॥ * ॥ अथ श्रीब्रह्मवैवर्त महापुराणं प्रारभ्यते ॥ * ॥

प्र.स. अ.४४[illegible]१३४-३५.३६
म [illegible]

ब्रह्मखंड १.


कृष्ण
राधा
विष्णु
लक्ष्मी
ब्रह्मा
सावित्री.
तुलसी
वृंदावन.
स्वाहा
अग्नि
दक्षिणा
स्वधा
वै.
क.
राजा
देवी

प्रस्तावना ।

यत्किल भक्तभव्याभिलाषुकेण तत्रभवता नारायणेन दयार्द्रचेतसा संसारार्णवनिमग्नानां कामक्रोधाद्यतिक्रूरमकरादिभिर्भूयोभूयो भक्ष्यमाणाज्ञानां मोहादिबृहत्तरतरंगेतस्ततःपरिचालनपरिक्लिश्यमानमानवानामुद्धारकृते चत्वारो वेदाः प्रागेव प्रादुर्भावयामासिरे । तदनु च व्यासादिमहर्षिरूपिणा षट्शास्त्राणि तथयितानीति तत्तदुदारचरितैर्न के मनीषिणः संजानतेतराम् । अथ चाल्पीयःप्रयासैर्भवाब्ध्युत्तितीर्षूपकृतये भगवदवतारादिसच्चरितसद्धर्मप्रपूरितानि मित्रवदुपदेशप्रचुरसत्कथागुम्फितानि "सृष्टिश्चैव विसृष्टिश्च स्थितिस्तेषां च पालनम् । कर्मणां वासना वार्त्ता मनूनां च क्रमेण च ॥ वर्णनं प्रलयानां च मोक्षस्य च निरूपणम् । उत्कीर्त्तनं हरेरेव देवानाञ्च पृथक्पृथक् ॥ दशाधिकं लक्षणं च महताम्परिकीर्त्तितम्" इति स्वलक्षणलाक्षितान्यष्टादश महापुराणानि महर्षिव्यासरूपेण श्रीभगवतैव प्रणिन्यिरे । तानि च "निस्ताराय तु लोकानां स्वयं नारायणः प्रभुः । व्यासरूपेण कृतवान्पुराणानि महीतले ॥ पठनाच्छ्रवणाद्येषां नृणां पापक्षयो भवेत् । धर्म्माऽधर्म्मपरिज्ञानं सदाचारप्रवर्त्तनम् ॥ गतिश्च परमा तद्वद्भक्तिर्भगवति प्रभौ" इति पाद्मोक्त्या भगवत्स्वरूपव्यासमहर्षिप्रणीतानि पठनश्रवणादिभिर्धर्म्माऽधर्मपरिज्ञानेन सदाचारप्रवृत्त्या च मोक्षसाधकानि, "इतिहासपुराणानि पञ्चमो वेद उच्यते" इति महदुक्त्या साक्षाद्वेदस्वरूपाण्येवेति भूरिगुणत्वेन वर्णयितुमशक्यत्वात्प्रकृतमेवाभिधीयते किंचित् । तत्राऽष्टादशमहापुराणेषु ब्रह्मवैवर्त्ताख्यमिदं महापुराणं ब्रह्मखण्ड–प्रकृतिखण्ड–गणपतिखण्ड–श्रीकृष्णजन्मखण्डाऽऽत्मकमखण्डभूमण्डलप्रसिद्धमेव । अत्र चाशरणशरणराधारमणश्रीकृष्णतः सर्वेषां भुवनानां सृष्टिस्थितिलयानां सर्गप्रतिसर्गमन्वन्तरवंशानुचरितानां ब्रह्म-प्रकृति-गणपति-शङ्करादिदेवानामुत्पत्त्याधिकारचरितानां च नारायणनारदसंवादद्वारा विस्तराद्वर्णनम् । अन्तिमे श्रीकृष्णजन्मखण्डे च श्रीमत्परब्रह्मश्रीकृष्णचरितानामतिविस्तरतया भक्तमानससम्मदाधायकवर्णनम् । एतद्ब्रह्मवैवर्तमहापुराणपुस्तकं लवपुर (लाहोर) राजधानीनिवासिश्रीठाकुर-महान्चन्द्रतः समुपलभ्य प्रतिपुस्तकैः शास्त्रिभिः संशोध्य पाठान्तरैस्संयोज्य मया मुम्बय्यां स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणयन्त्रालये सीसकोत्तमाक्षरैः पुष्टमसृणपत्रेषु संमुद्र्य प्रकाश्यते । तदेतद्ग्रहणवाचनश्रवणश्रावणादिभिः कृतार्थयन्तु मामनुग्राहका ग्राहका इति भृशमभ्यर्थयते–

खेमराज–श्रीकृष्णदासः–"श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणयन्त्रालयाध्यक्षो–मुम्बई–स्थः ।

॥ श्रीः ॥

अथ श्रीब्रह्मवैवर्तमहापुराणविषयानुक्रमणिका ।

अध्यायसंख्या विषयाः पत्रसंख्या

अथ ब्रह्मखण्डम् ॥ १ ॥

१ ग्रन्थादौ मङ्गलाचरणम्, नैमिषारण्ये शौनकादीन्प्रति सौतेरागमनम्, तत्र कुशलप्रश्नानन्तरं सौतिं प्रति शौनकमहर्षेः श्रीकृष्णभक्तीहापरसौख्यप्रदतन्महापुराणतत्त्वजिज्ञासया प्रश्नः । सौतिना शौनकं प्रति ब्रह्मवैवर्तमहापुराणप्रशंसातत्पुराणस्थचतुष्खण्डगतमुख्यविषयवर्णनम् ॥ अध्यायेऽत्र संहत्य श्लोकसंख्याः ॥ ६४ ॥ ... १

२ सौतिना गुरुवन्दनपूर्वकं सर्वोपरिस्थगोलोकवर्णनम्--ततःशतकोटियोजनाधःप्रदेशे वैकुण्ठलोकः । तदधः शिवलोकः । प्रलये वैकुण्ठशिवलोकयोः गोलोके लयः ॥ गोलोकस्य तूत्पत्तिलयाभावः ॥ गोलोकस्थतेजोमण्डलस्यैव सर्वजगत्कारणश्रीकृष्णरूपत्ववर्णनम् ॥ २७ ॥ श्लो० ... ... २

३ श्रीकृष्णपरमात्मनः जगत्सिसृक्षायां स्वाङ्गदक्षिणपार्श्वतः स्रष्टॄणां त्रयोदशानां पञ्चतन्मात्राणां महाभूतादीनां नारायणस्यचोत्पत्तिः । नारायणकृतश्रीकृष्णस्तोत्रम् । श्रीकृष्णाङ्गवामपार्श्वाच्च छङ्करोत्पत्तिः । शंकरकृतश्रीकृष्णस्तोत्रम् । नाभिप्रदेशाद्ब्रह्मोत्पत्तिस्तत्कृतश्रीकृष्ण--स्तोत्रम, तद्वक्षसो धर्मोत्पत्तिः तत्कृतश्रीकृष्णस्तोत्रम्। सरस्वतीमहालक्ष्मीदुर्गोत्पत्तिः । तत्कृतश्रीकृष्णस्तोत्रवर्णनम् ॥ ८७ ॥ श्लो० ... ३

४ श्रीकृष्णनासाग्रतः सावित्र्युत्पत्तिः । तत्कृतकृष्णस्तुतिः । श्रीकृष्णमनसो मन्मथोत्पत्तिः तद्वामाङ्गाद्रत्युत्पत्तिः । रतिदर्शनेन ब्रह्मणो रेतःपतनम् । तस्माद्रेतसो वरुणोत्पत्तिः । अग्निस्वाहावरुणानीनां क्रमेणोत्पत्तिः । श्रीकृष्णरेतःस्खलनान्महाविष्णोरुत्पत्तिः । श्रीकृष्णकर्णमलान्मधुकैटभोत्पत्तिः । श्रीकृष्णकृतमधुकैटभवधवर्णनम् ॥ २९ ॥ श्लो० ... ... ५

अध्यायसंख्या विषयाः पत्रसंख्या

५ गोलोकगोगोपीनां नित्यानित्यत्वव्यवस्था ॥ शंभुनारायणयोः कल्पत्रयवर्णनम् । ब्रह्मणः कालनिर्णयः । मार्कण्डेयस्थितिकालनिर्णयः । श्रीकृष्णकृतगोगोपबलीवर्दोत्पत्तिः । प्रकृतेः सकाशाद्राधोत्पत्तिः । राधागण्डप्रदेशात्कोटिसंख्याकगोपीनामुत्पत्तिवर्णनम् ॥ ७६ ॥ श्लो० ... ... ६

६ श्रीकृष्णेन नारायणादिभ्यो महालक्ष्म्यादीनां दानम् । महेश्वराय दुर्गायां समर्पयितव्यायां शंकरेण तत्स्वीकारप्रत्याख्यानम् । श्रीकृष्णेन शंकराय सर्वपूज्यत्वादिवरप्रदानपूर्वकं तन्माहात्म्यवर्णनम्-सिंहवाहिनीदेवीसमाश्वासनपूर्वकं मंत्रदानम् । ब्रह्मणे सृष्टिकरणायाज्ञाया दानम् ॥ ७२ ॥ श्लो० ... ... ८

७ ब्रह्मदेवकृतपृथिव्यादिविश्वसृष्टिवर्णनम् ॥ २० ॥ श्लो० ... ... १०

८ ब्रह्मणा सावित्र्यां वीर्याधानतो वेदशास्त्रादिसृष्टिवर्णनम्।ब्रह्मणः पृष्ठदेशादिभ्योऽधर्माद्युत्पत्तिः । स्वसुतेभ्यः सृष्टिकरणे आज्ञादानम् । ब्रह्मणो नारदाय शापदानम् । नारदेन च ब्रह्मणे शापदानम् ॥ ६८ ॥ श्लो० ... ... १०

९ ब्रह्माज्ञया नारदातिरिक्तसर्वमहर्षिकृतसृष्टिः । तत्र कश्यपादिसंबंधवर्णनम् । मंगलग्रहोत्पत्तिविषये इतिहासवर्णनम् । चंद्रपत्नीनां चरित्रे रोहिणीसंगतचंद्रंप्रति दक्षेण यक्ष्मरोगित्वापादकशापदानम् । चन्द्रस्य शिवाश्रयणम्।चंद्रपत्नीभिः स्वपतिलिप्सया पितृसमीपे पतिमाहात्म्यस्य वर्णनम्।दक्षेण शिवाच्चन्द्रस्य याचनम् । शिवेन तत्प्रत्याख्यानम् । कृष्णेन दक्षाय चंद्रस्य दानम् ॥ ९९ ॥ श्लो० ... १२

१० भृग्वादिभ्यश्च्यवनाद्युत्पत्तिः । कुबेरजन्मकथनम् । क्षत्रियादिजात्युत्पत्तिः । शिल्पकारोत्पत्तिः । शिल्पकाराणां पातितत्वादिदोषेण अयाज्यत्वे इतिहासवर्णनम् ।

अध्याय संख्या विषयाः पत्रसंख्या
घृताचीनामाप्सरोभिः सह विश्वकर्मणः समागमे उभयोः संवादः घृताच्या नीतिधर्मवर्णनम् । परस्परशापवर्णनम् । भूलोके विश्वकर्मणा ब्राह्मणजन्म । घृताच्या गोपिकायाः गंगातीरे रमणं ततः मलये रमणम् । ततो नवपुत्रोत्पत्तिः तेषां कार्यनिर्णयः । संकरजातिवर्णनम् । वैद्यजातिनिर्णयेऽश्विनीकुमारोत्पत्तिवर्णनम् । सर्वजातिषु योनिसंबंधवर्णनम् ॥ १७० ॥ श्लो० ... ... १४
११ सुतपोब्राह्मणस्याश्विनीकुमाराभ्यां शापः । सूर्यकृतब्राह्मणस्तुतिः। सुतपसाश्विनीकुमारयोर्नैरुज्यकरणम् । ब्राह्मणमाहात्म्यम् ॥ ४५॥ श्लोक० ... ... १८
१२ गंधर्वराजस्य पुत्रप्राप्तिनिमित्तं पुष्करक्षेत्र शंकरोद्देशेन तपश्चर्या । तत्तपस्तुष्टेन शंकरेण वरप्रदानम् । गंधर्वराजभार्यायां नारदजननम् ॥ ४५॥ श्लोक० ... १९
१३ नारदस्य पूर्वजन्मनि उपवर्हणेतिनामकथनम्। उपबर्हणस्य दुष्करतपश्चरणेन गंधर्वकन्यानां परिणयनम् । रंभादर्शनेन उपबर्हणस्य वीर्यस्खलने तस्मै शूद्रत्वप्रापक शापः । उपबर्हणस्य स्वदेहपरित्यागः । तन्निमित्तं मालावतीनामज्येष्ठपत्न्याः विलापः । शापोद्यतमालावतीभयाद्ब्रह्मादिसर्वदेवानां तत्रागमनम् ॥ ९१ ॥ श्लो० २१
१४ मालावतीसमीपे श्रीविष्णोरागमनम्॥स्वपतिमरणे कारणपृच्छायां ब्राह्मणेन सर्वदेवानां पृथक्पृथक् फलप्राप्तिवर्णनम् । विष्णुप्रशंसा ॥ ६६ ॥ श्लो० ... २३
१५ ब्राह्मणस्य स्वयं सर्वज्ञताप्रशस्तिः । मालावत्या प्रत्यक्षतोदर्शनं धर्मादीनाम्। धर्मादीन् प्रतिनिजकांतनिधनकारणपृच्छा । मालावतीकालपुरुषसंवादः॥५६॥श्लो०२४
१६ मालावत्याः व्याध्युत्पत्तेः हेतुज्ञानाय प्रश्नः । ब्राह्मणेन व्याधिकारणवर्णनम् । तत्र आयुर्वेदविद्याप्रवृत्तिजरानाशकोपचारकथनम् । वातपित्तश्लेष्महारकोपाय कथनम् ॥ ८८ ॥... ... ... २६
१७ ब्राह्मणरूपधारिविष्णोः ब्रह्मशिवादिभिः सह संवादे विष्णुप्रशंसा ॥७२॥श्लोक० २८
१८ ब्रह्मादीनां पुनः मालावतीसमीपं प्रत्यागमनम्।गंधर्वजीवनम्॥तदा मालावतीकृत महापुरुषस्तोत्रम् । कृष्णेन गन्धर्वजीवदानम् ॥ ४९ ॥ श्लो० — ... ३०
१९ विष्णुकवचम् । बाणेश्वरकवचम् ॥ ७९ ॥ श्लोक० ... ... ३१
२० उपबर्हणस्य ब्रह्मशापाद्वृषलीगर्भे जन्मवृत्तांतवर्णनम् ॥ ६७ ॥ श्लोक ... ३३
अध्यायसंख्या विषयाः पत्रसंख्या
२१ कलावतीवृत्तांतः वृषलीपुत्रस्य नारदेतिनामकरणम्। वीर्यप्रदनारदजन्मवृत्तांत वर्णनम् । श्रीकृष्णध्यानस्तोत्रकवचवर्णनम् । नारदस्य शापविमोचनम् ॥ ५७ ॥ श्लो० ... ... ३५
२० ब्रह्मणः कंठान्नारदोत्पत्तिप्रसंगेन प्राचेतसादिमुनीनां ब्रह्मांगविशेषादुत्पत्तिवर्णनम् ब्रह्मपुत्रनाम्नोर्व्युत्पत्तिवर्णनम् ॥ ३१ ॥ श्लो० ... ... ३६
२३ ब्रह्मणः नारदं प्रति पुनः सृष्टिकरणे आज्ञा । नारदेन दारपरिग्रहनिंदाप्रसंगेन स्त्रीस्वभाववर्णनम् ॥ ४५ ॥ श्लो० ... ... ३७
२४ ब्रह्मणो नारदंप्रति गार्हस्थ्यधर्मस्य वैदिकत्ववर्णनम्॥नारदस्य श्रीकृष्णमंत्रग्रहणाय ब्रह्मणि प्रार्थना । ब्रह्माज्ञया तदर्थं नारदस्य शिवलोकं प्रति गमनम् ॥४७॥... ३८
२५ तत्र नारदस्य शिवदर्शनम् ॥ १८ ॥ श्लो० ... ... ३९
२६ ब्राह्मणवैष्णवविधवानामाह्निकम् ॥ १०३ ॥ श्लो० ... ... ४०
२७ भक्ष्याभक्ष्यकर्तव्याकर्तव्यकथनम् ॥ ४६ ॥ श्लो०... ... ... ४२
२८ ब्रह्मस्वरूपवर्णनं शिवाज्ञया नारदस्य बदरिकाश्रमं प्रति गमनम् ॥७३॥ श्लो० ४३
२९ श्रीकृष्णमाहात्म्यवर्णनम् । प्रकृतिमाहात्म्यवर्णनम् ॥१६ ॥ श्लो० ... ४५
३० भगवत्स्तुतिः ॥ २१ ॥ श्लो० ... ... ४६

इति ब्रह्मखण्डम् ॥ १ ॥

अथ प्रकृतिखण्डम् ॥ २ ॥

१ प्रकृतिचरितम् ॥ १६४ ॥ श्लो० ... ... ४८
२ देवस्य देव्याश्चोत्पत्तिः ॥ ९०॥ श्लो० ... ... ५२
३ लोकाः । तत्स्थानानि । महाविराडुत्पत्तिः । तस्य जगत्स्रष्टृत्वम् ॥६२॥ श्लो० ५४
४ प्रकृतयः । सरस्वत्याः मंत्रः पूजा कवचं च ॥ ९१ ॥ श्लो० ... ... ५५
५ याज्ञवल्क्योक्तवाग्देवीस्तोत्रम् ॥ ३५ ॥ श्लो० ५७
६ सरस्वत्या गङ्गालक्ष्म्योः कलहः—परस्परं शापाश्च ॥ १२३ ॥ श्लो० ५८
७ शापात् सरस्वत्यानदीत्वम्-लक्ष्म्यास्तुलसीत्वम् । कलौ धर्मभ्रष्टे कल्क्यवतारः।

Digitization by eGangotri. Funding MHRD Delhi

अध्यायसंख्या विषयाः पत्रसंख्या
कृतयुगारम्भे सर्वेषां स्वस्वधर्मे प्रवृत्तिः । कालपरिमाणम् । जगदधिष्ठातारो देवाः ॥ ११७ ॥ श्लो० ... ... ६१
८ वसुधोत्पत्तिः । पृथिवीपूजामंत्रस्तोत्राणि ॥ ६१ ॥ श्लो० ... ... ६४
९ भूमिदाने फलम् । तद्धरणे पापम् । परकीयतडागात्पङ्कोत्तारे फलम् । भूस्वामिने पिण्डमदत्त्वा श्राद्धकरणे पापम्। भूमौ शंखादिस्थापने पापम्। भूमिनाम्नो व्युत्पत्तिवर्णनम् ॥ ३३ ॥ ६६
१० गङ्गोपाख्यानम् । तस्याः पूजादि । राधोत्साहः ॥ १७८ ॥ श्लो० ... ६७
११ गंगारूपमोहितकृष्णस्य राधोपालंभः ॥ १४२ ॥ श्लो० ... ... ७१
१२ गंगांप्रतिशापदानाद्राधाया निवारणम्।गंगायाःविष्णुनासाकं गांधर्वविवाहः२२श्लो०७४
१३ वृषध्वजहंसध्वज योर्धर्मध्वजकुशध्वजावतारत्वकथनम् ॥ ५७ ॥ श्लो० ७५
१४ कुशध्वजस्य कन्यायावेदवत्याः तपश्चरन्त्याःस्पर्शे रावणाय शापः । तस्याःजानकीरूपेणावतारः--तच्छायायाः द्रौपद्यवतारश्च ॥ ६५ ॥ श्लो० ... ... ७६
१५ धर्मध्वजपत्न्यां तुलस्याअवतारः।तस्याः विष्णुनासंगे ब्रह्मणो वरप्राप्तिः।तत्संगे राधिकाशापः । राधामंत्रेण ततोमोक्षश्च ॥ ५१ ॥ श्लो० ... ... ७८
१६ तुलस्याः शंखचूडेनसह विवाहः।शंखचूडाद्देवानांपराजयः।तत्कथनायागतं ब्रह्माणं प्रतिराधाशापकथाकथनम् । तद्वधोपक्रमः ॥ २०८ ॥ श्लो० ... ... ७९
१७ शंखचूडंप्रतिदूतत्वेनपुष्पदंतस्यप्रेषणम् । शंखचूडतुलस्योः संवादः॥९०॥श्लो० ८४
१८ शंखचूडस्ययुद्धार्थंशिवंप्रत्यागमनम् । तयोः संवादः ॥ ८४ ॥ श्लो० ... ८६
१९ शंखचूडस्यदेवैः साकंयुद्धम् ॥ ७५ ॥ श्लो० ... ... ८८
२० शिवेनसाकंयुद्धेविष्णुनातत्कवचहरणम् । ततस्तद्वधः ॥ ३३ ॥ श्लो० ९०
२१ तुलस्याः नारायणेनसंयोगः । तस्या वृक्षत्वेनोत्पत्तिः ।तन्माहात्म्यंच॥१०५॥श्लो०९१
२२ तस्याध्यानंस्तवनंपूजाविधिश्च ॥ ४४ ॥ श्लो० ... ... ९३
२३ सावित्र्युपाख्याने अश्वपतिराजानंप्रतिपराशरोक्तंसावित्रीव्रतम् ॥ ८७ ॥ श्लो० ९५

अध्यायसंख्या विषयाः पत्रसंख्या
२४ सावित्र्यवतारः । तस्याः सत्यवतासाकंविवाहः । अपमृत्युना मारितेस्वपतौ सावित्रीसंवादः ॥ ७७ ॥ श्लो० ... ... ९७
२५ यमसावित्रीसंवादः ॥ ३४ ॥ श्लो० ... ... ९८
२६ यमसावित्रीसंवादे कर्मविपाकविवरणम् ॥ ७२ ॥ श्लो० ... ... ”
२७ पुण्यकर्मफलानि ॥ १४५ ॥ श्लो० ... ... १००
२८ सावित्रीकृतयमस्तोत्रम् ॥ १८॥ श्लो० ... ... १०४
२९ नरकाणां संख्याः ॥ २७ ॥ श्लो०... ... ... ”
३० पापिनां यातनादिनिरूपणम् ॥ २२८ ॥ श्लो० ... ... १०५
३१ नरकाणांपुनर्वर्णनम् ॥ ६१॥ श्लो० ... ... ११०
३२ स्वर्गप्रापककर्माणि ॥ ३३ ॥ श्लो० ... ... ११२
३३ नरकाणां लक्षणानि ॥१२१ ॥ श्लो० ... ... ११३
३४ सावित्र्यैवरदानम् । श्रीकृष्णस्यवर्णनम् । तत्पतिंजीवयित्वा तस्याअखण्डसौभाग्यादिवरदानम् ॥ ९९ ॥ श्लो० ... ... ११६
३५ लक्ष्म्या उत्पत्तिः तस्या नानारूपाणि । तस्याःसामर्थ्यम् ॥ ३४ ॥ श्लो० ... ११८
३६ दुर्वाससः शापादिन्द्रस्यभ्रष्टश्रीत्वम् । तस्मैज्ञानोपदेशः ॥ १८० ॥ श्लो० ... ११९
३७ इन्द्रस्यगुरुणा संवादः ॥ ४१ ॥ श्लो०... ... ... १२३
३८ इंद्रस्य ब्रह्माणंप्रतिगमनम् । ब्रह्मणासहतस्यवैकुण्ठगमनम् । लक्ष्म्यावासस्ययोग्यस्थानानि ॥ ६३ ॥ श्लो० ... ... १२४
३९ लक्ष्म्याः ध्यानंस्तोत्रंपूजाच ॥ ८७ ॥ श्लो० ... ... १२६
४० स्वाहोपाख्यानम् ॥ ५५ ॥ श्लो० ... ... १२८
४१ स्वधोपाख्यानम् ॥ ४८ ॥ श्लो० ... ... १२९
४२ दक्षिणोपाख्यानम् ॥ ९९ ॥ श्लो० ... ... १३१
४३ षष्ठीदेव्युपाख्यानम् ॥ ७१ ॥ श्लो० ... ... १३३
४४ मंगलचंड्या उपाख्यानम् ॥४१॥ श्लो० ... ... १३५

अध्यायसंख्या विषयाः पत्रसंख्या
४५ मनसादेव्युपाख्यानम् ॥ २१ ॥ श्लो० ... ... १३६
४६ मनसादेवीस्तोत्रादि ॥ १४७ ॥ श्लो० ... ...
४७ सुरभिकथा ॥ ३३ ॥ श्लो० ... ... १४०
४८ नारायणीकथा ॥ राधोपाख्यानम् ॥ ५५ ॥ श्लो०... ... ... १४१
४९ राधासुदाम्नोः परस्परं शापकथनम् ॥ ७१ ॥श्लो०... ... ... १४२
५० सुयज्ञकथा । सुयज्ञाययज्ञेऽस्यअनादृतविप्रशापः ॥ ४३ ॥ श्लो० ... १४४
५१ ऋषिभिः पापकर्मणांतत्फलानांचकथनम् ॥ ७५ ॥ श्लो० ... १४५
५२ कृतघ्नताप्रकारः । तदादिकृतं पापम्-दंडश्च ॥ ५२ ॥ श्लो० ... १४७
५३ सुयज्ञसुतपस्संवादेतत्कथितं विष्णुस्वरूपम् ॥ ४७ ॥ श्लो० ... १४८
५४ गोलोकवर्णनम् । विश्ववर्णनम्।कालमानम् चतुर्दश मनवः। सप्तचिरंजीविनः । प्रलयवर्णनम् तदालोकस्थितिः । विप्रपादोदकमाहात्म्यवर्णनम् । सुतपसा सुयज्ञाय राधामंत्राद्युपदेशः । सुयज्ञस्य गोलोकदर्शनम्।गोलोकदर्शनेअधिकारिणः । तत्रविष्णुस्वरूपम् ॥ १८० ॥। श्लो० ... ... १४९
५५ राधापूजापद्धतिः ॥ १०१ ॥ श्लो० ... ... १५४
५६ राधाकवचम् ॥ ६८ ॥श्लो० ... ... १५६
५७ दुर्गोपाख्यानम् ॥ ४५ ॥ श्लो० ... ... १५८
५८ सुरथस्यराज्ञो वंशवर्णनन् । गुरुपत्न्यां तारायां चंद्राद्बुधोत्पत्तिः। चंद्रस्यकलंकप्राप्तिः । चंद्राय शुक्रशापः । परस्त्रीगमने दोषः । स्त्रीपुरुषाणांच कर्मविशेषान्नरकविशेषाः ॥ १०७ ॥ श्लो० ... ... १५९
५९ तारान्वेषणाय बृहस्पतिना स्वशिष्यप्रेषणम् । बृहस्पतेः शोकः । इंद्रबृहस्पत्योः संवादः ॥ ८५ ॥ श्लो० — १६२
६० बृहस्पतेः कैलासगमनम्-शिवबृहस्पत्योः आज्ञप्तिविज्ञप्तौ-देवानां नर्मदातीरआगमनम् ॥ १०४ ॥ श्लो १६४
६१ ब्रह्मणःतारान्वेषणाय शुक्रगृहे गमनम् । गुरोःताराप्राप्तिः बुधाच्चित्रायां चैत्रोत्पत्तिः । तस्य पुत्रोऽजरथः ॥ १०८ ॥ श्लो० ⋮ १६७
६२ नंदिराजेन पराजितस्य सुरथस्यारण्ये मेधोमहर्ष्याश्रमगमनम् । तस्य समाधिवैश्येन सह संगमः तयोर्मेधस अश्रमे गमनम्। तयोस्तेनमहर्षिणासहोक्तिप्रत्युक्ती । तयोर्महर्षिकृतमन्त्रोपदेशश्च ॥ ४२ ॥ श्लो० ... ... १६९
६३ समाधिकृता .देव्याःस्तुतिः ॥ तत्तपश्चर्या । तत्फलं कृष्णदास्यम् ॥४४॥श्लो० १७१
६४ राजकृतादेवीपूजापद्धतिः ॥१०६॥श्लो० ... ... १७२
६५ सुरथराजस्य ज्ञानप्राप्तिः ॥४३॥ श्लो० ... ... १७४
६६ दुर्गायाः स्तोत्रम् ॥ ३३ ॥श्लो० ... ... १७५
६७ दुर्गायाः कवचम् ॥२६ ॥ श्लो० ... ... १७६

इति प्रकृतिखण्डम् ॥ २ ॥

अथ गणपतिखण्डम् ॥ ३ ॥

१ पार्वत्युत्पत्तिः । शिवेन समागमः । पार्वतीसंगतस्य शिवस्य देवैः कृतो गर्भविघ्नः । तदाभूपतितवीर्येण स्कंदोत्पतिप्रक्रिया ॥४३ ॥ श्लो० ... ... १७९
२ तद्विघातकेभ्यः देवेभ्यः पार्वत्याः शापः शिवकृतं तत्सांत्वनम् । तस्य पुत्राभावाद्दुःखम् ॥ ३१ ॥श्लो० १८०
३ पुत्रप्राप्तये तस्य श्रीकृष्णव्रतोपदेशः । तत्फलंच ॥ ३७ ॥ श्लो०
४ व्रतोपकरणानि । व्रतविधानं च ॥ ८२ ॥ श्लो० ’’
५ व्रतमाहात्म्यकथा शिवस्य तपसे गमनम् ॥२९॥ श्लो० १८१
६ विष्णुना शिवाय वरदानम् । श्रीकृष्णव्रतकरणे आज्ञाग्रहणं च ॥१०६॥ श्लो० १८३
७ तत्र हरेराज्ञा पार्वतीकृतव्रतविधानम् व्रतांते पुरोहितयाचितदक्षिणाश्रवणमूर्च्छितायाः पार्वत्या देवानां समाधानोक्तौ उत्तरम् । विष्णुना धर्मप्राधान्यवर्णनम् । पार्वत्यै नारायणकृत उपदेशः पार्वतीकृतनारायणस्तोत्रम् ॥१३१ ॥ श्लो० १८४ १८७
८ पार्वत्या वरप्राप्तिः।पुनः पार्वत्या संगते शिवे गर्भविघ्नाय वृद्धविप्रवेषेण विष्णोरागमनम् । तदा भूपतितवीर्येण गणेशोत्पत्तिः ॥ ८९ ॥ श्लो० १९०
९ तिरोहितेविप्रेअन्वेषयन्त्यां पार्वत्यां गृहाभ्यन्तरे गणेशजन्मनिबन्धनाकाशवाणीप्रवृ-

अध्यायसंख्या विषयाः पत्रसंख्या
त्तिः। पार्वत्यास्तत्र गणेशदर्शनम् ॥ ३८ ॥ श्लो०... ... ... १९१
१० पुत्रोत्पत्तौ कृतानि दानानि देवानामाशीर्वचनम् ॥ ४० ॥ श्लो० १९३
११ शनैर्गणेशदर्शनायागतस्य शनैश्चरस्य अधोमुखत्वं पार्वत्याउक्तिप्रत्युक्ती॥३४॥श्लो० १९४
१२ शनिनादृष्टमात्रस्यगणेशस्यमस्तकपातेतत्र देवैः गजमस्तकस्यसंयोजनम् ५९श्लो० १९५
१३ विष्णुकृतगणेशस्तोत्रम्। गणेशपूजा ॥ ९४ ॥ श्लो० १९७
१४ सभायां कार्त्तिकेयोत्पत्तिवार्ता ॥ ३९ ॥ श्लो० १९९
१५ कार्त्तिकेयानयनाय शिवदूतानां कृत्तिकागृहेगमनम्। तत्र नंदिकार्त्तिकेयसंवादश्च ॥ ४३ ॥ श्लो० २००
१६ कृत्तिकाभिः सार्धं स्कन्दस्य तत्र देवसभायामागमनम् ॥ ५४ ॥ श्लो० २०१
१७ तस्यसेनानीत्वेऽभिषेकः ॥ २३ ॥ श्लो० २०३
१८ गणपतिशिरश्छेदे हेतुः शिवाय कश्यपशापः ॥ २३ ॥ श्लो० ”
१९ सूर्यस्य पूजनं स्तोत्रं च ॥ ४८ ॥ श्लो० २०४
२० गणपतौ गजमुखयोजने हेतुः ॥(तत्र इंद्रस्य भ्रष्टश्रीकत्वम्)॥ ६२ ॥ श्लो० २०५
२१ पुनरिंद्रस्य लक्ष्मीप्राप्तिः ॥ २० ॥ श्लो० २०७
२२ लक्ष्म्याः स्तोत्रं कवचं च ॥ ३९॥ श्लो० ॥ ”
२३ लक्ष्म्योक्तं स्वनिवासयोग्यस्थानवर्णनम् ॥ ४३ ॥ श्लो० २०८
२४ गणेशस्य एकदंतत्वे हेतुःजमदग्निकार्तवीर्ययोःकपिलागोग्रहेयुद्धारम्भः॥६६॥श्लो० २०९
२५ जमदग्निकार्तवीर्ययोर्युद्धवर्णनम् ॥ २२ ॥ श्लो० ॥ २११
२६ जमदग्निकार्तवीर्यार्जुनयोः ब्रह्मणा स्वयमागत्य युद्धनिवारणम् ॥ २६ ॥ श्लो० ”
२७ तयोः पुनर्युद्धम्। तत्र मृते जमदग्नौरेणुकाशोकः। तदा परशुरामागमनम्।कार्तवीर्याय शापदानम्। तद्वधे तत्कृतप्रतिज्ञा ॥ ६७ ॥ श्लो० २१२
२८ तस्योत्तरक्रिया भृगूपदिष्टरीत्या तस्योद्धारश्च ॥ ८२ ॥ श्लो० ॥ २१४
२९ तदर्थं परशुरामस्य तपश्चर्या ॥ ५१ ॥ श्लो० ॥ २१६
३० शिवपार्वतीभ्यांपरशुरामस्यवरयाचना। शंकरेणश्रीकृष्णकवचादिदानम्३२ ॥श्लो० २१७
अध्यायसंख्या विषयाः पत्रसंख्या
३१ शिवकथितं श्रीकृष्णकवचम् ॥ ५७॥ श्लो० ॥ २१८
३२ शिवकथितं कृष्णस्तोत्र मंत्रः पूजाविधानंच ॥ ६२ ॥ श्लो० २१९
३३ पुनः परशुरामस्य पुष्करतीर्थे तपश्चर्या। तस्यस्वप्नदर्शनम् ॥ ६२ ॥ श्लो० २२१
३४ रामस्यकार्तवीर्यप्रति दूतप्रेषणम्।तयोः संवादः।कार्तवीर्यस्याशुभदर्शनम् ८१ श्लो० २२२
३५ कार्तवीर्यपत्न्याः मनोरमायाः देहत्यागः। राज्ञः अनुतापः। आकाशवाण्या राज्ञो बोधः भार्गवेण राज्ञो युद्धारंभः ॥ १३९ ॥ श्लो० २२५
३६ कार्तवीर्यप्रेरितानां राज्ञां नाशः सुचंद्रेण राज्ञा सहरामस्य युद्धम् ॥४५॥ श्लो० २२८
३७ कालीकवचम् ॥ २४ ॥ श्लो० २२९
३८ सुचन्द्रवधेऽपरैरिन्द्रादिभिर्युद्धम्।रामेण पाशुपतास्त्रग्रहे लक्ष्मीकवचप्राप्तिः८२श्लो० २३०
३९ दुर्गाकवचम्। कार्तवीर्यस्य स्वतो युद्धायगमनम् ॥ २३ ॥ श्लो०... ... २३२
४० तयोस्तुमुलसंग्रामवर्णनम्। पाशुपतास्त्रेण कार्तवीर्यवधः। परशुरामेणैकविंशतिकृत्वः क्षत्रियाणां वधः ॥१०४॥ श्लो० ... ... ”
४१ महीं निःक्षत्रियां कृत्वा रामस्य कैलासगमनम् ॥ ३५ ॥श्लो० ... ... २३५
४२ रहःस्थितयोश्शिवयोः समीगमने परशुरामस्य गणपतिं प्रति प्रार्थना तदातयोः परस्परं विवादः ॥६९॥ श्लो० ... ... २३६
४३ पशुरामस्यांतःपुरगमने पुनर्गणपतिकृतमहानिरोधः ॥४२॥ श्लो० ... २३८
४४ तदा तयोर्युद्धे गणेशदंतस्य तत्र भंगः।ततस्तत्रगतायां पर्वत्यां रामं हंतुमुद्यतायां रामकृतं विष्णुस्तोत्रम् ॥९८॥ श्लो० ... ... २३९
४५ विष्णुना गौरीप्रीतये रामाय गणेशस्तवाद्युपदेशः। दुर्गास्तोत्रम्॥७६॥ श्लो० २४१
४६ स्वसङ्गमायागततुलसीनिवारणं गणेशकृतम्। गणेशतुलसीसंवादः। अस्यगणेशखंडस्य पठनादेः फलश्रुतिः॥५०॥ श्लो०... ... ... २४२

॥ इति गणेशखंडम् ॥

श्रीकृष्णजन्मखण्डविषयानुक्रमणिका तत्रैव द्रष्टव्या।

श्रीगणेशाय नमः ॥ ॥ अथ ब्रह्मवैवर्तें ब्रह्मखण्डम् ॥ गणेशब्रह्मेशसुरेशशेषाः[1] सुराश्च सर्वे मनवो मुनीन्द्राः ॥ सरस्वतीश्रीगिरिजादिकाश्च यं नमन्ति देव्यैः[2] प्रणमामि तं विभुम् ॥ १ ॥स्थूलास्तनूर्विदधतं त्रिगुणं विराजं विश्वानि लोमविवरेषु महान्तमाद्यम्॥ सृष्ट्युन्मुखः स्वकलयाऽपि ससर्ज सूक्ष्मं नित्यं समेत्य हृदि यस्तमजं भजामि॥२॥ध्यायन्ते ध्याननिष्ठाः सुरनरमनवो योगिनो योगरूढाः सन्तः स्वप्नेऽपि सन्तं कतिकतिजनिभिर्यं न पश्यन्ति तत्त्वा ॥ध्याये स्वेच्छामयं तं त्रिगुणपरमहो निर्विकारं निरीहं भक्त्या ध्यानैकहेतोर्निरुपमरुचिरश्यामरूपं दधानम् ॥ ३ ॥ वन्दे कृष्णं गुणातीतं परं ब्रह्माच्युतं यतः ॥ आविर्बभूवुः प्रकृतिब्रह्मविष्णुशिवादयः ॥४॥ ॐ नमो भगवते वासुदेवाय ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १ ॥ अमृतपरमपूर्वं भारतीकामधेनुं श्रुतिगणकृतवत्सो व्यासदेवो दुदोह ॥ अतिरुचिरपुराणं ब्रह्मवैवर्त्तमेतत्पिबत पिबत मुग्धा दुग्धमक्षय्यमिष्टम्॥२॥भारते नैमिषारण्ये ऋषयः शौनकादयः ॥ नित्यां नैमित्तिकीं कृत्वा क्रियामूषुः कुशासने ॥ १ ॥ एतस्मिन्नन्तरे सौतिमागच्छन्तं यदृच्छया ॥ प्रणतं सुविनीतं तं विलोक्य ददुरासनम् ॥ २॥ तं सम्पूज्यातिथिं भक्त्या शौनको मुनिपुङ्गवः॥पप्रच्छ कुशलं शांतं शान्तः पौराणिकं मुदा ॥ ३ ॥ वर्त्मायासविनिर्मुक्तं वसन्तं सुस्थिरासने ॥ सस्मितं सर्वतत्त्वज्ञं पुराणानां पुराणवित् ॥ ४ ॥ परं कृष्णकथोपेतं पुराणं श्रुतिसंमतम् ॥ मङ्गलं मङ्गलार्हं च मङ्गल्यं मङ्गलालयम् ॥ ५ ॥ सर्वमङ्गलबीजं च सर्वदा मङ्गलप्रदम् ॥ सर्वामङ्गलनिघ्नं च सर्वसंपत्करं परम् ॥ ६ ॥ हरिभक्तिप्रदं शश्वत्सुखदं मोक्षदं भवात् ॥ तत्त्वज्ञानप्रदं दारपुत्रपौत्रविवर्द्धनम् ॥ ७ ॥ पप्रच्छ सुविनीतं च सुप्रीतो मुनिसंसदि ॥ यथाऽऽकाशे तारकाणां द्विजराजो विराजते ॥ ८ ॥ ॥ शौनक उवाच ॥ ॥ प्रस्थानं भवतः कुत्र कुत आयासि ते शिवम् ॥ किमस्माकं पुण्यदिनमद्य त्वद्दर्शनेन च ॥ ९ ॥ वयमेव कलौ भीता विशिष्टज्ञानवर्जिताः ॥ मुमुक्षवो भवे मग्नास्तद्धेतुस्त्वमिहागतः[3] ॥ १० ॥ भवान्साधुर्महाभागः पुराणेषु पुराणवित् ॥ सर्वेषु च पुराणेषु निष्णातोऽति

---

[1] गणेशब्रह्मेशशङ्करासुरेश इति पाठान्तरम् । [2] देवं वा देवांश्चेति पाठद्वयम् । [3] तद्धेदंस्त्वमिहागतः ।

कृपानिधिः ॥ ११ ॥ श्रीकृष्णे निश्चला भक्तिर्यतो भवति शाश्वती ॥ तत्कथ्यतां महाभाग पुराणं ज्ञानवर्द्धनम् ॥ १२ ॥
गरीयसी या साक्षाच्च कर्ममूलनिकृन्तनी ॥ संसारसन्निबद्धानां निगडच्छेदकर्तरी ॥ १३ ॥ भवदावाग्निदग्धानां पीयूष
वृष्टिवर्षिणी ॥ सुखदाऽऽनन्ददा सौते शश्वच्चेतसि जीविनाम् ॥ १४ ॥ यत्रादौ सर्वबीजं च परं ब्रह्मनिरूपणम् ॥ तस्य
सृष्टयुन्मुखस्यापि सृष्टेरुत्कीर्त्तनं परम् १५ ॥ साकारं वा निराकारं परमात्मस्वरूपकम् ॥ किमाकारञ्च तद्ब्रह्म तद्ध्यानं किञ्च
भावनम् ॥ १६ ॥ ध्यायन्ते वैष्णवाः किंवा शान्ताश्च योगिनस्तथा ॥ मतं प्रधानं केषां वा गूढं वेदे निरूपितम् ॥ १७ ॥ प्रकृतेश्च
य आकारो यत्र वत्सनिरूपितः ॥ गुणानां लक्षणं यत्र महदादेश्च निश्चयः ॥ १८ ॥ गोलोकवर्णनं यत्र यत्र वैकुण्ठवर्णनम् ॥ वर्णनं
शिवलोकस्य यत्रान्यत् स्वर्गवर्णनम् ॥ १९ ॥ अंशानां च कलानां च यत्र सौते निरूपणम् ॥ के प्राकृताः का प्रकृतिः क आत्मा
प्रकृतेः परः ॥ २० ॥ निगूढं जन्म येषां वा देवानां देवयोषिताम् ॥ समुत्पत्तिः समुद्राणां शैलानां सरितामपि ॥ २१ ॥ के वांऽशाः
प्रकृतेश्चापि कलाः का वा कलाकलाः ॥ तासाञ्च चरितं ध्यानं पूजास्तोत्रादिकं शुभम् ॥ २२ ॥ दुर्गासरस्वतीलक्ष्मीसावित्रीणाञ्च
वर्णनम् ॥ यत्रैव राधिकाख्यानमत्यपूर्वं सुधोपमम् ॥ २३ ॥ जीवकर्मविपाकश्च नरकाणाञ्च वर्णनम् ॥ कर्मणां खण्डनं यत्र यत्र तेभ्यो
विमोक्षणम् ॥ २४ ॥ येषाञ्च जीविनां यद्यत्स्थानं यत्र शुभाशुभम् ॥ जीविनां कर्मणो यस्माद्यासु यासु च योनिषु ॥ २५ ॥ जीविनां
कर्मणो यस्माद्योयो रोगो भवेदिह ॥ मोक्षणं कर्मणो यस्मात्तेषाञ्च तन्निरूपय ॥ २६ ॥ मनसा तुलसी काली गङ्गा पृथ्वी
वसुन्धरा ॥ आसां यत्र शुभाख्यानमन्यासामपि यत्र वै ॥ २७ ॥ शालिग्रामशिलानाञ्च दानानाञ्च निरूपणम् ॥ अपूर्वं यत्र वा
सौते धर्माधर्मनिरूपणम् ॥ २८ ॥ गणेश्वरस्य चरितं यत्र तज्जन्म कर्म च ॥ कवचस्तोत्रमन्त्राणां गूढानां यत्र वर्णनम् ॥ २९ ॥
यदपूर्वमुपाख्यानमश्रुतं परमाद्भुतम् ॥ कृत्वा मनसि तत्सर्वं साम्प्रतं वक्तुमर्हसि ॥ ३० ॥ यत्र जन्म भ्रमो विश्वे पुण्यक्षेत्रे च

पा०—१ प्रकृतेश्च निराकारं यत्र वासो निरूपितः । २ यत्र जीवनं च । ३ अन्यथा ।

भारते ॥ परिपूर्णतमस्यापि कृष्णस्य परमात्मनः ॥ ३१ ॥ जन्म कस्य गृहे लब्धं पुण्ये पुण्यवतो मुने ॥ सुतं प्रसूता का
धन्या मान्या पुण्यवती सती ॥ ३२ ॥ आविर्भूय च तद्गेहात्कागतः केन हेतुना ॥ गत्वा किं कृतवांस्तत्र कथं वा
पुनरागतः ॥ ३३ ॥ भारावतरणं केन प्रार्थितो गोश्चकार सः ॥ विधाय किंवा सेतुं च गोलोकं गतवान्पुनः ॥ ३४ ॥
इतीदमन्यदाख्यानं पुराणं श्रुतिदुर्लभम् ॥ दुर्विज्ञेयं मुनीनां च मनोनिर्मलकारणम् ॥ ३५ ॥ स्वज्ञानाद्यन्मया पृष्टम पृष्टं वा
शुभाशुभम् ॥ सद्यो वैराग्यजननं तन्मे व्याख्यातुमर्हसि ॥ ३६ ॥ शिष्यपृष्टमपृष्टं वा व्याख्यानं कुरुते च यः ॥ स सद्गुरुः सतां श्रेष्ठो
योग्यायोग्ये च यः समः ॥ ३७ ॥ सौतिरुवाच ॥ सर्वं कुशलमस्माकं त्वत्पादपद्मदर्शनात् ॥ सिद्धक्षेत्रादागतोऽहं यामि नाराय
णाश्रमम् ॥ ३८ ॥ दृष्ट्वा विप्रसमूहं च नमस्कर्तुमिहागतः ॥ द्रष्टुं च नैमिषारण्यं पुण्यदं चापि भारते ॥ ३९ ॥ देवं विप्रं गुरुं
दृष्ट्वा न नमेद्यस्तु संभ्रमात् ॥ स कालसूत्रं व्रजति यावच्चन्द्रदिवाकरौ ॥ ४० ॥ हरिर्ब्राह्मणरूपेक्षण शश्वद् भ्रमति भूतले ॥ सुकृती
प्रणमेत्पुण्याद्ब्राह्मणं हरिरूपिणम् ॥ ४१ ॥ भगवन्यत्त्वया पृष्टं ज्ञातं सर्वमभीप्सितम् ॥ सारभूतं पुराणेषु ब्रह्मवैवर्त्तमुत्तमम् ॥
॥ ४२ ॥ पुराणोपपुराणानां वेदानां भ्रमभञ्जनम् ॥ हरिभक्तिप्रदं सर्वतत्त्वज्ञानविवर्द्धनम् ॥ ४३ ॥ कामिनां कामदं चेदं मुमुक्षूणां
च मोक्षदम् ॥ भक्तिप्रदं वैष्णवानां कल्पवृक्षस्वरूपकम् ॥ ४४ ॥ ब्रह्मखण्डं सर्वबीजं परब्रह्मनिरूपणम् ॥ ध्यायन्ते योगिनः
सन्तो वैष्णवा यत्परात्परम् ॥४५॥ वैष्णवा योगिनः सन्तो न च भिन्नाश्च शौनक ॥ स्वाज्ञानपरिपाकेन भवन्ति जीविनः क्रमात् ॥
॥४६॥ सन्तो भवन्ति सत्सङ्गाद्योगिसंगेन योगिनः ॥ वैष्णवा भक्तसंगेन क्रमात्सद्योगिनः पराः ॥४७॥ यत्रोद्भवश्च देवानां देवीनां
सर्वजीविनाम् ॥ ततः प्रकृतिखण्डे च देवीनां चरितं शुभम् ॥ ४८ ॥ जीवकर्मविपाकश्च शालिग्रामनिरूपणम् ॥ तासां च कवच
स्तोत्रमन्त्रपूजानिरूपणम् ॥ ४९ ॥ प्रकृतेर्लक्षणं तत्र कलांशानां निरूपणम् ॥ कीर्त्तेरुत्कीर्तनं तासां प्रभावश्च निरूपितः ॥ ५० ॥
सुकृतीनां दुष्कृतीनां यद्यत्स्थानं शुभाशुभम् ॥ वर्णनं नरकाणां च रोगाणां मोक्षणं ततः ॥ ५१ ॥ ततो गणेशखण्डे च तज्जन्म

परिकीर्तितम् ॥ अतीवापूर्वचरितं श्रुतिवेदसुदुर्लभम् ॥ ५२ ॥ गणेशभृगुसंवादे सर्वतत्त्वनिरूपणम् ॥ निगूढकवचस्तोत्रमन्त्रतन्त्र
निरूपणम् ॥ ५३ ॥ श्रीकृष्णजन्मखण्डं च कीर्तितं च ततः परम् ॥ भारते पुण्यक्षेत्रे च श्रीकृष्णजन्म कर्म च ॥ ५४ ॥ भुवो
भारावतरणं क्रीडाकौतुकमङ्गलम् ॥ सतां सेतुविधानं च जन्मखण्डे निरूपितम् ॥ ५५ ॥ इदं ते कथितं विप्र पुराणप्रवरं परम् ॥
चतुःखण्डैः परिमितं सर्वधर्मनिरूपणम् ॥ ५६ ॥ सर्वेषामीप्सितं श्रीदं सर्वाशापूर्णकारणम् ॥ ब्रह्मवैवर्त्तकं नाम सर्वाभीष्टफलप्रदम्
॥ ५७ ॥ सारभूतं पुराणेषु केवलं वेदसंमितम् ॥ विवृतं ब्रह्मकात्स्न्यं च कृष्णेन यत्र शौनक ॥ ५८ ॥ ब्रह्मवैवर्तकं तेन प्रवदन्ति
पुराविदः ॥ इदं पुराणसूत्रं च पुरा दत्तं च ब्रह्मणे ॥ ५९ ॥ निरामये च गोलोके कृष्णेन परमात्मना ॥ महातीर्थे पुष्करे च दत्तं
धर्माय ब्रह्मणा ॥६०॥ धर्मेण दत्तं पुत्राय प्रीत्या नारायणाय च ॥६१॥ नारदो व्यासदेवाय प्रददौ जाह्नवीतटे ॥ व्यासः पुराणसूत्रं
तत्संव्यस्य विपुलं महत् ॥ ६२ ॥ मह्यं ददौ सिद्धक्षेत्रे पुण्यदेशे मनोहरम् ॥ मयेदं कथितं ब्रह्मंस्तत्समग्रं निशामय ॥ ६३ ॥
अष्टादशसहस्रं तु व्यासेनेदं पुराणकम् ॥ पुराणकात्स्न्यश्रवणे यत्फलं लभते नरः ॥ तत्फलं लभते नूनमध्यायश्रवणेन च ॥ ६४ ॥
इति श्रीब्रह्मवैवर्ते महापुराणे सौतिशौनकसंवादे ब्रह्मखण्डेऽनुक्रमणिका नाम प्रथमोऽध्यायः ॥ १ ॥ शौनक उवाच ॥ किमपूर्वं श्रुतं
सौते परमाद्भुतमीप्सितम्[1] ॥ सर्वं कथय संव्यस्य[2] ब्रह्मखण्डमनुत्तमम् ॥ १ ॥ सौतिरुवाच ॥ वन्दे गुरोः पादपद्मं व्यासस्यामितते
जसः ॥ हरिं देवान्द्विजान्नत्वा धर्मान्वक्ष्ये सनातनान् ॥ २ ॥ यच्छ्रुतं व्यासवक्त्रेण ब्रह्मखण्डमनुत्तमम् ॥ अज्ञानान्धतमोध्वंसि ज्ञान
वर्त्मप्रदीपकम् ॥३॥ ज्योतिःसमूहं प्रलये पुराऽऽसीत्केवलं द्विज ॥ सूर्य्यकोटिप्रभं नित्यमसंख्यं विश्वकारणम् ॥४ ॥ स्वेच्छामयस्य
च विभोस्तज्ज्योतिरुज्ज्वलं महत् ॥ ज्योतिरभ्यन्तरे लोकत्रयमेव मनोहरम् ॥५॥ तेषामुपरि गोलोकं नित्यमीश्वरवद् द्विज॥ त्रिको
टियोजनायामविस्तीर्णं मण्डलाकृति ॥६॥ तेजःस्वरूपं सुमहद्रत्नभूमिमयं परम्॥अदृश्यं योगिभिः स्वप्ने दृश्यंगम्यं च वैष्णवैः ॥७॥

पा ०–१ मीश्वरम् । २ संन्यस्य ।

योगेन धृतमीशेन चान्तरिक्षस्थितं वरम् ॥ आधिव्याधिजरामृत्युशोकभीतिविवर्जितम् ॥ ८ ॥ सद्रत्नरचितासंख्यमन्दिरैः
परिशोभितम् ॥ लये कृष्णयुतं सृष्टौ गोपगोपीभिरावृतम् ॥ ९ ॥ तदधो दक्षिणे सव्ये पञ्चाशत्कोटियोजनान् ॥ वैकुण्ठं शिवलोकं
तु तत्समं सुमनोहरम् ॥ १० ॥ कोटियोजनविस्तीर्णं वैकुण्ठं मण्डलाकृति ॥ लये शून्यं च सृष्टौ च लक्ष्मीनारायणान्वि
तम् ॥ ११ ॥ चतुर्भुजैः पार्षदैश्च जरामृत्य्वादिवर्जितम् ॥ सव्ये च शिवलोकं च कोटियोजनविस्तृतम् ॥ १२ ॥ लये शून्यं
च सृष्टौ च सपार्षदशिवान्वितम् ॥ गोलोकाभ्यन्तरे ज्योतिरतीव सुमनोहरम् ॥ १३ ॥ परमाह्लादकं शश्वत्परमानन्दकारकम् ॥
ध्यायन्ते योगिनः शश्वद्योगेन ज्ञानचक्षुषा ॥१४॥ तदेवानन्दजनकं निराकारं परात्परम् ॥तज्ज्योतिरन्तरे रूपमतीव सुमनोहरम् ॥
॥ १५ ॥ नवीननीरदश्यामं रक्तपङ्कजलोचनम्॥शारदीयपार्वणेन्दुशोभितं चामलाननम् ॥ १६ ॥ कोटिकन्दर्पलावण्यं लीलाधाम म
नोरमम् ॥ द्विभुजं मुरलीहस्तं सस्मितं पीतवाससम् ॥१७॥ सद्रत्नभूषणौघेन भूषितं भक्तवत्सलम्॥ चन्दनोक्षितसर्वाङ्गं कस्तूरीकुङ्कु
मान्वितम् ॥ १८ ॥ श्रीवत्सवक्षःसंभ्राजत्कौस्तुभेन विराजितम् ॥सद्रत्नसाररचितकिरीटमुकुटोज्ज्वलम् ॥ १९ ॥ रत्नसिंहासनस्थं
च वनमालाविभूषितम् ॥ तदेव परमं ब्रह्म भगवन्तं सनातनम् ॥ २० ॥ स्वेच्छामयं सर्वबीजं सर्वाधारं परात्परम् ॥ किशोरवयसं
शश्वद्गोपवेषविधायकम् ॥ २१ ॥ कोटिपूर्णेन्दुशोभाढ्यं भक्तानुग्रहकारकम् ॥ निरीहं निर्विकारं च परिपूर्णतमं विभुम् ॥२२॥ रास
मण्डलमध्यस्थं शान्तं रासेश्वरं वरम् ॥ माङ्गल्यं मङ्गलार्हं च माङ्गल्यं मङ्गलप्रदम्॥२३॥परमानन्दबीजं च सत्यमक्षरमव्ययम् ॥
सर्वसिद्धेश्वरं सर्वसिद्धिरूपं च सिद्धिदम्॥२४॥प्रकृतेः परमीशानं निर्गुणं नित्यविग्रहम्॥आद्यं पुरुषमव्यक्तं पुरुहूतं पुरुष्टुतम् ॥२५॥
सत्यं स्वतन्त्रमेकं च परमात्मस्वरूपकम् ॥ ध्यायन्ते वैष्णवाः शान्ताः शान्तं तत्परमायणम् ॥ २६ ॥ एवंरूपं परं बिभ्रद्भगवानेक
एव सः ॥ दिग्भिश्च नभसा सार्द्धं शून्यं विश्वं ददर्श ह ॥२७॥ इति श्रीब्रह्मवैवर्ते महापुराणे सौतिशौनकसंवादे ब्रह्मखण्डे परब्रह्मनि
रूपणं नाम द्वितीयोऽध्यायः ॥ २ ॥ सौतिरुवाच ॥ दृष्ट्वा शून्यमयं विश्वं गोलोकं च भयङ्करम्॥निर्जन्तु निर्जलं घोरं निर्वातं तमसा

वृतम् ॥ १ ॥ वृक्षशैलसमुद्रादिविहीनं विकृताकृतम् ॥ निर्मुक्तिकं च निर्धातु निःसस्यं निस्तृणं द्विज॥२॥आलोच्य मनसा सर्वमेक
एवासहायवान् ॥ स्वेच्छया स्रष्टुमारेभे सृष्टिं स्वेच्छामयः प्रभुः ॥ ३ ॥ आविर्बभूवुः सर्गादौ पुंसो दक्षिणपार्श्वतः ॥ भवकारणरूपा
श्च मूर्तिमन्तस्त्रयो गुणाः ॥ ४ ॥ ततो महानहङ्कारः पञ्चतन्मात्र एव च ॥ रूपरसगन्धस्पर्शशब्दाश्चैवेतिसंज्ञकाः ॥ ५ ॥ आविर्ब
भूव तत्पश्चात्स्वयं नारायणः प्रभुः ॥ श्यामो युवा पीतवासा वनमाली चतुर्भुजः ॥ ६ ॥ शंखचक्रगदापद्मधरः स्मेरमुखाम्बुजः ॥
रत्नभूषणभूषाढ्यः शार्ङ्गी कौस्तुभभूषणः ॥ ७ ॥ श्रीवत्सवक्षाः श्रीवासः श्रीविधिः श्रीविभावनः ॥ शारदेन्दुप्रभामृष्टमुखेन्दुसुमनो
हरः ॥ ८ ॥ कामदेवप्रभामृष्टरूपलावण्यसुन्दरः ॥ श्रीकृष्णपुरतः स्थित्वा तुष्टाव तं पुटाञ्जलिः ॥ ९ ॥ नारायण उवाच ॥ वरं
वरेण्यं वरदं वरार्हं वरकारणम् ॥ कारणं कारणानां च कर्म तत्कर्मकारणम् ॥ १० ॥ तपस्तत्फलदं शश्वत्तपस्वीशं च तापसम् ॥
वन्दे नवघनश्यामं स्वात्मारामं मनोहरम् ॥११॥ निष्कामं कामरूपं च कामघ्नं कामकारणम्॥सर्वं सर्वेश्वरं सर्वबीजरूपमनुत्तमम् ॥
॥ १२ ॥ वेदरूपं वेदभवं वेदोक्तफलदं फलम् ॥ वेदज्ञं तद्विधानं च सर्ववेदविदांवरम् ॥ १३ ॥ इत्युक्त्वा भक्तियुक्तश्च स उवास
तदाज्ञया ॥ रत्नसिंहासने रम्ये पुरतः परमात्मनः ॥ १४ ॥ नारायणकृतं स्तोत्रं यः पठेत्सुसमाहितः ॥ त्रिसध्यं यः पठेन्नित्यं पापं
तस्य न विद्यते ॥ १५ ॥ पुत्रार्थी लभते पुत्रं भार्य्यार्थी लभते प्रियाम् ॥ भ्रष्टराज्यो लभेद्राज्यं धनं भ्रष्टधनो लभेत् ॥१६॥ कारा
गारे विपद्ग्रस्तः स्तोत्रेणानेन मुच्यते ॥ रोगात्प्रमुच्यते रोगी ध्रुवं श्रुत्वा च संयतः ॥ १७ ॥ सौतिरुवाच ॥ आविर्बभूव तत्पश्चादा
त्मनो वामपार्श्वतः ॥ शुद्धस्फटिकसङ्काशः पञ्चवक्त्रो दिगम्बरः ॥ १८ ॥ तप्तकाञ्चनवर्णाभजटाभारधरो वरः ॥ ईषद्धास्यप्रसन्ना
स्यस्त्रिनेत्रश्चन्द्रशेखरः ॥ १९ ॥ त्रिशूलपट्टिशधरो जपमालाकरः परः ॥ सर्वसिद्धेश्वरः सिद्धो योगीन्द्राणां गुरोर्गुरुः ॥ २० ॥ मृत्यो
र्मृत्युरीश्वरश्च मृत्युर्मृत्युञ्जयः शिवः ॥ ज्ञानानन्दो महाज्ञानी महाज्ञानप्रदः परः ॥२१॥ पूर्णचन्द्रप्रभामृष्टमुखदृश्यो मनोहरः ॥ वैष्ण
वानां च प्रवरः प्रज्वलन्ब्रह्मतेजसा॥२२॥श्रीकृष्णपुरतः स्थित्वा तुष्टाव तं पुटाञ्जलिः॥पुलकाङ्कितसर्वाङ्गः सा श्रुनेत्रोऽतिगद्गदः॥२३॥

“महादेव उवाच ॥ [1]जयस्वरूपं जयदं जयेशं जयकारणम् ॥ प्रवरं जयदानां च वन्दे तमपराजितम् ॥ २४ ॥ विश्वं विश्वेश्वरेशं च विश्वेशं विश्वकारणम् ॥ विश्वाधारं च विश्वस्तं विश्वकारणकारणम् ॥ २५ ॥ विश्वरक्षाकारणं च विश्वघ्नं विश्वजं परम् ॥ फलबीजं फलाधारं फलं च तत्फलप्रदम् ॥ २६ ॥ तेजःस्वरूपं तेजोदं सर्वतेजस्विनां वरम् ॥ इत्येवमुक्त्वा तं नत्वा रत्नसिंहासने वरे ॥ नारायणं च संभाष्य स उवास तदाज्ञया ॥ २७ ॥ इति शम्भुकृतं स्तोत्रं यो जनः संयतः पठेत् ॥ सर्वसिद्धिर्भवेत्तस्य विजयं च पदे पदे ॥ २८ ॥ सन्ततं वर्द्धते मित्रं धनमैश्वर्य्यमेव च ॥ शत्रुसैन्यं क्षयं याति दुःखानि दुरितानि च ॥ २९ ॥ इति ब्रह्मवैवर्ते शम्भुकृतं श्रीकृष्णस्तोत्रम् ॥” सौतिरुवाच ॥ आविर्बभूव तत्पश्चात्कृष्णस्य नाभिपङ्कजात् ॥ महातपस्वी वृद्धश्च कमण्डलुकरो वरः ॥ ३० ॥ शुक्लवासाः शुक्लदन्तः शुक्लकेशश्चतुर्मुखः ॥ योगीशः शिल्पिनामीशः सर्वेषां जनको गुरुः ॥ ३१ ॥ तपसां फलदाता च प्रदाता सर्वसम्पदाम् ॥ स्रष्टा विधाता कर्त्ता च हर्त्ता च सर्वकर्मणाम् ॥ ॥ ३२ ॥ धाता चतुर्णां वेदानां ज्ञाता वेदप्रसूपतिः ॥ शान्तः सरस्वतीकान्तः सुशीलश्च कृपानिधिः ॥ ३३ ॥ श्रीकृष्णपुरतः स्थित्वा तुष्टाव तं पुटाञ्जलिः ॥ पुलकांकितसर्वांगो भक्तिनम्रात्मकन्धरः ॥ ३४ ॥ ॥ ब्रह्मोवाच ॥ ॥ कृष्णं वन्दे गुणातीतं गोविन्दमेकमक्षरम् ॥ अव्यक्तमव्ययं व्यक्तं गोपवेषविधायिनम् ॥ ३५ ॥ किशोरवयसं शान्तं गोपीकान्तं मनोहरम् ॥ नवीननीरदश्यामं कोटिकन्दर्पसुन्दरम् ॥३६॥ वृन्दावनवनाभ्यर्णे रासमण्डलसंस्थितम् ॥ रासेश्वरं रासवासं रासोल्लाससमुत्सुकम्॥३७॥इत्येवमुक्त्वा तं नत्वा रत्नसिंहासने वरम् ॥ नारायणेशौ संभाष्य स उवास तदाज्ञया ॥ ३८ ॥ इति ब्रह्मकृतं स्तोत्रं प्रातरुत्थाय यः पठेत्॥ पापानि तस्य नश्यन्ति दुःस्वप्नः सुस्वप्नो भवेत् ॥ ३९ ॥ भक्तिर्भवति गोविन्दे श्रीपुत्रपौत्रवर्द्धिनी ॥ अकीर्तिः क्षयमाप्नोति सत्कीर्त्तिर्वर्द्धते चिरम् ॥ ४० ॥ इति ब्रह्मवैवर्त्ते ब्रह्मकृतं श्रीकृष्णस्तोत्रम् ॥ सौतिरुवाच ॥ आविर्बभूव तत्पश्चाद्वक्षसः परमात्मनः ॥

---

[1] इदं स्तोत्रं न विद्यते एकस्मिन्पुस्तके ।

Digitization by eGangotri. Funding MDF Delhi

सस्मितः पुरुषः कश्चिच्छुक्लवर्णो जटाधरः ॥ ४१ ॥ सर्वसाक्षी च सर्वज्ञः सर्वेषां सर्वकर्मणाम् ॥ समः सर्वत्र सदयो हिंसाकोपविवार्जितः
॥ ४२ ॥ धर्मज्ञानयुतो धर्मो धर्मिष्ठो धर्मदो भवेत् ॥ स एव धर्मिणां धर्मः परमात्मा फलोद्भवः ॥ ४३ ॥ श्रीकृष्णपुरतः
स्थित्वा प्रणम्य दण्डवद्भुवि ॥ तुष्टाव परमात्मानं सर्वेशं सर्वकामदम् ॥ ४४ ॥ श्रीधर्म उवाच ॥ ॥ कृष्णं विष्णुं वासुदेवं परमात्मानमीश्वरम्
॥ गोविन्दं परमानन्दमेकमक्षरमच्युतम् ॥ ४५ ॥ गोपेश्वरं च गोपीशं गोपं गोरक्षकं विभुम् ॥ गवामीशं च गोष्ठस्थं गोवत्सपुच्छधारिणम्
॥४६॥ गोगोपगोपीमध्यस्थं प्रधानं पुरुषोत्तमम् ॥४७॥ इत्युच्चार्य्य समुत्तिष्ठन्रत्नसिंहासने वरे ॥ ब्रह्मविष्णुमहेशांस्तान्सम्भाष्य
स उवास ह॥४८॥चतुर्विंशतिनामानि धर्मवक्त्रोद्गतानि च॥यः पठेत्प्रातरुत्थाय स सुखी सर्वतो जयी ॥४९॥मृत्युकाले
हरेर्नाम तस्य साध्यं लभेद्ध्रुवम् ॥ स यात्यन्ते हरेः स्थानं हरिदास्यं भवेद्ध्रुवम् ॥५०॥ नित्यं धर्मस्तं घटते नाधर्मे तद्रतिर्भवेत् ॥
चतुर्वर्गं फलं तस्य शश्वत्करगतं भवेत्॥५१॥तं दृष्ट्वा सर्वपापानि पलायन्ते भयेन च॥ भयानि चैव दुःखानि वैनतेयमिवोरगाः॥५२॥
इति ब्रह्मवैवर्त्ते धर्मकृतं श्रीकृष्णस्तोत्रम् ॥ सौतिरुवाच ॥ आविर्बभूव कन्यैका धर्मस्य वामपार्श्वतः ॥ मूर्त्तिर्मूर्तिमती साक्षाद्द्वितीया
कमलालया ॥५३ ॥ आविर्बभूव तत्पश्चान्मुखतः परमात्मनः ॥ एका देवी शुक्लवर्णा वीणापुस्तकधारिणी ॥५४॥ कोटिपूर्णेन्दुशोभाढ्या
शरत्पङ्कजलोचना ॥ वह्निशुद्धांशुकाधाना रत्नभूषणभूषिता ॥ ५५ ॥ सस्मिता सुदती श्यामा सुन्दरीणां च सुन्दरी ॥ श्रेष्ठा
श्रुतीनां शास्त्राणां विदुषां जननी परा ॥ ५६ ॥ वागधिष्ठातृदेवी सा कवीनामिष्टदेवता ॥ शुद्धसत्त्वस्वरूपा च शान्तरूपा सरस्वती
॥ ५७ ॥ गोविन्दपुरतः स्थित्वा जगौ प्रथमतः सुखम् ॥ तन्नामगुणकीर्तिं च वीणया सा ननर्त्त च ॥ ५८ ॥ कृतानि यानि कर्माणि
कल्पेकल्पे युगेयुगे ॥ तानि सर्वाणि हरिणा तुष्टाव संपुटांजलिः ॥५९॥सरस्वत्युवाच ॥ रासमण्डलमध्यस्थं रासोल्लाससमुत्सुकम् ॥
"रत्नसिंहासनस्थं च रत्नभूषणभूषितम् ॥ ६० ॥ रासेश्वरं रासकरं वरं रासेश्वरीश्वरम् ॥ रासाधिष्ठातृदेवं च वन्दे रासविनोदिनम्
॥६१॥ " रासायासपरिश्रान्तं रासरासविहारिणम् ॥ रासोत्सुकानां गोपीनां कान्तं शान्तं मनोहरम्॥६२॥ प्रणम्य च तमित्युक्त्वा

प्रहृष्टवदना सती ॥ उवास सा सकामा च रत्नसिंहासने वरे ॥ ६३ ॥ इति वाणीकृतं स्तोत्रं प्रातरुत्थाय यः पठेत् ॥ बुद्धिमान्धनवान्सोऽपि विद्यावान्पुत्रवान्सदा ॥६४॥ इति ब्रह्मवैवर्त्ते सरस्वतीकृतं श्रीकृष्णस्तोत्रम् ॥ सौतिरुवाच॥आविर्बभूव मनसः कृष्णस्य परमात्मनः ॥ एका देवी गौरवर्णा रत्नालंकारभूषिता ॥ ६५ ॥ पीतवस्त्रपरीधाना सस्मिता नवयौवना ॥ सर्वैश्वर्य्याधिदेवी सा सर्वसम्पत्फलप्रदा ॥ स्वर्गे च स्वर्गलक्ष्मीश्च राजलक्ष्मीश्च राजसु ॥ ६६ ॥ सा हरेः पुरतः स्थित्वा परमात्मानमीश्वरम् ॥ तुष्टाव प्रणता साध्वी भक्तिनम्रात्मकन्धरा ॥ ६७ ॥ महालक्ष्मीरुवाच ॥ सत्यस्वरूपं सत्येशं सत्यबीजं सनातनम् ॥ सत्याधारं च सत्यज्ञं सत्यमूलं नमाम्यहम् ॥ ६८ ॥ इत्युक्त्वा श्रीहरिं नत्वा सा चोवास सुखासने ॥ तप्तकांचनवर्णाभा भासयन्ती दिशस्त्विषा ॥ ६९ ॥ आविर्बभूव तत्पश्चाद् बुद्धेश्च परमात्मनः ॥ सर्वाधिष्ठातृदेवी सा मूलप्रकृतिरीश्वरी ॥ ७० ॥ तप्तकाञ्चनवर्णाभा सूर्य्यकोटिसमप्रभा ॥ ईषद्धास्यप्रसन्नास्या शरत्पङ्कजलोचना ॥ ७१ ॥ रक्तवस्त्रपरीधाना रत्नाभरणभूषिता ॥ निद्रातृष्णाक्षुत्पिपासादयाश्रद्धाक्षमादिकाः ॥ ७२ ॥ तासां च सर्वशक्तीनामीशाधिष्ठातृदेवता ॥ भयङ्करी शतभुजा दुर्गा दुर्गार्तिनाशिनी ॥ ७३ ॥ आत्मनः शक्तिरूपा सा जगतां जननी परा ॥ त्रिशूलशक्तिशार्ङ्गं च धनुःखड्गशराणि च ॥ ७४ ॥ शंखचक्रगदापद्ममक्षमालां कमण्डलुम् ॥ वज्रमङ्कुशपाशं च भुशुण्डीदण्डतोमरम् ॥७५॥ नारायणास्त्रं ब्रह्मास्त्रं रौद्रं पाशुपतं तथा ॥ पार्जन्यं वारुणं वाह्नं गान्धर्वं बिभ्रती सती ॥ कृष्णस्य पुरतः स्थित्वा तुष्टाव तं मुदाऽम्बिता ॥ ७६ ॥ प्रकृतिरुवाच ॥ अहं प्रकृतिरीशाना सर्वेशा सर्वरूपिणी ॥ सर्वशक्तिस्वरूपा च मया च शक्तिमज्जगत् ॥ ७७ ॥ त्वया सृष्टा न स्वतन्त्रा त्वमेव जगतां पतिः ॥ गतिश्च पाता स्रष्टा च संहर्त्ता च पुनर्विधिः ॥ ७८ ॥ स्रष्टुं स्रष्टा च संहर्तुं संहर्ता वेधसां विधिः ॥ परमानन्दरूपं त्वां वन्दे चानन्दपूर्वकम् ॥ चक्षुर्निमेषकाले च ब्रह्मणः पतनं भवेत् ॥ ७९ ॥ तस्य प्रभावमतुलं वर्णितुं कः क्षमो विभो ॥ भ्रूभङ्गलीलामात्रेण विष्णुकोटिं सृजेत्तु यः ॥ ८० ॥ चराचरांश्च विश्वेषु देवान्ब्रह्मपुरोगमान् ॥ मद्विधाः कति वा देवीः स्रष्टुं शक्तश्च लीलया ॥ ८१ ॥

परिपूर्णतमं स्वीड्यं वन्दे चानन्दपूर्वकम् ॥ महान्विराड् यत्कलांशो विश्वसंख्याश्रयो विभो ॥ वन्दे चानन्दपूर्वं तं परमात्मानमी
श्वरम् ॥ ८२ ॥ यं च स्तोतुमशक्ताश्च ब्रह्मविष्णुशिवादयः ॥ वेदा अहं च वाणी च वन्दे तं प्रकृतेः परम् ॥ ८३ ॥ वेदाश्च विदुषां
श्रेष्ठाः स्तोतुं शक्ताश्च न क्षमाः ॥ निर्लक्ष्यं कः क्षमः स्तोतुं तं निरीहं नमाम्यहम् ॥ ८४ ॥ इत्येवमुक्त्वा सा दुर्गा रत्नसिंहासने
वरे ॥ उवास नत्वा श्रीकृष्णं तुष्टुवुस्तां सुरेश्वराः ॥८५॥ इति दुर्गाकृतं स्तोत्रं कृष्णस्य परमात्मनः ॥ यः पठेदर्चनाकाले स जयी
सर्वतः सुखी ॥ ८६ ॥ दुर्गा तस्य गृहं त्यक्त्वा नैव याति कदाचन ॥ भवाब्धौ यशसा भाति यात्यन्ते श्रीहरेः पुरम् ॥ ८७ ॥ इति
श्रीब्रह्मवैवर्त्ते महापुराणे ब्रह्मखण्डे सौतिशौनकसंवादे सृष्टिनिरूपणे दुर्गास्तोत्रं नाम तृतीयोऽध्यायः ॥ ३ ॥ सौतिरुवाच ॥ आविर्ब
भूव तत्पश्चात्कृष्णस्य रसनाग्रतः ॥ शुद्धस्फटिकसंकाशा देवी चैका मनोहरा ॥ १ ॥ शुक्लवस्त्रपरीधाना सर्वालङ्कारभूषिता ॥ बिभ्रती
जपमालां च सा सावित्री प्रकीर्तिता ॥ २ ॥ सा तुष्टाव पुरः स्थित्वा परं ब्रह्म सनातनम्॥ पुटांजलिपरा साध्वी भक्तिनम्रात्मकन्धरा
॥ ३ ॥ सावित्र्युवाच ॥ नमामि सर्वबीजं त्वां ब्रह्मज्योतिः सनातनम् ॥ परात्परतरं श्यामं निर्विकारं निरञ्जनम् ॥ ४ ॥ इत्युक्त्वा
सस्मिता देवी रत्नसिंहासने वरे ॥ उवास श्रीहरिं नत्वा पुनरेव श्रुतिप्रसूः ॥ ५ ॥ आविर्बभूव तत्पश्चात्कृष्णस्य परमात्मनः ॥
मानसाच्च पुमानेकस्तप्तकांचनसन्निभः ॥ ६ ॥ मनो मथ्नाति सर्वेषां पञ्चबाणेन कामिनाम् ॥ तन्नाम मन्मथं तेन प्रवदन्ति म
नीषिणः ॥ ७ ॥ तस्य पुंसो वामपार्श्वात्कामस्य कामिनी वरा ॥ बभूवातीव ललिता सर्वेषां मोहकारिणी ॥ ८ ॥ रतिर्बभूव सर्वे
षां तां दृष्ट्वा सस्मितां सतीम् ॥ रतीति तेन तन्नाम प्रवदंति मनीषिणः ॥ ९ ॥ हरिं स्तुत्वा तया सार्द्धं स उवास हरेः पुरः ॥ रत्न
सिंहासने चास्य पञ्चबाणो धनुर्द्धरः ॥१०॥ मारणं स्तम्भनं चैव जृम्भणं शोषणं तथा ॥ उन्मादनं पञ्चबाणान्पञ्चबाणो बिभर्ति सः ॥
॥ ११ ॥ बाणांश्चिक्षेप सर्वांश्च कामो बाणपरीक्षया ॥ सद्यः सर्वे सकामाश्च बभूवुरीश्वरेच्छया ॥ १२ ॥ रतिं दृष्ट्वा ब्रह्मणश्च रेतः
पातो बभूव ह ॥ तत्र तस्थौ महायोगी वस्त्रेणाच्छाद्य लज्जया ॥ १३ ॥ वस्त्रं दग्ध्वा समुत्तस्थौ ज्वलदग्निः सुरेश्वरः ॥ कोटि

तालप्रमाणश्च सशिखश्च समुज्ज्वलन् ॥ १४ ॥ कृष्णस्तद्वर्द्धनं दृष्ट्वा ससर्जापः स्वलीलया ॥ निःश्वासवायुना सार्द्धं मुखबिन्दुं
समुद्गिरन् ॥ १५ ॥ विश्वौघं प्लावयामास मुखबिंदुजलं द्विज ॥ तत्र किञ्चिज्जलकणं वह्निं शान्तं चकार ह ॥ १६ ॥ ततःप्रभृति
तेनाग्निस्तोयान्निर्वाणतां व्रजेत् ॥ आविर्भूतः पुमानेकस्ततस्तदधिदेवता ॥ १७ ॥ उत्तस्थौ तज्जलादेकः पुमान्स वरुणः स्मृतः ॥
जलाधिष्ठातृदेवोऽसौ सर्वेषां यादसाम्पतिः ॥ १८ ॥ आविर्बभूव कन्यैका तद्देहेर्वामपार्श्वतः ॥ सा स्वाहा वह्निपत्नी तां प्रवदन्ति मनीषिणः
॥ १९ ॥ जलेशस्य वामपार्श्वात्कन्या चैका बभूव सा ॥ वरुणानीति विख्याता वरुणस्य प्रिया सती ॥ २० ॥ बभूव पवनः
श्रीमान्विभोर्निःश्वासवायुतः॥ स च प्राणाश्च सर्वेषां निःश्वासस्तत्फलोद्भवः॥२१॥तस्य वायोर्वामपार्श्वात्कन्या चैका बभूव ह॥
वायोः पत्नी सा च देवी वायवी परिकीर्तिता ॥२२॥ कृष्णस्य कामबाणेन रेतःपातो बभूव ह ॥ जले तद्रेचनं चक्रे लज्जया सुरसंसदि
॥ २३ ॥ सहस्रवत्सरान्ते तड्डिम्भरूपं बभूव ह ॥ ततो महान्विराड् जज्ञे विश्वौघाधार एव सः ॥ २४ ॥ यस्यैकलोमविवरे
विश्वैकस्य व्यवस्थितिः ॥ स्थूलात्स्थूलतरः सोऽपि महान्नान्यस्ततः परः ॥ २५ ॥ स एव षोडशांशोऽपि कृष्णस्य
परमात्मनः ॥ महाविष्णुः स विज्ञेयः सर्वाधारः सनातनः ॥ २६ ॥ महार्णवे शयानः स पद्मपत्रं यथा जले ॥
बभूवतुस्तौ द्वौ दैत्यौ तस्य कर्णमलोद्भवौ ॥ २७ ॥ तौ जलाच्च समुत्थाय ब्रह्माणं हन्तुमुद्यतौ ॥ नारायणश्च भगवाञ्जघने
तौ जघान ह ॥ २८ ॥ बभूव मेदिनी कृत्स्ना कार्त्स्न्येन मेदसा तयोः ॥ तत्रैव सन्ति विश्वानि सा च देवी वसुन्धरा
॥ २९ ॥ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे ब्रह्मखण्डे सौतिशौनकसंवादे सृष्टिनिरूपणे चतुर्थोऽध्यायः ॥ ४ ॥ ॥ शौनक उवाच
॥ ॥ गोगोपगोप्यो गोलोके किं नित्याः किन्तु कल्पिताः ॥ मम संदेहभेदार्थं तन्मे व्याख्यातुमर्हसि ॥ १ ॥ ॥ सौतिरुवाच
॥ ॥ सर्वादिसृष्टौ ताः क्लृप्ताः प्रलये प्रलये स्थिताः ॥ सर्वादिसृष्टिकथनं यन्मया कथितं द्विज ॥ २ ॥ सर्वादिसृष्टौ क्लृप्तौ
च नारायणमहेश्वरौ ॥ प्रलये प्रलये व्यक्तौ स्थितौ तौ प्रकृतिश्च सा॥३॥सर्वादौ ब्रह्मकल्पस्य चरितं कथितं द्विज ॥ वाराहपाद्मक

ल्पौ द्वौ कथयिष्यामि श्रोष्यसि ॥ ४ ॥ ब्राह्मवाराहपाद्माश्च कल्पाश्च त्रिविधा मुने ॥ यथा युगानि चत्वारि क्रमेण कथितानि च
॥ ५ ॥ सत्यं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् ॥ त्रिशतैश्च षष्ट्यधिकैर्युगैर्दिव्यं युगं स्मृतम् ॥ ६ ॥ मन्वन्तरं तु दिव्यानां
युगानामेकसप्ततिः ॥ चतुर्दशेषु[1] मनुषु गतेषु ब्रह्मणो दिनम् ॥ ७ ॥ त्रिशतैश्च षष्ट्यधिकैर्दिनैर्वर्षं च ब्रह्मणः ॥ अष्टोत्तरं वर्षशतं
विधेरायुर्निरूपितम् ॥ ८ ॥ एतन्निमेषकालस्तु कृष्णस्य परमात्मनः ॥ ब्रह्मणश्चायुषा कल्पः कालविद्भिर्निरूपितः ॥ ९ ॥ क्षुद्रक
ल्पा बहुतरास्ते संवर्तादयः स्मृताः ॥ सप्तकल्पांतजीवी स मार्कण्डेयश्च तन्मतः ॥१०॥ ब्रह्मणश्च दिनेनैव स कल्पः परिकीर्तितः ॥
विधेश्च सप्तदिवसे मुनेरायुर्निरूपितम् ॥ ११ ॥ ब्राह्मवाराहपाद्माश्च त्रयः कल्पा निरूपिताः ॥ कल्पत्रये यथा सृष्टिः कथयामि
निशामय ॥ १२ ॥ ब्राह्मे च मेदिनीं सृष्ट्वा स्रष्टा सृष्टिं चकार सः ॥ मधुकैटभयोश्चैव मेदसा चाज्ञया प्रभोः ॥१३॥ वाराहे तां समु
द्धृत्य लुप्तां मग्नां रसातलात् ॥ विष्णोर्वराहरूपस्य द्वारा चातिप्रयत्नतः ॥ १४ ॥ पाद्मे विष्णोर्नाभिपद्मे स्रष्टा सृष्टिं विनिर्ममे ॥
त्रिलोकीं ब्रह्मलोकान्तां नित्यलोकत्रयं विना ॥ १५ ॥ एतत्तु कालसंख्यानमुक्तं सृष्टिनिरूपणे ॥ किंचिन्निरूपणं सृष्टेः किं भूयः
श्रोतुमिच्छसि ॥ १६ ॥ ॥ शौनक उवाच ॥ ॥ अतः परं किं चकार भगवान्सात्वतांपतिः ॥ एतान्सृष्ट्वा किं चकार तन्मे
व्याख्यातुमर्हसि ॥ १७ ॥ ॥ सौतिरुवाच ॥ ॥ अतः परं तु गोलोके गोलोकेशो महान्प्रभुः ॥ एतान्सृष्ट्वा जगामासौ सुरम्यं रा
समण्डलम् ॥ एतैः समेतैर्भगवानतीव कमनीयकम् ॥ १८ ॥रम्याणां कल्पवृक्षाणां मध्येऽतीव मनोहरम् ॥ सुविस्तीर्णं च सुसमं
सुस्निग्धं मण्डलीकृतम् ॥ १९ ॥ चन्दनागुरुकस्तूरीकुङ्कुमैश्च सुसंस्कृतम् ॥ दधिलाजसक्तुधान्यदूर्वापर्णपरिप्लुतम् ॥ २० ॥ पट्ट
सूत्रग्रन्थियुक्तं नवचन्दनपल्लवैः ॥ संयुक्तरम्भास्तम्भानां समूहैः परिवेष्टितम् ॥ २१ ॥ सद्रत्नसारनिर्माणमण्डपानां त्रिकोटिभिः ॥
रत्नप्रदीपज्वलितैः पुष्पधूपाधिवासितैः ॥ २२ ॥ शृंगारार्हभोगवस्तुसमूहपरिवेष्टितम् ॥ अतीव ललिताकल्पतल्पयुक्तैः सुशोभि

---

[1] चतुर्दशसंख्यापूरकेषु इत्यर्थः । चालनीन्यायेन पृथक्पृथक्तत्पूरकत्वमस्त्येवेति ज्ञेयम् ।

तम् ॥ २३ ॥ तत्र गत्वा च तैः सार्धं समुवास जगत्पतिः ॥ दृष्ट्वा रासं विस्मितास्ते बभूवुर्मुनिसत्तम ॥ २४ ॥ आविर्बभूव कन्यै
का कृष्णस्य वामपार्श्वतः ॥ धावित्वा पुष्पमानीय ददावर्घ्यं प्रभोः पदे ॥ २५ ॥ रासे संभूय गोलोके सा दधाव हरेः पुरः ॥
तेन राधा समाख्याता पुराविद्भिर्द्विजोत्तम ॥ २६ ॥ प्राणाधिष्ठातृदेवी सा कृष्णस्य परमात्मनः ॥ आविर्बभूव प्राणेभ्यः प्राणे
भ्योऽपि गरीयसी ॥ २७ ॥ देवी षोडशवर्षीया नवयौवनसंयुता ॥ वह्निशुद्धांशुकाधाना सस्मिता सुमनोहरा ॥ २८ ॥ सुकोम
लांगी ललिता सुन्दरीषु च सुन्दरी ॥ बृहन्नितम्बभारार्त्ता पीनश्रोणिपयोधरा ॥ २९ ॥ बन्धुजीवजिता रक्तसुन्दरोष्ठा धरावरा ॥
मुक्तापङ्क्तिजिता चारुदन्तपंक्तिर्मनोहरा ॥ ३० ॥ शरत्पार्वणकोटीन्दुशोभामृष्टशुभानना चारुसीमन्तिनीचारुशरत्पङ्कजलोचना
॥ ३१ ॥ खगेन्द्रचञ्चुविजितचारुनासा मनोहरा ॥ स्वर्णगण्डूकविजिते गण्डयुग्मे च बिभ्रती ॥ ३२ ॥ दधती चारुकर्णौ च रत्नाभरण
भूषिते ॥ चन्दनागुरुकस्तूरीयुक्तकुंकुमबिन्दुभिः ॥ ३३ ॥ सिन्दूरबिन्दुसंयुक्तसुकपोला मनोहरा ॥ सुसंस्कृतं केशपाशं मालती
माल्यभूषितम् ॥ ३४ ॥ सुगन्धकबरीभारं सुन्दरं दधती सती ॥ स्थलपद्मप्रभामुष्टं पादयुग्मं च बिभ्रती ॥ ३५ ॥ गमनं कुर्वती
सा च हंसखञ्जनगञ्जनम् ॥ सद्रत्नसारनिर्माणां वनमालां मनोहराम् ॥ ३६ ॥ हारं हीरकनिर्माणं रत्नकेयूरकङ्कणम् ॥ सद्रत्नसारनिर्मा
णं पाशकं सुमनोहरम् ॥ ३७ ॥ अमूल्यरत्ननिर्माणं क्वणन्मञ्जीररञ्जितम् ॥ नानाप्रकारचित्राढ्यं सुन्दरं परिबिभ्रती ॥ ३८ ॥
सा च सम्भाष्य गोविन्दं रत्नसिंहासने वरे ॥ उवास सस्मिता भर्तुः पश्यन्ती मुखपङ्कजम् ॥ ३९ ॥ तस्याश्च लोमकूपेभ्यः सद्यो
गोपाङ्गनागणः ॥ आविर्बभूव रूपेण वेशेनैव च तत्समः ॥ ४० ॥ लक्षकोटीपरिमितः शश्वत्सुस्थिरयौवनः ॥ संख्याविद्भिश्च
संख्यातो गोलोके गोपिकागणः ॥ ४१ ॥ कृष्णस्य लोमकूपेभ्यः सद्यो गोपगणो मुने ॥ आविर्बभूव रूपेण वेषेणैव च तत्समः ॥
॥ ४२ ॥ त्रिंशत्कोटिपरिमितः कमनीयो मनोहरः ॥ संख्याविद्भिश्च संख्यातो बल्लवानां गणः श्रुतौ ॥ ४३ ॥ कृष्णस्य लोम
कूपेभ्यः सद्यश्चाविर्बभूव ह ॥ नानावर्णो गोगणश्च शश्वत्सुस्थिरयौवनः ॥ ४४ ॥ बलीवर्दाः सुरभ्यश्च वत्सा नानाविधाः

शुभाः ॥ अतीव ललिताः श्यामा बह्वचो वै कामधेनवः ॥ ४५ ॥ तेषामेकं बलीवर्दं कोटिसिंहसमं बले ॥ शिवाय प्रददौ
कृष्णो वाहनाय मनोहरम् ॥ ४६ ॥ कृष्णांघ्रिनखरन्ध्रेभ्यो हंसपङ्क्तिर्मनोहरा ॥ आविर्बभूव सहसा स्त्रीपुंवत्ससमन्विता ॥
॥ ४७ ॥ तेषामेकं राजहंसं महाबलपराक्रमम् ॥ वाहनाय ददौ कृष्णो ब्रह्मणे च तपस्विने ॥ ४८ ॥ वामकर्णस्य विवरात्कृष्णस्य
परमात्मनः ॥ गणः श्वेततुरङ्गाणामाविर्भूतो मनोहरः ॥ ४९ ॥ तेषामेकं च श्वेताश्वं धर्मार्थं वाहनाय च ॥ ददौ गोपाङ्गनेशश्च
संप्रीत्या सुरसंसदि ॥ ५० ॥ दक्षकर्णस्य विवरात्पुंसश्च सुरसंसदि ॥ आविर्भूता सिंहपङ्क्तिर्महाबलपराक्रमा ॥ ५१ ॥ तेषामेकं
ददौ कृष्णः प्रकृत्यै परमादरम् ॥ अमूल्यरत्नमाल्यं च वरं यदभिवाञ्छितम् ॥ ५२ ॥ कृष्णो योगेन योगीन्द्रश्चकार रथप
ञ्चकम् ॥ शुद्धरत्नेन्द्रनिर्माणं मनोयायि मनोहरम् ॥ ५३ ॥ लक्षयोजनमूर्ध्वे च प्रस्थे च शतयोजनम् ॥ लक्षचक्रं वायुरहं लक्ष
क्रीडागृहान्वितम् ॥ ५४ ॥ शृङ्गारार्हं भोगवस्तुतल्पासंख्यसमन्वितम् ॥ रत्नप्रदीपलक्षाणां वाजिभिश्च विराजितम् ॥ ५५ ॥
नानाचित्रविचित्राढ्यं सद्रत्नकलशोज्ज्वलम् ॥ रत्नदर्पणभूषाढ्यं शोभितं श्वेतचामरैः ॥ ५६ ॥ वह्निशुद्धांशुकैश्चित्रैर्मुक्ताजालै
र्विभूषितम् ॥ मणीन्द्रमुक्तामाणिक्यहीरहारविराजितम् ॥ ५७ ॥ आरक्तवर्णरत्नेन्द्रसारनिर्माणकृत्रिमैः ॥ पङ्कजानामसंख्यैश्च सुन्द
रैश्च सुशोभितम् ॥ ५८ ॥ ददौ नारायणायैकं तेषां मध्ये द्विजोत्तमः ॥ एकं दत्त्वा राधिकायै ररक्षाशेषमात्मने ॥
॥ ५९ ॥ आविर्बभूव कृष्णस्य गुह्यदेशात्ततः परम् ॥ पिङ्गलश्च पुमानेकः पिङ्गलैश्च गणैः सह ॥ ६० ॥ आविर्भूता यतो गुह्या
त्तेन ते गुह्यकाः स्मृताः ॥ यः पुमान् स कुबेरश्च धनेशो गुह्यकेश्वरः ॥ ६१ ॥ बभूव कन्यका चैका कुबेरे वामपार्श्वतः ॥
कुबेरपत्नी सा देवी सुन्दरीणां मनोरमा ॥ ६२ ॥ भूतप्रेतपिशाचाश्च कूष्माण्डब्रह्मराक्षसाः ॥ वेताला विकृतास्तस्यावि
र्भूता गुह्यदेशतः ॥ ६३ ॥ शङ्खचक्रगदापद्मधारिणो वनमालिनः ॥ पीतवस्त्रपरीधानाः सर्वे श्यामचतुर्भुजाः ॥ ६४ ॥ किरीटिनः कुण्ड
लिनो रत्नभूषणभूषिताः ॥ आविर्भूताः पार्षदाश्च कृष्णस्य मुखतो मुने ॥ ६५ ॥ चतुर्भुजान्पार्षदांश्च ददौ नारायणाय च ॥ गुह्य

कान्गुह्यकेशाय भूतादीञ्छङ्कराय च ॥६६॥ द्विभुजाः श्यामवर्णाश्च जपमालाकरा वराः ॥ ध्यायन्तश्चरणाम्भोजं कृष्णस्य सततं मुदा ॥६७॥ दास्यो नियुक्ता दसाश्चैवार्घ्यमादाय यत्नतः ॥ आविर्भूता वैष्णवाश्च सर्वे कृष्णपरायणाः ॥ ६८ ॥ पुलकाङ्कितसर्वाङ्गाः साश्रुनेत्राः सगद्गदाः ॥ आविर्भूताः पादपद्मात्पादपद्मैकमानसाः॥६९॥ आविर्बभूवुः कृष्णस्य दक्षनेत्राद्भयङ्कराः॥त्रिशूलपट्टिशधरास्त्रिनेत्राश्चन्द्रशेखराः ॥ ७० ॥ दिगम्बरा महाकाया ज्वलदग्निशिखोपमाः ॥ ते भैरवा महाभागाः शिवतुल्याश्च तेजसा ॥ ७१ ॥ रुरुसंहारकालाख्या असितक्रोधभीषणाः ॥ महाभैरवखट्वाङ्गावित्यष्टौ भैरवाः स्मृताः ॥ ७२ ॥ आविर्बभूव कृष्णस्य वामनेत्राद्भयङ्करः॥ त्रिशूलपट्टिशव्याघ्रचर्माम्बरगदाधरः ॥ ७३ ॥ दिगम्बरो महाकायस्त्रिणेत्रश्चन्द्रशेखरः ॥ स ईशानो महाभागो दिक्पालानामधीश्वरः ॥ ७४ ॥ डाकिन्यश्चैव योगिन्यः क्षेत्रपालाः सहस्रशः ॥ आविर्बभूवुः कृष्णस्य नासिकाविवरोदरात् ॥ ७५ ॥ सुरास्त्रिकोटिसंख्याता दिव्यमूर्तिधरावराः ॥ आविर्बभूवुः सहसा पुंसो वै पृष्ठदेशतः ॥ ७६ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे सौतिशौनकसंवादे सृष्टिनिरूपणे ब्रह्मखण्डे पञ्चमोऽध्यायः ॥ ५ ॥ सौतिरुवाच ॥ अथ कृष्णो महालक्ष्मीं सादरं च सरस्वतीम् ॥ नारायणाय प्रददौ रत्नेन्द्रं मालया सह ॥ १ ॥ सावित्रीं ब्रह्मणे प्रादान्मूर्तिं धर्माय सादरम् ॥ रतिं कामाय रूपाढ्यां कुबेराय मनोरमाम् ॥ २ ॥ अन्याश्च या या अन्यभ्यो याश्च येभ्यः समुद्भवाः ॥ तस्मै तस्मै ददौ कृष्णस्तां तां रूपवतीं सतीम् ॥ ॥ ३ ॥ ततः शंकरमाहूय सर्वेशो योगिनां गुरुम् ॥ उवाच प्रियमित्येवं गृह्णीयाः सिंहवाहिनीम् ॥ ४ ॥ श्रीकृष्णस्य वचः श्रुत्वा प्रहसन्नीललोहितः ॥ उवाच भीतः प्रणतः प्राणेशं प्रभुमच्युतम् ॥ ५ ॥ श्रीमहेश्वर उवाच ॥ अधुनाहं न गृह्णामि प्रकृतिं प्राकृतो यथा ॥ त्वद्भक्त्यैकव्यवहितां दास्यमार्गविरोधिनीम् ॥ ६ ॥ तत्त्वज्ञानसमाच्छन्नां योगद्वारकपाटिकाम् ॥ मुक्तीच्छाध्वंसरूपां च सकामां कामवर्द्धिनीम् ॥ ७ ॥ तपस्याच्छन्नरूपां च महामोहकरण्डिकाम् ॥ भवकारागृहे घोरे दृढां निगडरूपिणीम् ॥ ॥ ८ ॥ शश्वद्विबुद्धिजननी सद्बुद्धिच्छेदकारिणीम् ॥ शश्वद्विभोगसारां च विषयेच्छाविवर्द्धिनीम् ॥ ९ ॥ नेच्छामि गृहिणीं नाथ वरं

देहि मदीप्सितम् ॥ यस्य यद्वाञ्छितं तस्मै तद्ददाति सदीश्वरः ॥ १० ॥ त्वद्भक्तिविषये दास्ये लालसा वर्द्धतेऽनिशम् ॥ तृप्तिर्न
जायते नाम जपने पादसेवने ॥११॥ त्वन्नामपञ्चवक्त्रेण गुणं सन्मङ्गलालयम् ॥ स्वप्ने जागरणे शश्वद्गायन्गायन् भ्रमाम्यहम्॥१२॥
आकल्पकोटिकोटिं च तद्रूपध्यानतत्परम् ॥ भोगेच्छाविषयेनैव योगे तपसि मन्मनः ॥ १३ ॥ त्वत्सेवने पूजने च वन्दने नाम
कीर्तने ॥ सदोल्लसितमेषां च विरतौ विरतिं लभेत् ॥ १४ ॥ स्मरणं कीर्त्तनं नाम गुणयोः श्रवणं जपः ॥ त्वच्चारुरूपध्यानं त्वत्पा
दसेवाभिवन्दनम् ॥ १५ ॥ समर्पणं चात्मनश्च नित्यं नैवेद्यभोजनम् ॥ वरं वरेश देहीदं नवधा भक्तिलक्षणम् ॥ १६ ॥ सार्ष्टिसा
लोक्यसारूप्यसामीप्यं साम्यलीनताम् ॥ वदन्ति षड्विधां मुक्तिं मुक्तामुक्तिविदो विभो ॥ १७ ॥ अणिमालघिमाप्राप्तिः प्राकाम्यं
महिमा तथा ॥ ईशित्वं च वशित्वं च सर्वकामावसायिता ॥ १८ ॥ सर्वज्ञ दूरश्रवणं परकायप्रवेशनम् ॥ वाक्सिद्धिः कल्पवृक्ष
त्वं स्रष्टुं संहर्तुमीशता ॥ १९ ॥ अमरत्वं च सर्वाग्र्यं सिद्धयोऽष्टादश स्मृताः ॥ योगास्तपांसि सर्वाणि दानानि च व्रतानि च ॥
॥ २० ॥ यशःकीर्तिर्वचः सत्यं धर्माण्यनशनानि च ॥ भ्रमणं सर्वतीर्थेषु स्नानमन्यसुरार्चनम् ॥ २१ ॥ सुरार्चा दर्शनं सप्तद्वीपस
प्तप्रदक्षिणम् ॥ स्नानं सर्वसमुद्रेषु सर्वस्वर्गप्रदर्शनम् ॥ २२ ॥ ब्रह्मत्वं चैव रुद्रत्वं विष्णुत्वं च परं पदम् ॥ अतोऽनिर्वचनीयानि
वाञ्छनीयानि सन्ति वा ॥ २३ ॥ सर्वाण्येतानि सर्वेश कथितानि च यानि च ॥ तव भक्तिकलांशस्य कलां नार्हन्ति षोडशीम्
॥ २४ ॥ शर्वस्य वचनं श्रुत्वा कृष्णस्तं योगिनां गुरुम् ॥ प्रहस्योवाच वचनं सत्यं सर्वसुखप्रदम् ॥ २५ ॥ ॥ श्रीभगवानुवाच ॥
मत्सेवां कुरु सर्वेश शर्वसर्वविदांवर ॥ कल्पकोटिशतं यावत्पूर्णं शश्वदहर्निशम् ॥ २६ ॥ वरस्तपस्विनां त्वं च सिद्धानां यो
गिनां तथा ॥ ज्ञानिनां वैष्णवानां च सुराणां च सुरेश्वर ॥२७॥ अमरत्वं लभ भव भव मृत्युंजयो महान् ॥ सर्वसिद्धिं च वेदांश्च
सर्वज्ञत्वं च मद्वरात् ॥२८॥ असंख्यब्रह्मणां पातं लीलया वत्स पश्यसि ॥ अद्यप्रभृति ज्ञानेन तेजसा वयसा शिव ॥ २९ ॥ परा
क्रमेण यशसा महसा मत्समो भव॥प्राणानामधिकस्त्वञ्च न भक्तस्त्वत्परो मम ॥३०॥ त्वत्परो नास्ति मे प्रेयांस्त्वं मदीयात्मनःपरः॥

ये त्वां निन्दन्ति पापिष्ठा ज्ञानहीना विचेतनाः ॥ ३१ ॥ पच्यन्ते कालसूत्रेण यावच्चन्द्रदिवाकरौ ॥ कल्पकोटिशतान्ते च ग्रहीष्यसि शिवां शिव ॥ ३२ ॥ ममाव्यर्थं च वचनं पालनं कर्तुमर्हसि ॥ त्वन्मुखान्निर्गतं वाक्यं न करोम्यधुनेति च ॥ ३३ ॥ मद्वाक्यं च स्ववाक्यं च पालनं तत्करिष्यसि ॥ गृहीत्वा प्रकृतिं शम्भो दिव्यं वर्षसहस्रकम् ॥ ३४ ॥ सुखं महच्च शृङ्गारं करिष्यसि न संशयः ॥ न केवलं तपस्वी त्वमीश्वरो मत्समो महान् ॥ ३५ ॥ काले गृही तपस्वी च योगी स्वेच्छामयो हि यः ॥ दुःखं च दारसंयोगे यत्त्वया कथितं शिव ॥ ३६ ॥ कुस्त्री ददाति दुःखं च स्वामिने न पतिव्रता ॥ कुले महति या जाता कुलजा कुलपालिका ॥ ३७ ॥ करोति पालनं स्नेहात्सत्पुत्रस्य समं पतिम् ॥ पतिर्बन्धुः पतिर्भर्त्ता दैवतं कुलयोषिताम् ॥ ३८ ॥ पतितोऽपतितो वापि कृपणश्चेश्वरोऽथवा ॥ असत्कुलप्रसूतायाः पित्रोर्दुश्शीलमिश्रिताः ॥ ३९ ॥ ध्रुवं ताः परभोग्याश्च पतिं निन्दन्ति सन्ततम्॥ आवयोरतिरिक्तं च या पश्यति पतिं सती ॥ ४० ॥ गोलोके स्वामिना सार्द्धं कोटिकल्पं प्रमोदते ॥ भविता सा शिवा शैवी प्रकृतिर्वैष्णवी शिव ॥ ४१ ॥ मदाज्ञया च तां साध्वीं ग्रहीष्यसि भवाय च ॥ प्रकृत्या योनिसंयुक्तं त्वल्लिङ्गं तीर्थमृत्कृतम् ॥ ४२ ॥ तीर्थे सहस्रं संपूज्य भक्त्या पञ्चोपचारतः ॥ सदक्षिणं संयतो यः पवित्रश्च जितेन्द्रियः ॥ ४३ ॥ कोटिकल्पं च गोलोके मोदते च मया सह ॥ लक्षं तीर्थे पूजयेद्यो विधिवत्साधुदक्षिणम् ॥ ४४ ॥ न च्युतिस्तस्य गोलोकात्स भवेदावयोः समः ॥ मृद्भस्मगोशकृत्पिण्डैस्तीर्थे वालुकयाऽपि वा ॥ ४५ ॥ कृत्वा लिङ्गं सकृत्पूज्य वसेत्कल्पायुतं दिवि ॥ प्रजावान्भूमिमान्विद्वान्पुत्रवान्धनवांस्तथा ४६ ॥ ज्ञानवान्मुक्तिमान्साधुः शिवलिङ्गार्चनाद्भवेत् ॥ शिवलिङ्गार्चनं स्थानं मत्तीर्थं तीर्थमेव तत् ॥ भवेत्तत्र मृतः पापी शिवलोकं स गच्छति ॥ ४७ ॥ महादेव महादेव महादेवेतिवादिनः ॥ पश्चाद्यामि महात्रस्तो नामश्रवणलोभतः ॥ ४८ ॥ शिवेति शब्दमुच्चार्य्य प्राणांस्त्यजति यो नरः ॥ कोटिजन्मार्जितात्पापान्मुक्तो मुक्तिं प्रयाति सः ॥ ४९ ॥ शिवकल्याणवचनं कल्याणं मुक्तिवाचकम् ॥ यतस्तत्प्रभवेत्तेन स शिवः परिकीर्तितः ॥ ५० ॥ विच्छेदे धनबन्धूनां निमग्नः शोकसागरे ॥ शिवे

Digitization by eGangotri. Funding MHDE-Delhi

तिशब्दमुच्चार्य्य लभेत्सर्वशिवं नरः ॥ ५१ ॥ पापघ्ने वर्त्तते शिश्च वश्च मुक्तिप्रदे तथा ॥ पापघ्नो मोक्षदो नृणां शिवस्तेन
प्रकीर्तितः ॥ ५२ ॥ शिवेति च शिवं नाम यस्य वाचि प्रवर्त्तते ॥ कोटिजन्मार्जितं पापं तस्य नश्यति निश्चितम् ॥ ५३ ॥
इत्युक्त्वा शूलिने कृष्णो दत्त्वा कल्पतरुं मनुम् ॥ तत्त्वज्ञानं मृत्युजयमवोचत्तिंसहवाहिनीम् ॥ ५४ ॥ श्रीभगवानुवाच ॥अधुना तिष्ठ
वत्से त्वं गोलोके मम सन्निधौ ॥ काले भजिष्यसि शिवं शिवदं च शिवायनम् ॥ ५५ ॥ तेजःसु सर्वदेवानामाविर्भूय वरा
नने ॥ संहृत्य दैत्यान्सर्वांश्च भविता सर्वपूजिता ॥ ५६ ॥ ततः कल्पविशेषे च सत्यं सत्ययुगे सति ॥ भविता दक्षकन्या त्वं
सुशीला शम्भुगेहिनी ॥ ५७ ॥ ततः शरीरं संत्यज्य यज्ञे भर्त्तुश्च निन्दया ॥ मेनायां शैलभार्य्यायां भविता पार्वतीति च
॥ ५८ ॥ दिव्यं वर्षसहस्रं च विहरिष्यसि शम्भुना ॥ पूर्णं ततः सर्वकालमभेदं त्वं लभिष्यसि ॥ ५९ ॥ काले सर्वेषु विश्वेषु
महापूजासु पूजिते ॥ भविता प्रतिवर्षं च शारदी या सुरेश्वरि ॥ ॥ ६० ॥ ग्रामेषु नगरेष्वेव पूजिता ग्रामदेवता ॥ भवती भविते
त्येवं नामभेदेन चारुणा ॥ ६१ ॥ मदाज्ञया शिवकृतैस्तन्त्रैर्नानाविधैरपि ॥ पूजाविधिं विधास्यामि कवचं स्तोत्रसंयुतम् ॥ ६२ ॥
भविष्यन्ति महान्तश्च तवैव परिचारकाः ॥ धर्मार्थकाममोक्षाणां सिद्धाश्च फलभागिनः ॥ ६३ ॥ ये त्वां मातर्भजिष्यन्ति पुण्यक्षेत्रे
च भारते ॥ तेषां यशश्च कीर्तिश्च धर्मैश्वर्य्यं च वर्द्धते ॥ ६४ ॥ इत्युक्त्वा प्रकृतिं तस्यै मन्त्रमेकादशाक्षरम् ॥ दत्त्वा सकामबीजं
च मन्त्रराजमनुत्तमम् ॥ ६५ ॥ चकार विधिना ध्यानं भक्तं भक्तानुकम्पया ॥ श्रीमायाकामबीजाढ्यं ददौ मन्त्रं दशाक्षरम् ॥ ६६ ॥
सृष्ट्यौपयौगिकीं शक्तिं सर्वसिद्धिं च कामदाम् ॥ तद्विशिष्टोत्कृष्टतत्त्वं ज्ञानं तस्यै ददौ विभुः ॥ ६७ ॥ त्रयोदशाक्षरं मन्त्रं दत्त्वा
तस्मै जगत्पतिः ॥ कवचं स्तोत्रसहितं शङ्कराय तथा द्विज ॥ ६८ ॥ दत्त्वा धर्माय तं मन्त्रं सिद्धिज्ञानं तदेव च ॥ कामाय वह्नये
चैव कुबेराय च वायवे ॥ ६९ ॥ एवं कुबेरादिभ्यस्तु दत्त्वा मन्त्रादिकं परम्॥ विधिं प्रोवाच सृष्ट्यर्थं विधातुर्विधिरेव सः ॥ ७० ॥
श्रीभगवानुवाच ॥ मदीयं च तपः कृत्वा दिव्यं वर्षसहस्रकम् ॥ सृष्टिं कुरु महाभाग विधे नानाविधां पराम् ॥ ७१ ॥ इत्युक्त्वा

ब्रह्मणे कृष्णो ददौ मालां मनोरमाम् ॥ जगाम सार्द्धं गोपीभिर्गोपैर्वृन्दावनं वनम् ॥ ७२ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे सौतिशौ
नकसंवादे ब्रह्मखण्डे सृष्टिनिरूपणं नाम षष्ठोऽध्यायः ॥ ६ ॥ सौतिरुवाच ॥ तदा ब्रह्मा तपः कृत्वा सिद्धिं प्राप्य यथेप्सिताम् ॥
ससृजे पृथिवीमादौ मधुकैटभमेदसा ॥ १ ॥ ससृजे पर्वतानष्टौ प्रधानान्सुमनोहरान् ॥ क्षुद्रानसंख्यान्किं ब्रूमः प्रधानाख्यां निशा
मय ॥ २ ॥ सुमेरुं चैव कैलासं मलयं च हिमालयम् ॥ उदयं च तथाऽस्तं च सुवेलं गन्धमादनम् ॥ ३ ॥ समुद्रान्ससृजे सप्त नदा
न्कतिविधा नदीः ॥ वृक्षांश्च ग्रामनगरं समुद्राख्या निशामय ॥ ४ ॥ लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवान् ॥लक्षयोजनमानेन द्विगु
णांश्च परात्परान् ॥ ५ ॥ सप्तद्वीपांश्च तद्भूमिमण्डले कमलाकृते ॥ उपद्वीपांस्तथा सप्तसीमाशैलांश्च सप्त च ॥ ६ ॥ निबोध विप्र
द्वीपाख्यां पुरा या विधिना कृता ॥ जम्बूशाककुशप्लक्षक्रौञ्चन्यग्रोधपौष्करान् ॥ ७ ॥ मेरोरष्टसु शृङ्गेषु ससृजेऽष्टौ पुरीः प्रभुः ॥
अष्टानां लोकपालानां विहाराय मनोहराः ॥ ८ ॥ मूलेऽनन्तस्य नगरीं निर्माय जगतांपतिः ॥ ऊर्ध्वे स्वर्गांश्च सप्तैव तेषामाख्या
निशामय॥९॥भूर्लोकं च भुवर्लोकं स्वर्लोकं सुमनोहरम् ॥ जनोलोकं तपोलोकं सत्यलोकं च शौनक॥१०॥ शृङ्गमूर्धि ब्रह्मलोकं जरा
दिपरिवर्जितम् ॥ तदूर्ध्वे ध्रुवलोकं च सर्वतः सुमनोहरम् ॥११॥ तदधः सप्त पातालान्निर्ममे जगदीश्वरः ॥ स्वर्गातिरिक्तभोगाढ्या
नधोधः क्रमतो मुने ॥ १२ ॥ अतलं वितलं चैव सुतलं च तलातलम् ॥ महातलं च पातालं रसातलमधस्ततः ॥ १३ ॥
सप्तद्वीपैः सप्तनाकैः सप्तपातालसंज्ञकैः ॥ एभिर्लोकैश्च ब्रह्माण्डं ब्रह्माधिकृतमेव च ॥ १४ ॥ एवञ्चासंख्यब्रह्माण्डं सर्वं कृत्रिममेव
च ॥ महाविष्णोश्च लोम्नां च विवरेषु च शौनक ॥ १५ ॥ प्रतिविश्वेषु दिक्पाला ब्रह्मविष्णुमहेश्वराः ॥ सुरा नरादयः सर्वे
सन्ति कृष्णस्य मायया ॥ १६ ॥ ब्राह्माण्डगणनां कर्तुं न क्षमो जगतां पतिः ॥ न शङ्करो न धर्मश्च नच त्रिष्णुश्च के सुराः॥१७॥
संख्यातुमीश्वरः शक्तो न संख्यातुं तथापि सः ॥ विश्वाकाशदिशां चैव सर्वतो यद्यपि क्षमः ॥ १८ ॥ कृत्रिमाणि च विश्वानि
विश्वस्थानि च यानि च ॥ अनित्यानि च विप्रेन्द्र स्वप्नवन्नश्वराणि च ॥ १९ ॥ वैकुण्ठः शिवलोकश्च गोलोकश्च तयोः परः ॥

नित्यो विश्वबहिर्भूतश्चात्माकाशदिशो यथा ॥ २० ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे सौतिशौनकसंवादे ब्रह्मखण्डे सृष्टिनिरूपणं नाम सप्तमोऽध्यायः ॥ ७ ॥ सौतिरुवाच ॥ ब्रह्मा विश्वं विनिर्माय सावित्र्यां वरयोषिति ॥ चकार वीर्य्याधानं च कामुक्यां कामुको यथा ॥ १ ॥ सा दिव्यं शतवर्षं च धृत्वा गर्भं सुदुस्सहम् ॥ सुप्रसूता च सुषुवे चतुर्वेदान्मनोहरान् ॥ २ ॥ विविधान्शास्त्रसंघांश्च तर्कव्याकरणादिकान् ॥ षट्त्रिंशत्संख्यका दिव्या रागिणीः सुमनोहराः ॥ ३ ॥ षड्रागान्सुन्दरांश्चैव नानातालसमन्वितान् ॥ सत्यत्रेताद्वापरांश्च कलिं च कलहप्रियम् ॥ ४ ॥ वर्षमासमृतुं चैव तिथिं दण्डक्षणादिकम् ॥ दिनं रात्रिं च वारांश्च सन्ध्यामुषसमेव च ॥ ५ ॥ पुष्टिं च देवसेनां च मेधां च विजयां जयाम् ॥ षट्कृत्तिकाश्च योगांश्च करणं च तपोधनः ॥ ६ ॥ देवसेनां महाषष्ठीं कार्त्तिकेयप्रियां सतीम् ॥ मातृकासु प्रधाना सा बालानामिष्टदेवता ॥ ७ ॥ ब्राह्मं पाद्मं च वाराहं कल्पत्रयमिदं स्मृतम् ॥ नित्यं नैमित्तिकं चैव द्विपरार्द्धं च प्राकृतम् ॥ ८ ॥ चतुर्विधं च प्रलयं कालं वै मृत्युकन्यकाम् ॥ सर्वान्व्याधिगणांश्चैव सा प्रसूय स्तनं ददौ ॥ ९ ॥ अथ धातुः पृष्ठदेशादधर्मः समजायत॥अलक्ष्मीस्तद्वामपार्श्वाद्बभूवात्यन्तकामिनी ॥१०॥ नाभिदेशाद्विश्वकर्मा जातो वै शिल्पिनां गुरुः ॥ महान्तो वसवोऽष्टौ च महाबलपराक्रमाः ॥ ११ ॥ अथ धातुश्च मनस आविर्भूताः कुमारकाः ॥ चत्वारः पञ्चवर्षीया ज्वलन्तो ब्रह्मतेजसा ॥ १२ ॥ सनकश्च सनन्दश्च तृतीयश्च सनातनः ॥ सनत्कुमारो भगवांश्चतुर्थो ज्ञानिनां वरः ॥१३॥ आविर्बभूव मुखतः कुमारः कनकप्रभः ॥ दिव्यरूपधरः श्रीमान्सस्त्रीकः सुन्दरो युवा ॥ १४ ॥ क्षत्रियाणां बीजरूपो नाम्ना स्वायम्भुवो मनुः ॥ यास्त्री सा शतरूपा च रूपाढ्या कमला कला ॥१५॥ सस्त्रीकश्च मनुस्तस्थौ धात्राज्ञापरिपालकः ॥ स्वयं विधाता पुत्रांश्च तानुवाच प्रहर्षितान् ॥ १६ ॥ सृष्टिं कर्त्तुं महाभागो महाभागवतान्द्विज ॥ जग्मुस्ते च नहीत्युक्ता तप्तुं कृष्णपरायणाः ॥ १७ ॥ चुकोप हेतुना तेन विधाता जगतां पतिः ॥ कोपासक्तस्य च विधेर्ज्वलतो ब्रह्मतेजसा ॥ १८ ॥आविर्भूता ललाटाच्च रुद्रा एकादश प्रभो ॥ कालाग्निरुद्रः संहर्ता तेषामेकः प्रकीर्तितः ॥ १९ ॥ सर्वेषामेव विश्वानां स तामस इति स्मृतः ॥

राजसश्च स्वयं ब्रह्मा शिवो विष्णुश्च सात्त्विकौ ॥ २० ॥ गोलोकनाथः कृष्णश्च निर्गुणः प्रकृतेः परः ॥ परमज्ञानिनो मूर्खा वदन्ते
तामसं शिवम् ॥ २१ ॥ शुद्धसत्त्वस्वरूपं च निर्मलं वैष्णवाग्रणीम् ॥ शृणु नामानि रुद्राणां वेदोक्तानि च यानि च ॥ २२ ॥
महान्महात्मा मतिमान्भीषणश्च भयंकरः ॥ ऋतुध्वजश्चोर्ध्वकेशः पिङ्गलाक्षो रुचिः शुचिः ॥ २३ ॥ पुलस्त्यो दक्षकर्णाच्च पुलहो
वामकर्णतः ॥ दक्षनेत्रात्तथाऽत्रिश्च वामनेत्रात्क्रतुः स्वयम् ॥ २४ ॥ अरणिर्नासिकारन्ध्रादङ्गिराश्च मुखाद्रुचिः ॥ भृगुश्च वामपार्श्वाच्च
दक्षो दक्षिणपार्श्वतः ॥ २५ ॥ छायायाः कर्दमो जातो नाभेः पञ्चशिखस्तथा ॥ वक्षसश्चैव वोढुश्च कण्ठदेशाच्च नारदः ॥ २६ ॥
मरीचिः स्कन्धदेशाच्चैवापान्तरतमा गलात् ॥ वसिष्ठो रसनादेशात्प्रचेता अधरोष्ठतः ॥ २७ ॥ हंसश्च वामकुक्षेश्च दक्षकुक्षेर्यतिः
स्वयम् ॥ सृष्टिं विधातुं स विधिश्चकाराज्ञां सुतान्प्रति ॥ पितुर्वाक्यं समाकर्ण्य तमुवाच स नारदः ॥ २८ ॥ नारद उवाच ॥
पूर्वमानय मज्ज्येष्ठान्सनकादीन्पितामह ॥ कारयित्वा दारयुक्तानस्मान्वद जगत्पते ॥ २९ ॥ पित्रा ते तपसे युक्ताः संसाराय वयं
कथम् ॥ अहो हन्त प्रभोर्बुद्धिर्विपरीताय कल्पते ॥ ३० ॥ कस्मै पुत्राय पीयूषात्परं दत्तं तपोऽधुना ॥ कस्मै ददासि विषयं विषमं च
विषाधिकम् ॥ ३१ ॥ अतीव निम्ने घोरे च भवाब्धौ यः पतेत्पितः ॥ निष्कृतिस्तस्य नास्तीति कोटिकल्पे गतेऽपि च ॥ ३२ ॥
निस्तारबीजं सर्वेषां बीजं च पुरुषोत्तमम् ॥ सर्वदं भक्तिदं दास्यप्रदं सत्यं कृपामयम् ॥ ३३ ॥ भक्तैकशरणं भक्तवत्सलं स्वच्छमेव च
॥ भक्तप्रियं भक्तनाथं भक्तानुग्रहकारकम् ॥ ३४ ॥ भक्ताराध्यं भक्तसाध्यं विहाय परमेश्वरम् ॥ मनो दधाति को मूढो विषये
नाशकारणे ॥ ३५ ॥ विहाय कृष्णसेवां च पीयूषादधिकां प्रियाम् ॥ को मूढो विषमश्नाति विषमं विषयाभिधम् ॥ ३६ ॥ स्वप्न
वन्नश्वरं तुच्छमसत्यं मृत्युकारणम् ॥ यथा दीपशिखाग्रं च कीटानां सुमनोहरम् ॥३७॥ यथा बडिशमांसं च मत्स्यापातसुखप्रदम्॥
तथा विषयिणां तात विषयं मृत्युकारणम्॥३८॥इत्युक्त्वा नारदस्तत्र विरराम विधेः पुरः ॥ तस्थौ तातं नमस्कृत्य ज्वलदग्निशिखोपमः
॥३९॥ ब्रह्मा कोपपरीतश्च शशाप तनयं द्विज ॥ उवाच कम्पिताङ्गश्च रक्तास्यः स्फुरिताधरः ॥ ४० ॥ ब्रह्मोवाच ॥ भविता

ज्ञानलोपस्ते मच्छापेन च नारद ॥ क्रीडामृगश्च त्वं साध्यो योषिल्लुब्धश्च लम्पटः॥४१॥स्थिरयौवनयुक्तानां रूपाढ्यानां मनोहरः॥
पञ्चाशत्कामिनीनां च भर्ता च प्राणवल्लभः॥४२॥शृङ्गारशास्त्रवेत्ता च महाशृङ्गारलोलुपः॥नानाप्रकारशृङ्गारनिपुणानां·गुरोर्गुरुः ॥४३॥
गन्धर्वाणां च सुवरः सुस्वरश्च सुगायनः ॥ वीणावादनसन्दर्भनिष्णातः स्थिरयौवनः ॥ ४४ ॥ प्राज्ञो मधुरवाक् शान्तः सुशीलः
सुन्दरः सुधीः ॥ भविष्यसि न सन्देहो नामतश्चोपबर्हणः ॥ ४५ ॥ ताभिर्दिव्यं लक्षयुगं विहृत्य निर्जने वने ॥ पुनर्मदीयशापेन दासी
पुत्रश्च तत्परः ॥ ४६ ॥ वत्स वैष्णवसंसर्गाद्वैष्णवोच्छिष्टभोजनात् ॥ पुनः कृष्णप्रसादेन भविष्यसि मामात्मजः ॥ ४७ ॥ ज्ञानं
दास्यामि ते दिव्यं पुनरेव पुरातनम् ॥ आधुना भव नष्टस्त्वं मत्सुतो निपत ध्रुवम्॥४८॥ ब्रह्मेत्युक्त्वा सुतं विप्र विरराम जगत्पतिः
॥ रुरोद नारदस्तातमवोचत्संपुटाञ्जलिः ॥ ४९ ॥ नारद उवाच ॥ क्रोधं संहर संहर्तस्तात तात जगद्गुरो ॥ स्रष्टुस्तपस्वीशस्याहो
क्रोधोऽयं मय्यनाकरः ॥ ५० ॥ शपेत्परित्यजेद्विद्वान्पुत्रमुत्पथगामिनम् ॥ तपस्विनं सुतं शप्तुं कथमर्हसि पंडित ॥ ५१ ॥
जनिर्भवतु मे ब्रह्मन्यासु यासु च योनिषु ॥ न जहातु हरेर्भक्तिर्मा वेदं देहि मे वरम् ॥५२॥ पुत्रश्चेज्जगतां धातुर्नास्ति भक्तिर्हरेः पदे॥
सूकरादतिरिक्तश्च सोऽधमो भारते भुवि ॥ ५३ ॥ जातिस्मरो हरेर्भक्तियुक्तः सूकरयोनिषु ॥ जनिर्लभेत्स प्रवरो गोलोकं याति
कर्मणा ॥ ५४ ॥ गोविन्दचरणाम्भोजभक्तिमाध्वीकमीप्सितम् ॥ पिबतां वैष्णवादीनां स्पर्शपूता वसुन्धरा ॥ ५५ ॥ तीर्थानि स्पर्श
मिच्छन्ति वैष्णवानां पितामह ॥ पापानां पापितत्त्वानां क्षालनायात्मनामपि ॥५६॥ मन्त्रोपदेशमात्रेण नरा मुक्ताश्च भारते ॥ परैश्च
कोटिपुरुषैः पूर्वैः सार्धं हरेरहो ॥ ५७ ॥ कोटिजन्मार्जितात्पापान्मन्त्रग्रहणमात्रतः ॥ मुक्ताः शुध्यन्ति यत्पूर्वं कर्म निर्मूलयन्ति च
॥५८॥ पुत्रान्दारांश्च शिष्यांश्च सेवकान्बान्धवांस्तथा ॥ यो दर्शयति सन्मार्गं सद्गतिस्तं लभेद्ध्रुवम् ॥५९॥ यो दर्शयत्यसन्मार्गं
शिष्यैर्विश्वासितो गुरुः ॥ कुम्भीपाके स्थितिस्तस्य यावच्चन्द्रदिवाकरौ ॥ ६० ॥ स किंगुरुः स किंतातः स किंस्वामी स किंसुतः॥
यः श्रीकृष्णपदाम्भोजे भक्तिं दातुमनीश्वरः ॥ ६१ ॥ शप्तो निरपराधेन त्वयाऽहं चतुरानन ॥ मया शप्तुं त्वमुचितो घ्नन्तं घ्नन्त्य

पि पण्डिताः ॥ ६२ ॥ कवचस्तोत्रपूजाभिः सहितस्ते मनुर्मनोः ॥ लुप्तो भवतु मच्छापात्प्रतिविश्वेषु निश्चितम् ॥ ६३ ॥ अपूज्यो
भव विश्वेषु यावत्कल्पत्रयं पितः ॥ गतेषु त्रिषु कल्पेषु पूज्यपूज्यो भविष्यसि॥६४॥ अधुना यज्ञभागस्ते व्रतादिष्वपि सुव्रत ॥ पूजनं
चास्तु मामैकं वन्द्यो भव सुरादिभिः ॥ ६५ ॥ इत्युक्त्वा नारदस्तत्र विरराम पितुः पुरः ॥ तस्थौ सभायां स विधिर्हृदयेन विद्रु
यता ॥ ६६ ॥ उपबर्हेण गन्धर्वो नारदस्तेन हेतुना ॥ दासीपुत्रश्च शापेन पितुरेव च शौनक ॥ ६७ ॥ ततः पुनर्नारदश्च स बभूव
महानृषिः ॥ ज्ञानं प्राप्य पितुः पश्चात्कथयिष्यामि चाधुना ॥ ६८ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे सौतिशौनकसंवादे ब्रह्मखण्डे
ब्रह्मनारदशापोपलम्भनं नामाष्टमोऽध्यायः ॥ ८ ॥ सौतिरुवाच ॥ अथ ब्रह्मा स्वपुत्रांस्तानादिदेश च सृष्टये ॥ सृष्टिं प्रचक्रुस्ते
सर्वे विप्रेन्द्र नारदं विना ॥ १ ॥ मरीचेर्मनसो जातः कश्यपश्च प्रजापतिः ॥ अत्रेर्नेत्रमलाच्चन्द्रः क्षीरोदे च बभूव ह ॥ २ ॥
प्रचेतसोऽपि मनसो गौतमश्च बभूव ह ॥ पुलस्त्यमानसः पुत्रो मैत्रावरुण एव च ॥ ३ ॥ मनोश्च शतरूपायां तिस्रः कन्याः प्रज
ज्ञिरे ॥ आकूतिर्देवहूतिश्च प्रसूतिस्ताः पतिव्रताः ॥ ४ ॥ प्रियव्रतोत्तानपादौ द्वौ च पुत्रौ मनोहरौ ॥ उत्तानपादतनयो ध्रुवः परमधा
र्मिकः ॥ ५ ॥ आकूतिं रुचये प्रादाद्दक्षायाथ प्रसूतिकाम् ॥ देवहूतिं कर्दमाय यत्पुत्रः कपिलः स्वयम् ॥ ६ ॥ प्रसूत्यां दक्षबीजेन
षष्टिकन्याः प्रजज्ञिरे ॥ अष्टौ धर्माय स ददौ रुद्रायैकादश स्मृताः ॥ ७ ॥ शिवायैकां सतीं प्रादात्कश्यपाय त्रयोदश ॥ सप्तविंशति
कन्याश्च दक्षश्चन्द्राय दत्तवान् ॥ ८ ॥ नामानि धर्मपत्नीनां मत्तो विप्र निशामय ॥ शान्तिः पुष्टिर्धृतिस्तुष्टिः क्षमा श्रद्धा मतिः
स्मृतिः ॥ ९ ॥ शान्तेः पुत्रश्च सन्तोषः पुष्टेः पुत्रो महानभूत् ॥ धृतेर्धैर्य्यं च तुष्टेश्च हर्षदर्पौ सुतौ स्मृतौ ॥ १० ॥ क्षमापुत्रः
सहिष्णुश्च श्रद्धापुत्रश्च धार्मिकः ॥ मतेर्ज्ञानाभिधः पुत्रः स्मृतेर्जातिस्मरो महान् ॥ ११ ॥ पूर्वपत्न्यां च मूर्त्यां च नरनारायणावृषी ॥
बभूवुरेते धर्मिष्ठा धर्मपुत्राश्च शौनक ॥ १२ ॥ नामानि रुद्रपत्नीनां सावधानं निबोध मे ॥ कला कलावती काष्ठा कालिका कल
हप्रिया ॥ १३ ॥ कन्दली भीषणा रास्ना प्रमोचा भूषणा शुकी ॥ एतासां बहवः पुत्रा बभूवुः शिवपार्षदाः ॥ १४ ॥ सा सती

स्वामिनिन्दायां तनुं तत्याज यज्ञतः ॥ पुनर्भूत्वा शैलपुत्री लेभे सा शङ्करं पतिम् ॥ १५ ॥ कश्यपस्य प्रियाणां च नामानि शृणु
धार्मिक ॥ अदितिर्देबमाता वै दैत्यमाता दितिस्तथा॥१६॥ सर्पमाता तथा कद्रूर्विनता पक्षिसूस्तथा ॥ सुरभिश्च गवां माता महिषा
णां च निश्चितम् ॥ १७ ॥ सारमेयादिजन्तूनां सरमा सूश्चतुष्पदाम् ॥ दनुः प्रसूर्दानवानामन्याश्चेत्येवमादिकाः ॥ १८ ॥ इन्द्रश्च
द्वादशादित्या उपेन्द्राद्याः सुरा मुने ॥ कथिताश्चादितेः पुत्रा महाबलपराक्रमाः॥१९॥ इन्द्रपुत्रो जयन्तश्च ब्रह्मञ्शच्यामजाय त ॥
आदित्यस्य सवर्णायां कन्यायां विश्वकर्मणः॥२०॥ शनैश्चरयमौ पुत्रौ कालिन्दी कन्यका तथा ॥ उपेंद्रवीर्य्यात्पृथ्व्यां तु मङ्गलः
समजायत॥२१॥शौनक उवाच ॥ कथं सौते स चोपेन्द्रान्मङ्गलः समजायत ॥ वसुन्धरायां बलवांस्तन्मे व्याख्यातुमर्हसि ॥२२॥
सौतिरुवाच ॥ उपेन्द्ररूपमालोक्य कामार्ता च वसुन्धरा॥ विधाय सुन्दरीवेषमक्षता प्रौढयौवना ॥२३॥ मलये निर्जने रम्ये चारु
चन्दनपल्लवे ॥ चन्दनोक्षितसर्वाङ्गं रत्नभूषणभूषितम्॥२४॥तं सुशीलं शयानं च शान्तं सस्मितमीप्सितम् ॥ सस्मिता तस्य तल्पे
च सहसा समुपस्थिता॥२५॥सुरम्यां मालतीमालां ददौ तस्मै वरानना ॥ सुगन्धि चन्दनं चारु कस्तूरीकुङ्कुमान्वितम् ॥२६॥ उपे
न्द्रस्तन्मनो ज्ञात्वा कामिनीं कामपीडिताम् ॥ नानाप्रकारशृङ्गारं चकार च तया सह ॥ २७ ॥ तदङ्गसङ्गसंसक्ता मूर्छां प्राप सती
तदा ॥ मृतेव निद्रितेवासौ बीजाधानं कृते हरौ ॥ २८ ॥ तां विलग्नांच सुश्रोणीं सुखसम्भोगमूर्छिताम् ॥ बृहन्मुक्तनितम्बां च स
स्मितां विपुलस्तनीम् ॥ २९ ॥ क्षणं वक्षसि कृत्वा तां तदोष्ठं च चुचुम्ब ह ॥ विहाय तत्र रहसि जगाम पुरुषोत्तमः ॥ ३० ॥उर्वशी
पथि गच्छन्ती बोधयामास तां मुने ॥ सा च पप्रच्छ वृत्तान्तं कथयामास भूश्च ताम्॥ ३१ ॥ वीर्य्यसंवरणं कर्तुं सा चाशक्ता च
दुर्बला ॥ प्रवालस्याकरे त्रस्ता वीर्य्यन्यासं चकार सा ॥ ३२ ॥ तेन प्रवालवर्णश्च कुमारः समपद्यत ॥ तेजसा सूर्य्यसदृशो नारायण
सुतो महान् ॥ ३३ ॥ मङ्गलस्य प्रिया मेधा तस्य घण्टेश्वरो महान्॥ व्रणदाताऽतितेजस्वी विष्णुतुल्यो बभूव ह ॥३४॥ दितेर्हिर
ण्यकशिपुहिरण्याक्षौमहाबलौ ॥ कन्या च सिंहिका विप्र सैंहिकेयश्च तत्सुतः ॥३५॥ निर्ऋतिः सिंहिका सा च तेन राहुश्च नैर्ऋतः॥

सूकरेण हिरण्याक्षोऽप्यनपत्यो मृतो युवा ॥ ३६ ॥ हिरण्यकशिपोः पुत्रः प्रह्लादो वैष्णवाग्रणीः ॥ विरोचनश्च तत्पुत्रस्तत्पुत्रश्च बलिः स्वयम् ॥ ३७॥ बलेः पुत्रो[1] महायोगी ज्ञानी शङ्करकिंकरः ॥ दितेर्वंशश्च कथितः कद्रूवंशं निबोध मे ॥ ३८ ॥ अनन्तं वासुकिं चैव कालीयं च धनञ्जयम् ॥ कर्कोटकं तक्षकं च पद्ममैरावतं तथा ॥ ३९ ॥ महापद्मं च शंकुं च शंखं संवरणं तथा ॥ धृतराष्ट्रं च दुर्द्धर्षं दुर्जयं दुर्मुखं बलम् ॥ ४० ॥ गोक्षं गोकामुकं चैव विरूपादींश्च शौनक ॥ न तेषां प्रवराश्चैव यावत्यः सर्पजातयः ॥ ४१ ॥ कन्यका मनसा देवी कमलांशसमुद्भवा ॥ तपस्विनीनां प्रवरा महातेजस्विनी शुभा ॥ ४२ ॥ यत्पतिश्च जरत्कारुर्नारायणकुलोद्भवः ॥ आस्तीकस्तनयो यस्या विष्णुतुल्यश्च तेजसा ॥ ४३ ॥ एतेषां नाममात्रेण नास्ति नागभयं नृणाम् ॥ कद्रूवंशो निगदितो विनतायाः शृणुष्व मे ॥ ४४ ॥ वैनतेयारुणौ पुत्रौ विष्णुतुल्यपराक्रमौ ॥ तौ बभूवुः क्रमेणैव यावत्यः पक्षिजातयः ॥ ४५ ॥ गावश्च महिषाश्चैव सुरभिप्रवरा इमे ॥ सर्वे वै सारमेयाश्च बभूवुः सरमासुताः ॥ ॥४६॥ दानवाश्च दनोर्वंशा अन्यास्सामान्यजातयः ॥ उक्तः कश्यपवंशश्च चन्द्राख्यानं निबोध मे ॥ ४७ ॥ नामानि चन्द्रपत्नीनां सावधानं निशामय ॥ अत्यपूर्वं च चरितं पुराणेषु पुरातनम् ॥ ४८ ॥ अश्विनी भरणी चैव कृत्तिका रोहिणी तथा ॥ मृगशीर्षा तथाऽऽर्द्रा च पूज्या साध्वी पुनर्वसुः ॥ ४९ ॥ पुष्याऽऽश्लेषा मघा पूर्वफल्गुन्युत्तरफल्गुनी ॥ हस्ता चित्रा तथा स्वाती विशाखा चानुराधिका ॥ ५० ॥ ज्येष्ठा मूला तथा पूर्वाऽऽषाढा चैवोत्तरा स्मृता ॥ श्रवणा च धनिष्ठा च तथा शतभिषक् शुभा ॥ ५१ ॥ पूर्वा भाद्रोत्तरा भाद्रा रेवत्यन्ता विधुप्रियाः ॥ तासां मध्ये च सुभगा रोहिणी रसिका वरा ॥ ५२ ॥ सन्ततं रसभावेन चकार शशिनं वशम् ॥ रोहिण्युपगतश्चन्द्रो न यात्यन्यां च कामिनीम् ॥ ५३ ॥ सर्वा भगिन्यः पितरं कथयामासुराहताः ॥ सपत्नीकृतसन्तापं प्राणनाशकरं परम् ॥ ५४ ॥ दक्षः प्रकुपितश्चन्द्रमशपन्मन्त्रपूर्वकम् ॥ द्रुतं श्वशुरशापेन यक्ष्मग्रस्तो

---

[1] वाण इत्यर्थः ।

बभूव सः ॥ ५५ ॥ दिने दिने यक्ष्मणा स क्षीयमाणश्च दुःखितः ॥ वपुष्यर्द्धं क्षीयमाणे शंकरं शरणं ययौ ॥ ५६ ॥ दृष्ट्वा चन्द्रं
शंकरश्च क्लेशितं शरणागतम् ॥ करुणासागरस्तस्मै कृपया चाभयं ददौ ॥ ५७ ॥ निर्मुक्तं यक्ष्मणा कृत्वा स्वकपोले स्थलं ददौ ॥
अमरो निर्भयो भूत्वा स तस्थौ शिवशेखरे ॥ ५८ ॥ तं शिवः शेखरे कृत्वा चाभवच्चन्द्रशेखरः ॥ नास्ति देवेषु लोकेषु
शिवाच्छरणपंजरः ॥ ५९ ॥ दक्षकन्याः पतिं मुक्तं दृष्ट्वा च रुरुदुः पुनः ॥ आजग्मुः शरणं तातं दक्षं तेजस्विनां वरम् ॥ ६० ॥
उच्चैश्च रुरुदुर्गत्वा निहत्याङ्गं पुनः पुनः ॥ तमूचुः कातरं दीना दीननाथं विधेः सुतम् ॥ ६१ ॥ दक्षकन्या ऊचुः ॥
स्वामिसौभाग्यलाभाय त्वमुक्तोऽस्माभिरेव च ॥ सौभाग्यमस्तु नस्तात गतः स्वामी गुणान्वितः ॥ ६२ ॥ स्थिते चक्षुषि हे तात
दृष्टं ध्वान्तमयं जगत् ॥ विज्ञातमधुना स्त्रीणां पतिरेव हि लोचनम् ॥ ६३ ॥ पतिरेव गतिः स्त्रीणां पतिः प्राणाश्च सम्पदः ॥
धर्मार्थकाममोक्षाणां हेतुः सेतुर्भवार्णवे ॥ ६४ ॥ पतिर्नारायणः स्त्रीणां व्रतं धर्मः सनातनः ॥ सर्वं कर्म वृथा तासां स्वामिनां
विमुखाश्च याः ॥ ६५ ॥ स्नानं च सर्वतीर्थेषु सर्वयज्ञेषु दक्षिणा ॥ सर्वदानानि पुण्यानि व्रतानि नियमाश्च ये ॥ ६६ ॥ देवार्चनं
चानशनं सर्वाणि च तपांसि च ॥ स्वामिनः पादसेवायाः कलां नार्हति षोडशीम् ॥ ६७ ॥ सर्वेषां बान्धवानां च प्रियः पुत्रश्च
योषिताम् ॥ स एव स्वामिनोंऽशश्च शतपुत्रात्परः पतिः ॥ ६८ ॥ असद्वंशप्रसूता या सा द्वेष्टि स्वामिनं सदा ॥ यस्या मनश्चलं
दुष्टं सन्ततं परपूरुषे ॥ ६९ ॥ पतितं रोगिणं दुष्टं निर्धनं गुणहीनकम् ॥ युवानं चैव वृद्धं वा भजेत्तं न त्यजेत्सती ॥ ७० ॥
सगुणं निर्गुणं वापि द्वेष्टि या संत्यजेत्पतिम् ॥ पच्यते कालसूत्रे सा यावच्चंद्रदिवाकरौ ॥ ७१ ॥ कीटैः शुनकतुल्यैश्च भक्षिता सा
दिवानिशम् ॥ भुङ्क्ते मृतवसामांसं पिबेन्मूत्रं च तृष्णया ॥ ७२ ॥ गृध्रः कोटिसहस्राणि शतजन्मानि सूकरः ॥
श्वापदः शतजन्मानि सा भवेद्बन्धुहा ततः ॥ ७३ ॥ ततो मानवजन्मानि लभेच्चेत्पूर्वकर्मणः ॥ विधवा धनहीना च रोगयुक्ता
भवेद् ध्रुवम् ॥ ७४ ॥ देहिनः कान्तदानं च कामपूरं विधेः सुत ॥ विधात्रा सदृशस्त्वं च पुनः स्रष्टुं क्षमो जगत् ॥ ७५ ॥ कन्यानां

वचनं श्रुत्वा दक्षः शंकरसन्निधिम् ॥ जगाम शम्भुस्तं दृष्ट्वा समुत्थाय ननाम च ॥ ७६ ॥ दक्षस्तस्याशिषं कृत्वा समुवाच
कृपानिधिम् ॥ तत्याज कोपं दुर्द्धर्षो दृष्ट्वा च प्रणतं शिवम् ॥ ७७ ॥ दक्ष उवाच ॥ देहि जामातरं शम्भो मदीयं प्राणवल्लभम् ॥
मत्सुतानां च प्राणानां परमेव प्रियं पतिम् ॥ ७८ ॥ न चेद्ददासि जामातर्मम जामातरं विधुम् ॥ दास्यामि दारुणं शापं तुभ्यं
त्वं केन मुच्यसे ॥ ७९ ॥ दक्षस्य वचनं श्रुत्वा तमुवाच कृपानिधिः ॥ सुधाधिकं च वचनं ब्रह्मन्शरणपञ्जरः ॥ ८० ॥ शिव
उवाच ॥ करोषि भस्मसाच्चेन्मां दद्या वा शापमेव च ॥ नाहं दातुं समर्थश्च चन्द्रं च शरणागतम् ॥ ८१ ॥ शिवस्य वचनं
श्रुत्वा दक्षस्तं शप्तुमुद्यतः ॥ शिवः सस्मार गोविन्दं विपन्मोक्षणकारकम् ॥ ८२ ॥ एतस्मिन्नन्तरे कृष्णो वृद्धब्राह्मणरूपधृक्॥ सभा
ययौ तयोर्मूलं तौ तं च नमतुः क्रमात् ॥ ८३ ॥ दत्त्वा शुभाशिषं तौ स ब्रह्म ज्योतिः सनातनः ॥ उवाच शङ्करं पूर्वं परिपूर्णतमो
द्विज ॥ ८४ ॥ श्रीभगवानुवाच ॥ न चात्मनः प्रियः कश्चिच्छर्व सर्वेषु बन्धुषु ॥ आत्मानं रक्ष दक्षाय देहि चन्द्रं सुरेश्वर ॥८५॥
तपस्विनां वरः शान्तस्त्वमेवं वैष्णवाग्रणीः ॥ समः सर्वेषु जीवेषु हिंसाक्रोधविवर्जितः ॥ ८६ ॥ दक्षः क्रोधी च दुर्द्धर्षस्तेजस्वी
ब्रह्मणः सुतः ॥ शिष्टो बिभेति दुर्द्धर्षं न दुर्द्धर्षश्च कंचन ॥ ८७ ॥ नारायणवचः श्रुत्वा हसित्वा शङ्करः स्वयम् ॥ उवाच नीति
सारं च नीतिबीजं परात्परम् ॥ ८८ ॥ शङ्कर उवाच ॥ तपो दास्यामि तेजश्च सर्वसिद्धिं च सम्पदम् ॥ प्राणांश्च न समर्थोऽहं
प्रदातुं शरणागतम् ॥ ८९ ॥ यो ददाति भयेनैव प्रपन्नं शरणागतम् ॥ तं च धर्मः परित्यज्य याति शप्त्वा सुदारुणम् ॥ ९० ॥
सर्वं त्यक्तुं समर्थोऽहं न स्वधर्मं जगत्प्रभो ॥ यः स्वधर्मविहीनश्च स च सर्वबहिष्कृतः ॥ ९१ ॥ यश्च धर्मं सदा रक्षेद्धर्मस्तं
परिरक्षति ॥ धर्मं वेदेश्वर त्वं च किं मां ब्रूहि स्वमायया ॥ ९२ ॥ त्वं सर्वमाता स्रष्टा च हन्ता च परिणामतः ॥ त्वयि भक्ति
र्दृढा यस्य तस्य कस्माद्भयं भवेत् ॥ ९३ ॥ शङ्करस्य वचः श्रुत्वा भगवान्सर्वभाववित् ॥ चन्द्रं चन्द्राद्विनिष्कृष्य दक्षाय प्रददौ
हरिः ॥ ९४ ॥ प्रतस्थावर्द्धचन्द्रश्च निर्व्याधिः शिवशेखरे ॥ निजग्राह परं चन्द्रं विष्णुदत्तं प्रजापतिः ॥ ९५ ॥ यक्ष्मग्रस्तं च तं

दृष्ट्वा दक्षस्तुष्टाव माधवम् ॥ पक्षे पूर्णं क्षतं पक्षे तं चकार हरिः स्वयम् ॥ ९६ ॥ कृष्णस्तेभ्यो वरं दत्त्वा जगाम स्वालयं द्विज ॥
दक्षश्चन्द्रं गृहीत्वा च कन्याभ्यः प्रददौ पुनः ॥ ९७ ॥ चन्द्रस्ताश्च परिप्राप्य विजहार दिवानिशम् ॥ समं ददर्श ताः सर्वा
स्तत्प्रभृत्येव कम्पितः ॥ ९८ ॥ इत्येवं कथितं सर्वं किञ्चित्सृष्टिक्रमं मुने ॥ श्रुतं च गुरुवक्रेण पुष्करे मुनिसंसदि ॥ ९९ ॥ इति
श्रीब्रह्मवैवर्ते महापुराणे सौतिशौनकसंवादे ब्रह्मखण्डे नवमोऽध्यायः ॥ ९ ॥ सौतिरुवाच ॥ भृगोः पुत्रश्च च्यवनः शुक्रश्च ज्ञानि
नां वर ॥ क्रतोरपि क्रिया भार्य्या वालखिल्यानसूयत ॥ १ ॥ त्रयः पुत्राश्चाङ्गिरसो बभूवुर्मुनिसत्तमाः ॥ बृहस्पतिरुतथ्यश्च
शम्बरश्चापि शौनक ॥ २ ॥ वसिष्ठस्य सुतः शक्तिः शक्तेः पुत्रः पराशरः ॥ पराशरसुतः श्रीमान्कृष्णद्वैपायनो हरिः ॥ ३ ॥ व्यास
पुत्रः शिवांशश्च शुकश्च ज्ञानिनां वरः ॥ विश्वश्रवाः पुलस्त्यस्य यस्य पुत्रो धनेश्वरः ॥ ४ ॥ शौनक उवाच ॥ अहो पुराण वदु
षामत्यन्तं दुर्गमं वचः ॥ न बुद्धं वचनं किंचिद्धनेशोत्पत्तिपूर्वकम् ॥ ५ ॥ अधुना कथितं जन्म धनेशस्येश्वरादिदम् ॥ पुनर्भि
न्नक्रमं जन्म ब्रवीषि कथमेव माम् ॥ ६ ॥ सौतिरुवाच ॥ बभूवुरेते दिक्पालाः पुरा च परमेश्वरात् ॥ पुनश्च ब्रह्मशापेन स च
विश्वश्रवस्सुतः ॥ ७ ॥ गुरवे दक्षिणां दातुमुतथ्यश्च धनेश्वरम् ॥ ययाचे कोटिसौवर्णं यत्नतश्च प्रचेतसे ॥ ८ ॥ धनेशो विरसो
भूत्वा तस्मै तद्दातुमुद्यतः ॥ चकार भस्मसाद्विप्र पुनर्जन्म ललाभ सः ॥ ९ ॥ तेन विश्रवसः पुत्रः कुबेरश्च धनाधिपः ॥ रावणः
कुम्भकर्णश्च धार्मिकश्च विभीषणः ॥ १० ॥ पुलहस्य सुतो वात्स्यः शाण्डिल्यश्च रुचेः सुतः ॥ सावर्णिर्गौतमाज्जज्ञे मुनिप्रवर
एव सः ॥ ११ ॥ काश्यपः कश्यपाज्जातो भरद्वाजो बृहस्पतेः ॥ (स्वयं वात्स्यश्च पुलहात्सावर्णिर्गौतमात्तथा ॥ १२ ॥ शाण्डिल्य
श्च रुचेः पुत्रो मुनिस्तेजस्विनां वरः ॥) बभूवुः पञ्चगोत्राश्च एतेषां प्रवरा भवे ॥ १३ ॥ बभूवुर्ब्रह्मणो वक्रादन्या ब्राह्मणजातयः ॥
ताः स्थिता देशभेदेषु गोत्रशून्याश्च शौनक ॥ १४ ॥ चन्द्रादित्यमनूनां च प्रवराः क्षत्रियाः स्मृताः ॥ ब्रह्मणो बाहुदेशा
च्चैवान्याः क्षत्रियजातयः ॥ १५ ॥ ऊरुदेशाच्च वैश्याश्च पादतः शूद्रजातयः ॥ तासां सङ्करजातेन बभूवुर्वर्णसङ्कराः ॥ १६ ॥

गोपनापितभिल्लाश्च तथा मोदककूबरौ ॥ ताम्बूलिस्वर्णकारौ च वणिग्जातय एव च ॥ १७ ॥ इत्येवमाद्या विप्रेन्द्र सच्छूद्राः परिकीर्त्तिताः ॥ शूद्राविशोस्तु करणोऽम्बष्ठो वैश्यद्विजन्मनोः ॥ १८ ॥ विश्वकर्मा च शूद्रायां वीर्य्याधानं चकार सः ॥ ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः ॥ १९ ॥ मालाकारः शङ्खकारः कर्मकारः कुविन्दकः ॥ कुम्भकारः कांस्यकारः षडेते शिल्पिनां वराः ॥ २० ॥ सूत्रकारश्चित्रकारः स्वर्णकारस्तथैव च ॥ पतितास्ते ब्रह्मशापादयाज्या वर्णसङ्कराः ॥ ॥२१॥ शौनक उवाच ॥ कथं देवो विश्वकर्मा वीर्य्याधानं चकार सः ॥ शूद्रायामधमायां च कथं ते पतितास्त्रयः ॥ २२ ॥ कथं तेषु ब्रह्मशापो ह्यभवत्केन हेतुना ॥ हे पुराणविदां श्रेष्ठ तन्नः शंसितुमर्हसि ॥ २३ ॥ सौतिरुवाच ॥ घृताची कामतः कामं वेषं चक्रे मनोहरम् ॥ तामपश्यद्विश्वकर्मा गच्छन्तीं पुष्करे पथि ॥ २४ ॥ आगच्छत्तद्विलोकाच्च प्रसादोत्फुल्लमानसः ॥ तां ययाचे स शृङ्गारं कामेन हृतचेतनः ॥ २५ ॥ रत्नालङ्कारभूषाढ्यां सर्वावयवकोमलाम् ॥ यथा षोडशवर्षीयां शश्वत्सुस्थिरयौवनाम् ॥२६॥ बृहन्नितम्बभारार्त्तां मुनिमानसमोहिनीम् ॥ अतिवेगकटाक्षेण लोलां कामातिपीडिताम् ॥२७॥ तच्छ्रोणीं कठिनां दृष्ट्वा वायुनाऽपहृतांशुकाम् ॥ अतीवोच्चैः स्तनयुगं कठिनं वर्तुलं परम् ॥ २८ ॥ सुस्मितं चारु वक्रं च शरच्चन्द्रविनिन्दकम् ॥ पक्वबिम्बफलारक्तस्वोष्ठाधरं मनोहरम् ॥ २९ ॥ सिन्दूरबिन्दुसंयुक्तं कस्तूरीबिन्दुसंयुतम् ॥ कपोलमुज्ज्वलं शश्वन्महार्हमणिकुण्डलम् ॥ ३० ॥ तामुवाच प्रियां शान्तां कामशास्त्रविशारदः ॥ कामाग्निवर्द्धनोद्योगि वचनं श्रुतिसुन्दरम् ॥ ३१ ॥ विश्वकर्मोवाच ॥ अयि क्व यासि ललिते मम प्राणाधिके प्रिये ॥ मम प्राणांश्चापहृत्य तिष्ठ कान्ते क्षणं शुभे ॥ ३२ ॥ तवैवान्वेषणं कृत्वा भ्रमामि जगतीतलम् ॥ स्वप्राणांस्त्यक्तुमिष्टोऽहं त्वां न दृष्ट्वा हुताशने ॥३३॥ त्वं कामलोकं यासीति श्रुत्वा रम्भामुखोदितम् ॥ आगच्छमहमेवाद्य चास्मिन्वर्त्मन्यवस्थितः ॥ ३४ ॥ अहो सरस्वतीतीरे पुष्पोद्याने मनोहरे ॥ सुगन्धिमन्दशीतेन वायुना सुरभीकृते ॥ ३५ ॥ यभ कान्ते मया सार्द्धं यूना कान्तेन शोभने॥ विदग्धाया विदग्धेन सङ्गमो गुणवान्भवेत् ॥३६॥ स्थिरयौवनसंयुक्ता त्वमेव चिरजीविनी ॥ कामुकी कोमलाङ्गी च

सुन्दरीषु च सुन्दरी॥३७॥मृत्युंजयवरेणैव मृत्युकन्या जिता मया ॥ कुबेरभवनं गत्वा धनं लब्धं कुबेरतः॥३८॥रत्नमाला च वरुणाद्वायोः स्त्रीरत्नभूषणम् ॥वह्निशुद्धं वस्त्रयुगं वह्नेः प्राप्तं महौजसः॥३९॥कामशास्त्रं कामदेवाद्योषिद्रञ्जनकारणम् ॥ शृङ्गारशिल्पं यत्किञ्चिल्लब्धं चन्द्राच्च दुर्लभम् ॥ ४० ॥ रत्नमालां वस्त्रयुग्मं सर्वाण्याभरणानि च ॥ तुभ्यं दातुं हृदि कृतं प्राप्तं तत्क्षणमेव च ॥ ४१ ॥ गृहे तानि च संस्थाप्य चागतोऽन्वेषणे भवे ॥ विरामे सुखसम्भोगे तुभ्यं दास्यामि साम्प्रतम् ॥ ४२ ॥ कामुकस्य वचः श्रुत्वा घृताची सस्मिता मुने ॥ ददौ प्रत्युत्तरं शीघ्रं नीतियुक्तं मनोहरम् ॥ ४३ ॥ घृताच्युवाच ॥ त्वया यदुक्तं भद्रं तत्स्वीकरोम्यधुना परम् ॥ किन्तु सामयिकं वाक्यं ब्रवीष्यामि स्मरातुर ॥ ४४ ॥ कामदेवालयं यामि कृतवेषा च तत्कृते ॥ यद्दिने यत्कृते यामो वयं तेषां च योषितः ॥४५॥ अद्याहं कामपत्नी च गुरुपत्नी तवाधुना ॥ त्वयोक्तमधुनेदं च पठितं कामदेवतः ॥ ४६ ॥विद्यादाता मन्त्रदाता गुरुर्लक्षगुणैः पितुः ॥ मातुः सहस्रगुणवान्नास्त्यन्यस्तत्समो गुरुः ॥४७॥ गुरोः शतगुणैः पूज्या गुरुपत्नी श्रुतौ श्रुता ॥ पितुः शतगुणं पूज्या यथा माता विचक्षण ॥४८॥ मात्रा समागमे सूनोर्यावान्दोषः श्रुतौ श्रुतः ॥ ततो लक्षगुणो दोषो गुरुपत्नीसमागमे ॥ ४९ ॥ मातरित्येव शब्देन यां च सम्भाषते नरः ॥ स मातृतुल्या सत्येन धर्मः साक्षी सतामपि ॥ ५० ॥ तया हि संगतो यस्स्यात्कालसूत्रं प्रयाति सः ॥ तत्र घोरे वसत्येव यावच्चन्द्रदिवाकरौ ॥ ५१ ॥ मात्रा सह समायोगे ततो दोषश्चतुर्गुणः ॥ सार्द्धं च गुरुपत्न्या च तल्लक्षगुण एव च॥५२॥कुम्भीपाके पतत्येव यावद्वै ब्रह्मणो वयः ॥ प्रायश्चित्तं पापिनश्च तस्य नैव श्रुतौ श्रुतम् ॥५३॥ चक्राकारं कुलालस्य तीक्ष्णधारं च खड्गवत् ॥ वसामूत्रपुरीषैश्च परिपूर्णं सुदुस्तरम् ॥ ५४ ॥ शूलवत्कृमिसंयुक्तं तप्तमग्निसमं द्रवत् ॥ पापिनां तद्विहारं च कुम्भीपाकप्रकीर्तितम् ॥ ५५ ॥ यावान्दोषो हि पुंसां च गुरुपत्नीसमागमे ॥ तावांश्च गुरुपत्न्यां वै तत्र चेत्कामुकी यदि ॥ ५६ ॥ अद्य यास्यामि कामस्य मन्दिरं तस्य कामिनी ॥ वेषं कृत्वा गमिष्यामि त्वत्कृतेऽहं दिनान्तरे ॥५७॥ घृताचीवचनं श्रुत्वा विश्वकर्मा रुरोष ताम् ॥ शशाप शूद्रयोनिं च व्रजेति जगतीतले ॥५८॥ घृताची तद्वचः श्रुत्वा तं शशाप सुदारुणम् ॥ लभ

जन्म भवे त्वं च स्वर्गभ्रष्टो भवेति च ॥ ५९ ॥ घृताची कारुमुक्ता च साऽगच्छत्काममन्दिरम् ॥ कामेन सुरतं कृत्वा कथयामास
तां कथाम् ॥ ६० ॥ सा भारते च कामोक्त्या गोपस्य मदनस्य च ॥ पत्न्यां प्रयागे नगरे लेभे जन्म च शौनक ॥ ६१ ॥ जाति
स्मरा तत्प्रसूता बभूव च तपस्विनी ॥ वरं न वव्रे धर्मिष्ठा तपस्यायां मनो दधौ ॥ ६२ ॥ तपश्चकार तपसा तप्तकाञ्चनसन्निभा ॥
दिव्यं च शतवर्षं सा गङ्गातीरे मनोरमे ॥ ६३ ॥ वीर्य्येण सुरकारोश्च नव पुत्रान्प्रसूय सा ॥ पुनः स्वर्लोकं गत्वा च सा घृताची ब
भूव ह ॥ ६४ ॥ शौनक उवाच ॥ कथं वीर्य्यं सा दधार सुरकारोस्तपस्विनी ॥ पुत्रान्नव प्रसूता च कुत्र वा कति वासरान् ॥ ६५ ॥
सौतिरुवाच ॥ विश्वकर्मा तु तच्छापं समाकर्ण्य रुषाऽन्वितः ॥ जगाम ब्रह्मणः स्थानं शोकेन हृतचेतनः ॥ ६६ ॥ नत्वा स्तुत्वा
च ब्रह्माणं कथयामास तां कथाम् ॥ ललाभ जन्म ब्राह्मण्यां पृथिव्यामाज्ञया विधेः ॥ ६७ ॥ स एव ब्राह्मणो भूत्वा भुवि कारुर्ब
भूव ह ॥ नृपाणां च गृहस्थानां नानाशिल्पं चकार ह ॥६८॥ शिल्पं च कारयामास सर्वेभ्यः सर्वतः सदा ॥ विचित्रं विविधं शिल्पमा
श्चर्य्यं सुमनोहरम् ॥ ६९ ॥ एकदा तु प्रयागे च शिल्पं कृत्वा नृपस्य च ॥ स्नातुं जगाम गङ्गां स चापश्यत्तत्र कामिनीम्॥७०॥
घृताचीं नवरूपां च युवतिं तां तपस्विनीम् ॥ जातिस्मरां तां बुबुधे स च जातिस्मरो द्विज ॥ ७१ ॥ दृष्ट्वा सकामः सहसा बभूव
हृतचेतनः ॥ उवाच मधुरं शान्तः शान्तां तां च तपस्विनीम्॥७२॥ब्राह्मण उवाच ॥ अहोऽधुना त्वमत्रैव घृताचि सुमनोहरे ॥ मा
मां स्मरसि रम्भोरु विश्वकर्माऽहमेव च॥७३॥ शापमोक्षं करिष्यामि भज मां तव सुन्दरि॥त्वत्कृतेऽतिदहत्येव मनो मे स च मन्मथः॥
॥ ७४ ॥ द्विजस्य वचनं श्रुत्वा घृताची नवरूपिणी॥उवाच मधुरं शान्ता नीतियुक्तं परं वचः ॥७५॥ गोपिकोवाच ॥ तद्दिने कामका
न्ताऽहमधुना च तपस्विनी ॥ कथं त्वया संगता स्यां गंगातीरे च भारते ॥ ७६ ॥ विश्वकर्मन्निदं पुण्यं कर्मक्षेत्रं च भारतम् ॥
अत्र यत्क्रियते कर्म भोगोऽन्यत्र शुभाशुभम् ॥ ७७ ॥ धर्मी मोक्षकृते जन्म प्रलभ्य तपसः फलात् ॥ निबद्धः कुरुते कर्म मोहितो
विष्णुमायया ॥ ७८ ॥ माया नारायणीशाना परितुष्टा च यं भवेत् ॥ तस्मै ददाति श्रीकृष्णो भक्तिं तन्मन्त्रमीप्सितम् ॥ ७९ ॥

यो मूढो विषयासक्तो लब्धजन्मा च भारते ॥ विहाय कृष्णं सर्वेशं स मुग्धो विष्णुमायया ॥ ८० ॥ सर्वं स्मरामि देवाहमहो जातिस्मरा पुरा ॥ घृताची सुरवेश्याऽहमधुना गोपकन्यका ॥ ८१ ॥ तपः करोमि मोक्षार्थं गङ्गातीरे सुपुण्यदे ॥ नात्र स्थलं च क्रीडायाः स्थिरस्त्वं भव कामुक ॥ ८२ ॥ अन्यत्र यत्कृतं पापं गंगायां तद्विनश्यति ॥ गंगातीरे कृतं पापं सद्यो लक्षगुणं भवेत् ॥ ८३ ॥ तत्तु नारायणक्षेत्रे तपसा च विनश्यति ॥ यद्येव कामतः कृत्वा निवृत्तश्च भवेत्पुनः ॥ ८४ ॥ घृताचीवचनं श्रुत्वा विश्वकर्माऽनिलाकृतिः ॥ जगाम तां गृहीत्वा च मलयं चन्दनालयम् ॥ ८५ ॥ रम्यायां मलयद्रोण्यां पुष्पतल्पे मनोरमे ॥ पुष्पचन्दनवातेन संततं सुरभीकृते॥८६॥ चकार सुखसम्भोगं तया स विजने वने ॥ पूर्णं द्वादशवर्षं च बुबुधे न दिवानिशम्॥८७॥ बभूव गर्भः कामिन्याः परिपूर्णः सुदुर्वहः॥ सा सुषाव च तत्रैव पुत्रान्नव मनोहरान्॥८८॥कृतशिक्षितशिल्पांश्च ज्ञानयुक्तांश्च शौनक॥ पूर्णप्राक्तनतो युग्यान्बलयुक्तान्विचक्षणान् ॥ ८९ ॥ मालाकारान्कर्मकाराञ्छङ्खकारान्कुविन्दकान् ॥ कुम्भकारान्सूत्रकारान्स्वर्णचित्रकरांस्तथा ॥ ९० ॥ तौ च तेभ्यो वरं दत्त्वा तान्संस्थाप्य महीतले ॥ मानवीं तनुमुत्सृज्य जग्मतुर्निजमन्दिरम् ॥ ९१ ॥ स्वर्णकारः स्वर्णचौर्याद्ब्राह्मणानां द्विजोत्तम ॥ बभूव पतितः सद्यो ब्रह्मशापेन कर्मणा ॥ ९२ ॥ सूत्रकारो द्विजानां तु शापेन पतितो भुवि ॥ शीघ्रं च यज्ञकाष्ठानि न ददौ तेन हेतुना॥९३॥व्यतिक्रमेण चित्राणां सद्यश्चित्रकरस्तथा ॥ पतितो ब्रह्मशापेन ब्राह्मणानां च कोपतः॥९४॥कश्चिद्वणिग्विशेषश्च संसर्गात्स्वर्णकारिणः ॥ स्वर्णचौर्य्यादिदोषेण पतितो ब्रह्मशापतः ॥९५॥ कुलटायां च शूद्रायां चित्रकारस्य वीर्य्यतः ॥ बभूवाट्टालिकाकारः पतितो जारदोषतः ॥ ९६ ॥ अट्टालिकाकारबीजात्कुम्भकारस्य योषिति ॥ बभूव कोटकः सद्यः पतितो गृहकारकः ॥ ९७ ॥ कुम्भकारस्य बीजेन सद्यः कोटकयोषिति ॥ बभूव तैलकारश्च कुटिलः पतितो भुवि॥ ॥ ९८ ॥ सद्यः क्षत्रियबीजेन राजपुत्रस्य योषिति ॥ बभूव तीवरश्चैव पतितो जारदोषतः॥ ९९ ॥ तीवरस्य तु बीजेन तैलकारस्य

योषिति ॥ बभूव पतितो दस्युर्लैटश्च परिकीर्तितः ॥ १०० ॥ लेटं[1]स्तीवरकन्यायां जनयामास षट् सुतान् ॥ माल्लं[2] मन्त्रं मातरं च भण्डं कोलं कलन्दरम् ॥ १०१ ॥ ब्राह्मण्यां शूद्रवीर्य्येण पतितो जारदोषतः ॥ सद्यो बभूव चण्डालः सर्वस्मादधमोऽशुचिः ॥ ॥ १०२ ॥ तीवरेण च चण्डाल्यां चर्मकारो[3] बभूव ह ॥ चर्मकार्य्यां च चण्डालान्मांसच्छेदो बभूव ह ॥ १०३ ॥ मांसच्छेद्यां तीवरेण कोञ्चश्च परिकीर्तितः ॥ कोञ्चस्त्रियां तु कैवर्त्तात्कर्त्तारः[4] परिकीर्तितः ॥ १०४ ॥ सद्यश्चण्डालकन्यायां लेटवीर्य्येण शौनक ॥ बभूवतुस्तौ द्वौ पुत्रौ दुष्टौ हड्डिडमौ तथा ॥१०५॥ क्रमेण हड्डिकन्यायां सद्यश्चण्डालवीर्य्यतः ॥ बभूवुः पञ्च पुत्राश्च दुष्टा वनचराश्च ते ॥ १०६ ॥ लेटात्तीवरकन्यायां गङ्गातीरे च शौनक ॥ बभूव सद्यो यो बालो गङ्गापुत्रः प्रकीर्तितः ॥ १०७ ॥ गङ्गापुत्रस्य कन्यायां वीर्य्याद्वै वेषधारिणः ॥ बभूव वेषधारी च पुत्रो युङ्गी प्रकीर्तितः ॥ १०८ ॥ वैश्यात्तीवरकन्यायां सद्यः शुण्डी बभूव ह ॥ शुण्डीयोषिति वैश्यात्तु पौण्ड्रकश्च बभूव ह ॥ १०९ ॥ क्षत्रात्करणकन्यायां राजपुत्रो बभूव ह ॥ राजपुत्र्यां तु करणादागरीति प्रकीर्तितः ॥ ११० ॥ क्षत्रवीर्य्येण वैश्यायां कैवर्त्तः परिकीर्तितः ॥ कलौ तीवरसंसर्गाद्धीवरः पतितो भुवि ॥ १११ ॥ तीवर्यां धीवरात्पुत्रो बभूव रजकः स्मृतः ॥ रजक्यां तीवराच्चैव कोयाली[5]ति बभूव ह ॥ ११२ ॥ नापिताद्गोपकन्यायां सर्वस्वी तस्य योषिति ॥ क्षत्राद्बभूव व्याधश्च बलवान्मृगहिंसकः ॥ ११३ ॥ तीवराच्छुण्डिकन्यायां बभूवुः सप्त पुत्रकाः ॥ ते कलौ हड्डिसंसर्गाद्बभूवुर्दस्यवः सदा ॥ ११४ ॥ ब्राह्मण्यामृषिवीर्य्येण ऋतोः प्रथमवासरे ॥ कुत्सितश्चोदरे जातः कूदरस्तेन कीर्तितः ॥ ११५ ॥ तदशौचं विप्रतुल्यं पतितश्चर्तुदोषतः ॥ सद्यः कोटकसंसर्गादधमो जगतीतले ॥ ११६ ॥ क्षत्रवीर्य्येण वैश्यायामृतोः प्रथमवासरे ॥ जातः पुत्रो महादस्युर्बलवांश्च धनुर्द्धरः ॥ ११७ ॥ चकार वागतीतं च क्षत्रियेणापि वारितः ॥ तेन जात्याः स पुत्रश्च वागतीतः प्रकीर्तितः ॥ ११८ ॥ क्षत्रवीर्य्येण शूद्रायामृतुदोषेण पापतः ॥ बलवन्तो दुरन्ताश्च बभूवुर्म्लेच्छजातयः ॥ ११९ ॥ अविद्धकर्णाः

---

[1] नट इति पाठः । [2] मल्लमिति पाठः । [3] कर्मकार इति पाठः । [4] कोरश्चेति काण्डार इति वा पाठः । [5] कोदालीति पाठः ।

क्रूराश्च निर्भया रणदुर्जयाः ॥ शौचाचारविहीनाश्च दुर्द्धर्षा धर्मवर्जिताः ॥ १२० ॥ म्लेच्छात्कुविन्दकन्यायां जोला जातिर्बभूव ह॥
जोलात्कुविन्दकन्यायां शराङ्कः परिकीर्तितः ॥ १२१ ॥ वर्णसङ्करदोषेण बह्वयश्चाश्रुतजातयः ॥ तासां नामानि संख्याश्च को
वा वक्तुं क्षमो द्विज ॥ १२२ ॥ वैद्योऽश्विनीकुमारेण जातो विप्रस्य योषिति ॥ वैद्यवीर्य्येण शूद्रायां बभूवुर्बहवो जनाः ॥ १२३ ॥
ते च ग्राम्यगुणज्ञाश्च मन्त्रौषधिपरायणाः ॥ तेभ्यश्च जाताः शूद्रायां ये व्यालग्राहिणो भुवि ॥ १२४ ॥ शौनक उवाच ॥ कथं ब्रा
ह्मणपत्न्यां तु सूर्य्यपुत्रोऽश्विनीसुतः ॥ अहो केनाविवेकेन वीर्य्याधानं चकार ह ॥ १२५ ॥ सौतिरुवाच ॥ गच्छन्तीं तीर्थयात्रायां
ब्राह्मणीं रविनन्दनः ॥ ददर्श कामुकः शान्तः पुष्पोद्याने च निर्जने ॥ १२६ ॥ तया निवारितो यत्नाद्बलेन बलवान्सुरः ॥ अती
व सुन्दरीं दृष्ट्वा वीर्य्याधानं चकार सः ॥ १२७ ॥ द्रुतं तत्याज गर्भं सा पुष्पोद्याने मनोहरे ॥ सद्यो बभूव पुत्रश्च तप्तकाञ्चनस
न्निभः ॥ १२८ ॥ सपुत्रा स्वामिनो गेहं जगाम व्रीडिता सदा ॥ स्वामिनं कथयामास यन्मार्गे दैवसङ्कटम् ॥ १२९ ॥ विप्रो
रोषेण तत्याज तं च पुत्रं स्वकामिनीम् ॥ सरिद्बभूव योगेन सा च गोदावरी स्मृता ॥ १३० ॥ पुत्रं चिकित्साशास्त्रं च पाठयामा
स यत्नतः ॥ नानाशिल्पं च मंत्रं च स्वयं स रविनन्दनः ॥ १३१ ॥ विप्रश्च वेतनाज्योतिर्गणनाच्च निरन्तरम् ॥ वेदधर्मपरित्य
क्तो बभूव गणको भुवि ॥ १३२ ॥ लोभी विप्रश्च शूद्राणामग्रे दानं गृहीतवान् ॥ ग्रहणे मृतदानानामग्रादानी बभूव सः ॥ १३३ ॥
कश्चित्पुमान्ब्रह्मयज्ञे यज्ञकुण्डात्समुत्थितः ॥ स सूतो धर्मवक्ता च मत्पूर्वपुरुषः स्मृतः ॥ १३४ ॥ पुराणं पाठयामास तं च ब्रह्मा
कृपानिधिः ॥ पुराणवक्ता सूतश्च यज्ञकुण्डसमुद्भवः ॥ १३५ ॥ वैश्यायां सूतवीर्य्येण पुमानेको बभूव ह ॥ स भट्टो वावदूकश्च स
र्वेषां स्तुतिपाठकः ॥ १३६ ॥ एवं ते कथितः किंचित्पृथिव्यां जातिनिर्णयः ॥ वर्णसङ्करदोषेण बह्व्योऽन्याःसन्ति जातयः॥१३७॥
सबन्धो येषु येषां यः सर्वजातिषु सर्वतः ॥ तत्त्वं ब्रवीमि वेदोक्तं ब्रह्मणा कथितं पुरा ॥ १३८ ॥ पिता तातस्तु जनको जन्मदाता
प्रकीर्तितः ॥ अम्बा माता च जननी जनयित्री प्रसूरपि ॥ १३९ ॥ पितामहः पितृपिता तत्पिता प्रपितापहः ॥ अत ऊर्ध्वं ज्ञातय

श्च सगोत्राः परिकीर्तितः ॥ १४० ॥ मातामहः पिता मातुः प्रमातामह एव च ॥ मातामहस्य जनकस्तत्पिता वृद्धपूर्वकः ॥ १४१ ॥
पितामही पितुर्माता तच्छ्वश्रूः प्रपितामही ॥ तच्छ्वश्रूश्च परिज्ञेया सा वृद्धप्रपितामही ॥ १४२ ॥ मातामही मातृमाता मातृतुल्या
च पूजिता ॥ प्रमातामहीति ज्ञेया प्रमातामहकामिनी ॥ १४३ ॥ वृद्धमातामही ज्ञेया प्रतिपितुः कामिनी तथा ॥ पितृभ्राता पितृ
व्यश्च मातृभ्राता च मातुलः ॥ १४४ ॥ पितृष्वसा पितुर्मातृष्वसा मातुस्स्वसा स्मृता ॥ सूनुश्च तनयः पुत्रो दायादश्चात्मजस्तथा॥
॥ १४५ ॥ धनभाग्वीर्य्यजश्चैव पुंसि जन्ये च वर्त्तते ॥ जन्यायां दुहिता कन्या चात्मजा परिकीर्तिता ॥ १४६ ॥ पुत्रपत्नी वधू
र्ज्ञेया जामाता दुहितुः पतिः ॥ पतिः प्रियश्च भर्ता च स्वामीकान्ते च वर्तते ॥ १४७ ॥ देवरः स्वामिनो भ्राता ननांदा स्वामिनः
स्वसा ॥ श्वशुरः स्वामिनस्तातः श्वश्रूश्च स्वामिनः प्रसूः ॥ १४८ ॥ भार्य्या जाया प्रिया कान्ता स्त्री च पत्नी प्रकीर्तिता ॥
पत्नीभ्राता श्यालकश्च स्वसा पत्न्याश्च श्यालिका ॥ १४९ ॥ पत्नीमाता तथा श्वश्रूस्तत्पिता श्वशुरः स्मृतः ॥ सगर्भः
सोदरो भ्राता सगर्भा भगिनी स्मृता ॥ १५० ॥ भगिनीजो भागिनेयो भ्रातृजो भ्रातृपुत्रकः ॥ आवुत्तो भगिनीकान्तो भगिनीप
तिरेव च ॥ १५१ ॥ श्यालीपतिस्तु भ्राता च श्वशुरैकत्वहेतुना ॥ श्वशुरस्तु पिता ज्ञेयो जन्मदातुः समो मुने ॥१५२॥ अन्नदाता
भयत्राता पत्नीतातस्तथैव च ॥ विद्यादाता जन्मदाता पंचैते पितरो नृणाम् ॥ १५३॥ अन्नदातुश्च या पत्नी भगिनी गुरुकामिनी
माता च तत्सपत्नी च कन्या पुत्रप्रिया तथा ॥ १५४॥मातुर्माता पितुर्माता श्वश्रूपित्रोः स्वसा तथा॥पितृव्यस्त्री मातुलानी मातरश्च
चर्तुदश॥१५५॥पौत्रस्तु पुत्रपुत्रे च प्रपौत्रस्तत्सुतेऽपि च ॥ तत्पुत्राद्याश्च ये वंश्याः कुलजाश्च प्रकीर्तिताः॥१५६॥ कन्यापुत्रश्च दौहि
त्रस्तत्पुत्राद्याश्च बांधवाः॥भागिनेयसुताद्याश्च पुरुषा बांधवाः स्मृताः॥१५७॥भ्रातृपुत्रस्य पुत्राद्यास्ते पुनर्ज्ञातयः स्मृताः ॥ गुरुपुत्र
स्तथा भ्राता पोष्यः परमबान्धवः॥१५८॥गुरुकन्या च भगिनी पोष्या मातृसमा मुने॥पुत्रस्य च गुरुर्भ्राता पोष्यः सुस्निग्धबान्धवः
॥१५९॥पुत्रस्य श्वशुरो भ्राता बन्धुर्वैवाहिकः स्मृतः॥कन्यायाः श्वशुरे चैव तत्सम्बन्धः प्रकीर्तितः॥१६०॥गुरुश्च कन्यकायाश्च भ्रा

ता सुस्निग्धबान्धवः ॥ गुरुश्वशुरभ्रातॄणां गुरुतुल्यः प्रकीर्तितः ॥ १६१॥ बन्धुता येन सार्द्धं च तन्मित्रं परिकीर्तितम् ॥ मित्रं सुख
प्रदं ज्ञेयं दुःखदो रिपुरुच्यते ॥ १६२ ॥ बान्धवो दुःखदो दैवान्निस्सम्बन्धोऽसुखप्रदः ॥ सम्बन्धास्त्रिविधाः पुंसां विप्रेन्द्र जगतीतले
॥ १६३ ॥ विद्याजो योनिजश्चैव प्रीतिजश्च प्रकीर्तितः ॥ मित्रं तु प्रीतिजं ज्ञेयं स सम्बधः सुदुर्लभः ॥ १६४ ॥ मित्रमाता
मित्रभार्य्या मातृतुल्या न संशयः॥मित्रभ्राता मित्रपिता भ्रातृतातसमौ नृणाम् ॥१६५॥चतुर्थं नामसम्बन्धमित्याह कमलोद्भवः॥जार
श्चोपपतिर्बन्धुर्दुष्टा सम्भोगकर्त्तरि ॥ १६६ ॥ उपपत्न्यां नवज्ञा च प्रेयसी चित्तहारिणी ॥ स्वामितुल्यश्च जारश्च नवज्ञा गृहिणी
समा ॥ १६७ ॥ सम्बन्धो देशभेदे च सर्वदेशे विगर्हितः ॥ अवैदिको निन्दितस्तु विश्वामित्रेण निर्मितः ॥ १६८ ॥ दुस्त्यजश्च
महद्भिस्तु देशभेदे विधीयते ॥ अकीर्तिजनकः पुंसां योषितां च विशेषतः ॥ १६९ ॥ तेजीयसां न दोषाय विद्यमाने युगे युगे
॥ १७० ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे सौतिशौनकसंवादे ब्रह्मखण्डे जातिसम्बन्धनिर्णयो नाम दशमोऽध्यायः ॥ १० ॥
शौनक उवाच ॥ द्विजः स भार्य्यां संत्यज्य किञ्चकार विशेषतः ॥ अश्विनोर्वा महाभाग किं नाम कस्य वंशजौ ॥ १ ॥ सौतिरु
वाच ॥ द्विजश्च सुतपा नाम भारद्वाजो महामुनिः ॥ तपश्चकार कृष्णस्य लक्षवर्षं हिमालये ॥ २ ॥ महातपस्वी तेजस्वी प्रज्वल
न्ब्रह्मतेजसा ॥ ज्योतिर्ददर्श कृष्णस्य गगने सहसा क्षणम् ॥ ३ ॥ वरं स वव्रे निर्लिप्तमात्मानं प्रकृतेः परम् ॥ न च मोक्षं ययाचे
तं दास्यं भक्तिं च निश्चलाम् ॥ ४ ॥ बभूवाकाशवाणीति कुरु दारपरिग्रहम् ॥ पश्चाद्दास्यं प्रदास्यामि भक्तिं भोगक्षये द्विज ॥५॥
पितॄणां मानसीं कन्यां ददौ तस्मै विधिः स्वयम् ॥ तस्यां कल्याणमित्रश्च बभूव मुनिपुङ्गव ॥ ६ ॥ यस्य स्मरणमात्रेण न भवे
त्[1]कुलिशाद्भयम् ॥ न द्रष्टव्यं बन्धुमात्रं नूनं तत्स्मरणाल्लभेत ॥ ७ ॥ कल्याणमित्रजननीं परित्यज्य महामुनिः ॥ शशाप सूर्य्य
पुत्रं च यज्ञभागवर्जितो भव ॥ ८ ॥ स सोदरश्च वा पूज्यो भवेति च सुराधम ॥ व्याधिग्रस्तो जडाङ्गश्च भूयात्तेऽकीर्तिमानिति॥९॥

---

[1] कलिजादिति पाठः ।

इत्युक्त्वा सुतपा गेहं प्रतस्थे सूनुना सह ॥ अश्विभ्यां सहितः सूर्य्यः प्रययौ च तदन्तिकम् ॥ १० ॥ पुत्राभ्यां व्याधियुक्ताभ्यां सूर्य्यस्त्रिजगतां पतिः ॥ मुनीन्द्रं वै सुतपसं स तुष्टाव च शौनक ॥ ११ ॥ सूर्य्य उवाच॥ क्षमस्व भगवन्विप्र विष्णुरूप युगे युगे ॥ मम पुत्रापराधं च भारद्वाज मुनीश्वर ॥ १२ ॥ ब्रह्मविष्णुमहेशाद्याः सुराः सर्वे च सन्ततम् ॥ भुञ्जते विप्रदत्तं तु फलपुष्पजलादिकम् ॥ १३ ॥ ब्राह्मणावाहिता देवाः शश्वद्विश्वेषु पूजिताः ॥ न च विप्रात्परो देवो विप्ररूपी स्वयं हरिः ॥ १४ ॥ ब्राह्मणे परितुष्टे च तुष्टो नारायणः स्वयम् ॥ नारायणे च सन्तुष्टे सन्तुष्टाः सर्वदेवताः ॥ १५ ॥ नास्ति गङ्गासमं तीर्थं न च कृष्णात्परः सुरः ॥ न शङ्कराद्वैष्णवश्च न सहिष्णुर्धरापरा ॥ १६ ॥ न च सत्यात्परो धर्मो न साध्वी पार्वतीपरा ॥ न दैवाद्बलवान्कश्चिन्न च पुत्रात्परः प्रियः ॥ १७ ॥ न च व्याधिसमः शत्रुर्न च पूज्यो गुरोः परः ॥ नास्ति मातृसमो बन्धुर्न च मित्रं पितुः परम् ॥ १८ ॥ एकादशीव्रतान्नान्यत्तपो नानशनात्परम् ॥ परं सर्वधनं रत्नं विद्या रत्नं परं ततः ॥ १९ ॥ सर्वाश्रमैः परो विप्रो नास्ति विप्रसमो गुरुः ॥ वेदवेदाङ्गतत्त्वज्ञ इत्याह कमलोद्भवः ॥ २० ॥ सूर्य्यस्य वचनं श्रुत्वा भारद्वाजो ननाम तम् ॥ नीरुजौ चापि तत्पुत्रौ चकार तपसः फलात् ॥ २१ ॥ पश्चाच्च तव पुत्रौ च यज्ञभाजौ भविष्यतः ॥ इत्युक्त्वा तं च सुतपाः प्रणम्याहस्करं मुनिः ॥ २२ ॥ जगाम गङ्गां संत्रस्तो हरिसेवनतत्परः ॥ पुत्राभ्यां सहितः सूर्य्यो जगाम निज मन्दिरम् ॥ २३ ॥ बभूवतुस्तौ पूज्यौ च यज्ञभाजौ द्विजाशिषा ॥ एतत्सूर्यकृतं विप्रस्तोत्रं यो मानवः पठेत् ॥ विप्रपादप्रसादेन सर्वत्र विजयी भवेत् ॥ २४ ॥ ब्राह्मणेभ्यो नम इति प्रातरुत्थाय यः पठेत् ॥ स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ॥ २५ ॥ पृथिव्यां यानि तीर्थानि तानि तीर्थानि सागरे ॥ सागरे यानि तीर्थानि विप्रपादेषु तानि च ॥ २६ ॥ विप्रपादोदकं पीत्वा यावत्तिष्ठति मेदिनी ॥ तावत्पुष्करपात्रेषु पिबंति पितरो जलम् ॥ २७ ॥ विप्रपादोदकं पुण्यं भक्तियुक्तश्च यः पिबेत् ॥ स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ॥२८॥ महारोगी यदि पिबेद्विप्रपादोदकं द्विज ॥ मुच्यते सर्वरोगाच्च मासमेकं तु भक्तितः ॥२९ ॥ अविद्यो वा

सविद्यो वा संध्यापूतो हि यो द्विजः ॥ स एव विष्णुसदृशो न हरौ विमुखो यदि ॥ ३० ॥ घ्नन्तं विप्रं शपन्तं वा न हन्यान्न च तं
शपेत् ॥ गोभ्यः शतगुणं पूज्यो हरिभक्तश्च स स्मृतः॥३१॥पादोदकं च नैवेद्यं भुङ्क्ते विप्रस्य यो द्विज॥नित्यं नैवेद्यभोजी यो राज
सूयफलं लभेत् ॥ ३२ ॥ एकादश्यां न भुङ्क्ते यो नित्यं कृष्णं समर्चयेत्॥तस्य पादोदकं प्राप्य स्थलं तीर्थं भवेद् ध्रुवम्॥ ३३ ॥
यो भुङ्क्ते भोजनोच्छिष्टं नित्यं नैवेद्यभोजनम् ॥ कृष्णदेवस्य पूतोऽसौ जीवन्मुक्तो महीतले ॥ ३४ ॥ अन्नं विष्ठा पयो मूत्रं यद्वि
ष्णोरनिवेदितम् ॥ द्विजानां कुलजातानामित्याह कमलोद्भवः॥३५॥ब्रह्मा च ब्रह्मपुत्राश्च सर्वे विष्णुपरायणाः॥ब्राह्मणस्तत्कुले जातो
विमुखश्च हरौ कथम् ॥३६॥ पित्रोर्मातामहादीनां संसर्गस्य गुरोश्च वा ॥ दोषेण विमुखाः कृष्णे विप्रा जीवन्मृताश्च ते ॥ ३७ ॥ स
किंगुरुः स किंतातः स किंपुत्रः स किंसखा ॥ स किंराजा स किंबन्धुर्न दद्याद्यो हरौ मतिम् ॥ ३८ ॥ अवैष्णवाद्द्विजाद्विप्र चण्डालो
वैष्णवो वरः ॥ सगणः श्वपचो मुक्तो ब्राह्मणो नरकं व्रजेत् ॥ ३९ ॥ सन्ध्याहीनोऽशुचिर्नित्यं कृष्णे वा विमुखो द्विजः ॥ स एव
ब्राह्मणाभासो विषहीनो यथोरगः ॥ ४० ॥ गुरुवक्राद्विष्णुमंत्रो यस्य कर्णे प्रविशति ॥ तं वैष्णवं महापूतं जीवन्मुक्तं वदेद्विधिः ॥
॥ ४१ ॥ पुंसां मातामहादीनां शतैः सार्द्धं हरेः पदम् ॥ प्रयाति वैष्णवः पुंसामात्मनः कुलकोटिभिः ॥४२॥ ब्रह्मक्षत्रियविट्शूद्रा
श्चतस्रो जातयो यथा ॥ स्वतन्त्रा जातिरेका च विश्वस्मिन्वैष्णवाभिधा ॥ ४३ ॥ ध्यायन्ति वैष्णवाः शश्वद्गोविन्दपदपङ्कजम् ॥
ध्यायते तांश्च गोविन्दः शश्वत्तेषां च सन्निधौ ॥४४॥ सुदर्शनं संनियोज्य भक्तानां रक्षणाय च ॥ तथापि न हि निश्चिन्तोऽवतिष्ठे
द्भक्तसन्निधौ ॥ ४५ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे सौतिशौनकसंवादे ब्रह्मखण्डे विष्णुवैष्णवब्राह्मणप्रशंसा नामैकादशोऽध्यायः ॥
॥ ११ ॥ शौनक उवाच ॥ ऋषिवंशप्रसङ्गेन बभूवुर्विविधाः कथाः ॥ उपालम्भेन प्रस्तावात्कौतुकेन श्रुता मया ॥१॥ प्रजा वा स
सृजुः के वा ऊर्ध्वरेताश्च कश्चन ॥ पित्रा सह विरोधेन नारदः किं चकार सः ॥ २ ॥ पितुः शापेन पुत्रस्य किं बभूव विरोधतः ॥

---

१ सन्ध्याहीनो ह्यवैष्णवः ॥ तत्र विष्णुस्मरणादेस्सर्वत्र तैराचरणात्। स्मार्ताश्च पञ्चायतनपूजकाः ।

पितुर्वा पुत्रशापेन सौते तत्कथ्यतां शुभम् ॥ ३ ॥ सौतिरुवाच ॥ हंसो यतिश्चारणिश्च वोढुः पञ्चशिखस्तथा ॥ अपान्तरतमाश्चैव
सनकाद्याश्च शौनक ॥ ४ ॥ एतैर्विनाऽन्ये बहवो ब्रह्मपुत्राश्च सन्ततम् ॥ सांसारिकाः प्रजावन्तो गुर्वाज्ञापरिपालकाः ॥ ५ ॥
अपूज्यः पुत्रशापेन स्वयं ब्रह्मा प्रजापतिः ॥ तेनैव ब्रह्मणो मन्त्रं नोपासन्ते विपश्चितः ॥ ६ ॥ नारदो गुरुशापेन गन्धर्वश्च बभूव सः॥
कथयामि सुविस्तीर्णं तद्वृत्तान्तं निशामय ॥ ७ ॥ गन्धर्वराजः सर्वेषां गन्धर्वाणां वरो महान् ॥ परमैश्वर्य्यसंयुक्तः पुत्रहीनो हि कर्मणा
॥ ८ ॥ गुर्वाज्ञया पुष्करे स परमेण समाधिना ॥ तपश्चकार शम्भोश्च कृपणो दीनमानसः ॥ ९ ॥ शिवस्य कवचं स्तोत्रं मन्त्रं
च द्वादशाक्षरम् ॥ ददौ गन्धर्वराजाय वसिष्ठश्च कृपानिधिः ॥ १० ॥ जजाप परमं मन्त्रं दिव्यं वर्षशतं मुने ॥ पुष्करे स
निराहारः पुत्रदुःखेन तापितः ॥ ११ ॥ विरामे शतवर्षस्य ददर्श पुरतः शिवम् ॥ भासयंतं दश दिशो ज्वलन्तं ब्रह्मते
जसा ॥ १२ ॥ महत्तेजस्स्वरूपं च भगवन्तं सनातनम् ॥ ईषद्धासं प्रसन्नास्यं भक्तानुग्रहकारकम् ॥ १३ ॥ तपोरूपं तपो
बीजं तपस्याफलदं फलम् ॥ शरणागतभक्ताय दातारं सर्वसम्पदाम् ॥ १४ ॥ त्रिशूलपट्टिशधरं वृषभस्थं दिगम्बरम् ॥ शुद्ध
स्फटिकसंकाशं त्रिनेत्रं चन्द्रशेखरम् ॥ १५ ॥ तप्तस्वर्णप्रभाजुष्टजटाजालधरं वरम् ॥ नीलकण्ठं च सर्वज्ञ नागयज्ञोप
वीतकम् ॥ १६ ॥ संहर्त्तारं च सर्वेषां कालं मृत्युंजयं परम् ॥ ग्रीष्ममध्याह्नमार्त्तण्डकोटिसंकाशमीश्वरम् ॥ १७ ॥ तत्त्व
ज्ञानप्रदं शांतं मुक्तिदं हरिभक्तिदम् ॥ दृष्ट्वा ननाम सहसा गन्धर्वो दण्डवद्भुवि ॥ १८ ॥ वसिष्ठदत्तस्तोत्रेण तुष्टाव परमेश्वरम् ॥
वरं वृणुष्वेति शिवस्तमुवाच कृपानिधिः ॥ स ययाचे हरेर्भक्तिं पुत्रं परमवैष्णवम् ॥ १९ ॥ गन्धर्वस्य वचः श्रुत्वा चाह
सीच्चन्द्रशेखरः ॥ उवाच दीनं दीनेशो दीनबन्धुः सनातनम् ॥ २० ॥ श्रीमहादेव उवाच ॥ कृतार्थस्त्वं वरादेकादन्यच्चर्वितचर्वणम् ॥
गन्धर्वराज वृणुषे को वा तृप्तोऽतिमङ्गले ॥ २१ ॥ यस्य भक्तिर्हरौ वत्स सुदृढा सर्वमङ्गला ॥ स समर्थः सर्वविश्वं पातुं कर्तुं च

लीलया ॥ २२ ॥ आत्मनः कुलकोटिं च शतं मातामहस्य च ॥ पुरुषाणां समुद्धृत्य गोलोकं याति निश्चितम् ॥२३॥ त्रिविधानि
च पापानि कोटिजन्मार्जितानि च ॥ निहत्य पुण्यभोगं च हरिदास्यं लभेद्ध्रुवम् ॥२४॥ तावत्पत्नी सुतस्तावत्तावदैश्वर्य्यमीप्सितम्॥
सुखं दुःखं नृणां तावद्यावत्कृष्णे न मानसम् ॥ २५ ॥ कृष्णे मनसि संजाते भक्तिखड्गो दुरत्ययः ॥ नराणां कर्मवृक्षाणां मूलच्छेदं
करोत्यहो ॥ २६ ॥ [1]भवेद्येषां सुकृतिनां पुत्राः परमवैष्णवाः ॥ कुलकोटिं च तेषां ते उद्धरन्त्येव लीलया ॥ २७ ॥ चरितार्थः
पुमानेकाद्धरमिच्छुर्वरादहो ॥ किं वरेण द्वितीयेन पुंसां तृप्तिर्न मङ्गले ॥ २८ ॥ धनं संचितमस्माकं वैष्णवानां सुदुर्लभम् ॥ श्रीकृष्णे
भक्तिदास्यं च न वयं दातुमुत्सुकाः ॥२९॥ वरयान्यं वरं वत्स यत्ते मनसि वांछितम् ॥ इन्द्रत्वममरत्वं वा ब्रह्मत्वं लभ दुर्लभम् ॥३०॥
सर्वसिद्धिं महायोगं ज्ञानं मृत्युजयादिकम् ॥ सुखेन सर्वं दास्यामि हरिदास्यं त्यज ध्रुवम् ॥ ३१ ॥ शङ्करस्य वचः श्रुत्वा शुष्ककण्ठोष्ठतालुकः
॥ उवाच दीनो दीनेशं दातारं सर्वसम्पदाम् ॥ ३२ ॥ गन्धर्व उवाच ॥ यत्पक्ष्मचालनेनैव ब्रह्मणः पतनं भवेत् ॥ तद्ब्रह्मत्वं
स्वप्नतुल्यं कृष्णभक्तो न चेच्छति ॥ ३३ ॥ इन्द्रत्वममरत्वं वा सिद्धियोगादिकं शिव ॥ ज्ञानं मृत्युजयाद्यं वा न हि भक्तस्य
वाञ्छितम् ॥ ३४ ॥ सालोक्यसार्ष्टिसामीप्यसायुज्यं श्रीहरेरपि ॥ तत्र निर्वाणमोक्षं च न हि वाञ्छन्ति वैष्णवाः ॥ ३५ ॥ शश्वत्तत्र
दृढा भक्तिर्हरिदास्यं सुदुर्लभम् ॥ स्वप्ने जागरणे भक्ता वाञ्छन्त्येवं वरं वरम् ॥ ३६ ॥ तद्दास्यं वैष्णवसुतं देहि कल्पतरो वरम् ॥
त्वां प्राप्य लभते तुष्टं वरं सर्ववरोऽवरः ॥ ३७॥ न दास्यसीदं चेच्छम्भो वरं दुष्कृतिनं च माम् ॥ कृत्वा हि स्वशिरश्छेदं प्रदास्यामि
हुताशने ॥ ३८ ॥ गन्धर्ववचनं श्रुत्वा तमुवाच कृपानिधिः ॥ भक्तं दीनं च भक्तेशो भक्तानुग्रहकारकः ॥३९॥ श्रीशंकर उवाच ॥
हरिभक्तिं हरेर्दास्यं पुत्रं परमवैष्णवम् ॥ चिरायुषं च गुणिनं शश्वत्सुस्थिरयौवनम् ॥ ४० ॥ ज्ञानिनं सुन्दरवरं गुरुभक्तं जितेन्द्रियम् ॥
गन्धर्वराजप्रवरं [2]वरेमं लभ मा शुचः ॥ ४१ ॥ इत्युक्त्वा शंकरस्तस्माज्जगाम स्वालयं मुने ॥ गन्धर्वराजः सन्तुष्ट आजगाम स्वम

---

१ भवेयुरित्यर्थः । एकवचनं त्वत्रार्षम् । २ वरमिमं लभस्वेत्यर्थः । सन्धिर्विभक्तिलोपश्चार्षः ।

न्दिरम् ॥ ४२ ॥ प्रफुल्लमानसाः सर्वे मानवाः सिद्धकर्मणः ॥ नारदस्तस्य भार्य्यायां लेभे जन्म च भारते ॥ ४३ ॥ सुषाव पुत्रं सा वृद्धा पर्वते गन्धमादने ॥ गुरुर्वसिष्ठो भगवान्नाम चक्रे यथोचितम् ॥ ४४ ॥ बालकस्य च तस्यैव मङ्गलं मङ्गले दिने ॥ उपशब्दोऽधिकार्थश्च पूज्ये च बर्हणः पुमान् ॥ पूज्यानामधिको बालस्तेनोपबर्हणाभिधः ॥ ४५ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे सौति शौनकसंवादे ब्रह्मखण्डे नारदजन्मकथनं नाम द्वादशोऽध्यायः ॥ १२ ॥ सौतिरुवाच ॥ पुत्रोत्सवे च रत्नानि धनानि विविधानि च ॥ गन्धर्वराजः प्रददौ ब्राह्मणेभ्यो मुदाऽन्वितः ॥ १ ॥ उपबर्हणस्तु कालेन हरेर्मन्त्रं सुदुर्लभम् ॥ वसिष्ठेन तु सम्प्राप्य स चक्रे दुष्करं तपः ॥ २ ॥ एकदा गण्डकीतीरे तं च सम्प्राप्तयौवनम् ॥ गन्धर्वपत्न्यो ददृशुर्मूर्च्छामापुश्च तत्क्षणम् ॥ ३ ॥ ताश्च तीव्रं तपः कृत्वा प्राणान्संत्यज्य योगतः ॥ पञ्चाशत्ता बभूवुश्च कन्याश्चित्ररथस्य च ॥ ४ ॥ उपबर्हणगन्धर्वं ताश्च तं वव्रिरे पतिम् ॥ मुदा माला ददुस्तस्मै कामुक्यः पितुराज्ञया ॥ ५ ॥ गृहीत्वा ताश्च गन्धर्वो युवा सुस्थिरयौवनः ॥ दिव्यं त्रिलक्षवर्षं च रेमे रहसि कामुकः ॥६॥ ततोऽपि सुचिरं राज्यं कृत्वा ताभिः सहानिशम् ॥ जगाम ब्रह्मणः स्थानं हरिगाथां जगौ मुने ॥७॥ दृष्ट्वा स रम्भारम्भोरुर्नर्तने कठिनं स्तनम् ॥ बभूव स्खलनं तस्य गन्धर्वस्य महात्मनः ॥८॥ द्रुतं तत्याज सङ्गीतं मूर्च्छां प्राप सभातले ॥ उच्चैः प्रजहसुर्देवा ब्रह्मा कोपाच्छशाप तम् ॥ ९ ॥ व्रज त्वं शूद्रयोनिं च गान्धर्वीं तनुमुत्सृज ॥ काले वैष्णवसंसर्गान्मत्पुत्रस्त्वं भविष्यसि ॥ ॥ १० ॥ विना विपत्तेर्महिमा पुंसां नैव भवेत्सुत ॥ सुखं दुःखं च सर्वेषां क्रमेण प्रभवेदिति ॥ ११ ॥ इत्येवमुक्त्वा स विधिरगच्छत्पुष्कराद् गृहम् ॥ उपबर्हणगन्धर्वस्स जहौ तां तनुं तदा ॥ १२ ॥ मूलाधारं स्वाधिष्ठानं मणिपूरमनाहतम् ॥ विशुद्धमाज्ञाख्यं चेति भित्त्वा षट्चक्रमेव च ॥ १३ ॥ इडां सुषुम्नां मेधां च पिङ्गलां प्राणहारिणीम् ॥ सर्वज्ञानप्रदां चैव मनस्संयमिनीं तथा ॥ १४ ॥ विशुद्धां च निरुद्धां च वायुसंचारिणीं तथा ॥ तेजश्शुष्ककरीं चैव बलपुष्टिकरीं तथा ॥ १५ ॥ बुद्धिसंचारिणीं चैव ज्ञानजृम्भनकारिणीम् ॥ सर्वप्राणहरां चैव पुनर्जीवनकारिणीम् ॥ १६ ॥ एताः षोडशधा

नाडीर्भित्त्वा वै हंसमेव च ॥ मनसा सहितं ब्रह्मरन्ध्रमानीय योगतः ॥ १७ ॥ स्थित्वा मुहूर्त्तमात्मानमात्मन्येव युयोज ह ॥ जाति
स्मरश्च योगीन्द्रः संप्राप ब्रह्म शौनक ॥ १८ ॥ वीणां त्रितन्त्रीं दुष्प्राप्यां वामस्कन्धे निधाय च ॥ शुद्धस्फटिकमालां च विधृ
त्वा दक्षिणे करे ॥ १९ ॥ संजल्पन्परमं ब्रह्म वेदसारं परात्परम् ॥ परं निस्तारबीजं च कृष्ण इत्यक्षरद्वयम् ॥ २० ॥ प्राच्यां
कृत्वा शिरःस्थानं पश्चिमे चरणद्वयम् ॥ निधाय दर्भशयने शयानः पुरुषो यथा ॥ २१ ॥ गन्धर्वराजस्तं दृष्ट्वा भार्य्यया सह
तत्क्षणम् ॥ योगेन ब्रह्म सम्प्राप श्रीकृष्णं मनसा स्मरन् ॥ २२ ॥ पत्न्यश्च बान्धवाः सर्वे विलप्य रुरुदुर्भृशम् ॥ जग्मुः क्रमेण
शोकार्त्ता मोहिता विष्णुमायया॥२३॥ पञ्चाशद्योषितां मध्ये प्रधाना महिषी च या ॥ साध्वी मालावती नाम्ना परमा प्रेयसी वरा ॥
॥ २४ ॥ उच्चै रुरोद सा तीव्रं कान्तं कृत्वा च वक्षसि ॥ इत्युवाच च शोकार्त्ता कान्तं संबोध्य चैव हि ॥ २५ ॥ मालावत्यु
वाच ॥ हे नाथ रमण श्रेष्ठ विदग्ध रसिकेश्वर ॥ दर्शनं देहि मां बन्धो निमग्नां शोकसागरे ॥ २६ ॥ विस्रम्भके सुवसने रम्ये
चन्दनकानने ॥ पुष्पभद्रानदीतीरे पुष्पोद्याने मनोहरे ॥ २७ ॥ चन्दनाचलसान्निध्ये चारुचन्दनकानने ॥ पुष्पचन्दनतल्पे च
चन्दनानिलवासिते॥२८॥गन्धमादनशैलैकदेशे रम्ये नदीतटे ॥ पुंस्कोकिलनिनादे च मालतीजालशालिनि॥२९॥ श्रीशैले श्रीवने
दिव्ये श्रीनिवासनिषेविते ॥ श्रीयुक्ते श्रीपदाम्भोजे पूतेऽच्युतकृते शुभे ॥३०॥ पुरा या या कृता क्रीडा वसन्ते रहसि त्वया ॥ मया
च दुर्हृदा सार्द्धं तया वै दूयते मनः ॥ ३१ ॥ सुधातुल्येन वचसा सिक्ताऽहं च पुरा त्वया ॥ दूयते सततं तेन परमात्माऽतिदारु
णम् ॥ ३२ ॥ साधुना सह संसर्गो वैकुण्ठादपि दुर्लभः ॥ अहो ततोऽतिविच्छेदो मरणादपि दुष्करः ॥ ३३ ॥ तस्मात्तेषां च
विच्छेदः साधुशोककरः परः ॥ ततोऽपि बन्धुविच्छेदः शोकः परमदारुणः ॥ ३४ ॥ ततोऽपत्यवियोगो हि मरणादतिरिच्यते ॥
सर्वस्मात्पतिभेदो हि तत्परं नास्ति सङ्कटम् ॥ ३५ ॥ शयने भोजने स्नाने स्वप्ने जागरणेऽपि च ॥ स्वामिविच्छेददुःखं च
नूतनं च दिने दिने ॥ ३६ ॥ सर्वशोकं विस्मरेत्स्त्री स्वामिसंयोगमात्रतः ॥ बन्धुमन्यं न पश्यामि यं दृष्ट्वा विस्मरेत्पतिम् ॥ ३७ ॥

नातो विशिष्टं पश्यामि बान्धवं स्वामिना विना ॥ साध्वीनां कुलजातानामित्याह कमलोद्भवः ॥ ३८ ॥ हे दिगीशाश्च दि
क्पाला हे धर्म त्वं प्रजापते ॥ गिरीश कमलाकान्त पतिदानं च देहि मे ॥ ३९ ॥ इत्युक्त्वा विरहार्त्ता सा कन्या चित्ररथस्य च ॥
मूर्च्छां संप्राप तत्रैव दुर्गमे गहने वने ॥ ४० ॥ विचेतना तत्र तस्थौ कान्तं कृत्वा स्ववक्षसि ॥ परिपूर्णं दिवानक्तं सर्वैर्देवैश्च
रक्षिता ॥ ४१ ॥ प्रभाते चेतनां प्राप्य विललाप भृशं मुहुः ॥ इत्युवाच पुनस्तत्र हरिं संबोध्य सा सती ॥ ४२॥ मालावत्युवाच॥हे
कृष्ण जगतां नाथ नाथ नाहं जगद्बहिः ॥ त्वमेव जगतां पाता मां न पासि कथं प्रभो ॥ ४३ ॥ अयं भर्त्ताऽस्य भार्य्याऽहं ममेति
तव मायया॥त्वमेव सम्भवो भर्त्ता सर्वेषां सर्वकारणः॥ ४४ ॥ गन्धर्वः कर्मणा कान्तः कान्ताऽहं चास्य कर्मणा ॥ क्व गतः कर्मभोगान्ते
कुत्र संस्थाप्य मां प्रियाम् ॥४५॥ को वा कस्य पतिः पुत्रः का वा कस्य प्रिया प्रभो ॥ संयुनक्ति विधाता च विनयुक्ति च कर्मणा
॥४६॥संयोगे परमानन्दो वियोगे प्राणसङ्कटम्॥शश्वज्जगति मूर्खस्य नात्मारामस्य निश्चितम्॥४७॥नश्वरो विषयः सत्यं भुवि भोगश्च
बान्धवः॥ स्वयं त्यक्तः सुखायैव दुःखाय त्याजितः परैः॥४८॥तस्मात्सन्तः स्वयं त्यक्त्वा परमैश्वर्य्यमीप्सितम्॥ध्यायन्ते सततं कृष्ण
पादपद्मं निरापदम् ॥ ४९ ॥ सर्वत्र ज्ञानिनः सन्तः का स्त्री ज्ञानवती भुवि ॥ ततो मह्यं विमूढायै दातुमर्हति वाञ्छितम् ॥ ५० ॥
न मे वाञ्छाऽमरत्वे च शक्रत्वे मोक्षवर्त्मनि ॥ इमं कान्तं वरं देहि चतुर्वर्गकरं परम् ॥ ५१ ॥ यावती कामिनीजातिर्जगत्यां जगदी
श्वर ॥ कस्यैचिन्न हि दत्तश्च तेन धात्रेदृशः पतिः ॥ ५२ ॥ तस्मै दत्ता गुणाः सर्वे रूपाणि विविधानि च ॥ सुशीलानि च सर्वाणि
चामरत्वं विना हरे ॥ ५३ ॥ रूपेण च गुणेनैव तेजसा विक्रमेण च ॥ ज्ञानेन शान्त्या सन्तुष्ट्या हरितुल्यः प्रभुर्मम ॥
॥ ५४ ॥ हरिभक्तो हरिसमो गाम्भीर्य्ये सागरो यथा ॥ दीप्तिमान्सूर्य्यतुल्यश्च शुद्धो वह्निसमस्तथा ॥ ५५ ॥ चन्द्रतुल्यः सुदृ
श्यश्च कन्दर्पसमसुन्दरः ॥ बुद्ध्या बृहस्पतिसमः काव्ये कविसमस्तथा ॥ ५६ ॥ वाणी च सर्वशास्त्रज्ञा प्रतिभायां भृगोरिव ॥
कुबेरतुल्यो धनवान्महान्दाता मनोरिव ॥ ५७ ॥ धर्मे धर्मसमो धर्मी सत्ये सत्यव्रताधिकः ॥ कुमारतुल्यस्तपसा स्वाचारे ब्रह्मणा

समः ॥ ५८ ॥ ऐश्वर्य्ये शक्रतुल्यश्च सहिष्णुः पृथिवीसमः ॥ एवम्भूतो मृतः कान्तः प्राणा यान्ति न मे कथम् ॥ ५९ ॥ अरे सुरा यज्ञभाजो घृतं भोक्तुं क्षमा भुवि ॥ क्षणेनायज्ञभाजश्च करिष्यामि स्वलीलया ॥ ६० ॥ नारायण जगत्कान्त नाहमेव जगद्बहिः ॥ शीघ्रं जीवय मत्कान्तमन्यथा त्वां शपाम्यहम् ॥ ६१ ॥ प्रजापते पुत्रशापात्त्वमपूज्यो महीतले ॥ तवैवानधिकारित्वं करिष्याम्यधुना भवे ॥ ६२ ॥ हे शम्भो ज्ञानलोपं ते करिष्यामि शपेन च ॥ धर्मलोपं च धर्मस्य करिष्याम्येव लीलया ॥ ६३ ॥ यमाधिकारं दूरे च करिष्यामि न संशयः ॥ सत्यं कालं शपिष्यामि मृत्युकन्यां सुनिष्ठुराम् ॥ ६४ ॥ शपामि सर्वानत्रैव जरां व्याधिं विनाऽधुना ॥ व्याधिना जरया मृत्युर्न ह्यभूच्च पतेर्मम ॥ ६५ ॥ इत्युक्त्वा कौशिकीतीरे चागच्छच्छप्तुमेव तान् ॥ मालावती महासाध्वी शवं कृत्वा स्ववक्षसि ॥ ६६ ॥ तां शप्तुमुद्यतां दृष्ट्वा ब्रह्मा देवपुरोगमः ॥ जगाम शरणं विष्णुं तीरं क्षीरपयोनिधेः ॥ ६७ ॥ तत्र स्नात्वा च तुष्टाव परमात्मानमीश्वरम् ॥ विष्णुं ब्रह्मा जगत्कान्तमित्युवाच ह भीतवत् ॥ ६८ ॥ ब्रह्मोवाच ॥ उपबर्हणपत्नी सा कन्या चित्ररथस्य च ॥ कान्तहेतोश्च मा देवाञ्छपेत्त्वं रक्ष माधव ॥ ६९ ॥ स्मरन्ति साधवः सन्तो जपन्ति मुनयो मुदा ॥ स्वप्ने जागरणे चैव सर्वकार्य्येषु माधवम् ॥ ७० ॥ शरणागतदीनार्त्तपरित्राणपरायण ॥ रक्ष रक्ष हृषीकेश व्रजामः शरणं वयम् ॥ ७१ ॥ पूजा मे पुत्रशापेन विहता साम्प्रतं प्रभो ॥ अधिकारहतं मां च कुरुते मालती सती ॥ ७२ ॥ सर्वाधिकारो ब्रह्माण्डे त्वया दत्तः पुरा प्रभो ॥ सम्पदेतादृशी नाथ यास्यत्येवाधुना मम ॥ ७३ ॥ महादेव उवाच ॥ त्वया दत्तं महाज्ञानं गुप्तं सर्वेषु दुर्लभम् ॥ शतमन्वन्तरतपःफलेन पुष्करे पुरा ॥ ७४ ॥ ऐश्वर्य्यं वा धनं वाऽपि विद्या वा विक्रमोऽथवा ॥ ज्ञानस्य परमार्थस्य कलां नार्हति षोडशीम् ॥ ७५ ॥ सर्वाज्ञातं सर्वगुप्तमत्यन्तं दुर्लभं परम् ॥ मम तत्त्वज्ञानरत्नं शापान्निर्याति योषितः ॥ ७६ ॥ अहो पतिव्रतातेजः सर्वेषां तेजसां परम् ॥ तेजोऽनलेन दग्धं मां रक्ष रक्ष हरे हरे ॥ ७७ ॥ धर्म उवाच ॥ सर्वरत्नात्परं रत्नं धर्म एव सनातनः ॥ यास्यत्येवंविधो धर्मस्त्वया दत्तः पुरा प्रभो ॥ ७८ ॥ सप्तमन्वन्तरतपःफलेन परमेश्वर ॥ प्राप्तो धर्मो

ऽधुना याति शापेन योषितः प्रभो ॥ ७९ ॥ देवा ऊचुः ॥ यज्ञभाजो घृतभुजो वयमेव त्वया कृताः ॥ योषिच्छापेन तत्सर्वमधुना याति माधव ॥ ८० ॥ इत्युक्त्वा संयताः सर्वे तस्थुस्तत्र भयार्दिताः ॥ एतस्मिन्नन्तरेऽकस्माद्वागबभूवाशरीरिणी ॥ ८१ ॥ यूयं गच्छत तन्मूलं विप्ररूपी जनार्दनः ॥ पश्चाद्यास्यति शान्त्यर्थमिति वो रक्षणाय च ॥ ८२ ॥ श्रुत्वा तद्वचनं देवाः प्रहृष्टमनसोन्मुखाः ॥ जग्मुर्मालावतीस्थानं कौशिकीतीरमीश्वराः ॥ ८३ ॥ तामेव ददृशुर्देवा देवीं मालावतीं सतीम् ॥ रत्नसारेन्द्रभूषाभिरुज्ज्वलां कमलाकलाम् ॥ ८४ ॥ वह्निशुद्धांशुकाधानां सिन्दूरबिन्दुभूषिताम् ॥ शरच्चन्द्रप्रभां शान्तां द्योतयन्तीं दिशस्त्विषा ॥ ८५ ॥ पतिसेवामहाधर्मचिरसञ्चिततेजसा ॥ प्रज्वलन्तीं सुप्रदीप्तशिखां वह्नेरिवोत्तमाम् ॥ ८६ ॥ योगासनं कुर्वती च शववक्षःस्थलस्थिताम्[1] ॥ सुरम्यां स्वामिनो वीणां बिभ्रतीं दक्षिणे करे ॥ ८७ ॥ तर्जन्यङ्गुष्ठकोटिभ्यां शुद्धस्फटिकमालिकाम् ॥ भक्त्या स्नेहेन कान्तस्य बिभ्रतीं योगमुद्रया ॥ ८८ ॥ चारुचम्पकवर्णाभां बिम्बोष्ठीं रत्नमालिनीम् ॥ यथा षोडशवर्षीयां शश्वत्सुस्थिरयौवनाम् ॥ ॥८९॥ बृहन्नितम्बभारार्त्तां पीनश्रोणिपयोधराम् ॥ पश्यन्तीं शवमीशस्य शुभदृष्ट्या पुनः पुनः ॥९०॥ एवम्भूतां च तां दृष्ट्वा देवास्ते विस्मयं ययुः ॥ स्थगितां च क्षणं तत्र धार्मिका धर्मभीरवः ॥ ९१ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे सौतिशौनकसंवादे ब्रह्मखण्डे मालावतीविलापो नाम त्रयोदशोऽध्यायः ॥ १३ ॥ सौतिरुवाच ॥ तत्र स्थित्वा क्षणं देवा ब्रह्मेशानपुरोगमाः ॥ ययुर्मालावतीमूलं परं मङ्गलदायकाः ॥ १ ॥ मालावती सुरान्दृष्ट्वा प्रणनाम प्रतिव्रता ॥ रुरोद कान्तं संस्थाप्य देवानां सन्निधौ मुने ॥ २ ॥ एतस्मिन्नन्तरे तत्र कश्चिद्ब्राह्मणबालकः ॥ आजगाम सुराणां च सभामतिमनोहरः ॥ ३ ॥ दण्डी छत्री शुक्लवासा बिभ्रत्तिलकमुज्ज्वलम् ॥ दीर्घपुस्तकहस्तश्च सुप्रशान्तश्च सुस्मितः ॥ ४ ॥ चन्दनोक्षितसर्वाङ्गः प्रज्वलन्ब्रह्मतेजसा ॥ सुरान्संभाष्य तत्रैव विस्मिता

---

[1] 'शवं वक्षःस्थले स्थितं यस्याः सा ताम्' इति हि समासः कार्योऽत्र " इत्युक्त्वा कौशिकीतीरं जगाम शप्तुमेव तान् । मालावती महासाध्वी शवं कृत्वा स्ववक्षसि" :इति पूर्वमुक्तं न विस्मर्तव्यम् । तेनहि शवस्य वक्षःस्थले स्थितामिति न विप्रतिपत्तव्यम् ।

न्विष्णुमायया ॥५॥ तत्रोवास सभामध्ये तारामध्ये यथा शशी ॥ उवाच देवान्सर्वांश्च मालतीं च विचक्षणः ॥६॥ ब्राह्मण उवाच॥
कथमत्र सुराः सर्वे ब्रह्मेशानपुरोगमाः ॥ स्वयं विधाता जगतां स्रष्टा वै केन कर्मणा॥७॥सर्वब्रह्माण्डसंहर्त्ता शम्भुरत्र स्वयं विभुः॥अहो
त्रिजगतां साक्षी धर्मो वै सर्वकर्मणाम्॥८॥कथं रविः कथं चन्द्रः कथमत्र हुताशनः॥कथं कालो मृत्युकन्या कथं वाऽत्रय मादयः॥
॥९॥ हे मालावति ते क्रोडे कोऽतिशुष्कश्शवोऽनघे ॥जीवितायाः कथं मूले योषितश्च पुमाञ्छवः ॥१० ॥ इत्युक्त्वा तांश्च तां विप्रो
विरराम सभातले ॥ मालावती तं प्रणम्य समुवाच विचक्षणम् ॥ ११ ॥ मालावत्युवाच ॥ आनन्दपूर्वकं वन्दे विप्ररूपं जनार्द
नम् ॥ तुष्टा देवा हरिस्तुष्टो यस्य पुष्पजलेन च ॥१२॥ अवधानं कुरु विभो शोकार्त्ताया निवेदने ॥ समा कृपा सतां शश्वद्योग्या
योग्ये कृपावताम् ॥ १३ ॥ उपबर्हणभार्य्याऽहं कन्या चित्ररथस्य च ॥ सर्वे मालावतीं कृत्वा वदन्ते विप्रपुङ्गव ॥ १४ ॥ दिव्यं
लक्षयुगं रम्ये स्थाने स्थाने मनोहरे ॥ कृता स्वच्छन्दतः क्रीडा चानेन स्वामिना सह ॥ १५ ॥ प्रिये स्नेहो हि साध्वीनां यावान्वि
प्रेन्द्र योषिताम् ॥ सर्वं शास्त्रानुसारेण जानासि त्वं विचक्षण॥ १६ ॥ अकस्माद्ब्रह्मणः शापात्प्राणांस्तत्याज मत्पतिः॥ देवानुद्दिश्य
विलपे यथा जीवति मत्पतिः ॥ १७ ॥ स्वकार्य्यसाधने सर्वे व्यग्राश्च जगतीतले ॥ भावाभावं न जानन्ति केवलं स्वार्थतत्पराः ॥
॥ १८ ॥ सुखं दुःखं भयं शोकः सन्तापः कर्मणां नृणाम् ॥ ऐश्वर्य्यं परमानन्दो जन्म मृत्युश्च मोक्षणम् ॥ १९ ॥ देवाश्च सर्वज
नका दातारः कर्मणां फलम्॥कर्त्तारः कर्मवृक्षाणां मूलच्छेदं च लीलया॥२०॥न हि देवात्परो बन्धुर्न हि देवात्परो बली॥ दयावान्न हि
देवाच्च न च दाता ततः परः ॥ २१ ॥ सर्वान्देवानहं याचे पतिदानं ममेप्सितम् ॥ धर्मार्थकाममोक्षाणां फलदांश्च सुरद्रुमान् ॥ २२ ॥
यदि दास्यन्ति देवा मे कान्तदानं यथेप्सितम् ॥ भद्रं तदाऽन्यथा तेभ्यो दास्यामि स्त्रीवधं ध्रुवम् ॥ २३ ॥ शपिष्यामि च सर्वां
श्च दारुणं दुर्निवारकम् ॥ दुर्निवार्य्यः सतीशापस्तपसा केन वार्य्यते ॥ २४ ॥ इत्युक्त्वा मालती साध्वी शोकार्त्ता सुरसंसदि ॥ विर
राम द्विजश्रेष्ठस्तामुवाच च शौनक ॥ २५ ॥ ब्राह्मण उवाच ॥ कर्मणां फलदातारो देवाः सत्यं च मालति ॥ न सद्यः सुचिरे

णैव धान्यं कृषकवन्नृणाम् ॥ २६ ॥ गृही च कृषकद्वारा क्षेत्रे धान्यं वपेत्सति ॥ तदङ्कुरो भवेत्काले काले वृक्षः फलत्यपि ॥
॥ २७ ॥ काले सुपक्कं भवति काले प्राप्नोति तद्गृही ॥ एवं सर्वं समुन्नेयं चिरेण कर्मणः फलम् ॥ २८ ॥ अष्ठी वपति संसारे गृह
स्थो विष्णुमायया ॥ काले तदङ्कुरो वृक्षः काले प्राप्नोति तत्फलम् ॥ २९ ॥ पुण्यवान्पुण्यभूमौ च करोति सुचिरं तपः ॥ तेषां
च फलदातारो देवाः सत्यं न संशयः ॥ ३० ॥ ब्राह्मणानां मुखे क्षेत्रे श्रेष्ठेऽनूषर एव च ॥ यो यज्जुहोति भक्त्या च स तत्प्राप्नोति
निश्चितम् ॥३१॥ न बलं न च सौन्दर्य्यं नैश्वर्यं न धनं सुतः ॥ नैव स्त्री न च सत्कान्तः किं भवेत्तपसा विना ॥३२॥ सेवते प्रकृ
तिं यो हि भक्त्या जन्मनि जन्मनि॥स लभेत्सुन्दरीं कान्तां विनीतां च गुणान्विताम् ॥ ३३ ॥ श्रियं च निश्चलां पुत्रं पौत्रं भूमिं
धनं प्रजाम् ॥ प्रकृतेश्च वरेणैव लभेद्भक्तोऽवलीलया ॥ ३४ ॥ शिवं शिवस्वरूपं च शिवदं शिवकारणम् ॥ ज्ञानानन्दं महात्मानं
परं मृत्युंजयं परम् ॥३५॥ तमीशं सेवते यो हि भक्त्या जन्मनि जन्मनि ॥ पुमान्प्राप्नोति सत्कान्तां कामिनी चापि सत्पतिम् ॥
॥ ३६ ॥ विद्यां ज्ञानं सुकवितां पुत्रं पौत्रं परां श्रियम् ॥ बलं धनं विक्रमं च लभेद्धरवरेण सः ॥ ३७ ॥ ब्रह्माणं भजते यो हि ल
भेत्सोऽपि प्रजां श्रियम् ॥ विद्यामैश्वर्य्यमानन्दं वरेण ब्रह्मणो नरः ॥ ३८ ॥ यो नरो भजते भक्त्या दीननाथं दिनेश्वरम् ॥ विद्या
मारोग्यमानन्दं धनं पुत्रं लभेद्ध्रुवम् ॥३९॥ गणेश्वरं यो भजते देवदेवं सनातनम् ॥ सर्वाग्रपूज्यं सर्वेशं भक्त्या जन्मनि जन्मनि ॥
॥ ४० ॥ विघ्ननाशो भवेत्तस्य स्वप्ने जागरणेऽनिशम् ॥ परमानन्दमैश्वर्य्यं पुत्रं पौत्रं धनं प्रजाः ॥ ४१ ॥ ज्ञानं विद्यां सुकवितां
लभते तद्वरेण च ॥ भजते यो हि विष्णुं च लक्ष्मीकान्तं सुरेश्वरम् ॥४२॥ वरार्थी चेल्लभेत्सर्वं निर्वाणमन्यथा ध्रुवम् ॥ शान्तं नि
षेव्य पातारं सत्यं सत्यं लभेन्नरः ॥ ४३ ॥ सर्वं तपः सर्वधर्मं यशः कीर्तिमनुत्तमाम् ॥ विष्णुं निषेव्य सर्वेशं यो मूढो लभते व
रम् ॥ ४४ ॥ विडम्बितो विधात्राऽसौ मोहितो विष्णुमायया ॥ माया नारायणीशाना सर्वप्रकृतिरीश्वरी ॥ ४५ ॥ सा कृपां कुरुते
यं च विष्णुमन्त्रं ददाति तम् ॥ धर्मं यो भजते धर्मी सर्वधर्मं लभेद्ध्रुवम् ॥४६॥ इह लोके सुखं भुक्त्वा याति विष्णोः परं पदम् ॥

योयं देवं भजेद्भक्त्या स चादौ लभते च तम् ॥ ४७ ॥ काले पश्चात्तेन सार्द्धं परं विष्णोः पदं लभेत् ॥ श्रीकृष्णं भजते यो
हि निर्गुणं प्रकृतेः परम् ॥ ४८ ॥ ब्रह्मविष्णुशिवादीनां सेव्यं बीजं परात्परम् ॥ अक्षरं परमं ब्रह्म भगवन्तं सनातनम् ॥ ४९ ॥
साकारं च निराकारं ज्योतिः स्वेच्छामयं विभुम् ॥ सर्वाधारं च सर्वेशं परमानन्दमीश्वरम् ॥ ५० ॥ निर्लिप्तं साक्षिरूपं च भक्ता
नुग्रहविग्रहम् ॥ जीवन्मुक्तः स सत्यं हि न वरं लभते सुधीः॥५१॥स सर्वं मन्यते तुच्छं सालोक्यादिचतुष्टयम् ॥ ब्रह्मत्वममरत्वं वा
मोक्षं यत्तुच्छवत्सति ॥५२॥ ऐश्वर्य्यं लोष्टतुल्यं च नश्वरं चैव मन्यते ॥ इन्द्रत्वं च मनुत्वं च चिरजीवित्वमेव वा ॥ ५३ ॥ जल
बुद्बुदवद् बुद्ध्या चातितुच्छं न गण्यते ॥ स्वप्ने जागरणे वाऽपि शश्वत्सेवां च वाञ्छति ॥५४॥ दास्यं विना न याचेत श्रीकृष्ण
स्य पदं परम् ॥ तत्पादाब्जे दृढां भक्तिं लब्ध्वा पूर्णो निरन्तरम् ॥ ५५ ॥ परिपूर्णतमं ब्रह्म निषेव्यं सुस्थिरः सदा ॥ आत्मनः कु
लकोटिं च शतं मातामहस्य च ॥५६॥ श्वशुरस्य शतं पूर्वमुद्धृत्य चावलीलया ॥ दासं दासीं प्रसूं भार्य्यां पुत्रादपि परं शतम्॥
॥ ५७ ॥ उद्धरेत्कृष्णभक्तश्च गोलोकं याति निश्चितम् ॥ तावद्गर्भे वसेत्कामी तावती यमयातना ॥ ५८ ॥ तावद्गृही च भोगार्थी
यावत्कृष्णं न सेवते ॥ गुरुवक्त्राद्विष्णुमन्त्रो यस्य कर्णे प्रविश्यति ॥ ५९ ॥ यमस्तल्लिखनं दूरं करोति तत्क्षणं भिया ॥ मधुपर्कादि
कं ब्रह्मा पुरैव तन्नियोजयेत् ॥६०॥ अहो विलङ्घ्य मल्लोकं मार्गेणानेन यास्यति॥तस्य वै निष्कृतिर्नास्ति कल्पकोटिशतैरपि॥६१॥
दुरितानि च भीतानि कोटिजन्मकृतानि च ॥ तं विहाय पलायन्ते वैनतेयं यथोरगाः ॥ ६२ ॥ पुरातनं कृतं कर्म यद्यत्तस्य शुभा
शुभम् ॥ छिनत्ति कृष्णश्चक्रेण तीक्ष्णधारेण सन्ततम् ॥ ६३ ॥ तं विहाय जरा मृत्युर्याति चक्रभिया सति ॥ अन्यथा शतखण्डं
तां कुरुते च सुदर्शनः॥६४॥निःशङ्को याति गोलोकं विहाय मानवीं तनुम् ॥ गत्वा दिव्यां तनुं धृत्वा श्रीकृष्णं सेवते सदा॥६५॥
यावत्कृष्णो हि गोलोके तावद्भक्तो वसेत्सदा ॥ निमेषं मन्यते दासो नश्वरं ब्रह्मणो वयः ॥ ६६ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे
ब्रह्मखण्डे सौतिशौनकसंवादे विष्णुमालावतीसंवादो नाम चतुर्दशोऽध्यायः ॥ १४ ॥ ब्राह्मण उवाच ॥ केन रोगेण हि मृतोऽधुना

साध्वि तव प्रियः ॥ स१२ागचिकित्सां च जानामि च चिकित्सकः ॥ १ ॥ मृततुल्यं मृतं रोगात्सप्ताहाभ्यन्तरे सति ॥ महाज्ञानेन
तं जीवं जीवयाम्यवलीलया ॥२॥ राजमृत्युं यमं कालं व्याधिमानीय त्वत्पुरः॥ निबध्य दातुं शक्तोऽहं व्याधो बद्धा पशुं यथा॥३॥
यतो न सञ्चरेद्व्याधिर्देहेषु देहधारिणाम् ॥ व्याधीनां कारणं यद्यत्सर्वं जानामि सुन्दरि ॥ ४ ॥ यतो न सञ्चरेद्व्याधिर्बीजं दुष्टम
मङ्गलम् ॥ तदुपायं विजानामि शास्त्रतत्त्वानुसारतः॥५ ॥ यो वा योगेन खेदेन देहत्यागं करोति च ॥ तस्य तं जीवनोपायं जानामि
योगधर्मतः ॥ ६ ॥ ब्राह्मणस्य वचः श्रुत्वा स्फीता मालावती सती ॥ सस्मिता स्निग्धचित्ता सा तमुवाच प्रहर्षिता ॥ ७ ॥ मालाव
त्युवाच ॥ अहो श्रुतं किमाश्चर्य्यं वचनं बालवक्त्रतः ॥ वयसाऽतिशिशुर्दृष्टो ज्ञानं योगविदां परम् ॥ ८ ॥ त्वया कृता प्रतिज्ञा च कान्तं
जीवयितुं मम ॥ विपरीतं न सद्वाक्यं तत्क्षणं जीवितः पतिः ॥ ९ ॥ जीवयिष्यति मत्कान्तं पश्चाद्वेदविदां वरः ॥ यद्यत्पृच्छामि
सन्देहात्तद्भवान्वक्तुमर्हति ॥ १० ॥ सभायां जीविते कान्ते तस्य तीव्रस्य सन्निधौ ॥ त्वां हि प्रष्टुं न शक्ताऽहं विद्यमाने मदीश्वरे
॥ ११ ॥ एते ब्रह्मादयो देवा विद्यमानाश्च संसदि ॥ त्वं च वेदविदां श्रेष्ठो न च कश्चिन्मदीश्वरः ॥ १२ ॥ नारीं रक्षति भर्त्ता चेन्न
कोऽपि खण्डितुं क्षमः ॥ शास्तिं करोति यदि स न कोऽपि रक्षिता भुवि ॥ १३ ॥ एवं देवेषु नो शक्तिः शक्रे वा ब्रह्मरुद्रयोः ॥ स्त्रीपु
म्भावश्च बोद्धव्यः स्वामी कर्त्ता च योषिताम् ॥ १४ ॥ स्वामी कर्त्ता च हर्त्ता च शास्ता पोष्टा च रक्षिता ॥ अभीष्टदेवः पूज्यश्च
न गुरुः स्वामिनः परः ॥ १५ ॥ कन्या सत्कुलजाता या सा कान्तवशवर्त्तिनी ॥ या स्वतन्त्रा च सा दुष्टा स्वभावात्कुटिला ध्रुवम्
॥ १६ ॥ दुष्टा परपुमांसं च सेवते या नराधमा ॥ सा निन्दति पतिं शश्वदसद्वंशप्रसूतिका ॥ १७ ॥ उपबर्हणभार्य्याऽहं कन्या
चित्ररथस्य च ॥ वधूर्गन्धर्वराजस्य कान्तभक्ता सदा द्विज ॥१८॥ सर्वं कालयितुं शक्तस्त्वं च वेदविदां वर ॥ कालं यमं मृत्युक
न्यां मदभ्याशं समानय ॥ १९ ॥ मालावतीवचः श्रुत्वा विप्रो वेदविदां वरः ॥ सभामध्ये समाहूय तान्प्रत्यक्षं चकार ह ॥ २० ॥
ददर्श मृत्युकन्यां च प्रथमं मालती सती ॥ कृष्णवर्णां घोररूपां रक्ताम्बरधरां वराम् ॥ २१ ॥ सस्मितां षड्भुजां शान्तां दयायु

क्तां महासतीम् ॥ कालस्य स्वामिनो वामे चतुष्षष्टिसुतान्विताम् ॥ २२ ॥ कालं नारायणांशं च ददर्श पुरतः सती ॥ महोग्ररूपं विकटं ग्रीष्मसूर्य्यसमप्रभम् ॥ २३ ॥ षड्वक्त्रं षोडशभुजं चतुर्विंशतिलोचनम् ॥ षट्पादं कृष्णवर्णं च रक्ताम्बरधरं परम् ॥ २४ ॥ देवस्य देवं विकृतं सर्वसंहाररूपिणम् ॥ कालाधिदेवं सर्वेशं भगवन्तं सनातनम् ॥ २५ ॥ ईषद्धास्यप्रसन्नास्यमक्षमालाकरं वरम् ॥ जपन्तं परमं ब्रह्म कृष्णमात्मानमीश्वरम् ॥ २६ ॥ सती ददर्श पुरतो व्याधिसंघान्सुदुर्जयान् ॥ वयसाऽतिमहावृद्धान्स्तनन्धान्मातृसन्निधौ ॥ २७ ॥ स्थूलपादं कृष्णवर्णं धर्मिष्ठं रविनन्दनम् ॥ जपन्तं परमं ब्रह्म भगवन्तं सनातनम् ॥ २८ ॥ धर्माधर्मविचारज्ञं परं धर्मस्वरूपिणम् ॥ पापिनामपि शास्तारं ददर्श पुरतो यमम् ॥२९॥ तांश्च दृष्ट्वा च निःशङ्का पप्रच्छ प्रथमं यमम् ॥ मालावती महासाध्वी प्रहृष्टवदनेक्षणा ॥३०॥ मालावत्युवाच ॥ हे धर्मराज धर्मिष्ठ धर्मशास्त्रविशारद॥कालव्यतिक्रमे कान्तं कथं हरसि मे विभो॥ ॥३१॥ यम उवाच ॥ अप्राप्तकालो म्रियते न कश्चिज्जगतीतले ॥ ईश्वराज्ञां विना साध्वि नामृतं चालयाम्यहम् ॥ ३२॥ अहं कालो मृत्युकन्या व्याधयश्च सुदुर्जयाः ॥ निषेकेण प्राप्तकालं कालयन्तीश्वराज्ञया ॥ ३३ ॥ मृत्युकन्या विचारज्ञा यं प्राप्नोति निषेकतः ॥ तमहं कालयाम्येव पृच्छतां केन हेतुना ॥ ३४ ॥ मालावत्युवाच ॥ त्वमपि स्त्री मृत्युकन्या जानासि स्वामिवेदनम्[1] ॥ कथं हरसि मत्कान्तं जीवितायां मयि प्रिये ॥ ३५ ॥ मृत्युकन्योवाच ॥ पुरा विश्वसृजा सृष्टाऽप्यहमेवात्र कर्मणि ॥ न च क्षमा परित्यक्तु बहुना तपसा सति ॥ ३६ ॥ सती सतीनां मध्ये च काचित्तेजस्विनी वरा ॥ मामेव भस्मसात्कर्तुं क्षमा यदि भवेद्भवे ॥ ३७ ॥ सर्वापच्छान्तिरेवेह तदा भवति सुन्दरि ॥ पुत्राणां स्वामिनः पश्चाद्भविता यद्भविष्यति ॥ ३८ ॥ कालेन प्रेरिताऽहं च मत्पुत्रा व्याधयश्च वै ॥ न मत्सुतानां दोषश्च न च मे शृणु निश्चितम्॥३९॥पृच्छ कालं महात्मानं धर्मज्ञं धर्मसंसदि ॥ तदा यदुचितं भद्रे तत्करिष्यसि निश्चितम् ॥ ४० ॥ मालावत्युवाच ॥ हे काल कर्मणां साक्षिन्कर्मरूप सनातन ॥ नारायणांशो भगवन्नमस्तुभ्यं

---

[1] वेदनामिति पाठः ।

पराय च ॥ ४१ ॥ कथं हरसि मत्कान्तं जीवितायां मयि प्रभो ॥ जानासि सर्वदुःखं च सर्वज्ञस्त्वं कृपानिधे ॥ ४२ ॥ कालपुरुष उवाच ॥ को वाऽहं को यमः का च मृत्युकन्या च व्याधयः ॥ वयं भ्रमामः सततमीशाज्ञापरिपालकाः ॥ ४३ ॥ यस्य सृष्टा च प्रकृतिर्ब्रह्मविष्णुशिवादयः ॥ सुरा मुनीन्द्रा मनवो मानवाः सर्वजन्तवः ॥ ४४ ॥ ध्यायन्ते तत्पदाम्भोजं योगिनश्च विचक्षणाः॥ जपन्ति शश्वन्नामानि पुण्यानि परमात्मनः ॥ ४५ ॥ यद्भयाद्वाति वातोऽयं सूर्य्यस्तपति यद्भयात् ॥ स्रष्टा ब्रह्माऽऽज्ञया यस्य पाता विष्णुर्यदाज्ञया ॥ ४६ ॥ संहर्त्ता शङ्करः सर्वजगतां यस्य शासनात् ॥ धर्मश्च कर्मणां साक्षी यस्याज्ञापरिपालकः ॥ ४७ ॥ राशिचक्रं ग्रहाः सर्वे भ्रमन्ति यस्य शासनात् ॥ दिगीशाश्चैव दिक्पाला यस्याज्ञापरिपालकाः ॥ ४८ ॥ यस्याज्ञया च तरवः पुष्पाणि च फलानि च ॥ बिभ्रत्येव ददत्येव काले मालावतीसति ॥४९॥ यस्याज्ञया जलाधारा सर्वाधारा वसुन्धरा ॥ क्षमावती च पृथिवी कम्पिता न भयेन च ॥ ५० ॥ सहसा मोहिता माया मायया यस्य सन्ततम् ॥ सर्वप्रसूर्या प्रकृतिः सा भीता यद्भयादहो ॥ ५१ ॥ यस्यान्तं न विदुर्वेदा[1] वस्तूनां भावगा अपि ॥ पुराणानि च सर्वाणि यस्यैव स्तुतिपाठकाः ॥ ५२ ॥ यस्य नाम विधिर्विष्णुः सेवते सुमहान्विराट् ॥ षोडशांशो भगवतः स एव तेजसो विभोः ॥ ५३ ॥ सर्वेश्वरः कालकालो मृत्योर्मृत्युः परात्परः ॥ सर्वविघ्नविनाशाय तं कृष्णं परिचिन्तय ॥ ५४ ॥ सर्वाभीष्टं च भर्त्तारं प्रदास्यति कृपानिधिः ॥ इमे यत्प्रेरिताः सर्वे स दाता सर्वसम्पदाम् ॥ ५५ ॥ इत्युक्त्वा कालपुरुषो विरराम च शौनक ॥ कथां कथितुमारेभे पुनरेव तु ब्राह्मणः ॥ ५६ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे ब्रह्मखण्डे मालावतीकालपुरुषसंवादे पञ्चदशोऽध्यायः ॥ १५ ॥ ब्राह्मण उवाच ॥ दृष्टः कालो यमो मृत्युकन्या व्याधिगणा अहो ॥ कस्तेऽधुना च सन्देहस्तं पृच्छ कन्यके शुभे ॥ १ ॥ ब्राह्मणस्य वचः श्रुत्वा हृष्टा मालावती सती ॥ यन्मनोनिहितं प्रश्नं चकार जगदीश्वरम् ॥ २ ॥ मालावत्युवाच ॥ त्वया यत्कथितो व्याधिः प्राणिनां प्राणहारकः ॥ तत्कारणं च विविधं

---

[1] विदुः सर्वे इति पाठः ।

सर्वं वेदे निरूपितम् ॥ ३ ॥ यतो न सञ्चरेद्व्याधिर्दुर्निवारोऽशुभावहः ॥ तदुपायं च साकल्यं भवान्वक्तुमिहार्हति ॥ ४ ॥ यद्यत्पृष्टमपृष्टं वा ज्ञातमज्ञातमेव वा ॥ सर्वं कथय तद्भद्रं त्वं गुरुर्दीनवत्सलः ॥ ५ ॥ मालावतीवचः श्रुत्वा विप्ररूपी जनार्दनः ॥ संहितां वक्तुमारेभे संहितार्थां च वैद्यकीम्[1]॥६॥ ब्राह्मण उवाच ॥ वन्दे तं सर्वतत्त्वज्ञं सर्वकारणकारणम् ॥ वेदवेदांगबीजस्य बीजं श्रीकृष्णमीश्वरम् ॥७॥ स ईशश्चतुरो वेदान्ससृजे मङ्गलालयान् ॥ सर्वमङ्गलमङ्गल्यबीजरूपः सनातनः ॥८॥ ऋग्यजुःसामाथर्वाख्यान्दृष्ट्वा वेदान्प्रजापतिः ॥ विचिन्त्य तेषामर्थं चैवायुर्वेदं चकार सः ॥ ९ ॥ कृत्वा तु पञ्चमं वेदं भास्कराय ददौ विभुः ॥स्वतन्त्रसंहितां तस्माद्भास्करश्च चकार सः ॥ १० ॥भास्करश्च स्वशिष्येभ्य आयुर्वेदं स्वसंहिताम् ॥ प्रददौ पाठयामास ते चक्रुः संहितास्ततः ॥ ॥ ११ ॥ तेषां नामानि विदुषां तन्त्राणि तत्कृतानि च ॥ व्याधिप्रणाशबीजानि साध्वि मत्तो निशामय ॥ १२ ॥ धन्वन्तरिर्दिवोदासः काशीराजोऽश्विनीसुतौ ॥ नकुलः सहदेवोऽर्किश्च्यवनो जनको बुधः ॥ १३ ॥ जाबालो जाजलिः पैलः करथोऽगस्त्य एव च ॥ एते वेदाङ्गवेदज्ञाः षोडश व्याधिनाशकाः ॥ १४ ॥ चिकित्सातत्त्वविज्ञानं नाम तन्त्रं मनोहरम् ॥ धन्वन्तरिश्च भगवांश्चकार प्रथमं सति ॥ १५ ॥ चिकित्सादर्पणं नाम दिवोदासश्चकार सः ॥ चिकित्साकौमुदीं दिव्यां काशीराजश्चकार सः ॥ १६ ॥ चिकित्सासारतन्त्रं च भ्रमघ्नं चाश्विनीसुतौ ॥ तन्त्रं वैद्यकसर्वस्वं नकुलश्च चकार सः ॥ १७ ॥ चकार सहदेवश्च व्याधिसिन्धुविमर्दनम् ॥ ज्ञानार्णवं महातन्त्रं यमराजश्चकार ह ॥ १८ ॥ च्यवनो जीवदानं च चकार भगवानृषिः ॥ चकार जनको योगी वैद्यसन्देहभञ्जनम् ॥१९॥ सर्वसारं चन्द्रसुतो जाबालस्तन्त्रसारकम् ॥ वेदाङ्गसारं तन्त्रं च चकार जाजलिर्मुनिः ॥ २० ॥ पैलो निदानं करथस्तन्त्रं सर्वधरं परम् ॥ द्वैधनिर्णयतन्त्रं च चकार कुम्भसम्भवः ॥ २१ ॥ चिकित्साशास्त्रबीजानि तन्त्राण्येतानि षोडश ॥ व्याधिप्रणाशबीजानि बलाधानकराणि च ॥ २२ ॥ मथित्वा ज्ञानमन्त्रेणैवायुर्वेदपयोनिधिम् ॥ ततस्तस्मादु

---

[1] वैदिकीमिति पाठः ।

दाजह्रुर्नवनीतानि कोविदाः ॥ २३ ॥ एतानि क्रमशो दृष्ट्वा दिव्यां भास्करसंहिताम् ॥ आयुर्वेदं सर्वबीजं सर्वं जानासि सुन्दरि
॥ २४ ॥ व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः ॥ एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः ॥ २५ ॥ आयुर्वेदस्य विज्ञाता चिकि
त्सासु यथार्थवित् ॥ धर्मिष्ठश्च दयालुश्च तेन वैद्यः प्रकीर्तितः ॥२६॥ जनकः सर्वरोगाणां दुर्वारो दारुणो ज्वरः ॥ शिवभक्तश्च योगी
च निष्ठुरो विकृताकृतिः ॥ २७ ॥ भीमस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः ॥ भस्मप्रहरणो रौद्रः कालान्तकयमोपमः ॥२८॥
मन्दाग्निस्तस्य जनको मन्दाग्नेर्जनकास्त्रयः ॥ पित्तश्लेष्मसमीराश्च प्राणिनां दुःखदायकाः ॥ २९ ॥ वायुजः पित्तजश्चैव श्लेष्मजश्च
तथैव च ॥ ज्वरभेदाश्च त्रिविधाश्चतुर्थश्च त्रिदोषजः ॥ ३० ॥ पाण्डुश्च कामलः कुष्ठः शोथः प्लीहा च शूलकः ॥ ज्वरातिसारग्रह
णीकासव्रणहलीमकाः ॥ ३१ ॥ मूत्रकृच्छ्रश्च गुल्मश्च रक्तदोषविकारजः ॥ विषमेहश्च कुब्जश्च गोदश्च गलगण्डकः ॥ ३२ ॥
भ्रमरी सन्निपातश्च विषूची दारुणी सति ॥ एषां भेदप्रभेदेन चतुःषष्टी रुजः स्मृताः ॥ ३३ ॥ मृत्युकन्यासुताश्चैते जरा तस्याश्च
कन्यका ॥ जरा च भ्रातृभिः सार्द्धं शश्वद् भ्रमति भूतलम् ॥३४॥ एते चोपायवेत्तारं न गच्छन्ति च संयतम्॥पलायन्ते च तं दृष्ट्वा
वैनतेयमिवोरगाः ॥ ३५ ॥ चक्षुर्जलं च व्यायामः पादाधस्तैलमर्दनम् ॥ कर्णयोर्मूर्ध्नि तैलं च जराव्याधिविनाशनम् ॥ ३६ ॥ वस
न्ते भ्रमणं वह्निसेवां स्वल्पां करोति यः ॥ बालां च सेवते काले जरा तं नोपगच्छति॥३७॥[1]खातशीतोदकस्नायी सेवते चन्दनद्रवम्
नोपयाति जरा तं च निदाघेऽनिलसेवकम्॥३८॥प्रावृष्युष्णोदकस्नायी घनतोयं न सेवते ॥ समये च समाहारी जरा तं नोपगच्छति
॥ ३९ ॥ शरद्रौद्रं न गृह्णाति भ्रमणं तत्र वर्जयेत् ॥ खातस्नायी समाहारी जरा तं नोपगच्छति ॥ ४० ॥ [2]खातस्नायी च हेमन्ते
काले वह्निं च सेवते ॥ भुङ्क्ते नवान्नमुष्णं च जरा तं नोपगच्छति ॥ ४१ ॥ शिशिरेंऽशुकवह्निं च नवोष्णान्नं च सेवते ॥ यश्च वो
ष्णोदकस्नायी जरा तं नोपगच्छति॥४२॥सद्योमांसं नवान्नं च बालास्त्रीक्षीरभोजनम्॥घृतं च सेवते यो हि जरा तं नोपगच्छति॥४३॥

---

१ प्रातः शीतोदकस्नायी इति पाठः । २ प्रातःस्नायीति पाठः ।

भुङ्क्ते सदन्नं क्षुत्काले तृष्णायां पीयते जलम् ॥ नित्यं भुङ्क्ते च ताम्बूलं जरा तं नोपगच्छति ॥ ४४ ॥ दधि हैयङ्गवीनं च नवनीतं तथा गुडम् ॥ नित्यं भुङ्क्ते संयमी यो जरा तं नोपगच्छति ॥४५॥ शुष्कमांसं स्त्रियं वृद्धां बालार्कं तरुणं दधि ॥ संसेवन्तं जरा याति प्रहृष्टा भ्रातृभिः सह ॥ ४६ ॥ रात्रौ ये दधि सेवन्ते पुंश्चलीश्च रजस्वलाः ॥ तानुपैति जरा हृष्टा भ्रातृभिः सह सुन्दरि ॥ ४७ ॥ रजस्वला च कुलटा चावीरा जारदूतिका ॥ शूद्रयाजकपत्नी या ऋतुहीना च या सति ॥ ४८ ॥ यो हि तासामन्नभोजी ब्रह्महत्यां लभेत्तु सः ॥ तेन पापेन सार्द्धं सा जरा तमुपगच्छति ॥ ४९ ॥ पापानां व्याधिभिः सार्द्धं मित्रता सन्ततं ध्रुवम् ॥ पापं व्याधिजराबीजं विघ्नबीजं च निश्चितम् ॥ ५० ॥ पापेन जायते व्याधिः पापेन जायते जरा ॥ पापेन जायते दैन्यं दुःखं शोको भयङ्करः ॥ ५१ ॥ तस्मात्पापं महावैरं दोषबीजममङ्गलम् ॥ भारते सततं सन्तो नाचरन्ति भयातुराः ॥५२॥ स्वधर्माचारयुक्तं च दीक्षितं हरिसेवकम् ॥ गुरुदेवातिथीनां च भक्तं सक्तं तपःसु च ॥५३॥ व्रतोपवासयुक्तं च सदा तीर्थनिषेवकम् ॥ रोगा द्रवन्ति तं दृष्ट्वा वैनतेयमिवोरगाः॥५४॥एताञ्जरा न सेवेत व्याधिसंघश्च दुर्जयः ॥ सर्वं बोध्यमसमये काले सर्वं ग्रसिष्यति ॥ ५५ ॥ ज्वरस्य सर्वरोगाणां जनकः कथितः सति ॥ पित्तश्लेष्मसमीराश्च ज्वरस्य जनकास्त्रयः ॥ ५६ ॥ एते यथा संचरन्ति स्वयं यान्ति च देहिषु ॥ तमेव विविधोपायं साध्वि मत्तो निशामय ॥५७॥ क्षुधि जाज्वल्यमानायामाहाराभाव एव च ॥ प्राणिनां जायते पित्तं चक्रे च मणिपूरके ॥ ५८ ॥ तालबिल्वफलं भुक्त्वा जलपानं च तत्क्षणम् ॥ तदेव तु भवेत्पित्तं सद्यः प्राणहरं परम् ॥ ५९ ॥ तप्तोदकं च शिरसि भाद्रे तिक्तं विशेषतः ॥ दैवग्रस्तश्च यो भुङ्क्ते पित्तं तस्य प्रजायते ॥ ६० ॥ सशर्करं च धान्याकं पिष्टं शीतोदकान्वितम् ॥ चणकं सर्वगव्यं च दधितक्रविवर्जितम् ॥ ६१ ॥ बिल्वतालफलं पक्वं सर्वमैक्षवमेव च ॥ आर्द्रकं मुद्गयूषं च तिलपिष्टं सशर्करम् ॥ ६२ ॥ पित्तक्षयकरं सद्यो बलपुष्टिप्रदं परम् ॥ पित्तनाशं च

तद्वीजमुक्तमन्यन्निबोध मे ॥ ६३ ॥ भोजनानन्तरं स्नानं जलपानं विना तृषा ॥ तिलतैलं स्निग्धतैलं स्निग्धमामलकीद्रवम् ॥६४॥ पर्य्युषितान्नं च तक्रं च पक्वं रम्भाफलं दधि ॥ मेघाम्बु[१] शर्करातोयं सुस्निग्धजलसेवनम् ॥६५॥ नारिकेलोदकं रूक्षस्नानं पर्य्युषिते जले ॥ तरुगुंजापक्कफलं सुपक्वं कर्क्कटीफलम् ॥६६॥ खातस्नानं च वर्षासु मूलकं श्लेष्मकारकम् ॥ ब्रह्मरन्ध्रे च तज्जन्म महद्वीर्य्यविनाशनम्॥६७॥वह्निस्वेदं भ्रष्टभङ्गं[२] पक्कतैलविशेषकम् ॥ भ्रमणं शुष्कभक्षं च शुष्कपक्वहरीतकी ॥६८॥ पिण्डारकमपक्वं च रम्भाफलमपक्ककम् ॥ वेसवारः सिन्धुवार अनाहारमपानकम् ॥ ६९ ॥ सघृतं रोचनाचूर्णं सघृतं शुष्कशर्करम् ॥ मरीचं पिप्पलं शुष्कमार्द्रकं जीवकं मधु ॥ ७० ॥ द्रव्याण्येतानि गान्धर्वि सद्यःश्लेष्महराणि च ॥ बलपुष्टिकराण्येव वायुबीजं निशामय ॥ ७१ ॥ भोजनानन्तरं सद्यो गमनं धावनं तथा ॥ छेदनं वह्नितापश्च शश्वद्भ्रमणमैथुनम् ॥ ७२ ॥ वृद्धस्त्रीगमनं चैव मनःसन्ताप एव च ॥ अतिरूक्षमनाहारं युद्धं कलहमेव च ॥ ७३ ॥ कटु वाक्यं भयं शोकः केवलं वायुकारणम् ॥ आज्ञाख्यचक्रे तज्जन्म निशामय तदौषधम् ॥ ७४ ॥ पक्वं रम्भाफलं चैव सबीजं शर्करोदकम् ॥ नारिकेलोदकं चैव सद्यस्तक्रं सुपिष्टकम् ॥७५॥ माहिषं दधि मिष्टं च केवलं वा सशर्करम् ॥ सद्यः पर्य्युषितान्नं च सौवीरं शीतलोदकम् ॥ ७६ ॥ पक्वतैलविशेषं च तिलतैलं च केवलम् ॥ लांगलीतालखर्जूरमुष्णमामलकीद्रवम् ॥ ७७ ॥ शीतलोष्णोदकस्नानं सुस्निग्धचन्दनद्रवम् ॥ स्निग्धपद्मपत्रतल्पं सुस्निग्धव्यजनानि च ॥ ७८ ॥ एतत्ते कथितं वत्से सद्योवायुप्रणाशनम् ॥ वायवस्त्रिविधाः पुंसां क्लेशसन्तापकामजाः ॥ ७९ ॥ व्याधिसंघश्च कथितस्तन्त्राणि विविधानि च ॥ तानि व्याधिप्रणाशाय कृतानि सद्भिरेव च ॥ ८० ॥ तन्त्राण्येतानि सर्वाणि व्याधिक्षयकराणि च ॥ रसायनादयो येषु चोपायाश्च सुदुर्लभाः ॥ ८१ ॥ न शक्तः कथितुं साध्वि यथार्थं वत्सरेण च ॥ तेषां च सर्वतन्त्राणां कृतानां च विचक्षणैः॥८२॥ केन रोगेण त्वत्कान्तो मृतः कथय शोभने ॥ तदुपायं करिष्यामि येन जीवेदयं सति ॥ ८३ ॥ सौतिरुवाच ॥ ब्राह्मणस्य वचः

---

[१] मायाम्बु इति पाठः तस्यार्थः विजयाम्बु लोके (भांग) इति प्रसिद्धम् । [२] दृष्टिभङ्गमिति पाठः ।

श्रुत्वा कन्या चित्ररथस्य च ॥ कथां कथितुमारेभे सा गान्धर्वी प्रहर्षिता ॥ ८४ ॥ मालावत्युवाच ॥ योगेन प्राणांस्तत्याज
ब्रह्मणः शापहेतुना ॥ सभायां लज्जितः कान्तो मम विप्र निशामय ॥ ८५ ॥ सर्वं श्रुतमपूर्वं च शुभाख्यानं मनोहरम् ॥ भवेद्भवे
कुतः केषां महल्लभ्यं विपद्विना ॥ ८६ ॥ अधुना मत्प्राणकान्तं देहि देहि विचक्षण ॥ नत्वा वः स्वामिना सार्द्धं यास्यामि स्वगृहं
प्रति ॥ ८७ ॥ मालावतीवचः श्रुत्वा विप्ररूपी जनार्दनः ॥ सभां जगाम देवानां शीघ्रं विप्रस्तदन्तिकात् ॥ ८८ ॥ इति श्रीब्रह्म
वैवर्ते महापु० सौतिशौ० ब्रह्मखण्डे मालावतीविष्णुसंवादे चिकित्साप्रणयने षोडशोऽध्यायः ॥ १६ ॥ सौतिरुवाच ॥ दृष्ट्वा द्विजं
देवसंघः प्रत्युत्थानं चकार च ॥ परस्परं च सम्भाषा बभूव तत्र संसदि ॥ १ ॥ मा तं बुबुधिरे देवाः श्रीहरिं विप्ररूपिणम् ॥
पौर्वापर्य्यं विस्मृताश्च मोहिता विष्णुमायया ॥ २ ॥ सुरान्सम्बोध्य विप्रश्च वाचा मधुरया द्विज ॥ उवाच सत्यं परमं प्राणि
नां यच्छुभावहम् ॥ ३ ॥ ब्राह्मण उवाच ॥ उपबर्हणभार्य्येयं कन्या चित्ररथस्य च ॥ ययाचे जीवदानं च स्वामिनः शोककर्षिता
॥ ४ ॥ अधुना किमनुष्ठानमस्य कार्यस्य निश्चितम् ॥ तन्मां ब्रूत सुराः सर्वे नित्यं यत्समयोचितम् ॥ ५ ॥ शप्तुकामा सुरान्स
र्वान्साध्वी तेजस्विनी वरा ॥ अहं क्षेमाय युष्माकमागतो बोधिता सती ॥ ६ ॥ स्तुतिः कृता च युष्माभिः श्वेतद्वीपे हरेरपि॥युष्मा
कमीशो विष्णुश्च कथमेवात्र नागतः ॥ ७ ॥ बभूवाकाशवाणीति पश्चाद्यास्यति केशवः ॥ विपरीतं कथं भूतं वाणीवाक्यमचञ्चलम्॥
॥ ८ ॥ ब्राह्मणस्य वचः श्रुत्वा स्वयं ब्रह्मा जगद्गुरुः ॥ उवाच वचनं सत्यं हितं परममङ्गलम् ॥९॥ ब्रह्मोवाच ॥ मत्पुत्रो नारदः
शप्तो गन्धर्वश्चोपबर्हणः ॥ योगेन प्राणांस्तत्याज पुनः शापान्ममैव हि ॥ १० ॥ कालं लक्षयुगं व्याप्य स्थितिरस्य महीतले ॥
शूद्रयोनिं ततः प्राप्य भविता मत्सुतः पुनः ॥ ११ ॥ अस्य कालावशेषस्य किञ्चिदस्ति द्वीजोत्तम ॥ तत्तु वर्षसहस्रं चैवायुरस्यास्ति
साम्प्रतम् ॥ १२ ॥ दास्यामि जीवदानं च स्वयं विष्णोः प्रसादतः ॥ यथैनं न स्पृशेच्छापस्तत्करिष्यामि निश्चितम् ॥ १३ ॥
नागतो हरिरत्रेति त्वया यत्कथितं द्विज ॥ हरिः सर्वत्र सर्वात्मा विग्रहः कुत आत्मनः ॥ १४ ॥ स्वेच्छामयः परं ब्रह्म भक्तानुग्रह

विग्रहः ॥ सर्वं पश्यति सर्वज्ञः सर्वत्रास्ति सनातनः ॥ १५ ॥ विषिश्च व्याप्तिवचनो नुश्च सर्वत्रवाचकः ॥ सर्वव्यापी च सर्वात्मा तेन विष्णुः प्रकीर्त्तितः ॥ १६ ॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥१७॥ कर्मारम्भे च मध्ये वा शेषे विष्णुं च यः स्मरेत् ॥ परिपूर्णं तस्य कर्म वैदिकं च भवेद्द्विज ॥ १८ ॥ अहं स्रष्टा च जगतां विधाता संहरो हरः ॥ धर्मश्च कर्मणां साक्षी यस्याज्ञापरिपालकः ॥ १९ ॥ कालः संहरते लोकान्यमः शास्ता च पापिनाम् ॥ उपैति मृत्युः सर्वांश्च भिया यस्याज्ञया सदा ॥ २० ॥ सर्वेशा या च सर्वाद्या प्रकृतिः सर्वसूः पुरा ॥ सा भीता यस्य पुरतो यस्याज्ञापरिपालिका ॥ २१ ॥ महेश्वर उवाच ॥ पुत्राणां ब्रह्मणस्तेषां कस्य वंशोद्भवो भवान् ॥ वेदानधीत्य भवता ज्ञातः कः सार एव च ॥ २२ ॥ शिष्यः कस्य मुनीन्द्रस्य कस्त्वं नाम्ना च भो द्विज ॥ बिभर्त्त्यर्कातिरिक्तं च शिशुरूपोऽसि साम्प्रतम् ॥ २३ ॥ विडम्बयसि देवांश्च विष्णुमस्माकमीश्वरम् ॥ हृदिस्थं च न जानासि परमात्मानमीश्वरम् ॥ २४ ॥ यस्मिन्गते पते देहो देहिनां परमात्मनि ॥ प्रयान्ति सर्वे तत्पश्चान्नरदेवानुगा इव ॥ २५ ॥ जीवस्तत्प्रतिबिम्बश्च मनो ज्ञानं च चेतना ॥ प्राणाश्चेन्द्रियवर्गाश्च बुद्धिर्मेधा धृतिः स्मृतिः ॥२६॥ निद्रा दया च तन्द्रा च क्षुत्तृष्णा पुष्टिरेव च ॥ श्रद्धा संतुष्टिरिच्छा च क्षमा लज्जादिकाः स्मृताः ॥ २७ ॥ प्रयाति यत्पुरः शक्तिरीश्वरे गमनोन्मुखे ॥ एते सर्वे च शक्तिश्च यस्याज्ञापरिपालकाः ॥२८॥ ईश्वरे च स्थिते देही क्षमश्च सर्वकर्मसु ॥ गतेऽस्पृश्यः शवस्त्याज्यः कस्तं देही न मन्यते ॥ २९ ॥ स्वयं ब्रह्मा च जगतां विधाता सर्वकारकः ॥ पादारविन्दमनिशं ध्यायते द्रष्टुमक्षमः ॥ ३० ॥ युगलक्षं तपस्तप्तं श्रीकृष्णस्य च वेधसा ॥ तदा बभूव ज्ञानी च जगत्स्रष्टुं क्षमस्तदा ॥ ३१ ॥ असंख्यकालं सुचिरं तपस्तप्तं हरेर्मया ॥ तृप्तिं जगाम न मनस्तृप्यते केन मङ्गले ॥३२॥ अधुना पञ्चवक्रेण यन्नामगुणकीर्तनम् ॥ गायन्भ्रमामि सर्वत्र निस्पृहः सर्वकर्मसु ॥ ३३ ॥ मत्तो याति च मृत्युश्च यन्नामगुणकीर्त्तनात् ॥ शश्वज्जपन्तं तन्नाम दृष्ट्वा मृत्युः पलायते ॥ ३४ ॥ सर्वब्रह्माण्डसंहर्त्ताऽप्यहं मृत्युंजयाभिधः ॥ सुचिरं तपसा यस्य गुणनामानुकीर्त्तनात् ॥ ३५ ॥

काले तत्र विलीनोऽहमाविर्भूतस्ततः पुनः ॥ न कालो मम संहर्त्ता न मृत्युर्यत्प्रसादतः ।।३६॥ गोलोके यः स वैकुण्ठे श्वेतद्वीपे स एव
च ॥ अंशांशिनोर्न भेदश्च ब्रह्मन्वह्निस्फुलिङ्गवत् ॥ ३७ ॥ मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः ॥ अष्टाविंशतिमे शक्रे गते
च ब्रह्मणो दिनम् ॥ ३८ ॥ एतत्संख्याविशिष्टस्य शतवर्षायुषो विधेः ॥ पाते लोचनपातश्च यद्विष्णोः परमात्मनः ॥ ३९ ॥ अहं
कलानामृषभः कृष्णस्य परमात्मनः ॥ परं महिम्नः को गच्छेन्न जानामि च किञ्चन ॥ ४० ॥ इत्युक्त्वा शङ्करस्तत्र विरराम च
शौनक ॥ धर्मश्च वक्तुमारेभे यः साक्षी सर्वकर्मणाम् ॥ ४१ ॥ धर्म उवाच ॥ यत्पाणिपादौ सर्वत्र चक्षुश्च सर्वदर्शनम् ॥ सर्वान्तरा
त्मा प्रत्यक्षोऽप्रत्यक्षश्च दुरात्मनः ॥ ४२ ॥ अधुनाऽपि सभां विष्णुर्नायात इति यद्वचः ॥ त्वयोक्तं तत्कया बुद्ध्या मुनीनां च मति
भ्रमः ॥ ४३ ॥ महन्निन्दा भवेद्यत्र नैव साधुः शृणोति ताम् ॥ निन्दकः श्रोतृभिः सार्द्धं कुम्भीपाकं व्रजेद्युगम् ॥ ४४ ॥ श्रुत्वा देवा
न्महन्निन्दां श्रीविष्णोः स्मरणाद् बुधः ॥ मुच्यते सर्वपापेभ्यः पुण्यं प्राप्नोति दुर्लभम् ॥४५॥ कामतोऽकामतो वाऽपि विष्णुनिन्दां
करोति यः ॥ शृणोति यो हसति वा सभामध्ये नराधमः ॥ ४६ ॥ कुम्भीपाके पचति स यावद्धि ब्रह्मणो वयः ॥ स्थलं भवेदपूतं
च सुरापात्रं यथा द्विज ॥ ४७ ॥ प्राणी च नरकं याति श्रुतं तत्रैव चेद्ध्रुवम् ॥ विष्णुनिन्दा च त्रिविधा ब्रह्मणा कथिता पुरा ॥ ४८॥
अप्रत्यक्षं च कुरुते किं वा तं च न मन्यते ॥ देवान्यसाम्यं कुरुते ज्ञानहीनो नराधमः॥४९॥तस्यात्र निष्कृतिर्नास्ति यावद्वै ब्रह्मणः
शतम् ॥ गुरोर्निन्दां यः करोति पितुर्निन्दां नराधमः ॥ स याति कालसूत्रं च यावच्चन्द्रदिवाकरौ ॥ ५० ॥ विष्णुर्गुरुश्च सर्वेषां
जनको ज्ञानदायकः ॥ पोष्टा पाता भयत्राता वरदाता जगत्त्रये ॥ ५१ ॥ एषां च वचनं श्रुत्वा त्रयाणां विप्रपुङ्गव ॥ प्रहस्योवाच
तान्देवान्वाचा मधुरया पुनः ॥ ५२ ॥ ब्राह्मण उवाच ॥ का कृता विष्णुनिन्दाऽहो हे देवा धर्मशालिनः ॥ नागतो हरिरत्रेति
व्यर्थाऽऽकाशसरस्वती ॥५३॥ इति प्रोक्तं मया भद्रं ब्रूत धर्मार्थमीश्वराः ॥ सभायां पाक्षिकाः सन्तो घ्नन्ति स्म शतपूरुषम् ॥५४॥
यूयं च भावुका ब्रूत विष्णुः सर्वत्र सन्ततम् ॥ इति चेत्तत्कथं याताः श्वेतद्वीपं वराय च ॥५५॥ अंशांशिनोर्न भेदश्चेदात्मनश्चेति

निश्चितम्॥कलां हित्वा निषेवन्ते सन्तः पूर्णतमं कथम् ॥५६॥ कोटिजन्मदुराराध्यमसाध्यमसतामपि ॥ आशा बलवती पुंसां कृष्णं सेवितुमिच्छति ॥५७॥ किं क्षुद्राः किं महान्तश्च वाञ्छन्ति परमं पदम् ॥ लब्धुमिच्छति चन्द्रं च बाहुभ्यां वामनो यथा॥५८॥ यो विष्णुर्विषयी विश्वे श्वेतद्वीपनिवासकृत्॥यूयं ब्रह्मेशधर्माश्च दिक्पालाश्च दिगीश्वराः॥५९॥ब्रह्मविष्णुशिवाद्याश्च सुरलोकाश्चराचराः ॥ एवं कतिविधाः सन्ति प्रतिविश्वेषु सन्ततम् ॥ ६० ॥ विश्वानां च सुराणां च कः संख्यां कर्तुमीश्वरः ॥ सर्वेषामीश्वरः कृष्णो भक्तानुग्रहविग्रहः ॥ ६१ ॥ ऊर्ध्वं च सर्वब्रह्माण्डाद्वैकुण्ठं सत्यमीप्सितम् ॥ तस्मादूर्ध्वं च गोलोकः पञ्चाशत्कोटियोजनम् ॥ ६२ ॥ चतुर्भुजश्च वैकुण्ठे लक्ष्मीकान्तः सनातनः ॥ सुनन्दनन्दकुमुदपार्षदादिभिरावृतः ॥ ६३ ॥ गोलोके द्विभुजः कृष्णो राधाकान्तः सनातनः ॥ गोपाङ्गनादिभिर्युक्तो द्विभुजैर्वोपपार्षदैः ॥ ६४ ॥ परिपूर्णतमं ब्रह्म स चात्मा सर्वदेहिनाम् ॥ स्वेच्छामयश्च विहरेद्रासे वृन्दावने सदा ॥ ६५ ॥ तज्ज्योतिर्मण्डलाकारं सूर्य्यकोटिसमप्रभम् ॥ ध्यायन्ते योगिनः सन्तः सन्ततं च निरामयम् ॥ ६६ ॥ नवीननीरदश्यामं द्विभुजं पीतवाससम् ॥ कोटिकन्दर्पलावण्यलीलाधाम मनोहरम् ॥ ६७ ॥ किशोरनयनं शश्वच्छान्तं सस्मितमीश्वरम् ॥ ध्यायन्ते वैष्णवाः सन्तः सेवन्ते सत्यविग्रहम् ॥ ६८ ॥ यूयं च वैष्णवा ब्रूत कस्य वंशोद्भवो भवान् ॥ शिष्यः कस्य मुनीन्द्रस्येत्येवं मां च पुनः पुनः ॥ ६९ ॥ यस्य वंशोद्भवोऽहं च यस्य शिष्यश्च बालकः ॥ तस्येदं वचनं ज्ञानं देवसंघा निबोधत ॥ ॥ ७० ॥ शीघ्रं जीवय गन्धर्वं देवेश्वर सुरेश्वर ॥ व्यक्ते विचारे मूर्खः को वाग्युद्धे किं प्रयोजनम् ॥ ७१ ॥ इत्युक्त्वा बालकस्तत्र विप्ररूपी जनार्दनः ॥ विरराम सभामध्ये प्रजहास च शौनक ॥ ७२ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे ब्रह्मखण्डे विष्णुसुरसंघसंवादे विष्णुप्रशंसाप्रणयने सप्तदशोऽध्यायः ॥ १७ ॥ सौतिरुवाच ॥देवाः सार्द्धं ब्राह्मणेन मोहिता विष्णुमायया ॥ प्रययुर्मालतीमूलं ब्रह्मेशानपुरोगमाः ॥ १ ॥ ब्रह्मा कमण्डलुजलं ददौ गात्रे शवस्य च ॥ संचारं मनसस्तस्य चकार सुन्दरं वपुः ॥ २ ॥ ज्ञानदानं ददौ तस्मै ज्ञानानन्दः शिवः स्वयम् ॥ धर्मज्ञानं स्वयं धर्मो जीवदानं च ब्राह्मणः ॥ ३ ॥ वह्निदर्शनमात्रेण बभूव जठरानलः ॥ कामदर्शी

नमात्रेण सर्वकामः सुनिश्चितम् ॥ ४ ॥ तस्य वायोरधिष्ठानाज्जगत्प्राणस्वरूपिणः ॥ निश्वासस्य च सञ्चारः प्राणानां च बभूव ह॥ ॥ ५ ॥ सूर्य्याधिष्ठानमात्रेण दृष्टिशक्तिर्बभूव ह ॥ वाक्यं वाणीदर्शनेन शोभा श्रीदर्शनेन च ॥ ६ ॥ शवस्तथाऽपि नोत्तस्थौ यथा शेते जडस्तथा ॥ विशिष्टबोधनं प्राप चाधिष्ठानं विनाऽऽत्मनः ॥ ७ ॥ ब्रह्मणो वचनात्साध्वी तुष्टाव परमेश्वरम् ॥ स्नात्वा शीघ्रं सरित्तोये धृत्वा धौते च वाससी ॥ ८ ॥ मालावत्युवाच ॥ वन्दे तं परमात्मानं सर्वकारणकारणम् ॥ विना येन शवाः सर्वे प्राणिनो जगतीतले ॥ ९ ॥ निर्लिप्तं साक्षिरूपं च सर्वेषां सर्वकर्मसु ॥ विद्यमानं न दृष्टं च सर्वैः सर्वत्र सर्वदा ॥ १० ॥ येन सृष्टा च प्रकृतिः सर्वाधारा परात्परा ॥ ब्रह्मविष्णुशिवादीनां प्रसूर्या त्रिगुणात्मिका ॥ ११ ॥ जगत्स्रष्टा स्वयं ब्रह्मा नियतो यस्य सेवया ॥ पाता विष्णुश्च जगतां संहर्त्ता शङ्करः स्वयम् ॥ १२ ॥ ध्यायन्ते यं सुराः सर्वे मुनयो मनवस्तथा ॥ सिद्धाश्च योगिनः सन्तः सन्ततं प्रकृतेः परम्॥१३॥ साकारं च निराकारं परं स्वेच्छामयं विभुम् ॥ वरं वरेण्यं वरदं वरार्हं वरकारणम् ॥१४ ॥ तपःफलं तपोबीजं तपसां च फलप्रदम् ॥ स्वयंतपःस्वरूपं च सर्वरूपं च सर्वतः ॥ १५ ॥ सर्वाधारं सर्वबीजं कर्म तत्कर्मणां फलम् ॥ तेषां च फलदातारं तद्बीजं क्षयकारणम् ॥ १६ ॥ स्वयंतेजःस्वरूपं च भक्तानुग्रहविग्रहम् ॥ सेवाध्यानं न घटते भक्तानां विग्रहं विना ॥ १७ ॥ तत्तेजो मण्डलाकारं सूर्य्यकोटिसमप्रभम् ॥ अतीव कमनीयं च रूपं तत्र मनोहरम् ॥ १८ ॥ नवीननीरदश्यामं शरत्पङ्कजलोचनम् ॥ शरत्पार्वणचन्द्रास्यमीषद्धास्यसमन्वितम् ॥ १९ ॥ कोटिकन्दर्पलावण्यं लीलाधाम मनोहरम् ॥ चन्दनोक्षितसर्वाङ्गं रत्नभूषणभूषितम् ॥ ॥ २० ॥ द्विभुजं मुरलीहस्तं पीतकौशेयवाससम् ॥ किशोरवयसं शान्तं राधाकान्तमनन्तकम् ॥ २१ ॥ गोपाङ्गनापरिवृतं कुत्रचिन्निर्जने वने ॥ कुत्रचिद्रासमध्यस्थं राधया परिषेवितम् ॥ २२ ॥ कुत्रचिद्गोपवेषं च वेष्टितं गोपबालकैः ॥ शतशृङ्गाचलोत्कृष्टे रम्ये वृन्दावने वने ॥ २३ ॥ निकरं कामधेनूनां रक्षन्तं शिशुरूपिणम् ॥ गोलोके विरजातीरे पारिजातवने वने ॥ २४ ॥ वेणुं क्वणन्तं मधुरं गोपीसम्मोहकारणम् ॥ निरामये च वैकुंठे कुत्रचिच्च चतुर्भुजम् ॥ २५ ॥ लक्ष्मीकान्तं पार्षदैश्च सेवितं च चतुर्भुजैः ॥ कुत्रचि

त्स्वांशरूपेण जगतां पालनाय च॥२६॥श्वेतद्वीपे विष्णुरूपं पद्मया परिषेवितम् ॥ कुत्रचित्स्वांशकलया ब्रह्माण्डे ब्रह्मरूपिणम् ॥२७॥ शिवस्वरूपं शिवदं स्वांशेन शिवरूपिणम् ॥ स्वात्मनः षोडशांशेन सर्वाधारं परात्परम् ॥२८॥ स्वयं महद्विराड्रूपं विश्वौघं यस्य लोमसु ॥ लीलया स्वांशकलया जगतां पालनाय च॥२९॥नानावतारं बिभ्रन्तं बीजं तेषां सनातनम् ॥ वसन्तं कुत्रचित्सन्तं योगिनां हृदये सताम् ॥३०॥ प्राणरूपं प्राणिनां च परमात्मानमीश्वरम् ॥ तं च स्तोतुमशक्ताऽहमबला निर्गुणं विभुम्॥३१॥निर्लक्ष्यं च निरीहं च सारं वाङ्मनसोः परम् ॥ यं स्तोतुमक्षमोऽनन्तः सहस्रवदनेन च ॥३२॥ पञ्चवक्त्रश्चतुर्वक्त्रो गजवक्त्रः षडाननः ॥ यं स्तोतुं न क्षमा माया मोहिता यस्य मायया॥३३॥यं स्तोतुं न क्षमा श्रीश्च जडीभूता सरस्वती॥वेदा न शक्ता यं स्तोतुं को वा विद्वांश्च वेदवित्॥३४॥ किं स्तौमि तमनीहं च शोकार्त्ता स्त्री परात्परम् ॥ इत्युक्त्वा सा च गान्धर्वी विरराम रुरोद च ॥ ३५ ॥ कृपानिधिं प्रणनाम भयार्ता च पुनः पुनः ॥ कृष्णश्च शक्तिभिः सार्द्धमधिष्ठानं चकार ह ॥ ३६ ॥ भर्तुरस्यान्तरे तस्याः परमात्मा निराकृतिः ॥ उत्थाय शीघ्रं वीणां च धृत्वा स्नात्वा च वाससी ॥ ३७ ॥ प्रणनाम[1] देवसंघं ब्राह्मणं पुरतः स्थितम् ॥ नेदुर्दुन्दुभयो देवाः पुष्पवृष्टिं च[2] चक्रिरे ॥ ३८ ॥ दृष्ट्वा चोपरि दम्पत्योः प्रददुः परमाशिषम् ॥ गन्धर्वो देवपुरतो ननर्त्त च जगौ क्षणम् ॥ ३९ ॥ जीवितं पुरतः प्राप देवानां च वरेण च ॥ जगाम पत्न्या सार्द्धं च पित्रा मात्रा च हर्षितः ॥ ४० ॥ उपबर्हणगन्धर्वो गन्धर्वनगरं पुनः ॥ मालावती रत्नकोटिं धनानि विविधानि च ॥ ४१ ॥ प्रददौ ब्राह्मणेभ्यश्च भोजयामास तान्सती ॥ वेदांश्च पाठयामास कारयामास मङ्गलम् ॥ ४२ ॥ महोत्सवं च विविधं हरेर्नामैकमङ्गलम् ॥ जग्मुर्देवाश्च स्वस्थानं विप्ररूपी हरिः स्वयम् ॥ ४३ ॥ एतत्ते कथितं सर्वं स्तवराजं च शौनक ॥ इदं स्तोत्रं पुण्यरूपं पूजाकाले तु यः पठेत् ॥ ४४ ॥ हरिभक्तिं हरेर्दास्यं लभते वैष्णवो जनः॥ वरार्थी यः पठेद्भक्त्या चास्तिकः परमास्थया॥ ४५ ॥ धर्मार्थकाममोक्षाणां निश्चितं लभते फलम् ॥ विद्यार्थी लभते विद्यां धनार्थी

---

[1] प्रणेमुर्देवसंघाश्चेति पाठः । [2] पुष्पवृष्टिमुचो दिवीति पाठः ।

लभते धनम् ॥ ४६ ॥ भार्य्यार्थी लभते भार्य्यां पुत्रार्थी लभते सुतम् ॥ धर्मार्थी लभते धर्मं यशोऽर्थी लभते यशः ॥ ४७ ॥
भ्रष्टराज्यो लभेद्राज्यं प्रजाभ्रष्टः प्रजां लभेत् ॥ रोगार्त्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ॥ ४८ ॥ भयान्मुच्येत भीतस्तु धनं
नष्टधनो लभेत् ॥ दस्युग्रस्तो महारण्ये हिंस्रजन्तुसमन्वितः ॥ दावाग्निदग्धो मुच्येत निमग्नश्च जलार्णवे ॥ ४९ ॥ इति श्रीब्रह्मवै
वर्त्ते महापुराणे ब्रह्मखण्डे सौतिशौनकसंवादे गन्धर्वजीवदाने महापुरुषस्तोत्रप्रणयनं नामाष्टादशोऽध्यायः ॥ १८ ॥ सौतिरुवाच ॥
मालावती धनं दत्त्वा ब्राह्मणेभ्यः प्रहार्षिता ॥ चकार विविधं वेशं स्वात्मनः स्वामिनः कृते ॥१॥ भर्तुश्चकार शुश्रूषां पूजां च समयो
चिताम्॥तेन सार्द्धं सुरसिका रेमे सा सुचिरं मुदा॥२॥महापुरुषस्तोत्रं च पूजां च कवचं मनुम् ॥ विस्मृतं बोधयामास स्वयं रहसि
सुव्रता ॥ ३ ॥ पुरा दत्तं वसिष्ठेन स्तोत्रपूजादिकं हरेः ॥ गन्धर्वाय च मालत्यै मन्त्रमेकं च पुष्करे ॥४॥ विस्मृतं स्तोत्रकवचं वसि
ष्ठश्च कृपानिधिः ॥ गन्धर्वराजं रहसि बोधयामास शूलिनः ॥ ५ ॥ एवं चकार राज्यं च कुबेरभवनोपमे ॥ आश्रमे परमानन्दो
गन्धर्वो बान्धवैः सह ॥ ६ ॥ यथातथा गताभिश्च स्त्रीभिरन्याभिरेव च ॥ आगत्य ताभिः स्वस्वामी संप्राप्तः परया मुदा ॥ ७ ॥
शौनक उवाच ॥ किं स्तोत्रं कवचं विष्णोर्मन्त्रपूजाविधिः पुरा ॥ दत्तो विशिष्टस्ताभ्यां च तं भवान्वक्तुमर्हति ॥ ८ ॥ द्वादशा
क्षरमन्त्रं च शूलिनः कवचादिकम् ॥ दत्तं गन्धर्वराजाय वसिष्ठेन च किं पुरा ॥ ९ ॥ तदपि ब्रूहि हे सौते श्रोतुं कौतूहलं मम ॥
शङ्करस्तोत्रकवचं मन्त्रं दुर्गतिनाशनम् ॥१०॥ सौतिरुवाच ॥ तुष्टाव येन स्तोत्रेण मालती परमेश्वरम् ॥ तदेव स्तोत्रं दत्तं च मन्त्रं च
कवचं शृणु ॥ ११॥ ॐ नमो भगवते रासमण्डलेशाय स्वाहा ॥ इमं मन्त्रं कल्पतरुं प्रददौ षोडशाक्षरम् ॥ १२ ॥ पुरा दत्तं कुमा
राय ब्रह्मणा पुष्करे हरेः ॥ पुरा दत्तं च कृष्णेन गोलोके शङ्कराय च ॥१३॥ ध्यानं च विष्णोर्वेदोक्तं शाश्वतं सर्वदुर्लभम् ॥ मूलेन
सर्वं देयं च नैवेद्यादिकमुत्तमम् ॥ १४ ॥ अतीव गुप्तकवचं पितुर्वक्त्रान्मया श्रुतम् ॥ पित्रे दत्तं पुरा विप्र गङ्गायां शूलिना ध्रुवम्॥
॥ १५ ॥ शूलिने ब्रह्मणे दत्तं गोलोके रासमण्डले ॥ धर्माय गोपीकान्तेन कृपया परमाद्भुतम् ॥ १६ ॥ ब्रह्मोवाच ॥ राधाकान्त

महाभाग कवचं यत्प्रकाशितम् ॥ ब्रह्माण्डपावनं नाम कृपया कथय प्रभो ॥ १७ ॥ मां महेशं च धर्मं च भक्तं च भक्तवत्सल ॥ त्वत्प्रसादेन पुत्रेभ्यो दास्यामि भक्तिसंयुतः ॥ १८ ॥ श्रीकृष्ण उवाच ॥ शृणु वक्ष्यामि ब्रह्मेश धर्मेदं कवचं परम् ॥ अहं दास्यामि युष्मभ्यं गोपनीयं सुदुर्लभम् ॥ १९ ॥ यस्मै कस्मै न दातव्यं प्राणतुल्यं ममैव हि ॥ यत्तेजो मम देहेऽस्ति तत्तेजः कवचेऽपि च ॥ २० ॥ कुरु सृष्टिमिमं धृत्वा धाता त्रिजगतां भव ॥ संहर्त्ता भव हे शम्भो मम तुल्यो भवे भव ॥ ॥ २१ ॥ हे धर्म त्वमिमं धृत्वा भव साक्षी च कर्मणाम् ॥ तपसां फलदातारो यूयं भवत मद्वरात् ॥ २२ ॥ ब्रह्माण्डपावनस्यास्य कवचस्य हरिः स्वयम् ॥ ऋषिश्छन्दश्च गायत्री देवोऽहं जगदीश्वरः ॥ २३ ॥ धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॥ त्रिलक्षवार पठनात्सिद्धिदं कवचं विधे ॥ २४ ॥ यो भवेत्सिद्धकवचो मम तुल्यो भवेच्च सः ॥ तेजसा सिद्धियोगेन ज्ञानेन विक्रमेण च ॥ ॥ २५ ॥ प्रणवो मे शिरः पातु नमो रामेश्वराय च ॥ भालं पायान्नेत्रयुग्मं नमो राधेश्वराय च ॥ २६ ॥ कृष्णः पायाच्छ्रोत्रयुग्मं हे हरे घ्राणमेव च ॥ जिह्विकां वह्निजाया तु कृष्णायेति च सर्वतः ॥ २७ ॥ श्रीकृष्णाय स्वाहेति च कण्ठं पातु षडक्षरः ॥ ह्रीं कृष्णाय नमो वक्रं क्लींपूर्वश्च भुजद्वयम् ॥ २८ ॥ नमो गोपाङ्गनेशाय स्कन्धावष्टाक्षरोऽवतु ॥ दन्तपङ्क्तिमोष्ठयुग्मं नमो गोपीश्वराय च ॥ २९ ॥ ॐ नमो भगवते रासमण्डलेशाय स्वाहा ॥ स्वयं वक्षःस्थलं पातु मन्त्रोऽयं षोडशाक्षरः ॥ ३० ॥ ऐं कृष्णाय स्वाहेति च कर्णयुग्मं सदाऽवतु ॥ ॐ विष्णवे स्वाहेति च कपोलं सर्वतोऽवतु ॥ ३१ ॥ ॐ हरये नम इति पृष्ठं पादं सदाऽवतु ॥ ॐ गोवर्द्धनधारिणे स्वाहा सर्वशरीरकम् ॥ ३२ ॥ प्राच्यां मां पातु श्रीकृष्ण आग्नेय्यां पातु माधवः ॥ दक्षिणे पातु गोपीशो नैर्ऋत्यां नन्दनन्दनः ॥ ३३ ॥ वारुण्यां पातु गोविन्दो वायव्यां राधिकेश्वरः ॥ उत्तरे पातु रासेश ऐशान्यामच्युतः स्वयम् ॥ ३४ ॥ सततं सर्वतः पातु परो नारायणः स्वयम्॥इति ते कथितं ब्रह्मन्कवचं परमाद्भुतम् ॥३५॥ मम जीवनतुल्यं च युष्मभ्यं दत्तमेव च ॥ अश्वमेधसहस्राणि वाजपेयशतानि च ॥ कलां नार्हन्ति तान्येव कवचस्यैव धारणात् ॥ ३६ ॥ गुरुमभ्यर्च्य विधिवद्वस्त्रालङ्कार

चन्दनैः ॥ स्नात्वा तं च नमस्कृत्य कवचं धारयेत्सुधीः ॥ ३७ ॥ कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः ॥ यदि स्यात्सिद्धकवचो
विष्णुरेव भवेद्द्विज ॥ ३८ ॥ सौतिरुवाच ॥ शिवस्य कवचं स्तोत्रं श्रूयतामिति शौनक ॥ वशिष्ठेन च यद्दत्तं गन्धर्वाय च यो मनुः
॥ ३९ ॥ ॐ नमो भगवते शिवाय स्वाहेति च मनुः ॥ दत्तो वशिष्ठेन पुरा पुष्करे कृपया विभो ॥ ४० ॥ अयं मन्त्रो रावणाय
प्रदत्तो ब्रह्मणा पुरा ॥ स्वयं शम्भुश्च बाणाय तथा दुर्वाससे पुरा ॥४१॥ मूलेन सर्वं देयं च नैवेद्यादिकमुत्तमम् ॥ ध्यायेन्नित्यादिकं
ध्यानं वेदोक्तं सर्वसम्मतम्॥४२॥ॐ नमो महादेवाय ॥ बाणासुर उवाच ॥ महेश्वर महाभाग कवचं यत्प्रकाशितम् ॥ संसार पावनं
नाम कृपया कथय प्रभो ॥ ४३ ॥ महेश्वर उवाच ॥ शृणु वक्ष्यामि हे वत्स कवचं परमाद्भुतम् ॥ अहं तुभ्यं प्रदास्यामि गोपनीयं
सुदुर्लभम् ॥ ४४ ॥ पुरा दुर्वाससे दत्तं त्रैलोक्यविजयाय च ॥ ४५ ॥ ममैवेदं च कवचं भक्त्या यो धारयेत्सुधीः ॥ जेतुं शक्नोति
त्रैलोक्यं भगवन्नवलीलया॥४६॥संसारपावनस्यास्य कवचस्य प्रजापतिः॥ऋषिश्छन्दश्च गायत्री देवोऽहं च महेश्वरः॥धर्मार्थकाममोक्षेषु
विनियोगः प्रकीर्तितः ॥ ४७ ॥ पंचलक्षजपेनैव सिद्धिदं कवचं भवेत् ॥ यो भवेत्सिद्धकवचो मम तुल्यो भवेद्भुवि ॥ तेजसा सिद्धि
योगेन तपसा विक्रमेण च ॥४८॥शम्भुर्मे मस्तकं पातु मुखं पातु महेश्वरः ॥ दन्तपंक्तिं नीलकण्ठोऽप्यधरोष्ठं हरः स्वयम् ॥ ४९॥
कण्ठं पातु चन्द्रचूडः स्कन्धौ वृषभवाहनः ॥ वक्षःस्थलं नीलकण्ठः पातु पृष्ठं दिगम्बरः ॥ ५० ॥ सर्वाङ्गं पातु विश्वेशः सर्वदिक्षु च
सर्वदा ॥ स्वप्ने जागरणे चैव स्थाणुर्मे पातु सन्ततम् ॥ ५१ ॥ इति ते कथितं बाण कवचं परमाद्भुतम् ॥ यस्मै कस्मै न दातव्यं
गोपनीयं प्रयत्नतः ॥ ५२ ॥ यत्फलं सर्वतीर्थानां स्नानेन लभते नरः ॥ तत्फलं लभते नूनं कवचस्यैव धारणात् ॥ ५३ ॥ इदं
कवचमज्ञात्वा भजेन्मां यः सुमन्दधीः ॥ शतलक्षप्रजप्तोऽपि न मन्त्रः सिद्धिदायकः ॥ ५४ ॥ सौतिरुवाच ॥ इदं च कवचं प्रोक्तं
स्तोत्रं च शृणु शौनक ॥ मन्त्रराजः कल्पतरुर्वशिष्ठो दत्तवान्पुरा ॥ ५५ ॥ ॐ नमः शिवाय ॥ बाणासुर उवाच ॥ वन्दे सुराणां
सारं च सुरेशं नीललोहितम् ॥ योगीश्वरं योगबीजं योगिनां च गुरोर्गुरुम् ॥ ५६ ॥ ज्ञानानन्दं ज्ञानरूपं ज्ञानबीजं सनातनम् ॥

तपसां फलदातारं दातारं सर्वसम्पदाम् ॥५७॥ तपोरूपं तपोबीजं तपोधनधनं वरम् ॥ वरं वरेण्यं वरदमीड्यं सिद्धगणैर्वरैः॥५८॥ कारणं भुक्तिमुक्तीनां नरकार्णवतारणम् ॥ आशुतोषं प्रसन्नास्यं करुणामयसागरम् ॥५९॥ हिमचन्दनकुन्देन्दुकुमुदाम्भोजसन्निभम्॥ ब्रह्मज्योतिःस्वरूपं च भक्तानुग्रहविग्रहम् ॥ ६० ॥ विषयाणां विभेदेन बिभ्रतं बहुरूपकम् ॥ जलरूपमग्निरूपमाकाशरूपमीश्वरम्॥ ॥ ६१ ॥ वायुरूपं चन्द्ररूपं सूर्य्यरूपं महत्प्रभुम् ॥ आत्मनः स्वपदं दातुं समर्थमवलीलया ॥ ६२ ॥ भक्तजीवनमीशं च भक्तानुग्रहकातरम् ॥ वेदा न शक्ता यं स्तोतुं किमहं स्तौमि तं प्रभुम् ॥६३॥ अपरिच्छिन्नमीशानमहो वाङ्मनसोः परम् ॥ व्याघ्रचर्माम्बरधरं वृषभस्थं दिगम्बरम् ॥ त्रिशूलपट्टिशधरं सस्मितं चन्द्रशेखरम् ॥ ६४ ॥ इत्युक्ता स्तवराजेन नित्यं बाणः सुसंयतः ॥ प्राणमच्छङ्करं भक्त्या दुर्वासाश्च मुनीश्वरः ॥ ६५ ॥ इदं दत्तं वसिष्ठेन गन्धर्वाय पुरा मुने ॥ कथितं च महास्तोत्रं शूलिनः परमाद्भुतम् ॥ ६६ ॥ इदं स्तोत्रं महापुण्यं पठेद्भक्त्या च यो नरः ॥ स्नानस्य सर्वतीर्थानां फलमाप्नोति निश्चितम् ॥ ६७ ॥ अपुत्रो लभते पुत्रं वर्षमेकं शृणोति यः ॥ संयतश्च हविष्याशी प्रणम्य शङ्करं गुरुम् ॥ ६८ ॥ गलत्कुष्ठी महाशूली वर्षमेकं शृणोति यः ॥ अवश्यं मुच्यते रोगाद्व्यासवाक्यमिति श्रुतम् ॥ ६९ ॥ कारागारेऽपि बद्धो यो नैव प्राप्नोति निर्वृतिम् ॥ स्तोत्रं श्रुत्वा मासमेकं मुच्यते बन्धनाद् ध्रुवम् ॥ ७० ॥ भ्रष्टराज्यो लभेद्राज्यं भक्त्या मासं शृणोति यः ॥ मासं श्रुत्वा संयतश्च लभेद्भ्रष्टधनो धनम् ॥ ७१ ॥ यक्ष्मग्रस्तो वर्षमेकमास्तिको यः शृणोति चेत् ॥ निश्चितं मुच्यते रोगाच्छङ्करस्य प्रसादतः ॥ ७२ ॥ यः शृणोति सदा भक्त्या स्तवराजमिमं द्विज ॥ तस्यासाध्यं त्रिभुवने नास्ति किंचिच्च शौनक ॥ ७३ ॥ कदाचिद्बन्धुविच्छेदो न भवेत्तस्य भारते ॥ अचलं परमैश्वर्य्यं लभते नात्र संशयः ॥ ७४ ॥ सुसंयतोऽतिभक्त्या च मासमेकं शृणोति यः ॥ अभार्य्यो लभते भार्य्यां सुविनीतां सतीं वराम् ॥७५॥ महामूर्खश्च दुर्मेधा मासमेकं शृणोति यः ॥ बुद्धिं विद्यां च लभते गुरूपदेशमात्रतः॥७६॥कर्मदुःखी दरिद्रश्च मासं भक्त्या शृणोति यः॥ध्रुवं वित्तं भवेत्तस्य शङ्करस्य प्रसादतः॥७७॥

इह लोके सुखं भुक्त्वा कृत्वा कीर्तिं सुदुर्लभाम् ॥ नानाप्रकारधर्मं च यात्यन्ते शङ्करालयम् ॥ ७८ ॥ पार्षदप्रवरो भूत्वा
सेवते तत्र शङ्करम् ॥ यः शृणोति त्रिसन्ध्यं च नित्यं स्तोत्रमनुत्तमम् ॥ ७९ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे ब्रह्मखण्डे सौतिशौनक
संवादे विष्णुशङ्करस्तोत्रकथनं नामैकोनविंशोऽध्यायः ॥ १९ ॥ सौतिरुवाच ॥ मुदा मालावतीसार्द्धं गन्धर्वश्चोपबर्हणः ॥ रेमे काला
वशेषं च ताभिश्च निर्जने वने ॥ १ ॥ गन्धर्वराजो मुमुदे पुत्रदारादिभिः सह ॥ नानाविधं क्रतुवरं महत्पुण्यं चकार ह ॥ २ ॥
राजत्वं बुभुजे राजा कुबेरभवनोपमे ॥ रेमे सुशीलया सार्द्धं स्थिरयौवनयुक्तया ॥ ३ ॥ गन्धर्वराजः काले च गङ्गातीरे मनोहरे ॥
पत्न्या सार्द्धमसूंस्त्यक्त्वा वैकुण्ठं च ययौ मुदा ॥ ४ ॥ शैवः शिवप्रसादेन पुत्रस्य विष्णुसेवया ॥ बभूव दासो वैकुण्ठे विष्णोः
श्यामचतुर्भुजः ॥ ५ ॥ कृत्वा पित्रोश्च सत्कारं गन्धर्वश्चोपबर्हणः ॥ ब्राह्मणेभ्यो ददौ विप्र धनानि विविधानि च ॥ ६ ॥ काले
स्वयं ब्रह्मशापात्प्राणांस्त्यक्त्वा विचक्षणः ॥ स जज्ञे वृषलीगर्भें ब्रह्मबीजेन शौनक ॥ ७ ॥ मालावती वह्निकुण्डे पुष्करे भारते
भुवि ॥ कृत्वा तु वाञ्छितं कामं प्राणांस्तत्याज सा सती ॥ ८ ॥ सृंजयस्य तु पत्न्यां च मनुवंशोद्भवस्य च ॥ जज्ञे नृपस्य साध्वी
सा पुण्या जातिस्मरा वरा ॥ ९ ॥ उपबर्हणगन्धर्वः पतिर्मे भवितेति च ॥ इतिकामा कामुकी सा सुन्दरी सुन्दरीवरा ॥ १० ॥
शौनक उवाच ॥ ब्रह्मवीर्य्याच्छूद्रपत्न्यां गन्धर्वश्चोपबर्हणः ॥ जातःकेन प्रकारेण तद्भवान्वक्तुमर्हति ॥ ११ ॥ सौतिरुवाच ॥ कान्य
कुब्जे च देशे च द्रुमिलो नाम राजकः ॥ कलावती तस्य पत्नी वन्ध्या चापि पतिव्रता ॥ १२ ॥ स्वामिदोषेण सा वन्ध्या काले
च भर्तुराज्ञया ॥ उपतस्थे वने घोरे नारदं काश्यपं मुनिम् ॥ १३ ॥ ध्यायमानं च श्रीकृष्णं ज्वलन्तं ब्रह्मतेजसा ॥ तस्थौ
सुवेषं कृत्वा सा ध्यानान्तं च मुनेः पुरः ॥ १४ ॥ ग्रीष्ममध्याह्नमार्तण्डप्रभातुल्येन तेजसा ॥ तपन्तं दूरतोऽप्येवं समीपं गन्तुम
क्षमा ॥ १५ ॥ ध्यानान्ते च मुनिश्रेष्ठः परः कृष्णपरायणः ॥ ददर्श पुरतो दूरे सुन्दरीं स्थिरयौवनाम् ॥ १६ ॥ चारुचम्पकव
र्णाभां शरत्पङ्कजलोचनाम् ॥ शरत्पार्वणचन्द्रास्यां रत्नभूषणभूषिताम् ॥ १७ ॥ बृहन्नितम्बभारार्त्तां पीनश्रोणिपयोधराम् ॥ शोभितां

पीतवस्त्रेण सस्मितां रक्तलोचनाम् ॥ १८ ॥ मोहितां मुनिरूपेण कामबाणप्रपीडिताम् ॥ दर्शयन्तीं स्तनश्रोणिं मैथुनासक्तचेतसा ॥
॥ १९ ॥ सिन्दूरबिन्दुभूषाढ्यां सुचारुकज्जलोज्ज्वलाम् ॥ पदालक्तकशोभाढ्यां रूपेणैव यथोर्वशीम् ॥ २० ॥ मुनिः पप्रच्छ दृष्ट्वा
तां का त्वं कामिनि निर्जने ॥ कस्य पत्नी कथं वाऽत्र सत्यं ब्रूहि च पुंश्चलि ॥२१॥ मुनेश्च वचनं श्रुत्वा कम्पिता च कलावती ॥
उवाच विनयेनैव कृत्वा च श्रीहरिं हृदि ॥ २२ ॥ कलावत्युवाच ॥ गोपिकाऽहं द्विजश्रेष्ठ द्रुमिलस्य च कामिनी ॥ पुत्रार्थिनी
चागताऽहं त्वन्मूलं भर्त्तुराज्ञया ॥ २३ ॥ वीर्य्याधानं कुरु मयि स्त्री नोपेक्ष्या ह्युपस्थिता ॥ तेजीयसां न दोषाय वह्नेः सर्वभुजो
यथा ॥ २४ ॥ वृषलीवचनं श्रुत्वा चुकोप मुनिसत्तमः ॥ उवाच नीत्यं सत्यं च कोपप्रस्फुरिताधरः ॥ २५ ॥ काश्यप उवाच ॥
यः स्वलक्ष्मीं च भोगार्हां पराय दातुमिच्छति ॥ तं सा त्यजति मूढं च वेदवाद इति ध्रुवम् ॥ २६ ॥ न त्वं द्रुमिलभोगार्हा पुन
रेव भविष्यसि ॥ विरक्तेन स्वयं त्यक्ता न गृह्णाति च त्वां पुनः ॥ २७ ॥ यः शूद्रपत्नीं गृह्णाति ब्राह्मणो ज्ञानदुर्बलः॥स चण्डालो
भवेत्सत्यं न कर्मार्हो द्विजातिषु ॥ २८ ॥ पितृश्राद्धे च यज्ञे च शिलास्पर्शे सुरार्चने ॥ अधिकारश्च तस्यैवमित्याह कमलोद्भवः ॥
॥ २९ ॥ कुम्भीपाकं स्वयं याति पातयित्वा च पूरुषान् ॥ मातामहान्स्वात्मनश्च दश पूर्वान्दशापरान् ॥ ३० ॥ तत्तर्पणं मूत्रमेव
पिण्डं सद्यः पुरीषकम् ॥ शालग्रामस्य तत्स्पर्शे चोपवासस्त्रिरात्रकम् ॥ ३१ ॥ तदिष्टदेवो गृह्णाति न नैवेद्यं न तज्जलम् ॥ संन्या
सिनां ब्राह्मणानां तदन्नं च पुरीषवत् ॥ ३२ ॥ कुम्भीपाके पच्यते स शक्रान्तं यावदेव हि ॥ एकविंशतिपुरुषैः सार्द्धं सत्यं च
पुंश्चलि ॥ ३३ ॥ पत्रोच्छिष्टं च यो भुङ्क्ते शूद्राणां ब्राह्मणाधमः ॥ तत्तुल्योऽधरभोजी चैवेत्याङ्गिरसभाषितम् ॥ ३४ ॥ शूद्रो वा
यदि गृह्णाति ब्राह्मणीं ज्ञानदुर्बलः ॥ स पच्यते कालसूत्रे यावदिन्द्राश्चतुर्दश ॥ ३५ ॥ अष्टादशेन्द्रावच्छिन्नं कालं च कालसूत्रके॥
ब्राह्मणी पच्यते तत्र भक्षिता क्रिमिभिर्ध्रुवम् ॥ ३६ ॥ ततश्चण्डालयोनौ च लब्ध्वा जन्म च ब्राह्मणी ॥ शूद्रश्च कुष्ठी भवति
ज्ञातिभिः परिवर्जितः ॥ ३७ ॥ इत्युक्त्वा च मुनिश्रेष्ठो विरराम च शौनक ॥ वृषली तत्पुरस्तस्थौ शुष्ककण्ठोष्ठतालुका ॥ ३८ ॥

एतस्मिन्नन्तरे तेन पथा याति च मेनका ॥ तस्या ऊरुं स्तनं दृष्ट्वा मुनेर्वीर्य्यं पपात ह ॥ ३९ ॥ ऋतुस्नाता च वृषली पीत्वा तत्क्षणं मुदा ॥ मुनिं प्रणम्य प्रहृष्टा प्रययौ भर्तुरन्तिकम् ॥ ४० ॥ गत्वा प्रणम्य द्रुमिलं कान्ता कान्तं मनोहरम् ॥ सर्वं निवेदयामास वृत्तांत्तं गर्भहेतुकम् ॥४१॥ कलावतीवचः श्रुत्वा प्रहृष्टवदनेक्षणः ॥ उवाच कान्तां मधुरं परिणामसुखावहम् ॥ ४२ ॥ द्रुमिल उवाच ॥ विप्रस्य वीर्यं त्वद्गर्भे वैष्णवस्य महात्मनः ॥ वैष्णवो भविता बालस्त्वं च भाग्यवती सती ॥४३॥ यद्गर्भे वैष्णवो जातो यस्य वीर्य्येण वा सति ॥ तयोर्याति च वैकुण्ठं पुरुषाणां शतं शतम् ॥४४॥ तौ च विष्णुविमानेन सद्रत्ननिर्मितेन च ॥ यातौ वैकुण्ठनगरं जन्ममृत्युजराहरम् ॥ ४५ ॥ कस्यचिद्ब्राह्मणस्यैव गेहं गच्छ शुभानने ॥ पश्चान्ममान्तिकं भद्रे यास्यसीति हरेः पुरम् ॥ ४६ ॥ इत्युक्त्वा गोपराजश्च स्नात्वा कृत्वा तु तर्पणम् ॥ संपूज्याभीष्टदेवं च ब्राह्मणेभ्यो धनं ददौ ॥ ४७ ॥ अश्वानां च चतुर्लक्षं गजानां लक्षमेव च ॥ शतं मत्तगजेन्द्राणां ब्राह्मणेभ्यो ददौ मुदा ॥ ४८ ॥ उच्चैःश्रवःपञ्चलक्षं रथानां च सहस्रकम् ॥ शकटानां त्रिलक्षं च ब्राह्मणेभ्यो ददौ मुदा ॥ ४९ ॥ गवां द्वादशलक्षं च महिषाणां त्रिलक्षकम् ॥ त्रिलक्षं राजहंसानां ब्राह्मणेभ्यो ददौ मुदा ॥ ५० ॥ पारावतानां लक्षं च शुकानां च शतं मुने ॥ लक्षं च दासदासीनां ब्राह्मणेभ्यो ददौ मुदा ॥ ५१ ॥ ग्रामाणां च सहस्रं च नगराणां शतं शतम् ॥ धान्यतण्डुलशैलं च ब्राह्मणेभ्यो ददौ मुदा॥५२॥ शतकोटिं सुवर्णानां रत्नानां च सहस्रकम्॥ मुद्राणां कोटिकलशं ब्राह्मणेभ्यो ददौ मुदा ॥ ५३ ॥ ददौ तैजसपात्राणां भूषणानामसंख्यकम् ॥ तां स्त्रियं रत्नभूषाढ्यां ब्राह्मणेभ्यो ददौ मुदा ॥५४॥ राज्यं दत्त्वा महाराजोऽप्यन्तर्बाह्ये हरिं स्मरन् ॥ जगाम बदरीं गोपो मनोगामी मुदाऽन्वितः॥५५॥ तत्र मासं तपः कृत्वा गङ्गातीरे मनोहरे ॥ प्राणांस्तत्याज योगेन सद्यो दृष्टो महर्षिभिः ॥५६॥ स च विष्णुविमानेन रत्नेन्द्रनिर्मितेन च॥ संयुक्तो विष्णुदूतैश्च वैकुण्ठं च जगाम ह॥५७॥ तत्र प्राप हरेर्दास्यं हरिदासो बभूव सः ॥ वृत्तान्तं च कलावत्याः श्रूयतामिति शौनक ॥ ५८ ॥ गते कलावती नाथे उच्चैश्च प्ररुरोद ह ॥ वह्नौ प्राणांस्त्यक्तुकामा ब्राह्मणेनैव रक्षिता ॥ ५९ ॥ ब्राह्मणो मातरित्युक्त्वा तां

गृहीत्वा मुदाऽन्वितः ॥ जगाम रत्नपूर्णं च स्वगेहं च क्षणेन च ॥ ६० ॥ सा विप्रगेहे साध्वी च सुषाव तनयं वरम् ॥ तप्तकाञ्चनव
र्णाभं ज्वलन्तं ब्रह्मतेजसा ॥ ६१ ॥ तत्रस्था योषितः सर्वा ददृशुर्बालकं शुभम् ॥ ग्रीष्ममध्याह्नमार्तण्डजितं तं ब्रह्मतेजसा ॥ ६२ ॥
कामदेवाधिकं रूपे चन्द्राधिकशुभाननम् ॥ शरत्पार्वणचन्द्रास्यं शरत्पङ्कजलोचनम् ॥ ६३ ॥ हस्तपादादिवलितं सुकपोलं मनोह
रम् ॥ पद्मचक्राङ्कितं पादपद्मं वाऽतुलमुज्ज्वलम् ॥ ६४ ॥ करयुग्मं वाऽतुलं च रुदन्तं च स्तनार्थिनम् ॥ योषितो बालकं दृष्ट्वा
प्रययुः स्वाश्रमं मुदा ॥ ६५ ॥ पुत्रदारयुतो विप्रः प्रहृष्टश्च ननर्त ह ॥ स बालो ववृधे तत्र शुक्लपक्षे यथा शशी ॥ ६६ ॥ पुपोष
ब्राह्मणस्तां च सपुत्रां च यथा सुताम् ॥ ६७ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे ब्रह्मखण्डे सौतिशौनकसंवादे उपबर्हणजन्मकथनं नाम
विंशोऽध्यायः ॥ २० ॥ सौतिरुवाच ॥ बभूव काले बालश्च क्रमेण पञ्चहायनः ॥ जातिस्मरो ज्ञानयुक्तः पूर्वमन्त्रस्मृतः सदा ॥१ ॥
गीयते सततं कृष्णयशोनामगुणादिकम् ॥ क्षणं रोदिति नृत्येन पुलकाञ्चितविग्रहः ॥ २ ॥ कृष्णसम्बन्धिनीं गाथां शृणोति यत्र
तत्र वै ॥ तत्सम्बन्धि पुराणं च तत्र तिष्ठति बालकः ॥ ३ ॥ धूलिधूसरसर्वाङ्गो धूलिनैवेद्यमीप्सितम् ॥ धूलिषु प्रतिमां कृत्वा
धूलिना पूजयेद्धरिम् ॥ ४ ॥ पुत्रमाह्वयते माता प्रातराशाय चेन्मुने ॥ हरिं संपूजयामीति मातरं संवदेत्पुनः॥ ५ ॥ शौनक उवाच ॥
किं नाम बालकस्यास्य जन्मन्यत्र बभूव ह ॥ व्युत्पत्त्या संज्ञया वाऽपि तद्भवान्वक्तुमर्हति ॥ ६ ॥ सौतिरुवाच ॥ अनावृष्ट्यवशेष
च काले बालो बभूव ह ॥ नारं ददौ जन्मकाले तेनायं नारदाभिधः ॥७॥ ददाति नारं ज्ञानं च बालकेभ्यश्च बालकः ॥ जातिस्मरो
महाज्ञानी तेनायं नारदाभिधः ॥ ८ ॥ वीर्य्येण नारदस्यैव बभूव बालको मुने ॥ मुनीन्द्रस्य वरेणैव तेनायं नारदाभिधः ॥ ९ ॥
शौनक उवाच ॥ शिशुनाम च विज्ञातं व्युत्पत्त्या च यथोचितम् ॥ मुनीन्द्रस्य कथं नाम नारदश्चेति मंगलम् ॥ १० ॥
सौतिरुवाच ॥ अपुत्रकाय विप्राय धर्मपुत्रो नरो मुनिः ॥ ददौ पुत्र कश्यपाय तेनायं नारदाभिधः ॥ ११ ॥ शौनक उवाच ॥ अधुना
नामव्युत्पत्तिः श्रुता सौते शिशोरपि ॥ शूद्रयोनौ ब्रह्मपुत्रः कथं स नारदाभिधः ॥ १२ ॥ सौतिरुवाच ॥ कल्पान्तरे ब्रह्मकण्ठाद्बभूवु

बंहवो नराः ॥ नरान्ददौ तत्कण्ठं च तेन तन्नारदं स्मृतम् ॥१३॥ ततो बभूव बालश्च नारदात्कण्ठदेशतः ॥ अतो ब्रह्मा नाम चक्रे ना
रदश्चेति मङ्गलम् ॥ १४ ॥ साम्प्रतं शिशुवृत्तान्तं सावधानं निशामय ॥ उपालम्भरहस्येन विशिष्टं किं प्रयोजनम् ॥ १५ ॥ ववृधे
गोपिकाबालो विप्रगेहे दिनेदिने ॥ सपुत्रां पालितां चक्रे ब्राह्मणः स्वसुतां यथा ॥१६॥ एतस्मिन्नन्तरे विप्रा आययुर्विप्रमन्दिरम् ॥
शिशवः पञ्चवर्षीया महातेजस्विनो यथा ॥ १७ ॥ प्रच्छन्नं हृतवन्तश्च ग्रीष्ममध्याह्नभास्करम् ॥ मधुपर्कादिकं दत्त्वा तान्ननाम गृही
द्विज ॥ १८ ॥ फलमूलादिकं काले चत्वारो मुनिपुङ्गवाः ॥ विप्रदत्तं बुभुजिरे तच्छेशं बुभुजे शिशुः ॥ १९ ॥ चतुर्थको मुनिस्तस्मै
कृष्णमन्त्रं ददौ मुदा ॥ तेषां बभूव दासः स द्विजस्य मातुराज्ञया ॥२०॥ एकदा शिशुमाता च गच्छन्ती निशि वर्त्मनि ॥ ममार
सर्पदष्टा च तत्क्षणं स्मरती हरिम् ॥ २१ ॥ सद्यो जगाम वैकुण्ठं विष्णुयानेन सा सती ॥ विष्णुपार्षदसंयुक्ता सद्रत्ननिर्मितेन च
॥ २२ ॥ प्रातर्बालो द्विजैः सार्धं प्रययौ विप्रमन्दिरात् ॥ तत्त्वज्ञानं ददुस्तस्मै ब्राह्मणाश्च कृपालवः ॥ २३ ॥ ब्रह्मपुत्राः शिशुं
त्यक्त्वा स्वस्थानं प्रययुः किल ॥ महाज्ञानी शिशुस्तस्थौ गङ्गातीरे मनोहरे ॥२४॥ तत्र स्नात्वा विप्रदत्तं विष्णुमन्त्रं जजाप सः ॥
क्षुत्पिपासारोगशोकहरं वेदेषु दुर्लभम् ॥ २५ ॥ महारण्ये च घोरे च अश्वत्थमूलसन्निधौ ॥ कृत्वा योगासनं तस्थौ
सुचिरं तत्र बालकः ॥ २६ ॥ शौनक उवाच ॥ कंमन्त्रं बालकः प्राप कुमारेण च धीमता ॥ दत्तं परं श्रीहरेश्च तद्भवान्वक्तु
मर्हति ॥ २७ ॥ सौतिरुवाच ॥ कृष्णेन दत्तो गोलोके कृपया ब्रह्मणे पुरा ॥ द्वाविंशत्यक्षरो मन्त्रो वेदेषु च सुदुर्लभः ॥ २८ ॥
तं च ब्रह्मा ददौ भक्त्या कुमाराय च धीमते ॥ कुमारेण स दत्तश्च मन्त्रश्च शिशवे द्विज ॥ २९ ॥ ॐ श्रीं नमो भगवते रास
मण्डलेश्वराय ॥ श्रीकृष्णाय स्वाहेति च मन्त्रोऽयं कल्पपादपः ॥ ३० ॥ महापुरुषस्तोत्रं च पूर्वोक्तं कवचं च यत् ॥
अस्यौपयौगिकं ध्यानं सामवेदोक्तमेव च ॥ ३१ ॥ तेजोमण्डलरूपे च सूर्य्यकोटिसमप्रभे ॥ योगिभिर्वाञ्छितं ध्याने
योगैः सिद्धगणैः सुरैः ॥ ३२ ॥ ध्यायन्ते वैष्णवा रूपं तदभ्यन्तरसन्निधौ ॥ अतीव कमनीयानिर्वचनीयं मनोहरम् ॥ ३३ ॥

नवीनजलदश्यामं शरत्पङ्कजलोचनम् ॥ शरत्पार्वणचन्द्रास्यं पक्वबिम्बाधिकाधरम् ॥ ३४ ॥ मुक्तापङ्क्तिविनिन्दैकदन्तपंक्तिमनोहरम् ॥ सस्मितं मुरलीन्यस्तहस्तावलम्बनेन च ॥ ३५ ॥ कोटिकन्दर्पलावण्यं लीलाधाम मनोहरम् ॥ चन्द्रलक्षप्रभाजुष्टं पुष्टश्रीयुक्तविग्रहम् ॥ ३६ ॥ त्रिभङ्गसङ्गि वायुक्तं द्विभुजं पीतवाससम् ॥ रत्नकेयूरवलयरत्ननूपुरभूषितम् ॥ ३७ ॥ रत्नकुण्डलयुग्मेन गण्डस्थलविराजितम् ॥ मयूरपुच्छचूडं च रत्नमालाविभूषितम् ॥ ३८ ॥ शोभितं जानुपर्य्यन्तं मालतीवनमालया ॥ चन्दनोक्षितसर्वाङ्गं भक्तानुग्रहकारकम् ॥३९॥ मणिना कौस्तुभेन्द्रेण वक्षस्थलसमुज्ज्वलम् ॥ वीक्षितं गोपिकाभिश्च शश्वद्व्रीडितलोचनैः ॥४०॥ स्थिरयौवनयुक्ताभिर्वेष्टिताभिश्च सन्ततम् ॥ भूषणैर्भूषिताभिश्च राधावक्षःस्थलस्थितम् ॥ ॥ ४१ ॥ ब्रह्मविष्णुशिवाद्यैश्च पूजितं वन्दितं स्तुतम् ॥ किशोरं राधिकाकान्तं शान्तरूपं परात्परम् ॥ ४२ ॥ निर्लिप्तं साक्षिरूपं च निर्गुणं प्रकृतेः परम् ॥ ध्यायेत्सर्वेश्वरं तं च परमात्मानमीश्वरम् ॥ ४३ ॥ इदं ते कथितं ध्यानं स्तोत्रं च कवचं मुने ॥ मन्त्रोपयौगिकं सत्यं मन्त्रश्च कल्पपादपः॥४४॥साम्प्रतं बालकस्तस्थौ ध्यानस्थ स्तत्र शौनक ॥ दिव्यं वर्षसहस्रं च निराहारः कृशोदरः॥ ॥४५॥शक्तिमान्परिपुष्टश्च सिद्धमन्त्रप्रभावतः॥ददर्श बालको ध्याने दिव्यं लोकं च बालकम् ॥४६॥ रत्नसिंहासनस्थं च रत्नभूषणभूषितम् ॥ किशोरवयसं श्यामं गोपवेषं च सस्मितम् ॥ ४७ ॥ गोपैर्गोपाङ्गनाभिश्च वेष्टितं पीतवाससम् ॥ द्विभुजं मुरलीहस्तं चन्दनेन विचर्चितम्॥४८॥ ब्रह्मविष्णुशिवाद्यैश्च स्तूयमानं परात्परम् ॥ दृष्ट्वा च सुचिरं शान्तं शान्तश्च गोपिकासुतः॥४९॥विरराम च शोकार्त्तो यदा तद्द्रष्टुमक्षमः ॥ रुरोदाश्वत्थमूले च न दृष्ट्वा बालकं शिशुः ॥ ५० ॥ बभूवाकाशवाणीति रुदन्तं बालकं प्रति ॥ सत्यं प्रबोधयुक्तं च हितमेव मिताक्षरम् ॥ ५१ ॥ सकृद्यद्दर्शितं रूपं तदेव नाधुना पुनः ॥ अपि पक्वकषायाणां दुर्दर्शं च कुयोगिनाम् ॥ ५२ ॥ एतस्मिन्विग्रहेऽतीते संप्राप्ते दिव्यविग्रहे ॥ पुनर्द्रक्ष्यसि गोविन्दं जन्ममृत्युहरं हरिम् ॥ ५३ ॥ इति श्रुत्वा बालकश्च विरराम मुदाऽन्वितः ॥ काले तत्याज तीर्थे च तनुं कृष्णं हृदि स्मरन् ॥ ५४ ॥ नेदुर्दुन्दुभयः स्वर्गे पुष्पवृष्टिर्बभूव ह ॥

बभूव शापमुक्तश्च नारदश्च महामुनिः॥५५॥तनुं त्यक्त्वा स जीवश्च विलीनो ब्रह्मविग्रहे ॥ बभूव प्राक्तनान्नित्यः कालभेदे तिरोहितः ॥
॥ ५६ ॥ आविर्भावस्तिरोभावः स्वेच्छया नित्यदेहिनाम् ॥ जन्ममृत्युजराव्याधिर्भक्तानां नास्ति शौनक ॥ ५७ ॥ इति श्रीब्रह्मवै
वर्त्ते महापुराणे ब्रह्मखण्डे सौतिशौनकसंवादे नारदशापविमोचनं नामैकविंशोऽध्यायः ॥ २१ ॥ सौतिरुवाच ॥ कतिकल्पान्तरे
ऽतीते स्रष्टुः सृष्टि विधौ पुनः ॥ मरीचिमिश्रैर्मुनिभिः सार्द्धं कण्ठाद्बभूव सः॥१॥विधेर्नारदनाम्नश्च कण्ठदेशाद्बभूव सः ॥नारदश्चेति वि
ख्यातो मुनीन्द्रस्तेन हेतुना ॥ २ ॥ यः पुत्रश्चेतसो धातुर्बभूव मुनिपुंगवः ॥ तेन प्रचेता इति च नाम चक्रे पितामहः ॥ ३ ॥ बभूव
धातुर्यः पुत्रः सहसा दक्षपार्श्वतः ॥ सर्वकर्माणि दक्षश्च तेन दक्षः प्रकीर्तितः ॥ ४ ॥ वेदेषु कर्दमः शब्दश्छायायां वर्त्तते स्फुटः ॥
बभूव कर्दमाद्बालः कर्दमस्तेन कीर्त्तितः ॥ ५ ॥ तेजोभेदे मरीचिश्च वेदेषु वर्त्तते स्फुटम् ॥ जातः सद्योऽतितेजस्वी मरीचिस्तेन
कीर्तितः ॥ ६ ॥ क्रतुसंघश्च बालेन कृतो जन्मान्तरेऽधुना ॥ ब्रह्मपुत्रेऽपि तन्नाम क्रतुरित्यभिधीयते ॥ ७ ॥ प्रधानाङ्गमुखं धातु
स्ततो जातश्च बालकः ॥ इरस्तेजस्विवचनोऽप्यङ्गिरास्तेन कीर्त्तितः ॥ ८ ॥ अतितेजस्विनि भृगुर्वर्त्तते नाम्नि शौनक ॥ जातः सद्यो
ऽतितेजस्वी भृगुस्तेन प्रकीर्त्तितः ॥ ९ ॥ बालोऽप्यरुणवर्णश्च जातः सद्योऽतितेजसा ॥ प्रज्वलन्नूर्ध्वतपसा चारुणिस्तेन कीर्त्तितः
॥ १० ॥ हंसा आत्मवशा यस्य योगेन योगिनो ध्रुवम् ॥ बालः परमयोगीन्द्रस्तेन हंसी प्रकीर्त्तितः ॥ ११ ॥ वशीभूतश्च शिष्यश्च
जातः सद्यो हि बालकः ॥ अतिप्रियश्च धातुश्च वशिष्ठस्तेन कीर्त्तितः ॥ १२ ॥ सन्ततं यस्य यत्नं च तपःसु बालकस्य च ॥
प्रकीर्त्तितो यतिस्तेन संयतः सर्वकर्मसु ॥ पुलस्तपःसु वेदेषु वर्त्ततेऽहः स्फुटेऽपि च ॥ १३ ॥ स्फुटस्तपःसमूहश्च पुलहस्तेन
बालकः ॥ पुलस्तपः समूहश्च यस्यास्ति पूर्वजन्मनाम् ॥ तपःसंघस्वरूपश्च पुलस्त्यस्तेन बालकः ॥ १४ ॥ त्रिगुणायां प्रकृत्यां
त्रिर्विष्णावश्च प्रवर्त्तते ॥ तयोभक्तिः समा यस्य तेन बालोऽत्रिरुच्यते ॥ १५ ॥ जटा वह्निशिखारूपाः पञ्च सन्ति च मस्तके ॥
तपस्तेजोभवा यस्य स च पञ्चशिखः स्मृतः ॥ १६ ॥ अपान्तरतमे देशे तपस्तेपेऽन्यजन्मनि ॥ अपान्तरतमा नाम शिशोस्तेन

प्रकीर्तितम् ॥ १७ ॥ स्वयं तपः समाप्नोति वाहयेत्प्रापयेत्परान् ॥ वोढुं समर्थस्तपसि वोढुस्तेन प्रकीर्तितः ॥१८॥तपसस्तेजसा बा
लो दीप्तिमान्सततं मुने ॥ तपःसु रोचते चित्तं रुचिस्तेन प्रकीर्तितः ॥ १९ ॥ कोपकाले बभूवुर्ये स्रष्टुरेकादश स्मृताः ॥ रोदना
देव रुद्राश्च कोपितास्तेन हेतुना॥२०॥शौनक उवाच ॥ रुद्रेष्वेकतमो बालो महेश इति मे भ्रमः ॥ भवान्पुराणतत्त्वज्ञः सन्देहं छेत्तु
मर्हति॥२१॥सौतिरुवाच ॥ विष्णुः सत्त्वगुणः पाता ब्रह्मा स्रष्टा रजोगुणः॥तमोगुणास्ते रुद्राश्च दुर्निवारा भयंकराः ॥ २२॥ काला
ग्निरुद्रः संहर्त्ता तेष्वेकः शंकरांशकः ॥ शुद्धसत्त्वस्वरूपश्च शिवश्च शिवदः सताम् ॥ २३ ॥ अन्ये कृष्णस्य च कलास्तावंशौ
विष्णुशंकरौ ॥ समौ सत्त्वस्वरूपौ द्वौ परिपूर्णतमस्य च ॥ २४ ॥ उक्तं रुद्रोद्भवे काले कथं विस्मरसि द्विज ॥ मायया मोहिताः
सर्वे मुनीनां च मतिभ्रमः ॥ २५ ॥ सनकश्च सनंदश्च तृतीयश्च सनातनः ॥ सनत्कुमारो भगवांश्चतुर्थो ब्रह्मणः सुतः ॥ २६ ॥
ब्रह्मा स्रष्टुं पूर्वपुत्रानुवाच ते न सेहिरे ॥ तेन प्रकोपितो धाता रुद्राः कोपोद्भवा मुने ॥ २७॥ सनकश्च सनन्दश्च तौ द्वावानन्द
वाचकौ ॥ आनन्दितौ च बालौ द्वौ भक्तिपूर्णतमौ सदा ॥२८ ॥ सनातनश्च श्रीकृष्णो नित्यः पूर्णतमः स्वयम् ॥ तद्भक्तस्तत्समः
सत्यं तेन बालः सनातनः ॥ २९ ॥ सनत्तु नित्यवचनः कुमारः शिशुवाचकः ॥ सनत्कुमारं तेनेममुवाच कमलोद्भवः ॥ ३० ॥
ब्रह्मणो बालकानां च व्युत्पत्तिः कथिता मुने ॥ साम्प्रतं नारदाख्यानं श्रूयतां च यथाक्रमम् ॥ ३१ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे
ब्रह्मखण्डे सौतिशौनकसंवादे ब्रह्मपुत्रव्युत्पत्तिकथनं नाम द्वाविंशतितमोऽध्यायः ॥ २२ ॥ सौतिरुवाच ॥ स्रष्टा सृष्टिविधानेन
नियोज्य सर्वबालकान् ॥ नारदं प्रेरयामास सृष्टिं कर्त्तुं च शौनक ॥ १ ॥ हितं सत्यं वेदसारं परिणामसुखावहम् ॥ उवाच नारदं
ब्रह्मा वेदवेदाङ्गपारगम् ॥ २ ॥ ब्रह्मोवाच ॥ एहि वत्स कुलश्रेष्ठ नारद प्राणवल्लभ ॥ ज्ञानदीपशिखाज्ञानतिमिरक्षयकारक ॥ ३ ॥
सर्वेषामपि वन्द्यानां जनकः परमो गुरुः ॥ विद्यादाता मन्त्रदाता द्वौ समौ च पितुः परौ ॥ ४ ॥ तवाहं जनकः पुत्र विद्यादाता च
पालकः॥ममाज्ञया च मत्प्रीत्या कुरु दारपरिग्रहम् ॥ ५ ॥ स च शिष्यः सोऽपि पुत्रो यश्चाज्ञां पालयेद्गुरोः ॥ न क्षेमं तस्य मूढ

स्य यो गुरोरवचस्करः ॥ ६ ॥ स पण्डितः स च ज्ञानी स क्षेमी स च पुण्यवान् ॥ गुरोर्वचस्करो यो हि क्षेमं तस्य पदे पदे ॥
॥ ७ ॥ सर्वेषामाश्रमाणां च प्रधानः पुण्यवान्गृही ॥ स्त्रीपुत्रपौत्रयुक्तं च मन्दिरं तपसः फलम् ॥ ८ ॥ पितरः पूर्वकाले च तिथिकाले
च देवताः ॥ सर्वे गृहस्थमायान्ति निपानमिव धेनवः ॥ ९ ॥ नित्यं नैमित्तिकं काम्यं कुर्वन्ति गृहिणः सदा ॥ इह एतत्सुखं पुण्यं
स्वर्गभोगः परत्र च ॥ १० ॥ जीवन्मुक्तो गृहस्थश्च स्वधर्मपरिपालकः ॥ यशस्वी पुण्यवांश्चैव कीर्तिमान्धनवान्सुखी ॥ ११ ॥
यशस्वी कीर्तिमान्यो हि मृतो जीवति सन्ततम् ॥ यशःकीर्तिविहीनो हि जीवन्नपि मृतो हि सः ॥१२॥ ब्रह्मणो वचनं श्रुत्वा नारदो
मुनिसत्तमः ॥ उवाच विनयं भीतः शुष्ककण्ठौष्ठतालुकः॥१३॥नारदउवाच ॥ एकदा वाग्विरोधेन चोभयोस्तातपुत्रयोः ॥ हानिर्बभूव दैवेन
महती वाऽयशस्करी ॥ १४ ॥ मया प्राप्तं च त्वच्छापाद्गान्धर्वं शौद्रमेव च ॥ जन्म कर्म च मच्छापात्त्वमपूज्यो भवे भव
॥ १५ ॥ बभूव शापो मुक्तो मे काले ते भविता विधे ॥ दोषाय कल्पते शश्वद्विरोधो न गुणाय च ॥ १६ ॥ स पिता स गुरुर्बन्धुः
स पुत्रः समधीश्वरः ॥ यः श्रीकृष्णपादपद्मे दृढां भक्तिं च कारयेत् ॥१७॥ असद्वर्त्मनि चाज्ञानाद्गच्छन्ति यदि बालकाः ॥ निवर्त्तयति
तानेव स पिता करुणानिधिः ॥ १८ ॥ कारयित्वा कृष्णपादे भक्तित्यागं च यः पिता ॥ अन्यस्मिन्विषये पुत्रं स किं हन्तुं
प्रवर्त्तयेत् ॥ १९ ॥ दारग्रहो हि दुःखाय केवलं न सुखाय च ॥ तपःस्वर्गभक्तिमुक्तिकर्मणां व्यवधायकः ॥ २० ॥ योषितस्त्रिविधा
ब्रह्मन्गृहिणां मूढचेतसाम् ॥ साध्वी भोग्या च कुलटास्ताः सर्वाः स्वार्थतत्पराः॥२१॥परलोकभिया साध्वी तथेह यशसाऽऽत्मनः ॥
कामस्नेहाच्च कुरुते भर्तुः सेवां च सन्ततम् ॥ २२ ॥ भोग्या भोगार्थिनी शश्वत्कामस्नेहेन केवलम् ॥ कुरुते कान्तसेवां च न च
भोगादृते क्षणम् ॥ २३ ॥ वस्त्रालंकारसम्भोगसुस्निग्धाहारमुत्तमम् ॥ यावत्प्राप्नोति सा भोग्या तावच्च वशगा प्रिया ॥ २४ ॥ कुलाङ्गारसमा
नारी कुलटा कुलनाशिनी ॥ कपटात्कुरुते सेवां स्वामिनो न च भक्तितः ॥ २५ ॥ सदा पुंयोगमाशंसुर्मनसा मदनातुरा॥
आहारादधिकं जारं प्रार्थयन्ती नवं नवम् ॥ २६ ॥ जारार्थे स्वपतिं तात हन्तुमिच्छति पुंश्चली ॥ तस्यां यो विश्वसेन्मूढो जीवनं

तस्य निष्फलम् ॥ २७ ॥ कथिता योषितः सर्वा उत्तमाधममध्यमाः ॥ स्वात्मारामा विजानन्ति मनस्तासां न पण्डिताः ॥ २८ ॥ हृदयं क्षुरधाराभं शरत्पद्मोत्सवं मुखम् ॥ सुधासमं सुमधुरं वचनं स्वार्थसिद्धये ॥ २९ ॥ प्रकोपे विषतुल्यं च विश्वासे सर्वनाशनम् ॥ दुर्ज्ञेयं तदभिप्रायं निगूढं कर्म केवलम् ॥ ३० ॥ सदा तासामविनयः प्रबलं साहसं परम् ॥ दोषोत्कर्षश्छलोत्कर्षः शश्वन्माया दुरत्यया ॥ ३१ ॥ पुंसश्चाष्टगुणः कामः शश्वत्कामो जगद्गुरो ॥ आहारो द्विगुणो नित्यं नैष्ठुर्य्यं च चतुर्गुणम् ॥३२॥ कोपः पुंसः षड्गुणश्च व्यवसायश्च निश्चितम्॥यत्रेमे दोषनिवहाः काऽऽस्था तत्र पितामह॥३३॥का क्रीडा किं सुखं पुंसो विण्मूत्रमलवेश्मनि॥ तेजः प्रनष्टं सम्भोगे दिवालापे यशःक्षयः ॥ ३४ ॥ धनक्षयोऽतिप्रीतौ चात्यासक्तौ च वपुःक्षयः॥साहित्ये पौरुषं नष्टं कलहे माननाशनम् ॥ सर्वनाशश्च विश्वासे ब्रह्मन्नारीषु किं सुखम् ॥ ३५ ॥ यावद्धनी च तेजस्वी सश्रीको योग्यतापरः ॥ पुमान्नारीं वशीकर्तुं समर्थस्तावदेव हि ॥ ३६ ॥ रोगिणं निर्द्धनं वृद्धं योषिद्वै प्रेक्षतेऽप्रियम् ॥ लोकाचारभयात्तस्मै ददात्याहारमल्पकम् ॥ ३७ ॥ इत्येवं कथितं सर्वं ब्रह्मन्नात्मागमो यथा ॥ सर्वं जानासि सर्वज्ञ स्वात्मारामेश्वरो भवान् ॥ ३८ ॥ अनुग्रहं कुरु विभो विदायं देहि साम्प्रतम् ॥ कृष्णभक्तिं प्रार्थयामि त्वयि कल्पतरोः परे ॥ ३९ ॥ इत्युक्त्वा नारदस्तत्र धृत्वा तातपदाम्बुजम् ॥आज्ञां ययाचे पितरं गन्तुं तपसि मङ्गले ॥ ४० ॥ कृताञ्जलिपुटो भूत्वा भक्तिनम्रात्मकन्धरः॥कृत्वा प्रदक्षिणं नत्वा ब्रह्माणं गन्तुमुद्यतः ॥ ४१ ॥ गच्छन्तं तनयं दृष्ट्वा विधाता जगतां मुने ॥ रुरोदोच्चैर्मुक्तकण्ठं महासांसारिको यथा ॥ ४२ ॥ करे धृत्वा समालिङ्ग्य चुचुम्ब च पुनः पुनः ॥ चिरं वक्षसि कृत्वा च वासयामास जानुनि ॥ ४३ ॥ स्वात्मारामेश्वरो ब्रह्मा योगीन्द्राणां गुरोर्गुरुः ॥ भेदं सोढुं न शक्तोऽभूद्विच्छेदो दुःसहो नृणाम् ॥ ४४ ॥ कातरः पुत्रभेदेन मोहितो विष्णुमायया॥शोकार्त्तो वक्तुमारेभे सुतं सम्बोध्य शौनक ॥ ४५ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे ब्रह्मखण्डे ब्रह्मनारदसंवादे त्रयोविंशतितमोऽध्यायः ॥ २३ ॥

श्रीब्रह्मोवाच ॥ त्वं गच्छ तपसे वत्स किं मे संसारकर्मणि ॥ अहं यास्यामि गोलोकं विज्ञातुं कृष्णमीश्वरम् ॥ १ ॥ सनकश्च सनन्दश्च तृतीयश्च सनातनः ॥ सनत्कुमारो नीरागश्चतुर्थः

पुत्र एव च ॥ २ ॥ यती हंसी चारुणिश्च वोढुः पञ्चशिखस्तथा ॥ पुत्रास्तपस्विनः सर्वे किं मे संसारकर्मणि ॥ ३ ॥ वचस्करो मरी
चिर्मे अङ्गिराश्च भृगुस्तथा ॥ रुचिरत्रिः कर्दमश्च प्रचेताश्च क्रतुर्मनुः ॥ ४ ॥ वसिष्ठो वशगः शश्वत्सर्वेषु च सुतेषु च ॥ अन्ये
ऽविवेकिनोऽसाध्याः किं मे संसारकर्मणि ॥ ५ ॥ निबोध वत्स वक्ष्यामि वेदोक्तं वचनं शुभम् ॥पारम्पर्य्यक्रमपरं चतुर्वर्गफलप्रदम् ॥
॥ ६ ॥ धर्मार्थकाममोक्षांश्च सर्वे वाञ्छन्ति पण्डिताः ॥ वेदप्रणिहितानेतान्सभासु मुनिशंसितान् ॥ ७ ॥ वेदप्रणिहितो धर्मो ह्यधर्म
स्तद्विपर्य्ययः ॥ आदौ विप्रो यज्ञसूत्रं परिधाय सुखं सुखी ॥ ८ ॥ समधीत्य ततो वेदान्ददाति गुरुदक्षिणाम् ॥ ततः प्रकृष्टकुल
जां सुविनीतां समुद्वहेत् ॥ ९ ॥ सा साध्वी कुलजा या च पतिसेवासु तत्परा ॥ सद्वंशे दुर्विनीता च संभवेन्न कदाचन ॥
आकरे पद्मरागाणां जन्म काचमणेः कुतः ॥ १० ॥ असद्वंशप्रसूता या पित्रोर्दोषेण नारद ॥ दुर्विनीता च सा दुष्टा
स्वतन्त्रा सर्वकर्मसु ॥ ११ ॥ न वत्स दुष्टाः सर्वाश्च योषितः कमलाकलाः ॥ स्वर्वेश्यांशाश्च कुलटा असद्वंश
समुद्भवाः ॥ १२ ॥ निर्गुणं स्वामिनं साध्वी सेवते च प्रशंसति ॥ न सेवते च कुलटा प्रियं निन्दति सद्गुणम् ॥ १३ ॥
साधुः सद्वंशजां कन्यां प्रयत्नेन परिग्रहेत् ॥ तस्यां पुत्रान्समुत्पाद्य वृद्धस्तु तपसे व्रजेत् ॥ १४ ॥ वरं हुतवहे वासः
सर्पवक्त्रे च कण्टके ॥ एतेभ्यो दुःखदो वासः स्त्रिया दुर्मुखया सह ॥ १५ ॥ मत्तोऽधीतस्त्वया वेदो मह्यं च गुरुदक्षिणाम् ॥
पुत्र देहीदमेवेह कुरु दारपरिग्रहम् ॥ १६ ॥ वत्स त्वं कुलजातां च पूर्वपत्नीं च मालतीम् ॥ विवाहं कुरु कल्याण कल्याणे च दिने
ऽनघ ॥ १७ ॥ मनुवंशोद्भवस्येह सृंजयस्य गृहे सती ॥ त्वत्कृते जन्म लब्ध्वा च कुरुते भारते तपः ॥ १८ ॥ गृह्णीष्व परमां रत्न
मालां च कमलाकलाम् ॥ भारते न भवेद्व्यर्थं जनानां तपसः फलम् ॥ १९ ॥ आदौ भवेद्गृही लोको वानप्रस्थस्ततः परम् ॥ ततस्त
पस्वी मोक्षाय क्रम एष श्रुतौ श्रुतः ॥ २० ॥ वैष्णवानां हरेरर्चा तपस्या च श्रुतौ श्रुता ॥ २१ ॥ वैष्णव त्वं गृहे तिष्ठ कुरु कृष्णप
दार्चनम् ॥ अन्तर्बहिर्हरिर्यस्य तस्य किं तपसा सुत ॥ २२ ॥ नान्तर्बहिर्हरिर्यस्य तस्य किं तपसाऽनघ ॥ तपसा हरिराराध्यो

नान्यः कश्चन विद्यते ॥ २३ ॥ यत्र तत्र कृतं कृष्णसेवनं परमं तपः ॥ वत्स मद्वचनेनैव गृहे स्थित्वा हरिं भज ॥ २४ ॥ गृही भव
मुनिश्रेष्ठ गृहिणां सर्वदा सुखम् ॥ कामिन्यां सुखसम्भोगः स्वर्गभोगसमो मतः ॥ २५ ॥ तद्दर्शनमुपस्पर्शं वाञ्छन्त्येव मुमुक्षवः ॥
सर्वस्पर्शसुखात्स्त्रीणामुपस्पर्शसुखं परम्॥२६॥ततः सुखतमं पुत्रदर्शनं स्पर्शनं मुने ॥ सर्वेभ्यः प्रेयसी कान्ता प्रिया तेन प्रकीर्त्तिता ॥
॥२७॥ पुत्रप्रयोजना कान्ता शतकान्ताप्रियः सुतः ॥ नास्ति पुत्रात्परो बन्धुर्नास्ति पुत्रात्परः प्रियः ॥ २८॥ सर्वेभ्यो जयमन्विच्छे
त्पुत्रादेकात्पराजयम् ॥ न चात्मनि प्रियोऽर्थश्च तस्मादपि सुतः प्रियः ॥ २९ ॥ अतः प्रियतमे पुत्रे न्यसेदात्मपरं धनम् ॥ इत्येवमु
क्त्वा स ब्रह्मा विरराम च शौनक ॥ उवाच वचनं तातं नारदो ज्ञानिनां वरः ॥ ३० ॥ नारद उवाच ॥ स्वयं विज्ञाय सर्वार्थं स्वपुत्रं
वेददर्शने ॥ प्रवर्त्तयत्यसन्मार्गे स दयालुः कथं पिता ॥३१॥ जलबुद्बुदवत्सर्वं संसारमतिनश्वरम् ॥ जलरेखा यथा मिथ्या तथा
ब्रह्मञ्जगत्त्रयम् ॥ ३२ ॥ विहाय हरिदास्यं च विषये यन्मनश्चलम् ॥ दुर्लभं मानवं जन्म मा भूत्तन्निष्फलं क्वचित् ॥ ३३ ॥ का
वा कस्य प्रिया पुत्रो बन्धुः को वा भवार्णवे ॥ कर्मोर्मिभिर्योजना च तदपायो वियोजना ॥ ३४ ॥ सुकर्म कारयेद्यो हि तन्मित्रं स
पिता गुरुः ॥ दुर्बुद्धिं जनयेद्यो हि स रिपुः स्यात्कथं पिता ॥ ३५ ॥ इत्येवं कथितं तात वेदबीजं यथागमम् ॥ ध्रुवं तथाऽपि कर्त्तव्यं
तवाज्ञापरिपालनम् ॥ ३६ ॥ आदौ यास्यामि भगवन्नरनारायणाश्रमम् ॥ नारायणकथां श्रुत्वा करिष्ये दारसंग्रहम् ॥३७॥ इत्येवमु
क्त्वा स मुनिर्विरराम पितुः पुरः ॥ पुष्पवृष्टिस्तदुपरि तत्क्षणेन बभूव ह ॥ ३८ ॥ क्षणं पितुः पुरः स्थित्वा नारदो मुनिसत्तमः ॥
उवाच च पुनर्वेदं वचनं मङ्गलप्रदम् ॥ ३९ ॥ श्रीनारद उवाच ॥ देहि मे कृष्णमन्त्रं च यन्मनोवाञ्छितं मम ॥ तत्सम्बन्धि च य
ज्ज्ञानं यत्र तद्गुणवर्णनम्॥ ४० ॥ ततः पश्चात्करिष्यामि त्वत्प्रीत्या दारसंग्रहम् ॥ मानसे परिपूर्णे च कार्य्यं कर्तुं पुमान्सुखी॥४१॥
नारदस्य वचः श्रुत्वा प्रहृष्टः कमलोद्भवः ॥ उवाच पुनरेवेदं पुत्रं ज्ञानविदां वरः ॥ ४२ ॥ ब्रह्मोवाच ॥ पत्युर्मन्त्रं पितुर्मन्त्रं न गृह्णी
याद्विचक्षणः ॥ विविक्ताश्रमिणां चैव न मन्त्रः सुखदायकः ॥ ४३ ॥ निषेकाल्लभ्यते मन्त्रो गुरुर्भर्त्ता च कामिनी॥ विद्या सुखं भयं

दुःखं पुरुषैः स्वेच्छया न च ॥ ४४ ॥ महेश्वरस्तव गुरुः प्राक्तनो नः पुरातनः ॥ गच्छ वत्स शिवं शान्तं शिवदं ज्ञानिनां गुरुम् ॥ ४५ ॥ तत एव भवान्मन्त्रं ज्ञानं लब्ध्वा पुरातनात् ॥ नारायणकथां श्रुत्वा शीघ्रमागच्छ मद्गृहम् ॥ ४६ ॥ इत्युक्त्वा जगतां धाता विरराम च शौनक ॥ प्रणम्य पितरं भक्त्या शिवलोकं ययौ मुनिः ॥ ४७ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे ब्रह्मखण्डे सौतिशौनकसंवादे ब्रह्मनारदोक्तसंसारसुखासुखवर्णनं नाम चतुर्विंशतितमोऽध्यायः ॥ २४ ॥ सौतिरुवाच ॥ क्षणेन विप्रप्रवरो मुदाऽन्वितो जगाम शम्भोः सदनं मनोहरम् ॥ ऊर्ध्वं ध्रुवाद्योजनलक्षमीप्सितं महार्हरत्नौघविनिर्मितं महत् ॥ १ ॥ निराश्रये योगबलेन शम्भुना धृतं विचित्रं विविधालयान्वितम् ॥ दृष्टं सुपुण्याशयसाधकैर्वरैर्मुनीन्द्रवर्यैः परिपूरितं शुभम् ॥ २ ॥ मयूखशून्यं रविचन्द्रयोर्मुने हुताशनैर्वेष्टितमेव केवलम् ॥ प्राकाररूपैरतिरिक्तवर्द्धितैरुच्चैरसंख्याप्रमितैः शिखोज्ज्वलैः ॥ ३ ॥ पुरं वरं योजनलक्षविस्तृतं त्रिकोटिरत्नेन्द्रगृहान्वितं सदा ॥ विराजितं हीरकसारनिर्मितैश्चित्रैर्विचित्रैर्विविधैर्मनोहरैः ॥ ४ ॥ माणिक्यमुक्तामणिदर्पणैर्युतं नस्वप्नदृष्टं द्विज विश्वकर्मणः ॥ आकल्पमेकैः शिवसेवितैर्जनैर्निषेवितं सन्ततमेव शौनक ॥ ५ ॥ सिद्धैर्नियुक्तं शतकोटिलक्षैकैस्त्रिकोटिलक्षैश्च युतं स्वपार्षदैः ॥ युक्तं त्रिलक्षैर्विकटैश्च भैरवैः क्षेत्रैश्चतुर्लक्षशतैश्च वेष्टितम् ॥ ६ ॥ सुरद्रुमैर्वेष्टितमेव सन्ततं मन्दारवृक्षप्रवरैः सुपुष्पितैः ॥ विराजितं सुन्दरकामधेनुभिर्यथा बलाकाशतकैर्नभस्तलम् ॥ ७ ॥ दृष्ट्वा मुनिर्विस्मयमाप मानसे किं नात्र चित्रं सुरयोगिनां गुरौ ॥ लोकं त्रिलोकाच्च विलक्षणं परं भीमृत्युरोगार्त्तिजराहरं वरम् ॥ ८ ॥ दूरे सभामण्डलमध्यगं शिवं ददर्श शान्तं शिवदं मनोहरम् ॥ पञ्चत्रिनेत्रं विधुपञ्चवक्त्रं गङ्गाधरं निर्मलचन्द्रशेखरम् ॥ ९ ॥ प्रतप्तहेमाभजटाधरं विभुं दिगम्बरं शुभ्रमनन्तमक्षरम् ॥ मन्दाकिनीपुष्करबीजमालया कृष्णेति नामैव मुदा जपन्तम् ॥ १० ॥ सुनीलकण्ठं भुजगेन्द्रमण्डितं योगीन्द्रसिद्धेन्द्रमुनीन्द्रवन्दितम् ॥ सिद्धेश्वरं सिद्धविधानकारणं मृत्युंजयं कालयमान्तकारकम् ॥ ११ ॥ प्रसन्नहास्यास्यमनोहरं वरं विश्वाश्रयाणां शिवदं वरप्रदम् ॥ सदाऽऽशुतोषं भवरोगवर्जितं भक्तप्रियं भक्तजनैकबन्धुम् ॥ १२ ॥ गत्वा समीपं मुनिरेष शूलिनं ननाम मूर्ध्ना पुल

काङ्कविग्रहः ॥ वीणां त्रितन्त्रीं क्वणयन्पुनर्जगौ कृष्णं स तुष्टाव कलं सुकण्ठः ॥ १३ ॥ दृष्ट्वा मुनीन्द्रप्रवरं च सस्मितं विधेः सुतं वेदविदां वरिष्ठम् ॥ योगीन्द्रसिद्धेन्द्रमहर्षिभिः समं हर्षेण पीठादुदपश्यदीश्वरः ॥ १४ ॥ ददौ च तस्मै मुनये स संभ्रमादालिङ्गनं चाशिषमासनादिकम् ॥ पप्रच्छ भद्रागमनप्रयोजनं तपोधनं तं तपसा च शौनक ॥ १५ ॥ सद्रत्नसिंहासनसुन्दरे परश्चोवास शम्भुर्वरपार्षदैः सह ॥ नोवास धातुस्तनयः कृताञ्जलिस्तुष्टाव भक्त्या प्रणतः प्रभुं द्विज ॥ १६॥ गन्धर्वराजेन कृतेन नारदः स्तोत्रेण रम्येण शुभप्रदेन च ॥ स्तुत्वा प्रणामं पुनरेव कृत्वा भवाज्ञयोवास भवस्य वामतः ॥ १७ ॥ चकार तत्रैव निवेदनं शिवे मनोऽभिलाषं निजकामपूरके ॥ श्रुत्वा मुनेस्तद्वचनं कृपानिधिर्द्रुतं प्रतिज्ञाय चकार चोमिति ॥ १८ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे ब्रह्मखण्डे सौतिशौनकसंवादे कैलासं प्रति नारदागमनं नाम पञ्चविंशतितमोऽध्यायः ॥ २५ ॥ सौतिरुवाच ॥ हरिस्तोत्रं च कवचं मन्त्रं पूजाविधिं परम् ॥ हरं ययाचे देवर्षिर्ध्यानं च ज्ञानमेव च ॥ १ ॥ स्तोत्रं च कवचं मन्त्रं ध्यानं पूजाविधिं तथा ॥ तत्प्राक्तनीयज्ञानं च ददौ तस्मै महेश्वरः ॥ २ ॥ सर्वं प्राप्य मुनिश्रेष्ठः परिपूर्णमनोरथः ॥ उवाच प्रणतो भक्त्या गुरुं प्रणतवत्सलम् ॥ ३ ॥ नारद उवाच ॥ आह्निकं ब्राह्मणानां च वद वेदविदां वर ॥ स्वधर्मपालनं नित्यं यतो भवति नित्यशः ॥ ४ ॥ श्रीमहेश्वर उवाच ॥ ब्राह्मे मुहूर्त्तं चोत्थाय ब्रह्मरन्ध्रस्थपङ्कजे ॥ सूक्ष्मे सहस्रपत्रे स्वे निर्मले ग्लानिवर्जिते ॥ ५ ॥ रात्रिवासं परित्यज्य गुरुं तत्रैव चिन्तयेत् ॥ व्याख्यामुद्राकरं प्रीतं सस्मितं शिष्यवत्सलम् ॥ ६ ॥ प्रसन्नवदनं शान्तं परितुष्टं निरन्तरम् ॥ साक्षाद्ब्रह्मस्वरूपं च परमं चिन्तयेत्सदा ॥ ७ ॥ ध्यात्वैवं गुरुमाराध्य हृत्पद्मे निर्मले सिते ॥ सहस्रपत्रे विस्तीर्णे देवमिष्टं विचिन्तयेत् ॥ ८ ॥ यस्य देवस्य यद्ध्यानं यद्रूपं तद्विचिन्तयेत् ॥ गृहीत्वा तदनुज्ञां च कर्त्तव्यं समयोचितम् ॥ ९ ॥ आदौ ध्यात्वा गुरुं नत्वा संपूज्य विधिपूर्वकम् ॥ पश्चात्तदाज्ञामादाय ध्यायेदिष्टं प्रपूजयेत् ॥१०॥ गुरुप्रदर्शितो देवो मन्त्रपूजाविधिर्जपः ॥ न देवेन गुरुर्दृष्टस्तस्माद्देवाद्गुरुः परः ॥ ॥ ११ ॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ॥ गुरुः प्रकृतिरीशाद्या गुरुश्चन्द्रोऽनलो रविः ॥ १२ ॥ गुरुर्वायुश्च वरुणो गुरुर्माता

पिता सुहृत् ॥ गुरुरेव परं ब्रह्म नास्ति पूज्यो गुरोः परः ॥ १३ ॥ अभीष्टदेवे रुष्टे च समर्थौ रक्षणे गुरुः ॥ न समर्था गुरौ रुष्टे
रक्षणे सर्वदेवताः ॥ १४ ॥ यस्य तुष्टो गुरुः शश्वज्जयस्तस्य पदे पदे ॥ यस्य रुष्टो गुरुस्तस्य सर्वनाशश्च सर्वदा ॥ १५ ॥ न संपू
ज्य गुरुं देवं यो मूढः पूजयेद् भ्रमात्॥ब्रह्महत्याशतं पापी लभते नात्र संशयः ॥१६॥ सामवेदे च भगवानित्युवाच हरिः स्वयम्॥
तस्मादभीष्टदेवाच्च गुरुः पूज्यतमः परः ॥ १७ ॥ गुरुमिष्टं स्वयं ध्यात्वा स्तुत्वा वै साधको मुने ॥ निर्मलं स्थलमासाद्य विण्मूत्रं
ह्युत्सृजेन्मुदा ॥ १८ ॥ जलं जलसमीपं च सरन्ध्रं प्राणिसन्निधिम् ॥ देवालयसमीपं च वृक्षमूलं च वर्त्म च ॥ १९ ॥ हलोत्कर्ष
स्थलं चैव सस्यक्षेत्रं च गोष्ठकम् ॥ नदीकन्दरगर्भं च पुष्पोद्यानं च पंकिलम् ॥ २० ॥ ग्रामाद्यभ्यन्तरं चैव नृणां गृहसमीपकम्॥
शङ्कुं सेतुं शरवणं श्मशानं वह्निसन्निधिम् ॥ २१ ॥ क्रीडास्थलं महारण्यं मंचकाधःस्थलं तथा ॥ वृक्षच्छायायुतं स्थानमन्तःप्रा
ण्यवपर्णकम् ॥२२॥ दूर्वास्थानं कुशस्थानं वल्मीकस्थानमेव च ॥ वृक्षारोपणभूमिं च कार्य्यार्थं च परिष्कृतम् ॥ २३ ॥ एतत्सर्वं
परित्यज्य सूर्य्यतापविवर्जितम् ॥ कृत्वा गर्त्ते पुरीषं च मूत्रं च परिवर्जयेत् ॥ २४ ॥ पुरीषमूत्रोत्सर्गं च दिवा कुर्य्यादुदङ्मुखः ॥
पश्चिमाभिमुखो रात्रौ सन्ध्यायां दक्षिणामुखः ॥ २५ ॥ मौनी भूत्वा च निश्वासं यथा गन्धो न सञ्चरेत् ॥ त्यक्त्वा मृदा समा
च्छाद्य शौचं कुर्य्याद्विचक्षणः ॥२६॥ कृत्वा तु लोष्टशौचं च जलशौचं ततः परम् ॥ मृद्युक्तं तज्जलं चैव तत्प्रमाणं निशामय ॥
॥ २७ ॥ एकां लिङ्गे मृदं दद्याद्वामहस्ते चतुष्टयम् ॥ उभयोर्हस्तयोर्द्वे तु मूत्रशौचं प्रकीर्तितम् ॥ २८ ॥ मूत्रशौचं द्विगुणितं
मैथुनानन्तरं यदि ॥ मैथुनानन्तरं यद्वा मूत्रशौचं चतुर्गुणम् ॥ २९ ॥ एका लिङ्गे गुदे तिस्रस्तथा वामकरे दश ॥ उभयोः
सप्त दातव्याः पादः षष्ठेन शुध्यति ॥ ३० ॥ पुरीषशौचं विप्राणां गृहिणामिदमेव च ॥ विधवानां द्विगुणितं शौचमेव प्रकीर्त्ति
तम् ॥ ३१ ॥ यतीनां वैष्णवानां च ब्रह्मर्षैर्ब्रह्मचारिणाम् ॥ चतुर्गुणं च गृहिणां तेषां शौचं प्रकीर्त्तितम् ॥ ३२ ॥ नो यावदुपनीयेत
द्विजः शूद्रस्तथाऽङ्गना ॥ गन्धलेपक्षयकरं तेषां शौचं प्रकीर्त्तितम् ॥ ३३ ॥ शौचं क्षत्रविशोश्चैव द्विजानां गृहिणां समम् ॥

द्विगुणं वैष्णवादीनां मुनीनां परिकीर्तितम् ॥ ३४ ॥ न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभीप्सता ॥ प्रायश्चित्तं प्रयुज्येत विहि
तातिक्रमे कृते ॥ ३५ ॥ शौचं तन्नियमं मत्तः सावधानं निशामय ॥ मृच्छौचे च शुचिर्विप्रोऽप्यशुचिश्च व्यतिक्रमे ॥ ३६ ॥
वल्मीकमूषिकोत्खातां मृदमन्तर्जलां तथा ॥ शौचावशिष्टां गेहाच्च न दद्यात्क्लेशसम्भवाम् ॥ ३७ ॥ अन्तःप्राण्यवपर्णां च हलो
त्खातां विशेषतः ॥कुशमूलोत्थितां चैव दूर्वामूलोत्थितां तथा ॥ ३८ ॥ अश्वत्थमूलान्नीतां च तथैव शयनोत्थिताम् ॥ चतुष्प
थाच्च गोष्ठानां गोष्पदानां तथैव च ॥३९॥ शस्यस्थलानां क्षेत्राणामुद्यानानां मृदं त्यजेत् ॥ स्नातो वाऽप्यथवाऽस्नातो विप्रः शौचेन
शुध्यति ॥ ४० ॥ शौचहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ॥ कृत्वा शौचमिदं विप्रो मुखं प्रक्षालयेत्सुधीः ॥ ४१ ॥ आदौ षोड
शगण्डूषैर्मुखशुद्धिं विधाय च ॥ दन्तकाष्ठेन दन्तं च तत्पश्चात्परिमार्जयेत् ॥४२॥ पुनः षोडशगण्डूषैर्मुखशुद्धिं समाचरेत् ॥ दन्त
मार्जनकाष्ठानां नियमं शृणु नारद ॥४३॥ निरूपितं सामवेदे हरिणा चाह्निकक्रमे ॥ अपामार्गं सिन्धुवारमाम्रं च करवीरकम्॥४४॥
खदिरं च शिरीषं च जातिपुन्नागशालकम् ॥ अशोकमर्जुनं चैव क्षीरिवृक्षं कदम्बकम् ॥४५॥ जम्बूकं बकुलं तोक्मं पलाशं च प्रश
स्तकम् ॥ बदरीं पारिभद्रं च मन्दारं शाल्मलिं तथा॥४६॥वृक्षं कण्टकयुक्तं च लतादि परिवर्जयेत् ॥ पिप्पलं च प्रियालं च तिन्ति
डीकं च तालकम् ॥४७॥ खर्जूरं नारिकेलं च तालं च परिवर्जयेत् ॥ दन्तशौचविहीनश्च सर्वशौचविहीनकः ॥४८॥ शौचहीनोऽशुचि
र्नित्यमनर्हः सर्वकर्मसु ॥ कृत्वा शौचं शुचिर्विप्रो धृत्वा धौते च वाससी ॥ ४९ ॥ प्रक्षाल्य पादावाचम्य प्रातःसन्ध्यां समाचरेत्॥
एवं त्रिसंध्यं संध्यां च कुरुते कुलजो द्विजः ॥ ५० ॥ स स्नातः सर्वतीर्थेषु त्रिसन्ध्यं यः समाचरेत् ॥ सन्ध्यात्रितयहीनस्स्यादन
र्हः सर्वकर्मसु ॥ ५१ ॥ यदह्ना कुरुते कर्म न तस्य फलभाग्भवेत् ॥ नोपतिष्ठति यः पूर्वां नोपास्ते यस्तु पश्चिमाम् ॥ ५२ ॥ स
शूद्रवद्बहिष्कार्य्यः सर्वस्माद्द्विजकर्मणः ॥ पूर्वां सन्ध्यां परित्यज्य मध्यमां पश्चिमां तथा ॥५३॥ब्रह्महत्यामात्महत्यां प्रत्यहं लभते
द्विजः ॥ एकदशीविहीनो यः सन्ध्याहीनश्च यो द्विजः ॥ ५४ ॥ कल्पं व्रजेत्कालसूत्रं यथा हि वृषलीपतिः ॥ प्रातःसन्ध्यां विधा

यैवं गुरुमिष्टं सुरं रविम् ॥५५॥ ब्रह्माणमीशं विष्णुं च मायां पद्मां सरस्वतीम् ॥ प्रणम्य गुरुमाज्यं च दर्पणं मधु काञ्चनम् ॥५६॥ स्पृष्ट्वा स्नानादिकं काले कुर्यात्साधकसत्तमः ॥ पुष्करिण्यां तु वाप्यां तु यदा स्नानं समाचरेत् ॥ ५७ ॥ समुद्धृत्य पञ्चपिण्डानादौ धर्मी विचक्षणः ॥ नद्यां नदे कन्दरे वा तीर्थे वा स्नानमाचरेत् ॥ ५८ ॥ कुर्य्यात्स्नात्वा तु सङ्कल्पं ततः स्नानं पुनर्मुने ॥ श्रीकृष्णप्रीतिकामश्च वैष्णवानां महात्मनाम् ॥ ५९ ॥ सङ्कल्पो गृहिणां चैव कृतपातकनाशकः ॥ विप्रः कृत्वा तु सङ्कल्पं मृदं गात्रे प्रलेपयेत् ॥ ६० ॥ वेदोक्तमन्त्रेणानेन देहशुद्धिकृते नरः ॥ अश्वक्रान्ते रथक्राते विष्णुक्रान्ते वसुन्धरे ॥ ६१ ॥ मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ॥ उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥ ६२ ॥ आरुह्य मम गात्राणि सर्वं पापं प्रमोचय ॥ पुण्यं देहि महाभागे स्नानानुज्ञां कुरुष्व माम् ॥ ६३ ॥ इत्युक्त्वा च जले नाभिप्रमाणे मन्त्रपूर्वकम् ॥ चतुर्हस्तप्रमाणां च कृत्वा मण्डलिका शुभाम् ॥ ६४ ॥ तीर्थान्यावाहयेत्तत्र हस्तं दत्त्वा तपोधन ॥ यानि यानि च तीर्थानि सर्वाणि कथयामि ते ॥ ६५ ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिं कुरु ॥ ६६ ॥ नलिनी नन्दिनी सीता मालिनी च महापगा ॥ विष्णुपादाब्जसम्भूता गङ्गा त्रिपथगामिनी ॥ ६७ ॥ पद्मावती भोगवती स्वर्णरेखा च कौशिकी ॥ दक्षा पृथ्वी च सुभगा विश्वकाया शिवामृता ॥ ६८ ॥ विद्याधरी सुप्रसन्ना तथा लोकप्रसाधिनी ॥ क्षेमा च वैष्णवी शान्ता शान्तिदा गोमती सती ॥ ६९ ॥ सावित्री तुलसी दुर्गा महालक्ष्मीः सरस्वती ॥ कृष्णप्राणाधिका राधा लोपामुद्रा दितीरतिः ॥७०॥ अहल्या चादितिः संज्ञा स्वधा स्वाहाऽप्यरुन्धती ॥ शतरूपा देवहूतिरित्याद्याः संस्मरेत्सुधीः ॥ ७१ ॥ स्नात्वा स्नात्वा महापूतः कुर्य्यात्तु तिलकं बुधः ॥ बाह्वोर्मूले ललाटे च कण्ठदेशे च वक्षसि ॥ ७२ ॥ स्नानं दानं तपो होमो देवतापितृकर्म च ॥ तत्सर्वं निष्फलं याति ललाटे तिलकं विना ॥ ७३ ॥ ब्राह्मणस्तिलकं कृत्वा कुर्य्यात्सन्ध्यां च तर्पणम् ॥ नमस्कृत्य सुरान्भक्त्या गृहं गच्छेन्मुदाऽन्वितः ॥७४॥ प्रक्षाल्य पादौ यत्नेन धृत्वा धौते च वाससी ॥ मन्दिरं प्रविशेत्प्राज्ञ इत्याह हरिरेव च ॥ ७५ ॥ विना पादक्षालनं यः स्नात्वा

विशति मन्दिरम् ॥ तस्य स्नानादिकं नष्टं जपहोमादिपञ्चकम् ॥ ७६ ॥ परिधाय स्निग्धवस्त्रं गृहं च प्रविशेद्गृही ॥ रुष्टा लक्ष्मीर्गृहा
द्याति शापं दत्त्वा सुदारुणम् ॥ ७७ ॥ जङ्घोर्ध्वतश्च यो विप्रः पादौ प्रक्षालयेद्यदा ॥ तावद्भवति चाण्डालो यावद्गङ्गां न पश्यति
॥ ७८ ॥ उपविश्यासने ब्रह्मञ्छुचिराचम्य साधकः ॥ पूजां कुर्य्यात्तु वेदोक्तां भक्तियुक्तो हि संयतः ॥ ७९ ॥ शालग्रामे मणौ मन्त्रे
प्रतिमायां जले स्थले ॥ गोपृष्ठे वा गुरौ विप्रे प्रशस्तमर्चनं हरेः ॥ ८० ॥ सर्वेषु शस्ता पूजा च शालग्रामे च नारद ॥ सुराणामेव
सर्वेषां यत्राधिष्ठानमेव च ॥ ८१ ॥ स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ॥ शालग्रामोदकेनैव योऽभिषेकं समाचरेत् ॥ ८२ ॥
शालग्रामजलं भक्त्या नित्यमश्नाति यो नरः ॥ जीवन्मुक्तः स च भवेद्यात्यन्ते कृष्णमन्दिरम् ॥ ८३ ॥ शालग्रामशिलाचक्रं यत्र
तिष्ठति नारद ॥ सचक्रो भगवांस्तत्र सर्वतीर्थानि निश्चितम् ॥ ८४ ॥ तत्र यो हि मृतो देही ज्ञानाज्ञानेन दैवतः ॥ रत्ननिर्मितया
नेन स याति श्रीहरेः पदम् ॥ ८५ ॥ शालग्रामं विनाऽन्यत्र कः साधुः पूजयेद्धरिम् ॥ कृत्वा तत्र हरेः पूजां परिपूर्णं फलं लभेत् ॥
॥ ८६ ॥ पूजाधारश्च कथितः श्रूयतां पूजनक्रमः ॥ हरेः पूजां बहुमतां कथयामि यथागमम् ॥ ८७ ॥ कश्चिद्ददाति हरये चोपचा
रांश्च षोडश ॥ सुन्दराणि पवित्राणि नित्यं भक्त्या च वैष्णवः ॥ ८८ ॥ कश्चिद्द्वादश वस्तूनि पञ्च वस्तूनि कश्चन ॥ येषामेव
यथा शक्तिर्भक्तिर्मूलं च पूजने ॥८९॥ आसनं वसनं पाद्यमर्घ्यमाचमनीयकम् ॥ पुष्पं चन्दनधूपं च दीपं नैवेद्यमुत्तमम् ॥ ९० ॥
गन्धं माल्यं च शय्यां च ललितां सुविलक्षणाम् ॥ जलमन्नं च ताम्बूलं साधारं देयमेव च ॥ ९१ ॥ गन्धान्नतलपताम्बूलं विना
द्रव्याणि द्वादश ॥ पाद्यार्घ्यजलनैवेद्यपुष्पाण्येतानि पंच च ॥ ९२ ॥ सेवार्ण्येतानि मूलेन दद्यात्साधकसत्तमः ॥ गुरूपदिष्टं मूलं
च प्रशस्तं सर्वकर्मसु ॥ ९३ ॥ आदौ कृत्वा भूतशुद्धिं प्राणायामं ततः परम् ॥ अङ्गप्रत्यङ्गयोर्न्यासं मन्त्रन्यासं ततः परम् ॥९४॥
वर्णन्यासं विनिर्वर्त्य चार्घ्यपात्रं विनिर्दिशेत् ॥ त्रिकोणमण्डलं कृत्वा तत्र कूर्मं प्रपूजयेत् ॥ ९५॥ जलेनापूर्य्य शङ्खं च तत्र संस्था
पयेद्द्विजः ॥ जलं संपूज्य विधिवत्तीर्थान्यावाहयेत्ततः ॥ ९६ ॥ पूजोपकरणं तेन जलेन क्षालयेत्पुनः ॥ ततो गृहीत्वा पुष्पं च कृत्वा

योगासनं शुचिः ॥ ९७ ॥ ध्यानेन गुरुदत्तेन ध्यायेत्कृष्णमनन्यधीः ॥ध्यात्वा पाद्यादिकं सर्वं दद्यान्मूलेन साधकः ॥ ९८ ॥ अङ्ग
प्रत्यङ्गदेवं च तन्त्रोक्तं पूजयेद्धरिम् ॥ मूलं जप्त्वा यथाशक्ति देवमन्त्रं विसर्जयेत् ॥ ९९ ॥ दत्त्वोपहारं विविधं स्तुत्वा च कवचं
पठेत् ॥ ततः कृत्वा परीहारं मूर्ध्ना च प्रणमेद्भुवि ॥१००॥ कृत्वा वै देवपूजां च यज्ञं कुर्य्याद्विचक्षणः ॥ श्रौतस्मार्त्ताग्नियुक्तं च बलिं
दद्यात्ततो मुने ॥ १०१ ॥ नित्यश्राद्धं यथाशक्ति दानं वित्तानुरूपकम् ॥ कृत्वा कृती स विहरेत्क्रम एष श्रुतौ श्रुतः ॥ १०२॥ इति
ते कथितं सर्वं वेदोक्तं सूत्रमुत्तमम् ॥ आह्निकस्य च विप्राणां किं भूयः श्रोतुमिच्छसि॥१०३॥इति श्रीब्रह्मवैवर्त्ते महापुराणे ब्रह्मखण्डे
शिवनारदसंवादे आह्निकनिरूपणं नाम षड्विंशतितमोऽध्यायः ॥ २६ ॥ नारद उवाच ॥ भक्ष्यं किं वाऽप्यभक्ष्यं च द्विजानां
गृहिणां प्रभो ॥ यतीनां वैष्णवानां च विधवाब्रह्मचारिणाम् ॥ १ ॥ किं कर्त्तव्यमकर्त्तव्यमभोग्यं भोग्यमेव वा ॥ सर्वं कथय सर्वज्ञ
सर्वेशः सर्वकारणम् ॥ २ ॥ महेश्वर उवाच ॥ कश्चित्तपस्वी विप्रश्च निराहारी चिरं मुनिः ॥ कश्चित्समीरणाहारी फलाहारी च कश्चन
॥ ३ ॥ अन्नाहारी यथा काले गृही च गृहिणीयुतः ॥ येषामिच्छा च या ब्रह्मन्तुचीनां विविधा गतिः ॥ ४ ॥ हविष्यान्नं ब्राह्म
णानां प्रशस्तं गृहिणां सदा ॥ नारायणोच्छिष्टमिष्टमभक्ष्यमनिवेदितम् ॥ ५ ॥ अन्नं विष्ठा जलं मूत्रं यद्विष्णोरनिवेदितम्॥ विण्मूत्रं
सर्वथा प्रोक्तमन्नं च हरिवासरे ॥६॥ ब्राह्मणः कामतोऽन्नं च यो भुङ्क्ते हरिवासरे॥त्रैलोक्यजनितं पापं सोऽपि भुङ्क्ते न संशयः॥७॥
न भोक्तव्यं न भोक्तव्यं न भोक्तव्यं च नारद ॥ गृहिभिर्ब्राह्मणैरन्नं संप्राप्ते हरिवासरे ॥८॥ गृही शैवश्च शाक्तश्च ब्राह्मणो ज्ञानदुर्बलः ॥
प्रयाति कालसूत्रं च भुक्त्वा च हरिवासरे ॥ ९ ॥ कृमिभिः शालिमानैश्च भक्षितस्तत्र तिष्ठति ॥ विण्मूत्रभोजनं कृत्वा यावदिन्द्रा
श्चतुर्दश ॥ १० ॥ जन्माष्टमीदिने रामनवमीदिवसे हरेः॥ शिवरात्रौ च यो भुङ्क्ते सोऽपि द्विगुणपातकी ॥ ११ ॥ उपवासासमर्थश्च
फलं मूलं जलं पिबेत् ॥ [1]नष्टे शरीरे स भवेदन्यथा चात्मघातकः ॥१२॥ सकृद्भुङ्क्ते हविष्यान्नं विष्णोर्नैवेद्यमेव च॥न भवेत्प्रत्यवायी

---

[1] न चेच्छरीरीति पाठः ।

स चोपवासफलं लभेत् ॥ १३ ॥ एकादश्यामनाहारं गृही विप्रश्च भारते ॥ स च तिष्ठति वैकुण्ठे यावद्वै ब्रह्मणो वयः ॥ १४ ॥ गृहिणां शैवशाक्तानामिदमुक्तं च नारद ॥ विशेषतो वैष्णवानां यतीनां ब्रह्मचारिणाम् ॥ १५ ॥ नित्यं नैवेद्यभोजी यः श्रीविष्णोस्स हि वैष्णवः ॥ नित्यं शतोपवासानां जीवन्मुक्तफलं भवेत् ॥ १६ ॥ वाञ्छन्ति तस्य संस्पर्शं तीर्थान्यखिलदेवताः ॥ आलापं दर्शनं चैव सर्वपापप्रणाशनम् ॥ १७ ॥ द्विः स्विन्नमन्नं पृथुकं शुद्धं देशविशेषके ॥ नात्यन्तशस्तं विप्राणां भक्षणे न निवेदने ॥ १८ ॥ अभक्ष्यं वै यतीनां च विधवाब्रह्मचारिणाम् ॥ ताम्बूलं च यथा ब्रह्मंस्तथैतद्वस्तु न ध्रुवम् ॥ १९ ॥ ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम् ॥ तपस्विनां च विप्रेन्द्र गोमांससदृशं ध्रुवम् ॥ २० ॥ सर्वेषां ब्राह्मणानां यदभक्ष्यं शृणु नारद ॥ यदुक्तं सामवेदे च हरिणा चाह्निकक्रमे ॥ २१ ॥ ताम्रपात्रे पयःपानमुच्छिष्टे घृतभोजनम् ॥ दुग्धं लवणसार्द्धं च सद्यो गोमांसभक्षणम् ॥ २२ ॥ नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं लघु ॥ ऐक्षवं ताम्रपात्रस्थं सुरातुल्यं न संशयः ॥ २३ ॥ उत्थाय वामहस्तेन यस्तोयं पिबति द्विजः ॥ सुरापी च स विज्ञेयः सर्वधर्मबहिष्कृतः ॥ २४ ॥ अनिवेद्यं हरेरन्नं भुक्तशेषं च नित्यशः ॥ पीतशेषजलं चैव गोमांससदृशं मुने ॥ २५ ॥ वानिङ्गणफलं[1] चैव गोमांसं कार्त्तिके स्मृतम् ॥ माघे च मूलकं चैव कलम्बी शयने तथा ॥ २६ ॥ श्वेतवर्णं च तालं च मसूरं मत्स्यमेव च ॥ सर्वेषां ब्राह्मणानां च त्याज्यं सर्वत्र देशके ॥ २७ ॥ मत्स्यांश्च कामतो भुक्त्वा सोपवासस्त्र्यहं वसेत् ॥ प्रायश्चित्तं ततः कृत्वा शुद्धिमाप्नोति वाडवः ॥ २८ ॥ प्रतिपत्सु च कूष्माण्डमभक्ष्यं ह्यर्थनाशनम् ॥ द्वितीयायां च बृहतीभोजनेन स्मरेद्धरिम् ॥ २९ ॥ अभक्ष्यं च पटोलं च शत्रुवृद्धिकरं परम् ॥ तृतीयायां चतुर्थ्यां च मूलकं धननाशनम् ॥ ३० ॥ कलङ्ककारणं चैव पंचम्यां बिल्वभक्षणम् ॥ तिर्य्यग्योनिं प्रापयेत्तु षष्ठ्यां वै निम्बभक्षणम् ॥ ३१ ॥ रोगवृद्धिकरं चैव नराणां तालभक्षणम् ॥ सप्तम्यां च तथा तालं शरीरस्य च नाशकम् ॥ ३२ ॥ नारिके

---

[1] कलिंगण इत्यर्थः ।

लफलं भक्ष्यमष्टम्यां बुद्धिनाशनम् ॥ तुम्बी नवम्यां गोमांसं दशम्यां च कलम्बिका ॥ ३३ ॥ एकादश्यां तथा शिम्बी द्वादश्यां पूतिका तथा ॥ त्रयोदश्यां च वार्त्ताकी न भक्ष्या पुत्रनाशनम् ॥३४॥ चतुर्दश्यां माषभक्ष्यं महापापकरं परम् ॥ पञ्चदश्यां तथा मांसमभक्ष्यं गृहिणां मुने ॥३५॥ गृहिणां प्रोक्षितं मांसं भक्ष्यमन्यदिनेषु च ॥ प्रातः स्नाने तथा श्राद्धे पार्वणे व्रतवासरे ॥ ३६ ॥ प्रशस्तं सार्षपं तैलं पक्वतैलं च नारद ॥ कुहूपूर्णेन्दुसंक्रांतिचतुर्दश्यष्टमीषु च ॥३७॥ रवौ श्राद्धे व्रताहे च दुष्टं स्त्रीतिलतैलकम् ॥ मांसं च रक्तशाकं च कांस्यपात्रे च भोजनम् ॥ ३८ ॥ निषिद्धं शयनं चैव कूर्ममांसं च मन्त्रितम् ॥ निषिद्धं सर्ववर्णानां दिवा स्वस्त्रीनिषेवणम् ॥ ३९ ॥ रात्रौ च दधि भक्ष्यं च शयनं सन्ध्ययोर्दिने ॥ रजस्वलास्त्रीगमनमेतन्नरककारणम् ॥ ४० ॥ उदक्यवीरयोरन्नं पुंश्चल्यन्नमभक्षकम् ॥ शूद्रान्नं याजकान्नं च शूद्रश्राद्धान्नमेव च ॥४१॥ अभक्ष्यान्नं च विप्रर्षे यदन्नं वृषलीपतेः ॥ ब्रह्मन्वार्धुषिकान्नं च गणकान्नमभक्षकम् ॥ ४२ ॥ अग्रदानिद्विजान्नं च चिकित्साकारकस्य च ॥ हस्तचित्राहरौ तैलमग्राह्यं चाप्यभक्षकम् ॥ ४३ ॥ मूले मृगे भाद्रपदे मांसं गोमांसतुल्यकम् ॥ [1]अमायां कृत्तिकायां च द्विजैः क्षौरं विवार्जितम् ॥ ४४ ॥ कृत्वा तु मैथुनं क्षौरं यो देवांस्तर्पयेत्पितॄन् ॥ रुधिरं तद्भवेत्तोयं दाता च नरकं व्रजेत् ॥ ४५ ॥ यत्कर्त्तव्यमकर्त्तव्यं यद्भोज्यं यदभोज्यकम् ॥ सर्वं तुभ्यं निगदितं किं भूयः श्रोतुमिच्छसि ॥ ४६ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे ब्रह्मखण्डे सौतिशौनकसंवादे नारदं प्रति शिवोपदेशे भक्ष्याभक्ष्यादिविवरणं नाम सप्तविंशतितमोऽध्यायः ॥२७॥

नारद उवाच ॥ श्रुतं सर्वं जगन्नाथ त्वत्प्रसादाज्जगद्गुरो ॥ भवान्ब्रह्मस्वरूपं च वद ब्रह्मनिरूपणम् ॥ १ ॥ प्रभो किं ब्रह्म साकारं किं निराकारमीश्वर ॥ किं तद्विशेषणं किं वाऽप्यविशेषणमेव च ॥२॥ किं वा दृश्यमदृश्यं वा लिप्तं देहिषु किं न वा ॥ किं वा तल्लक्षणं शास्त्रे वेदे वा किं निरूपितम् ॥ ३ ॥ ब्रह्मातिरिक्ता प्रकृतिः किं वा ब्रह्मस्वरूपिणी ॥ प्रकृतेर्लक्षणं किं वा सारभूतं श्रुतौ श्रुतम्॥४॥प्राधान्यं तस्य सृष्टौ च द्वयोर्मध्ये वरं परम् ॥ विचार्य्य मनसा सर्वं सर्वज्ञ

---

[1] मघायामिति पाठः ।

वद मां ध्रुवम् ॥५॥ नारदस्य वचः श्रुत्वा पञ्चवक्त्रः प्रहस्य च ॥ भगवान्कर्तुमारेभे परब्रह्मनिरूपणम् ॥ ६ ॥ महादेव उवाच ॥ यद्य
त्पृष्टं त्वया वत्स निगूढं ज्ञानमुत्तमम् ॥ सुदुर्लभं च वेदेषु पुराणेषु च नारद ॥७॥ अहं ब्रह्मा च विष्णुश्च शेषो धर्मो महान्विराट्॥
सर्वं निरूपितं ब्रह्मन्नस्माभिः श्रुतिभिर्मुने ॥ ८ ॥ यद्विशेषणयुक्तं च दृश्यं प्रत्यक्षमेव च ॥ तन्निरूपितमस्माभिर्वेदे वेदविदांवर ॥९॥
वैकुण्ठे च पुरा पृष्टे धर्मेण ब्रह्मणा तदा ॥ यदुवाच हरिः किञ्चिन्निबोध कथयामि ते ॥१०॥ सारभूतं च तत्त्वानामज्ञानान्धकलोच
नम्॥द्वैधभ्रमतमोध्वंससुप्रकृष्टप्रदीपकम्॥११॥परमात्मस्वरूपं च परं ब्रह्म सनातनम्॥सर्वदेहस्थितं साक्षिस्वरूपं देहिकर्मणाम्॥१२॥
प्राणाः पञ्च स्वयं विष्णुर्मनो ब्रह्मा प्रजापतिः ॥ सर्वज्ञानस्वरूपोऽहं शक्तिः प्रकृतिरीश्वरी ॥ १३ ॥ आत्माधीना वयं सर्वे स्थिते त
स्मिन्वयं स्थिताः ॥ गते गताश्च परमे नरदेवमिवानुगाः ॥ १४ ॥ जीवस्तत्प्रतिबिम्बं च सर्वभोगी हि कर्मणाम् ॥ यथाऽर्कचन्द्रयो
र्बिम्बं जलपूर्णघटेषु च ॥ १५ ॥ बिम्बं घटेषु भग्नेषु प्रलीनं चन्द्रसूर्य्ययोः ॥ तथा लयप्रसंगे स जीवो ब्रह्मणि लीयते ॥ १६ ॥
एकमेव परं ब्रह्म शेषे वत्स भवक्षये ॥ वयं प्रलीनास्तत्रैव जगदेतच्चराचरम् ॥ १७ ॥ तच्च ज्योतिःस्वरूपं च मण्डलाकारमेव च ॥
ग्रीष्ममध्याह्नमार्त्तण्डकोटिकोटिसमप्रभम्॥१८॥आकाशमिव विस्तीर्णं सर्वव्यापकमव्ययम्॥सुखदृश्यं यथा चन्द्रबिम्बं योगिभिरेव च
॥ १९ ॥ वदन्ति योगिनस्तत्र परं ब्रह्म सनातनम् ॥ दिवानिशं च ध्यायन्ते सत्यं तत्सर्वमङ्गलम् ॥ २० ॥ निरीहं च निराकारं
परमात्मानमीश्वरम् ॥ स्वेच्छामयं स्वतन्त्रं च सर्वकारणकारणम् ॥ २१ ॥ परमानन्दरूपं च परमानन्दकारणम् ॥ परं प्रधानं
पुरुषं निर्गुणं प्रकृतेः परम् ॥ तत्रैव लीना प्रकृतिः सर्वबीजस्वरूपिणी ॥ २२ ॥ यथाऽग्नौ दाहिका शक्तिः प्रभा सूर्य्ये यथा मुने॥
यथा दुग्धे च धावल्यं जले शैत्यं यथैव च ॥ २३ ॥ यथा शब्दश्च गगने यथा गन्धः क्षितौ सदा ॥ तथा हि निर्गुणं ब्रह्म निर्गुणा
प्रकृतिस्तथा ॥ २४ ॥ सृष्टयुन्मुखेन तद् ब्रह्म चांशेन पुरुषः,स्मृतः ॥ स एव सगुणो वत्स प्राकृतो विषयी स्मृतः ॥ २५ ॥ त्रिगुणा
सा हि तत्रैव परा च्छायामयी स्मृता॥२६॥यथा मृदा कुलालश्च घटं कर्तुं क्षमः सदा॥तथा प्रकृत्या तद् ब्रह्म सृष्टिं स्रष्टुं क्षमो मुने॥२७॥स्वर्णे

न कुण्डलं कर्त्तुं स्वर्णकारः क्षमो यथा ॥ तथा ब्रह्म तया सार्द्धं सृष्टिं कर्तुमिहेश्वरः ॥ २८ ॥ कुलालसृष्टा न च मृन्नित्या
चैव सनातनी ॥ न स्वर्णकारसृष्टं तत्स्वर्णं वा नित्यमेव च ॥ २९ ॥ नित्यं तत्परमं ब्रह्म नित्या च प्रकृतिः स्मृता ॥ द्वयोः समं
च प्राधान्यमिति केचिद्वदन्ति हि ॥ ३० ॥ मृदं स्वर्णं समाहर्त्तुं कुलालस्वर्णकारकौ ॥ न समर्थौ च मृत्स्वर्णं तयोराहरणे क्षमम्
॥ ३१ ॥ तस्मात्तत्प्रकृतेर्ब्रह्म परमेव च नारद ॥ इति केचिद्वदन्त्येवं द्वयोर्वै नित्यता ध्रुवम् ॥ ३२ ॥ केचिद्वदन्ति तद्ब्रह्म स्वयं च
प्रकृतिः पुमान् ॥ ब्रह्मातिरिक्ता प्रकृतिर्वदन्तीति च केचन ॥ ३३ ॥ तद्ब्रह्म परमं धाम सर्वकारणकारणम् ॥ तद्ब्रह्मलक्षणं ब्रह्मन्निदं
किंचिच्छ्रुतौ श्रुतम् ॥ ३४ ॥ ब्रह्म चात्मा च सर्वेषां निर्लिप्तं साक्षिरूपि च ॥ सर्वव्यापि च सर्वादि लक्षणं च श्रुतौ श्रुतम् ॥३५॥
तद्ब्रह्मशक्तिः प्रकृतिः सर्वबीजस्वरूपिणी ॥ यतस्तच्छक्तिमद्ब्रह्म चेदं प्रकृतिलक्षणम् ॥ ३६ ॥ तेजोरूपं च तद्ब्रह्म ध्यायन्ते योगिनः
सदा ॥ वैष्णवास्तन्न मन्यन्ते मद्भक्ताः सूक्ष्मबुद्धयः ॥ ३७ ॥ तत्तेजः कस्य नाश्चर्य्यं ध्यायन्ते पुरुषं विना ॥ कारणेन विना कार्यं
कुतो वा प्रभवेद्भुवि ॥ ३८ ॥ ध्यायन्ते वैष्णवास्तस्मात्तत्र रूपं मनोहरम् ॥ स्वेच्छामयस्य पुंसश्च साकारस्यात्मनः सदा ॥ ३९ ॥
तत्तेजोमण्डलाकारे सूर्य्यकोटिसमप्रभे ॥ नित्यं स्थलं च प्रच्छन्नं गोलोकाभिधमेव च ॥४०॥ लक्षकोटया योजनानां चतुरस्रं मनो
हरम् ॥ रत्नेन्द्रसारनिर्माणैर्गोपीभिश्चावृतं सदा ॥४१॥ सुदृश्यं वर्तुलाकारं यथा चन्द्रस्य मण्डलम् ॥ नानारत्नैश्च खचितं निराधारं
तदिच्छया ॥ ४२ ॥ ऊर्ध्वं च नित्यवैकुण्ठात्पञ्चाशत्कोटियोजनम् ॥ गोगोपगोपीसंयुक्तं कल्पवृक्षसमन्वितम् ॥ ४३ ॥ कामधे
नुभिराकीर्णं रासमण्डलमण्डितम् ॥ वृन्दावनवनाच्छन्नं विरजावेष्टितं मुने ॥ ४४ ॥ शतशृङ्गं शातकुम्भैः सुदीप्तं श्रीमदीप्सितम् ॥
लक्षकोटया परिमितैराश्रमैः सुमनोहरैः ॥ ४५ ॥ शतमन्दिरसंयुक्तमाश्रमं सुमनोहरम् ॥ प्राकारपरिखायुक्तं पारिजातवनान्वितम् ॥
॥ ४६ ॥ कौस्तुभेन्द्रेण मणिना राजितं परमोज्ज्वलम् ॥ हीरसारसुसंक्लृप्तसोपानैश्चातिसुन्दरैः ॥ ४७ ॥ मणीन्द्रसाररचितैः कपा
टैर्दर्पणान्वितैः ॥ नानाचित्रविचित्राढ्यैराश्रमं च सुसंस्कृतम् ॥ ४८ ॥ षोडशद्वारसंयुक्तं सुदीप्तं रत्नदीपकैः ॥ रत्नसिंहासने रम्ये

महार्घमणिनिर्मिते ॥ ४९ ॥ नानाचित्रविचित्राढ्ये वसन्तं वरमीश्वरम् ॥ नवीननीरदश्यामं किशोरवयसं शिशुम् ॥ ५० ॥
शरन्मध्याह्नमार्त्तण्डप्रभामोचकलोचनम् ॥ शरत्पार्वणपूर्णेन्दुशुभदीप्तिमदाननम् ॥ ५१ ॥ कोटिकन्दर्पलावण्यलीलानिन्दितमन्म
थम् ॥ कोटिचन्द्रप्रभाजुष्टं पुष्टं श्रीयुक्तविग्रहम् ॥५२॥ सस्मितं मुरलीहस्तं सुप्रशस्तं सुमङ्गलम् ॥ परमोत्तमपीतांशुकयुगेन समु
ज्ज्वलम् ॥ ५३ ॥ चन्दनोक्षितसर्वांगं कौस्तुभेन विराजितम् ॥ आजानु मालतीमालावनमालाविभूषितम् ॥ ५४ ॥ त्रिभङ्गभ
ङ्ग्या संयुक्तं मणिमाणिक्यभूषितम् ॥ मयूरपुच्छचूडं च सद्रत्नमुकुटोज्ज्वलम् ॥५५॥ रत्नकेयूरवलयरत्नमञ्जीररञ्जितम् ॥ रत्नकु
ण्डलयुग्मेन गण्डस्थलसुशोभितम् ॥ ५६ ॥ मुक्तापङ्क्तिसद्दक्षाभदशनं सुमनोहरम् ॥ पक्वबिम्बाधरोष्ठं च नासिकोन्नतिशोभनम् ॥
॥ ५७ ॥ वीक्षितं गोपिकाभिश्च वेष्टिताभिस्समन्ततः ॥ स्थिरयौवनयुक्ताभिः सस्मिताभिश्च सादरम् ॥ ५८ ॥ भूषिताभिश्च
सद्रत्ननिर्मितैर्भूषणैः परम् ॥ सुरेन्द्रैश्च मुनीन्द्रैश्च मुनिभिर्मानवेन्द्रकैः ॥ ५९ ॥ ब्रह्मविष्णुशिवानन्तधर्माद्यैर्वन्दितं मुदा ॥ भक्तप्रियं
भक्तनाथं भक्तानुग्रहकारकम् ॥ ६० ॥ रासेश्वरं सुरसिकं राधावक्षस्थलस्थितम् ॥ एवंरूपमरूपं तं मुने ध्यायन्ति वैष्णवाः ॥
॥ ६१ ॥ सततं ध्येयमस्माकं परमात्मानमीश्वरम् ॥ अक्षरं परमं ब्रह्म भगवन्तं सनातनम् ॥ ६२ ॥ स्वेच्छामयं निर्गुणं च
निरीहं प्रकृतेः परम् ॥ सर्वाधारं सर्वबीज सर्वज्ञं सर्वमेव च ॥ ६३ ॥ सर्वेश्वरं सर्वपूज्यं सर्वसिद्धिकरं प्रदम् ॥ स एव
भगवानादिर्गोलोके द्विभुजः स्वयम् ॥ ६४ ॥ गोपवेषश्च गोपालैः पार्षदैः परिवेष्टितः ॥ परिपूर्णतमः श्रीमान् श्रीकृष्णो राधिके
श्वरः ॥ ६५ ॥ सर्वान्तरात्मा सर्वत्र प्रत्यक्षः सर्वगः स्मृतः ॥ कृषिश्च सर्ववचनो नकारश्चात्मवाचकः ॥ सर्वात्मा च परं ब्रह्म तेन
कृष्णः प्रकीर्तितः ॥ ६६ ॥ कृषिश्च सर्ववचनो नकारश्चादिवाचकः ॥ सर्वादिपुरुषो व्यापी तेन कृष्णः प्रकीर्तितः ॥ ६७ ॥
स एवांशेन भगवान्वैकुण्ठे च चतुर्भुजः ॥ चतुर्भुजैः पार्षदैस्तैरावृतः कमलापतिः ॥ ६८ ॥ स एव कलया विष्णुः पाता च ज
गतां प्रभुः ॥ श्वेतद्वीपे सिन्धुकन्यापतिरेव चतुर्भुजः ॥ ६९ ॥ एतत्ते कथितं सर्वं परब्रह्मस्वरूपकम् ॥ अस्माकं चिन्तनीयं च सेव्यं

वन्दितमीप्सितम् ॥ ७० ॥ इत्युक्त्वा शङ्करस्तत्र विरराम च शौनक ॥ गन्धर्वराजस्तोत्रेण तुष्टुवे तं च नारदः ॥७१ ॥ मुनिस्तोत्रेण सन्तुष्टो भगवानादिरच्युतः ॥ ज्ञानं मृत्युञ्जयस्तस्मै प्रददौ वरमीप्सितम् ॥ ७२ ॥ मुनीन्द्रस्तं संप्रणम्य प्रहृष्टवदनेक्षणः ॥ तदाज्ञया पुण्यरूपं ययौ नारायणाश्रमम् ॥ ७३ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे ब्रह्मखण्डे सौतिशौनकसंवादे ब्रह्मस्वरूपवैकुण्ठादिवर्णनं नारदप्रस्थानं नामाष्टाविंशतितमोऽध्यायः ॥ २८ ॥ सौतिरुवाच ॥ ददर्शाश्रममाश्चर्य्यं देवर्षिर्नारदस्तथा ॥ ऋषिर्नारायणस्यैव बदरीवनसंयुतम् ॥ १ ॥ नानावृक्षफलाकीर्णं पुंस्कोकिलरुतश्रुतम् ॥ शरभेन्द्रैः केसरीन्द्रैर्व्याघ्रौघैः परिवेष्टितम् ॥ २ ॥ ऋषीन्द्रस्य प्रभावेण हिंसाभयविवर्जितम् ॥ महारण्यमगम्यं च स्वर्गादपि मनोहरम् ॥ ३ ॥ सिद्धेन्द्राणां मुनीन्द्राणामाश्रमाणां त्रिकोटिभिः ॥ आवृतं चन्दनारण्यैः पारिजातवनान्वितम् ॥ ४ ॥ ददर्श तमृषीन्द्रं च सभामध्ये मनोहरम् ॥ रत्नसिंहासनस्थं च वसन्तं योगिनां गुरुम् ॥ ५ ॥ जपन्तं परमं ब्रह्म कृष्णमात्मानमीश्वरम् ॥ प्रणनाम च तं दृष्ट्वा ब्रह्मपुत्रश्च शौनक ॥ ६ ॥ उत्थाय सहसाऽऽलिङ्ग्य युयुजे परमाशिषम् ॥ पप्रच्छ कुशलं स्नेहाच्चकारातिथिपूजनम् ॥७॥ रत्नसिंहासने रम्ये वासयामास नारदम् ॥ निवसन्नासने रम्ये वर्त्मश्रमविवर्जितः ॥ ८ ॥ उवाच तमृषिश्रेष्ठं भगवन्तं सनातनम् ॥ अधीत्य वेदान्सर्वांश्च पितुः स्थाने सुदुर्गमान् ॥९॥ ज्ञानं सम्प्राप्य योगीन्द्रान्मन्त्रं वै शङ्कराद्विभो ॥ मनो मे न हि तृप्नोति दुर्निवारं च चंचलम् ॥१०॥ दृष्टं मया त्वत्पदाब्जं मनसा प्रेरितेन च ॥ किंचिज्ज्ञानविशेषं च लब्धुमिच्छामि साम्प्रतम् ॥ ११ ॥ यत्र कृष्णगुणाख्यानं जन्ममृत्युजरापहम् ॥ १२ ॥ ब्रह्मविष्णुशिवाद्याश्च सुरेन्द्रश्च सुरा विभो ॥ कं चिन्तयन्ति मुनयो मनवश्च विचक्षणाः॥१३॥कस्मात्सृष्टिश्च भवति कुत्र वा संप्रलीयते॥ को वा सर्वेश्वरो विष्णुः सर्वकारणकारकः॥१४॥ तस्येश्वरस्य किं रूपं कर्म वा किं जगत्पते ॥ विचार्य्य मनसा सर्वं तद्भवान्वक्तुमर्हति॥१५॥नारदस्य वचः श्रुत्वा प्रहस्य भगवानृषिः॥कथां कथितुमारेभे पुण्यां भुवनपावनीम् ॥ १६ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे ब्रह्मखण्डे सौतिशौनकसंवादे नारायणं प्रति नारदप्रश्नो नामैकोनत्रिंशत्तमो

ऽध्यायः ॥ २९ ॥ श्रीनारायण उवाच ॥ लम्बोदरो हरिरुमापतिरीशशेषा ब्रह्मादयः सुरगणा मनवो मुनीन्द्राः ॥ वाणीशिवात्रिपथगाकमलादिकाश्च संचिन्तयेद्भगवतश्चरणारविन्दम् ॥ १ ॥ संसारसागरमतीव गभीरघोरं दावाग्निसर्पपरिवेष्टितचेष्टिताङ्गम् ॥ संलंघ्य गन्तुमभिवाञ्छति यो हि दास्यं संचिन्तयेद्भगवतश्चरणारविन्दम् ॥ २ ॥ गोवर्द्धनोद्धरणकीर्त्तिरतीव खिन्ना भूर्धारिता च दशनाग्रत एव चार्द्रा ॥ विश्वानि लोमविवरेषु बिभर्तुरादेः संचिन्तयेद्भगवतश्चरणारविन्दम् ॥ ३ ॥ वेदाङ्गवेदमुखनिःसृतकीर्त्तिरंशैर्वेदाङ्गवेदजनकस्य हरेर्विधातुः॥जन्मान्तकादिभयशोकविदीर्णदेहः संचिन्तयेद्भगवतश्चरणारविन्दम् ॥४॥ गोपाङ्गनावदनपङ्कजषट्पदस्य रासेश्वरस्य रसिकारमणस्य पुंसः॥वृन्दावने विहरतो व्रजवेषविष्णोः संचिन्तयेद्भगवतश्चरणारविन्दम्॥५॥ चक्षुर्निमेषपतितो जगतां विधाता तत्कर्म वत्स कथितुं भुवि कः समर्थः॥त्वं चापि नारद मुने परमादरेण संचिन्तनं कुरु हरेश्चरणारविन्दम् ॥६॥ यूयं वयं तस्य कलाकलांशाः कलाकलांशा मनवो मुनीन्द्राः ॥ कलाविशेषा भवपारमुख्या महान्विराड् यस्य कलाविशेषः ॥ ७ ॥ सहस्रशीर्षाशिरसः प्रदेशे बिभर्त्ति सिद्धार्थसमं च विश्वम् ॥ कूर्मे च शेषो मशको गजे यथा कूर्मश्च कृष्णस्य कलाकलांशः ॥ ८ ॥ गोलोकनाथस्य विभोर्यशोऽमलं श्रुतौ पुराणे नहि किंचन स्फुटम् ॥ न पाद्ममुख्याः कथितुं समर्थाः सर्वेश्वरं तं भज पाद्ममुख्यम् ॥ ९ ॥ विश्वेषु सर्वेषु च विश्वधाम्नः सन्त्येव शश्वद्विधिविष्णुरुद्राः ॥ तेषां च संख्याः श्रुतयश्च देवाः परं न जानन्ति तमीश्वरं भज ॥१०॥ करोति सृष्टिं स विधेर्विधाता विधाय नित्यां प्रकृतिं जगत्प्रसूम् ॥ ब्रह्मादयः प्राकृतिकाश्च सर्वे भक्तिप्रदां श्रीप्रकृतिं भजन्ति॥११॥ ब्रह्मस्वरूपा प्रकृतिर्न भिन्ना यया च सृष्टिं कुरुते सनातनः॥ श्रियश्च सर्वाः कलया जगत्सु माया च सर्वे च तया विमोहिताः॥१२॥ नारायणी सा परमा सनातनी शक्तिश्च पुंसः परमात्मनश्च ॥ आत्मेश्वरश्चापि यया च शक्तिमांस्तया विना स्रष्टुमशक्त एव ॥ १३ ॥ गत्वा विवाहं कुरु वत्स साम्प्रतं कर्तुं प्रयुक्तश्च पितुर्निदेशः॥ गुरोर्निदेशप्रतिपालको भवेः सर्वत्र पूज्यो विजयी च सन्ततम्॥१४॥स्वपत्नीं पूजयेद्यो हि वस्त्रालङ्कारचन्दनैः॥प्रकृतिस्तस्य सन्तुष्टा यथा कृष्णो द्विजार्च्चने॥१५॥सा च योषित्स्वरूपा च प्रतिविश्वेषु माय

या ॥ योषितामपमानेन पराभूता च सा भवेत् ॥ १६ ॥ दिव्या स्त्री पूजिता येन पतिपुत्रवती सती ॥ प्रकृतिः पूजिता तेन सर्वमङ्ग लदायिनी॥ १७॥मूलप्रकृतिरेका सा पूर्णब्रह्मस्वरूपिणी ॥ सृष्टौ पञ्चविधा सा च विष्णुमाया सनातनी ॥ १८ ॥ प्राणाधिष्ठातृदेवी या कृष्णस्य परमात्मनः ॥ सर्वासां प्रेयसी कान्ता सा राधा परिकीर्तिता ॥ १९ ॥ नारायणप्रिया लक्ष्मीः सर्वसम्पत्स्वरूपिणी ॥ रागाधिष्ठातृदेवी[१] या सा च पूज्या सरस्वती ॥ २० ॥ सावित्री वेदमाता च पूज्यरूपा विधेः प्रिया ॥ शङ्करस्य प्रिया दुर्गा यस्याः पुत्रो गणेश्वरः ॥ २१ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे ब्रह्मखण्डे सौतिशौनकसंवादे भगवत्स्तुतितत्स्वरूपवर्णनं नाम त्रिंशत्तमोऽध्यायः ॥ ३० ॥ ॥

इति श्रीब्रह्मवैवर्त्ते महापुराणे प्रथमं ब्रह्मखण्डं सम्पूर्णम् ॥

---

[१] वागधिष्ठातृ इति पाठः ।

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजेन क्षेमराजेन श्रेष्ठिना स्वकीये
“ श्रीवेङ्कटेश्वर ”–स्टीम्–यन्त्रालयेऽङ्कयित्वा प्रकाशितम् ।
संवत् १९८८, शकाब्दाः १८५३.

॥ अथ ब्रह्मवैवर्ते महापुराणे द्वितीयः प्रकृतिखण्डः प्रारभ्यते ॥

प्रकृतिखंड २.


ब्रह्मदेव.
नारद
ऋषि
चंद्र
दक्ष
दक्षकन्या
राधा.
कृष्ण.
वि.
ब्र.
शि.
शिव
पा.
नारद
नारद
नारायण
नर

श्रीगणेशाय नमः ॥ श्रीवेङ्कटेश्वराय नमः ॥ ॥ श्रीमहासरस्वत्यै नमः ॥ ॥ श्रीलक्ष्मीनरसिंहाभ्यां नमः ॥ ॥ अथ प्रकृतिखण्डप्रारंभः ॥ ॥ नारद उवाच ॥ ॥ गणेशजननी दुर्गा राधा लक्ष्मीः सरस्वती ॥ सावित्री वै सृष्टिविधौ प्रकृतिः पञ्चधा स्मृता ॥ १ ॥ आविर्बभूव सा केन का वा सा ज्ञानिनां वरा ॥ किं वा तल्लक्षणं ब्रूहि सा भवत्पञ्चधा कथम् ॥ २ ॥ सर्वासां चरितं पूजाविधानं कथमीप्सितम् ॥ अवतारं कुत्र कस्यास्तन्मां व्याख्यातुमर्हसि ॥३॥ नारायण उवाच ॥ प्रकृतेर्लक्षणं वत्स को वा वक्तुं क्षमो भवेत् ॥ किंचित्तथापि वक्ष्यामि यच्छ्रुतं धर्मवक्त्रतः ॥ ४ ॥ प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः ॥ सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्तिता ॥ ५ ॥ गुणे प्रकृष्टसत्त्वे च प्रशब्दो वर्त्तते श्रुतौ ॥ मध्यमे कृश्च रजसि तिशब्दस्तमसि स्मृतः ॥ ६ ॥ त्रिगुणात्मस्वरूपा या सर्वशक्तिसमन्विता ॥ प्रधाना सृष्टिकरणे प्रकृतिस्तेन कथ्यते ॥ ७ ॥ प्रथमे वर्त्तते प्रश्च कृतिस्स्यात्सृष्टिवाचकः ॥ सृष्टेराद्या च या देवी प्रकृतिः सा प्रकीर्तिता ॥ ८ ॥ योगेनात्मा सृष्टिविधौ द्विधारूपो बभूव सः ॥ पुमांश्च दक्षिणार्द्धाङ्गो वामाङ्गः प्रकृतिः स्मृतः ॥ ९ ॥ सा च ब्रह्मस्वरूपा स्यान्माया नित्या सनातनी ॥ यथाऽऽत्मा च यथाशक्तिर्यथाऽग्नौ दाहिका स्मृता ॥ १० ॥ अत एव हि योगीन्द्रः स्त्रीपुंभेदं न मन्यते ॥ सर्वं ब्रह्ममयं ब्रह्मञ्छश्वत्पश्यति नारद ॥ ११ ॥ स्वेच्छामयस्येच्छया च श्रीकृष्णस्य सिसृक्षया ॥ साऽऽविर्बभूव सहसा मूलप्रकृतिरीश्वरी ॥ १२ ॥ तदाज्ञया पञ्चविधा सृष्टिकर्मणि भेदतः ॥ अथ भक्तानुरोधाद्वा भक्तानुग्रहविग्रहा ॥ १३ ॥ गणेशमाता दुर्गा या शिवरूपा शिवप्रिया ॥ नारायणी विष्णुमाया पूर्णब्रह्मस्वरूपिणी ॥ १४ ॥ ब्रह्मादिदेवैर्मुनिभिर्मनुभिः पूजिता सदा ॥ सर्वाधिष्ठातृदेवी सा ब्रह्मरूपा सनातनी ॥ १५ ॥ यशोमङ्गलधर्मश्रीसत्यपुण्यप्रदायिनी ॥ मोक्षहर्षप्रदात्रीयं शोकदुःखार्तिनाशिनी ॥ १६ ॥ शरणागतदीनार्तपरित्राणपरायणा ॥ तेजःस्वरूपा परमा तदधिष्ठातृदेवता ॥ १७ ॥ सर्वशक्तिस्वरूपा च शक्तिरीशस्य सन्ततम् ॥ सिद्धेश्वरी सिद्धरूपा सिद्धिदा सिद्धिदेश्वरी ॥१८॥ बुद्धिर्निद्रा क्षुत्पिपासा च्छाया तन्द्रा दया स्मृतिः ॥ जातिः क्षान्तिश्च शान्तिश्च कांतिर्भ्रान्तिश्च चेतना ॥ १९ ॥ तुष्टिः पुष्टिस्तथा लक्ष्मीर्वृत्तिर्माता

तथैव च ॥ सर्वशक्तिस्वरूपा सा कृष्णस्य परमात्मनः ॥ २० ॥ उक्तः श्रुतौ श्रुतगुणश्चातिस्वल्पो यथागमम् ॥ गुणोऽस्त्यनन्तोऽ
नन्ताया अपरां च निशामय ॥ २१ ॥ शुद्धसत्त्वस्वरूपा या पद्मा च परमात्मनः ॥ सर्वसम्पत्स्वरूपा या तदधिष्ठातृदेवता॥२२॥
कान्ता दान्ताऽतिशान्ता च सुशीला सर्वमङ्गला ॥ लोभान्मोहात्कामरोषान्मदाहङ्कारतस्तथा ॥ २३ ॥ त्यक्ताऽनुरक्ता पत्युश्च
सर्वाद्या च पतिव्रता ॥ प्राणतुल्या भगवतः प्रेमपात्री प्रियंवदा ॥ २४ ॥ सर्वसस्यात्मिका सर्वजीवनोपायरूपिणी ॥ महालक्ष्मीश्च
वैकुण्ठे पतिसेवापरायणा ॥ ॥ २५ ॥ स्वर्गे च स्वर्गलक्ष्मीश्च राजलक्ष्मीश्च राजसु ॥ गृहे च गृहलक्ष्मीश्च मर्त्यानां गृहिणां तथा॥
॥ २६ ॥ सर्वेषु प्राणिद्रव्येषु शोभारूपा मनोहरा ॥ प्रीतिरूपा पुण्यवतां प्रभारूपा नृपेषु च ॥ २७ ॥ वाणिज्यरूपा वणिजां
पापिनां कलहङ्करी ॥ दयामयी भक्तमाता भक्तनुग्रहकारिका ॥ २८ ॥ चपले चपला भक्तसम्पदो रक्षणाय च ॥ जगज्जीवन्मृतं
सर्वं यया देव्या विना मुने ॥ २९ ॥ शक्तिर्द्वितीया कथिता वेदोक्ता सर्वसम्मता ॥ सर्वपूज्या सर्ववन्द्या चान्यां मत्तो निशामय ॥
॥ ३० ॥ वाग्बुद्धिविद्याज्ञानाधिदेवता परमात्मनः ॥ सर्वविद्यास्वरूपा या सा च देवी सरस्वती ॥ ३१ ॥ सुबुद्धिः कवितामेधाप्र
तिभास्मृतिदा सताम् ॥ नानाप्रकारसिद्धान्तभेदार्थकल्पनाप्रदा ॥ ३२ ॥ व्याख्याबोधस्वरूपा च [1]सर्वसंदेहभञ्जिनी ॥ विचारका
रिणी ग्रन्थकारिणी शक्तिरूपिणी ॥ ३३ ॥ सर्वसङ्गीतसन्धानतालकारणरूपिणी ॥ विषयज्ञानवाग्रूपा प्रतिविश्वं च जीविनाम् ॥
॥३४॥ यया विना च विश्वौघो मूको मृतसमः सदा ॥ व्याख्यामुद्राकरा शान्ता वीणापुस्तकधारिणी ॥३५॥ शुद्धसत्त्वस्वरूपा या
सुशीला श्रीहरिप्रिया ॥ हिमचन्दनकुन्देन्दुकुमुदाम्भोजसन्निभा॥३६॥जपन्ती परमात्मानं श्रीकृष्णं रत्नमालया॥तपस्स्वरूपा तपसां
फलदात्री तपस्विनी॥३७॥सिद्धिविद्यास्वरूपा च सर्वसिद्धिप्रदा सदा॥३८॥यथागमं यथाकिञ्चिदपरां संनिबोध मे ॥ माता चतुर्णां
वेदानां वेदाङ्गानां च छन्दसाम्॥३९॥सन्ध्यावन्दनमन्त्राणां तन्त्राणां च विचक्षणा॥द्विजादिजातिरूपा च जपरूपा तपस्विनी॥४०॥ब्राह्म

---

[1] प्रभेति पाठः ।

ण्यतेजोरूपा च सर्वसंस्कारकारिणी ॥ पवित्ररूपा सावित्री गायत्री ब्रह्मणः प्रिया ॥ ४१ ॥ तीर्थानि यस्याः संस्पर्शं दर्शं वाञ्छन्ति शुद्धये ॥ शुद्धस्फटिकसंकाशा शुद्धसत्त्वस्वरूपिणी ॥ ४२ ॥ परमानन्दरूपा च परमा च सनातनी ॥ परब्रह्मस्वरूपा च निर्वाणपददायिनी ॥ ४३ ॥ ब्रह्मतेजोमयी शक्तिस्तदधिष्ठातृदेवता ॥ यत्पादरजसा पूतं जगत्सर्वं च नारद ॥ ४४ ॥ देवी चतुर्थी कथिता पञ्चमीं वर्णयामि ते ॥ प्रेमप्राणाधिदेवी या पञ्चप्राणस्वरूपिणी ॥ ४५ ॥ प्राणाधिकप्रियतमा सर्वाद्या सुन्दरी वरा ॥ सर्वसौभाग्ययुक्ता च मानिनी गौरवान्विता ॥ ४६ ॥ वामार्द्धाङ्गस्वरूपा च सुगुणैस्तेजसा समा ॥ परावरा सर्वमाता परमाद्या सनातनी ॥४७॥ परमानन्दरूपा च धन्या मान्या च पूजिता ॥ रासक्रीडाधिदेवी च कृष्णस्य परमात्मनः ॥ ४८ ॥ रासमण्डलसंभूता रासमण्डलमण्डिता ॥ रासेश्वरी सुरसिका रासावासनिवासिनी ॥ ४९ ॥ गोलोकवासिनी देवी गोपीवेषविधायिका ॥ परमाह्लादरूपा च सन्तोषामर्षरूपिणी ॥ ५० ॥ निर्गुणा च निराकारा निर्लिप्ताऽऽत्मस्वरूपिणी ॥ निरीहा निरहङ्कारा भक्तानुग्रहविग्रहा ॥ ५१ ॥ वेदानुसारध्यानेन विज्ञेया सा विचक्षणैः ॥ दृष्टिर्दृष्टा सहस्रेषु सुरेन्द्रैर्मुनिपुङ्गवैः ॥ ५२ ॥ वह्निशुद्धांशुकाधाना रत्नालङ्कारभूषिता॥ कोटिचन्द्रप्रभाजुष्टश्रीयुक्ता भक्तविग्रहा ॥ ५३ ॥ श्रीकृष्णभक्तदास्यैकदायिनी सर्वसम्पदाम् ॥ अवतारे च वाराहे वृषभानुसुता च या ॥ ५४ ॥ यत्पादपद्मसंस्पर्शपवित्रा च वसुन्धरा ॥ ब्रह्मादिभिरदृष्टा या सर्वदृष्टा च भारते ॥ ५५ ॥ स्त्रीरत्नसारसंभूता कृष्णवक्षःस्थलस्थिता ॥ तथा घने नवघने लोला सौदामिनी मुने ॥ ५६ ॥ षष्टिवर्षसहस्राणि प्रततं ब्रह्मणा पुरा ॥ यत्पादपद्मनखरदृष्टये चात्मशुद्धये ॥ ५७ ॥ स्वप्नेऽपि नैव दृष्टः स्यात्प्रत्यक्षेऽपि च का कथा ॥ तेनैव तपसा दृष्टा भूरि वृन्दावने वने ॥ ५८ ॥ कथिता पञ्चमी देवी सा राधा परिकीर्त्तिता ॥ अंशरूपा कलारूपा कलांशांशसमुद्भवा ॥ ५९ ॥ प्रकृतेः प्रतिविश्वं च रूपं स्यात्सर्वयोषितः॥ परिपूर्णतमाः पञ्चविधा देव्यः प्रकीर्त्तिताः ॥ ६० ॥ या याः प्रधानांशरूपा वर्णयामि निशामय ॥ प्रधानांशस्वरूपा च गङ्गा भुवनपावनी ॥ ६१ ॥ विष्णुपादाब्जसंभूता द्रवरूपा सनातनी ॥ पापिपापेध्मदाहाय ज्वलदिन्धनरूपिणी ॥ ६२ ॥ दर्शनस्पर्शनस्नान

पानैर्निर्वाणदायिनी ॥ गोलोकस्थानगमनसुसोपानस्वरूपिणी ॥ ६३ ॥ पवित्ररूपा तीर्थानां सरितां च परावरा ॥ शम्भुमौलिजटामेरुमुक्तापंक्तिस्वरूपिणी ॥ ६४ ॥ तपस्सम्पादिनी सद्यो भारते च तपस्विनाम् ॥ शङ्खपद्मक्षीरनिभा शुद्धसत्त्वस्वरूपिणी ॥ ६५ ॥ निर्मला निरहङ्कारा साध्वी नारायणप्रिया ॥ प्रधानांशस्वरूपा च तुलसी विष्णुकामिनी ॥ ६६ ॥ विष्णुभूषणरूपा च विष्णुपादस्थिता सती ॥ तपस्सङ्कल्पपूजादिसद्यस्सम्पादिनी मुने ॥ ६७ ॥ सारभूता च पुष्पाणां पवित्रा पुण्यदा सदा ॥ दर्शनस्पर्शनाभ्यां च सद्यो निर्वाणदायिनी ॥ ६८ ॥ कलौ कलुषशुष्केध्मदाहनायाग्निरूपिणी ॥ यत्पादपद्मसंस्पर्शात्सद्यः पूता वसुन्धरा ॥ ६९ ॥ यत्स्पर्शदर्शं वाञ्छन्ति तीर्थानामात्मशुद्धये ॥ यया विना च विश्वेषु सर्वं कर्मास्ति निष्फलम् ॥ ७० ॥ मोक्षदा या मुमुक्षूणां कामिनां सर्वकामदा ॥ कल्पवृक्षस्वरूपा च भारते वृक्षरूपिणी ॥ ७१ ॥ त्राणाय भारतानां च पूजानां परदेवता ॥ प्रधानांशस्वरूपा च मनसा कश्यपात्मजा ॥ ७२ ॥ शङ्करप्रियशिष्या च महाज्ञानविशारदा ॥ नागेश्वरस्यानन्तस्य भगिनी नागपूजिता ॥ ७३ ॥ नागेश्वरी नागमाता सुन्दरी नागवाहिनी ॥ नागेन्द्रगणयुक्ता सा नागभूषणभूषिता ॥ ७४ ॥ नागेन्द्रवन्दिता सिद्धयोगिनी नागवासिनी ॥ विष्णुभक्ता विष्णुरूपा विष्णुपूजापरायणा ॥ ~~७५~~ ॥ तपःस्वरूपा तपसां फलदात्री तपस्विनी ॥ दिव्यं त्रिलक्षवर्षं च तपस्ततं यया हरेः ॥ ७६ ॥ तपस्विनीषु पूज्या च तपस्विषु च भारते ॥ सर्वमन्त्राधिदेवी च ज्वलन्ती ब्रह्मतेजसा ॥ ७७ ॥ ब्रह्मस्वरूपा परमा ब्रह्मभावनतत्परा ॥ जरत्कारुमुनेः पत्नी कृष्णशम्भुपतिव्रता ॥ ७८ ॥ आस्तीकस्य मुनेर्माता प्रवरस्य तपस्विनाम् ॥ प्रधानांशस्वरूपा या देवसेना च नारद ॥ ७९ ॥ मातृका सा पूज्यतमा सा च षष्ठी प्रकीर्त्तिता ॥ शिशूनां प्रतिविश्वं तु प्रतिपालनकारिणी ॥ ८० ॥ तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनी ॥ षष्ठांशरूपा प्रकृतेस्तेन षष्ठी प्रकीर्तिता ॥ ८१ ॥ पुत्रपौत्रप्रदात्री च धात्री च जगतां सदा ॥ सुन्दरी युवती रम्या सततं भर्तुरन्तिके ॥ ८२ ॥ स्थाने शिशूनां परमा वृद्धरूपा च योगिनी ॥ पूजा

---

१ शायिनी इति पाठः।

द्वादशमासेषु यस्याः षष्ठ्यास्तु सन्ततम् ॥ ८३ ॥ पूजा च सूतिकागारे परषष्ठदिने शिशोः ॥ एकविंशतिमे चैव पूजा कल्याणहेतुकी ॥ ८४ ॥ शश्वन्नियमिता चैषा नित्या काम्याऽप्यतः परा ॥ मातृरूपा दयारूपा शश्वद्रक्षणकारिणी ॥ ८५ ॥ जले स्थले चान्तरिक्षे शिशूनां स्वप्नगोचरा ॥ प्रधानांशस्वरूपा या देवी मङ्गलचण्डिका ॥ ८६ ॥ प्रकृतेर्मुखसंभूता सर्वमङ्गलदा सदा ॥ सृष्टौ मङ्गलरूपा च संहारे कोपरूपिणी ॥ ८७ ॥ तेन मङ्गलचण्डी सा पण्डितैः परिकीर्त्तिता ॥ प्रतिमङ्गलवारेषु प्रतिविश्वेषु पूजिता ॥ ८८ ॥ पञ्चोपचारैर्भक्त्या च योषिद्भिः परिपूजिता ॥ पुत्रपौत्रधनैश्वर्य्ययशोमङ्गलदायिनी ॥ ८९ ॥ शोकसन्तापपापार्त्तिदुःखदारिद्र्यनाशिनी॥परितुष्टा सर्ववाञ्छाप्रदात्री सर्वयोषिताम् ॥९०॥ रुष्टा क्षणेन संहर्त्तुं शक्ता विश्वं महेश्वरी ॥प्रधानांशस्वरूपा च काली कमललोचना ॥ ९१ ॥ दुर्गाललाटसंभूता रणे शुम्भनिशुम्भयोः ॥ दुर्गार्द्धांशस्वरूपा स्याद्गुणैस्सा तेजसा समा ॥ ९२ ॥ कोटिसूर्य्यप्रभाजुष्टदिव्यसुन्दरविग्रहा ॥ प्रधाना सर्वशक्तीनां वरा बलवती परा ॥ ९३ ॥ सर्वसिद्धिप्रदा देवी परमा सिद्धियोगिनी ॥ कृष्णभक्ता कृष्णतुल्या तेजसा विक्रमैर्गुणैः ॥ कृष्णभावनया शश्वत्कृष्णवर्णा सनातनी ॥ ९४ ॥ ब्रह्माण्डं सकलं हर्त्तुं शक्ता निःश्वासमात्रतः ॥ रणं दैत्यैः समं तस्याः क्रीडया लोकरक्षया ॥ ९५ ॥ धर्मार्थकाममोक्षांश्च दातुं शक्ता सुपूजिता ॥ ब्रह्मादिभिः स्तूयमाना मुनिभिर्मनुभिर्नरैः ॥ ९६ ॥ प्रधानांशस्वरूपा च प्रकृतिश्च वसुन्धरा ॥ आधारभूता सर्वेषां सर्वसस्यप्रसूतिका ॥ ९७ ॥ रत्नाकारा रत्नगर्भा सर्वरत्नाकराश्रया ॥ प्रजादिभिः प्रजेशैश्च पूजिता वन्दिता सदा ॥ ९८ ॥ सर्वोपजीव्यरूपा च सर्वसम्पद्विधायिनी ॥ यया विना जगत्सर्वं निराधारं चराचरम् ॥९९॥ प्रकृतेश्च कला या यास्ता निबोध मुनीश्वर ॥ यस्य यस्य च याः पत्न्यस्ताः सर्वा वर्णयामि ते ॥ १०० ॥ स्वाहादेवी वह्निपत्नी त्रिषु लोकेषु पूजिता ॥ यया विना हविर्दत्तं न ग्रहीतुं सुराः क्षमाः ॥ १०१ ॥ दक्षिणा यज्ञपत्नी च दीक्षा सर्वत्र पूजिता ॥ यया विना च विश्वेषु सर्वं कर्म च निष्फलम् ॥१०२॥ स्वधा पितृणां पत्नी च मुनिभिर्मनुभिर्नरैः ॥ पूजिता पैतृकं दानं निष्फलं च यया विना ॥ १०३ ॥स्वस्तिदेवी वायुपत्नी प्रति

विश्वेषु पूजिता ॥ आदानं च प्रदानं च निष्फलं च यया विना ॥ १०४ ॥ पुष्टिर्गणपतेः पत्नी पूजिता जगतीतले ॥ यया विना परिक्षीणाः पुमांसो योषितोऽपि च ॥ १०५ ॥ अनन्तपत्नी तुष्टिश्च पूजिता वन्दिता सदा ॥ यया विना न सन्तुष्टाः सर्वे लोकाश्च सर्वतः ॥ १०६ ॥ ईशानपत्नी सम्पत्तिः पूजिता च सुरैर्नरैः ॥ सर्वे लोका दरिद्राश्च विश्वेषु च यया विना ॥ १०७ ॥ धृतिः कपिलपत्नी च सर्वैः सर्वत्र पूजिता ॥ सर्वे लोका अधीरास्स्युर्जगत्सु च यया विना ॥ १०८ ॥ यमपत्नी क्षमा साध्वी सुशीला सर्वपूजिता ॥ समुन्मत्ताश्च रुद्राश्च सर्वे लोका यया विना ॥ १०९ ॥ क्रीडाधिष्ठातृदेवी सा कामपत्नी रतिः सती ॥ केलिकौतुकहीनाश्च सर्वे लोका यया विना ॥ ११० ॥ सत्यपत्नी सती मुक्तिः पूजिता जगतां प्रिया ॥ यया विना भवेल्लोको बन्धुतारहितः सदा ॥ १११ ॥ मोहपत्नी दया साध्वी पूजिता च जगत्प्रिया ॥ सर्वे लोकाश्च सर्वत्र निष्ठुराश्च यया विना ॥ ११२ ॥ पुण्यपत्नी प्रतिष्ठा सा पुण्यरूपा च पूजिता ॥ यया विना जगत्सर्वं जीवन्मृतसमं मुने ॥ ११३ ॥ सुकर्मपत्नी कीर्त्तिश्च धन्या मान्या च पूजिता ॥ यया विना जगत्सर्वं यशोहीनं मृतं यथा ॥ ११४ ॥ क्रिया उद्योगपत्नी च पूजिता सर्वसङ्गता ॥ यया विना जगत्सर्वमुच्छिन्नमिव नारद ॥ ११५ ॥ अधर्मपत्नी मिथ्या सा सर्वधूर्तैश्च पूजिता ॥ यया विना जगत्सर्वमुच्छिन्नं विधिनिर्मितम् ॥ ११६ ॥ सत्ये अदर्शना या च त्रेतायां सूक्ष्मरूपिणी ॥ अर्द्धावयवरूपा च द्वापरे संहृता ह्रिया ॥ ११७ ॥ कलौ महाप्रगल्भा च सर्वत्र व्यातिकारणात् ॥ कपटेन सह भ्रात्रा भ्रमत्येव गृहे गृहे ॥ ११८ ॥ शान्तिर्लज्जा च भार्य्ये द्वे सुशीलस्य च पूजिते ॥ याभ्यां विना जगत्सर्वमुन्मत्तमिव नारद ॥ ११९ ॥ ज्ञानस्य तिस्रो भार्य्याश्च बुद्धिर्मेधा स्मृतिस्तथा ॥ याभिर्विना जगत्सर्वं मूढं मृतसमं सदा ॥ १२० ॥ मूर्त्तिश्च धर्मपत्नी सा कान्तिरूपा मनोहरा ॥ परमात्मा च विश्वौघा निराधारा यया विना ॥ १२१ ॥ सर्वत्र शोभारूपा च लक्ष्मी मूर्तिमती सती ॥ श्रीरूपा मूर्तिरूपा च मान्या धन्या च पूजिता ॥ १२२ ॥ कालाग्निरुद्रपत्नी च निद्रा या सिद्धयोगिनाम् ॥ सर्वलोकाः

---

१ बलादिति पाठः ।

समाच्छन्ना मायायोगेन रात्रिषु ॥ १२३ ॥ कालस्य तिस्रो भार्य्याश्च सन्ध्या रात्रिर्दिनानि च ॥ याभिर्विना विधात्रा च संख्यां कर्तुं न शक्यते ॥ १२४ ॥ क्षुत्पिपासे लोभभार्य्ये धन्ये मान्ये च पूजिते ॥ याभ्यां व्याप्तं जगत्क्षोभयुक्तं चिन्तितमेव च ॥ ॥ १२५ ॥ प्रभा च दाहिका चैव द्वे भार्य्ये तेजसस्तथा ॥ याभ्यां विना जगत्स्रष्टुं विधाता च न हीश्वरः ॥ १२६ ॥ कालकन्ये मृत्युजरे प्रज्वरस्य प्रिये प्रिये ॥ याभ्यां जगत्समुच्छिन्नं विधात्रा निर्मिते विधौ ॥ १२७ ॥ निद्राकन्या च तन्द्रा सा प्रीतिरन्या सुखप्रिये ॥ याभ्यां व्याप्तं जगत्सर्वं विधिपुत्र विधेर्विधौ ॥ १२८ ॥ वैराग्यस्य च द्वे भार्य्ये श्रद्धा भक्तिश्च पूजिते ॥ याभ्यां शश्वज्जगत्सर्वं जीवन्मुक्तमिदं मुने ॥ १२९ ॥ अदितिर्देवमाता च सुरभिश्च गवां प्रसूः ॥ दितिश्च दैत्यजननी कद्रूश्च विनता दनुः ॥ १३० ॥ उपयुक्ताः सृष्टिविधावेताश्च प्रकृतेः कलाः ॥ कलाश्चान्याः सन्ति बह्व्यस्तासु काश्चिन्निबोध मे ॥ ॥ १३१ ॥ रोहिणी चन्द्रपत्नी च संज्ञा सूर्यस्य कामिनी ॥ शतरूपा मनोर्भार्या शचीन्द्रस्य च गेहिनी ॥ १३२ ॥ तारा बृहस्पतेर्भार्य्या वसिष्ठस्याप्यरुन्धती ॥ अहल्या गौतमस्त्री स्यादनसूयाऽत्रिकामिनी ॥ १३३ ॥ देवहूतिः कर्दमस्य प्रसूतिर्दक्षकामिनी ॥ पितॄणां मानसी कन्या मेनका साऽम्बिकाप्रसूः ॥ १३४ ॥ लोपामुद्रा तथा हूतिः कुबेरस्य तु कामिनी ॥ वरुणानी यमस्त्री च बलेर्विन्ध्यावलीति च ॥ १३५ ॥ कुन्ती च दमयन्ती च यशोदा देवकी सती ॥ गान्धारी द्रौपदी सव्या सावित्री सत्यवत्प्रिया ॥ ॥ १३६ ॥ वृषभानुप्रिया साध्वी राधामाता कलावती ॥ मन्दोदरी च कौसल्या सुभद्रा कैकयी तथा ॥ १३७ ॥ रेवती सत्यभामा च कालिन्दी लक्ष्मणा तथा ॥ मित्रविन्दा नाग्नजिती तथा जाम्बवती परा ॥ १३८ ॥ लक्ष्मणा रुक्मिणी सीता स्वयं लक्ष्मीः प्रकीर्तिता ॥ कला योजनगन्धा च व्यासमाता महासती ॥ १३९ ॥ बाणपुत्री तथोषा च चित्रलेखा च तत्सखी ॥ प्रभावती भानुमती तथा मायावती सती ॥१४०॥ रेणुका च भृगोर्माता हलिमाता च रोहिणी॥ एकानंशा च दुर्गा सा श्रीकृष्णभगिनी सती ॥ १४१ ॥ बह्व्यः सन्ति कलाश्चैवं प्रकृतेरेव भारते ॥ या याश्च ग्रामदेव्यस्ताः सर्वाश्च प्रकृतेः कलाः ॥ १४२ ॥ कलांशांशस

मुद्भूताः प्रतिविश्वेषु योषितः ॥ योषितामपमानेन प्रकृतेश्च पराभवः ॥ १४३ ॥ ब्राह्मणी पूजिता येन पतिपुत्रवती सती ॥ प्रकृतिः
पूजिता तेन वस्त्रालङ्कारचन्दनैः॥१४४॥कुमारी चाष्टवर्षीया वस्त्रालङ्कारचन्दनैः॥ पूजिता येन विप्रस्य प्रकृतिस्तेन पूजिता॥१४५॥
सर्वाः प्रकृतिसम्भूता उत्तमाधममध्यमाः॥सत्त्वांशाश्चोत्तमा ज्ञेयाः सुशीलाश्च पतिव्रताः ॥१४६॥ मध्यमा रजसश्चांशास्ताश्च भोग्याः
प्रकीर्त्तिताः ॥ सुखसम्भोगवत्यश्च स्वकार्य्ये तत्पराः सदा ॥ १४७ ॥ अधमास्तमसश्चांशा अज्ञातकुलसम्भवाः ॥ दुर्मुखाः कुलटा
धूर्त्ताः स्वतन्त्राः कलहप्रियाः॥१४८॥पृथिव्यां कुलटा याश्च स्वर्गे चाप्सरसां गणाः ॥ प्रकृतेस्तमसश्चांशाः पुंश्चल्यः परिकीर्त्तिताः
॥ १४९ ॥ एवं निगदितं सर्वं प्रकृतेर्भेदपञ्चकम् ॥ ताः सर्वाः पूजिताः पृथ्व्यां पुण्यक्षेत्रे च भारते ॥ १५० ॥ पूजिता सुरथेनादौ
दुर्गा दुर्गार्तिनाशिनी ॥ द्वितीया रामचन्द्रेण रावणस्य वधार्थिना ॥ १५१ ॥ तत्पश्चाज्जगतां माता त्रिषु लोकेषु पूजिता ॥
जाताऽऽदौ दक्षपत्न्यां च निहन्तुं दैत्यदानवान् ॥ १५२ ॥ ततो देहं परित्यज्य यज्ञे भर्तुश्च निन्दया ॥ जज्ञे हिमवतः पत्न्यां
लेभे पशुपतिं पतिम् ॥१५३॥ गणेशश्च स्वयं कृष्णः स्कन्दो विष्णुकलोद्भवः ॥ बभूवतुस्तौ तनयौ पश्चात्तस्याश्च नारद ॥१५४॥
लक्ष्मीर्मङ्गलभूपेन प्रथमे परिपूजिता ॥ त्रिषु लोकेषु तत्पश्चाद्देवतामुनिमानवैः ॥ १५५ ॥ सावित्री प्रथमं चापि भक्त्या वै परि
पूजिता ॥ तत्पश्चात्त्रिषु लोकेषु देवतामुनिमानवैः ॥ १५६ ॥ आदौ सरस्वती देवी ब्रह्मणा परिपूजिता ॥ तत्पश्चात्त्रिषु लोकेषु
देवतामुनिमानवैः ॥ १५७ ॥ प्रथमं पूजिता राधा गोलोके रासमण्डले ॥ पौर्णमास्यां कार्त्तिकस्य कृष्णेन परमात्मना ॥ १५८ ॥
गोपिकाभिश्च गोपैश्च बालिकाभिश्च बालकैः ॥ गवां गणैः सुरगणैस्तत्पश्चान्मायया हरेः ॥ १५९ ॥ तदा ब्रह्मादिभिर्देवै
र्मुनिभिर्मनुभिस्तथा ॥ पुष्पधूपादिभिर्भक्त्या पूजिता वन्दिता सदा॥१६०॥पृथिव्यां प्रथमे देवी सुयज्ञेन च पूजिता॥शङ्करेणोपदि
ष्टेन पुण्यक्षेत्रे च भारते ॥ १६१ ॥ त्रिषु लोकेषु तत्पश्चादाज्ञया परमात्मनः ॥ पुष्पधूपादिभिर्भक्त्या पूजिता मुनिभिः सुरैः ॥
॥ १६२ ॥ कला या याः सुसंभूताः पूजितास्ताश्च भारते ॥ पूजिता ग्रामदेव्यश्च ग्रामे च नगरे मुने ॥ १६३ ॥ एवं ते कथितं

सर्वं प्रकृतेश्चरितं शुभम् ॥ यथागमं लक्षणञ्च किं भूयः श्रोतुमिच्छसि ॥ १६४ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृति
खण्डे नारायणनारदसंवादे प्रकृतिस्वरूपतद्भेदवर्णनं नाम प्रथमोऽध्यायः ॥ १ ॥ नारद उवाच ॥ समासेन श्रुतं सर्वं देवीनां
चरितं विभो ॥ विबोधनार्थं बोधस्य व्यासतो वक्तुमर्हसि ॥१॥ सृष्टेराद्या सृष्टिविधौ कथमाविर्बभूव ह ॥ कथं वा पञ्चधा भूता वद
वेदविदां वर ॥ २ ॥ भूता या याश्च कलया तया त्रिगुणया भवे ॥ व्यासेन तासां चरितं श्रोतुमिच्छामि साम्प्रतम् ॥ ३ ॥
तासां जन्मानुकथनं ध्यानं पूजाविधिं परम् ॥ स्तोत्रं कवचमैश्वर्य्यं शौर्यं वर्णय मङ्गलम् ॥ ४ ॥ श्रीनारायण उवाच ॥ नित्यात्मा च
नभो नित्यं कालो नित्यो दिशो यथा ॥ विश्वेषां गोकुलं नित्यं नित्यो गोलोक एव च ॥ ५ ॥ तदेकदेशो वैकुण्ठो लम्बभागः
स नित्यकः ॥ तथैव प्रकृतिर्नित्या ब्रह्मलीना सनातनी ॥ ६ ॥ यथाऽग्नौ दाहिका चन्द्रे पद्मे शोभा प्रभा रवौ ॥ शश्वद्युक्ता न
भिन्ना सा तथा प्रकृतिरात्मनि ॥ ७ ॥ विना स्वर्णं स्वर्णकारः कुण्डलं कर्तुमक्षमः ॥ विना मृदा कुलालो हि घटं कर्तुं नहीश्वरः ॥
॥ ८ ॥ नहि क्षमस्तथा ब्रह्मा सृष्टिं स्रष्टुं तया विना ॥ सर्वशक्तिस्वरूपा सा तया स्याच्छक्तिमान्सदा ॥ ९ ॥ ऐश्वर्य्यवचनः शक्र
च तिः पराक्रमवाचकः ॥ तत्स्वरूपा तयोर्दात्री या सा शक्तिः प्रकीर्तिता ॥ १० ॥ समृद्धिबुद्धिसम्पत्तियशसां वचनो भगः ॥ तेन
शक्तिर्भगवती भगरूपा च सा सदा ॥ ११ ॥ तया युक्तः सदाऽऽत्मा च भगवांस्तेन कथ्यते ॥ स च स्वेच्छामयः कृष्णः साकारश्च
निराकृतिः ॥ १२ ॥ तेजोरूपं निराकारं ध्यायन्ते योगिनः सदा ॥ वदन्ति ते परं ब्रह्म परमात्मानमीश्वरम् ॥ १३ ॥ अदृश्यं सर्व
द्रष्टारं सर्वज्ञं सर्वकारणम् ॥ सर्वदं सर्वरूपान्तमरूपं सर्वपोषकम् ॥ १४ ॥ वैष्णवास्तं न मन्यन्ते तद्भक्ताः सूक्ष्मदर्शिनः ॥ वदन्ति
कस्य तेजस्ते इति तेजस्विनं विना ॥१५॥ तेजोमण्डलमध्यस्थं ब्रह्म तेजस्विनं परम्॥स्वेच्छामयं सर्वरूपं सर्वकारणकारणम्॥१६॥
अतीव सुन्दरं रूपं बिभ्रतं सुमनोहरम् ॥ किशोरवयसं शान्तं सर्वकान्तं परात्परम् ॥१७॥ नवीननीरदाभासं रासैकश्यामसुन्दरम् ॥
शरन्मध्याह्नपद्मौघशोभामोचकलोचनम् ॥ १८ ॥ मुक्तासारमहास्वच्छदन्तपङ्क्तिमनोहरम् ॥ मयूरपुच्छचूडं च मालतीमाल्यमण्डि

तम् ॥१९॥ सुनासं सस्मितं शश्वद्भक्तानुग्रहकारकम् ॥ ज्वलदग्निविशुद्धैकपीतांशुकसुशोभितम् ॥२०॥ द्विभुजं मुरलीहस्तं रत्नभूषणभूषितम् ॥ सर्वाधारं च सर्वेशं सर्वशक्तियुतं विभुम् ॥ २१ ॥ सर्वैश्वर्य्यप्रदं सर्वं स्वतन्त्रं सर्वमङ्गलम् ॥ परिपूर्णतमं सिद्धं सिद्धिदं सिद्धिकारणम् ॥ २२ ॥ ध्यायन्ते वैष्णवाः शश्वदेवंरूपं सनातनम् ॥ जन्ममृत्युजराव्याधिशोकभीतिहरं परम् ॥ २३ ॥ ब्रह्मणो वयसा यस्य निमेष उपचार्य्यते ॥ स चात्मा परमं ब्रह्म कृष्ण इत्यभिधीयते ॥ २४ ॥ कृषिस्तद्भक्तिवचनो नश्च तद्दास्यकारकः ॥ भक्तिदास्यप्रदाता यः स कृष्णः परिकीर्तितः ॥ २५ ॥ कृषिश्च सर्ववचनो नकारो बीजवाचकः ॥ सर्वबीजं परं ब्रह्म कृष्ण इत्यभिधीयते ॥ २६ ॥ असंख्यब्रह्मणां पाते कालेऽतीतेऽपि नारद ॥ यद्गुणानां नास्ति नाशस्तत्समानो गुणेन च ॥ २७ ॥ स कृष्णः सर्वसृष्टयादौ सिसृक्षुस्त्वेक एव च ॥ सृष्टयुन्मुखस्तदंशेन कालेन प्रेरितः प्रभुः ॥ २८ ॥ स्वेच्छामयः स्वेच्छया च द्विधारूपो बभूव ह ॥ स्त्रीरूपा वामभागांशाद्दक्षिणांशः पुमान्स्मृतः ॥ २९ ॥ तां ददर्श महाकामी कामाधारः सनातनः ॥ अतीव कमनीयां च चारुचम्पकसन्निभाम् ॥ ३० ॥ पूर्णेन्दुबिम्बसदृशनितम्बयुगलां पराम् ॥ सुचारुकदलीस्तम्भसदृशश्रोणिसुन्दरीम् ॥ ३१ ॥ श्रीयुक्तश्रीफलाकारस्तनयुग्ममनोरमाम् ॥ पुष्टया युक्तां सुललितां मध्यक्षीणां मनोहराम् ॥ ३२ ॥ अतीव सुन्दरीं शान्तां सस्मितां वक्रलोचनाम् ॥ वह्निशुद्धांशुकाधानां रत्नभूषणभूषिताम् ॥ ३३ ॥ शश्वच्चक्षुश्चकोराभ्यां पिबन्तीं सन्ततं मुदा ॥ कृष्णस्य सुन्दरमुखं चन्द्रकोटिविनिन्दकम् ॥ ३४ ॥ कस्तूरीबिन्दुभिः सार्द्धमधश्चन्दनबिन्दुना ॥ समं सिन्दूरबिन्दुं च भालमध्ये च बिभ्रतीम् ॥ ३५ ॥ सुवक्रकबरीभारं मालतीमाल्यभूषितम् ॥ रत्नेन्द्रसारहारं च दधतीं कान्तकामुकीम् ॥ ३६ ॥ कोटिचन्द्रप्रभाजुष्टपुष्टशोभासमन्विताम् ॥ गमने राजहंसीं तां दृष्टया खञ्जनगञ्जनीम् ॥ ३७ ॥ अतिमात्रं तया सार्द्धं रासेशो रासमण्डले ॥ रासोल्लासेषु रहसि रासक्रीडां चकार ह॥३८॥नानाप्रकारश्रृंगारं शृङ्गारो मूर्त्तिमानिव॥चकार सुखसम्भोगं यावद्वै ब्रह्मणो वयः ॥३९॥ ततः स च परिश्रान्तस्तस्या योनौ जगत्पिता ॥ चकार वीर्य्याधानं च नित्यानन्दः शुभक्षणे ॥ ४० ॥ गात्रतो योषितस्तस्याः

सुरतान्ते च सुव्रत ॥ निस्ससार श्रमजलं श्रान्तायास्तेजसा हरेः ॥ ४१ ॥ महासुरतखिन्नाया निश्वासश्च बभूव ह ॥ तदाधारश्रमजलं तत्सर्वं विश्वगोलकम् ॥ ४२ ॥ स च निःश्वासवायुश्च सर्वाधारो बभूव ह ॥ निश्श्वासवायुः सर्वेषां जीविनां च भवेषु च ॥ ४३ ॥ बभूव मूर्त्तिमद्वायोर्वामाङ्गात्प्राणवल्लभा ॥ तत्पत्नी सा च तत्पुत्राः प्राणाः पञ्च च जीविनाम् ॥ ४४ ॥ प्राणोऽपानः समानश्चैवोदानो व्यान एव च ॥ बभूवुरेव तत्पुत्रा अधःप्राणाश्च पञ्च च ॥ ४५ ॥ घर्मतोयाधिदेवश्च बभूव वरुणो महान् ॥ तद्वामाङ्गाच्च तत्पत्नी वरुणानी बभूव सा ॥ ४६ ॥ अथ सा कृष्णशक्तिश्च कृष्णाद्गर्भं दधार ह ॥ शतमन्वन्तरं यावज्ज्वलन्ती ब्रह्मतेजसा ॥ ४७ ॥ कृष्णप्राणाधिदेवी सा कृष्णप्राणाधिकप्रिया ॥ कृष्णस्य सङ्गिनी शश्वत्कृष्णवक्षस्थलस्थिता ॥ ४८ ॥ शतमन्वन्तरातीते काले परमसुन्दरी ॥ सुषावाण्डं सुवर्णाभं विश्वाधारालयं परम् ॥ ४९ ॥ दृष्ट्वा चाण्डं हि सा देवी हृदयेन विदूयता ॥ उत्ससर्ज च कोपेन तदण्डं गोलके जले ॥ ५० ॥ दृष्ट्वा कृष्णश्च तत्त्यागं हाहाकारं चकार ह॥शशाप देवीं देवेशस्तत्क्षणं च यथोचितम् ॥ ५१ ॥ यतोऽपत्यं त्वया त्यक्तं कोपशीले सुनिष्ठुरे ॥ भव त्वमनपत्याऽपि चाद्यप्रभृति निश्चितम् ॥ ५२ ॥ या यास्त्वदंशरूपाश्च भविष्यन्ति सुरस्त्रियः ॥ अनपत्याश्च ताः सर्वास्त्वत्समा नित्ययौवनाः ॥ ५३ ॥ एतस्मिन्नन्तरे देवीजिह्वाग्रात्सहसा ततः ॥ आविर्बभूव कन्यैका शुक्लवर्णा मनोहरा ॥ ५४ ॥ पीतवस्त्रपरीधाना वीणापुस्तकधारिणी ॥ रत्नभूषणभूषाढ्या सर्वशास्त्राधिदेवता ॥ ५५ ॥ अथ कालान्तरे सा च द्विधारूपा बभूव ह ॥ वामार्द्धाङ्गा च कमला दक्षिणार्द्धा च राधिका ॥ ५६ ॥ एतस्मिन्नन्तरे कृष्णो द्विधारूपो बभूव ह ॥ दक्षिणार्द्धस्स्याद्विभुजो वामार्द्धश्च चतुर्भुजः ॥ ५७ ॥ उवाच वाणीं श्रीकृष्णस्त्वमस्य भव कामिनी॥अत्रैव मानिनी राधा नैव भद्रं भविष्यति ॥ ५८ ॥ एवं लक्ष्मीं संप्रददौ तुष्टो नारायणाय वै ॥ संजगाम च वैकुण्ठं ताभ्यां सार्द्धं जगत्पतिः ॥ ५९ ॥ अनपत्ये च ते द्वे च यतो राधांशसम्भवे॥ नारायणाङ्गादभवन्पार्षदाश्च चतुर्भुजाः ॥ ६० ॥ तेजसा वयसा रूपगुणाभ्यां च समा हरेः ॥ बभूवुः कमलाङ्गाच्च दासीकोट्यश्च

तत्समाः ॥ ६१ ॥ अथ गोलोकनाथस्य लोम्नां विवरतो मुने ॥ आसन्नसंख्यगोपाश्च वयसा तेजसा समाः ॥ ६२ ॥ रूपेण सुगुणे
नैव वेषाद्वा विक्रमेण च ॥ प्राणतुल्याः प्रियाः सर्वे बभूवुः पार्षदा विभोः ॥ ६३ ॥ राधाङ्गलोमकूपेभ्यो बभूवुर्गोपकन्यकाः ॥
राधातुल्याश्च सर्वास्ता नान्यतुल्याः प्रियंवदाः ॥ ६४ ॥ रत्नभूषणभूषाढ्याः शश्वत्सुस्थिरयौवनाः ॥ अनपत्याश्च ताः सर्वाः पुंसः
शापेन सन्ततम् ॥ ६५ ॥ एतस्मिन्नन्तरे विप्र सहसा कृष्णदेहतः ॥ आविर्बभूव सा दुर्गा विष्णुमाया सनातनी ॥ ६६ ॥ देवी
नारायणीशाना सर्वशक्तिस्वरूपिणी ॥ बुद्ध्यधिष्ठातृदेवी सा कृष्णस्य परमात्मनः ॥६७॥ देवीनां बीजरूपा च मूलप्रकृतिरीश्वरी॥
परिपूर्णतमा तेजःस्वरूपा त्रिगुणात्मिका ॥ ६८ ॥ तप्तकाञ्चनवर्णाभा सूर्य्यकोटिसमप्रभा ॥ ईषद्धासप्रसन्नास्या सहस्रभुजसंयुता
॥ ६९ ॥ नानाशस्त्रास्त्रनिकरं बिभ्रती सा त्रिलोचना ॥ वह्निशुद्धांशुकाधाना रत्नभूषणभूषिता ॥ ७० ॥ यस्याश्चांशांशकलया बभूवुः
सर्वयोषितः ॥ सर्वविश्वस्थिता लोका मोहिता मायया यया ॥ ७१ ॥ सर्वैश्वर्य्यप्रदात्री च कामिनां गृहमेधिनाम् ॥ कृष्णभक्ति
प्रदात्री च वैष्णवानां च वैष्णवी ॥ ७२ ॥ मुमुक्षूणां मोक्षदात्री सुखिनां सुखदायिनी ॥ स्वर्गेषु स्वर्गलक्ष्मीः सा गृहलक्ष्मीर्गृहेष्वसौ॥
॥७३॥तपस्विषु तपस्या च श्रीरूपा सा नृपेषु च ॥ या चाग्नौ दाहिकारूपा प्रभारूपा च भास्करे ॥ ७४ ॥ शोभास्वरूपा चन्द्रे च
पद्मेषु च सुशोभना ॥ सर्वशक्तिस्वरूपा या श्रीकृष्णे परमात्मनि ॥ ७५ ॥ यया च शक्तिमानात्मा यया वै शक्तिमज्जगत् ॥ यया
विना जगत्सर्वं जीवन्मृतमिव स्थितम् ॥ ७६ ॥ या च संसारवृक्षस्य बीजरूपा सनातनी ॥ स्थितिरूपा बुद्धिरूपा फलरूपा च
नारद ॥ ७७ ॥ क्षुत्पिपासा दया श्रद्धा निद्रा तन्द्रा क्षमा धृतिः ॥ शान्तिर्लज्जातुष्टिपुष्टिभ्रान्तिकान्त्यादिरूपिणी ॥ ७८ ॥
सा च संस्तूय सर्वेशं तत्पुरः समुपस्थिता ॥ रत्नसिंहासनं तस्यै प्रददौ राधिकेश्वरः ॥ ७९ ॥ एतस्मिन्नन्तरे तत्र सस्त्रीकश्च चतु
र्मुखः ॥ पद्मनाभो नाभिपद्मान्निस्ससार पुमान्मुने ॥ ८० ॥ कमण्डलुधरः श्रीमांस्तपस्वी ज्ञानिनां वरः ॥ चतुर्मुखस्तं तुष्टाव प्रज्व
लन्ब्रह्मतेजसा ॥ ८१ ॥ सुदती सुन्दरी श्रेष्ठा शतचन्द्रसमप्रभा ॥ वह्निशुद्धांशुकाधाना रत्नभूषणभूषिता ॥ ८२ ॥ रत्नसिंहासने

रम्ये स्तुता वै सर्वकारणम् ॥ उवास स्वामिना सार्द्धं कृष्णस्य पुरतो मुदा ॥ ८३ ॥ एतस्मिन्नन्तरे कृष्णो द्विधारूपो बभूव सः ॥ वामार्द्धांगो महादेवो दक्षिणो गोपिकापतिः ॥ ८४ ॥ शुद्धस्फटिकसङ्काशः शतकोटिरविप्रभः ॥ त्रिशूलपट्टिशधरो व्याघ्रचर्मधरो हरः ॥ ८५ ॥ तप्तकाञ्चनवर्णाभजटाभारधरः परः ॥ भस्मभूषणगात्रश्च सस्मितश्चन्द्रशेखरः ॥ ८६ ॥ दिगम्बरो नीलकण्ठः सर्पभूषणभूषितः ॥ बिभ्रद्दक्षिणहस्तेन रत्नमालां सुसंस्कृताम् ॥ ८७ ॥ प्रजपन्पञ्चवक्त्रेण ब्रह्मज्योतिः सनातनम् ॥ सत्यस्वरूपं श्रीकृष्णं परमात्मानमीश्वरम् ॥ ८८ ॥ कारणं कारणानां च सर्वमङ्गलमङ्गलम् ॥ जन्ममृत्युजराव्याधिशोकभीतिहरं परम् ॥ ८९ ॥ संस्तूय मृत्योर्मृत्युं तं जातो मृत्युञ्जयाभिधः ॥ रत्नसिंहासने रम्ये समुवास हरेः पुरः ॥ ९० ॥ इति श्रीब्र०महापु०द्वि०प्रकृ० नारायणनारदसंवादे देवदेव्युत्पत्तिर्नाम द्वितीयोऽध्यायः ॥ २ ॥ श्रीनारायण उवाच ॥ अथाण्डं तज्जलेऽतिष्ठद्यावद्वै ब्रह्मणो वयः ॥ ततः स्वकाले सहसा द्विधारूपो बभूव सः ॥१॥ तन्मध्ये शिशुरेकश्च शतकोटिरविप्रभः॥क्षणं रोरूयमाणश्च स शिशुः पीडितः क्षुधा॥२॥ पितृमातृपरित्यक्तो जलमध्ये निराश्रयः ॥ नैकब्रह्माण्डनाथो यो ददर्शोर्ध्वमनाथवत् ॥ ३ ॥ स्थूलात्स्थूलतमः सोऽपि नाम्ना देवो महाविराट् ॥ परमाणुर्यथा सूक्ष्मात्परः स्थूलात्तथाऽप्यसौ ॥ ४ ॥ तेजसां षोडशांशोऽयं कृष्णस्य परमात्मनः ॥ आधारोऽसंख्यविश्वानां महाविष्णुस्सुरेश्वरः ॥ ५ ॥ प्रत्येकं रोमकूपेषु विश्वानि निखिलानि च ॥ अद्यापि तेषां संख्यां च कृष्णो वक्तुं न हि क्षमः ॥ ६ ॥ यथाऽस्ति संख्या रजसां विश्वानां न कदाचन ॥ ब्रह्मविष्णुशिवादीनां तथा संख्या न विद्यते ॥ ७ ॥ प्रतिविश्वेषु सन्त्येवं ब्रह्मविष्णुशिवादयः ॥ पातालाद्ब्रह्मलोकान्तं ब्रह्माण्डं परिकीर्त्तितम् ॥ ८ ॥ तत ऊर्ध्वे च वैकुण्ठो ब्रह्माण्डाद्बहिरेव सः ॥ स च सत्यस्वरूपश्च शश्वन्नारायणो यथा ॥ ९ ॥ तदूर्ध्वे गोलकश्चैव पञ्चाशत्कोटियोजनात् ॥ नित्यः सत्यस्वरूपश्च यथा कृष्णस्तथाप्ययम् ॥ १० ॥ सप्तद्वीपमिता पृथ्वी सप्तसागरसंयुता ॥ एकोनपञ्चाशदुपद्वीपाऽसंख्यवनान्विता ॥ ११ ॥ ऊर्ध्वं सप्त सुवर्लोका ब्रह्मलोकसमन्विताः ॥ पातालानि च सप्ताधश्चैवं ब्रह्माण्डमेव च ॥ १२ ॥ ऊर्ध्वं धराया भूर्लोको भुवर्लोकस्ततः परः ॥ स्वर्लोकस्तु

ततः पश्चान्महर्लोकस्ततो जनः ॥ १३ ॥ ततः परस्तपोलोकः सत्यलोकस्ततः परः ॥ ततः परो ब्रह्मलोकस्तप्तकाञ्चननिर्मितः ॥
॥१४ ॥ एवं सर्वं कृत्रिमं तद्बाह्याभ्यन्तर एव च ॥ तद्विनाशे विनाशश्च सर्वेषामेव नारद ॥ १५ ॥ जलबुद्बुदवत्सर्वं विश्वसंघमनित्य
कम् ॥ नित्यौ गोलोकवैकुण्ठौ सत्यौ शश्वदकृत्रिमौ ॥ १६ ॥ लोमकूपे च विध्यण्डं प्रत्येकं तस्य निश्चितम् ॥ एषां संख्यां न
जानाति कृष्णोऽन्यस्यापि का कथा ॥ १७ ॥ प्रत्येकं प्रतिविध्यण्डे ब्रह्मविष्णुशिवादयः ॥ तिस्रः कोटयः सुराणां च संख्या सर्वत्र
पुत्रक ॥ १८ ॥ दिगीशाश्चैव दिक्पाला नक्षत्राणि ग्रहादयः ॥ भुवि वर्णाश्च चत्वारोऽधो नागाश्च चराचराः ॥ १९ ॥ अथ कालेन
स विराडूर्ध्वं दृष्ट्वा पुनः पुनः ॥ डिम्भान्तरं च शून्यं च न द्वितीयं कथंचन ॥ २० ॥ चिन्तामवाप क्षुद्युक्तो रुरोद च पुनः पुनः ॥
ज्ञानं प्राप्य तदा दध्यौ कृष्णं परमपूरुषम् ॥ २१ ॥ ततो ददर्श तत्रैव ब्रह्म ज्योतिः सनातनम् ॥ नवीननीरदश्यामं द्विभुजं पीतवा
ससम् ॥ २२ ॥ सस्मितं मुरलीहस्तं भक्तानुग्रहकारकम् ॥ जहास बालकस्तुष्टो दृष्ट्वा जनकमीश्वरम् ॥ २३ ॥ वरं तस्मै ददौ तुष्टो
वरेशः समयोचितम् ॥ मत्समो ज्ञानयुक्तश्च क्षुत्पिपासाविवर्जितः ॥ २४ ॥ ब्रह्माण्डासंख्यनिलयो भव वत्स लयावधि ॥ निष्कामो
निर्भयश्चैव सर्वेषां वरदो वरः ॥ रोगमृत्युजराशोकपीडादिपरिवर्जितः ॥ २५ ॥ इत्युक्त्वा तद्दक्षकर्णे महामन्त्रं षडक्षरम् ॥ त्रिः कृत्वा
प्रजजापादौ वेदाङ्गमवरं परम् ॥ २६ ॥ प्रणवादिचतुर्थ्यन्तं कृष्ण इत्यक्षरद्वयम् ॥ वह्निज्वालान्तमिष्टं च सर्वविघ्नहरं परम् ॥ २७ ॥
मन्त्रं दत्त्वा तदाहारं कल्पयामास वै प्रभुः ॥ श्रूयतां तद्ब्रह्मपुत्र निबोध कथयामि ते ॥ २८ ॥ प्रतिविश्वेषु नैवेद्यं दद्याद्वै वैष्णवो जनः ॥
षोडशांशं विषयिणो विष्णोः पञ्चदशास्य वै ॥ २९ ॥ निर्गुणस्यात्मनश्चैव परिपूर्णतमस्य च ॥ नैवेद्येन च कृष्णस्य नहि किञ्चि
त्प्रयोजनम् ॥ ३० ॥ यद्ददाति च नैवेद्यं यस्मै देवाय यो जनः ॥ स च खादति तत्सर्वं लक्ष्मीदृष्ट्या पुनर्भवेत् ॥ ३१ ॥ तं च
मन्त्रं वरं दत्त्वा तमुवाच पुनर्विभुः ॥ अन्यो वरः क इष्टस्ते त मे ब्रूहि ददामि ते ॥ ३२ ॥ कृष्णस्य वचनं श्रुत्वा तमुवाच महावि
राट् ॥ अदन्तो बालकस्तत्र वचनं समयोचितम् ॥ ३३ ॥ महाविराडुवाच ॥ वरं मे त्वत्पदाम्भोजे भक्तिर्भवतु निश्चला ॥ सन्ततं

यावदायुर्में क्षणं वा सुचिरं च वा ॥ ३४ ॥ त्वद्भक्तियुक्तो यो लोके जीवन्मुक्तः स सन्ततम् ॥ त्वद्भक्तिहीनो मूर्खश्च जीवन्नपि मृतो हि सः ॥ ३५ ॥ किं तज्जपेन तपसा यज्ञेन यजनेन च ॥ व्रतेनैवोपवासेन पुण्यतीर्थनिषेवया ॥ ३६ ॥ कृष्णभक्तिविहीनस्य पुंसः स्याज्जीवनं वृथा ॥ येनात्मना जीवितश्च तमेव नहि मन्यते ॥ ३७ ॥ यावदात्मा शरीरेऽस्ति तावत्स्याच्छक्तिसंयुतः ॥ पश्चाद्यान्ति गते तस्मिन्न स्वतन्त्राश्च शक्तयः ॥३८॥ स च त्वं च महाभाग सर्वात्मा प्रकृतेः परः ॥ स्वेच्छामयश्च सर्वाद्यो ब्रह्म ज्योतिः सनातनः ॥ ३९ ॥ इत्युक्त्वा बालकस्तत्र विरराम च नारद ॥ उवाच कृष्णः प्रत्युक्तिं मधुरां श्रुतिसुन्दरीम् ॥ ४० ॥ श्रीकृष्ण उवाच ॥ सुचिरं सुस्थिरं तिष्ठ यथाऽहं त्वं तथा भव ॥ असंख्यब्रह्मणां पाते पातस्ते न भविष्यति ॥ ४१ ॥ अंशेन प्रतिविध्यण्डे त्वं च पुत्र विराड् भव ॥ त्वन्नाभिपद्मे ब्रह्मा च विश्वस्रष्टा भविष्यति ॥ ४२ ॥ ललाटे ब्रह्मणश्चैव रुद्राश्चैकादशैव तु ॥ शिवांशेन भविष्यन्ति सृष्टिसंचरणाय वै ॥ ४३ ॥ कालाग्निरुद्रस्तेष्वेको विश्वसंहारकारकः ॥ पाता विष्णुश्च विषयी क्षुद्रांशेन भविष्यति॥ ॥ ४४ ॥ मद्भक्तियुक्तः सततं भविष्यसि वरेण मे ॥ ध्यानेन कमनीयं मां नित्यं द्रक्ष्यसि निश्चितम् ॥ ४५ ॥ मातरं कमनीयां च मम वक्षःस्थलस्थिताम् ॥ यामि लोकं तिष्ठ वत्सेत्युक्त्वा सोऽन्तरधीयत ॥ ४६ ॥ गत्वा च नाकं ब्रह्माणं शङ्करं स उवाच ह ॥ स्रष्टारं स्रष्टुमीशं च संहर्त्तारं च तत्क्षणम्॥४७॥श्रीकृष्ण उवाच ॥ सृष्टिं स्रष्टुं गच्छ वत्स नाभिपद्मोद्भवो भव॥ महाविराड् लोमकूपे क्षुद्रस्य च विधेः शृणु ॥ ४८ ॥ गच्छ वत्स महादेव ब्रह्मभालोद्भवो भव ॥ अंशेन च महाभाग स्वयं च सुचिरं तपः ॥ ४९ ॥ इत्युक्त्वा जगतां नाथो विरराम विधेः सुतः ॥ जगाम नत्वा तं ब्रह्मा शिवश्च शिवदायकः ॥ ५० ॥ महाविराड् लोमकूपे ब्रह्माण्डे गोलके जले ॥ स बभूव विराट् क्षुद्रो विराडंशेन साम्प्रतम् ॥ ५१ ॥ श्यामो युवा पीतवासाः शयानो जलतल्पके ॥ ईषद्धासः प्रसन्नास्यो विश्वरूपी जनार्दनः ॥ ५२ ॥ तन्नाभिकमले ब्रह्मा बभूव कमलोद्भवः ॥ संभूय पद्मदण्डं च बभ्राम युगलक्षकम् ॥ ५३ ॥ नान्तं जगाम दण्डस्य पद्मनाभस्य पद्मजः ॥ नाभिजस्य च पद्मस्य चिन्तामाप पितामहः ॥ ५४ ॥ स्वस्थानं पुनरागत्य

दध्यौ कृष्णपदाम्बुजम् ॥ ततो ददर्श क्षुद्रं तं ध्यात्वा तद्दिव्यचक्षुषा ॥ ५५ ॥ शयानं जलतल्पे च ब्रह्माण्डपिण्डमावृते ॥ यल्लो
मकूपे ब्रह्माण्डं तं च तत्परमीश्वरम् ॥ ५६ ॥ श्रीकृष्णं चापि गोलोकं गोपगोपीसमन्वितम् ॥ तं संस्तूय वरं प्राप ततः
सृष्टिं चकार सः ॥ ५७ ॥ बभूवुर्ब्रह्मणः पुत्रा मानसाः सनकादयः ॥ ततो रुद्राः कपालाच्च शिवस्यैकादश स्मृताः ॥ ५८ ॥ बभूव
पाता विष्णुश्च वामे क्षुद्रस्य पार्श्वतः ॥ चतुर्भुजश्च भगवाञ्श्वेतद्वीपनिवासकृत् ॥ ५९ ॥ क्षुद्रस्य नाभिपद्मे च ब्रह्मा विश्वं ससर्ज
सः ॥ स्वर्गं मर्त्यं च पातालं त्रिलोकं सचराचरम् ॥ ६० ॥ एवं सर्वं लोमकूपे विश्वं प्रत्येकमेव च ॥ प्रतिविश्वं क्षुद्रविराड् ब्रह्म
विष्णुशिवादयः ॥ ६१ ॥ इत्येवं कथितं वत्स कृष्णसङ्कीर्त्तनं शुभम् ॥ सुखदं मोक्षदं सारं किं भूयः श्रोतुमिच्छसि ॥ ६२ ॥ इति
श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे विश्वब्रह्माण्डवर्णनं नाम तृतीयोऽध्यायः॥३॥ नारद उवाच ॥ श्रुतं
सर्वमपूर्वं च त्वत्प्रसादात्सुधोपमम् ॥ अधुना प्रकृतीनां च व्यासं वर्णय भो प्रभो ॥ १ ॥ कस्याः पूजा कृता केन कथं मर्त्ये प्रका
शिता ॥ केन वा पूजिता का वा केन का वा स्तुता मुने ॥२॥ कवचं स्तोत्रकं ध्यानं प्रभावं चरितं शुभम् ॥ काभिः काभ्यो वरो
दत्तस्तन्मे व्याख्यातुमर्हसि ॥ ३ ॥ नारायण उवाच ॥ गणेशजननी दुर्गा राधा लक्ष्मीः सरस्वती ॥ सावित्री वै सृष्टिविधौ प्रकृतिः
पञ्चधा स्मृता ॥ ४ ॥ आसीत्पूज्या प्रसिद्धा च प्रभावः परमाद्भुतः ॥ सुधोपमं च चरितं सर्वमङ्गलकारणम् ॥ ५ ॥ प्रकृत्यंशाः
कला याश्च तासां च चरितं शुभम् ॥ सर्वं वक्ष्यामि ते ब्रह्मन्सावधानं निशामय ॥ ६ ॥ वाणी[१] वसुन्धरा गङ्गा षष्ठी मङ्गलच
ण्डिका ॥ तुलसी मानसी निद्रा स्वधा स्वाहा च दक्षिणा ॥ ७ ॥ तेजसा मत्समास्ताश्च रूपेण च गुणेन च ॥ ८ ॥ संक्षेपमासां
चरितं पुण्यदं श्रुतिसुन्दरम् ॥ जीवकर्मविपाकं च तच्च वक्ष्यामि सुन्दरम् ॥ ९ ॥ दुर्गायाश्चैव राधाया विस्तीर्णं चरितं महत् ॥
तच्च पश्चात्प्रवक्ष्यामि संक्षेपात्क्रमतः शृणु ॥ १० ॥ आदौ सरस्वतीपूजा श्रीकृष्णेन विनिर्मिता ॥ यत्प्रसादान्मुनिश्रेष्ठ मूर्खो

---

[१] कालीति पाठः ।

भवति पण्डितः ॥ ११ ॥ आविर्भूता यदा देवी वक्त्रतः कृष्णयोषितः ॥ इयेष कृष्णं कामेन कामुकी कामरूपिणी ॥ १२ ॥ स च विज्ञाय तद्भावं सर्वज्ञः सर्वमातरम् ॥ तामुवाच हितं सत्यं परिणामसुखावहम् ॥ १३ ॥ श्रीकृष्ण उवाच ॥ भज नारायणं साध्वि मदंशं च चतुर्भुजम् ॥ युवानं सुन्दरं सर्वगुणयुक्तं च मत्समम् ॥ १४ ॥ कामदं कामिनीनां च तासां तं कामपूरकम् ॥ कोटिकन्दर्पलावण्यं लीलान्यक्कृतमन्मथम् ॥ १५ ॥ कान्ते कान्तं च मां कृत्वा यदि स्थातुमिहेच्छसि ॥ त्वत्तो बलवती राधा न ते भद्रं भविष्यति ॥ १६ ॥ यो यस्माद्बलवान्वाऽपि ततोऽन्यं रक्षितुं क्षमः ॥ कथं परान्साधयति यदि स्वयमनीश्वरः ॥ १७ ॥ सर्वेशस्सर्वशास्ताऽहं राधां राधितुमक्षमः ॥ तेजसा मत्समा सा च रूपेण च गुणेन च ॥ १८ ॥ प्राणाधिष्ठातृदेवी सा प्राणांस्त्यक्तुं च कः क्षमः ॥ प्राणतोऽपि प्रियः कुत्र केषां वाऽस्ति च कश्चन ॥ १९ ॥ त्वं भद्रे गच्छ वैकुण्ठं तव भद्रं भविष्यति ॥ पतिं तमीश्वरं कृत्वा मोदस्व सुचिरं सुखम् ॥ २० ॥ विवर्जिता लोभमोहकामकोपेन हिंसया ॥ तेजसा त्वत्समा लक्ष्मी रूपेण च गुणेन च ॥ २१ ॥ तया सार्द्धं भव प्रीत्या सुखं कालं प्रयास्यति ॥ गौरवं चापि तत्तुल्यं करिष्यति पतिर्द्वयोः ॥ २२ ॥ प्रतिविश्वेषु ते पूजां महतीं ते मुदाऽन्विताः ॥ माघस्य शुक्लपञ्चम्यां विद्यारम्भेषु सुन्दरि ॥ २३ ॥ मानवा मनवो देवा मुनीन्द्राश्च मुमुक्षवः ॥ सन्तश्च योगिनः सिद्धा नागगन्धर्वकिंनराः ॥ २४ ॥ मद्वरेण करिष्यन्ति कल्पे कल्पे यथाविधि ॥ भक्तियुक्ताश्च दत्त्वा वै चोपचारांश्च षोडश ॥२५॥ काण्वशाखोक्तविधिना ध्यानेन स्तवनेन च ॥ जितेन्द्रियाः संयताश्च पुस्तकेषु घटेऽपि च ॥ २६ ॥ कृत्वा सुवर्णगुटिकां गन्धचन्दनचार्चिताम् ॥ कवचं ते ग्रहीष्यन्ति कण्ठे वा दक्षिणे भुजे ॥ २७ ॥ पठिष्यन्ति च विद्वांसः पूजाकाले च पूजिते ॥ इत्युक्त्वा पूजयामास तां देवीं सर्वपूजितः ॥ २८ ॥ ततस्तत्पूजनं चक्रुर्ब्रह्मविष्णुमहेश्वराः ॥ अनन्तश्चापि धर्मश्च मुनीन्द्राः सनकादयः ॥२९॥ सर्वे देवाश्च मनवो नृपा वा मानवादयः ॥ बभूव पूजिता नित्या सर्वलोकैः सरस्वती ॥ ३० ॥ नारद उवाच ॥ पूजाविधानं स्तवनं ध्यानं कवचमीप्सितम् ॥ पूजोपयुक्तं नैवेद्यं पुष्पं वा चन्दनादिकम् ॥ ३१ ॥ वद वेदविदां श्रेष्ठ श्रोतुं कौतूहलं मम ॥ वर्द्धते साम्प्र

तं शश्वत्किमिदं श्रुतिसुन्दरम् ॥ ३२ ॥ नारायण उवाच ॥ शृणु नारद वक्ष्यामि काण्वशाखोक्तपद्धतिम् ॥ जगन्मातुः सरस्वत्याः
पूजाविधिसमन्वितम्॥ ३३॥माघस्य शुक्लपञ्चम्यां विद्यारम्भदिनेऽपि च॥पूर्वेऽह्नि संयमं कृत्वा तत्र स्यात्संयतः शुचिः ॥३४॥ स्नात्वा
नित्यक्रियां कृत्वा घटं संस्थाप्य भक्तितः॥संपूज्य देवषट्कं च नैवेद्यादिभिरेव च॥३५॥गणेशं च दिनेशं च वह्निं विष्णुं शिवं शिवाम्॥
संपूज्य संयतोऽग्रे च ततोऽभीष्टं प्रपूजयेत् ॥ ३६ ॥ ध्यानेन वक्ष्यमाणेन ध्यात्वा बाह्यघटे बुधः ॥ ध्यात्वा पुनः षोडशोपचारैस्तां
पूजयेद्व्रती ॥३७॥ पूजोपयुक्तं नैवेद्यं यद्यद्वेदे निरूपितम् ॥ वक्ष्यामि साम्प्रतं किञ्चिद्यथाऽधीतं यथाऽऽगमम् ॥ ३८ ॥ नवनीतं
दधि क्षीरं लाजांश्च तिललड्डुकान् ॥ इक्षुमिक्षुरसं शुक्लवर्णं पक्वगुडं मधु ॥ ३९ ॥ स्वस्तिकं शर्करां शुक्लधान्यस्याक्षतमक्षतम्॥
अस्विन्नशुक्लधान्यस्य पृथुकं शुक्लमोदकम् ॥ ४० ॥ घृतसैन्धवसंस्कारैर्हविष्यैर्व्यञ्जनैस्तथा ॥ यवगोधूमचूर्णानां पिष्टकं घृतसंस्कृ-
तम् ॥ ४१ ॥ पिष्टकं स्वस्तिकस्यापि पक्वरम्भाफलस्य च ॥ परमान्नं च सघृतं मिष्टान्नं च सुधोपमम् ॥ ४२ ॥ नारिकेलं तदु-
दकं केशरं मूलमार्द्रकम् ॥ पक्वरम्भाफलं चारु श्रीफलं बदरीफलम् ॥ कालदेशोद्भवं पक्वफलं शुक्लं सुसंस्कृतम् ॥ ४३ ॥ सुगन्धि
शुक्लपुष्पं च गन्धाढ्यं शुक्लचन्दनम् ॥ नवीनं शुक्लवस्त्रं च शङ्खं च सुमनोहरम् ॥ माल्यं च शुक्लपुष्पाणां मुक्ताहीरादिभूषणम् ॥
॥ ४४ ॥ यद्दृष्टं च श्रुतौ ध्यानं प्रशस्तं श्रुतिसुन्दरम् ॥ तन्निबोध महाभाग भ्रमभञ्जनकारणम् ॥ ४५ ॥ सरस्वतीं शुक्लवर्णां
सस्मितां सुमनोहराम् ॥ कोटिचन्द्रप्रभाजुष्टपुष्टश्रीयुक्तविग्रहाम् ॥ ४६ ॥ वह्निशुद्धांशुकाधानां सस्मितां सुमनोहराम् ॥ रत्नसारेन्द्र-
खचितवरभूषणभूषिताम् ॥ ४७ ॥ सुपूजितां सुरगणैर्ब्रह्मविष्णुशिवादिभिः ॥ वन्दे भक्त्या वन्दितां तां मुनीन्द्रमनुमानवैः ॥ ४८॥
एवं ध्यात्वा च मूलेन सर्वं दत्त्वा विचक्षणः ॥ संस्तूय कवचं धृत्वा प्रणमेद्दण्डवद्भुवि ॥ ४९ ॥ येषां स्यादिष्टदेवीयं तेषां नित्यं
शुभं मुने ॥ विद्यारम्भे च सर्वेषां वर्षान्ते पञ्चमीदिने ॥ ५० ॥ सर्वोपयुक्तमूलं च वैदिकाष्टाक्षरः परः ॥ येषां यदुपदेशो वा तेषां
तन्मूलमेव च ॥ सरस्वतीचतुर्थ्यन्तो वह्निजायान्त एव च ॥ ५१ ॥ श्रीं ह्रीं सरस्वत्यै स्वाहा ॥ लक्ष्मीमायादिकं चैव मन्त्रोऽयं

कल्पपादपः ॥ ५२ ॥ पुरा नारायणश्चेमं वाल्मीकाय कृपानिधिः ॥ प्रददौ जाह्नवीतीरे पुण्यक्षेत्रे च भारते ॥ ५३ ॥ भृगुर्ददौ च
शुक्राय पुष्करे सूर्य्यपर्वणि ॥ चन्द्रपर्वणि मारीचो ददौ वाक्पतये मुदा ॥ ५४ ॥ भृगवे च ददौ तुष्टो ब्रह्मा बदरिकाश्रमे ॥
आस्तीकाय जरत्कारुर्ददौ क्षीरोदसन्निधौ ॥ विभाण्डको ददौ मेरावृष्यशृङ्गाय धीमते ॥ ५५ ॥ शिवः कणादमुनये गौतमाय
ददौ मुने ॥ सूर्य्यश्च याज्ञवल्क्याय तथा कात्यायनाय च ॥ ५६ ॥ शेषः पाणिनये चैव भरद्वाजाय धीमते ॥ ददौ शाकटायनाय
सुतले बलिसंसदि ॥ ५७ ॥ चतुर्लक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम् ॥ यदि स्यात्सिद्धमन्त्रो हि बृहस्पतिसमो भवेत् ॥ ५८ ॥
कवचं शृणु विप्रेन्द्र यद्दत्तं विधिना पुरा ॥ विश्वश्रेष्ठं विश्वजयं भृगवे गन्धमादने ॥ ५९ ॥ भृगुरुवाच ॥ ब्रह्मन्ब्रह्मविदां श्रेष्ठ ब्रह्म
ज्ञानविशारद ॥ सर्वज्ञ सर्वजनक सर्वपूजकपूजित ॥ ६० ॥ सरस्वत्याश्च कवचं ब्रूहि विश्वजयं प्रभो ॥ अयातयाममन्त्राणां समूहो
यत्र संयुतः ॥ ६१ ॥ ब्रह्मोवाच ॥ शृणु वत्स प्रवक्ष्यामि कवचं सर्वकामदम् ॥ श्रुतिसारं श्रुतिसुखं श्रुत्युक्तं श्रुतिपूजितम् ॥ ६२ ॥
उक्तं कृष्णेन गोलोके मह्यं वृन्दावने वने ॥ रासेश्वरेण विभुना रासे वै रासमण्डले ॥ ६३ ॥ अतीव गोपनीयं च कल्पवृक्षसमं
परम् ॥ अश्रुताद्भुतमन्त्राणां समूहैश्च समन्वितम् ॥ ६४ ॥ यद्धृत्वा पठनाद्ब्रह्मन्बुद्धिमांश्च बृहस्पतिः ॥ यद्धृत्वा भगवाञ्छुक्रः
सर्वदैत्येषु पूजितः ॥ ६५ ॥ पठनाद्धारणाद्वाग्मी कवीन्द्रो वाल्मिकी मुनिः ॥ स्वायम्भुवो मनुश्चैव यद्धृत्वा सर्वपूजितः ॥ ६६ ॥
कणादो गौतमः कण्वः पाणिनिः शाकटायनः ॥ ग्रन्थं चकार यद्धृत्वा दक्षः कात्यायनः स्वयम् ॥ ६७ ॥ धृत्वा वेदविभागं च
पुराणान्यखिलानि च ॥ चकार लीलामात्रेण कृष्णद्वैपायनः स्वयम् ॥ ६८ ॥ शातातपश्च संवर्त्तो वसिष्ठश्च पराशरः ॥ यद्धृत्वा
पठनाद्ग्रन्थं याज्ञवल्क्यश्चकार सः ॥ ६९ ॥ ऋष्यशृङ्गो भरद्वाजश्चास्तीको देवलस्तथा ॥ जैगीषव्योऽथ जाबालिर्यद्धृत्वा सर्व
पूजितः ॥ ७० ॥ कवचस्यास्य विप्रेन्द्र ऋषिरेष प्रजापतिः ॥ स्वयं बृहस्पतिश्छन्दो देवो रासेश्वरः प्रभुः ॥७१॥ सर्वतत्त्वपरिज्ञाने
सर्वार्थेऽपि च साधने ॥ कवितासु च सर्वासु विनियोगः प्रकीर्त्तितः ॥ ७२ ॥ ॐ ह्रीं सरस्वत्यै स्वाहा शिरो मे पातु सर्वतः ॥

श्रीं वाग्देवतायै स्वाहा भालं मे सर्वदाऽवतु ॥ ७३ ॥ ॐ सरस्वत्यै स्वाहेति श्रोत्रं पातु निरन्तरम् ॥ ॐ श्रीं ह्रीं भारत्यै स्वाहा
नेत्रयुग्मं सदाऽवतु ॥ ७४ ॥ ॐ ह्रीं वाग्वादिन्यै स्वाहा नासां मे सर्वतोऽवतु ॥ ह्रीं विद्याधिष्ठातृदेव्यै स्वाहा श्रोत्रं सदाऽवतु ॥
॥ ७५ ॥ ॐ श्रीं ह्रीं ब्राह्म्यै स्वाहेति दन्तपंक्तीः सदाऽवतु ॥ ऐमित्येकाक्षरो मन्त्रो मम कण्ठं सदाऽवतु ॥ ७६ ॥ ॐ
श्रीं ह्रीं पातु मे ग्रीवां स्कन्धं मे श्रीं सदाऽवतु ॥ श्रीं विद्याधिष्ठातृदेव्यै स्वाहा वक्षः सदाऽवतु ॥ ७७ ॥ ॐ ह्रीं विद्यास्वरूपायै
स्वाहा मे पातु नाभिकाम् ॥ ॐ ह्रीं ह्रीं वाण्यै स्वाहेति मम पृष्ठं सदाऽवतु ॥ ७८ ॥ ॐ सर्ववर्णात्मिकायै पादयुग्मं सदाऽवतु ॥
ॐ रागाधिष्ठातृदेव्यै सर्वाङ्गं मे सदाऽवतु॥७९॥ ॐ सर्वकण्ठवासिन्यै स्वाहा प्राच्यां सदाऽवतु ॥ ॐ ह्रीं जिह्वाग्रवासिन्यै स्वाहाऽग्नि
दिशि रक्षतु ॥ ८० ॥ ॐ ऐं ह्रीं श्रीं सरस्वत्यै बुधजनन्यै स्वाहा ॥ सततं मन्त्रराजोऽयं दक्षिणे मां सदाऽवतु ॥ ८१ ॥
ॐ ह्रीं श्रीं त्र्यक्षरो मन्त्रो नैर्ऋत्यां मे सदाऽवतु ॥ कविजिह्वाग्रवासिन्यै स्वाहा मां वारुणेऽवतु ॥ ८२ ॥ ॐ सदम्बिकायै स्वाहा
वायव्ये मां सदाऽवतु ॥ ॐ गद्यपद्यवासिन्यै स्वाहा मामुत्तरेऽवतु ॥ ८३ ॥ ॐ सर्वशास्त्रवासिन्यै स्वाहैशान्यां सदाऽवतु ॥ ॐ
सर्वपूजितायै स्वाहा चोर्ध्वं सदाऽवतु ॥ ८४ ॥ ऐं ह्रीं पुस्तकवासिन्यै स्वाहाऽधो मां सदाऽवतु ॥ ॐ ग्रन्थबीजरूपायै स्वाहा
मां सर्वतोऽवतु ॥ ८५ ॥ इति ते कथितं विप्र सर्वमन्त्रौघविग्रहम् ॥ इदं विश्वजयं नाम कवचं ब्रह्मरूपकम् ॥ ८६ ॥ पुरा
श्रुतं धर्मवक्त्रात्पर्वते गन्धमादने ॥ तव स्नेहान्मयाऽऽख्यातं प्रवक्तव्यं न कस्यचित् ॥ ८७ ॥ गुरुमभ्यर्च्य विधिवद्वस्त्रालङ्कार
चन्दनैः ॥ प्रणम्य दण्डवद्भूमौ कवचं धारयेत्सुधीः ॥ ८८ ॥ पञ्चलक्षजपेनैव सिद्धं तु कवचं भवेत् ॥ यदि स्यात्सिद्धकवचो बृह
स्पतिसमो भवेत ॥ ८९ ॥ महावाग्मी कवीन्द्रश्च त्रैलोक्यविजयी भवेत् ॥ शक्नोति सर्वं जेतुं स कवचस्य प्रभावतः ॥९०॥
इदं ते काण्वशाखोक्तं कथितं कवचं मुने॥स्तोत्रं पूजाविधानं च ध्यानं वै वन्दनं तथा॥९१॥इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृ
तिखण्डे नारदनारायणसंवादे सरस्वतीकवचं नाम चतुर्थोऽध्यायः ॥ ४ ॥ नारायण उवाच ॥ वाग्देवतायाः स्तवनं श्रूयतां सर्व

कामदम् ॥ महामुनिर्याज्ञवल्क्यो येन तुष्टाव तां पुरा॥१॥गुरुशापाच्च स मुनिर्हतविद्यो बभूव ह ॥ तदाऽऽजगाम दुःखार्तो रविस्थानं
च पुण्यदम् ॥ २ ॥ संप्राप्य तपसा सूर्य्यं कोणार्के दृष्टिगोचरे ॥ तुष्टाव सूर्य्यं शोकेन रुरोद च पुनः पुनः ॥ ३ ॥ सूर्य्यस्तं पाठ
यामास वेदवेदाङ्गमीश्वरः ॥ उवाच स्तुहि वाग्देवीं भक्त्या च स्मृतिहेतवे ॥ ४ ॥ तमित्युक्त्वा दीननाथो ह्यन्तर्द्धानं जगाम सः ॥
मुनिः स्नात्वा च तुष्टाव भक्तिनम्रात्मकन्धरः ॥५॥ याज्ञवल्क्य उवाच ॥ कृपां कुरु जगन्मातर्मामेवं हततेजसम् ॥ गुरुशापात्स्मृति
भ्रष्टं विद्याहीनं च दुःखितम्॥६॥ ज्ञानं देहि स्मृतिं देहि विद्यां विद्याधिदेवते ॥ प्रतिष्ठां कवितां देहि शक्तिं शिष्यप्रबोधिकाम्॥७॥
ग्रन्थनिर्मितिशक्तिं च सच्छिष्यं सुप्रतिष्ठितम् ॥ प्रतिभां सत्सभायां च विचारक्षमतां शुभाम् ॥ ८ ॥ लुप्तां सर्वां दैववशान्नवां कुरु
पुनः पुनः ॥ यथाऽङ्कुरं जनयति भगवान्योगमायया ॥ ९ ॥ ब्रह्मस्वरूपा परमा ज्योतीरूपा सनातनी ॥ सर्वविद्याधिदेवी या तस्यै
वाण्यै नमो नमः ॥ १० ॥ यया विना जगत्सर्वं शश्वज्जीवन्मृतं सदा ॥ ज्ञानाधिदेवी या तस्यै सरस्वत्यै नमो नमः ॥ ११ ॥
यया विना जगत्सर्वं मूकमुन्मत्तवत्सदा ॥ वागधिष्ठातृदेवी या तस्यै वाण्यै नमो नमः ॥ १२ ॥ हिमचन्दनकुन्देन्दुकुमुदाम्भोज
सन्निभा ॥ वर्णाधिदेवी या तस्यै चाक्षरायै नमो नमः ॥ १३ ॥ विसर्गबिन्दुमात्राणां यदधिष्ठानमेव च ॥ इत्थं त्वं गीयसे स
द्भिर्भारत्यै ते नमो नमः ॥१४॥ यया विनाऽत्र संख्याकृत्संख्यां कर्त्तुं न शक्नुते ॥ कालसंख्यास्वरूपा या तस्यै देव्यै नमो नमः ॥
॥ १५ ॥ व्याख्यास्वरूपा या देवी व्याख्याधिष्ठातृदेवता ॥ भ्रमसिद्धान्तरूपा या तस्यै देव्यै नमो नमः ॥ १६ ॥ स्मृतिशक्तिज्ञान
शक्तिबुद्धिशक्तिस्वरूपिणी ॥ प्रतिभाकल्पनाशक्तिर्या च तस्यै नमो नमः ॥ १७ ॥ सनत्कुमारो ब्रह्माणं ज्ञानं पप्रच्छ यत्र वै ॥
बभूव जडवत्सोऽपि सिद्धान्तं कर्त्तुमक्षमः ॥ १८॥ तदाऽऽजगाम भगवानात्मा श्रीकृष्ण ईश्वरः ॥ उवाच सत्तमं स्तोत्रं वाण्या इति
विधिं तदा ॥ १९ ॥ स च तुष्टाव तां ब्रह्मा चाज्ञया परमात्मनः ॥ चकार तत्प्रसादेन तदा सिद्धान्तमुत्तमम् ॥ २० ॥ यदाऽप्य
नन्तं पप्रच्छ ज्ञानमेकं वसुन्धरा ॥ बभूव मूकवत्सोऽपि सिद्धान्तं कर्तुमक्षमः ॥२१॥ तदा त्वां च स तुष्टाव संत्रस्तः कश्यपाज्ञया ॥

ततश्चकार सिद्धान्तं निर्मलं भ्रमभञ्जनम् ॥ २२ ॥ व्यासः पुराणसूत्रं च समपृच्छत वाल्मिकिम् ॥ मौनीभूतः स सस्मार त्वामेव
जगदंबिकाम् ॥२३॥ तदा चकार सिद्धान्तं त्वद्वरेण मुनीश्वरः ॥ स प्राप निर्मलं ज्ञानं प्रमादध्वंसकारणम् ॥२४॥ पुराणसूत्रं श्रुत्वा
स व्यासः कृष्णकलोद्भवः॥त्वां सिषेवे च दध्यौ च शतवर्षं च पुष्करे ॥ तदा त्वतो वरं प्राप्य स कवीन्द्रो बभूव ह ॥२५॥ तदा वे
दविभागं च पुराणानि चकार ह ॥ यदा महेन्द्रे पप्रच्छ तत्त्वज्ञानं शिवा शिवम् ॥ २६ ॥ क्षणं त्वामेव संचिन्त्य तस्यै ज्ञानं ददौ
विभुः ॥ पप्रच्छ शब्दशास्त्रं च महेन्द्रश्च बृहस्पतिम् ॥ २७ ॥ दिव्यं वर्षसहस्रं च स त्वां दध्यौ च पुष्करे ॥ तदा त्वत्तो वरं
प्राप्य दिव्यं वर्षसहस्रकम् ॥ उवाच शब्दशास्त्रं च तदर्थं च सुरेश्वरम् ॥ २८ ॥ अध्यापिताश्च यैः शिष्या यैरधीतं मुनीश्वरैः ॥ ते
च त्वां परिसंचिन्त्य प्रवर्त्तन्ते सुरेश्वरि ॥ २९ ॥ त्वं संस्तुता पूजिता च मुनीन्द्रमनुमानवैः ॥ दैत्येन्द्रैश्च सुरैश्चापि ब्रह्मविष्णु
शिवादिभिः ॥ ३० ॥ जडीभूतः सहस्रास्यः पञ्चवक्रश्चतुर्मुखः ॥ यां स्तोतुं किमहं स्तौमि तामेकास्येन मानवः ॥ ३१ ॥ इत्युक्त्वा
याज्ञवल्क्यश्च भक्तिनम्रात्मकन्धरः ॥ प्रणनाम निराहारो रुरोद च मुहुर्मुहुः ॥ ३२ ॥ तदा ज्योतिस्स्वरूपा सा तेना
दृष्टाऽप्युवाच तम् ॥ सुकवीन्द्रो भवेत्युक्त्वा वैकुण्ठं च जगाम ह ॥ ३३ ॥ याज्ञवल्क्यकृतं वाणीस्तोत्रं यः संयतः पठेत् ॥
स कवीन्द्रो महावाग्मी बृहस्पतिसमो भवेत् ॥ ३४ ॥ महामूर्खश्च दुर्मेधा वर्षमेकं च यः पठेत् ॥ स पण्डितश्च मेधावी सुकविश्च
भवेद् ध्रुवम् ॥३५॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे प्रकृतिखण्डे नारदनारायणसंवादे याज्ञवल्क्योक्तवाणीस्तवनं नाम पञ्चमोऽध्यायः॥
॥ ५ ॥ नारायण उवाच ॥ सरस्वती सा वैकुण्ठे स्वयं नारायणान्तिके ॥ गङ्गाशापेन कलया कलहाद्भारते सरित् ॥ १ ॥ पुण्यदा
पुण्यजननी पुण्यतीर्थस्वरूपिणी ॥ पुण्यवद्भिर्निषेव्या च स्थितिः पुण्यवतां मुने ॥ २ ॥ तपस्विनां तपोरूपा तपस्याकाररूपिणी ॥
कृतपापेध्मदाहाय ज्वलदग्निस्वरूपिणी ॥ ३ ॥ ज्ञाने सरस्वतीतोये गतं यैर्मानवैर्भुवि ॥ तेषां स्थितिश्च वैकुण्ठे सुचिरं हरिसंस
दि ॥ ४ ॥ भारते कृतपापश्च स्नात्वा तत्रैव लीलया ॥ मुच्यते सर्वपापेभ्यो विष्णुलोके वसेच्चिरम् ॥ ५ ॥ चतुर्दश्यां पौर्णमास्या

मक्षयायां दिनक्षये ॥ ग्रहणे च व्यतीपातेऽन्यस्मिन्पुण्यदिनेऽपि च ॥ ६ ॥ अनुषङ्गेण यः स्नाति हेलया श्रद्धयाऽपि वा ॥ सारूप्यं लभते नूनं वैकुण्ठे स हरेरपि ॥ ७ ॥ सरस्वतीमन्त्रकं च मासमेकं तु यो जपेत् ॥ महामूर्खः कवीन्द्रश्च स भवेन्नात्र संशयः ॥८॥ नित्यं सरस्वतीतोये यः स्नात्वा मुण्डयेन्नरः ॥ न गर्भवासं कुरुते पुनरेव स मानवः ॥ ९ ॥ इत्येवं कथितं किंचिद्भारतीगुण कीर्त्तनम् ॥ सुखदं मोक्षदं सारं किं भूयः श्रोतुमिच्छसि ॥ १० ॥ सौतिरुवाच ॥ नारायणवचः श्रुत्वा नारदो मुनिसत्तमः ॥ पुनः पप्रच्छ सन्देहच्छेदं शौनक सत्वरम् ॥ ११ ॥ नारद उवाच ॥ कथं सरस्वती देवी गङ्गाशापेन भारते ॥ कलया कलहेनैव समभूत्पुण्यदा सरित् ॥१२॥ श्रवणे श्रुतिसाराणां वर्द्धते कौतुकं मम ॥ कथामृतानां नो तृप्तिः केन श्रेयसि तृप्यते ॥१३॥ कथं शशाप सा गङ्गा पूजितां तां सरस्वतीम् ॥ शान्तासत्त्वस्वरूपा च पुण्यदा सर्वदा नृणाम् ॥१४॥ तेजस्विन्योर्द्वयोर्वादकारणं श्रुतिसुन्दरम् ॥ सुदुर्लभं पुराणेषु तन्मे व्याख्यातुमर्हसि ॥ १५ ॥ नारायण उवाच ॥ शृणु नारद वक्ष्यामि कथामेतां पुरातनीम् ॥ यस्याः स्मरणमात्रेण सर्वपापात्प्रमुच्यते ॥ १६ ॥ लक्ष्मीस्सरस्वती गङ्गा तिस्रो भार्य्या हरेरपि ॥ प्रेम्णः समास्तास्तिष्ठन्ति सततं हरिसन्निधौ ॥ १७ ॥ चकार सैकदा गङ्गा विष्णोर्मुखनिरीक्षणम्॥सस्मिता च सकामा च सकटाक्षं पुनः पुनः॥१८॥ विभुर्जहास तद्वक्त्रं निरीक्ष्य च मुदा क्षणम् ॥ क्षमां चकार तद्दृष्ट्वा लक्ष्मीर्नैव सरस्वती॥१९॥बोधयामास तां पद्मा सत्त्वरूपा च सस्मिता ॥क्रोधाविष्टा च सा वाणी न च शान्ता बभूव ह ॥ २० ॥ उवाच गङ्गां भर्त्तारं रक्तास्या रक्तलोचना ॥ कम्पिता कोपवेगेन शश्वत्प्रस्फुरिताधरा ॥२१॥ सरस्वत्युवाच ॥ सर्वत्र समताबुद्धिः सद्भर्तुः कामिनीः प्रति ॥ धर्मिष्ठस्य वरिष्ठस्य विपरीता खलस्य च ॥ २२ ॥ ज्ञातं सौभाग्यमधिकं गंगायां ते गदाधर ॥ कमलायां च तत्तुल्यं न च किंचिन्मयि प्रभो ॥२३॥ गंगायाः पद्मया सार्द्धं प्रीतिश्चापि सुसम्मता ॥ क्षमां चकार तेनेदं विपरीतं हरिप्रिया ॥ २४ ॥ किं जीवनेन मेऽत्रैव दुर्भगायाश्च साम्प्रतम् ॥ निष्फलं जीवनं तस्या या पत्युः प्रेमवञ्चिता ॥२५॥ त्वां सर्वेशं सत्त्वरूपं ये वदन्ति मनीषिणः ॥ ते च मूर्खा न वेदज्ञा न जानन्ति मतिं तव ॥२६॥ सरस्वतीवचः श्रुत्वा दृष्ट्वा

तां कोपसंयुताम् ॥ मनसा तु समालोच्य स जगाम बहिः सभाम् ॥ २७ ॥ गते नारायणे गंगामवोचन्निर्भयं रुषा ॥ रागाधिष्ठातृ
देवी सा वाक्यं श्रवणदुःसहम् ॥ २८ ॥ हे निर्लज्जे सकामे त्वं स्वामिगर्वं करोषि किम् ॥ अधिकं स्वामिसौभाग्यं विज्ञापयितुमि
च्छसि ॥ २९ ॥ मानहानिं करिष्यामि तवाद्य हरिसन्निधौ ॥ किं करिष्यति ते कान्तो मम वै कान्तवल्लभे ॥३०॥ इत्येवमुक्त्वा गंगा
या जिघृक्षुं केशमुद्यताम् ॥ वारयामास तां पद्मा मध्यदेशस्थिता सती ॥ ३१ ॥ शशाप वाणी तां पद्मां महाकोपवती सती ॥
वृक्षरूपा सरिद्रूपा भविष्यसि न संशयः ॥ ३२ ॥ विपरीतं यतो दृष्ट्वा किंचिन्नो वक्तुमर्हसि ॥ सन्तिष्ठसि सभामध्ये यथा वृक्षो
यथा सरित् ॥ ३३ ॥ शापं श्रुत्वा च सा देवी न शशाप चुकोप न ॥ तत्रैव दुःखिता तस्थौ वाणीं धृत्वा करेण च ॥ ३४ ॥
अत्युद्धतां च तां दृष्ट्वा कोपप्रस्फुरितानना ॥ उवाच गंगा तां देवीं पद्मां पद्मविलोचना ॥ ३५ ॥ गंगोवाच ॥ त्वमुत्सृज महोग्रां तां
पद्मे किं मे करिष्यति ॥ वाग्दुष्टा वागधिष्ठात्री देवीयं कलहप्रिया ॥ ३६ ॥ यावती योग्यताऽस्याश्च यावती शक्तिरेव वा ॥ तथा
करोतु वादं च मया सार्द्धं सुदुर्मुखा ॥ ३७ ॥ स्वबलं यन्मम बलं विज्ञापयितुमर्हतु ॥ जानन्तु सर्वे ह्युभयोः प्रभावं विक्रमं सति
॥ ३८ ॥ इत्येवमुक्त्वा सा देवी वाण्यै शापं ददाविति ॥ सरित्स्वरूपा भवतु सा या त्वामशपद्रुषा ॥ ३९ ॥ अधो मर्त्यं सा प्रयातु
सन्ति यत्रैव पापिनः ॥ कलौ तेषां च पापांशं लभिष्यति न संशयः ॥ ४० ॥ इत्येवं वचनं श्रुत्वा तां शशाप सरस्वती ॥
त्वमेव यास्यसि महीं पापिपापं लभिष्यसि ॥ ४१ ॥ एतस्मिन्नन्तरे तत्र भगवानाजगाम ह ॥ चतुर्भुजश्चतुर्भिश्च
पार्षदैश्च चतुर्भुजैः ॥ ४२ ॥ सरस्वतीं करे धृत्वा वासयामास वक्षसि ॥ बोधयामास सर्वज्ञः सर्वज्ञानं पुरा
तनम् ॥ ४३ ॥ श्रुत्वा रहस्यं तासां च शापस्य कलहस्य च ॥ उवाच दुःखितास्ताश्च वाक्यं सामयिकं विभुः ॥ ४४ ॥ श्रीभगवा
नुवाच ॥ लक्ष्मि त्वं कलया गच्छ धर्मध्वजगृहं शुभे ॥ अयोनिसम्भवा भूमौ तस्य कन्या भविष्यसि ॥ ४५ ॥ तत्रैव दैवदोषेण
वृक्षत्वं च लभिष्यसि ॥ मदंशस्यासुरस्यैव शङ्खचूडस्य कामिनी ॥ ४६ ॥ भूत्वा पश्चाच्च मत्पत्नी भविष्यसि न संशयः ॥

त्रैलोक्यपावनी नाम्ना तुलसीति च भारते ॥ ४७ ॥ कलया च सरिद्भूत्वा शीघ्रं गच्छ वरानने ॥ भारतं भारतीशापान्नाम्ना पद्मा
वती भव ॥ ४८ ॥ गङ्गे यास्यसि चांशेन पश्चात्त्वं विश्वपावनी ॥ भारतं भारतीशापात्पापदाहाय देहिनाम् ॥ ४९ ॥ भगीरथस्य
तपसा तेन नीता सुदुष्करात् ॥ नाम्ना भागीरथी पूता भविष्यसि महीतले ॥ ५० ॥ मदंशस्य समुद्रस्य जाया जाये ममाज्ञया ॥
मत्कलांशस्य भूपस्य शन्तनोश्च सुरेश्वरि ॥ ५१ ॥ गङ्गाशापेन कलया भारतं गच्छ भारति ॥ कलहस्य फलं भुङ्क्ष्व सप
त्नीभ्यां सहाच्युते ॥ ५२ ॥ स्वयं च ब्रह्मसदनं ब्रह्मणः कामिनी भव ॥ गङ्गा यातु शिवस्थानमत्र पद्मैव तिष्ठतु ॥ ५३ ॥ शान्ता
च क्रोधरहिता मद्भक्ता मत्स्वरूपिणी ॥ महासाध्वी महाभागा सुशीला धर्मचारिणी ॥ ५४ ॥ यदंशकलया सर्वा धर्मिष्ठाश्च पति
व्रताः ॥ शान्तरूपाः सुशीलाश्च प्रतिविश्वेषु योषितः॥५५॥ तिस्रो भार्य्यास्त्रयः श्यालास्त्रयो भृत्याश्च बान्धवाः ॥ ध्रुवं वेदविरुद्धाश्च
न ह्येते मङ्गलप्रदाः ॥ ५६ ॥ स्त्री पुंवच्च गृहे येषां गृहिणां स्त्रीवशः पुमान् ॥ निष्फलं जन्म वै तेषामशुभं च पदे पदे ॥ ५७ ॥
मुखदुष्टा योनिदुष्टा यस्य स्त्री कलहप्रिया ॥ अरण्यं तेन गन्तव्यं महारण्यं गृहाद्वरम् ॥ ५८ ॥ जनानां च स्थलानां च पुराणां
प्राप्तिरेव च ॥ सततं सुलभा तत्र न तेषां तद्गृहेऽपि च ॥ ५९ ॥ वरमग्नौ स्थितिर्हिंस्रजन्तूनां सन्निधौ सुखम् ॥ ततोऽपि दुःखं
पुंसां च दुष्टस्त्रीसन्निधौ ध्रुवम् ॥ ६० ॥ व्याधिज्वाला विषज्वाला वरं पुंसां वरानने ॥ दुष्टस्त्रीणां मुखज्वाला मरणादतिरिच्यते ॥
॥ ६१ ॥ पुंसश्च स्त्रीजितस्येह जीवितं निष्फलं ध्रुवम् ॥ यदह्ना कुरुते कर्म न तस्य फलभाग्भवेत् ॥ ६२ ॥ स निन्दितोऽत्र
सर्वत्र परत्र नरकं व्रजेत् ॥ यशःकीर्तिविहीनो यो जीवन्नपि मृतो हि सः ॥ ६३ ॥ बह्वीनां च सपत्नीनां नैकत्र श्रेयसी स्थितिः ॥
एकभार्य्यः सुखी नैव बहुभार्य्यः कदाचन ॥ ६४ ॥ गच्छ गंगे शिवस्थानं ब्रह्मस्थानं सरस्वति ॥ अत्र तिष्ठतु मद्गेहे सुशीला कम
लालया ॥६५॥ सुसाध्या यस्य पत्नी च सुशीला च पतिव्रता॥इह स्वर्गसुखं तस्य धर्ममोक्षौ परत्र च॥६६॥पतिव्रता यस्य पत्नी
स च मुक्तः शुचिः सुखी ॥ जीवन्मृतोऽशुचिर्दुःखी दुश्शीलापतिरेव यः ॥ ६७ ॥ इत्युक्त्वा जगतां नाथो विरराम च नारद ॥

अत्युच्चै रुरुदुर्देव्यः समालिङ्ग्य परस्परम् ॥ ६८ ॥ ताश्च सर्वाः समालोच्य क्रमेणोचुः सदीश्वरम् ॥ कम्पिताः साश्रुनेत्राश्च
शोकेन च भयेन च ॥ ६९ ॥ सरस्वत्युवाच ॥ प्रायश्चित्तं देहि नाथ दुष्टायां जन्मशोधकम् ॥ सत्स्वामिना परित्यक्ताः कुत्र जीवन्ति
काः स्त्रियः ॥७०॥ देहत्यागं करिष्यामि ध्रुवं योगेन भारते ॥ अत्युच्चतो निपतनं प्राप्तुमर्हति निश्चितम् ॥७१॥ गंगोवाच ॥
अहं केनापराधेन त्वया त्यक्ता जगत्पते ॥ देहत्यागं करिष्यामि निर्दोषाया वधं लभ ॥ ७२ ॥ निर्दोषकामिनीत्यागं कुरुते
यो जनो भवे ॥ स याति नरकं कल्पं किं ते सर्वेश्वरस्य वा ॥ ७३ ॥ लक्ष्मीरुवाच ॥ नाथ सत्त्वस्वरूपस्त्वं कोपः कथमहो
तव ॥ प्रसादं कुरु चास्मभ्यं सदीशस्य क्षमा वरा ॥ ७४ ॥ भारतं भारतीशापाद्यास्यामि कलया यदि ॥ कतिकालं स्थितिस्तत्र
कदा द्रक्ष्यामि ते पदम् ॥७५॥ दास्यन्ति पापिनः पापं मह्यं स्नानावगाहनात् ॥ केन तस्माद्विमुक्ताऽहमागमिष्यामि ते पदम्॥७६॥
कलया तुलसीरूपा धर्मध्वजसुता सती ॥ भूत्वा कदा लभिष्यामि त्वत्पादाम्बुजमच्युत ॥ ७७ ॥ वृक्षरूपा भविष्यामि तदधिष्ठातृदेवता
॥ मामुद्धरिष्यसि कदा तन्मे ब्रूहि कृपानिधे ॥ ७८ ॥ गंगा सरस्वतीशापाद्यदि यास्यति भारतम् ॥ शापेन मुक्ता
पापाच्च कदा त्वां वा लभिष्यति ॥ ७९ ॥ गंगाशापेन सा वाणी यदि यास्यति भारतम् ॥ कदा शापाद्विनिर्मुच्य लभिष्यति
पदं तव ॥ ८० ॥ तां वाणीं ब्रह्मसदनं गंगां वा शिवमन्दिरम् ॥ गन्तुं वदसि हे नाथ तत्क्षमस्व च ते वचः ॥ ८१ ॥ इत्युक्त्वा
कमला कान्तपदं धृत्वा ननाम च ॥ सुकेशैर्वेष्टयित्वा च रुरोद च पुनः पुनः ॥८२॥ उवाच पद्मनाभस्तां प्रभां कृत्वा स्ववक्षसि॥
ईषद्धासः प्रसन्नास्यो भक्तानुग्रहकारकः ॥ ८३ ॥ नारायण उवाच ॥ त्वद्वाक्यमाचरिष्यामि स्ववाक्यं च सुरेश्वरि ॥ समतां च
करिष्यामि शृणु तत्क्रममेव च ॥ ८४ ॥ भारती यातु कलया सरिद्रूपा च भारतम् ॥ अर्द्धांशा ब्रह्मसदनं स्वयं तिष्ठतु
मद्गृहे ॥ ८५ ॥ भगीरथेन नीता सा गंगा यास्यति भारतम् ॥ पूतं कर्तुं त्रिभुवनं स्वयं तिष्ठतु मद्गृहे ॥ ८६ ॥ तत्रैव चन्द्रमौलेश्च
मौलिं प्राप्स्यति दुर्लभम् ॥ ततः स्वभावतः पूताऽप्यतिपूता भविष्यति ॥ ८७ ॥ कलांशांशेन गच्छ त्वं भारते कमलोद्भवे ॥ पद्मा

वती सरिद्रूपा तुलसीवृक्षरूपिणी ॥ ८८ ॥ कलेः पञ्चसहस्रे च गते वर्षे च मोक्षणम् ॥ युष्माकं सरितां भूयो मद्गृहे चागमिष्यथ ॥ ॥ ८९ ॥ सम्पदां हेतुभूता च विपत्तिः सर्वदेहिनाम् ॥ विना विपत्तेर्महिमा केषां पद्मे भवेद्ध्रुवे ॥ ९० ॥ मन्मन्त्रोपासकानां च सतां स्नानावगाहनात् ॥ युष्माकं मोक्षणं पापात्पापिस्पर्शनहेतुकात् ॥ ९१ ॥ पृथिव्यां यानि तीर्थानि सन्त्यसंख्यानि सुन्दरि ॥ भविष्यन्ति च पूतानि मद्भक्तस्पर्शदर्शनात् ॥ ९२ ॥ मन्मन्त्रोपासका भक्ता भ्रमन्ते भारते सति ॥ पूतं कर्तुं भारतं च सुपवित्रां वसुन्धराम् ॥ ९३ ॥ मद्भक्ता यत्र तिष्ठन्ति पादं प्रक्षालयन्ति च ॥ तत्स्थानं च महातीर्थं सुपवित्रं भवेद्ध्रुवम् ॥ ९४ ॥ स्त्रीघ्नो गोघ्नः कृतघ्नश्च ब्रह्मघ्नो गुरुतल्पगः ॥ जीवन्मुक्तो भवेत्पूतो मद्भक्तस्पर्शदर्शनात् ॥ ९५ ॥ एकादशीविहीनश्च सन्ध्याहीनोऽपि नास्तिकः ॥ वृषवाहो भवेत्पूतो मद्भक्तस्पर्शदर्शनात् ॥ ९६ ॥ असिजीवी मषीजीवी धावकः शूद्रयाजकः ॥ वृषवाहो भवेत्पूतो मद्भक्तस्पर्शदर्शनात् ॥ ९७ ॥ विश्वासघाती मित्रघ्नो मिथ्यासाक्ष्यप्रदायकः ॥ न्यासहारी भवेत्पूतो मद्भक्तस्पर्शदर्शनात् ॥ ९८ ॥ ऋणग्रस्तो वार्द्धुषिको जारजः पुंश्चलीपतिः ॥ पूतश्च पुंश्चलीपुत्रो मद्भक्तस्पर्शदर्शनात् ॥ ९९ ॥ शूद्राणां सूपकारश्च देवलो ग्रामयाजकः ॥ अदीक्षितो भवेत्पूतो मद्भक्तस्पर्शदर्शनात् ॥ १०० ॥ अश्वत्थघातकश्चैव मद्भक्तानां च निन्दकः ॥ अनिवेदितभोजी च पूतो मद्भक्तदर्शनात् ॥ १०१ ॥ मातरं पितरं भार्य्यां भ्रातरं तनयं सुताम् ॥ गुरोः कुलं च भगिनीं वंशहीनं च बान्धवम् ॥ १०२ ॥ श्वश्रूं च श्वशुरं चैव यो न पुष्णाति नारद ॥ स महापातकी पूतो मद्भक्तस्पर्शदर्शनात् ॥ १०३ ॥ देवद्रव्यापहारी च विप्रद्रव्यापहारकः ॥ लाक्षालोहरसानां च विक्रेता दुहितुस्तथा ॥ १०४ ॥ महापातकिनश्चैते शूद्राणां शवदाहकाः ॥ भवेयुरेते पूताश्च मद्भक्तस्पर्शदर्शनात् ॥ १०५ ॥ लक्ष्मीरुवाच ॥ भक्तानां लक्षणं ब्रूहि भक्तानुग्रहकारक ॥ येषां सन्दर्शनस्पर्शात्सद्यः पूता नराधमाः ॥ १०६ ॥ हरिभक्तिविहीनाश्च महाहङ्कारसंयुताः ॥ स्वप्रशंसारता धूर्त्ताः शठा वै साधुनिन्दकाः ॥ १०७ ॥ पुनन्ति सर्वतीर्थानि येषां स्नानावगाहनात् ॥ येषां च पादरजसा पूता पादोदकान्मही ॥ १०८ ॥ येषां स

न्दर्शनं स्पर्शं देवा वाञ्छन्ति भारते ॥ सर्वेषां परमो लाभो वैष्णवानां समागमः ॥ १०९ ॥ न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥
ते पुनन्त्युरुकालेन विष्णुभक्ताः क्षणादहो ॥ ११० ॥ सौतिरुवाच ॥ महालक्ष्मीवचः श्रुत्वा लक्ष्मीकान्तश्च सस्मितः ॥
निगूढतत्त्वं कथितुमृषिश्रेष्ठोपचक्रमे ॥ १११ ॥ श्रीनारायण उवाच ॥ भक्तानां लक्षणं लक्ष्मि गूढं श्रुतिपुराणयोः ॥ पुण्यस्वरूपं
पापघ्नं सुखदं भुक्तिमुक्तिदम् ॥ ११२ ॥ सारभूतं गोपनीयं न वक्तव्यं खलेषु च ॥ त्वां पवित्रां प्राणतुल्यां कथयामि निशामय
॥ ११३ ॥ गुरुवक्त्राद्विष्णुमन्त्रो यस्य कर्णे विशेद्वरः ॥ वदन्ति वेदवेदाङ्गात्तं पवित्रं नरोत्तमम् ॥ ११४ ॥ पुरुषाणां शतं पूर्वं पूतं
तज्जन्ममात्रतः ॥ स्वर्गस्थं नरकस्थं वा मुक्तिं प्राप्नोति तत्क्षणात् ॥ ११५ ॥ यैः कैश्चिद्यत्र वा जन्म लब्धं येषु च जंतुषु ॥ जीवन्मुक्तास्ते
च पूता यान्ति काले हरेः पदम् ॥ ११६ ॥ मद्भक्तियुक्तो मत्पूजानियुक्तो मद्गुणान्वितः ॥ मद्गुणश्लाघनीयश्च मन्निविष्टश्च
सन्ततम् ॥ ११७ ॥ मद्गुणश्रुतिमात्रेण सानन्दः पुलकान्वितः ॥ सगद्गदः साश्रुनेत्रः स्वात्मविस्मृतिरेव च ॥ ११८ ॥ न वाञ्छन्ति
सुखं मुक्तिं सालोक्यादि चतुष्टयम् ॥ ब्रह्मत्वममरत्वं वा तद्वाञ्छा मम सेवने ॥ ११९ ॥ इन्द्रत्वं च मनुत्वं च देवत्वं च सुदुर्लभम् ॥
स्वर्गराज्यादिभोगं च स्वप्नेऽपि न हि वाञ्छति ॥ १२० ॥ ब्रह्माण्डानि विनश्यन्ति देवा ब्रह्मादयस्तथा ॥ कल्याणभक्तियुक्तश्च
मद्भक्तो न प्रणश्यति ॥ १२१ ॥ भ्रमन्ति भारते भक्ता लब्ध्वा जन्म सुदुर्लभम् ॥ तेऽपि यान्ति महीं पूतां कृत्वा तीर्थं
ममालयम् ॥ १२२ ॥ इत्येतत्कथितं सर्वं कुरु पद्मे यथोचितम् ॥ तदाज्ञाताश्च ताश्चक्रुर्हरिस्तस्थौ सुखासने ॥ १२३ ॥ इति
श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे सरस्वत्युपाख्यानं नाम षष्ठोऽध्यायः ॥ ६ ॥ नारायण उवाच ॥
पुण्यक्षेत्रे ह्याजगाम भारते सा सरस्वती ॥ गङ्गाशापेन कलया स्वयं तस्थौ हरेः पदे ॥ १ ॥ भारती भारतं गत्वा ब्राह्मी च
ब्रह्मणः प्रिया ॥ वागधिष्ठातृदेवी सा तेन वाणी च कीर्त्तिता ॥ २ ॥ सर्वं विश्वं परिव्याप्य स्रोतस्येव हि दृश्यते ॥ हरिः सरस्सु
तस्येयं तेन नाम्ना सरस्वती ॥ ३ ॥ सरस्वती नदी सा च तीर्थरूपाऽतिपावनी ॥ पापिपापेध्मदाहाय ज्वलदग्निस्व

रूपिणी ॥ ४ ॥ पश्चाद्भगीरथानीता महीं भागीरथी शुभा ॥ समाजगाम कलया वाणीशापेन नारद ॥ ५ ॥ तत्रैव समये तां
च दधार शिरसा शिवः ॥ वेगं सोढुमशक्ताया भुवः प्रार्थनया विभुः ॥ ६ ॥ पद्मा जगाम कलया सा च पद्मावती
नदी ॥ भारतं भारतीशापात्स्वयं तस्थौ हरेः पदे ॥ ७ ॥ ततोऽन्यया सा कलया चालभज्जन्म भारते ॥ धर्मध्वजसुता
लक्ष्मीर्विख्याता तुलसीति च ॥ ८ ॥ पुरा सरस्वतीशापात्तत्पश्चाद्धरिशापतः ॥ बभूव वृक्षरूपा सा कलया विश्वपावनी
॥ ९ ॥ कलेः पञ्चसहस्रं च वर्षं स्थित्वा च भारते ॥ जग्मुस्ताश्च सरिद्रूपं विहाय श्रीहरेः पदम् ॥ १० ॥ यानि सर्वाणि
तीर्थानि काशीं वृन्दावनं विना ॥ यास्यन्ति सार्द्धं ताभिश्च हरेर्वैकुण्ठमाज्ञया ॥ ११ ॥ शालग्रामो हरेर्मूर्त्तिर्जगन्नाथश्च भारतम् ॥
कलेर्दशसहस्रान्ते ययौ त्यक्त्वा हरेः पदम् ॥ १२ ॥ वैष्णवाश्च पुराणानि शङ्खाश्च श्राद्धतर्पणम् ॥ वेदोक्तानि च कर्माणि ययुस्तैः
सार्द्धमेव च ॥ १३ ॥ हरिपूजा हरेर्नाम तत्कीर्त्तिगुणकीर्त्तनम् ॥ वेदाङ्गानि च शास्त्राणि ययुस्तैः सार्द्धमेव च ॥ १४ ॥ सत्त्वं च
सत्यं धर्मश्च वेदाश्च ग्राम्यदेवताः ॥ व्रतं तपस्याऽनशनं ययुस्तैः सार्द्धमेव च ॥ १५ ॥ वामाचाररताः सर्वे मिथ्याकापट्यसंयुताः ॥
तुलसीवर्जिता पूजा भविष्यति ततः परम् ॥ १६ ॥ एकादशीविहीनाश्च सर्वे धर्मविवर्जिताः ॥ हरिप्रसङ्गविमुखा भविष्यन्ति
ततः परम् ॥ १७ ॥ शठाः क्रूरा दाम्भिकाश्च महाहङ्कारसंयुताः ॥ चौराश्च हिंसकाः सर्वे भविष्यन्ति ततः परम् ॥ १८ ॥ पुंसां
भेदस्तथा स्त्रीणां विवाहो वादनिर्णयः ॥ स्वस्वामिभेदो वस्तूनां न भविष्यत्यतः परम् ॥ १९ ॥ सर्वे जनाः स्त्रीवशाश्च पुंश्चल्यश्च
गृहे गृहे ॥ तर्जनैर्भर्त्सनैः शश्वत्स्वामिनं ताडयन्ति च ॥ २० ॥ गृहेश्वरी च गृहिणी गृही भृत्याधिकोऽधमः ॥ चेटीभृत्यासमा वध्वः
श्वश्रूश्च श्वशुरस्तथा ॥ २१ ॥ कर्त्तारो बलिनो गेहे योनिसम्बन्धिबान्धवाः ॥ विद्यासम्बन्धिभिः सार्द्धं सम्भाषाऽपि न विद्यते ॥२२॥
यथा परिचिता लोकास्तथा पुंसश्च बान्धवाः ॥ सर्वकर्माक्षमाः पुंसो योषितामाज्ञया विना ॥ २३ ॥ ब्रह्मक्षत्त्रियविट्शूद्रा जात्याचारविनिर्णयः
॥ संध्या च यज्ञसूत्रं च भावलुप्तं न संशयः ॥ २४ ॥ म्लेच्छाचारा भविष्यन्ति वर्णाश्चत्वार एव च ॥ म्लेच्छशास्त्रं

पठिष्यन्ति स्वशास्त्राणि विहाय ते ॥ ब्रह्मक्षत्रविशां वंशाः शूद्राणां सेवकाः कलौ ॥ २५ ॥ सूपकारा भविष्यन्ति धावका वृषवाहकाः ॥ सत्यहीना जनाः सर्वे सस्यहीना च मेदिनी ॥ २६ ॥ फलहीनाश्च तरवोऽपत्यहीनाश्च योषितः ॥ क्षीरहीनास्तथा गावः क्षीरं सर्पिर्विवर्जितम् ॥ २७ ॥ दम्पती प्रीतिहीनौ च गृहिणः सुखवर्जिताः ॥ प्रतापहीना भूपाश्च प्रजाश्च करपीडिताः ॥ २८ ॥ जलहीना नदा नद्यो दीर्घिकाः कन्दरादयः ॥ धर्महीनाः पुण्यहीना वर्णाश्चत्वार एव च ॥ २९ ॥ लक्षेषु पुण्यवान्कोऽपि न तिष्ठति ततः परम् ॥ कुत्सिता विकृताकारा नरा नार्य्यश्च बालकाः ॥ ३० ॥ कुवार्त्ताः कुत्सितपथा भविष्यन्ति ततः परम् ॥ केचिद् ग्रामाश्च नगरा नरशून्या भयानकाः ॥३१॥ केचित्स्वल्पकुटीरेण नरेण च समन्विताः ॥ अरण्यानि भविष्यन्ति ग्रामेषु नगरेषु च ॥ ३२ ॥ अरण्यवासिनः सर्वे जनाश्च करपीडिताः ॥ सस्यानि च भविष्यन्ति तडागेषु नदीषु च ॥ ३३ ॥ क्षेत्राणि सस्यहीनानि प्रकृष्टान्यर्थतः परम् ॥ हीनाः प्रकृष्टा धनिनो बलदर्पसमन्विताः ॥३४॥ प्रकृष्टवंशजा हीना भविष्यन्ति कलौ युगे ॥ अलीकवादिनो धूर्त्ताः शठा वै सत्यवादिनः ॥३५॥ पापिनः पुण्यवन्तश्चाप्यशिष्टः शिष्ट एव च ॥ जितेन्द्रिया लम्पटाश्च पुंश्चल्यश्च पतिव्रताः॥३६॥ तपस्विनः पातकिनो विष्णुभक्ता अवैष्णवाः ॥ हिंसकाश्च दयायुक्ताश्चौराश्च नरघातिनः॥३७॥भिक्षुवेषधरा धूर्त्ता निन्दन्त्युपहसन्ति च ॥ भूतादिसेवानिपुणा जनानां मोदकारिणः ॥ ३८ ॥ पूजितास्ते भविष्यन्ति वञ्चका ज्ञानदुर्बलाः ॥ वामना व्याधियुक्ताश्च नरा नार्य्यश्च सर्वतः ॥ ३९ ॥ अल्पायुषो जरायुक्ता यौवनेषु कलौ युगे ॥ पलिताः षोडशे वर्षे महावृद्धास्तु विंशतौ॥४०॥ अष्टवर्षा च युवती रजोयुक्ता च गर्भिणी ॥ वत्सरान्ते प्रसूता स्त्री षोडशेन जरान्विता ॥ ४१ ॥ एताः काश्चित्सहस्रेषु वन्ध्याश्चापि कलौ युगे ॥ कन्याविक्रयिणः सर्वे वर्णाश्चत्वार एव च ॥ ४२ ॥ मातृजायावधूनां च जारोपार्जनतत्पराः ॥ कन्यानां भगिनीनां च जारोपार्जनजीविनः॥४३॥हरेर्नाम्नां विक्रयिणो भविष्यन्ति कलौ युगे ॥ स्वयमुत्सृज्य दानं च कीर्तिवर्द्धनहेतवे ॥४४॥ तत्पश्चान्मनसाऽऽलोच्य स्वयमुल्लङ्घयिष्यति ॥ देववृत्तिं ब्रह्मवृत्तिं वृत्तिं गुरुकुलस्य च ॥४५॥स्वदत्तां परदत्तां वा सर्वमुल्लङ्घयिष्यति ॥

कन्यकागामिनः केचित्केचिच्छश्वभिगामिनः ॥ ४६ ॥ केचिद्वधूगामिनश्च केचित्सर्वत्रगामिनः ॥ भगिनीगामिनः केचित्सपत्नीभ्रातृगामिनः ॥ ४७ ॥ भ्रातृजायागामिनश्च भविष्यन्ति कलौ युगे ॥ अगम्यागमनं चैव करिष्यन्ति गृहे गृहे ॥ ४८ ॥ आत्मयोनिं परित्यज्य विहरिष्यन्ति सर्वतः ॥ पत्नीनां निर्णयो नास्ति भर्तॄणां च कलौ युगे॥४९॥प्रजानां चैव वस्तूनां ग्रामाणां च विशेषतः॥ अलीकवादिनः सर्वे सर्वे चौर्यार्थलम्पटाः ॥ ५० ॥ परस्परं हिंसकाश्च सर्वे च नरघातिनः ॥ ब्रह्मक्षत्रविशां वंशा भविष्यन्ति च पापिनः ॥ ५१ ॥ लाक्षालोहरसानां च व्यापारं लवणस्य च ॥ वृषवाहा विप्रवंशाः शूद्राणां शवदाहिनः ॥५२॥ शूद्रान्नभोजिनः सर्वे सर्वे च वृषलीरताः ॥ पञ्चपर्वपरित्यक्ताः कुहूरात्रिषु भोजिनः ॥ ५३ ॥ यज्ञसूत्रविहीनाश्च सन्ध्याशौचविहीनकाः ॥ ५४ ॥ पुंश्चली वार्धुषाऽवीरा कुट्टिनी च रजस्वला॥विप्राणां रन्धनागारे भविष्यन्ति च पाचिकाः ॥५५॥ अन्नानां निर्णयो नास्ति योनीनां च विशेषतः ॥ आश्रमाणां जनानां च सर्वे म्लेच्छाः कलौ युगे ॥ ५६ ॥ एवं कलौ संप्रवृत्ते सर्वे म्लेच्छमया भवे ॥ हस्तप्रमाणे वृक्षे चाङ्गुष्ठमाने च मानवे ॥ ५७ ॥ विप्रस्य विष्णुयशसः पुत्रः कल्की भविष्यति ॥ नारायणकलांशश्च भगवान्बलिनां बली ॥ ५८ ॥ दीर्घेण करवालेन दीर्घघोटकवाहनः ॥ म्लेच्छशून्यां च पृथिवीं त्रिरात्रेण करिष्यति ॥ ५९ ॥ निर्म्लेच्छां वसुधां कृत्वा चान्तर्द्धानं करिष्यति ॥ अराजका च वसुधा दस्युग्रस्ता भविष्यति ॥ ६० ॥ स्थूलप्रमाणं षड्रात्रं वर्षाधाराप्लुता मही ॥ लोकशून्या वृक्षशून्या गृहशून्या भविष्यति ॥ ६१ ॥ ततश्च द्वादशादित्याः करिष्यन्त्युदयं मुने ॥ प्राप्नोति शुष्कतां पृथ्वी समा तेषां च तेजसा ॥ ६२ ॥ कलौ गते च दुर्द्धर्षे संप्रवृत्ते कृते युगे ॥ तपस्सत्यसमायुक्तो धर्मः पूर्णो भविष्यति ॥ ६३ ॥ तपस्विनश्च धर्मिष्ठा वेदज्ञा ब्राह्मणा भुवि ॥ पतिव्रताश्च धर्मिष्ठा योषितश्च गृहे गृहे ॥ ६४ ॥ राजानः क्षत्रियाः सर्वे विप्रभक्ताः स्वधर्मिणः ॥ प्रतापवन्तो धर्मिष्ठाः पुण्यकर्मरताः सदा ॥ ६५ ॥ वैश्या वाणिज्यनिरता विप्रभक्ताश्च धार्मिकाः ॥ शूद्राश्च पुण्यशीलाश्च धर्मिष्ठा विप्रसेविनः ॥ ६६ ॥ विप्रक्षत्त्रविशां वंशा विष्णुयज्ञपरायणाः ॥ विष्णुमन्त्ररताः सर्वे विष्णुभक्ताश्च वैष्णवाः ॥ ६७ ॥

श्रुतिस्मृतिपुराणज्ञा धर्मज्ञा ऋतुगामिनः ॥ लेशो नास्ति ह्यधर्माणां धर्मपूर्णे कृते युगे॥६८॥ धर्मस्त्रिपाच्च त्रेतायां द्विपाच्च द्वापरे स्मृतः॥
कलौ प्रवृत्ते पादात्मा सर्वलोपस्ततः परम् ॥ ६९ ॥ वाराः सप्त यथा विप्र तिथयः षोडश स्मृताः ॥ यथा द्वादश मासाश्च ऋतवश्च
षडेव हि ॥ ७० ॥ द्वौ पक्षौ चायने द्वे च चतुर्भिः प्रहरैर्दिनम् ॥ चतुर्भिः प्रहरै रात्रिर्मासस्त्रिंशद्दिनैस्तथा ॥ ७१ ॥ वर्षः पञ्चविधो
ज्ञेयः कालसंख्यां निबोध मे ॥ यथा चायान्ति यान्त्येव तथा युगचतुष्टयम् ॥ ७२ ॥ वर्षे पूर्णे नराणां च देवानां च दिवानिशम् ॥
शतत्रये षष्ट्यधिके नराणां च युगे गते ॥ देवानां च युगो ज्ञेयः कालसंख्याविदां मतः ॥ ७३ ॥ मन्वन्तरं तु दिव्यानां युगानामेकस
ततिः ॥ मन्वंतरसमं ज्ञेयं चेन्द्रायुः परिकीर्तितम् ॥ ७४ ॥ अष्टाविंशतिमे चेन्द्रे गते ब्राह्मं दिवानिशम् ॥ अष्टोत्तरे वर्षशते गते पातो
विधेर्भवेत् ॥ ७५ ॥ प्रलयः प्राकृतो ज्ञेयस्तत्रादृष्टा वसुन्धरा ॥ जलप्लुतानि विश्वानि ब्रह्मविष्णुशिवादयः ॥७६॥ ऋषयो जीविनः
सर्वे लीनाः कृष्णे परात्परे ॥ तत्रैव प्रकृतिर्लीना तेन प्राकृतिको लयः ॥ ७७ ॥ लये प्राकृतिकेऽतीते पाते च ब्रह्मणो मुने ॥ निमेष
मात्रः कालश्च कृष्णस्य परमात्मनः ॥ ७८ ॥ एवं नश्यन्ति सर्वाणि ब्रह्माण्डान्यखिलानि च ॥ स्थितौ गोलोकवैकुण्ठौ श्रीकृष्णश्च
सपार्षदः ॥ ७९ ॥ निमेषमात्रः प्रलयो यत्र विश्वं जलप्लुतम् ॥ निमेषानन्तरे काले पुनः सृष्टिः क्रमेण च ॥ ८० ॥ एवं कतिविधा
सृष्टिर्लयः कतिविधोऽपि वा ॥ कतिकृत्वो गतायातः संख्यां जानाति कः पुमान् ॥ ८१ ॥ सृष्टीनां च कलानां च ब्रह्माण्डानां च
नारद ॥ ब्रह्मादीनां च विध्यण्डे संख्यां जानाति कः पुमान् ॥८२॥ ब्रह्माण्डानां च सर्वेषामीश्वरश्चैक एव सः ॥ सर्वेषां परमात्मा च
श्रीकृष्णः प्रकृतेः परः ॥ ८३ ॥ ब्रह्मादयश्च तस्यांशास्तस्यांशश्च महाविराट् ॥ तस्यांशश्च विराट् क्षुद्रस्तस्यांशा प्रकृतिः स्मृता
॥ ८४ ॥ स च कृष्णो द्विधाभूतो द्विभुजश्च चतुर्भुजः ॥ चतुर्भुजश्च वैकुण्ठे गोलोके द्विभुजः स्वयम् ॥ ८५ ॥ ब्रह्मादितृणपर्य्यन्तं
सर्वं प्राकृतिकं भवेत् ॥ यद्यत्प्राकृतिकं सृष्टं सर्वं नश्वरमेव च ॥ ८६ ॥ विद्धयेकं सृष्टिमूलं तत्सत्यं नित्यं सनातनम् ॥ स्वेच्छा
मयं परं ब्रह्म निर्लिप्तं निर्गुणं परम् ॥ ८७ ॥ निरुपाधिं निराकारं भक्तानुग्रहविग्रहम् ॥ अतीव कमनीयं च नवीनघनसन्निभम्॥८८॥

द्विभुजं मुरलीहस्तं गोपवेषं किशोरकम् ॥ सर्वज्ञं सर्वसेव्यं च परमात्मानमीश्वरम् ॥ ८९ ॥ करोति धाता ब्रह्माण्डं ज्ञानात्मा कमलोद्भवः ॥ शिवो मृत्युञ्जयश्चैव संहर्त्ता सर्वतत्त्ववित् ॥ ९० ॥ यस्य ज्ञानाद्यत्तपसा सर्वेशस्तत्समो महान् ॥ महाविभूतियुक्तश्च सर्वज्ञः सर्वदा स्वयम् ॥ ९१ ॥ सर्वव्यापी सर्वपाता स दाता सर्वसम्पदाम् ॥ विष्णुः सर्वेश्वरः श्रीमान्यस्य ज्ञानाज्जगत्पतिः ॥ ९२ ॥ महामाया च प्रकृतिः सर्वशक्तिमतीश्वरी ॥ यज्ज्ञानाद्यस्य तपसा यद्भक्त्या यस्य सेवया ॥ ९३ ॥ सावित्री वेदमाता च वेदाधिष्ठातृदेवता ॥ पूज्या द्विजानां वेदज्ञा यज्ञाद्यस्याश्च सेवया ॥ ९४ ॥ सर्वविद्याधिदेवी सा पूज्या च विदुषां पुरा ॥ यत्सेवया यत्तपसा यस्य ज्ञानात्सरस्वती ॥ ९५ ॥ यत्सेवया यत्तपसा प्रदात्री सर्वसंपदाम् ॥ धनसस्याधिदेवी सा महालक्ष्मीः सनातनी ॥ ९६ ॥ यत्सेवया यत्तपसा सर्वविश्वेषु पूजिता ॥ सर्वग्रामाधिदेवी सा सर्वसम्पत्प्रदायिनी ॥ ९७ ॥ सर्वेश्वरी सर्ववन्द्या सर्वेशं प्राप या पतिम् ॥ सर्वस्तुता च सर्वज्ञा दुर्गा दुर्गतिनाशिनी ॥ ९८ ॥ कृष्णवामांशसम्भूता कृष्णप्रेमाधिदेवता ॥ कृष्णप्राणाधिका प्रेम्णा राधिका कृष्णसेवया ॥ ९९ ॥ सर्वाधिकं च रूपं च सौभाग्यं मानगौरवम् ॥ कृष्णवक्षःस्थलस्थानं पत्नीत्वं प्राप सेवया ॥ १०० ॥ तपश्चकार सा पूर्वं शतशृङ्गे च पर्वते ॥ दिव्यं युगसहस्रं च निराहाराऽतिकर्शिता ॥ १०१ ॥ कृशां निःश्वासरहितां दृष्ट्वा चन्द्रकलोपमाम् ॥ कृष्णो वक्षःस्थले कृत्वा रुरोद कृपया विभुः ॥ ॥१०२॥ वरं तस्यै ददौ सारं सर्वेषामपि दुर्लभम् ॥ मम वक्षःस्थले तिष्ठ मयि ते भक्तिरस्त्विति ॥ १०३ ॥ सौभाग्येन च मानेन प्रेम्णा वै गौरवेण च ॥ त्वं मे श्रेष्ठा परं प्रेम्णा ज्येष्ठा त्वं सर्वयोषिताम् ॥ १०४ ॥ वरिष्ठा च गरिष्ठा च संस्तुता पूजिता मया ॥ सन्ततं तव साध्योऽहं बाध्यश्च प्राणवल्लभे ॥ १०५ ॥ इत्युक्त्वा जगतां नाथश्चक्रे तच्चेतनां ततः ॥ सपत्नीरहितां तां च चकार प्राणवल्लभाम् ॥ १०६ ॥ येषां या याश्च देव्यो वै पूजितास्तस्य सेवया ॥ तपस्या यादृशी यासां तासां तादृक्फलं मुने ॥ १०७ ॥ दिव्यं वर्षसहस्रं च तपस्तप्त्वा हिमालये ॥ दुर्गा च तत्पदं ध्यात्वा सर्वपूज्या बभूव ह ॥ १०८ ॥ सरस्वती तपस्तप्त्वा पर्वते गन्ध

मादने ॥ लक्षवर्षं च दिव्यं च सर्ववन्द्या बभूव सा ॥ १०९ ॥ लक्ष्मीर्युगशतं दिव्यं तपस्तप्त्वा च पुष्करे ॥ सर्वसम्पत्प्रदात्री सा
चाभवत्तस्य सेवया ॥११०॥ सावित्री मलये तप्त्वा द्विजपूज्या बभूव सा ॥ षष्टिवर्षसहस्रं च दिव्यं ध्यात्वा च तत्पदम् ॥१११॥
शतमन्वन्तरं तप्तं शंकरेण पुरा विभो ॥ शतमन्वन्तरं चैव ब्रह्मणा तस्य भक्तितः ॥ ११२ ॥ शतमन्वन्तरं विष्णुस्तप्त्वा पाता
बभूव ह ॥ शतमन्वन्तरं धर्मस्तप्त्वा पूज्यो बभूव ह ॥११३॥ मन्वन्तरं तपस्तेपे शेषो भक्त्या च नारद ॥ मन्वन्तरं च सूर्यश्च
शक्रश्चन्द्रस्तथा गुरुः ॥ ११४ ॥ दिव्यं शतयुगं चैव वायुस्तप्त्वा च भक्तितः ॥ सर्वप्राणः सर्वपूज्यः सर्वाधारो बभूव सः ॥११५॥
एवं कृष्णस्य तपसा सर्वे देवाश्च पूजिताः ॥ मुनयो मानवा भूपा ब्राह्मणाश्चैव पूजिताः ॥ ११६ ॥ एवं ते कथितं सर्वं पुराणं च
तथाऽऽगमम् ॥ गुरुवक्त्राद्यथा ज्ञातं किं भूयः श्रोतुमिच्छसि ॥ ११७ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारद
नारायणसंवादे युगतन्माहात्म्यमन्वन्तरकालेश्वरगुणनिरूपणं नाम सप्तमोऽध्यायः ॥ ७ ॥ नारद उवाच ॥ हरेर्निमेषमात्रेण ब्रह्मणः
पात एव च ॥ तस्य पाते प्राकृतिकः प्रलयः परिकीर्त्तितः ॥ १ ॥ प्रलये प्राकृते चोक्तं तत्राऽदृष्टा वसुन्धरा ॥ जलप्लुतानि विश्वानि
सर्वे लीना हराविति ॥ २ ॥ वसुन्धरा तिरोभूता कुत्र वा तत्र तिष्ठति ॥ सृष्टेर्विधानसमये साऽऽविर्भूता कथं पुनः ॥ ३ ॥ कथं बभूव
सा धन्या मान्या सर्वाश्रया जया ॥ तस्याश्च जन्मविस्तारं वद मङ्गलकारणम् ॥ ४ ॥ श्रीनारायण उवाच ॥ सर्वादिसृष्टौ सर्वेषां
जन्म कृष्णादिति श्रुतिः ॥ आविर्भावस्तिरोभावः सर्वेषु प्रलयेषु च ॥५॥ श्रूयतां वसुधाजन्म सर्वमंगलमंगलम् ॥ विघ्ननिघ्नं परं पाप
नाशनं पुण्यवर्द्धनम् ॥ ६ ॥ अहो केचिद्वदन्तीति मधुकैटभमेदसा ॥ बभूव वसुधा धन्या तद्विरुद्धमतं शृणु ॥ ७ ॥ ऊचतुस्तौ पुरा
विष्णुं तुष्टौ युद्धेन तेजसा ॥ आवां जहि न यत्रोर्वी पयसा संवृतेति च ॥ ८ ॥ तयोर्जीवनकालेन प्रत्यक्षा च भवेत्स्फुटम् ॥ ततो
बभूव मेदश्च मरणानन्तरं तयोः ॥ ९ ॥ मेदिनीति च विख्यातेत्युक्ता यैस्तन्मतं शृणु ॥ जलधौता कृशा पूर्वं वर्द्धिता मेदसा यतः
॥ १० ॥ कथयामि च तज्जन्म सार्थकं सर्वसम्मतम् ॥ पुरा श्रुतं च श्रुत्युक्तं धर्मवक्त्राच्च पुष्करे ॥ ११ ॥ महाविराट्शरीरस्य जल

स्थस्य चिरं स्फुटम् ॥ मलो बभूव कालेन सर्वांगव्यापको ध्रुवम् ॥ १२ ॥ स च प्रविष्टः सर्वेषां तल्लोम्नां विवरेषु च ॥ कालेन
महता तस्माद्बभूव वसुधा मुने ॥१३॥ प्रत्येकं प्रतिलोम्नां च स्थिता कूपेषु सा स्थिरा ॥ आविर्भूता तिरोभूता सा चला च पुनः पुनः
॥ १४ ॥ आविर्भूता सृष्टिकाले तज्जलात्पर्य्युपस्थिता ॥ प्रलये च तिरोभूता जलाभ्यन्तरवस्थिता ॥ १५ ॥ प्रतिविश्वेषु वसुधा
शैलकाननसंयुता ॥ सप्तसागरसंयुक्ता सप्तद्वीपमिता सती ॥ १६ ॥ हिमाद्रिमेरुसंयुक्ता ग्रहचन्द्रार्कसंयुता ॥ ब्रह्मविष्णुशिवाद्यैश्च
सुरैर्लोकैस्तथा नुता ॥ १७ ॥ पुण्यतीर्थसमायुक्ता पुण्यभारतसंयुता ॥ काञ्चनीभूमिसंयुक्ता सर्वदुर्गसमन्विता ॥ १८ ॥ पातालाः
सप्त तदधस्तदूर्ध्वं ब्रह्मलोककः ॥ ध्रुवलोकश्च तत्रैव सर्वं विश्वं च तत्र वै ॥ १९ ॥ एवं सर्वाणि विश्वानि पृथिव्यां निर्मितानि वै ॥
ऊर्ध्वं गोलोकवैकुण्ठौ नित्यौ विश्वपरौ च तौ ॥ २० ॥ नश्वराणि च विश्वानि कृत्रिमाकृत्रिमाणि च ॥ प्रलये प्राकृते ब्रह्मन्ब्रह्म
णश्च निपातने ॥ २१ ॥ महाविराडादिसृष्टौ सृष्टः कृष्णेन चात्मना ॥ नित्ये स्थितः स प्रलये काष्ठाकाशेश्वरैः सह ॥ २२ ॥
क्षित्यधिष्ठातृदेवी सा वाराहे पूजिता सुरैः ॥ मनुभिर्मुनिभिर्विप्रैर्गन्धर्वादिभिरेव च ॥ २३ ॥ विष्णोर्वराहरूपस्य पत्नी सा
श्रुतिसम्मता ॥ तत्पुत्रो मंगलो ज्ञेयः सुयशा मंगलात्मजः ॥ २४ ॥ नारद उवाच ॥ पूजिता केन रूपेण वाराहे च सुरैर्मही ॥
वराहेण च वाराही सर्वैः सर्वाश्रया सती ॥ २५ ॥ तस्याः पूजाविधानं चाप्यधश्चोद्धरणक्रमम् ॥ मंगलं मंगलस्या
पि जन्मव्यासं वद प्रभो ॥ २६ ॥ नारायण उवाच ॥ वाराहे च वराहश्च ब्रह्मणा संस्तुतः पुरा ॥ उद्दधार महीं हत्वा हिरण्याक्षं
रसातलात् ॥ २७ ॥ जले तां स्थापयामास पद्मपत्रं,यथाऽर्णवे ॥ तत्रैव निर्ममे ब्रह्मा सर्वं विश्वं मनोहरम् ॥ २८ ॥ दृष्ट्वा तदधि
देवीं च सकामां कामुको हरिः ॥ वराहरूपी भगवान्कोटिसूर्य्यसमप्रभः ॥ २९ ॥ कृत्वा रतिकरीं शय्यां मूर्त्तिं च सुमनोहराम् ॥
क्रीडां चकार रहसि दिव्यवर्षमहर्निशम् ॥ ३० ॥ सुखसम्भोगसंस्पर्शान्मूर्च्छां सम्प्राप सुन्दरी ॥ विदग्धाया विदग्धेन संगमोऽपि
सुखप्रदः ॥ ३१ ॥ विष्णुस्तदंगसंश्लेषाद् बुबुधे न दिवानिशम् ॥ वर्षान्ते चेतनां प्राप्य कामी तत्याज कामुकीम् ॥३२॥ दधार पूर्वं

रूपं हि वाराहं चैव लीलया ॥ पूजां चकार भक्त्या च ध्यात्वा च धरणीं सतीम् ॥ ३३ ॥ धूपैर्दीपैश्च नैवद्यैः सिन्दूरैरनुलेपनः ॥
वस्त्रैः पुष्पैश्च बलिभिः संपूज्योवाच तां हरिः ॥ ३४ ॥ महावराह उवाच ॥ सर्वाधारा भव शुभे सर्वैः संपूजिता शुभम् ॥
मुनिभिर्मनुभिर्देवैः सिद्धैर्वा मानवादिभिः ॥ ३५ ॥ जलोच्छ्वासाज्जलत्यागगृहारम्भप्रवेशने ॥ वापीतडागारम्भे च शुभे च कृषि
कर्मणि ॥ ३६ ॥ तव पूजां करिष्यन्ति संभ्रमेण सुरादयः ॥ मूढा ये न करिष्यन्ति यास्यन्ति नरकं च ते ॥ ३७ ॥ वसुधोवाच ॥
वहामि सर्वं वाराहरूपेणाहं तवाज्ञया ॥ लीलामात्रेण भगवन्विश्वं च सचराचरम् ॥ ३८ ॥ मुक्तां शुक्तिं हरेरर्चां शिवलिंगं शिलां
तथा ॥ शंखं प्रदीपं रत्नं च माणिक्यं हीरकं मणिम् ॥ ३९ ॥ यज्ञसूत्रं च पुष्पं च पुस्तकं तुलसीदलम् ॥ जपमालां पुष्पमालां
कर्पूरं च सुवर्णकम् ॥ ४० ॥ गोरोचनां चन्दनं च शालग्रामजलं तथा ॥ एतान्वोढुमशक्ताऽहं क्लिष्टा च भगवञ्छृणु ॥ ४१ ॥
श्रीभगवानुवाच ॥ द्रव्याण्येतानि ये मूढा अर्पयिष्यन्ति सुन्दरि ॥ यास्यन्ति ते कालसूत्रं दिव्यं वर्षशतं त्वयि ॥ ४२ ॥ इत्ये
वमुक्त्वा भगवान्विरराम च नारद ॥ बभूव तेन गर्भेण तेजस्वी मङ्गलग्रहः ॥४३॥ पूजां चक्रुः पृथिव्याश्च ते सर्वे चाज्ञया हरेः ॥
दध्युः काण्वोक्तमार्गेण तुष्टुवुः स्तवनेन च ॥ ४४ ॥ दद्युर्मूलेन मन्त्रेण नैवेद्यादिकमेव च ॥ संस्तुता त्रिषु लोकेषु पूजिता सा
बभूव ह ॥ ४५ ॥ नारद उवाच ॥ किं ध्यानं स्तवनं किं वा तस्या मूलं च किं वद ॥ गूढं सर्वपुराणेषु श्रोतुं कौतूहलं मम ॥ ४६ ॥
नारायण उवाच ॥ आदौ च पृथिवी देवी वराहेण सुपूजिता ॥ ततो हि ब्रह्मणा पश्चात्ततश्च पृथुना पुरा ॥ ४७ ॥
ततः सर्वैर्मुनीन्द्रैश्च मनुभिर्नारदादिभिः ॥ ध्यानं च स्तवनं मन्त्रं शृणु वक्ष्यामि नारद ॥ ४८ ॥ ॐ ह्रीं श्रीं वां वसुधायै स्वाहा ॥
इत्यनेन तु मन्त्रेण पूजिता विष्णुना पुरा ॥ ४९ ॥ श्वेतचम्पकवर्णाभां शतचन्द्रसमप्रभाम् ॥ चन्दनोक्षितसर्वाङ्गीं सर्वभूषणभूषि
ताम् ॥ ५० ॥ रत्नाधारां रत्नगर्भां रत्नाकरसमन्विताम् ॥ वह्निशुद्धांशुकाधानां सस्मितां वन्दितां भजे ॥ ५१ ॥ ध्यानेनानेन
सा देवी सर्वैश्च पूजिता भवेत् ॥ स्तवनं शृणु विप्रेन्द्र काण्वशाखोक्तमेव च ॥५२॥ विष्णुरुवाच ॥ यज्ञसूकरजाया त्वं जयं देहि

जयावहे ॥ जयेऽजये जयाधारे जयशीले जयप्रदे ॥ ५३ ॥ सर्वाधारे सर्वबीजे सर्वशक्तिसमन्विते ॥ सर्वकामप्रदे देवि सर्वेष्टं देहि
मे स्थिरे ॥ ५४ ॥ सर्वसस्यालये सर्वसस्याढ्ये सर्वसस्यदे ॥ सर्वसस्यहरे काले सर्वसस्यात्मिके क्षिते ॥ ५५ ॥ मङ्गले मङ्गला
धारे माङ्गल्ये मङ्गलप्रदे ॥ मङ्गलार्थे मङ्गलांशे मंगलं देहि मे परम् ॥ ५६ ॥ भूमे भूमिपसर्वस्वे भूमिपालपरायणे ॥ भूमिपाह
ङ्काररूपे भूमिं देहि वसुन्धरे ॥ ५७ ॥ इदं स्तोत्रं महापुण्यं तां संपूज्य च यः पठेत् ॥ कोटचन्तरे जन्मनि स संभवेद्भूमिपेश्वरः ॥
॥ ५८ ॥ भूमिदानकृतं पुण्यं लभते पठनाज्जनः ॥ दत्तापहारजातपापान्मुच्यते नात्र संशयः ॥ ५९ ॥ अम्बुवीचीभूखननात्पापा
न्मुच्येत स ध्रुवम् ॥ अन्यकूपे कुपदजातपापान्मुच्येत स ध्रुवम् ॥ ६० ॥ परभूश्राद्धजातपापान्मुच्यते नात्र संशयः ॥ भूमौ वीर्य्यत्या
गपापाद्दीपादिस्थापनात्तथा ॥ ६१ ॥ पापेन मुच्यते प्राज्ञः स्तोत्रस्य पठनान्मुने ॥ अश्वमेधशतं पुण्यं लभते नात्र संशयः॥ ६२ ॥
इतिश्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे पृथिव्युपाख्याने पृथिवीस्तोत्रं नामाष्टमोऽध्यायः॥८॥नारद उवाच॥
भूमिदानकृतं पुण्यं पापं तद्धरणेन यत् ॥ परभूमौ श्राद्धरूपं कूपे कुपदजं तथा ॥ १ ॥ अम्बुवीचीभूखननबीजत्यागजमेव च ॥
दीपादिस्थापनात्पापं श्रोतुमिच्छामि यत्नतः ॥ २ ॥ अन्यद्वा पृथिवीजन्यं पापं यत्प्रश्नतः परम् ॥ यदस्ति तत्प्रतीकारं वद वे
दविदां वर ॥३॥ नारायण उवाच॥वितस्तिमात्रं भूमिं च यो ददाति च भारते॥सन्ध्यापूताय विप्राय स यायाद्विष्णुमन्दिरम् ॥४॥
भूमिं च सर्वसस्याढ्यां ब्राह्मणाय ददाति यः॥भूमिरेणुप्रमाणे च वर्षे विष्णुपदे वसेत्॥५॥ग्रामं भूमिं च धान्यं च यो ददात्याददाति
यः ॥ सर्वपापाद्विनिर्मुक्तौ चोभौ वैकुण्ठवासिनौ ॥ ६ ॥ भूमिदानं च तत्काले यः साधुश्चानुमोदते ॥ स प्रयाति च वैकुण्ठं मित्र
गोत्रसमन्वितः ॥ ७ ॥ स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः ॥ कालसूत्रे तिष्ठति स यावच्चन्द्रदिवाकरौ ॥ ८ ॥ तत्पुत्रपौत्रप्रभृति
र्भूमिहीनः श्रिया हतः ॥ सुखहीनो दरिद्रः स्यादन्ते याति च रौरवम् ॥ ९ ॥ गवां मार्गं विनिष्कृष्य यश्च सस्यं ददाति सः ॥ दि
व्यं वर्षशतं चैव कुम्भीपाके च तिष्ठति ॥ १० ॥ गोष्ठं तडागं निष्कृष्य मार्गं सस्यं ददाति यः ॥ स च तिष्ठत्यसीपत्रे यावदिन्द्रा

श्चतुर्दश ॥ ११ ॥ न पञ्चपिण्डमुद्धृत्य स्नाति कूपे परस्य यः॥प्राप्नोति नरकं चैव न स्नानफलमेव च ॥१२॥ कामी भूमौ च रहसि
बीजत्यागं करोति यः ॥ स्निग्धरेणुप्रमाणं च वर्षं तिष्ठति रौरवे ॥ १३ ॥ अम्बुवीच्यम्बुखननं यः करोति च मानवः ॥ स याति
कृमिदंशं च स्थितिस्तत्र चतुर्युगम् ॥ १४ ॥ परकीये लुप्तकूपे कूपं मूढः करोति यः ॥ पुष्करिण्यां च लुप्तायां तां ददाति
च यो नरः ॥ १५ ॥ सर्वं फलं परस्यैव तप्तसूर्मिं व्रजेत्तु सः ॥ तत्र तिष्ठति संतप्तो यावदिन्द्राश्चतुर्दश ॥ १६ ॥ परकीयतडागे
च पङ्कमुद्धृत्य चोत्सृजेत् ॥ रेणुप्रमाणवर्षं च ब्रह्मलोके वसेन्नरः ॥१७॥ पिण्डं पित्रे भूतिभर्त्तुर्न प्रदाय च मानवः ॥ श्राद्धं करोति
यो मूढो नरकं याति निश्चितम् ॥ १८ ॥ भूमौ दीपं योऽर्पयति सोऽन्धः सप्तसु जन्मसु ॥ भूमौ शंखं च संस्थाप्य कुष्ठं जन्मा
न्तरे लभेत् ॥ १९ ॥ मुक्तामाणिक्यहीरं च सुवर्णं च मणिं तथा ॥ यश्च संस्थापयेद्भूमौ दरिद्रः सप्तजन्मसु ॥ २० ॥ शिवलिङ्गं
शिलामर्च्यां यश्चार्पयति भूतले ॥ शतमन्वन्तरं यावत्कृमिभक्षे स तिष्ठति ॥२१॥ सूक्तं मन्त्रं शिलातोयं पुष्पं च तुलसीदलम् ॥
यश्चार्पयति भूमौ च स तिष्ठन्नरके युगम् ॥२२॥ जपमालां पुष्पमालां कर्पूरं रोचनां तथा ॥ यो मूढश्चार्पयेद्भूमौ स याति नरकं
ध्रुवम् ॥ २३ ॥ मुने चन्दनकाष्ठं च रुद्राक्षं कुशमूलकम् ॥ संस्थाप्य भूमौ नरके वसेन्मन्वन्तरावधि ॥ २४ ॥ पुस्तकं यज्ञसूत्रं
च भूमौ संस्थापयेत्तु यः॥न भवेद्विप्रयोनौ च तस्य जन्मान्तरे जनिः॥२५॥ब्रह्महत्यासमं पापमिह वै लभते ध्रुवम्॥ ग्रन्थियुक्तं यज्ञ
सूत्रं पूज्यं स्यात्सर्ववर्णकैः ॥ २६ ॥ यज्ञं कृत्वा तु यो भूमिं क्षीरेण नहि सिञ्चति॥स याति तप्तसूर्मिं च संतप्तः सर्वजन्मसु ॥२७॥
भूकम्पे ग्रहणे यो हि करोति खननं भुवः ॥ जन्मान्तरे महापापी सोऽङ्गहीनो भवेद्ध्रुवम् ॥२८॥ भवनं यत्र सर्वेषां भूमिस्तेन प्रकी
र्त्तिता॥ वसुरत्नं या दधाति वसुधा च वसुन्धरा॥२९॥हरेरूरौ च या जाता सा चोर्वी परिकीर्त्तिता ॥ धरा धरित्री धरणी सर्वेषां धर
णात्तु या ॥ ३० ॥ इज्या च यागभरणात्क्षोणी क्षीणा लये च या ॥ महालये क्षयं याति क्षितिस्तेन प्रकीर्त्तिता ॥ ३१ ॥ काश्यपी

---

१ यः शक्तोऽपि सन् वित्तशाठ्येन लुप्तोद्धारमेव करोति नतु स्वयं निर्मापयति तं प्रतीत्थमुक्तम् ।

कश्यपस्येयमचला स्थितिरूपतः ॥ विश्वम्भरा तद्धरणाच्चानन्ताऽनन्तरूपतः ॥ ३२ ॥ पृथ्वी पृथुककन्यात्वाद्विस्तृतत्वान्मही मुने ॥ ३३ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे पृथिव्युपाख्यानं नाम नवमोऽध्यायः ॥ ९ ॥ नारद उवाच ॥ श्रुतं पृथिव्युपाख्यानमतीव सुमनोहरम् ॥ गङ्गोपाख्यानमधुना वद वेदविदां वर ॥ १ ॥ भारतं भारतीशापादाजगाम सुरेश्वरी ॥ विष्णुस्वरूपा परमा स्वयं विष्णुपदी सती ॥ २ ॥ कथं कुत्र युगे केन प्रार्थिता प्रेरिता पुरा ॥ तत्क्रमं श्रोतुमिच्छामि पापघ्नं पुण्यदं शुभम् ॥ ३ ॥ नारायण उवाच ॥ राजराजेश्वरः श्रीमन्सगरः सूर्य्यवंशजः ॥ तस्य भार्या च वैदर्भी शैब्या च द्वे मनोहरे ॥ ४ ॥ सत्यस्वरूपः सत्येष्टः सत्यवाक्सत्यभावनः ॥ सत्यधर्मविचारज्ञः परं सत्ययुगोद्भवः ॥ ५ ॥ एककन्यश्चैकपुत्रो बभूव सुमनोहरः ॥ असमञ्ज इति ख्यातः शैब्यायां कुलवर्द्धनः ॥ ६ ॥ अन्या चाराधयामास शङ्करं पुत्रकामुकी ॥ बभूव गर्भस्तस्याश्च शिवस्य तु वरेण च ॥ ७ ॥ गते शताब्दे पूर्णे च मांसपिण्डं सुषाव सा ॥ तद्दृष्ट्वा च शिवं ध्यात्वा रुरोदोच्चैः पुनः पुनः ॥८॥ शम्भुर्ब्राह्मणरूपेण तत्समीपं जगाम ह ॥ चकार संविभज्यैतत्पिण्डं षष्टिसहस्रधा ॥ ९ ॥ सर्वे बभूवुः पुत्राश्च महाबलपराक्रमाः ॥ ग्रीष्ममध्याह्नमार्त्तण्डप्रभाजुष्टकलेवराः ॥ १० ॥ कपिलर्षेः कोपदृष्ट्या बभूवुर्भस्मसाच्च ते ॥ राजा रुरोद तच्छ्रुत्वा जगाम मरणं शुचा ॥ ११ ॥ तपश्चकारासमंजो गङ्गानयनकारणात् ॥ तपः कृत्वा लक्षवर्षं म्रियते कालयोगतः ॥ १२ ॥ दिलीपस्तस्य तनयो गङ्गानयनकारणात् ॥ तपः कृत्वा लक्षवर्षं ययौ लोकान्तरं नृपः ॥ १३ ॥ अंशुमाँस्तस्य पुत्रश्च गङ्गानयनकारणात् ॥ तपः कृत्वा लक्षवर्षं मृतश्च कालयोगतः ॥ १४ ॥ भगीरथस्तस्य पुत्रो महाभागवतः सुधीः ॥ वैष्णवो विष्णुभक्तश्च गुणवान जरामरः ॥ १५ ॥ तपः कृत्वा लक्षवर्षं गङ्गानयनकारणात् ॥ ददर्श कृष्णं हृष्टास्यं सूर्य्यकोटिसमप्रभम् ॥ १६ ॥ द्विभुजं मुरलीहस्तं किशोरं गोपवेषकम् ॥ परमात्मानमीशं च भक्तानुग्रहविग्रहम् ॥ १७ ॥ स्वेच्छामयं परं ब्रह्म परिपूर्णतमं विभुम् ॥ ब्रह्मविष्णुशिवाद्यैश्च स्तुतं मुनिगणैर्युतम् ॥ १८ ॥ निर्लिप्तं साक्षिरूपं च निर्गुणं प्रकृतेः परम् ॥ ईष

द्धास्यं प्रसन्नास्यं भक्तानुग्रहकारकम् ॥ १९ ॥ वह्निशुद्धां शुकाधानं रत्नभूषणभूषितम् ॥ तुष्टाव दृष्ट्वा नृपतिः प्रणम्य
च पुनःपुनः ॥ २० ॥ लीलया च वरं प्राप्य वाञ्छितं वंशतारकम् ॥ तत्राजगाम गंगा सा स्मरणात्परमात्मनः ॥
॥ २१ ॥ तं प्रणम्य प्रतस्थौ च तत्पुरः संपुटाञ्जलिः ॥ उवाच भगवांस्तत्र तां दृष्ट्वा सुमनोहरम् ॥ कुर्वतीं स्तवनं दिव्यं
पुलकाञ्चितविग्रहाम् ॥ २२ ॥ श्रीकृष्ण उवाच ॥ भारतं भारतीशापाद्गच्छ शीघ्रं सुरेश्वरि ॥ २३ ॥ सगरस्य सुतान्सर्वान्पूतान्कुरु
ममाज्ञया ॥ त्वत्स्पर्शवायुना पूता यास्यान्ति मम मान्दिरम् ॥ २४ ॥ बिभ्रतो दिव्यमूर्त्तिं ते दिव्यस्यन्दनगामिनः ॥ मत्पार्षदा
भविष्यन्ति सर्वकालं निरामयाः ॥ २५ ॥ कर्मभोगं समुच्छिद्य कृतं जन्मनि जन्मनि ॥ नानाविधं महत्स्वल्पं पापं स्याद्भारते
नृभिः ॥ २६ ॥ गंगायाः स्पर्शवातेन नश्यतीति श्रुतौ श्रुतम् ॥ स्पर्शनं दर्शनाद्देव्याः पुण्यं दशगुणं ततः ॥ २७ ॥ मौसलस्नान
मात्रेण सामान्यदिवसे नृणाम् ॥ कोटिजन्मार्जितं पापं नश्यतीति श्रुतौ श्रुतम् ॥२८॥ यानि कानि च पापानि ब्रह्महत्यादिकानि च॥
नानाजन्मार्जितान्येव कामतोऽपि कृतानि च ॥२९॥ तानि सर्वाणि नश्यन्ति मौसलस्नानतो नृणाम् ॥ पुण्याहस्नानजं पुण्यं वेदा
नैव वदन्ति च ॥ ३० ॥ केचिद्वदन्ति ते देवि फलमेव यथागमम् ॥ ब्रह्मविष्णुशिवाद्याश्च सर्वे नैव विदन्ति च ॥ ३१ ॥ सामान्य
दिवसस्नानसङ्कल्पं शृणु सुन्दरि ॥ पुण्यं दशगुणं चैव मौसलस्नानतः परम् ॥ ३२ ॥ ततस्त्रिंशद्गुणं पुण्यं रविसंक्रमणे दिने ॥
अमायां चापि तत्तुल्यं द्विगुणं दक्षिणायने ॥३३॥ ततो दशगुणं पुण्यं नराणामुत्तरायणे ॥ चातुर्मास्यां पौर्णमास्यामनन्तं पुण्य
मेव च ॥ ३४ ॥ अक्षयायां च तत्तुल्यं नैतद्वेदे निरूपितम् ॥ असंख्यपुण्यफलदमेतेषु स्नानदानकम् ॥ ३५ ॥ सामान्यदिवसे
स्नानं ध्यानाच्छतगुणं फलम् ॥ मन्वन्तरेषु देवेशि युगादिषु तथैव च ॥ ३६ ॥ माघस्य सितसप्तम्यां भीष्माष्टम्यां तथैव च ॥ तथा
ऽशोकाष्टमीतिथ्यां नवम्यां च तथा हरेः ॥ ३७ ॥ ततोऽपि द्विगुणं पुण्यं नन्दायां तव दुर्लभम् ॥ दशपापहरायां तु दशम्यां सुमह
त्फलम् ॥ ३८ ॥ नन्दासमं च वारुण्यां महत्पूर्वे चतुर्गुणम् ॥ ततश्चतुर्गुणं पुण्यं द्विमहत्पूर्वके सति ॥ ३९ ॥ पुण्यं कोटिगुणं चैव

सामान्यस्नानतो भवेत् ॥ चन्द्रसूर्योपरागेषु स्मृतं दशगुणं ततः ॥ ४० ॥ पुण्येऽप्यर्द्धोदये काले ततः शतगुणं फलम् ॥ सर्वेषामेव
सङ्कल्पो वैष्णवानां विपर्य्ययः ॥४१॥ फलसन्धानरहिता जीवन्मुक्ताश्च वैष्णवाः ॥ मत्प्रीतिभक्तिकामास्ते सर्वदा सर्वकर्मसु ॥४२॥
गुरुवक्त्राद्विष्णुमन्त्रो यस्य कर्णे विशेत्परः ॥ जीवन्मुक्तं वैष्णवं तं वेदाः सर्वे वदन्ति च ॥ ४३ ॥ पुरुषाणां शतं पूर्वं पैतृकं च परं
शतम् ॥ मातामहस्य च शतं मातरं मातृमातरम् ॥४४॥ भगिनीं भ्रातरं चैव भागिनेयं च मातुलम् ॥ श्वश्रूं च श्वशुरं चैव गुरुपत्नीं
गुरोः सुतम् ॥ ४५ ॥ गुरुं च ज्ञानदातारं मित्रं च सहचारिणम् ॥ भृत्यं शिष्यं तथा चेटीं प्रजाः स्वाश्रमसन्निधौ ॥ ४६ ॥ उद्धरे
दात्मना सार्द्धं मन्त्रग्रहणमात्रतः ॥ मन्त्रग्रहणमात्रेण जीवन्मुक्तो भवेन्नरः ॥ ४७ ॥ तस्य संस्पर्शनात्पूतं तीर्थं च भुवि भारते ॥
तस्यैव पादरजसा सद्यः पूता वसुन्धरा ॥ ४८ ॥ पादोदकस्थानमिदं तीर्थमेव भवेद्ध्रुवम् ॥ अन्नं विष्ठा जलं मूत्रं यद्विष्णोरनिवेदि
तम् ॥४९ ॥ खादन्ति नो वैष्णवाश्च सदा नैवेद्यभोजिनः ॥ विष्णोर्निवेदितान्नं च नित्यं ये भुञ्जते नराः ॥ ५० ॥ पूतानि सर्वती
र्थानि तेषां च स्पर्शनादहो ॥ विष्णोः पादोदकं पुण्यं नित्यं ये भुञ्जते नराः ॥ ५१ ॥ तत्पापानि पलायन्ते वैनतेयादिवोरगाः ॥
तेषां दर्शनमात्रेण पूतं च भुवनत्रयम् ॥ ५२ ॥ विष्णोः सुदर्शनं चक्रं सन्ततं तांश्च रक्षति ॥ मद्गुणश्रवणाद्ये च पुलकाङ्कितविग्रहाः॥
॥ ५३ ॥ गद्गदाः साश्रुनेत्राश्च नरास्ते वैष्णवोत्तमाः ॥ पुत्रादपि परः स्नेहो मयि येषां निरन्तरम् ॥ गृहाद्याश्च मयि न्यस्तास्ते नरा
वैष्णवोत्तमाः ॥ ५४ ॥ आब्रह्मस्तम्बपर्य्यन्तं मत्तः सर्वं चराचरम् ॥ सर्वेषामहमेवेश इतिज्ञा वैष्णवोत्तमाः ॥ ५५ ॥ असंख्यकोटिब्र
ह्माण्डं ब्रह्मविष्णुशिवादयः ॥ प्रलये मयि लीयन्ते चेतिज्ञा वैष्णवोत्तमाः ॥ ५६ ॥ तेजःस्वरूपं परमं भक्तानुग्रहविग्रहम् ॥ स्वेच्छा
मयं निर्गुणं च निरीहं प्रकृतेः परम् ॥ ५७ ॥ सर्वे प्राकृतिका मत्त आविर्भूतास्तिरोहिताः ॥ इति जानन्ति ये देवि ते नरा वैष्णवो
त्तमाः ॥ ५८ ॥ इत्येवमुक्त्वा देवेशो विरराम तयोः पुरः ॥ उवाच तं त्रिपथगा भक्तिनम्रात्मकन्धरा ॥५९॥ गङ्गोवाच ॥ यामि चे
द्भारतं नाथ भारतीशापतः पुरा ॥ तवाज्ञया च राजेन्द्र तपसा चैव साम्प्रतम् ॥ ६० ॥ यानि कानि च पापानि मह्यं दास्यन्ति

पापिनः ॥ तानि मे केन नश्यन्ति तदुपायं वद प्रभो ॥ ६१ ॥ कतिकालं परिमितं स्थितिमें तत्र भारते ॥ कदा यास्यामि
सर्वेश तवद्विष्णोः परमं पदम् ॥ ६२ ॥ ममान्यद्वाञ्छितं यद्यत्सर्वं जानासि सर्ववित् ॥ सर्वान्तरात्मन्त्सर्वज्ञ तदुपायं
वद प्रभो ॥ ६३ ॥ श्रीकृष्ण उवाच ॥ जानामि वाञ्छितं गङ्गे तव सर्वं सुरेश्वरि ॥ पतिस्ते रुद्ररूपोऽयं लवणोदो
भविष्यति ॥ ६४ ॥ ममैवांशः समुद्रश्च त्वं च लक्ष्मीस्वरूपिणी ॥ विदग्धाया विदग्धेन सङ्गमो गुणवान्भुवि ॥ ६५ ॥
यावत्यः सन्ति नद्यश्च भारत्याद्याश्च भारते ॥ सौभाग्यं तव तास्वेव लवणोदस्य सौरते ॥ ६६ ॥ अद्यप्रभृति देवेशि कलेः पञ्च
सहस्रकम् ॥ वर्षं स्थितिस्ते भारत्या भुवि शापेन भारते ॥ ६७ ॥ नित्यं वारिधिना सार्द्धं करिष्यसि रहो रतिम् ॥ त्वमेव रसिका
देवी रसिकेन्द्रेण संयुता ॥ ६८ ॥ त्वां तोषयन्ति स्तोत्रेण भगीरथकृतेन च ॥ भारतस्था जनाः सर्वे पूजयिष्यन्ति भक्तितः ॥६९॥
ध्यानेन कौथुमोक्तेन ध्यात्वा त्वां पूजयिष्यति ॥ यः स्तौति प्रणमेन्नित्यं सोऽश्वमेधफलं लभेत् ॥ ७० ॥ गङ्गा गङ्गेति यो ब्रूयाद्यो
जनानां शतैरपि ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥७१॥ सहस्रपापिनां स्नानाद्यत्पापं ते भविष्यति ॥ मद्भक्तदर्शने
तावत्तदेव हि विनश्यति ॥ ७२ ॥ पापिनां तु सहस्राणां शवस्पर्शेन यत्तव ॥ मन्मन्त्रोपासकस्नानात्तदघं च विनश्यति ॥ ७३ ॥
यत्र यत्र भवेद्गङ्गे मन्नामगुणकीर्त्तनम् ॥ तत्रैव त्वमधिष्ठानं करिष्यस्यघमोचनात् ॥ ७४ ॥ सार्द्धं सरिद्भिः श्रेष्ठाभिः सरस्वत्या
दिभिः शुभे ॥ तत्तु तीर्थं भवेत्सद्यो यत्र मद्गुणकीर्त्तनम् ॥ ७५ ॥ यद्रेणुस्पर्शमात्रेण पूतो भवति पातकी ॥ रेणुप्रमाणं वर्षं च स
वैकुण्ठे वसेद् ध्रुवम् ॥७६॥ ज्ञानेन त्वयि ये भक्त्या मन्नामस्मृतिपूर्वकम् ॥ समुत्सृजन्ति प्राणांश्च ते गच्छन्ति हरेः पदम् ॥ ७७ ॥
पार्षदप्रवरास्ते च भविष्यन्ति हरेश्चिरम् ॥असंख्यकं प्राकृतिकं लयं द्रक्ष्यन्ति ते नराः ॥ ७८ ॥ मृतस्य बहुपुण्येन तच्छवं त्वयि
विन्यसेत् ॥ प्रयाति स च वैकुण्ठं यावदस्थनां स्थितिस्त्वयि ॥ ७९ ॥ कायव्यूहं ततः कृत्वा भोजयित्वा स्वकर्मकम् ॥ तस्मै
ददामि सारूप्यं तं करोमि च पार्षदम् ॥ ८० ॥ अज्ञानी त्वज्जलस्पर्शाद्यदि प्राणान्समुत्सृजेत् ॥तस्मै ददामि सारूप्यं तं करोमि

च पार्षदम् ॥ ८१ ॥ अन्यत्र वा त्यजेत्प्राणांस्त्वन्नामस्मृतिपूर्वकम् ॥ तस्मै ददामि सालोक्यमसंख्यप्रलयालयम् ॥ ८२ ॥ अन्यत्र
वा त्यजेत्प्राणान्मन्नामस्मृतिपूर्वकम् ॥ तस्मै ददामि सालोक्यं यावद्वै ब्रह्मणो वयः ॥ ८३ ॥ तीर्थेऽप्यतीर्थे मरणे विशेषो नास्ति
कश्चन ॥ मन्मन्त्रोपासकानां च नित्यं नैवेद्यभोजिनाम् ॥ ८४ ॥ पूतं कर्तुं स शक्तो हि लीलया भुवनत्रयम् ॥ रत्नेन्द्रसारयानेन
गोलोकं स प्रयाति च ॥ ८५ ॥ मद्भक्तबान्धवा ये ये ते ते पुण्यधियः शुभे ॥ ते यान्ति रत्नयानेन गोलोकं च सुदुर्लभम् ॥८६॥
यत्र तत्र मृता ये च ज्ञानाज्ञानेन वा सति ॥ जीवन्मुक्ताश्च ते पूता भक्तसन्निधिमात्रतः ॥ ८७ ॥ इत्युक्त्वा श्रीहरिस्तां च तमुवाच
भगीरथम् ॥ स्तुहि गङ्गामिमां भक्त्या पूजां कुरु च साम्प्रतम् ॥ ८८ ॥ भगीरथस्तां तुष्टाव पूजयामास भक्तितः ॥ ध्यानेन कौथुमोक्तेन
स्तोत्रेण च पुनः पुनः ॥ ८९ ॥ श्रीकृष्णं प्रणनामाथ परमात्मानमीश्वरम् ॥ भगीरथश्च गङ्गां च सोऽन्तर्द्धाय गतो हरिः
॥ ९० ॥ नारद उवाच ॥ स्तोत्रेण केन ध्यानेन केन पूजाक्रमेण च ॥ पूजां चकार नृपतिर्वद वेदविदां वर ॥ ९१ ॥ श्रीनारायण
उवाच ॥ स्नात्वा नित्यक्रियां कृत्वा धृत्वा धौते च वाससी ॥ पादौ प्रक्षाल्य चाचम्य संयतो भक्तिपूर्वकम् ॥ ९२ ॥ गणेशं च
दिनेशं च वह्निं विष्णुं शिवं शिवाम् ॥ सम्पूजयेन्नरश्शुद्धः सोऽधिकारी च पूजने ॥ ९३ ॥ गणेशं विघ्ननाशाय निष्पापाय दिवाकरम्
॥ वह्निं स्वशुद्धये विष्णुं मुक्तये पूजयेन्नरः ॥ ९४ ॥ शिवं ज्ञानाय तदिनां शिवां बुद्धिविवृद्धये ॥ सम्पूज्यैतल्लभेत्प्राज्ञो विपरीतमतोऽन्यथा
॥ ९५ ॥ दध्यावनेन तद्ध्यानं शृणु नारद तत्त्वतः ॥ ध्यानं च कौथुमोक्तं वै सर्वपापप्रणाशनम् ॥ ९६ ॥ श्वेतचम्पकवर्णाभां
गङ्गां पापप्रणाशिनीम् ॥ कृष्णविग्रहसम्भूतां कृष्णतुल्यां :परां सतीम् ॥ ९७ ॥ वह्निशुद्धांशुकाधानां रत्नभूषणभूषिताम्
॥ शरत्पूर्णेन्दुशतकप्रभाजुष्टकलेवराम् ॥ ९८ ॥ ईषद्धासप्रसन्नास्यां शश्वत्सुस्थिरयौवनाम् ॥ नारायणप्रियां शान्तां सत्सौभाग्यसमन्विताम्
॥ ९९ ॥ बिभ्रतीं कबरीभारं मालतीमाल्यसंयुताम् ॥ सिन्दूरबिन्दुललितां सार्द्धं चन्दनबिन्दुभिः ॥ १०० ॥
कस्तूरीपत्रकं गण्डे नानाचित्रसमन्वितम् ॥ पक्वबिम्बसमानैकचार्वोष्ठपुटमुत्तमम् ॥ १०१ ॥ मुक्तापंक्तिप्रभाजुष्टदन्तपंक्तिमनो

हराम् ॥ सुचारुवक्रनयनां सकटाक्षमनोरमाम् ॥ १०२ ॥ कठिनं श्रीफलाकारं स्तनयुग्मं च बिभ्रतीम् ॥ बृहच्छ्रोणीं सुकठिनां रम्भास्तम्भपरिष्कृताम् ॥ १०३ ॥ स्थलपद्मप्रभाजुष्टपादपद्मयुगंधराम् ॥ रत्नाभरणसंयुक्तं कुंकुमाक्तं सयावकम् ॥ १०४ ॥ देवेन्द्रमौलिमन्दारमकरन्दकणारुणम् ॥ सुरसिद्धमुनीन्द्रादिदत्तार्घ्यैस्ससंयुतं सदा ॥ १०५ ॥ तपस्विमौलिनिकरभ्रमरश्रेणिसंयुतम् ॥ मुक्तिप्रदं मुमुक्षूणां कामिनां स्वर्गभोगदम् ॥ १०६ ॥ वरां वरेण्यां वरदां भक्तानुग्रहकातराम् ॥ श्रीविष्णोः पददात्रीं च भजे विष्णुपदीं सतीम् ॥ १०७ ॥ इति ध्यानेन चानेन ध्यात्वा त्रिपथगां शुभाम् ॥ दत्त्वा संपूजयेद्ब्रह्मन्नुपहारांश्च षोडश ॥ १०८ ॥ आसनं पाद्यमर्घ्यं च स्नानीयं चानुलेपनम् ॥ धूपं दीपं च नैवेद्यं ताम्बूलं शीतलं जलम् ॥ १०९ ॥ वसनं भूषणं माल्यं गन्धमाचमनीयकम् ॥ मनोहरं सुतल्पं च देयान्येतानि षोडश ॥११०॥ दत्त्वा भक्त्या संप्रणमेत्स्तुत्वा तां संपुटाञ्जलिः ॥ संपूज्यैवंप्रकारेण सोऽश्वमेधफलं लभेत् ॥१११॥ स्तोत्रं वै कौथुमोक्तं च संवादं विष्णुवेधसोः ॥ शृणु नारद वक्ष्यामि पापघ्नं च सुपुण्यदम्॥११२॥ श्रीब्रह्मोवाच ॥ श्रोतुमिच्छामि देवेश लक्ष्मीकान्त नमः प्रभो ॥ विष्णो विष्णुपदीस्तोत्रं पापघ्नं पुण्यकारणम् ॥ ११३ ॥ श्रीनारायण उवाच ॥ शिवसंगीतसंमुग्धश्रीकृष्णाङ्गद्रवोद्भवाम् ॥ राधांगद्रवसम्भूतां तां गङ्गां प्रणमाम्यहम् ॥ ११४ ॥ या जन्मसृष्टेरादौ च गोलोके रासमण्डले ॥ सन्निधाने शङ्करस्य तां गङ्गां प्रणमाम्यहम् ॥ ॥ ११५ ॥ गोपैर्गोपीभिराकीर्णे शुभे राधामहोत्सवे ॥ कार्तिकीपूर्णिमाजातां तां गंगां प्रणमाम्यहम् ॥ ११६ ॥ कोटियोजनविस्तीर्णा दैर्घ्ये लक्षगुणा ततः ॥ समावृता या गोलोकं तां गंगां प्रणमाम्यहम् ॥११७॥ षष्टिलक्षैर्योजनैर्या ततो दैर्घ्ये चतुर्गुणा ॥ समावृता या वैकुण्ठं तां गंगां प्रणमाम्यहम् ॥११८॥ विंशल्लक्षैर्योजनैर्या ततो दैर्घ्ये चतुर्गुणा ॥ आवृता ब्रह्मलोकं या तां गंगां प्रणमाम्यहम् ॥ ११९ ॥ त्रिंशल्लक्षैर्योजनैर्या दैर्घ्ये पञ्चगुणा ततः ॥ आवृता शिवलोकं या तां गंगां प्रणमाम्यहम् ॥ १२० ॥ षड्योजनसुविस्तीर्णा दैर्घ्ये दशगुणा ततः ॥ मन्दाकिनी येन्द्रलोके तां गंगां प्रणमाम्यहम् ॥ १२१ ॥ लक्षयोजनविस्तीर्णा दैर्घ्ये सप्त

गुणा ततः ॥ आवृता ध्रुवलोकं या तां गंगां प्रणमाम्यहम् ॥ १२२ ॥ लक्षयोजनविस्तीर्णा दैर्घ्ये षड्गुणिता ततः ॥ आवृता चन्द्रलोकं या तां गंगां प्रणमाम्यहम् ॥१२३॥ योजनैष्षष्टिसाहस्रैर्दैर्घ्ये दशगुणा ततः ॥ आवृता सूर्य्यलोकं या तां गंगां प्रणमाम्यहम्॥ ॥ १२४ ॥ लक्षयोजनविस्तीर्णा दैर्घ्ये षड्गुणिता ततः ॥ आवृता सत्यलोकं या तां गङ्गां प्रणमाम्यहम् ॥ १२५ ॥ दशलक्षैर्योजनैर्या दैर्घ्ये पञ्चगुणा ततः ॥ आवृता या तपोलोकं तां गङ्गां प्रणमाम्यहम् ॥१२६॥ सहस्रयोजना या च दैर्घ्ये सप्तगुणा ततः ॥ आवृता जनलोकं या तां गंगां प्रणमाम्यहम् ॥ १२७ ॥ सहस्रयोजनाऽऽयामे दैर्घ्ये सप्तगुणा ततः ॥ आवृता या च कैलासं तां गंगां प्रणमाम्यहम् ॥१२८॥ पाताले या भोगवती विस्तीर्णा दशयोजना ॥ ततो दशगुणा दैर्घ्ये तां गंगां प्रणमाम्यहम् ॥१२९॥ क्रोशैकमात्रविस्तीर्णा ततः क्षीणा न कुत्रचित् ॥ क्षितौ चालकनन्दा या तां गङ्गां प्रणमाम्यहम् ॥ १३० ॥ सत्ये या क्षीरवर्णा च त्रेतायामिन्दुसन्निभा ॥ द्वापरे चन्दनाभा च तां गंगां प्रणमाम्यहम् ॥१३१॥ जलप्रभा कलौ या च नान्यत्र पृथिवीतले ॥ स्वर्गे च नित्यं क्षीराभा तां गङ्गां प्रणमाम्यहम् ॥ १३२ ॥ यस्याः प्रभाव अतुलः पुराणे च श्रुतौ श्रुतः ॥ या पुण्यदा पापहर्त्री तां गङ्गां प्रणमाम्यहम् ॥ १३३ ॥ यत्तोयकणिकास्पर्शः पापिनां च पितामह ॥ ब्रह्महत्यादिकं पापं कोटिजन्मार्जितं दहेत् ॥ १३४ ॥ इत्येवं कथितं ब्रह्मन्गंगापद्यैकविंशतिम् ॥ स्तोत्ररूपं च परमं पापघ्नं पुण्यबीजकम् ॥ १३५ ॥ नित्यं यो हि पठेद्भक्त्या संपूज्य च सुरेश्वरीम् ॥ अश्वमेधफलं नित्यं लभते नात्र संशयः॥१३६॥ अपुत्रो लभते पुत्र भार्याहीनो लभेत्प्रियाम् ॥ रोगान्मुच्येत रोगी च बद्धो मुच्येत बन्धनात् ॥ १३७ ॥ अस्पष्टकीर्तिः सुयशा मूर्खो भवति पण्डितः ॥ यः पठेत्प्रातरुत्थाय गङ्गास्तोत्रमिदं शुभम् ॥ ॥१३८॥ शुभं भवेत्तु दुःस्वप्नं गङ्गास्नानफलं लभेत् ॥१३९॥ नारायण उवाच ॥ भगीरथोऽनया स्तुत्या स्तुत्वा गङ्गां च नारद ॥ जगाम तां गृहीत्वा च यत्र नष्टश्च सागराः ॥ १४० ॥ वैकुण्ठं ते ययुस्तूर्णं गङ्गायाः स्पर्शवायुना ॥ भगीरथेन साऽऽनीता तेन भागीरथी स्मृता ॥ १४१ ॥ इत्येवं कथितं सर्वं गङ्गोपाख्यानमुत्तमम् ॥ पुण्यदं मोक्षदं सारं किं भूयः श्रोतुमिच्छसि ॥ १४२ ॥

नारद उवाच ॥ शिवसंगीतसंमुग्धे श्रीकृष्णे द्रवतां गते ॥ द्रवतां च गतायां च राधायां किं बभूव ह ॥ १४३ ॥ तत्रस्थाश्च जना ये ये ते च किं चक्रुरुद्यमम् ॥ एतत्सर्वं सुविस्तीर्णं प्रभो वक्तुमिहार्हसि॥१४४॥नारायण उवाच ॥ कार्त्तिकीपूर्णिमायां च राधायाः सुमहोत्सवे ॥ कृष्णः संपूज्य तां राधामत्रसद्रासमण्डले ॥ १४५ ॥ कृष्णेन पूजितां तां तु संपूज्याहृतमानसाः ॥ ऊचुर्ब्रह्मादयः सर्वे ऋषयः सनकादयः ॥ १४६ ॥ एतस्मिन्नन्तरे कृष्ण संगीतं च सरस्वती ॥ जगौ सुन्दरतानेन वीणया च मनोहरम् ॥ १४७ ॥ तुष्टो ब्रह्मा ददौ तस्यै महारत्नाढ्यमालिकाम् ॥ शिरोमणीन्द्रसारं च सर्वब्रह्माण्डदुर्लभम् ॥ १४८ ॥ कृष्णः कौस्तुभरत्नं च सर्वरत्नात्परं वरम् ॥ अमूल्यरत्नखचितं हारसारं च राधिका ॥ १४९ ॥ नारायणश्च भगवान्वनमालां मनोहराम् ॥ अमूल्यरत्नकलितं लक्ष्मीर्मकरकुण्डलम् ॥ १५० ॥ विष्णुमाया भगवती मूलप्रकृतिरीश्वरी ॥ दुर्गा नारायणीशानी विष्णुभक्तिं सुदुर्लभाम् ॥ १५१ ॥ धर्मबुद्धिं च धर्मस्तु यशश्च विपुलं भवे ॥ वह्निशुद्धांशुकं वह्निर्वायुश्च मणिनूपुरम् ॥ १५२ ॥ एतस्मिन्नन्तरे शम्भुर्ब्रह्मणा प्रेरितो मुहुः ॥ जगौ श्रीकृष्णसंगीतं रासोल्लाससमन्वितम् ॥ १५३ ॥ मूर्च्छां प्रापुः सुराः सर्वे चित्रपुत्तलिका यथा ॥ क्षणेन चेतनां प्राप्य ददृशू रासमण्डलम् ॥ १५४ ॥ स्थलं सर्वं जलाकीर्णं हीनराधाहरिं तथा ॥ अत्युच्चै रुरुदुः सर्वे गोपा गोप्यः सुरा द्विजाः ॥ १५५ ॥ ध्यानेन धाता बुबुधे सर्वमेतदभीप्सितम् ॥ गतश्च राधया सार्द्धं श्रीकृष्णो द्रवतामिति ॥ १५६ ॥ ततो ब्रह्मादयः सर्वे तुष्टुवुः परमेश्वरम् ॥ स्वमूर्त्तिं दर्शय विभो वाञ्छितं वरमेव नः ॥ १५७ ॥ एतस्मिन्नन्तरे तत्र वागबभूवाशरीरिणी ॥ तामेव शुश्रुवुः सर्वे सुव्यक्तां मधुरां शुभाम् ॥ १५८ ॥ सर्वात्माऽहमियं शक्तिर्भक्तानुग्रहविग्रहा ॥ ममाप्यस्याश्च हे देवा देहेन च किमावयोः ॥ १५९ ॥ मनवो मानवाः सर्वे मुनयश्चैव वैष्णवाः ॥ मन्मन्त्रपूता मां द्रष्टुमागमिष्यन्ति मत्पदम् ॥ १६० ॥ मूर्त्तिं द्रष्टुं च सुव्यग्रा यूयं यदि सुरेश्वराः ॥ करोति शम्भुस्तत्रैव मदीयं वाक्यपालनम् ॥ १६१ ॥ स्वयं विधाता त्वं ब्रह्मन्नाज्ञां कुरु जगद्गुरो ॥ कर्त्तुं शास्त्रविशेषं च वेदांगं सुमनोहरम् ॥ १६२ ॥ अपूर्वमन्त्रनिकरैः सर्वाभीष्टफलप्रदैः ॥ स्तोत्रैश्च

कवचैर्ध्यानैर्युतं पूजाविधिक्रमैः ॥ १६३ ॥ मन्मन्त्रं कवचं स्तोत्रं कृत्वा यत्नेन गोपय ॥ भवन्ति विमुखा येन जनानां यत्करिष्यति ॥ १६४ ॥ सहस्रेषु शतेष्वेको मन्मन्त्रोपासको भवेत् ॥ ते ते जना मन्त्रपूताश्चागमिष्यन्ति मत्पदम् ॥ ॥ १६५ ॥ अन्यथा च भविष्यन्ति सर्वे गोलोकवासिनः ॥ निष्फलं भविता सर्वं ब्रह्माण्डं चैव वेधसः ॥ १६६ ॥ जनाः पञ्चप्रकाराश्च युक्ताः स्रष्टुर्भवे भवे ॥ पृथिवीवासिनः केचित्केचित्स्वर्गनिवासिनः ॥ १६७ ॥ अधोनिवासिनः केचिद्ब्रह्मलोकनिवासिनः ॥ केचिद्वा वैष्णवाः केचिन्मम लोकनिवासिनः ॥ १६८ ॥ इदं कर्तुं महादेवः करोतु सुरसंसदि ॥ प्रतिज्ञां सुदृढां सद्यस्ततो मूर्तिं च पश्यसि ॥ १६९ ॥ इत्येवमुक्त्वा गगने विरराम सनातनः ॥ तद्दृष्ट्वा च जगन्नाथस्तमुवाच शिवं मुदा ॥१७०॥ ब्रह्मणो वचनं श्रुत्वा ज्ञानेशो ज्ञानिनां वरः ॥ गङ्गातोयं करे धृत्वा स्वीचकार वचस्तु सः ॥ १७१ ॥ संयुक्तं विष्णुमायाद्यैर्मन्त्राद्यैः शास्त्रमुत्तमम् ॥ वेदसारं करिष्यामि कृष्णाज्ञापालनाय च ॥ १७२ ॥ गंगातोयमुपस्पृश्य मिथ्या यदि वदेज्जनः ॥ स याति कालसूत्रं च यावद्वै ब्रह्मणो वयः ॥ १७३ ॥ इत्युक्ते शङ्करे ब्रह्मन्गोलोके सुरसंसदि ॥ आविर्बभूव श्रीकृष्णो राधया सह तत्परः ॥ १७४ ॥ ते तं दृष्ट्वा च संहृष्टाः संस्तूय पुरुषोत्तमम् ॥ परमानन्दपूर्णाश्च चक्रुश्च पुनरुत्सवम् ॥ १७५ ॥ कालेन शम्भुर्भगवान्छास्त्रदीपं चकार सः ॥ इत्येवं कथितं सर्वं सुगोप्यं च सुदुर्लभम् ॥ १७६ ॥ सा चैवं द्रवरूपा या गङ्गा गोलोकसम्भवा ॥ राधाकृष्णाङ्गसम्भूता भुक्तिमुक्तिफलप्रदा ॥ १७७ ॥ स्थाने स्थाने स्थापिता सा कृष्णेन परमात्मना ॥ कृष्णस्वरूपा परमा सर्वब्रह्माण्डपूजिता ॥ १७८ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे नारदनारायणसंवादे द्वितीये प्रकृतिखण्डे गङ्गोपाख्यानं नाम दशमोऽध्यायः॥१०॥ नारद उवाच॥कलेः पञ्चसहस्रे सा समतीते सुरेश्वरी ॥ क्व गता सा महाभागा तन्मे व्याख्यातुमर्हसि ॥१॥ नारायण उवाच ॥ भारतं भारतीशापात्समागत्येश्वरेच्छया ॥ जगाम तं च वैकुण्ठं शापान्ते पुनरेव सा ॥२॥ भारतं भारती त्यक्त्वा चागमत्तद्धरेः पदम् ॥ पद्मावती च शापान्ते गंगायाश्चैव नारद ॥३॥ गङ्गा सरस्वती लक्ष्मीश्चैतास्तिस्रः प्रिया हरेः॥तुलसीसहिता ब्रह्मंश्चतस्रः कीर्त्तिताः श्रुतौ॥४॥नारद उवाच ॥ हेतुना केन

देवी वै विष्णुपादाब्जसंभवा ॥ धातुः कमण्डलुस्था च शङ्करस्य शिरोगता ॥ ५ ॥ बभूव सा मुनिश्रेष्ठ गंगा नारायणप्रिया ॥ अहो
केन प्रकारेण तन्मे व्याख्यातुमर्हसि ॥ ६ ॥ ॥ श्रीनारायण उवाच ॥ पुरा बभूव गोलोके सा गंगा द्रवरूपिणी ॥ राधाकृष्णांगसं
भूता तदंशा तत्स्वरूपिणी ॥ ७ ॥ द्रवाधिष्ठातृरूपा या रूपेणाप्रतिमा भुवि ॥ नवयौवनसम्पन्ना रत्नाभरणभूषिता ॥ ८ ॥ शरन्म
ध्याह्नपद्मास्या सस्मिता सुमनोहरा ॥ तप्तकाञ्चनवर्णाभा शरच्चन्द्रसमप्रभा ॥ ९ ॥ स्निग्धप्रभाऽतिसुस्निग्धा शुद्धसत्त्वस्वरूपिणी ॥
सुपीनकठिनश्रोणी सुनितम्बयुगं वरम् ॥ १० ॥ पीनोन्नतं सुकठिनं स्तनयुग्मं सुवर्तुलम् ॥ सुचारु नेत्रयुगलं सुकटाक्षं सुवक्रिमम् ॥
॥ ११ ॥ वक्रिमं कबरीभारं मालतीमाल्यसंयुतम् ॥ सिन्दूरबिन्दुललितं सार्द्धं चन्दनबिन्दुभिः ॥ १२ ॥ कस्तूरीपत्रिकायुक्तं
गण्डयुग्मं मनोहरम् ॥ बन्धूककुसुमाकारमधरोष्ठं च सुंदरम् ॥ १३ ॥ पक्वदाडिमबीजाभदन्तपंक्तिसमुज्ज्वला ॥ वाससी वह्निशुद्धे
च नीवीयुक्ते च बिभ्रती ॥ १४ ॥ सा सकामा कृष्णपार्श्वे समुत्तस्थे सुलज्जिता ॥ पद्मपत्रसमानाभ्यां लोचनाभ्यां विभो
र्मुखम् ॥ १५ ॥ निमेषरहिताभ्यां च पिबन्ती सततं मुदा ॥ प्रफुल्लवदना हर्षान्नवसङ्गमलालसा ॥ १६ ॥ मूर्च्छिता प्रभुरूपेण
पुलकाङ्कितविग्रहा ॥ एतस्मिन्नन्तरे तत्र विद्यमाना च राधिका ॥ १७ ॥ गोपीत्रिंशत्कोटियुक्ता कोटिचन्द्रसमप्रभा ॥
कोपेन रक्तपद्मास्या रक्तपङ्कजलोचना ॥ १८ ॥ श्वेतचम्पकवर्णाभा मत्तवारणगामिनी ॥ अमूल्यरत्नखचितनानाभरणभूषिता ॥ १९ ॥
माणिक्यखचितं हारममूल्यं वह्निशौचकम् ॥ पीताभवस्त्रयुगलं नीवीयुक्तं च बिभ्रती ॥ २० ॥ स्थलपद्मप्रभाजुष्टं कोमलं च सुरञ्जि
तम् ॥ कृष्णदत्तार्घ्यसंयुक्तं विन्यस्यन्ती पदाम्बुजम् ॥ २१ ॥ रत्नेन्द्रराजखचितविमानादवरुह्य च ॥ सेव्यमाना च सखिभिः श्वेत
चामरवायुना ॥ २२ ॥ कस्तूरीबिन्दुतिलकं चन्दनेन्दुसमन्वितम् ॥ दीप्तदीपप्रभाकारं सिन्दूरारुणसुन्दरम् ॥ २३ ॥ दधती भाल
मध्ये च सीमन्ताधस्तदुज्ज्वलम् ॥ पारिजातप्रसूनादिमालायुक्तं सुवक्रिमम् ॥ २४ ॥ सुचारुकबरीभारं कम्पयन्ती च कम्पिता ॥
सुचारुनासासंयुक्तमोष्ठं कम्पयती रुषा ॥ २५ ॥ गत्वा तस्थौ कृष्णपार्श्वे रत्नसिंहासने वरे ॥ सखीनां च समूहैश्च परिपूर्णा विभोः

सभा ॥ २६ ॥ तां च दृष्ट्वा समुत्तस्थौ कृष्णः सादरमच्युतः ॥ संभाष्य मधुरालापैः सस्मितश्च ससंभ्रमः ॥ २७ ॥ प्रणेमुरभि
संत्रस्ता गोपा नम्रात्मकन्धराः ॥ तुष्टुवुस्ते च भक्त्या तं तुष्टाव परमेश्वरम् ॥ २८ ॥ उत्थाय गंगा सहसा सम्भाषां च चकार
सा ॥ कुशलं परिपप्रच्छ भीताऽतिविनयेन च ॥ २९ ॥ नम्रभावस्थिता त्रस्ता शुष्ककण्ठौष्ठतालुका ॥ ध्यानेन शरणापन्ना श्री
कृष्णचरणाम्बुजे ॥ ३० ॥ तद्धृत्पद्मे स्थितः कृष्णो भीतायै चाभयं ददौ ॥ बभूव स्थिरचित्ता सा सर्वेश्वरवरेण च ॥ ३१ ॥
ऊर्ध्वं सिंहासनस्थां च राधां गङ्गा ददर्श सा ॥ सुस्निग्धां सुखदृश्यां च ज्वलन्तीं ब्रह्मतेजसा ॥ ३२ ॥ असंख्यब्रह्मणामाद्यां चा
दिसृष्टिं सनातनीम् ॥ यथा द्वादशवर्षीयां कन्यां च नवयौवनाम् ॥ ३३ ॥ विश्ववृन्दे निरुपमां रूपेण च गुणेन च ॥ शान्त
कान्तामनन्तां तामाद्यन्तरहितां सतीम् ॥ ३४ ॥ शुभां सुभद्रां सुभगां स्वामिसौभाग्यसंयुताम् ॥ सौन्दर्यसुन्दरीं श्रेष्ठां सुन्दरीष्व
खिलासु च ॥ ३५ ॥ कृष्णार्द्धाङ्गी कृष्णसमां तेजसा वयसा त्विषा ॥ पूजितां च महालक्ष्मीं महालक्ष्मीश्वरेण च ॥ ३६ ॥ प्रच्छा
द्यमानां प्रभया सभामीशस्य सुप्रभाम् ॥ सखीदत्तं च ताम्बूलं गृह्णतीमन्यदुर्लभम् ॥ ३७ ॥ अजन्यां सर्वजननीं धन्यां मान्यां च
मानिनीम् ॥ कृष्णप्राणाधिदेवीं च प्राणप्रियतमां रमाम्॥३८॥दृष्ट्वा रासेश्वरीं तृप्तिं न जगाम सुरेश्वरी ॥ निमेषरहिताभ्यां च लोच
नाभ्यां पपौ च ताम्॥३९॥एतस्मिन्नन्तरे राधा जगदीशमुवाच सा॥वाचा मधुरया शान्ता विनीता सस्मिता मुने॥४०॥राधिकोवाच॥
केयं प्राणेश कल्याणी सस्मिता त्वन्मुखाम्बुजम् ॥ पश्यन्ती सततं पार्श्वे सकामा रक्तलोचना ॥ ४१ ॥ मूर्च्छां प्राप्नोति रूपेण
पुलकाङ्कितविग्रहा ॥ वस्त्रेण मुखमाच्छाद्य निरीक्षन्ती पुनः पुनः ॥ ४२ ॥ त्वं चापि मां सन्निरीक्ष्य सकामः सस्मितः सदा ॥
मयि जीवति गोलोके भूता दुर्वृत्तिरीदृशी ॥ ४३ ॥ त्वमेव चैवं दुर्वृत्तं वारंवारं करोषि च ॥ क्षमां करोमि ते प्रेम्णा स्त्रीजातिः
स्निग्धमानसा ॥ ४४ ॥ संगृह्येमां प्रियामिष्टां गोलोकाद्गच्छ लम्पट ॥ अन्यथा नहि ते भद्रं भविष्यति सुरेश्वर ॥ ४५ ॥ दृष्टस्त्वं
विरजायुक्तो मया चन्दनकानने ॥ क्षमा कृता मया पूर्वं सखीनां वचनादहो ॥ ४६ ॥ त्वया मच्छब्दमात्रेण तिरोधानं कृतं पुरा ॥

देहं सन्त्यज्य विरजा नदीरूपा बभूव सा ॥ ४७ ॥ कोटियोजनविस्तीर्णा ततो दैर्घ्यं चतुर्गुणा ॥ अद्यापि विद्यमाना सा तत्र सत्की
र्तिरूपिणी ॥ ४८ ॥ गृहं मयि गतायां च पुनर्गत्वा तदन्तिकम् ॥ उच्चैरुरौषीर्विरजे विरजे चेति संस्मरन् ॥ ४९ ॥ तदा तोयात्स
मुत्थाय सा योगात्सिद्धयोगिनी ॥ सालङ्कारा मूर्तिमती ददौ तुभ्यं च दर्शनम् ॥ ५० ॥ ततस्तां च समाश्लिष्य वीर्य्याधानं कृतं
त्वया ॥ ततो बभूवुस्तस्यां च समुद्राः सप्त चैव हि ॥ ५१ ॥ दृष्टस्त्वं शोभया गोप्या युक्तश्चम्पककानने ॥ सद्यो मच्छब्दमात्रेण तिरो
धानं कृतं त्वया ॥५२॥ शोभा देहं परित्यज्य प्राविशच्चन्द्रमण्डलम् ॥ ततस्तस्याः शरीरं च स्निग्धं तेजो बभूव ह ॥ ५३ ॥ संवि
भज्य त्वया दत्तं हृदयेन विदूयता ॥ रत्नाय किञ्चित्स्वर्णाय किञ्चिन्मतिवराय च ॥ ५४ ॥ किञ्चित्स्त्रीणां मुखाब्जेभ्यः
किञ्चिद्राज्ञे च किञ्चन ॥ किञ्चित्प्रकृष्टवस्त्रेभ्यो रौप्येभ्यश्चापि किञ्चन ॥ ५५ ॥ किञ्चिच्चन्दनपङ्केभ्यस्तोयेभ्यश्चापि किञ्चन ॥
किञ्चित्किसलयेभ्यश्च पुष्पेभ्यश्चापि किंचन ॥ ५६ ॥ किञ्चित्फलेभ्यः सस्येभ्यः सुपक्वेभ्यश्च किञ्चन ॥ नृपदेवगृहेभ्यश्च
संस्कृतेभ्यश्च किंचन ॥ ५७ ॥ दृष्टस्त्वं प्रभया गोप्या युक्तो वृन्दावने वने ॥ सद्यो मच्छब्दमात्रेण तिरोधानं कृतं त्वया ॥
॥ ५८ ॥ प्रभा देहं परित्यज्य प्राविशत्सूर्य्यमण्डलम् ॥ ततस्तस्याः शरीरं च तीक्ष्णं तेजो बभूव ह ॥ ५९ ॥ संविभज्य त्वया
दत्तं प्रेम्णा च रुदता पुरा ॥ विभज्य चक्षुषोर्दत्तं लज्जया तद्भयेन च ॥ ६० ॥ हुताशनाय किंचिच्च नृपेभ्यश्चापि किञ्चन ॥
किंचित्पुरुषसंघेभ्यो देवेभ्यश्चापि किंचन ॥ ६१ ॥ किंचिद्दस्युगणेभ्यश्च नागेभ्यश्चापि किंचन ॥ ब्राह्मणेभ्यो मुनिभ्यश्च तप
स्विभ्यश्च किंचन ॥६२॥ स्त्रीभ्यः सौभाग्ययुक्ताभ्यो यशस्विभ्यश्च किंचन ॥ तच्च दत्त्वा च सर्वेभ्यः पूर्वं रोदितुमुद्यतः ॥६३॥
शान्त्या गोप्या युतस्त्वं च दृष्टो वै रासमण्डले ॥ वसन्ते पुष्पशय्यायां माल्यवांश्चन्दनोक्षितः ॥ ६४ ॥ रत्नप्रदीपैर्युक्तश्च रत्ननि
र्मितमन्दिरे ॥ रत्नभूषणभूषाढ्यो रत्नभूषितया सह ॥ ६५ ॥ त्वया दत्तं च ताम्बूलं भुक्तवत्यै सुवासितम् ॥ तया दत्तं च ताम्बूलं
भुक्तवांस्त्वं पुरा विभो ॥६६॥ सद्यो मच्छब्दमात्रेण तिरोधानं कृतं त्वया ॥ शान्तिर्देहं परित्यज्य भिया लीना त्वयि प्रभो ॥६७॥

ततस्तस्याः शरीरं च गुणश्रेष्ठं बभूव ह ॥ संविभज्य त्वया दत्तं प्रेम्णा च रुदता पुरा ॥ ६८ ॥ विश्वे विषयिणे किंचित्सत्त्वरूपाय विष्णवे ॥ शुद्धसत्त्वस्वरूपायै किंचिल्लक्ष्म्यै पुरा विभो ॥६९॥ त्वन्मन्त्रोपासकेभ्यश्च वैष्णवेभ्यश्च किंचन ॥ तपस्विभ्यश्च धर्माय धर्मिष्ठेभ्यश्च किंचन ॥७०॥ मया पूर्वं हि दृष्टस्त्वं गोप्या च क्षमया सह ॥ सुवेषवान्माल्यवांश्च गन्धचन्दनसंयुतः ॥ ॥ ७१ ॥ रत्नभूषितया चारुचन्दनोक्षितया तया ॥ सुखेन मूर्छितस्तल्पे पुष्पचन्दनसंयुते ॥ ७२ ॥ श्लिष्टोऽभून्निद्रया सद्यः सुखेन नवसङ्गमात् ॥ मया प्रबोधितौ सा च भवांश्च स्मरणं कुरु ॥ ७३ ॥ गृहीतं पीतवस्त्रं ते मुरली च मनोहरा ॥ वनमाला कौस्तुभश्चाप्यमूल्यं रत्नकुण्डलम् ॥ ७४ ॥ पश्चात्प्रदत्तं प्रेम्णा च सखीनां वचनादहो ॥ लज्जया कृष्णवर्णोऽभूदद्यापि च भवान्प्रभो ॥७५॥ क्षमा देहं परित्यज्य लज्जया पृथिवीं गता ॥ ततस्तस्याः शरीरं च गुणश्रेष्ठं बभूव ह ॥ ७६ ॥ संविभज्य त्वया दत्तं प्रेम्णा च रुदता पुरा ॥ किंचिद्दत्तं विष्णवे च वैष्णवेभ्यश्च किंचन ॥ ७७ ॥ धर्मिष्ठेभ्यश्च धर्माय दुर्बलेभ्यश्च किंचन ॥ तपस्विभ्योऽपि देवेभ्यः पंडितेभ्यश्च किंचन ॥ ७८ ॥ एतत्ते कथितं सर्वं किं भूयः श्रोतुमिच्छसि ॥ त्वद्गुणं बहुविस्तारं जानामि च परं प्रभो ॥७९॥ इत्येवमुक्त्वा सा राधा रक्तपङ्कजलोचना ॥ गङ्गां वक्तुं समारेभे नम्रास्यां लज्जितां सतीम् ॥ ८० ॥ गङ्गा रहस्यं योगेन ज्ञात्वा वै सिद्धयोगिनी ॥ तिरोभूय सभामध्यात्स्वजलं प्रविवेश सा ॥८१॥ राधा योगेन विज्ञाय सर्वत्रावस्थितां च ताम् ॥ पानं कर्तुं समारेभे गण्डूषात्सिद्धयोगिनी ॥ ८२ ॥ गंगा रहस्यं योगेन ज्ञात्वा वै सिद्धयोगिनी ॥ श्रीकृष्णचरणाम्भोजं परमं शरणं ययौ ॥ ८३ ॥ गोलोकं चैव वैकुण्ठं ब्रह्मलोकादिकं तथा ॥ ददर्श राधा सर्वत्र नैव गङ्गां ददर्श सा ॥ ८४ ॥ सर्वतो जलशून्यं च शुष्कपङ्कजगोलकम् ॥ जलजन्तुसमूहैश्च मृतदेहैः समन्वितम् ॥ ८५ ॥ ब्रह्मविष्णुशिवानन्तधर्मेन्द्रेन्दुदिवाकराः ॥ मनवो मानवाः सर्वे देवाः सिद्धास्तपस्विनः ॥ ८६ ॥ गोलोकं च समाजग्मुः शुष्ककण्ठौष्ठतालुकाः ॥ सर्वे प्रणेमुर्गोविन्दं सर्वेशं प्रकृतेः परम् ॥ ८७ ॥ वरं वरेण्यं वरदं वरिष्ठं वरकारणम् ॥ वरेशं च वरार्हं च सर्वेषां प्रवरं प्रभुम् ॥ ८८ ॥ निरीहं च निराकारं निर्लिप्तं च निराश्रयम् ॥ निर्गुणं च

निरुत्साहं निर्व्यूहं च निरञ्जनम् ॥ ८९ ॥ स्वेच्छामयं च साकारं भक्तानुग्रहविग्रहम् ॥ सत्यस्वरूपं सत्येशं साक्षिरूपं सनातनम् ॥
॥ ९० ॥ परं परेशं परमं परमात्मानमीश्वरम् ॥ प्रणम्य तुष्टुवुः सर्वे भक्तिनम्रात्मकन्धराः ॥ ९१ ॥ सगद्गदाः साश्रुनेत्राः पुलकाङ्कि
तविग्रहाः ॥ सर्वे संस्तूय सर्वेशं भगवन्तं परं हरिम् ॥९२॥ ज्योतिर्मयं परं ब्रह्म सर्वकारणकारणम् ॥ अमूल्यरत्नखचितचित्रसिंहा
सनस्थितम् ॥ ९३ ॥ सेव्यमानं च गोपालैः श्वेतचामरवायुना ॥ गोपालिकानृत्यगीतं पश्यन्तं सस्मितं मुदा ॥ ९४ ॥ वल्गुवेषैः
परिवृतं गोपैश्च शतकोटिभिः ॥ चन्दनोक्षितसर्वांगं रत्नभूषणभूषितम् ॥ ९५ ॥ नवीननीरदश्यामं किशोरं पीतवाससम् ॥ यथा
द्वादशवर्षीयं बालं गोपालरूपिणम् ॥ ९६ ॥ कोटिचन्द्रप्रभाजुष्टपुष्टश्रीयुक्तविग्रहम् ॥ स्वतेजसा परिवृतं सुसाहश्यं मनोहरम् ॥
॥ ९७ ॥ कोटिकन्दर्पसौन्दर्य्यलीलालावण्यविग्रहम् ॥ दृश्यमानं च गोपीभिः सस्मिताभिश्च सन्ततम् ॥ ९८ ॥ भूषणैर्भूषिताभिश्च
महारत्नविनिर्मितैः ॥ पिबन्तीभिर्लोचनाभ्यां मुखचन्द्रं प्रभोर्मुदा ॥ ९९ ॥ प्राणाधिकप्रियतमाराधावक्षःस्थलस्थितम् ॥ तया
प्रदत्तं ताम्बूलं भुक्तवन्तं सुवासितम् ॥ परिपूर्णतमं रासे ददृशुः सर्वतः सुराः ॥ १०० ॥ मुनयो मानवाः सिद्धास्तपसा च तप
स्विनः ॥ प्रहृष्टमानसाः सर्वे जग्मुः परमविस्मयम् ॥ १०१ ॥ परस्परं समालोच्य ते तमूचुश्चतुर्मुखम् ॥ निवेदितुं जगन्नाथं स्वाभि
प्रायमभीप्सितम् ॥ १०२ ॥ ब्रह्मा तद्वचनं श्रुत्वा स्थितं विष्णोस्तु दक्षिणे ॥ वामतो वामदेवस्य चागमत्कृष्णमुत्तमम् ॥ १०३ ॥
परमानन्दयुक्तं च परमानन्दरूपकम् ॥ सर्वं कृष्णमयं धाता चापश्यद्रासमण्डले ॥ १०४ ॥ सर्वं समानवेषं च समानासनसं
स्थितम् ॥ १०५ ॥ द्विभुजं मुरलीहस्तं वनमालाविभूषितम् ॥ मयूरपुच्छचूडं च कौस्तुभेन विराजितम् ॥ १०६ ॥
अतीव कमनीयं च सुन्दरं शान्तविग्रहम् ॥ गुणभूषणरूपेण तेजसा वयसा त्विषा ॥ १०७ ॥ वाससा यशसाऽऽकृत्या मूर्त्या सुन्द
रया समम् ॥ परिपूर्णतमं सर्वं सर्वैश्वर्य्यसमन्वितम् ॥ १०८ ॥ कः सेव्यस्सेवको वेति दृष्ट्वा निर्वक्तुमक्षमः ॥ क्षणं तेजः
स्वरूपं च रूपराशियुतं क्षणम्॥१०९॥एकमेव क्षणं कृष्णं राधया सहितं परम्॥प्रत्येकासनसंस्थं च तया च सहितं क्षणम् ॥११०॥

राधारूपधरं कृष्णं कृष्णरूपकलत्रकम् ॥ किं स्त्रीरूपं च पुंरूपं विधाता ध्यातुमक्षमः॥१११॥हृत्पद्मस्थं च श्रीकृष्णं धाता ध्यानेन
चेतसा ॥ चकार स्तवनं भक्त्या प्रणम्याथ त्वनेकधा ॥ ११२ ॥ ततः स चक्षुरुन्मील्य पुनश्च तदनुज्ञया ॥ अपश्यत्कृष्णमेकं
च राधावक्षःस्थलस्थितम् ॥ ११३ ॥ स्वपार्षदैः परिवृतं गोपीमण्डलमण्डितम् ॥ पुनः प्रणेमुस्तं दृष्ट्वा तुष्टुवुश्च पुनश्च ते ॥११४॥
विज्ञाय तदभिप्रायं तानुवाच सुरेश्वरः ॥ सर्वात्मा सर्वयज्ञेशः सर्वेशः सर्वभावनः ॥ ११५ ॥ श्रीभगवानुवाच ॥ आगच्छ कुशलं
ब्रह्मन्नागच्छ कमलापते ॥ इहागच्छ महादेव शश्वत्कुशलमस्तु वः ॥ ११६ ॥ आगताः स्थ महाभागा गङ्गानयनकारणात् ॥ गंगा
मच्चरणाम्भोजे भयेन शरणं गता ॥ ११७ ॥ राधेमां पातुमिच्छन्ती दृष्ट्वा मत्सन्निधानतः ॥ दास्यामीमां बहिः कृत्वा यूयं कुरुत
निर्भयाम् ॥ ११८ ॥ श्रीकृष्णस्य वचः श्रुत्वा सस्मितः कमलोद्भवः ॥ तुष्टाव सर्वाराध्यां तां राधां श्रीकृष्णपूजिताम् ॥ ११९ ॥
वक्त्रैश्चतुर्भिः संस्तूय भक्तिनम्रात्मकन्धरः ॥ धाता चतुर्णां वेदानामुवाच चतुराननः ॥ १२० ॥ गङ्गा त्वदङ्गसम्भूता प्रभोर्वै रास
मण्डले॥द्रवरूपा च सा जाता मुग्धया शङ्करस्वरात्॥१२१॥कृष्णांशा च त्वदंशा च त्वत्कन्यासदृशी प्रिया॥तन्मन्त्रग्रहणं कृत्वा
करोतु तव पूजनम्॥१२२॥भविष्यति पतिस्तस्या वैकुण्ठे च चतुर्भुजः॥भूगतायाः कलायाश्च लवणोदश्च वारिधिः॥१२३॥गोलोकस्था
च या राधा सर्वत्रस्था तथात्मिका ॥ तदात्मिका त्वं देवेशि सर्वदा च तवात्मजा ॥ १२४ ॥ ब्रह्मणो वचनं श्रुत्वा स्वीचकार च
सस्मिता ॥ बहिर्बभूव सा कृष्णपादाङ्गुष्ठनखाग्रतः ॥१२५॥ तत्रैव संवृता शान्ता तस्थौ तेषां च मध्यतः ॥ उवास तोयादुत्थाय
तदधिष्ठातृदेवता ॥ १२६ ॥ तत्तोयं ब्रह्मणा किञ्चित्स्थापितं च कमण्डलौ ॥ किंचिद्दधार शिरसि चन्द्रार्द्धे चन्द्रशेखरः ॥ १२७ ॥
गङ्गायै राधिकामन्त्रं प्रददौ कमलोद्भवः ॥ तत्स्तोत्रं कवचं पूजाविधानं ध्यानमेव च ॥ १२८ ॥ सर्वं तत्सामवेदोक्तं पुरश्चर्या
क्रमं तथा ॥ गङ्गा तामेव संपूज्य वैकुण्ठं प्रययौ सती ॥ १२९ ॥ लक्ष्मीः सरस्वती गंगा तुलसी विश्वपावनी ॥ एता नारायण
स्यैव चतस्रो योषितो मुने॥१३०॥अथ तं सस्मितः कृष्णो ब्रह्माणं समुवाच ह॥सर्वं कालस्य वृत्तान्तं दुर्बोध्यमविपश्चिताम्॥१३१॥

श्रीकृष्ण उवाच ॥ गृहाण गंगां हे ब्रह्मन् हे विष्णो हे महेश्वर ॥ शृणु कालस्य वृत्तान्तं यदतीतं निशामय ॥ १३२ ॥
यूयं च येऽन्यदेवाश्च मुनयो मनवस्तथा ॥ सिद्धास्तपस्विनश्चैव ये येऽत्रैव समागताः ॥१३३॥ ते ते जीवन्ति गोलोके कालचक्र
विवर्जिते ॥ जलाप्लुतं सर्वविश्वमागतं प्राकृते लये ॥ १३४ ॥ ब्रह्माद्या येऽन्यविश्वस्थास्ते लीना अधुना मयि ॥ वैकुण्ठं च विना
सर्वं सजलं पश्य पद्मज ॥ १३५ ॥ गत्वा सृष्टिं कुरु पुनर्ब्रह्मलोकादिकं परम् ॥ सब्रह्माण्डं विरचय पश्चाद्गङ्गा च यास्यति
॥ १३६ ॥ एवमन्येषु विश्वेषु सृष्ट्वा ब्रह्मादिकं पुनः ॥ करोम्यहं पुनः सृष्टिं गच्छ शीघ्रं सुरैः सह ॥ १३७ ॥ मच्चक्षुषोर्निमेषेण
ब्रह्मणः पतनं भवेत् ॥ गताः कतिविधास्ते च भविष्यन्ति च वेधसः ॥ १३८ ॥ इत्युक्त्वा राधिकानाथो जगामान्तःपुरं मुने ॥
देवा गत्वा पुनः सृष्टिं चक्रुरेव प्रयत्नतः ॥१३९॥ गोलोके च स्थिता गंगा वैकुण्ठे शिवलोकके॥ब्रह्मलोके तथाऽन्यत्र यत्र तत्र पुरा
स्थिता ॥ १४० ॥ तत्रैव सा गता गंगा चाज्ञया परमात्मनः ॥ निर्गता विष्णुपादाब्जात्तेन विष्णुपदी स्मृता ॥ १४१ ॥ इत्येवं
कथितं सर्वं गंगोपाख्यानमुत्तमम् ॥ सुखदं मोक्षदं सारं किं भूयः श्रोतुमिच्छसि ॥ १४२ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये
प्रकृतिखण्डे नारदनारायणसंवादे गंगोपाख्याने एकादशोऽध्यायः ॥ ११ ॥ नारद उवाच ॥ लक्ष्मीः सरस्वती गंगा तुलसी लोक
पावनी ॥ एता नारायणस्यैव चतस्रश्च प्रिया इति ॥ १ ॥ गंगा जगाम वैकुण्ठमिदमेव श्रुतं मया ॥ कथं सा तस्य पत्नी च बभूव
ब्रूहि केशव ॥ २ ॥ नारायण उवाच ॥ गंगा जगाम वैकुण्ठं तत्पश्चाच्च गतो विधिः ॥ गत्वोवाच तया सार्द्धं प्रणम्य जगदी
श्वरम् ॥ ३ ॥ ब्रह्मोवाच ॥ राधाकृष्णांगसंभूता या देवी द्रवरूपिणी ॥ तदधिष्ठातृदेवीयं रूपेणाप्रतिमा भुवि ॥ ४ ॥
नवयौवनसम्पन्ना सुशीला सुन्दरी वरा ॥ शुद्धसत्त्वस्वरूपा च क्रोधाहङ्कारवर्जिता ॥ ५ ॥ यदंगसम्भवा नान्यं वृणो
तीयं च तं विना ॥ तत्रापि मानिनी राधा महातेजस्विनी वरा ॥ ६ ॥ समुद्यता पातुमिमां भीतेयं बुद्धिपूर्वकम् ॥
विवेश चरणाम्भोजे कृष्णस्य परमात्मनः ॥ ७ ॥ सर्वं विशुष्कं गोलोकं दृष्ट्वाऽहमगमं तदा ॥ गोलोकं यत्र

कृष्णश्च सर्ववृत्तान्तलब्धये ॥ ८ ॥ सर्वान्तरात्मा सर्वं नो ज्ञात्वाऽभिप्रायमेव च ॥ बहिश्चकार गंगां च पादाङ्गुष्ठनखाग्रतः ॥ ९ ॥
दत्त्वाऽस्यै राधिकामन्त्रं पूरयित्वा च गोलकम् ॥ संप्रणम्य च राधेशं गृहीत्वाऽत्रागमं विभो ॥ १० ॥ गान्धर्वेण विवाहेन गृहाणेमां
सुरेश्वरीम् ॥ सुरेश्वरस्त्वं रसिको रसिकां रसभावनः ॥ ११ ॥ पुंरत्नं पुंसु देवेषु स्त्रीरत्नं स्त्रीष्वियं सती ॥ विदग्धाया विदग्धेन
सङ्गमो गुणवान्भवेत् ॥ १२ ॥ उपस्थितां च यः कन्यां न गृह्णाति मदेन च ॥ तं विहाय महालक्ष्मी रुष्टा याति न संशयः ॥
॥ १३ ॥ यो भवेत्पण्डितः सोऽपि प्रकृतिं नावमन्यते ॥ सर्वे प्राकृतिकाः पुंसः कामिन्यः प्रकृतेः कलाः ॥ १४ ॥ त्वमेव भगवा
नाद्यो निर्गुणः प्रकृतेः परः ॥ अर्द्धांगो द्विभुजः कृष्णोऽप्यर्धांगेन चतुर्भुजः ॥ १५ ॥ कृष्णवामांगसम्भूता परमा राधिका पुरा ॥
दक्षिणाङ्गात्स्वयं सा च वामाङ्गात्कमला यथा ॥ १६ ॥ तेन त्वां सा वृणोत्येव यतस्त्वद्देहसम्भवा ॥ स्त्रीपुंसौ वै तथैकाङ्गौ
यथा प्रकृतिपूरुषौ ॥ १७ ॥ इत्येवमुक्त्वा धाता च तां समर्प्य जगाम सः ॥ गान्धर्वेण विवाहेन तां जग्राह हरिः स्वयम् ॥ १८ ॥
शय्यां रतिकरीं कृत्वा पुष्पचन्दनचर्चिताम् ॥ रेमे रमापतिस्तत्र गङ्गया सहितो मुदा ॥ १९ ॥ गां पृथ्वीं च गता यस्मात्स्वस्थानं
पुनरागता ॥ निर्गता विष्णुपादाच्च गङ्गा विष्णुपदी स्मृता ॥२०॥ मूर्च्छां सम्प्राप सा देवी नवसङ्गममात्रतः ॥ रसिका सुखसम्भो
गाद्रसिकेश्वरसंयुता ॥२१॥ तद्दृष्ट्वा दुःखिता वाणी सापत्न्येर्ष्याविवर्जिता ॥ नित्यमीर्ष्यति तां वाणी न च गंगा सरस्वतीम् ॥२२॥
गङ्गया सहितस्यैव तिस्रो भार्य्या रमापतेः ॥ सार्द्धं तुलस्या पश्चाच्च चतस्रो ह्यभवन्मुने ॥ २३ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे
द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे गङ्गोपाख्यानं नाम द्वादशोऽध्यायः ॥ १२ ॥ नारद उवाच ॥ नारायणप्रिया साध्वी
कथं सा च बभूव ह ॥ तुलसी कुत्र सम्भूता का वा सा पूर्वजन्मनि ॥१॥ कस्य वा सा कुले जाता कस्य कन्या तपस्विनी ॥ केन
वा तपसा सा च संप्राप प्रकृतेः परम् ॥ २ ॥ निर्विकल्पं निरीहं च सर्वसाक्षिस्वरूपकम् ॥ नारायणं परं ब्रह्म परमात्मानमीश्वरम् ॥
॥३॥ सर्वाराध्यं च सर्वेशं सर्वज्ञं सर्वकारणम् ॥ सर्वाधारं सर्वरूपं सर्वेषां परिपालनम् ॥४॥ कथमेतादृशी देवी वृक्षत्वं समवाप ह ॥

कथं साऽप्यसुरग्रस्ता संबभूव तपस्विनी ॥ ५ ॥ सन्दिग्धं मे मनो लोल प्रेरयन्मां मुहुर्मुहुः ॥ छेत्तुमर्हसि सन्देहं सर्वसन्देहभञ्जन॥
॥ ६ ॥ नारायण उवाच ॥ मनुश्च दक्षसावर्णिः पुण्यवान्वैष्णवः शुचिः ॥ यशस्वी कीर्त्तिमांश्चैव विष्णोरंशसमुद्भवः ॥ ७ ॥
तत्पुत्रो धर्मसावर्णिर्धार्मिष्ठो वैष्णवः शुचिः ॥ तत्पुत्रो विष्णुसावर्णिर्वैष्णवश्च जितेन्द्रियः ॥ ८ ॥ तत्पुत्रो देवसावर्णिर्विष्णुव्रतपरा
यणः ॥ तत्पुत्रो राजसावर्णिर्महाविष्णुपरायणः ॥ ९ ॥ वृषध्वजश्च तत्पुत्रो वृषध्वजपरायणः ॥ यस्याश्रमे स्वयं शम्भुरासीद्देवयुग
त्रयम् ॥ १० ॥ पुत्रादपि परः स्नेहो नृपे तस्मिञ्छिवस्य च ॥ न च नारायणं मेने न च लक्ष्मीं सरस्वतीम् ॥ ११ ॥ पूजां च सर्व
देवानां दूरीभूतां चकार सः ॥ भाद्रे मासि महालक्ष्मीपूजां मत्तोऽत्यजन्नृपः ॥ १२ ॥ माघे सरस्वतीपूजां दूरीभूतां चकार सः ॥
यज्ञं च विष्णुपूजां च निनिन्दे न चकार सः ॥ १३ ॥ न कोऽपि देवो भूपेन्द्रं शशाप शिवकारणात् ॥ भ्रष्टश्रीर्भव भूपेति चाशपत्तं
दिवाकरः ॥ १४ ॥ शूलं गृहीत्वा तं सूर्य्यं धृतवाञ्छङ्करः स्वयम् ॥ पित्रा सार्द्धं दिनेशश्च ब्रह्माणं शरणं ययौ ॥ १५ ॥ शिवस्त्रि
शूलहस्तश्च ब्रह्मलोकं ययौ क्रुधा ॥ ब्रह्मा सूर्य्यं पुरस्कृत्य वैकुण्ठं च ययौ भिया ॥ १६ ॥ शूलं गृहीत्वा तत्रापि धृतवाञ्छङ्करो
रविम् ॥ ब्रह्मकश्यपमार्त्तण्डाः संत्रस्ताः शुष्कतालुकाः ॥ १७ ॥ नारायणं च सर्वेशं ते ययुः शरणं भिया ॥ मूर्ध्ना प्रणेमुस्ते
गत्वा तुष्टुवुश्च पुनः पुनः ॥ १८ ॥ सर्वं निवेदनं चक्रुर्भियस्ते कारणं हरौ ॥ १९ ॥ नारायणश्च कृपयाऽभयं तेभ्यो ददौ मुने ॥
स्थिरा भवत हे भीता भयं किं वो मयि स्थिते ॥ २० ॥ स्मरन्ति ये यत्र तत्र मां विपत्तौ भयान्विताः ॥ तांस्तत्र गत्वा रक्षामि चक्र
हस्तस्त्वरान्वितः ॥ २१ ॥ पाताऽहं जगतां देवः कर्त्ताऽहं सततं सदा ॥ स्रष्टा च ब्रह्मरूपेण संहर्त्ता शिवरूपतः ॥ २२ ॥ शिवोऽहं
त्वमहं चापि सूर्य्योऽहं त्रिगुणात्मकः ॥ विधाय नानारूपं च कुर्यां सृष्ट्यादिकाः क्रियाः ॥ २३ ॥ यूयं गच्छत भद्रं वो भविष्यति
भयं कुतः ॥ अद्यप्रभृति वो नास्ति मद्वराच्छङ्कराद्भयम् ॥ २४ ॥ आशुतोषः स भगवाञ्छरण्यश्च सतां गतिः ॥ भक्ताधीनश्च
भक्तेशो भक्तात्मा भक्तवत्सलः ॥ २५ ॥ सुदर्शनं शिवश्चैव मम प्राणाधिकप्रियौ ॥ ब्रह्माण्डेषु न तेजस्वी हे ब्रह्मन्ननयोः परः ॥ २६ ॥

शक्तः स्रष्टुं महादेवः सूर्य्यकोटिं च लीलया ॥ कोटिं च ब्रह्मणामेवं किमसाध्यं च शूलिनः ॥ २७ ॥ बाह्यज्ञानं तन्न किंचिद्ध्यायतो मां दिवानिशम् ॥ मन्नाम मद्गुणं भक्त्या पञ्चवक्त्रेण गीयते ॥२८॥ अहमेव चिन्तयामि तत्कल्याणं दिवानिशम् ॥ ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ॥ २९ ॥ शिवस्वरूपो भगवाञ्छिवाधिष्ठातृदेवता ॥ शिवो भवति यस्माच्च शिवं तेन विदुर्बुधाः ॥ ३० ॥ एतस्मिन्नन्तरे तत्र चागमच्छङ्करः स्वयम् ॥ शूलहस्तो वृषारूढो रक्तपङ्कजलोचनः ॥ ३१ ॥ अवरुह्य वृषात्तूर्णं भक्तिनम्रात्मकन्धरः ॥ ननाम भक्त्या तं शान्तं लक्ष्मीकान्तं परात्परम् ॥ ३२ ॥ रत्नसिंहासनस्थं च रत्नालङ्कारभूषितम् ॥ किरीटिनं कुण्डलिनं चक्रिणं वनमालिनम् ॥ ३३ ॥ नवीननीरदश्यामं सुन्दरं च चतुर्भुजम् ॥ चतुर्भुजैः सेवितं च श्वेतचामरवायुना ॥ ३४ ॥ चन्दनोक्षितसर्वांगं भूषितं पीतवाससा ॥ लक्ष्मीप्रदत्तताम्बूलं भुक्तवन्तं च नारद ॥ ३५ ॥ विद्याधरीनृत्यगीतं शृण्वन्तं सस्मितं मुदा ॥ ईश्वरं परमात्मानं भक्तानुग्रहविग्रहम् ॥ ३६ ॥ तं ननाम महादेवो ब्रह्माणं च ननाम सः ॥ ननाम सूर्य्यो भक्त्या च संत्रस्तश्चन्द्रशेखरम् ॥ ३७ ॥ कश्यपश्च महाभक्त्या तुष्टाव च ननाम च ॥ शिवः संस्तूय सर्वेशं समुवास सुखासने ॥ ॥ ३८ ॥ सुखासने सुखासीनं विश्रान्तं चन्द्रशेखरम् ॥ श्वेतचामरवातेन सेवितं विष्णुपार्षदैः ॥ ३९ ॥ अक्रोधं सत्त्वसंसर्गात्प्रसन्नं सस्मितं मुदा ॥ स्तूयमानं पञ्चवक्त्रैः परं नारायणं विभुम् ॥ ४० ॥ तमुवाच प्रसन्नात्मा प्रसन्नं सुरसंसदि ॥ पीयूषतुल्यं मधुरं वचनं सुमनोहरम् ॥ ४१ ॥ श्रीभगवानुवाच ॥ अत्यन्तमुपहास्यं च शिवप्रश्नं शिवे शिवम् ॥ लौकिकं वैदिकं चैव त्वां पृच्छामि तथाऽपि शम्॥४२॥तपसां फलदातारं दातारं सर्वसम्पदाम्॥सम्पत्प्रश्नं तपःप्रश्नमयोग्यं त्वां च साम्प्रतम्॥४३॥ज्ञानाधिदेवे सर्वज्ञे ज्ञानं पृच्छामि किं वृथा ॥ निरापदि विपत्प्रश्नमलं मृत्युञ्जये हरे ॥४४॥ त्वामेव वाग्धनं प्रश्नमलं स्वाश्रयमागमे ॥ आगतोऽसि कथं वेगादित्युवाच रमापतिः ॥ ४५ ॥ श्रीमहादेव उवाच ॥ वृषध्वजं च मद्भक्तं मम प्राणाधिकप्रियम् ॥ सूर्य्यः शशाप इति मे हेतुरागमकोपयोः ॥ ४६ ॥ पुत्रवात्सल्यशोकेन सूर्य्यं हन्तुं समुद्यतः ॥ स ब्रह्माणं प्रपन्नश्च स सूर्य्यश्च विधिस्त्वयि ॥४७॥ त्वां ये शर

णमापन्ना ध्यानेन वचसाऽपि वा ॥ निरापदस्ते निश्शङ्का जरा मृत्युश्च तैर्जितः ॥ ४८ ॥ साक्षाद्ये शरणापन्नास्तत्फलं किं वदामि भोः ॥ हरिस्मृतिश्चाभयदा सर्वमङ्गलदा सदा ॥ ४९ ॥ किं मे भक्तस्य भविता तन्मे ब्रूहि जगत्प्रभो ॥ श्रीहतस्यास्य मूढस्य सूर्य्यशापेन हेतुना ॥ ५० ॥ श्रीभगवानुवाच ॥ कालोऽतियातो दैवेन युगानामेकविंशतिः ॥ वैकुण्ठे घटिकार्द्धेन शीघ्रं याहि नृपालयम् ॥ ॥५१॥ वृषध्वजो मृतः कालाद्दुर्निवार्य्यात्सुदारुणात् ॥ हंसध्वजश्च तत्पुत्रो मृतः सोऽपि श्रिया हतः ॥५२॥ तत्पुत्रौ च महाभागौ धर्मध्वजकुशध्वजौ ॥ हतश्रियौ सूर्य्यशापात्तौ वै परमवैष्णवौ ॥ ५३ ॥ राज्यभ्रष्टौ श्रिया भ्रष्टौ कमलाता[2]पसावुभौ ॥ तयोश्च भार्य्ययोर्लक्ष्मीः कलया च जनिष्यति ॥५४॥ सम्पद्युक्तौ तदा तौ च नृपश्रेष्ठौ भविष्यतः ॥ मृतस्ते सेवकः शम्भो गच्छ यूयं च गच्छत॥५५॥इत्युक्त्वा च सलक्ष्मीकः सभातोऽभ्यन्तरं गतः ॥ देवा जग्मुश्च संहृष्टाः स्वाश्रमं परमं मुदा ॥५६॥ शिवश्च तपसे शीघ्रं परिपूर्णतमो ययौ॥५७॥इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे तुलस्युपाख्याने त्रयोदशोऽध्यायः॥१३॥

नारायण उवाच ॥ लक्ष्मीं तौ च समाराध्य चोग्रेण तपसा मुने ॥ प्रत्येकं वरमिष्टं च संप्रापतुरभीप्सितम् ॥ १ ॥ महालक्ष्म्या वरेणैव तौ पृथ्वीशौ बभूवतुः॥धनवन्तौ पुत्रवन्तौ धर्मध्वजकुशध्वजौ॥२॥ कुशध्वजस्य पत्नी च देवी मालावती सती ॥ सा सुषाव च कालेन कमलांशां सुतां सतीम् ॥ ३ ॥ सा च भूतलसम्बन्धाज्ज्ञानयुक्ता बभूव ह ॥ कृत्वा वेदध्वनिं स्पष्टमुत्तस्थौ सूतिकागृहे ॥ ४ ॥ वेदध्वनिं सा चकार जातमात्रेण कन्यका ॥ तस्मात्तां ते वेदवतीं प्रवदन्ति मनीषिणः ॥ ५ ॥ जातमात्रेण सुस्नाता जगाम तपसे वनम् ॥ सर्वैर्निषिद्धा यत्नेन नारायणपरायणा ॥ ६ ॥ एकमन्वन्तरं चैव पुष्करे च तपस्विनी ॥ अत्युग्रां वै तपस्यां तु लीलया च चकार सा ॥ ७ ॥ तथाऽपि पुष्टा न कृशा नवयौवनसंयुता ॥ शुश्राव खे च सहसा सा वाचमशरीरिणीम् ॥ ॥ ८ ॥ जन्मान्तरे ते भर्त्ता च भविष्यति हरिः स्वयम् ॥ ब्रह्मादिभिर्दुराराध्यं पतिं लप्स्यसि सुन्दरि ॥ ९ ॥

---

१ रथ इति पाठः । २ तपसाविति पाठः ।

इति श्रुत्वा तु सा रुष्टा चकार च पुनस्तपः ॥ अतीव निर्जनस्थाने पर्वते गन्धमादने ॥ १० ॥ तत्रैवं सुचिरं तद्वा विश्वस्य
समुवास सा ॥ ददर्श पुरतस्तत्र रावणं दुर्निवारणम् ॥ ११ ॥ दृष्ट्वा साऽतिथिभक्त्या च पाद्यं तस्मै ददौ किल ॥
सुस्वादु फलमूलं च जलं चापि सुशीतलम् ॥ १२ ॥ तच्च भुक्त्वा स पापिष्ठश्चावात्सीत्तत्समीपतः ॥ चकार प्रश्नमिति तां
का त्वं कल्याणि चेति च ॥ १३ ॥ तां च दृष्ट्वा वरारोहां पीनोन्नतपयोधराम् ॥ शरत्पद्मनिभास्यां च सस्मितां सुदतीं
सतीम् ॥ १४ ॥ मूर्च्छामवाप कृपणः कामबाणप्रपीडितः ॥ तां करेण समाकृष्य सम्भोगं कर्त्तुमुद्यतः ॥ १५ ॥
सा सती कोपदृष्ट्या च स्तम्भितं तं चकार ह ॥ स जडो हस्तपादैश्च किंचिद्वक्तुं न च क्षमः ॥ १६ ॥ तुष्टाव मनसा
देवीं पद्मांशां पद्मलोचनाम्॥सा तत्स्तवेन सन्तुष्टा प्राकृतं तं मुमोच ह॥१७॥शशाप च मदर्थे त्वं विनश्यसि सबान्धवः ॥ स्पृष्टाऽहं
च त्वया कामाद्विसृजाम्यवलोकय ॥ १८ ॥ इत्युक्त्वा सा च योगेन देहत्यागं चकार ह ॥ गंगायां तां च संन्यस्य स्व
गृहं रावणो ययौ ॥ १९ ॥ अहो किमद्भुतं दृष्टं किं कृतं वा मयाऽधुना ॥ इति संचिन्त्य संस्मृत्य विललाप पुनः पुनः ॥
॥ २० ॥ सा च कालान्तरे साध्वी बभूव जनकात्मजा सीतादेवीति विख्याता यदर्थे रावणो हतः ॥ २१ ॥ महातपस्विनी सा
च तपसा पूर्वजन्मनः ॥ लेभे रामं च भर्त्तारं परिपूर्णतमं हरिम् ॥२२॥ संप्राप्य तपसाऽऽराध्य स्वामिनं च जगत्पतिम्॥ सा रमा
सुचिरं रेमे रामेण सह सुन्दरी ॥२३॥ जातिस्मरा स्म स्मरति तपसश्च क्रमं पुरा ॥ सुखेन तज्जहौ सर्वं दुःखं चापि सुखं लभेत् ॥
॥ २४ ॥ नानाप्रकारविभवं चकार सुचिरं सती ॥ सम्प्राप्य सुकुमारं तमतीव नवयौवनम् ॥ २५ ॥ गुणिनं रसिकं शान्तं कान्तवे
षमनुत्तमम् ॥ स्त्रीणां मनोज्ञं रुचिरं तथा लेभे यथेप्सितम् ॥ २६ ॥ पितुर्वचःपालनार्थं सत्यसन्धो रघूत्तमः जगाम काननं पश्चा
त्कालेन च बलीयसा ॥ २७ ॥ तस्थौ समुद्रनिकटे सीतया लक्ष्मणेन च ॥ ददर्श तत्र वह्निं च विप्ररूपधरं हरिः ॥ २८ ॥ तं
रामं दुःखितं दृष्ट्वा स च दुःखी बभूव ह ॥ उवाच किंचित्सत्येष्टं सत्यं सत्यपरायणः ॥ २९ ॥ वह्निरुवाच॥ भगवञ्छ्रूयतां वाक्यं

कालेन यदुपस्थितम् ॥ सीताहरणकालोऽयं तवैव समुपस्थितः ॥ ३० ॥ दैवं च दुर्निवार्य्यं वै न च दैवात्परं बलम् ॥ मत्प्रसूं मयि संन्यस्य च्छायां रक्षान्तिकेऽधुना ॥३१॥ दास्यामि सीतां तुभ्यं च परीक्षासमये पुनः ॥ देवैः प्रस्थापितोऽहं च न च विप्रो हुताशनः ॥ ३२ ॥ रामस्तद्वचनं श्रुत्वा न प्रकाश्य च लक्ष्मणम् ॥ स्वच्छन्दं स्वीचकारासौ हृदयेन विदूयता ॥३३॥ वह्निर्योगेन सीतावन्मायासीतां चकार ह ॥ तत्तुल्यगुणरूपां तां ददौ रामाय नारद ॥ ३४ ॥ सीतां गृहीत्वा स ययौ गोप्यं वक्तुं निषेध्य च ॥ लक्ष्मणो नैव बुबुधे गोप्यमन्यस्य का कथा ॥ ३५ ॥ एतस्मिन्नन्तरे रामो ददर्श कनकं मृगम् ॥ सीता तं प्रेरयामास तदर्थं यत्नपूर्वकम् ॥ ३६ ॥ संन्यस्य लक्ष्मणं रामो जानक्या रक्षणे वने ॥ स्वयं जगाम हन्तुं तं विव्यधे सायकेन च ॥ ३७ ॥ लक्ष्मणेति च शब्दं वै कृत्वा मायामृगस्तदा ॥ प्राणांस्तत्याज सहसा पुरो दृष्ट्वा हरिं स्मरन् ॥ ३८ ॥ मृगरूपं परित्यज्य दिव्यरूपं विधाय च ॥ रत्ननिर्मितयानेन वैकुण्ठं स जगाम ह ॥ ३९ ॥ वैकुण्ठस्य महाद्वारे किङ्करो द्वारपालयोः ॥ जयविजययोश्चैव बलवांश्च जयाभिधः ॥ ४० ॥ शापेन सनकादीनां सम्प्राप्तो राक्षसीं तनुम् ॥ पुनर्जगाम तद्द्वारमादौ स द्वारपालयोः ॥४१॥ अथ शब्दं च सा श्रुत्वा लक्ष्मणेति च विक्लवम् ॥ सीता तं प्रेरयामास लक्ष्मणं रामसन्निधौ ॥४२॥ गते च लक्ष्मणे रामं रावणो दुर्निवारणः ॥ सीतां गृहीत्वा प्रययौ लङ्कामेव स्वलीलया ॥ ४३ ॥ विषसाद च रामश्च वने दृष्ट्वा च लक्ष्मणम् ॥ तूर्णं च स्वाश्रमं गत्वा सीतां नैव ददर्श सः ॥ ४४ ॥ मूर्च्छां सम्प्राप्य सुचिरं विललाप भृशं पुनः ॥ पुनर्बभ्राम गहने तदन्वेषणपूर्वकम् ॥ ४५ ॥ काले संप्राप्य तद्वार्तां गृध्रद्वारा नदीतटे ॥ सहायं वानरं कृत्वा चाबध्नात्सागरं हरिः ॥ ॥ ४६ ॥ लङ्कां गत्वा रघुश्रेष्ठश्चावधीत्सायकेन च ॥ सबान्धवं रावणं च सीतां सम्प्राप दुःखिताम् ॥ ४७ ॥ तां च वह्निपरीक्षां वै कारयामास सत्वरम् ॥ हुताशनस्तत्र काले वास्तवीं जानकीं ददौ ॥ ४८ ॥ छाया चोवाच वह्निं च रामं च विनयान्विता ॥ करिष्यामीति किमहं तदुपायं वदस्व मे ॥ ४९ ॥ वह्निरुवाच ॥ त्वं गच्छ तपसे देवि पुष्करं च सुपुण्यदम् ॥ कृत्वा तपस्यां

तत्रैव स्वर्गलक्ष्मीर्भविष्यसि ॥ ५० ॥ सा च तद्वचनं श्रुत्वा प्रतेपे पुष्करे तपः ॥ दिव्यं त्रिलक्षवर्षं च स्वर्गे लक्ष्मीर्बभूव ह ॥५१॥
सा च कालेन तपसा यज्ञकुण्डसमुद्भवा ॥ कामिनी पाण्डवानां च द्रौपदी द्रुपदात्मजा ॥ ५२ ॥ कृते युगे वेदवती कुशध्वजसुता
शुभा ॥ त्रेतायां रामपत्नी च सीतेति जनकात्मजा ॥ ५३ ॥ तच्छाया द्रौपदी देवी द्वापरे द्रुपदात्मजा ॥ त्रिहायणीति सा प्रोक्ता
विद्यमाना युगत्रये ॥५४॥ नारद उवाच ॥ प्रियाः पञ्च कथं तस्या बभूवुर्मुनिपुङ्गव ॥ इति मे चित्तसन्देहं दूरीकुरु महाप्रभो ॥५५॥
नारायण उवाच ॥ लङ्कायां वस्तुतः सीता रामं संप्राप नारद ॥ रूपयौवनसम्पन्ना छाया सा बहुविह्वला ॥ ५६ ॥ रामाग्न्योराज्ञया
तप्त्वा ययाचे शङ्करं वरम्॥कामातुरा पतिव्यग्रा प्रार्थयन्ती पुनः पुनः॥५७॥पतिं देहि पतिं देहि पतिं देहि त्रिलोचन॥पतिं देहि पतिं
देहि पञ्चवारं पतिव्रता ॥५८॥ शिवस्तत्प्रार्थनां श्रुत्वा सस्मितो रसिकेश्वरः ॥ प्रिये तव प्रियाः पञ्च भवन्तीति वरं ददौ ॥ ५९ ॥
तेनासीत्पाण्डवानां च पञ्चानां कामिनी प्रिया ॥ इत्येवं कथितं सर्वं प्रस्तुतं वस्तुतः शृणु॥६०॥अथ संप्राप्य लङ्कायां सीतां रामो
मनोहराम्॥विभीषणाय तां लङ्कां दत्त्वाऽयोध्यां ययौ पुनः॥६१॥एकादशसहस्राब्दं कृत्वा राज्यं च भारते ॥ जगाम सर्वैर्लोकैश्च सार्द्धं
वैकुण्ठमेव च ॥६२॥ कमलांशा वेदवती कमलायां विवेश सा ॥कथितं पुण्यमाख्यानं पुण्यदं पापनाशनम् ॥ ६३ ॥ सततं मूर्ति
मन्तश्च वेदाश्चत्वार एव च ॥ सन्ति यस्याश्च जिह्वाग्रे सा च वेदवती स्मृता ॥ ६४ ॥ कुशध्वजसुताख्यानमुक्तं संक्षेपतस्तव ॥
धर्मध्वजसुताख्यानं निबोध कथयामि ते ॥ ६५ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे तुलस्यु
पाख्याने वेदवतीप्रस्तावे चतुर्दशोऽध्यायः ॥ १४ ॥ नारायण उवाच ॥ धर्मध्वजस्य पत्नी च माधवीति च विश्रुता॥नृपेण सार्द्धं सा
रागाद्रेमे वै गन्धमादने ॥ १ ॥ शय्यां रतिकरीं कृत्वा पुष्पचन्दनचर्चिता ॥ चन्दनोक्षितसर्वाङ्गी पुष्पचन्दनवायुना ॥ २ ॥ स्त्रीरत्न
मतिचार्वंगी रत्नभूषणभूषिता ॥ कामुकी रसिकश्रेष्ठा रसिकेशेन संगता ॥ ३ ॥ सुरताद्विरतिर्नासीत्तयोः सुरतविज्ञयोः ॥ गतं वर्ष
शतं दैवं नाजानीतां दिवानिशम्॥४॥ततो रजस्वलां प्राप्य सुरताद्विरराम सः ॥ कामुकी सुन्दरी किंचिन्न च तृप्तिं जगाम सा ॥५॥

दधार गर्भं सा सद्यो देवाब्दशतकं सती ॥ श्रीगर्भा श्रीयुता सा च संबभूव दिनेदिने ॥ ६ ॥ शुभक्षणे शुभदिने शुभयो
गेन संयुते ॥ शुभलग्ने शुभांशे च शुभस्वामिगृहान्विते ॥ ७ ॥ कार्त्तिकीपूर्णिमायां च सितवारे च पद्मजे ॥ सुषाव सा च पद्मांशां
पद्मिनीं सुमनोहराम् ॥ ८ ॥ पादपद्मयुगे चैव पद्मरागविराजिताम् ॥ राजराजेश्वरीं लक्ष्मीं सर्वावयवसुन्दरीम् ॥ ९ ॥ राजलक्ष्मील
क्ष्मयुक्तां राजलक्ष्म्यधिदेवताम् ॥ शरत्पार्वणचन्द्रास्यां शरत्पङ्कजलोचनाम् ॥ १० ॥ पक्वबिम्बाधरोष्ठीं च पश्यन्तीं सस्मितां
गृहम् ॥ हस्तपादतलारक्तां निम्ननाभिं मनोरमाम् ॥ ११ ॥ तदधस्त्रिवलीयुक्तां वृत्तवल्गुनितम्बिनीम्॥शीते सुखोष्णसर्वांगीं ग्रीष्मे
च सुखशीतलाम् ॥ १२ ॥ श्यामां सुकेशीं रुचिरां न्यग्रोधपारिमण्डलाम् ॥ श्वेतचम्पकवर्णाभां सुन्दरीष्वेकसुन्दरीम् ॥ १३ ॥
नरा नार्य्यश्च तां दृष्ट्वा तुलनां दातुमक्षमाः ॥ तेन नाम्ना च तुलसीं तां वदन्ति पुराविदः ॥ १४ ॥ सा च भूमिष्ठमात्रेण योग्या
स्त्रीप्रकृतिर्यथा ॥ सर्वैर्निषिद्धा तपसे जगाम बदरीवनम् ॥ १५ ॥ तत्र दैवाब्दलक्षं च चकार परमं तपः ॥ मम नारायणः स्वामी
भवितेति विनिश्चिता ॥ १६ ॥ ग्रीष्मे पञ्चतपाः शीते तोयस्था सा च सुन्दरी ॥ प्रकाशस्था वृष्टिधारां सहन्ती च दिवानिशम् ॥
॥ १७ ॥ विंशत्सहस्रवर्षं च फलतोयाशना च सा ॥ त्रिंशच्छतसहस्राब्दं पत्राहारा तपस्विनी ॥ १८ ॥ चत्वारिंशत्सहस्राब्दं वाय्वा
हारा कृशोदरी॥ ततो दशसहस्राब्दं निराहारा बभूव सा॥१९॥निर्लक्ष्यां चैकपादस्थां दृष्ट्वा तां कमलोद्भवः॥ समाययौ वरं दातुं परं
बदरिकाश्रमम् ॥ २० ॥ चतुर्मुखं च सा दृष्ट्वा प्राणंसीद्धंसवाहनम् ॥ तामुवाच जगत्कर्त्ता विधाता जगतामपि ॥ २१ ॥ ब्रह्मो
वाच ॥ वरं वृणुष्व तुलसि यत्ते मनसि वाञ्छितम् ॥ हरिभक्तिं च मुक्तिं वाऽप्यजरामरतामपि ॥ २२ ॥ तुलस्युवाच ॥ शृणु तात
प्रवक्ष्यामि यन्मे मनसि वाञ्छितम् ॥ सर्वज्ञस्यापि पुरतः का लज्जा मम साम्प्रतम् ॥ २३ ॥ अहं च तुलसी गोपी गोलोकेऽहं
स्थिता पुरा ॥ कृष्णप्रिया किङ्करी च तदंशा तत्सखी प्रिया ॥ २४ ॥ गोविन्देन सहासक्तामतृप्तां मां च मूर्च्छिताम् ॥ रासेश्वरी
समागत्य चापश्यद्रासमण्डले॥२५॥गोविन्दं भर्त्सयामास मां शशाप रुषाऽन्विता॥याहि त्वं मानवीं योनिमित्येवं च पितामह॥२६॥

मामुवाच स गोविन्दो मदंशं त्वं चतुर्भुजम् ॥ लभिष्यसि तपस्तप्त्वा भारते ब्रह्मणो वरात् ॥ २७ ॥ इत्येवमुक्त्वा देवे
शोऽप्यन्तर्धानमवाप सः ॥ देव्या भिया तनुं त्यक्त्वा लब्धं जन्म मया भुवि ॥ २८ ॥ अहं नारायणं कान्तं शान्तं सुन्दरविग्रहम् ॥
साम्प्रतं लब्धुमिच्छामि वरमेवं च देहि मे ॥ २९ ॥ ब्रह्मोवाच ॥ सुदामा नाम गोपश्च श्रीकृष्णाङ्गसमुद्भवः ॥ तदंशश्चातिते
जस्वी चालभज्जन्म भारते ॥ ३० ॥ साम्प्रतं राधिकाशापाद्दनुवंशसमुद्भवः ॥ शङ्खचूड इति ख्यातस्त्रैलोक्ये न च तत्परः ॥ ३१ ॥
गोलोके त्वां पुरा दृष्ट्वा कामोन्मथितमानसः ॥ विलंघितुं न शक्नोति राधिकायाः प्रभावतः ॥ ३२ ॥ स च जातिस्मरस्तप्त्वा त्वां
ललाभ वरेण च ॥ जातिस्मरा तु त्वमपि सर्वं जानासि सुन्दरि ॥ ३३ ॥ अधुना तस्य पत्नी च भव भाविनि शोभने ॥ पश्चान्ना
रायणं कान्तं शान्तमेव लभिष्यसि ॥ ३४ ॥ शापान्नारायणस्यैव कलया दैवयोगतः ॥ प्राप्नोषि वृक्षरूपं तं त्वं पूता विश्वपावनी
॥ ३५ ॥ प्रधाना सर्वपुष्पाणां विष्णुप्राणाधिका भवेत् ॥ त्वया विना च सर्वेषां पूजा च विफला भवेत् ॥३६॥ वृन्दावने वृक्षरूपा
नाम्ना वृन्दावनीति च ॥ त्वत्पत्रैर्गोपिका गोपाः पूजयिष्यन्ति माधवम्॥३७॥वृक्षाधिदेवीरूपेण सार्द्धं कृष्णेन सन्ततम्॥विहरिष्यसि
गोपेन स्वच्छन्दं मद्वरेण च॥३८॥इत्येवं वचनं श्रुत्वा सस्मिता हृष्टमानसा॥प्रणनाम च धातारं तं च किंचिदुवाच ह॥३९॥तुलस्यु
वाच॥यथा मे द्विभुजे कृष्णे वाञ्छा च श्यामसुन्दरे॥सत्यं ब्रवीमि हे तात न तथा च चतुर्भुजे॥४०॥अतृप्ताऽहं च गोविन्दे दैवाच्छृ
ङ्गारभंगतः ॥ गोविन्दस्यैव वचनात्प्रार्थयामि चतुर्भुजम् ॥४१॥ तत्प्रसादेन गोविन्दं पुनरेव सुदुर्लभम् ॥ ध्रुवमेवं लभिष्यामि राधा
भीतिं प्रमोचय ॥ ४२ ॥ ब्रह्मोवाच ॥ गृहाण राधिकामन्त्रं ददे वै षोडशाक्षरम् ॥ तस्याश्च प्राणतुल्या त्वं मद्वरेण भविष्यसि ॥४३॥
शृंगारं युवयोर्गोप्यमाज्ञास्यति च राधिका ॥ राधासमा त्वं सुभगा गोविन्दस्य भविष्यसि ॥ ४४ ॥ इत्येवमुक्त्वा दत्त्वा च देव्यै
तत्षोडशाक्षरम् ॥ मन्त्रं तस्यै जगद्धाता स्तोत्रं च कवचं परम् ॥ ४५ ॥ सर्वं पूजाविधानं च पुरश्चर्याविधिक्रमम् ॥ परं शुभाशि
षं कृत्वा सोऽन्तर्द्धानमवाप ह ॥ ४६ ॥ सा च ब्रह्मोपदेशेन पुण्ये बदरिकाश्रमे ॥ जजाप परमं मन्त्रं यदिष्टं पूर्वजन्मनः ॥ ४७ ॥

दिव्यं द्वादशवर्षं च पूजां चैव चकार सा ॥ बभूव सिद्धा सा देवी तत्प्रत्यादेशमाप च ॥ ४८ ॥ सिद्धे तपसि मन्त्रे च वरं प्राप्य
यथेप्सितम् ॥ बुभुजे च महाभागं यद्विश्वेषु सुदुर्लभम् ॥ ४९ ॥ प्रसन्नमानसा देवी तत्याज तपसः क्रमम् ॥ सिद्धे फले नराणां
च दुःखं च सुखमुत्तमम् ॥ ५० ॥ भुक्त्वा पीत्वा च सन्तुष्टा शयनं च चकार सा ॥ तल्पे मनोरमे तत्र पुष्पचन्दनचर्चिते ॥ ५१ ॥
इति श्रीब्रह्मवैवर्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे तुलस्युपाख्याने तुलसीवरप्रदानं नाम पञ्चदशोऽध्यायः॥१५॥
नारायण उवाच ॥ तुलसी परितुष्टा सा चास्वाप्सीद्धृष्टमानसा ॥ नवयौवनसम्पन्ना प्रशंसन्ती वरांगना ॥ १ ॥ चिक्षेप पञ्चबाणश्च
पञ्च बाणांश्च तां प्रति ॥ पुष्पायुधेन सा दग्धा पुष्पचन्दनचर्चिता ॥ २ ॥ पुलकाञ्चितसर्वांगी कम्पिता रक्तलोचना ॥ क्षणं सा
शुष्कतां प्राप क्षणं मूर्च्छामवाप ह ॥३॥ क्षणमुद्विग्नतां प्राप क्षणं तन्द्रां सुखावहाम् ॥ क्षणं सा दहनं प्राप क्षणं प्राप प्रमत्तताम्॥४॥
क्षणं सा चेतनां प्राप क्षणं प्राप विषण्णताम् ॥ उत्तिष्ठन्ती क्षणं तल्पाद्गच्छन्ती निकटं क्षणम् ॥५॥ भ्रमन्ती क्षणमुद्वेगाद्विवसन्ती
क्षणं पुनः ॥ क्षणमेव समुद्वेगादस्वाप्सीत्पुनरेव सा ॥ ६ ॥ पुष्पचन्दनतल्पं च तद्बभूवातिकण्टकम् ॥ विषमाहारकं स्वादु
दिव्यरूपं फलं जलम् ॥७॥ निलयश्च निराकारः सूक्ष्मवस्त्रं हुताशनः॥सिन्दूरपत्रकं चैव व्रणतुल्यं च दुःखदम्॥८॥क्षणं ददर्श तन्द्रायां
सुवेषं पुरुषं सती॥सुन्दरं च युवानं च सस्मितं रसिकेश्वरम्॥९॥चन्दनोक्षितसर्वांगं रत्नभूषणभूषितम्॥ आगच्छन्तं माल्यवन्तं पश्य
न्तं तन्मुखाम्बुजम् ॥ १० ॥ कथयन्तं रतिकथां चुम्बन्तमधरं मुहुः ॥ शयानं पुष्पतल्पे च समाश्लिष्यन्तमङ्गकम् ॥ ११ ॥
पुनरेव तु गच्छन्तमागच्छन्तं वसन्तकम् ॥ कान्त क्व यासि प्राणेश तिष्ठेत्येवमुवाच सा ॥ १२ ॥ पुनः स्वचेतनां प्राप्य विललाप
पुनः पुनः ॥ एवं तपोवने सा च तस्थौ तत्रैव नारद ॥ १३ ॥ शङ्खचूडो महायोगी जैगीषव्यान्मनोरमम् ॥ कृष्णस्य मन्त्रं सम्प्रा
प्य प्राप्य सिद्धिं तु पुष्करे ॥ १४ ॥ पठन्सदा तु कवचं सर्वमङ्गलमङ्गलम् ॥ ब्रह्मेशाच्च वरं प्राप्य यत्तन्मनसि वाञ्छितम् ॥१५॥
आज्ञया ब्रह्मणः सोऽपि बदरीं वै समाययौ ॥ आगच्छन्तं शङ्खचूडमपश्यत्तुलसी मुने॥१६॥नवयौवनसम्पन्नं कामदेवसमप्रभम्॥१७॥

श्वेतचम्पकवर्णाभं रत्नभूषणभूषितम् ॥ शरत्पार्वणचन्द्रास्यं शरत्पङ्कजलोचनम् ॥ १८ ॥ महारत्नगणाक्लृप्तविमानस्थं
मनोहरम् ॥ रत्नकुण्डलयुग्माढ्यगण्डस्थलविराजितम् ॥ १९ ॥ पारिजातप्रसूनाढ्यमाल्यवन्तं च सुस्मितम् ॥ कस्तूरीकुङ्कमयुतं
सुगन्धितिलकोज्ज्वलम्॥२०॥सा दृष्ट्वा सन्निधाने तं मुखमाच्छाद्य वाससा ॥ सस्मिता तं निरीक्षन्ती सकटाक्षं पुनः पुनः ॥२१॥
बभूव सा नम्रमुखी नवसङ्गमलज्जिता॥कामुकी कामबाणेन पीडिता पुलकान्विता ॥ २२ ॥ पिबन्ती तन्मुखाम्भोजं लोचनाभ्यां च
सन्ततम् ॥ ददर्श शङ्खचूडश्च कन्यामेकां तपोवने ॥ २३ ॥ पुष्पचन्दनतल्पस्थां वसन्तीं वाससा वृताम् ॥ पश्यन्तीं तन्मुखं
शश्वत्सस्मितां सुमनोहराम् ॥२४॥ सुपीनकठिनश्रोणीं पीनोन्नतपयोधराम्॥मुक्तापंक्तिप्रभाजुष्टदन्तपंक्तिं सुबिभ्रतीम् ॥२५॥ पक्वबि
म्बाधरोष्ठीं च सुनासां सुन्दरीं वराम् ॥ तप्तकाञ्चनवर्णाभां शरच्चन्द्रसमप्रभाम् ॥ २६ ॥ स्वतेजसा परिवृतां सुखदृश्यां मनोरमाम् ॥
कस्तूरीबिन्दुभिः सार्द्धमधश्चन्दनबिन्दुना ॥ २७ ॥ सिन्दूरबिन्दुना शश्वत्सीमन्ताधःस्थलोज्ज्वलाम् ॥ निम्ननाभिगभीरां च तद्
धस्त्रिवलीयुताम् ॥ २८ ॥ करपद्मतलारक्तां नखचन्द्रैर्विभूषिताम् ॥ स्थलपद्मप्रभाजुष्टं पादपद्मं च बिभ्रतीम् ॥ २९ ॥ आरक्तवर्णं
ललितमलक्तकसमप्रभम् ॥ स्थलपद्मैश्च जलजैः पद्मरागविराजिताम् ॥३०॥ शरदिन्दुविनिन्द्यैकनखेन्द्वोघविराजिताम्॥अमूल्यरत्न
संमिश्रयावकेन स्वलंकृताम्॥३१॥मणीन्द्रमुख्यखचितक्वणन्मञ्जीररञ्जिताम् ॥३२॥ दधतीं कबरीभारं मालतीमाल्यसंयुतम्॥अमूल्य
रत्नसंक्लृप्तमकराकृतिरूपिणा॥३३॥चित्रकुण्डलयुग्मश्रीसुषुमापरिशोभिताम् ॥ रत्नेन्द्रमुक्ताहारश्रीस्तनमध्यस्थलोज्ज्वलाम् ॥३४॥
रत्नकंकणकेयूरशंखभूषणभूषिताम् ॥ रत्नांगुलीयकैर्दिव्यैरंगुल्यावलिभिर्युताम् ॥ ३५ ॥ दृष्ट्वा तां ललितां रम्यां सुशीलां सुदतीं
सतीम् ॥ उवास तत्समीपे च मधुरं तामुवाच सः॥३६॥शंखचूड उवाच ॥ का त्वं कस्य च कन्याऽसि धन्ये मान्ये सुयोषिताम्॥
का त्वं कामिनि कल्याणि सर्वकल्याणदायिनि॥३७॥स्वर्गभोगादिसरिति विहारे हाररूपिणि॥संसारदारसारे च मायाधारे मनोहरे॥
॥ ३८ ॥ जगद्विलक्षणे क्षामे मुनीनां मोहकारिणि ॥ मौनं त्यक्त्वा किंकरं मां सम्भाषां कुरु सुन्दरि ॥ ३९ ॥ इत्येवं वचनं श्रुत्वा

सकामा वामलोचना ॥ सस्मिता नम्रवदना सकामं तमुवाच सा ॥४०॥ तुलस्युवाच ॥ धर्मध्वजसुताऽहं च तपस्यायां तपोवने ॥ तपस्विनीह तिष्ठामि कस्त्वं गच्छ यथासुखम् ॥४१॥ कामिनीं कुलजातां च रहस्येकाकिनीं सतीम् ॥ न पृच्छति कुले जात एवमेव श्रुतौ श्रुतम् ॥४२॥ लम्पटोऽसत्कुले जातो धर्मशास्त्रार्थवर्जितः ॥ येनाश्रुतः श्रुतेरर्थः स कामीच्छति कामिनीम् ॥४३॥ आपातमधुरामन्ते चान्तकां पुरुषस्य ताम् ॥ विषकुम्भाकाररूपाममृतास्यां च सन्ततम् ॥ ४४ ॥ हृदये क्षुरधाराभां शश्वन्मधुरभाषिणीम् ॥ स्वकार्य्यपरिनिष्पत्तितत्परां सततं सदा ॥४५॥ कार्य्यार्थे स्वामिवशगामन्यथैवावशां सदा ॥ स्वान्तर्मलिनरूपां च प्रसन्नवदनेक्षणाम् ॥४६॥ श्रुतौ पुराणे यासां च चरित्रमनिरूपितम् ॥ तासु को विश्वसेत्प्राज्ञो ह्यप्राज्ञ इव सर्वदा ॥ ४७ ॥ तासां को वा रिपुर्मित्रं प्रार्थयन्तीं नवं नवम् ॥ दृष्ट्वा सुवेशं पुरुषमिच्छन्तीं हृदये सदा ॥४८॥ बाह्ये स्वात्मसतीत्वं च ज्ञापयन्तीं प्रयत्नतः ॥ शश्वत्कामां च रामां च कामाधारां मनोहराम् ॥४९॥ बाह्ये छलाच्छादयन्तीं स्वान्तमैथुनलालसाम् ॥ कान्तं ग्रसन्तीं रहसि बाह्येऽतीव सुलज्जिताम् ॥५०॥ मानिनीं मैथुनाभावे कोपिनीं कलहांकुराम् ॥ संभीतां भूरिसम्भोगात्स्वल्पमैथुनदुःखिताम् ॥ ५१ ॥ सुमृष्टान्नं शीततोयमाकांक्षन्तीं च मानसे ॥ सुन्दरं रसिकं कान्तं युवानं गुणिनं सदा ॥ ५२ ॥ सुतात्परमतिस्नेहं कुर्वन्तीं रतिकर्तरि ॥ प्राणाधिकं प्रियतमं सम्भोगकुशलं प्रियम् ॥ ५३ ॥ पश्यन्तीं रिपुतुल्यं च वृद्धं वा मैथुनाक्षमम् ॥ कलहं कुर्वती शश्वत्तेन सार्द्धं सुकोपनाम् ॥ ५४ ॥ चर्वया भक्षयन्तीं तं कीनाशे इव गोरजः ॥ दुस्साहसस्वरूपां च सर्वदोषाश्रयां सदा ॥५५॥ शश्वत्कपटरूपां च सर्वदोषाश्रयां सदा ॥ ब्रह्मविष्णुशिवादीनां दुस्त्याज्यां मोहरूपिणीम् ॥ ५६ ॥ तपोमार्गार्गलां शश्वन्मुक्तिद्वारकपाटिकाम् ॥५७॥ हरेर्भक्तिव्यवहितां सर्वमायाकरण्डिकाम् ॥ संसारकारागारे च शश्वन्निगडरूपिणीम् ॥ ५८ ॥ इन्द्रजालस्वरूपां च मिथ्यावादिस्वरूपिणीम् ॥ बिभ्रतीं बाह्यसौन्दर्य्यं मध्याङ्गमतिकुत्सितम् ॥५९॥ नानाविण्मूत्रपूयानामाधारं मलसंयुतम् ॥ दुर्गन्धि दोषसंयुक्तं रक्तात्कं चाप्यसंस्कृतम् ॥ ॥६०॥ मायारूपं मायिनां च विधिना निर्मितं पुरा ॥ विषरूपां मुमुक्षूणामदृश्यां चैव सर्वदा ॥६१॥ इत्युक्त्वा तुलसी तं च विरराम

च नारद ॥ सस्मितः शंखचूडश्च प्रवक्तुमुपचक्रमे ॥६२॥शंखचूड उवाच ॥ त्वया यत्कथितं देवि न च सर्वमलीककम् ॥ किंचित्सत्यमलीकं च किंचिन्मत्तो निशामय॥६३॥निर्मितं द्विविधं धात्रा स्त्रीरूपं सर्वमोहनम् ॥ कृत्यारूपं वास्तवं च प्रशस्यं चाप्रशंसितम्॥॥६४॥ लक्ष्मीसरस्वतीदुर्गासावित्रीराधिकादिकम्॥सृष्टिसूत्रस्वरूपं चाप्याद्यं स्रष्ट्रा तु निर्मितम् ॥ ६५ ॥ एतासामंशरूपं यत्स्त्रीरूपं वास्तवं स्मृतम् ॥ तत्प्रशंस्यं यशोरूपं सर्वमङ्गलकारणम् ॥ ६६ ॥ शतरूपा देवहूतिस्स्वधा स्वाहा च दक्षिणा ॥ छायावती रोहिणी च वरुणानी शची तथा ॥ ६७ ॥ कुबेरवायुपत्नी साऽप्यदितिश्च दितिस्तथा ॥ लोपामुद्राऽनसूया च कैटभी तुलसी तथा ॥६८॥ अहल्याऽरुन्धती मेना तारा मन्दोदरी परा ॥ दमयन्ती वेदवती गंगा च यमुना तथा ॥ ६९ ॥ पुष्टिस्तुष्टिः स्मृतिर्मेधा कालिका च वसुन्धरा ॥ षष्ठी मंगलचण्डी च मूर्तिर्वै धर्मकामिनी ॥ ७० ॥ स्वस्तिः श्रद्धा च कान्तिश्च तुष्टिः शान्तिस्तथा परा ॥ निद्रा तन्द्रा क्षुत्पिपासा सन्ध्या रात्रिर्दिनानि च ॥ ७१ ॥ सम्पत्तिवृत्तिकीर्त्यश्च क्रियाशोभाप्रभांशकम् ॥यत्स्त्रीरूपं च सम्भूतमुत्तमं तद्युगे युगे ॥ ७२ ॥ कृत्यास्वरूपं तद्यत्तु स्वर्वैश्यादिकमेव च ॥ तदप्रशंस्यं विश्वेषु पुंश्चलीरूपमेव च ॥ ७३ ॥ सत्त्वप्रधानं यद्रूपं तच्च शुद्धं स्वभावतः ॥ तदुत्तमं च विश्वेषु साध्वीरूपं प्रशंसितम् ॥७४॥ तद्वास्तवं च विज्ञेयं प्रवदन्ति मनीषिणः॥रजोरूपं तमोरूपं कृत्यासु द्विविधं स्मृतम् ॥७५॥ स्थानाभावात्क्षणाभावान्मध्यवृत्तेरभावतः ॥ देहक्लेशेन रोगेण सत्संसर्गेण सुन्दरि॥७६॥ बहुगोष्ठावृतेनैव रिपुराजभयेन च ॥ रजोरूपस्य साध्वीत्वमेतेनैवोपजायते ॥ ७७ ॥ इदं मध्यमरूपं च प्रवदन्ति मनीषिणः ॥ तमोरूपं दुर्निवार्य्यमधमं तद्विदुर्बुधाः॥७८॥न पृच्छति कुले जातः पण्डितश्च परस्त्रियम्॥निर्जने दुर्जने वाऽपि रहस्ये वचसां स्त्रियम् ॥७९॥ आगच्छामि त्वत्समीपमाज्ञया ब्रह्मणोऽधुना ॥ गान्धर्वेण विवाहेन त्वां ग्रहीष्यामि शोभने ॥ ८० ॥ अहमेव शङ्खचूडो देवविद्रावकारकः ॥ दनुवंशोद्भवो विश्वे सुदामाऽहं हरेः पुरे ॥ ८१ ॥ अहमष्टसु गोपेषु गोगोपीपार्षदेषु च ॥ अधुना दानवेन्द्रोऽहं राधिकायाश्च शापतः ॥ ८२ ॥ जातिस्मरोऽहं जानामि कृष्णमन्त्रप्रभावतः ॥ जातिस्मरा त्वं तुलसी संसक्ता हरिणा पुरा ॥ ८३ ॥ त्वमेव

राधिकाकोपाज्जाताऽसि भारते भुवि ॥ त्वां सम्भोक्तुमिच्छकोऽहं नालं राधाभयात्ततः ॥ ८४ ॥ इत्येवमुक्त्वा स पुमान्विरराम
महामुने ॥ सस्मिता तुलसी हृष्टा प्रवक्तुमुपचक्रमे ॥ ८५ ॥ तुलस्युवाच ॥ एवंविधो बुधो विश्वे बुधेषु च प्रशंसितः ॥ कान्तमे
वंविधं कान्ता शश्वदिच्छति कामतः ॥ ८६ ॥ त्वयाऽहमधुना सत्यं विचारेण पराजिता ॥ स निन्दितश्चाप्यशुचिर्यः पुमांश्च
स्त्रिया जितः ॥ ८७ ॥ निन्दन्ति पितरो देवा बान्धवाः स्त्रीजितं जनम् ॥ स्त्रीजितं मनसा वाचा पिता भ्राता च निन्दति ॥८८॥
शुध्येद्विप्रो दशाहेन जातके मृतके तथा ॥ भूमिपो द्वादशाहेन वैश्यः पञ्चदशाहतः ॥ ८९ ॥ शूद्रो मासेन वेदेषु मातृवद्वर्णसङ्करः॥
अशुचिः स्त्रीजितः शुध्येच्चितादहनकालतः ॥ ९० ॥ न गृह्णन्तीच्छया तस्य पितरः पिण्डतर्पणम् ॥ न गृह्णन्तीच्छया देवास्त
स्य पुष्पजलादिकम् ॥ ९१ ॥ किं तस्य ज्ञानतपसा जपहोमप्रपूजनैः ॥ किं विद्यया वा यशसा स्त्रीभिर्यस्य मनो हृतम् ॥ ९२ ॥
विद्याप्रभावज्ञानार्थं मया त्वं च परीक्षितः ॥ कृत्वा परीक्षां कान्तस्य वृणोति कामिनी वरम् ॥ ९३ ॥ वराय गुणहीनाय वृद्धा
याज्ञानिने तथा ॥ दरिद्राय च मूर्खाय रोगिणे कुत्सिताय च ॥ ९४ ॥ अत्यन्तकोपयुक्ताय चात्यन्तदुर्मुखाय च ॥ पंगुलायाङ्गही
नाय चान्धाय बधिराय च ॥ ९५ ॥ जडाय चैव मूकाय क्लीबतुल्याय पापिने ॥ ब्रह्महत्यां लभेत्सोऽपि यः स्वकन्यां ददाति च ॥
॥ ९६ ॥ शान्ताय गुणिने चैव यूने च विदुषेऽपि च ॥ वैष्णवाय सुतां दत्त्वा दशवाजिफलं लभेत् ॥ ९७ ॥ यः कन्यापालनं
कृत्वा करोति विक्रयं यदि ॥ विपदा धनलोभेन कुम्भीपाकं स गच्छति ॥ ९८ ॥ कन्यामूत्रपुरीषं च तत्र भक्षति पातकी ॥ कृमि
भिर्दंशितः काकैर्यावदिन्द्राश्चतुर्दश ॥९९॥ तदन्ते व्याधयोनौ च लभते जन्म निश्चितम् ॥ विक्रीणाति मांसभारं वहत्येव दिवानि
शम् ॥ १०० ॥ इत्येवमुक्त्वा तुलसी विरराम तपोवने ॥ एतस्मिन्नन्तरे ब्रह्मा तयोरन्तिकमाययौ ॥ १०१ ॥ मूर्ध्ना ननाम तुलसी
शङ्खचूडश्च नारद ॥ उवास तत्र देवेशश्चोवाच च तयोर्हितम् ॥१०२॥ किं करोषि शङ्खचूड संवादमनया सह ॥ गान्धर्वेण विवाहेन
त्वमस्या ग्रहणं कुरु ॥ १०३ ॥ त्वं च पुरुषरत्नं च स्त्रीरत्नं स्त्रीष्वियं सती ॥ विदग्धाया विदग्धेन सङ्गमो गुणवान्भवेत्॥१०४॥

निर्विरोधसुखं राजन्को वा त्यजति दुर्लभम् ॥ योऽविरोधसुखत्यागी स पशुर्नात्र संशयः ॥ १०५ ॥ किमुपेक्षसि त्वं कान्तमीदृशं गुणिनं सती ॥ देवानामसुराणां च दानवानां विमर्दनम् ॥ १०६ ॥ यथा लक्ष्मीश्च लक्ष्मीशे यथा कृष्णे च राधिका॥ यथा मयि च सावित्री भवानी च भवे यथा ॥ १०७ ॥ यथा धरा वराहे च यथा मेना हिमालये ॥ यथाऽत्रावनसूया च दमयन्ती नले यथा ॥ १०८ ॥ रोहिणी च यथा चन्द्रे यथा कामे रतिः सती ॥ यथा दितिः कश्यपे च वशिष्ठेऽरुन्धती यथा ॥ ॥ १०९ ॥ यथाऽहल्या गौतमे च देवहूतिश्च कर्दमे ॥ यथा बृहस्पतौ तारा शतरूपा मनौ यथा ॥ ११० ॥ यथा च दक्षिणा यज्ञे यथा स्वाहा हुताशने ॥ यथा शची महेन्द्रे च यथा पुष्टिर्गणेश्वरे ॥ १११ ॥ देवसेना यथा स्कन्दे धर्मे मूर्त्तिर्यथा सती ॥ सौभाग्या सुप्रिया त्वं च शङ्खचूडे तथा भव ॥ ११२ ॥ अनेन सार्द्धं सुचिरं सुन्दरेण च सुन्दरि ॥ स्थाने स्थाने विहारं च यथेच्छं कुरु सन्ततम् ॥ ११३ ॥ पश्चात्प्राप्स्यसि गोविन्दं गोलोके पुनरेव च ॥ चतुर्भुजं च वैकुण्ठे शंखचूडे मृते सति ॥ ११४ ॥ इत्येवमाशिषं कृत्वा स्वालयं प्रययौ विधिः ॥ गान्धर्वेण विवाहेन जगृहे तां च दानवः ॥११५॥ स्वर्गे दुन्दुभिवाद्यं च पुष्पवृष्टिर्बभूव ह ॥ स रेमे रमया सार्द्धं वासगेहे मनोहरे ॥ ११६ ॥ मूर्च्छां सम्प्राप तुलसी नवसङ्गमसङ्गता ॥ निमग्ना निर्जने साध्वी सम्भोगसुखसागरे ॥ ११७ ॥ चतुःषष्टिकलामानं चतुःषष्टिविधं सुखम् ॥ कामशास्त्रे यन्निरुक्तं रसिकानां यथेप्सितम् ॥ ११८ ॥ अङ्गप्रत्यंगसंश्लेषपूर्वकं स्त्रीमनोहरम् ॥ तत्सर्वं सुखशृंगारं चकार रसिकेश्वरः ॥११९॥ अतीव रम्ये देशे च सर्वजन्तुविवर्जिते ॥ पुष्पचन्दनतल्पे च पुष्पचन्दनवायुना ॥ १२० ॥ पुष्पोद्याने नदीतीरे पुष्पचन्दनचार्चिते ॥ गृहीत्वा रसिकां रामां पुष्पचन्दनचर्चिताम् ॥ ॥ १२१ ॥ भूषितां भूषणैः सर्वैरतीव सुमनोहराम् ॥ सुरतेर्विरतिर्नास्ति तयोः सुरतविज्ञयोः ॥ १२२ ॥ जहार मानसं भर्तुर्लीलया तुलसी सती ॥ चेतनां रसिकायाश्च जहार रसभाववित् ॥ १२३ ॥ वक्षसश्चन्दनं बाह्वोस्तिलकं विजहार सा ॥ स च जग्राह तस्याश्च सिन्दूरबिन्दुपत्रकम् ॥ १२४ ॥ स तद्वक्षसि तस्याश्च नखरेखां ददौ मुदा॥ सा ददौ तद्वामपार्श्वे करभूषणलक्षणम् ॥ १२५ ॥

राजा तदोष्ठपुटके ददौ दशनदंशनम् ॥ तद्गण्डयुगले सा च प्रददौ तच्चतुर्गुणम् ॥ १२६ ॥ सुरतेर्विरतौ तौ च समुत्थाय परस्परम् ॥
सुवेशं चक्रतुस्तत्र यत्तन्मनसि वाञ्छितम् ॥ १२७ ॥ कुङ्कुमाक्तचन्दनेन सा तस्मै तिलकं ददौ ॥ सर्वाङ्गे सुन्दरे
रम्ये चकार चानुलेपनम् ॥ १२८ ॥ सुवासितं च ताम्बूलं वह्निशुद्धे च वाससी ॥ पारिजातस्य कुसुमं माल्यं चैव
सुशोभनम् ॥ १२९ ॥ अमूल्यरत्ननिर्माणमंगुलीयकमुत्तमम् ॥ सुन्दरं च मणिवरं त्रिषु लोकेषु दुर्लभम् ॥ १३० ॥
दासी तवाहमित्येवं समुच्चार्य पुनः पुनः ॥ ननाम परया भक्त्या स्वामिनं गुणशालिनम् ॥ १३१ ॥ सस्मिता तन्मुखाम्भोजं
लोचनाभ्यां पपौ पुनः ॥ निमेषरहिताभ्यां च सकटाक्षं च सुन्दरम् ॥ १३२ ॥ स च तां च समाकृष्य चकार वक्षसि
प्रियाम् ॥ सस्मितं वाससाऽऽच्छन्नं ददर्श मुखपङ्कजम् ॥ १३३ ॥ चुचुम्ब कठिने गण्डे बिम्बोष्ठे पुनरेव च ॥ ददौ तस्यै वस्त्रयुग्मं
वरुणादाहृतं च यत् ॥ तदाहृतां रत्नमालां त्रिषु लोकेषु विश्रुताम् ॥ १३४ ॥ ददौ मञ्जीरयुग्मं च स्वाहायाश्च हृतं च यत् ॥
केयूरयुग्मं छायाया रोहिण्याश्चैव कुण्डलम् ॥ १३५ ॥ अंगुलीयकरत्नानि रत्याश्च वरभूषणम् ॥ शङ्खं सुरुचिरं चित्रं यद्दत्तं विश्वकर्मणा ॥
१३६ ॥ विचित्रपीठकश्रेणीं शय्यां चापि सुदुर्लभाम् ॥ भूषणानि च दत्त्वा च परीहारं चकार ह ॥ १३७ ॥ निर्माय
कबरीभारं तस्याश्च माल्यसंयुतम् ॥ सुचित्रं पत्रकं गण्डे जयलेखसमं तथा ॥ १३८ ॥ चन्द्रलेखात्रिभिर्युक्तं चन्दनेन सुगन्धिना ॥
परितः परितश्चित्रैः सार्द्धं कुंकुमबिन्दुभिः ॥ १३९ ॥ ज्वलत्प्रदीपाकारं च सिन्दूरतिलकं ददौ ॥ तत्पादपद्मयुगले स्थलपद्मविनिन्दिते ॥
१४० ॥ चित्रालक्तकरागं च नखरेषु ददौ मुदा ॥ स्ववक्षसि मुहुर्न्यस्तं सरागं चरणाम्बुजम् ॥ १४१ ॥ हे देवि तव
दासोऽहमित्युच्चार्य्य पुनः पुनः ॥ रत्ननिर्माणयानेन तां च कृत्वा स्ववक्षसि ॥ १४२ ॥ तपोवनं परित्यज्य राजा स्थानान्तरं ययौ ॥
मलये देवनिलये शैले शैले वने वने ॥ १४३ ॥ स्थाने स्थानेऽतिरम्ये च पुष्पोद्यानेऽतिनिर्जने ॥ कन्दरे कन्दरे सिन्धुतीरे च
सुन्दरे वने ॥ १४४ ॥ पुष्पभद्रानदीतीरे नीरवातमनोहरे ॥ पुलिने पुलिने दिव्ये नद्यां नद्यां नदे नदे ॥ १४५ ॥ मधौ मधुकराणां

च मधुरध्वनिनादिते ॥ विनिस्यन्दे सुपवने नन्दने गन्धमादने ॥ १४६ ॥ देवोद्याने देववने चित्रे चन्दनकानने ॥ चम्पकानां केत
कीनां माधवीनां च माधवे ॥१४७॥ कुन्दानां मालतीनां च कुमुदाम्भोजकानने ॥ कल्पवृक्षे कल्पवृक्षे पारिजातवने वने ॥१४८॥
निर्जने काञ्चनीस्थाने धन्ये काञ्चनपर्वते ॥ काञ्चीवने किञ्चनके कञ्चके काञ्चनाकरे ॥ १४९ ॥ पुष्पचन्दनतल्पे च
पुंस्कोकिलरुतश्रुते ॥ पुष्पचन्दनसंयुक्तः पुष्पचन्दनवायुना ॥ १५० ॥ कामुकया कामुकः कामात्स रेमे रामया सह ॥ न तृप्तो
दानवेन्द्रश्च तृप्तिं नैव जगाम सा ॥ १५१ ॥ हविषा कृष्णवर्त्मेव ववृधे मदनस्तयोः ॥ तया सह समागत्य स्वाश्रमं दानव
स्ततः ॥ १५२ ॥ रम्यं क्रीडालयं कृत्वा विजहार पुनस्ततः ॥ एवं संबुभुजे राज्यं शङ्खचूडः प्रतापवान् ॥ १५३ ॥ एकमन्वन्तरं
पूर्णं राजराजेश्वरो बली ॥ देवानामसुराणां च दानवानां च सन्ततम् ॥ १५४ ॥ गन्धर्वाणां किन्नराणां राक्षसानां च शास्तिदः ॥
हताधिकारा देवाश्च चरन्ति भिक्षुका यथा ॥ १५५ ॥ पूजाहोमादिकं तेषां जहार विषयं बलात् ॥ आश्रयं चाधिकारं च शस्त्रा
स्त्रभूषणादिकम् ॥ १५६ ॥ निरुद्यमाः सुराः सर्वे चित्रपुत्तलिका यथा ॥ ते च सर्वे विषण्णाश्च प्रजग्मुर्ब्रह्मणः सभाम्॥
॥ १५७ ॥ वृत्तान्तं कथयामासू रुरुदुश्च भृशं मुहुः ॥ तदा ब्रह्मा सुरैः सार्द्धं जगाम शङ्करालयम् ॥ १५८ ॥ सर्वं संकथयामास
विधाता चन्द्रशेखरम् ॥ ब्रह्मा शिवश्च तैः सार्द्धं वैकुण्ठं च जगाम ह ॥ १५९ ॥ सुदुर्लभं परं धाम जरामृत्युहरं परम् ॥ सम्प्राप
च वरं द्वारमाश्रमाणां हरेरहो ॥ १६० ॥ ददर्श द्वारपालांश्च रत्नसिंहासनस्थितान् ॥ शोभितान्पीतवस्त्रैश्च रत्नभूषणभूषितान्॥
॥ १६१ ॥ वनमालान्वितान्सर्वान्श्यामसुन्दरविग्रहान् ॥ शंखचक्रगदापद्मधरांश्चैव चतुर्भुजान् ॥ १६२ ॥ सस्मितान्पद्मवक्त्रांश्च
पद्मनेत्रान्मनोहरान् ॥ ब्रह्मा तान्कथयामास वृत्तान्तं गमनार्थकम् ॥ १६३ ॥ तेऽनुज्ञां च ददुस्तस्मै प्रविवेश तदाज्ञया ॥ एवं च
षोडश द्वारान्निरीक्ष्य कमलोद्भवः ॥ १६४ ॥ देवैः सार्द्धं तानतीत्य प्रविवेश हरेः सभाम् ॥ देवर्षिभिः परिवृतां पार्षदैश्च चतुर्भुजैः
॥ १६५ ॥ नारायणस्वरूपैश्च सर्वैः कौस्तुभभूषितैः ॥ पूर्णेन्दुमण्डलाकारां चतुरस्रां मनोहराम् ॥ १६६ ॥ मणीन्द्रसारनिर्माणां

हीरासारसुशोभिताम् ॥ अमूल्यरत्नखचितां रचितां स्वेच्छया हरेः ॥ १६७ ॥ माणिक्यमालाजालाढ्यां मुक्तापंक्तिविभूषिताम् ॥
मण्डितां मण्डलाकारै रत्नदर्पणकोटिभिः॥१६८॥विचित्रैश्चित्ररेखाभिर्नानाचित्रविचित्रिताम्॥पद्मरागेन्द्ररचितै रचितां पद्मकृत्रिमैः ॥
॥१६९॥सोपानशतकैर्युक्तां स्यमन्तकविनिर्मितैः॥पट्टसूत्रग्रन्थियुतैश्चारुचन्दनपल्लवैः॥१७०॥इन्द्रनीलमणिस्तम्भैर्वेष्टितां सुमनोरमाम् ॥
सद्रत्नपूर्णकुम्भानां समूहैश्च समन्विताम् ॥ १७१ ॥ पारिजातप्रसूनानां मालाजालैर्विराजिताम् ॥ कस्तूरीकुङ्कुमाक्तैश्च सुगन्धिचन्दनद्रवैः
॥ १७२ ॥ सुसंस्कृतां तु सर्वत्र वासितां गन्धवायुना ॥ विद्याधरीसमूहानां सङ्गीतैश्च मनोहरम् ॥ १७३ ॥ सहस्रयोजनायामां
परिपूर्णां च किंकरैः ॥ ददर्श श्रीहरिं ब्रह्मा शङ्करैश्च सुरैः सह ॥ १७४ ॥ वसन्तं तन्मध्यदेशे यथेन्दुं तारकावृतम् ॥ अमूल्यरत्ननिर्माणचित्रसिंहासनस्थितम्
॥ १७५ ॥ किरीटिनं कुण्डलिनं वनमालाविभूषितम् ॥ शङ्खचक्रगदापद्मधारिणं च चतुर्भुजम् ॥
॥ १७६ ॥ नवीननीरदश्यामं सुन्दरं सुमनोहरम् ॥अमूल्यरत्ननिर्माणसर्वाभरणभूषितम् ॥ १७७ ॥ चन्दनोक्षितसर्वाङ्गं बिभ्रतं केलिपङ्कजम्
॥ पुरतो नृत्यगीतं च पश्यन्तं सस्मितं मुदा ॥ १७८ ॥ शान्तं सरस्वतीकान्तं लक्ष्मीधृतपदाम्बुजम् ॥ भक्तप्रदत्तताम्बूलं
भुक्तवन्तं सुवासितम् ॥ १७९ ॥ गङ्गया परया भक्त्या सेवितं श्वेतचामरैः ॥ सर्वैश्च स्तूयमानं च भक्तिनम्रात्मकन्धरैः॥ १८० ॥
एवं विशिष्टं तं दृष्ट्वा परिपूर्णतमं विभुम् ॥ ब्रह्मादयः सुराः सर्वे प्रणम्य तुष्टुवुस्तदा ॥ १८१ ॥ पुलकाङ्कितसर्वाङ्गाः साश्रुनेत्राः
सगद्गदाः ॥ भक्त्या परमया भक्ता भीता नम्रात्मकन्धराः ॥ १८२ ॥ पुटाञ्जलियुतो भूत्वा विधाता जगतामपि ॥ वृत्तान्तं कथयामास
विनयेन हरेः पुरः ॥ १८३ ॥ हरिस्तद्वचनं श्रुत्वा सर्वज्ञः सर्वभाववित् ॥ प्रहस्योवाच ब्रह्माणं रहस्यं च मनोहरम् ॥ १८४ ॥
श्रीभगवानुवाच ॥ शङ्खचूडस्य वृत्तान्तं सर्वं जानामि पद्मज ॥ मद्भक्तस्य च गोपस्य महातेजस्विनः पुरा ॥ १८५ ॥ सुराः शृणुत
तत्सर्वमितिहासं पुरातनम् ॥ गोलोकस्यैव चरितं पापघ्नं पुण्यकारणम् ॥ १८६ ॥ सुदामा नाम गोपश्च पार्षदप्रवरो मम ॥ स प्राप
दानवीं योनिं राधाशापात्सुदारुणात् ॥ १८७ ॥ तत्रैकदाऽहमगमं स्वालयाद्रासमण्डलम् ॥ विहाय मानिनीं राधां मम प्राणाधिकां

पराम् ॥ १८८ ॥ सा मां विरजया सार्द्धं विज्ञाय किंकरीमुखात् ॥पश्चात्क्रुधा साऽऽजगाम मां ददर्श च तत्र च ॥ १८९॥ विरजां च नदीरूपां मां ज्ञात्वा च तिरोहितम् ॥ पुनर्जगाम सा रुष्टा स्वालयं सखिभिः सह ॥ १९० ॥ मां दृष्ट्वा मन्दिरे देवी सुदामसहितं पुरा ॥ भृशं मां भर्त्सयामास मौनीभूतं च सुस्थिरम् ॥ १९१ ॥ तच्छ्रुत्वा च सुमहांश्च सुदामा तां चुकोप ह॥ स च तां भर्त्सयामास कोपेन मम सन्निधौ॥१९२॥तच्छ्रुत्वा सा कोपयुक्ता रक्तपङ्कजलोचना ॥बहिष्कर्तुं चकाराज्ञां संत्रस्ता मम संसदि॥१९३॥ सखीलक्षं समुत्तस्थौ दुर्वारं तेजसोज्ज्वलम् ॥ बहिश्चकार तं तूर्णं जल्पन्तं च पुनः पुनः ॥ १९४ ॥ सा च तद्वचनं श्रुत्वा समारुष्टा शशाप तम् ॥ याहि रे दानवीं योनिमित्येवं दारुणं वचः ॥१९५॥ तं गच्छन्तं शपन्तं च रुदन्तं मां प्रणम्य च ॥ वारयामास सा तुष्टा रुदन्ती कृपया पुनः ॥ १९६ ॥ हे वत्स तिष्ठ मा गच्छ क्व यासीति पुनः पुनः ॥ समुच्चार्य्य च तत्पश्चाज्जगाम सा च विस्मिता ॥ १९७ ॥ गोप्यश्च रुरुदुः सर्वा गोपाश्चेति सुदुःखिताः ॥ ते सर्वे राधिका चापि तत्पश्चाद्बोधिता मया ॥ १९८ ॥ आयास्यति क्षणार्धेन कृत्वा शापस्य पालनम् ॥ सुदामंस्त्वमिहागच्छेत्युवाच सा निवारिता ॥ १९९ ॥ गोलोकस्य क्षणार्द्धेन चैकमन्वन्तरं भवेत् ॥ पृथिव्यां जगतां धातरित्येवं वचनं ध्रुवम् ॥ २०० ॥ स एव शंखचूडश्च पुनस्तत्रैव यास्यति ॥ महाबलिष्ठो योगीशः सर्वमायाविशारदः ॥२०१॥ मम शूलं गृहीत्वा च शीघ्रं गच्छत भारतम् ॥ शिवः करोतु संहारं मम शूलेन रक्षसः ॥ २०२ ॥ ममैव कवचं कण्ठे सर्वमङ्गलमङ्गलम् ॥ बिभर्ति दानवः शश्वत्संसारविजयी ततः ॥२०३ ॥ तत्र ब्रह्मन्स्थिते कण्ठे न कोऽपि हिंसितुं क्षमः ॥ तद्याच्ञां च करिष्यामि विप्ररूपोऽहमेव च ॥२०४॥सतीत्वभङ्गस्तत्पत्न्या यत्र काले भविष्यति ॥ तत्रैव काले तन्मृत्युरिति दत्तो वरस्त्वया ॥ २०५ ॥ तत्पत्न्याश्चोदरे वीर्य्यमर्पयिष्यामि निश्चितम् ॥ तत्क्षणेनैव तन्मृत्युर्भविष्यति न संशयः ॥ २०६ ॥ पश्चात्सा देहमुत्सृज्य भविष्यति प्रिया मम ॥ इत्युक्त्वा जगतां नाथो ददौ शूलं हराय च ॥२०७॥ शूलं दत्त्वा ययौ शीघ्रं हरिरभ्यन्तरं मुदा ॥ भारतं च ययुर्देवा ब्रह्मरुद्रपुरोगमाः ॥ २०८ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे

तुलस्युपाख्याने षोडशोऽध्यायः ॥ १६ ॥ नारायण उवाच ॥ ब्रह्मा शिवं संनियोज्य संहारे दानवस्य च ॥ जगाम स्वालयं तूर्णं
यथास्थानं महामुने ॥ १ ॥ चन्द्रभागानदीतीरे वटमूले मनोहरे ॥ तत्र तस्थौ महादेवो देवनिस्तारहेतवे ॥ २ ॥ दूतं कृत्वा पुष्पदन्तं
गन्धर्वेश्वरमीप्सितम् ॥ शीघ्रं प्रस्थापयामास शंखचूडान्तिकं मुदा ॥ ३ ॥ स चेश्वराज्ञया शीघ्रं ययौ तन्नगरं वरम् ॥ महेन्द्र
नगरोत्कृष्टं कुबेरभवनाधिकम् ॥ ४ ॥ पञ्चयोजनविस्तीर्णं दैर्घ्ये तद्द्विगुणं मुने ॥ स्फाटिकाकारमणिभिस्समन्तात्परिवेष्टितम्
॥ सप्तभिः परिखाभिश्च दुर्गमाभिः समन्वितम् ॥ ५ ॥ ज्वलदग्निनिभैर्नित्यं शोभितं रत्नकोटिभिः ॥ युक्तं
च वीथिशतकैर्मणिवेदिसमन्वितैः ॥ ६ ॥ परितो वणिजां संचैर्नानावस्तुविराजितैः ॥ सिन्दूराकारमणिभिर्निर्मितैश्च
विचित्रितैः ॥ ७ ॥ भूषितं भूषितैर्दिव्यैराश्रमैः शतकोटिभिः ॥ गत्वा ददर्श तन्मध्ये शङ्खचूडालयं वरम् ॥ ८ ॥ अतीव वलयाकारं
यथा पूर्णेन्दुमण्डलम् ॥ ज्वलदग्निशिखाभिश्च परिखाभिश्चतसृभिः॥९॥सुदुर्गमं च शत्रूणामन्येषां सुगमं सुखम् ॥ अत्युच्चैर्गगनस्पर्श्यमणिप्राचीरवेष्टितम्॥१०॥राजितं द्वादशद्वारैर्द्वारपालसमन्वितैः ॥ रत्नकृत्रिमपद्माढ्यै रत्नदर्पणभूषितैः ॥११ ॥ मणीन्द्रसारखचितैः शोभितं लक्षमन्दिरैः॥शोभितं रत्नसोपानै रत्नस्तम्भविराजितैः ॥१२॥रत्नचित्रकपाटाद्यैः सद्रत्नकलशान्वितैः॥ रत्नेन्द्रचित्र
राजीभिः सुदीप्ताभिर्विराजितैः॥१३॥परितो रक्षितं शश्वद्दानवैः शतकोटिभिः॥दिव्यास्त्रधारिभिः शूरैर्महाबलपराक्रमैः॥१४॥सुन्दरैश्च
सुवेषैश्च नानालङ्कारभूषितैः ॥ तान्दृष्ट्वा पुष्पदन्तोऽपि वरद्वारं ददर्श सः ॥ १५ ॥ द्वारे नियुक्तं पुरुषं शूलहस्तं च सस्मितम् ॥
तिष्ठन्तं पिङ्गलाक्षं च ताम्रवर्णं भयङ्करम् ॥ १६ ॥ कथयामास वृत्तान्तं जगाम तदनुज्ञया ॥ अतिक्रम्य नवद्वारं जगामाभ्यन्तरं
पुरम् ॥ १७ ॥ न कैश्चिद्वारितो दूतो दूतरूपेण तस्य च ॥ गत्वा सोऽभ्यन्तरं द्वारं द्वारपालमुवाच ह ॥ १८ ॥ रणस्य सर्व
वृत्तान्तं विज्ञापयितुमीश्वरम् ॥ स च तं कथयित्वा च दूतं गन्तुमुवाच ह ॥ १९ ॥ स गत्वा शंखचूडं तं ददर्श सुमनोहरम् ॥
रासमण्डलमध्यस्थं स्वर्णसिंहासनस्थितम् ॥ २० ॥ मणीन्द्रखचितं चित्रं रत्नदण्डसमन्वितम् ॥ रत्नकृत्रिमपुष्पैश्च प्रशस्तं शोभितं

सदा ॥ २१ ॥ भृत्येन हस्तविधृतं स्वर्णच्छत्रं मनोहरम् ॥ सेवितं पार्षदगणैर्व्यंजनैः श्वेतचामरैः ॥ २२ ॥ सुवेषं सुन्दरं रम्यं रत्नभूषणभूषितम् ॥ माल्यानुलेपनं सूक्ष्मवस्त्रं च दधतं मुने ॥ २३ ॥ दानवेन्द्रैः परिवृतं सुवेषं च त्रिकोटिभिः ॥ शतकोटिभिरन्यैश्च भ्रमद्भिश्शस्त्रधारिभिः ॥ २४ ॥ एवंभूतं च तं दृष्ट्वा पुष्पदन्तः सविस्मयः ॥ उवाच रणवृत्तान्तं यदुक्तं शङ्करेण च ॥ २५ ॥ पुष्पदन्त उवाच ॥ राजेन्द्र शिवदूतोऽहं पुष्पदन्ताभिधः प्रभो ॥ यदुक्तं शङ्करेणैव तद्ब्रवीमि निशामय ॥ २६ ॥ राज्यं देहि च देवानामधिकारं च साम्प्रतम् ॥ देवाश्च शरणापन्ना देवेशे श्रीहरौ परे ॥ २७ ॥ दत्त्वा त्रिशूलं हरिणा तुभ्यं प्रस्थापितः शिवः ॥ चन्द्रभागानदीतीरे वटमूले त्रिलोचनः ॥२८॥ विषयं देहि तेषां च युद्धं वा कुरु निश्चितम् ॥ गत्वा वक्ष्यामि किं शम्भुं तद्भवान्वक्तुमर्हति ॥ २९ ॥ दूतस्य वचनं श्रुत्वा शङ्खचूडः प्रहस्य च ॥ प्रभाते ह्यागमिष्यामि त्वं च गच्छेत्युवाच ह ॥ ३० ॥ स गत्वोवाच तूर्णं तं वटमूलस्थमीश्वरम् ॥ शङ्खचूडस्य वचनं तदीयं यत्परिच्छदम् ॥३१॥ एतस्मिन्नन्तरे स्कन्द आजगाम शिवान्तिकम् ॥ वीरभद्रश्च नन्दी च महाकालः सुभद्रकः ॥ ३२ ॥ विशालाक्षश्च बाणश्च पिङ्गलाक्षो विकम्पनः ॥ विरूपो विकृतिश्चैव मणिभद्रश्च बाष्कलः॥३३॥कपिलाक्षो दीर्घदंष्ट्रो विकटस्ताम्रलोचनः ॥ कालङ्कटो बलीभद्रः कालजिह्वः कुटीचरः ॥३४॥ बलोन्मत्तो रणश्लाघी दुर्जयो दुर्गमस्तथा ॥ अष्टौ च भैरवा रौद्रा रुद्राश्चैकादश स्मृताः ॥ ३५ ॥ वसवो वासवाद्याश्च आदित्या द्वादश स्मृताः ॥ हुताशनश्च चन्द्रश्च विश्वकर्माऽश्विनौ च तौ ॥३६॥ कुबेरश्च यमश्चैव जयन्तो नलकूबरः ॥ वायुश्च वरुणश्चैव बुधो वै मंगलस्तथा ॥ ॥ ३७ ॥ धर्मश्च शनिरीशानः कामदेवश्च वीर्य्यवान् ॥ उग्रदंष्ट्रा चोग्रचण्डा कोट्टरी कैटभी तथा ॥ ३८ ॥ स्वयं शतभुजा देवी भद्रकाली भयंकरी ॥ रत्नेन्द्रराजखचितविमानोपरि संस्थिता ॥ ३९ ॥ रक्तवस्त्रपरीधाना रक्तमाल्यानुलेपना ॥ नृत्यन्ती च हसन्ती च गायन्ती सुस्वरं मुदा ॥४०॥ अभयं ददती भक्तमभया सा भयं रिपुम् ॥ बिभ्रती विकटां जिह्वां सुलोलां योजनायताम् ॥ ॥ ४१ ॥ खर्परं वर्त्तुलाकारं गम्भीरं योजनायतम् ॥ त्रिशूलं गगनस्पर्शि शक्तिं वै योजनायताम् ॥ ४२ ॥ शंखं चक्रं गदां पद्मं

शरांश्चापं भयंकरम् ॥ मुद्गरं मुशलं वज्रं खड्गं फलकमुज्ज्वलम् ॥ ४३ ॥ वैष्णवास्त्रं वारुणास्त्रमाग्नेयं नागपाशकम् ॥ नारायणास्त्रं
ब्रह्मास्त्रं गान्धर्वं गारुडं तथा ॥ ४४ ॥ पार्जन्यं वै पाशुपतं जृम्भणास्त्रं च पार्वतम् ॥ माहेश्वरास्त्रं वायव्यं दण्डं सम्मोहनं तथा ॥
नानाविधान्यायुधानि दिव्यास्त्रशतकं परम् ॥४५॥ आगत्य तत्र तस्थौ सा योगिनीनां त्रिकोटिभिः ॥ सार्द्धं वै डाकिनीनां च विक
टानां त्रिकोटिभिः ॥ ४६ ॥ भूतप्रेतपिशाचाश्च कूष्माण्डब्रह्मराक्षसाः ॥ वेतालाश्चैव यक्षाश्च राक्षसाश्चैव किन्नराः ॥ ४७ ॥ ताभि
श्चैव सह स्कन्दो नत्वा वै चन्द्रशेखरम् ॥ पितुः पार्श्वे सभायां च समुवास भवाज्ञया ॥ ४८ ॥ अथ दूते गते तत्र शंखचूडः प्रताप
वान् ॥ उवाच तुलसीं वार्त्तां गत्वाऽभ्यन्तरमेव च ॥४९॥ रणवार्त्तां च सा श्रुत्वा शुष्ककण्ठोष्ठतालुका ॥ उवाच मधुरं साध्वी हृद
येन विदूयता ॥५०॥ तुलस्युवाच ॥ हे प्राणनाथ हे बन्धो तिष्ठ मे वक्षसि क्षणम् ॥ हे प्राणाधिष्ठातृदेव रक्ष मे जीवनं क्षणम् ॥५१॥
भुंक्ष्व जन्मसु भोग्यं तद्यद्वै मनसि वांछितम् ॥ पश्यामि त्वां क्षणं किञ्चिल्लोचनाभ्यां पिपासिता ॥ ५२ ॥ आन्दोलयन्ति प्राणा मे
मनो दग्धं च सन्ततम् ॥ दुस्स्वप्नं च मया दृष्टं चाद्यैव चरमे निशि ॥ ५३ ॥ तुलसीवचनं श्रुत्वा भुक्त्वा पीत्वा नृपेश्वरः ॥ उवाच
वचनं प्राज्ञो हितं सत्यं यथोचितम् ॥५४॥ शङ्खचूड उवाच ॥ कालेन योजितं सर्वं कर्म भोगनिबन्धने ॥ शुभं हर्षं सुखं दुःखं भयं
शोकममंगलम् ॥५५॥ काले भवन्ति वृक्षाश्च शाखावन्तश्च कालतः ॥ क्रमेण पुष्पवन्तश्च फलवन्तश्च कालतः ॥५६॥ तेषां फलानि
पक्वानि प्रभवन्त्येव कालतः ॥ ते सर्वे फलिनः काले काले कालं प्रयान्ति च॥५७॥भवन्ति काले भूतानि काले कालं प्रयान्ति च॥
काले भवन्ति विश्वानि काले नश्यन्ति सुन्दरि॥५८॥ स्रष्टा च काले सृजति पाता पाति च कालतः॥संहर्त्ता संहरेत्काले संचरन्ति
क्रमेण ते ॥५९॥ ब्रह्मविष्णुशिवादीनामीश्वरः प्रकृतेः परः॥स्रष्टा पाता च संहर्त्ता स कृत्स्नांशेन सर्वदा॥६०॥ काले स एव प्रकृतिं
निर्माय स्वेच्छया प्रभुः॥निर्माय प्राकृतान्सर्वान्विश्वस्थांश्च चराचरान्॥६१॥आब्रह्मस्तंबपर्य्यन्तं सर्वं कृत्रिममेव च॥प्रवदन्ति च कालेन
नश्यत्यपि हि नश्वरम्॥६२॥भज सत्यं परं ब्रह्म राधेशं त्रिगुणात्परम् ॥ सर्वेशं सर्वरूपं च सर्वात्मानन्तमीश्वरम् ॥६३॥जलं जलेन

सृजति जलं पाति जलेन यः ॥ हरेज्जलं जलेनैव तं कृष्णं भज सन्ततम् ॥६४॥ यस्याज्ञया वाति वातः शीघ्रगामी च सन्ततम्॥
यस्याज्ञया च तपनस्तपत्येव यथाक्षणम् ॥ ६५ ॥ यथाक्षणं वर्षतीन्द्रो मृत्युश्चरति जन्तुषु ॥ यथाक्षणं दहत्यग्निश्चन्द्रो भ्रमति
भीतवत्॥६६॥मृत्योर्मूलं कालमूलं यमस्य च यमं परम्॥स्रष्टारं स्रष्टुरपि च पातुः पालकमेव च ॥६७॥ संहर्त्तारं च संहर्तुस्तं कृष्णं
शरणं व्रज॥ को बन्धुश्चैव केषां वा सर्वबन्धुं भज प्रिये ॥ ६८ ॥ अहं को वा त्वं च का वा विधिना योजितः पुरा ॥ त्वया सार्द्धं
कर्मणा च पुनस्तेन वियोजितः ॥६९॥ अज्ञानी कातरः शोके विपत्तौ च न पण्डितः ॥ सुखं दुःखं भ्रमत्येव चक्रनेमिक्रमेण च ॥
॥ ७० ॥ नारायणं तं सर्वेशं कान्तं प्राप्स्यसि निश्चितम् ॥ तपः कृतं यदर्थं च पुरा बदरिकाश्रमे ॥ ७१॥ मया त्वं तपसा लब्धा
ब्रह्मणश्च वरेण हि ॥ हरेरर्थं तव तपो हरिं प्राप्स्यसि कामिनि ॥ ७२ ॥ वृन्दावने च गोविन्दं गोलोके त्वं लभिष्यसि ॥ अहं
यास्यामि तल्लोकं तनुं त्यक्त्वा च दानवीम् ॥ ७३ ॥ तत्र द्रक्ष्यसि मां त्वं च त्वां च द्रक्ष्यामि सन्ततम् ॥ आगमं राधिकाशा
पाद्धारतं च सुदुर्लभम् ॥ ७४ ॥ पुनर्यास्यामि तत्रैव कः शोको मे शृणु प्रिये ॥ त्वं हि देहं परित्यज्य दिव्यरूपं विधाय च ॥
॥७५॥ तत्कालं प्राप्स्यसि हरिं मा कान्ते कातरा भव ॥ इत्युक्त्वा च दिनान्ते च तया सार्द्धं मनोहरे ॥७६॥ सुष्वाप शोभने तल्पे
पुष्पचन्दनचर्च्चिते ॥ नानाप्रकारविभवे चचार रत्नमन्दिरे ॥ ७७ ॥ रत्नप्रदीपसंयुक्ते स्त्रीरत्नं प्राप्य सुन्दरीम् ॥ निनाय रजनीं
राजा क्रीडाकौतुकमंगलैः ॥७८॥ कृत्वा वक्षसि कान्तां तां रुदन्तीमतिदुःखिताम् ॥ कृशोदरीं निराहारां निमग्नां शोकसागरे॥७९॥
पुनस्तां बोधयामास दिव्यज्ञानेन बोधवित् ॥ पुरा कृष्णेन यद्दत्तं भाण्डीरे तत्त्वमुत्तमम् ॥ ८० ॥ स च तस्यै ददौ तच्च सर्वशोक
हरं परम् ॥ ज्ञानं संप्राप्य सा देवी प्रसन्नवदनेक्षणा ॥ ८१ ॥ क्रीडां चकार हर्षेण सर्वं मत्वाऽतिनश्वरम् ॥ तौ दम्पती च
क्रीडार्त्तौ निमग्नौ सुखसागरे ॥ ८२ ॥ पुलकाङ्कितसर्वाङ्गौ मूर्च्छितौ निर्जने मुने ॥ अंगप्रत्यंगसंयुक्तौ सुप्रीतौ सुरतोत्सुकौ ॥ ८३ ॥
एकांगौ च तथा तौ द्वौ चार्द्धनारीश्वरौ यथा ॥ प्राणेश्वरं च तुलसी मेने प्राणाधिकं परम् ॥ ८४ ॥ प्राणाधिकां च तां मेने राजा

प्राणाधिकेश्वरीम् ॥ तौ स्थितौ सुखसुप्तौ च तन्त्रितौ सुन्दरौ समौ ॥ ८५ ॥ सुवेषौ सुखसम्भोगादचेष्टौ सुमनोहरौ ॥ क्षणं सचे
तनौ तौ च कथयन्तौ रसाश्रयाम् ॥ कथां मनोहरां दिव्यां हसन्तौ च क्षणं पुनः ॥ ८६ ॥ भुक्तवन्तौ च ताम्बूलं प्रदत्तं च परस्प
रम् ॥ ८७ ॥ परस्परं सेवितौ च सुप्रीत्या श्वेतचामरैः ॥ क्षणं शयानौ सानन्दौ वसन्तौ च क्षणं पुनः ॥ ८८ ॥ क्षणं
केलिनियुक्तौ च रसभावसमन्वितौ ॥ सुरताद्विरतिर्नास्ति तौ तद्विषयपण्डितौ ॥ ८९ ॥ सततं जययुक्तौ द्वौ क्षणं नैव पराजितौ ॥
॥ ९० ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे तुलसीशंखचूडसम्भोगो नाम सप्तदशोऽध्यायः ॥
॥ १७ ॥ नारायण उवाच ॥ श्रीकृष्णं मनसा ध्यात्वा राजा कृष्णपरायणः ॥ ब्राह्मे मुहूर्त्ते चोत्थाय पुष्पतल्पान्मनोहरात् ॥१॥
रात्रिवासः परित्यज्य स्नात्वा मङ्गलवारिणा ॥ धौते च वाससी धृत्वा कृत्वा तिलकमुज्ज्वलम् ॥२॥ चकाराह्निकमावश्यमभीष्टगुरुव
न्दनम् ॥ दध्याज्यं मधु लाजांश्च सोऽपश्यद्वस्तु मङ्गलम् ॥ ३ ॥ रत्नश्रेष्ठं मणिश्रेष्ठं वस्त्रश्रेष्ठं च काञ्चनम् ॥ ब्राह्मणेभ्यो ददौ
मत्त्या यथानित्यं च नारद ॥ ४ ॥ अमूल्यरत्नं यत्किञ्चिन्मुक्तामाणिक्यहीरकम् ॥ ददौ विप्राय गुरवे यात्रामङ्गलहेतवे ॥ ५ ॥
गजरत्नं चाश्वरत्नं धेनुरत्नं मनोहरम् ॥ ददौ सर्वं दरिद्राय विप्रार्थं मङ्गलाय च ॥ ६ ॥ कोशागारसहस्रं च नगराणां
त्रिलक्षकम् ॥ ग्रामाणां शतकोटिं च ब्राह्मणेभ्यो ददौ मुदा ॥ ७ ॥ पुत्रं कृत्वा च राजेन्द्रं सुचन्द्रं दान
वेषु च ॥ पुत्रे समर्प्य भार्यां च राज्यं वै सर्वसम्पदम् ॥ ८ ॥ प्रजानुचरसंघं च कोशौघं वाहनादिकम् ॥ स्वयं
सन्नाहयुक्तश्च धनुष्पाणिर्बभूव ह ॥ ९ ॥ भृत्यद्वारा क्रमेणैव स चक्रे सैन्यसंचयम् ॥ अश्वानां च त्रिलक्षेण पञ्चलक्षेण हस्तिनाम् ॥
॥ १० ॥ रथानामयुतेनैव धानुष्काणां त्रिकोटिभिः ॥ त्रिकोटिभिश्चर्मिणां च शूलिनां च त्रिकोटिभिः ॥ ११ ॥ कृता सेनाऽपरि
मिता दानवेन्द्रेण नारद ॥ यस्यां सेनापतिश्चैव युद्धशास्त्रविशारदः ॥ १२ ॥ महारथः स विज्ञेयो रथिनां प्रवरो रणे ॥ त्रिलक्षाक्षौ
हिणीसेनापतिं कृत्वा नराधिपः ॥१३॥ त्रिंशदक्षौहिणीवाद्यभाण्डौघं च चकार सः ॥ बहिर्बभूव शिबिरान्मनसा श्रीहरिं स्मरन् ॥१४॥

रत्नेन्द्रसारखचितं विमानं ह्यारुरोह सः ॥ गुरुवर्गान्पुरस्कृत्य प्रययौ शङ्करान्तिकम् ॥ १५ ॥ पुष्पभद्रानदीतीरे यत्राक्षयवटः
शुभः ॥ सिद्धाश्रमं च सिद्धानां सिद्धिक्षेत्रं च नामतः ॥१६॥ कपिलस्य तपस्थानं पुण्यक्षेत्रं च भारते ॥ पश्चिमोदधिपूर्वे च
मलयस्य च पश्चिमे॥१७॥ श्रीशैलोत्तरभागे च गन्धमादनदक्षिणे ॥ पञ्चयोजनविस्तीर्णा दैर्घ्ये शतगुणा तथा ॥ शाश्वती जलपूर्णा
च पुष्पभद्रानदी शुभा ॥ १८ ॥ लवणोदप्रिया भार्य्या शश्वत्सौभाग्यसंयुता ॥ शुद्धस्फटिकसङ्काशा भारते च सुपुण्यदा ॥१९॥
शरावतीमिश्रिता च निर्गता सा हिमालयात् ॥ गोमन्तं वामतः कृत्वा प्रविष्टा पश्चिमोदधौ ॥२०॥ तत्र गत्वा शंखचूडो दृलोके
चन्द्रशेखरम् ॥ वटमूले समासीनं सूर्य्यकोटिसमप्रभम् ॥ २१ ॥ कृत्वा योगासने स्थित्वा मुद्रायुक्तं च सस्मितम् ॥ शुद्धस्फटिक
सङ्काशं ज्वलन्तं ब्रह्मतेजसा ॥ २२ ॥ त्रिशूलपट्टिशधरं व्याघ्रचर्माम्बरं वरम् ॥ तप्तकाञ्चनवर्णाभं जटाजालं च बिभ्रतम् ॥ २३ ॥
त्रिनेत्रं पञ्चवक्त्रं च नागयज्ञोपवीतिनम् ॥ मृत्युञ्जयं कालमृत्युं विश्वमृत्युकरं परम् ॥ २४ ॥ भक्तमृत्युहरं शान्तं गौरीकान्तं मनोरमम्
॥ तपसां फलदातारं दातारं सर्वसम्पदाम् ॥ २५ ॥ आशुतोषं प्रसन्नास्यं भक्तानुग्रहकारकम् ॥ विश्वनाथं विश्वरूपं विश्वबीजं
च विश्वजम् ॥ २६ ॥ विश्वम्भरं विश्ववरं विश्वसंहारकारणम् ॥ कारणं कारणानां च नरकार्णवतारणम् ॥ २७ ॥ ज्ञानप्रदं ज्ञानबीजं
ज्ञानानन्दं सनातनम् ॥ अवरुह्य विमानाच्च स दृष्ट्वा दानवेश्वरः ॥ २८ ॥ सर्वैः सार्द्धं भक्तियुक्तः शिरसा प्रणनाम सः ॥
वामतो भद्रकालीं च स्कन्दं तत्पुरतः स्थितम् ॥ २९ ॥ आशिषं च ददौ तस्मै काली स्कन्दश्च शङ्करः ॥ उत्तस्थुर्दानवं दृष्ट्वा सर्वे
नन्दीश्वरादयः ॥३०॥ परस्परं च सम्भाषां ते चक्रुस्तत्र साम्प्रतम्॥राजा कृत्वा च सम्भाषामुवास शिवसन्निधौ ॥३१॥ प्रसन्नात्मा महादेवो
भगवांस्तमुवाच ह ॥ ३२ ॥ श्रीमहादेव उवाच ॥ विधाता जगतां ब्रह्मा पिता धर्मस्य धर्मवित् ॥ मरीचिस्तस्य पुत्रश्च वैष्णवश्चापि
धार्मिकः ॥ ३३ ॥ कश्यपश्चापि तत्पुत्रो धर्मिष्ठश्च प्रजापतिः ॥ दक्षः प्रीत्या ददौ तस्मै भक्त्या कन्यास्त्रयोदश ॥ ३४ ॥
तास्वेका च दनुः साध्वी तत्सौभाग्येन वर्द्धिता ॥ चत्वारिंशद्दनोः पुत्रा दानवास्तेजसोज्ज्वलाः ॥ ३५ ॥ तेष्वेको विप्रचित्तिश्च

महाबलपराक्रमः ॥ तत्पुत्रो धार्मिको दम्भो विष्णुभक्तो जितेन्द्रियः ॥ ३६ ॥ जजाप परमं मन्त्रं पुष्करे लक्षवत्सरम् ॥ शुक्राचार्य्यं गुरुं कृत्वा कृष्णस्य परमात्मनः ॥ ३७ ॥ तदा त्वां तनयं प्राप परं कृष्णपरायणम् ॥ पुरा त्वं पार्षदो गोपो गोपेष्वष्टसु धार्मिकः ॥ ३८ ॥ अधुना राधिकाशापाद्भारते दानवेश्वरः ॥ आब्रह्मस्तम्बपर्यन्तं भ्रमं मेने च वैष्णवः ॥ ३९ ॥ सालोक्यसार्ष्टिसारूप्यसामीप्यैक्यं हरेरपि ॥ दीयमानं न गृह्णन्ति वैष्णवाः सेवनं विना॥४०॥ब्रह्मत्वममरत्वं वा तुच्छं मेने च वैष्णवः ॥ इन्द्रत्वं वा कुबेरत्वं न मेने गणनासु च ॥ ४१ ॥ कृष्णभक्तस्य ते किं वा देवानां विषये भ्रमे ॥ देहि राज्यं च देवानां मत्प्रीतिं कुरु भूमिप ॥ ४२ ॥ सुखं स्वराज्ये त्वं तिष्ठ देवास्सन्तु स्वके पदे ॥ अलं भ्रातृविरोधेन सर्वे कश्यपवंशजाः ॥ ४३ ॥ यानि कानि च पापानि ब्रह्महत्यादिकानि च ॥ ज्ञातिद्रोहस्य पापस्य कलां नार्हन्ति षोडशीम् ॥ ४४ ॥ स्वसम्पदां च हानिं च यदि राजेन्द्र मन्यसे ॥ सर्वावस्थासु समता केषां याति च सर्वदा॥४५॥ब्रह्मणश्च तिरोभावो लये प्राकृतिके सति ॥ आविर्भावः पुनस्तस्य प्रभवेदीश्वरेच्छया॥ ॥ ४६ ॥ ज्ञानं बुद्धिश्च तपसा स्मृतिर्लोकस्य निश्चितम् ॥ करोति सृष्टिं ज्ञानेन स्रष्टा सोऽपि क्रमेण च ॥४७॥ परिपूर्णतमो धर्मः सत्ये सत्याश्रयः सदा ॥ सोऽपि त्रिभागस्त्रेतायां द्विभागो द्वापरे स्मृतः ॥ ४८ ॥ एकभागः कलेः पूर्वं तद्ध्रासश्च क्रमेण च ॥ कलामात्रं कलेः शेषे कुह्वां चन्द्रकला यथा ॥ ४९ ॥ यादृक्तेजो रवेर्ग्रीष्मे न तादृक्शिशिरे पुनः ॥ दिने च यादृङ् मध्याह्ने सायंप्रातर्न तत्समम् ॥ ५० ॥ उदयं याति कालेन बालयतां च क्रमेण च ॥ प्रकाण्डतां च तत्पश्चात्कालेऽस्तं पुनरेव सः ॥ ५१ ॥ दिने प्रच्छन्नतां याति काले वै दुर्दिने घने ॥ राहुग्रस्ते कम्पितश्च पुनरेव प्रसन्नताम् ॥ ५२ ॥ परिपूर्णतमश्चन्द्रः पूर्णिमायां च यादृशः॥ तादृशो न भवेन्नित्यं क्षयं याति दिने दिने ॥५३॥ पुनः स पुष्टतां याति परकुह्वा दिने दिने ॥ सम्पद्युक्तः शुक्लपक्षे कृष्णे म्लानश्च यक्ष्मणा ॥ ५४ ॥ राहुग्रस्ते दिने म्लानो दुर्दिने निबिडे घने ॥ काले चन्द्रो भवेच्छुद्धो भ्रष्टश्रीः कालभेदके ॥ ५५ ॥ भविष्यति बलिश्चेन्द्रो भ्रष्टश्रीः सुतलेऽधुना ॥ कालेन पृथ्वी सस्याढ्या सर्वाधारा वसुन्धरा ॥ ५६ ॥ काले जले निमग्ना सा तिरोभूता विप

द्रुता ॥ काले नश्यन्ति विश्वानि प्रभवन्त्येव कालतः ॥ ५७ ॥ चराचराश्च कालेन नश्यन्ति प्रभवन्ति च ॥ ईश्वरस्यैव समता
कृष्णस्य परमात्मनः ॥ ५८ ॥ अहं मृत्युञ्जयो यस्मादसंख्यं प्राकृतं लयम् ॥ अदृश्यं चापि पश्यामि वारं वारं पुनः पुनः ॥
॥ ५९ ॥ स च प्रकृतिरूपश्च स एव पुरुषः स्मृतः ॥ स चात्मा सर्वजीवश्च नानारूपधरः परः ॥ ६० ॥ करोति सततं यो हि
तन्नामगुणकीर्त्तनम् ॥ कालं मृत्युं स जयति जन्म रोगं जरां भयम् ॥ ६१ ॥ स्रष्टा कृतो विधिस्तेन पाता विष्णुः कृतो भवे ॥
अहं कृतश्च संहर्त्ता वयं विषयिणो यतः ॥६२॥ कालाग्निरुद्रं संहारे नियुज्य विषये नृप ॥ अहं करोमि सततं तन्नामगुणकीर्त्तनम् ॥
॥ ६३ ॥ तेन मृत्युञ्जयोऽहं च ज्ञानेनानेन निर्भयः ॥ मृत्युर्मत्तो भयाद्याति वैनतेयादिवोरगः ॥ ६४ ॥ इत्युक्त्वा स च सर्वेशः
सर्वज्ञः सर्वभावनः ॥ विररामाथ शर्वश्च सभामध्ये च नारद ॥ ६५ ॥ राजा तद्वचनं श्रुत्वा प्रशशंस पुनः पुनः ॥ उवाच सुंदरं
देवं परं विनयपूर्वकम् ॥ ६६ ॥ शंखचूड उवाच ॥ त्वया यत्कथितं नाथ सर्वं सत्यं च नानृतम् ॥ तथाऽपि किञ्चिद्यत्सत्यं श्रूयतां
मन्निवेदनम् ॥ ६७ ॥ ज्ञातिद्रोहे महत्पापं त्वयोक्तमधुना त्रयम् ॥ गृहीत्वा तस्य सर्वस्वं कुतः प्रस्थापितो बलिः ॥ ६८ ॥ मया
समुद्धृतं सर्वमैश्वर्य्यं विक्रमेण च ॥ सुतलाच्च समुद्धर्त्तुं नालं सोऽपि गदाधरः ॥६९ ॥ सभ्रातृको हिरण्याक्षः कथं देवैश्च हिंसितः ॥
शुम्भादयश्चासुरा वै कथं देवैर्निपातिताः ॥ ७० ॥ पुरा समुद्रमथने पीयूषं भक्षितं सुरैः ॥ क्लेशभाजो वयं तत्र तैः सर्वफलभाजनैः ॥
॥ ७१ ॥ क्रीडाभाण्डमिदं विश्वं कृष्णस्य परमात्मनः ॥ यदा ददाति यस्मै स तस्यैश्वर्यं भवेत्तदा ॥ ७२ ॥ देवदानवयोर्वादः
शश्वन्नैमित्तिकः सदा ॥ पराजयो जयस्तेषां कालेऽस्माकं क्रमेण च ॥ ७३ ॥ तत्रावयोर्विरोधे च गमनं निष्फलं तव ॥ सम
सम्बन्धिनोर्बन्ध्वोरीश्वरस्य महात्मनः ॥ ७४ ॥ जायते महती लज्जा स्पर्द्धाऽस्माभिः सहाधुना ॥ ततोऽधिका च समरे कीर्त्ति
हानिः पराजये ॥ ७५ ॥ शंखचूडवचः श्रुत्वा प्रहस्याह त्रिलोचनः ॥ यथोचितं सुमधुरमत्युग्रं दानवेश्वरम् ॥ ७६ ॥
श्रीमहादेव उवाच ॥ युष्माभिः सह युद्धं मे ब्रह्मवंशसमुद्भवैः ॥ का लज्जा महती राजन्नकीर्त्तिर्वा पराजये ॥ ७७ ॥ युद्धमादौ

हरेरेव मधुना कैटभेन च ॥ हिरण्यकशिपोश्चैव सह तेनात्मना नृप ॥ ७८ ॥ हिरण्याक्षस्य युद्धं च पुनस्तेन गदाभृता ॥
त्रिपुरैः सह युद्धं च मया चापि पुरा कृतम् ॥ ७९ ॥ सर्वेश्वर्य्याः सर्वमातुः प्रकृत्याश्च बभूव ह ॥ सह शुम्भादिभिः पूर्वं
समरं परमाद्भुतम् ॥ ८० ॥ पार्षदप्रवरस्त्वं च कृष्णस्य परमात्मनः ॥ ये ये हताश्च ते दैत्या नहि केऽपि त्वया समाः॥ ८१ ॥
का लज्जा महती राजन्मम युद्धे त्वया सह ॥ सुराणां शरणस्यैव प्रेषितस्य हरेरहो ॥ ८२ ॥ देहि राज्यं च देवानां वाग्व्ययें किं
प्रयोजनम् ॥ युद्धं मा कुरु मत्सार्द्धमिति मे निश्चितं वचः ॥ ८३ ॥ इत्युक्त्वा शंकरस्तत्र विरराम च नारद ॥ उत्तस्थौ शंखचूडश्च
स्वामात्यैः सह सत्वरः ॥ ८४ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे नारदनारायणसंवादे द्वितीये प्रकृतिखण्डे तुलस्युपाख्याने शिव
शंखचूडसंवादेऽष्टादशोऽध्यायः ॥ १८ ॥ नारायण उवाच ॥ शिवं प्रणम्य शिरसा दानवेन्द्रः प्रतापवान् ॥ समारुरोह यानं च
स्वामात्यैः सह सत्वरः ॥ १ ॥ बभूवुस्ते च संक्षुब्धाः स्कन्दशक्त्याऽर्दितास्तदा ॥ नेदुर्दुन्दुभयः स्वर्गे पुष्पवृष्टिर्बभूव ह ॥ २ ॥
स्कन्दस्योपरि तत्रैव समरे च भयङ्करे ॥ स्कन्दस्य समरं दृष्ट्वा महदद्भुतमुल्बणम् ॥ ३ ॥ दानवानां क्षयकरं यथा प्राकृतिकं
लयम् ॥ राजा विमानमारुह्य शरवर्षं चकार ह ॥ ४ ॥ नृपस्य शरवृष्टिश्च घनवृष्टिर्यथा तथा ॥ महान्घोरान्धकारश्च
वह्न्युत्थानं बभूव ह ॥ ५ ॥ देवाः प्रदुद्रुवुश्चान्ये सर्वे नन्दीश्वरादयः ॥ एकाकी कार्त्तिकेयस्तु तस्थौ समरमूर्द्धनि ॥ ६ ॥
पर्वतानां च सर्पाणां शिलानां शाखिनां तथा ॥ शश्वच्चकार वृष्टिं च दुर्वार्ह्यां च भयङ्करीम् ॥ ७ ॥ नृपस्य शरवृष्ट्या
च प्रच्छन्नः शिवनन्दनः ॥ नीरदेन च सान्द्रेण संच्छन्नो भास्करो यथा ॥ ८ ॥ धनुस्स्कन्दस्य चिच्छेद दुर्वहं च भयङ्करम् ॥ बभञ्ज च
रथं दिव्यं चिच्छेद रथघोटकान् ॥ ९ ॥ मयूरं जर्जरीभूतं दिव्यास्त्रेण चकार सः ॥ शक्तिं चिक्षेप सूर्य्याभां तस्य वक्षोवि
भेदिनीम् ॥ १० ॥ क्षणं मूर्छां च संप्राप्य चेतनामुपलभ्य सः ॥ गृहीत्वाऽन्यद्धनुर्दिव्यं यद्दत्तं विष्णुना पुरा ॥ ११ ॥
रत्नेन्द्रसारखचितं यानमारुह्य चाग्निभूः ॥ शस्त्रमस्त्रं गृहीत्वा च चकार रणमुल्बणम् ॥ १२ ॥ सर्पांश्च पर्वतांश्चैव वृक्षांश्च

---

१ अलं कलहकारणमिति पाठः। २ वाग्व्ययेति पाठः।

प्रस्तरांस्तथा ॥ सर्वांश्चिच्छेद कोपेन दिव्यास्त्रेण शिवात्मजः ॥ १३ ॥ आग्नेयं वारुणास्त्रेण वारयामास वै गुहः ॥ रथं धनुश्च चिच्छेद शंखचूडस्य लीलया ॥ १४ ॥ सवाहं सारथिं चैव किरीटं मुकुटोज्ज्वलम् ॥ चिक्षेप शक्तिमुल्काभां दानवेन्द्रस्य वक्षसि ॥ १५ ॥ मूर्च्छां संप्राप्य राजोपलभ्य वै चेतनां पुनः ॥ आरुह्य वै यानमन्यं धनुर्जग्राह सत्वरः ॥ १६ ॥ चकार शरजालं च मायया मायिनां वरः ॥ गुहं चाच्छाद्य समरे शरजालेन नारद ॥ १७ ॥ जग्राह शक्तिमव्यर्थां शतसूर्य्यसमप्रभाम् ॥ प्रलयाग्निशिखारूपां विष्णोर्वै तेजसा वृताम् ॥ १८ ॥ चिक्षेप तां च कोपेन महावेगेन कार्त्तिके ॥ पपात शक्तिस्तद्गात्रे वह्निराशिरिवोज्ज्वला ॥ १९ ॥ मूर्च्छां संप्राप शक्त्या च कार्त्तिकेयो महाबलः ॥ काली गृहीत्वा तं क्रोडे निनाय शिवसन्निधौ ॥ २० ॥ शिवस्तं दर्शनादेव जीवयामास लीलया ॥ ददौ बलमनन्तं च स चोत्तस्थौ प्रतापवान् ॥ २१ ॥ शिवः स्वसैन्यं देवांश्च प्रेरयामास सत्वरः ॥ दानवेन्द्रैः ससैन्यैश्च युद्धारम्भो बभूव ह ॥ २२ ॥ स्वयं महेन्द्रो युयुधे सार्द्धं च वृषपर्वणा ॥ भास्करो युयुधे विप्रचित्तिना सह सत्वरः ॥ २३ ॥ दम्भेन सह चन्द्रश्च चकार समरं परम् ॥ कालेश्वरेण कालश्च गोकर्णेन हुताशनः ॥ २४ ॥ कुबेरः कालकेयेन विश्वकर्मा मयेन च ॥ भयङ्करेण मृत्युश्च संहारेण यमस्तथा ॥ २५ ॥ कलविङ्केन वरुणश्चञ्चलेन समीरणः ॥ बुधश्च धृतपुष्टेन रक्ताक्षेण शनैश्चरः ॥ २६ ॥ जयन्तो रत्नसारेण वसवो वर्चसां गणैः ॥ अश्विनौ वै दीप्तिमता धूम्रेण नलकूबरः ॥ २७ ॥ धनुर्द्धरेण धर्मश्च मण्डूकाक्षेण मङ्गलः ॥ शोभाकरेणैवेशानः पिठरेण च मन्मथः ॥२८॥ उल्कामुखेन धूम्रेण खड्गेनापि ध्वजेन च ॥ कांचीमुखेन पिण्डेन धूम्रेण सह नन्दिना ॥ २९ ॥ विश्वेन च पलाशेन चादित्या युयुधुः परम् ॥ एकादश महारुद्राश्चैकादश भयङ्करैः ॥ ३० ॥ महामारी च युयुधे चोग्रदण्डादिभिः सह ॥ नन्दीश्वरादयः सर्वे दानवानां गणैः सह ॥ ३१ ॥ युयुधुश्च महद्युद्धे प्रलये च भयङ्करे ॥ वटमूले च शम्भुश्च तस्थौ काल्या सुतेन च ॥ ३२ ॥ सर्वे च युयुधुः सैन्यसमूहाः सततं मुने ॥ रत्नसिंहासने रम्ये कोटिभिर्दानवैः सह ॥ ३३ ॥ उवास शंखचूडश्च रत्नभूषणभूषितः ॥ शङ्करस्य च योधाश्च युद्धे सर्वे पराजिताः ॥ ३४ ॥ देवाश्च

दुद्रुवुः सर्वे भीताश्च क्षतविक्षताः ॥ चकार कोपं स्कन्दश्च देवेभ्यश्चाभयं ददौ ॥ ३५ ॥ बलं च स्वगणानां वै वर्द्धयामास तेजसा॥ स्वयमेकश्च युयुधे दानवानां गणैः सह ॥ ३६ ॥ अक्षौहिणीनां शतकं समरे स जघान ह ॥ खर्परं पातयामास काली कमललोचना ॥ ३७ ॥ पपौ रक्तं दानवानां क्रुद्धा सा शतखर्परम् ॥ दशलक्षं गजेन्द्राणां शतलक्षं च वाजिनाम् ॥ ३८ ॥ समादायैकहस्तेन मुखे चिक्षेप लीलया ॥ कबन्धानां सहस्रं च ननर्त्त समरे मुने ॥ ३९ ॥ स्कन्दस्य शरजालेन दानवाः क्षतविक्षताः ॥ भीताश्च दुद्रुवुः सर्वे महाबलपराक्रमाः ॥ ४० ॥ वृषपर्वा विप्रचित्तिर्दम्भश्चापि विकङ्कनः ॥ स्कन्देन सार्द्धं युयुधुस्ते च सर्वेक्रमेण च॥४१॥ काली जगाम समरमरक्षत्कार्त्तिकं शिवः ॥ वीरास्तामनुजग्मुश्च ते च नन्दीश्वरादयः ॥ ४२ ॥ सर्वे देवाश्च गन्धर्वा यक्षराक्षसकिन्नराः ॥ राज्यभाण्डाश्च बहुशः शतकोटिर्बलाहकाः ॥ ४३ ॥ सा च गत्वा च संग्रामं सिंहनादं चकार ह ॥ देव्या वै सिंहनादेन प्रापुर्मूर्च्छां च दानवाः ॥ ४४ ॥ अट्टाट्टहासमशिवं चकार च पुनः पुनः ॥ हृष्टा पपौ च माध्वीकं ननर्त्त रणमूर्द्धनि ॥ ४५ ॥ उग्रदंष्ट्रा चोग्रचण्डा कौट्टरी च पपौ मधु ॥ योगिनीनां डाकिनीनां गणाः सुरगणादयः ॥ ४६ ॥ हृष्ट्वा कालीं शङ्खचूडः शीघ्रमाजिं समाययौ ॥ दानवाश्च भयं प्रापू राजा तेभ्योऽभयं ददौ ॥ ४७ ॥ काली चिक्षेप चाग्नेयं प्रलयाग्निशिखोपमम् ॥ राजा निर्वापयामास वारुणेन स लीलया ॥ ४८ ॥ चिक्षेप वारुणं सा च तत्तीव्रं महदद्भुतम् ॥ गान्धर्वेण च चिच्छेद दानवेन्द्रश्च लीलया ॥ ४९ ॥ माहेश्वरं प्रचिक्षेप काली वह्निशिखोपमम् ॥ राजा जघान तच्छीघ्रं वैष्णवेन च लीलया ॥ ५० ॥ नारायणास्त्रं सा देवी चिक्षिपे मन्त्रपूर्वकम् ॥ राजा ननाम तं हृष्ट्वा चावरुह्य रथादहो ॥५१॥ ऊर्ध्वं जगाम तच्छस्त्रं प्रलयाग्निशिखोपमम् ॥ पपात शङ्खचूडश्च भक्त्या वै दण्डवद्भुवि ॥ ब्रह्मास्त्रं सा च चिक्षेप यत्नतो मन्त्रपूर्वकम् ॥ ५२ ॥ ब्रह्मास्त्रेण महाराज निर्वाणं च चकार ह ॥ चिक्षेपातीव दिव्यास्त्रं सा देवी मन्त्रपूर्वकम् ॥ ५३ ॥ राजा दिव्यास्त्रजालेन निर्वाणं च चकार ह ॥ देवी चिक्षेप शक्तिं च यत्नतो योजनायताम् ॥ ५४ ॥ राजा तीक्ष्णास्त्रजालेन शतखण्डं चकार ह ॥ जग्राह मन्त्रपूर्वं च देवी पाशुपतं रुषा ॥ ५५ ॥

निक्षेप्तुं सा निषिद्धा च वाग्बभूवाशरीरिणी ॥ मृत्युः पाशुपते नास्ति नृपस्य च महात्मनः ॥ ५६ ॥ यावदस्त्येव कण्ठेऽस्य कवचं हि हरेरिति ॥ यावत्सतीत्वमस्तीह सत्याश्च नृपयोषितः ॥ ५७ ॥ तावदस्य जरा मृत्युर्नास्तीति ब्रह्मणो वरः ॥ इत्याकर्ण्य महाकाली न तच्चिक्षेप सा सती॥५८॥शतलक्षं दानवानामग्रहील्लीलया[1] क्रुधा ॥ अत्तुं जगाम वेगेन शंखचूडं भयंकरी॥५९॥ दिव्यास्त्रेण सुतीक्ष्णेन वारयामास दानवः ॥ खड्गं चिक्षेप सा देवी ग्रीष्मसूर्योपमं परम् ॥६०॥ दिव्यास्त्रैर्दानवेन्द्रोऽयं शतखण्डं चकार सः ॥ पुनरत्तुं महादेवी वेगेन च जगाम तम् ॥ ६१ ॥ सर्वसिद्धेश्वरः श्रीमान्ववृधे दानवेश्वरः ॥ निवारयामास च तां सर्वसिद्धेश्वरो वरः ॥ वेगेन मुष्टिना काली कोपयुक्ता भयंकरी ॥६२॥ बभञ्जाथ रथं तस्य चाहनत्सारथिं सती ॥ सा च शूलं च चिक्षेप प्रलयाग्निशिखोपमम् ॥ ६३ ॥ वामहस्तेन जग्राह शंखचूडश्च लीलया ॥ मुष्ट्या जघान तं देवी महाकोपेन वेगतः ॥ ६४ ॥ बभ्राम व्यथया दैत्यः क्षणं मूर्च्छामवाप ह ॥ क्षणेन चेतनां प्राप्य समुत्तस्थौ प्रतापवान् ॥ ६५ ॥ न चक्रे बाहुयुद्धं स देव्या सह ननाम ताम् ॥ देव्याश्चास्त्रं च चिच्छेद चाग्रहीत्स्वेन तेजसा ॥ ६६ ॥ नास्त्रं चिक्षेप तां भक्त्या मातृबुद्ध्या च वैष्णवः ॥ ६७ ॥ गृहीत्वा दानवं देवी भ्रामयित्वा पुनः पुनः ॥ ऊर्ध्वं च प्रेरयामास महावेगेन कोपतः ॥ ६८ ॥ ऊर्ध्वात्पपात वेगेन शंखचूडः प्रतापवान् ॥ निपत्य च समुत्तस्थौ स नत्वा भद्रकालिकाम् ॥६९॥ रत्नेन्द्रसारखचितं विमानाग्र्यं मनोहरम् ॥ आरुरोह रथं हृष्टो न विश्रान्तो महारणे ॥ ॥ ७० ॥ क्षतजं दानवानां च मांसं च विपुलं क्षुधा ॥ पीत्वा भुक्त्वा भद्रकाली ययौ सा शंकरान्तिकम् ॥ ७१ ॥ उवाच रणवृत्तान्तं पौर्वापर्य्यं यथाक्रमम् ॥ श्रुत्वा जहास शम्भुश्च दानवानां विनाशनम् ॥७२॥ लक्षं च दानवेन्द्राणामवशिष्टं रणेऽधुना ॥ उद्वृत्तं भूभृता सार्द्धं तदन्यं भुक्तमीश्वर ॥७३॥ संग्रामे दानवेन्द्रं च हन्तुं पाशुपतेन वै ॥ अवध्यस्तव राजेति वाग्बभूवाशरीरिणी ॥ ॥ ७४ ॥ राजेन्द्रश्च महाज्ञानी महाबलपराक्रमः ॥ न च चिक्षेप मय्यस्त्रं चिच्छेद मम सायकम् ॥ ७५ ॥ इति श्री ब्रह्मवैवर्ते

---

[1] अग्रसल्लीलया क्षुधेति पाठः ।

महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे तुलस्युपाख्याने कालीशंखचूडयुद्ध एकोनविंशोऽध्यायः ॥ १९ ॥ नारायण
उवाच ॥ शिवस्तत्त्वं समाकर्ण्य तत्त्वज्ञानविशारदः ॥ ययौ स्वयं च समरं स्वगणैः सह नारद ॥ १ ॥ शंखचूडः शिवं दृष्ट्वा विम
नादवरुह्य च ॥ ननाम परया भक्त्या दण्डवत्पतितो भुवि ॥ २ ॥ तं प्रणम्य च वेगेन विमानं ह्यारुरोह सः ॥ तूर्णं चकार सन्नाहं
धनुर्जग्राह दुर्वहम् ॥ ३ ॥ शिवदानवयोर्युद्धं पूर्णमब्दं बभूव ह ॥ न वै बभूवतुर्ब्रह्मंस्तयोर्जयपराजयौ ॥ ४ ॥ न्यस्तशस्त्रश्च भगवा
न्यस्तशस्त्रश्च दानवः ॥ रथस्थः शंखचूडश्च वृषस्थो वृषभध्वजः ॥ ५ ॥ दानवानां च शतकमुद्वृत्तं च बभूव ह ॥ रणे ये
मृताः शंभोर्जीवयामास तान्विभुः ॥ ६ ॥ ततो विष्णुर्महामायो वृद्धब्राह्मणरूपधृक् ॥ आगत्य च रणस्थानमवोचद्दानवेश्वरम् ॥ ७ ॥
वृद्धब्राह्मण उवाच ॥ देहि भिक्षां च राजेन्द्र मह्यं विप्राय साम्प्रतम् ॥ त्वं सर्वसम्पदां दाता यन्मे मनसि वाञ्छितम् ॥ ८ ॥ निरा
हाराय वृद्धाय तृषितायातुराय च ॥ पश्चात्त्वां कथयिष्यामि पुरः सत्यं च कुर्विति ॥ ९ ॥ ओमित्युवाच राजेन्द्रः प्रसन्नवदनेक्षणः ॥
कवचार्थी जनश्चाहमित्युवाच स मायया ॥ १० ॥ तच्छ्रुत्वा दानवश्रेष्ठो ददौ कवचमुत्तमम् ॥ गृहीत्वा कवचं दिव्यं जगाम हरिरेव
च ॥ ११ ॥ शङ्खचूडस्य रूपेण जगाम तुलसीं प्रति ॥ गत्वा तस्यां मायया च वीर्य्याधानं चकार ह ॥ १२ ॥ अथ शम्भुर्हरेः
शूलं दानवार्थं समग्रहीत ॥ ग्रीष्ममध्याह्नमार्त्तण्डशतकप्रभमुज्ज्वलम् ॥ १३ ॥ नारायणाधिष्ठिताग्रं ब्रह्माधिष्ठितमध्यमम् ॥ शिवा
धिष्ठितमूलं च कालाधिष्ठितधारकम् ॥ १४ ॥ किरणावलिसंयुक्तं प्रलयाग्निशिखोपमम् ॥ दुर्निवार्य्यं च दुर्धर्षमव्यर्थं वैरिघातकम् ॥
॥ १५ ॥ तेजसा चक्रतुल्यं च सर्वशस्त्रादिघातकम् ॥ शिवकेशवयोरन्यद् दुर्वहं च भयंकरम् ॥ १६ ॥ धनुस्सहस्रं दैर्घ्येण विस्तृत्या
शतहस्तकम् ॥ सजीवं ब्रह्मरूपं च नित्यरूपमनिर्मितम् ॥ १७ ॥ संहर्त्तुं सर्वविध्यण्डमेकदा दैवलीलया ॥ चिक्षेप घूर्णनं कृत्वा
शंखचूडे च नारद ॥ १८ ॥ राजा चापं परित्यज्य श्रीकृष्णचरणाम्बुजम् ॥ ध्यानं चकार भक्त्या च कृत्वा योगासनं धिया ॥
॥ १९ ॥ शूलं च भ्रमणं कृत्वा न्यपतद्दानवोपरि ॥ चकार भस्मसात्तं च सरथं चैव लीलया ॥ २० ॥ राजा धृत्वा दिव्यरूपं बालकं

गोपवेषकम् ॥ द्विभुजं मुरलीहस्तं रत्नभूषणभूषितम् ॥२१॥ नानारत्नसुभूषाढ्यगोपकोटिभिरावृतम् ॥ गोलोकादागतं यानमारुह्य
तत्पुरं ययौ॥२२॥गत्वा ननाम शिरसा राधामाधवयोर्मुने ॥ भक्त्या तच्चरणाम्भोजं रासे वृन्दावने मुने॥सुदामानं तौ च दृष्ट्वा प्रसन्न
वदनेक्षणौ ॥ २३ ॥ तदा च चक्रतुः क्रोडे स्नेहेन परिसंप्लुतौ ॥ अथ शूलश्च वेगेन प्रययौ शूलिनः करम् ॥ २४ ॥ शङ्करस्तेन
शूलेन दानवस्यास्थिजालकम् ॥ २५ ॥ प्रेम्णा च प्रेरयामास लवणोदे च सागरे ॥ अस्थिभिः शंखचूडस्य शंखजातिर्बभूव ह ॥
॥ २६ ॥ नानाप्रकाररूपा च श्रेष्ठा पूता सुरार्चने ॥ प्रशस्तं शंखतोयं च देवानां प्रीतिदं परम् ॥ २७॥ तीर्थतोयस्वरूपं
च पवित्रं शंकरं विना ॥ शंखशब्दो भवेद्यत्र तत्र लक्ष्मीश्च सुस्थिरा ॥ २८ ॥ स स्नातः सर्वतीर्थेषु यः स्नातः शंखवारिणा ॥
शंखं हरेरधिष्ठानं यत्र शंखस्ततो हरिः ॥ २९ ॥ तत्रैव सततं लक्ष्मीर्दूरीभूतममङ्गलम् ॥ स्त्रीणां च शंखध्वनिभिः शू
द्राणां च विशेषतः ॥ भीता रुष्टा याति लक्ष्मीः स्थलमन्यं स्थलात्ततः ॥३०॥ शिवश्च दानवं हत्वा शिवलोकं जगाम सः॥प्रहृष्टो
वृषमारुह्य स्वगणैश्च समावृतः ॥ ३१ ॥ सुराः स्वविषयं प्रापुः परमानन्दसंयुताः ॥ नेदुर्दुन्दुभयः स्वर्गे जगुर्गन्धर्वकिन्नराः ॥
॥ ३२ ॥ बभूव पुष्पवृष्टिश्च शिवस्योपरि सन्ततम् ॥ प्रशशंसुः सुरास्तं च मुनीन्द्रप्रवरादयः ॥ ३३ ॥ इति श्रीब्रह्मवैवर्त्ते महापु
राणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे तुलस्युपाख्याने शंखचूडवधे शंखप्रस्तावो नाम विंशोऽध्यायः ॥ २० ॥ नारद
उवाच ॥ नारायणश्च भगवान्वीर्य्याधानं चकार ह ॥ तुलस्यां केन रूपेण तन्मे व्याख्यातुमर्हसि ॥१॥ नारायण उवाच ॥ नाराय
णश्च भगवान्देवानां साधनेन च ॥ शंखचूडस्य रूपेण रेमे तद्रामया सह ॥२॥ शंखचूडस्य कवचं गृहीत्वा मायया हरिः ॥ पुनर्वि
धाय तद्रूपं जगाम तुलसीगृहम् ॥ ३ ॥ दुन्दुभिं वादयामास तुलसीद्वारसन्निधौ ॥ जयशब्दरवद्वारा बोधयामास सुन्दरीम् ॥ ४ ॥
तच्छ्रुत्वा सा च साध्वी च परमानन्दसंयुता ॥ राजमार्गगवाक्षेण ददर्श परमादरात् ॥ ५ ॥ब्राह्मणेभ्यो धनं दत्त्वा कारयामास मङ्ग
लम् ॥ बन्दिभ्यो भिक्षुकेभ्यश्च वाचिकेभ्यो धनं ददौ ॥ ६ ॥ अवरुह्य रथाद्देवो देव्याश्च भवनं ययौ ॥ अमूल्यरत्नसंक्लृप्तं सुन्दरं

सुमनोहरम् ॥ ७ ॥ दृष्ट्वा च पुरतः कान्तं शान्तं कान्ता मुदाऽन्विता ॥ तत्पादं क्षालयामास ननाम च रुरोद च ॥ ८ ॥ रत्नसिंहा
सने रम्ये वासयामास कामुकी ॥ ताम्बूलं च ददौ तस्मै कर्पूरादिसुवासितम् ॥ ९ ॥ अद्य मे सफलं जन्म ह्यद्य मे सफलाः
क्रियाः ॥ रणागतं च प्राणेशं पश्यन्त्याश्च पुनर्गृहे॥ १० ॥सस्मिता सकटाक्षं च स कामा पुलकाञ्चिता ॥ पप्रच्छ रणवृत्तान्तं कान्तं
मधुरया गिरा ॥ ११ ॥ तुलस्युवाच ॥ असंख्यविश्वसंहर्त्रा सार्द्धमाजौ तव प्रभो ॥ कथं बभूव विजयस्तन्मे ब्रूहि कृपानिधे ॥१२॥
तुलसीवचनं श्रुत्वा प्रहस्य कमलापतिः ॥ शंखचूडस्य रूपेण तामुवाचानृतं वचः ॥ १३ ॥ श्रीहरिरुवाच ॥ आवयोः समरं कान्ते
पूर्णमब्दं बभूव ह ॥ नाशो बभूव सर्वेषां दानवानां च कामिनि ॥ १४ ॥ प्रीतिं च कारयामास ब्रह्मा च स्वयमावयोः ॥ देवानाम
धिकारश्च प्रदत्तो ब्रह्मणा पुरा ॥ १५ ॥ मयाऽऽगतं स्वभवनं शिवलोकं शिवो गतः ॥ इत्युक्त्वा जगतां नाथः शयनं च चकार ह
॥१६॥ रेमे रमापतिस्तत्र रामया सह नारद ॥ सा साध्वी सुखसम्भोगादाकर्षणव्यतिक्रमात् ॥ सर्वं वितर्कयामास कस्त्वमेवेत्युवाच
ह ॥ १७ ॥ तुलस्युवाच ॥ को वा त्वं वद मायेशो भुक्ताऽहं मायया त्वया॥ १८ ॥दूरीकृतं मत्सतीत्वमथवा त्वां शपामहे ॥ तुलसीवचनं
श्रुत्वा हरिः शापभयेन च ॥ १९ ॥ दधार लीलया ब्रह्मन्स्वां मूर्तिं सुमनोहराम् ॥ ददर्श पुरतो देवी देवदेवं सनातनम् ॥ नवीननीरद
श्यामं शरत्पङ्कजलोचनम् ॥ २० ॥ कोटिकन्दर्पलीलाभं रत्नभूषणभूषितम् ॥ ईषद्धास्यं प्रसन्नास्यं शोभितं पीतवाससा ॥ २१ ॥
तं दृष्ट्वा कामिनी कामान्मूर्छां संप्राप लीलया ॥ पुनश्च चेतनां प्राप्य पुनः सा तमुवाच ह ॥ २२ ॥ हे नाथ ते दया नास्ति पाषाण
सदृशस्य च ॥ छलेन धर्मभङ्गेन मम स्वामी त्वया हतः ॥ २३ ॥ पाषाणसदृशस्त्वं च दयाहीनो यतः प्रभो ॥ तस्मात्पाषाणरूप
स्त्वं भुवि देव भवाधुना ॥ २४ ॥ ये वदन्ति दयासिन्धुं त्वां ते भ्रान्ता न संशयः ॥ भक्तो विनाऽपराधेन परार्थे च कथं हतः ॥२५॥
दुर्वृत्तस्त्वं च सर्वज्ञो न जानासि परव्यथाम् ॥ अतस्त्वमेकजनुषि स्वमेव विस्मरिष्यसि ॥ २६ ॥ इत्युक्त्वा च महासाध्वी निपत्य
चरणे हरेः ॥ भृशं रुरोद शोकार्त्ता विललाप मुहुर्मुहुः ॥ २७ ॥ तस्याश्च करुणां दृष्ट्वा करुणामयसागरः ॥ नारायणस्तां बोधयितुमु

वाच कमलापतिः ॥ २८ ॥ श्रीभगवानुवाच ॥ तपस्त्वया कृतं साध्वि मदर्थे भारते चिरम् ॥ त्वदर्थे शङ्खचूडश्च चकार सुचिरं तपः ॥ २९ ॥ कृत्वा त्वां कामिनीं कामी विजहार च तत्फलात् ॥ अधुना दातुमुचितं तवैव तपसः फलम् ॥ ३० ॥ इदं शरीरं त्यक्त्वा च दिव्यं देहं विधाय च ॥ रासे मे रमया सार्द्धं त्वं रमासदृशी भव॥३१॥ इयं तनुर्नदीरूपा गण्डकीति च विश्रुता ॥ पूता सुपुण्यदा नृणां पुण्या भवतु भारते ॥ ३२ ॥ तव केशसमूहाश्च पुण्यवृक्षा भवन्त्विति ॥ तुलसीकेशसम्भूता तुलसीति च विश्रुता ॥ ३३ ॥ त्रिलोकेषु च पुष्पाणां पत्राणां देवपूजने ॥ प्रधानरूपा तुलसी भविष्यति वरानने ॥३४॥ स्वर्गे मर्त्ये च पाताले वैकुण्ठे मम सन्निधौ॥ भवन्तु तुलसीवृक्षा वराः पुष्पेषु सुन्दरि ॥ ३५ ॥ गोलोके विरजातीरे रासे वृन्दावने भुवि ॥ भाण्डीरे चम्पकवने रम्ये चन्दनकानने ॥ ३६ ॥ माधवीकेतकीकुन्दमल्लिकामालतीवने ॥ भवन्तु तरवस्तत्र पुष्पस्थानेषु पुण्यदाः ॥ ३७ ॥ तुलसीतरुमूले च पुण्यदेशे सुपुण्यदे ॥ अधिष्ठानं तु तीर्थानां सर्वेषां च भविष्यति ॥ ३८ ॥ तत्रैव सर्वदेवानां समधिष्ठानमेव च ॥ तुलसीपत्रपतनं प्रायो यत्र वरानने ॥ ३९ ॥ स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ॥ तुलसीपत्रतोयेन योऽभिषेकं समाचरेत् ॥४०॥ सुधाघटसहस्रेण सा तुष्टिर्न भवेद्धरेः ॥ या च तुष्टिर्भवेन्नृणां तुलसीपत्रदानतः ॥ ४१ ॥ गवामयुतदानेन यत्फलं लभते नरः ॥ तुलसीपत्रदानेन तत्फलं लभते सति ॥ ४२ ॥ तुलसीपत्रतोयं च मृत्युकाले च यो लभेत् ॥ स मुच्यते सर्वपापाद्विष्णुलोकं स गच्छति ॥ ४३ ॥ नित्यं यस्तुलसीतोयं भुङ्क्ते भक्त्या च यो नरः ॥ स एव जीवन्मुक्तश्च गंगास्नानफलं लभेत् ॥४४॥ नित्यं यस्तुलसीं दत्त्वा पूजयेन्मां च मानवः॥ लक्षाश्वमेधजं पुण्यं लभते नात्र संशयः ॥ ४५ ॥ तुलसीं स्वकरे धृत्वा देहे धृत्वा च मानवः ॥ प्राणांस्त्यजति तीर्थेषु विष्णुलोकं स गच्छति ॥ ४६ ॥ तुलसीकाष्ठनिर्माणमालां गृह्णाति यो नरः ॥ पदे पदेऽश्वमेधस्य लभते निश्चितं फलम् ॥ ४७ ॥ तुलसीं स्वकरे धृत्वा स्वीकारं यो न रक्षति ॥ स याति कालसूत्रं च यावच्चन्द्रदिवाकरौ ॥ ४८ ॥ करोति मिथ्याशपथं तुलस्या यो हि मानवः ॥ स याति कुम्भीपाकं च यावदिन्द्राश्चतुर्दश ॥ ४९ ॥ तुलसीतोयकणिकां मृत्युकाले च यो लभेत् ॥ रत्नयानं समारुह्य

वैकुण्ठं स प्रयाति च॥५०॥पूर्णिमायाममायां च द्वादश्यां रविसंक्रमे ॥ तैलाभ्यंगे चास्नाते च मध्याह्ने निशि सन्ध्ययोः ॥ ५१ ॥ आशौचेऽशुचिकाले वा रात्रिवासान्विते नराः ॥ तुलसीं ये च छिन्दन्ति ते छिन्दन्ति हरेः शिरः ॥ ५२ ॥ त्रिरात्रं तुलसीपत्रं शुद्धं पर्य्युषितं सति ॥ श्राद्धे व्रते वा दाने वा प्रतिष्ठायां सुरार्चने ॥ ५३ ॥ भूगतं तोयपतितं यद्दत्तं विष्णवे सति ॥ शुद्धं तु तुलसीपत्रं क्षालनादन्यकर्मणि ॥५४॥ वृक्षाधिष्ठात्री देवी या गोलोके च निरामये ॥ कृष्णेन सार्द्धं रहसि नित्यं क्रीडां करिष्यति॥५५॥ नद्यधिष्ठातृदेवी या भारते च सुपुण्यदा ॥ लवणोदस्य पत्नी च मदंशस्य भविष्यति ॥५६॥ त्वं च स्वयं महासाध्वी वैकुण्ठे मम सन्निधौ ॥ रमासमा च रासे च भविष्यसि न संशयः ॥ ५७ ॥ अहं च शैलरूपी च गण्डकीतीरसन्निधौ ॥ अधिष्ठानं करिष्यामि भारते तव शापतः ॥ ५८ ॥ वज्रकीटाश्च कृमयो वज्रदंष्ट्राश्च तत्र वै ॥ तच्छिलाकुहरे[1] चक्रं करिष्यन्ति मदीयकम् ॥५९॥ एकद्वारे चतुश्चक्रं वनमालाविभूषितम् ॥ नवीननीरदश्यामं लक्ष्मीनारायणाभिधम् ॥६०॥ एकद्वारे चतुश्चक्रं नवीननीरदोपमम्॥ लक्ष्मीजनार्दनं ज्ञेयं रहितं वनमालया ॥ ६१ ॥ द्वारद्वये चतुश्चक्रं गोष्पदेन समन्वितम् ॥ रघुनाथाभिधं ज्ञेयं रहितं वनमालया ॥ ॥ ६२ ॥ अतिक्षुद्रं द्विचक्रं च नवीनजलदप्रभम् ॥ दधिवामनाभिधं ज्ञेयं गृहिणां च सुखप्रदम् ॥ ६३ ॥ अतिक्षुद्रं द्विचक्रं च वनमालाविभूषितम् ॥ विज्ञेयं श्रीधरं देवं श्रीप्रदं गृहिणां सदा ॥ ६४ ॥ स्थूलं च वर्तुलाकारं रहितं वनमालया ॥ द्विचक्रं स्फुटमत्यन्तं ज्ञेयं दामोदराभिधम् ॥ ६५ ॥ मध्यमं वर्तुलाकारं द्विचक्रं बाणविक्षतम् ॥ रणरामाभिधं ज्ञेयं शरतूणसमन्वितम् ॥ ६६ ॥ मध्यमं सप्तचक्रं च छत्रतूणसमन्वितम् ॥ राजराजेश्वरं ज्ञेयं राजसम्पत्प्रदं नृणाम् ॥ ६७ ॥ द्विसप्तचक्रं स्थूलं च नवीनजलदप्रभम् ॥ अनन्ताख्यं च विज्ञेयं चतुर्वर्गफलप्रदम् ॥ ६८ ॥ चक्राकारं द्विचक्रं च सश्रीकं जलदप्रभम् ॥ सगोष्पदं मध्यमं च विज्ञेयं मधुसूदनम्॥६९॥ सुदर्शनं चैकचक्रं गुप्तचक्रं गदाधरम् ॥ द्विचक्रं हयवक्त्राभं हयग्रीवं प्रकीर्त्तितम्॥७०॥अतीव विस्तृतास्यं च द्विचक्रं विकटं

---

[1] तच्छिलासु हरेश्चक्रम् इति पाठः।

सति ॥ नरसिंहाभिधं ज्ञेयं सद्यो वैराग्यदं नृणाम् ॥ ७१ ॥ द्विचक्रं विस्तृतास्यं च वनमालासमन्वितम् ॥ लक्ष्मीनृसिंहं विज्ञेयं गृहिणां सुखदं सदा ॥ ७२ ॥ द्वारदेशे द्विचक्रं च सश्रीकं च समं स्फुटम् ॥ वासुदेवं च विज्ञेयं सर्वकामफलप्रदम् ॥ ७३ ॥ प्रद्युम्नं सूक्ष्मचक्रं च नवीननीरदप्रभम् ॥ सुषिरे च्छिद्रबहुलं गृहिणां च सुखप्रदम् ॥ ७४ ॥ द्वे चक्रे चैकलग्ने च पृष्ठे यत्र तु पुष्कलम् ॥ संकर्षणं तु विज्ञेयं सुखदं गृहिणां सदा ॥ ७५ ॥ अनिरुद्धं तु पीताभं वर्तुलं चातिशोभनम् ॥ सुखप्रदं गृहस्थानां प्रवदन्ति मनीषिणः ॥ ७६ ॥ शालग्रामशिला यत्र तत्र सन्निहितो हरिः ॥ तत्रैव लक्ष्मीर्वसति सर्वतीर्थसमन्विता ॥७७॥ यानि कानि च पापानि ब्रह्महत्यादिकानि च ॥ तानि सर्वाणि नश्यंति शालग्रामशिलार्चनात् ॥ ७८ ॥ छत्राकारे[1] भवेद्राज्यं वर्तुले च महाश्रियः ॥ दुःखं च शकटाकारे शूलाग्रे मरणं ध्रुवम् ॥ ७९ ॥ विकृतास्ये च दारिद्र्यं पिङ्गले हानिरेव च ॥ लग्नचक्रे भवेद्व्याधिर्विदीर्णे मरणं ध्रुवम् ॥ ८० ॥ व्रतं दानं प्रतिष्ठा च श्राद्धं च देवपूजनम् ॥ शालग्रामशिलायाश्चैवाधिष्ठानात्प्रशस्तकम् ॥ ८१ ॥ स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ॥ शालग्रामशिलातोयैर्योऽभिषेकं समाचरेत् ॥ ८२ ॥ सर्वदानेषु यत्पुण्यं प्रादक्षिण्ये भुवो यथा ॥ सर्वयज्ञेषु तीर्थेषु व्रतेष्वनशनेषु च ॥ ८३ ॥ तस्य स्पर्शं च वाञ्छन्ति तीर्थानि निखिलानि च ॥ जीवन्मुक्तो महापूतो भवेदेव न संशयः ॥८४॥ पाठे चतुर्णां वेदानां तपसां करणे सति ॥ तत्पुण्यं लभते नूनं शालग्रामशिलार्चनात् ॥ ८५ ॥ शालग्रामशिलातोयं नित्यं भुङ्क्ते च यो नरः ॥ सुरेप्सितं प्रसादं च जन्ममृत्युजराहरम् ॥८६॥ तस्य स्पर्शं च वाञ्छन्ति तीर्थानि निखिलानि च ॥ जीवन्मुक्तो महापूतोऽप्यन्ते याति हरेः पदम् ॥ ८७ ॥ तत्रैव हरिणा सार्द्धमसंख्यं प्राकृतं लयम् ॥ पश्यत्येव हि दास्ये च निर्मुक्तो[2] दास्यकर्मणि ॥ ८८ ॥ यानि कानि च पापानि ब्रह्महत्यादिकानि च ॥ तं च दृष्ट्वा भिया यान्ति वैनतेयमिवोरगाः ॥ ८९ ॥ तत्पादपद्मरजसा सद्यः पूता वसुन्धरा ॥ पुंसां लक्षं तत्पितृणां निस्तारस्तस्य जन्मनः ॥ ९० ॥ शालग्रामशिला

---

[1] छत्राकारमिति पाठः । [2] नियुक्तो इति पाठः ।

तोयं मृत्युकाले च यो लभेत् ॥ सर्वपापाद्विनिर्मुक्तो विष्णुलोकं स गच्छति ॥ ९१ ॥ निर्वाणमुक्तिं लभते कर्मभोगाद्विमुच्यते ॥ विष्णुपादे प्रलीनश्च भविष्यति न संशयः ॥९२॥ शालग्रामशिलां धृत्वा मिथ्यावादं वदेत्तु यः॥स याति कूर्मदंष्ट्रं च यावद्वै ब्रह्मणो वयः ॥ ९३ ॥ शालग्रामशिलां स्पृष्ट्वा स्वीकारं यो न पालयेत् ॥ स प्रयात्यसिपत्रं च लक्षमन्वन्तराधिकम् ॥ ९४ ॥ तुलसीपत्रविच्छेदं शालग्रामे करोति यः ॥ तस्य जन्मान्तरे काले स्त्रीविच्छेदो भविष्यति ॥ ९५ ॥ तुलसीपत्रविच्छेदं शंखे यो हि करोति च ॥ भार्य्याहीनो भवेत्सोऽपि रोगी च सप्तजन्मसु ॥ ९६ ॥ शालग्रामं च तुलसीं शंखमेकत्र एव च ॥ यो रक्षति महाज्ञानी स भवेच्छ्रीहरिप्रियः ॥ ९७ ॥ सकृदेव हि यो यस्यां वीर्य्याधानं करोति यः ॥ तद्विच्छेदे तस्य दुःखं भवेदेव परस्परम् ॥ ९८ ॥ त्वं प्रिया शंखचूडस्य चैकमन्वन्तरावधि ॥ शंखेन सार्द्धं त्वद्भेदः केवलं दुःखदस्तव ॥९९॥ इत्युक्त्वा श्रीहरिस्तां च विरराम च सादरम् ॥ स च देहं परित्यज्य दिव्यरूपं दधार ह ॥ १०० ॥ यथा श्रीश्च तथा सा चाप्युवास हरिवक्षसि ॥ प्रजगाम तया सार्द्धं वैकुण्ठं कमलापतिः ॥ १०१ ॥ लक्ष्मीः सरस्वती गङ्गा तुलसी चापि नारद ॥ हरेः प्रियाश्चतस्रश्च बभूवुरीश्वरस्य च ॥ १०२ ॥ सद्यस्तद्देहजाता च बभूव गण्डकी नदी ॥ हरेरंशेन शैलश्च तत्तीरे पुण्यदो नृणाम् ॥ १०३ ॥ कुर्वन्ति तत्र कीटाश्च शिलां बहुविधां मुने ॥ जले पतन्ति या याश्च जलदाभाश्च निश्चितम् ॥ १०४ ॥ स्थलस्थाः पिङ्गला ज्ञेयाश्चोपतापाद्धरेरिति ॥ इत्येवं कथितं सर्वं किं भूयः श्रोतुमिच्छसि ॥ १०५ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे द्वितीये प्रकृतिखण्डे नारायणनारदसंवादे तुलस्युपाख्यान एकविंशोऽध्यायः ॥ २१ ॥

नारद उवाच ॥ तुलसी च जगत्पूज्या पूता नारायणप्रिया ॥ तस्याः पूजाविधानं च स्तोत्रं किं न श्रुतं मया॥ ॥ १ ॥ केन पूज्या स्तुता केन पुरा प्रथमतो मुने ॥ तव पूज्या सा बभूव केन वा वद मामहो ॥ २ ॥ सूत उवाच ॥ नारदस्य वचः श्रुत्वा प्रहस्य गरुडध्वजः ॥ कथां कथितुमारेभे पुण्यरूपां पुरातनीम् ॥३॥ नारायण उवाच ॥ हरिः संप्राप्य तुलसीं रेमे च रमया

सह ॥ रमासमां तां सौभाग्यां चकार गौरवेण च ॥ ४ ॥ सेहे लक्ष्मीश्च गंगा च तस्याश्च नवसंगमम् ॥ सौभाग्यं गौरवं कोपान्न सेहे च सरस्वती ॥५॥ सा तां जघान कलहे मानिनी हरिसन्निधौ ॥ व्रीडया स्वापमानाच्च साऽन्तर्द्धानं चकार ह॥६॥सर्वसिद्धेश्वरी देवी ज्ञानिनी सिद्धयोगिनी ॥ बभूवादर्शनं कोपात्सर्वत्र च हरेरहो॥७॥ हरिर्न दृष्ट्वा तुलसीं बोधयित्वा सरस्वतीम्॥तदनुज्ञां गृहीत्वा च जगाम तुलसीवनम्॥८॥तत्र गत्वा च स्नात्वा च तुलस्या तुलसीं सतीम्॥पूजयामास ध्यात्वा तां स्तोत्रं भक्त्या चकार ह॥९॥ लक्ष्मीमायाकामवाणीबीजपूर्वं दशाक्षरम्॥वृन्दावनीति ङेन्तं च वह्निजायान्तमेव च॥१०॥श्रीं ह्रीं क्लीं ऐं वृन्दावन्यै स्वाहा ॥अनेन कल्पतरुणा मन्त्रराजेन नारद ॥ पूजयेच्च विधानेन सर्वसिद्धिं लभेन्नरः ॥ ११ ॥ घृतदीपेन धूपेन सिन्दूरचन्दनेन च ॥ नैवेद्येन च पुष्पेण चोपहारेण नारद॥१२॥हरिस्तोत्रेण तुष्टा सा चाविर्भूय महीरुहात्॥प्रपन्ना चरणाम्भोजे जगाम शरणं शुभम्॥१३॥वरं तस्यै ददौ विष्णुर्जगत्पूज्या भवेति च ॥ अहं त्वां च धरिष्यामि स्वमूर्ध्नि वक्षसीति च ॥ १४ ॥ सर्वे त्वां धारयिष्यन्ति स्वयं मूर्ध्नि सुरादयः ॥ इत्युक्त्वा तां गृहीत्वा च प्रययौ स्वालयं विभुः॥१५॥नारद उवाच ॥ किं ध्यानं स्तवनं किं वा किं वा पूजाविधिक्रमम् ॥ तुलस्याश्च महाभाग तन्मे व्याख्यातुमर्हसि॥१६॥नारायण उवाच॥अन्तर्हितायां तस्यां च गत्वा च तुलसीवनम्॥हरिः संपूज्य तुष्टाव तुलसीं विरहातुरः ॥ १७ ॥ श्रीभगवानुवाच ॥ वृन्दारूपाश्च वृक्षाश्च यदैकत्र भवन्ति च ॥ विदुर्बुधास्तेन वृन्दां मत्प्रियां तां भजाम्यहम्॥१८॥ पुरा बभूव या देवी ह्यादौ वृन्दावने वने ॥ तेन वृन्दावनी ख्याता तां सौभाग्यां भजाम्यहम्॥१९॥असंख्येषु च विश्वेषु पूजिता या निरन्तरम् ॥ तेन विश्वपूजिताख्यां जगत्पूज्यां भजाम्यहम् ॥२०॥ असंख्यानि च विश्वानि पवित्राणि यया सदा ॥ तां विश्वपावनीं देवीं विरहेण स्मराम्यहम् ॥२१॥ देवा न तुष्टाः पुष्पाणां समूहेन यया विना ॥ तां पुष्पसारां शुद्धां च द्रष्टुमिच्छामि शोकतः॥२२॥विश्वे यत्प्राप्तिमात्रेण भक्त्याऽऽनन्दो भवेद्ध्रुवम्॥नन्दिनी तेन विख्याता सा प्रीता भविता हि मे॥२३॥यस्या देव्यास्तुला नास्ति विश्वेषु निखिलेषु च ॥ तुलसी तेन विख्याता तां यामि शरणं प्रिये ॥ २४ ॥ कृष्णजीवनरूपा या शश्वत्प्रियतमा

सती ॥ तेन कृष्णजीवनीति मम रक्षतु जीवनम् ॥ २५ ॥ इत्येवं स्तवनं कृत्वा तत्र तस्थौ रमापतिः ॥ ददर्श तुलसीं साक्षात्पाद
पद्मे नतां सतीम् ॥ २६ ॥ रुदतीमभिमानेन मानिनीं मानपूजिताम् ॥ प्रियां दृष्ट्वा प्रियः शीघ्रं वासयामास वक्षसि ॥ २७ ॥
भारत्याज्ञां गृहीत्वा च स्वालयं च ययौ हरिः ॥ भारत्या सह तत्प्रीतिं कारयामास सत्वरम् ॥ २८ ॥ वरं विष्णुर्ददौ तस्यै
विश्वपूज्या भवेति च ॥ शिरोधार्य्या च सर्वेषां वन्द्या मान्या ममेति च ॥ २९ ॥ विष्णोर्वरेण सा देवी परितुष्टा बभूव ह ॥
सरस्वती तामाश्लिष्य वासयामास सन्निधौ ॥ ३० ॥ लक्ष्मीर्गङ्गा सस्मिता तां समाश्लिष्य च नारद ॥ गृहं प्रवेशयामास विनयेन
सतीं तदा॥३१॥वृन्दां वृन्दावनीं विश्वपावनीं विश्वपूजिताम् ॥ पुष्पसारां नन्दिनीं च तुलसीं कृष्णजीवनीम्॥३२॥एतन्नामाष्टकं चैत
त्स्तोत्रं नामार्थसंयुतम् ॥ यः पठेत्तां च संपूज्य सोऽश्वमेधफलं लभेत् ॥ ३३ ॥ कार्त्तिकीपूर्णिमायां च तुलस्या जन्म मङ्गलम् ॥
तत्र तस्याश्च पूजा च विहिता हरिणा पुरा ॥ ३४ ॥ तस्यां यः पूजयेत्तां च भक्त्या च विश्वपावनीम् ॥ सर्वपापाद्विनिर्मुक्तो
विष्णुलोकं स गच्छति ॥ ३५ ॥ कार्त्तिके तुलसीपत्रं विष्णवे यो ददाति च ॥ गवामयुतदानस्य फलमाप्नोति निश्चितम् ॥३६॥
अपुत्रो लभते पुत्रं प्रियाहीनो लभेत्प्रियाम् ॥ बन्धुहीनो लभेद्बन्धुं स्तोत्रस्मरणमात्रतः ॥ ३७ ॥ रोगी प्रमुच्यते रोगाद्बद्धो मुच्येत
बन्धनात् ॥ भयान्मुच्येत भीतस्तु पापान्मुच्येत पातकी ॥ ३८ ॥इत्येवं कथितं स्तोत्रं ध्यानं पूजाविधिं शृणु ॥ त्वमेव वेद जानासि
काण्वशाखोक्तमेव च ॥ ३९ ॥ यद्वक्ष्ये पूजयेत्तां च भक्त्या चावाहनं विना ॥ उपचारैः षोडशभिर्ध्यानं पातकनाशनम् ॥ ४० ॥
तुलसीं पुष्पसारां च सतीं पूज्यां मनोहराम् ॥ कृत्स्नपापेध्मदाहाय ज्वलदग्निशिखोपमाम् ॥४१॥ पुष्पेषु तुलनाप्यस्या नासीद्देवीषु
वा मुने ॥ पवित्ररूपा सर्वासु तुलसी सा च कीर्त्तिता ॥ ४२ ॥ शिरोधार्य्यां च सर्वेषामीप्सितां विश्वपावनीम् ॥ जीवन्मुक्तां
मुक्तिदां च भजे तां हरिभक्तिदाम्॥४३॥इति ध्यात्वा च संपूज्य स्तुत्वा च प्रणमेद् बुधः ॥ उक्तं तुलस्युपाख्यानं किं भूयःश्रोतुमि
च्छसि ॥ ४४ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे तुलस्युपाख्यानं नाम द्वाविंशतितमो

ऽध्यायः ॥ २२ ॥ नारद उवाच ॥ तुलस्युपाख्यानमिदं श्रुतमीश सुधोपमम् ॥ यत्तु सावित्र्युपाख्यानं तन्मे व्याख्यातुमर्हसि ॥ १ ॥ पुरा येन समुद्भूता सा श्रुता च श्रुतिप्रसूः ॥ केन वा पूजिता देवी प्रथमे कैश्च वा परे ॥ २ ॥ नारायण उवाच ॥ ब्रह्मणा वेदजननी पूजिता प्रथमे मुने ॥ द्वितीये च देवगणैस्तत्पश्चाद्विदुषां गणैः ॥ ३ ॥ तथा चाश्वपतिः पूर्वं पूजयामास भारते ॥ तत्पश्चात्पूजयामासुर्वर्णाश्चत्वार एव च ॥ ४ ॥ नारद उवाच ॥ को वा सोऽश्वपतिर्ब्रह्मन्केन वा तेन पूजिता ॥ सर्वपूज्या च सावित्री तन्मे व्याख्यातुमर्हसि ॥ ५ ॥ नारायण उवाच ॥ मद्रदेशे महाराजो बभूवाश्वपतिर्मुने ॥ वैरिणां बलहर्त्ता च मित्राणां दुःखनाशनः ॥ ६ ॥ आसीत्तस्य महा[1]राज्ञी महिषी धर्मचारिणी ॥ मालतीति च सा ख्याता यथा लक्ष्मीर्गदाभृतः ॥ ७ ॥ सा च राज्ञी महासाध्वी वसिष्ठस्योपदेशतः ॥ चकाराराधनं भक्त्या सावित्र्याश्चैव नारद ॥ ८ ॥ प्रत्यादेशं न सा प्राप महिषी न ददर्श ताम् ॥ गृहं जगाम सा दुःखाद्धृदयेन विदूयता ॥ ९ ॥ राजा तां दुःखितां दृष्ट्वा बोधयित्वा नयेन वै ॥ सावित्र्यास्तपसे भक्त्या जगाम पुष्करं तदा ॥ १० ॥ तपश्चचार तत्रैव संयतः शतवत्सरम् ॥ न ददर्श च सावित्रीं प्रत्यादेशो बभूव ह ॥ ११ ॥ शुश्रावाकाशवाणीं च नृपेन्द्रश्चाशरीरिणीम् ॥ गायत्रीदशलक्षं च जपं कुर्वीति नारद ॥ १२ ॥ एतस्मिन्नन्तरे तत्र प्रजगाम पराशरः ॥ प्रणनाम नृपस्तं च मुनिर्नृपमुवाच ह ॥ १३ ॥ पराशर उवाच ॥ सकृज्जपश्च गायत्र्याः पापं दिनकृतं हरेत् ॥ दशधा प्रजपान्नृणां दिवारात्र्यघमेव च ॥ १४ ॥ शतधा च जपाच्चैवं पापं मासार्जितं परम् ॥ सहस्रधा जपाच्चैवं कल्मषं वत्सरार्जितम् ॥ १५ ॥ लक्षं जन्मकृतं पापं दशलक्षं त्रिजन्मनः ॥ सर्वजन्मकृतं पापं शतलक्षो विनश्यति ॥ १६ ॥ करोति मुक्तिं विप्राणां जपो दशगुणस्ततः ॥ करं सर्पफणाकारं कृत्वा तु ऊर्ध्वमुद्रितम् ॥ १७ ॥ आनम्रमूर्द्ध[2]मचलं प्रजपेत्प्राङ्मुखो द्विजः ॥ अनामिकामध्यदेशादथो वामक्रमेण च ॥ १८ ॥ तर्जनीमूलपर्य्यन्तं जपस्यैष क्रमः करे ॥ श्वेतपङ्कज

---

[1] महाराज्ञः इति वा पाठः । [2] अनम्रमूर्धा सततमिति पाठः ।

बीजानां स्फाटिकानां च संस्कृताम् ॥ १९ ॥ कृत्वा वा मालिकां राजञ्जपेत्तीर्थें सुरालये ॥ संस्थाप्य मालामश्वत्थपत्रसप्तसु संयतः
॥ २० ॥ कृत्वा गोरोचनाक्तां च गायत्र्या स्नापयेत्सुधीः ॥ गायत्रीशतकं तस्यां जपेच्च विधिपूर्वकम् ॥ २१ ॥ अथवा पञ्चगव्येन
स्नाता माला च संस्कृता ॥ अथ गङ्गोदकेनैव स्नाता वाऽतिसुसंस्कृता ॥२२॥ एवं क्रमेण राजर्षे दशलक्षं जपं कुरु ॥ साक्षाद् द्र
क्ष्यसि सावित्रीं त्रिजन्मपातकक्षयात् ॥ २३ ॥ नित्यं नित्यं त्रिसन्ध्यं च करिष्यसि दिने दिने ॥ मध्याह्ने चापि सायाह्ने प्रातरेव
शुचिः सदा ॥ २४ ॥ सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ॥ यदह्ना कुरुते कर्म न तस्य फलभाग्भवेत् ॥ २५ ॥ नोपतिष्ठति
यः पूर्वां नोपास्ते यश्च पश्चिमाम् ॥ स शूद्रवद्बहिष्कार्य्यः सर्वस्माद् द्विजकर्मणः ॥२६॥ यावज्जीवनपर्य्यन्तं यस्त्रिसन्ध्यां करोति
च ॥ स च सूर्य्यसमो विप्रस्तेजसा तपसा सदा ॥२७॥ तत्पादपद्मरजसा सद्यः पूता वसुन्धरा ॥ जीवन्मुक्तः स तेजस्वी सन्ध्या
पूतो हि यो द्विजः ॥ २८ ॥ तीर्थानि च पवित्राणि तस्य स्पर्शनमात्रतः ॥ ततः पापानि यान्त्येव वैनतेयादिवोरगाः ॥ २९ ॥
न गृह्णन्ति सुराः पूजां पितरः पिण्डतर्पणम् ॥ स्वेच्छया च द्विजातेश्च त्रिसन्ध्यरहितस्य च ॥ ३० ॥ विष्णुमन्त्रविही
नश्च त्रिसन्ध्यरहितो द्विजः ॥ एकादशीविहीनश्च विषहीनो यथोरगः ॥ ३१ ॥ हरेरनैवेद्यभोजी धावको वृषवाहकः ॥
शूद्रान्नभोजी विप्रश्च विषहीनो यथोरगः ॥ ३२ ॥ शवदाही च शूद्राणां यो विप्रो वृषलीपतिः ॥ शूद्राणां सूपकारश्च
विषहीनो यथोरगः ॥ ३३ ॥ शूद्राणां च प्रतिग्राही शूद्रयाजी च यो द्विजः ॥ असिजीवी मषीजीवी विषहीनो यथोरगः ॥३४॥
यो विप्रोऽवीरान्नभोजी ऋतुस्नातान्नभोजकः ॥ भगजीवी वार्धुषिको विषहीनो यथोरगः ॥ ३५ ॥ यः कन्याविक्रयी विप्रो
यो हरेर्नामविक्रयी ॥ यो विद्याविक्रयी भूप विषहीनो यथोरगः ॥ ३६ ॥ सूर्य्योदये च द्विर्भोजी मत्स्यभोजी च यो द्विजः ॥
शिलापूजादिरहितो विषहीनो यथोरगः ॥ ३७ ॥ इत्युक्त्वा च मुनिश्रेष्ठः सर्वं पूजाविधिक्रमम् ॥ तमुवाच च सावित्र्या ध्यानादिक
मभीप्सितम् ॥ ३८ ॥ दत्त्वा सर्वं नृपेन्द्राय प्रययौ स्वालयं मुनिः ॥ राजा संपूज्य सावित्रीं ददर्श वरमाप च॥३९॥ नारद उवाच॥

किं वा ध्यानं च सावित्र्याः किं वा पूजाविधानकम्॥स्तोत्रं मन्त्रं च किं दत्त्वा प्रययौ स पराशरः ॥४०॥ नृपः केन विधानेन संपूज्य श्रुतिमातरम्॥वरं च किं वा संप्राप वद सोऽश्वपतिर्नृपः॥४१॥नारायण उवाच॥ज्येष्ठे कृष्णत्रयोदश्यां शुद्धे काले च संयतः॥व्रतमेव चतुर्दश्यां व्रती भक्त्या समाचरेत्॥४२॥व्रतं चतुर्दशाब्दं च द्विसप्तफलसंयुतम्॥ दत्त्वा द्विसप्तनैवेद्यं पुष्पधूपादिकं तथा ॥४३॥ वस्त्रं यज्ञोपवीतं च भोज्यं च विधिपूर्वकम्॥संस्थाप्य मङ्गलघटं फलशाखासमन्वितम्॥४४॥गणेशं च दिनेशं च वह्निं विष्णुं शिवं शिवाम्॥ संपूज्य पूजयेदिष्टं घटे आवाहिते मुने॥४५॥शृणु ध्यानं च सावित्र्याश्चोक्तं माध्यन्दिने च यत् ॥ स्तोत्रं पूजाविधानं च मन्त्रं च सर्वकामदम् ॥ ४६ ॥ तप्तकाञ्चनवर्णाभां ज्वलन्तीं ब्रह्मतेजसा ॥ ग्रीष्ममध्याह्नमार्त्तण्डसहस्रसमसुप्रभाम् ॥ ४७ ॥ ईषद्धास्यप्रसन्नास्यां रत्नभूषणभूषिताम्॥वह्निशुद्धांशुकाधानां भक्तानुग्रहकातराम् ॥४८॥ सुखदां मुक्तिदां शान्तां कान्तां च जगतां विधेः॥सर्वसम्पत्स्वरूपां च प्रदात्रीं सर्वसम्पदाम् ॥ ४९ ॥ वेदाधिष्ठातृदेवीं च वेदशास्त्रस्वरूपिणीम् ॥ वेदे बीजस्वरूपां च भजे त्वां वेदमातरम् ॥ ५० ॥ ध्यात्वा ध्यानेन चानेन दत्त्वा पुष्पं स्वमूर्द्धनि ॥ पुनर्ध्यात्वा घटे भक्त्या देवीमावाहयेद्व्रती ॥ ५१ ॥ दत्त्वा षोडशोपचारं वेदोक्तमन्त्रपूर्वकम् ॥ सम्पूज्य स्तुत्वा प्रणमेदेवं देवीं विधानतः ॥ ५२ ॥ आसनं पाद्यमर्घ्यं च स्नानीयं चानुलेपनम् ॥ धूपं दीपं च नैवेद्यं ताम्बूलं शीतलं जलम्॥५३॥वसनं भूषणं माल्यं गन्धमाचमनीयकम्॥मनोहरं सुतल्पं च देयान्येतानि षोडश॥५४॥ दारुसारविकारं च हेमादिनिर्मितं च वा ॥ देवाधारं पुण्यदं च मया नित्यं निवेदितम् ॥ ५५ ॥ तीर्थोदकं च पाद्यं च पुण्यदं प्रीतिदं महत् ॥ पूजाङ्गभूतं शुद्धं च मया भक्त्या निवेदितम् ॥ ५६ ॥ पवित्ररूपमर्घ्यं च दूर्वापुष्पाक्षतान्वितम् ॥ पुण्यदं शंखतोयाक्तं मया तुभ्यं निवेदितम् ॥ ५७॥ सुगन्धि धात्रीतैलं च देहसौन्दर्य्यकारणम् ॥ मया निवेदितं भक्त्या स्नानीयं प्रतिगृह्यताम् ॥ ५८ ॥ मलयाचलसम्भूतं देहशोभाविवर्द्धनम् ॥ सुगन्धियुक्तं सुखदं मया तुभ्यं निवेदितम् ॥ ५९ ॥ गन्धद्रव्योद्भवः पुण्यः प्रीतिदो दिव्यगन्धदः ॥ मया निवेदितो भक्त्या धूपोऽयं प्रतिगृह्यताम् ॥ ६० ॥ जगतां दर्शनीयं च दर्शनं दीप्तिकारणम् ॥ अन्ध

कारध्वंसबीजं मया तुभ्यं निवेदितम् ॥ ६१ ॥ तुष्टिदं पुष्टिदं चैव प्रीतिदं क्षुद्विनाशनम् ॥ पुण्यदं स्वादुरूपं च नैवेद्यं
प्रतिगृह्यताम् ॥ ६२ ॥ ताम्बूलं च वरं रम्यं कर्पूरादिसुवासितम् ॥ तुष्टिदं पुष्टिदं चैव मया भक्त्या निवेदितम् ॥ ६३ ॥ सुशीतलं
वासितं च पिपासानाशकारणम् ॥ जगतां जीवरूपं च जीवनं प्रतिगृह्यताम् ॥६४॥ देहशोभास्वरूपं च सभाशोभाविवर्द्धनम् ॥
कार्पासजं च कृमिजं वसनं प्रतिगृह्यताम् ॥६५॥ काञ्चनादिभिराबद्धं श्रीयुक्तं श्रीकरं सदा॥सुखदं पुण्यदं चैव भूषणं प्रतिगृह्यताम्
॥ ६६ ॥ नानापुष्पलताकीर्णं बहुभासा समन्वितम् ॥ प्रीतिदं पुण्यदं चैव माल्यं वै प्रतिगृह्यताम् ॥ ६७ ॥ सर्वमङ्गलरूपश्च सर्वमङ्गलदो
वरः ॥ पुण्यप्रदश्च गन्धाढ्यो गन्धश्च प्रतिगृह्यताम् ॥६८॥ शुद्धं शुद्धिप्रदं चैव शुद्धानां प्रीतिदं महत् ॥ रम्यमाचमनीयं
च मया दत्तं प्रगृह्यताम् ॥ ६९ ॥ रत्नसारादिनिर्माणं पुष्पचन्दनसंयुतम् ॥ सुखदं पुण्यदं चैव सुतल्पं प्रतिगृह्यताम् ॥ ७० ॥
नानावृक्षसमुद्भूतं नानारूपसमन्वितम् ॥ फलस्वरूपं फलदं फलं च प्रतिगृह्यताम् ॥ ७१ ॥ सिन्दूरं च वरं रम्यं भालशोभाविवर्द्धनम्
॥ भूषणं भूषणानां च सिन्दूरं प्रतिगृह्यताम् ॥ ७२ ॥ विशुद्धग्रंथिसंयुक्तं पुण्यसूत्रविनिर्मितम् ॥ पवित्रं वेदमन्त्रेण यज्ञसूत्रं
च गृह्यताम् ॥ ७३ ॥ द्रव्याण्येतानि मूलेन दत्त्वा स्तोत्रं पठेत्सुधीः ॥ ततः प्रणम्य विप्राय व्रती दद्याच्च दक्षिणाम् ॥ ७४ ॥ सावित्रीति
चतुर्थ्यन्तं वह्निजायान्तमेव च ॥ लक्ष्मीमायाकामपूर्वं मन्त्रमष्टाक्षरं विदुः ॥ ७५ ॥ श्रीं ह्रीं क्लीं सावित्र्यै स्वाहा ॥ मध्यन्दिनोक्तं
स्तोत्रं च सर्ववाञ्छाफलप्रदम् ॥ विप्रजीवनरूपं च निबोध कथयामि ते ॥७६॥ कृष्णेन दत्ता सावित्री गोलोके ब्रह्मणे पुरा ॥
न याति सा तेन सार्द्धं ब्रह्मलोकं तु नारद ॥ ७७ ॥ ब्रह्मा कृष्णाज्ञया भक्त्या पर्यष्टौद्वेदमातरम् ॥ तदा सा परितुष्टा च ब्रह्माणं
चकमे सती ॥ ७८ ॥ ब्रह्मोवाच ॥ नारायणस्वरूपे च नारायणि सनातनि ॥ नारायणात्समुद्भूते प्रसन्ना भव सुन्दरि ॥ ७९ ॥
तेजस्स्वरूपे परमे परमानन्दरूपिणि ॥ द्विजातीनां जातिरूपे प्रसन्ना भव सुन्दरि॥८०॥नित्ये नित्यप्रिये देवि नित्यानन्दस्वरूपिणि॥
सर्वमंगलरूपेण प्रसन्ना भव सुन्दरि ॥८१॥ सर्वस्वरूपे विप्राणां मन्त्रसारे परात्परे ॥ सुखदे मोक्षदे देवि प्रसन्ना भव सुन्दरि॥८२॥

विप्रपापेन्धदाहाय ज्वलदग्निशिखोपमे ॥ ब्रह्मतेजःप्रदे देवि प्रसन्ना भव सुन्दरि ॥ ८३ ॥ कायेन मनसा वाचा यत्पापं कुरुते द्विजः ॥ तत्ते स्मरणमात्रेण भस्मीभूतं भविष्यति॥८४॥इत्युक्त्वा जगतां धाता तत्र तस्थौ च संसदि ॥ सावित्री ब्रह्मणा सार्द्धं ब्रह्मलोकं जगाम सा ॥८५॥ अनेन स्तवराजेन संस्तूयाश्वपतिर्नृपः ॥ ददर्श तां च सावित्रीं वरं प्राप मनोगतम् ॥८६॥ स्तवराजमिदं पुण्यं त्रिसन्ध्यायां च यः पठेत् ॥ पाठे चतुर्णां वेदानां यत्फलं तल्लभेद् ध्रुवम् ॥ ८७ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे सावित्र्युपाख्याने सावित्रीस्तोत्रकथनं नाम त्रयोविंशतितमोऽध्यायः ॥ २३ ॥ नारायण उवाच ॥ स्तुत्वा सोऽश्वपतिस्तेन संपूज्य विधिपूर्वकम् ॥ ददर्श तत्र तां देवीं सहस्रार्कसमप्रभाम् ॥ १ ॥ उवाच सा तं राजानं प्रसन्ना सस्मिता सती ॥ यथा माता स्वपुत्रं च द्योतयन्ती दिशस्त्विषा ॥२॥ सावित्र्युवाच ॥ जानामि ते महाराज यत्ते मनसि वर्त्तते ॥ वाञ्छितं तव पत्न्याश्च सर्वं दास्यामि निश्चितम् ॥ ३ ॥ साध्वी कन्याभिलाषं च करोति तव कामिनी ॥त्वं प्रार्थयसि पुत्रं च भविष्यति च ते क्रमात् ॥ ४ ॥ इत्युक्त्वा सा महादेवी ब्रह्मलोकं जगाम ह ॥ राजा जगाम स्वगृहं तत्कन्याऽऽदौ बभूव ह ॥ ५ ॥ राज्ञो धनाच्च सावित्र्या बभूव कमला कला ॥ सावित्रीति च तन्नाम चकाराश्वपतिर्नृपः ॥ ६ ॥ कालेन सा वर्द्धमाना बभूव च दिने दिने ॥ रूपयौवनसम्पन्ना शुक्ले चन्द्रकला यथा ॥ ७ ॥ सा वरं वरयामास द्युमत्सेनात्मजं तदा ॥ सावित्री सत्यवन्तं च नानागुणसमन्वितम् ॥ ॥८॥ राजा तस्मै ददौ तां च रत्नभूषणभूषिताम् ॥ स च सार्धं कौतुकेन तां गृहीत्वा गृहं ययौ॥९॥ स च संवत्सरेऽतीते सत्यवान्सत्यविक्रमः ॥ जगाम फलकाष्ठार्थं प्रहर्षं पितुराज्ञया ॥१०॥ जगाम तत्र सावित्री तत्पश्चाद्दैवयोगतः ॥ निपत्य वृक्षाद्दैवेन प्राणांस्तत्याज सत्यवान् ॥ ११ ॥ यमस्तज्जीवपुरुषं बद्ध्वाङ्गुष्ठसमं मुने ॥ गृहीत्वा गमनं चक्रे तत्पश्चात्प्रययौ सती ॥ १२ ॥ पश्चात्तां सुन्दरीं दृष्ट्वा यमः संयमिनीपतिः ॥ उवाच मधुरं साध्वीं साधूनां प्रवरो महान् ॥ १३ ॥ यम उवाच ॥ अहो क्व यासि सावित्रि गृहीत्वा मानुषीं तनुम् ॥ यदि यास्यसि कान्तेन सार्धं देहं तदा त्यज ॥ १४ ॥ गन्तुं मर्त्यो न शक्नोति गृहीत्वा पाञ्चभौतिकम्॥

देहं च यमलोकं च नश्वरं नश्वरः सदाः ॥ १९ ॥ घूर्णश्च भर्त्तुस्ते कालः ह्यभवद्धारते सति ॥ स कर्मफलभोगार्थं सत्यवान्याति मद्गृहम् ॥ १६ ॥ कर्मणा जायते जन्तुः कर्मणैव प्रलीयते ॥ सुखं दुःखं भयं शोकं कर्मणैव प्रपद्यते ॥ १७ ॥ कर्मणेन्द्रो भवेज्जीवो ब्रह्मपुत्रः स्वकर्मणा ॥ स्वकर्मणा हरेर्दासो जन्मादिरहितो भवेत् ॥ १८ ॥ स्वकर्मणा सर्वसिद्धिममरत्वं लभेद् ध्रुवम् ॥ लभेत्स्वकर्मणा विष्णोः सालोक्यादिचतुष्टयम् ॥ १९ ॥ कर्मणा ब्राह्मणत्वं च मुक्तत्वं च स्वकर्मणा ॥ सुरत्वं च मनुत्वं च राजेन्द्रत्वं लभेन्नरः ॥ २० ॥ कर्मणा च मुनीन्द्रत्वं तपस्वित्वं च कर्मणा ॥ कर्मणा क्षत्रियत्वं च वैश्यत्वं च स्वकर्मणा ॥ २१ ॥ कर्मणा चैव शूद्रत्वमन्त्यजत्वं स्वकर्मणा ॥ २२ ॥ स्वकर्मणा च म्लेच्छत्वं लभते नात्र संशयः ॥ स्वकर्मणा जङ्गमत्वं स्थावरत्वं स्वकर्मणा ॥ २३ ॥ स्वकर्मणा च शैलत्वं वृक्षत्वं च स्वकर्मणा ॥ स्वकर्मणा पशुत्वं च पक्षित्वं च स्वकर्मणा ॥ २४ ॥ स्वकर्मणा क्षुद्रजन्तुः कृमित्वं च स्वकर्मणा ॥ स्वकर्मणा च सर्प त्वं गन्धर्वत्वं स्वकर्मणा ॥ २५ ॥ स्वकर्मणा राक्षसत्वं किन्नरत्वं स्वकर्मणा ॥ स्वकर्मणा च यक्षत्वं कूष्माण्डत्वं स्वकर्मणा ॥ २६ ॥ स्वकर्मणा च प्रेतत्वं वेतालत्वं स्वकर्मणा ॥ भूतत्वं च पिशाचत्वं डाकिनीत्वं स्वकर्मणा ॥ २७ ॥ दैत्यत्वं दानवत्वं चाप्यसुरत्वं स्वकर्मणा ॥ कर्मणा पुण्यवाञ्जीवो महापापी स्वकर्मणा ॥ २८ ॥ कर्मणा सुन्दरोऽरोगी महारोगी च कर्मणा ॥ कर्मणा चान्धः काणश्च कुत्सितश्च स्वकर्मणा ॥ २९ ॥ कर्मणा नरकं यान्ति जीवाः स्वर्गं स्वकर्मणा ॥ कर्मणा शक्रलोकं च सूर्य्यलोकं स्वकर्मणा ॥ ३० ॥ कर्मणा चन्द्रलोकं च वह्निलोकं स्वकर्मणा ॥ कर्मणा वायुलोकं च कर्मणा वरुणालयम् ॥ ३१ ॥ तथा कुबेरलोकं च नरो याति स्वकर्मणा ॥ कर्मणा ध्रुवलोकं च शिवलोकं स्वकर्मणा ॥ ३२ ॥ याति नक्षत्रलोकं च सत्यलोकं स्वकर्मणा ॥ जनोलोकं तपोलोकं महर्लोकं स्वकर्मणा ॥ ३३ ॥ स्वकर्मणा च पातालं ब्रह्मलोकं स्वकर्मणा ॥ कर्मणा भारतं पुण्यं सर्वेप्सितवरप्रदम् ॥ ३४ ॥ कर्मणा याति वैकुण्ठं गोलोकं च निरामयम् ॥ कर्मणा चिरजीवी च क्षणायुश्च स्वकर्मणा ॥ ३५ ॥ कर्मणा कोटिकल्पायुः क्षीणा

युश्च स्वकर्मणा ॥ जीवसंचारमात्रायुर्गर्भे मृत्युः स्वकर्मणा ॥ ३६ ॥ इत्येवं कथितं सर्वं मया तत्त्वं च सुन्दरि ॥ कर्मणा ते मृतो भर्त्ता गच्छ वत्से यथासुखम् ॥ ३७ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे कर्मविपाके कर्मणः सर्वहेतुत्वप्रदर्शनं नाम चतुर्विंशतितमोऽध्यायः ॥ २४ ॥ श्रीनारायण उवाच ॥ यमस्य वचनं श्रुत्वा सावित्री च पतिव्रता ॥ तुष्टाव परया भक्त्या तमुवाच मनस्विनी ॥ १ ॥ सावित्र्युवाच ॥ किं कर्म्म वा शुभं धर्म्मराज किं वाऽशुभं नृणाम् ॥ कर्म्म निर्मूलयन्त्येव केन वा साधवो जनाः ॥२॥ कर्म्मणां बीजरूपः कः को वा कर्म्मफलप्रदः॥ किं कर्म्म तद्भवेत्केन को वा तद्धेतुरेव च॥३॥ को वा कर्म्मफलं भुङ्क्ते को वा निर्लिप्त एव च ॥ को वा देही कश्च देहः को वा वै कर्मकारकः॥४॥ किं विज्ञानं मनो बुद्धिः के वा प्राणाः शरीरिणाम् ॥ कानीन्द्रियाणि किं तेषां लक्षणं देवताश्च काः॥५॥भोक्ता भोजयिता को वा को भोगः का च निष्कृतिः ॥ को जीवः परमात्मा कस्तन्मे व्याख्यातुमर्हसि ॥६॥ यम उवाच ॥ वेदेन विहितं कर्म तन्मये मङ्गलं परम् ॥ अवैदिकं तु यत्कर्म तदेवाशुभमेव च॥७॥ अहैतुकी विष्णुसेवा सङ्कल्परहिता सताम्॥कर्म्मनिर्म्मूलनात्मा वै सा चैव हरिभक्तिदा॥८॥हरिभक्तो नरो यश्च स च मुक्तः श्रुतौ श्रुतम् ॥ जन्ममृत्युजराव्याधिशोकभीतिविवर्जितः ॥९॥ मुक्तिश्च द्विविधा साध्वि श्रुत्युक्ता सर्वसम्मता ॥ निर्वाणपददात्री च हरिभक्तिप्रदा नृणाम् ॥ १० ॥ हरिभक्तिस्वरूपां च मुक्तिं वाञ्छन्ति वैष्णवाः ॥ अन्ये निर्वाणरूपां च मुक्तिमिच्छन्ति साधवः ॥ ॥ ११ ॥ कर्म्मणो बीजरूपश्च सन्ततं तत्फलप्रदः ॥ कर्म्मरूपश्च भगवाञ्छ्रीकृष्णः प्रकृतेः परः ॥ १२ ॥ सोऽपि तद्धेतुरूपश्च कर्म्म तेन भवेत्सति ॥ जीवः कर्म्मफलं भुङ्क्ते आत्मा निर्लिप्त एव च ॥ १३ ॥ आत्मनः प्रतिबिम्बं च देही जीवः स एव च ॥ पाञ्चभौतिकरूपश्च देहो नश्वर एव च॥१४॥पृथिवी वायुराकाशो जलं तेजस्तथैव च॥एतानि सूत्ररूपाणि सृष्टिः सृष्टिविधौ हरेः ॥ ॥ १५ ॥ कर्त्ता भोक्ता च देही च स्वात्मा भोजयिता सदा ॥ भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च ॥ १६ ॥ सदसद्भेदबीजं च ज्ञानं नानाविधं भवेत् ॥ विषयाणां विभागानां भेदबीजं च कीर्त्तितम् ॥१७॥ बुद्धिर्विवेचनारूपा ज्ञानसंदीपिनी श्रुतौ ॥ वायुभे

दाश्च वै प्राणा बलरूपाश्च देहिनाम् ॥ १८ ॥ इन्द्रियाणां वै प्रवरमीश्वराणां समूहकम् ॥ प्रेरकं कर्मणां चैव दुर्निवार्य्यं च देहि
नाम् ॥ १९ ॥ अनिरूप्यमदृश्यं च ज्ञानभेदं मनः स्मृतम् ॥ लोचनं श्रवणं घ्राणं त्वग्जिह्वादिकमिन्द्रियम् ॥ २० ॥ अङ्गिनामङ्ग
रूपं च प्रेरकं सर्वकर्मणाम् ॥ रिपुरूपं मित्ररूपं सुखदं दुःखदं सदा ॥ २१ ॥ सूर्य्यो वायुश्च पृथिवी वाण्याद्या देवताः स्मृताः ॥
प्राणदेहादिभृद्यो हि स जीवः परिकीर्त्तितः॥२२॥ परमात्मा परं ब्रह्म निर्गुणः प्रकृतेः परः ॥ कारणं कारणानां च श्रीकृष्णो भगवा
न्स्वयम् ॥२३॥ इत्येवं कथितं सर्वं मया पृष्टं यथागमम् ॥ ज्ञानिनां ज्ञानरूपं च गच्छ वत्से यथासुखम् ॥ २४ ॥ सावित्र्युवाच ॥
त्यक्त्वा क्व यामि कान्तं वा त्वां वा ज्ञानार्णवं बुधम् ॥ प्रश्नं यद्यत्करोमि त्वां तद्भवान्वक्तुमर्हति ॥ २५ ॥ कां कां योनिं याति जी
वः कर्मणा केन वा यम ॥ केन वा कर्मणा स्वर्गं केन वा नरकं पितः ॥ २६ ॥ केन वा कर्मणा मुक्तिः केन भक्तिर्भवेद्धरेः ॥ केन
वा कर्मणा रोगी चारोगी केन कर्मणा॥२७॥केन वा दीर्घजीवी च केनाल्पायुश्च कर्म्मणा ॥ केन वा कर्म्मणा दुःखी केन वा कर्म्मणा
सुखी ॥ २८ ॥ अङ्गहीनश्च काणश्च बधिरः केन कर्म्मणा ॥ अन्धो वा कृपणो वाऽपि प्रमत्तः केन कर्म्मणा ॥ २९ ॥ क्षिप्तोऽतिलु
ब्धकश्चैव केन वा नरघातकः ॥ केन सिद्धिमवाप्नोति सालोक्यादिचतुष्टयम् ॥३०॥ केन वा ब्राह्मणत्वं च तपस्वित्वं च केन वा ॥
स्वर्गभोगादिकं केन वैकुण्ठं केन कर्म्मणा॥३१॥गोलोकं केन वा ब्रह्मन्सर्वोत्कृष्टं निरामयम्॥नरकं वा कतिविधं किं संख्यं नाम किं
तथा ॥३२॥ को वा कं नरकं याति कियन्तं तेषु तिष्ठति ॥ पापिनां कर्म्मणा केन को वा व्याधिः प्रजायते ॥३३॥ यद्यदस्ति मया
पृष्टं तन्मे व्याख्यातुमर्हसि ॥ ३४ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे कर्म्मविपाके यमोक्त्य
नन्तरं सावित्रीप्रश्नो नाम पञ्चविंशोऽध्यायः ॥ २५ ॥ नारायण उवाच ॥ सावित्रीवचनं श्रुत्वा जगाम विस्मयं यमः ॥
प्रहस्य वक्तुमारेभे कर्मपाकं च जीविनाम् ॥ १ ॥ यम उवाच ॥ कन्या द्वादशवर्षीया वत्से त्वं वयसाऽधुना ॥ ज्ञानं ते पूर्वविदुषां
योगिनां ज्ञानिनां परम् ॥ २ ॥ सावित्रीवरदानेन त्वं सावित्रीकला सति ॥ प्राप्ता पुरा भूभृता च तपसा तत्समा शुभे ॥ ३ ॥यथा

श्रीः श्रीपतेः क्रोडे भवानी च भवोरसि ॥ यथा राधा च श्रीकृष्णे सावित्री ब्रह्मवक्षसि ॥ ४ ॥ धर्मोरसि यथा मूर्त्तिः शतरूपा मनौ
यथा ॥ कर्दमे देवहूतिश्च वसिष्ठेऽरुन्धती यथा ॥ ५ ॥ अदितिः कश्यपे चापि यथाऽहल्या च गौतमे ॥ यथा शची महेन्द्रे च
यथा चन्द्रे च रोहिणी ॥ ६ ॥ यथा रतिः कामदेवे यथा स्वाहा हुताशने ॥ यथा स्वधा च पितृषु यथा संज्ञा दिवाकरे ॥ ७ ॥
वरुणानी च वरुणे यज्ञे च दक्षिणा यथा ॥ यथा धरा वराहे च देवसेना च कार्तिके ॥ ८ ॥ सौभाग्या सुप्रिया त्वं च भव सत्यवति
प्रिये ॥ इति तुभ्यं वरं दत्तमपरं च यदीप्सितम् ॥ वृणु देवि महाभागे सर्वं दास्यामि निश्चितम् ॥ ९ ॥ सावित्र्युवाच ॥
सत्यवदौरसेनैव पुत्राणां शतकं मम ॥ भविष्यति महाभाग वरमेतन्मदीप्सितम् ॥ १० ॥ मत्पितुः पुत्रशतकं श्वशुरस्य च
चक्षुषी ॥ राज्यलाभो भवत्वेव वरमेवं मदीप्सितम् ॥ ११ ॥ अन्ते सत्यवता सार्द्धं यास्यामि हरिमन्दिरम् ॥ समतीते लक्षवर्षे
देहीमं मे जगत्प्रभो ॥ १२ ॥ जीवकर्मविपाकं च श्रोतुं कौतूहलं च मे ॥ विश्वविस्तारबीजं च तन्मे व्याख्यातुमर्हसि ॥ १३ ॥
यम उवाच ॥ भविष्यति महासाध्वि सर्वं मानसिकं तव ॥ जीवकर्म्मविपाकं च कथयामि निशामय ॥ १४ ॥ शुभानामशुभानां
च कर्म्मणां जन्म भारते ॥ पुण्यक्षेत्रेऽत्र सर्वत्र नान्यत्र भुञ्जते जनाः ॥ १५ ॥ सुरा दैत्या दानवाश्च गन्धर्वा राक्षसादयः ॥ नराश्च
कर्म्मजनका न सर्वे समजीविनः ॥ १६ ॥ विशिष्टजीविनः कर्म्म भुञ्जते सर्वयोनिषु ॥ विशेषतो मानवाश्च भ्रमन्ति सर्वयोनिषु ॥
॥ १७ ॥ शुभाशुभं भुञ्जते च कर्म पूर्वार्जितं परम् ॥ शुभेन कर्म्मणा यान्ति ते स्वर्गादिकमेव च ॥ १८ ॥ कर्म्मणा चाशुभेनैव
भ्रमन्ति नरकेषु च ॥ कर्म्मनिर्मूलने मुक्तिः सा चोक्ता द्विविधा मता ॥ १९ ॥ निर्वाणरूपा सेवा च कृष्णस्य परमात्मनः ॥ रोगी
कुकर्म्मणा जीवश्चारोगी शुभकर्म्मणा ॥ २० ॥ दीर्घजीवी च क्षीणायुः सुखी दुःखी च निश्चितम् ॥ अन्धादयश्चाङ्गहीनाः कुत्सितेन
च कर्मणा ॥ २१ ॥ सिद्ध्यादिकमवाप्नोति सर्वोत्कृष्टेन कर्म्मणा ॥ सामान्यं कथितं सर्वं विशेषं शृणु सुन्दरि ॥ २२ ॥ सुदुर्लभं
सुभोग्यं च पुराणेषु श्रुतिष्वपि ॥ २३ ॥ दुर्लभा मानवी जातिः सर्वजातिषु भारते ॥ सर्वाभ्यो ब्राह्मणः श्रेष्ठः प्रशस्तः

सर्वकर्म्मसु॥२४॥विष्णुभक्तो द्विजश्चैव गरीयान्भारते ततः ॥ निष्कामश्च सकामश्च वैष्णवो द्विविधः सति ॥२५॥सकामश्च प्रधानश्च निष्कामो भक्त एव च ॥ कर्मभोगी सकामश्च निष्कामो निरुपद्रवः ॥ २६ ॥ स याति देहं त्यक्त्वा च पदं विष्णोर्निरामयम् ॥ पुनरागमनं नास्ति तेषां निष्कामिणां सति ॥ २७ ॥ ये सेवन्ते च द्विभुजं कृष्णमात्मानमीश्वरम् ॥ गोलोकं यान्ति ते भक्ता दिव्यरूपविधारिणः ॥ २८ ॥ ये च नारायणं भक्ताः सेवन्ते च चतुर्भुजम् ॥ वैकुण्ठं यान्ति ते सर्वे दिव्यरूपविधारिणः ॥२९ ॥ सकामिनो वैष्णवाश्च गत्वा वैकुण्ठमेव च ॥ भारतं पुनरायान्ति तेषां जन्म द्विजातिषु ॥ ३० ॥ कालेन ते च निष्कामा भविष्यन्ति क्रमेण च ॥ भक्तिं च निर्मलां बुद्धिं तेभ्यो दास्यति निश्चितम् ॥ ३१ ॥ ब्राह्मणाद्वैष्णवादन्ये सकामाः सर्वजन्मसु ॥ न तेषां निर्म्मला बुद्धिर्विष्णुभक्तिविवर्जिताः ॥ ३२ ॥ तीर्थाश्रिता द्विजा ये च तपस्यानिरताः सति ॥ ते यान्ति ब्रह्मलोकं च पुनरायान्ति भारतम् ॥३३॥ स्वधर्म्मनिरता विप्राः सूर्य्यभक्ताश्च भारते ॥ व्रजन्ति सूर्यलोकं ते पुनरायान्ति भारतम् ॥ ३४ ॥ स्वधर्मनिरता विप्राः शैवाः शाक्ताश्च गाणपाः ॥ ते यान्ति शिवलोकं च पुनरायान्ति भारतम् ॥ ३५ ॥ ये विप्रा अन्यदेवेष्टाः स्वधर्मनिरताः सति ॥ ते गत्वा शक्रलोकं च पुनरायान्ति भारतम् ॥ ३६ ॥ हरिभक्ताश्च निष्कामाः स्वधर्म्मरहिता द्विजाः ॥ तेऽपि यान्ति हरेर्लोकं क्रमाद्भक्तिबलादहो ॥ ३७ ॥ स्वधर्म्मरहिता विप्रा देवान्यसेविनः सदा ॥ भ्रष्टाचाराश्च बालाश्च ते यांति नरकं ध्रुवम् ॥ ३८ ॥ स्वधर्म्मनिरताश्चैवं वर्णाश्चत्वार एव च ॥ भवन्त्येव शुभस्यैव कर्म्मणः फलभागिनः ॥ ३९ ॥ स्वधर्म्मरहितास्ते च नरकं यान्ति हि ध्रुवम्॥भारते च भवन्त्येव कर्म्मणः फलभागिनः॥४०॥स्वधर्मनिरता विप्राः स्वधर्मनिरताय च॥कन्यां ददति विप्राय चन्द्रलोकं व्रजन्ति ते ॥४१॥ वसंति तत्र ते साध्वि यावदिन्द्राश्चतुर्दश॥सालङ्कृताया दानेन द्विगुणं फलमुच्यते ॥४२॥ सकामा यांति तल्लोकं न निष्कामाश्च वैष्णवाः ॥ ते प्रयांति विष्णुलोकं फलसन्धानवर्जिताः ॥ ४३ ॥ गव्यं च रजतं भार्य्यां वस्त्रं सस्यं फलं जलम् ॥ ये ददत्येव विप्रेभ्यस्तल्लोकं हि व्रजन्ति च ॥४४॥ वसंति ते च तल्लोकं यावन्मन्वन्तरं सति ॥ कालं च सुचिरं वासं कुर्वंति तत्र

ते जनाः ॥ ४५ ॥ ये ददंति सुवर्णं च गां च ताम्रादिकं सति ॥ ते यांति सूर्य्यलोकं च शुचये ब्राह्मणाय च ॥ ४६ ॥ वसन्ति तत्र
ते लोके वर्षाणामयुतं सति ॥ विपुले च चिरं वासं कुर्वंति च निरामयाः ॥ ४७ ॥ ददाति भूमिं विप्रेभ्यो धान्यानि विपुलानि
च ॥ स याति विष्णुलोकं च श्वेतद्वीपं मनोहरम् ॥ ४८ ॥ तत्रैव निवसत्येव यावच्चन्द्रदिवाकरौ ॥ विपुलं विपुले वासं करोति पुण्यवान्सति ॥ ४९ ॥ गृहं ददति विप्राय ये जना भक्तिपूर्वकम् ॥ ते यांति सुरलोकं च चिरं तत्र भवंति ते ॥ ५० ॥ गृहरेणुप्रमाणाब्दं दानं
पुण्यदिने यदि ॥ विपुलं विपुले वासं कुर्वंति मानवाः सति ॥ ५१ ॥ यस्मै यस्मै च देवाय यो ददाति गृहं नरः ॥ स याति तस्य लोकं
च रेणुमानाब्दमेव च ॥ ५२ ॥ सौधे चतुर्गुणं पुण्यं पूर्त्तौ शतगुणं फलम् ॥ प्रकृष्टेऽष्टगुणं तस्मादित्याह कमलोद्भवः ॥ ५३ ॥ यो
ददाति तडागं च सर्वभूताय भारते ॥ स याति जनलोकं च वर्षाणामयुतं सति ॥ ५४ ॥ वाप्यां फलं शतगुणं प्राप्नोति मानवस्ततः
॥ तथा सेतुप्रदानेन तडागस्य फलं लभेत् ॥ ५५ ॥ धनुश्चतुःसहस्रेण दैर्घ्यमानेन निश्चितम् ॥ न्यूना वा तावती प्रस्थे सा वापी
परिकीर्त्तिता ॥ ५६ ॥ दशवापीसमा कन्या यदि पात्रे प्रदीयते ॥ फलं ददाति द्विगुणं यदि सालंकृता भवेत् ॥ ५७ ॥ तत्फलं च तडागे च पङ्कोद्धारेण तत्फलम् ॥ वाप्याश्च पंकोद्धारेण वापीतुल्यफलं लभेत् ॥ ५८ ॥ अश्वत्थवृक्षमारोप्य प्रतिष्ठां च करोति यः ॥ स
याति तपसो लोकं वर्षाणामयुतं परम् ॥ ५९ ॥ पुष्पोद्यानं यो ददाति सावित्रि सर्वभूतये ॥ स वसेद्ध्रुवलोके च वर्षाणामयुतं
ध्रुवम् ॥ ६० ॥ यो ददाति विमानं च विष्णवे भारते सति ॥ विष्णुलोके वसेत्सोऽपि यावन्मन्वन्तरं परम् ॥ ६१ ॥ चित्रयुक्ते च विपुले
फलं तस्य चतुर्गुणम् ॥ रथार्धं शिबिकादाने फलमेव लभेद्ध्रुवम् ॥ ६२ ॥ यो ददाति भक्तियुक्तो हरये दोलमन्दिरम् ॥ विष्णुलोके
वसेत्सोऽपि यावन्मन्वतरं परम् ॥ ६३ ॥ राजमार्गे सौधयुक्तं यः करोति पतिव्रते ॥ वर्षाणामयुतं सोऽपि शक्रलोके महीयते ॥ ६४ ॥
ब्राह्मणेभ्योऽपि देवेभ्यो दाने समफलं लभेत् ॥ यच्च दत्तं हि तद्भोक्तुर्न दत्तं नोपतिष्ठते ॥ ६५ ॥ भुक्त्वा स्वर्गादिकं सौख्यं पुनरायान्ति भारते ॥ लभेद्विप्रकुलेष्वेव क्रमेणैवोत्तमादिषु ॥ ६६ ॥ भारते पुण्यवान्विप्रो भुक्त्वा स्वर्गादिकं परम् ॥ पुनः सोऽपि भवेद्वि

प्रो न पुनः क्षत्रियादयः॥६७॥क्षत्रियो वाऽपि वैश्यो वा कल्पकोटिशतेन च ॥ तपसा ब्राह्मणत्वं च न प्राप्नोति श्रुतौ श्रुतम् ॥६८॥
स्वधर्मरहिता विप्रा नानायोनिं व्रजन्ति च ॥ भुक्ता च कर्मभोगं च विप्रयोनिं लभेत्पुनः॥६९॥ नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतै
रपि ॥ अवश्यवमेव भोक्तव्यं कल्पकोटिशतैरपि ॥ ७० ॥ अवश्यमेव भोक्तव्यं कृतं कर्म्म शुभाशुभम्॥ देवतीर्थे सहायेन कायव्यूहेन
शुध्यति॥७१॥एतत्ते कथितं सर्वं किं भूयः श्रोतुमिच्छसि॥७२॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे सावित्र्युपाख्याने
कर्म्मविपाके कर्मानुरूपस्थानगमनं नाम षड्विंशोऽध्यायः॥२६॥सावित्र्युवाच ॥ प्रयांति स्वर्गमन्यं च येन येनैव कर्म्मणा॥मानवाः
पुण्यवन्तश्च तन्मे व्याख्यातुमर्हसि ॥ १ ॥यम उवाच ॥ अन्नदानं च विप्राय यः करोति च भारते ॥ अन्नप्रमाणवर्षं च शक्रलोके
महीयते ॥२॥ अन्नदानात्परं दानं न भूतं न भविष्यति ॥ नात्र पात्रपरीक्षा स्यान्न कालनियमः क्वचित् ॥ ३ ॥ देवेभ्यो ब्राह्मणेभ्यो
वा दद्दाति चासनं यदि ॥ महीयते वह्निलोके वर्षाणामयुतं ध्रुवम् ॥ ४ ॥ यो ददाति च विप्राय दिव्यां धेनुं पयस्विनीम् ॥ तल्लो
समानवर्णं च वैकुण्ठे च महीयते ॥५॥ चतुर्गुणं पुण्यदिने तीर्थे शतगुणं फलम् ॥ दानं नारायणक्षेत्रे फलं कोटिगुणं भवेत् ॥ ६ ॥
गां यो ददाति विप्राय भारते भक्तिपूर्वकम् ॥ वर्षाणामयुतं चैव चन्द्रलोके महीयते ॥७॥ यश्चोभयमुखीदानं करोति ब्राह्मणाय च ॥
तल्लोमसमानवर्षं च वैकुण्ठे च महीयते॥८॥यो ददाति ब्राह्मणाय शालिग्रामं सवस्त्रकम् ॥ महीयते स वैकुण्ठे यावच्चन्द्रदिवाकरौ ॥९॥
यो ददाति ब्राह्मणाय छत्रं च सुमनोहरम् ॥ वर्षाणामयुतं सोऽपि मोदते वरुणालये ॥ १० ॥ विप्राय पादुकायुग्मं यो ददाति च
भारते ॥ महीयते वायुलोके वर्षाणामयुतं सति॥११॥यो ददाति ब्राह्मणाय शय्यां दिव्यां मनोहराम्॥ महीयते चन्द्रलोके यावच्चन्द्रदि
वाकरौ ॥ १२ ॥ यो ददाति प्रदीपं च देवाय ब्राह्मणाय च ॥ यावन्मन्वन्तरं सोऽपि ब्रह्मलोके महीयते ॥ १३ ॥ सम्प्राप्य मानवीं
योनिं चक्षुष्मांश्च भवेद्ध्रुवम् ॥ न याति यमलोकं च तेन पुण्येन सुन्दरि ॥ १४ ॥ करोति गजदानं च यो हि विप्राय भारते॥ याव
दिन्द्रादिदेवस्य लोके चार्धासने वसेत् ॥ १५ ॥ भारते योऽश्वदानं च करोति ब्राह्मणाय च ॥ मोदते वारुणे लोके यावदिन्द्राश्च

तुर्दश ॥ १६ ॥ प्रकृष्टां शिबिकां यो हि ददाति ब्राह्मणाय च ॥ महीयते विष्णुलोके यावन्मन्वन्तरं सति ॥ १७ ॥ यो ददाति
च विप्राय व्यजनं श्वेतचामरम् ॥ महीयते वायुलोके वर्षाणामयुतं ध्रुवम् ॥ १८ ॥ धान्याचलं यो ददाति ब्राह्मणाय च भारते ॥
स च धान्यप्रमाणाब्दं विष्णुलोके महीयते ॥ १९ ॥ ततः स्वयोनिं संप्राप्य चिरजीवी भवेत्सुखी ॥ दाता ग्रहीता तौ द्वौ च ध्रुवं
वैकुण्ठगामिनौ ॥ २० ॥ सततं श्रीहरेर्नाम भारते यो जपेन्नरः ॥ स एव चिरजीवी च ततो मृत्युः पलायते ॥ २१ ॥ यो नरो भारते
वर्षे दोलनं कारयेद्धरेः ॥ पूर्णिमारजनीशेषे जीवन्मुक्तो भवेन्नरः ॥ २२ ॥ इह लोके सुखं भुक्त्वा यात्यन्ते विष्णुमन्दिरम् ॥ निश्चितं
निवसेत्तत्र शतमन्वन्तरावधि ॥ २३ ॥ फलमुत्तरफाल्गुन्यां ततोऽपि द्विगुणं भवेत् ॥ कल्पान्तजीवी स भवेदित्याह कमलोद्भवः
॥ २४ ॥ तिलदानं ब्राह्मणाय यः करोति च भारते ॥ तिलप्रमाणवर्षं च मोदते विष्णुमन्दिरे ॥ २५ ॥ ततः स्वयोनिं संप्राप्य चिर
जीवी भवेत्सुखी ॥ ताम्रपात्रस्थदानेन द्विगुणं च फलं लभेत् ॥ २६ ॥ सालंकृतां च भोग्यां च सवस्त्रां सुन्दरीं प्रियाम् ॥ यो ददाति ब्राह्मणा
य भारते च पतिव्रताम् ॥ २७ ॥ महीयते चन्द्रलोके यावदिन्द्राश्चतुर्दश ॥ तत्र स्ववेश्यया सार्द्धं मोदते च दिवानिशम् ॥ २८ ॥
ततो गन्धर्वलोके च वर्षाणामयुतं सति ॥ दिवानिशं कौतुकेन चोर्वश्या सह मोदते ॥ २९ ॥ ततो जन्मसहस्रं च प्राप्नोति सुन्दरीं
प्रियाम् ॥ सतीं सौभाग्ययुक्तां च कोमलां प्रियवादिनीम् ॥ ३० ॥ ददाति सफलं वृक्षं ब्राह्मणाय च यो नरः ॥ फलप्रमाणवर्षं च
शक्रलोके महीयते ॥ ३१ ॥ पुनः स्वयोनिं संप्राप्य लभते सुतमुत्तमम् ॥ सफलानां च वृक्षाणां सहस्रं च प्रशंसितम् ॥ ३२ ॥
केवलं फलदानं च ब्राह्मणाय ददाति यः ॥ सुचिरं स्वर्गवासं च कृत्वा याति च भारतम् ॥ ३३ ॥ नानाद्रव्यसमायुक्तं नानासस्यसम
न्वितम् ॥ ददाति यश्च विप्राय भारते विपुलं गृहम् ॥ ३४ ॥ कुबेरलोके वसति स च मन्वन्तरावधि ॥ ततः स्वयोनिं संप्राप्य
महांश्च धनवान्भवेत् ॥ ३५ ॥ यो जनः सस्यसंयुक्तां भूमिं च रुचिरां सति ॥ ददाति भक्त्या विप्राय पुण्यक्षेत्रे च वा सति ॥
॥ ३६ ॥ महीयते स वैकुण्ठे मन्वन्तरशतं ध्रुवम् ॥ पुनः स्वयोनिं संप्राप्य महांश्च भूमिवान्भवेत् ॥ ३७ ॥ तं न त्यजति भूमिश्च

जन्मनां शतकं परम् ॥ श्रीमांश्च धनवांश्चैव पुत्रवांश्च प्रजेश्वरः ॥ ३८ ॥ सप्रजं च प्रकृष्टं च ग्रामं दद्याद्द्विजातये ॥ लक्षमन्वन्तरं
चैव वैकुण्ठे स महीयते ॥३९॥ पुनः स्वयोनिं संप्राप्य ग्रामलक्षं लभेद्ध्रुवम् ॥ न जहाति च तं पृथ्वी जन्मनां लक्षमेव च ॥४०॥
सप्रजं सुप्रकृष्टं च पञ्चसस्यसमन्वितम् ॥ नानापुष्करिणीवृक्षफलभोगसमन्वितम् ॥४१॥ नगरं यश्च विप्राय ददाति भारते भुवि ॥
महीयते स वैकुण्ठे दशलक्षेन्द्रकालकम्॥४२॥पुनः स्वयोनिं संप्राप्य राजेन्द्रो भारते भवेत्॥नगराणां च नियुतं लभते नात्र संशयः॥
॥ ४३ ॥ धरा तं न जहात्येव जन्मनां नियुतं ध्रुवम् ॥ परमैश्वर्य्यं संयुक्तो भवेदेव महीतले ॥४४॥ नगराणां च शतकं देशं यो हि
द्विजातये ॥ सुप्रकृष्टप्रजायुक्तं ददाति भक्तिपूर्वकम् ॥ ४५ ॥ वापीतडागसंयुक्तं नानावृक्षसमन्वितम् ॥ महीयते स वैकुण्ठे कोटिमन्व
न्तरावधि ॥ ४६ ॥ पुनः स्वयोनिं संप्राप्य जम्बूद्वीपपतिर्भवेत् ॥ परमैश्वर्य्यसंयुक्तो यथा शक्रस्तथा भुवि ॥ ४७ ॥ मही तं न जहा
त्येव जन्मनां कोटिमेव च ॥ कल्पान्तजीवी स भवेद्राजराजेश्वरो महान् ॥४८॥ स्वाधिकारं समग्रं च यो ददाति द्विजातये॥चतुर्गुण
फलं चातो भवेत्तस्य न संशयः ॥४९॥ जम्बूद्वीपं यो ददाति ब्राह्मणाय पतिव्रते ॥ फलं शतगुणं चातो भवेत्तस्य न संशयः ॥५०॥
सप्तद्वीपमहीदातुः सर्वतीर्थानुसेविनः॥सर्वेषां तपसां कर्त्तुः सर्वोपवासकारिणः॥५१॥सर्वदानप्रदातुश्च सर्वसिद्धेश्वरस्य च ॥ अस्त्येव
पुनरावृत्तिर्न भक्तस्य हरेरहो॥५२॥असंख्यब्रह्मणां पातं पश्यन्ति वैष्णवाः सति ॥ निवसन्ति हि गोलोके वैकुण्ठे वा हरेः पदे॥५३॥
विष्णुमन्त्रोपासकश्च विहाय मानवीं तनुम्॥बिभर्त्ति दिव्यरूपं च जन्ममृत्युजरापहम् ॥५४॥ लब्ध्वा विष्णोश्च सारूप्यं विष्णुसेवां
करोति च॥स च पश्यति गोलोके ह्यसंख्यं प्राकृतं लयम्॥५५॥नश्यन्ति देवाः सिद्धाश्च विश्वानि निखिलानि च॥कृष्णभक्ता न नश्यन्ति
जन्ममृत्युजराहराः॥५६॥कार्त्तिके तुलसीदानं करोति हरये च यः ॥ युगं पत्रप्रमाणं च मोदते हरिमन्दिरे ॥ ५७ ॥ पुनः स्वयोनिं
संप्राप्य हरिभक्तिं लभेद्ध्रुवम् ॥ सुखी च चिरजीवी च स भवेद्भारते भुवि॥५८॥घृतप्रदीपं हरये कार्त्तिके यो ददाति च ॥ पलप्रमाणं
वर्षं च मोदते हरिमन्दिरे ॥ ५९ ॥ पुनः स्वयोनिं संप्राप्य विष्णुभक्तिं लभेद्ध्रुवम् ॥ महाधनाढ्यः स भवेच्चक्षुष्मांश्चैव दीप्ति

मान् ॥ ६० ॥ माघे यः स्नाति गङ्गायामरुणोदयकालतः ॥ युगषष्टिसहस्राणि मोदते हरिमन्दिरे ॥ ६१ ॥ पुनः स्वयोनिं संप्राप्य विष्णुभक्तिं लभेद्ध्रुवम् ॥ जितेन्द्रियाणां प्रवरः स भवेद्भारते भुवि ॥ ६२ ॥ माघे यः स्नाति गंगायां प्रयागे चारुणोदये ॥ वैकुण्ठे मोदते सोऽपि लक्षमन्वन्तरावधि ॥ ६३ ॥ पुनः स्वयोनिं संप्राप्य विष्णुमन्त्रं लभेद्ध्रुवम् ॥ त्यक्त्वा च मानुषं देहं पुनर्याति हरेः पदम् ॥ ६४ ॥ नास्ति तत्पुनरावृत्तिर्वैकुण्ठाच्च महीतले ॥ करोति हरिदास्यं च लब्ध्वा सारूप्यमेव च ॥ ६५ ॥ नित्यस्नायी च गङ्गायां स पूतः सूर्य्यवद्भुवि ॥ पदे पदेऽश्वमेधस्य लभते निश्चितं फलम् ॥ ६६ ॥ तस्यैव पादरजसा सद्यः पूता वसुन्धरा ॥ मोदते स च वैकुण्ठे यावच्चन्द्रदिवाकरौ ॥ ६७ ॥ पुनः स्वयोनिं संप्राप्य तपस्विप्रवरो भवेत् ॥ स्वधर्मनिरतः शुद्धो विद्वांश्च सुजितेन्द्रियः ॥ ६८ ॥ मीनकर्कटयोर्मध्ये गाढं तपति भास्करे ॥ भारते यो ददात्येव जलमेव सुवासितम् ॥ ६९ ॥ मोदते स च वैकुण्ठे यावदिन्द्राश्चतुर्दश ॥ पुनः स्वयोनिं संप्राप्य सुखी निष्कपटो भवेत् ॥ ७० ॥ वैशाखे हरये भक्त्या यो ददाति च चन्दनम् ॥ युगषष्टिसहस्राणि मोदते विष्णुमन्दिरे ॥ पुनः स्वयोनिं संप्राप्य रूपवांश्च सुखी भवेत् ॥७१॥ वैशाखे सक्तुदानं च यः करोति द्विजातये ॥ सक्तुरेणुप्रमाणाब्दं मोदते विष्णुमन्दिरे ॥ ७२ ॥ करोति भारते यो हि कृष्णजन्माष्टमीव्रतम् ॥ शतजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥७३ ॥ वैकुण्ठे मोदते सोऽपि यावदिन्द्राश्चतुर्दश ॥ पुनः स्वयोनिं संप्राप्य कृष्णभक्तिं लभेद्ध्रुवम् ॥ ७४ ॥ इहैव भारते वर्षे शिवरात्रिं करोति यः ॥ मोदते शिवलोके च सप्तमन्वन्तरावधि ॥ ७५ ॥ शिवाय शिवरात्रौ च बिल्वपत्रं ददाति यः ॥ पत्रप्रमाणं च युगं मोदते शिवमन्दिरे ॥ ७६॥ पुनः स्वयोनिं संप्राप्य शिवभक्तिं लभेद्ध्रुवम् ॥ विद्यावान्पुत्रवाञ्छ्रीमान्प्रजावान्भूमिवान्भवेत् ॥ ७७ ॥ चैत्रमासेऽथवा माघे शङ्करं योऽर्चयेद्व्रती ॥ करोति नर्त्तनं भक्त्या वेत्रपाणिर्दिवानिशम् ॥ ७८ ॥ मासं वाप्यर्द्धमासं वा दश सप्तदिनानि वा ॥ दिनमानं युगं सोऽपि शिवलोके महीयते ॥ ७९ ॥श्रीरामनवमीं यो हि करोति भारते नरः॥ सप्तमन्वन्तरं यावन्मोदते विष्णुमन्दिरे ॥ ८० ॥ पुनः स्वयोनिं संप्राप्य रामभक्तिं लभेद्ध्रुवम् ॥ जितेन्द्रियाणां प्रवरो महांश्च

धार्मिको भवेत् ॥ ८१ ॥ शारदीयां महापूजां प्रकृतेर्यः करोति च ॥ महिषैश्छागलैर्मेषैरिक्षुकूष्माण्डकैस्तथा ॥ ८२ ॥ नैवेद्यैरुपहारैश्च धूपदीपादिभिस्तथा ॥ नृत्यगीतादिभिर्वाद्यैर्नानाकौतुकमङ्गलैः ॥ ॥ ८३ ॥ शिवलोके वसेत्सोऽपि सप्तमन्वन्तरावधि ॥ पुनः स्वयोनिं संप्राप्य बुद्धिं च निर्मलां लभेत् ॥ ८४ ॥ अचलां श्रियमाप्नोति पुत्रपौत्रादिवर्द्धिनीम् ॥ महाप्रभावयुक्तश्च गजवाजिसमन्वितः ॥ ८५ ॥ राजराजेश्वरः सोऽपि भवेदेव न संशयः ॥ भाद्रशुक्लाष्टमीं प्राप्य महालक्ष्मीं च योऽर्चयेत् ॥८६ ॥ नित्यं भक्त्या पक्षमेकं पुण्यक्षेत्रे च भारते ॥ दत्त्वा तस्यै प्रकृष्टानि चोपचाराणि षोडश ॥ ८७ ॥ वैकुण्ठे मोदते सोऽपि यावच्चन्द्रदिवाकरौ॥पुनः स्वयोनिं संप्राप्य राजराजेश्वरो भवेत् ॥ ८८ ॥ कार्तिकीपूर्णिमायां च कृत्वा तु रासमण्डलम् ॥ गोपानां शतकं कृत्वा गोपीनां शतकं तथा ॥ ८९ ॥ शिलायां प्रतिमायां वा श्रीकृष्णं राधया सह ॥ भारते पूजयेद्दत्त्वा चोपचाराणि षोडश ॥ ९० ॥ गोलोके च वसेत्सोऽपि यावद्वै ब्रह्मणो वयः ॥ भारतं पुनरागत्य हरिभक्तिं लभेद्ध्रुवम् ॥ ९१ ॥ क्रमेण सुदृढां भक्तिं लब्ध्वा मन्त्रं हरेरपि ॥ देहं त्यक्त्वा च गोलोकं पुनरेव प्रयाति सः ॥ ९२ ॥ तत्र कृष्णस्य सारूप्यं संप्राप्य पार्षदो भवेत् ॥ पुनस्तत्पतनं नास्ति जरामृत्युहरो महान् ॥ ९३ ॥ शुक्लां वाऽप्यथवा कृष्णां करोत्येकादशीं च यः ॥ वैकुण्ठे मोदते सोऽपि यावद्वै ब्रह्मणो वयः ॥ ९४ ॥ भारतं पुनरागत्य हरिभक्तिं लभेद्ध्रुवम् ॥ पुनर्याति च वैकुण्ठं न तस्य पतनं भवेत् ॥ ९५ ॥ भाद्रे शुक्ले च द्वादश्यां यः शक्रं पूजयेन्नरः ॥ षष्टिवर्षसहस्राणि शक्रलोके महीयते ॥ ९६ ॥ रविवारेऽर्कसंक्रान्त्यां सप्तम्यां शुक्लपक्षतः ॥ सम्पूज्यार्कं हविष्यान्नं यः करोति च भारते ॥ ९७ ॥ महीयते सोऽर्कलोके यावच्चन्द्रदिवाकरौ ॥ भारतं पुनरागत्य चारोगी श्रीयुतो भवेत् ॥ ९८ ॥ ज्येष्ठशुक्लचतुर्दश्यां सावित्रीं यो हि पूजयेत् ॥ महीयते ब्रह्मलोके सप्तमन्वन्तरावधि ॥ ९९ ॥ पुनर्महीं समागत्य श्रीमानतुलविक्रमः ॥ चिरजीवी भवेत्सोऽपि ज्ञानवान्सम्पदा युतः ॥ १०० ॥ माघस्य शुक्लपञ्चम्यां

---

१ कृष्ण इति पाठः ।

पूजयेद्यः सरस्वतीम् ॥ संयतो भक्तितो दत्त्वा चोपचाराणि षोडश॥१०१॥महीयते स वैकुण्ठे यावद्ब्रह्मदिवानिशम् ॥ संप्राप्य च पुन
र्जन्म स भवेत्कविपण्डितः ॥ १०२ ॥ गां सुवर्णादिकं यो हि ब्राह्मणाय ददाति च ॥ नित्यं जीवनपर्य्यन्तं भक्तियुक्तश्च भारते
॥ १०३ ॥ गवां लोमप्रमाणाब्दं द्विगुणं विष्णुमन्दिरे ॥ मोदते हरिणा सार्द्धं क्रीडाकौतुकमङ्गलैः ॥ १०४ ॥ ततः पुनरिहागत्य
विष्णुभक्तिं लभेद्ध्रुवम् ॥ ततः पुनरिहागत्य राजराजेश्वरो भवेत् ॥ गोमांश्च पुत्रवान्विद्वान्ज्ञानवान्सर्वतः सुखी ॥ १०५ ॥ भोजये
द्यो हि मिष्टान्नं ब्राह्मणेभ्यश्च भारते ॥ विप्रलोमप्रमाणाब्दं मोदते विष्णुमन्दिरे ॥ १०६ ॥ ततः पुनरिहागत्य स सुखी
धनवान्भवेत् ॥ विद्वान्सुचिरजीवी च श्रीमानतुलविक्रमः ॥ १०७ ॥ यो वक्ति वा ददात्येव हरेर्नामानि भारते ॥ युगनामप्रमाणं
च विष्णुलोके महीयते ॥ १०८ ॥ ततः पुनरिहागत्य विष्णुभक्तिं लभेद्ध्रुवम् ॥ यदि नारायणक्षेत्रे फलं कोटिगुणं लभेत् ॥ १०९ ॥
नाम्नां कोटिं हरेर्यो हि क्षेत्रे नारायणे जपेत् ॥ सर्वपापविनिर्मुक्तो जीवन्मुक्तो भवेद्ध्रुवम् ॥ ११० ॥ लभते न पुनर्जन्म वैकुण्ठे
स महीयते ॥ लभेद्विष्णोश्च सारूप्यं न तस्य पतनं भवेत् ॥ १११ ॥ यः शिवं पूजयेन्नित्यं कृत्वा लिङ्गं च पार्थिवम् ॥ यावज्जी
वनपर्य्यन्तं स याति शिवमन्दिरम् ॥ ११२ ॥ मृदां रेणुप्रमाणाब्दं शिवलोके महीयते ॥ ततः पुनरिहागत्य राजेन्द्रो भारते भवेत् ॥
॥ ११३ ॥ शिलां च योऽर्चयेन्नित्यं शिलातोयं च भक्षति ॥ महीयते स वैकुण्ठे यावद्वै ब्रह्मणः शतम् ॥ ११४ ॥ ततो लब्ध्वा
पुनर्जन्म हरिभक्तिं सुदुर्लभाम् ॥ महीयते विष्णुलोके न तस्य पतनं भवेत् ॥ ११५ ॥ तपांसि चैव सर्वाणि व्रतानि निखिलानि च ॥
कृत्वा तिष्ठति वैकुण्ठे यावदिन्द्राश्चतुर्दश ॥११६॥ ततो लब्ध्वा पुनर्जन्म राजेन्द्रो भारते भवेत् ॥ ततो मुक्तो भवेत्पश्चात्पुनर्जन्म न
विद्यते ॥ ११७ ॥ यः स्नाति सर्वतीर्थेषु भुवि कृत्वा प्रदक्षिणम् ॥ स च निर्वाणतां याति न तज्जन्म भवेद्भुवि ॥११८॥ पुण्यक्षेत्रे
भारते च योऽश्वमेधं करोति च ॥ अश्वलोमप्रमाणाब्दं शक्रस्यार्द्धासने वसेत् ॥ ११९ ॥ चतुर्गुणं राजसूये फलमाप्नोति मानवः ॥ नर

मेधेऽश्वमेधार्द्धं गोमेधे च तदेव च॥१२०॥पुत्रेष्टौ च तदर्द्धं च सुपुत्रं च लभेद्ध्रुवम्॥लभते लाङ्गलेष्टौ[१] च गोमेधसदृशं फलम्॥१२१॥
तत्समानं च विप्रेष्टौ वृद्धियागे च तत्फलम् ॥ पद्मयज्ञे तदर्द्धं च फलमाप्नोति मानवः ॥१२२॥ विशोके च विशोकं च पद्मार्द्धं स्व
र्गमश्नुते ॥ विजये विजयी राजा स्वर्गं पद्मसमं भवेत् ॥१२३॥ प्राजापत्ये प्रजालाभो भूवृद्धिर्भूभृतां भवेत् ॥ इह राजश्रियं लब्ध्वा
पद्मार्द्धं स्वर्गमश्नुते ॥ ऋद्धियागे महैश्वर्य्यं स्वर्गं पद्मसमं भवेत् ॥१२४॥ विष्णुयज्ञः प्रधानं च सर्वयज्ञेषु सुन्दरि ॥ब्रह्मणा च कृतः
पूर्वं महासम्भारसंयुतः ॥ १२५ ॥ बभूव कलहो यत्र दक्षशङ्करयोः सति ॥ शेपुश्च नन्दिनं विप्रा नन्दी विप्रांश्च कोपतः ॥ १२६ ॥
यतो हेतोर्दक्षयज्ञं बभञ्ज चन्द्रशेखरः ॥ चकार विष्णुयज्ञं च पुरा दक्षप्रजापतिः ॥१२७॥ धर्मश्च कश्यपश्चैव शेषश्चापि च कर्दमः ॥
स्वायम्भुवो मनुश्चैव तत्पुत्रश्च प्रियव्रतः ॥ १२८ ॥ शिवः सनत्कुमारश्च कपिलश्च ध्रुवस्तथा ॥ राजसूयसहस्राणां समृद्ध्या च
क्रतुर्भवेत् ॥ १२९ ॥ राजसूयसहस्राणां फलमाप्नोति निश्चितम् ॥ विष्णुयज्ञात्परो यज्ञो नास्ति वेदे फलप्रदः ॥ १३० ॥ बहुक
ल्पान्तजीवी च जीवन्मुक्तो भवेद्ध्रुवम् ॥ ज्ञानेन तेजसा चैव विष्णुतुल्यो भवेदिह ॥१३१॥ देवानां च यथा विष्णुर्वैष्णवानां यथा
शिवः ॥ शास्त्राणां च यथा वेदा आश्रमाणां च ब्राह्मणाः ॥१३२॥ तीर्थानां च यथा गङ्गा पवित्राणां च वैष्णवाः ॥ एकादशी व्रता
नां च पुष्पाणां तुलसी यथा ॥१३३॥ नक्षत्राणां यथा चन्द्रः पक्षिणां गरुडो यथा ॥ यथा स्त्रीणां च प्रकृतिराधाराणां वसुन्धरा ॥
॥ १३४ ॥ शीघ्रगानां चेन्द्रियाणां चञ्चलानां यथा मनः ॥ प्रजापतीनां ब्रह्मा च प्रजेशानां प्रजापतिः ॥ १३५ ॥ वृन्दावनं वनानां
च वर्षाणां भारतं यथा ॥ श्रीमतां च यथा श्रीश्च विदुषां च सरस्वती ॥ १३६ ॥ पतिव्रतानां दुर्गा च सौभाग्यानां च राधिका ॥
विष्णुयज्ञस्तथा वत्से यज्ञेषु च महानिति ॥१३७॥ अश्वमेधशतेनैव शक्रत्वं लभते ध्रुवम् ॥ सहस्रेण विष्णुपदं संप्राप पृथुरेव च ॥
॥ १३८ ॥ स्नानं च सर्वतीर्थेषु सर्वयज्ञेषु दीक्षणम् ॥ सर्वेषां च व्रतानां च तपसां फलमेव च ॥ १३९ ॥ पाठश्चतुर्णां वेदानां प्राद
क्षिण्यं भुवस्तथा ॥ फलं बीजमिदं सर्वं मुक्तिदं कृष्णसेवनम् ॥ १४० ॥ पुराणेषु च वेदेषु चेतिहासेषु सर्वतः ॥ निरूपितं सार

---

[१] वानुकूलेष्टौ इति पाठः ।

भूतं कृष्णपादाम्बुजार्चनम् ॥ १४१ ॥ तद्वर्णनं च तद्ध्यानं तन्नामगुणकीर्त्तनम् ॥ तत्स्तोत्रं स्मरणं चैव वन्दनं जप एव च ॥ १४२ ॥ तत्पादोदकनैवेद्यभक्षणं नित्यमेव च ॥ सर्वसम्मतमित्येवं सर्वेप्सितमिष्टं सति ॥ १४३ ॥ भज कृष्णं परं ब्रह्म निर्गुणं प्रकृतेः परम् ॥ गृहाण स्वामिनं वत्से सुखं गच्छ स्वमन्दिरम् ॥ १४४ ॥ एतत्ते कथितं सर्वं विपाकं कर्मणां नृणाम् ॥ सर्वेप्सितं सर्वमतं परं तत्त्वप्रदं नृणाम् ॥ १४५ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे सावित्रीयमसंवादे सावित्र्युपाख्याने शुभकर्मविपाकप्रकथनं नाम सप्तविंशोऽध्यायः ॥ २७ ॥ श्रीनारायण उवाच॥ हरेरुत्कीर्त्तनं श्रुत्वा सावित्री यमवक्त्रतः ॥ साश्रुनेत्रा सपुलका यमं पुनरुवाच सा ॥ १ ॥ सावित्र्युवाच ॥ हरेरुत्कीर्त्तनं धर्म स्वकुलोद्धारकारणम् ॥ श्रोतृणां चैव वक्तृणां जन्ममृत्युजराहरम् ॥ २ ॥ दानानां च व्रतानां च सिद्धीनां तपसां परम् ॥ योगानां चैव वेदानां सेवनं कीर्त्तनं हरेः ॥ ३ ॥ मुक्तत्वममरत्वं वा सर्वसिद्धित्वमेव वा ॥ श्रीकृष्णसेवनस्यैव कलां नार्हन्ति षोडशीम् ॥४॥ भजामि केन विधिना श्रीकृष्णं प्रकृतेः परम् ॥ मूढां मामबलां तात वद वेदविदां वर ॥ ५ ॥ शुभकर्म्मविपाकं च श्रुतं नृणां मनोहरम् ॥ कर्म्माशुभविपाकं च तन्मे व्याख्यातुमर्हसि ॥ ६ ॥ इत्युक्त्वा सा सती ब्रह्मन्भक्तिनम्रात्मकन्धरा ॥ तुष्टाव धर्म्मराजं च वेदोक्तेन स्तवेन च ॥ ७ ॥ सावित्र्युवाच ॥ तपसा धर्म्ममाराध्य पुष्करे भास्करः पुरा ॥ धर्मांशं यं सुतं प्राप धर्मराजं नमाम्यहम् ॥ ८ ॥ समता सर्वभूतेषु यस्य सर्वस्य साक्षिणः ॥ अतो यन्नाम शमनमिति तं प्रणमाम्यहम् ॥ ९ ॥ येनान्तश्च कृतो विश्वे सर्वेषां जीविनां परम् ॥ कर्मानुरूपकालेन तं कृतान्तं नमाम्यहम् ॥ १० ॥ बिभर्त्ति दण्डं दण्ड्याय पापिनां शुद्धिहेतवे ॥ नमामि तं दण्डधरं यः शास्ता सर्वकर्म्मणाम् ॥ ११ ॥ विश्वे यः कलयत्येव सर्वायुश्चापि सन्ततम् ॥ अतीव दुर्निवार्य्यश्च तं कालं प्रणमाम्यहम् ॥ १२ ॥ तपस्वी वैष्णवो धर्म्मी संयमी विजितेन्द्रियः ॥ जीविनां कर्म्मफलदं तं यमं प्रणमाम्यहम् ॥ १३ ॥ स्वात्मारामश्च सर्वज्ञो मित्रं पुण्यकृतां भवेत् ॥ पापिनां क्लेशदो यश्च पुण्यं मित्रं नमाम्यहम् ॥ १४ ॥ यज्जन्म ब्रह्मणो वंशे ज्वलन्तं ब्रह्मतेजसा॥

यो ध्यायति परं ब्रह्म ब्रह्मवंशं नमाम्यहम् ॥ १५ ॥ इत्युक्त्वा सा च सावित्री प्रणनाम यमं मुने ॥ यमस्तां विष्णुभजनं कर्म्मपाकमुवाच ह ॥ १६ ॥ इदं यमाष्टकं नित्यं प्रातरुत्थाय यः पठेत् ॥ यमात्तस्य भयं नास्ति सर्वपापात्प्रमुच्यते ॥ १७ ॥ महापापी यदि पठेन्नित्यं भक्त्या च नारद ॥ यमः करोति तं शुद्धं कायव्यूहेन निश्चितम् ॥१८॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे सावित्रीकृतयमस्तोत्रं नामाष्टाविंशोऽध्यायः ॥२८॥

श्रीनारायण उवाच ॥ यमस्तस्यै विष्णुमन्त्रं दत्त्वा च विधिपूर्वकम् ॥ कर्म्माशुभविपाकं च तामुवाच रवेः सुतः ॥ १ ॥ यम उवाच ॥ शुभकर्मविपाकं च श्रुतं नानाविधं सति ॥ कर्माशुभविपाकं च कथयामि निशामय ॥ २ ॥ नानाप्रकारं स्वर्गं च याति जीवः सुकर्म्मणा ॥ कुकर्म्मणा च नरकं याति नानाविधं नरः ॥ ३ ॥ नरकाणां च कुण्डानि सन्ति नानाविधानि च ॥ नानापुराणभेदेन नामभेदानि तानि च ॥४॥ विस्तृतानि गभीराणि क्लेशदानि च जीविनाम् ॥ भयङ्कराणि घोराणि हे वत्से कुत्सितानि च ॥ ५ ॥ षडशीतिश्च कुण्डानि संयमन्यां च सन्ति च ॥ निबोध तेषां नामानि प्रसिद्धानि श्रुतौ सति ॥६॥ वह्निकुण्डं तप्तकुण्डं क्षमकुण्डं भयानकम् ॥ विट्कुण्डं मूत्रकुण्डं च श्लेष्मकुण्डं च दुःसहम् ॥ ७ ॥ गरकुण्डं दूषिकाकुण्डं वसाकुण्डं तथैव च ॥ शुक्रकुण्डमसृक्कुण्डमश्रुकुण्डं च कुत्सितम् ॥ ८ ॥ कुण्डं गात्रमलानां च कर्णविट्कुण्डमेव च ॥ मज्जाकुण्डं मांसकुण्डं नखकुण्डं च दुस्तरम् ॥ ९ ॥ लोम्नां कुण्डं केशकुण्डमस्थिकुण्डं च दुःखदम् ॥ ताम्रकुण्डं लौहकुण्डं प्रतप्तं क्लेशदं महत् ॥१०॥ तीक्ष्णकण्टककुण्डं च विषकुण्डं च विघ्नदम् ॥ धर्म्मकुण्डं तप्तसुराकुण्डं चापि प्रकीर्त्तितम् ॥ ११ ॥ प्रतप्ततैलकुण्डं च दन्तकुण्डं च दुर्वहम् ॥ कृमिकुण्डं पूयकुण्डं सर्पकुण्डं दुरन्तकम् ॥ १२ ॥ मशकुण्डं दंशकुण्डं भीमं गरलकुण्डकम् ॥ कुण्डं च वज्रदंष्ट्राणां वृश्चिकानां च सुव्रते ॥ १३ ॥ शरकुण्डं शूलकुण्डं खड्गकुण्डं च भीषणम् ॥ गोलकुण्डं नक्रकुण्डं काककुण्डं शुचास्पदम् ॥ १४ ॥ सञ्चालकुण्डं वाजकुण्डं बन्धकुण्डं सुदुस्तरम् ॥ तप्तपाषाणकुण्डं च तीक्ष्णपाषाणकुण्डकम् ॥ १५ ॥ लालाकुण्डमसिकुण्डं चूर्णकुण्डं सुदारुणम् ॥ चक्रकुण्डं वज्रकुण्डं कूर्म्मकुण्डं महोल्बणम् ॥ १६ ॥ ज्वाल

कुण्डं भस्मकुण्डं पूतिकुण्डं च सुन्दरि ॥ तप्तसूर्यमसीपत्रं क्षुरधारं सुचीमुखम् ॥ १७ ॥ गोधामुखं नक्रमुखं गजदंशं च गोमुखम् ॥
कुम्भीपाकं कालसूत्रमवटोदमरुन्तुदम्॥ १८ ॥ पांशुभोजं पाशवेष्टं शूलप्रोतं प्रकम्पनम् ॥ उल्कामुखमन्धकूपं वेधनं दण्डताडनम् ॥
॥ १९ ॥ जालबन्धं देहचूर्णं दलनं शोषणङ्करम् ॥ सर्पज्वालामुखं जिह्मधूमान्धं नागवेष्टनम् ॥२०॥ कुण्डान्येतानि सावित्रि पापिनां
क्लेशदानि च ॥ नियुक्तैः किङ्करगणै रक्षितानि च सन्ततम् ॥ २१ ॥ दण्डहस्तैः शूलहस्तैः पाशहस्तैर्भयङ्करैः ॥ शक्तिहस्तैर्गदाहस्तैर्म
दमत्तैश्च दारुणैः ॥ २२ ॥ तमोयुक्तैर्दयाहीनैर्दुर्निवार्य्यैं च सर्वतः ॥ तेजस्विभिश्च निःशङ्कैस्ताम्रपिङ्गललोचनैः ॥२३ ॥ योगयुक्तैः
सिद्धयोगैर्नानारूपधरैर्वरैः ॥ आसन्नमृत्युभिर्दृष्टैः पापिभिः सर्वजीविभिः ॥ २४ ॥ स्वकर्म्मनिरतैः शैवैः शाक्तैः सौरैश्च गाणपैः ॥
अदृष्टैः पुण्यकृद्भिश्च सिद्धयोगिभिरेव च ॥ २५ ॥ स्वधर्म्मनिरतैर्वाऽपि विरतैर्वा स्वतन्त्रकैः ॥ बलवद्भिश्च निःशङ्कैः स्वप्नदृष्टैश्च
वैष्णवैः ॥ २६ ॥ एतत्ते कथितं साध्वि कुण्डसंख्यानिरूपणम् ॥ येषां निवासो यत्कुंडे निबोध कथयामि ते ॥ २७ ॥ इति श्रीब्रह्म
वैवर्त्ते महापुराणे नारदनारायणसंवादे द्वितीये प्रकृतिखण्डे सावित्र्युपाख्याने यमसावित्रीसंवादे नरककुण्डसंख्यानं नामैकोनत्रिंशो
ऽध्यायः ॥ २९ ॥ यम उवाच ॥ हरिसेवारतः शुद्धो योगी सिद्धो व्रती सति ॥ तपस्वी ब्रह्मचारी च न याति नरकं यतिः
॥ १ ॥ कटुवाचा बान्धवांश्च खलत्वेन च यो नरः ॥ दग्धान्करोति बलवान्वह्निकुण्डं प्रयाति सः ॥ २ ॥ गात्रलोमप्रमा
णाब्दं तत्र स्थित्वा हुताशने ॥ पशुयोनिमवाप्नोति रौद्रे दग्धस्त्रिजन्मनि ॥ ३ ॥ ब्राह्मणं तृषितं क्षुब्धं प्रतप्तं गृहमागतम् ॥
न भोजयति यो मूढस्तप्तकुण्डं प्रयाति सः ॥ ४ ॥ तत्र लोमप्रमाणाब्दं स्थित्वा तत्र च दुःखितः ॥ तप्तस्थले वह्निकुण्डे पक्षी च
सप्तजन्मसु ॥ ५ ॥ रविवारार्कसंक्रान्त्याममायां श्राद्धवासरे ॥ वस्त्राणां क्षारसंयोगं करोति यो हि मानवः ॥ ६ ॥ स याति क्षार
कुण्डं च सूत्रमानाब्दमेव च ॥ स व्रजेद्रजकीं योनिं सप्तजन्मसु भारते ॥ ७ ॥ स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः ॥ षष्टिवर्षस
हस्राणि विट्कुण्डं च प्रयाति सः ॥ ८ ॥ षष्टिवर्षसहस्राणि विड्भोजी तत्र तिष्ठति ॥ षष्टिवर्षसहस्राणि विट्कृमिश्च पुनर्भुवि ॥९॥

परकीयतडागे च तडागं यः करोति च ॥ उत्सृजेद्दैवदोषेण मूत्रकुण्डं प्रयाति सः ॥ १० ॥ तद्रेणुमानवर्षं च तद्भोजी तत्र तिष्ठति ॥ भारते गोधिका चैव स भवेत्सप्तजन्मसु ॥ ११ ॥ एकाकी मिष्टमश्नाति श्लेष्मकुण्डं प्रयाति सः ॥ पूर्णमब्दशतं चैव तद्भोजी तत्र तिष्ठति ॥ १२ ॥ पूर्णमब्दशतं चैव स प्रेतो भारते भवेत् ॥ श्लेष्ममूत्रगरं चैव पूयं भुङ्क्ते ततः शुचिः ॥ १३ ॥ पितरं मातरं चैव गुरुं भार्य्यां सुतं सुताम् ॥ यो न पुष्णात्यनाथं च गरकुण्डं प्रयाति सः ॥ १४ ॥ पूर्णमब्दसहस्रं च तद्भोजी तत्र तिष्ठति ॥ ततो व्रजेद्भूतयोनिं शतवर्षं ततः शुचिः ॥ १५ ॥ दृष्ट्वातिथिं वक्रचक्षुः करोति यो हि मानवः ॥ पितृदेवास्तस्य जलं न गृह्णन्ति च पापिनः ॥ १६ ॥ यानि कानि च पापानि ब्रह्महत्यादिकानि च ॥ इहैव लभते चान्ते दूषिकाकुण्डमाव्रजेत्॥ १७ ॥ पूर्णमब्दशतं चैव तद्भोजी तत्र तिष्ठति ॥ ततो नरो भवेद्भूमौ दरिद्रः सप्तजन्मसु ॥ १८ ॥ दत्त्वा द्रव्यं च विप्राय चान्यस्मै दीयते यदि॥स तिष्ठति वसाकुण्डे तद्भोजी शतवत्सरम्॥१९॥ततो भवेत्स चण्डालस्त्रिजन्मनि ततः शुचिः॥कृकलासो भवेत्सोऽपि भारते सप्तजन्मसु ॥ ततो भवेन्मानवश्च दरिद्रोऽल्पायुरेव च ॥२०॥ पुमांसं कामिनी वाऽपि कामिनीं वा पुमानथ ॥ यः शुक्रं पाययत्येव[1] शुक्रकुण्डं प्रयाति सः ॥ २१ ॥ पूर्णमब्दशतं चैव तद्भोजी तत्र तिष्ठति ॥ योनिकृमिः शताब्दं च भवेद्भुवि ततः शुचिः ॥ २२ ॥ सन्ताड्य च गुरुं विप्रं रक्तपातं च कारयेत् ॥ स च तिष्ठत्यसृक्कुण्डे तद्भोजी शतवत्सरम्॥२३॥ततो भवेद्व्याधजन्म सप्तजन्मसु भारते ॥ ततः शुद्धिमवाप्नोति मानवश्च क्रमेण च ॥ २४ ॥ अश्रु स्रवन्तं गायन्तं भक्तं दृष्ट्वा च गद्गदम् ॥ श्रीकृष्णगुणसंगीते हसत्येव हि यो नरः ॥ २५ ॥ स वसेदश्रुकुण्डे च तद्भोजी शतवत्सरम् ॥ ततो भवेत्स चण्डालस्त्रिजन्मनि ततः शुचिः ॥ २६ ॥ करोति खलतां शश्वदशुद्धहृदयो नरः ॥ कुण्डं गात्रमलानां च स च याति दशाब्दकम् ॥ २७ ॥ ततः स गार्दभी योनिमवाप्नोति त्रिजन्मनि ॥ त्रिजन्मनि च शार्गालीं ततः शुद्धो भवेद्ध्रुवम् ॥ २८ ॥ बधिरं यो हसत्येव निन्दत्येव हि मानवः ॥ स वसेत्कर्ण

---

[1] पातयत्येवेति पाठः ।

विट्कुण्डे तद्भोजी शतवत्सरम् ॥ २९ ॥ ततो भवेत्स बधिरो दरिद्रः सप्तजन्मसु ॥ सप्तजन्मस्वङ्गहीनस्ततः शुद्धिं लभेद्ध्रुवम् ॥
॥ ३० ॥ लोभात्स्वपालनार्थाय जीविनं हन्ति यो नरः ॥ मज्जाकुण्डे वसेत्सोऽपि तद्भोजी लक्षवर्षकम् ॥ ३१ ॥ ततो भवेत्स
शशको मीनश्च सप्तजन्मसु ॥ एणादयश्च कर्म्मभ्यस्ततः शुद्धिं लभेद्ध्रुवम् ॥३२॥ स्वकन्यापालनं कृत्वा विक्रीणाति हि यो नरः ॥
अर्थलोभान्महामूढो मांसकुण्डं प्रयाति सः ॥ ३३ ॥ कन्यालोमप्रमाणाब्दं तद्भोजी तत्र तिष्ठति ॥ तं च कुण्डे प्रहारं च करोति
यमकिङ्करः ॥ ३४ ॥ मांसभारं मूर्ध्नि कृत्वा रक्तधारां लिहेत्क्षुधा ॥ ततो हि भारते पापी कन्याविट्सु कृमिर्भवेत् ॥ ३५ ॥
षष्टिवर्षसहस्राणि व्याधश्च सप्तजन्मसु ॥ त्रिजन्मनि वराहश्च कुक्कुरस्सप्तजन्मसु ॥ ३६ ॥ सप्तजन्मसु मण्डूको जलौ
काः सप्तजन्मसु ॥ सप्तजन्मसु काकश्च ततः शुद्धिं लभेद्ध्रुवम् ॥ ३७ ॥ व्रतानामुपवासानां श्राद्धादीनां च संयमे ॥
न करोति क्षौरकर्म सोऽशुचिः सर्वकर्मसु ॥ ३८ ॥ स च तिष्ठति कुण्डेषु नखादीनां च सुन्दरि ॥ तदेव दिनमानाब्दं
तद्भोजी दण्डताडितः ॥ ३९ ॥ सकेशं पार्थिवं लिङ्गं यो वाऽर्चयति भारते ॥ स तिष्ठति केशकुण्डे मृद्रेणुमानवर्षकम् ॥ ४० ॥
तदन्ते यावनीं योनिं प्रयाति हरकोपतः ॥ शताब्दाच्छुद्धिमाप्नोति स्वकुलं लभते ध्रुवम् ॥ ४१ ॥ पितॄणां यो विष्णुपदे पिण्डं
नैव ददाति च ॥ स तिष्ठत्यस्थिकुण्डे च स्वलोमाब्दं महोल्बणे ॥ ४२ ॥ ततः स्वयोनिं संप्राप्य खञ्जः सप्तसु जन्मसु ॥ भवेन्महा
दरिद्रश्च ततः शुद्धो हि दण्डतः ॥ ४३ ॥ यः सेवते महामूढो गुर्विणीं च स्वकामिनीम् ॥ प्रतप्तताम्रकुण्डे च शतवर्षं स तिष्ठति॥
॥ ४४ ॥ अवीरान्नं च यो भुङ्क्ते ऋतुस्नातान्नमेव च ॥ लौहकुण्डे शताब्दं च स च तिष्ठति तप्तके ॥ ४५ ॥ स व्रजेद्राजकीं योनिं
कर्मकारीं च सप्तसु ॥ महाव्रणी दरिद्रश्च ततः शुद्धो भवेन्नरः ॥ ॥ ४६ ॥ यो हि घर्माक्तहस्तेन देवद्रव्यमुपस्पृशेत् ॥ शतवर्षप्रमाणं
च घर्मकुण्डे स तिष्ठति ॥ ४७ ॥ यः शूद्रेणाभ्यनुज्ञातो भुङ्क्ते शूद्रान्नमेव च ॥ स च तप्तसुराकुण्डे शताब्दं तिष्ठति द्विजः ॥ ४८॥
ततो भवेच्छूद्रयाजी ब्राह्मणः सप्तजन्मसु ॥ शूद्रश्राद्धान्नभोजी च ततः शुद्धो भवेद् ध्रुवम् ॥ ॥ ४९ ॥ वाग्दुष्टा कटुवाचा या ताड

येत्स्वामिनं सदा ॥ तीक्ष्णकण्टककुण्डे सा तद्भोजी तत्र तिष्ठति ॥ ९० ॥ ताडिता यमदूतेन दण्डेन च चतुर्युगम् ॥ तत उच्चैः
श्रवाः सप्तजन्मस्वेव ततः शुचिः ॥९१॥ विषेण जीविनं हन्ति निर्दयो यो हि पामरः ॥ विषकुंडे च तद्भोजी सहस्राब्दं च तिष्ठति ॥
॥९२॥ ततो भवेन्नृघाती च व्रणी स्यात्सप्तजन्मसु ॥ सप्तजन्मसु कुष्ठी च ततः शुद्धो भवेद्ध्रुवम् ॥९३॥ दण्डेन ताडयेद्यो हि वृषं
च वृषवाहकः ॥ भृत्यद्वारा स्वतन्त्रो वा पुण्यक्षेत्रे च भारते ॥ ९४ ॥ प्रतप्ततैलकुण्डे च स तिष्ठति चतुर्युगम् ॥ गवां लोमप्रमाणाब्दं
वृषो भवति तत्परम् ॥ ९५ ॥ दन्तेन[1] हन्ति जीवं यो लौहेन बडिशेन वा ॥ दन्त[2]कुण्डे वसेत्सोऽपि वर्षाणामयुतं सति ॥ ९६ ॥ ततः
स्वयोनिं संप्राप्य चोदरव्याधिसंयुतः॥क्लिष्टेन जन्मनैकेन ततः शुद्धो भवेन्नरः॥९७॥यो भुंक्ते च वृथा मांसं मत्स्यभोजी च ब्राह्मणः ॥
हरेरनैवेद्यभोजी कृमिकुण्डं प्रयाति सः ॥ ९८ ॥ स्वलोममानवर्षं च तद्भोजी तत्र तिष्ठति ॥ ततो भवेन्म्लेच्छजातिस्त्रिजन्मनि ततो
द्विजः ॥९९॥ ब्राह्मणः शूद्रयाजी यः शूद्रश्राद्धान्नभोजकः ॥ शूद्राणां शवदाही च पूयकुण्डं व्रजेद्ध्रुवम् ॥६०॥ यावल्लोमप्रमाणाब्दं
यजमानस्य सुव्रते ॥ ताडितो यमदूतेन तद्भोजी तत्र तिष्ठति ॥ ६१ ॥ ततो भारतमागत्य स शूद्रः सप्तजन्मसु ॥ महाशूली दरि
द्रश्च ततः शुद्धः पुनर्द्विजः ॥ ६२ ॥ लघुं क्रूरं महान्तं वा सर्पं हन्ति च यो नरः ॥ स्वात्मलोमप्रमाणाब्दं सर्पकुण्डं प्रयाति सः
॥ ६३ ॥ सर्पेण भक्षितः सोऽपि यमदूतेन ताडितः ॥ वसेच्च सर्पविट्जीवी ततः सर्पो भवेद्ध्रुवम् ॥ ६४ ॥ ततो भवेन्मानवश्चाप्य
ल्पायुर्दद्रुसंयुतः ॥ महाक्लेशेन तन्मृत्युः सर्पेण भक्षणं ध्रुवम् ॥ ६५ ॥ विधिं प्रकल्प्य जीवांश्च क्षुद्रजन्तूंश्च हन्ति यः ॥ सदंशम
शके कुण्डे जन्ममानदिनाब्दकम् ॥ ६६ ॥ दिवानिशं भक्षितस्तैरनाहारश्च शब्दकृत् ॥ बद्धहस्तपदादिश्च यमदूतेन ताडितः॥ ६७ ॥
ततो भवेत्क्षुद्रजन्तुर्जातिर्वै यावती स्मृता ॥ ततो भवेन्मानवश्च सोऽङ्गहीनस्ततः शुचिः ॥ ६८ ॥ यो मूढो मधु गृह्णाति हत्वा च
मधुमक्षिकाः ॥ स एव गरले कुंडे जीवमानदिनाब्दकम् ॥ ६९ ॥ भक्षितो गरलैर्दग्धो यमदूतेन ताडितः ॥ ततो हि मक्षिकाजाति

---

[1] कुन्तेनेति पाठः। [2] कुन्त इति पाठः।

स्ततः शुद्धो भवेन्नरः ॥ ७० ॥ दण्डं करोत्यदड्ये च विप्रे दण्डं करोति च ॥ स कुण्डं वज्रदंष्ट्राणां कीटानां वै प्रयाति च ॥ ७१ ॥ तल्लोममानवर्षं च तत्र तिष्ठत्यहर्निशम् ॥ शब्दकृद्भक्षितस्तैश्च ततः शुद्धो भवेन्नरः ॥ ७२ ॥ अर्थलोभेन यो भूपः प्रजादण्डं करोति च ॥ वृश्चिकानां च कुण्डेषु तल्लोमाब्दं वसेद्ध्रुवम् ॥ ७३ ॥ ततो वृश्चिकजातिश्च सप्तजन्मसु जायते ॥ ततो नरश्चाङ्गहीनो व्याधियुक्तो भवेद्ध्रुवम् ॥ ७४ ॥ ब्राह्मणः शस्त्रधारी यो ह्यन्येषां धावको भवेत् ॥ सन्ध्याहीनश्च मूढश्च हरिभक्तिविहीनकः ॥ ७५ ॥ स तिष्ठति स्वलोमाब्दं कुण्डादिषु शरादिषु ॥ विद्धः शरादिभिः शश्वत्ततः शुद्धो भवेन्नरः ॥ ७६ ॥ कारागारे सान्धकारे निबध्नाति प्रजाश्च यः ॥ प्रमत्तः स्वल्पदोषेण गोलकुण्डं प्रयाति सः ॥ ॥ ७७ ॥ तत्कुण्डं तप्ततोयाक्तं सान्धकारं भयङ्करम् ॥ तीक्ष्णदंष्ट्रैश्च कीटैश्च संयुक्तं गोलकुण्डकम् ॥ ७८ ॥ कीटैर्विद्धो वसेत्तत्र प्रजालोमाब्दमेव च ॥ ततो भवेन्नीचभृत्यस्ततः शुद्धो नरो भुवि ॥ ७९ ॥ सरोवरादुत्थितांश्च नक्रादीन्हन्ति यः सति ॥ नक्रकण्टकमानाब्दं नक्रकुण्डं प्रयाति सः ॥ ८० ॥ ततो नक्रादिजातिश्च भवेन्नद्यादिषु ध्रुवम् ॥ ततः सद्यो विशुद्धो हि दण्डेनैव नरः पुनः ॥ ८१ ॥ वक्षःश्रोणीस्तनास्यं च यः पश्यति परस्त्रियाः ॥ कामेन कामुको यो हि पुण्यक्षेत्रे च भारते ॥८२॥ स वसेत्काककुण्डं च काकैश्च क्षुण्णलोचनः ॥ ततः स्वलोममानाब्दं ततश्चान्धस्त्रिजन्मनि॥८३॥ सप्तजन्मदरिद्रश्च महाक्रूरश्च पातकी ॥ भारते स्वर्णकारश्च स च स्वर्णवणिक्ततः ॥ ८४ ॥ यो भारते ताम्रचौरो लौहचौरश्च सुन्दरि ॥ स स्वलोमप्रमाणाब्दं वज्रकुण्डं प्रयाति वै ॥ ८५ ॥ तत्रैव वज्रविड्भोजी वज्रैश्च क्षुण्णलोचनः ॥ ताडितो यमदूतेन ततः शुद्धो भवेन्नरः ॥ ८६ ॥ भारते देवचौरश्च देवद्रव्यादिहारकः ॥ सुदुष्करे वज्रकुण्डे स्वलोमाब्दं वसेद्ध्रुवम् ॥ ८७ ॥ देहदग्धो हि तद्वज्रैरनाहारश्च शब्दकृत् ॥ ताडितो यमदूतेन ततः शुद्धो भवेन्नरः ॥ ॥ ८८ ॥ रौप्यगव्यां शुकानां च यश्चौरः सुरविप्रयोः ॥ तप्तपाषाणकुण्डे च स्वलोमाब्दं वसेद्ध्रुवम् ॥ ८९ ॥ त्रिजन्मनि बकः सोऽपि श्वेतहंसस्त्रिजन्मनि ॥ जन्मैकं शङ्खचिल्लश्च ततोऽन्ये श्वेतपक्षिणः ॥ ९० ॥ ततो रक्तविकारी च शूली वै मानवो भवेत् ॥ सप्तजन्मसु चाल्पायुस्ततः शुद्धो भवेन्नरः ॥ ९१ ॥ रैत्यकांस्या

दिपात्रं च यो हरेत्सुरविप्रयोः ॥ तीक्ष्णपाषाणकुण्डे च स्वलोमाब्दं वसेद्ध्रुवम् ॥ ९२ ॥ स भवेदश्वजातिश्च भारते सप्तजन्मसु ॥ ततोऽ
धिकाङ्गयुक्तश्च पादरोगी ततः शुचिः ॥ ९३ ॥ पुंश्चल्यन्नं च यो भुंक्ते पुंश्चलीजीव्यजीवनः ॥ स्वलोममानवर्षं च लालाकुण्डे वसे
द्ध्रुवम् ॥ ९४ ॥ ताडितो यमदूतेन तद्भोजी तत्र तिष्ठति ॥ ततश्चक्षुश्शूलरोगी ततः शुद्धः क्रमेण सः ॥ ९५ ॥
म्लेच्छसेवी मषीजीवी यो विप्रो भारते भुवि ॥ स च तप्तमषीकुण्डे स्वलोमाब्दं वसेद्ध्रुवम् ॥ ९६ ॥ ताडितो यम
दूतेन तद्भोजी तत्र तिष्ठति ॥ ततस्त्रिजन्मनि भवेत्कृष्णवर्णः पशुः सति ॥ ९७ ॥ त्रिजन्मनि भवेच्छागः कृष्णसर्पस्त्रिजन्मनि ॥
ततश्च तालवृक्षश्च ततः शुद्धो भवेन्नरः ॥ ९८ ॥ धान्यादि सस्यं ताम्बूलं यो हरेत्सुरविप्रयोः ॥ आसनं च तथा तल्पं चूर्णकुण्डं प्रया
ति सः ॥ ९९ ॥ शताब्दं तत्र निवसेद्यमदूतेन ताडितः ॥ ततो भवेन्मेषजातिः कुक्कुटश्च त्रिजन्मनि ॥ १०० ॥ ततो भवेन्मानवश्च
कासव्याधियुतो भुवि ॥ वंशहीनो दरिद्रश्चाप्यल्पायुश्च ततः शुचिः ॥ १०१ ॥ चक्रं करोति विप्राणां हृत्वा द्रव्यं च यो नरः ॥ स
वसेच्चक्रकुण्डे च शताब्दं दंडताडितः ॥ १०२ ॥ ततो भवेन्मानवश्च तैलकारस्त्रिजन्मनि ॥ व्याधियुक्तो भवेद्रोगी वंशहीनस्ततः
शुचिः ॥ १०३ ॥ बान्धवेषु च विप्रेषु कुरुते वक्रतां नरः॥ प्रयाति वज्रकुण्डं च वसेत्तत्र युगं सति ॥ १०४ ॥ ततो भवेत्स वक्रांगो
हीनाङ्गः सप्तजन्मसु ॥ दरिद्रो वंशहीनश्च भार्य्याहीनस्ततः शुचिः ॥ १०५ ॥ शयने कूर्ममांसं च ब्राह्मणो यो हि भक्षति ॥ कूर्म्म
कुण्डे वसेत्सोऽपि शताब्दं कूर्म्मभक्षितः॥१०६॥ततो भवेत्कूर्म्मजन्म त्रिजन्मनि च सूकरः॥त्रिजन्मनि बिडालश्च मयूरश्च त्रिजन्मनि
॥ १०७ ॥ घृततैलादिकं चैव यो हरेत्सुरविप्रयोः ॥ ज्वालकुण्डं स वै याति भस्मकुण्डं च पातकी ॥ १०८॥ तत्र स्थित्वा शताब्दं
च स भवेत्तैलपायिकः ॥ सप्तजन्मसु मत्स्यः स्यान्मूषकश्च ततः शुचिः ॥ १०९ ॥ सुगन्धितैलं धात्रीं च गन्धद्रव्यं तथैव वा ॥
भारते पुण्यवर्षे च यो हरेत्सुरविप्रयोः ॥ ११० ॥ वसेद्दुर्गन्धकुंडे च दुर्गन्धं च लभेत्सदा ॥ स्वलोममानवर्षं च ततो दुर्गन्धिको
भवेत् ॥ १११ ॥ दुर्गंधिकः सप्तजनौ मृगनाभिस्त्रिजन्मनि ॥ सप्तजन्म सुगंधिश्च ततो वै मानवो भवेत् ॥ ११२ ॥ बलेनैव खल

त्वेन हिंसारूपेण वा सति ॥ बली च यो हरेद्भूमिं भारते परपैतृकीम् ॥ ११३ ॥ स वसेत्तप्तशूले च भवेत्तप्तो दिवानिशम् ॥ तप्ततैले यथा जीवो दग्धो भ्रमति सन्ततम् ॥ ११४ ॥ भस्मसान्न भवत्येव भोगदेहो न नश्यति ॥ सप्तमन्वन्तरं पापी सन्तप्तस्तत्र तिष्ठति ॥ ११५ ॥ शब्दं करोत्यनाहारो यमदूतेन ताडितः ॥ षष्टिवर्षसहस्राणि विट्कृमिर्भारते ततः ॥ ११६ ॥ ततो भवेद्भूमिहीनो दरिद्रश्च ततः शुचिः ॥ ततः स्वयोनिं संप्राप्य शुभकर्म्मा भवेत्पुनः ॥ ११७ ॥ छिनत्ति जीविनः खड्गैर्दयाहीनः सुदारुणः ॥ नरघाती हन्ति नरमर्थलोभेन भारते ॥ ११८ ॥ असिपत्रे च स वसेद्यावदिन्द्राश्चतुर्दश ॥ तेषु चेद्ब्राह्मणान्हन्ति शतमन्वन्तरं तदा ॥११९ ॥ छिन्नाङ्गश्च भवेत्पापी खड्गधारेण सन्ततम् ॥ अनाहारः शब्दकृच्च यमदूतेन ताडितः ॥ १२० ॥ चण्डालः शतजन्मानि भारते सूकरो भवेत् ॥ कुक्कुरः शतजन्मानि सृगालः सप्तजन्मसु ॥ १२१ ॥ व्याघ्रश्च सप्तजन्मानि वृकश्चैव त्रिजन्मनि ॥ जन्मसप्तसु गंडी स्यान्महिषश्च त्रिजन्मनि ॥ १२२ ॥ ग्रामं वा नगरं वाऽपि दाहनं यः करोति च ॥ क्षुरधारे वसेत्सोऽपि च्छिन्नाङ्गस्त्रियुगं सति ॥ ॥ १२३ ॥ ततः प्रेतो भवेत्सद्यो वह्निवक्त्रो भ्रमेन्महीम् ॥ सप्तजन्मामेध्यभोजी खद्योतः सप्तजन्मसु ॥ १२४ ॥ ततो भवेन्महाशूली मानवः सप्तजन्मसु ॥ सप्तजन्म गलत्कुष्ठी ततः शुद्धो भवेन्नरः ॥ १२५ ॥ परकर्णोपजापेन परनिन्दां करोति यः ॥ परदोषे महातोषी देवब्राह्मणनिन्दकः ॥१२६॥ सूचीमुखे स च वसेत्सूचीविद्धो युगत्रयम् ॥ ततो भवेद्वृश्चिकश्च सर्पः स्यात्सप्तजन्मसु ॥ १२७ ॥ वज्रकीटः सप्तजनौ भस्मकीटस्ततः परम् ॥ ततो भवेन्मानवश्च महाव्याधिस्ततः शुचिः ॥ १२८ ॥ गृहिणां च गृहं भित्त्वा वस्तुतेयं करोति यः ॥ गाश्च च्छागांश्च मेषांश्च याति गोधामुखं च सः ॥ १२९ ॥ ततो भवेत्सप्तजनौ गोजातिर्व्याधिसंयुतः ॥ त्रिजन्ममेषजातिश्च च्छागजातिस्त्रिजन्मनि ॥ १३० ॥ ततो भवेन्मानवश्च नित्यरोगी दरिद्रकः ॥ भार्य्याहीनो बन्धुहीनः सन्तापी च ततः शुचिः ॥ १३१ ॥ सामान्यद्रव्यचौरश्च याति नक्रमुखं युगम् ॥ ततो भवेन्मानवश्च महारोगी ततः शुचिः ॥ ॥ १३२ ॥ हन्ति गाश्च गजांश्चैव तुरगांश्च नरांस्तथा ॥ स याति गजदंशं च महापापी युगत्रयम् ॥ १३३ ॥ ताडितो यमदू

तेन गजदन्तेन सन्ततम् ॥ स भवेद्गजजातिश्च तुरगश्च त्रिजन्मनि ॥ गोजातिम्लेच्छजातिश्च ततः शुद्धो भवेन्नरः ॥ १३४ ॥ जलं
पिबन्तीं तृषितां गां वारयति यो नरः ॥ तच्छुश्रूषाविहीनश्च गोमुखं याति मानवः ॥ १३५ ॥ नरकं गोमुखाकारं कृमित
तोदकान्वितम् ॥ तत्र तिष्ठति सन्तप्तो यावन्मन्वन्तरावधि ॥ १३६ ॥ ततो नरोऽपि गोहीनो महारोगी दरिद्रकः ॥ सप्त
जन्मन्यन्त्यजातिः ततः शुद्धो भवेन्नरः ॥ १३७ ॥ गोहत्यां ब्रह्महत्यां च यः करोत्यतिदेशिकीम् ॥ यो हि गच्छेदगम्यां च
सन्ध्याहीनोऽप्यदीक्षितः ॥ १३८ ॥ प्रतिग्राही च तीर्थेषु ग्रामयाजी च देवलः ॥ [१]शूद्राणां सूपकारश्च प्रमत्तो वृषलीपतिः
॥ १३९ ॥ गोहत्यां ब्रह्महत्यां च स्त्रीहत्यां च करोति यः ॥ मित्रहत्यां भ्रूणहत्यां महापापी च भारते ॥ १४० ॥ कुम्भीपाके स
च वसेद्यावदिन्द्राश्चतुर्दश ॥ ताडितो यमदूतेन चूर्ण्यमानश्च सन्ततम् ॥ १४१ ॥ क्षणं पतति वह्नौ च क्षणं पतति कण्टके ॥
क्षणं च तप्ततैलेषु तप्ततोयेषु च क्षणम् ॥ १४२ ॥ क्षणं च तप्तपाषाणे तप्तलोहे क्षणं ततः ॥ गृध्रकोटिसहस्राणि शतजन्मानि
सूकरः ॥ १४३ ॥ काकश्च सप्तजन्मानि सर्पस्स्यात्सप्तजन्मसु ॥ षष्टिवर्षसहस्राणि ततो वै विट्कृमिर्भवेत् ॥ १४४ ॥
ततो भवेत्स वृषणो गलत्कुष्ठी दरिद्रकः ॥ यक्ष्मग्रस्तो वंशहीनो भार्य्याहीनस्ततः शुचिः ॥ १४५ ॥ सावित्र्युवाच ॥ ब्रह्महत्या
च गोहत्या किंविधा वाऽऽतिदेशिकी ॥ का वा नृणामगम्या वा को वा सन्ध्याविहीनकः ॥ १४६ ॥ अदीक्षितः पुमान्को
वा को वा तीर्थे प्रतिग्रही ॥ द्विजः को वा ग्रामयाजी को वा विप्रश्च देवलः ॥ १४७ ॥ शूद्राणां सूपकारः कः प्रमत्तो
वृषलीपतिः ॥ एतेषां लक्षणं सर्वं वद वेदविदां वर ॥ १४८ ॥ यम उवाच ॥ श्रीकृष्णे च तदर्च्चायां मृन्मय्यां प्रकृतौ
तथा ॥ शिवे च शिवलिङ्गे वा सूर्य्ये सूर्य्यमणौ तथा ॥ १४९ ॥ गणेशे वा तदर्च्चायामेवं सर्वत्र सुन्दरि ॥ करोति भेदबुद्धिं यो
ब्रह्महत्यां लभेत्तु सः ॥ १५० ॥ स्वगुरौ स्वेष्टदेवे वा जन्मदातरि मातरि ॥ करोति भेदबुद्धिं यो ब्रह्महत्यां लभेत्तु सः ॥ १५१ ॥

---

१ वृषल इति पाठः ।

वैष्णवेष्वन्यभक्तेषु ब्राह्मणेष्वितरेषु च ॥ करोति समतां यो हि ब्रह्महत्यां लभेत्तु सः ॥ १५२ ॥ यो मूढो विष्णुनैवेद्ये चान्यनैवेद्य
के तथा ॥ हरेः पादोदकेष्वन्यदेवपादोदके तथा ॥ करोति समतां यो हि ब्रह्महत्यां लभेत्तु सः ॥ १५३ ॥ सर्वेश्वरेश्वरे कृष्णे
सर्वकारणकारणे ॥ सर्वाद्ये सर्वदेवानां सेव्ये सर्वान्तरात्मनि ॥ १५४ ॥ माययाऽनेकरूपे वाऽप्येक एव हि निर्गुणे ॥ करोत्यन्येन
समतां ब्रह्महत्यां लभेत्तु सः ॥ १५५ ॥ पितृदेवार्चनां पौर्वापरां वेदविनिर्मिताम् ॥ यः करोति निषेधं च ब्रह्महत्यां लभेत्तु सः
॥ १५६ ॥ ये निन्दन्ति हृषीकेशं तमन्त्रोपासकं तथा ॥ पवित्राणां पवित्रं च ब्रह्महत्यां लभन्ति ते ॥ १५७ ॥ शिवं शिवस्व
रूपं च कृष्णप्राणाधिकं प्रियम् ॥ पवित्राणां पवित्रं च ज्ञानानन्दं सनातनम् ॥ १५८॥ प्रधानं वैष्णवानां च देवानां सव्यमीश्वरम्॥
ये नार्चयन्ति निन्दन्ति ब्रह्महत्यां लभंति ते ॥ १५९ ॥ ये विष्णुमायां निन्दन्ति विष्णुभक्तिप्रदां सतीम् ॥ सर्वशक्तिस्वरूपां च
प्रकृतिं सर्वमातरम् ॥ १६० ॥ सर्वदेवीस्वरूपां च सर्वाद्यां सर्ववन्दिताम् ॥ सर्वकारणरूपां च ब्रह्महत्यां लभन्ति ते ॥ १६१ ॥
कृष्णजन्माष्टमीं रामनवमीं पुण्यदां पराम् ॥ शिवरात्रिं तथा चैकादशीं वारं रवेस्तथा ॥ १६२ ॥ पञ्चपर्वाणि पुण्यानि ये न कुर्वन्ति
मानवाः ॥ लभन्ते ब्रह्महत्यां ते चाण्डालाधिकपापिनः ॥ १६३ ॥ अम्बुवीच्यांबुखनने जले शौचादिकं च ये ॥ कुर्वन्ति
भारते वत्से ब्रह्महत्यां लभन्ति ते ॥ १६४ ॥ गुरुं च मातरं तातं साध्वीं भार्य्यां सुतं सुताम् ॥ अनाथान्यो न पुष्णाति ब्रह्महत्यां
लभेत्तु सः ॥ १६५ ॥ विवाहो यस्य न भवेन्न पश्यति सुतं च यः ॥ हरिभक्तिविहीनो यो ब्रह्महत्यां लभेत्तु सः ॥ १६६ ॥ हरेर
नैवेद्यभोजी नित्यं विष्णुं न पूजयेत् ॥ पुण्यं पार्थिवलिंगं वा ब्रह्महत्यां लभेत्तु सः ॥ १६७ ॥ आहारं कुर्वतीं गां च पिबन्तीं यो
निवारयेत् ॥ याति गोविप्रयोर्म्मध्ये गोहत्यां च लभेत्तु सः ॥ १६८ ॥ दण्डैर्गास्ताडयेन्मूढो यो विप्रो वृषवाहकः ॥ दिने दिने
गवां हत्यां लभते नात्र संशयः ॥ १६९ ॥ ददाति गोभ्य उच्छिष्टं यो जयेद्वृषवाहकम् ॥ भोजयेद्वृषवाहान्नं स गोहत्यां लभेद्ध्रुवम्॥
॥ १७०॥ वृषलीपतिं याजयद्यो भुंक्तेऽन्नं तस्य यो नरः ॥ गोहत्याशतकं सोऽपि लभते नात्र संशयः ॥ १७१ ॥ पादं ददाति

वह्नौ च गाश्च पादेन ताडयेत् ॥ गृहं विशेदधौतांघ्रिः स्नात्वा गोवधमाप्नुयात् ॥ १७२ ॥ यो भुंक्ते स्निग्धपादेन शेते स्निग्धांघ्रिरेव च
॥ सूर्य्योदये च द्विर्भोजी स गोहत्यां लभेद्ध्रुवम् ॥ १७३ ॥ अवीरान्नं च यो भुंक्ते योनिजीवी च वै द्विजः ॥ यस्त्रिसन्ध्या
विहीनश्च स गोहत्यां लभेद् ध्रुवम् ॥१७४॥ पितॄंश्च पर्वकाले च तिथिकाले च देवताम् ॥ न सेवतेऽतिथिं यो हि गोहत्यां स लभेद्ध्रुवम्
॥ १७५ ॥ स्वभर्तरि च कृष्णे च भेदबुद्धिं करोति या ॥ कटूक्त्या ताडयेत्कान्तं सा गोहत्यां लभेद्ध्रुवम् ॥१७६॥ गोमार्गखननं
कृत्वा वपते सस्यमेव च ॥ तडागे वा तदूर्ध्वं वा स गोहत्यां लभेद्ध्रुवम् ॥ १७७ ॥ प्रायश्चित्तं गोवधस्य यः करोति व्यतिक्रमम्
॥ अर्थलोभादथाज्ञानात्स गोहत्यां लभेद्ध्रुवम् ॥ १७८ ॥ राजके दैवके यत्नाद्गोस्वामी गां न पातयेत् ॥ दुःखं ददाति यो
मूढो गोहत्यां स लभेद्ध्रुवम् ॥१७९॥ प्राणिनं लंघयेद्यो हि देवार्चायां रतं जलम् ॥ नैवेद्यं पुष्पमन्नं च स गोहत्यां लभेद्ध्रुवम् ॥
॥१८०॥ शश्वन्नास्तीति वादी यो मिथ्यावादी प्रतारकः ॥ देवद्वेषी गुरुद्वेषी स गोहत्यां लभेद्ध्रुवम् ॥ १८१ ॥ देवताप्रतिमां दृष्ट्वा
गुरुं वा ब्राह्मणं सति ॥ सम्भ्रमान्न नमेद्यो हि स गोहत्यां लभेद्ध्रुवम् ॥१८२॥ न ददात्याशिषं कोपात्प्रणताय च यो द्विजः ॥
विद्यार्थिने च विद्यां वै स गोहत्यां लभेद्ध्रुवम् ॥१८३॥ गोहत्या ब्रह्महत्या च कथिता चातिदेशिकी ॥ यथा श्रुतं सूर्य्यवक्रात्किं
भूयः श्रोतुमिच्छसि ॥ १८४ ॥ सावित्र्युवाच ॥ वास्तवे चातिदेशे च सम्बन्धे पापपुण्ययोः ॥ न्यूनाधिके च को भेदस्तन्मां
व्याख्यातुमर्हसि ॥ १८५ ॥ यम उवाच ॥ कुत्रापि वास्तवः श्रेष्ठो न्यूनोऽतिदेशिकस्सदा ॥ कुत्रातिदेशिकः श्रेष्ठो वास्तवो न्यून
एव च ॥ १८६ ॥ कुत्र वा समता साध्वि तयोर्वेदप्रमाणतः ॥ करोति तत्र नास्थां यो गुरुहत्यां लभेत्तु सः ॥ १८७ ॥ पुरा परिचिते
विप्रे विद्यामन्त्रप्रदातरि ॥ गुरौ पितृत्वमारोपाद्वस्तुतश्श्रेष्ठ उच्यते॥१८८॥पितुः शतगुणा माता मातुः शतगुणस्तथा ॥ विद्यामन्त्रप्रदाता
च गुरुः पूज्यः श्रुतेर्मतः ॥ १८९ ॥ गुरुतो गुरुपत्नी च गौरवे च गरीयसी ॥ यथेष्टं देवपत्नी च पूज्या चाभीष्टदेवता॥
॥ १९० ॥ विप्रः शिवसमो यश्च विष्णुतुल्यपराक्रमः ॥ राजाऽऽतिदेशिकाच्छ्रेष्ठो वास्तवो गुणलक्षतः ॥ १९१ ॥ सर्वं गङ्गासमं

तोयं सर्वं व्याससमा द्विजाः ॥ ग्रहणे सूर्य्यशशिनोश्चात्रैव समता तयोः ॥ १९२ ॥ आतिदेशिकहत्याया वास्तवश्च चतुर्गुणः ॥
सम्मतः सर्ववेदानामित्याह कमलोद्भवः ॥ १९३ ॥ आतिदेशिकहत्याया भेदश्च कथितः सति ॥ या याऽगम्या नृणामेव निबोध
कथयामि ते ॥ १९४ ॥ स्वस्त्री गम्या च सर्वेषामिति वेदे निरूपिता ॥ अगम्या च तदन्या या चेति वेदवेदो विदुः ॥ १९५ ॥
सामान्यं कथितं सर्वं विशेषं शृणु सुन्दरि ॥ अत्यगम्याश्च या या वै निबोध कथयामि ते ॥ १९६ ॥ शूद्राणां विप्रपत्नी च
विप्राणां शूद्रकामिनी ॥ अत्यगम्याऽतिनिन्द्या च लोके वेदे पतिव्रते ॥ १९७॥ शूद्रश्चेद्ब्राह्मणीं गच्छेद्ब्रह्महत्याशतं लभेत् ॥ तत्स
मं ब्राह्मणी चापि कुम्भीपाकं व्रजेद्ध्रुवम् ॥ १९८ ॥ यदि शूद्रां व्रजेद्विप्रो वृषलीपतिरेव सः ॥ स भ्रष्टो विप्रजातेश्च चण्डालात्सो
ऽधमः स्मृतः ॥ १९९ ॥ विष्ठासमश्च तत्पिंडो मूत्रतुल्यं च तर्पणम् ॥ तत्पितॄणां सुराणां च पूजने तत्समं सति ॥ २०० ॥ कोटि
जन्मार्जितं पुण्यं सन्ध्यार्चातपसाऽर्जितम् ॥ द्विजस्य वृषलीभोगान्नश्यत्येव न संशयः ॥ २०१ ॥ ब्राह्मणश्च सुरापीती विड्भोजी
वृषलीपतिः ॥ हरिवासरभोजी च कुम्भीपाकं व्रजेद्ध्रुवम् ॥ २०२ ॥ गुरुपत्नीं राजपत्नीं सपत्नीमातरं प्रसूम् ॥ सुतां पुत्रवधूं श्वश्रूं
सगर्भां भगिनीं सति ॥ २०३ ॥ सोदरभ्रातृजायां च मातुलानीं पितृप्रसूम् ॥ मातुः प्रसूं तत्स्वसारं भगिनीं भ्रातृकन्यकाम् ॥
॥ २०४ ॥ शिष्यां च शिष्यपत्नीं च भगिनेयस्य कामिनीम् ॥ भ्रातुः पुत्रप्रियां चैवाप्यगम्यामाह पद्मजः ॥ २०५ ॥ एतास्वेका
मनेकां वा यो व्रजेन्मानवोऽधमः ॥ स्वमातृगामी वेदेषु ब्रह्महत्याशतं लभेत् ॥ २०६ ॥ अकर्म्मार्होऽपि सोऽस्पृश्यो लोके वेदेऽति
निन्दितः ॥ स याति कुम्भीपाकं च महापापी सुदुस्तरम्॥२०७॥करोत्यशुद्धां सन्ध्यां च सन्ध्यां वा न करोति यः॥त्रिसन्ध्यां वर्ज
येद्यो वा सन्ध्याहीनश्च स द्विजः ॥२०८॥ वैष्णवं च तथा शैवं शाक्तं सौरं च गाणपम् ॥ योऽहङ्कारान्न गृह्णाति मन्त्रं सोऽदीक्षितः
स्मृतः ॥२०९॥ प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयम् ॥ तत्र नारायणः स्वामी गङ्गागर्भान्तरे वरे ॥ २१० ॥ तत्र नारायणक्षेत्रे
कुरुक्षेत्रे हरेः पदे॥वाराणस्यां बदर्य्यां च गङ्गासागरसंगमे ॥ २११ ॥ पुष्करे भास्करक्षेत्रे प्रभासे रासमण्डले ॥ हरिद्वारे च केदारे

सोमे बदरपावने ॥ २१२ ॥ सरस्वतीनदीतीरे पुण्ये वृन्दावने वने ॥ गोदावर्य्यां च कौशिक्यां त्रिवेण्यां च हिमालये ॥ २१३ ॥ एष्वन्यत्र च यो दानं प्रतिगृह्णाति कामतः ॥ स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च ॥ २१४ ॥ शूद्रातिरिक्तयाजी यो ग्रामयाजी च कीर्त्तितः ॥ तथा देवोपजीवी यो देवलः परिकीर्त्तितः ॥ २१५ ॥ शूद्रपाकोपजीवी यः सूपकार इति स्मृतः ॥ सन्ध्यापूजाविहीनश्च प्रमत्तः · पतितः स्मृतः ॥ २१६ ॥ उक्तं पूर्वप्रकरणे लक्षणं वृषलीपतेः ॥ एते महापातकिनः कुम्भीपाकं प्रयान्ति ते ॥ ११७ ॥ कुडान्यन्यानि ते यान्ति निबोध कथयामि ते ॥ २१८ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे सावित्र्युपाख्याने यमसावित्रीसंवादे कर्मविपाके पापिनरकनिरूपणं शिवप्राशस्त्यं ब्रह्महत्यादिपदार्थपरिभाषानिरूपणं नाम त्रिंशत्तमोऽध्यायः ॥ ३० ॥ यम उवाच ॥ हरिसेवां विना साध्वि न लभेत्कर्मखण्डनम् ॥ शुभकर्म्म स्वर्गबीजं नरकं च कुकर्म्मतः ॥ १ ॥ पुंश्चल्यन्नं च यो भुंक्ते वेश्यान्नं च पतिव्रते ॥ तां व्रजेत्तु द्विजो यो हि कालसूत्रं प्रयाति सः ॥ २ ॥ शतवर्षं कालसूत्रे स्थित्वा शूद्रो भवेद्ध्रुवम् ॥ तत्र जन्मनि रोगी च ततः शुद्धो भवेद्द्विजः ॥ ॥ ३ ॥ पतिव्रता चैकंपत्नी[1] द्वितीये[2] कुलटा स्मृता ॥ तृतीये धर्षिणी ज्ञेया चतुर्थे पुंश्चली स्मृता ॥ ४ ॥ वेश्या च पञ्चमे षष्ठे युग्मी[3] च परिकीर्त्तिता ॥ अत ऊर्ध्वं महावेश्या साऽस्पृश्या सर्वजातिषु ॥ ५ ॥ यो द्विजः कुलटां गच्छेद्धर्षिणीं पुंश्चलीमपि ॥ वेश्ययुग्मीं महावेश्यामवटोदं प्रयाति सः ॥ ६ ॥ शताब्दं कुलटागामी धृष्टागामी चतुर्गुणम् ॥ षड्गुणं पुंश्चलीगामी वेश्यागामी गुणाष्टकम् ॥ ७ ॥ युग्मीगामी दशगुणं वसेत्तत्र न संशयः ॥ महावेश्याकामुकश्च ततः शतगुणं वसेत् ॥ ८ ॥ तदा हि सर्वगामी चेत्येवमाह पितामहः ॥ तत्रैव यातनां भुङ्क्ते यमदूतेन ताडितः ॥९॥ तित्तिरिः कुलटागामी धृष्टागामी च वायसः॥कोकिलः पुंश्चलीगामी वेश्यागामी वृकस्तथा ॥ १० ॥ युग्मीगामी सूकरश्च सप्तजन्मसु भारते ॥ महावेश्याकामुकश्च श्मशाने शाल्मलिस्तरुः ॥ ११ ॥

---

[1] एकः पतिर्यस्यास्सेत्यर्थः । [2] द्वितीये पत्यौ सतीत्यर्थः । [3] युङ्गीति पाठः ।

यो भुंक्ते ज्ञानहीनश्च ग्रहणे चन्द्रसूर्य्ययोः ॥ अरुन्तुदं स यात्येव चन्द्रमानाब्दमेव च ॥ १२ ॥ ततो भवेन्मानवस्स्यादुदरव्याधिसंयुतः ॥ गुल्मयुक्तश्च काणश्च दन्तहीनस्ततः शुचिः ॥ १३ ॥ वाक्प्रदत्तां हि कन्यां च यश्चान्यस्मै ददाति च ॥ स वसेत्पांशुभोगे च तद्भोजी च शताब्दकम् ॥१४॥ दत्तापहारी यः साध्वि पाशवेष्टं शताब्दकम् ॥ निवसेच्छरशय्यायां यमदूतेन ताडितः॥१५॥ न पूजयेद्यो हि भक्त्या शिवलिङ्गं च पार्थिवम् ॥ स याति शूलिनः कोपाच्छूलप्रोतं सुदारुणम् ॥ १६ ॥ स्थित्वा शताब्दं तत्रैव श्वापदः सप्तजन्मसु ॥ ततो भवेद्देवलश्च सप्तजन्मस्वतः शुचिः ॥ १७ ॥ करोति दण्डं यो विप्रे यद्भयात्कम्पते द्विजः ॥ प्रकम्पने वसेत्सोऽपि विप्रलोमाब्दमेव च ॥१८॥ प्रकोपवदना कोपात्स्वामिनं या च पश्यति ॥ कटूक्तिं तं च वदति याति चोल्कामुखं च सा ॥ १९ ॥ उल्कां ददाति वक्त्रे च सततं यमकिङ्करः ॥ दण्डेन ताडयेन्मूर्ध्नि तल्लोमाब्दप्रमाणकम् ॥ २० ॥ ततो भवेन्मानवी च विधवा सप्तजन्मसु ॥ भुक्त्वा दुःखं च वैधव्यं व्याधिं भुक्त्वा ततः शुचिः ॥२१॥ या ब्राह्मणी शूद्रभोग्या साऽन्धकूपं प्रयाति च॥ तप्तशौचोदके ध्वान्ते तदाहारा दिवानिशम् ॥ २२ ॥ निवसेदतिसन्तप्ता यमदूतेन ताडिता ॥ शौचोदके निमग्ना च यावदिन्द्राश्चतुर्दश ॥ २३ ॥ काकी जन्मसहस्राणि शतजन्मानि सूकरी ॥ कुक्कुटी शतजन्मानि शृगाली सप्तजन्मसु ॥२४॥ पारावती सप्तजनौ वानरी सप्तजन्मसु ॥ ततो भवेत्सा चण्डाली सर्वभोग्या च भारते॥२५॥ ततो भवेच्च रजकी यक्ष्मग्रस्ता च पुंश्चली॥ततः कुष्ठयुता तैलकारी शुद्धा भवेत्ततः ॥ २६ ॥ वेश्या वसेद्वेधने च युग्मी[१] वै दण्डताडने ॥ जालेबन्धे[२] महावेश्या कुलटा देहचूर्णके ॥ २७ ॥ स्वैरिणी दलने चैव धृष्टा वै शोषणे तथा ॥ निवसेद्यातनायुक्ता यमदूतेन ताडिता ॥ २८ ॥ विण्मूत्रभक्षणं तत्र यावन्मन्वन्तरं सति॥ ततो भवेद्विट्कृमिश्च वर्षलक्षं ततः शुचिः ॥ २९ ॥ ब्राह्मणो ब्राह्मणीं गच्छेत्क्षत्रियामपि क्षत्रियः ॥ वैश्यो वैश्यां च शूद्रां च शूद्रो वाऽपि व्रजेद्यदि ॥ ३० ॥ स्ववर्णपरदारी च कषं याति तया सह ॥ भुक्त्वा कषायतप्तोदं निवसेद्द्वादशाब्दकम् ॥ ३१ ॥ ततो

---

[१] युंगी चेति पाठः । [२] जालरंध्रे इति पाठः ।

विप्रो भवेच्छुद्धश्चैवं च क्षत्रियादयः ॥ योषितश्चापि शुध्यन्तीत्येवमाह पितामहः ॥ ३२ ॥ क्षत्रियो ब्राह्मणीं गच्छेद्वैश्यो वाऽपि पतिव्रते ॥ मातृगामी भवेत्सोऽपि शूर्पं च नरकं व्रजेत् ॥ ३३ ॥ शूर्पाकारैश्च कृमिभिर्ब्राह्मण्या सह भक्षितः ॥ प्रतप्तमूत्रभोजी च यमदूतेन ताडितः ॥ ३४ ॥ तत्रैव यातनां भुंक्ते यावदिन्द्राश्चतुर्दश ॥ सप्तजन्मसु वाराहश्छागलश्च ततः शुचिः ॥ ३५ ॥ करे धृत्वा च तुलसीं प्रतिज्ञां यो न पालयेत् ॥ मिथ्या वा शपथं कुर्य्यात्स च ज्वालामुखं व्रजेत् ॥ ३६ ॥ गङ्गातोयं करे धृत्वा प्रतिज्ञां यो न पालयेत् ॥ शिलां च देवप्रतिमां स च ज्वालामुखं व्रजेत् ॥ ३७ ॥ दत्त्वा च दक्षिणं हस्तं प्रतिज्ञां यो न पालयेत् ॥ स्थित्वा देवगृहे वाऽपि स च ज्वालामुखं व्रजेत् ॥ ३८ ॥ स्पृष्ट्वा च ब्राह्मणं गां च वह्निं विष्णुसमं सति ॥ न पालयेत्प्रतिज्ञां च स च ज्वालामुखं व्रजेत् ॥ ३९ ॥ मित्रद्रोही कृतघ्नश्च यो हि विश्वासघातकः ॥ मिथ्यासाक्ष्यप्रदश्चैव स च ज्वालामुखं व्रजेत् ॥ ४० ॥ एते तत्र वसन्त्येव यावदिन्द्राश्चतुर्दश ॥ यथाऽङ्गारप्रदग्धाश्च यमदूतैश्च ताडिताः ॥ ४१ ॥ चण्डालस्तुलसीस्पर्शी सप्तजन्मस्वतः शुचिः ॥ म्लेच्छो गंगाजलस्पर्शी पञ्चजन्मस्वतः शुचिः ॥ ४२ ॥ शिलास्पर्शी विट्कृमिश्च सप्तजन्मसु सुन्दरि ॥ अर्चास्पर्शीव्रणकृमिस्सप्तजन्मस्वतः शुचिः ॥ ४३ ॥ दक्षहस्तप्रघाता च सर्पस्स्यात्सप्तजन्मसु ॥ ततो भवेद्धस्तहीनो मानवश्च ततः शुचिः ॥ ४४ ॥ मिथ्यावादी देवगृहे देवलः सप्तजन्मसु ॥ विप्रादिस्पर्शकारी च सोऽग्रदानी भवेद्ध्रुवम् ॥ ४५ ॥ ततो भवन्ति मूकास्ते बधिराश्च त्रिजन्मसु ॥ भार्य्याहीना वंशहीना बुद्धिहीनास्ततः शुचिः ॥ ४६ ॥ मित्रद्रोही च नकुलः कृतघ्नश्चापि गण्डकः ॥ विश्वासघाती व्याघ्रश्च सप्तजन्मसु भारते ॥ ४७ ॥ मिथ्यासाक्ष्यप्रदश्चैव भल्लूकः सप्तजन्मसु ॥ पूर्वान्सप्त परान्सप्त पुरुषान्हन्ति चात्मनः ॥ ४८ ॥ नित्यक्रियाविहीनश्च जडत्वेन युतो द्विजः ॥ यस्यानास्था वेदवाक्ये मन्दं हसति संततम्॥ ॥ ४९ ॥ व्रतोपवासहीनश्च सद्वाक्यपरिनिंदकः ॥ जिह्मे जिह्मो वसेत्सोऽपि शताब्दं च हिमोदके ॥ ५० ॥ जलजंतुर्भवेत्सोऽपि शतजन्मक्रमेण च ॥ ततो नानाप्रकारा च मत्स्यजातिस्ततः शुचिः ॥ ५१ ॥ यो वा धनस्यापहारं देवाब्रह्मणयोश्चरेत् ॥ पातयि

---

१ पंढक इति पाठः।

त्वा स्वपुरुषान्दश पूर्वान्दशापरान् ॥ ९२ ॥ स्वयं याति च धूमांधं धूमध्वांतसमन्वितम् ॥ धूमक्लिष्टो धूमभोजी वसेत्तत्र चतुर्युगम् ॥ ॥ ९३ ॥ ततो मूषकजातिश्च शतजन्मानि भारते ॥ ततो नानाविधाः पक्षिजातयः कृमिजातयः ॥ ९४ ॥ ततो नानाविधा वृक्षजातयश्च ततो नरः ॥ भार्याहीनो वंशहीनः शबरो व्याधिसंयुतः॥ ९५ ॥ ततो भवेत्स्वर्णकारः सुवर्णस्य वणिक्तथा ॥ ततो यवनसेवी च ब्राह्मणो गणकस्ततः ॥ ९६ ॥ विप्रो दैवज्ञोपजीवी वैद्यजीवी चिकित्सकः ॥ व्यापारी लोहलाक्षादे रसादेर्विक्रयी च यः ॥ ॥ ९७ ॥ स याति नागवेष्टं च नागैर्वेष्टित एव च ॥ वसेत्स्वलोममानाब्दं तत्र वै नागदंशितः ॥ ९८ ॥ ततो भवेत्स गणको वैद्यो वै सप्तजन्मसु ॥ गोपश्च कर्म्मकारश्च शङ्खकारस्ततः शुचिः ॥ ९९ ॥ प्रसिद्धानि च कुण्डानि कथितानि पतिव्रते ॥ अन्यानि चाप्रसिद्धानि तत्र क्षुद्राणि सन्ति वै ॥ ६० ॥ सन्ति पातकिनस्तेषु स्वकर्म्मफलभोगिनः ॥ भ्रमंति तावत्संसारे किं भूयः श्रोतुमिच्छसि ॥६१॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे सावित्र्युपाख्याने कर्मविपाके पापिनां कुण्डनिर्णयो नामैकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥ सावित्र्युवाच ॥ धर्मराज महाभाग वेदवेदाङ्गपारग ॥ नानापुराणेतिहासपाञ्चरात्रप्रदर्शकः ॥१॥ सर्वेषु सारभूतं यत्सर्वेष्टं सर्वसम्मतम् ॥ कर्मच्छेदे बीजरूपं प्रशंस्यं सुखदं नृणाम् ॥ २ ॥ यशःप्रदं धर्मदं च सर्वमंगलमंगलम् ॥ येन यामीं न ते यांति यातनां भवदुःखदाम् ॥ ३ ॥ कुण्डानि च न पश्यन्ति तत्र नैव पतंति च ॥ न भवेद्येन जन्मादि तत्कर्म वद सुव्रत ॥ ४ ॥ किमाकाराणि कुण्डानि कानि तेषां मतानि च ॥ केन रूपेण तत्रैव सदा तिष्ठंति पापिनः ॥ ५ ॥ स्वदेहे भस्मसाद्भूते यांति लोकान्तरं नराः ॥ केन देहेन वा भोगं भुञ्जते वा शुभाशुभम् ॥ ६ ॥ सुचिरं क्लेशभोगेन कथं देहो न नश्यति ॥ देहो वा किंविधो ब्रह्मंस्तन्मे व्याख्यातुमर्हसि ॥७॥ नारायण उवाच ॥ सावित्रीवचनं श्रुत्वा धर्मराजो हरिं स्मरन् ॥ कथां कथितुमारेभे गुरुं नत्वा च नारद ॥ ८ ॥ यम उवाच ॥ वत्से चतुर्षु वेदेषु धर्मो वै संहितासु च ॥ पुराणेष्वितिहासेषु पाञ्चरात्रादिकेषु च ॥ ९ ॥

अन्येषु सर्वशास्त्रेषु वेदांगेषु च सुव्रते ॥ सर्वेष्टं सारभूतं च मंगलं कृष्णसेवनम् ॥ १० ॥ जन्ममृत्युजरारोगशोकसन्तापतारणम् ॥
सर्वमङ्गलरूपं च परमानन्दकारणम् ॥ ११ ॥ कारणं सर्वसिद्धीनां नरकार्णवतारणम् ॥ भक्तिवृक्षांकुरकरं कर्मवृक्षनिकृन्तनम् ॥१२॥
गोलोकमार्गसोपानमविनाशिपदप्रदम्॥सालोक्यसार्ष्टिसारूप्यसामीप्यादिप्रदं शुभे॥१३॥कुण्डानि यमदूतं च यमं च यमकिङ्करान् ॥
स्वप्नेऽपि नहि पश्यन्ति सति श्रीकृष्णकिङ्कराः ॥ १४ ॥ हरिव्रतं ये कुर्वंति गृहिणः कर्मभोगिनः ॥ ये स्नांति हरितीर्थे च नाश्न
न्ति हरिवासरे ॥ १५ ॥ प्रणमंति हरिं नित्यं हर्य्यर्चां पूजयन्ति च ॥ न यान्ति ते च घोरां च मम संयमनीं पुरीम् ॥ १६ ॥
त्रिसन्ध्यपूता विप्राश्च शुद्धाचारसमन्विताः ॥ स्वधर्मनिरताः शान्ता न यान्ति यममन्दिरम् ॥ १७ ॥ ते स्वर्गभोगिनोऽन्ये च
शुद्धा देवान्यकिंकराः ॥ यान्त्यायान्ति च मर्त्यं च स्वर्गं च नहि निर्वृताः ॥ निर्वृत्तिं न हि लिप्सन्ति कृष्णसेवां विना
नराः ॥ १८ ॥ स्वधर्म्मनिरताश्चापि स्वधर्मविरतास्तथा ॥ गच्छन्तो मर्त्यलोकं च दुर्द्धर्षा यमकिङ्कराः ॥ १९ ॥ भीताः कृष्णोपा
सकाच्च वैनतेयादिवोरगाः ॥ स्वदूतं पाशहस्तं च गच्छन्तं तं वदाम्यहम् ॥ २० ॥ यास्यसीति च सर्वत्र हरिभक्ताश्रमं विना ॥
कृष्णमन्त्रोपासकानां नामानि च निकृन्तनम् ॥ २१ ॥ करोति नखराञ्जल्या चित्रगुप्तश्च भीतवत् ॥ मधुपर्कादिकं ब्रह्मा तेषां च
कुरुते पुनः ॥ २२ ॥ विलंघ्य ब्रह्मलोकं च गोलोके गच्छतां सताम् ॥ दुरितानि च नश्यन्ति तेषां संस्पर्शमात्रतः ॥ २३ ॥
यथा सुप्रज्वलद्वह्नौ काष्ठानि च तृणानि च ॥ प्राप्नोति मोहः संमोहं तांश्च दृष्ट्वाऽतिभीतवत् ॥ २४ ॥ कामश्च कामिनं याति लोभ
क्रोधौ ततः सति ॥ मृत्युः पलायते रोगो जरा शोको भयं तथा ॥ २५ ॥ कालः शुभाशुभं कर्म्म हर्षो भोगस्तथैव च ॥ ये ये न
यान्ति यामीं च कथितास्ते मया सति ॥ २६ ॥ शृणु देहस्य विवृतिं कथयामि यथागमम् ॥ पृथिवी वायुराकाशं तेजस्तोयमिति
स्फुटम् ॥ २७ ॥ देहिनां देहबीजं च स्रष्टुः सृष्टिविधौ परम् ॥ पृथ्व्यादिपञ्चभूतैश्च यो देहो निर्मितो भवेत् ॥ २८ ॥ स कृत्रिमो
नश्वरश्च भस्मसाच्च भवेदिह ॥ वृद्धाङ्गुष्ठप्रमाणेन यो जीवः पुरुषाकृतिः ॥ २९ ॥ बिभर्ति सूक्ष्मदेहं च तद्रूपं भोगहेतवे ॥ स देहो

न भवेद्भस्म ज्वलदग्नौ ममालये ॥ ३० ॥ जलेन नष्टो देहो वा प्रहारे सुचिरं कृते ॥ न शस्त्रे च न चास्त्रे च सुतीक्ष्णे कण्टके तथा ॥ ३१ ॥ तप्तद्रवे तप्तलौहे तप्तपाषाण एव च ॥ प्रतप्तप्रतिमाश्लेषेऽप्यत्यूर्ध्वपतनेऽपि च ॥ ॥ ३२ ॥ न च दग्धो न भग्नश्च भुंक्ते संतापमेव च ॥ कथितं देवि वृत्तान्तं कारणं च यथागमम् ॥ कुण्डानां लक्षणं सर्वं निबोध कथयामि ते ॥ ॥ ३३ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे सावित्र्युपाख्याने द्वात्रिंशत्तमोऽध्यायः ॥ ३२ ॥ यम उवाच ॥ पूर्णेन्दुमण्डलाकारं सर्वकुण्डं च वर्तुलम् ॥ अतीव निम्नं पाषाणभेदैश्च खचितं सति ॥ १ ॥ न नश्वरं चाप्रलयं निर्मितं चेश्वरेच्छया ॥ क्लेशदं वै पातकिनां नानारूपं तदालयम् ॥ २ ॥ ज्वलदङ्गाररूपं च शतहस्तशिखान्वितम् ॥ परितः क्रोशमानं च वह्निकुण्डं प्रकीर्त्तितम् ॥ ३ ॥ महच्छब्दं प्रकुर्वद्भिः पापिभिः परिपूरितम् ॥ रक्षितं मम दूतैश्च ताडितैश्चापि सन्ततम् ॥ ४ ॥ प्रतप्तोदकपूर्णं च हिंस्रजन्तुसमन्वितम् ॥ महाघोरान्धकारं च पापिसंघेन संकुलम् ॥ ५ ॥ प्रकुर्वता काकुशब्दं प्रहारैर्वर्णितेन च ॥ क्रोशार्द्धमानं मद्दूतस्ताडितेन च रक्षितम् ॥ ६ ॥ तप्तक्षारोदकैः पूर्णं नक्रैश्च परिवेष्टितम् ॥ सङ्कुलं पापिभिश्चैव क्रोशमानं भयानकम् ॥ ७ ॥ त्राहीति शब्दं कुर्वद्भिर्मम दूतैश्च ताडितैः ॥ प्रचलद्भिरनाहारैः शुष्ककण्ठौष्ठतालुकैः ॥ ८ ॥ विण्मूत्रैरेव पूर्णं च क्रोशमानं च कुत्सितम् ॥ अतिदुर्गन्धिसंयुक्तं व्याप्तं पापिभिरेव च ॥ ९ ॥ ताडितैर्मम दूतैश्चाप्यनाहारैरुपद्रवैः ॥ रक्षेति शब्दं कुर्वद्भिस्तत्कीटैरेव भक्षितम् ॥ ॥ १० ॥ तप्तमूत्रद्रवैः पूर्णं मूत्रकीटैश्च संकुलम् ॥ युक्तं महापापिभिश्च तत्कीटैर्दंशितं सदा ॥ ११ ॥ गव्यूतिमानं ध्वान्तार्त्तं शब्दकृद्भिश्च सन्ततम् ॥ मद्दूतैस्ताडितैर्घोरैः शुष्ककण्ठौष्ठतालुकैः ॥ १२ ॥ श्लेष्मपूर्णं क्रोशमितं वेष्टितं चेष्टितैः सदा ॥ तद्भोजिभिः पापिभिश्च तत्कीटैर्भक्षितैः सदा ॥ १३ ॥ क्रोशार्द्धं गरपूर्णं च गरभोजिभिरन्वितम् ॥ गरकीटैर्भक्षितैश्च पापिभिः पूर्णमेव च ॥ ॥ १४ ॥ ताडितैर्मम दूतैश्च शब्दकृद्भिश्च कम्पितैः ॥ सर्पाकारैर्वज्रदंष्ट्रैः शुष्ककण्ठैः सुदारुणैः ॥ १५ ॥ नेत्रयोर्मलपूर्णं च क्रोशार्द्धं

---

१ तदाकारैरिति पाठः ।

कीटसंयुतम् ॥ पापिभिः संकुलं शश्वद्द्रवद्भिः कीटभक्षितैः ॥ १६ ॥ वसारसेन पूर्णं च क्रोशतुर्य्यं सुदुस्सहम् ॥ तद्भोजिभिः
पातकिभिर्व्याप्तं दूतैश्च ताडितैः॥१७॥ शुक्रपूर्णं क्रोशतुर्य्यं शुक्रकीटैश्च भक्षितैः ॥ क्रन्दद्भिः पापिभिः शश्वत्संकुलं व्याकुलैर्भिया॥
॥ १८ ॥ दुर्गन्धिरक्तपूर्णं च वापीमानं गभीरकम् ॥ तद्भोजिभिः पापिभिश्च संकुलं कीटभक्षितैः ॥ १९ ॥ पूर्णं नेत्राश्रुभिर्नृणां
वाप्यर्द्धं पापिभिर्युतम् ॥ ताडितैर्मम दूतैश्च तद्भक्ष्यैः कीटभक्षितैः ॥ २० ॥ नृणां गात्रमलैः पूर्णं तद्भक्ष्यैः पापिभिर्युतम् ॥ ताडितै
र्मम दूतैश्च व्यग्रैश्च कीटभक्षितैः॥२१॥ कर्णविट्परिपूर्णं च तद्भक्ष्यैः पापिभिर्युतम् ॥ वापीतुर्य्यप्रमाणं च रुदद्भिः कीटभक्षितैः॥२२॥
मज्जापूर्णं नराणां च महादुर्गन्धिसंयुतम् ॥ महापातकिभिर्युक्तं वापीतुर्य्यप्रमाणकम् ॥ २३ ॥ परिपूर्णं स्निग्धमांसैर्मम दूतैश्च
ताडितैः॥ पापिभिः सङ्कुलं चैव वापीमानं भयानकम् ॥ २४ ॥ कन्याविक्रयिभिश्चैव तद्भक्ष्यैः कीटभक्षितैः ॥ त्राहीति शब्दं कुर्व
द्भिस्त्रासितैश्च भयानकम् ॥ २५ ॥ वापीतुर्य्यप्रमाणं च नखादिकचतुष्टयम् ॥ पापिभिः संकुलं शश्वन्मम दूतैश्च ताडितैः
॥ २६ ॥ प्रतप्तताम्रकुंडं च ताम्रपर्य्युन्मुखान्वितम् ॥ ताम्राणां प्रतिमालक्षैः प्रतप्तैरावृतं सदा ॥ २७ ॥ प्रत्येकं प्रति
माश्लिष्टै रुदद्भिः पापिभिर्युतम् ॥ गव्यूतिमानं विस्तीर्णं मम दूतैश्च ताडितैः ॥ २८ ॥ प्रतप्तलोहधारं च ज्वलदङ्गारसंयुतम् ॥
लोहानां प्रतिमालक्षैः प्रतप्तैरावृतं सदा ॥ २९ ॥ प्रत्येकं सर्वसंश्लिष्टैः शश्वद्भिचलितैर्भिया ॥ रक्ष रक्षेति शब्दं च कुर्वद्भिर्दूतताडितैः
॥ ३० ॥ महापातकिभिर्युक्तं द्विग[१]व्यूतिप्रमाणकम् ॥ भयानकं ध्वान्तयुक्तं लौहकुण्डं प्रकीर्तितम् ॥ ३१ ॥ धर्मकुण्डं तप्तसुराकुण्डं
वाप्यर्द्धमेव च ॥ तद्भोजिभिः पापिभिश्च व्याप्तं मद्दूतताडितैः ॥३२॥ अधः शाल्मलिवृक्षस्य तीक्ष्णकण्टककुण्डकम् ॥ लक्षपौरुष
मानं च क्रोशमानं च दुःखदम् ॥ ३३ ॥ धनुर्माने कण्टकैश्च सुतीक्ष्णैः परिवेष्टितम् ॥ ३४ ॥ प्रत्येकं कंटकैर्विद्धं महापातकिभि
र्युतम् ॥ वृक्षाग्रान्निपतद्भिश्च मम दूतैश्च ताडितैः ॥ ३५ ॥ जलं देहीति शब्दं च कुर्वद्भिः शुष्कतालुकैः ॥ महाभयाऽतिव्यग्रैश्च

---

[१] त्रिगव्यूतीति पाठः ।

दण्डसंभिन्नमस्तकैः ॥ प्रचलद्भिर्यथा तप्ततैले जीविभिरेव च ॥३६॥ विषौघैस्तक्षकादीनां पूर्णं च क्रोशमानकम्॥तद्भक्ष्यैः पापिभिर्युक्तं मम दूतैश्च ताडितैः ॥ ३७ ॥ प्रतप्ततैलपूर्णं च कीटादिपरिवर्जितम् ॥ तद्भक्ष्यैः पापिभिर्युक्तं स्निग्धगात्रैश्च वेष्टितैः ॥ ३८ ॥ काकुशब्दं प्रकुर्वद्भिश्चलद्भिर्दूतताडितैः ॥ महापातकिभिर्युक्तं द्विगव्यूतिप्रमाणकम् ॥ ३९ ॥ शस्त्रकुण्डं ध्वान्तयुक्तं क्रोशमानं भयानकम् ॥ शूलाकारैः सुतीक्ष्णाग्रैर्लौहशस्त्रैश्च वेष्टितम् ॥ ४० ॥ शस्त्रतल्पस्वरूपं च क्रोशतुर्य्यप्रमाणकम् ॥ पातकिभिर्वेष्टितं च कुन्तविद्धैश्च वेष्टितम् ॥ ४१ ॥ ताडितैर्मम दूतैश्च शुष्ककण्ठौष्ठतालकैः ॥ कीटैः संपीडचमानैश्च सर्पयानैर्भयङ्करैः ॥४२॥ तीक्ष्णदन्तैश्च विकृतैर्व्याप्तं ध्वान्तयुतं सति ॥ महापातकिभिर्युक्तं भीतैर्वा कीटभक्षितैः ॥ रुदद्भिः क्रोशमानं च मम दूतैश्च ताडितैः ॥ ४३ ॥ अतिदुर्गन्धिसंयुक्तं क्रोशार्द्धं पूयसंयुतम् ॥ तद्भक्ष्यैः पापिभिर्युक्तं मम दूतैश्च ताडितैः ॥ ४४ ॥ द्विगव्यूतिप्रमाणं च हिमतोयप्रपूरितम् ॥ तालवृक्षप्रमाणैश्च सर्पकोटिभिरावृतम् ॥ ४५ ॥ सर्पवेष्टितगात्रैश्च पापिभिः सर्पभक्षितैः ॥ संकुलं शब्दकृद्भिश्च मम दूतैश्च ताडितैः ॥ ४६ ॥ कुण्डत्रयं मशादीनां पूर्णं च मशकादिभिः ॥ सर्वं कोशार्द्धमानं च महापातकिभिर्युतम् ॥ ४७॥ हस्तपादादिभिर्बद्धैः क्षत्रैः क्षतजलौहितैः ॥ हाहेति शब्दं कुर्वद्भिः प्रचलद्भिश्च सन्ततम्॥४८॥वज्रवृश्चिकयोः कुण्डं ताभ्यां च परिपूरितम् ॥ वाप्यर्द्धं पापिभिर्युक्तं वज्रवृश्चिकदंशितैः ॥ ४९ ॥ कुण्डत्रयं शरादीनां तैरेव परिपूरितम् ॥ तैर्विद्धैः पापिभिर्युक्तं वाप्यर्द्धं रक्तलोहितैः ॥५०॥ तप्तपङ्कोदकैः पूर्णं सध्वान्तं गोलकुण्डकम् ॥ कीटैः संपीडचमानैश्च भक्षितैः पापिभिर्युतम् ॥ ५१ ॥ वाप्यर्द्धं परिपूर्णं च जलस्थैर्नक्रकोटिभिः ॥ दारुणैर्विकृताकारैर्भक्षितैः पापिभिर्युतम् ॥ ५२ ॥ विण्मूत्रश्लेष्मभक्ष्यैश्च संयुक्तं शतकोटिभिः ॥ काकैश्च विकृताकारैर्धनुर्लक्षं च पापिभिः ॥ ५३ ॥ सञ्चालवाजयोः कुण्डं ताभ्यां च परिपूरितम् ॥ भक्षितैः पापिभिर्युक्तं शब्दकृद्भिश्च सन्ततम् ॥ ५४ ॥ धनुःशतं वज्रयुक्तं पापिभिः सङ्कुलं सदा ॥ शब्दकृद्भिर्वज्रदग्धैरन्तर्ध्वान्तमयं सदा॥ ॥ ५५ ॥ वापीद्विगुणयानं च तप्तप्रस्तरनिर्मितम् ॥ ज्वलदङ्गारसदृशं चलद्भिः पापिभिर्युतम् ॥ ५६ ॥ क्षुरधारोपमैस्तीक्ष्णैः पाषाणै

निर्मितं परम् ॥ महापातकिभिर्युक्तं क्षतं क्षतजलोहितैः ॥५७॥ दुर्गन्धिलालापूर्णं च तद्भक्ष्यैः पापिभिर्युतम् ॥ क्रोशमानं गभीरं च मम दूतैश्च ताडितैः ॥५८॥ तप्ततोयेऽञ्जनाकारैः परिपूर्णं धनुश्शतम् ॥ चलद्भिः पापिभिर्युक्तं मम दूतेन ताडितैः॥५९॥ पूर्णं चूर्णद्रवैः क्रोशमानं पापिभिरन्वितम् ॥ तद्भोजिभिः प्रदग्धैश्च मम दूतैश्च ताडितैः ॥ ६० ॥ कुण्डं कुलालचक्राभं घूर्णमानं च सन्ततम् ॥ सुतीक्ष्णषोडशारं च घूर्णितैः पापिभिर्युतम् ॥ ६१ ॥ अतीव वक्रं निम्नं च द्विगव्यूतिप्रमाणकम् ॥ कन्दराकारनिर्माणं तप्तोदकसमन्वितम् ॥६२॥ महापातकिभिर्युक्तं भक्षितैर्जलजन्तुभिः ॥ प्रचलद्भिः शब्दकृद्भिर्ध्वान्तयुक्तं भयानकम् ॥ ६३ ॥ कोटिभिर्विकृताकारैः कच्छपैश्च सुदारुणैः ॥ जलस्थैः संयुतं तैश्च भक्षितैः पापिभिर्युतम्॥६४॥ज्वालाकलापैस्तेजोभिर्निर्मितं क्रोशमानकम् ॥ शब्दकृद्भिः पापिभिश्च चलद्भिः संयुतं सदा ॥ ६५ ॥ क्रोशमानं गभीरं च तप्तभस्मभिरन्वितम् ॥ शश्वच्चलद्भिः संयुक्तं पापिभिर्भस्मभक्षितैः ॥ ६६ ॥ तप्तपाषाणलोष्टानां समूहैः परिपूरितम् ॥ प्राणिभिर्दग्धगात्रैश्च युक्तं वै शुष्कतालुकैः ॥ ६७ ॥ क्रोशमानं ध्वान्तमयं गभीरमतिदारुणैः ॥ ताडितैर्मम दूतैश्च दग्धकुण्डं प्रकीर्तितम् ॥ ६८ ॥ अत्यूर्मियुक्ततोयं च प्रतप्तक्षारसंयुतम् ॥ नानाप्रकारविकृतं जलजन्तुसमन्वितम् ॥ ६९ ॥ द्विगव्यूतिप्रमाणं च गभीरं ध्वान्तसंयुतम् ॥ तद्भक्ष्यैः पापिभिर्युक्तं दंशितैर्जलजन्तुभिः॥७०॥ चलद्भिः क्रन्दमानैश्च न पश्यद्भिः परस्परम् ॥ उत्तप्तसूर्मिकुण्डं च कीर्तितं च भयानकम् ॥ ७१ ॥ असिपत्रवनस्यैवाप्युच्चैस्तालतरोरधः ॥ क्रोशार्द्धमानकुण्डं च पतत्पत्रसमन्वितम् ॥ ७२ ॥ पापिनां रक्तपूर्णं च वृक्षाग्रात्पततां परम् ॥ परित्राहीति शब्दं च कुर्वतामसतामपि ॥ ७३ ॥ गभीरं ध्वान्तसंयुक्तं रक्तकीटसमन्वितम् ॥ तदसीपत्रकुण्डं च कीर्तितं च भयानकम् ॥ ७४ ॥ धनुश्शतप्रमाणं च क्षुराकारास्त्रसंकुलम्॥पापिनां रक्तपूर्णं च क्षुरधारं भयानकम्॥७५॥सूचीवाश्यास्त्रसंयुक्तं पापिरक्तौघपूरितम्॥पञ्चाशद्धनुरायामं क्लेशदं सूचीकामुखम् ॥ ७६ ॥ गोधाह्वजन्तुभेदस्य मुखाकृति भयानकम् ॥ कूपरूपं गभीरं च धनुर्विंशतिमानकम् ॥ ७७ ॥

---

१ नीलकेति पाठः ।

महापातकिना चैव महाक्लेशकरं परम् ॥ तत्कीटभक्षितानां च नम्रास्यानां च सन्ततम् ॥ ७८ ॥ कुण्डं नरमुखाकारं धनुष्षोडशमानकम् ॥ गभीरं कूपरूपं च पापिष्ठैः संकुलं सदा ॥ ७९ ॥ गजेन्द्राणां समूहेन व्याप्तं कुण्डाकृति स्थलम्॥ गजदन्तहतानां च पापिनां रक्तपूरितम् ॥ ८० ॥ तत्कीटभक्षितानां च दीनशब्दकृतां सदा ॥ धनुश्शतप्रमाणं च कीर्त्तितं गजदंशनम् ॥ ८१ ॥ धनुस्त्रिंशत्प्रमाणं च कुण्डं वै गोमुखाकृति ॥ पापिनां दुःखदं चैव गोमुखं परिकीर्त्तितम् ॥ ८२ ॥ भ्रमितं कालचक्रेण सन्ततं च भयानकम् ॥ कुम्भाकारं ध्वान्तयुक्तं द्विगव्यूतिप्रमाणकम् ॥ ८३ ॥ लक्षमानवमानं च गभीरमतिविस्तृतम् ॥ कुत्रचित्तप्ततैलं च कुण्डाभ्यन्तरमन्तिके ॥८४॥ कुत्रचित्तप्तलौहादिकुण्डं ताम्रादिकं तथा ॥ कुत्रचित्तप्तपाषाणकुण्डाभ्यन्तरमन्तिके ॥ ८५ ॥ पापिनां च प्रधानैश्च महापातकिभिर्युतम् ॥ परस्परं न पश्यद्भिः शब्दकृद्भिश्च सन्ततम् ॥ ८६ ॥ ताडितैर्मम दूतैश्च दण्डैश्च मुसलैस्तथा ॥ ८७ ॥ घूर्णमानं पतद्भिश्च मूर्च्छितैश्च मुहुर्मुहुः ॥ पातितैर्मम दूतैश्चाप्यत्यूर्ध्वात्पतितैः क्षणम् ॥ ८८ ॥ यावन्तः पापिनः सन्ति सर्वकुण्डेषु सुन्दरि ॥ चतुर्गुणाः सन्ति तत्र कुम्भीपाके च दुस्तरे ॥ ८९ ॥ सुचिरं पतिताश्चैव[1] भोगदेहविवर्जिताः ॥ सर्वकुण्डप्रधानं च कुम्भीपाकं प्रकीर्तितम् ॥ ९० ॥ कालनिर्मितसूत्रेण निबद्धा यत्र पापिनः ॥ उत्थापिताश्च मद्दूतैः क्षणमेव निमज्जिताः ॥ ९१ ॥ निश्वासबन्धाः सुचिरं कुण्डानामन्तरे तथा ॥ अतीव क्लेशयुक्ताश्च भोगदेहा अनश्वराः ॥ ९२ ॥ दण्डेन मुसलेनैव मम दूतैश्च ताडिताः ॥ प्रतप्ततोययुक्तं च कालसूत्रं प्रकीर्तितम् ॥ ९३ ॥ अवटः कूपभेदश्च यत्रोदं च तदाकृति ॥ प्रतप्ततोयपूर्णं च धनुर्विंशत्प्रमाणकम् ॥ ९४ ॥ व्याप्तं महापापिभिश्च दग्धगात्रैश्च सन्ततम् ॥ मद्दूतैस्ताडितैः शश्वदवटोदं प्रकीर्तितम् ॥ ९५ ॥ यत्तोयस्पर्शमात्रेण सर्वव्याधिश्च पापिनाम् ॥ भवेदकस्मात्पततां यत्र कुण्डे धनुश्शते ॥ ९६ ॥ सर्वे रुद्धाः पापिनश्च व्यथन्ते यत्र सन्ततम् ॥ हाहेति शब्दं कुर्वन्तस्तदेवारुन्तुदं विदुः ॥९७॥ तप्तपांसुभिराकीर्णं ज्वलद्भिस्तु सुदग्धकैः ॥ तद्भक्ष्यैः पापिभिर्युक्तं पांसुभोजं धनुश्शतम् ॥९८॥

---

[1] सुचिरं पात्यमानास्त इति पाठः ।

पततां पापिनां यत्र भवेदेव प्रकम्पनम् ॥ पातमात्रेण पापी वै भवेत्पाशेन वेष्टितः ॥ ९९ ॥ क्रोशमाने च कुण्डे वै विदुस्त
त्पाशवेष्टनम् ॥ धनुर्विंशतिमानं च शूलप्रोतं प्रकीर्तितम् ॥ १०० ॥ पातमात्रेण पापी च शूलेन ग्रथितो भवेत् ॥ पततां पापिनां यत्र
भवेदेव प्रकम्पनम् ॥ १०१ ॥ अतीव हिमतोये च क्रोशार्द्धं च प्रकम्पनम् ॥ ददत्येव हि मद्दूता यत्रोल्काः पापिनां मुखे ॥ १०२ ॥
धनुर्विंशतिमानं च तदुल्काभिश्च संकुलम् ॥ लक्षमानवमानं च गभीरं च धनुश्शतम् ॥ १०३ ॥ नानाप्रकारक्रिमिभिः संयुक्तं च
भयानकैः ॥ अत्यन्धकारव्याप्तं यत्कूपाकारं च वर्त्तुलम् ॥ १०४ ॥ तद्भक्ष्यैः पापिभिर्युक्तं न पश्यद्भिः परस्परम्॥ तप्ततोयप्रदग्धैश्च
चलद्भिः कीटभक्षितैः ॥ ध्वान्तेन चक्षुषा चान्धैरन्धकूपं प्रकीर्तितम् ॥ १०५ ॥ नानाप्रकारशस्त्रौघैर्यत्र विद्धाश्च पापिनः ॥ धनुर्विंश
तिमानं च वेधनं तत्प्रकीर्तितम् ॥ १०६ ॥ दण्डेन ताडिता यत्र मम दूतैश्च पापिनः ॥ धनुःषोडशमानं च तत्कुण्डं दण्डताडनम्
॥ १०७ ॥ निबद्धाश्च महाजालैर्यथा मीनाश्च पापिनः ॥ धनुस्त्रिंशत्प्रमाणं च जालबद्धप्रकीर्तितम् ॥ १०८ ॥ पततां पापिनां
कुण्डे देहाश्चूर्णीभवन्ति च ॥ लौहवेदिनिबद्धान्तः कोटिमानवमानकम् ॥१०९॥ गभीरं ध्वान्तयुक्तं च धनुर्विंशतिमानकम् ॥ मूर्च्छि
तानां जडानां तद्देहचूर्णं प्रकीर्तितम् ॥ ११० ॥ दलिताः पापिनो यत्र मद्दूतैर्मुसलैः सदा ॥ धनुष्षोडशमानं च तत्कुण्डं दलनं स्मृत
म् ॥ १११ ॥ पातमात्रे यत्र पापी शुष्ककण्ठौष्ठतालुकः ॥ वालुकासु च तप्तासु धनुस्त्रिंशत्प्रमाणकम् ॥ ११२ ॥ शतमानवमानं च
गभीरं ध्वान्तसंयुतम्॥जलाहारैर्विरहितं शोषणं तत्प्रकीर्तितम्॥११३॥नानाचर्मकषायोदैः परिपूर्णं धनुःशतम्॥ दुर्गन्धियुक्तं तद्भक्ष्यैः
पापिभिः संकुलं महत् ॥११४॥ शूर्पाकारमुखं कुण्डं धनुर्द्वादशमानकम्॥तप्तलौहीवालुकाभिः पूर्णं पातकिभिर्युतम् ॥११५॥ अन्तरा
ऽग्निशिखानां च ज्वालाव्याप्तमुखं सदा ॥ धनुर्विंशतिमानं च यस्य कुण्डस्य सुन्दरि ॥ ११६ ॥ ज्वालाभिर्दग्धगात्रैश्च पापिभि
र्व्याप्तमेव यत् ॥ तन्महत्क्लेशदं शश्वत्कुण्डं ज्वालामुखं स्मृतम् ॥ ११७ ॥ पातमात्राद्यत्र पापी मूर्छितो व्यथितो भवेत् ॥ तप्तेष्ट
काभ्यन्तरितं वाप्यर्द्धं जिह्मकुण्डकम् ॥ ११८ ॥ धूमान्धकारयुक्तं च धूमान्धैः पापिभिर्युतम् ॥ धनुश्शतं श्वासरुद्धैर्धूमान्धं परिकी

र्तितम् ॥ ११९ ॥ पातमात्राद्यत्र पापी नागैस्संवेष्टितो भवेत् ॥ धनुश्शतं नागपूर्णं नागवेष्टनकुण्डकम् ॥ १२० ॥ षडशीतिश्च कुण्डानि मयोक्तानि निशामय ॥ लक्षणं चापि तेषां च किं भूयः श्रोतुमिच्छसि ॥ १२१ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे सावित्र्युपाख्याने यमलोकस्थनरककुण्डलक्षणप्रकथनं नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

सावित्र्युवाच ॥ हरिभक्तिं देहि मह्यं सारभूतां सुदुर्लभाम् ॥ त्वत्तः सर्वं श्रुतं देव नावशिष्टोऽधुना मम ॥ १ ॥ किंचित्कथय मे धर्मं श्रीकृष्णगुणकीर्त्तगम् ॥ पुंसां लक्षोद्धारबीजं नरकार्णवतारकम् ॥ २ ॥ कारणं मुक्तिकार्याणां सर्वाशुभनिवारणम् ॥ दारणं कर्मवृक्षाणां कृतपापौघहारकम् ॥ ३ ॥ मुक्तयः कतिधा सन्ति किं वा तासां च लक्षणम् ॥ हरिभक्तेर्मूर्तिभेदं निषेकस्यापि लक्षणम् ॥ ४ ॥ तत्त्वज्ञानविहीना च स्त्रीजातिर्विधिनिर्मिता ॥ किं तज्ज्ञानं सारभूतं वद वेदविदां वर ॥ ५ ॥ सर्वदानं ह्यनशनं तीर्थस्नानं व्रतं तपः ॥ अज्ञाने ज्ञानदानस्य कलां नार्हन्ति षोडशीम् ॥ ६ ॥ पितुः शतगुणा माता गौरवेणातिरिच्यते ॥ मातुः शतगुणैः पूज्यो ज्ञानदाता गुरुः प्रभो ॥ ७ ॥ यम उवाच ॥ पूर्वं सर्वो वरो दत्तो यस्ते मनसि वाञ्छितः ॥ अधुना हरिभक्तिस्ते वत्से भवतु मद्वरात् ॥ ८ ॥ श्रोतुमिच्छसि कल्याणि श्रीकृष्णगुणकीर्त्तनम् ॥ वक्तॄणां प्रश्नकर्तॄणां श्रोतॄणां कुलतारकम् ॥ ९ ॥ शेषो वक्त्रसहस्रेण नहि यद्वक्तुमीश्वरः ॥ मृत्युञ्जयो न क्षमश्च वक्तुं पञ्चमुखेन च ॥ १० ॥ धाता चतुर्णां वेदानां विधाता जगतामपि ॥ ब्रह्मा चतुर्मुखेनैव नालं विष्णुश्च सर्ववित् ॥ ११ ॥ कार्तिकेयः षण्मुखेन नापि वक्तुमलं ध्रुवम् ॥ न गणेशः समर्थश्च योगीन्द्राणां गुरोर्गुरुः ॥ १२ ॥ सारभूतांश्च शास्त्राणां वेदाश्चत्वार एव च ॥ कलामात्रं यद्गुणानां न विदन्ति बुधाश्च ये ॥ १३ ॥ सरस्वती च यत्नेन नालं यद्गुणवर्णने ॥ सनत्कुमारो धर्मश्च सनकश्च सनातनः ॥ १४ ॥ सनन्दः कपिलः सूर्यो ये चान्ये ब्रह्मणः सुताः ॥ विचक्षणा न यद्वक्तुं के वाऽन्ये जडबुद्धयः ॥ १५ ॥ न यद्वक्तुं क्षमाः सिद्धा मुनीन्द्रा योगिनस्तथा ॥ के वाऽन्ये च वयं के वा भगवद्गुणवर्णने ॥ १६ ॥ ध्यायन्ति

---

१ जडीभूतेति पाठः ।

यत्पदाम्भोजं ब्रह्मविष्णुशिवादयः ॥ अतिसाध्यं स्वभक्तानां तदन्येषां सुदुर्लभम् ॥ १७ ॥ कश्चित्किंचिद्विजानाति तद्गुणोत्कीर्त्तनं
महत् ॥ अतिरिक्तं विजानाति ब्रह्मा ब्रह्मसुतादयः[1] ॥ १८ ॥ ततोऽतिरिक्तं जानाति गणेशो ज्ञानिनां गुरुः ॥ सर्वातिरिक्तं जानाति
सर्वज्ञः शम्भुरेव च ॥१९॥ तस्मै दत्तं पुरा ज्ञानं कृष्णेन परमात्मना॥अतीव निर्जने रम्ये गोलोके रासमण्डले॥२०॥ तत्रैव कथितं
किंचिद्यद्गुणोत्कीर्त्तनं पुनः ॥ धर्माय कथयायास शिवलोके शिवः स्वयम् ॥ २१ ॥ धर्मस्तत्कथयामास पुष्करे भास्कराय च ॥
पिता मम यमाराध्य गां प्राप तपसा सति ॥ २२ ॥ पूर्वं स्वविषयं चाहं न गृह्णामि प्रयत्नतः ॥ वैराग्ययुक्तस्तपसे गन्तुमिच्छामि
सुव्रते ॥ २३ ॥ तदा मां कथयामास पिता तद्गुणकीर्त्तनम् ॥ यथागमं तद्वदामि निबोधातीव दुर्गमम् ॥ २४ ॥ तद्गुणं स न
जानाति तदन्यस्य च का कथा ॥ यथाऽऽकाशं न जानाति स्वान्तमेव वरानने ॥ २५ ॥ सर्वान्तरात्मा भगवान्सर्वकारणकारणम्॥
सर्वेश्वरश्च सर्वाद्यः सर्ववित्सर्वरूपधृक् ॥ २६ ॥ नित्यरूपी नित्यदेही नित्यानन्दो निराकृतिः ॥ निरंकुशश्च निश्शङ्को
निर्गुणश्च निराश्रयः ॥ २७ ॥ निर्लिप्तः सर्वसाक्षी च सर्वाधारः परात्परः ॥ प्रकृतिस्तद्विकारा च प्राकृतास्तद्विकारजाः ॥ २८ ॥
स्वयं पुमांश्च प्रकृतिः स्वयं च प्रकृतेः परः ॥ रूपं विधत्तेऽरूपश्च भक्तानुग्रहहेतवे ॥ २९ ॥ अतीव कमनीयं च सुन्दरं सुमनो
हरम् ॥ नवीननीरदश्यामं किशोरं गोपवेषकम् ॥ ३० ॥ कन्दर्पकोटिलावण्यलीलाधाम मनोहरम् ॥ शरन्मध्याह्नपद्मानां
शोभामोषकलोचनम् ॥ ३१ ॥ शरत्पार्वणकोटीन्दुशोभासंशोभिताननम् ॥ अमूल्यरत्नखचितरत्नाभरणभूषितम् ॥ ३२ ॥
सस्मितं शोभितं शश्वदमूल्याऽऽपीतवाससा ॥ परं ब्रह्मस्वरूपं च ज्वलन्तं ब्रह्मतेजसा ॥ ३३ ॥ सुखदृश्यं च शान्तं च राधा
कान्तमनन्तकम् ॥ गोपीभिर्वीक्ष्यमाणं च सस्मिताभिः समन्ततः ॥ ३४ ॥ रासमण्डलमध्यस्थं रत्नसिंहासनस्थितम्॥
वंशीं क्वणन्तं द्विभुजं वनमालाविभूषितम् ॥ ३५ ॥ कौस्तुभेन मणीन्द्रेण सुन्दरं वक्षसोज्ज्वलम् ॥ कुङ्कुमागरुकस्तूरीचन्दनार्चित

---

[1] ब्रह्मविशारदाः इति पाठः ।

विग्रहम् ॥ ३६ ॥ चारुचम्पकमालाब्जमालतीमाल्यमण्डितम् ॥ चारुचम्पकशोभाढ्यचूडावक्रिमराजितम् ॥ ३७ ॥ ध्यायन्ति चवम्भूतं वै भक्ता भक्तिपरिप्लुताः॥यद्भयाज्जगतां धाता विधत्ते सृष्टिमेव च ॥ ३८ ॥ करोति लेखनं कर्मानुरूपं सर्वदेहिनाम् ॥ तपसां फलदाता च कर्मणां च यदाज्ञया ॥ ३९ ॥ विष्णुः पाता च सर्वेषां यद्भयात्पाति सन्ततम् ॥ कालाग्निरुद्रः संहर्त्ता सर्वविश्वेषु यद्भयात् ॥ ४० ॥ शिवो मृत्युञ्जयश्चैव ज्ञानिनां च गुरोर्गुरुः ॥ यज्ज्ञानदानात्सिद्धेशो योगीशः सर्ववित्स्वयम् ॥४१॥ परमानन्दयुक्तश्च भक्तिवैराग्यसंयुतः ॥ यत्प्रसादाद्वाति वातः प्रवरः शीघ्रगामिनाम् ॥ ४२ ॥ तपनश्च प्रतपति यद्भयात्सन्ततं सति ॥ यदाज्ञया वर्षतीन्द्रो मृत्युश्चरति जन्तुषु ॥ ४३ ॥ यदाज्ञया दहेद्वह्निर्जलमेव सुशीतलम् ॥ दिशो रक्षन्ति दिक्पाला महाभीता यदाज्ञया ॥ ४४ ॥ भ्रमन्ति राशिचक्राणि ग्रहा वै यद्भयेन च ॥ भयात्फलन्ति वृक्षाश्च पुष्पन्त्यपि च यद्भयात् ॥ ४५ ॥ भयात्फलानि पक्वानि निष्फलास्तरवो भयात् ॥ यदाज्ञया स्थलस्थाश्च न जीवन्ति जलेषु च ॥ ४६ ॥ तथा स्थले जलस्थाश्च न जीवन्ति यदाज्ञया ॥ अहं नियमकर्त्ता च धर्मा धर्मं च यद्भयात् ॥ ४७ ॥ कालश्च कलयेत्सर्वं भ्रमत्येव यदाज्ञया ॥ अकाले हरेत्कालो मृत्युर्वै यद्भयेन च ॥ ४८ ॥ ज्वलदग्नौ पतन्तं च गभीरे च जलार्णवे ॥ वृक्षाग्रात्तीक्ष्णखड्गे च सर्पादीनां मुखेषु च॥४९॥ नानाशस्त्रास्त्रविद्धं च रणेषु विषमेषु च ॥ पुष्पचन्दनतल्पे च बन्धुवर्गैश्च रक्षितम् ॥ ५० ॥ शयानं तन्त्रमन्त्रैश्च काले कालो हरेद्भयात् ॥ धत्ते वायुस्तोयराशिं तोयं कूर्मं यदाज्ञया ॥ ५१ ॥ कूर्मोऽनन्तं स च क्षोणीं समुद्रान्सप्तपर्वतान् ॥ सर्वांश्चैव क्षमारूपो नानारूपं बिभर्त्ति सः ॥ ५२ ॥ यतः सर्वाणि भूतानि लीयन्तेऽन्ते च तत्र वै ॥ इन्द्रायुश्चैव दिव्यानां युगानामेकसप्ततिः ॥५३॥ अष्टाविंशच्छक्रपाते ब्रह्मणस्स्यादहर्निशम् ॥ षष्ट्याधिके[1] पञ्चशते सहस्रे पञ्चविंशतौ ॥ ५४ ॥ युगे नराणां शक्रायुरेवं संख्याविदो विदुः ॥ एवं त्रिंशद्दिनैर्मासो द्वाभ्यां ताभ्यामृतुः स्मृतः ॥ ५५ ॥ ऋतुभिः षड्भिरेवाब्दं शताब्दं ब्रह्मणो वयः ॥ ब्रह्मणश्च निपाते

---

१ अष्टाधिके इति पा० ।

वै चक्षुरुन्मीलनं हरेः ॥ ५६ ॥ चक्षुर्निमीलने तस्य लयं प्राकृतिकं विदुः ॥ प्रलये प्राकृताः सर्वे देवाद्याश्च चराचराः ॥ ५७ ॥
लीना धातरि धाता च श्रीकृष्णे नाभिपङ्कजे ॥ विष्णुः क्षीरोदशायी च वैकुण्ठे यश्चतुर्भुजः ॥ ५८ ॥ विलीना वामपार्श्वे च
कृष्णस्य परमात्मनः ॥ रुद्राद्या भैरवाद्याश्च यावन्तश्च शिवानुगाः ॥ ५९ ॥ शिवाधारे शिवे लीना ज्ञानानन्दे सनातने ॥ ज्ञाना
धिदेवः कृष्णस्य महादेवस्य चात्मनः ॥ ६० ॥ तस्य ज्ञाने विलीनश्च बभूवाथ क्षणं हरेः ॥ दुर्गायां विष्णुमायायां विलीनाः सर्व
शक्तयः ॥ ६१ ॥ सा च कृष्णस्य बुद्धौ च बुद्ध्यधिष्ठातृदेवता ॥ नारायणांशः स्कन्दश्च लीनो वक्षसि तस्य च ॥ ६२ ॥ श्रीकृ
ष्णांशश्च तद्बाहौ देवाधीशो गणेश्वरः ॥ पद्मांशभूता पद्मायां सा राधायां च सुव्रते ॥६३॥ गोप्यश्चापि च तस्यां च सर्वा वै देवयो
षितः ॥ कृष्णप्राणाधिदेवी सा तस्य प्राणेषु सा स्थिता ॥६४॥ सावित्री च सरस्वत्यां वेदशास्त्राणि यानि च स्थिता ॥ स्थिता वाणी
च जिह्वायां तस्यैव परमात्मनः ॥ ६५ ॥ गोलोकस्थस्य गोपाश्च विलीनास्तस्य लोमसु ॥ तत्प्राणेषु च सर्वेषां प्राणा वाता हुता
शनः ॥ ६६ ॥ जठराग्नौ विलीनश्च जलं तद्रसनाग्रतः ॥ वैष्णवाश्चरणाम्भोजे परमानन्दसंयुताः ॥ ६७ ॥ सारात्सारतरा भक्तिरसपी
यूषपायिनः ॥ विराट् क्षुद्रश्च महति लीनः कृष्णे महान्विराट् ॥ ६८ ॥ यस्यैव लोमकूपेषु विश्वानि निखिलानि च ॥ यस्य चक्षु
निमेषेण महांश्च प्रलयो भवेत् ॥६९॥ चक्षुरुन्मीलने सृष्टिर्यस्यैव परमात्मनः ॥ यावन्निमेषे सृष्टिस्स्यात्तावदुन्मीलने व्ययः ॥७०॥
ब्रह्मणश्च शताब्देन सृष्टिस्तत्र लयः पुनः ॥ ब्रह्मसृष्टिलयानां च संख्या नास्त्येव सुव्रते ॥७१॥ यथा भूरजसां चैव संख्यानं च निशा
मय ॥ चक्षुर्निमेषे प्रलयो यस्य सर्वान्तरात्मनः ॥ ७२ ॥ उन्मीलने पुनः सृष्टिर्भवेदेवेश्वरेच्छया ॥ तद्गुणोत्कीर्त्तनं वक्तुं ब्रह्माण्डेषु
च कः क्षमः ॥ ७३ ॥ यथा श्रुतं तातवक्त्रात्तथोक्तं च यथागमम् ॥ मुक्तयश्च चतुर्वेदैर्निरुक्ताश्च चतुर्विधाः ॥ ७४ ॥ तत्प्रधाना हरे
र्भक्तिर्मुक्तेरपि गरीयसी ॥ सालोक्यदा हरेरेका चान्या सारूप्यदा परा ॥७५॥ सामीप्यदा च निर्वाणदात्री चैवमिति स्मृतिः ॥ भक्तास्ता
नहि वाञ्छन्ति विना तत्सेवनादिकम् ॥ ७६ ॥ सिद्धत्वममरत्वं च ब्रह्मत्वं चावहेलया ॥ जन्ममृत्युजराव्याधिभयशोकादिखण्ड

नम्॥७७॥धारणं दिव्यरूपस्य विदुर्निर्वाणमोक्षदम् ॥ मुक्तिश्च सेवारहिता भक्तिः सेवाविवर्द्धिनी॥७८॥भक्तिमुक्त्योरयं भेदो निषेके लक्षणं शृणु ॥ विदुर्बुधा निषेकं च भोगं च कृतकर्मणाम् ॥ ७९ ॥ तत्खण्डनं च शुभदं परं श्रीकृष्णसेवनम्॥ तत्त्वज्ञानमिदं साध्वि सारं वै लोकवेदयोः ॥ ८० ॥ विघ्नघ्नं शुभदं चोक्तं गच्छ वत्से यथासुखम् ॥ इत्युक्त्वा सूर्य्यपुत्रश्च जीवयित्वा च तत्पतिम् ॥८१॥ तस्यै शुभाशिषं दत्त्वा गमनं कर्तुमुद्यतः ॥ दृष्ट्वा यमं च गच्छन्तं सावित्री तं प्रणम्य च ॥ ८२ ॥ रुरोद चरणे धृत्वा सद्विच्छेदोऽतिदुःखदः ॥ सावित्रीरोदनं दृष्ट्वा यमस्सोऽयं कृपानिधिः ॥ ८३ ॥ तामित्युवाच सन्तुष्टस्त्वरोदीच्चापि नारद ॥ ८४ ॥ यम उवाच ॥ लक्षवर्षं सुखं भुक्त्वा पुण्यक्षेत्रे च भारते ॥ अन्ते यास्यसि गोलोके श्रीकृष्णभवनं शुभे ॥ ८५ ॥ गत्वा च स्वगृहं भद्रे सावित्र्याश्च व्रतं कुरु ॥ द्विसप्तवर्षपर्य्यन्तं नारीणां मोक्षकारणम् ॥ ८६ ॥ ज्येष्ठे शुक्लचतुर्दश्यां सावित्र्याश्च व्रतं शुभम्॥ शुक्लाष्टम्यां भाद्रपदे महालक्ष्म्या व्रतं शुभम् ॥ ८७ ॥ द्व्यष्टवर्षव्रतं चेदं प्रत्यब्दं पक्षमेव च ॥ करोति परया भक्त्या सा याति च हरेः पदम् ॥ ८८ ॥ प्रतिमङ्गलवारे च देवीं मङ्गलचण्डिकाम् ॥ प्रतिमासं शुक्लषष्ठ्यां षष्ठीं मङ्गलदायिकाम् ॥८९॥ तथा चाषाढसंक्रान्त्यां मनसा सर्वसिद्धिदाम् ॥ राधां रासे च कार्त्तिक्यां कृष्णप्राणाधिकां प्रियाम् ॥ ९० ॥ उपोष्य शुक्लाष्टम्यां च प्रतिमासे वरप्रदाम् ॥ विष्णुमायां भगवतीं दुर्गां दुर्गार्तिनाशिनीम् ॥ ९१ ॥ प्रकृतिं जगदम्बां च पतिपुत्रवतीं सतीम् ॥ पतिव्रतासु शुद्धासु यन्त्रेषु प्रतिमासु च ॥ ९२ ॥ या नारी पूजयेद्भक्त्या धनसन्तानहेतवे ॥ इह लोके सुखं भुक्त्वा यात्यन्ते श्रीहरेः पदम् ॥ ९३ ॥ इत्युक्त्वा तां धर्मराजो जगाम निजमन्दिरम्॥गृहीत्वा स्वामिनं सा च सावित्री च निजालयम्॥९४॥सावित्री सत्यवन्तं च वृत्तान्तं च यथाक्रमम्॥अन्यांश्च कथयामास बान्धवांश्चैव नारद ॥ ९५ ॥ सावित्रीजनकः पुत्रान्स प्रापद्वै क्रमेण च ॥ श्वशुरश्चक्षुषी राज्यं सा च पुत्रान्वरेण च ॥ ९६ ॥ लक्षवर्षं सुखं भुक्त्वा पुण्यक्षेत्रे च भारते ॥ जगाम स्वामिना सार्द्धं गोलोकं सा पतिव्रता ॥ ९७ ॥ सवितुश्चाधिदेवी या मन्त्राधिष्ठातृदेवता ॥ सावित्री चापि वेदानां सावित्री तेन कीर्त्तिता ॥ ९८ ॥ इत्येवं कथितं वत्स सावित्र्याख्यानमुत्तमम् ॥ जीव

कर्मविपाकं च किं पुनः श्रोतुमिच्छसि ॥ ९९ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे सावित्र्युपाख्याने सावित्र्या यमोपदेशसमाप्तिर्नाम चतुस्त्रिंशत्तमोऽध्यायः ॥ ३४ ॥ इति सावित्र्युपाख्यानम् ॥ नारद उवाच ॥ श्रीकृष्णस्यात्मनश्चैव निर्गुणस्य निराकृतेः ॥ सावित्रीयमसंवादे श्रुतं सुविमलं यशः ॥१॥ तद्गुणोत्कीर्त्तनं सत्यं मंगलानां च मङ्गलम् ॥ अधुना श्रोतुमिच्छामि लक्ष्म्युपाख्यानमीश्वर॥२॥केनादौ पूजिता साऽपि किम्भूता केन वा पुरा ॥ तद्गुणोत्कीर्त्तनं सत्यं वद वेदविदां वर॥ ॥ ३ ॥ नारायण उवाच ॥ सृष्टेरादौ पुरा ब्रह्मन्कृष्णस्य परमात्मनः ॥ देवी वामांशसंभूता चासीत्सा रासमण्डले ॥ ४ ॥ अतीव सुन्दरी श्यामा न्यग्रोधपरिमण्डला ॥ यथा द्वादशवर्षीया रम्या सुस्थिरयौवना ॥ ५ ॥ श्वेतचम्पकवर्णाभा सुखदृश्या मनोहरा ॥ शरत्पार्वणकोटीन्दुप्रभासंशोभितानना ॥ ६ ॥ शरन्मध्याह्नपद्मानां शोभाशोभितलोचना ॥ सा च देवी द्विधाभूता सहसैवेश्वरेच्छया ॥ ७ ॥ समा रूपेण वर्णेन तेजसा वयसा त्विषा ॥ यशसा वाससा मूर्त्या भूषणेन गुणेन च ॥ ८ ॥ स्मितेन वीक्षणेनैव वचसा गमनेन च ॥ मधुरेण स्वरेणैव [1]नयेनानुनयेन च ॥ ९ ॥ तद्वामांशा महालक्ष्मीर्दक्षिणांशा च राधिका ॥ राधाऽऽदौ वरयामास द्विभुजं च परात्परम् ॥ १० ॥ महालक्ष्मीश्च तत्पश्चाच्चकमे कमनीयकम् ॥ कृष्णस्तद्गौरवेणैव द्विधारूपो बभूव ह ॥ ११ ॥ दक्षिणांशो वै द्विभुजो वामांशश्च चतुर्भुजः ॥ चतुर्भुजाय द्विभुजो महालक्ष्मीं ददौ पुरा ॥ १२ ॥लक्ष्यते दृश्यते विश्वं स्निग्धदृष्ट्या ययाऽनिशम्॥देवीषु या च महती महालक्ष्मीश्च सा स्मृता ॥१३॥ द्विभुजो राधिकाकान्तो लक्ष्मीकान्तश्चतुर्भुजः॥ गोलोके द्विभुजस्तस्थौ गोपैर्गोपीभिरावृतः॥१४॥चतुर्भुजश्च वैकुण्ठं प्रययौ पद्मया सह ॥ सर्वांशेन समौ तौ द्वौ कृष्णनारायणौ परौ॥१५॥महालक्ष्मीश्च योगेन नानारूपा बभूव सा॥वैकुण्ठे च महालक्ष्मीः परिपूर्णतमा परा॥१६॥शुद्धसत्त्वस्वरूपा च सर्वसौभाग्यसंयुता॥प्रेम्णा सा वै प्रधाना च सर्वासु रमणीषु च॥१७॥स्वर्गे च स्वर्गलक्ष्मीश्च शक्रसम्पत्स्वरूपिणी॥पातालेषु च मर्त्येषु राजलक्ष्मीश्च राजसु॥१८॥गृहल

---

[1] प्रेम्णा चानुनयेनेति पाठः ।

क्ष्मीर्गृहेष्वेव गृहिणी च कलांशया॥सम्पत्स्वरूपा गृहिणां सर्वमङ्गलमंगला॥ १९॥गवां प्रसूः सा सुरभिर्दक्षिणा यज्ञकामिनी॥क्षीरोदसिन्धुकन्या सा श्रीरूपा पद्मिनीषु च॥२०॥शोभारूपा च चन्द्रे सा सूर्य्यमण्डलमण्डिता॥ विभूषणेषु रत्नेषु फलेषु जलजेषु च ॥२१॥ नृपेषु नृपपत्नीषु दिव्यस्त्रीषु गृहेषु च ॥ सर्वसस्येषु वस्त्रेषु स्थाने सा संस्कृते तथा ॥ २२ ॥ प्रतिमासु च देवानां मङ्गलेषु घटेषु च ॥ माणिक्येषु च मुक्तासु माल्येषु च मनोहरा ॥२३॥ मणीन्द्रेषु च हारेषु क्षीरे वै चन्दनेषु च ॥ वृक्षशाखासु रम्यासु नवमेघेषु वस्तुषु ॥ २४ ॥ वैकुण्ठे पूजिता साऽऽदौ देवी नारायणेन च ॥ द्वितीये ब्रह्मणा भक्त्या तृतीये शङ्करेण च ॥ २५ ॥ विष्णुना पूजिता सा च क्षीरोदे भारते मुने ॥ स्वायम्भुवेन मनुना मानवेन्द्रैश्च सर्वतः ॥ २६ ॥ ऋषीन्द्रैश्च मुनीन्द्रैश्च सद्भिश्च गृहिभिर्भवेत् ॥ गन्धर्वाद्यैश्च नागाद्यैः पातालेषु च पूजिता ॥ २७ ॥ शुक्लाष्टम्यां भाद्रपदे पूजा वै ब्रह्मणा कृता ॥ भक्त्या च पक्षपर्यन्तं त्रिषु लोकेषु नारद ॥२८॥ चैत्रे पौषे च भाद्रे च पुण्ये मङ्गलवासरे ॥ विष्णुना निर्मिता पूजा त्रिषु लोकेषु भक्तितः ॥ २९ ॥ वर्षान्ते पौषसंक्रांत्यां मेध्यामावाह्य चाङ्गणे ॥ मनुस्तां पूजयामास सा भूता भुवनत्रये ॥ ३० ॥ राज्ञा संपूजिता सा वै मङ्गलेनैव मङ्गला॥ केदारेणैव नीलेन नलेन सुबलेन च ॥ ३१ ॥ ध्रुवेणौत्तानपादेन शक्रेण बलिना तथा ॥ कश्यपेन च दक्षेण मनुना[1] च विवस्वता ॥ ३२ ॥ प्रियव्रतेन चन्द्रेण कुबेरेणैव वायुना ॥ यमेन वह्निना चैव वरुणेनैव पूजिता ॥ ३३ ॥ एवं सर्वत्र सर्वैश्च वन्दिता पूजिता सदा ॥ सर्वैश्वर्य्याधिदेवी सा सर्वसम्पत्स्वरूपिणी ॥ ३४ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे लक्ष्म्युपाख्याने लक्ष्मीस्वरूपपूजादिवर्णनं नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ नारद उवाच ॥ नारायणप्रिया सा च वरा वैकुण्ठवासिनी ॥ वैकुण्ठाधिष्ठातृदेवी महालक्ष्मीः सनातनी ॥ १ ॥ कथं बभूव सा देवी पृथिव्यां सिन्धुकन्यका ॥ किं तद्ध्यानं च कवचं सर्वं पूजाविधिक्रमम् ॥ २ ॥ पुरा केन स्तुताऽऽदौ सा तन्मे व्याख्यातुमर्हसि ॥ ३ ॥ नारायण उवाच ॥ पुरा दुर्वाससः शापाद्भ्रष्ट

---

[1] कर्दमेनेति पाठः ।

श्रीकः पुरन्दरः॥बभूव देवसंघश्च मर्त्यलोकश्च नारद ॥४॥ लक्ष्मीः स्वर्गादिकं त्यक्त्वा रुष्टा परमदुःखिता॥गत्वा लीना च वैकुण्ठे महालक्ष्म्यां च नारद॥५॥तदा शोकाद्ययुर्देवा दुःखिता ब्रह्मणः सभाम् ॥ ब्रह्माणं च पुरस्कृत्य ययुर्वैकुण्ठमेव च॥६॥वैकुण्ठे शरणापन्ना देवा नारायणे परे ॥ अतीव दैन्ययुक्ताश्च शुष्ककण्ठोष्ठतालुकाः ॥ ७ ॥ तदा लक्ष्मीश्च कलया पुरा नारायणाज्ञया ॥ बभूव सिन्धुकन्या सा शक्रसम्पत्स्वरूपिणी ॥ ८ ॥ तदा मथित्वा क्षीरोदं देवा दैत्यगणैः सह ॥ संप्रापुश्च वरं लक्ष्म्या ददृशुस्तां च तत्र हि ॥ ९॥ सुरादिभ्यो वरं दत्त्वा वनमालां च विष्णवे ॥ ददौ प्रसन्नवदना तुष्टा क्षीरोदशायिने ॥ १० ॥ देवाश्चाप्यसुराक्रान्तं राज्यं प्रापुश्च तद्वरात् ॥ तां संपूज्य च संस्तूय सर्वत्र च निरापदः ॥११॥नारद उवाच ॥ कथं शशाप दुर्वासा मुनिश्रेष्ठः पुरन्दरम्॥केन दोषेण वा ब्रह्मन्ब्रह्मिष्ठं ब्रह्मवित्पुरा॥ १२॥ममन्थे केन रूपेण जलधिस्तैः सुरादिभिः॥केन स्तोत्रेण सा देवी शक्रे साक्षाद्बभूव ह॥१३॥ को वा तयोश्च संवादो ह्यभवत्तद्वद प्रभो ॥ १४ ॥ नारायण उवाच॥ मधुपानप्रमत्तश्च त्रैलोक्याधिपतिः पुरा ॥ क्रीडां चकार रहसि रम्भया सह कामुकः ॥ १५ ॥ कृत्वा क्रीडां तया सार्द्धं कामुक्या हृतचेतनः ॥ तस्थौ तत्र महारण्ये कामोन्मथितचेतनः ॥ १६ ॥ कैलासशिखरं यान्तं वैकुण्ठादृषिपुङ्गवम् ॥ दुर्वाससं ददर्शेन्द्रो ज्वलन्तं ब्रह्मतेजसा ॥ १७ ॥ ग्रीष्ममध्याह्नमार्त्तण्डसहस्रप्रभमीश्वरम् ॥ प्रतप्तकाञ्चनाभासं जटाभारमहोज्ज्वलम् ॥ १८ ॥ शुक्लयज्ञोपवीतं च चीरं दण्डं कमण्डलुम् ॥ महोज्ज्वलं च तिलकं बिभ्रतं चन्द्रसन्निभम् ॥ १९ ॥ समन्वितं शिष्यवर्गैर्वेदवेदाङ्गपारगैः ॥ दृष्ट्वा ननाम शिरसा सम्भ्रमात्तं पुरन्दरः ॥२० ॥ शिष्यवर्गं स भक्त्या वै तुष्टाव च मुदान्वितः ॥ मुनिना च सशिष्येण तस्मै दत्ताश्शुभाशिषः ॥ २१ ॥ विष्णुदत्तं पारिजातपुष्पं च सुमनोहरम् ॥ मृत्युरोगजराशोकहरं मोक्षकरं ददौ ॥ २२ ॥ शक्रः पुष्पं गृहीत्वा च प्रमत्तो राजसम्पदा ॥ भ्रमेण स्थापयामास तत्र वै हस्तिमस्तके ॥ २३ ॥ हस्ती तत्स्पर्शमात्रेण रूपेण च गुणेन च ॥ तेजसा वयसा कान्त्या विष्णुतुल्यो बभूव सः ॥ २४ ॥ त्यक्त्वा शक्रं गजेन्द्रश्चाप्यगच्छद्घोरकाननम् ॥ न शशाक महेन्द्रस्तं रक्षितुं तेजसा मुने ॥ २५ ॥ तत्पुष्पं त्यक्तवन्तं च दृष्ट्वा शक्रं

मुनीश्वरः ॥ तं शशाप महातेजाः क्रोधसंरक्तलोचनः ॥ २६ ॥ दुर्वासा उवाच ॥ अरे श्रिया प्रमत्तस्त्वं कथं मामवमन्यसे ॥ मद्दत्तपुष्पं गर्वेण त्यक्तवान्हस्तिमस्तके ॥ २७ ॥ विष्णोर्निवेदितं पुष्पं नैवेद्यं वा फलं जलम् ॥ प्राप्तिमात्रेण भोक्तव्यं त्यागेन ब्रह्महा जनः॥२८॥भ्रष्टश्रीर्भ्रष्टबुद्धिश्च भ्रष्टज्ञानो भवेन्नरः॥यस्त्यजेद्विष्णुनैवेद्यं भाग्येनोपस्थितं शुभम्॥२९॥प्राप्तिमात्रेण यो भुङ्क्ते भक्त्या विष्णुनिवेदितम्॥पुंसां शतं समुद्धृत्य जीवन्मुक्तः स्वयं भवेत्॥३०॥विष्णुनैवेद्यभोजी यो नित्यं तु प्रणमेद्धरिम्॥पूजयेत्स्तौति वा भक्त्या स विष्णुसदृशो भवेत् ॥ ३१ ॥ तत्स्पर्शवायुना सद्यस्तीर्थौघश्च विशुध्यति ॥ तत्पादरजसा मूढ सद्यः पूता वसुन्धरा ॥३२॥ पुंश्चल्यन्नमवीरान्नं शूद्रश्राद्धान्नमेव च ॥ यद्धरेरनिवेद्यं च वृथा मांसम्म भक्षकम् ॥३३॥ शिवलिङ्गप्रदत्तान्नं यदन्नं शूद्रयाजिनाम् ॥ चिकित्सकद्विजानां च देवलान्नं तथैव च ॥ ३४ ॥ कन्याविक्रयिणामन्नं यदन्नं योनिजीविनाम् ॥ अनुष्णान्नं पर्युषितं सर्वभक्ष्यावशेषितम् ॥ ३५ ॥ शूद्रापतिद्विजान्नं च वृषवाहद्विजान्नकम् ॥ अदीक्षितद्विजान्नं च यदन्नं शवदाहिनाम् ॥ ३६ ॥ अगम्यगामिनां चैव द्विजानामन्नमेव च ॥ मित्रद्रुहां कृतघ्नानामन्नं विश्वासघातिनाम् ॥ ३७ ॥ मिथ्यासाक्ष्यप्रदानां च ब्राह्मणानां तथैव च ॥ एतत्सर्वं विशुध्येत विष्णुनैवेद्यभक्षणात्॥३८॥श्वपचो विष्णुसेवी च वंशानां कोटिमुद्धरेत् ॥ हरेरभक्तो विप्रश्च स्वं च रक्षितुमक्षमः ॥ ३९ ॥ अज्ञानाद्यदि गृह्णाति विष्णोर्निर्माल्यमेव च ॥ सप्तजन्मार्जितात्पापान्मुच्यते नात्र संशयः ॥४०॥ ज्ञात्वा भक्त्या च गृह्णाति विष्णोर्नैवेद्यमेव च ॥ कोटिजन्मार्जितात्पापान्मुच्यते नात्र संशयः ॥ ४१ ॥ यस्मात्संस्थापितं पुष्पं गर्वाद्वै हस्तिमस्तके ॥ तस्माद्युष्मान्परित्यज्य यातु लक्ष्मीर्हरेः पदम् ॥ ४२ ॥ नारायणस्य भक्तोऽहं न बिभेमीश्वरं विधिम् ॥ कालं मृत्युं जरां चैव कानन्यान्गणयामि च ॥ ४३ ॥ किं करिष्यति ते तातः कश्यपश्च प्रजापतिः ॥ बृहस्पतिर्गुरुश्चैव निश्शङ्कस्य च मे हरेः ॥ ४४ ॥ इदं पुष्पं यस्य मूर्ध्नि तस्य वै पूजनं पुरः॥मूर्ध्नि च्छिन्ने शिवशिशोश्छित्त्वेदं योजयिष्यति॥४५॥ इति श्रुत्वा महेन्द्रश्च धृत्वा तच्चरणद्वयम्॥ उच्चै रुरोद शोकार्त्तस्तमुवाच भयाकुलः ॥ ४६ ॥ इन्द्र उवाच ॥ दत्तः समुचितः शापो मह्यं मत्ताय हे प्रभो ॥ हृता त्वया

चेत्सम्पत्तिः कियज्ज्ञानं च देहि मे ॥ ४७ ॥ ऐश्वर्य्यं विपदां बीजं प्रच्छन्नज्ञानकारणम् ॥ मुक्तिमार्गार्गलं दार्ढ्यांद्धरिभक्तिव्यपायकम् ॥ ४८ ॥ जन्ममृत्युजरारोगशोकदुःखांकुरं परम् ॥ सम्पत्तितिमिरान्धश्च मुक्तिमार्गं न पश्यति ॥ ४९ ॥ सम्पन्मत्तः सुमूढश्च सुरामत्तः सचेतनः ॥ बान्धवैर्वेष्टितः सोऽपि बन्धुद्वेषकरो मुने ॥ ५० ॥ सम्पन्मदे प्रमत्तश्च विषयान्धश्च विह्वलः ॥ महाकामी साहसिकः सत्त्वमार्गं न पश्यति ॥५१॥ द्विविधो विषयान्धश्च राजसस्तामसः स्मृतः ॥ अशास्त्रज्ञस्तामसश्च शास्त्रज्ञो राजसः स्मृतः ॥ ५२ ॥ शास्त्रे च द्विविधं मार्गं निर्दिष्टं मुनिपुङ्गव ॥ प्रवृत्तिबीजमेकं च निवृत्तेः कारणं परम् ॥ ५३ ॥ चरन्ति जीविनश्चादौ प्रवृत्तौ दुःखवर्त्मनि ॥ स्वच्छन्दे चाप्रसन्ने च निर्निरोधे च सन्ततम् ॥ ५४ ॥ आपातमधुरे लोभात्क्लेशे च सुखमानिनः ॥ परिणामोत्पत्तिबीजे जन्ममृत्युजराकरे ॥ ५५ ॥ अनेकजन्मपर्य्यन्तं कृत्वा च भ्रमणं मुदा ॥ स्वकर्मविहितायां च नानायोन्यां क्रमेण च ॥५६॥ ततः कृष्णानुग्रहाच्च सत्सङ्गं लभते जनः ॥ सहस्रेषु शतेष्वेको भवाब्धेः पारकारणम् ॥ ५७ ॥ साधुः सत्त्वप्रदीपेन मुक्तिमार्गं प्रदर्शयेत् ॥ तदा करोति यत्नं च जीवी बन्धनखण्डने ॥ ५८ ॥ अनेकजन्मयोगेन तपसाऽनशनेन च ॥ तदा लभेन्मुक्तिमार्गं निर्विघ्नं सुखदं परम् ॥ ५९ ॥ इदं श्रुतं गुरोर्वक्रात्प्रसङ्गावसरेण च ॥ नहि पृष्टमतोऽन्यच्च भवदुःखौघवेष्टिताः ॥ ६० ॥ अधुना विधिना दत्तो विपत्तौ ज्ञानसागरः॥सम्पद्रूपा विपदियं मम निस्तारकारिणी॥६१॥ज्ञानसिन्धो दीनबन्धो मह्यं दीनाय साम्प्रतम् ॥ देहि किञ्चिज्ज्ञानसारं भवपारं दयानिधे ॥ ६२ ॥ इन्द्रस्य वचनं श्रुत्वा प्रहस्य ज्ञानिनां गुरुः ॥ ज्ञानं कथितुमारेभे ह्यतितुष्टः सनातनः ॥ ६३ ॥ दुर्वासा उवाच ॥ अहो महेन्द्र माङ्गल्यमात्मानं द्रष्टुमिच्छसि ॥ आपाततो दुःखबीजं परिणामसुखावहम् ॥ ६४ ॥ स्वगर्भयातनानाशपीडाखण्डनकारणम् ॥ दुष्पारासारदुर्वारसंसारार्णवतारकम् ॥ ६५ ॥ कर्मवृक्षाङ्कुरच्छेदकारणं सर्वतारकम् ॥ सन्तोषसन्ततिकरं प्रवरं सर्ववर्त्मनाम् ॥ ६६ ॥ दानेन तपसा वाऽपि व्रतेनानशनादिना ॥ कर्मणा स्वर्गभोगादि सुखं भवति जीविनाम् ॥ ६७ ॥ काम्यानां कर्मणां चैव मूलं संछिद्य यत्नतः ॥ अधुनेदं मोक्षबीजं संकल्पाभाव एव च ॥ ६८ ॥

यत्कर्म सात्त्विकं कुर्य्यादसंकल्पितमेव च ॥ सर्वं कृष्णार्पणं कृत्वा परे ब्रह्मणि लीयते ॥ ६९ ॥ सांसारिकाणामेतत्तु निर्वाणं
मोचकं विदुः ॥ नेच्छन्ति वैष्णवास्तत्तु सेवाविरहकातराः ॥ ७० ॥ सेवां कुर्वन्ति ते नित्यं विधायोत्तमदेहकम् ॥ गोलोके वाऽपि
वैकुण्ठे तस्यैव परमात्मनः ॥ ७१ ॥ हरिसेवादिरूपां च मुक्तिमिच्छन्ति वैष्णवाः ॥ जीवन्मुक्ताश्च ते शक्र स्वकुलोद्धारका
रिणः ॥ ७२ ॥ स्मरणं कीर्त्तनं विष्णोरर्चनं पादसेवनम् ॥ वन्दनं स्तवनं नित्यं भक्त्या नैवेद्यभक्षणम् ॥ ७३ ॥ चरणोदकपानं च
तन्मंत्रजपनं परम् ॥ इदं निस्तारबीजं च सर्वेषामीप्सितं भवेत् ॥ ७४ ॥ इदं मृत्युञ्जयज्ञानं दत्तं मृत्युञ्जयेन मे ॥ तच्छिष्योऽहं च
निश्शङ्कस्तत्प्रसादाच्च सर्वतः ॥ ७५ ॥ स जन्मदाता स गुरुः स च बन्धुः सतां परः ॥ यो ददाति हरेर्भक्तिं त्रैलोक्ये
च सुदुर्लभम् ॥ ७६ ॥ दर्शयेदन्यमार्गं च विना श्रीकृष्णसेवनम् ॥ स च तं नाशयत्येव ध्रुवं तद्वधभाग्भवेत् ॥ ७७ ॥
सन्ततं जगतां कृष्णनाम मङ्गलकारणम् ॥ मङ्गलं वर्द्धते नित्यं न भवेदायुषो व्ययः ॥ ७८ ॥ तेभ्योऽप्यपैति कालश्च मृत्युस्स्या
द्रोग एव च ॥ सन्तापश्चैव शोकश्च वैनतेयादिवोरगाः ॥ ७९ ॥ कृष्णमन्त्रोपासकश्च ब्राह्मणः श्वपचोऽपि वा ॥ ब्रह्मलोकं समुल्लं
घ्य याति गोलोकमुत्तमम् ॥ ८० ॥ ब्रह्मणा पूजितः सोऽपि मधुपर्कादिना च यः ॥ स्तुतः सुरैश्च सिद्धश्च परमानन्दभावनः
॥ ८१ ॥ ज्ञानसारं तपःसारं ब्रह्मसारं परं शिवम् ॥ शिवेनोक्तं योगसारं श्रीकृष्णपदसेवनम् ॥ ८२ ॥ ब्रह्मादिस्तम्बपर्य्यन्तं सर्वं
मिथ्यैव केवलम् ॥ भज सत्यं परं ब्रह्म राधेशं प्रकृतेः परम् ॥ ८३ ॥ अतीव सुखदं सारं भुक्तिदं मुक्तिदं परम् ॥ सिद्धियोगप्रदं
चैव दातारं सर्वसम्पदाम् ॥ ८४ ॥ योगिनामपि सिद्धानां यतीनां च तपस्विनाम् ॥ सर्वेषां कर्मभोगोऽस्ति न नारायणसेविनाम्
॥ ८५ ॥ भस्मसाच्च भवेत्पापं यदुपस्पर्शमात्रतः ॥ ज्वलदग्नौ पातितं च यथा शुष्केन्धनं तथा ॥ ८६ ॥ ततो रोगा हि वेपन्ते
पापानि च भयानि च ॥ दूरतश्च पलायन्ते यमदूतास्ततो भयात् ॥ ८७ ॥ तावन्निबद्धः संसारे कारागारे विधेर्जनः ॥ न यावत्कृष्ण
मन्त्रं च प्राप्नोति गुरुवक्त्रतः ॥ ८८ ॥ कृतकर्मौघभोगाख्यनिगडच्छेदकारणम् ॥ मायाजालोच्छेदकरं मायापाशनिकृन्तनम् ॥८९॥

गोलोकमार्गसोपानं निस्तारे बीजकारणम् ॥ भक्त्यंकुरस्वरूपं च नित्यं वृद्धमनश्वरम् ॥ ९० ॥ सारं च सर्वतपसां योगानां साधनं तथा ॥ सिद्धीनां वेदपाठानां व्रतादीनां च निश्चितम् ॥ ९१ ॥ दानानां तीर्थशौचानां यज्ञादीनां पुरन्दर ॥ पूजा[1]नामुपवासानामित्याह कमलोद्भवः ॥ ९२ ॥ पुंसां लक्षं पितृणां च शतं मातामहस्य च ॥ पूर्वं परं च तत्संख्यं पितरं मातरं गुरुम् ॥ ९३ ॥ सहोदरं कलत्रं च बन्धुं शिष्यं च किङ्करम् ॥ समुद्धरेच्च श्वशुरं श्वश्रूं कन्यां च तत्सुतम् ॥ ९४ ॥ स्वात्मानं च सतीर्थ्यं च गुरुपत्नीं गुरोः सुतम् ॥ उद्धरेद्बलवान्भक्तो मन्त्रग्रहणमात्रतः ॥ ९५ ॥ मन्त्रग्रहणमात्रेण जीवन्मुक्तो भवेन्नरः ॥ तत्स्पर्शपूतस्तीर्थौघः सद्यः पूता वसुन्धरा ॥ ९६ ॥ अनेकजन्मपर्य्यन्तं दीक्षाहीनो भवेन्नरः ॥तदन्यदेवमन्त्रं च लभते पुण्यलेशतः ॥ ९७ ॥ सप्तजन्मसु देवानां कृत्वा सेवां स्वकर्मतः ॥ लभते च रवेर्मन्त्रं साक्षिणः सर्वकर्म्मणाम् ॥ ९८ ॥ जन्मत्रयं भास्करं च सेवित्वा मानवः शुचिः ॥ लभेद्गणेशमन्त्रं च सर्वविघ्नहरं परम् ॥ ९९ ॥ जन्मत्रयं तं निषेव्य निर्विघ्नश्च भवेन्नरः ॥ विघ्नेशस्य प्रसादेन दिव्यज्ञानं लभेन्नरः ॥ १०० ॥ तदा ज्ञानप्रदीपेन समालोच्य महामतिः ॥ अज्ञानान्धतमश्छित्त्वा महामायां भजेन्नरः ॥ १०१ ॥ प्रकृतिं विष्णुमायां च दुर्गां दुर्गतिनाशिनीम् ॥ सिद्धिदां सिद्धिरूपां च परमां सिद्धियोगिनीम् ॥ १०२ ॥ वाणीरूपां च पद्मां च भद्रां कृष्णप्रियात्मिकाम् ॥ नानारूपां तां निषेव्य जन्मनां शतकं नरः ॥ १०३ ॥ तत्प्रसादाद्भवेज्ज्ञानी ज्ञानानन्दं तदा भजेत् ॥ कृष्णं ज्ञानाधिदेवं च महादेवं सनातनम् ॥ १०४ ॥ शिवं शिवस्वरूपं च शिवदं शिवकारणम् ॥ परमानन्दरूपं च परमानन्ददायिनम् ॥ १०५ ॥ सुखदं मोक्षदं चैव दातारं सर्वसम्पदाम् ॥ अमरत्वप्रदं चैव दीर्घमायुष्यदं परम् ॥ १०६ ॥ इन्द्रत्वं च मनुत्वं च दातुं शक्तं च लीलया ॥ राजेन्द्रत्वप्रदं चैव ज्ञानदं हरिभक्तिदम् ॥ १०७ ॥ जन्मत्रयं तमाराध्य चाशुतोषप्रसादतः ॥ सर्वदस्य प्रसादेन शङ्करस्य महात्मनः ॥ १०८ ॥ वरदस्य वरेणैव हरिभक्तिं लभेद्ध्रुवम् ॥ तदा तद्भक्तसंसर्गात्कृष्णमन्त्रं लभेद्ध्रुवम् ॥ १०९ ॥ निर्म्मलज्ञान

---

[1] जपानामिति पाठः ।

दीपेन प्रदीप्तेन च तत्त्ववित् ॥.ब्रह्मादिस्तम्बपर्य्यन्तं सर्वं मिथ्यैव पश्यति ॥ ११० ॥ दयानिधेः प्रसादेन निर्म्मलज्ञानमालभेत् ॥
वरदस्य वरेणैव हरिभक्तिं लभेद्ध्रुवम् ॥ १११ ॥ तदा निर्वृतिमाप्नोति सारात्सारां परात्पराम् ॥ यत्र देहे लभेन्मन्त्रं तद्देहावधि भारते
॥ ११२ ॥ तत्पाञ्चभौतिकं त्यक्त्वा बिभृयाद्दिव्यरूपकम् ॥ करोति दास्यं गोलोके वैकुण्ठे वा हरेः पदे ॥ ११३ ॥ परमानन्दसं
युक्तो मोहादिषु विवर्जितः ॥ न विद्यते पुनर्जन्म पुनरागमनं हरे ॥ ११४ ॥ पुनश्च न पिबेत्क्षीरं धृत्वा मातृस्तनं परम् ॥ विष्णुम
न्त्रोपासकानां गङ्गादेस्तीर्थसेविनाम् ॥ ११५ ॥ स्वधर्मिणां च भिक्षूणां पुनर्जन्म न विद्यते ॥ तीर्थे परित्यजेत्पापं क्रियां कृत्वा
हरिं भजेत् ॥ ११६ ॥ अयं निरूपितो धात्रा स्वधर्मस्तीर्थसेविनाम् ॥ तन्नाममन्त्रं प्रजपेत्तत्सेवादिषु तत्परः ॥ ११७ ॥ व्रतोप
वासरत इत्युक्तो वै विष्णुसेविनाम् ॥ सदन्ने वा कदन्ने वा लोष्टे वा काञ्चने तथा ॥ ११८ ॥ समा बुद्धिर्यस्य शश्वत्स
संन्यासीति कीर्तितः ॥ दण्डं कमण्डलुं रक्तवस्त्रमात्रं च धारयेत् ॥ ११९ ॥ नित्यं प्रवासी नैकत्र स्यात्संन्यासीति
कीर्त्तितः ॥ शुद्धाचारद्विजान्नं च भुङ्क्ते लोभादिवर्जितः ॥ १२० ॥ किन्तु किंचिन्न याचेत स संन्यासीति कीर्त्तितः ॥
न व्यापारी नाश्रमी च सर्वकर्मविवर्जितः ॥ १२१ ॥ ध्यायेन्नारायणं शश्वत्स संन्यासीति कीर्त्तितः ॥ शश्वन्मौनी ब्रह्मचारी संभाषा
परिवर्जितः ॥ १२२ ॥ सर्वं ब्रह्ममयं पश्येत्स संन्यासीति कीर्त्तितः ॥ सर्वत्र समबुद्धिश्च हिंसामायाविवर्जितः ॥ १२३ ॥ क्रोधाहङ्का
ररहितः स संन्यासीति कीर्त्तितः ॥ अयाचितोपस्थितं च मिष्टामिष्टं च भुक्तवान् ॥ १२४ ॥ न याचते भक्षणार्थी स संन्यासीति
कीर्त्तितः ॥ न च पश्येन्मुखं स्त्रीणां न तिष्ठेत्तत्समीपतः॥१२५॥दारवीमपि योषां च न स्पृशेद्यः स भिक्षुकः ॥ अयं संन्यासिनां धर्म
इत्याह कमलोद्भवः ॥ १२६ ॥ विपर्य्यये विनाशश्च जन्मयाम्यं भयं भवेत् ॥ जन्मदुःखं याम्यदुःखं जीविनामतिदारुणम् ॥१२७॥
सुरसूकरयोनौ वा गर्भे दुःखं समं सुर ॥ योनौ वा क्षुद्रजन्तूनां पश्वादीनां तथैव च ॥ १२८ ॥ गर्भे स्मरन्ति सर्वे ते कर्म्म जन्म
शतोद्भवम्॥ विस्मरेन्निर्गतो जीवो गर्भाद्वै विष्णुमायया॥स्वदेहं पाति यत्नेन सुरो वा कीट एव वा॥१२९॥योनेरभ्यन्तरे शुक्रे पतिते

पुरुषस्य च॥शुक्रं शोणितयुक्तं च सहसा तत्क्षणं भवेत्॥१३०॥रक्ताधिके मातृसमश्वेतरे पितुराकृतिः॥ युग्माहे च भवेत्पुत्रः कन्यका तद्विपर्य्यये ॥१३१॥ रविभौमगुरूणां च वारे चेत्तद्भवेत्सुतः ॥ अयुग्माहे तदितरे वारे वै कन्यका भवेत् ॥ १३२ ॥ प्रथमप्रहरे जन्म यस्य सोऽल्पायुरेव च ॥ द्वितीये मध्यमश्चैव तृतीये तत्परो भवेत् ॥ १३३ ॥ चतुर्थे चिरजीवी स्यात्क्षणानामनुरूपकः ॥ दुःखी वाऽथ सुखी वाऽपि पूर्वकर्मानुरूपतः ॥ १३४ ॥ यादृशे च क्षणे जन्म प्रसवस्तादृशे भवेत् ॥ प्रसूतिक्षणचर्चां च कुर्वन्त्येवं विचक्षणाः ॥ १३५ ॥ कललं त्वेकरात्रेण प्रवृद्धः स्याद्दिने दिने ॥ सप्तमे बदराकारो मासे गण्डुसमो भवेत् ॥ १३६ ॥ मासत्रये मांसपिण्डो हस्तपादादिवर्जितः ॥ सर्वावयवसम्पन्नो देही मासे च पञ्चमे ॥ १३७ ॥ भवेत्तु जीवसंचारः षण्मासे सर्वतत्त्ववित् ॥ दुःखी स्वल्पस्थलस्थायी शकुन्त इव पञ्जरे ॥ १३८ ॥ मातृजग्धान्नपानं च भुङ्क्तेऽमेध्यस्थले स्थितः ॥ हाहेति शब्दं कृत्वा च चिन्तयेदीश्वरं परम् ॥ १३९ ॥ एवं च चतुरो मासान्भुक्त्वा परमयातनाम् ॥ प्रेरितो वायुना काले गर्भाद्वै निर्गतो भवेत् ॥ १४० ॥ दिग्देशकालाव्युत्पन्नो विस्मृतो विष्णुमायया ॥ शश्वद्विण्मूत्रसंयुक्तः शिशुः स्याच्छैशवावधि ॥ १४१ ॥ परायत्तोऽप्यक्षमश्च मशकादिनिवारणे ॥ कीटादिभुक्तो दुःखी च रौति तत्र पुनः पुनः ॥ १४२ ॥ स्तनान्धोऽप्यसमर्थश्च याच्ञां कर्तुमभीप्सिताम् ॥ न वाणी निस्सरेत्तस्य पौगण्डावधि सुस्फुटा॥१४३॥पौगण्डे यातनां भुक्त्वा प्राप्नुते यौवनं पुनः ॥ न स्मरेन्मायया देही गर्भादेर्यातनां पुनः॥ ॥ १४४ ॥ आहारमैथुनार्त्तश्च नानामोहादिवेष्टितः ॥ पुत्रं कलत्रमनुगं यत्नेन परिपालयेत् ॥ १४५ ॥ एवं यावत्समर्थश्च तावदेव हि पूजितः ॥ असमर्थं च मन्यन्ते बान्धवा गोजरं[1] यथा ॥ १४६ ॥ यदाऽतीव जरायुक्तो जडोऽतिबधिरो भवेत् ॥ कासश्वासादियुक्तश्च परायत्तोऽतिमूढवत् ॥ १४७ ॥ तदन्तरेऽनुतापं च कुरुते सन्ततं पुनः ॥ न सेवितं हरेस्तीर्थं सत्संगश्चापि कामतः ॥ १४८ ॥ पुनश्च मानवीं योनिं लभामि भारते यदि ॥ तदा तीर्थं गमिष्यामि भजे वै कृष्णमित्यहो ॥ १४९ ॥ इत्येवमादि मनसि कुर्वन्तं तं जडं

---

[1] गोजरं वृद्धवृषभमित्यर्थः ।

सुर ॥ गृह्णाति यमदूतश्च काले प्राप्तेऽतिदारुणः ॥ १५० ॥ स पश्येद्यमदूतं च पाशहस्तं च दण्डिनम् ॥ अतीव कोपरक्ताक्षं विकृता
कारमुल्बणम् ॥ १५१ ॥ दुर्निवार्य्यमुपायैश्च बलिष्ठं च भयङ्करम् ॥ दुर्दृश्यं सर्वसिद्धिज्ञं सर्वादृष्टं पुरः स्थितम् ॥ १५२ ॥ दृष्टमात्रा
न्महाभीतो विण्मूत्रं च समुत्सृजेत् ॥ तदा प्राणांस्त्यजेत्सद्यो देहं वै पाञ्चभौतिकम् ॥१५३॥ अंगुष्ठमात्रं पुरुषं गृहीत्वा यमकिङ्करः॥
विन्यस्य भोगदेहे च स्वस्थानं प्रापयेद् द्रुतम् ॥ १५४ ॥ जीवो गत्वा यमं पश्येत्सर्वधर्मज्ञमेव च ॥ रत्नसिंहासनस्थं च सस्मितं
सुस्थिरं परम् ॥१५५॥ धर्माधर्मविचारज्ञं सर्वज्ञं सर्वतोमुखम् ॥ विश्वेष्वेकाधिकारं च विधात्रा निर्मितं पुरा ॥१५६॥ वह्निशुद्धांशुका
धानं रत्नभूषणभूषितम् ॥ वेष्टितं पार्षदगणैर्दूतैश्चापि त्रिकोटिभिः ॥१५७॥ जपन्तं श्रीकृष्णनाम शुद्धस्फाटिकमालया ॥ ध्यायमानं
तत्पदाब्जं पुलकाङ्कितविग्रहम् ॥ १५८ ॥ सगद्गदं साश्रुनेत्रं सर्वत्र समदर्शिनम्॥अतीव कमनीयं च शश्वत्सुस्थिरयौवनम् ॥१५९॥
स्वतेजसा प्रज्वलन्तं सुखदृश्यं विचक्षणम् ॥ शरत्पार्वणचन्द्राभं चित्रगुप्तपुरःस्थितम् ॥ १६० ॥ पुण्यात्मनां शान्तरूपं पापिनां च
भयङ्करम् ॥ तं दृष्ट्वा प्रणमेद्देही महाभीतश्च तिष्ठति ॥ १६१ ॥ चित्रगुप्तविचारेण येषां यदुचितं फलम् ॥ शुभाशुभं च कुरुते
तदेव रविनन्दनः ॥ १६२ ॥ एवं तेषां गतायाते निवृत्तिर्नास्ति जीविनाम् ॥ निवृत्तिहेतुरूपं च श्रीकृष्णपदसेवनम् ॥
॥ १६३ ॥ इत्येवं कथितं सर्वं वरं प्रार्थय वाञ्छितम् ॥ सर्वं दास्यामि ते वत्स न मेऽसाध्यं च किंचन ॥ १६४ ॥
महेन्द्र उवाच ॥ इन्द्रत्वं च गतं भद्रं किमैश्वर्य्यैः प्रयोजनम् ॥ कल्पवृक्ष मुनिश्रेष्ठ देहि मे परमं पदम् ॥ १६५ ॥ महेन्द्रस्य वचः
श्रुत्वा प्रहस्य मुनिपुङ्गवः ॥ तमुवाच वचः सत्यं वेदोक्तं सारमेव च ॥१६६॥ दुर्वासा उवाच ॥ परं पदं विषयिणां महेन्द्रातिसुदुर्ल
भम् ॥ मुक्तिर्युष्मद्विधानां च न लये प्राकृतेऽपि च ॥ १६७ ॥ आविर्भावः सृष्टिविधौ तिरोभावो लयेऽपि च ॥ यथा जागरणं
सुप्तिर्भवत्येव क्रमेण च ॥ १६८ ॥ यथा भ्रमति कालश्च तथा विषयिणो ध्रुवम् ॥ चक्रनेमिक्रमेणैव नित्यमेवेश्वरेच्छया ॥१६९॥
पलमेकं भवेदेव यथा विपलषष्टिभिः ॥ षष्टिभिश्च पलैर्दण्डो मुहूर्त्तौ द्विगुणात्ततः॥१७०॥त्रिंशद्भिश्च मुहूर्त्तैश्च भवेदेव दिवानिशम्॥

दशपञ्च दिवारात्रिः पक्षमेकं विदुर्बुधाः ॥ १७१ ॥ पक्षाभ्यां शुक्लकृष्णाभ्यां मास एव विधीयते ॥ ऋतुर्द्वाभ्यां च मासाभ्यां संख्याविद्भिः प्रकीर्त्तितः ॥ १७२ ॥ ऋतुत्रयेणायनं च ताभ्यां द्वाभ्यां च वत्सरः ॥ त्रिंशत्सहस्राधिकैश्च त्रिचत्वारिंशलक्षकैः ॥ १७३ ॥ वत्सरैर्नरमानैश्च युगानां च चतुष्टयम् ॥ षष्ट्याऽधिके पञ्चशते सहस्रे पञ्चविंशतौ ॥१७४॥ युगे नराणां शक्रायुर्मनोरायुः प्रकीर्त्तितम् ॥ दिग्लक्षेन्द्रनिपातेऽष्टसहस्राधिक एव च ॥१७५॥ निपातो ब्रह्मणस्तत्र भवेत्प्राकृतिको लयः ॥ लये प्राकृतिके वत्स कृष्णस्य परमात्मनः ॥ १७६ ॥ चक्षुर्निमेषः सृष्टिश्च पुनरुन्मीलने तथा ॥ ब्रह्मसृष्टिलयानां च संख्या नास्ति श्रुतौ श्रुतम् ॥१७७॥ यथा पृथिव्या रेणूनामित्यूचे चन्द्रशेखरः ॥ एतेषां मोक्षणं नास्ति कथितानि च यानि तु ॥ १७८॥ सृष्टिसूत्रस्वरूपं हि चान्यद्वृणु वरं सुर ॥ मुनीन्द्रस्य वचः श्रुत्वा देवेन्द्रो विस्मितो मुने ॥ १७९ ॥ आत्मनः पूर्वमैश्वर्य्यं वरयामास तत्र वै ॥ तत्प्राप्स्यस्यचिरेणैवेत्युक्त्वा स प्रययौ गृहम् ॥ १८० ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे दुर्वासोमुनिसुरेन्द्रसंवादे इन्द्रं प्रति दुर्वासःशापादिकथनं नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥

नारद उवाच ॥ हरेर्गुणं समाकर्ण्य ज्ञानं प्राप्य पुरन्दरः ॥ किं चकार गृहं गत्वा तन्मे व्याख्यातुमर्हसि ॥१॥ नारायण उवाच ॥ श्रीकृष्णस्य गुणं श्रुत्वा वीतरागो बभूव सः ॥ वैराग्यं वर्द्धयामास तदा ब्रह्मन्दिने दिने ॥ २ ॥ मुनिस्थानाद्गृहं गत्वा स ददर्शामरावर्तीम् ॥ दैत्यैरसुरसंघैश्च समाकीर्णां भयाकुलाम् ॥३॥ विषण्णबान्धवां चैव बन्धुहीनां च कुत्रचित् ॥ पितृमातृकलत्रादिविहीनामतिचञ्चलाम् ॥ ४ ॥ शत्रुग्रस्तां च दृष्ट्वा तामगमद्वाक्पतिं प्रति ॥ शक्रो मन्दाकिनीतीरे ददर्श गुरुमीश्वरम् ॥ ५ ॥ ध्यायमानं परं ब्रह्म गङ्गातोये स्थितं परम् ॥ सूर्य्याभिसंमुखं पूर्वमुखं वै विश्वतोमुखम् ॥ ६ ॥ साश्रुनेत्रं पुलकितं परमानन्दसंयुतम् ॥ वरिष्ठं च गरिष्ठं च धर्मिष्ठं चेष्टसेविनम् ॥ ७ ॥ श्रेष्ठं च बन्धुवर्गाणामतिश्रेष्ठं च मानिनाम् ॥ ज्येष्ठं च बन्धुवर्गाणां नेष्टं च सुरवैरिणाम् ॥ ८ ॥ दृष्ट्वा गुरुं जपन्तं च तत्र तस्थौ सुरेश्वरः ॥ प्रहरान्ते गुरुं दृष्ट्वा चोत्थितं प्रणनाम सः ॥ ९ ॥ प्रणम्य चरणाम्भोजे रुरोदोच्चैर्मुहुर्मुहुः ॥ वृत्तान्तं कथयामास ब्रह्मशापादिकं तथा ॥१०॥ पुन

वरो मया लब्धो ज्ञानिनामपि दुर्लभाम् ॥ वैरिग्रस्तां स्वीयपुरीं क्रमेणैव सुरेश्वरः ॥ ११ ॥ शिष्यस्य वचनं श्रुत्वा सतां बुद्धिमतां वरः ॥ बृहस्पतिरुवाचेदं कोपरक्तान्तलोचनः ॥ १२ ॥ बृहस्पतिरुवाच ॥ श्रुतं सर्वं सुरश्रेष्ठ मा रोदीर्वचनं शृणु ॥ न कातरो हि नीतिज्ञो विपत्तौ स्यात्कदाचन ॥ १३ ॥ सम्पत्तिर्वा विपत्तिर्वा नश्वरा स्वप्नरूपिणी ॥ पूर्वस्वकर्मायत्ता च स्वयं कर्त्ता तयोरपि ॥ ॥ १४ ॥ सर्वेषां च भ्रमत्येव शश्वज्जन्मनि जन्मनि ॥ चक्रनेमिक्रमेणैव तत्र का परिदेवना ॥ १५ ॥ भुङ्क्ते हि स्वकृतं कर्म सर्वत्रापि च भारते ॥ शुभाशुभं च यत्किंचित्स्वकर्मफलभुक्पुमान् ॥ १६ ॥ नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥ अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ॥ १७ ॥ इत्येवमुक्तं वेदे च कृष्णेन परमात्मना ॥ साम्नि कौथुमशाखायां संबोध्य स्वकुलोद्भवम् ॥ ॥१८॥ जन्म भोगावशेषे च सर्वेषां कृतकर्मणाम् ॥ अनुरूपं च तेषां वै भारतेऽन्यत्र चैव हि ॥१९॥ कर्मणा ब्रह्मशापं च कर्मणा च शुभाशिषम् ॥ कर्मणा च महालक्ष्मीं लभेद्दैन्यं च कर्मणा ॥ २० ॥ कोटिजन्मार्जितं कर्म जीविनामनुगच्छति ॥ नहि त्यजेद्विना भोगात्तं छायेव पुरन्दर ॥ २१ ॥ कालभेदे देशभेदे पात्रभेदे च कर्मणाम् ॥ न्यूनताऽधिकता वाऽपि भवेदेव हि कर्मणाम् ॥ ॥ २२ ॥ वस्तुदाने च वस्तूनां समं पुण्यं समे दिने ॥ दिनभेदे कोटिगुणमसंख्यं वाऽधिकं ततः ॥ २३ ॥ समदेशे च वस्तूनां दाने पुण्यं समं वृषन् ॥ देशभेदे कोटिगुणमसंख्यं वाऽधिकं ततः ॥ २४ ॥ समे पात्रे समं पुण्यं वस्तूनां कर्तुरेव च ॥ पात्रभेदे शतगुणमसंख्यं वा ततोऽधिकम् ॥ २५ ॥ यथा फलन्ति सस्यानि न्यूनान्यप्यधिकानि च ॥ कर्षकाणां क्षेत्रभेदे पात्रभेदे फलं तथा ॥ २६ ॥ सामान्यदिवसे विप्रे दानं समफलं भवेत् ॥ अमायां रविसंक्रान्त्यां फलं शतगुणं भवेत् ॥ चातुर्मास्यां पौर्णमास्यामनन्तफलमेव च ॥ २७ ॥ ग्रहणे शशिनः कोटिगुणं च फलमेव च ॥ सूर्य्यस्य ग्रहणे चापि ततो दशगुणं फलम् ॥ २८ ॥ अक्षयायामक्षयं चाप्यसंख्यफलमुच्यते ॥ एवमन्यत्र पुण्याहे फलाधिक्यं भवेदिह ॥ २९ ॥ यथा दाने तथा स्नाने जपे वै पुण्यकर्मसु ॥ एवं सर्वत्र बोद्धव्यं नराणां कर्मणां फलम् ॥ ३० ॥ सामान्यदेशे दानं च

विप्रे समफलं भवेत् ॥ तीर्थे देवगृहे चैव फलं शतगुणं स्मृतम् ॥ ३१ ॥ गङ्गायां वै कोटिगुणं क्षेत्रे नारायणेऽव्ययम् ॥ कुरुक्षेत्रे बदर्य्यां च काश्यां कोटिगुणं तथा ॥ ३२ ॥ यथा च वै कोटिगुणं तथा वै विष्णुमन्दिरे ॥ केदारे वै लक्षगुणं हरिद्वारे तथा फलम् ॥ ३३ ॥ पुष्करे भास्करक्षेत्रे दशलक्षगुणं फलम् ॥ एवं सर्वत्र बोद्धव्यं फलाधिक्यं क्रमेण च ॥३४॥ सामान्यब्राह्मणे दानं सममेव फलं लभेत् ॥ लक्षं त्रिसन्ध्यं पूते च पण्डिते च जितेन्द्रिये ॥३५॥ विष्णुमन्त्रोपासके च बुधे कोटिगुणं फलम्॥ एवं सर्वत्र बोद्धव्यं फलाधिक्यं गुणाधिके ॥३६॥ यथा दण्डेन सूत्रेण शरावेण जलेन च ॥ कुम्भं निर्माति चक्रेण कुम्भकारो मृदा भुवि ॥३७॥ तथैव कर्मसूत्रेण फलं धाता ददाति च ॥ यस्याज्ञया सृष्टिविधौ तं च नारायणं भज ॥ ३८ ॥ स विधाता विधातुश्च पातुः पाता जगत्त्रये ॥ स्रष्टुः स्रष्टा च संहर्त्तुः संहर्त्ता कालकालकः ॥ ३९ ॥ महाविपत्तौ संसारे यः स्मरेन्मधुसूदनम् ॥ विपत्तौ तस्य सम्पत्तिर्भवेदित्याह शङ्करः ॥ ४० ॥ इत्येवमुक्त्वा जीवश्च समालिङ्ग्य सुरेश्वरम् ॥ दत्त्वा शुभाशिषं [1]चेष्टं बोधयामास नारद ॥ ४१ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे बृहस्पतिमहेन्द्रसंवादे महालक्ष्म्युपाख्याने कर्मफलनिरूपणं नाम सप्तत्रिंशत्तमोऽध्यायः ॥३७॥ नारायण उवाच ॥ हरिं ध्यात्वा हरिर्ब्रह्मञ्जगाम ब्रह्मणः सभाम्॥बृहस्पतिं पुरस्कृत्य सर्वैः सुरगणैः सह ॥ १ ॥ शीघ्रं गत्वा ब्रह्मलोकं दृष्ट्वा च कमलोद्भवम् ॥ प्रणेमुर्देवताः सर्वा गुरुणा सह नारद ॥२॥ वृत्तान्तं कथयामास सुराचार्यो विधिं विभुम् ॥ प्रहस्योवाच तच्छ्रुत्वा महेन्द्रं कमलोद्भवः ॥ ३ ॥ ब्रह्मोवाच ॥ वत्स मद्वंशजातोऽसि प्रपौत्रो मे विचक्षणः ॥ बृहस्पतेश्च शिष्यस्त्वं सुराणामधिपः स्वयम् ॥४॥ मातामहस्ते दक्षश्च विष्णुभक्तः प्रतापवान् ॥ कुलत्रयं यच्छुद्धं च कथं सोऽहंकृतो भवेत् ॥ ५ ॥ माता पतिव्रता यस्य पिता शुद्धो जितेन्द्रियः ॥ मातामहो मातुलश्च कथं सोऽहंकृतो भवेत् ॥ ६ ॥ जनः पैतृकदोषेण दोषान्मातामहस्य च ॥ गुरोर्दोषान्नीतिर्दोषैर्हरिद्वेषी भवेद्ध्रुवम् ॥ ७ ॥ सर्वान्तरात्मा भगवान्सर्वदेहेष्ववस्थितः॥

---

[1] त्रिभिरिति पाठः ।

यस्य देहात्स प्रयाति स शवस्तत्क्षणं भवेत् ॥ ८ ॥ मनोऽहमिन्द्रियेशश्च ज्ञानरूपो हि शङ्करः ॥ असवः प्रकृतिर्विष्णुर्बुद्धिर्भग
वती सती ॥ ९ ॥ निद्रादयः शक्तयश्च ताः सर्वाः प्रकृतेः कलाः ॥ आत्मनः प्रतिबिम्बं च जीवो भोगी शरीरभृत् ॥ १० ॥
आत्मनीशे गते देहात्सर्वे यान्ति ससंभ्रमात् ॥ यथा वर्त्मनि गच्छन्तं नरदेवमिवानुगाः ॥ ११ ॥ अहं शिवश्च शेषश्च विष्णुर्धर्मो
महान्विराट् ॥ वयं यदंशा भक्ताश्च तत्पुष्पं न्यक्कृतं त्वया ॥ १२ ॥ शिवेन पूजितं पादपद्मं पुष्पेण येन च ॥ तच्च दुर्वाससा
दत्तं दैवेनान्यकृतं सुर ॥ १३ ॥ तत्पुष्पं मस्तके यस्य कृष्णपादाब्जतश्च्युतम् ॥ सर्वेषां वै सुराणां च तत्पूजा पुरतो भवेत् ॥१४॥
दैवेन वञ्चितस्त्वं च दैवं च बलवत्तरम् ॥ भाग्यहीनं जनं मूढं को वा रक्षितुमीश्वरः ॥ १५ ॥ कृष्णं न मन्यते यो हि श्रीनाथं सर्व
वन्दितम् ॥ प्रयाति रुष्टा तद्दासी महालक्ष्मीर्विहाय तम् ॥ १६ ॥ शतयज्ञेन या लब्धा दीक्षितेन त्वया पुरा ॥ सा श्रीर्गता
ऽधुना कोपात्कृष्णनिर्माल्यवर्जनात् ॥ १७ ॥ अधुना गच्छ वैकुण्ठं मया च गुरुणा सह ॥ निषेव्य तत्र श्रीनाथं श्रियं प्राप्स्यसि
तद्वरात् ॥ १८ ॥ इत्येवमुक्त्वा स ब्रह्मा सर्वैः सुरगणैः सह ॥ शीघ्रं जगाम वैकुण्ठं यत्र श्रीशस्तया सह ॥ १९ ॥ तत्र गत्वा परं
ब्रह्म भगवन्तं सनातनम् ॥ दृष्ट्वा तेजःस्वरूपं च प्रज्वलन्तं स्वतेजसा ॥ २० ॥ ग्रीष्ममध्याह्नमार्त्तण्डशतकोटिसमप्रभम् ॥
शान्तं चानादिमध्यान्तं लक्ष्मीकान्तमनन्तकम् ॥ २१ ॥ चतुर्भुजैः पार्षदैश्च सरस्वत्या स्तुतं नतम् ॥ भक्त्या चतुर्भिर्वेदैश्च
गङ्गया परिषेवितम् ॥ २२ ॥ तं प्रणेमुः सुराः सर्वे मूर्ध्ना ब्रह्मपुरोगमाः ॥ भक्तिनम्राः साश्रुनेत्रास्तुष्टुवुः पुरुषोत्तमम् ॥ २३ ॥
वृत्तान्तं कथयामास स्वयं ब्रह्मा कृताञ्जलिः ॥ रुरुदुर्देवताः सर्वाः स्वाधिकारच्युताश्च ताः॥२४॥ स चापश्यत्सुरगणं विपद्ग्रस्तं भया
कुलम् ॥ वस्त्रभूषणशून्यं च वाहनादिविवर्जितम् ॥२५॥ शोभाशून्यं हतश्रीकं परिवारैरनावृतम् ॥ उवाच कातरं दृष्ट्वा विपन्नभयभ
ञ्जनः॥२६॥नारायण उवाच ॥ मा भैर्ब्रह्मन्हे सुराश्च भयं किं वो मयि स्थिते ॥ दास्यामि लक्ष्मीमचलां परमैश्वर्यवर्द्धिनीम्॥२७॥
किञ्च मद्वचनं किञ्चिच्छ्रूयतां समयोचितम् ॥ हितं सत्यं सारभूतं परिणामसुखावहम् ॥ २८ ॥ जनाश्चासंख्यविश्वस्था मदधीनाश्च

सन्ततम् ॥ यथा तथाऽहं मद्भक्तैः पराधीनः स्वतन्त्रकः ॥ २९ ॥ यो यो रुष्टो हि मद्भक्तेमत्परे हि निरङ्कुशः ॥ तद्गृहेऽहं न तिष्ठामि पद्मया सह निश्चितम् ॥ ३० ॥ दुर्वासाः शङ्करांशश्च वैष्णवो मत्परायणः ॥ तच्छापादागतोऽहं च सश्रीको वो गृहादपि ॥ ३१ ॥ यत्र शङ्खध्वनिर्नास्ति तुलसी च शिलार्चनम् ॥ न भोजनं च विप्राणां न पद्मा तत्र तिष्ठति ॥ ३२ ॥ मद्भक्तानां च मे निन्दा यत्र यत्र भवेत्सुराः ॥ महारुष्टा महालक्ष्मीस्ततो याति पराभवात् ॥ ३३ ॥ मद्भक्तिहीनो यो मूढो यो भुङ्क्ते हरिवासरे ॥ मम जन्मदिने चापि याति श्रीस्तद्गृहादपि ॥ ३४ ॥ मन्नामविक्रयी यश्च विक्रीणाति स्वकन्यकाम् ॥ यत्रातिथिर्न भुङ्क्ते च मत्प्रिया याति तद्गृहात् ॥ ३५ ॥ पापिनां यो गृहं याति शूद्रश्राद्धान्नभोजिनाम् ॥ महारुष्टा ततो याति मन्दिरात्कमलालया ॥ ३६ ॥ शूद्राणां शवदाही च भाग्यहीनश्च वाडवः ॥ याति रुष्टा तद्गृहाच्च देवी कमलवासिनी ॥ ३७ ॥ शूद्राणां सूपकारो यो ब्राह्मणो वृषवाहकः ॥ तत्तो[1]यपानभीता च कमला याति तद्गृहात् ॥ ३८ ॥ विप्रो यवनसेवी च देवलः शूद्रयाजकः ॥ ततोयपानभीता च वैष्णवी याति तद्गृहात् ॥ ३९ ॥ विश्वासघाती मित्रघ्नो नरघाती कृतघ्नकः ॥ अगम्यां याति यो विप्रो मद्भार्य्या याति तद्गृहात् ॥ ४० ॥ अशुद्धहृदयः क्रूरो हिंसको निन्दको द्विजः ॥ ब्राह्मण्यां शूद्रजातश्च याति देवी च तद्गृहात् ॥ ४१ ॥ यो विप्रः पुंश्चलीपुत्रो महापापी च तत्पतिः ॥ अवीरान्नं च यो भुङ्क्ते तस्माद्याति जगत्प्रसूः ॥ ४२ ॥ तृणं छिनत्ति नखरैस्तैर्वा यो हि लिखेन्महीम् ॥ जिह्नो वा मलत्रासाश्च सा प्रयाति च तद्गृहात् ॥ ४३ ॥ सूर्य्योदये च द्विर्भोजी दिवाशायी च वाडवः ॥ दिवामैथुनकारी च तस्माद्याति हरिप्रिया ॥ ॥ ४४ ॥ आचारहीनो यो विप्रो यश्च शूद्रप्रतिग्रही ॥ अदीक्षितो हि यो मूढस्तस्माल्लोला प्रयाति च ॥ ४५ ॥ स्निग्धपादश्च नग्नो वा यः शेते ज्ञानदुर्बलः ॥ शश्वद्धर्मातिवाचालो याति वै तद्गृहात्सती ॥ ४६ ॥ शिरस्नातश्च तैलेन योऽन्यदङ्गमुपस्पृशेत् ॥ स्वाङ्गे च वादयेद्वाद्यं रमा याति च तद्गृहात् ॥ ४७ ॥ व्रतोपवासहीनो यः सन्ध्याहीनोऽशुचिर्द्विजः ॥ विष्णुभक्तिविहीनो यस्तस्माद्याति

---

[1] ततोऽपमानभीता चेति पाठः ।

हरिप्रिया ॥ ४८ ॥ ब्राह्मणं निन्दयेद्यो हि तान्वै द्वेष्टि च सन्ततम् ॥ हिंसाकारी दयाहीनो याति सर्वप्रसूस्ततः ॥ ४९ ॥ यत्र तत्र हरेरर्चा हरेरुत्कीर्त्तनं शुभम् ॥ तत्र तिष्ठति सा देवी कमला सर्वमङ्गला ॥ ५० ॥ यत्र प्रशंसा कृष्णस्य तद्भक्तस्य पितामह ॥ सा च कृष्णप्रिया देवी तत्र तिष्ठति सन्ततम्॥५१॥यत्र शङ्खध्वनिः शङ्खः शिला च तुलसीदलम्॥तत्सेवा वन्दनं ध्यानं तत्र सा तिष्ठति स्वयम् ॥५२॥ शिवलिङ्गार्चनं यत्र तस्य चोत्कीर्त्तनं शुभम्॥दुर्गार्चनं तद्गुणाश्च तत्र पद्मनिवासिनी ॥५३॥ विप्राणां सेवनं यत्र तेषां वै भोजनं शुभम् ॥ अर्चनं सर्वदेवानां तत्र पद्ममुखी सती ॥ ५४ ॥ इत्युक्त्वा च सुरान्सर्वान्रमामाह रमापतिः ॥ क्षीरोदसागरे जन्म लभस्व कलया रमे ॥ ५५ ॥ इत्युक्त्वा तां जगन्नाथो ब्रह्माणं पुनराह च ॥ मथित्वा सागरं लक्ष्मीं देवेभ्यो देहि पद्मज ॥ ५६ ॥ इत्युक्त्वा कमलाकान्तो देवश्चान्तरधान्मुने ॥ देवाश्चिरेण कालेन ययुः क्षीरोदसागरम् ॥ ५७ ॥ मन्थानं मन्दरं कृत्वा कूर्मं कृत्वा च भाजनम् ॥ रज्जुं कृत्वा वासुकिं च ममन्थुश्चैव सागरम् ॥ ५८ ॥ धन्वन्तरिं च पीयूषमुच्चैःश्रवसमीप्सितम् ॥ नानारत्नं हस्तिरत्नं प्रापुर्लक्ष्म्याश्च दर्शनम् ॥५९॥ वनमालां ददौ सा च क्षीरोदशायिने मुने ॥ सर्वेश्वराय रम्याय विष्णवे वैष्णवी सती ॥६०॥ देवैः स्तुता पूजिता च ब्रह्मणा शङ्करेण च ॥ ददौ दृष्टिं सुरगृहे ब्रह्मशापविमोचिकाम् ॥ ६१ ॥ प्रापुर्देवाः स्वविषयं दैत्यैर्ग्रस्तं भयङ्करैः॥ महालक्ष्मीप्रसादेन वरदानेन नारद ॥ ६२ ॥ इत्येवं कथितं सर्वं लक्ष्म्युपाख्यानमुत्तमम् ॥ सुखदं सारभूतं च किं भूयः श्रोतुमिच्छसि ॥ ६३ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे लक्ष्म्युपाख्याने समुद्रमथनं नामाष्टात्रिंशोऽध्यायः ॥ ३८ ॥ नारद उवाच ॥ हरेरुत्कीर्त्तनं भद्रं श्रुतं तज्ज्ञानमुत्तमम् ॥ ईप्सितं लक्ष्म्युपाख्यानं ध्यानं स्तोत्रादिकं वद ॥ १ ॥ हरिणा पूजिता पूर्वं ततो ब्रह्मादिभिस्तथा॥शक्रेण भ्रष्टराज्येन सार्द्धं सुरगणेन च॥२॥ध्यानेन पूजिता केन विधिना केन वा पुरा॥केन स्तुता वा स्तोत्रेण तन्मे व्याख्यातुमर्हसि ॥ ३ ॥ श्रीनारायण उवाच ॥ स्नात्वा तीर्थे पुरा शक्रो धृत्वा धौते च वाससी ॥ क्षीरोदे संस्थाप्य घटं देवषट्कमपूजयत् ॥ ४ ॥ गणेशं च दिनेशं च वह्निं विष्णुं शिवं शिवाम् ॥ एतान्भक्त्या समभ्यर्च्य पुष्पगन्धादिभि

स्तथा ॥ ५ ॥ तत्रावाह्य महालक्ष्मीं परमैश्वर्य्यरूपिणीम् ॥ पूजां चकार देवेशो ब्रह्मणा च पुरोधसा ॥ ६ ॥ पुरः स्थितेषु मुनिषु ब्राह्मणेषु गुरौ तथा ॥ देवादिषु च देवेशे ज्ञानानन्दे शिवे मुने ॥ ७ ॥ पारिजातस्य पुष्पं च गृहीत्वा चन्दनोक्षितम् ॥ ध्यात्वा देवीं महालक्ष्मीं पूजयामास नारद ॥८॥ ध्यानं च सामवेदोक्तं यदुक्तं ब्रह्मणे पुरा ॥ ध्यानेन हरिणा तेन तन्निबोध वदामि ते॥९॥ सहस्रदलपद्मस्य कर्णिकावासिनीं पराम् ॥ शरत्पार्वणकोटीन्दुप्रभाजुष्टकरां वराम् ॥ १० ॥ स्वतेजसा प्रज्वलन्तीं सुखदृश्यां मनोहराम् ॥ प्रतप्तकाञ्चननिभां शोभां मूर्तिमतीं सतीम् ॥ ११ ॥ रत्नभूषणभूषाढ्यां शोभितां पीतवाससा ॥ ईषद्धास्यप्रसन्नास्यां रम्यां सुस्थिरयौवनाम् ॥ १२ ॥ सर्वसम्पत्प्रदात्रीं च महालक्ष्मीं भजे शुभाम् ॥ ध्यानेनानेन तां ध्यात्वा चोपहारैस्सुसंयुतः ॥ १३ ॥ सम्पूज्य ब्रह्मवाक्येन चोपहाराणि षोडश ॥ ददौ भक्त्या विधानेन प्रत्येकं मन्त्रपूर्वकम् ॥१४॥ प्रशंस्यानि प्रहृष्टानि दुर्लभानि वराणि च॥ अमूल्यरत्नखचितं निर्मितं विश्वकर्मणा ॥ आसनं च विचित्रं च महालक्ष्मि प्रगृह्यताम् ॥ १५ ॥ शुद्धं गङ्गोदकमिदं सर्ववन्दितमीप्सितम् ॥ पापेध्मवह्निरूपं च गृह्यतां कमलालये ॥ १६ ॥ पुष्पचन्दनदूर्वादिसंयुतं जाह्नवीजलम् ॥ शङ्खगर्भस्थितं शुद्धं गृह्यतां पद्मवासिनि ॥ १७ ॥ सुगन्धियुक्ततैलं च सुगन्धामलकीजलम् ॥ देहसौन्दर्य्यबीजं च गृह्यतां श्रीहरिप्रिये ॥ १८ ॥ वृक्षनिर्यासरूपं च गन्धद्रव्यादिसंयुतम् ॥ कृष्णकान्ते पवित्रो वै धूपोऽयं प्रतिगृह्यताम् ॥ १९ ॥ मलयाचलसंभूतं वृक्षसारं मनोहरम् ॥ सुगन्धियुक्तं सुखदं चन्दनं देवि गृह्यताम् ॥ २० ॥ जगच्चक्षुस्स्वरूपं च ध्वान्तप्रध्वंसकारणम् ॥ प्रदीपं शुद्धरूपं च गृह्यतां परमेश्वरि ॥ २१ ॥ नानोपहाररूपं च नानारससमन्वितम् ॥ नानास्वादुकरं चैव नैवेद्यं प्रतिगृह्यताम् ॥ २२ ॥ अन्नं ब्रह्मस्वरूपं च प्राणरक्षणकारणम् ॥ तुष्टिदं पुष्टिदं चान्नं मधुरं प्रतिगृह्यताम् ॥ २३ ॥ शाल्यक्षतसुपक्वं च शर्करागव्यसंयुतम् ॥ सुस्वादु रम्यं पद्मे च परमान्नं प्रगृह्यताम् ॥ २४ ॥ शर्करागव्यपक्वं च सुस्वादु सुमनोहरम् ॥ मया निवेदितं लक्ष्मि स्वस्तिकं प्रतिगृह्यताम् ॥ २५ ॥ नानाविधानि रम्याणि पक्वानि च फलानि तु ॥ स्वादुरस्यानि कमले गृह्यन्तां फलदानि च ॥ २६ ॥ सुरभिस्तनसम्भूतं सुस्वादु

सुमनोहरम् ॥ मर्त्यामृतं च गव्यं वै गृह्यतामच्युतप्रिये ॥ २७ ॥ सुस्वादुरससंयुक्तमिक्षुवृक्षरसोद्भवम् ॥ अग्निपक्वमपक्वं वा गुडं वै देवि गृह्यताम् ॥ २८ ॥ यवगोधूमसस्यानां चूर्णरेणुसमुद्भवम् ॥ सुपक्वगुडगव्याक्तं मिष्टान्नं देवि गृह्यताम् ॥ २९ ॥ सस्यचूर्णोद्भवं पक्वं स्वस्तिकादिसमन्वितम् ॥ मया निवेदितं देवि पिष्टकं प्रतिगृह्यताम् ॥ ३० ॥ पार्थिवं वृक्षभेदं च विविधैर्द्रव्यकारकम् ॥ सुस्वादु रससंयुक्तमैक्षवं प्रतिगृह्यताम्॥३१॥शीतवायुप्रदं चैव दाहे च सुखदं परम् ॥ कमले गृह्यतां चेदं व्यजनं श्वेतचामरम्॥३२॥ ताम्बूलं च वरं रम्यं कर्पूरादिसुवासितम् ॥ जिह्वाजाड्यच्छेदकरं ताम्बूलं देवि गृह्यताम् ॥ ३३ ॥ सुवासितं शीतलं च पिपासानाशकारणम् ॥ जगज्जीवनरूपं च जीवनं देवि गृह्यताम् ॥ ३४ ॥ देहसौन्दर्य्यबीजं च सदा शोभाविवर्द्धनम् ॥ कार्पासजं च कृमिजं वसनं देवि गृह्यताम् ॥ ३५ ॥ रत्नस्वर्णविकारं च देहसौख्यविवर्द्धनम् ॥ शोभाधानं श्रीकरं च भूषणं प्रतिगृह्यताम् ॥ ॥ ३६ ॥ नानाकुसुमसन्दर्भं बहुशोभाप्रदं परम् ॥ सुरलोकप्रियं शुद्धं माल्यं देवि प्रगृह्यताम् ॥ ३७ ॥ शुद्धिदं शुद्धिरूपं च सर्वमङ्गलमङ्गलम् ॥ गन्धवस्तूद्भवं रम्यं गन्धं देवि प्रगृह्यताम् ॥३८॥ पुण्यतीर्थोदकं चैव विशुद्धं शुद्धिदं सदा ॥ गृहाण कृष्णकान्ते त्वं रम्यमाचमनीयकम् ॥ ३९ ॥ रत्नसारैस्संग्रथितं पुष्पचन्दनसंयुतम् ॥ रत्नभूषणभूषाढ्यं सुतल्पं प्रतिगृह्यताम् ॥ ४० ॥ यद्यद्द्रव्यमपूर्वं च पृथिव्यामस्ति दुर्लभम् ॥ देवभूपाढ्यभोग्यं च तद्द्रव्यं देवि गृह्यताम् ॥ ४१ ॥ द्रव्याण्येतानि दत्त्वा वै मूलेन देवपुंगव ॥ मूलं जजाप भक्त्या च दशलक्षं विधानतः ॥४२॥ जपेन दशलक्षेण मन्त्रसिद्धिर्बभूव ह ॥ मन्त्रश्च ब्रह्मणा दत्तः कल्पवृक्षश्च सर्वदा ॥ ४३ ॥ लक्ष्मीर्माया कामवाणी ततः कमलवासिनी ॥ स्वाहान्तो[१] वैदिको मन्त्रराजोऽयं द्वादशाक्षरः ॥ ४४ ॥ श्रीं ह्रीं क्लीं ऐं कमलवासिन्यै स्वाहा ॥ कुबेरोऽनेन मन्त्रेण सर्वैश्वर्य्यमवाप्तवान् ॥ राजराजेश्वरो दक्षः सावर्णिर्मनुरेव च ॥ ४५ ॥ मंगलोऽनेन मन्त्रेण सप्तद्वीपवतीपतिः ॥ प्रियव्रतोत्तानपादौ केदारो नृप एव च ॥ ४६ ॥ एते च सिद्धा राजेन्द्रा मन्त्रेणानेन नारद ॥ सिद्धे

---

[१] वैदिको मन्त्रराजोऽयं प्रसिद्धो द्वादशाक्षर इति पाठः ।

मन्त्रे महालक्ष्मीर्ददौ शक्राय दर्शनम् ॥ ४७ ॥ रत्नेन्द्रव्यूहखचितविमानस्था वरप्रदा ॥ सप्तद्वीपवतीं पृथ्वीं छादयन्ती त्विषा च सा ॥ ४८ ॥ श्वेतचम्पकवर्णाभा रत्नभूषणभूषिता ॥ ईषद्धास्यप्रसन्नास्या भक्तानुग्रहकारिका ॥ ४९ ॥ बिभ्रती रत्नमालां च कोटिचन्द्रसमप्रभा ॥ दृष्ट्वा जगत्प्रसूं शान्तां तां तुष्टाव पुरन्दरः ॥ ५० ॥ पुलकाङ्कितसर्वाङ्गः साश्रुनेत्रः कृताञ्जलिः ॥ ब्रह्मणा च प्रदत्तेन स्तोत्रराजेन संयतः ॥ सर्वाभीष्टप्रदेनैव वैदिकेनैव तत्र च ॥ ५१ ॥ इन्द्र उवाच ॥ ॐ नमः कमलवासिन्यै नारायण्यै नमो नमः ॥ कृष्णप्रियायै सारायै पद्मायै च नमो नमः ॥ ५२ ॥ पद्मपत्रेक्षणायै च पद्मास्यायै नमो नमः ॥ पद्मासनायै पद्मिन्यै वैष्णव्यै च नमो नमः ॥ ५३ ॥ सर्वसम्पत्स्वरूपायै सर्वदात्र्यै नमो नमः ॥ सुखदायै मोक्षदायै सिद्धिदायै नमो नमः ॥ ५४ ॥ हरिभक्तिप्रदात्र्यै च हर्षदात्र्यै नमो नमः ॥ कृष्णवक्षस्थितायै च कृष्णेशायै नमो नमः ॥ ५५ ॥ [1]कृष्णशोभास्वरूपायै रत्नाढ्यायै नमो नमः ॥ सम्पत्त्यधिष्ठातृदेव्यै महादेव्यै नमो नमः ॥ ५६ ॥ सस्याधिष्ठातृदेव्यै च सस्यलक्ष्म्यै नमो नमः ॥ नमो [2]बुद्धिस्वरूपायै बुद्धिदायै नमो नमः ॥ ५७ ॥ वैकुण्ठे च महालक्ष्मीर्लक्ष्मीः क्षीरोदसागरे ॥ स्वर्गलक्ष्मीरिन्द्रगेहे राजलक्ष्मी र्नृपालये ॥ ५८ ॥ गृहलक्ष्मीश्च गृहिणां गेहे च गृहदेवता ॥ सुरभिस्सा गवां माता दक्षिणा यज्ञकामिनी ॥ ५९ ॥ अदितिर्देवमाता त्वं कमला कमलालये ॥ स्वाहा त्वं च हविर्दाने कव्यदाने स्वधा स्मृता ॥ ६० ॥ त्वं हि विष्णुस्वरूपा च सर्वाधारा वसुन्धरा ॥ शुद्धसत्त्वस्वरूपा त्वं नारायणपरायणा॥६१॥क्रोधहिंसावर्जिता च वरदा च शुभानना॥परमार्थप्रदा त्वं च हरिदास्यप्रदा परा॥६२॥ यया विना जगत्सर्वं भस्मीभूतमसारकम् ॥ जीवन्मृतं च विश्वं च शवतुल्यं यया विना ॥ ६३॥ सर्वेषां च परा त्वं हि सर्वबान्धवरूपिणी॥यया विना न संभाष्यो बान्धवैर्बान्धवः सदा॥६४॥त्वया हीनो बन्धुहीनस्त्वया युक्तः सबान्धवः॥धर्मार्थकाममोक्षाणां त्वं च कारणरूपिणी॥६५॥स्तनन्धयानां त्वं माता शिशूनां शैशवे यथा॥ तथा त्वं सर्वदा माता सर्वेषां सर्वविश्वतः ॥६६॥ त्यक्तस्तनो

---

[1] चन्द्र इति पाठः । [2] वृद्धिस्वरूपायै वृद्धिदायै इति पाठः ।

मातृहीनः स चेज्जीवति दैवतः ॥ त्वया हीनो जनः कोऽपि न जीवत्येव निश्चितम् ॥ ६७ ॥ सुप्रसन्नस्वरूपा त्वं मे प्रसन्ना भवाम्बिके ॥ वैरिग्रहस्तद्विषयं देहि मह्यं सनातनि ॥ ६८ ॥ वयं यावत्त्वया हीना बन्धुहीनाश्च भिक्षुकाः ॥ सर्वसंपद्विहीनाश्च तावदेव हरिप्रिये ॥६९॥ राज्यं देहि श्रियं देहि बलं देहि सुरेश्वरि ॥ कीर्तिं देहि धनं देहि पुत्रान्मह्यं च देहि वै ॥७०॥ कामं देहि मतिं देहि भोगान्देहि हरिप्रिये ॥ज्ञानं देहि च धर्मं च सर्वसौभाग्यमीप्सितम् ॥७१॥ सर्वाधिकारमेवं वै प्रभावं च प्रतापकम् ॥ जयं पराक्रमं युद्धे परमैश्वर्य्यमेव च॥७२॥इत्युक्त्वा तु महेन्द्रश्च सर्वैः सुरगणैः सह ॥ ननाम साश्रुनेत्रोऽयं मूर्ध्ना चैव पुनः पुनः ॥७३॥ ब्रह्मा च शंकरश्चैव शेषो धर्मश्च केशवः॥सर्वे चक्रुः परीहारं सुरार्थे च पुनः पुनः॥७४॥देवेभ्यश्च वरं दत्त्वा पुष्पमालां मनोहराम्॥केशवाय ददौ लक्ष्मीः सन्तुष्टा सुरसंसदि ॥ ७५ ॥ ययुर्देवाश्च सन्तुष्टाः स्वं स्वं स्थानं च नारद ॥देवी ययौ हरेः क्रोडं हृष्टा क्षीरो दशायिनः ॥७६॥ ययतुस्तौ स्वस्वगृहं ब्रह्मेशानौ च नारद ॥ दत्त्वा शुभाशिषं तौ च देवेभ्यः प्रीतिपूर्वकम् ॥७७॥ इदं स्तोत्रं महापुण्यं त्रिसन्ध्यं यः पठेन्नरः ॥ कुबेरतुल्यः स भवेद्राजराजेश्वरो महान् ॥ ७८ ॥ सिद्धस्तोत्रं यदि पठेत्सोऽपि कल्पतरुर्नरः ॥ पञ्चलक्षजपेनैव स्तोत्रसिद्धिर्भवेन्नृणाम् ॥ ७९ ॥ सिद्धिःस्तोत्रं यदि पठेन्मासमेकं च संयतः ॥ महासुखी च राजेन्द्रो भविष्यति न संशयः ॥ ८० ॥ नारद उवाच ॥ पुष्पं दुर्वाससा दत्तमस्ति वै यस्य मस्तके ॥ तस्य सर्वा पुरःपूजेत्युक्तं पूर्वं त्वया प्रभो ॥ ८१॥ तदेव स्थापितं पुष्पं गजेन्द्रस्यैव मस्तके ॥ यतो जन्म गणेशस्य स च मत्तो वनं गतः ॥८२॥ मूर्ध्नि च्छिन्ने गणपतेः शनेर्दृष्ट्या पुरा मुने ॥ तत्स्कन्धे योजयामास हस्तिमस्तं हरिः स्वयम् ॥८३॥ अधुनोक्तं देवषट्कं संपूज्य च पुरन्दरः ॥ पूजयामास लक्ष्मीं च क्षीरोदे च सुरैः सह ॥ ८४ ॥ अहो पुराणवक्तॄणां दुर्बोधं वचनं नृणाम् ॥ सुव्यक्तमस्य सिद्धान्तं वद वेदविदां वर ॥ ८५ ॥ श्रीनारायण उवाच ॥ यदा शशाप शक्रं च दुर्वासा मुनिपुंगवः ॥ तदा नास्त्येव तज्जन्म पूजाकाले बभूव सः ॥८६॥ सुचिरं दुःखिता देवा बभ्रमुर्ब्रह्मशापतः॥पश्चात्प्रापुश्च तां लक्ष्मीं वरेण च हरेर्मुने॥८७॥इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारा

यणसंवादे लक्ष्मीपूजाविधानं नामैकोनचत्वारिंशत्तमोऽध्यायः ॥३९॥ श्रीलक्ष्म्युपाख्यानं समाप्तम् ॥ नारद उवाच॥नारायण महाभाग समश्चैव त्वया प्रभो॥रूपेण च गुणैश्चैव यशसा तेजसा त्विषा॥१॥त्वमेव ज्ञानिनां श्रेष्ठः सिद्धानां योगिनां तथा॥तपस्विनां मुनीनां च परो वेदविदां तथा॥महालक्ष्म्या उपाख्यानं विज्ञातं महदद्भुतम् ॥२॥ अन्यत्किञ्चिदुपाख्यानं निगूढं वद साम्प्रतम्॥ अतीव गोपनीयं यदुपयुक्तं च सर्वतः॥अप्रकाश्यं पुराणेषु वेदोक्तं धर्मसंयुतम्॥३॥ श्रीनारायण उवाच॥नानाप्रकारमाख्यानमप्रकाश्यं पुराणतः ॥ श्रुतौ कतिविधं गूढमास्ते ब्रह्मन्सुदुर्लभम्॥ ४ ॥ तेषु यत्सारभूतं च श्रोतुं किं वा त्वमिच्छसि ॥ तन्मे ब्रूहि महाभाग पश्चाद्वक्ष्यामि तत्पुनः ॥५॥ नारद उवाच ॥ स्वाहा देवहविर्दाने प्रशस्ता सर्वकर्मसु॥ पितृदाने स्वधा शस्ता दक्षिणा सर्वतो वरा ॥६॥ एतासां चरितं जन्म फलं प्राधान्यमेव च ॥ श्रोतुमिच्छामि ते वक्राद्वद वेदविदां वर ॥ ७ ॥ सौतिरुवाच ॥ नारदस्य वचः श्रुत्वा प्रहस्य मुनिपुंगवः ॥ कथां कथितुमारेभे पुराणोक्तां पुरातनीम् ॥ ८ ॥ श्रीनारायण उवाच ॥ सृष्टेः प्रथमतो देवाश्चाहारार्थं ययुः पुरा ॥ ब्रह्मलोके ब्रह्मसभामगम्यां सुमनोहराम् ॥ ९ ॥ गत्वा निवेदनं चक्रुर्मुने त्वाहारहेतुकम् ॥ ब्रह्मा श्रुत्वा प्रतिज्ञाय सिषेवे श्रीहरेः पदम् ॥ १० ॥ यज्ञरूपो हि भगवान्कलया च बभूव सः ॥ यज्ञे यद्यद्धविर्दानं दत्तं तेभ्यश्च वेधसः ॥ ११ ॥ हविर्ददति विप्राश्च भक्त्या च क्षत्रियादयः ॥ सुरा नैव प्राप्नुवन्ति तद्दानं मुनिपुंगव ॥ १२ ॥ देवा विषण्णास्ते सर्वे तत्सभां च पुनर्ययुः ॥ गत्वा निवेदनं चक्रुराहाराभावहेतुकम् ॥ १३ ॥ ब्रह्मा श्रुत्वा तु मनसा श्रीकृष्णं शरणं ययौ ॥ प्रकृतिं पूजयामास ध्यायन्नेव तदाज्ञया ॥ ॥ १४ ॥ प्रकृतिः कलया चैव सर्वशक्तिस्वरूपिणी ॥ बभूव दाहिका शक्तिरग्नेः स्वाहास्वरूपिणी ॥ १५ ॥ ग्रीष्ममध्याह्नमार्त्तण्डप्रभान्यक्कारकारिणी ॥ अतीव सुन्दरी रामा रमणीया मनोहरा ॥ १६ ॥ ईषद्धास्यप्रसन्नास्या भक्तानुग्रहकारिणी ॥ उवाचेति विधेरग्रे पद्मयोने वरं वृणु ॥ १७ ॥ विधिस्तद्वचनं श्रुत्वा सम्भ्रमात्समुवाच ताम् ॥ १८ ॥ ब्रह्मोवाच ॥ त्वमग्नेर्दाहिका शक्तिर्भव पत्नी च सुन्दरी ॥ दग्धुं न शक्तस्स्वहुतं हुताशश्च त्वया विना ॥ १९ ॥ त्वन्नामोच्चार्य्य मन्त्रान्ते यद्दास्यति हविर्नरः ॥ सुरेभ्यस्त

त्प्राप्नुवन्ति सुराः सानन्दपूर्वकम् ॥२०॥ अग्नेः सम्पत्स्वरूपा च श्रीरूपा च गृहेश्वरी ॥ देवानां पूजिता शश्वन्नरादीनां भवाम्बिके॥
॥ २१ ॥ ब्रह्मणश्च वचः श्रुत्वा सा विषण्णा बभूव ह ॥ तमुवाच स्वयं देवी स्वाभिप्रायं स्वयम्भुवम् ॥ २२ ॥ स्वाहोवाच ॥ अहं
कृष्णं भजिष्यामि तपसा सुचिरेण च ॥ ब्रह्मंस्तदन्यद्यत्किंचित्स्वप्नवद्भ्रम एव च ॥२३॥ विधाता जगतां त्वं च शम्भुर्मृत्युञ्जयः
प्रभुः ॥ बिभर्ति शेषो विश्वं च धर्म्मः साक्षी च देहिनाम् ॥ २४ ॥ सर्वाद्यपूज्यो देवानां गणेषु च गणेश्वरः ॥ प्रकृतिः सर्वसूः सर्वै
पूजिता यत्प्रसादतः ॥२५॥ ऋषयो मुनयश्चैव पूजिता यं निषेव्य च ॥ तत्पादपद्मं ब्रह्मैक्यभावाद्वै चिन्तयाम्यहम् ॥२६॥ पद्मास्या
पाद्ममित्युक्त्वा पद्मलाभानुसारतः ॥ जगाम तपसे पाद्मे पद्मादीशस्य पद्मजा ॥ २७ ॥ तपस्तेपे लक्षवर्षमेकपादेन पाद्मजा ॥ तदा
ददर्श श्रीकृष्णं निर्गुणं प्रकृतेः परम् ॥ २८ ॥ अतीव कमनीयं च रूपं दृष्ट्वा च सुन्दरी ॥ मूर्छां सम्प्राप कामेन कामेशस्य च
कामुकी ॥ २९ ॥ विज्ञाय तदभिप्रायं सर्वज्ञस्तामुवाच सः ॥ स्वक्रोडे च समुत्थाप्य क्षीणांगीं तपसा चिरम् ॥ ३० ॥ श्रीकृष्ण
उवाच ॥ वाराहे च त्वमंशेन मम पत्नी भविष्यसि ॥ नाम्ना नाग्नजिती कन्या कान्ते नग्नजितस्य च ॥ ३१ ॥ अधुनाऽग्नेर्दाहिका
त्वं भव पत्नी च भाविनि ॥ मन्त्राङ्गरूपा पूता च मत्प्रसादाद्भविष्यसि ॥ ३२ ॥ वह्निस्त्वां भक्तिभावेन सम्पूज्य च गृहेश्वरीम्॥
रमिष्यते त्वया सार्द्धं रामया रमणीयया ॥ ३३ ॥ इत्युक्त्वाऽन्तर्दधे देवो देवीमाश्वास्य नारद ॥ तत्राजगाम सन्त्रस्तो वह्निर्ब्रह्मनि
देशतः ॥ ३४ ॥ ध्यानैश्च सामवेदोक्तैर्ध्यात्वा तां जगदम्बिकाम् ॥ सम्पूज्य परितुष्टाव पाणिं जग्राह मन्त्रतः ॥ ३५ ॥ तदा दिव्यं
वर्षशतं स रेमे रामया सह ॥ अतीव निर्जने रम्ये सम्भोगसुखदे सदा ॥३६॥ बभूव गर्भं तस्याश्च हुताशस्यैव तेजसा ॥ तद्दधार
च सा देवी दिव्यं द्वादशवत्सरम् ॥ ३७ ॥ ततः सुषाव पुत्रांश्च रमणीयान्मनोहरान् ॥ दक्षिणाग्निगार्हपत्याहवनीयान्क्रमेण च ॥
॥ ३८ ॥ ऋषयो मुनयश्चैव ब्राह्मणाः क्षत्रियादयः ॥ स्वाहान्तं मन्त्रमुच्चार्य्य हविर्ददति नित्यशः ॥ ३९ ॥ स्वाहायुक्तं च मन्त्रं च
यो गृह्णाति प्रशस्तकम् ॥ सर्वसिद्धिर्भवेत्तस्य ब्रह्मन्ग्रहणमात्रतः ॥ ४० ॥ विषहीनो यथा सर्पो वेदहीनो यथा द्विजः ॥ पतिसेवावि

हीना स्त्री विद्याहीनो यथा नरः ॥ ४१ ॥ फलशाखाविहीनश्च यथा वृक्षो हि निन्दितः ॥ स्वाहाहीनस्तथा मन्त्रो न द्रुतं फलदायकः ॥ ४२ ॥ परितुष्टा द्विजाः सर्वे देवाः संप्रापुराहुतिम् ॥ स्वाहान्तेनैव मन्त्रेण सफलं सर्वकर्म च ॥ ४३ ॥ इत्येवं वर्णितं सर्वं स्वाहोपाख्यानमुत्तमम् ॥ सुखदं मोक्षदं सारं किं भूयः श्रोतुमिच्छसि ॥ ४४ ॥ नारद उवाच ॥ स्वाहापूजाविधानं च ध्यानं स्तोत्रं मुनीश्वर ॥ संपूज्य वह्निस्तुष्टाव येन तां वद मे प्रभो ॥ ४५ ॥ नारायण उवाच ॥ ध्यानं च सामवेदोक्तं स्तोत्रं पूजाविधानकम् ॥ वदामि श्रूयतां ब्रह्मन्सावधानं निशामय ॥ ४६ ॥ सर्वयज्ञारम्भकाले शालग्रामे घटेऽथवा ॥ स्वाहां संपूज्य यत्नेन यज्ञं कुर्यात्फलाप्तये ॥ ४७ ॥ स्वाहां मन्त्राङ्गभूतां च मन्त्रसिद्धिस्वरूपिणीम् ॥ सिद्धां च सिद्धिदां नृणां कर्मणां फलदां भजे ॥ ४८ ॥ इति ध्यात्वा च मूलेन दत्त्वा पाद्यादिकं नरः ॥ सर्वसिद्धिं लभेत्स्तुत्वा मूलं स्तोत्रं मुने शृणु ॥ ४९ ॥ ॐ ह्रीं श्रीं वह्निजायायै देव्यै स्वाहेत्यनेन च ॥ यः पूजयेच्च तां देवीं सर्वेष्टं लभते ध्रुवम् ॥ ५० ॥ वह्निरुवाच ॥ स्वाहाऽऽद्या प्रकृतेरंशा मन्त्रतन्त्राङ्गरूपिणी॥मन्त्राणां फलदात्री च धात्री च जगतां सती ॥५१॥ सिद्धिस्वरूपा सिद्धा च सिद्धिदा सर्वदा नृणाम् ॥ हुताशदाहिकाशक्तिस्तत्प्राणाधिकरूपिणी ॥ ५२ ॥ संसारसाररूपा च घोरसंसारतारिणी ॥ देवजीवनरूपा च देवपोषणकारिणी ॥ ५३ ॥ षोडशैतानि नामानि यः पठेद्भक्तिसंयुतः ॥ सर्वसिद्धिर्भवेत्तस्य चेह लोके परत्र च ॥ ५४ ॥ नाङ्गहीनो भवेत्तस्य सर्वकर्मसु शोभनम् ॥ अपुत्रो लभते पुत्रमभार्य्यो लभते प्रियाम् ॥ ५५ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारद नारायणसंवादे स्वाहोपाख्याने स्वाहाजन्मादिकथनं नाम चत्वारिंशत्तमोऽध्यायः ॥ ४० ॥ इति स्वाहोपाख्यानं समाप्तम् ॥ नारायण उवाच ॥ शृणु नारद वक्ष्यामि स्वधोपाख्यानमुत्तमम् ॥ पितॄणां वै तृप्तिकरं श्राद्धानां फलवर्द्धनम् ॥ १ ॥ सृष्टेरादौ पितृगणान्ससर्ज जगतां विधिः ॥ चतुरो वै मूर्त्तिमतस्त्रींश्च तेजस्स्वरूपिणः ॥ २ ॥ सप्त दृष्ट्वा पितृगणान्सिद्धिरूपान्मनोहरान् ॥ आहारं

---

१ पूतां चेति पाठः ।

ससृजे तेषां श्राद्धतर्पणपूर्वकम् ॥ ३ ॥ स्नानं तर्पणपर्य्यन्तं श्राद्धान्तं देवपूजनम् ॥ आह्निकं च त्रिसन्ध्यान्तं विप्राणां च श्रुतौ श्रुतम् ॥ ४ ॥ नित्यं न कुर्य्याद्यो विप्रस्त्रिसन्ध्यं श्राद्धतर्पणम् ॥ बलिं वेदध्वनिं सोऽपि विषहीनो यथोरगः ॥ ५ ॥ हरिसेवाविहीनश्च श्रीहरेरनिवेद्यभुक् ॥ भस्मान्तं सूतकं तस्य न कर्मार्हः स नारद ॥ ६ ॥ ब्रह्मा श्राद्धादिकं सृष्ट्वा जगाम पितृहेतवे ॥ न प्राप्नुवन्ति पितरो ददति ब्राह्मणादयः ॥ ७ ॥ सर्वे प्रजग्मुः क्षुधिता विषण्णा ब्रह्मणः सभाम् ॥ सर्वे निवेदनं चक्रुस्तमेव जगतां विधिम् ॥ ॥ ८ ॥ ब्रह्मा च मानसीं कन्यां ससृजे तां मनोहराम् ॥ रूपयौवनसम्पन्नां शरच्चन्द्रसमप्रभाम् ॥ ९ ॥ विद्यावतीं गुणवतीमपि रूपवतीं सतीम् ॥ श्वेतचम्पकवर्णाभां रत्नभूषणभूषिताम् ॥ १० ॥ विशुद्धां प्रकृतेरंशां सस्मितां वरदां शुभाम् ॥ स्वधाभिधानां सुदतीं लक्ष्मीं लक्षणसंयुताम् ॥ ११ ॥ शतपद्मपदन्यस्तपादपद्मं च बिभ्रतीम् ॥ पत्नीं पितॄणां पद्मास्यां पद्मजां पद्मलोचनाम् ॥ ॥ १२ ॥ पितृभ्यस्तां ददौ कन्यां तुष्टेभ्यस्तुष्टिरूपिणीम् ॥ ब्राह्मणानां चोपदेशं चक्रे वै गोपनीयकम् ॥ १३ ॥ स्वधान्तं मन्त्रमुच्चार्य्य पितृभ्यो देहि चेति च ॥ क्रमेण तेन विप्राश्च पित्रे दानं ददुः पुरा ॥ १४ ॥ स्वाहा शस्ता देवदाने पितृदाने स्वधा वरा ॥ सर्वत्र दक्षिणा शस्ता हतो यज्ञस्त्वदक्षिणः ॥ १५ ॥ पितरो देवता विप्रा मुनयो मानवास्तथा ॥ पूजां चक्रुः स्वधां शान्तां तुष्टाव परमादरम् ॥ १६ ॥ देवादयश्च सन्तुष्टाः परिपूर्णमनोरथाः ॥ विप्रादयश्च पितरः स्वधादेवीवरेण च ॥ १७ ॥ इत्येवं कथितं सर्वं स्वधोपाख्यानमुत्तमम् ॥ सर्वेषां वै तुष्टिकरं किं भूयः श्रोतुमिच्छसि ॥ १८ ॥ नारद उवाच ॥ स्वधापूजाविधानं च ध्यानं स्तोत्रं महामुने ॥ श्रोतुमिच्छामि यत्नेन वद वेदविदां वर ॥ १९ ॥ नारायण उवाच ॥ तद्ध्यानं स्तवनं ब्रह्मन्वेदोक्तं सर्वसम्मतम् ॥ सर्वं जानासि वक्ष्ये वै ज्ञातुमिच्छसि वृद्धये ॥ २० ॥ शरत्कृष्णत्रयोदश्यां मघायां श्राद्धवासरे ॥ स्वधां संपूज्य यत्नेन ततः श्राद्धं समाचरेत् ॥ २१ ॥ स्वधां नाभ्यर्च्य यो विप्रः श्राद्धं कुर्य्यादहंमतिः ॥ न भवेत्फलभाक् सत्यं श्राद्धतर्पणयोस्तथा ॥ २२ ॥ ब्रह्मणो मानसीं कन्यां शश्वत्सुस्थिरयौवनाम् ॥ पूज्यां पितॄणां देवानां श्राद्धानां

फलदां भजे ॥ २३ ॥ इति ध्यात्वा घटे रम्ये शालग्रामेऽथवा शुभे ॥ दद्यात्पाद्यादिकं तस्यै मूलेनेति श्रुतौ श्रुतम् ॥ २४ ॥ ॐह्रीं
श्रीं क्लीं स्वधादेव्यै स्वाहेति च महामनुम् ॥ समुच्चार्य्य च संपूज्य स्तुत्वा तां प्रणमेद्द्विजः ॥ २५ ॥ स्तोत्रं शृणु मुनिश्रेष्ठ ब्रह्मपुत्र
विशारद ॥ सर्ववाञ्छाप्रदं नृणां ब्रह्मणा यत्कृतं पुरा॥२६॥ब्रह्मोवाच ॥ स्वधोच्चारणमात्रेण तीर्थस्नायी भवेन्नरः॥मुच्यते सर्वपापेभ्यो
वाजपेयफलं लभेत् ॥ २७ ॥ स्वधा स्वधा स्वधेत्येवं यदि वारत्रयं स्मरेत् ॥ श्राद्धस्य फलमाप्नोति कालतर्पणयोस्तथा ॥ २८ ॥
श्राद्धकाले स्वधास्तोत्रं यः शृणोति समाहितः ॥ लभेच्छ्राद्धशतानां च पुण्यमेव न संशयः ॥ २९ ॥ स्वधा स्वधा स्वधेत्येवं
त्रिसन्ध्यं यः पठेन्नरः ॥ प्रियां विनीतां स लभेत्साध्वीं पुत्रं गुणान्वितम् ॥३०॥ पितॄणां प्राणतुल्या त्वं द्विजजीवनरूपिणी ॥ श्राद्धा
धिष्ठातृदेवी च श्राद्धादीनां फलप्रदा ॥ ३१ ॥ बहिर्मन्मनसो गच्छ पितॄणां तुष्टिहेतवे ॥ संप्रीतये द्विजातीनां गृहिणां वृद्धिहेतवे ॥
॥ ३२ ॥ नित्या नित्यस्वरूपाऽसि गुणरूपाऽसि सुव्रते ॥ आविर्भावस्तिरोभावः सृष्टौ च प्रलये तव ॥ ३३ ॥ ॐ स्वस्ति च नमः
स्वाहा स्वधा त्वं दक्षिणा तथा ॥ निरूपिताश्चतुर्वेदे षट् प्रशस्ताश्च कर्मिणाम् ॥ ३४ ॥ पुराऽऽसीस्त्वं स्वधा गोपी गोलोके राधिका
सखी ॥ धृता स्वोरसि कृष्णेन यतस्तेन स्वधा स्मृता ॥ ३५ ॥ ध्वस्ता त्वं राधिकाशापाद्गोलोकाद्विश्वमागता ॥ कृष्णाश्लिष्टा तया
दृष्टा पुरा वृन्दावने वने ॥ ३६ ॥ कृष्णालिंगनपुण्येन भूता मे मानसी सुता ॥ अतृप्तसुरते तेन चतुर्णां स्वामिनां प्रिया ॥
॥ ३७ ॥ स्वाहा सा सुन्दरी गोपी पुराऽऽसीद्राधिकासखी ॥ रतौ स्वयं कृष्णमाह तेन स्वाहा प्रकीर्त्तिता ॥ ३८ ॥
कृष्णेन सार्द्धं सुचिरं वसन्ते रासमण्डले ॥ प्रयत्ता सुरते श्लिष्टा दृष्टा सा राधया पुरा ॥३९॥ तस्याः शापेन सा ध्वस्ता गोलोकाद्वि
श्वमागता ॥ कृष्णालिङ्गनपुण्येन समभूद्वह्निकामिनी ॥ ४० ॥ पवित्ररूपा परमा देवाद्यैर्वन्दिता नृभिः ॥ यन्नामोच्चारणेनैव नरो
मुच्येत पातकात् ॥ ४१ ॥ या सुशीलाभिधा गोपी पुराऽऽसीद्राधिकासखी ॥ उवास दक्षिणे क्रोडे कृष्णस्य च महात्मनः ॥ ४२ ॥
प्रध्वस्ता सा च तच्छापाद्गोलोकाद्विश्वमागता ॥ कृष्णालिङ्गनपुण्येन सा बभूव च दक्षिणा ॥ ४३ ॥ सा प्रेयसी रतौ दक्षा प्रशस्ता

सर्वकर्मसु ॥ उवास दक्षिणे भर्तुर्दक्षिणा तेन कीर्त्तिता ॥ ४४ ॥ गोप्यो बभूवुस्तिस्रो वै स्वधा स्वाहा च दक्षिणा ॥ कार्मिणां कर्म
पूर्णार्थं पुरा चैवेश्वरेच्छया ॥ ४५ ॥ इत्येवमुक्त्वा स ब्रह्मा ब्रह्मलोके च संसदि ॥ तस्थौ च सहसा सद्यः स्वधा साऽऽविर्बभूव ह
॥ ४६ ॥ तदा पितृभ्यः प्रददौ तामेव कमलाननाम् ॥ तां संप्राप्य ययुस्ते च पितरश्च प्रहर्षिताः ॥ ४७ ॥ स्वधास्तोत्रमिदं पुण्यं
यः शृणोति समाहितः ॥ स स्नातः सर्वतीर्थेषु वेदपाठफलं लभेत् ॥ ४८ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे
नारदनारायणसंवादे स्वधोपाख्याने स्वधोत्पत्तितत्पूजादिकथनं नामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ इति स्वधोपाख्यानं समाप्तम्॥
नारायण उवाच ॥ उक्तं स्वाहास्वधाख्यानं प्रशस्तं मधुरं परम् ॥ वक्ष्यामि दक्षिणाख्यानं सावधानं निशामय ॥१॥ गोपी सुशीला
गोलोके पुराऽऽसीत्प्रेयसी हरेः ॥ राधाप्रधाना सध्रीची धन्या मान्या मनोहरा ॥ अतीव सुन्दरी रामा सुभगा सुदती सती ॥२॥
विद्यावती गुणवती सती रूपवती तथा ॥ कलावती कोमलांगी कान्ता कमललोचना ॥ ३ ॥ सुश्रोणी सुस्तनी श्यामा न्यग्रोध
परिमण्डला ॥ ईषद्धास्यप्रसन्नास्या रत्नालङ्कारभूषिता ॥ ४ ॥ श्वेतचम्पकवर्णाभा बिम्बोष्ठी मृगलोचना ॥ कामशास्त्रसुनिष्णाता
कामिनी कलहंसगा ॥ ५ ॥ भावानुरक्ता भावज्ञा कृष्णस्य प्रियभामिनी ॥ रसज्ञा रसिका रासे रासेशस्य रसोत्सुका ॥ ६ ॥
उवास दक्षिणे क्रोडे राधायाः पुरतः पुरा ॥ संबभूवानम्रमुखो भयेन मधुसूदनः ॥ ७॥ दृष्ट्वा राधां च पुरतो गोपीनां प्रवरां वराम्॥
मानिनीं रक्तवदनां रक्तपङ्कजलोचनाम् ॥ ८ ॥ कोपेन कम्पिताङ्गीं च कोपनां कोपदर्शनाम् ॥ कोपेन निष्ठुरं वक्तुमुद्यतां स्फुरिता
धराम् ॥९॥ आगच्छन्तीं च वेगेन विज्ञाय तदनन्तरम्॥ विरोधभीतो भगवानन्तर्द्धानं जगाम सः ॥ १० ॥ पलायन्तं च तं शान्तं
सत्त्वाधारं सुविग्रहम् ॥ विलोक्य कम्पिता गोपी सुशीलाऽन्तर्दधौ भिया ॥ ११ ॥ विलोक्य सङ्कटं तत्र गोपीनां लक्षकोटयः ॥
बद्धाञ्जलिपुटा भीता भक्तिनम्रात्मकन्धराः ॥१२॥ रक्ष रक्षेत्युक्तवत्यो हे देवीति पुनः पुनः ॥ ययुर्भयेन शरणं तस्याश्चरणपङ्कजे ॥
॥ १३ ॥ त्रिलक्षकोटयो गोपाः सुदामादय एव च ॥ ययुर्भयेन शरणं तत्पादाब्जे च नारद ॥ १४ ॥ पलायन्तं च कान्तं

वै विज्ञाय परमेश्वरी ॥ पलायन्तीं सहचरीं सुशीलां च शशाप सा ॥ १५ ॥ अद्यप्रभृति गोलोकं सा चेदायाति गोपिका ॥ सद्यो
गमनमात्रेण भस्मसाच्च भविष्यति ॥ १६ ॥ इत्येवमुक्त्वा तत्रैव देवदेवीश्वरी रुषा ॥ रासेश्वरी रासमध्ये रासेशं चाजुहाव ह॥
॥ १७ ॥ नालोक्य पुरतः कृष्णं राधा विरहकातरा ॥ युगकोटिसमं मेने क्षणभेदेन सुव्रता ॥ १८ ॥ हे कृष्ण हे प्राणनाथागच्छ
प्राणाधिकप्रिय ॥ प्राणाधिष्ठातृदेवेह प्राणा यान्ति त्वया विना ॥ १९ ॥ स्त्रीगर्वः पतिसौभाग्याद्वर्द्धते च दिने दिने ॥ सुस्त्री चेद्वि
भवो यस्मात्तं भजेद्धर्मतः सदा ॥ २० ॥ पतिर्बन्धुः कुलस्त्रीणामधिदेवः सदा गतिः ॥ परं सम्पत्स्वरूपश्च सुखरूपश्च मूर्त्तिमान्॥
॥ २१ ॥ धर्मदः सुखदः शश्वत्प्रीतिदः शान्तिदः सदा ॥ सम्मानदो मानदश्च मान्यो वै मानखण्डनः ॥ २२ ॥ सारात्सारतमः
स्वामी बन्धूनां बन्धुवर्द्धनः ॥ न च भर्त्तुः समो बन्धुः सर्वबन्धुषु दृश्यते ॥२३॥ भरणादेव भर्त्ताऽयं पालनात्पतिरुच्यते ॥ शरीरे
शाच्च स स्वामी कामदः कान्त एव च ॥ २४ ॥ बन्धुश्च सुखबन्धाच्च प्रीतिदानात्प्रियः परः ॥ ऐश्वर्य्यदानादीशश्च प्राणेशात्प्राण
नायकः॥२५॥रतिदानाच्च रमणः प्रियो नास्ति प्रियात्परः ॥ पुत्रस्तु स्वामिनः शुक्राज्जायते तेन स प्रियः॥२६॥शतपुत्रात्परः स्वामी
कुलजानां प्रियः सदा॥असत्कुलप्रसूता या कान्तं विज्ञातुमक्षमा ॥२७॥ स्नानं च सर्वतीर्थेषु सर्वयज्ञेषु दीक्षणम् ॥ प्रादक्षिण्यं पृथि
व्याश्च सर्वाणि च तपांसि वै॥२८॥सर्वाण्येव व्रतादीनि महादानानि यानि च॥उपोषणानि पुण्यानि यान्यन्यानि च विश्वतः॥२९॥
गुरुसेवाविप्रसेवादेवसेवादिकं च यत्॥स्वामिनः पादसेवायाः कलां नार्हन्ति षोडशीम्॥३०॥गुरुविप्रेष्टदेवेषु सर्वेभ्यश्च पतिर्गुरुः॥विद्या
दाता यथा पुंसां कुलजानां तथा प्रियः॥३१॥ गोपीत्रिलक्षकोटीनां गोपानां च तथैव च॥ब्रह्माण्डानामसंख्यानां तत्रस्थानां तथैव च
॥३२॥रमादिगोपकान्तानामीश्वरी तत्प्रसादतः॥अहं न जाने तं कान्तं स्त्रीस्वभावो दुरत्ययः ॥ ३३ ॥ इत्युक्त्वा राधिका कृष्णं तत्र
दध्यौ सुभक्तितः ॥ आरात्संप्राप तं तेन विजहार च तत्र वै ॥ ३४ ॥ अथ सा दक्षिणादेवी ध्वस्ता गोलोकतो मुने ॥ सुचिरं च तप
स्तप्त्वा विवेश कमलातनौ॥३५॥अथ देवादयः सर्वे यज्ञं कृत्वा सुदुष्करम् ॥ न लभन्ते फलं तेषां विषण्णाः प्रययुर्विधिम् ॥३६॥

विधिर्निवेदनं श्रुत्वा देवादीनां जगत्पतिः ॥ दध्यौ सुचिन्तितो भक्त्या तत्प्रत्यादेशमाप सः ॥ ३७ ॥ नारायणश्च भगवान्महालक्ष्मीश्च देहतः ॥ मर्त्यलक्ष्मीं विनिष्कृष्य ब्रह्मणे दक्षिणां ददौ ॥ ३८ ॥ ब्रह्मा ददौ तां यज्ञाय पूर्णार्थं कर्मणां सताम् ॥ यज्ञः संपूज्य विधिवत्तां तुष्टाव रमां मुदा ॥ ३९ ॥ तप्तकाञ्चनवर्णाभां चन्द्रकोटिसमप्रभाम् ॥ अतीव कमनीयां च सुन्दरीं सुमनोहराम् ॥ ४० ॥ कमलास्यां कोमलाङ्गीं कमलायतलोचनाम् ॥ कमलासनसंपूज्यां कमलाङ्गसमुद्भवाम् ॥ ४१ ॥ वह्निशुद्धांशुकाधानां बिम्बोष्ठीं सुदतीं सतीम् ॥ बिभ्रतीं कबरीभारं मालतीमाल्यभूषितम् ॥ ४२ ॥ ईषद्धास्यप्रसन्नास्यां रत्नभूषणभूषिताम् ॥ सुवेषाढ्यां च सुस्नातां मुनिमानसमोहिनीम् ॥ ४३ ॥ कस्तूरीबिन्दुभिः सार्द्धं चन्दनैश्च सुगन्धिभिः ॥ सिन्दूरबिन्दुनाऽत्यन्तं मस्तकाधस्थलोज्ज्वलाम्॥४४॥सुप्रशस्तनितम्बाढ्यां बृहच्छ्रोणिपयोधराम् ॥ कामदेवाधाररूपां कामबाणप्रपीडिताम्॥४५॥तां दृष्ट्वा रमणीयां च यज्ञो मूर्च्छामवाप ह ॥ पत्नीं तामेव जग्राह विधिबोधितमार्गतः ॥ ४६ ॥ दिव्यं वर्षशतं चैव तां गृहीत्वाऽथ निर्जने ॥ यज्ञो रेमे मुदा युक्तो रामया रमया सह ॥ ४७ ॥ गर्भं दधार सा देवी दिव्यं द्वादशवत्सरम् ॥ ततः सुषाव पुत्रं च फलं वै सर्वकर्मणाम् ॥४८॥ कर्मणां फलदाता च दक्षिणा कर्मणां सताम् ॥ परिपूर्णे कर्मणि च तत्पुत्रः फलदायकः॥४९॥यज्ञो दक्षिणया सार्द्धं पुत्रेण च फलेन च ॥ कर्मणां फलदाता चेत्येवं वेदविदो विदुः ॥ ५० ॥ यज्ञश्च दक्षिणां प्राप्य पुत्रं च फलदायकम् ॥ फलं ददौ च सर्वेभ्यः कर्मठेभ्यो यदा मुने ॥ ५१ ॥ तदा देवादयस्तुष्टाः परिपूर्णमनोरथाः ॥ स्वस्थानं प्रययुः सर्वे धर्मवक्त्रादिदं श्रुतम् ॥ ५२ ॥ कृत्वा कर्म च कर्ता तु तूर्णं दद्याच्च दक्षिणाम् ॥तत्क्षणं फलमाप्नोति वेदैरुक्तमिदं मुने ॥ ५३ ॥ कर्ता कर्मणि पूर्णेऽपि तत्क्षणाद्यदि दक्षिणाम् ॥ न दद्याद्ब्राह्मणेभ्यश्च दैवेनाज्ञानतोऽथवा ॥ ५४ ॥ मुहूर्त्ते समतीते च द्विगुणा सा भवेद्ध्रुवम् ॥ ५५ ॥ एकरात्रे व्यतीते तु भवेद्दशगुणा च सा ॥ त्रिरात्रे वै दशगुणा सप्ताहे द्विगुणा ततः ॥ ५६ ॥ मासे लक्षगुणा प्रोक्ता ब्राह्मणानां च वर्द्धते ॥ संवत्सरे व्यतीते तु सा त्रिकोटिगुणा भवेत् ॥ ५७ ॥ कर्म्म तद्यजमानानां सर्वं वै निष्फलं भवेत् ॥ स च ब्रह्मस्वापहारी

न कर्मार्होऽशुचिर्नरः ॥ ५८ ॥ दरिद्रो व्याधियुक्तश्च तेन पापेन पातकी ॥ तद्गृहाद्याति लक्ष्मीश्च शापं दत्त्वा सुदारुणम् ॥ ५९ ॥ पितरो नैव गृह्णन्ति तद्दत्तं श्राद्धतर्पणम् ॥ एवं सुराश्च तत्पूजां तद्दत्तां पावकाहुतिम् ॥ ६० ॥ दाता ददाति नो दानं ग्रहीता तन्न याचते ॥ उभौ तौ नरकं यातश्छिन्नरज्जुर्यथा घटः ॥ ६१ ॥ नार्पयेद्यजमानश्चेद्याचितारं च दक्षिणाम् ॥ भवेद्ब्रह्मस्वापहारी कुम्भीपाकं व्रजेद्ध्रुवम् ॥ ६२ ॥ वर्षलक्षं वसेत्तत्र यमदूतेन ताडितः ॥ ततो भवेत्स चण्डालो व्याधियुक्तो दरिद्रकः ॥ ६३ ॥ पातयेत्पुरुषान्सप्त पूर्वान्वै पूर्वजन्मनः ॥ इत्येवं कथितं विप्र किं भूयः श्रोतुमिच्छसि ॥ ६४ ॥ नारद उवाच ॥ यत्कर्म दक्षिणाहीनं को भुङ्क्ते तत्फलं मुने ॥ पूजाविधिं दक्षिणायाः पुरा यज्ञकृतं वद ॥ ६५ ॥ नारायण उवाच ॥ कर्मणोऽदक्षिणस्यैव कुत एव फलं मुने ॥ सदक्षिणे कर्मणि च फलमेव प्रवर्त्तते ॥ ६६ ॥ या या कर्मणि सामग्री बलिर्भुङ्क्ते च तां मुने ॥ बलये तत्प्रदत्तं च वामनेन पुरा मुने ॥ ६७ ॥ अश्रोत्रियं श्राद्धवस्तु चा[1]श्राद्धं दानमेव च ॥ वृषलीपतिविप्राणां पूजाद्रव्यादिकं च यत् ॥६८॥ ऋत्विजा न कृतं यज्ञमशुचेः पूजनं च यत् ॥ गुरावभक्तस्य कर्म बलिर्भुङ्क्ते न संशयः ॥ ६९ ॥ दक्षिणायाश्च यद्ध्यानं स्तोत्रं पूजाविधिक्रमम् ॥ तत्सर्वं काण्वशाखोक्तं प्रवक्ष्यामि निशामय ॥ ७० ॥ पुरा संप्राप्य तां यज्ञः कर्मदक्षां च दक्षिणाम्॥मुमोह तस्या रूपेण तुष्टुवे कामकातरः ॥ ७१ ॥ यज्ञ उवाच ॥ पुरा गोलोकगोपी त्वं गोपीनां प्रवरा परा ॥ राधासमा तत्सखी च श्रीकृष्णप्रेयसी प्रिये ॥ ७२ ॥ कार्त्तिकीपूर्णिमायां तु रासे राधामहोत्सवे ॥ आविर्भूता दक्षिणांशात्कृष्णस्यातो हि दक्षिणा ॥ ७३ ॥ पुरा त्वं च सुशीलाख्या शीलेन सुशुभेन च ॥ कृष्णदक्षांशवासाच्च राधाशापाच्च दक्षिणा ॥ ७४ ॥ गोलोकात्त्वं परिध्वस्ता मम भाग्यादुपस्थिता ॥ कृपां कुरु त्वमेवाद्य स्वामिनं कुरु मां प्रिये ॥ ७५ ॥ कर्तॄणां कर्मणां देवी त्वमेव फलदा सदा ॥ त्वया विना च सर्वेषां सर्वं कर्म च निष्फलम् ॥ ७६ ॥ फलशाखाविहीनश्च यथा वृक्षो महीतले ॥ त्वया

---

[1] यच्छ्राद्धमिति पाठः ।

विना तथा कर्म कर्तृणां च न शोभते ॥ ७७ ॥ ब्रह्मविष्णुमहेशाश्च दिक्पालादय एव च ॥ कर्मणश्च फलं दातु न शक्ताश्च त्वया विना ॥ ७८ ॥ कर्मरूपी स्वयं ब्रह्मा फलरूपी महेश्वरः ॥ यज्ञरूपी विष्णुरहं त्वमेषां साररूपिणी ॥ ७९ ॥ फलदाता परं ब्रह्म निर्गुणः प्रकृतेः परः ॥ स्वयं कृष्णश्च भगवान्न च शक्तस्त्वया विना ॥ ८० ॥ त्वमेव शक्तिः कान्ते मे शश्वज्जन्मनि जन्मनि ॥ सर्वकर्मणि शक्तोऽहं त्वया सह वरानने ॥ ८१ ॥ इत्युक्त्वा तत्पुरस्तस्थौ यज्ञाधिष्ठातृदेवकः ॥ तुष्टा बभूव सा देवी भेजे तं कमलाकला ॥ ८२ ॥ इदं च दक्षिणास्तोत्रं यज्ञकाले च यः पठेत् ॥ फलं च सर्वयज्ञानां लभते नात्र संशयः ॥ ८३ ॥ राजसूये वाजपेये गोमेधे नरमेधके ॥ अश्वमेधे लांगले च विष्णुयज्ञे यशस्करे ॥ ८४ ॥ धनदे भूमिदे फलगौ पुत्रेष्टौ गजमेधके ॥ लोहयज्ञे स्वर्णयज्ञे पटलव्याधिखण्डने[1] ॥ ८५ ॥ शिवयज्ञे[2] रुद्रयज्ञे शक्रयज्ञे च बन्धके ॥ इष्टौ वरुणयागे च कन्दुके वैरिमर्दने ॥ ८६ ॥ शुचियागे धर्मयागे रेचने पापमोचने ॥ बन्धने कर्मयागे च मणियागे सुभद्रके ॥ ८७ ॥ एतेषां च समारम्भे इदं स्तोत्रं च यः पठेत् ॥ निर्विघ्नेन च तत्कर्म साङ्गं भवति निश्चितम् ॥ ८८ ॥ इदं स्तोत्रं च कथितं ध्यानं पूजाविधानकम्[3] ॥ शालग्रामे घटे वाऽपि दक्षिणां पूजयेत्सुधीः ॥ ८९ ॥ लक्ष्मीदक्षांशसम्भूतां दक्षिणां कमलाकलाम् ॥ सर्वकर्मसु दक्षां च फलदां सर्वकर्मणाम् ॥ ९० ॥ विष्णोःशक्तिस्वरूपां च सुशीलां शुभदां भजे ॥ ध्यात्वाऽनेनैव वरदां सुधीर्मूलेन पूजयेत् ॥ ९१ ॥ दत्त्वा पाद्यादिकं देव्यै वेदोक्तेन च नारद ॥ ॐ श्रीं क्लीं ह्रीं दक्षिणायै स्वाहेति च विचक्षणः ॥ ९२ ॥ पूजयेद्विधिवद्भक्त्या दक्षिणां सर्वपूजिताम् ॥ इत्येवं कथितं सर्वं दक्षिणाख्यानमुत्तमम् ॥ ९३ ॥ सुखदं प्रीतिदं चैव फलदं सर्वकर्मणाम् ॥ इदं च दक्षिणाख्यानं यः शृणोति समाहितः ॥ ९४ ॥ अंगहीनं च तत्कर्म न भवेद्भारते भुवि ॥ अपुत्रो लभते पुत्रं निशिचतं च गुणान्वितम् ॥ ९५ ॥ भार्य्याहीनो लभेद्भार्य्यां सुशीलां सुन्दरीं पराम् ॥ वरारोहां पुत्रदतीं विनीतां प्रियवादिनीम् ॥ ९६ ॥ पतिव्रतां सुव्रतां च शुद्धां च कुलजां वराम् ॥ विद्याहीनो लभेद्विद्यां धनहीनो धनं लभेत् ॥ ९७ ॥ भूमिहीनो लभेद्भूमिं प्रजाहीनो लभेत्प्रजाः ॥ सङ्कटे बन्धुविच्छेदे

---

[1] पाटलीति पाठः । [2] शत्रुयज्ञे इति पाठः । [3] पूजाविधिं शृण्विति पाठः ।

विपत्तौ बन्धने तथा ॥ ९८ ॥ मासमेकमिदं श्रुत्वा मुच्यते नात्र संशयः॥ ९९ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे
नारदनारायणसंवादे दक्षिणोपाख्याने दक्षिणोत्पत्तितत्पूजादिविधानं नाम द्विचत्वारिंशत्तमोऽध्यायः ॥ ४२ ॥ नारद उवाच ॥
अनेकासां च देवीनां श्रुतमाख्यानमुत्तमम् ॥ अन्यासां चरितं ब्रह्मन्वद वेदविदां वर ॥ १ ॥ नारायण उवाच ॥ सर्वासां चरितं विप्र
वेदेष्वस्ति पृथक्पृथक् ॥ पूर्वोक्तानां च देवीनां त्वं कासां श्रोतुमिच्छसि ॥ २ ॥ नारद उवाच ॥ षष्ठी मङ्गलचण्डी च मनसा
प्रकृतेः कला ॥ उत्पत्तिमासां चरितं श्रोतुमिच्छामि तत्त्वतः ॥३॥ नारायण उवाच ॥ षष्ठांशा प्रकृतेर्या च सा च षष्ठी प्रकीर्त्तिता॥
बालकाधिष्ठातृदेवी विष्णुमाया च बालदा ॥ ४ ॥ मातृकासु च विख्याता देवसेनाभिधा च सा ॥ प्राणाधिकप्रिया साध्वी
स्कन्दभार्य्या च सुव्रता ॥ ५ ॥ आयुःप्रदा च बालानां धात्री रक्षणकारिणी ॥ सततं शिशुपार्श्वस्था योगाद्वै सिद्धियोगिनी
॥ ६ ॥ तस्याः पूजाविधौ ब्रह्मन्नितिहासविधिं शृणु ॥ यच्छ्रुतं धर्ममुखतः सुखदं पुत्रदं परम् ॥ ७ ॥ राजा प्रियव्रतश्चासीत्स्वायम्भुव
मनोः सुतः ॥ योगीन्द्रो नोद्वहेद्भार्य्यां तपस्यासु रतः सदा ॥ ८ ॥ ब्रह्माज्ञया च यत्नेन कृतदारो बभूव सः ॥ सुचिरं कृतदारश्च
न लेभे तनयं मुने ॥ ९ ॥ पुत्रेष्टियज्ञं तं चापि कारयामास कश्यपः ॥ मालिन्यै तस्य कान्तायै मुनिर्यज्ञचरुं ददौ ॥ १० ॥ भुक्त्वा
चरुं च तस्याश्च सद्यो गर्भो बभूव ह ॥ दधार तं च सा देवी दैवं द्वादशवत्सरम् ॥ ११ ॥ ततः सुषाव सा ब्रह्मन्कुमारं कनकप्रभम्॥
सर्वावयवसम्पन्नं मृतमुत्तारलोचनम् ॥ १२ ॥ तं दृष्ट्वा रुरुदुः सर्वा नार्य्यो वै बान्धवस्त्रियः ॥ मूर्च्छामवाप तन्माता पुत्रशोकेन
सुव्रता ॥ १३ ॥ श्मशानं च ययौ राजा गृहीत्वा बालकं मुने ॥ रुरोद तत्र कान्तारे पुत्रं कृत्वा स्ववक्षसि ॥ १४ ॥ नोत्सृज्य बालकं
राजा प्राणांस्त्यक्तुं समुद्यतः ॥ ज्ञानयोगं विसस्मार पुत्रशोकात्सुदारुणात् ॥ १५ ॥ एतस्मिन्नन्तरे तत्र विमानं च ददर्श ह ॥
शुद्धस्फटिकसङ्काशं मणिराजविराजितम् ॥ १६ ॥ तेजसा ज्वलितं शश्वच्छोभितं क्षौमवाससा ॥ नानाचित्रविचित्राढ्यं पुष्पमाला
विराजितम् ॥ १७ ॥ ददर्श तत्र देवीं च कमनीयां मनोहराम् ॥ श्वेतचम्पकवर्णाभां रम्यसुस्थिरयौवनाम् ॥ १८ ॥ ईषद्धास्यप्रसन्ना

स्यां रत्नभूषणभूषिताम् ॥ कृपामयीं योगसिद्धां भक्तानुग्रहकारिणीम् ॥ १९ ॥ दृष्ट्वा तां पुरतो राजा तुष्टाव परमादरात् ॥ चकार पूजनं तस्या विहाय भुवि बालकम् ॥ २० ॥ पप्रच्छ राजा तां दृष्ट्वा ग्रीष्मसूर्य्यसमप्रभाम् ॥ तेजसा ज्वलितां शान्तां कान्तां स्कन्दस्य नारद ॥ २१ ॥ प्रियव्रत उवाच ॥ का त्वं सुशोभने कान्ते कस्य कान्ताऽसि सुव्रते ॥ कस्य कन्या वरारोहे धन्या मान्या च योषिताम् ॥ २२ ॥ नृपेन्द्रस्य वचः श्रुत्वा जगन्मङ्गलदायिनी ॥ उवाच देवसेना सा देवरक्षणकारिणी ॥ २३ ॥ देवानां दैत्यभीतानां पुरा सेना बभूव सा ॥ जयं ददौ च तेभ्यश्च देवसेना च तेन सा॥२४॥ देवसेनोवाच॥ ब्रह्मणो मानसी कन्या देवसेनाऽहमीश्वरी ॥ सृष्ट्वा मां मनसो धाता ददौ स्कन्दाय भूमिप ॥ २५ ॥ मातृकासु च विख्याता स्कन्दसेना च सुव्रता ॥ विश्वे षष्ठीति विख्याता षष्ठांशा प्रकृतेर्यतः ॥ २६ ॥ पुत्रदाऽहमपुत्राय प्रियदात्री प्रियाय च ॥ धनदा च दरिद्रेभ्यः कर्तृभ्यः शुभकर्मदा ॥ २७ ॥ सुखं दुःखं भयं शोकं हर्षं मंगलमेव च ॥ सम्पत्तिश्च विपत्तिश्च सर्वं भवति कर्मणा ॥ २८ ॥ कर्मणा बहुपुत्री च वंशहीनश्च कर्मणा ॥ कर्मणा रूपवांश्चैव रोगी शश्वत्स्वकर्मणा ॥ २९ ॥ कर्मणा मृतपुत्रश्च कर्मणा चिरजीविनः ॥ कर्मणा गुणवन्तश्च कर्मणा चांगहीनकाः ॥ ३० ॥ तस्मात्कर्म परं राजन्सर्वेभ्यश्च श्रुतौ श्रुतम् ॥ कर्मरूपी च भगवांस्तद्द्वारा फलदो हरिः ॥ ॥ ३१ ॥ इत्येवमुक्त्वा सा देवी गृहीत्वा बालकं मुने ॥ महाज्ञानेन सहसा जीवयामास लीलया ॥ ३२ ॥ राजा ददर्श तं बालं सस्मितं कनकप्रभम् ॥ देवसेना च पश्यन्तं नृपमम्बरमेव च॥३३॥गृहीत्वा बालकं देवी गगनं गन्तुमुद्यता ॥ पुनस्तुष्टाव तां राजा शुष्ककण्ठौष्ठतालुकः ॥ ३४ ॥ नृपस्तोत्रेण सा देवी परितुष्टा बभूव ह ॥ उवाच तं नृपं ब्रह्मन्वेदोक्तं कर्म निर्मितम् ॥ ३९ ॥ देवसेनोवाच ॥ त्रिषु लोकेषु राजा त्वं स्वायम्भुवमनोः सुतः ॥ मम पूजां च सर्वत्र कारयित्वा स्वयं कुरु ॥ ३६ ॥ तदा दास्यामि पुत्रं ते कुलपद्मं मनोहरम् ॥ सुव्रतं नाम विख्यातं गुणवन्तं सुपण्डितम् ॥ ३७ ॥ जातिस्मरं च योगीन्द्रं नारायणपरायणम् ॥ शतक

---

१ कलात्मकमिति पाठः ।

तुकरं श्रेष्ठं क्षत्त्रियाणां च वन्दितम् ॥३८॥ मत्तमातङ्गलक्षाणां धृतवन्तं बलं शुभम् ॥ [१]धन्विनं गुणिनं शुद्धं विदुषां प्रियमेव च ॥
॥ ३९ ॥ योगिनं ज्ञानिनं चैव सिद्धरूपं तपस्विनम् ॥ यशस्विनं च लोकेषु दातारं सर्वसम्पदाम् ॥ ४० ॥ इत्येवमुक्त्वा सा देवी
तस्मै तद्बालकं ददौ ॥ राजा च तं स्वीचकार तत्पूजार्थं च सुव्रतः ॥ ४१ ॥ जगाम देवी स्वर्गं च दत्त्वा तस्मै शुभं वरम् ॥ आज
गाम महाराजः स्वगृहं हृष्टमानसः ॥ आगत्य कथयामास वृत्तान्तं पुत्रहेतुकम् ॥४२॥ तुष्टा बभूवुः सन्तुष्टा नरा नार्य्यश्च नारद ॥
मङ्गलं कारयामास सर्वत्र सुतहेतुकम् ॥ देवीं च पूजयामास ब्राह्मणेभ्यो धनं ददौ ॥ ४३ ॥ राजा च प्रतिमासेषु शुक्लषष्ठ्यां
महोत्सवम् ॥ षष्ठ्या देव्याश्च यत्नेन कारयामास सर्वतः ॥४४॥ बालानां सूतिकागारे षष्ठाहे यत्नपूर्वकम् ॥ तत्पूजां कारयामास
चैकविंशतिवासरे ॥ ४५ ॥ बालानां शुभकार्य्ये च शुभान्नप्राशने तथा ॥ सर्वत्र वर्द्धयामास स्वयमेव चकार ह ॥ ४६ ॥ ध्यानं
पूजाविधानं च स्तोत्रं मत्तो निशामय ॥ यच्छ्रुतं धर्मवक्त्रेण कौथुमोक्तं च सुव्रत ॥ ४७ ॥ शालग्रामे घटे वाऽथ वटमूलेऽथवा मुने॥
भित्त्यां पुत्तलिकां कृत्वा पूजयेद्वा विचक्षणः ॥ ४८ ॥ षष्ठांशां प्रकृतेः शुद्धां सुप्रतिष्ठां च सुव्रताम् ॥ सुपुत्रदां च शुभदां दयारूपां
जगत्प्रसूम् ॥ ४९ ॥ श्वेतचम्पकवर्णाभां रत्नभूषणभूषिताम् ॥ पवित्ररूपां परमां देवसेनां परां भजे ॥ ५० ॥ इति ध्यात्वा स्वशि
रसि पुष्पं दत्त्वा विचक्षणः ॥ पुनर्ध्यात्वा च मूलेन पूजयेत्सुव्रतः सतीम् ॥ ५१ ॥ पाद्यार्घ्याचमनीयैश्च गन्धधूपप्रदीपकैः ॥ नैवे
द्यैर्विविधैश्चापि फलेन च शुभेन च ॥५२॥ मूलमों ह्रीं षष्ठीदेव्यै स्वाहेति विधिपूर्वकम् ॥ अष्टाक्षरं महामन्त्रं यथाशक्ति जपेन्नरः ॥
॥ ५३ ॥ तत्र स्तुत्वा च नमते भक्तियुक्तः समाहितः ॥ स्तोत्रं च सामवेदोक्तं धनपुत्रफलप्रदम् ॥ ५४ ॥ अष्टाक्षरं महामन्त्रं
लक्षधा यो जपेन्मुने ॥ स पुत्रं लभते नूनमित्याह कमलोद्भवः ॥ ५५ ॥ स्तोत्रं शृणु मुनिश्रेष्ठ सर्वेषां च शुभावहम् ॥ वाञ्छा
प्रदं च सर्वेषां गूढं वेदे च नारद ॥ ५६ ॥ प्रियव्रत उवाच ॥ नमो देव्यै महादेव्यै सिद्ध्यै शान्त्यै नमो नमः ॥ सुखदायै मोक्ष

---

[१] घनिनां गुणिनामिति पाठः ।

दायै षष्ठीदेव्यै नमो नमः ॥ ५७ ॥ वरदायै पुत्रदायै धनदायै नमो नमः ॥ सुखदायै मोक्षदायै षष्ठीदेव्यै नमो नमः ॥ ५८ ॥
शक्तेः षष्ठांशरूपायै सिद्धायै च नमो नमः ॥ मायायै सिद्धयोगिन्यै षष्ठीदेव्यै नमो नमः ॥ ५९ ॥ पारायै पारदायै च
षष्ठीदेव्यै नमो नमः ॥ सारायै सारदायै च पारायै सर्वकर्मणाम् ॥ ६० ॥ बालाधिष्ठातृदेव्यै च षष्ठी देव्यै नमो नमः ॥ कल्या
णदायै कल्याण्यै फलदायै च कर्मणाम् ॥ ६१ ॥ प्रत्यक्षायै च भक्तानां षष्ठीदेव्यै नमो नमः ॥ पूज्यायै स्कन्दकान्तायै सर्वेषां
सर्वकर्मसु॥६२॥देवरक्षणकारिण्यै षष्ठीदेव्यै नमो नमः॥शुद्धसत्त्वस्वरूपायै वन्दितायै नृणां सदा॥६३॥हिंसाक्रोधैर्वर्जितायै षष्ठीदेव्यै
नमो नमः॥धनं देहि प्रियां देहि पुत्रं देहि सुरेश्वरि ॥ ६४ ॥ धर्मं देहि यशो देहि षष्ठीदेव्यै नमो नमः ॥ भूमिं देहि प्रजां देहि देहि
विद्यां सुपूजिते ॥ ६५ ॥ कल्याणं च जयं देहि षष्ठीदेव्यै नमो नमः ॥ इति देवीं च संस्तूय लेभे पुत्रं प्रियव्रतः ॥ ६६ ॥ यशस्विनं
च राजेन्द्रं षष्ठीदेवीप्रसादतः ॥ षष्ठीस्तोत्रमिदं ब्रह्मन्यः शृणोति च वत्सरम् ॥ ६७ ॥ अपुत्रो लभते पुत्रं वरं सुचिरजीविनम् ॥
वर्षमेकं च या भक्त्या संयत्तेदं शृणोति च ॥ ६८ ॥ सर्वपापाद्विनिर्मुक्ता महावन्ध्या प्रसूयते ॥ वीरपुत्रं च गुणिनं विद्यावन्तं यश
स्विनम् ॥ ६९ ॥ सुचिरायुष्मन्तमेव षष्ठीमातृप्रसादतः ॥ काकवन्ध्या च या नारी मृतापत्या च या भवेत् ॥ ७० ॥ वर्षं श्रुत्वा
लभेत्पुत्रं षष्ठीदेवीप्रसादतः ॥ रोगयुक्ते च बाले च पिता माता शृणोति च ॥ ७१ ॥ मासं च मुच्यते बालः षष्ठीदेवीप्रसादतः ॥
इति श्रीब्रह्म०म०द्वि०प्र०नारदनारायणसं०षष्ठ्युपाख्याने षष्ठीदेव्युत्पत्तितत्पूजास्तोत्रादिकथनं नाम त्रिचत्वारिंशत्तमोऽध्यायः॥४३॥
नारायण उवाच ॥ कथितं षष्ठ्युपाख्यानं ब्रह्मपुत्र यथागमम्॥देवी मङ्गलचण्डी च तदाख्यानं निशामय ॥ १ ॥ तस्याः पूजादिकं
सर्वं धर्मवक्राच्च यच्छ्रुतम् ॥ श्रुतिसम्मतमेवेष्टं सर्वेषां विदुषामपि ॥ २ ॥ चण्डायां वर्त्तते चण्डी जाग्रती शत्रुमण्डले ॥ मङ्गलेषु च
या दक्षा मङ्गला सैव चण्डिका ॥ ३ ॥ दुर्गायां विद्यते चण्डी मङ्गलोऽपि महीसुते ॥ मङ्गलाऽभीष्टदेवी या सा स्यान्मङ्गलचण्डिका
॥ ४ ॥ मंगलो मनुवंशश्च सप्तद्वीपावनीपतिः ॥ तस्य पूज्याऽभीष्टदेवी तेन मंगलचण्डिका ॥ ५ ॥ मूर्त्तिभेदेन सा दुर्गा मूलप्रकृ

तिरीश्वरी ॥ कृपारूपाऽतिप्रत्यक्षा योषितामिष्टदेवता ॥६॥ प्रथमे पूजिता सा च शङ्करेण पुरा परा ॥ त्रिपुरस्य वधे घोरे विष्णुना
प्रेरितेन च ॥ ७ ॥ ब्रह्मन्ब्रह्मोपदेशेन दुर्गप्रस्थे च सङ्कटे ॥ आकाशात्पतिते याने रुषा दैत्येन पातिते ॥ ८ ॥ ब्रह्मविष्णूपदिष्टश्च
दुर्गां तुष्टाव शङ्करः ॥ सा च मंगलचण्डीयमभवद्रूपभेदतः ॥ ९ ॥ उवाच पुरतः शम्भोर्भयं नास्तीति ते प्रभो ॥ भगवान्वृषरूपश्च
सर्वेशश्च बभूव ह ॥ १० ॥ युद्धशक्तिस्वरूपाऽहं भविष्यामि तदाज्ञया ॥ मयाऽऽत्मना च हरिणा सहायेन वृषध्वज ॥ ११ ॥
जहि दैत्यं च देवेश सुराणां पदघातकम् ॥ इत्युक्त्वाऽन्तर्हिता देवी शम्भोः शक्तिर्बभूव सा ॥ १२ ॥ विष्णुदत्तेन शस्त्रेण जघान
तमुमापतिः ॥ मुनीन्द्र पतिते दैत्ये सर्वे देवा महर्षयः ॥ १३ ॥ तुष्टुवुः शंकरं देवा भक्तिनम्रात्मकन्धराः ॥ सद्यः शिरसि शम्भोश्च
पुष्पवृष्टिर्बभूव ह ॥ १४ ॥ ब्रह्मा विष्णुश्च सन्तुष्टो ददौ तस्मै शुभाशिषम् ॥ ब्रह्मविष्णूपदिष्टश्च सुस्नातः शङ्करः शुचिः ॥ १५ ॥
पूजयामास तां शक्तिं देवीं मङ्गलचण्डिकाम् ॥ पाद्यार्घ्याचमनीयैश्च बलिभिर्विविधैरपि ॥ १६ ॥ पुष्पचन्दननैवेद्यैर्भक्त्या नानाविधैर्मुने
॥ छागैर्मेषैश्च महिषैर्गण्डैर्मायाविभिर्वरैः ॥ १७ ॥ वस्त्रालङ्कारमाल्यैश्च पायसैः पिष्टकैरपि ॥ मधुभिश्च सुधाभिश्च पक्वैर्नानाविधैः फलैः
॥ १८ ॥ सङ्गीतैर्नर्त्तनैर्वाद्यैरुत्सवैः कृष्णकीर्त्तनैः ॥ ध्यात्वा माध्यन्दिनोक्तेन ध्यानेन विधिपूर्वकम् ॥ १९ ॥ ददौ
द्रव्याणि मूलेन मन्त्रेणैव च नारद ॥ ॐ ह्रीं श्रीं क्लीं सर्वपूज्ये देवि मङ्गलचण्डिके ॥ ऐं क्रूं फट्स्वाहेत्येवं चाप्येकविंशाक्षरो मनुः॥
॥ २० ॥ पूज्यः कल्पतरुश्चैव भक्तानां सर्वकामदः ॥ दशलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम् ॥ २१ ॥ मन्त्रसिद्धिर्भवेद्यस्य स
विष्णुः सर्वकामदः ॥ ध्यानं च श्रूयतां ब्रह्मन्वेदोक्तं सर्वसम्मतम् ॥ २२ ॥ देवीं षोडशवर्षीयां रम्यां सुस्थिरयौवनाम् ॥ सर्वरूपगुणाढ्यां
च कोमलांगीं मनोहराम् ॥ २३ ॥ श्वेतचम्पकवर्णाभां चन्द्रकोटिसमप्रभाम् ॥ वह्निशुद्धांशुकाधानां रत्नभूषणभूषिताम् ॥
॥ २४ ॥ बिभ्रतीं कबरीभारं मल्लिकामाल्यभूषितम् बिम्बोष्ठीं सुदतीं शुद्धां शरत्पद्मनिभाननाम् ॥ २५ ॥ ईषद्धास्यप्रसन्नास्यां
सुनीलोत्पललोचनाम् ॥ जगद्धात्रीं च दात्रीं च सर्वेभ्यः सर्वसम्पदाम् ॥ २६ ॥ संसारसागरे घोरे पोतरूपां वरां भजे ॥ २७ ॥

देव्याश्च ध्यानमित्येवं स्तवनं श्रूयतां मुने ॥ प्रयतः सङ्कटग्रस्तो येन तुष्टाव शङ्करः ॥ २८॥ शङ्कर उवाच ॥ रक्ष रक्ष जगन्मातर्देवि मंगलचण्डिके ॥ संहर्त्रि विपदां राशेर्हर्षमंगलकारिके ॥ २९ ॥ हर्षमंगलदक्षे च हर्षमंगलचण्डिके ॥ शुभे मंगलदक्षे च शुभमंगलचण्डिके ॥ ३० ॥ मंगले मङ्गलार्हे च सर्वमंगलमंगले ॥ सतां मंगलदे देवि सर्वेषां मंगलालये ॥ ३१ ॥ पूज्या मंगलवारे च मंगलाभीष्टदैवते ॥ पूज्ये मंगलभूपस्य मनुवंशस्य सन्ततम् ॥ ३२ ॥ मंगलाधिष्ठातृदेवि मंगलानां च मंगले ॥ संसारे मंगलाधारे मोक्षमंगलदायिनि ॥ ३३ ॥ सारे च मंगलाधारे पारे त्वं सर्वकर्मणाम् ॥ प्रतिमंगलवारं च पूज्ये त्वं मंगलप्रदे ॥ ३४ ॥ स्तोत्रेणानेन शम्भुश्च स्तुत्वा मंगलचण्डिकाम् ॥ प्रतिमंगलवारे च पूजां कृत्वा गतः शिवः ॥ ३५ ॥ देव्याश्च मंगलस्तोत्रं यः शृणोति समाहितः ॥ तन्मंगलं भवेच्छश्वन्न भवेत्तदमंगलम् ॥ ३६ ॥ प्रथमे पूजिता देवी शम्भुना सर्वमंगला ॥ द्वितीये पूजिता देवी मंगलेन ग्रहेण च ॥ ३७ ॥ तृतीये पूजिता भद्रा मंगलेन नृपेण च ॥ चतुर्थे मंगले वारे सुन्दरीभिश्च पूजिता ॥ पञ्चमे मङ्गलाकांक्षैर्नरैर्मंगलचण्डिका ॥३८॥ पूजिता प्रतिविश्वेषु विश्वेशैः पूजिता सदा ॥ ततः सर्वत्र संपूज्य सा बभूव सुरेश्वरी ॥ ३९ ॥ देवादिभिश्च मुनिभिर्मनुभिर्मानवैर्मुने ॥ देव्याश्च मङ्गलस्तोत्रं यः शृणोति समाहितः ॥ ४० ॥ तन्मंगलं भवेच्छश्वन्न भवेत्तदमंगलम् ॥ वर्द्धन्ते तत्पुत्रपौत्रा मंगलं च दिने दिने ॥ ४१ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे मङ्गलोपाख्याने तत्स्तोत्रादिकथनं नाम चतुश्चत्वारिंशत्तमोऽध्यायः॥४४॥नारायण उवाच ॥ उक्तं द्वयोरुपाख्यानं ब्रह्मपुत्र यथागमम्॥ श्रूयतां मनसाख्यानं यच्छ्रुतं धर्मवक्त्रतः॥१॥कन्या भगवती सा च कश्यपस्य च मानसी॥तेनेयं मनसादेवी मनसा या च दीव्यति ॥ २॥ मनसा ध्यायते या वा परमात्मानमीश्वरम् ॥ तेन सा मनसादेवी योगेनैतेन दीव्यति ॥३॥ आत्मारामा च सा देवी वैष्णवी सिद्धयोगिनी ॥ त्रियुगं च तपस्तप्त्वा कृष्णस्य परमात्मनः ॥ ४ ॥ जरत्कारुशरीरं च दृष्ट्वा यां क्षणमीश्वरः ॥ गोपीपतिर्नाम चक्रे जरत्कारुरिति प्रभुः ॥ ५ ॥ वाञ्छितं च ददौ तस्यै कृपया च कृपानिधिः ॥ पूजां च कारयामास चकार च

पुनः स्वयम् ॥ ६ ॥ स्वर्गे च नागलोके च पृथिव्यां ब्रह्मलोकतः ॥ भृशं जगत्सु गौरी सा सुन्दरी च मनोहरा ॥ ७ ॥ जगद्गौरीति विख्याता तेन सा पूजिता सती ॥ शिवशिष्या च सा देवी तेन शैवीति कीर्त्तिता ॥८॥ विष्णुभक्ताऽतीव रम्या वैष्णवी तेन नारद ॥ नागानां प्राणरक्षित्री जनमेजययज्ञके॥९॥नागेश्वरीति विख्याता सा नागभगिनी तथा ॥ विषं संहर्त्तुमीशा सा तेन सा विषहारिणी ॥ ॥१०॥सिद्धं योगं हरात्प्राप तेनासौ सिद्धयोगिनी॥महाज्ञानं च गोप्यं च मृतसञ्जीविनीं पराम् ॥११॥ महाज्ञानयुतां तां च प्रवदन्ति मनीषिणः ॥ आस्तीकस्य मुनीन्द्रस्य माता सा वै तपस्विनः ॥ १२ ॥ आस्तीकमाता विख्याता जरत्कारुरिति स्म सा ॥ प्रिया मुनेर्जरत्कारोर्मुनीन्द्रस्य महात्मनः ॥ १३ ॥ योगिनो विश्वपूज्यस्य जरत्कारोः प्रिया ततः ॥ १४ ॥ ॐ नमो मनसायै ॥ जरत्कारुर्जगद्गौरी मनसा सिद्धयोगिनी ॥ वैष्णवी नागभगिनी शैवी नागेश्वरी तथा ॥ १५ ॥ जरत्कारुप्रियाऽऽस्तीकमाता विषहरीति च ॥ महाज्ञानयुता चैव सा देवी विश्वपूजिता ॥ १६ ॥ द्वादशैतानि नामानि पूजाकाले च यः पठेत् ॥ तस्य नागभयं नस्ति तस्य वंशोद्भवस्य च ॥ १७ ॥ नागभीदे च शयने नागग्रस्ते च मन्दिरे ॥ नागक्षते नागदुर्गे नागवेष्टितविग्रहे ॥ १८ ॥ इदं स्तोत्रं पठित्वा तु मुच्यते नात्र संशयः ॥ नित्यं पठेद्यस्तं दृष्ट्वा नागवर्गः पलायते ॥ १९ ॥ दशलक्षजपेनैव स्तोत्रसिद्धिर्भवेन्नृणाम् ॥ स्तोत्रं सिद्धं भवेद्यस्य स विषं भोक्तुमीश्वरः ॥२०॥ नागौघं भूषणं कृत्वा स भवेन्नागवाहनः ॥ नागासनो नागतल्पो महासिद्धो भवेन्नरः ॥ २१ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे मनसोपाख्याने मनसास्तोत्रादिकथनं नाम पञ्चचत्वारिंशत्तमोऽध्यायः ॥ ४५ ॥ नारायण उवाच ॥ पूजाविधानं स्तोत्रं च श्रूयतां मुनिपुंगव ॥ ध्यानं च सामवेदोक्तं देवीपूजाविधानकम् ॥ १ ॥ श्वेतचम्पकवर्णाभां रत्नभूषणभूषिताम् ॥ वह्निशुद्धांशुकाधानां नागयज्ञोपवीतिनीम् ॥२॥ महाज्ञानयुतां चैव प्रवरां ज्ञानिनां सताम् ॥ सिद्धाधिष्ठातृदेवीं च सिद्धां सिद्धिप्रदां भजे ॥ ३ ॥ इति ध्यात्वा च तां देवीं मूलेनैव प्रपूजयेत् ॥ नैवेद्यैर्विविधैर्दीपैः पुष्पैर्धूपानुलेपनैः ॥ ४ ॥ मूलमन्त्रश्च वेदोक्तो भक्तानां वाञ्छितप्रदः॥मूलकल्पतरुर्नाम सुसिद्धो द्वादशाक्षरः ॥५॥

ॐ ह्रीं श्रीं क्रीं ऐं मनसादेव्यै स्वाहेति कीर्तितः ॥ पञ्चलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम् ॥ ६ ॥ मन्त्रसिद्धिर्भवेद्यस्य स सिद्धो जगतीतले ॥ सुधासमं विषं तस्य धन्वन्तरिसमो भवेत् ॥ ७ ॥ ब्रह्मन्नाषाढसंक्रान्त्यां गुडाशाखासु यत्नतः ॥ आवाह्य देवीं मासान्तं पूजयेद्यो हि भक्तितः ॥ ८ ॥ पञ्चम्यां मानसाख्यायां देव्यै दद्याच्च यो बलिम् ॥ धनवान्पुत्रवांश्चैव कीर्तिमान्स भवेद्ध्रुवम् ॥ ९ ॥ पूजाविधानं कथितं तदाख्यानं निशामय ॥ कथयामि महाभाग यच्छ्रुतं धर्मवक्त्रतः ॥ १० ॥ पुरा नागभयाक्रान्ता बभूवुर्मानवा भुवि ॥ यान्यान्खादन्ति नागाश्च न ते जीवन्ति नारद ॥ ११ ॥ मन्त्रांश्च ससृजे भीतः कश्यपो ब्रह्मणाऽर्थितः ॥ वेदबीजानुसारेण चोपदेशेन वेधसः ॥१२॥ मन्त्राधिष्ठातृदेवीं तां मानसां ससृजे ततः ॥ तपसा मनसा तेन मानसा सा बभूव ह ॥ १३ ॥ कुमारी सा च संभूय चागमच्छङ्करालयम् ॥ भक्त्या सम्पूज्य कैलासे तुष्टुवे चन्द्रशेखरम् ॥ १४ ॥ दिव्यं वर्षसहस्रं च तं सिषेवे मुनेः सुता ॥ आशुतोषो महेशश्च तां च तुष्टो बभूव ह ॥ १५ ॥ महाज्ञानं ददौ तस्यै पाठयामास साम च ॥ कृष्णमन्त्रं कल्पतरुं ददावष्टाक्षरं मुने ॥ १६ ॥ लक्ष्मीमायाकामबीज ङेन्तं कृष्णपदं तथा ॥ ॐ श्रीं ह्रीं क्लीं कृष्णाय ॥ त्रैलोक्यमङ्गलं नाम कवचं पूजनक्रमम् ॥ १७ ॥ स्तवनं सर्वपूज्यं च ध्यानं भुवनपावनम् ॥ पुरश्चर्याक्रमं चापि वेदोक्तं सर्वसम्मतम् ॥ १८ ॥ प्राप्य मृत्युञ्जयाज्ज्ञानं परं मृत्युञ्जयं सती ॥ जगाम तपसे साध्वी पुष्करं शङ्कराज्ञया ॥१९॥ त्रियुगं च तपस्तप्त्वा कृष्णस्य परमात्मनः ॥ सिद्धा बभूव सा देवी ददर्श पुरतः प्रभुम् ॥ २० ॥ दृष्ट्वा कृशाङ्गीं बालां च कृपया च कृपानिधिः ॥ पूजां च कारयामास चकार च हरिः स्वयम् ॥ २१ ॥ वरं च प्रददौ तस्यै पूजिता त्वं भवे भव ॥ वरं दत्त्वा च कल्याण्यै सद्यश्चान्तर्दधे विभुः ॥ २२ ॥ प्रथमे पूजिता सा च कृष्णेन परमात्मना ॥ द्वितीये शङ्करेणैव कश्यपेन सुरेण च ॥ २३ ॥ मनुना मुनिना चैव ह्यहिना मानवादिना ॥ बभूव पूजिता सा च त्रिषु लोकेषु सुश्रुता ॥ २४ ॥ जरत्कारुमुनीन्द्राय कश्यपस्तां ददौ पुरा ॥ अयाचितो मुनिश्रेष्ठो जग्राह ब्राह्मणाज्ञया ॥ २५ ॥ कृत्वोद्वाहं महायोगी विश्रान्तस्तपसा

चिरम् ॥ सुष्वाप देव्या जघने वटमूले च पुष्करे ॥ २६ ॥ निद्रां जगाम स मुनिः स्मृत्वा निद्रेशमीश्वरम् ॥ जगामास्तं दिनकरः
सायंकाल उपस्थितः ॥ २७ ॥ संचिन्त्य मनसा तत्र मनसा च पतिव्रता ॥ धर्म्मलोपभयेनैव चकारालोचनं सती ॥ २८ ॥
अकृत्वा पश्चिमां सन्ध्यां नित्यां चैव द्विजन्मनाम्॥ब्रह्महत्यादिकं पापं लभिष्यति पतिर्मम ॥ २९ ॥ नोपतिष्ठति यः पूर्वां नोपास्ते
यश्च पश्चिमाम् ॥ स सर्वदाऽशुचिर्नित्यं ब्रह्महत्यादिकं लभेत् ॥ ३० ॥ वेदोक्तमिति संचिन्त्य बोधयामास तं मुनिम् ॥ स च बुद्ध्वा
मुनिश्रेष्ठस्तां चुकोप भृशं मुनिः ॥ ३१ ॥ जरत्कारुरुवाच ॥ कथं मे सुव्रते साध्वि निद्राभङ्गः कृतस्त्वया ॥ व्यर्थं व्रतादिकं तस्या
या भर्त्तुश्चापकारिणी ॥३२॥ तपश्चानशनं चैव व्रतं दानादिकं च यत् ॥ भर्तुरप्रियकारिण्याः सर्वं भवति निष्फलम् ॥ ३३ ॥ यया
पतिः पूजितश्च श्रीकृष्णः पूजितस्तया ॥ पतिव्रताव्रतार्थं च पतिरूपी हरिः स्वयम् ॥ ३४ ॥ सर्वदानं सर्वयज्ञः सर्वतीर्थनिषेवणम्॥
सर्वं तपो व्रतं सर्वमुपवासादिकं च यत् ॥ ३५ ॥ सर्वधर्मश्च सत्यं च सर्वदेवप्रपूजनम् ॥ तत्सर्वं स्वामिसेवायाः कलां नार्हन्ति
षोडशीम् ॥ ३६ ॥ सुपुण्ये भारते वर्षे पतिसेवां करोति या ॥ वैकुण्ठं स्वामिना सार्द्धं सा याति ब्रह्मणः पदम् ॥ ३७ ॥ विप्रियं
कुरुते भर्तुर्विप्रियं वदति प्रियम् ॥ असत्कुलप्रजाता या तत्फलं श्रूयतां सति ॥३८॥ कुम्भीपाकं व्रजेत्सा च यावच्चन्द्रदिवाकरौ ॥
ततो भवति चाण्डाली पतिपुत्रविवर्जिता ॥ ३९ ॥ इत्युक्त्वा च मुनिश्रेष्ठो बभूव स्फुरिताधरः ॥ चकम्पे मनसा साध्वी भयेनोवा
च तं पतिम् ॥ ४० ॥ मनसोवाच ॥ सन्ध्यालोपभयेनैव निद्राभङ्गः कृतस्तव ॥ कुरु शान्तिं महाभाग दुष्टाया मम सुव्रत
॥ ४१ ॥ शृङ्गाराहारनिद्राणां यश्च भङ्गं करोति च ॥ स व्रजेत्कालसूत्रं च स्वामिनश्च विशेषतः ॥ ४२ ॥ इत्युक्त्वा मनसा देवी
स्वामिनश्चरणाम्बुजे ॥ पपात भक्त्या भीता च रुरोद च पुनः पुनः ॥ ४३ ॥ कुपितं च मुनिं दृष्ट्वा श्रीसूर्य्यं शप्तुमुद्यतम् ॥ तत्रा
जगाम भगवान्सन्ध्यया सह नारद ॥ ४४ ॥ तत्रागत्य मुनिश्रेष्ठमवोचद्भास्करः स्वयम् ॥ विनयेन विनीतश्च तया सह यथोचितम्
॥ ४५ ॥ श्रीसूर्य्य उवाच ॥ सूर्य्यास्तसमयं दृष्ट्वा धर्मलोपभयेन च ॥ त्वां बोधयामास विप्र नाहमस्तं गतस्तदा ॥ ४६ ॥ क्षमस्व

भगवन्ब्रह्मन्मां शप्तुं नोचितं मुने ॥ ब्राह्मणानां च हृदयं नवनीतसमं सदा ॥४७॥ तेषां क्षणार्द्धं क्रोधश्च ततो भस्म भवेज्जगत् ॥
पुनः स्रष्टुं द्विजः शक्तो न तेजस्वी द्विजात्परः ॥ ४८ ॥ ब्रह्मणो[1] वंशसम्भूतः प्रज्वलन्ब्रह्मतेजसा ॥ श्रीकृष्णं भावयेन्नित्यं ब्रह्म
ज्योतिः सनातनम् ॥ ४९ ॥ सूर्य्यस्य वचनं श्रुत्वा द्विजस्तुष्टो बभूव ह ॥ सूर्य्यो जगाम स्वस्थानं गृहीत्वा ब्राह्मणाशिषम् ॥५०॥
तत्याज मनसां विप्रः प्रतिज्ञापालनाय च ॥ रुदन्तीं शोकयुक्तां च हृदयेन विदूयता ॥ ५१ ॥ सा सस्मार गुरुं शम्भुमिष्टदेवं हरिं
विधिम् ॥ कश्यपं जन्मदातारं विपत्तौ भयकर्शिता ॥ ५२ ॥ तत्राजगाम भगवान्गोपीशः शम्भुरेव च ॥ विधिश्च कश्यपश्चैव
मनसां परिचिन्तयन् ॥ ५३ ॥ स च दृष्ट्वाऽभीष्टदेवं निगुणं प्रकृतेः परम् ॥ तुष्टाव परया भक्त्या प्रणनाम मुहुर्मुहुः ॥ ५४ ॥ नम
श्चकार शम्भुं च ब्रह्माणं कश्यपं तथा ॥ कथमागमनं त्वत्रेत्येवं प्रश्नं चकार सः ॥ ५५ ॥ ब्रह्मा तद्वचनं श्रुत्वा सहसा समयोचितम्॥
तमुवाच नमस्कृत्य हृषीकेशपदाम्बुजम् ॥ ५६ ॥ यदि त्यक्ता धर्मपत्नी धर्मिष्ठा मनसा सती ॥ कुरुष्वास्यां सुतोत्पत्तिं धर्मसं
स्थापनाय वै ॥ ५७ ॥ यतिर्वा ब्रह्मचारी वा भिक्षुर्वनचरोऽपि वा ॥ जायायां च सुतोत्पत्तिं कृत्वा पश्चाद्भवेन्मुनिः ॥५८॥ अकृत्वा
तु सुतोत्पत्तिं विरागी यस्त्यजेत्प्रियाम् ॥ स्रवेत्तपस्तत्पुण्यं च चालिन्यां च यथा जलम् ॥५९॥ ब्रह्मणो वचनं श्रुत्वा जरत्कारुर्मुनी
श्वरः ॥ चक्रे तन्नाभिसंस्पर्शं योगाद्वै मन्त्रपूर्वकम् ॥ ६० ॥ तस्यै शुभाशिषं दत्त्वा ययुर्देवा मुदाऽन्विताः ॥ मुदाऽन्विता च मनसा
जरत्कारुर्मुदाऽन्वितः ॥ ६१ ॥ मुनेः करस्पर्शमात्रात्सद्यो गर्भो बभूव ह॥मनसाया मुनिश्रेष्ठ मुनिश्रेष्ठ उवाच ताम् ॥६२॥जरत्कारुरु
वाच ॥ गर्भेणानेन मनसे तव पुत्रो भविष्यति॥जितेन्द्रियाणां प्रवरो धर्मिष्ठो वैष्णवाग्रणीः॥६३॥तेजस्वी च तपस्वी च यशस्वी च
गुणान्वितः ॥ वरो वेदविदां चैव योगिनां ज्ञानिनां तथा॥६४॥स च पुत्रो विष्णुभक्तो धार्मिकः कुलमुद्धरेत् ॥ नृत्यन्ति पितरः सर्वे
जन्ममात्रेण वै मुदा ॥ ६५ ॥ पतिव्रता सुशीला या सप्रिया प्रियवादिनी ॥ धर्मिष्ठा पुत्रमाता च कुलजा कुलपालिका ॥ ६६ ॥

---

[1] ब्राह्मणो ब्रह्मणो वंशे—इति पाठः ।

हरिभक्तिप्रदो बन्धुस्तदिष्टं यत्सुखप्रदम् ॥ यो बन्धच्छित्स च पिता हरेर्वर्त्मप्रदर्शकः ॥ ६७ ॥ सा गर्भधारिणी या च गर्भवासविमोचिनी ॥ विष्णुमन्त्रप्रदाता च स गुरुर्विष्णुभक्तिदः ॥ ६८ ॥ गुरुश्च ज्ञानदाता च तज्ज्ञानं कृष्णभावनम् ॥ आब्रह्मस्तम्बपर्य्यन्तं यतो विश्वं चराचरम् ॥ ६९ ॥ आविर्भूतं तिरोभूतं किं वा ज्ञानं तदन्यतः ॥ वेदजं योगजं यद्यत्तत्सारं हरिसेवनम् ॥ ७० ॥ तत्त्वानां सारभूतं च हरेरन्यद्विडम्बनम् ॥ दत्तं ज्ञानं मया तुभ्यं स स्वामी ज्ञानदो हि यः ॥ ७१ ॥ ज्ञानात्प्रमुच्यते बन्धात्स रिपुर्यो हि बन्धदः ॥ विष्णुभक्तियुतं ज्ञानं यो ददाति स वै गुरुः ॥ ७२ ॥ स रिपुः शिष्यघाती च यतो बन्धान्न मोचयेत् ॥ जननीगर्भजात्क्लेशाद्यमताडनजात्तथा ॥ ७३ ॥ न मोचयेद्यः स कथं गुरुस्तातो हि बान्धवः ॥ परमानन्दरूपं च कृष्णमार्गमनश्वरम् ॥ ७४ ॥ न दर्शयेद्यः स कथं कीदृशो बान्धवो नृणाम् ॥ भज साध्वि परं ब्रह्माच्युतं कृष्णं च निर्गुणम् ॥ निर्मूलं च पुराकर्म भवेद्यत्सेवया ध्रुवम् ॥ ७५ ॥ मया छलेन त्वं त्यक्ता दोषं मे क्षम्यतां प्रिये ॥ क्षमायुतानां साध्वीनां सत्त्वात्क्रोधो न विद्यते॥ ७६ ॥ पुष्करे तपसे यामि गच्छ देवि यथासुखम् ॥ श्रीकृष्णचरणाम्भोजे ध्यानविच्छेदकातरः ॥७७॥ धनादिषु स्त्रियां प्रीतिः प्रवृत्तिपथगामिनाम् ॥ श्रीकृष्णचरणाम्भोजे निःस्पृहाणां मनोरथाः ॥ ७८ ॥ जरत्कारुवचः श्रुत्वा मनसा शोककातरा ॥ सा साश्रुनेत्रा विनयादुवाच प्राणवल्लभम् ॥ ७९ ॥ मनसोवाच ॥ दोषेणाहं त्वया त्यक्ता निद्राभङ्गेन ते प्रभो ॥ यत्र स्मरामि त्वां बन्धो तत्र मामागमिष्यसि॥८०॥बन्धुभेदः क्लेशतमः पुत्रभेदस्ततः परः ॥ प्राणेशभेदः प्राणानां विच्छेदात्सर्वतः परः ॥८१॥ पतिः पतिव्रतानां च शतपुत्राधिकः प्रियः ॥ सर्वस्माच्च प्रियः स्त्रीणां प्रियस्तेनोच्यते बुधैः॥८२॥पुत्रे यथैकपुत्राणां वैष्णवानां यथा हरौ ॥ नेत्रे यथैकनेत्राणां तृषितानां यथा जले ॥८३॥ क्षुधितानां यथाऽन्ने च कामुकानां यथा स्त्रियाम्॥ यथा परस्वे चौराणां यथा जारे कुयोषिताम्॥ ॥ ८४ ॥ विदुषां च यथा शास्त्रे वणिज्ये वणिजां यथा ॥ तथा शश्वन्मनः कान्ते साध्वीनां योषितां प्रभो ॥ ८५ ॥ इत्युक्त्वा मनसा देवी पपात स्वामिनः पदे ॥ क्षणं चकार क्रोडे तां कृपया च कृपानिधिः ॥ ८६ ॥ नेत्रोदकेन मनसां स्नापयामास तां मुनिः ॥

साऽश्रुणा च मुनेः क्रोडं सिषेवे भेदकातरा ॥८७॥ तदा ज्ञानेन तौ द्वौ च विशोकौ च बभूवतुः ॥ स्मारं स्मारं पदाम्भोजं कृष्णस्य परमात्मनः ॥ ८८ ॥ जगाम तपसे विप्रः स कान्तां सुप्रबोध्य च ॥ जगाम मनसा शम्भोः कैलासं मन्दिरं गुरोः ॥ ८९ ॥ पार्वती बोधयामास मनसां शोककर्शिताम् ॥ शिवंश्चातीव[1] बोधेन शिवेन च शिवालये ॥ ९० ॥ सुप्रशस्ते दिने साध्वी सुषुवे मङ्गले क्षणे॥ नारायणांशं पुत्रं च ज्ञानिनां योगिनां गुरुम् ॥ ९१ ॥ गर्भस्थितो महाज्ञानं श्रुत्वा शङ्करवक्रतः ॥ स बभूव महायोगी योगिनां ज्ञानिनां गुरुः ॥ ९२ ॥ जातकं कारयामास वाचयामास मंगलम् ॥ वेदांश्च पाठयामास शिवाय च शिवः शिशोः ॥ ९३ ॥ रत्नत्रिकोटिलक्षं च ब्राह्मणेभ्यो ददौ शिवः ॥ पार्वती च गवां लक्षं रत्नानि विविधानि च ॥ ९४ ॥ शम्भुश्च चतुरो वेदान्वेदांगानितरांस्तथा ॥ बालकं पाठयामास ज्ञानं मृत्युञ्जयं परम् ॥ ९५ ॥ भक्तिरास्ते स्वकान्ते चाभीष्टे देवे हरौ गुरौ॥ यस्यास्तेन च तत्पुत्रो बभूवास्तीक एव च ॥ ९६ ॥ जगाम तपसे विष्णोः पुष्करं शङ्कराज्ञया ॥ संप्राप्य च महामन्त्रं तपश्च परमात्मनः ॥ ९७ ॥ दिव्यं वर्षत्रिलक्षं च तपस्तप्त्वा तपोधनः ॥ आजगाम महायोगी नमस्कर्त्तुं शिवं प्रभुम् ॥ ९८ ॥ शंकरं च नमस्कृत्य पुरः कृत्वा च बालकम् ॥ सा चाजगाम मनसा कश्यपस्याश्रमं पितुः ॥९९॥ तां सपुत्रां सुतां दृष्ट्वा मुदं प्राप प्रजापतिः ॥ शतलक्षं च रत्नानां ब्राह्मणेभ्यो ददौ मुने ॥ १०० ॥ ब्राह्मणान्भोजयामास त्वसंख्याञ्छ्रेयसे शिशोः ॥ अदितिश्च दितिश्चान्या मुदं प्रापुः परं तथा ॥ १०१ ॥ सा सपुत्रा च सुचिरं तस्थौ तातालये तदा ॥ तदीयं पुनराख्यानं वक्ष्ये त्वं तन्निशामय ॥ १०२ ॥ अथाभिमन्युतनये ब्रह्मशापः परीक्षिते ॥ बभूव सहसा ब्रह्मन्दैवदोषेण कर्मणा ॥ १०३ ॥ सप्ताहे समतीते तु तक्षकस्त्वां च दंक्ष्यति ॥ शशाप शृङ्गी कौशिक्या जलं संस्पृश्य चेति सः ॥ १०४ ॥ राजा श्रुत्वा तत्प्रवृत्तिं गंगाद्वारं जगाम सः ॥ तत्र तस्थौ च सप्ताहं शुश्रुवे धर्मसंहिताम् ॥ १०५ ॥ सप्ताहे समतीते तु गच्छन्तं तक्षकं पथि ॥ धन्वन्तरिर्मोचयितुमपश्यद्गन्तुको नृपम् ॥ १०६ ॥

---

१ शिवश्च तीव्रज्ञानेनेति पाठः ।

तयोर्बभूव संवादः सुप्रीतिश्च परस्परम् ॥ धन्वन्तरेर्मणिं श्रेष्ठं तक्षकः स्वेच्छया ददौ ॥ १०७ ॥ स ययौ तं गृहीत्वा तु तुष्टसंहृष्ट
मानसः ॥ अपश्यत्तक्षकस्तूर्णं नृपं मञ्चकसंस्थितम्[1] ॥१०८॥ राजा जगाम वैकुण्ठं स्मारंस्मारं हरिं गुरुम् ॥ संस्कारं कारयामास
पितुर्वै जनमेजयः॥१०९॥राजा चकार यज्ञं च सर्पसत्राभिधं मुने॥ प्राणांस्तत्याज सर्पाणां समूहो ब्रह्मतेजसा ॥११०॥ स तक्षकश्च
भीतश्च महेन्द्रं शरणं ययौ ॥ सेन्द्रं च तक्षकं हन्तुं विप्रवर्गः समुद्यतः ॥ १११ ॥ अथ देवाश्च मुनयश्चाययुर्मनसान्तिकम् ॥ तां
तुष्टाव महेन्द्रश्च समक्षं भयकातरः ॥११२॥ तत्र आस्तीक आगत्य मातुर्यज्ञमथाज्ञया ॥ महेन्द्रतक्षकप्राणान्ययाचे भूमिपं वरम्॥
॥ ११३ ॥ ददौ वरं नृपश्रेष्ठः कृपया ब्राह्मणाज्ञया ॥ यज्ञं समाप्य विप्रेभ्यो दक्षिणां च ददौ मुदा ॥ ११४ ॥ विप्राश्च मुनयो
देवा गत्वा च मनसान्तिकम् ॥ मनसां पूजयामासुस्तुष्टुवुश्च पृथक्पृथक् ॥११५॥ शक्रः संभृतसंभारो भक्तियुक्तः सदा शुचिः ॥
मनसां पूजयामास तुष्टाव परमादरात् ॥११६॥ उपचारैः षोडशभिर्बलिं दत्त्वा प्रियं तदा ॥ प्रददौ परितुष्टश्च ब्रह्मविष्णुसुराज्ञया॥
॥११७॥ संपूज्य मनसादेवीं प्रययुः स्वालयं च ते ॥ इत्येवं कथितं सर्वं किं भूयः श्रोतुमिच्छसि ॥ ११८ ॥ नारद उवाच ॥ केन
स्तोत्रेण तुष्टाव महेन्द्रो मनसां सतीम् ॥ पूजाविधिक्रमं तस्याः श्रोतुमिच्छामि तत्त्वतः ॥ ११९ ॥ नारायण उवाच ॥ सुस्नातः
शुचिराचान्तो धृत्वा धौते च वाससी ॥ रत्नसिंहासने देवीं वासयामास भक्तितः ॥ १२० ॥ स्वर्गगङ्गाजलेनैव रत्नकुम्भ
स्थितेन च ॥ स्नापयामास मनसां महेन्द्रो वेदमन्त्रतः ॥ १२१ ॥ वाससी वासयामास वह्निशुद्धे मनोरमे ॥ सर्वांगे चन्दनं लिप्त्वा
पाद्यार्घ्यं भक्तिसंयुतः ॥ १२२ ॥ गणेशं च दिनेशं च वह्निं विष्णुं शिवं शिवाम् ॥ संपूज्य देवषट्कं च पूजयामास तां सतीम् ॥
॥ १२३ ॥ ॐ ह्रीं श्रीं मनसादेव्यै स्वाहेत्येवं च मन्त्रतः ॥ दशाक्षरेण मन्त्रेण ददौ सर्वान्यथोचितम् ॥ १२४ ॥ उपचारान्षोड
शकान्भक्तितो दुर्लभान्हरिः ॥ पूजयामास भक्त्या च ब्रह्मणा प्रेरितो मुदा ॥ १२५ ॥ वाद्यं नानाप्रकारं च वादयामास तत्र वै ॥

---

[1] मस्तकसंस्थितमिति पाठः ।

बभूव पुष्पवृष्टिश्च नभसो मनसोपरि ॥ १२६ ॥ देवो विप्राज्ञया तत्र ब्रह्मविष्णुशिवाज्ञया ॥ तुष्टाव साश्रुनेत्रश्च पुलकाञ्चित
विग्रहः ॥ १२७ ॥ महेन्द्र उवाच ॥ देवि त्वां स्तोतुमिच्छामि साध्वीनां प्रवरां वराम् ॥ परात्परां च परमां नहि स्तोतुं क्षमो
ऽधुना ॥ १२८ ॥ स्तोत्राणां लक्षणं वेदे स्वभावाख्यानतः परम् ॥ न क्षमः प्रकृतिं वक्तुं गुणानां तव सुव्रते ॥ १२९ ॥ शुद्धसत्त्व
स्वरूपा त्वं कोपहिंसाविवर्जिता ॥ न च शप्तो मुनिस्तेन त्यक्तया च त्वया यतः ॥ त्वं मया पूजिता साध्वि जननी च यथाऽदितिः ॥
॥ १३० ॥ दयारूपा च भगिनी क्षमारूपा यथा प्रसूः ॥ त्वया मे रक्षिताः प्राणाः पुत्रदाराः सुरेश्वरि ॥ १३१ ॥ अहं करोमि त्वां
पूज्यां मम प्रीतिश्च वर्द्धते ॥ नित्यं यद्यापि पूज्या त्वं भवेऽत्र जगदम्बिके ॥ १३२ ॥ तथाऽपि तव पूजां वै वर्द्धयामि पुनः पुनः ॥
ये त्वामाषाढसंक्रान्त्यां पूजयिष्यन्ति भक्तितः ॥१३३॥ पञ्चम्यां मनसाख्यायां मासान्ते वा दिने दिने ॥ पुत्रपौत्रादयस्तेषां वर्द्धन्ते
च धनानि च ॥ १३४ ॥ यशस्विनः कीर्त्तिमन्तो विद्यावन्तो गुणान्विताः ॥ ये त्वां न पूजयिष्यन्ति निन्दन्त्यज्ञानतो जनाः ॥
॥ १३५ ॥ लक्ष्मीहीना भविष्यन्ति तेषां नागभयं सदा ॥ त्वं स्वर्गलक्ष्मीः स्वर्गे च वैकुण्ठे कमला कला ॥ १३६॥ नारायणांशो
भगवाञ्जरत्कारुर्मुनीश्वरः ॥ तपसा तेजसा त्वां च मनसा ससृजे पिता ॥१३७॥ अस्माकं रक्षणायैव तेन त्वं मनसाभिधा ॥ मनसा
देवितुं शक्ता चात्मना सिद्धयोगिनी ॥ १३८ ॥ तेन त्वं मनसादेवी पूजिता वन्दिता भवे ॥ यां भक्त्या मनसा देवाः पूजय
न्त्यनिशं भृशम् ॥ १३९ ॥ तेन त्वां मनसादेवीं प्रवदन्ति पुराविदः ॥ सत्त्वरूपा च देवी त्वं शश्वत्सत्त्वनिषेवया ॥ १४० ॥ यो
हि यद्भावयेन्नित्यं शतं प्राप्नोति तत्समम् ॥ इन्द्रश्च मनसां स्तुत्वा गृहीत्वा भगिनीं च ताम् ॥ १४१ ॥ निर्जगाम स्वभवनं भूषावा
सपरिच्छदाम् ॥ पुत्रेण सार्द्धं सा देवी चिरं तस्थौ पितुर्गृहे ॥१४२॥ भ्रातृभिः पूजिता शश्वन्मान्या वन्द्या च सर्वतः ॥ गोलोका
त्सुरभी ब्रह्मंस्तत्रागत्य सुपूजिताम् ॥ १४३ ॥ तां स्नापयित्वा क्षीरेण पूजयामास सादरम् ॥ ज्ञानस्य कथयामास स्वरूपं सर्वदुर्ल
भम् ॥ तदा देवैः पूजिता सा स्वर्गलोकं पुनर्ययौ ॥१४४॥ इदं स्तोत्रं पुण्यबीजं तां संपूज्य च यः पठेत् ॥ तस्य नागभयं नास्ति

तस्य वंशे भवेच्च यः ॥ १४५ ॥ विषं भवेत्सुधातुल्यं सिद्धस्तोत्रं यदा पठेत् ॥ पञ्चलक्षजपेनैव सिद्धस्तोत्रो भवेन्नरः ॥१४६॥ सर्प
शायी भवेत्सोऽपि निश्चितं सर्पवाहनः ॥ १४७ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे मनसोपा
ख्याने तदुत्पत्तिपूजास्तोत्रादिकथनं नाम षट्चत्वारिंशत्तमोऽध्यायः ॥ ४६ ॥ नारद उवाच ॥ का वा सा सुरभी देवी गोलोका
दागता च या ॥ तज्जन्म चरितं ब्रह्मञ्छ्रोतुमिच्छामि तत्त्वतः ॥ १ ॥ नारायण उवाच ॥ गवामधिष्ठातृदेवी गवामाद्या गवां प्रसूः ॥
गवां प्रधाना सुरभी गोलोके च समुद्भवा ॥ २ ॥ सर्वादिसृष्टेः कथनं कथयामि निशामय ॥ बभूव तेन तज्जन्म पुरा वृन्दावने वने
॥ ३ ॥ एकदा राधिकानाथो राधया सह कौतुकात् ॥ गोपांगनापरिवृतः पुण्यं वृन्दावनं ययौ ॥ ४ ॥ सहसा तत्र रहसि विजहार
च कौतुकात् ॥ बभूव क्षीरपानेच्छा तदा स्वेच्छापरस्य च ॥ ५ ॥ ससृजे सुरभीं देवीं लीलया वामपार्श्वतः ॥ वत्सयुक्तां दुग्धवतीं
वत्सानां च मनोरमाम् ॥ ६ ॥ दृष्ट्वा सवत्सां सुरभीं रत्नभाण्डे दुदोह सः ॥ क्षीरं सुधातिरिक्तं च जन्ममृत्युहरं परम् ॥ ७ ॥ तदुष्णं
च पयः स्वादु पपौ गोपीपतिः स्वयम् ॥ सरो बभूव पयसा भाण्डविस्रंसनेन च ॥८॥ दीर्घे च विस्तृते चैव परितः शतयोजनम् ॥
गोलोकेषु प्रसिद्धं तद्रम्यं क्षीरसरोवरम् ॥ ९ ॥ गोपिकानां च राधायाः क्रीडावापी बभूव सा ॥ रत्नेन रचिता तूर्णं भूता वापीश्व
रेच्छया ॥ १० ॥ बभूव कामधेनूनां सहसा लक्षकोटयः ॥ तावत्यो हि सवत्साश्च सुरभीलोमकूपतः ॥ ११ ॥ तासां पुत्राश्च पौत्राश्च
संबभूवुरसंख्यकाः ॥ कथिता च गवां सृष्टिस्तया संपूरितं जगत् ॥ १२ ॥ पूजां चकार भगवान्सुरभ्याश्च पुरा मुने ॥ ततो बभूव
तत्पूजा त्रिषु लोकेषु दुर्लभा ॥ १३ ॥ दीपान्विता परदिने श्रीकृष्णस्याज्ञया भवे ॥ बभूव सुरभीपूजा धर्मवक्त्रादिति श्रुतम्
॥ १४ ॥ ध्यानं स्तोत्रं मूलमन्त्रं यद्यत्पूजाविधिक्रमम् ॥ वेदोक्तं च महाभाग निबोध कथयामि ते ॥ १५ ॥ ॐ सुरभ्यै नम इति
मन्त्रोऽयं तु षडक्षरः ॥ सिद्धो लक्षजपेनैव भक्तानां कल्पपादपः ॥१६॥ स्थितं ध्यानं यजुर्वेदे पूजनं सर्वसम्मतम् ॥ ऋद्धिदां वृद्धिदां
चैव मुक्तिदां सर्वकामदाम् ॥ १७ ॥ लक्ष्मीस्वरूपां परमां राधासहचरीं पराम् ॥ गवामधिष्ठातृदेवीं गवामाद्यां गवां प्रसूम् ॥१८॥

पवित्ररूपां पूज्यां च भक्तानां सर्वकामदाम् ॥ यया पूतं सर्वविश्वं तां देवीं सुरभीं भजे ॥ १९ ॥ घटे वा धेनुशिरसि बद्धस्तभे गवां च वा ॥ शालग्रामे जलेऽग्नौ वा सुरभीं पूजयेद्द्विजः ॥ २० ॥ दीपान्विता परदिने पूर्वाह्ने भक्तिसंयुतः ॥ यः पूजयेच्च सुरभीं स च पूज्यो भवेद्भुवि ॥ २१ ॥ एकदा त्रिषु लोकेषु वाराहे विष्णुमायया ॥ क्षीरं जहार सहसा चिन्तिताश्च सुरादयः ॥ २२ ॥ ते गत्वा ब्रह्मणो लोकं ब्रह्माणं तुष्टुवुस्तदा ॥ तदाज्ञया च सुरभीं तुष्टुवे पाकशासनः ॥ २३ ॥ महेन्द्र उवाच ॥ नमो देव्यै महादेव्यै सुरभ्यै च नमो नमः ॥ गवां बीजस्वरूपायै नमस्ते जगदम्बिके ॥ २४ ॥ नमो राधाप्रियायै च पद्मांशायै नमो नमः ॥ नमः कृष्णप्रियायै च गवां मात्रे नमो नमः ॥ कल्पवृक्षस्वरूपायै प्रदात्र्यै सर्वसंपदाम् ॥ २५ ॥ श्रीदायै धनदायै च बुद्धिदायै नमो नमः ॥ शुभदायै प्रसन्नायै गोप्रदायै नमो नमः ॥ २६ ॥ यशोदायै सौख्यदायै धर्मज्ञायै नमो नमः ॥ स्तोत्रश्रवणमात्रेण तुष्टा हृष्टा जगत्प्रसूः ॥ २७ ॥ आविर्बभूव तत्रैव ब्रह्मलोके सनातनी ॥ महेन्द्राय वरं दत्त्वा वाञ्छितं सर्वदुर्लभम् ॥ २८ ॥ जगाम सा च गोलोकं ययुर्देवादयो गृहम् ॥ बभूव विश्वं सहसा दुग्धपूर्णं च नारद ॥ २९ ॥ दुग्धाद् घृतं ततो यज्ञस्ततः प्रीतिः सुरस्य च ॥ इदं स्तोत्रं महापुण्यं भक्तियुक्तश्च यः पठेत् ॥ ३० ॥ स गोमान्धनवांश्चैव कीर्त्तिमान्पुण्यवान्भवेत् ॥ सुस्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ॥ ३१ ॥ इह लोके सुखं भुक्त्वा यात्यन्ते कृष्णमन्दिरम् ॥ सुचिरं निवसेत्तत्र कुरुते कृष्णसेवनम् ॥ ३२ ॥ न पुनर्भवनं तस्य ब्रह्मपुत्र भवे भवेत् ॥ ३३ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे सुरभ्युपाख्याने तदुत्पत्ति तत्पूजादिकथनं नाम सप्तचत्वारिंशत्तमोऽध्यायः ॥ ४७ ॥ नारद उवाच ॥ नारायण महाभाग नारायणपरायण ॥ नारायणांश भगवन्ब्रूहि नारायणीं कथाम् ॥ १ ॥ श्रुतं सुरभ्युपाख्यानमतीव सुमनोहरम् ॥ गोप्यं सर्वपुराणेषु पुराविद्भिः प्रशंसितम् ॥ २ ॥ अधुना श्रोतुमिच्छामि राधिकाख्यानमुत्तमम् ॥ तदुत्पत्तिं च तद्ध्यानं स्तोत्रं कवचमुत्तमम् ॥ ३ ॥ श्रीनारायण उवाच ॥ पुरा कैलासशिखरे भगवन्तं सनातनम् ॥ सिद्धेशं सिद्धिदं सर्वस्वरूपं शंकरं परम् ॥ ४ ॥ प्रफुल्लवदनं प्रीतं सस्मितं मुनिभिः

स्तुतम् ॥ कुमाराय प्ररोचन्तं कृष्णस्य परमात्मनः ॥ ५ ॥ रासोत्सवरसाख्यानं रासमण्डलवर्णनम् ॥ तदाख्यानावसाने च
प्रस्तावावसरे सती ॥ ६ ॥ पप्रच्छ पार्वती स्फीता सस्मिता प्राणवल्लभम् ॥ स्तवनं कुर्वती भीता प्राणेशेन प्रसादिता
॥ ७ ॥ प्रोवाच तं महादेवं महादेवी सुरेश्वरी ॥ अपूर्वं राधिकाख्यानं पुराणेषु सुदुर्लभम् ॥ ८ ॥ श्रीपार्वत्युवाच ॥
आगमं निखिलं नाथ श्रुतं सर्वमनुत्तमम् ॥ पाञ्चरात्रादिकं नीतिशास्त्रयोगं च योगिनाम् ॥ ९ ॥ सिद्धानां सिद्धिशास्त्रं
च नानातन्त्रं मनोहरम् ॥ भक्तानां भक्तिशास्त्रं च कृष्णस्य परमात्मनः ॥ १० ॥ देवीनामपि सर्वासां चरितं त्वन्मुखाम्बुजात् ॥
अधुना श्रोतुमिच्छामि राधिकाख्यानमुत्तमम् ॥११॥ श्रुतौ श्रुतं प्रशस्तं च राधायाश्च समासतः ॥ त्वन्मुखात्काण्वशाखायां व्यासे
नोक्तां वदाधुना ॥ १२ ॥ आगमाख्यानकाले च भवता स्वीकृतं पुरा ॥ नहीश्वरव्याहृतिश्च मिथ्या भवितुमर्हति ॥ १३ ॥ तदुत्पत्तिं
च तद्ध्यानं नाम्नो माहात्म्यमुत्तमम् ॥ पूजाविधानं चरितं स्तोत्रं कवचमुत्तमम् ॥१४॥ आराधनविधानं च पूजापद्धतिमीप्सिताम्॥
साम्प्रतं ब्रूहि भगवन्मां भक्तां भक्तवत्सल ॥ १५ ॥ कथं न कथितं पूर्वमागमाख्यानकालतः ॥ पार्वतीवचनं श्रुत्वा नम्रवक्त्रो
बभूव सः ॥ १६ ॥ पञ्चवक्त्रश्च भगवाञ्छुष्ककण्ठोष्ठतालुकः ॥ स्वसत्यभङ्गभीतश्च मौनीभूय विचिन्तयन् ॥ १७ ॥ सस्मार कृष्णं
ध्यानेनाभीष्टदेवं कृपानिधिम् ॥ तदनुज्ञां च संप्राप्य स्वार्द्धाङ्गां तामुवाच सः ॥ १८ ॥ निषिद्धोऽहं भगवता कृष्णेन परमात्मना ॥
आगमारम्भसमये राधाख्यानप्रसंगतः ॥ १९ ॥ मदर्द्धांगस्वरूपा त्वं न मद्भिन्ना स्वरूपतः ॥ अतोऽनुज्ञां ददौ कृष्णो मह्यं वक्तुं
महेश्वरि ॥ २० ॥ मदिष्टदेवकान्ताया राधायाश्चरितं सति ॥ अतीव गोपनीयं च सुखदं कृष्णभक्तिदम् ॥ २१ ॥ जानामि तदहं दुर्गे
सर्वं पूर्वापरं वरम् ॥ यज्जानामि रहस्यं च न तद्ब्रह्मा फणीश्वरः ॥ २२ ॥ न तत्सनत्कुमारश्च न च धर्मः सनातनः ॥ न देवेन्द्रो
मुनीन्द्राश्च सिद्धेन्द्राः सिद्धपुङ्गवाः ॥ २३ ॥ मत्तो बलवती त्वं च प्राणांस्त्यक्तुं समुद्यता ॥ अतस्त्वां गोपनीयं च कथयामि सुरेश्वरि
॥ २४ ॥ शृणु दुर्गे प्रवक्ष्यामि रहस्यं परमाद्भुतम् ॥ चरितं राधिकायाश्च दुर्लभं च सुपुण्यदम् ॥ २५ ॥ पुरा वृन्दावने रम्ये

गोलोके रासमण्डले ॥ शतशृंगैकदेशे च मालतीमल्लिकावने ॥ २६ ॥ रत्नसिंहासने रम्ये तस्थौ तत्र जगत्पतिः ॥ स्वेच्छामयश्च
भगवान्बभूव रमणोत्सुकः ॥ २७ ॥ रिरंसोस्तस्य जगतां पत्युस्तन्मल्लिकावने ॥ इच्छया च भवेत्सर्वं तस्य स्वेच्छामयस्य च
॥ २८ ॥ एतस्मिन्नन्तरे दुर्गे द्विधारूपो बभूव सः ॥ दक्षिणांगं च श्रीकृष्णो वामार्द्धांगा च राधिका ॥ २९ ॥ बभूव रमणी रम्या
रासेशा रमणोत्सुका ॥ अमूल्यरत्नाभरणा रत्नसिंहासनस्थिता ॥ ३० ॥ वह्निशुद्धांशुकाधाना कोटिपूर्णशशिप्रभा ॥ तप्तकाञ्चनव
र्णाभा राजिता च स्वतेजसा॥३१॥सस्मिता सुदती शुद्धा शरत्पद्मनिभानना ॥ बिभ्रती कबरीं रम्यां मालतीमाल्यमण्डिताम्॥३२॥
रत्नमालां च दधती ग्रीष्मसूर्य्यसमप्रभाम् ॥ मुक्ताहारेण शुभ्रेण गंगाधारानिभेन च ॥ ३३ ॥ संयुक्तं वर्तुलोत्तुंगं सुमेरु
गिरिसन्निभम् ॥ कठिनं सुन्दरं दृश्यं कस्तूरीपत्रचिह्नितम् ॥ ३४ ॥ मांगल्यं मंगलार्हं च स्तनयुग्मं च बिभ्रती ॥ नितम्बश्रोणिभा
रार्त्ता नवयौवनसुन्दरी ॥ ३५ ॥ कामातुरः सस्मितां तां ददर्श रसिकेश्वरः ॥ दृष्ट्वा कान्तां जगत्कान्तो बभूव रमणोत्सुकः ॥३६॥
दृष्ट्वा चैनं सुकान्तं च सा दधार हरेः पुरः ॥ तेन राधा समाख्याता पुराविद्भिर्महेश्वरि ॥ ३७ ॥ राधा भजति तं कृष्णं स च तां
च परस्परम् ॥ उभयोः सर्वसाम्यं च सदा सन्तो वदन्ति च ॥ ३८ ॥ भवनं[1] धावनं रासे स्मरत्यालिंगनं जपन् ॥ तेन जलपति
संकेतं तत्र राधां स ईश्वरः ॥ ३९ ॥ राशब्दोच्चारणाद्भक्तो राति[2] मुक्तिं सुदुर्लभाम् ॥ धाशब्दोच्चारणाद्दुर्गे धावत्येव हरेः पदम् ॥
॥ ४० ॥ कृष्णवामांशसम्भूता राधा रासेश्वरी पुरा ॥ तस्याश्चांशांशकलया बभूवुर्देवयोषितः ॥ ४१ ॥ रा इत्यादानवचनो धा च
निर्वाणवाचकः ॥ ततोऽवाप्नोति मुक्तिं च तेन राधा प्रकीर्तिता ॥ ४२ ॥ बभूव गोपीसंघश्च राधाया लोमकूपतः ॥ श्रीकृष्णलोमकू
पेभ्यो बभूवुः सर्वबल्लवाः ॥ ४३ ॥ राधावामांशभागेन महालक्ष्मीर्बभूव सा ॥ तस्याधिष्ठातृदेवी सा गृहलक्ष्मीर्बभूव सा ॥ ४४ ॥
चतर्भुजस्य सा पत्नी देवी वैकुण्ठवासिनी ॥ तदंशा राजलक्ष्मीश्च राजसम्पत्प्रदायिनी ॥ ४५ ॥ तदंशा मर्त्यलक्ष्मीश्च गृहिणां

---

[1] भरणं धारणमिति पाठः । [2] यातीति पाठः ।

च गृहे गृहे ॥ दीपाधिष्ठातृदेवी च सा चैव गृहदेवता ॥ ४६ ॥ स्वयं राधा कृष्णपत्नी कृष्णवक्षःस्थलस्थिता ॥ प्राणाधिष्ठातृदेवी च तस्यैव परमात्मनः ॥ ४७ ॥ आब्रह्मस्तम्बपर्य्यन्तं सर्वं मिथ्यैव पार्वति ॥ भज सत्यं परं ब्रह्म राधेशं त्रिगुणात्परम् ॥ ४८ ॥ परं प्रधानं परमं परमात्मानमीश्वरम् ॥ सर्वाद्यं सर्वपूज्यं च निरीहं प्रकृतेः परम् ॥ ४९ ॥ स्वेच्छामयं नित्यरूपं भक्तानुग्रहविग्रहम् ॥ तद्भिन्नानां च देवानां प्राकृतं रूपमेव च ॥ ५० ॥ तस्य प्राणाधिका राधा बहुसौभाग्यसंयुता ॥ महाविष्णोः प्रसूः सा च मूलप्रकृतिरीश्वरी ॥ ५१ ॥ मानिनीं राधिकां सन्तः सेवन्ते नित्यशस्सदा ॥ सुलभं यत्पदाम्भोजं ब्रह्मादीनां सुदुर्लभम् ॥ ५२ ॥ स्वप्ने राधापदाम्भोजं नहि पश्यन्ति बल्लवाः ॥ स्वयं देवी हरेः क्रोडे छायारूपेण कामिनी ॥ ५३ ॥ स च द्वादशगोपानां रायाणप्रवरः प्रिये ॥ श्रीकृष्णांशश्च भगवान्विष्णुतुल्यपराक्रमः ॥ ५४ ॥ सुदामशापात्सा देवी गोलोकादागता महीम् ॥ वृषभानुगृहे जाता तन्माता च कलावती ॥५५॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादान्तर्गतहरगौरीसंवादे राधोपाख्याने राधोत्पत्तितत्पूजादिकथनं नामाष्टचत्वारिंशत्तमोऽध्यायः ॥ ४८ ॥ पार्वत्युवाच ॥ कथं सुदामशापश्च सा देवी ललाभ ह ॥ कथं शशाप भृत्यो हि स्वाभीष्टां देवकामिनीम् ॥ १ ॥ श्रीभगवानुवाच ॥ शृणु देवी प्रवक्ष्यामि रहस्यं परमाद्भुतम् ॥ गोप्यं सर्वपुराणेषु शुभदं भक्तिमुक्तिदम् ॥ २ ॥ एकदा राधिकेशश्च गोलोके रासमण्डले ॥ शतशृंगाख्यगिर्य्येकदेशे वृन्दावने वने ॥३॥ गृहीत्वा विरजां गोपीं सुभाग्यां राधिकासमाम् ॥ क्रीडां चकार भगवान्रत्नभूषणभूषितः ॥ ४ ॥ रत्नप्रदीपसंयुक्ते रत्ननिर्माणमण्डले ॥ अमूल्यरत्नखचितमञ्चके पुष्पतल्पके ॥ ५ ॥ कस्तूरीकुंकुमारक्ते सुचन्दनसुधूपिते ॥ सुगन्धिमालतीमालासमूहपरिमण्डिते ॥ ६ ॥ सुरताद्विरतिर्नास्ति दम्पती रतिपण्डितौ ॥ तौ द्वौ परस्परासक्तौ सुखसम्भोगतन्त्रितौ ॥ ७ ॥ मन्वन्तराणां लक्षश्च कालः परिमितो गतः ॥ गोलोकस्य स्वल्पकाले जन्मादिरहितस्य च ॥ ८ ॥ दूत्यश्चतस्रो

---

१ रायाणो नाम कश्चन वैश्यः ।

ज्ञात्वाऽथ जगदुस्तां तु राधिकम् ॥ श्रुत्वा परमरुष्टा सा तत्याज हरिमीश्वरी ॥९॥ प्रबोधिता च सखिभिः कोपरक्तास्यलोचना ॥ विहाय रत्नालङ्कारं वह्निशुद्धांशुके शुभे ॥ १० ॥ क्रीडापद्मं च सद्रत्नामूल्यदर्पणमुज्ज्वलम् ॥ निर्मार्जयामास सती सिन्दूरं चित्रपत्रकम् ॥ ११ ॥ प्रक्षाल्य तोयाञ्जलिभिर्मुखरागमलक्तकम् ॥ विस्रस्तकबरीभारा मुक्तकेशी प्रकम्पिता ॥ १२ ॥ शुक्लवस्त्रपरीधाना रूक्षा वेषादिवर्जिता ॥ ययौ यानान्तिकं तूर्णं प्रियालीभिर्निवारिता॥१३॥आजुहाव सखीसंघं रोषविस्फुरिताधरा ॥ शश्वत्कम्पान्वितांगी सा गोपीभिः परिवारिता ॥१४॥ ताभिर्भक्त्या युताभिश्च कातराभिश्च संस्तुता ॥ आरुरोह रथं दिव्यममूल्यं रत्ननिर्मितम् ॥ दशयोजनविस्तीर्णं दैर्घ्यैं तच्छतयोजनम् ॥१५॥ सहस्रचक्रयुक्तं च नानाचित्रसमन्वितम् ॥ नानाविचित्रवसनैः सूक्ष्मैः क्षौमैर्विराजितम् ॥ १६ ॥ अमूल्यरत्ननिर्माणदर्पणैः परिशोभितम् ॥ मणीन्द्रजालमालाभैः पुष्पमालासहस्रकैः ॥ १७ ॥ सद्रत्नकलशैर्युक्तं रम्यैर्मन्दिरकोटिभिः ॥ त्रिलक्षकोटिभिः सार्द्धं गोपीभिश्च प्रियालिभिः ॥ १८ ॥ ययौ रथेन तेनैव सुमनोमालिना प्रिये ॥ श्रुत्वा कोलाहलं गोपः सुदामा कृष्णपार्षदः ॥ १९ ॥ कृष्णं कृत्वा सावधानं गोपैः सार्द्धं पलायितः ॥ भयेन कृष्णः सन्त्रस्तो विहाय विरजां सतीम् ॥ २० ॥ स्वप्रेममग्नः कृष्णोऽपि तिरोधानं चकार सः ॥ सा सती समयं ज्ञात्वा विचार्य्य स्वहृदि क्रुधा ॥ २१ ॥ राधाप्रकोपभीता च प्राणांस्तत्याज तत्क्षणम् ॥ विरजालिगणास्तत्र भयविह्वलकातराः ॥ २२ ॥ प्रययुः शरणं साध्वीं विरजां तत्क्षणं भिया ॥ गोलोके सा सरिद्रूपा जाता वै शैलकन्यके ॥ २३ ॥ कोटियोजनविस्तीर्णा दीर्घे शतगुणा तथा ॥ गोलोकं वेष्टयामास परिखेव मनोहरा ॥ २४ ॥ बभूवुः क्षुद्रनद्यश्च तदाऽन्या गोप्य एव च ॥ सर्वा नद्यस्तदंशाश्च प्रतिविश्वेषु सुन्दरि ॥ २५ ॥ इमे सप्त समुद्राश्च विरजानन्दना भुवि ॥ अथागत्य महाभागा राधा रासेश्वरी परा ॥ २६ ॥ न दृष्ट्वा विरजां कृष्णं स्वगृहं च पुनर्ययौ ॥ जगाम कृष्णस्तां राधां गोपालैरष्टभिः सह ॥ २७ ॥ गोपीभिर्द्वारि युक्ताभिर्वारितोऽपि पुनः पुनः ॥ दृष्ट्वा कृष्णं च सा देवी भर्त्सयामास तं तदा ॥ २८ ॥ सुदामा भर्त्सयामास तां तथा कृष्णस

न्निधौ ॥ क्रुद्धा शशाप सा देवी सुदामानं सुरेश्वरी ॥ २९ ॥ गच्छ त्वमासुरीं योनिं गच्छ दूरमतो द्रुतम् ॥ शशाप तां सुदामा च त्वमितो गच्छ भारतम् ॥ ३० ॥ भव गोपी गोपकन्यामुख्याभिः स्वाभिरेव च ॥ तत्र ते कृष्णविच्छेदो भविष्यति शतं समाः ॥ ॥३१॥ तत्र भारावतरणं भगवांश्च करिष्यति ॥ इति शप्त्वा सुदामाऽसौ प्रणम्य जननीं हरिम् ॥ साश्रुनेत्रो मोहयुक्तस्ततो गन्तुं समुद्यतः ॥ ३२ ॥ राधा जगाम तत्पश्चात्साश्रुनेत्राऽतिविह्वला ॥ वत्स क्व यासीत्युच्चार्य्य पुत्रविच्छेदकातरा ॥ ३३ ॥ कृष्णस्तां बोधयामास विद्यया च कृपानिधिः ॥ शीघ्रं संप्राप्स्यसि सुतं मा रुदस्त्वं वरानने ॥ ३४ ॥ स चासुरः शङ्खचूडो बभूव तुलसीपतिः ॥ मच्छूलभिन्नकायेन गोलोकं वै जगाम सः ॥ ३५ ॥ राधा जगाम वाराहे गोकुलं भारतं सती ॥ वृषभानोश्च वैश्यस्य सा च कन्या बभूव ह ॥ ३६ ॥ अयोनिसम्भवा देवी वायुगर्भा कलावती ॥ सुषुवे मायया वायुं सा तत्राविर्बभूव ह ॥ ३७ ॥ अतीते द्वादशाब्दे तु दृष्ट्वा तां नवयौवनाम् ॥ सार्द्धं रायाणवैश्येन तत्सम्बन्धं चकार सः ॥ ३८ ॥ छायां संस्थाप्य तद्गेहे साऽन्तर्द्धानमवाप ह ॥ बभूव तस्य वैश्यस्य विवाहश्छायया सह ॥ ३९ ॥ गते चतुर्दशाब्दे तु कंसभीतेश्छलेन च ॥ जगाम गोकुलं कृष्णः शिशुरूपी जगत्पतिः ॥ ४० ॥ कृष्णमाता यशोदा या रायाणस्तत्सहोदरः ॥ गोलोके गोपकृष्णांशः सम्बन्धात्कृष्णमातुलः॥४१॥कृष्णेन सह राधायाः पुण्ये वृन्दावने वने ॥ विवाहं कारयामास विधिना जगतां विधिः॥४२॥ स्वप्ने राधापदाम्भोजं नहि पश्यन्ति बल्लवाः॥स्वयं राधा हरेः क्रोडे छाया रायाणमन्दिरे॥४३॥षष्टिवर्षसहस्राणि तपस्तेपे पुरा विधिः॥ राधिकाचरणाम्भोजदर्शनार्थी च पुष्करे ॥४४॥ भारावतरणे भूमेर्भारते नन्दगोकुले ॥ ददर्श तत्पदाम्भोजं तपसस्तत्फलेन च॥४५॥ किञ्चित्कालं स वै कृष्णः पुण्ये वृन्दावने वने ॥ रेमे गोलोकनाथश्च राधया सह भारते॥ ४६ ॥ ततः सुदामशापेन विच्छेदश्च बभूव ह ॥ तत्र भारावतरणं भूमेः कृष्णश्चकार सः ॥ ४७ ॥ शताब्दे समतीते तु तीर्थयात्राप्रसंगतः ॥ ददर्श कृष्णं सा राधा स च तां च परस्परम् ॥ ४८ ॥ ततो जगाम गोलोकं राधया सह तत्त्ववित् ॥ कलावती यशोदा च पर्यगाद्राधया सह ॥ ४९ ॥ वृषभानुश्च

नन्दश्च ययौ गोलोकमुत्तमम् ॥ सर्वे गोपाश्च गोप्यश्च ययुस्ता याः समागताः ॥ ५० ॥ छाया गोपाश्च गोप्यश्च प्रापुर्मुक्तिं च
सन्निधौ ॥ रेमिरे ताश्च तत्रैव सार्द्धं कृष्णेन पार्वति ॥ ५१ ॥ षट्त्रिंशल्लक्षकोटयश्च गोप्यो गोपाश्च तत्समाः ॥ गोलोकं प्रययुर्मुक्ताः
सार्धं कृष्णेन राधया ॥ ५२ ॥ द्रोणः प्रजापतिर्नन्दो यशोदा तत्प्रिया धरा ॥ संप्राप पूर्वतपसा परमात्मानमीश्वरम् ॥ ५३ ॥
वसुदेवः कश्यपश्च देवकी चादितिः सती ॥ देवमाता देवपिता प्रतिकल्पे स्वभावतः ॥ ५४ ॥ पितॄणां मानसी कन्या राधामाता
कलावती ॥ वसुदामापि गोलोकाद् वृषभानुः समाययौ ॥ ५५ ॥ इत्येवं कथितं दुर्गे राधिकाख्यानमुत्तमम् ॥ सम्पत्करं पापहरं
पुत्रपौत्रविवर्धनम् ॥ ५६ ॥ श्रीकृष्णश्च द्विधारूपो द्विभुजश्च चतुर्भुजः ॥ चतुर्भुजश्च वैकुण्ठे गोलोके द्विभुजः स्वयम् ॥ ५७ ॥
चतुर्भुजस्य पत्नी च महालक्ष्मीः सरस्वती ॥ गंगा च तुलसी चैव देव्यो नारायणप्रियाः ॥५८॥ श्रीकृष्णपत्नी सा राधा तदर्द्धाङ्गसमुद्भवा
॥ तेजसा वयसा साध्वी रूपेण च गुणेन च ॥ ५९ ॥ आदौ राधां समुच्चार्य पश्चात्कृष्णं वदेद् बुधः ॥ व्यतिक्रमे ब्रह्महत्यां
लभते नात्र संशयः ॥ ६० ॥ कार्त्तिकीपूर्णिमायां च गोलोके रासमण्डले ॥ चकार पूजां राधायास्तत्सम्बन्धिमहोत्सवम्
॥ ६१ ॥ सद्रत्नघुटिकायाश्च कृत्वा तत्कवचं हरिः ॥ दधार कण्ठे बाहौ च दक्षिणे सह गोपकैः ॥ ६२ ॥ कृत्वा ध्यानं च भक्त्या
च स्तोत्रमेतच्चकार सः ॥ राधाचर्वितताम्बूलं चखाद मधुसूदनः ॥ ६३ ॥ राधा पूज्या च कृष्णस्य तत्पूज्यो भगवान्प्रभुः ॥
परस्पराभीष्टदेवे भेदकृन्नरकं व्रजेत् ॥ ६४ ॥ द्वितीये पूजिता सा च धर्मेण ब्रह्मणा मया ॥ अनन्तवासुकिभ्यां च रविणा शशिना
पुरा ॥ ६५ ॥ महेन्द्रेण च रुद्रैश्च मनुना मानवेन च ॥ सुरेन्द्रैश्च मुनीन्द्रैश्च सर्वविश्वैश्च पूजिता ॥ ६६ ॥ तृतीये पूजिता सा च
सप्तद्वीपेश्वरेण च ॥ भारते च सुयज्ञेन पुत्रैर्मित्रैर्मुदाऽन्वितैः ॥ ६७ ॥ ब्राह्मणेनाभिशप्तेन दैवदोषेण भूभृता ॥ व्याधिग्रस्तेन हस्तेन
दुःखिना च विदूयता ॥ ६८ ॥ संप्राप राज्यं भ्रष्टश्रीः स च राधावरेण च ॥ स्तोत्रेण ब्रह्मदत्तेन स्तुत्वा च परमेश्वरीम् ॥ ६९ ॥
अभेद्यं कवचं तस्याः कण्ठे बाहौ दधार सः ॥ ध्यात्वा चकार पूजां च पुष्करे शतवत्सरान् ॥ ७० ॥ अन्ते जगाम गोलोकं रत्न

यानेन भूमिपः ॥ इति ते कथितं सर्वं किं भूयः श्रोतुमिच्छसि ॥ ७१ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादान्तर्गतहरगौरीसंवादे राधोपाख्याने राधायाः सुदामशापादिकथनं नामैकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥ पार्वत्युवाच ॥ को वा सुयज्ञो नृपतिः कुत्र वंशे बभूव सः ॥ कथं विप्राभिशप्तश्च कथं संप्राप राधिकाम् ॥ १ ॥ सर्वात्मनश्च कृष्णस्य पत्नीं श्रीकृष्णपूजिताम् ॥ कथं विण्मूत्रधारी च सिषेवे परमेश्वरीम् ॥ २ ॥ षष्टिवर्षसहस्राणि तपस्तेपे पुरा विधिः ॥ यत्पादाम्भोजरेणूनां लब्धये पुष्करे विभुः ॥ ३ ॥ कथं ददर्श तां देवीं महालक्ष्मीं पुरा सतीम् ॥ दुर्दर्शामपि युष्माकं दृश्या साऽभूत्कथं नृणाम् ॥ ४ ॥ कथं त्रिजगतां धाता तस्मै तत्कवचं ददौ ॥ ध्यानं पूजाविधिं स्तोत्रं तस्या व्याख्यातुमर्हसि ॥ ५ ॥ श्रीमहादेव उवाच ॥ स्वायम्भुवो मनुर्देवि मनूनामादिरेव च ॥ ब्रह्मात्मजस्तपस्वी च शतरूपापतिः प्रभुः ॥६॥ उत्तानपादस्तत्पुत्रस्तत्पुत्रो ध्रुव एव च ॥ ध्रुवस्य कीर्तिर्विख्यातस्त्रैलोक्ये शैलकन्यके ॥७॥ उत्कलस्तस्य पुत्रश्च नारायणपरायणः ॥ सहस्रं राजसूयानां पुष्करे स चकार ह ॥ ८ ॥ सर्वाणि रत्नपात्राणि ब्राह्मणेभ्यो ददौ मुदा ॥ अमूल्यरत्नराशीनां सहस्रं तेजसा वृतम् ॥ ९ ॥ ब्राह्मणेभ्यो ददौ राजा यज्ञान्ते स महोत्सवे ॥ दृष्ट्वा तच्छोभनं यज्ञं विधाता जगतां प्रिये ॥ १० ॥ सुयज्ञं नाम नृपतिं चकार सुरसंसदि ॥ स च राजा सुयज्ञश्च मनुवंशसमुद्भवः ॥ ११ ॥ अन्नदाता रत्नदाता दाता वै सर्वसम्पदाम् ॥ दशलक्षं गवां चैव रत्नशृङ्गपरिच्छदम् ॥ १२ ॥ नित्यं ददौ स विप्रेभ्यो मुदा युक्तः सदक्षिणम् ॥ गवां द्वादशलक्षाणां ददौ नित्यं मुदाऽन्वितः ॥ १३ ॥ सुपक्वानि च मांसानि ब्राह्मणेभ्यश्च पार्वति ॥ षट्कोटीर्ब्राह्मणानां च भोजयामास नित्यशः ॥ १४ ॥ चोष्यैश्चव्यैर्लेह्यपेयैरतितृप्तं दिने दिने ॥ विप्रलक्षं सूपकारं भोजयामास तत्परम् ॥ १५ ॥ पूर्णमन्नं च सूपाक्तं सगव्यं मांसवर्जितम् ॥ विप्रा भोजनकाले च मनुवंशसमुद्भवम् ॥ १६ ॥ न तुष्टुवुः सुयज्ञं च तुष्टुवुस्तर्पितृंश्च ते ॥ दिने सुयज्ञयज्ञान्ते षट्त्रिंशल्लक्षकोटयः ॥ १७ ॥ चक्रुः सुभोजनं विप्राश्चातितृप्ताश्च सुन्दरि ॥ गृहीतानि च रत्नानि स्वगृहं वोढुमक्षमाः ॥ १८ ॥ वृषलेभ्यो ददुः किञ्चित्किञ्चित्पथि च तत्यजुः ॥ विप्राणां भोज

नान्ते च विप्रान्येभ्यो ददौ नृपः ॥ १९ ॥ तथाप्युर्वरितं तत्र चान्नराशिसहस्रकम् ॥ कृत्वा यज्ञं महाबाहुः समुवास स्वसंसदि ॥
॥ २० ॥ रत्नेन्द्रसारसंक्लृप्तच्छत्रकोटिसमन्विते ॥ रत्नसिंहासने रम्ये पट्टवस्त्रैः सुसंस्कृते ॥ २१ ॥ चन्दनादिसुसंसृष्टे रम्ये चन्दन
पल्लवैः ॥ शाखायुक्तैः पूर्णकुम्भै रम्भावृक्षैश्च शोभिते ॥ २२ ॥ चन्दनागुरुकस्तूरीघनसिन्दूरसंस्कृते ॥ वसुवासवचन्द्रेन्द्ररुद्रादित्य
समन्विते ॥ २३ ॥ मुनिनारदमन्वादिब्रह्मविष्णुशिवान्विते ॥ एतस्मिन्नन्तरे तत्र विप्र एकः समाययौ ॥ २४ ॥ रूक्षो मलिनवा
साश्च शुष्ककण्ठौष्ठतालुकः ॥ रत्नसिंहासनस्थं च माल्यचन्दनचर्चितम् ॥ २५ ॥ राजानमाशिषं चक्रे सस्मितः सम्पुटाञ्जलिः ॥
प्रणनाम नृपस्तं च नोत्तस्थौ किंचिदेव हि ॥२६॥ सभासदश्च नोत्तस्थुर्जहसुः स्वल्पमेव च ॥ मुनिभ्योऽपि च देवेभ्यो नमस्कृत्य
द्विजोत्तमः ॥ २७ ॥ शशाप नृपतिं क्रोधात्तत्रातिष्ठन्निरंकुशः ॥ गच्छ दूरमतो राज्याद्भ्रष्टश्रीर्भव पामर ॥ २८ ॥ भवाचिरं गल
त्कुष्ठी बुद्धिहीनोऽप्युपद्रुतः ॥ इत्युक्त्वा कम्पितः क्रोधात्सभास्थाञ्छप्तुमुद्यतः ॥ २९ ॥ ये यत्र जहसुः सर्वे समुत्तस्थुः सभासदः ॥
सर्वे चक्रुः प्रणामं ते क्रोधं तत्याज वाडवः ॥ ३० ॥ प्रणम्यागत्य राजा तं रुरोद भयकातरः ॥ निस्ससार सभामध्याद्धृदयेन विदू
यता ॥ ३१ ॥ ब्राह्मणो गूढरूपी च प्रज्वलन्ब्रह्मतेजसा ॥ तत्पश्चान्मुनयः सर्वे प्रययुर्भयकातराः ॥ ३२ ॥ हे विप्र तिष्ठ तिष्ठेति
समुच्चार्य्य पुनः पुनः ॥ पुलहश्च पुलस्त्यश्च प्रचेता भृगुरंगिराः ॥ ३३ ॥ मरीचिः कश्यपश्चैव वसिष्ठः क्रतुरेव च ॥ शुक्रो बृहस्पति
श्चैव दुर्वासा लोमशस्तथा ॥ ३४ ॥ गौतमश्च कणादश्च कण्वः कात्यायनः कठः ॥ पाणिनिर्जाजलिश्चैव ऋष्यशृंगो विभा
ण्डकः ॥ ३५ ॥ तैत्तिरिश्चाप्यापिशलिर्मार्कण्डेयो महातपाः ॥ सनकश्च सनन्दश्च वोढुः पैलः सनातनः ॥ ३६ ॥ सनत्कुमारो
भगवान्नरनारायणावृषी ॥ पराशरो जरत्कारुः संवर्त्तः करभस्तथा ॥ ३७ ॥ भरद्वाजश्च वाल्मीकिरौर्वश्च च्यवनस्तथा ॥ अगस्त्यो
ऽत्रिरुतथ्यश्च सङ्कर्ताऽऽस्तीक आसुरिः ॥ ३८ ॥ शिलालिर्लाङ्गलिश्चैव शाकल्यः शाकटायनः ॥ गर्गो वत्सः पञ्चशिखो जमदग्निश्च
देवलः ॥ ३९ ॥ जैगीषव्यो वामदेवो वालखिल्यादयस्तथा ॥ शक्तिर्दक्षः कर्दमश्च प्रस्कन्नः कपिलस्तथा ॥ ४० ॥ विश्वामित्रश्च

कौत्सश्चाप्यृचीकोऽप्यघमर्षणः ॥ एते चान्ये च मुनयः पितरोऽग्निर्हरिप्रिया[1] ॥४१॥ दिक्पाला देवताः सर्वा विप्रं पश्चात्समाययुः॥
ब्राह्मणं बोधयामासुर्वासयामासुरीश्वरि ॥ ४२ ॥ समूचुस्तं क्रमेणैव नीतिं नीतिविशारदाः ॥ ४३ ॥ इति श्रीब्रह्मवैवर्त्ते महापु
राणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादान्तर्गतहरगौरीसंवादे राधोपाख्याने सुयज्ञोपाख्यानं नाम पञ्चाशत्तमोऽध्यायः ॥५०॥
श्रीपार्वत्युवाच ॥ किमूचुर्ब्राह्मणं ब्रह्मन्ब्राह्मणा ब्रह्मणः सुताः ॥ नीतिज्ञा नीतिवचनं तन्मां व्याख्यातुमर्हसि ॥ १ ॥ श्रीमहादेव
उवाच ॥ सन्तोष्य तं ब्राह्मणं च स्तवेन विनयेन च ॥ क्रमेण वक्तुमारेभे मुनिसंघो वरानने ॥ २ ॥ सनत्कुमार उवाच ॥ त्वत्प
श्चादागता लक्ष्मीः कीर्त्तिः सत्त्वं यशस्तथा ॥ सुशीलं च महैश्वर्यं पितरोऽग्निः सुरास्तथा ॥ ३ ॥ आगता नृपगेहेभ्यः कृत्वा भ्रष्ट
श्रियं नृपम् ॥ भव तुष्टो द्विजश्रेष्ठ चाशुतोषश्च वाडवः ॥४॥ ब्राह्मणानां तु हृदयं कोमलं नवनीतवत् ॥ शुद्धं सुनिर्मलं चैव मार्जितं
तपसा मुने ॥ ५ ॥ क्षमस्वागच्छ विप्रेन्द्र शुद्धं कुरु नृपालयम् ॥ आशिषं कुरु तस्मै त्वं पवित्रपदरेणुना ॥६॥ भृगुरुवाच ॥ अति
थिर्यस्य भग्नाशो गृहात्प्रतिनिवर्त्तते ॥ पितरस्तस्य देवाश्च वह्निश्चैव तथैव च ॥ ७ ॥ निराशाः प्रतिगच्छन्ति चातिथेरप्रतिग्रहात्॥
क्षमस्वागच्छ विप्रेन्द्र शुद्धं कुरु नृपालयम् ॥ ८ ॥ स्त्रीघ्नैर्गोघ्नैः कृतघ्नैश्च ब्रह्मघ्नैर्गुरुतल्पगैः ॥ तुल्यदोषो भवत्येतैर्यस्यातिथिर
नर्चितः ॥ ९ ॥ पुलस्त्य उवाच ॥ पश्यन्ति ये वक्रदृष्ट्या चातिथिं गृहमागतम् ॥ दत्त्वा स्वपापं तस्मै तत्पुण्य
मादाय गच्छति ॥ १० ॥ क्षमस्व नृपदोषं च गच्छ वत्स यथासुखम् ॥ राजा स्वकर्मदोषेण नोत्तस्थौ तत्क्षमां
कुरु ॥ ११ ॥ पुलह उवाच ॥ राजश्रिया विद्यया वा ब्राह्मणं योऽवमन्यते ॥ विप्रस्त्रिसन्ध्याहीनो यः श्रीहीनः
क्षत्रियो भवेत् ॥ १२ ॥ एकादशीविहीनश्च विष्णुनैवेद्यवञ्चितः ॥ क्षमस्वागच्छ विप्रेन्द्र शुद्धं कुरु नृपालयम् ॥ १३ ॥ क्रतुरु
वाच ॥ ब्राह्मणः क्षत्रियो वाऽपि वैश्यो वा शूद्र एव च ॥ दीक्षाहीनो भवेत्सोऽपि ब्राह्मणं योऽवमन्यते ॥ १४ ॥ धनहीनः पुत्रहीनो

---

[1] हविःप्रियाः इति पाठः ।

भार्य्याहीनो भवेद्ध्रुवम् ॥ क्षमस्वागच्छ भगवञ्छुद्धं कुरु नृपालयम् ॥ १५ ॥ अङ्गिरा उवाच ॥ ज्ञानवान्ब्राह्मणो भूत्वा ब्राह्मणं योऽवमन्यते॥वृषवाहो भवेत्सोऽपि भारते सप्तजन्मसु॥१६॥मरीचिरुवाच॥ पुण्यक्षेत्रे भारते च देवं च ब्राह्मणं गुरुम्॥विष्णुभक्तिविहीनश्च स भवेद्योऽवमन्यते ॥ १७ ॥ कश्यप उवाच ॥ वैष्णवं ब्राह्मणं दृष्ट्वा योऽसत्यमवमन्यते ॥ विष्णुमन्त्रविहीनश्च तत्पूजाविरतो भवेत् ॥१८॥ प्रचेता उवाच ॥ अतिथिं ब्राह्मणं दृष्ट्वा नाभ्युत्थानं करोति यः ॥ पितृभक्तिविहीनस्स्यात्स भवेद्भारते भुवि॥१९॥ प्राप्नोति कौञ्जरीं योनिं स मूढः सप्तजन्मसु ॥ शीघ्रं गच्छ द्विजश्रेष्ठ राज्ञे देह्याशिषश्शुभाः ॥२०॥ दुर्वासा उवाच ॥ गुरुं वा ब्राह्मणं वाऽपि देवताप्रतिमामपि ॥ दृष्ट्वा शीघ्रं न प्रणमेत्स भवेत्सूकरो भुवि ॥२१॥ मिथ्यासाक्षी च भवति तथा विश्वासघातकः ॥ क्षमस्व सर्वमस्माकमातिथ्यग्रहणं कुरु ॥ २२ ॥ राजोवाच ॥ छलेन कथितो धर्मो युष्माभिर्मुनिपुङ्गवैः ॥ सर्वं कृत्वा च विस्पष्टं मां मूढं बोधयन्त्वहो ॥ २३ ॥ स्त्रीघ्नगोघ्नकृतघ्नानां गुरुस्त्रीगामिनां तथा ॥ ब्रह्मघ्नानां च को दोषो ब्रूत मां योगिनां वराः ॥ २४ ॥ वसिष्ठ उवाच ॥ कामतो गोवधे राजन्वर्षं तीर्थं भ्रमेन्नरः ॥ यवयावकभोजी च करेण च जलं पिबेत् ॥ २५ ॥ तदा धेनुशतं दिव्यं ब्राह्मणेभ्यः सदक्षिणम् ॥ दत्त्वा मुञ्चति पापाच्च भोजयित्वा शतं द्विजान् ॥ २६ ॥ प्रायश्चित्ते तु वै चीर्णे सर्वपापान्न मुच्यते ॥ पापावशेषाद्भवति दुःखी चाण्डाल एव च ॥ २७ ॥ आतिदेशिकहत्यायां तदर्धं फलमश्नुते ॥ प्रायश्चित्तानुकल्पेन सर्वपापान्न मुच्यते॥ ॥ २८ ॥ शुक्र उवाच ॥ गोहत्याद्विगुणं पापं स्त्रीहत्यायां भवेद्ध्रुवम् ॥ षष्टिवर्षसहस्राणि कालसूत्रे वसेद्ध्रुवम् ॥ २९ ॥ ततो भवेन्महापापी सूकरः सप्तजन्मसु ॥ ततो भवति सर्पश्च सप्तजन्मन्यतः शुचिः ॥ ३० ॥ बृहस्पतिरुवाच ॥ स्त्रीहत्याद्विगुणं पापं ब्रह्महत्याकृतो भवेत् ॥ लक्षवर्षं महाघोरे कुम्भीपाके वसेद्ध्रुवम्॥ ३१ ॥ ततो भवेन्महापापी विष्ठाकीटः शताब्दकम्॥ ततो भवति सर्पश्च सप्तजन्मन्यतः शुचिः ॥ ३२ ॥ गौतम उवाच ॥ दोषः कृतघ्ने राजेन्द्र ब्रह्महत्याचतुर्गुणः ॥ निष्कृतिर्नास्ति वेदोक्ता कृतघ्नानां च निश्चितम् ॥ ३३ ॥ राजोवाच ॥ लक्षणं च कृतघ्नानां वद वेदविदां वर ॥ कृतघ्नः कतिधा प्रोक्तः केषु को दोष एव च॥३४॥

ऋष्यशृङ्ग उवाच ॥ कृतघ्नाः षोडशविधाः सामवेदे निरूपिताः ॥ सर्वः प्रत्येकदोषेण प्रत्येकं फलमश्नुते ॥ ३५ ॥
कृते सत्ये च पुण्ये च स्वधर्मे तपसि स्थिते ॥ प्रतिज्ञायां च दाने च स्वगोष्ठीपरिपालने ॥ ३६ ॥ गुरुकृत्ये देवकृत्ये काम्यकृत्ये
द्विजार्चने ॥ नित्यकृत्ये च विश्वासे परधर्मप्रदानयोः ॥ ३७ ॥ एतान्यो हन्ति पापिष्ठः स कृतघ्न इति स्मृतः ॥ एतेषां सन्ति
लोकाश्च तज्जन्म भिन्नयोनिषु ॥ ३८ ॥ यान्यांश्च नरकांस्ते च यान्ति राजेन्द्र पापिनः ॥ ते ते च नरकाः सन्ति यमलोके सुनि
श्चितम् ॥३९॥ सुयज्ञ उवाच॥ के किं कृत्वा कृतघ्नाश्च कांस्कान्गच्छन्ति रौरवान् ॥ प्रत्येकं श्रोतुमिच्छामि वक्तुमर्हसि मे प्रभो॥
॥ ४० ॥ कात्यायन उवाच ॥ कृत्वा शपथरूपं च सत्यं हन्ति न पालयेत् ॥ स कृतघ्नः कालसूत्रे वसेदेव चतुर्युगम् ॥ ४१ ॥
सप्तजन्मसु काकश्च सप्तजन्मसु पेचकः ॥ ततः शूद्रो महाव्याधिः सप्तजन्मस्वतः शुचिः ॥ ४२ ॥ श्रीसनन्दन उवाच ॥ पुण्यं
कृत्वा वदत्येव कीर्तिवर्द्धनहेतुना ॥ स कृतघ्नस्तप्तसूर्म्यां वसत्येव युगत्रयम् ॥ ४३ ॥ पञ्चजन्मसु मण्डूकस्त्रिषु जन्मसु कर्कटः ॥
तदा मूको महाव्याधिर्दरिद्रश्च ततः शुचिः ॥ ४४ ॥ सनातन उवाच ॥ स्वधर्मं हन्ति यो विप्रः सन्ध्यात्रयविवर्जितः ॥ अतर्पयंश्च
यः स्नाति विष्णुनैवेद्यवर्जितः ॥ ४५ ॥ विष्णुपूजाविहीनश्च विष्णुमन्त्रविहीनकः ॥ एकादशीविहीनः श्रीकृष्णजन्मदिने तदा ॥
॥ ४६ ॥ शिवरात्रौ च यो भुङ्क्ते श्रीरामनवमीदिने ॥ पितृकृत्यादिहीनो यः स कृतघ्न इति स्मृतः ॥ ४७ ॥ कुम्भीपाके वसत्येवं
यावदिन्द्राश्चतुर्दश ॥ ततश्चाण्डालतां याति सप्तजन्मसु निश्चितम् ॥ ४८ ॥ शतजन्मनि गृध्रश्च शतजन्मनि सूकरः ॥ ततो
भवेद्ब्राह्मणश्च शूद्राणां सूपकारकः ॥ ४९ ॥ ततो भवेज्जन्म सप्त ब्राह्मणो वृषवाहकः ॥ शूद्राणां शवदाही च भवेत्सप्तसु जन्मसु ॥
॥ ५० ॥ द्विजो भूत्वा सप्तजनौ भारते वृषलीपतिः ॥ भुक्त्वा स्वभोगलेशं च भ्रमित्वा याति रौरवम् ॥ ५१ ॥ पुनः
पुनः पापयोनिं नरकं च पुनः पुनः ॥ ततो भवेद्दर्दभश्च मार्जारः पञ्चजन्मसु ॥ ५२ ॥ पञ्चजन्मसु मण्डूको भवे
च्छुछुन्दरस्ततः क्रमात्॥५३॥सुयज्ञ उवाच ॥ शूद्राणां सूपकरणे शूद्राणां शवदाहने ॥ शूद्रान्नभोजने वाऽपि शूद्रस्त्रीगमनेऽपि च॥५४॥

ब्राह्मणानां च को दोषो वृषाणां वाहने तथा ॥ एतान्सर्वान्समालोच्य ब्रूहि मां निश्चयं मुने ॥ ५५ ॥ पराशर उवाच ॥ शूद्राणां सूपकारश्च यो विप्रो ज्ञानदुर्बलः ॥ असिपत्रे वसत्येव युगानामेकसप्ततिः ॥ ५६ ॥ ततो भवेद्दर्दभश्च मूषिकः सप्तजन्मसु॥ तैलकीटस्सप्तजन्मस्वतः शुद्धो भवेन्नरः ॥ ५७ ॥ जरत्कारुरुवाच ॥ भृत्यद्वारा स्वयं वाऽपि यो विप्रो वृषवाहकः ॥ स कृतघ्न इति ख्यातः प्रसिद्धो भारते नृप ॥ ५८ ॥ ब्रह्महत्यासमं पापं तन्नित्यं वृषताडने ॥ वृषपृष्ठे भारदानात्पापं तद्द्विगुणं भवेत् ॥ ५९ ॥ सूर्य्यातपे वाहयेद्यः क्षुधितं तृषितं वृषम् ॥ ब्रह्महत्याशतं पापं लभते नात्र संशयः ॥ ६० ॥ अन्नं विष्ठा जलं मूत्रं विप्राणां वृषवाहिनाम् ॥ नाधिकारो भवेत्तेषां पितृदेवार्चने नृप ॥ ६१ ॥ लालाकुण्डे वसत्येव यावच्चन्द्रदिवाकरौ ॥ विष्ठाभक्ष्यं मूत्रजलं तत्र तस्य भवेद्ध्रुवम् ॥ ६२ ॥ त्रिसन्ध्यं ताडयेत्तं च शूलेन यमकिङ्करः ॥ उल्कां ददाति मुखतः सूच्या कृन्तति सन्ततम् ॥६३॥ षष्टिवर्षसहस्राणि विष्ठायां च कृमिर्भवेत् ॥ ततः काकः पञ्चजन्मस्वथैवं बक एव च ॥ ६४ ॥ पञ्चजन्मसु गृध्रश्च शृगालः सप्तजन्मसु ॥ ततो दरिद्रः शूद्रश्च महाव्याधिस्ततः शुचिः ॥ ६५ ॥ भारद्वाज उवाच ॥ शूद्राणां शवदाही यः स कृतघ्न इति स्मृतः ॥ वयःप्रमाणां राजेन्द्र ब्रह्महत्यां लभेद्ध्रुवम् ॥ ६६ ॥ तत्तुल्ययोनिभ्रमणात्तत्तुल्यनरकाच्छुचिः ॥ यो दोषो ब्राह्मणानां च शूद्राणां शवदाहने ॥ ६७ ॥ तावदेव भवेद्दोषः शूद्रश्राद्धान्नभोजने ॥ ६८ ॥ विभाण्डक उवाच ॥ पितृश्राद्धे च शूद्राणां भुङ्क्ते यो ब्राह्मणोऽधमः॥ सुरापीती ब्रह्मघाती पितृदेवार्चनाद्बहिः ॥ ६९ ॥ मार्कण्डेय उवाच ॥ यो दोषो ब्राह्मणानां च शूद्रस्त्रीगमने नृप ॥ अहं वक्ष्यामि वेदोक्तं सावधानं निशामय ॥७०॥ कृतघ्नानां प्रधानश्च यो विप्रो वृषलीपतिः ॥ कृमिदंष्ट्रे वसेत्सोऽपि यावदिन्द्राश्चतुर्दश॥७१॥ कृमिभक्ष्यो भवेद्विप्रो विह्वलो यमकिङ्करैः ॥ प्रतिमां तां तप्तलौहीमाश्लेषयति नित्यशः ॥ ७२ ॥ ततश्च पुंश्चलीयोनौ कृमिर्भवति निश्चितम् ॥ एवं वर्षसहस्रं च ततः शूद्रस्ततः शुचिः ॥ ७३ ॥ सुयज्ञ उवाच ॥ अन्येषां च कृतघ्नानां वद कर्मफलं मुने ॥ श्लाघ्यो

---

१ विद्धश्चेति पाठः ।

मे ब्राह्मशापश्च कस्य सम्पद्विनाऽऽपदम् ॥ ७४ ॥ धन्योऽहं कृतकृत्योऽहं सफलं जीवनं मम ॥ आगतास्तु यतो मुक्ता मद्गेहे मुनयः
सुराः ॥ ७५ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वि० प्र० नारदनारायणसंवादान्तर्गतहरगौरीसंवादे नृपमुनिसंवादे राधोपाख्याने
कर्मविपाको नामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥ श्रीपार्वत्युवाच ॥ अन्येषां च कृतघ्नानां यद्यत्कर्मफलं प्रभो ॥ तेषां किमूचुर्मुनयो
वेदवेदाङ्गपारगाः ॥ १ ॥ श्रीमहेश्वर उवाच ॥ प्रश्नं कुर्वति राजेन्द्रे सर्वेषु मुनिषु प्रिये ॥ तत्र प्रवक्तुमारेभे ऋषिर्नारायणो महान्
॥ २ ॥ श्रीनारायण उवाच ॥ स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः ॥ स कृतघ्न इति ज्ञेयः फलं च शृणु भूमिप ॥ ३ ॥ यावन्तो
रेणवः सिक्ता विप्राणां नेत्रबिन्दुभिः ॥ तावद्वर्षसहस्रं च शूलपोते स तिष्ठति ॥ ४ ॥ तप्ताङ्गारं च तद्भक्ष्यं पानं वै तप्तमूत्रकम् ॥
तप्ताङ्गारे च शयनं ताडितो यमकिङ्करैः ॥ ५ ॥ तदन्ते च महापापी विष्ठायां जायते कृमिः ॥ षष्टिवर्षसहस्राणि देवमानेन भारते
॥ ६ ॥ ततो भवेद्भूमिहीनः प्रजाहीनश्च मानवः ॥ दरिद्रः कृपणो रोगी शूद्रो निन्द्यस्ततः शुचिः ॥७॥ नारद उवाच ॥ हन्ति यः
परकीर्त्तिं च स्वकीर्त्तिं वा नराधमः॥स कृतघ्न इति ख्यातस्तत्फलं च निशामय ॥ ८ ॥ अन्धकूपे वसेत्सोऽपि यावदिन्द्राश्चतुर्दश॥
कीटैर्नकुलगृध्रैश्च भक्षितः सततं नृप ॥ ९ ॥ तप्तक्षारोदकं पापी नित्यं पिबति वै ततः ॥ सप्तजन्मस्वतः सर्पः काकः पञ्चस्वतः
शुचिः ॥ १० ॥ देवल उवाच ॥ ब्रह्मस्वं वा गुरुस्वं वा देवस्वं वाऽपि यो हरेत् ॥ स कृतघ्न इति ज्ञेयो महापापी च भारते॥११॥
अवटोदे वसेत्सोऽपि यावदिन्द्राश्चतुर्दश ॥ ततो भवेत्सुरापी स ततः शूद्रस्ततः शुचिः ॥ १२ ॥ जैगीषव्य उवाच ॥ पितृमातृगुरूं
श्चापि भक्तिहीनो न पालयेत् ॥ वाचाऽपि ताडयेत्तांश्च स कृतघ्न इति स्मृतः ॥ वाचा च ताडयेन्नित्यं स्वामिनं कुलटा च या
॥ १३ ॥ सा कृतघ्नीति विख्याता भारते पापिनी वरा ॥ वह्निकुण्डं महाघोरं तौ प्रयातस्सुनिश्चितम् ॥ १४ ॥ तत्र वह्नौ वसत्येव
यावच्चन्द्रदिवाकरौ ॥ ततो भवेज्जलौकाश्च सप्तजन्मस्वतः शुचिः ॥ १५ ॥ वाल्मीकिरुवाच ॥यथा तरुषु वृक्षत्वं सर्वत्र न जहाति
च ॥ तथा कृतघ्नता राजन्सर्वपापेषु वर्त्तते ॥ १६ ॥ मिथ्यासाक्ष्यं यो ददाति कामात्क्रोधात्तथा भयात् ॥ सभायां पाक्षिकं वक्ति

स कृतघ्न इति स्मृतः ॥ १७ ॥ पुण्यमात्रं चापि राजन्यो हन्ति स कृतघ्नकः ॥ सर्वत्रापि च सर्वेषां पुण्यहानौ कृतघ्नता ॥ १८ ॥
मिथ्यासाक्ष्यं पाक्षिकं वा भारते वक्ति यो नृप ॥ यावदिन्द्रसहस्रं च सर्पकुण्डे वसेद्ध्रुवम् ॥ १९ ॥ सन्ततं वेष्टितः
सर्पैर्भीतो वै भक्षितस्तथा ॥ भुङ्क्ते च सर्वविण्मूत्रं यमदूतेन ताडितः ॥ २० ॥ कृकलासो भवेत्तत्र भारते सप्तजन्मसु ॥ सप्तजन्मसु
मण्डूकः पितृभिः सप्तभिः सह ॥ २१ ॥ ततो भवेद्वै वृक्षश्च महारण्ये तु शालमलिः ॥ ततो भवेन्नरो मूकस्ततः शूद्रस्ततः शुचिः
॥ २२ ॥ आस्तीक उवाच ॥ गुर्वङ्गनानां गमने मातृगामी भवेन्नरः ॥ नराणां मातृगमने प्रायश्चित्तं न विद्यते ॥ २३ ॥ भारते च नृप
श्रेष्ठ यो दोषो मातृगामिनाम् ॥ ब्राह्मणीगमने चैव शूद्राणां तावदेव हि ॥ २४ ॥ ब्राह्मण्यास्तावदेव स्याद्दोषः शूद्रेण मैथुने ॥
कन्यानां पुत्रपत्नीनां श्वश्रूणां गमने तथा ॥ २५ ॥ सगर्भभ्रातृपत्नीनां भगिनीनां तथैव च ॥ दोषं वक्ष्यामि राजेन्द्र यदाह कम
लोद्भवः ॥ २६ ॥ यः करोति महापापी चैताभिः सह मैथुनम् ॥ जीवन्मृतो भवेत्सोऽपि चण्डालोऽस्पृश्य एव च ॥ २७ ॥ नाधि
कारो भवेत्तस्य सूर्य्यमण्डलदर्शने ॥ शालग्रामं तज्जलं च तुलस्याश्च दलं जलम् ॥ २८ ॥ सर्वतीर्थजलं चैव विप्रपादोदकं तथा ॥
स्प्रष्टुं च नैव शक्नोति विट्तुल्यः पातकी नरः ॥ २९ ॥ देवं गुरुं ब्राह्मणं च नमस्कर्त्तुं न चार्हति ॥ विष्ठाधिकं तदन्नं च जलं मूत्रा
धिकं तथा ॥ ३० ॥ देवताः पितरो विप्रा नैव गृह्णन्ति भारते ॥ भवेत्तदङ्गवातेन तीर्थमङ्गारवाहनम् ॥ ३१ ॥ सप्तरात्रं ह्युपवसे
दैवस्पर्शात्तथा द्विजः ॥ भारक्रान्ता च पृथिवी तद्भारं वोढुमक्षमा ॥ ३२ ॥ तत्पापात्पतितो देशः कन्याविक्रयिणो यथा ॥ तत्स्प
र्शाच्च तदालापाच्छयनाश्रयभोजनात् ॥ ३३ ॥ नृणां च तत्समं पापं भवत्येव न संशयः ॥ कुम्भीपाके वसेत्सोऽपि यावद्वै ब्रह्मणः
शतम् ॥ ३४ ॥ दिवानिशं भ्रमेत्तत्र चक्रावर्त्ते निरन्तरम् ॥ दग्धो वाऽग्निशिखाभिश्च यमदूतैश्च ताडितः ॥ ३५ ॥ एवं नित्यं महा
पापी भुङ्क्ते निरययातनाम् ॥ विष्ठाहारश्च सर्वत्र कुम्भीपाकेऽथ पातितः ॥ ३६ ॥ गते प्राकृतिके घोरे महति प्रलये तथा ॥ पुनः
सृष्टेः समारम्भे तद्विधो वा भवेत्पुनः ॥ ३७ ॥ षष्टिवर्षसहस्राणि विष्ठायां च कृमिर्भवेत् ॥ ततो भवति चण्डालो भार्य्याहीनो

नपुंसकः ॥३८॥ सप्तजन्मसु शूद्रश्च गलत्कुष्ठी नपुंसकः ॥ ततो भवेद्ब्राह्मणश्चाप्यन्धः कुष्ठी नपुंसकः॥३९॥ लब्ध्वैवं सप्त जन्मानि
महापापी भवेच्छुचिः ॥ ४० ॥ मुनय ऊचुः॥इत्येवं कथितं सर्वमस्माभिर्नो यथागमम् ॥ एभिस्तुल्यो भवेद्दोषोऽप्यतिथीनां पराभवे
॥४१॥प्रणामं कुरु विप्रेन्द्रं गृहं प्रापय निश्चितम् ॥ संपूज्य ब्राह्मणं यत्नाद्गृहीत्वा ब्राह्मणाशिषम् ॥४२॥ वनं गच्छ महाराज तपस्यां
कुरु सत्वरम्॥ब्रह्मशापैर्विनिर्मुक्तः पुनरेवागमिष्यसि॥४३॥इत्युक्त्वा मुनयः सर्वे ययुस्तूर्णं स्वमन्दिरम्॥सुराश्चापि च राजानो बन्धु
वर्गाश्च पार्वति ॥ ४४ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादान्तर्गतहरगौरीसंवादे राधोपा
ख्याने सुयज्ञोपाख्याने कर्मविपाको नाम द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥ श्रीपार्वत्युवाच ॥ गतेषु मुनिसंघेषु श्रुत्वा कर्मफलं
नृणाम् ॥ किं चकार नृपश्रेष्ठो ब्रह्मशापेन विह्वलः ॥ १ ॥ अतिथिर्ब्राह्मणो वाऽपि किं चकार तदा प्रभो ॥ जगाम नृपगेहं वा न
वा तद्वक्तुमर्हसि ॥ २ ॥ महेश्वर उवाच ॥ गतेषु मुनिसंघेषु निन्दाग्रस्तो नराधिपः ॥ प्रेरितश्च वसिष्ठेन धर्मिष्ठेन पुरोधसा ॥
॥ ३ ॥ पपात दण्डवद्भूमौ पादयोर्ब्राह्मणस्य च ॥त्यक्त्वा मन्युं द्विजश्रेष्ठो ददौ तस्मै शुभाशिषम् ॥ ४ ॥ सस्मितं ब्राह्मणं दृष्ट्वा
त्यक्तमन्युं कृपामयम् ॥ उवाच नृपतिश्रेष्ठः साश्रुनेत्रः कृताञ्जलिः ॥ ५ ॥ राजोवाच ॥ कुत्र वंशे भवाञ्जातः किं नाम भवतः
प्रभो ॥ किंनामा वाऽपि तद्ब्रूहि क्व वासः कथमागतः ॥६॥ विप्ररूपी स्वयं विष्णुर्गूढः कपटमानुषः ॥ साक्षात्स मूर्तिमानग्निः प्रज्व
लन्ब्रह्मतेजसा ॥ ७ ॥ को वा गुरुस्ते भगवन्निष्टदेवश्च भारते ॥ तव वेषः कथमयं ज्ञानपूर्णस्य साम्प्रतम् ॥८॥ गृहाण राज्यं निखि
लमैश्वर्य्यं कोशमेव च ॥ स्वभृत्यं कुरु मे पुत्रं मां च दासीं स्त्रियं मुने ॥ ९ ॥ सप्तसागरसंयुक्तां सप्तद्वीपां वसुन्धराम् ॥ अष्टादशो
पद्वीपाढ्यां सशैलवनशोभिताम् ॥ १० ॥ मया भृत्येन शाधि त्वं राजेन्द्रो भव भारते ॥ रत्नेन्द्रसारखचिते तिष्ठ सिंहासने वरे ॥
॥ ११ ॥ नृपस्य वचनं श्रुत्वा जहास मुनिपुङ्गवः ॥ उवाच परमं तत्त्वमज्ञातं सर्वदुर्लभम् ॥ १२ ॥ अतिथिरुवाच ॥ मरीचिर्ब्रह्मणः
पुत्रस्तत्पुत्रः कश्यपः स्वयम् ॥ कश्यपस्य सुताः सर्वे प्राप्ता देवत्वमीप्सितम्॥१३॥तेषु त्वष्टा महाज्ञानी चकार परमं तपः ॥ दिव्यं

वर्षसहस्रं च पुष्करे दुष्करं तपः॥१४॥सिषेवे ब्राह्मणार्थं च देवदेवं हरिं परम्॥ नारायणाद्वरं प्राप विप्रं तेजस्विनं सुतम् ॥१५॥ ततो बभूव तेजस्वी विश्वरूपस्तपोधनः॥पुरोधसं चकारेन्द्रो वाक्पतौ तं क्रुधा गते॥१६॥मातामहेभ्यो दैत्येभ्यो दत्तवन्तं घृताहुतिम् ॥ चिच्छेद तं शुनासीरो ब्राह्मणं मातुराज्ञया॥१७॥विश्वरूपस्य तनयो विरूपो मत्पिता[१] नृप ॥ अहं च सुतपा नाम विरागी कश्यपो द्विजः ॥१८॥ महादेवो मम गुरुर्विद्याज्ञानमनुप्रदः ॥ अभीष्टदेवः सर्वात्मा श्रीकृष्णः प्रकृतेः परः ॥ १९ ॥ तच्चिन्तयामि पादाब्जं न मे वाञ्छाऽस्ति सम्पदि ॥ सालोक्यसार्ष्टिसारूप्यसामीप्यं राधिकापतेः ॥२०॥ तेन दत्तं न गृह्णामि विना तत्सेवनं शुभम् ॥ ब्रह्मत्वममरत्वं वा मन्येऽहं जलबिम्बवत् ॥ २१ ॥ भक्तिऽव्यवहितं मिथ्याभ्रममेव तु नश्वरम् ॥ इन्द्रत्वं वा मनुत्वं वा सौरत्वं वा नराधिप॥२२॥ न मन्ये जलरेखेति नृपत्वं केन गण्यते ॥ श्रुत्वा सुयज्ञयज्ञे ते मुनीनां गमनं नृप ॥ २३ ॥ लालसां विष्णुभक्तिं ते संप्रापयितुमागतः ॥ केवलानुगृहीतस्त्वं नहि शप्तो मयाऽधुना॥२४॥समुद्धृतश्च पतितो घोरे निम्ने भवार्णवे ॥ नह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥ २५ ॥ ते पुनन्त्युरुकालेन कृष्णभक्ताश्च दर्शनात् ॥ राजन्निर्गम्यतां गेहाद्देहि राज्यं सुताय च ॥ २६ ॥ पुत्रे न्यस्य प्रियां साध्वीं गच्छ वत्स वनं द्रुतम् ॥ ब्रह्मादिस्तम्बपर्य्यन्तं सर्वं मिथ्यैव भूमिप ॥ २७ ॥ श्रीकृष्णं भज राधेशं परमात्मानमीश्वरम् ॥ ध्यानसाध्यं दुराराध्यं ब्रह्मविष्णुशिवादिभिः ॥ २८ ॥ आविर्भूतैस्तिरोभूतैः प्राकृतैः प्रकृतेः परम् ॥ ब्रह्मा स्रष्टा हरिः पाता हरः संहारकारकः ॥ २९ ॥ दिक्पालाश्च दिगीशाश्च भ्रमन्त्येवास्य मायया ॥ यदाज्ञया वाति वायुः सूर्य्यो दिनपतिः सदा॥ ॥ ३० ॥ निशापतिः शशी शश्वत्सस्यसुस्निग्धताकरः ॥ कालेन मृत्युः सर्वेषां सर्वविश्वेषु वै भवेत् ॥ ३१ ॥ काले वर्षति शक्रश्च दहत्यग्निश्च कालतः॥भीतवद्विश्वशास्ता च प्रजासंयमनो यमः॥३२॥कालः संहरते काले काले सृजति पाति च॥स्वदेशे वै समुद्रश्च स्वदेशे वै वसुन्धरा॥३३॥स्वदेशे पर्वताश्चैव स्वाः पातालाः स्वदेशतः॥स्वर्लोकाः सप्त राजेन्द्र सप्तद्वीपा वसुन्धरा॥३४॥ शैलसागर

---

[१] मत्पितामहः इति पाठः ।

संयुक्ताः पातालाः सप्त चैव हि ॥ ब्रह्माण्डमेभिर्लोकैश्च डिम्बाकारं जलप्लुतम् ॥३५॥ सन्त्येव प्रतिविध्यण्डे ब्रह्मविष्णुशिवादयः ॥ सुरा नराश्च नागाश्च गन्धर्वा राक्षसादयः ॥३६॥ आपातालाद्ब्रह्मलोकपर्य्यन्तं डिम्बरूपकम् ॥ इदमेव तु विध्यण्डमुत्तमं कृत्रिमं नृप ॥ ३७ ॥ नाभिपद्मे विराड्विष्णोः क्षुद्रस्य जलशायिनः ॥ स्थितं यथा पद्मबीजं कर्णिकायां च पङ्कजे ॥३८॥ एवं सोऽपि शयानस्स्याज्जलतल्पे सुविप्लुते ॥ ध्यायत्येव महायोगी प्राकृतः प्रकृतेः परम् ॥ ३९ ॥ कालभीतश्च कालेशं कृष्णमात्मानमीश्वरम् ॥ महाविष्णोर्लोमकूपसाधारः सोऽस्ति विस्तृते ॥ कूपेषु लोम्नां प्रत्येकमेवं विश्वानि सन्ति वै ॥ ४० ॥ महाविष्णोर्गात्रलोम्नां ब्रह्माण्डानां च भूमिप ॥ संख्यां कर्त्तुं न शक्नोति कृष्णोऽप्यन्यस्य का कथा ॥४१॥ महाविष्णुः प्राकृतिकः सोऽपि डिम्बोद्भवः सदा ॥ भवेत्कृष्णेच्छया डिम्बः प्रकृतेर्गर्भसम्भवः ॥ ४२ ॥ सर्वाधारो महान्विष्णुः कालभीतः स शङ्कितः ॥ काले शं ध्यायति स्वैरं कृष्णमात्मानमीश्वरम् ॥ ४३ ॥ एवं च सर्वविश्वस्था ब्रह्मविष्णुशिवादयः ॥ महान्विराट् क्षुद्रविराट् सर्वे प्राकृतिकाः सदा ॥४४॥ सा सर्वबीजरूपा च मूलप्रकृतिरीश्वरी ॥ काले लीना च कालेशे कृष्णे तं ध्यायति स्म सा ॥४५॥ एवं सर्वे कालभीताः प्रकृतिः प्राकृतास्तथा ॥ आविर्भूतास्तिरोभूताः कालेन परमात्मनि ॥४६॥ इत्येवं कथितं सर्वं महाज्ञानं सुदुर्लभम् ॥ शिवेन गुरुणा दत्तं किं भूयः श्रोतुमिच्छसि ॥४७॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृखण्डे नारदनारायणसंवादान्तर्गतहरगौरीसंवादे राधोपाख्याने सुयज्ञं प्रत्यतिथ्युपदेशो नाम त्रिपञ्चाशत्तमोऽध्यायः ॥५३॥

राजोवाच ॥ कुत्राधारो महाविष्णोः सर्वाधारस्य तस्य च ॥ कालभीतस्य कति च कालमाया मुनीश्वर ॥ १ ॥ क्षुद्रस्य कतिचित्कालं ब्रह्मणः प्रकृतेस्तथा ॥ मनोरिन्द्रस्य चन्द्रस्य सूर्य्यस्यायुस्तथैव च ॥ २ ॥ अन्येषां वै जनानां च प्राकृतानां परं वयः ॥ वेदोक्तं सुविचार्य्यं च वद वेदविदां वर ॥ ३ ॥ विश्वानामूर्ध्वभागे च कस्स्याद्वा लोक एव सः ॥ कथयस्व महाभाग सन्देहच्छेदनं कुरु ॥ ४ ॥ मुनिरुवाच ॥ गोलोको नृप विश्वानां विस्तृतश्च नभस्समः ॥ तथा नित्यं डिम्बरूपश्श्रीकृष्णेच्छासमुद्भवः ॥ ५ ॥ जलेन परिपूर्णश्च कृष्णस्य मुखबिन्दुना ॥ सृष्ट्युन्मुखस्यादिसर्गे

परिश्रान्तस्य खेलतः ॥६॥ प्रकृत्या सह युक्तस्य कलया निजया नृप ॥ तत्राधारो महाविष्णोर्विश्वाधारस्य विस्तृतः ॥७॥ प्रकृति
गर्भ[१]संयुक्तडिम्बोद्भूतस्य भूमिप ॥ सुविस्तृते जलाधारे शयानश्च महाविराट् ॥ ८ ॥ राधेश्वरस्य कृष्णस्य षोडशांशः प्रकीर्त्तितः ॥
दूर्वादलश्यामरूपः सस्मितश्च चतुर्भुजः ॥ ९ ॥ वनमालाधरः श्रीमाञ्छोभितः पीतवाससा ॥ ऊर्ध्वं नभसि [२]तद्विष्णोर्नित्यवैकुण्ठ
एव च ॥१०॥ आत्माऽऽकाशसमो नित्यो विस्तृतश्चन्द्रबिम्बवत् ॥ ईश्वरेच्छासमुद्भूतो निर्लक्ष्यश्च निराश्रयः ॥ ११ ॥ आकाशव
त्सुविस्तारो रत्नौघैश्च विनिर्मितः ॥ तत्र नारायणः श्रीमान्वनमाली चतुर्भुजः ॥ १२ ॥ लक्ष्मीसरस्वतीगङ्गातुलसीपतिरीश्वरः ॥
सुनन्दनन्दकुमुदपार्षदादिभिरावृतः॥१३॥सर्वेशः सर्वसिद्धेशो भक्तानुग्रहविग्रहः ॥ श्रीकृष्णश्च द्विधाभूतो द्विभुजश्च चतुर्भुजः॥१४॥
चतुर्भुजश्च वैकुण्ठे गोलोके द्विभुजः स्वयम् ॥ ऊर्ध्वं वैकुण्ठलोकाच्च पञ्चाशत्कोटियोजनात् ॥ १५ ॥ गोलोको वर्तुलाकारो वरिष्ठ
स्सर्वलोकतः ॥ अमूल्यरत्नखचितैर्मन्दिरैश्च विभूषितः ॥ १६ ॥ रत्नेन्द्रसारखचितैः स्तम्भसोपानचित्रितैः ॥ मणीन्द्रदर्पणासक्तैः
कपाटैः कलशोज्ज्वलैः ॥ १७ ॥ नानाचित्रविचित्रैश्च शिबिरैश्च विराजितः ॥ कोटियोजनविस्तीर्णो दैर्घ्ये शतगुणस्तथा ॥
विरजासरिदाकीर्णैश्शतशृंगैस्सुवेष्टितः ॥ १८ ॥ सरिदर्धप्रमाणेन दैर्घ्येण च ततेन च ॥ शैलार्द्धपरिमाणेन युक्तो वृन्दावनेन च ॥
॥ १९ ॥ तदर्द्धमानविलसद्रासमण्डलमण्डितः ॥ सरिच्छैलवनादीनां मध्ये गोलोक एव च ॥ २० ॥ यथा पंकजमध्ये च
कर्णिका सुमनोहरा ॥ तत्र गोगोपगोपीभिर्गोपीशो रासमण्डले ॥ २१ ॥ रासेश्वर्य्या राधिकया संयुक्तः सन्ततं नृप ॥ द्विभुजो
मुरलीहस्तः शिशुर्गोपालरूपधृक् ॥२२॥ वह्निशुद्धांशुकाधानो रत्नभूषणभूषितः ॥ चन्दनोक्षितसर्वांगो रत्नमालाविराजितः ॥२३॥
रत्नसिंहासनस्थश्च रत्नच्छत्रेण शोभितः ॥ तथा स प्रियगोपालैः सेवितः श्वेतचामरैः ॥ २४ ॥ भूषिताभिश्च गोपीभिर्मालाचन्द
नचर्चितः॥सस्मितः सकटाक्षाभिः सुवेषाभिश्च वीक्षितः॥२५॥कथितो लोकविस्तारो यथाशक्ति यथागमम्॥यथाश्रुतं शम्भुवक्त्रात्काल

---

[१] संभूत इति पाठः । [२] संविष्टो नित्यो वैकुण्ठ एव चेति पाठः ।

मानं निशामय ॥ २६ ॥ पात्रं षट्पलसंभूतं गभीरं चतुरङ्गुलम् ॥ २७ ॥ स्वर्णमाषकृतच्छिद्रं दण्डैश्च चतुरंगुलैः ॥ यावज्जलप्लुतं
पात्रं तत्कालं दण्डमेव च ॥ २८ ॥ दण्डद्वयं मुहूर्त्तं च यामस्तस्य चतुष्टयम् ॥ वासरश्चाष्टभिर्यामैः पक्षस्तैर्दशपञ्चभिः ॥ २९ ॥
मासो द्वाभ्यां च पक्षाभ्यां वर्षं द्वादशमासकैः ॥ मासेन वै नराणां च पितॄणां तदहर्निशम् ॥ ३० ॥ कृष्णपक्षे दिनं प्रोक्तं शुक्ले
रात्रिः प्रकीर्त्तिता ॥ वत्सरेण नराणां च देवानां च दिवानिशम् ॥ ३१ ॥ अयनं ह्युत्तरमहो रात्रिर्वै दक्षिणायनम् ॥ युगकर्मानुरूपं
च नरादीनां वयो नृप ॥ ३२ ॥ प्रकृतेः प्राकृतानां च ब्रह्मादीनां निशामय ॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् ॥ ३३ ॥
दिव्यैर्द्वादशसाहस्रैः सावधानं निशामय ॥ चत्वारि त्रीणि च द्व्येकं सहस्राणि कृतादिकम् ॥३४॥ तेषां च सन्ध्यासन्ध्यांशौ द्वे
सहस्रे प्रकीर्त्तिते ॥ त्रिचत्वारिंशकैर्लक्षैस्सविंशतिसहस्रकैः ॥ ३५ ॥ चतुर्युगं परिमितं नरमानक्रमेण च ॥ लक्षैश्च सप्तदशभिस्साष्ट
विंशसहस्रकैः ॥ ३६ ॥ कृतं युगं नृमानेन संख्याविद्भिः प्रकीर्त्तितम् ॥ सहस्रैष्षण्णवतिभिर्लक्षैर्द्वादशभिस्सह ॥ ३७ ॥ त्रेतायुगं परि
मितं कालविद्भिः प्रकीर्त्तितम् ॥ अष्टलक्षैस्सह मितं चतुष्षष्टिसहस्रकम्॥३८॥परिमाणं द्वापरस्य संख्याविद्भिरितीरितम्॥ सद्वात्रिंश
त्सहस्रैश्च चतुर्लक्षैश्च वत्सरैः॥नृमानाद्वै कलियुगं विदुः कालविदो बुधाः॥३९॥तत्र सप्त च वारा वै तिथयः षोडश स्मृताः॥दिवारा
त्र्यश्च पक्षौ द्वौ मासो वर्षं च निर्मितम्॥४०॥तथा भ्रमति तच्चक्रमेवमेवं चतुर्युगम्॥तथायुगानि राजेन्द्र तथा मन्वन्तराणि च॥४१॥
मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः॥ एवं क्रमाद्भ्रमन्त्येव मनवश्च चतुर्दश॥४२॥पञ्चविंशतिसाहस्रं षष्ट्यन्तशतपञ्चकम् ॥ नर
मानयुगं चैव परं मन्वन्तरं स्मृतम्॥४३॥आख्यानं च मनूनां च धर्मिष्ठानां नराधिप॥यच्छ्रुतं शिववक्त्रेण तत्त्वं मत्तो निशामय॥४४॥
आद्यो मनुर्ब्रह्मपुत्रः शतरूपा पतिव्रता ॥ धर्मिष्ठानां वरिष्ठश्च गरिष्ठो मनुषु प्रभुः॥४५॥स्वायम्भुवः शम्भुशिष्यो विष्णुव्रतपरायणः॥
जीवन्मुक्तो महाज्ञानी भवतः प्रपितामहः॥४६॥राजसूयसहस्रं च चक्रे वै नर्मदातटे॥त्रिलक्षमश्वमेधं च त्रिलक्षं नरमेधकम्॥४७॥गोमेधं
च चतुर्लक्षं विधिवन्महदद्भुतम् ॥ ब्राह्मणानां त्रिकोटीश्च भोजयामास नित्यशः ॥ ४८ ॥ पञ्चलक्षगवां मांसैः सुपक्वैर्घृतसंस्कृतैः ॥

चर्व्यैश्चोष्यैर्लेह्यपेयैर्मिष्टद्रव्यैः सुदुर्लभैः॥४९॥अमूल्यरत्नलक्षं च दशकोटिसुवर्णकम् ॥ स्वर्णशृङ्गयुतं दिव्यं गवां लक्षं सुपूजितम् ॥
॥५०॥ वह्निशुद्धानि वस्त्राणि मुनीन्द्राणां च लक्षकम् ॥ भूमिं च सर्वसस्याढ्यां गजेन्द्राणां च लक्षकम्॥त्रिलक्षमश्वरत्नं च शातकु
भविभूषितम्॥५१॥सहस्रं रथरत्नं च शिबिकालक्षमेव च॥त्रिकोटिस्वर्णपात्राणि सान्नं सजलमीप्सितम्॥त्रिकोटिस्वर्णभूषाश्च कर्पूरा
दिसुवासितम्॥५२॥ताम्बूलं सुविचित्रं च त्रिकोटिस्वर्णतल्पकम् ॥ रत्नेन्द्रखचितैर्मञ्चै रचितैर्विश्वकर्मणा ॥५३॥ वह्निशुद्धांशुकैश्चित्रै
राजितं माल्यजालकैः॥नित्यं ददौ ब्राह्मणेभ्यो विष्णुप्रीत्या शिवाज्ञया॥५४॥संप्राप्य शंकराज्ज्ञानं कृष्णमन्त्रं सुदुर्लभम्॥संप्राप्य कृष्ण
दास्यं च गोलोकं वै जगाम सः॥५५॥दृष्ट्वा मुक्तं स्वपुत्रं च प्रहृष्टोऽभूत्प्रजापतिः॥तुष्टाव शंकरं तुष्टः ससृजेऽन्यं मनुं विधिः॥५६॥यतः
स्वयम्भुपुत्रोऽयमतः स्वायम्भुवो मनुः॥स्वारोचिषो मनुश्चैव द्वितीयो वह्निनन्दनः॥५७॥ राजा वदान्यो धर्मिष्ठः स्वायम्भुवसमो महा
न् ॥ प्रियव्रतसुतावन्यौ द्वौ मनू धर्मिणां वरौ ॥ ५८ ॥ तौ तृतीयौ चतुर्थौ च वैष्णवौ तापसोत्तमौ ॥ तौ च शङ्करशिष्यौ च
कृष्णभक्तिपरायणौ ॥ ५९ ॥ धर्मिष्ठानां वरिष्ठश्च रैवतः पञ्चमो मनुः ॥ षष्ठश्च चाक्षुषो ज्ञेयो विष्णुभक्तिपरायणः ॥ ६० ॥
श्राद्धदेवः सूर्यसुतो वैष्णवः सप्तमो मनुः ॥ सावर्णिः सूर्यतनयो वैष्णवो मनुरष्टमः ॥ ६१ ॥ नवमो दक्षसावर्णिर्विष्णुव्रतपरायणः ॥
दशमो ब्रह्मसावर्णिर्ब्रह्मज्ञानविशारदः ॥ ६२ ॥ ततश्च धर्मसावर्णिर्मनुरेकादशः स्मृतः ॥ धर्मिष्ठश्च वरिष्ठश्च वैष्णवव्रततत्परः ॥
॥ ६३ ॥ ज्ञानी च रुद्रसावर्णिर्मनुश्च द्वादशः स्मृतः ॥ धर्मात्मा देवसावर्णिर्मनुरेवं त्रयोदशः ॥ ६४ ॥ चतुर्दशो महाज्ञानी चन्द्र
सावर्णिरेव च ॥ यावदायुर्मनूनां स्यादिन्द्राणां तावदेव हि ॥ ६५ ॥ चतुर्दशेन्द्रावच्छिन्नं ब्रह्मणो दिनमुच्यते ॥ तावती ब्रह्मणो
रात्रिः सा च ब्राह्मी निशा नृप ॥ ६६ ॥ कालरात्रिश्च सा ज्ञेया वेदेषु परिकीर्त्तिता ॥ ब्रह्मणो वासरे राजन्क्षुद्रकल्पः प्रकीर्त्तितः॥
॥ ६७ ॥ सप्तकल्पे चिरंजीवी मार्कण्डेयो महातपाः ॥ ब्रह्मलोकादधः सर्वे लोका दग्धाश्च तत्र वै ॥ ६८ ॥ उत्तिथतेनैव सहसा

सङ्कर्षणमुखाग्निना ॥ चन्द्रार्कब्रह्मपुत्राश्च ब्रह्मलोकं गता ध्रुवम् ॥६९॥ ब्रह्मरात्रिव्यतीते तु पुनश्च ससृजे विधिः ॥ तस्यां ब्रह्मनि
शायां च क्षुद्रः प्रलय उच्यते ॥ ७० ॥ देवाश्च मनवश्चैव तत्र दग्धा नरादयः ॥ एवं त्रिंशद्दिवारात्रैर्ब्रह्मणो मास एव च ॥ ७१ ॥
वर्षं द्वादशमासैश्च ब्रह्मसम्बन्धि चैव हि ॥ एवं पञ्चदशाब्दे तु गते च ब्रह्मणो नृप ॥ दैनंदिनस्तु प्रलयो वेदेषु परिकीर्त्तितः ॥
॥ ७२ ॥ मोहरात्रिश्च सा प्रोक्ता वेदविद्भिः पुरातनैः ॥ तत्र सर्वे प्रणष्टास्स्युश्चन्द्रार्कादिदिगीश्वराः ॥ ७३ ॥ आदित्या वसवो
रुद्रा मनवो मानवादयः ॥ ऋषयो मुनयश्चैव गन्धर्वा राक्षसादयः ॥ ७४ ॥ मार्कण्डेयो लोमशश्च पेचकश्चिरजीविनः ॥ इन्द्रद्यु
म्नश्च नृपतिश्चाकूपारश्च कच्छपः ॥७५॥ नाडीजंघो बकश्चैव सर्वे नष्टाश्च तत्र वै ॥ ब्रह्मलोकादधः सर्वे लोका नागालयास्तथा ॥
॥ ७६ ॥ ब्रह्मलोकं ययुः सर्वे ब्रह्मपुत्रादयस्तथा ॥ गते दैनंदिने ब्रह्मा लोकांश्च ससृजे पुनः ॥७७॥ एवं शताब्दपर्य्यन्तं परमायुः
प्रजापतेः ॥ ब्रह्मणश्च निपाते स्यान्महाकल्पो भवेन्नृप ॥ ७८ ॥ प्रकीर्तिता महारात्रिः सैव चेह पुरातनैः ॥ ब्रह्मणश्च निपाते च
ब्रह्माण्डौघो जलप्लुतः ॥ ७९ ॥ देवमाता च सावित्री वेदा धर्म्मादयस्तथा ॥ सर्वे प्रणष्टा मृत्युश्च प्रकृतिं च शिवं विना ॥ ८० ॥
नारायणे प्रलीनाश्च विश्वस्था वैष्णवास्तथा ॥ कालाग्निरुद्रः संहर्त्ता सर्वरुद्रगणैः सह ॥८१॥ मृत्युञ्जये महादेवे प्रलीनः स तमो
गुणः ॥ ब्रह्मणश्च निपातेन निमेषः प्रकृतेर्भवेत् ॥ ८२ ॥ नारायणस्य शम्भोश्च महाविष्णोश्च निश्चितम् ॥ निमेषान्ते पुनः
सृष्टिर्भवेत्कृष्णेच्छया नृप ॥ ८३ ॥ कृष्णो निमेषरहितो निर्गुणः प्रकृते परः ॥ सगुणानां निमेषश्च कालसंख्यावयोमितः ॥
॥ ८४ ॥ निर्गुणस्य च नित्यस्य चाद्यन्तरहितस्य च ॥ निमेषाणां सहस्रेण प्रकृतेर्दण्ड उच्यते ॥ ८५ ॥ षष्टिदण्डात्मिकास्तस्या
वासरश्च प्रकीर्त्तितः ॥ त्रिंशद्रात्रिदिनैर्मासो वर्षं द्वादशमासकैः ॥ ८६ ॥ एवं गते शताब्दे च श्रीकृष्णे प्रकृतेर्लयः ॥ प्रकृत्यां च
प्रलीनायां श्रीकृष्णे प्राकृतो लयः ॥ ८७ ॥ सर्वान्संहत्य सा चैका महाविष्णोः प्रसूश्च या ॥ कृष्णवक्षसि लीना च मूलप्रकृति

---

१ द्रुतमिति पाठः ।

रीश्वरी ॥८८॥ संन्तो वदन्ति तां दुर्गां विष्णुमायां सनातनीम् ॥ सर्वशक्तिस्वरूपां च परां नारायणीं सतीम् ॥ ८९ ॥ बुद्ध्यधिष्ठातृदेवी च श्रीकृष्णस्यैव निर्गुणाम् ॥ यन्मायामोहिताश्चैव ब्रह्मविष्णुशिवादयः॥९०॥ वैष्णवास्तां महालक्ष्मीं परां राधां वदन्ति ते ॥ अर्द्धाङ्गां च महालक्ष्मीः प्रिया नारायणस्य च ॥ ९१ ॥ प्राणाधिष्ठातृदेवीं च प्रेम्णा प्राणाधिकां वराम् ॥ स्थिरप्रेममयीं शक्तीं निर्गुणां निर्गुणस्य च ॥९२॥ नारायणश्च शम्भुश्च संहत्य स्वगणान्बहून् ॥ शुद्धसत्त्वस्वरूपी श्रीकृष्णे लीनश्च निर्गुणे॥ ॥९३॥ गोपा गोप्यश्च गावश्च सवत्साश्च नराधिप ॥ सर्वे लीनाः प्रकृत्यां च प्रकृतिः परमेश्वरे॥९४॥ महाविष्णौ विलीनाश्च ते सर्वे क्षुद्रविष्णवः ॥ महाविष्णुः प्रकृत्यां च सा चैवं परमात्मनि॥९५॥प्रकृतिर्योगनिद्रा च श्रीकृष्णनयनद्वये ॥ अधिष्ठानं चकारैवं मायया चेश्वरेच्छया॥९६॥ प्रकृतेर्वासरो यावन्मितः कालः प्रकीर्त्तितः ॥ तावद्वृन्दावने निद्रा कृष्णस्य परमात्मनः॥९७॥अमूल्यरत्नतल्पे च वह्निशुद्धांशुकार्चिते ॥ गन्धचन्दनमाल्यौघवाय्वादिसुरभीकृते ॥ ९८ ॥ पुनः प्रजागरे तस्य सर्वसृष्टिर्भवेत्पुनः ॥ एवं सर्वे प्राकृताश्च श्रीकृष्णं निर्गुणं विना ॥ ९९ ॥ तद्वन्दनं तत्स्मरणं तस्य ध्यानं तदर्चनम् ॥ कीर्त्तनं तद्गुणानां च महापातकनाशनम् ॥ १०० ॥ एतत्ते कथितं सर्वं यद्यन्मृत्युञ्जयाच्छ्रुतम् ॥ यथागमं महाराज किं भूयः श्रोतुमिच्छसि ॥ १०१ ॥ सुयज्ञ उवाच ॥ कालाग्निरुद्रो विश्वानां संहर्त्ता च तमोगुणः ॥ ब्रह्मणोऽन्ते विलीनश्च सत्त्वं मृत्युञ्जये शिवे ॥१०२॥ शिवो लीनो निर्गुणे च श्रीकृष्णे प्राकृते लये ॥ कथं तव गुरोर्नाम मृत्युञ्जय इति श्रुतम् ॥१०३॥ कथं प्रसूर्महाविष्णोर्मूलप्रकृतिरीश्वरी ॥ असंख्यानि च विश्वानि सन्ति वै यस्य लोमसु ॥ १०४ ॥ सुतपा उवाच ॥ ब्रह्मणोऽन्ते मृत्युकन्या प्रणष्टा जलबिम्बवत् ॥ संहर्त्री सर्वलोकानां ब्रह्मादीनां नराधिप ॥ १०५ ॥ कतिधा मृत्युकन्यानां ब्रह्मणां कोटिशो लये ॥ कालेन लीनः शम्भुश्च सत्त्वरूपे च निर्गुणे ॥ १०६ ॥ मृत्युकन्या जिता शश्वच्छिवेन गुरुणा मम ॥ न मृत्युना जितः शम्भुः कल्पे कल्पे श्रुतौ श्रुतम् ॥ १०७ ॥ शम्भुर्नां

---

१ शाक्ता-इति पाठः ।

रायणस्यैव प्रकृतेश्च नराधिप ॥ नित्यानां लीनता नित्ये तन्माया न तु वास्तवी ॥ १०८ ॥ स्वयं पुमान्निर्गुणश्च कालेन सगुणः
स्वयम् ॥ स्वयं नारायणः शम्भुर्मायया प्रकृतिः स्वयम् ॥ १०९ ॥ तदंशस्तत्समः शश्वद्यथा वह्नेः स्फुलिङ्गवत् ॥ ये ये च ब्रह्मणा
सृष्टा रुद्रादित्यादयस्तथा ॥ ११० ॥ कल्पे कल्पे जितास्ते ते नश्वरा मृत्युकन्यया ॥ न शिवो ब्रह्मणा सृष्टः सत्यो नित्यः सना
तनः ॥ १११ ॥ कतिधा ब्रह्मणां पातो यन्निमेषण भूमिप ॥ अथादिसर्गे श्रीकृष्णः प्रकृत्यां च जगद्गुरुः ॥ ११२ ॥ चकार वीर्या
धानं च पुण्ये वृन्दावने वने ॥ तद्वामांशसमुद्भूता रासे रासेश्वरी परा ॥ ११३ ॥ गर्भं दधार सा राधा यावद्वै ब्रह्मणो वयः॥ ततः
सुषाव सा डिम्भं गोलोके रासमण्डले ॥ ११४ ॥ चुकोप डिम्भं सा दृष्ट्वा हृदयेन विदूयता ॥ तड्डिम्भं प्रेरयामास तदधो विश्व
गोलके ॥ ११५ ॥ त्यक्त्वाऽपत्यं महादेवी रुरोद च मुहुर्मुहुः ॥ कृष्णस्तां बोधयामास महायोगेन योगवित् ॥ ११६ ॥ बभूव
तस्माड्डिम्भाच्च सर्वाधारो महान्विराट् ॥ ११७ ॥ सुयज्ञ उवाच ॥ अद्य मे सफलं जन्म जीवनं सार्थकं मम ॥ शापो मे वररूप
श्चाप्यभवद्भक्तिकारणम् ॥ ११८ ॥ सुदुर्लभा हरेर्भक्तिः सर्वमङ्गलमङ्गला ॥ न तस्याश्च समं विप्र वेदोक्तं भक्तिपञ्चकम् ॥११९॥
यथा भक्तिर्मम भवेच्छ्रीकृष्णे परमात्मनि ॥ सुदुर्लभा च सर्वेषां तत्कुरुष्व महामुने ॥ १२० ॥ नह्यम्मयानि तीर्थानि न देवा मृच्छि
लामयाः ॥ ते पुनन्त्युरुकालेन कृष्णभक्ताश्च दर्शनात् ॥ १२१ ॥ सर्वेषामाश्रमाणां च द्विजातेर्जातिरुत्तमा ॥ स्वधर्मनिरताश्चैव
तेषु श्रेष्ठश्च भारते ॥ १२२ ॥ कृष्णमन्त्रोपासकश्च कृष्णभक्तिपरायणः ॥ नित्यं नैवेद्यभोजी च ततः श्रेष्ठो महाञ्छुचिः ॥१२३॥
त्वां वैष्णवं द्विजश्रेष्ठं महाज्ञानार्णवं परम् ॥ संप्राप्य शिवशिष्यं च कं यामि शरणं मुने ॥ १२४ ॥ अधुनाऽहं गलत्कुष्ठी तव शापा
न्महामुने ॥ कथं तपस्यामशुचिर्नाधिकारी करोमि च ॥ १२५ ॥ सुतपा उवाच ॥ हरिभक्तिप्रदात्री सा विष्णुमाया सनातनी ॥
सा च याननुगृह्णाति तेभ्यो भक्तिं ददाति च ॥ १२६ ॥ यांश्च माया मोहयति तेभ्यस्तां न ददाति च ॥ करोति वञ्चनां तेषां नश्व
रेण धनेन च ॥ १२७ ॥ कृष्णप्रेममयीं शक्तिं प्राणाधिष्ठातृदेवताम् ॥ भज राधां निर्गुणां तां प्रदात्रीं सर्वसम्पदाम् ॥ १२८ ॥

शीघ्रं यास्यासि गोलोकं तदनुग्रहसेवया ॥ सा सेविता श्रीकृष्णेन सर्वाराध्येन पूजिता ॥ १२९ ॥ ध्यानसाध्यं दुराराध्यं भक्ताः
संसेव्य निर्गुणम् ॥ सुचिरेण च गोलोकं प्रयान्ति बहुजन्मतः ॥ १३० ॥ कृपामयीं च संसेव्य भक्ता यान्त्यचिरेण वै ॥ सा प्रसूश्च
महाविष्णोः सर्वसम्पत्स्वरूपिणी ॥ १३१ ॥ सहस्रवर्षपर्य्यन्तं विप्रपादोदकं पिब ॥ कामदेवस्वरूपश्च रोगहीनो भविष्यसि ॥१३२॥
विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी ॥ तावत्पुष्करपत्रेषु पिबन्ति पितरो जलम् ॥ १३३ ॥ पृथिव्यां यानि तीर्थानि तानि
तीर्थानि सागरे ॥ सागरे यानि तीर्थानि विप्रपादेषु तानि च ॥ १३४ ॥ विप्रपादोदकं चैव पापव्याधिविनाशनम् ॥ सर्वतीर्थोदक
समं भुक्तिमुक्तिप्रदं शुभम् ॥ १३५ ॥ विप्रो मानवरूपी च देवदेवो जनार्दनः ॥ विप्रेण दत्तं द्रव्यं च भुञ्जते सर्वदेवताः ॥ १३६ ॥
इत्येवमुक्त्वा विप्रश्च गृहीत्वा तस्य पूजनम् ॥ जगाम गृहमित्युक्त्वा त्वायास्ये वत्सरान्तरे ॥ १३७ ॥ भक्त्या च बुभुजे राजा विप्रपा
दोदकं शिवे ॥ विप्रांश्च पूजयामास भोजयामास वत्सरम् ॥ १३८ ॥ संवत्सरे व्यतीते तु निर्मुक्तो व्याधितो नृपः ॥
आजगाम मुनिश्रेष्ठः सुतपाः कश्यपाग्रणीः ॥ १३९ ॥ राधापूजाविधानं च स्तोत्रं च कवचं मनुम् ॥ ध्यानं च साम
वेदोक्तं ददौ तस्मै नृपाय सः ॥ १४० ॥ राजन्निर्गम्यतां शीघ्रमित्युक्त्वा तपसे मुनिः ॥ जगाम स्वालयाद्दुर्गं निर्जगाम
त्वरन्नृपः ॥ १४१ ॥ रुरुदुर्बान्धवाः सर्वे त्रिरात्रं शोकमूर्च्छिताः ॥ भार्य्याश्च तत्यजुः प्राणान्पुत्रो राजा बभूव ह ॥ १४२ ॥
सुयज्ञः पुष्करं गत्वा चक्रे वै दुष्करं तपः ॥ दिव्यं वर्षशतं राजा जजाप परमं मनुम् ॥ १४३ ॥ तदा ददर्श गगने रथ
स्थां परमेश्वरीम् ॥ स तद्दर्शनमात्रेण निष्पापश्च बभूव ह ॥१४४॥ तत्याज मानुषं देहं दिव्यां मूर्त्तिं दधार ह ॥ सा देवी तेन यानेन
रत्नेन्द्रैर्निर्मितेन च॥१४५॥नृपं नीत्वा च गोलोकं तत्र चैषा ययौ तदा ॥ राजा ददर्श गोलोकं नद्या विरजया वृतम्॥१४६॥वेष्टितं
पर्वतेनैव शतशृङ्गेण चारुणा॥ श्रीवृन्दावनसंयुक्तं रासमण्डलमण्डितम् ॥१४७॥ गोगोपगोपीनिकरैः शोभितं परिसेवितैः॥रत्नेन्द्रसा
रखचितैर्मन्दिरैः सुमनोहरैः ॥१४८॥ नानाचित्रविचित्रैश्च राजितं परिशोभितम्॥ सप्तत्रिंशद्भिराक्रीडैः कल्पवृक्षसमन्वितैः ॥ १४९॥

पारिजातद्रुमाकीर्णैर्वेष्टितं कामधेनुभिः ॥ आकाशवत्सुविस्तीर्णं वर्त्तुलं चन्द्रबिम्बवत् ॥ १५० ॥ अत्यूर्ध्वमपि वैकु
ण्ठात्पञ्चाशत्कोटियोजनम् ॥ शून्ये स्थितं निराधारं ध्रुवमेवेश्वरेच्छया ॥१५१॥ आत्माकाशसमं नित्यमस्माकं च सुदुर्लभम् ॥ अहं
नारायणोऽनन्तो ब्रह्मा विष्णुर्महान्विराट् ॥ १५२ ॥ धर्मक्षुद्रविराट्संघो गङ्गा लक्ष्मीः सरस्वती ॥ त्वं विष्णुमाया सावित्री
तुलसी च गणेश्वरः ॥ १५३ ॥ सनत्कुमारः स्कन्दश्च नरनारायणावृषी ॥ कपिलो दक्षिणा यज्ञो ब्रह्मपुत्राश्च योगिनः ॥ १५४ ॥
पवनो वरुणश्चन्द्रः सूर्य्यो रुद्रो हुताशनः ॥ कृष्णमन्त्रोपासकश्च भारतस्थाश्च वैष्णवाः ॥ १५५ ॥ एभिर्दृष्टश्च गोलोको नान्यैर्दृष्टः
कदाचन॥निरामये च तत्रैव रत्नसिंहासने स्थितम्॥१५६॥रत्नमालाकिरीटैश्च भूषितं रत्नभूषणैः॥सुनिर्मलैः पीतवस्त्रैः वह्निशुद्धैर्विरा
जितम् ॥ १५७ ॥ चन्दनोक्षितसर्वाङ्गं किशोरं गोपरूपिणम् ॥ नवीननीरदश्यामश्वेतपङ्कजलोचनम् ॥१५८॥ शरत्पार्वणचन्द्रास्य
मीषद्धास्यं मनोहरम् ॥ द्विभुजं मुरलीहस्तं भक्तानुग्रहविग्रहम् ॥ १५९ ॥ स्वेच्छामयं परं ब्रह्म निर्गुणं प्रकृतेः परम् ॥ ध्यानसाध्यं
दुराराध्यमस्माकं च सुदुर्लभम् ॥ १६० ॥ प्रियैर्द्वादशगोपालैः सेवितं श्वेतचामरैः ॥ वीक्षितं गोपिकावृन्दैः सस्मितैः सुमनोहरैः
॥ १६१ ॥ पीडितैः कामबाणैश्च शश्वत्सुस्थिरयौवनैः ॥ वह्निशुद्धांशुकाधाने रत्नभूषणभूषितैः ॥ १६२ ॥ रासमण्डलमध्यस्थं
श्रीकृष्णं च परात्परम् ॥ ददर्श राजा तत्रैव राधया दर्शितं तदा ॥ १६३ ॥ स्तुतं चतुर्भिर्वेदैश्च मूर्तिमद्भिर्मनोहरैः ॥ रागिणीनां च
रागाणामतीव सुमनोहरम् ॥ १६४ ॥ श्रुतवन्तं च सङ्गीतं यन्त्रवक्त्रोत्थितं शिवे ॥ नित्यया च सनातन्या प्रकृत्या च सह त्वया
॥ १६५ ॥ शश्वत्पूजितपादाब्जमखण्डतुलसीदलैः ॥ कस्तूरीकुंकुमाक्तैश्च गन्धचन्दनचर्चितैः ॥ १६६ ॥ दूर्वाभिरक्षताभिश्च पारिजा
तप्रसूनकैः ॥ निर्मलैर्विरजातोयैर्दत्तार्घ्यैरतिशोभितम् ॥ १६७ ॥ सुप्रसन्नं स्वतन्त्रं च सर्वकारणकारणम् ॥ सर्वेषां चान्तरात्मानं
सर्वेशं सर्वजीवनम् ॥ १६८ ॥ सर्वाधारं परं पूज्यं ब्रह्म ज्योतिः सनातनम् ॥ सर्वसम्पत्स्वरूपं च दातारं सर्वसम्पदाम् ॥ १६९ ॥
सर्वमङ्गलरूपं च सर्वमङ्गलकारणम् ॥ सर्वमंगलदं सर्वमंगलनां च मंगलम् ॥ १७० ॥ तं दृष्ट्वा नृपतिस्त्रस्तो ह्यवरुह्य रथात्त्वरन् ॥

साश्रुनेत्रः पुलकितो मूर्ध्ना स प्रणनाम च ॥ १७१ ॥ परमात्मा ददौ तस्मै स्वदास्यं च शुभाशिषम् ॥ स्वभक्तिं निश्चलां सत्यामस्माकं च सुदुर्लभाम् ॥ १७२ ॥ राधाऽवरुह्य स्वरथात्कृष्णवक्षस्युवास सा ॥ गोपीभिः सुप्रियाभिश्च सेविता श्वेतचामरैः ॥ ॥ १७३ ॥ सम्भाषिता श्रीकृष्णेन सस्मितेन च पूजिता ॥ समुत्थितेन सहसा भक्त्या वै सम्भ्रमेण च ॥ १७४ ॥ आदौ राधां समुच्चार्य्य पश्चात्कृष्णं च माधवम् ॥ प्रवदन्ति च वेदेषु वेदविद्भिः पुरातनैः ॥१७५॥ विपर्य्ययं ये वदन्ति ये निन्दन्ति जगत्प्रसूम् ॥ कृष्णप्राणाधिकां प्रेममयीं शक्तिं च राधिकाम् ॥ १७६ ॥ ते पच्यन्ते कालसूत्रे यावच्चन्द्रदिवाकरम् ॥ भवन्ति स्त्रीपुत्रहीना रोगिणः शतजन्मसु ॥१७७॥ इत्येवं कथितं दुर्गे राधिकाख्यानमुत्तमम् ॥ सा त्वं सती भगवती वैष्णवी च सनातनी॥१७८॥ नारायणी विष्णुमाया मूलप्रकृतिरीश्वरी ॥ मायया मां पृच्छसि त्वं सर्वज्ञा सर्वरूपिणी॥१७९॥ स्त्रीजातिष्वधिदेवी च परा जातिस्मरा वरा ॥ कथितं राधिकाख्यानं किं भूयः श्रोतुमिच्छसि ॥ १८० ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादान्तर्गतहरगौरीसंवादे राधाख्याने सुयज्ञाख्याने सुतपः सुयज्ञसंवादे सुयज्ञस्य गोलोकप्राप्तिर्नाम चतुष्पञ्चाशत्तमोऽध्यायः॥५४॥ इति सुयज्ञोपाख्यानं समाप्तम् ॥ श्रीपार्वत्युवाच ॥ श्रीकृष्णस्य स्थिते मन्त्रे चान्येषामीश्वरस्य वः ॥ कथं जग्राह राधाया मन्त्रं वै वैष्णवो नृपः ॥ १ ॥ किं विधानं च किं ध्यानं किं स्तोत्रं कवचं च किम् ॥ कं मन्त्रं च ददौ राज्ञे तां पूजापद्धतिं वद ॥ ॥ २ ॥ श्रीमहेश्वर उवाच ॥ हे विप्र कं भजामीति प्रश्नं कुर्वति राजनि ॥ शीघ्रं प्राप्नोमि गोलोकं कस्याराधनतो मुने ॥ ३ ॥ इत्युक्तवन्तं राजेन्द्रमुवाच ब्राह्मणोत्तमः ॥ तत्सेवया च तल्लोकं प्राप्स्यसे बहुजन्मतः ॥ ४ ॥ तत्प्राणाधिष्ठातृदेवीं भज राधां परात्पराम् ॥ कृपामयीप्रसादेन शीघ्रं प्राप्नोति तत्पदम् ॥ ५ ॥ इत्युक्त्वा राधिकामन्त्रं ददौ तस्मै षडक्षरम् ॥ ॐ राधेति चतुर्थ्यन्तं वह्निजायान्तमेव च ॥ ६ ॥ प्राणायामं भूतशुद्धिं मन्त्रन्यासं तथैव च ॥ करांगन्यासमेवं च ध्यानं सर्वसुदुर्लभम् ॥ ७ ॥ स्तोत्रं च कवचं तं च शिक्षयामास भक्तितः ॥ राजा तेन क्रमेणैव जजाप परमं मनुम् ॥ ८ ॥ ध्यानं च सामवेदोक्तं मंगलानां च

मंगलम् ॥ कृष्णस्तां पूजयामास पुरा ध्यानेन येन च ॥ ९ ॥ श्वेतचम्पकवर्णाभां कोटिचन्द्रसमप्रभाम् ॥ शरत्पार्वणचन्द्रास्यां शरत्पङ्कजलोचनाम् ॥ सुश्रोणीं सुनितम्बां च पक्वबिम्बाधरां वराम्॥१०॥मुक्तापंक्तिप्रतिनिधिदन्तपंक्तिमनोहराम् ॥ ईषद्धास्यप्रसन्नास्यां भक्तानुग्रहकारिकाम् ॥ वह्निशुद्धांशुकाधानां रत्नमालाविभूषिताम् ॥ ११ ॥ रत्नकेयूरवलयां रत्नमञ्जीररञ्जिताम् ॥ रत्नकुण्डलयुग्मेन विचित्रेण विराजिताम् ॥ सूर्य्यप्रभाप्रतिकृतिगण्डस्थलविराजिताम् ॥ १२ ॥ अमूल्यरत्नखचितग्रैवेयकविभूषिताम् ॥ सद्रत्नसारखचितकिरीटमुकुटोज्ज्वलाम् ॥ रत्नांगुलीयसंयुक्तां रत्नपाशकशोभिताम् ॥ १३ ॥ बिभ्रतीं कबरीभारं मालतीमाल्यशोभिताम् ॥ रूपाधिष्ठातृदेवीं च मत्तवारणगामिनीम् ॥ १४ ॥ गोपीभिः सुप्रियाभिश्च सेवितां श्वेत[1]चामरैः ॥ कस्तूरीबिन्दुभिः सार्द्धमधश्चन्दनबिन्दुना ॥ १५ ॥ सिन्दूरबिन्दुना चारुसीमन्ताधःस्थलोज्ज्वलाम् ॥ नित्यं सुपूजितां भक्त्या कृष्णेन परमात्मना ॥ १६ ॥ कृष्णसौभाग्यसंयुक्तां कृष्णप्राणाधिकां वराम्॥कृष्णप्राणाधिदेवीं च निर्गुणां च परात्पराम्॥१७॥महाविष्णुविधात्रीं च प्रदात्रीं सर्वसम्पदाम् ॥ कृष्णभक्तिप्रदां शान्तां मूलप्रकृतिमीश्वरीम् ॥ १८ ॥ वैष्णवीं विष्णुमायां च कृष्णप्रेममयीं शुभाम् ॥ रासमण्डलमध्यस्थां रत्नसिंहासनस्थिताम् ॥ रासे रासेश्वरयुतां राधां रासेश्वरीं भजे ॥ १९ ॥ ध्यात्वा पुष्पं मूर्ध्नि दत्त्वा पुनर्ध्यायेज्जगत्प्रभुम् ॥ दद्यात्पुष्पं पुनर्ध्यात्वा चोपचाराणि षोडश ॥ २० ॥ आसनं वसनं पाद्यमर्घ्यं गन्धानुलेपनम् ॥ धूपं दीपं सुपुष्पं च स्नानीयं रत्नभूषणम् ॥ २१ ॥ नानाप्रकारनैवेद्यं ताम्बूलं वासितं जलम् ॥ मधुपर्कं रत्नतल्पमुपचाराणि षोडश ॥ २२ ॥ प्रत्येकं वेदमन्त्रेण दत्तं भक्त्या च भूभृता ॥ मन्त्रांश्च श्रूयतां दुर्गे वेदोक्तान्सर्वसम्मतान् ॥ २३ ॥ रत्नसारविकारं च निर्मितं विश्वकर्म्मणा ॥ वरं सिंहासनं रम्यं राधे पूजासु गृह्यताम् ॥ २४ ॥ अमूल्यरत्नखचितममूल्यं सूक्ष्ममेव च ॥ वह्निशुद्धं निर्म्मलं च वसनं देवि गृह्यताम्॥२५॥ सद्रत्नसारपात्रस्थं सर्वतीर्थोदकं शुभम् ॥ पादप्रक्षालनार्थं च राधे पाद्यं च गृह्यताम् ॥२६॥ दक्षिणावर्त्तशङ्खस्थं सदूर्वा

---

[1] सिद्ध चारणैः—इति पाठः ।

पुष्पचन्दनम् ॥ पूतं युक्तं तीर्थतोयै राधेऽर्घ्यं प्रतिगृह्यताम् ॥ ॥ २७ ॥ पार्थिवद्रव्यसंभूतमतीव सुरभीकृतम् ॥ मङ्गलार्हं पवित्रं च राधे गन्धं गृहाण मे ॥ २८ ॥ श्रीखण्डचूर्णं सुस्निग्धं कस्तूरीकुंकुमान्वितम् ॥ सुगन्धयुक्तं देवेशि गृह्यतामनुलेपनम् ॥ २९ ॥ वृक्षनिर्याससंयुक्तं पार्थिवद्रव्यसंयुतम् ॥ अग्निखण्डशिखाजातं धूपं देवि गृहाण मे ॥ ३० ॥ अन्धकारे भयहरममूल्यमणिशोभितम् ॥ रत्नप्रदीपं शोभाढ्यं गृहाण परमेश्वरि॥३१॥पारिजातप्रसूनं च गन्धचन्दनचर्चितम् ॥ अतीव शोभनं रम्यं गृह्यतां परमेश्वरि ॥३२॥ सुगन्धामलकीचूर्णं सुस्निग्धं सुमनोहरम् ॥ विष्णुतैलसमायुक्तं स्नानीयं देवि गृह्यताम्॥३३॥ अमूल्यरत्नखचितं केयूरवलयादिकम्॥ शश्वत्सु शोभनं राधे गृह्यतां भूषणं मम॥३४॥कालदेशोद्भवं पक्कफलं वै लड्डुकादिकम्॥परमान्नं च मिष्टान्नं नैवेद्यं देवि गृह्यताम्॥३५॥ ताम्बूलं च वरं रम्यं कर्पूरादिसुवासितम् ॥ सर्वभोगाधिकं स्वादु ताम्बूलं देवि गृह्यताम् ॥ ३६ ॥ अशनं रत्नपात्रस्थं सुस्वादु सुमनोहरम् ॥ मया निवेदितं भक्त्या गृह्यतां परमेश्वरि॥३७॥ रत्नेन्द्रसारखचितं वह्निशुद्धांशुकान्वितम् ॥ पुष्पचन्दनचर्चाढ्यं पर्य्यंकं देवि गृह्यताम् ३८ ॥ एवं संपूज्य देवीं तां दद्यात्पुष्पाञ्जलित्रयम् ॥ यत्नेन पूजयेद्देवीं नायिकाश्च व्रते व्रती ॥ ३९ ॥ प्रागादिक्रमयोगेन दक्षिणावर्त्ततः प्रिये ॥ भक्त्या पञ्चोपचारेण सुप्रियाः परिचारिकाः ॥ ४० ॥ मालावतीं पूर्वकोणे वह्निकोणे च माधवीम् ॥ दक्षिणे रत्नमालां च सुशीलां नैर्ऋते सतीम् ॥ ४१ ॥ पश्चिमे वै शशिकलां पारिजातां च मारुते ॥ पद्मावतीमुत्तरे चाथैशान्यां सुन्दरीं तथा ॥ ४२ ॥ यूथिकामालतीपद्ममाला दद्याद् व्रते व्रती ॥ परिहारं च कुरुते सामवेदोक्तमेव च ॥ ४३ ॥ त्वं देवी जगतां माता विष्णुमाया सनातनी ॥ कृष्णप्राणाधिदेवी च कृष्णप्राणाधिका शुभा ॥ ४४ ॥ कृष्णप्रेममयी शक्तिः कृष्णे सौभाग्यरूपिणी ॥ कृष्णभक्तिप्रदे राधे नमस्ते मङ्गलप्रदे ॥ ४५ ॥ अद्य मे सफलं जन्म जीवनं सार्थकं मम ॥ पूजिताऽसि मया सा च या श्रीकृष्णेन पूजिता ॥ ४६ ॥ कृष्णवक्षसि या राधा सर्वसौभाग्यसंयुता ॥ रासे रासेश्वरीरूपा वृन्दा वृन्दावने वने ॥ ४७ ॥ कृष्णप्रिया च गोलोके तुलसीकानने तु या ॥ चम्पावती कृष्णसंगे क्रीडा चम्पककानने ॥ ४८ ॥

चन्द्रावली[1] चन्द्रवने शतशृंगे सतीति च॥विरजादर्पहन्त्री च विरजातटकानने॥४९॥पद्मावती पद्मवने कृष्णा कृष्णसरोवरे॥भद्रा कुञ्ज
कुटीरे च काम्या वै काम्यके वने॥५०॥वैकुण्ठे च महालक्ष्मीर्वाणी नारायणोरसि[2]॥क्षीरोदे सिन्धुकन्या च मर्त्ये लक्ष्मीर्हरिप्रिया॥५१॥
सर्वस्वर्गे स्वर्गलक्ष्मीर्देवदुःखविनाशिनी॥सनातनी विष्णुमाया दुर्गा शङ्करवक्षसि॥५२॥सावित्री वेदमाता च कलया ब्रह्मवक्षसि ॥
कलया धर्म्मपत्नी त्वं नरनारायणप्रभोः ॥ ५३ ॥ कलया तुलसी त्वं च गङ्गा भुवनपावनी ॥ लोमकूपोद्भवा गोप्यः कलांशा
रोहिणी रतिः ॥ ५४ ॥ कला कलांशरूपा च शतरूपा शची दितिः ॥ अदितिर्देवमाता च त्वत्कलांशा हरिप्रिया ॥५५॥ देव्यश्च
मुनिपत्न्यश्च त्वत्कलाकलया शुभे ॥ कृष्णभक्तिं कृष्णदास्यं देहि मे कृष्णपूजिते ॥ ५६ ॥ एवं कृत्वा परीहारं स्तुत्वा च कवचं
पठेत् ॥ पुरा कृतं स्तोत्रमेतद्भक्तिदास्यप्रदं शुभम् ॥५७॥ एवं नित्यं पूजयेद्यो विष्णुतुल्यः स भारते ॥ जीवन्मुक्तश्च पूतश्च गोलोकं
याति निश्चितम् ॥ ५८ ॥ कार्त्तिकीपूर्णिमायां च राधां यः पूजयेच्छिवे ॥ एवं क्रमेण प्रत्यब्दं राजसूयफलं लभेत् ॥ ५९ ॥ परमै
श्वर्य्ययुक्तः स्यादिह लोके स पुण्यवान् ॥ सर्वपापाद्विनिर्मुक्तो यात्यन्ते विष्णुमन्दिरम् ॥ ६० ॥ आदावेवं क्रमेणैव रासे वृन्दावने
वने ॥ स्तुता सा पूजिता राधा श्रीकृष्णेन पुरा सती ॥६१॥ संपूजिता द्वितीये च धात्रा त्वेवं क्रमेण च ॥ त्वद्वरेण च संप्राप्य
विधाता वेदमातरम् ॥ ६२ ॥ नारायणो महालक्ष्मीं प्राप संपूज्य भारतीम् ॥ गंगां च तुलसीं चैव परां भुवनपावनीम् ॥ ॥६३॥
विष्णुः क्षीरोदशायी च प्राप सिन्धुसुतां तथा ॥ मृतायां दक्षकन्यायां मया कृष्णाज्ञया पुरा ॥ ६४ ॥ त्वमेव दुर्गा सम्प्राप्ता
पूजिता पुष्करे च सा ॥ अदितिं कश्यपः प्राप चन्द्रः संप्राप रोहिणीम् ॥ ६५ ॥ कामो रतिं च संप्राप धर्मो मूर्त्तिं पतिव्रताम्॥
देवाश्च मुनयश्चैव यां संपूज्य प्रतिव्रताम् ॥ ६६ ॥ संप्रापुर्यद्वरेणैव धर्मकामार्थमोक्षकम् ॥ एवं पूजाविधानं च कथितं च स्तवं
शृणु ॥ ६७ ॥ श्रीमहेश्वर उवाच ॥ एकदा मानिनी राधा बभूवागोचरा प्रभोः ॥ संसक्तस्य तुलस्यां च गोप्यां च तुलसीवने॥६८॥

---

१ चन्द्रावती–इति पाठः । २ नारायणे वने–इति पाठः ।

सा संहृत्य स्वमूर्त्तीश्च कलाः सर्वांश्च लीलया ॥ सर्वे बभूवुर्देवाश्च ब्रह्मविष्णुशिवादयः ॥ ६९ ॥ अष्टैश्वर्य्याश्च निश्श्रीका भार्य्याहीना ह्युपद्रुताः ॥ ते च सर्वे समालोच्य श्रीकृष्णं शरणं ययुः ॥ ७० ॥ तेषां स्तोत्रेण सन्तुष्टः स्नात्वा संपूज्य तां शुचिः ॥ तुष्टाव परमात्मा स सर्वेषां राधिकां सतीम् ॥ ७१ ॥ श्रीकृष्ण उवाच ॥ एवमेव प्रियोऽहं ते प्रमोदश्चैव ते मयि ॥ सुव्यक्तमद्य कापट्यवचनं ते वरानने ॥७२॥ हे कृष्ण त्वं मम प्राणा जीवात्मेति च सन्ततम् ॥ यद्ब्रूहि नित्यं प्रेम्णा त्वं साम्प्रतं तद्गतं द्रुतम् ॥ ॥ ७३ ॥ तस्मात्सर्वमलीकं ते वचनं जगदम्बिके ॥ क्षुरधारं च हृद्यं स्त्रीजातीनां च सर्वतः ॥ ७४ ॥ अस्माकं वचनं सत्यं यद्ब्रवीसि च तद्ध्रुवम् ॥ पञ्चप्राणाधिदेवी त्वं राधा प्राणाधिकेति मे ॥ ७५ ॥ शक्तो न रक्षितुं त्वां च यान्ति प्राणास्त्वया विना ॥ विनाऽधिष्ठातृदेवीं च को वा कुत्र च जीवति ॥७६॥ महाविष्णोश्च माता त्वं मूलप्रकृतिरीश्वरी ॥ सगुणा त्वं च कलया निर्गुणा स्वयमेव तु ॥७७॥ ज्योतीरूपा निराकारा भक्तानुग्रहविग्रहा ॥ भक्तानां रुचिवैचित्र्यान्नानामूर्त्तीश्च बिभ्रती ॥ ७८ ॥ महालक्ष्मीश्च वैकुण्ठे भारती च सतां प्रसूः ॥ पुण्यक्षेत्रे भारते च सती त्वं पार्वती तथा ॥ ७९ ॥ तुलसी पुण्यरूपा च गंगा भुवनपावनी ॥ ब्रह्मलोके च सावित्री कलया त्वं वसुन्धरा ॥८०॥ गोलोके राधिका त्वं च सर्वगोपालकेश्वरी ॥ त्वया विनाऽहं निर्जीवो ह्यशक्तः सर्व कर्म्मसु ॥ ८१ ॥ शिवः शक्तस्त्वया शक्त्या शवाकारस्त्वया विना ॥ वेदकर्त्ता स्वयं ब्रह्मा वेदमात्रा त्वया सह ॥ ८२ ॥ नारायणस्त्वया लक्ष्म्या जगत्पाता जगत्पतिः ॥ फलं ददाति यज्ञश्च त्वया दक्षिणया सह ॥८३॥ बिभर्त्ति सृष्टिं शेषश्च त्वां कृत्वा मस्तके भुवम् ॥ बिभर्त्ति गङ्गारूपां त्वां मूर्ध्नि गंगाधरः शिवः ॥८४॥ शक्तिमच्च जगत्सर्वं शवरूपं त्वया विना ॥ वक्ता सर्वस्त्वया वाण्या सूतो मूकस्त्वया विना ॥८५॥ यथा मृदा घटं कर्त्तुं कुलालः शक्तिमान्सदा ॥ सृष्टिं स्रष्टुं तथाऽहं च प्रकृत्या च त्वया सह ॥८६॥ त्वया विना जडश्चाहं सर्वत्र च न शक्तिमान् ॥ सर्वशक्तिस्वरूपा त्वं त्वमागच्छ ममान्तिकम् ॥ ८७ ॥ वह्नौ त्वं दाहिकाशक्तिर्नाग्निश्शक्तस्त्वया विना ॥ शोभास्वरूपा चन्द्रे त्वं त्वां विना न स सुन्दरः ॥ ८८ ॥ प्रभारूपा हि सूर्य्ये त्वं त्वां विना न स भानु

मान् ॥ न कामः कामिनीबन्धुस्त्वया रत्या विना प्रिये ॥८९॥ इत्येवं स्तवनं कृत्वा तां संप्राप जगत्प्रभुः ॥ देवा बभूवुः सश्रीकाः
सभार्य्याः शक्तिसंयुताः ॥ ९० ॥ सस्त्रीकं च जगत्सर्वं समभूच्छैलकन्यके ॥ गोपीपूर्णश्च गोलोको ह्यभवत्तत्प्रसादतः ॥ ९१ ॥
राजा जगाम गोलोकमिति स्तुत्वा हरिप्रियाम् ॥ श्रीकृष्णेन कृतं स्तोत्रं राधाया यः पठेन्नरः ॥ ९२ ॥ कृष्णभक्तिं च तद्दास्यं सं
प्राप्नोति न संशयः ॥ स्त्रीविच्छेदे यः शृणोति मासमेकमिदं शुचिः ॥ ९३ ॥ अचिराल्लभते भार्य्यां सुशीलां सुन्दरीं सतीम् ॥
भार्य्याहीनो भाग्यहीनो वर्षमेकं शृणोति यः॥ ९४ ॥ अचिराल्लभते भार्य्यां सुशीलां सुन्दरीं सतीम् ॥ पुरा मया च त्वं प्राप्ता स्तो
त्रेणानेन पार्वति ॥ ९५ ॥ मृतायां दक्षकन्यायामाज्ञया परमात्मनः ॥ स्तोत्रेणानेन संप्राप्ता सावित्री ब्रह्मणा पुरा ॥ ९६ ॥ पुरा
दुर्वाससः शापान्निश्श्रीके देवतागणे ॥ स्तोत्रेणानेन देवैस्तैः संप्राप्ता श्रीः सुदुर्लभा ॥ ९७ ॥ शृणोति वर्षमेकं च पुत्रार्थी लभते
सुतम् ॥ महाव्याधी रोगमुक्तो भवेत्स्तोत्रप्रसादतः ॥ ९८ ॥ कार्त्तिकीपूर्णिमायां तु तां संपूज्य पठेत्तु यः ॥ अचलां श्रियमाप्नोति
राजसूयफलं लभेत् ॥ ९९ ॥ नारी शृणोति चेत्स्तोत्रं स्वामिसौभाग्यसंयुता ॥ भक्त्या शृणोति यः स्तोत्रं बन्धनान्मुच्यते ध्रुवम्॥
॥ १०० ॥ नित्यं पठति यो भक्त्या राधां संपूज्य भक्तितः ॥ स प्रयाति च गोलोकं निर्मुक्तो भवबन्धनात् ॥ १०१ ॥ इति श्री
ब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादान्तर्गतहरगौरीसंवादे श्रीराधिकोपाख्याने राधापूजास्तोत्रादिकथनं नाम
पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥ श्रीपार्वत्युवाच ॥ पूजाविधानं स्तोत्रं च श्रुतमत्यद्भुतं मया ॥ अधुना कवचं ब्रूहि श्रोष्यामि
त्वत्प्रसादतः ॥ १ ॥ श्रीमहेश्वर उवाच ॥ शृणु वक्ष्यामि हे दुर्गे कवचं परमाद्भुतम् ॥ पुरा मह्यं निगदितं गोलोके परमात्मनः
॥ २ ॥ अतिगुह्यं परं तत्त्वं सर्वमन्त्रौघविग्रहम् ॥ यद्धृत्वा पठनाद्ब्रह्मा संप्राप्तो वेदमातरम् ॥ ३ ॥ यद्धृत्वाऽहं तव स्वामी सर्वमाता
सुरेश्वरी ॥ नारायणश्च यद्धृत्वा महालक्ष्मीमवाप सः ॥ ४ ॥ यद्धृत्वा परमात्मा च निर्गुणं प्रकृतेः परः ॥ बभूव शक्तिमान्कृष्णः
सृष्टिं कर्तुं पुरा विभुः॥५॥विष्णुः पाता च यद्धृत्वा संप्राप्तस्सिन्धुकन्यकाम् ॥ शेषो बिभर्ति ब्रह्माण्डं मूर्ध्नि सर्षपवद्यतः ॥६॥ प्रत्येकं

लोमकूपेषु ब्रह्माण्डानि महान्विराट्॥बिभर्ति धारणाद्यस्य सर्वाधारो बभूव सः ॥७॥ यद्धारणाच्च पठनाद्धर्म्मः साक्षी च सर्वतः॥ यद्धारणात्कुबेरश्च धनाध्यक्षश्च भारते ॥ ८ ॥ इन्द्रः सुराणामीशश्च पठनाद्धारणाद्विभुः ॥ नृपाणां मनुरीशश्च पठनाद्धारणात्प्रभुः ॥ ॥ ९ ॥ श्रीमांश्चन्द्रश्च यद्धृत्वा राजसूयं चकार सः ॥ स्वयं सूर्यस्त्रिलोकेशः पठनाद्धारणाद्धरिः ॥१०॥ यद्धृत्वा पठनादग्निर्जगत्पूतं करोति च॥यद्धृत्वा वाति वातोऽयं पुनाति भुवनत्रयम्॥ ११ ॥ यद्धृत्वा च स्वतन्त्रो हि मृत्युश्चरति जन्तुषु॥ त्रिःसप्तकृत्वो निःक्षत्रां चकार च वसुन्धराम् ॥ १२ ॥ जामदग्न्यश्च रामश्च पठनाद्धारणात्प्रभू ॥ पपौ समुद्रं यद्धृत्वा पठनात्कुम्भसम्भवः॥ १३ ॥ सनत्कुमारो भगवान्यद्धृत्वा ज्ञानिनां गुरुः ॥ जीवन्मुक्तौ च सिद्धौ च नरनारायणावृषी ॥१४॥ यद्धृत्वा पठनात्सिद्धो वसिष्ठो ब्रह्मपुत्रकः॥ सिद्धेशः कपिलो यस्माद्यस्माद्दक्षः प्रजापतिः ॥१५॥ यस्माद्भृगुश्च मां द्वेष्टि कूर्म्मः शेषं बिभर्त्ति च ॥ सर्वाधारो यतो वायुर्वरुणः पवनो यतः ॥ १६ ॥ ईशानो दिक्पतिश्चैव यमः शास्ता यतः शिवे ॥ कालः कालाग्निरुद्रश्च संहर्त्ता जगतां यतः ॥१७॥ यद्धृत्वा गौतमः सिद्धः कश्यपश्च प्रजापतिः ॥ वसुदेवसुतां प्राप चैकांशेन तु तत्कलाम् ॥१८॥ पुरा स्वजायाविच्छेदे दुर्वासा मुनिपुङ्गवः॥ संप्राप रामः सीतां च रावणेन हृतां पुरा ॥१९॥ पुरा नलश्च संप्राप दमयन्तीं यतः सतीम् ॥ शङ्खचूडो महावीरो दैत्यानामीश्वरो यतः ॥ २० ॥ वृषो वहति मां दुर्गे यतो हि गरुडो हरिम् ॥ एवं संप्राप संसिद्धिं सिद्धाश्च मुनयः पुरा[1] ॥२१ ॥ यद्धृत्वा च महालक्ष्मीः प्रदात्री सर्वसम्पदाम् ॥ सरस्वती सतां श्रेष्ठा यतः क्रीडावती रतिः ॥२२॥ सावित्री वेदमाता च यतः सिद्धिमवाप्नुयात्॥ सिन्धुकन्या मर्त्यलक्ष्मीर्यतो विष्णुमवाप सा ॥ २३ ॥ यद्धृत्वा तुलसी पूता गङ्गा भुवनपावनी ॥ यद्धृत्वा सर्वसस्याढ्या सर्वाधारा वसुन्धरा ॥ २४ ॥ यद्धृत्वा मनसादेवी सिद्धा वै विश्वपूजिता ॥ यद्धृत्वा देवमाता च विष्णुं पुत्रमवाप सा ॥ २५ ॥ पतिव्रता च यद्धृत्वा लोपामुद्राऽप्यरुन्धती ॥ लेभे च कपिलं पुत्रं देवहूती यतः सती ॥ २६ ॥ प्रियव्रतोत्तानपादौ सुतौ प्राप च

---

[1] सुरा इति पाठः ।

तत्प्रसूः ॥ त्वन्माता चापि संप्राप त्वां देवीं गिरिजां यतः ॥ २७ ॥ एवं सर्वे सिद्धगणाः सर्वैश्वर्य्यमवाप्नुयुः ॥ श्रीजगन्मङ्गलस्यास्य कवचस्य प्रजापतिः ॥ २८ ॥ ऋषिश्छन्दोऽस्य गायत्री देवी रासेश्वरी[1] स्वयम् ॥ श्रीकृष्णभक्तिसंप्राप्तौ विनियोगः प्रकीर्त्तितः ॥ २९ ॥ शिष्याय कृष्णभक्ताय ब्राह्मणाय प्रकाशयेत् ॥ शठाय परशिष्याय दत्त्वा मृत्युमवाप्नुयात् ॥ ३० ॥ राज्यं देयं शिरो देयं न देयं कवचं प्रिये ॥ कण्ठे धृतमिदं भक्त्या कृष्णेन परमात्मना ॥ ३१ ॥ मया दृष्टं च गोलोके ब्रह्मणा विष्णुना पुरा ॥ ॐ राधेति चतुर्थ्यन्तं वह्निजायान्तमेव च ॥ ३२ ॥ कृष्णेनोपासितो मन्त्रः कल्पवृक्षः शिरोऽवतु ॥ ॐ ह्रीं श्रीं राधिकां ङेन्तं वह्निजायान्तमेव च ॥ ३३ ॥ कपालं नेत्रयुग्मं च श्रोत्रयुग्मं सदाऽवतु ॥ ॐ ए ह्रीं श्रीं राधिकायै वह्निजायान्तमेव च ॥ ३४ ॥ मस्तकं केशसंघांश्च मन्त्रराजः सदाऽवतु ॥ ओं रां राधाचतुर्थ्यन्तं वह्निजायान्तमेव च ॥ ३५ ॥ सर्वसिद्धिप्रदः पातु कपोलं नासिकां मुखम् ॥ क्लीं श्रीकृष्णप्रिया ङेन्तं कण्ठं पातु नमोऽन्तकम् ॥ ३६ ॥ ओं रां रासेश्वरीं ङेन्तं स्कंधं पातु नमोऽन्तकम् ॥ ओं रां रासविलासिन्यै स्वाहा पृष्ठं सदाऽवतु ॥३७॥ वृन्दावनेविलासिन्यै[2] स्वाहा वक्षः सदाऽवतु ॥ तुलसीवनवासिन्यै स्वाहा पातु नितम्बकम् ॥ ३८ ॥ कृष्णप्राणाधिका ङेन्तं स्वाहान्तं प्रणवादिकम् ॥ पादयुग्मं च सर्वाङ्गं सन्ततं पातु सर्वतः ॥ ३९ ॥ प्राच्यां रक्षतु सा राधा वह्नौ कृष्णप्रियाऽवतु ॥ दक्षे रासेश्वरी पातु गोपीशा नैर्ऋतेऽवतु ॥ ४० ॥ पश्चिमे निर्गुणा पातु वायव्ये कृष्णपूजिता ॥ उत्तरे सन्ततं पातु मूलप्रकृतिरीश्वरी ॥ १४१ ॥ सर्वेश्वरी सदैशान्यां पातु मां सर्वपूजिता ॥ जले स्थले चान्तरिक्षे स्वप्ने जागरणे तथा ॥ ४२ ॥ महाविष्णोश्च जननी सर्वतः पातु सन्ततम् ॥ कवचं कथितं दुर्गे श्रीजगन्मङ्गलं परम् ॥ ४३ ॥ यस्मै कस्मै न दातव्यं गुह्याद्गुह्यतरं परम् ॥ तव स्नेहान्मयाऽऽख्यातं प्रवक्तव्यं न कस्यचित्॥४४॥गुरुमभ्यर्च्य विधिवद्वस्त्रालङ्कारचन्दनैः॥कण्ठे वा दक्षिणे बाहौ धृत्वा विष्णुसमो भवेत् ॥४५॥

---

१ वेदो रासेश्वरः–इति पाठः । २ वृन्दावनविलासिन्यै स्वाहा पातु नितम्बकम् । तुलसीवनवासिन्यै स्वाहा बाहुं सदाऽवतु–इति पाठः ।

शतलक्षजपेनैव सिद्धं च कवचं भवेत् ॥ यदि स्यात्सिद्धकवचो न दग्धो वह्निना भवेत् ॥ ४६ ॥ एतस्मात्कवचाद्दुर्गे
राजा दुर्य्योधनः पुरा ॥ विशारदो जलस्तम्भं वह्निस्तम्भं च निश्चितम् ॥ ४७ ॥ मया सनत्कुमाराय पुरा दत्तं च पुष्करे ॥ सूर्य्यपर्वणि
मेरौ च स सान्दीपनये ददौ॥४८॥बह्लाय तेन दत्तं च ददौ दुर्य्योधनाय सः॥कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः॥४९॥
नित्यं पठति भक्त्येदं तन्मन्त्रोपासकश्च यः॥विष्णुतुल्यो भवेन्नित्यं राजसूयफलं लभेत्॥५०॥स्नानेन सर्वतीर्थानां सर्वदानेन यत्फलम्॥
सर्वव्रतोपवासेन पृथिव्याश्च प्रदक्षिणैः॥५१॥सर्वयज्ञेषु दीक्षायां नित्यं वै सत्यरक्षणे ॥ नित्यं श्रीकृष्णसेवायां कृष्णनैवेद्यभक्षणे ॥
॥ ५२ ॥ पाठे चतुर्णां वेदानां यत्फलं च लभेन्नरः ॥ तत्फलं लभते नूनं पठनात्कवचस्य च ॥ ५३ ॥ राजद्वारे श्मशाने च
सिंहव्याघ्रान्विते वने ॥ दावाग्नौ संकटे चैव दस्युचौरान्विते भये ॥ ५४ ॥ कारागारे विपद्ग्रस्ते[1] घोरे च दृढबन्धने ॥ व्याधियुक्तो
भवेन्मुक्तो धारणात्कवचस्य च ॥ ५५ ॥ इत्येतत्कथितं दुर्गे तवैवेदं महेश्वरि॥त्वमेव सर्वरूपा मां माया पृच्छसि मायया ॥५६॥
श्रीनारायण उवाच ॥ इत्युक्त्वा राधिकाख्यानं स्मारंस्मारं च माधवम् ॥ पुलकाङ्कितसर्वाङ्गः साश्रुनेत्रो बभूव सः ॥ ५७ ॥ न
कृष्णसदृशो देवो न गङ्गासदृशी सरित् ॥ न पुष्करात्परं तीर्थं न वर्णो ब्राह्मणात्परः ॥ ५८ ॥ परमाणोः परं सूक्ष्मं महाविष्णोः
परो महान् ॥ नभः परं च विस्तीर्णं यथा नास्त्येव नारद ॥ ५९ ॥ यथा न वैष्णवाज्ज्ञानी योगीन्द्रः शङ्करात्परः ॥ कामक्रोधलोभमोहा
जितास्तेनैव नारद ॥ ६० ॥ स्वप्ने जागरणे शश्वत्कृष्णध्यानरतः शिवः ॥ यथा कृष्णस्तथा शम्भुर्न भेदो माधवेशयोः
॥ ६१ ॥ यथा शम्भुर्वैष्णवेषु यथा देवेषु माधवः ॥तथेदं कवचं वत्स कवचेषु प्रशस्तकम् ॥ ६२ ॥ शिशब्दो मङ्गलार्थश्च वकारो
दातृवाचकः ॥ मङ्गलानां प्रदाता यः स शिवः परिकीर्त्तितः ॥ ६३ ॥ नराणां सन्ततं विश्वे शं कल्याणं करोति यः ॥ कल्याणं
मोक्ष इत्युक्तं स एवं शङ्करः स्मृतः॥६४॥ब्रह्मादीनां सुराणां च मुनीनां वेदवादिनाम्॥तेषां च महतां देवो महादेवः प्रकीर्तितः॥६५॥

---

[1] रिपुग्रस्ते इति पाठः ।

महती पूजिता विश्वे मूलप्रकृतिरीश्वरी ॥ तस्या देवः पूजितश्च महादेवः स च स्मृतः ॥ ६६ ॥ विश्वस्थानां च सर्वेषां महतामीश्वरः स्वयम् ॥ महेश्वरं च तेनेमं प्रवदन्ति मनीषिणः ॥ ६७ ॥ हे ब्रह्मपुत्र धन्योऽसि यद्गुरुश्च महेश्वरः ॥ श्रीकृष्णभक्तिदाता यो भवान्पृच्छति मां च किम् ॥ ६८ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे राधिकोपाख्याने तन्मन्त्रादिकथनं नाम षट्पञ्चाशत्तमोऽध्यायः॥५६॥इति राधोपाख्यानम् ॥ नारद उवाच ॥ सर्वाख्यानं श्रुतं ब्रह्मन्नतीव परमाद्भुतम्॥अधुना श्रोतुमिच्छामि दुर्गोपाख्यानमुत्तमम्॥१॥दुर्गा नारायणीशाना विष्णुमाया शिवा सती ॥ नित्या सत्या भगवती शर्वाणी सर्वमङ्गला॥२॥अम्बिका वैष्णवी गौरी पार्वती च सनातनी॥नामानि कौथुमोक्तानि सर्वेषां शुभदानि च॥३॥अर्थं षोडशनाम्नां च सर्वेषामीप्सितं वरम्॥ ब्रूहि वेदविदां श्रेष्ठ वेदोक्तं सर्वसम्मतम् ॥४॥ केन वा पूजिता साऽऽदौ द्वितीये केन वा पुरा ॥ तृतीये वा चतुर्थे वा केन सर्वत्र पूजिता ॥ ५ ॥ नारायण उवाच ॥ अर्थं षोडशनाम्नां च विष्णुर्वेदे चकार सः ॥ ज्ञात्वा पुनः पृच्छसि त्वं कथयामि यथागमम् ॥ ६ ॥ दुर्गो दैत्ये महाविघ्ने भवबन्धे च कर्म्मणि ॥ शोके दुःखे च नरके यमदण्डे च जन्मनि ॥ ७ ॥ महाभयेऽति[1]रोगे चाप्याशब्दो हन्तृवाचकः ॥ एतान्हन्त्येव या देवी सा दुर्गा परिकीर्त्तिता ॥८॥ यशसा तेजसा रूपैर्नारायणसमा गुणैः ॥ शक्तिर्नारायणस्येयं तेन नारायणी स्मृता ॥ ९ ॥ ईशानः सर्वसिद्ध्यर्थे चाशब्दो दातृवाचकः ॥ सर्वसिद्धिप्रदात्री या साऽपीशाना प्रकीर्त्तिता ॥१०॥ सृष्टा माया पुरा सृष्टौ विष्णुना परमात्मना ॥ मोहितं मायया विश्वं विष्णुमाया प्रकीर्त्तिता ॥११॥ शिवे कल्याणरूपा च शिवदा च शिवप्रिया ॥ प्रिये दातरि चाशब्दः शिवा तेन प्रकीर्तिता ॥१२॥ सद्बुद्ध्यधिष्ठातृदेवी विद्यमाना युगे युगे॥पतिव्रता सुशीला च सा सती परिकीर्तिता॥१३॥यथा नित्यो हि भगवान्नित्या भगवती तथा॥स्वमायया तिरोभूता तत्रेशे प्राकृते लये॥१४॥आब्रह्मस्तम्बपर्यन्तं सर्वं मिथ्यैव कृत्रिमम्॥दुर्गा सत्यस्वरूपा सा प्रकृतिर्भगवान्यथा॥१५॥ सिद्धैश्वर्यादिकं सर्वं

---

[1] वेगे चेति पाठः ।

यस्यामस्ति युगे युगे ॥ सिद्धादिके भगो ज्ञेयस्तेन सा भगवती स्मृता ॥१६॥ सर्वान्मोक्षं प्रापयति जन्ममृत्युजरादिकम् ॥ चराच
रांश्च विश्वस्थाञ्छर्वाणी तेन कीर्तिता ॥ १७ ॥ मङ्गलं मोक्षवचनं चाशब्दो दातृवाचकः ॥ सर्वान्मोक्षान्या ददाति सैव स्यात्सर्वम
ङ्गला ॥ १८ ॥ हर्षे सम्पदि कल्याणे मंगलं परिकीर्तितम् ॥ तान्ददाति च सर्वेभ्यस्तेन सा सर्वमंगला ॥१९॥ अम्बेति मातृवचनो
वन्दने पूजने सदा ॥ पूजिता वन्दिता माता जगतां तेन साऽम्बिका ॥ २० ॥ विष्णुभक्ता विष्णुरूपा विष्णोः शक्तिस्वरूपिणी ॥
सृष्टौ च विष्णुना सृष्टा वैष्णवी तेन कीर्तिता ॥ २१ ॥ गौरः पीते च निर्लिप्ते परे ब्रह्मणि निर्म्मले ॥ तस्यात्मनः शक्तिरियं
गौरी तेन प्रकीर्तिता ॥ २२ ॥ गुरुः शम्भुश्च सर्वेषां तस्य शक्तिः या सती ॥ गुरुः कृष्णश्च तन्माया गौरी तेन प्रकीर्त्तिता ॥
॥ २३ ॥ तिथिभेदे पर्वभेदे[1] कल्पभेदेऽन्यभेदके ॥ ख्यातौ तेषु च विख्याता पार्वती तेन कीर्तिता ॥ २४ ॥ महोत्सवविशेषे च पर्व
न्निति सुकीर्तिता ॥ तस्याधिदेवी या सा च पार्वती परिकीर्त्तिता॥२५॥पर्वतस्य सुता देवी साऽऽविर्भूता च पर्वते॥ पर्वताधिष्ठातृदेवी
पार्वती तेन कीर्त्तिता ॥ २६ ॥ सर्वकाले सना प्रोक्तो विस्तृते च तनीति च ॥ सर्वत्रसर्वकाले च विद्यमाना सनातनी ॥२७॥ अर्थः
षोडशनाम्नां च कीर्त्तितश्च महामुने ॥ यथागमं त्वं वेदोक्तोपाख्यानं च निशामय ॥२८॥ प्रथमे पूजिता सा च कृष्णेन परमात्मना॥
वृन्दावने च सृष्ट्यादौ गोलोके रासमण्डले ॥ २९ ॥ मधुकैटभभीतेन ब्रह्मणा सा द्वितीयतः ॥ त्रिपुरप्रेरितेनैव तृतीये त्रिपुरारिणा॥
॥ ३० ॥ भ्रष्टश्रिया महेन्द्रेण शापाद्दुर्वाससः पुरा ॥ चतुर्थे पूजिता देवी भक्त्या भगवती सती ॥ ३१ ॥ तदा मुनीन्द्रैः सिद्धेन्द्रै
र्देवैश्च मुनिपुङ्गवैः ॥ पूजिता सर्वविश्वेषु समभूत्सर्वतः सदा ॥ ३२ ॥ तेजस्सु सर्वदेवानां साऽऽविर्भूता पुरा मुने ॥ सर्वे देवा ददु
स्तस्यै शस्त्राण्याभरणानि च ॥ ३३ ॥ दुर्गादयश्च दैत्याश्च निहता दुर्गया तया ॥ दत्तं स्वराज्यं देवेभ्यो वरं च यदभीप्सितम् ॥
॥ ३४ ॥ कल्पान्तरे पूजिता सा सुरथेन महात्मना ॥ राज्ञा च मेधशिष्येण मृन्मय्यां च सरित्तटे ॥ ३५ ॥ मेधादिभिश्च महर्षैः

---

[1] सर्वभेदे—इति पाठः।

कृष्णसारैश्च मण्डकैः ॥ छागैरिक्षुसुकूष्माण्डैः पक्षिभिर्बलिभिर्मुने ॥ ३६ ॥ वेदोक्तांश्चैव दत्त्वैवमुपचारांस्तु षोडश ॥ ध्यात्वा च
कवचं धृत्वा संपूज्य च विधानतः ॥ ३७ ॥ राजा कृत्वा परीहारं वरं प्राप यथेप्सितम् ॥ मुक्तिं संप्राप वैश्यश्च संपूज्य च सरित्तटे
॥३८॥ तुष्टाव राजा वैश्यश्च साश्रुनेत्रः कृताञ्जलिः ॥ ससर्ज मृन्मयीं तां वै गभीरे निर्मले जले ॥३९॥ मृन्मयीं तामदृष्ट्वा च
जलधौतां नराधिपः ॥रुरोद च तदा वैश्यस्ततः स्थानान्तरं ययौ ॥ ४० ॥ त्यक्त्वा देहं च वैश्यस्तु पुष्करे दुष्करं तपः ॥ ४१ ॥
कृत्वा जगाम गोलोकं दुर्गादेवीवरेण सः ॥ राजा ययौ स्वराज्यं च पूज्यो निष्कण्टकं बली ॥ ४२ ॥ भोगं च बुभुजे भूपः
षष्टिवर्षसहस्रकम् ॥ भार्यां स्वराज्यं संन्यस्य पुत्रे वै कालयोगतः ॥४३॥ मनुर्बभूव सावर्णिस्तप्त्वा वै पुष्करे तपः ॥ इत्येवं कथितं
वत्स समासेन यथागमम्॥४४॥दुर्गाख्यानं मुनिश्रेष्ठ किं भूयः श्रोतुमिच्छसि॥४५॥इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृ० नारदनारायणसंवादे दुर्गोपाख्याने दुर्गादिनामव्युत्पत्त्यादिकथनं नाम सप्तपञ्चाशत्तमोऽध्यायः॥५७॥नारद उवाच॥कस्य वंशोद्भवो राजा
सुरथो धर्म्मिणां वरः॥कथं संप्राप वै ज्ञानं मेधसो ज्ञानिनां वरात्॥१॥कस्य वंशोद्भवो ब्रह्मन्मेधसो मुनिसत्तम॥ बभूव कुत्र संवादो नृपस्य
मुनिना सह॥२॥सख्यं बभूव कुत्रास्य वा प्रभो नृपवैश्ययोः॥व्यासेन श्रोतुमिच्छामि वद वेदविदां वर॥३॥ नारायण उवाच ॥ अत्रिश्च
ब्रह्मणः पुत्रस्तस्य पुत्रो निशाकरः ॥ स च कृत्वा राजसूयं द्विजराजो बभूव ह ॥ ४ ॥ गुरुपत्न्यां च तारायां तस्याभूच्च बुधः
सुतः ॥ बुधपुत्रस्तु चैत्रश्च तत्पुत्रः सुरथः स्मृतः ॥ ५ ॥ नारद उवाच ॥ गुरुपत्न्यां च तारायां समभूत्तत्सुतः कथम्॥ अहो व्यतिक्रमं
ब्रूहि वेदस्य च महामुने ॥ ६ ॥ नारायण उवाच ॥ सम्पन्मत्तो महाकामी व्यचरज्जाह्नवीतटे ॥ तारां सुरगुरोः पत्नीं धर्म्मिष्ठां
च पतिव्रताम् ॥ ७ ॥ सुस्नातां सुन्दरीं रम्यां पीनोन्नतपयोधराम् ॥ सुश्रोणीं सुनितम्बाढ्यां मध्यक्षीणां मनोहराम् ॥ ८ ॥ सुदतीं
कोमलांगीं च नवयौवनसंयुताम् ॥ सूक्ष्मवस्त्रपरीधानां रत्नभूषणभूषिताम् ॥ ९ ॥ कस्तूरीबिन्दुना सार्द्धमधश्चन्दनबिन्दुना ॥ सिन्दूरबिन्दुना
चारुफालमध्यस्थलोज्ज्वलाम् ॥ १० ॥ वायुनाऽधोवस्त्रहीनां सकामां रक्तलोचनाम् ॥ शरत्पार्वणचन्द्रास्यां पक्वबिम्बा

धरां वराम् ॥ ११ ॥ सस्मितां नम्रवक्त्रां च लज्जया चन्द्रदर्शनाम् ॥ गच्छन्तीं स्वगृहं हर्षान्मत्तवारणगामिनीम् ॥ १२ ॥ तां दृष्ट्वा
मन्मथाक्रान्तश्चन्द्रो लज्जां जहौ मुने ॥ पुलकांकितसर्वाङ्गः सकामस्तामुवाच सः ॥ १३ ॥ चन्द्र उवाच ॥ योषिच्छ्रेष्ठे क्षणं तिष्ठ
वरिष्ठे रसिकासु च ॥ सुविदग्धे विदग्धानां मनो हरसि सन्ततम् ॥ १४ ॥ निषेव्य प्रकृतिं जन्मसहस्रं कामसागरे ॥ तपःफलेन
त्वां प्राप बृहच्छ्रोणीं बृहस्पतिः ॥ १५ ॥ अहो तपस्विना सार्द्धमविदग्धेन वेधसा ॥ योजिता त्वं रसवती शश्वत्कामातुरा वरा
॥ १६ ॥ किं वा सुखं च विज्ञातमविज्ञेषु समागमे ॥ विदग्धाया विदग्धेन सङ्गमः सुखसागरः ॥ १७ ॥ कामेन कामिनी त्वं च
दग्धाऽसि व्यर्थमीश्वरि ॥ कर्मणा वाऽऽत्मदोषाद्वा को जानाति मनः स्त्रियाः ॥ १८ ॥ दिने दिने वृथा याति दुर्लभं नवयौवनम् ॥
नवीनयौवनस्थाया वृद्धेन स्वामिना तव ॥ १९ ॥ शश्वत्तपस्यायुक्तश्च कृष्णमात्मानमीप्सितम् ॥ स्वप्ने जागरणे वाऽपि ध्यायन्नास्ते
बृहस्पतिः ॥ २० ॥ सर्वकामरसज्ञा त्वं निष्कामं काममीप्सितम् ॥ ध्यायन्ती कामुकी शश्वद्यूनां शृंगारमात्मनि ॥ २१ ॥ अन्यश्च
त्वन्मनःकामो भिन्नं त्वद्भर्तुरीप्सितम् ॥ ययोश्च भिन्नौ विषयौ का प्रीतिः संगमे तयोः ॥ २२ ॥ वासन्तीपुष्पतल्पे च गन्धचन्दन
चर्चिते ॥ मोदस्व मां गृहीत्वा त्वं वसन्ते माधवीवने ॥ २३ ॥ सुगन्ध्युत्फुल्लकुसुमे निर्जने चन्दने वने ॥ भवती युवती भाग्यवती
तत्रैव मोदताम् ॥ २४ ॥ चन्दने चम्पकवने शीतचम्पकवायुना ॥ रम्ये चम्पकतल्पे च क्रीडां कुरु मया सह ॥ २५ ॥ इत्युक्त्वा मदनो
न्मत्तो मदनाधिकसुन्दरः ॥ पपात चरणे देव्या मन्दो मन्दाकिनीतटे ॥ २६ ॥ निरुद्धमार्गा चन्द्रेण शुष्ककण्ठौष्ठतालुका ॥ अभी
तोवाच कोपेन रक्तपंकजलोचना ॥ २७ ॥ तारोवाच ॥ धिक् त्वां चन्द्र तृणं मन्ये परस्त्रीलम्पटं शठम् ॥ अत्रेरभाग्यात्त्वं पुत्रो
व्यर्थं ते जन्म जीवनम् ॥ २८ ॥ अरे कृत्वा राजसूयमात्मानं मन्यसे बली ॥ बभूव पुण्यं ते व्यर्थं विप्रस्त्रीषु च यन्मनः ॥ २९ ॥
यस्य चित्तं परस्त्रीषु सोऽशुचिः सर्वकर्मसु ॥ न कर्मफलभाक्पापी निन्द्यो विश्वेषु सर्वतः ३० ॥ सतीत्वं मे नाशयसि यक्ष्मग्रस्तो
भविष्यसि ॥ अत्युच्छ्रितो निपतनं प्राप्नोतीति श्रुतौ श्रुतम् ॥ ३१ ॥ दुष्टानां दर्पहा कृष्णो दर्पं ते निहनिष्यति ॥ त्यज मां मातरं

वत्स सत्यं ते शं भविष्यति ॥ ३२ ॥ इत्युक्त्वा तारका साध्वी रुरोद च मुहुर्मुहुः ॥ चकार साक्षिणं धर्मं सूर्य्यं वायुं हुताशनम्
॥ ३३ ॥ ब्रह्माणं परमात्मानमाकाशं पवनं धराम् ॥ दिनं रात्रिं च सन्ध्यां च सर्वं सुरगणं मुने ॥ ३४ ॥ तारकावचनं श्रुत्वा न
भीतः स चुकोप ह॥करे धृत्वा रथे तूर्णं स्थापयामास सुन्दरीम् ॥३५॥ रथं च चालयामास मनोयायी मनोहरम्॥मनोहरां गृहीत्वा
तां स च रेमे मनोहरम् ॥ ३६ ॥ विस्पन्दके सुरवने चन्दने पुष्पभद्रके ॥ पुष्करे च नदीतीरे पुष्पिते पुष्पकानने ॥३७॥ सुगन्धि
पुष्पतल्पे च पुष्पचन्दनवायुना ॥ निर्जने मलयद्रोण्यां स्निग्धचन्दनचर्चिते ॥ ३८ ॥ शैले शैले नदे नद्यां शृंगारं कुर्वतोस्तयोः ॥
गतं वर्षशतं हर्षान्मुहूर्त्तमिव नारद ॥ ३९ ॥ बभूव शरणापन्नो भीतो दैत्येषु चन्द्रमाः ॥ तेजस्विनि तथा शुक्रे तेषां च बलिनां गुरौ
॥ ४० ॥ अभयं च ददौ तस्मै कृपया भृगुनन्दनः ॥ गुरुं जहास देवानां सुविपक्षं बृहस्पतिम् ॥ ४१ ॥ सभायां जहसुर्दृष्ट्वा बलिनो
दितिनन्दनाः ॥ अभयं च ददुस्तस्मै भीताय च कलङ्किने ॥ ४२ ॥ सतीसतीत्वध्वंसेन पापिष्ठचन्द्रमण्डले ॥ बभूव शशरूपं च
कलंकं निर्मले मलम् ॥ ४३ ॥ उवाच तं महाभीतं शुक्रो वेदविदां वरः ॥ हितं तथ्यं वेदयुक्तं परिणामसुखावहम् ॥ ४४ ॥ शुक्र
उवाच ॥ त्वमहो ब्रह्मणः पौत्रोऽप्यत्रेर्भगवतः सुतः ॥ दुर्नीतं कर्म ते पुत्र नीचवन्नयशस्करम् ॥ ४५ ॥ राजसूयस्य सुफले
निर्मले कीर्त्तिमण्डले ॥ सुधाराशौ सुराबिन्दुरूपमंकमुपार्जितम् ॥ ४६ ॥ त्यज देवगुरोः पत्नीं प्रसूमिव महासतीम् ॥
धर्मिष्ठस्य वरिष्ठस्य ब्राह्मणानां बृहस्पतेः ॥ ४७ ॥ शम्भोः सुराणामीशस्य गुरुपुत्रस्य वेधसः ॥ पौत्रस्यांगिरसे
नित्यं ज्वलतो ब्रह्मतेजसा ॥४८॥ शत्रोरपि गुणा वाच्या दोषा वाच्या गुरोरपि ॥ इति सद्वंशजातानां स्वभावं च सतामपि ॥४९॥
स शत्रुर्मे सुरगुरुः परो विश्वे निशाकर ॥ तथाऽपि सहजाख्यानं वर्णितं धर्मसंसदि ॥ यत्र लोकाश्च धर्मिष्ठास्तत्र धर्मः सनातनः ॥
॥ ५० ॥ यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः ॥ गौरेकं पञ्च च व्याघ्री सिंही सप्त प्रसूयते ॥ ५१ ॥ हिंसकाः प्रलयं
यान्ति धर्मो रक्षति धार्मिकम् ॥ देवाश्च गुरवो विप्राः शक्ता यद्यपि रक्षितुम् ॥५२॥ तथाऽपि नहि रक्षन्ति धर्मघ्नं पापिनं जनम्॥

कुलटा विप्रपत्नीनां गमने सुरविप्रयोः ॥ ५३ ॥ ब्रह्महत्याषोडशांशपातकं च भवेद्ध्रुवम् ॥ तासामुपस्थितानां च गमने तच्चतुर्थकम् ॥ ५४ ॥ विप्रपत्नीसतीनां च गमनं वै बलेन चेत् ॥ ब्रह्महत्याशतं पापं भवेदेव श्रुतौ श्रुतम् ॥ ५५ ॥ धर्म्मं चर महाभाग ब्राह्मणीं त्यज साम्प्रतम् ॥ कृत्वाऽनुतापं पापाच्च निवृत्तिस्तु महाफला ॥ ५६ ॥ उपायेन च ते पापं दूरीभूतं भवेन्ननु ॥ शरणागत भीतस्य मयि देवस्य धर्मतः ॥ ५७ ॥ शस्त्रहीनं च भीतं च दीनं च शरणार्थिनम् ॥ यो न रक्षत्यधर्मिष्ठः कुम्भीपाके वसेद्ध्रुवम्॥ ॥ ५८ ॥ राजसूयशतानां च रक्षिता लभते फलम् ॥ परमैश्वर्य्ययुक्तश्च धर्मेण स भवेदिह ॥ ५९ ॥ इत्युक्त्वा वै दैत्यगुरुः स्वर्गे मन्दाकिनीतटे ॥ स्नात्वा तं स्नापयामास विष्णुपूजां चकार सः ॥ ६० ॥ विष्णुपादाब्जजातेन तन्नैवेद्यं शुभप्रदम् ॥ गंगोदकेन पुण्येन भोजयामास चन्द्रकम् ॥६१॥ क्रोडे कृत्वा तु तं भीतं सज्जितं पापकर्म्मणा ॥ कुशहस्तस्तमित्यूचे स्मारंस्मारं हरिं मुने ॥ ॥ ६२ ॥ शुक्र उवाच ॥ यद्यस्ति[1] मे तपः सत्यं सत्यं पूजाफलं हरे ॥ सत्यं व्रतफलं चैव सत्यं सत्यवचःफलम् ॥ ६३ ॥ तीर्थस्नानफलं सत्यं सत्यं दानफलं यदि ॥ उपवासफलं सत्यं पापान्मुक्तो भवान्भवेत् ॥ ६४ ॥ विप्रं त्रिसन्ध्याहीनं या विष्णुपूजाविहीनकम् ॥ तन्नाप्नोतु महाघोरं चन्द्रपापं सुदारुणम् ॥ ६५ ॥ स्वभार्य्यांवञ्चनं कृत्वा यः प्रयाति परस्त्रियम् ॥ स यातु नरकं घोरं चन्द्रपापेन पातकी ॥६६॥ वाचा वा ताडयेत्कान्तं दुश्शीला दुर्मुखा च या ॥ सा युगं चन्द्रपापेन यातु लालामुखं ध्रुवम् ॥६७॥ अनैवेद्यं वृथान्नं च यश्च भुङ्क्ते हरेर्द्विजः ॥ स यातु कालसूत्रं च चन्द्रपापाच्चतुर्युगम् ॥ ६८ ॥ अम्बुवाच्यं भूखननं यः करोति नराधमः ॥ चन्द्रपापाद्युगशतं कालसूत्रं स गच्छतु ॥ ६९ ॥ स्वकान्तं वञ्चयित्वा च या याति परपूरुषम् ॥ सा यातु वह्निकुण्डं च चन्द्रपापाच्चतुर्युगम् ॥ ७० ॥ कीर्त्तिं करोति रजसा परकीर्त्तिं विलुप्य च ॥ स युगं चन्द्रपापेन कुम्भीपाकं च गच्छतु ॥ ७१ ॥ पितरं मातरं भार्य्यां यो न पुष्णाति पातकी ॥ स्वगुरुं चन्द्रपापेन यातु चण्डालतां ध्रुवम् ॥ ७२ ॥ कुलटान्नमवीरान्नमृतुस्नातान्न

---

[1] यद्यचेति पाठः ।

मेव च ॥ योऽश्नाति चन्द्रपापं च यातु तं पापिनं ध्रुवम् ॥७३॥ स यातु तेन पापेन कुम्भीपाकं चतुर्युगम् ॥ तस्मादुत्तीर्य्य चाण्डालीं
योनिमाप्नोति पातकी ॥ ७४ ॥ दिवसे यो ग्राम्यधर्मं महापापी करोति च ॥ यो गच्छेत्कामतः कामी गुर्विणीं वा रजस्वलाम् ॥
७५ ॥ तं यातु चन्द्रपापं च महाघोरं च पापिनम् ॥ स यातु तेन पापेन कालसूत्रं चतुर्युगम् ॥७६॥ मुखं श्रोणीं स्तनं
चापि यः पश्यति परस्त्रियाः ॥ कामतः कामदग्धश्च यातु तं चन्द्रकल्मषम् ॥७७॥ स यातु लालाभक्ष्यं च चन्द्रपापाच्चतुर्युगम् ॥
तस्मादुत्तीर्य्य भवतु चाण्डालोऽन्धो नपुंसकः ॥ ७८ ॥ कुहूपूर्णेन्दुसंक्रान्तिचतुर्दश्यष्टमीषु च ॥ मांसं मसूरं लकुचं यश्च भुङ्क्ते
रवेर्दिने ॥ ७९ ॥ कुरुते ग्राम्यधर्मं च यातु तं चन्द्रकिल्बिषम् ॥ चतुर्युगं कालसूत्रं तेन पापेन गच्छतु ॥ ८० ॥ तस्मादुत्तीर्य्य
चाण्डालीं योनिमाप्नोति पातकी ॥ सप्तजन्मसु सद्रोगी दरिद्रः कुब्ज एव च ॥८१॥ एकादश्यां च यो भुङ्क्ते कृष्णजन्माष्टमीदिने॥
शिवरात्रौ महापापी यातु तं चन्द्रपातकम् ॥ ८२ ॥ स यातु कुम्भीपाकं च यावदिन्द्राश्चतुर्दश ॥ तेन पापेन चाप्नोतु चाण्डालीं
योनिमेव च ॥ ८३ ॥ ताम्रस्थं दुग्धमाध्वीकमुच्छिष्टे घृतमेव च ॥ नारिकेलोदकं कांस्ये दुग्धं सलवणं तथा ॥ ८४ ॥ पीतशेष
जलं चैव भुक्तशेषं तथौदनम् ॥ असकृच्चौदनं भुङ्क्ते सूर्य्ये नास्तं गते द्विजः ॥ ८५ ॥ तं यातु चन्द्रपापं च दुर्निवारं च दारुणम् ॥
स यातु तेन पापेन चान्धकूपं चतुर्युगम् ॥ ८६ ॥ स्वकन्याविक्रयी विप्रो देवलो वृषवाहकः ॥ शूद्राणां शवदाही च तेषां
वै सूपकारकः ॥ ८७ ॥ अश्वत्थतरुघाती च विष्णुवैष्णवनिन्दकः ॥ तं यातु चन्द्रपापं च दारुणं पापिनं भृशम् ॥
॥ ८८ ॥ स यातु तस्मात्पापाच्च तप्तसूर्मीं च पातकी ॥ शश्वद्दग्धो भवतु स यावदिन्द्राश्चतुर्दश ॥ ८९ ॥ तस्मादुत्तीर्य्य
चाण्डालीं योनिमाप्नोति पातकी ॥ सप्तजन्मसु चाण्डालो वृषभः पञ्चजन्मसु ॥ ९० ॥ गर्दभो जन्मशतकं
सूकरस्सप्तजन्मसु ॥ तीर्थध्वांक्षस्सप्तसु वै विट्कृमिः पञ्चजन्मसु ॥ जलौका जन्मशतकं शुचिर्भवतु तत्परम् ॥ ९१ ॥
वृथा मांसं च यो भुङ्क्ते स्वार्थं पाकान्नमेव च ॥ तददत्तं महापापी प्राप्नुयाच्चन्द्रपातकम् ॥ ९२ ॥ स यातु चन्द्रपापेन चासिपत्रं चतु

युगम् ॥ ततो भवतु सर्पश्च पशुस्स्यात्सप्तजन्मसु ॥ ९३ ॥ विप्रो वार्धुषिको यो हि योनिजीवी चिकित्सकः ॥हरेर्नाम्नां च विक्रेता यश्च वा स्वाङ्गविक्रयी ॥९४॥ स्वधर्मकथकश्चैव यश्च स्वात्मप्रशंसकः ॥ मषीजीवी धावकश्च कुलटापोष्य एव च ॥९५॥ तं यातु चन्द्रपापं च चन्द्रो भवतु विज्वरः ॥ स यातु तेन पापेन शूलप्रोतं सुदारुणम् ॥९६॥ तत्र विद्धो भवतु स यावदिन्द्राश्चतुर्दश ॥ ततो दरिद्रो रोगी च दीक्षाहीनो नरः पशुः ॥ ९७ ॥ लाक्षामांसरसानां च तिलानां लवणस्य च ॥ अश्वानां चैव लौहानां विक्रेता नरघातकः ॥ ९८ ॥ विप्रः कुलालः चौरश्च यातु तं चन्द्रपातकम् ॥स यातु तेन पापेन क्षुरधारं सुदुःसहम् ॥ ९९ ॥ तत्र च्छिन्नो भवतु स यावदिन्द्रसहस्रकम् ॥ तस्मादुत्तीर्य्य स भवेत्सृगालः सप्तजन्मसु ॥ १०० ॥ सप्तजन्मसु मार्जारो महिषो जन्मपञ्चकम् ॥ सप्तजन्मसु भल्लूकः कुक्कुरस्सप्तजन्मसु[1] ॥ १०१ ॥ मत्स्यश्च[2] जन्मशतकं कर्कटी जन्मपञ्चकम् ॥ गोधिका जन्मशतकं गर्द्दभः सप्तजन्मसु ॥ १०२ ॥ सप्तजन्मसु मण्डूकस्ततः स्यान्मानवोऽधमः ॥चर्म्मकारश्च रजकस्तैलकारश्च वर्द्धकिः ॥१०३॥ नाविकः शवजीवी च व्याधश्च स्वर्णकारकः ॥ कुम्भकारो लोहकारस्ततः क्षत्रस्ततो द्विजः ॥ १०४ ॥ इति चन्द्रं शुचिं कृत्वा समुवाच तु तारकाम् ॥ त्यक्त्वा चन्द्रं महासाध्वि गच्छ कान्तमिति द्विजः ॥ १०५ ॥ प्रायश्चित्तं विना पूता त्वमेवं शुद्धमानसा ॥ अकामा या बलिष्ठेन न स्त्री जारेण दुष्यति ॥ १०६ ॥ इत्येवमुक्त्वा शुक्रश्च चन्द्रं वा तारकां सतीम् ॥ सस्मितां सस्मितं चैव चकार च शुभाशिषः ॥ १०७ ॥ इति श्री० ब्र० वै० महापु० द्विती० प्रकृतिख० नारदनारायणसं० दुर्गोपाख्याने ताराचन्द्रयोर्दोषनिवारणं नामाष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥ नारद उवाच ॥ बृहस्पतिः किं चकार तारकाहरणान्तरे॥कथं संप्राप तां साध्वीं तन्मे व्याख्यातुमर्हसि ॥ १ ॥ श्रीनारायण उवाच ॥ दृष्ट्वा विलम्बं तारायाः भ्रान्त्याश्चापि गुरुः स्वयम् ॥ प्रस्थापयामास शिष्यमन्वेषार्थं च जाह्नवीम् ॥ २ ॥ शिष्यो गत्वा च तद्वृत्तं ज्ञात्वा वै लोकवक्त्रतः॥ रुदन्नुवाच स्वगुरुं तारकाहरणं मुने ॥ ३ ॥ श्रुत्वा सुरगुरुर्वार्तां

---

[1] जन्मपञ्चकमिति पाठः । [2] आखुश्च जन्मशतकं कुक्कुटो वेति पाठः ।

शशिना च प्रियां हृताम् ॥ मुहूर्त्तं प्राप मूर्च्छां च ततः संप्राप्य चेतनाम् ॥ ४ ॥ रुरोदोच्चैः सशिष्यश्च हृदयेन विदूयता ॥ शोकेन
लज्जयाऽऽविष्टो विललाप मुहुर्मुहुः॥५॥उवाच शिष्यान्सम्बोध्य नीतिं च श्रुतिसम्मताम् ॥ साश्रुनेत्रः साश्रुनेत्राञ्छोकार्तः शोककर्शि
तान् ॥६॥ बृहस्पतिरुवाच ॥ हे वत्साः केन शप्तोऽहं न जाने कारणं परम् ॥ दुःखं धर्म्मविरुद्धो यः स प्राप्नोति न संशयः ॥७॥
यस्य नास्ति सती भार्य्या गृहेषु प्रियवादिनी ॥अरण्यं तेन गन्तव्यं यथाऽरण्यं तथा गृहम् ॥ ८ ॥ भावानुरक्ता वनिता हृता यस्य
च शत्रुणा ॥ अरण्यं तेन गन्तव्यं यथाऽरण्यं तथा गृहम् ॥ ९ ॥ सुशीला सुन्दरी भार्य्या गता यस्य गृहादहो ॥ अरण्यं तेन गन्त
व्यं यथाऽरण्यं तथा गृहम् ॥१०॥ दैवेनापहृता यस्य पतिसाध्या पतिव्रता ॥ अरण्यं तेन गन्तव्यं यथाऽरण्यं यथा गृहम् ॥ ११ ॥
यस्य माता गृहे नास्ति गृहिणी वा सुशासिता ॥ अरण्यं तेन गन्तव्यं यथाऽरण्यं तथा गृहम् ॥ १२ ॥ प्रियाहीनं गृहं यस्य पूर्णं
द्रविणबन्धुभिः ॥ अरण्यं तेन गन्तव्यं यथाऽरण्यं तथा गृहम् ॥ १३ ॥ भार्याशून्या वनसमाः सभार्याश्च गृहा गृहाः ॥ गृहिणी च
गृहं प्रोक्तं न गृहं गृहमुच्यते ॥१४॥ अशुचिः स्त्रीविहीनश्च दैवे पित्र्ये च कर्मणि ॥ यदह्ना कुरुते कर्म न तस्य फलभाग्भवेत्॥१५॥
दाहिकाशक्तिहीनश्च यथा मन्दो हुताशनः ॥ प्रभाहीनो यथा सूर्य्यः शोभाहीनो यथा शशी ॥ १६ ॥ शक्तिहीनो यथा जीवो यथा
चात्मा तनुं विना ॥ विनाऽऽधारं यथाऽऽधेयो यथेशः प्रकृतिं विना ॥ १७ ॥ न च शक्तो यथा यज्ञः फलदो दक्षिणां विना॥कर्मणां
च फलं दातुं सामग्री मूलमेव च ॥ १८ ॥ विनास्वर्णं स्वर्णकारो यथा शक्तः स्वकर्मणि ॥ यथा शक्तः कुलालश्च मृत्तिकां[1] च
विना द्विजाः ॥ १९ ॥ तथा गृही न शक्तश्च सततं सर्वकर्मणि ॥ गृहाधिष्ठातृदेवीं च स्वशक्तिगृहिणीं विना ॥ २० ॥ भार्य्यामूलाः
क्रियाः[2] सर्वा भार्य्यामूला गृहास्तथा ॥ भार्य्यामूलं सुखं सर्वं गृहस्थानां गृहे सदा ॥ २१ ॥ भार्य्यामूलः सदा हर्षो भार्य्यामूलं च
मङ्गलम् ॥ भार्य्यामूलं च संसारो भार्य्यामूलं च सौ[3]रभम् ॥ २२ ॥ यथा रथश्च रथिनां गृहिणां च तथा गृहम् ॥सारथिस्तु यथा

---

१ घटं च मृत्तिकां विनाः इति पाठः । २ च पुत्राश्चेति पाठः । ३ सौरतमिति पाठः ।

तेषां गृहिणां च तथा प्रिया ॥ २३ ॥ सर्वरत्नप्रधाना च स्त्रीरत्नं दुष्कुलादपि ॥ गृहीता सा गृहस्थेनैवेत्याह कमलोद्भवः ॥ २४ ॥ यथा जलं विना पद्मं पद्मं शोभां विना यथा ॥ तथैव पुंसां स्वगृहं गृहिणां गृहिणीं विना ॥ २५ ॥ इत्येवमुक्त्वा स गुरुः प्रविवेश गृहं मुहुः ॥ गृहाद्बहिर्निस्ससार भूयो भूयः शुचाऽन्वितः ॥ २६ ॥ मुहुर्मुहुश्च मूर्च्छां च चेतनां समवाप सः ॥ भूयोभूयो रुरोदोच्चैः स्मारंस्मारं प्रियागुणान् ॥ २७ ॥ अथान्तरे महाज्ञानी ज्ञानिभिश्च प्रबोधितः ॥ सच्छिष्यैर्मुनिभिश्चान्यैः पुरन्दरगृहं ययौ ॥ २८ ॥ स गुरुः पूजितस्तेन चातिथ्येन मरुत्वता ॥ तमुवाच स्ववृत्तान्तं हृदि शल्यमिवाप्रियम् ॥ २९ ॥ बृहस्पतिवचः श्रुत्वा रक्तपङ्कजलोचनः ॥ तमुवाच महेन्द्रश्च कोपप्रस्फुरिताधरः ॥ ३० ॥ महेन्द्र उवाच ॥ दूतानां वै सहस्रं च चारकर्मणि गच्छतु ॥ अतीव निपुणं दक्षं तत्त्वप्राप्तिनिमित्तकम् ॥ ३१ ॥ यत्रास्ति पातकी चन्द्रो मन्मात्रा तारया सह ॥ गच्छामि तत्र सन्नद्धः सर्वैर्देवगणैः सह ॥ ३२ ॥ त्यज चिन्तां महाभाग सर्वं भद्रं भविष्यति ॥ भद्रबीजं दुर्गमिदं कस्य सम्पद्विपद्विना ॥ ३३ ॥ इत्युक्त्वा च शुनासीरो दूतानां च सहस्रकम् ॥ तूर्णं प्रस्थापयामास तत्कर्मनिपुणं मुने ॥ ३४ ॥ ते दूता वै वर्षशतं ययुर्निर्जनमेव च ॥ सुदुर्लङ्घ्यं च विश्वेषु भ्रमित्वा शक्रमाययुः ॥ ३५ ॥ चन्द्रं च शुक्रभवने तं प्रपन्नं च विज्वरम् ॥ दृष्ट्वा सतारकं भीतं कथयामासुरीश्वरम् ॥ ३६ ॥ इति श्रुत्वा शुनासीरो नतवक्त्रो बृहस्पतिम् ॥ उवाच शोकसन्तप्तो हृदयेन विदूयता ॥ ३७ ॥ महेन्द्र उवाच ॥ शृणु नाथ प्रवक्ष्यामि परिणामसुखावहम् ॥ भयं त्यज महाभाग सर्वं भद्रं भविष्यति ॥ ३८ ॥ त्वया नहि जितः शुक्रो न मया दितिनन्दनः ॥ एतदालोच्य चन्द्रश्च जगाम शरणं कविम् ॥३९॥ गच्छ शीघ्रं ब्रह्मलोकमस्माभिः सार्द्धमेव च ॥ ब्रह्मणा सह यास्यामः कैलासे [1]शङ्करं वयम् ॥४०॥ इत्युक्त्वा तु महेन्द्रश्च सन्तप्तो गुरुणा सह ॥ जगाम ब्रह्मलोकं च सुखदृश्यं निरामयम् ॥ ४१ ॥ तत्र दृष्ट्वा च ब्रह्माणं ननाम गुरुणा सह ॥

---

[1] कैलासं शंकरालयमिति पाठः ।

प्रोवाच सर्ववृत्तान्तं देवानामीश्वरं परम् ॥ ४२ ॥ महेन्द्रवचनं श्रुत्वा हसित्वा कमलोद्भवः ॥ हितं तथ्यं नीतिसारमुवाच विनया
न्वितः ॥ ४३ ॥ ब्रह्मोवाच ॥ यो ददाति परस्मै च दुःखमेव च सर्वतः ॥ तस्मै ददाति दुःखं च शास्ता कृष्णः सनातनः
॥ ४४ ॥ अहं स्रष्टा च सृष्टेश्च पाता विष्णुः सनातनः ॥ यथा रुद्रश्च संहर्त्ता ददाति च शिवं शिवः ॥ ४५ ॥ निरन्तरं
सर्वसाक्षी धर्मो वै सर्वकारणम् ॥ सर्वे देवा विषयिणः कृष्णाज्ञापरिपालकाः ॥ ४६ ॥ बृहस्पतिरुतथ्यश्च संवर्तश्च जितेन्द्रियः ॥
त्रयश्चांगिरसः पुत्रा वेदवेदाङ्गपारगाः ॥ ४७ ॥ संवर्त्ताय कनिष्ठाय न च किञ्चिद्ददौ गुरुः ॥ स बभूव तपस्वी च कृष्णं ध्यायति
चेश्वरम् ॥ ४८ ॥ मध्यमस्योतथ्यकस्य सतीं भार्यां च गुर्विणीम् ॥ जहार कामतस्तां च भ्रातृजायामकामुकीम् ॥ ४९ ॥ यो हरे
द्भ्रातृजायां च कामी कामादकामुकीम् ॥ ब्रह्महत्यासहस्रं च लभते नात्र संशयः ॥ ५० ॥ स याति कुम्भीपाकं च यावच्चन्द्रदिवा
करम् ॥ भ्रातृजायापहारी च मातृगामी भवेन्नरः ॥ ५१ ॥ तस्मादुत्तीर्य्य पापी च विष्ठायां जायते कृमिः ॥ वर्षकोटिसहस्राणि
तत्र स्थित्वा च पातकी ॥ ५२ ॥ ततो भवेन्महापापी वर्षकोटिसहस्रकम् ॥ पुंश्चलीयोनिगर्ते च कृमिश्चैव पुरन्दर ॥
॥ ५३ ॥ गृध्रः कोटिसहस्राणि शतजन्मानि कुक्कुरः ॥ भ्रातृजायापहरणाच्छतजन्मानि सूकरः ॥ ५४ ॥ ददाति यो न दायं च
बलिष्ठो दुर्बलाय च ॥ स याति कुम्भीपाकं च यावच्चन्द्रदिवाकरम् ॥ ५५ ॥ नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि ॥ अव
श्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ॥ ५६ ॥ जगद्गुरोः शिवस्यापि गुरुपुत्रो बृहस्पतिः ॥ ज्ञातं करोतु वृत्तान्तमीश्वरं बलिनां
वरम् ॥ ५७ ॥ सर्वे समूहा देवानां सन्नद्धाश्च सवाहनाः ॥ मध्यस्था मुनयश्चैव सन्तु वै नर्मदातटे ॥ ५८ ॥ पश्चादहं च यास्यामि
पुण्यं तन्नर्म्मदातटम् ॥ गुरुस्तद्गुरुपुत्रोऽपि शीघ्रं यातु शिवालयम् ॥५९॥ महेन्द्र उवाच ॥ कथं वा वेदकर्त्तुश्च सिद्धानां योगिनां
गुरोः ॥ मृत्युञ्जयस्य शम्भोश्च गुरुपुत्रो बृहस्पतिः ॥ ६० ॥ अङ्गिरास्तव पुत्रश्च तत्पुत्रश्च बृहस्पतिः ॥ त्वत्तो ज्ञानी महादेवः
कथं शिष्यो गुरोः पितुः ॥ ६१ ॥ ब्रह्मोवाच ॥ कथेयमतिगुप्ता च पुराणेषु पुरन्दर ॥ इमां पुराप्रवृत्तिं च कथयामि निशामय॥६२॥

मृतवत्सा कर्म्मदोषाद्भार्य्यां चाङ्गिरसः पुरा ॥ व्रतं चकार सा चैव कृष्णस्य परमात्मनः ॥ ६३ ॥ व्रतं पुंसवनं नाम वर्षमेकं
चकार सा ॥ सनत्कुमारो भगवान्कारयामास तां व्रतम् ॥ ६४ ॥ तदाऽऽगत्य च गोलोकात्परमात्मा कृपामयः ॥ स्वेच्छामयं
परं ब्रह्म भक्तानुग्रहविग्रहः ॥ ६५ ॥ सुव्रतां च सलक्ष्मीकां तामुवाच कृपानिधिः ॥ प्रणतां साश्रुनेत्रां च विनीतां च
तया स्तुतः ॥ ६६ ॥ श्रीकृष्ण उवाच ॥ गृहाणेदं व्रतफलं मम तेजस्समन्वितम् ॥ भुंक्ष्व मद्वरतः पुत्रि भविष्यति
मदंशतः ॥ ६७ ॥ पतिर्गुरुश्च देवानां महतां ज्ञानिनां वरः ॥ पुत्रस्ते भविता साध्वि मद्वरेण बृहस्पतिः ॥ ६८ ॥
मद्वरेण भवेद्यो हि स च मद्वरपुत्रकः ॥ त्वद्गर्भे मम पुत्रोऽयं चिरजीवी भविष्यति ॥ ६९ ॥ वरजो वीर्य्यजश्चैव
क्षेत्रजः पालकस्तथा ॥ विद्यामन्त्रसुतौ चैव गृहीतः सप्तमः सुतः ॥ ७० ॥ इत्युक्त्वा राधिकानाथः स्वलोकं च जगाम सः ॥ श्रीकृष्णवरपुत्रोऽयं
ज्ञानीश्वरगुरुः स्वयम् ॥ मृत्युञ्जयं महाज्ञानं शिवाय प्रददौ पुरा ॥ ७१ ॥ दिव्यं वर्षत्रिलक्षं च तपश्चक्रे हिमालये ॥
स्वयोगं ज्ञानमखिलं तेजस्स्वामसमं परम् ॥ स्वशक्तिं विष्णुमायां च स्वांशं वै वाहनं वृषम् ॥ ७२ ॥ स्वशूलं च स्वकवचं स्वमन्त्रं
द्वादशाक्षरम् ॥ कृपामयः स्तुतस्तेन श्रीकृष्णश्च परात्परः ॥ शिवलोके शिवा सा च विष्णुमाया शिवप्रिया ॥७३॥ शक्तिर्नारायणस्येयं
सा॒ऽऽविर्भूता सनातनी ॥ तेजस्सु सर्वदेवानां साऽऽविर्भूता सनातनी ॥ ७४ ॥ जघान दैत्यनिकरं देवेभ्यः प्रददौ पदम् ॥
कल्पान्ते दक्षकन्या च सा मूलप्रकृतिः सती ॥ ७५ ॥ पितृयज्ञे तनुं त्यक्त्वा योगाद्वै सिद्धयोगिनी ॥ बभूव शैलकन्या
सा साध्वी वै भर्तृनिन्दया ॥७६॥ कालेन कृष्णतपसा शङ्करं प्राप सुन्दरी ॥ श्रीकृष्णो हि गुरुः शम्भोः परमात्मा परात्परः॥७७॥
कृष्णस्य वरपुत्रोऽयं स्वयमेव बृहस्पतिः ॥ अतो हेतोः सुरगुरुर्गुरुपुत्रः शिवस्य च ॥ ७८ ॥ इत्येवं कथितं सर्वमतिगुह्यं पुरातनम्॥
इति प्रधानसम्बन्धः श्रुतश्च कथितो मया ॥ ७९ ॥ पारंपरिकमन्यं च कथयामि निशामय ॥ दुर्वासा गरुडश्चैव शङ्करांशः प्रतापवान्
॥ ८० ॥ शिष्यौ चांगिरसस्तौ द्वौ गुरुपुत्रोऽथवा ततः ॥ प्राणाधिकायां सत्यां च मृतायां दक्षशापतः ॥ ८१ ॥ स्वज्ञानं

स्वं च भगवान्विसस्मार स्वमोहतः ॥ स्मरणं कारयामास कृष्णेन प्रेरितोऽङ्गिराः ॥ ८२ ॥ अतो हेतोर्गुरुश्चैवं मत्सुतस्याच्छि
वस्य सः ॥ शीघ्रं गच्छतु कैलासं स्वयमेव बृहस्पतिः ॥ ८३ ॥ त्वं गच्छ तत्र सन्नद्धः सदेवो नर्म्मदातटम् ॥ इत्युक्त्वा जगतां
धाता विरराम च नारद ॥ ८४ ॥ गुरुर्ययौ च कैलासं महेन्द्रो नर्म्मदातटम् ॥ ८५ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृति
खण्डे नारदनारायणसंवादे दुर्गोपाख्याने बृहस्पतेः कैलासगमनं नामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ नारद उवाच ॥ नारायण महा
भाग वेदवेदाङ्गपारग ॥ निपीतं च महाख्यानं त्वन्मुखेन्दुविनिसृतम् ॥ १ ॥ अधुना श्रोतुमिच्छामि किमुवाच बृहस्पतिः ॥
शिवं च गत्वा कैलासं दातारं सर्वसम्पदाम् ॥ २ ॥ जगत्कर्त्ता विधाता च किं वा तं प्रत्युवाच सः ॥ एतत्सर्वं समालोच्य वद
वेदविदां वर ॥ ३ ॥ नारायण उवाच ॥ शीघ्रं गत्वा च कैलासं भ्रष्टश्रीः शंकरं गुरुः ॥ प्रणम्य तस्थौ पुरतो लज्जावनतकन्धरः ॥
॥ ४ ॥ दृष्ट्वा गुरुसुतं शम्भुरुदतिष्ठत्कुशासनात् ॥ आलिङ्गनं ददौ तस्मै शीघ्रं मांगलिकाशिषः ॥ ५ ॥ स्वासने वासयित्वा वै
पप्रच्छ कुशलं वचः ॥ उवाच मधुरं वाक्यं भीतं तं लज्जितं शिवः ॥ ६ ॥ श्रीशङ्कर उवाच ॥ कथमेवंविधस्त्वं च दुःखी मलिन
विग्रहः ॥ साश्रुनेत्रो लज्जितश्च भ्रातस्तत्कारणं वद ॥ ७ ॥ किं वा तपस्या हीना ते सन्ध्या हीनाऽथवा मुने ॥ किं वा श्रीकृ
ष्णसेवा सा विहीना दैवदोषतः ॥ ८ ॥ किं वा गुरौ भक्तिहीनोऽभीष्टदेवेऽथवा गुरौ ॥ किं वा न रक्षितुं शक्तः प्रपन्नं शरणागतम्
॥ ९ ॥ किं वाऽतिथिस्ते विमुखः किं वा पोष्या बुभुक्षिताः ॥ किं वा स्वतन्त्रा स्त्री वा ते किं वा पुत्रोऽवचस्करः ॥१०॥ सुशासितो
न शिष्यो वा किं भृत्याश्चोत्तरप्रदाः ॥ किं वा ते विमुखा लक्ष्मीः किं वा रुष्टो गुरुस्तव ॥ ११ ॥ गरिष्ठश्च वरिष्ठश्च शश्वत्सन्तुष्ट
मानस ॥ गुरुस्तव वसिष्ठश्च प्रेष्ठः श्रेष्ठः सतामहो ॥१२॥ किं वा रुष्टोऽभीष्टदेवः किं वा रुष्टाश्च वाडवाः ॥ किं वा रुष्टा वैष्णवाश्च
किं वा ते प्रबलो रिपुः ॥ १३ ॥ किं वा ते बन्धुविच्छेदो विग्रहो बलिना सह ॥ किं वा पदं परग्रस्तं किं वा बन्धुधनं च वा ॥१४॥
केन ते वा कृता निन्दा खलैर्वा पापिभिर्मुने ॥ केन वा त्वं परित्यक्तो बान्धवेन प्रियेण वा॥१५॥ बन्धुस्त्यक्तस्त्वया किं वा वैराग्येण

क्रुधाऽथवा ॥ किं वा तीर्थैं नहि स्नातं न दत्तं पुण्यवासरे॥१६॥गुरुनिन्दा बन्धुनिन्दा खलवक्त्राच्छ्रुताऽथवा ॥ गुरुनिन्दा हि साधूनां मरणादतिरिच्यते ॥ १७ ॥ असद्वंशप्रजातानां खलानां निन्दनं तथा ॥ दौश्शील्यमेवमसतां शश्वन्नारकिणामिह ॥ १८ ॥ परप्रशंसकाः सन्तः पुण्यवन्तो हि भारते ॥ शश्वन्मङ्गलयुक्ताश्च राजन्ते मनसा सदा ॥ १९ ॥ पुत्रे यशसि तोये च समृद्धे च पराक्रमे ॥ ऐश्वर्य्यें वा प्रतापे च प्रजाभूंमिधनेषु च ॥ २० ॥ वचनेषु च बुद्धौ च स्वभावे च चरित्रतः ॥ आचारे व्यवहारे च जायते हृदयं नृणाम्॥२१॥यादृग्येषां च हृदये तादृक्तेषां च मंगलम् ॥ यादृग्येषां पूर्वपुण्यं तादृक्तेषां च मानसम् ॥ २२ ॥ इत्युक्त्वा च महादेवो विरराम स्वसंसदि ॥ तमुवाच महावक्ता स्वयमेव बृहस्पतिः ॥ २३ ॥ बृहस्पतिरुवाच ॥ अकथ्यमेव वृत्तान्तं कथयामि किमीश्वर ॥ लोकाः कर्मवशान्नित्यं नानाजन्मसु यत्कृतम् ॥ २४ ॥ स्वकर्मणां फलं भुङ्क्ते जन्तुर्जन्मनि जन्मनि ॥ नहि नष्टं च तत्कर्म विना भोगाच्च भारते ॥ २५ ॥ सुखं दुःखं भयं शोको नराणां भारते प्रभो ॥ केचिद्वदन्ति हि भवेत्स्वकृतेन च कर्मणा ॥ २६ ॥ केचिद्वदन्ति दैवेन स्वभावेनेति केचन ॥ त्रिविधा गतयो ह्यस्य वेदवेदाङ्गपारग ॥ २७ ॥ स्वयं च कर्मजनकः कर्म वै दैवकारणम् ॥ स्वभावो जायते नृणां स्वात्मनः पूर्वकर्मणः ॥ २८ ॥ स्वकर्मणां च सर्वेषां जन्तूनां प्रतिजन्मनि ॥ सुखं दुःखं भयं शोकं स्वात्मनश्च प्रजायते ॥ २९ ॥ स्वकर्मफलभोक्ता च जीवो हि सगुणः सदा ॥ आत्मभोजयिता साक्षी निर्गुणः प्रकृतेः परः ॥ ३० ॥ स एवात्मा सर्वसेव्यः सर्वेषां च फलप्रदः ॥ स वै सृजति दैवं च स्वभावं कर्म चैव हि ॥ ३१ ॥ कर्मणा च नृणां लज्जा प्रशंसा च प्रफुल्लता ॥ लज्जाबीजं च वृत्तान्तं तथाऽपि कथयामि ते ॥ ३२ ॥ इत्युक्त्वा सर्ववृत्तान्तमवोचत्तं बृहस्पतिः ॥ श्रुत्वा बभूव नम्रास्यो गौरीशो लज्जया तदा ॥३३॥ जपमाला कराद्भ्रष्टा कोपाविष्टस्य शूलिनः ॥ बभूव सद्यःकम्पश्च रक्तपंकजलोचने ॥३४॥

---

१ मित्र--इति पाठः ।

संहर्त्तुरीशो रुद्रस्य विष्णोः पातुः सखा शिवः ॥ स्रष्टुः स्तुत्यश्च[1] मान्यश्च स्वात्मनः परमात्मनः ॥ ३५ ॥ निर्गुणस्य च कृष्णस्य प्रकृतीशस्य नारद ॥ कोपात्प्रवक्तुमारेभे शुष्ककण्ठौष्ठतालुकः ॥ ३६ ॥ शिव उवाच ॥ शिवमस्तु च साधूनां वैष्णवानां सतामिह ॥ अवैष्णवानामसतामशिवं च पदे पदे ॥ ३७ ॥ ददाति वैष्णवेभ्यश्च यो दुःखं सुस्थितो जनः ॥ श्रीकृष्णस्तस्य संहर्त्ता विघ्नस्तस्य पदे पदे ॥ ३८ ॥ अवैष्णवानां हृदयं नहि शुद्धं सदामलम् ॥ श्रीकृष्णमन्त्रस्मरणं मनोनैर्मल्यकारणम् ॥ ३९ ॥ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ॥ विष्णुमन्त्रोपासनया क्षीयते कर्म तन्नृणाम् ॥ ४० ॥ अहो श्रीकृष्णदासानां कः स्वभावः सुनिर्मलः ॥ हतभार्य्यं मूर्च्छितश्च न शशाप रिपुं गुरुः ॥ ४१ ॥ गुरुर्यस्य वरिष्ठश्च क्रोधहीनश्च धार्मिकः ॥ शतपुत्रघ्नमप्येनं न शशाप रिपुं मुनिः ॥ ४२ ॥ निश्श्वासाद्वै सुरगुरोर्भ्रातुर्मम बृहस्पतेः ॥ भस्मीभूतो निमेषेण शतचन्द्रो भवेद्ध्रुवम् ॥ ॥ ४३ ॥ तथाऽपि तं नो शशाप धर्म्मभङ्गभयेन च ॥ तपस्या हीयते शप्तुः कोपाविष्टस्य नित्यशः ॥ ४४ ॥ अहो ह्यत्रेरसत्पुत्रः परस्त्रीलुब्धकः शठः ॥ तपस्विनो वैष्णवस्य ब्रह्मपुत्रस्य धीमतः ॥ ४५ ॥ धर्मिष्ठा ब्रह्मणः पुत्रा वैष्णवा ब्राह्मणास्तथा ॥ केचिद्देवा द्विजा दैत्याः पौत्राश्च त्रिविधा मताः ॥ ४६ ॥ ये सात्त्विका ब्राह्मणास्ते देवा राजसिकास्तथा ॥ दैत्यास्तामसिका रौद्रा बलिष्ठाश्चोद्धताः सदा ॥ ४७ ॥ स्वधर्मनिरता विप्रा नारायणपरायणाः ॥ शैवाः शाक्ताश्च ते देवा दैत्याः पूजाविवर्जिताः ॥ ४८ ॥ मुमुक्षवो विष्णुभक्ता ब्राह्मणा दास्यलिप्सवः ॥ ऐश्वर्य्यलिप्सवो देवाश्चासुरास्तामसास्तथा ॥ ४९ ॥ ब्राह्मणानां स्वधर्मश्च कृष्णस्यार्च्चनमीप्सितम् ॥ निष्कामानां निर्गुणस्य परस्य प्रकृतेरपि ॥ ५० ॥ ये ब्राह्मणा वैष्णवाश्च स्वतन्त्राः परमं पदम् ॥ यान्त्यन्योपासकाश्चान्यैः सार्द्धं च प्राकृते लये ॥ ५१ ॥ वर्णानां ब्राह्मणाः श्रेष्ठाः साधवो वैष्णवा यदि ॥ विष्णुमन्त्रविहीनेभ्यो द्विजेभ्यः श्वपचो वरः ॥ ५२ ॥ परिपक्वा विपक्वा वा वैष्णवाः साधवश्च ते ॥ सततं पाति तांश्चैव विष्णुचक्रं सुदर्शनम् ॥ ५३ ॥ यथा वह्नौ

---

[1] स्रष्टुः श्रेष्ठश्चेति पाठः ।

शुष्कतृणं भस्मीभूतं भवेत्सदा ॥ तथा पापं वैष्णवेषु काष्ठानीव हुताशने ॥ ५४ ॥ गुरुवक्राद्विष्णुमन्त्रो यस्य कर्णे प्रवेक्ष्यति ॥ तं वैष्णवं महापूतं प्रवदन्ति मनीषिणः ॥ ५५ ॥ पुंसां शतं पितॄणां च शतं मातामहस्य च ॥ स्वसोदरांश्च जननीमुद्धरन्त्येव वैष्णवाः ॥ ५६ ॥ गयायां पिण्डदानेन पिण्डदाः पिण्डभोजिनम् ॥ समुद्धरन्ति पुंसां च वैष्णवाश्च शतं शतम् ॥५७॥ मन्त्रग्रहणमात्रेण जीवन्मुक्तो भवेन्नरः ॥ यमस्तस्मान्महाभीतो वैनतेयादिवोरगः ॥ ५८ ॥ पुनन्त्येव हि तीर्थानि गङ्गादीनि च भारते ॥ कृष्णमन्त्रोपासकाश्च स्पर्शमात्रेण वाक्पते ॥ ५९ ॥ पापानि पापिनां तीर्थे यावन्ति प्रभवन्ति च ॥ नश्यन्ति तानि सर्वाणि वैष्णवस्पर्शमात्रतः ॥ ६० ॥ कृष्णमन्त्रोपासकानां रजसा पादपद्मयोः ॥ सद्यो मुक्ताः पातकेभ्यः कृत्स्ना पूता वसुन्धरा ॥ ६१ ॥ वायुश्च पवनो वह्निः सूर्य्यः सर्वं पुनाति च ॥ एते पूता वैष्णवानां स्पर्शमात्रेण लीलया ॥ ६२ ॥ अहं ब्रह्मा च शेषश्च धर्मः साक्षी च कर्म्मणाम् ॥ एते हृष्टाश्च वाञ्छन्ति वैष्णवानां समागमम् ॥ ६३ ॥ फलं कर्मानुरूपेण सर्वेषां भारते भवेत् ॥ न भवेत्तद्वैष्णवे च सिद्धधान्ये यथाऽङ्कुरम् ॥ ६४ ॥ हन्ति तेषां कर्म्म पूर्वं भक्तानां भक्तवत्सलः ॥ कृपया स्वपदं तेभ्यो ददात्येव कृपानिधिः ॥ ६५ ॥ तेजस्विनां च प्रवरं वैष्णवं भृगुनन्दनम् ॥ स चन्द्रो दुर्बलो भीतः शुक्रं च शरणं ययौ ॥ ६६ ॥ सुदर्शनो बलिष्ठं च शुक्रं जेतुं न शक्तिमान् ॥ तथाऽपि चोद्धरिष्यामि तारां मन्त्रेण मद्गुरोः ॥ ६७ ॥ भज सत्यं परं ब्रह्म कृष्णमात्मानमीश्वरम् ॥ सुप्रसन्ने भगवति पत्नीं प्राप्स्यसि लीलया ॥ ६८ ॥ मन्त्रं तस्य प्रदास्यामि भ्रातः कल्पतरुं परम् ॥ कोटिजन्माघनिघ्नं च सर्वमंगलकारणम् ॥६९॥ ब्रह्मादिस्तम्बपर्य्यन्तं नश्वरं जलबिम्बवत् ॥ शरणं याहि गोविन्दं परमात्मानमीश्वरम् ॥ तावद्भवेच्छा भोगेच्छा स्त्रीसुखेच्छा नृणामिह ॥ ७० ॥ यावद्गुरुमुखाम्भोजान्न प्राप्नोति मनुं हरेः ॥ संप्राप्य दुर्लभं मन्त्रं वितृष्णो हि भवेन्नरः ॥ ७१ ॥ इन्द्रत्वममरत्वं च नहि वाञ्छन्ति वैष्णवाः ॥ नहि वाञ्छन्ति मोक्षं च दास्यं भक्तिं विना हरेः ॥ ७२ ॥ भक्तिनिर्मथनं भक्तो मोक्षं नो वाञ्छति प्रभोः ॥ ज्ञानं मृत्युञ्जयत्वं च सर्वसिद्धिं तदीप्सितम् ॥ ७३ ॥ वाक्सिद्धिं चैव धातृत्वं भक्तानां

नहि वाञ्छितम् ॥ भक्तिं विहाय कृष्णस्य विषयं यो हि वाञ्छति ॥७४॥ विषमत्ति सुधां त्यक्त्वा वञ्चितो विष्णुमायया ॥ अहं
ब्रह्मा च विष्णुश्च धर्मोऽनन्तश्च कश्यपः ॥७५॥ कपिलश्च कुमारश्च नरनारायणावृषी ॥ स्वायम्भुवो मनुश्चैव प्रह्लादश्च पराशरः ॥
॥ ७६ ॥ भृगुः शुक्रश्च दुर्वासा वसिष्ठः क्रतुरंगिराः ॥ बलिश्च वालखिल्याश्च वरुणश्च हुताशनः ॥ ७७ ॥ वायुः सूर्य्यश्च गरुडो
दक्षो गणपतिः स्वयम् ॥ एते परा भक्तवराः कृष्णस्य परमात्मनः ॥७८॥ ये च तस्य कलाः श्रेष्ठास्ते तद्भक्तिपरायणाः ॥ इत्युक्त्वा
शङ्करस्तस्मै ददौ कल्पतरुं मनुम् ॥७९॥ लक्ष्मीमायाकामबीजं ङेन्तं कृष्णपदं मुने ॥ परं पूजाविधानं च स्तोत्रं च कवचं मुने ॥
॥ ८० ॥ तत्पुरश्चरणं ध्यानं शुद्धे मन्दाकिनीतटे ॥ गुरुः संप्राप्य तं मन्त्रं शङ्कराच्च जगद्गुरोः ॥ ८१ ॥ विषण्णो हि भवाब्धौ च
बभूव तमुवाच ह ॥ ८२ ॥ बृहस्पतिरुवाच ॥ आज्ञां कुरु जगन्नाथ यामि तप्तुं हरेस्तपः ॥ तारा तिष्ठतु तत्रैव न तया मे प्रयोज
नम् ॥८३॥ पश्यामि विषतुल्यं च सर्वं नश्वरमीश्वर ॥ श्रीकृष्णं शरणं यामि सत्यं नित्यं च निर्गुणम्॥८४॥ श्रीमहादेव उवाच ॥
परग्रस्तां स्त्रियं त्यक्त्वा न प्रशंस्यं तपो मुने ॥ सम्भावितस्य दुश्चर्चा मरणादतिरिच्यते ॥ ८५ ॥ पुरो गच्छ महाभाग तमेतं नर्म
दातटम् ॥ यत्र ब्रह्मादयो देवास्तत्राहं यामि सत्वरम् ॥८६॥ शिवस्य वचनं श्रुत्वा ययौ सुरगुरुः स्वयम् ॥ आययौ च महाभागः
शङ्करो नर्मदातटम् ॥ ८७ ॥ सगणं शङ्करं दृष्ट्वा प्रसन्नवदनेक्षणम् ॥ प्रणेमुर्देवताः सर्वा मनवो मुनयस्तथा ॥ ८८ ॥ ननाम शम्भुः
शिरसा विष्णुं च कमलोद्भवम् ॥ ददौ[1] विष्णुर्महेशाय प्रेम्णाऽऽलिङ्गनमासनम् ॥ ८९ ॥ एतस्मिन्नन्तरे तत्र चागमच्च बृहस्पतिः ॥
प्रणनाम महादेवं विष्णुं च कमलोद्भवम् ॥ ९० ॥ सूर्य्यं धर्ममनन्तं च नरं मां च मुनीश्वरान् ॥ स्वगुरुं पितरं भक्त्या चावसत्तत्र
संसदि ॥ ९१ ॥ सञ्चिन्त्य मनसा युक्तिमूचे तत्र च संसदि ॥ स्वयं विष्णुश्च भगवान्ब्रह्माणं चन्द्रशेखरम् ॥९२॥ विष्णुरुवाच॥
युवां च मुनयश्चैव समुद्रपुलिनं द्रुतम् ॥ शुक्रं कश्चिच्च मध्यस्थं प्रस्थापयितुमर्हथ ॥९३॥ विग्रहेणैव विषमं भविष्यति न संशयः॥

---

[1] ददतुस्तौ महेशायेति पाठः ।

मदाशिषा सुरगुरुस्तारां प्राप्स्यति निश्चितम् ॥ ९४ ॥ सुरैः स्तुतश्च सन्तुष्टः शुक्राचार्य्यो भविष्यति ॥ सुरैः शुक्रो हि न जितः कृष्णचक्रेण रक्षितः ॥ ९५ ॥ युवाभ्यां प्रार्थ्यमानोऽहं युवयोः स्तवनेन च ॥ श्वेतद्वीपादागतोऽस्मि परितुष्टः स्तवेन च ॥ ९६ ॥ शुक्राश्रमसमीपर्णं सर्वा गच्छन्तु देवताः ॥ रिपुर्बलिष्ठः स्तोत्रेण वशीभूत इति श्रुतिः ॥ ९७ ॥ इत्युक्त्वा जगतां नाथस्तत्रैवान्तरधीयत ॥ स्तुतो ब्रह्मादिभिर्देवैः प्रणतैः परिपूजितः ॥९८॥ गते च जगतां नाथे श्वेतद्वीपं च नारद ॥ चिन्तिताश्च सुराः सर्वे विषण्णमनसस्तथा ॥ ९९ ॥ मुनीन्देवांश्च संबोध्य ब्रह्मा वै तत्र संसदि ॥ उवाच नीतिसारं तत्सम्मतं शङ्करस्य सः ॥ १०० ॥ ब्रह्मोवाच ॥ मम शम्भोश्च धर्मस्य विष्णोर्वा सर्वसाक्षिणः ॥ अस्माकं च समः स्नेहो दैत्ये देवे च पुत्रकाः ॥ १०१ ॥ दैत्यानां च गुरुं शुक्रं प्रपन्नश्च निशाकरः ॥ न जितश्च सुरैः शुक्रः पूजितो दितिनन्दनैः ॥ १०२ ॥ ताराहेतोरहं यामि शुक्रस्य भवनं सुराः ॥ सर्वे समुद्रपुलिनं यान्तु विष्णोर्निदेशतः ॥१०३॥ इत्युक्त्वा जगतां धाता चागमच्छुक्रसन्निधिम् ॥ प्रययुर्देवता विप्राः समुद्रपुलिनं मुने॥ ॥ १०४ ॥ इति श्रीब्रह्मवैवर्त्ते म०द्वि०प्र०नारदनारायणसंवादे श्रीकृष्णोपदिष्टतारोद्धरणोपायज्ञानं नाम षष्टितमोऽध्यायः ॥ ६० ॥

नारद उवाच ॥ ततः परं किं रहस्यं बभूवासुरदेवयोः ॥ श्रोतुमिच्छामि भगवन्परं कौतूहलं मम ॥ १ ॥ नारायण उवाच ॥ ब्रह्मा जगाम निलयं शुक्रस्य च महात्मनः ॥ नानादैत्यगणाकीर्णं रत्नमण्डपभूषितम् ॥ २ ॥ पञ्चाशत्कोटिभिः शिष्यैः परीतं ब्रह्मवादिभिः ॥ सप्तभिः परिखाभिश्च वेष्टितं दुर्गमेव च ॥ ३॥ रक्षितं रक्षकगणैर्दैत्यैश्च शतकोटिभिः ॥ पद्मरागैर्विरचितैः प्रावारैः परिशोभितम् ॥ ४ ॥ ददर्श जगतां धाता सभायां भृगुनन्दनम् ॥ स्तुतं मुनिगणैर्दैत्यै रत्नसिंहासनस्थितम् ॥ ५ ॥ जपन्तं परमं ब्रह्म कृष्णमात्मानमीश्वरम् ॥ कोटिसूर्य्यप्रभं शश्वज्ज्वलन्तं ब्रह्मतेजसा ॥ ६ ॥ दृष्ट्वा पौत्रं प्रभायुक्तं विधाता हृष्टमानसः ॥ आत्मानं कृतिनं मेने पुत्रं पौत्रं च नारद ॥ ७ ॥ दृष्ट्वा पितामहं शुक्रो धातारं जगतां प्रभुम् ॥ उत्थाय सहसा भीतः प्रणनाम कृताञ्जलिः ॥ ८ ॥ आदाय पूजयामास चोपचारांस्तु षोडश ॥ तुष्टाव परया भक्त्या सम्भ्रमेण यथागमम् ॥ ९ ॥ विद्या

मन्त्रप्रदातारं दातारं सर्वसम्पदाम् ॥ स्वकर्म्मणां च फलदं सर्वेषां बिभ्रतो वरम् ॥१०॥ शुकस्य स्तवनेनैव सन्तुष्टो जगतां पतिः॥
अवरुह्य रथात्तूर्णमवसत्तत्र संसदि ॥ ११ ॥ शुक्रेण शिरसा दत्तरत्नसिंहासने वरे॥ तेजसा ज्वलिते रम्ये निर्म्मिते विश्वकर्म्मणा ॥
॥ १२ ॥ शुक्रः प्रणम्य ब्रह्माणं कुमारं शकुनं क्रतुम् ॥ वसिष्ठं च मरीचिं च सनन्दं च सनातनम् ॥ १३ ॥ कपिलं वै पञ्चशिखं
वोढुमंगिरसं मुने ॥ धर्मं मां च नरं भक्त्या प्रणनाम कृताञ्जलिः ॥१४॥ प्रत्येकं पूजयामास सादरं च यथोचितम् ॥ सिंहासनेषु
रत्नेषु वासयामास धार्मिकः ॥ १५ ॥ प्रहृष्टवदनाः सर्वे प्रणेमुर्दितिनन्दनाः ॥ ऋषिसंघाश्च धातारं तुष्टुवुश्च यथागमम् ॥ १६ ॥
सर्वान्संस्तूय स कविरवोचत्सम्पुटाञ्जलिः ॥ साश्रुनेत्रः सपुलकः प्रणतो विनयान्वितः ॥ १७ ॥ शुक्र उवाच ॥ अद्य मे सफलं
जन्म जीवितं च सुजीवितम् ॥ स्वयं विधाता भगवान्साक्षाद्दृष्टः स्वमन्दिरे ॥ १८ ॥ साक्षाद्दृष्टाश्च तत्पुत्रा भगवन्तः सनातनाः ॥
तुष्टः कृष्णोऽद्य मामेवं परमात्मा परात्परः ॥ १९ ॥ कृतार्थं कर्तुमीशा मां युष्माकं स्वागतं शिशुम् ॥ स्वात्मारामेषु कुशलप्रश्न
मेवं विडम्बनम् ॥ २० ॥ पवित्रं कर्तुमीशा मां हेतुरागमनेऽत्र वः ॥ अपरं ब्रूथ किं वाऽपि शास्त नः करवामि किम् ॥ २१ ॥
ब्रह्मोवाच ॥ उद्विग्नश्चिरविच्छेदात्त्वां पौत्रं द्रष्टुमागतः ॥ विच्छेदः पुत्रपौत्राणां मरणादतिरिच्यते ॥ २२ ॥ कुशलं ते मुनिश्रेष्ठ
पुत्रयोश्चापि योषितः ॥ कुशलं ते स्वधर्माणां काम्यानां तपसामपि ॥ २३ ॥ दिने दिनेऽपरिच्छिन्नं श्रीकृष्णार्चनमीप्सितम् ॥ स्व
गुरोः सेवनं नित्यमविच्छिन्नं भवेत्तव ॥ २४ ॥ गुर्विष्टयोः पूजनं च सर्वमङ्गलकारणम् ॥ पापाधिरोगशोकघ्नं पुण्यहर्षप्रदं शुभम्॥
॥ २५ ॥ अभीष्टदेवः सन्तुष्टो गुरौ तुष्टे नृणामिह ॥ इष्टदेवे च सन्तुष्टे सन्तुष्टाः सर्वदेवताः ॥ २६ ॥ गुरुर्विप्रः सुरो रुष्टो येषां
पातकिनामिह ॥ तेषां च कुशलं नास्ति विघ्नस्तस्य पदे पदे ॥ २७ ॥ तुष्टश्च सततं वत्स श्रीकृष्णः प्रकृतेः परः ॥ सर्वान्तरात्मा
भगवांस्तव भक्त्या च निर्गुणः ॥ २८ ॥ तव तुष्टो गुरुरहं विधाता जगतामपि ॥ मयि तुष्टे हरिस्तुष्टो हरौ तुष्टे तु देवताः ॥२९॥
साम्प्रतं शृणु मे धीमन्नत्रागमनकारणम् ॥ प्रेषितस्य सुराणां च विश्वसंहर्तुरेव च ॥ ३० ॥ शिवस्य गुरुपुत्रस्य साध्वीं तारां

बृहस्पतेः ॥ अपहृत्य निशानाथस्तवैव शरणागतः ॥ ३१ ॥ शम्भुर्धर्मश्च सूर्य्यश्च शक्रोऽनन्तश्च पुत्रक ॥ आदित्या वसवो रुद्रा दि
क्पालाश्च दिगीश्वराः ॥ ३२ ॥ युद्धायायान्ति सन्नद्धास्तिस्रः कोटयश्च देवताः ॥ नागाः किम्पुरुषाश्चैव यक्षराक्षसगुह्यकाः ॥ ३३ ॥
भूताः प्रेताः पिशाचाश्च कूष्माण्डा ब्रह्मराक्षसाः ॥ किराताश्चैव गन्धर्वाः समुद्रपुलिनेऽधुना ॥ ३४ ॥ तारकामयसंग्रामे मध्यस्थो
ऽहं सुतैः सह ॥ देहि तारां रणं किं वा त्यज चन्द्रं च कामिनम् ॥३५॥ शुक्र उवाच ॥ आगच्छन्तु सुराः सर्वे सन्नद्धा रणदुर्मदाः॥
योत्स्ये विना महेशं च सर्वेषां च गुरुं परम् ॥३६॥ दैत्या ऊचुः ॥ उभयेषां गुरुः शम्भुर्मान्यो वन्द्यश्च सर्वदा ॥ धर्मश्च साक्षी
सर्वेषां त्वमेव च पितामहः ॥३७॥ अन्यांश्च तृणतुल्यांश्च नहि मन्यामहे वयम् ॥ आगच्छन्तु च योत्स्यामो व्रज ब्रूहि जगद्गुरो॥
॥ ३८ ॥ कृपया गुरुपुत्रस्य यद्यायाति महेश्वरः ॥ आग्नेयास्त्रं प्रयोक्ष्यामः पश्चाद्योत्स्यामहे प्रभो ॥ ३९ ॥ ब्रह्मोवाच ॥ काला
ग्निरुद्रः संहर्त्ता विश्वस्य बलिनां वरः ॥ हे वत्सास्तेन सार्द्धं च को वा युद्धं करिष्यति ॥ ४० ॥ भद्रकाली जगन्माता खड्गखर्पर
धारिणी ॥ तया दुर्द्धर्षया सार्द्धं को वा युद्धं करिष्यति ॥ ४१ ॥ सा सहस्रभुजा देवी मुण्डमालाविभूषणा ॥ योजनायतवक्त्रा
च दशयोजनविस्तृता ॥ ४२ ॥ सप्ततालप्रमाणाश्च यस्या दन्ता भयानकाः ॥ क्रोशप्रमाणजिह्वा च माहालोला भयङ्करी ॥
॥ ४३ ॥ अतीव रौद्राः सन्नद्धा भीमाः शंकरकिंकराः ॥ अतिभीमा भैरवाश्च नन्दी च रणकर्कशः ॥ ४४ ॥ शिवस्य पार्षदाः सर्वे
महाबलपराक्रमाः ॥ वीरभद्रादयः शूराः कोटिसूर्य्यसमप्रभाः ॥ ४५ ॥ सहस्रमूर्द्ध्नः शेषस्य फणामण्डलभूषणम् ॥ विश्वं सर्षपतुल्यं
च को वा योद्धा च तत्समः॥४६॥कालाग्निरुद्रः संहर्त्ता यस्य शम्भोश्च किंकरः॥शूलिनस्त्रिपुरघ्नस्य ज्वलतो ब्रह्मतेजसा॥४७॥ यस्य
पाशुपतास्त्रेण दुर्निवार्य्येण पुत्रकाः ॥ भस्मीभूतं भवेद्विश्वं दैत्यानां चैव का कथा ॥४८॥ यस्य शूलेन भिन्नश्च शङ्खचूडः प्रतापवान् ॥
सुदामा पार्षदवरः कृष्णस्य परमात्मनः॥४९॥त्रिकोटिसूर्य्यसदृशस्तेजस्वी परमाद्भुतः ॥ राधाकवचकण्ठश्च सर्वदैत्यजनेश्वरः ॥५०॥
मधुकैटभयोर्हन्ता हिरण्यकशिपोश्च यः ॥ स च विष्णुः समायाति श्वेतद्वीपात्स्वयं प्रभुः ॥ ५१ ॥ इत्युक्त्वा जगतां धाता विरराम

च संसदि ॥ प्रहस्योवाच दैतेयो दानवानामधीश्वरः ॥ ५२ ॥ प्रह्लाद उवाच ॥ नमस्तुभ्यं जगद्धातः सर्वेषां प्राक्तनेश्वर ॥ सर्वपूज्यः सर्वनाथः किं वक्ष्यामि तवाग्रतः ॥ ५३ ॥ हिरण्यकशिपोर्हन्ता मधुकैटभयोश्च यः ॥ सा कला यस्य कृष्णस्य परिपूर्णतमस्य च ॥ ॥ ५४ ॥ सर्वान्तरात्मनस्तस्य चक्रं नाम सुदर्शनम् ॥ अस्माकं लोकमस्मांश्च तद्दाग्धक्ष्यति दुस्सहम् ॥ ५५ ॥ ततो न बलवाञ्छम्भुर्न च पाशुपतं विधे ॥ न च काली न शेषश्च न च रुद्रादयः सुराः ॥ ५६ ॥ यस्य लोमसु विश्वानि निखिलानि जगत्पते ॥ सर्वाधारस्य च विभोः स्थूलात्स्थूलतरस्य च ॥ ५७ ॥ षोडशांशो भगवतः स चैव हि महान्विराट् ॥ अनन्तो नहि तत्स्थूलो न काली बृहती ततः ॥ ५८ ॥ आगच्छन्तु सुराः सर्वे युद्धं कुर्वन्तु साम्प्रतम् ॥ न बिभेमि शरेभ्यश्च न च पाशुपताद्धरात् ॥ ५९ ॥ नमस्तस्मै भगवते शिवाय शिवरूपिणे ॥ नमोऽनन्ताय साधुभ्यो वैष्णवेभ्यः प्रजापते ॥ ६० ॥ श्रीकृष्णस्य प्रसादेन निर्भयोऽहं निरामयः ॥ न मे स्वात्मबलं ब्रह्मंस्तद्बलं यत्प्रभोर्बलम् ॥ ६१ ॥ स्वपापेन मृतस्तातो पुरा वै विष्णुनिन्दया ॥ निर्बन्धाच्छङ्खचूडश्च दर्पाच्च मधुकैटभौ ॥ ६२ ॥ त्रिपुरः किङ्करोऽस्माकं वीरत्वेन न गण्यते ॥ तथाऽपि प्रेरितस्तेन स रथस्थो महेश्वरः ॥ ६३ ॥ इत्युक्त्वा दानवश्रेष्ठो विरराम च संसदि ॥ उवाच जगतां धाता पुनरेव च नारद ॥ ६४ ॥ ब्रह्मोवाच ॥ विनाशकारणं युद्धमुभयोर्दैत्यदेवयोः॥ सुप्रीत्या चरणं वत्स सर्वमङ्गलकारणम् ॥ ६५ ॥ तारां भिक्षां देहि मह्यं भिक्षुकाय च वेधसे ॥ विमुखे भिक्षुके राजन्गृहस्थः सर्वपापभाक् ॥ ६६ ॥ सनत्कुमार उवाच ॥ स्वकीर्तिं रक्ष राजेन्द्र सिंहस्त्वं सुरदैत्ययोः ॥ यस्य भिक्षुर्जगद्धाता तस्य कीर्तेश्च का कथा ॥ ६७ ॥ सनातन उवाच ॥ न जितस्त्वं सुरेन्द्रैश्च ब्रह्मेशानपुरोगमैः ॥ रक्षितः कृष्णचक्रेण वैष्णवः पुण्यवाञ्छुचिः ॥ ६८ ॥ सनन्दन उवाच ॥ यस्येष्टदेवः सर्वात्मा श्रीकृष्णः प्रकृतेः परः ॥ गुरुश्च वैष्णवः शुक्रः स च केन जितो महान् ॥ ६९ ॥ सनक उवाच ॥ पुण्यवान्न जितः केन जितः पापी स्वपातकैः ॥ पुण्यदीपो न निर्वाति पाषण्डेनैव वायुना ॥ ७० ॥ ऋषय ऊचुः ॥ देहि तारां महाभाग चन्द्रप्राणाधिकं गुरोः ॥ स्वकीर्तिं रक्ष सुचिरं प्रार्थयामः पुनः पुनः ॥ ७१ ॥ प्रह्लाद उवाच ॥ स्थिते मदीश्वरे

साक्षान्नहि भृत्यो विराजते ॥ कर्त्तारं ब्रूहि मन्नाथं गुरुं शुक्रं सतां वरम् ॥ ७२ ॥ शिष्याणामाधिपत्ये च साधूनां गुरुरीश्वरः ॥ गुरौ
समर्पितं पूर्वं सर्वैश्वर्य्यं मुनीश्वरे ॥ ७३ ॥ वयं भृत्याश्च पोष्याश्च स्वगुरोः परिचारकाः ॥ ते च शिष्याः कुशलिनो गुर्वाज्ञां
पालयन्ति ये ॥ ७४ ॥ प्रह्लादस्य वचः श्रुत्वा चकार प्रार्थनां कविम् ॥ ददौ शुक्रश्च तारां तां चन्द्रं च मलिनं मुने ॥ ७५ ॥
दत्त्वा तारां विधुं शुक्रः प्रणनाम विधेः पदे ॥ नमस्कृत्य मुनिभ्यश्च प्रणतः स्वपुरं ययौ ॥ ७६ ॥ प्रह्लादः सगणो भक्त्या नमस्कृत्य
विधेः पदे ॥ प्रत्येकं वै मुनिगणान्प्रणतः स्वगृहं ययौ ॥ ७७ ॥ ब्रह्मा ददर्श तारां च प्रणतां स्वपदे सतीम् ॥लज्जया नम्रवक्त्रां
च रुदतीं गुर्विणीं मुने ॥ ७८ ॥ चन्द्रं च प्रणतं धाता क्रोडे संस्थाप्य मायया ॥ उवाच मलिनां तारां कातरां च कृपामयः
॥७९॥ तारे त्यज भयं मत्तः भयं किं ते मयि स्थिते ॥ सौभाग्ययुक्ता स्वपतौ भविष्यसि वरेण मे ॥८०॥ दुर्बला बलिना ग्रस्ता
निष्कामा न च्युता भवेत् ॥ प्रायश्चित्तेन शुद्धा सा न स्त्री जारेण दुष्यति ॥ ८१ ॥ सकामा कामतो जारं भजते स्वसुखेन च ॥
प्रायश्चित्तान्न शुद्धा सा स्वामिना परिवर्जिता ॥ ८२ ॥ कुम्भीपाके पच्यते सा यावच्चन्द्रदिवाकरम् ॥ अन्नं विष्ठा जलं मूत्रं स्पर्शनं
सर्वपापदम् ॥ ८३ ॥ पापी यस्याश्च तस्याश्च साधुभिः परिवर्जितम् ॥ कस्य गर्भं वद शुभे गच्छ वत्से गुरोर्गृहम् ॥ ८४ ॥ त्यज
लज्जां महाभागे सर्वं च प्राक्तनाद्भवेत्॥ब्रह्मणो वचनं श्रुत्वा तमुवाच सती तदा ॥८५॥ चन्द्रस्य गर्भं हे तात बिभर्म्यद्य स्वकर्मणा ॥
सर्वे मे साक्षिणः सन्ति दुर्बलायाः प्रजापते ॥ ८६ ॥ यदा जग्राह चन्द्रो मां दयाहीनश्च दुर्मतिः॥इत्युक्त्वा तारका देवी सुषाव कनकप्रभम्
॥ ८७ ॥ कुमारं सुन्दरं तत्र ज्वलन्तं ब्रह्मतेजसा ॥ गृहीत्वा तनयं चन्द्रो नत्वा ब्रह्माणमीश्वरम् ॥ ८८ ॥ जगाम स स्वभवनं
ब्रह्मा सिन्धुतटं ययौ ॥ साध्वीं तारां च गुरवे देवेभ्योऽप्यभयं ददौ ॥८९॥ आशिषं शम्भुधर्माभ्यां दत्त्वा लोकं ययौ विधिः
॥ देवा ययुः स्वभवनं स्वगृहं च बृहस्पतिः ॥ ९० ॥ भावानुरक्तवनितां प्राप्य संहृष्टमानसः ॥ तारकागर्भसंभूतः स एव च बुधः
स्वयम् ॥ ९१ ॥ तेजस्वी सद्ग्रहो ब्रह्मश्चन्द्रस्य तनयो महान् ॥ स एव नन्दनवने चित्रां संप्राप्य निर्जने ॥ ९२ ॥

घृताच्या गर्भसंभूतां कुबेरस्य च रेतसा ॥ दृष्ट्वा च निर्जने रम्यां कन्यां कमललोचनाम् ॥ ९३ ॥ अतीव यौवनस्थां च बालां षोडशवार्षिकीम् ॥ गान्धर्वेण विवाहेन तां जग्राह विधोः सुतः ॥ ९४ ॥ तस्यामथायं रहसि वीर्य्याधानं चकार सः ॥ बभूव राजा चित्रायां चैत्रो वै मण्डलेश्वरः ॥९५॥ सप्तद्वीपवतीं पृथ्वीं शास्ति वै धार्मिको बली ॥ शतं नद्यो घृतानां च दध्नां नद्यः शतानि च ॥ ९६ ॥ शतानि नद्यो दुग्धानां मधुनद्यश्च षोडश ॥ दश नद्यश्च तैलानां शर्करालक्षराशयः ॥ ९७ ॥ मिष्टान्नानां स्वस्तिकानां लक्षराशिश्च नित्यशः ॥ पञ्चकोटिगवां मांसं सापूपं स्वन्नमेव च ॥ ९८ ॥ एतेषां च नदीराशीर्भुञ्जते ब्राह्मणा मुने ॥ गवां लक्षं च रत्नानां मणीनां लक्षमेव च ॥ ९९ ॥ शतलक्षं सुवर्णानां लक्षं वै सूक्ष्मवाससाम् ॥ रत्नानां भूषणं पात्रमतीव सुमनोहरम् ॥ १०० ॥ ददौ द्विजातये राजा नित्यं वै जीवितावधि ॥ तस्य चैत्रस्य पुत्रश्च राजाऽधिरथ एव च ॥ १०१ ॥ तस्य पुत्रश्च सुरथश्चक्रवर्त्ती बृहच्छ्रवाः ॥ महाज्ञानं च संप्राप्य मेधसो मुनिसत्तमात् ॥ १०२ ॥ भेजे पुरा विष्णुमायां पुण्यक्षेत्रे च भारते ॥ शरत्काले महापूजां चकार स सरित्तटे॥१०३॥वैश्येन सार्धं स महान्ज्ञानिनां मुनिसत्तम॥ राजा कलिङ्गदेशस्य विराधश्च विशां वरः ॥ १०४ ॥ तस्य पुत्रो महायोगी द्रुमिणो ज्ञानिनां वरः ॥ द्रुमिणो वैष्णवः प्राज्ञः पुष्करे दुष्करं तपः ॥ १०५ ॥ कृत्वा समाधिं संप्राप ज्ञानिनां वैष्णवाग्रणीः ॥ पुत्रैर्दारैर्निरस्तश्च धनलोभाद्दुरात्मभिः ॥१०६॥ स च कोटिसुवर्णं च नित्यं दत्त्वा जलं पपौ ॥ मुक्तिं संप्राप संसेव्य विष्णुमायां सनातनीम्॥१०७॥ राजा लेभे मनुत्वं च राज्यं निष्कण्टकं मुने ॥ उवाच मधुरं वाक्यं धाता त्रिजगतां पतिः ॥ १०८ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे दुर्गोपाख्याने गुरोस्ताराप्राप्तिबुधोत्पत्त्यादिवर्णनं नामैकषष्टितमोऽध्यायः ॥ ६१ ॥

नारद उवाच ॥ कथं राजा महाज्ञानं संप्राप मुनिसत्तमात् ॥ वैश्यो मुक्तिं मेधसश्च तन्मे व्याख्यातुमर्हसि ॥ १ ॥ श्रीनारायण उवाच ॥ ध्रुवस्य पौत्रो बलवान्नन्दिरुत्कलनन्दनः ॥ स्वायम्भुवमनोर्वंश्यः सत्यवादी जितेन्द्रियः ॥ २ ॥ अक्षौहिणीनां शतकं गृहीत्वा सैन्यमेव च ॥ कोलां च

वेष्टयामास सुरथस्य महामतेः ॥३॥ युद्धं बभूव नियतं पूर्णमब्दं च नारद ॥ चिरंजीवी वैष्णवश्च जिगाय सुरथं नृपः ॥४॥ एकाकी
सुरथो भीतो नन्दिना च बहिष्कृतः ॥ निशायां हयमारुह्य जगाम गहनं वनम् ॥ ५ ॥ ददर्श तत्र वैश्यं च पुष्पभद्रानदीतटे ॥ तयो
र्बभूव संप्रीतिः कृतबान्धवयोर्मुने ॥ ६ ॥ वैश्येन सार्द्धं नृपतिरगच्छन्मेधसाश्रमम् ॥ पुष्करं दुष्करं पुण्यक्षेत्रं वै भारते सताम् ॥
॥ ७ ॥ ददर्श तत्र नृपतिर्मुनिं तं तीव्रतेजसम् ॥ शिष्येभ्यश्च प्रवोचन्तं ब्रह्मतत्त्वं सुदुर्लभम् ॥८॥ राजा ननाम वैश्यश्च शिरसा मुनि
पुङ्गवम् ॥ मुनिस्तौ पूजयामास ददौ ताभ्यां शुभाशिषम् ॥ ९ ॥ प्रश्नं चकार कुशलं जातिनाम पृथक्पृथक् ॥ ददौ प्रत्युत्तरं राजा
क्रमेण मुनिपुङ्गवम् ॥ १० ॥ सुरथ उवाच ॥ राजाऽहं सुरथो ब्रह्मंश्चैत्रवंशसमुद्भवः ॥ बहिर्भूतः स्वराज्याच्च नन्दिना बलिनाऽधुना ॥
॥ ११ ॥ किमुपायं करिष्यामि कथं राज्यं भवेन्मम ॥ तन्मां ब्रूहि महाभाग त्वामेव शरणागतम् ॥ १२ ॥ अयं वैश्यः समा
धिश्च स्वगृहाच्च बहिष्कृतः ॥ पुत्रैः कलत्रैर्दैवेन धनलोभेन धार्मिकः ॥ १३ ॥ ब्राह्मणाय ददौ नित्यं रत्नकोटिं दिने दिने ॥
निषिद्ध्यमानः पुत्रैश्च कलत्रैर्बान्धवैरयम् ॥ १४ ॥ कोपान्निराकृतस्तैश्च पुनरन्वेषितः शुचा ॥ अयं गृहं च न ययौ विरक्तो
ज्ञानवाञ्छुचिः॥ १५ ॥ पुत्राश्च पितृशोकेन गृहं त्यक्त्वा ययुर्वनम् ॥ दत्त्वा दानानि विप्रेभ्यो विरक्ताः सर्वकर्मसु ॥ १६ ॥
सुदुर्लभं हरेर्दास्यं वैश्यस्यास्य च वाञ्छितम् ॥ कथं प्राप्नोति निष्कामस्तन्मे व्याख्यातुमर्हसि ॥ १७ ॥ श्रीमेधा
उवाच ॥ करोति मायया च्छन्नं विष्णुमाया दुरत्यया ॥ निर्गुणस्य च कृष्णस्य त्रिगुणा विश्वमाज्ञया ॥ १८ ॥ कृपां
करोति येषां सा धर्मिणां च कृपामयी ॥ तेभ्यो ददाति कृपया कृष्णभक्तिं सुदुर्लभाम् ॥ १९ ॥ येषां मायाविनां माया न करोति
कृपां नृप ॥ मायया तान्निबध्नाति मोहजालेन दुर्गतान् ॥ २० ॥ नश्वरेऽनित्यसंसारे भ्रामयेद्बर्बरा सदा ॥ कुर्वन्ती नित्यबुद्धिं च
विहाय परमेश्वरम् ॥ २१ ॥ देवमन्यं निषेवन्ते तन्मन्त्रं च जपंति च ॥ मिथ्या किञ्चिन्निमित्तं च कृत्वा मनसि लोभतः ॥ २२ ॥
सप्तजन्मसु संसेव्य देवताश्च हरेः कलाः ॥ तदा प्रकृत्या कृपया सेवन्ते प्रकृतिं तदा ॥ २३ ॥ सप्तजन्मसु संसेव्य विष्णुमायां

कृपामयीम् ॥ शिवे भक्तिं लभन्ते ते ज्ञानानन्दे सनातने ॥ २४ ॥ ज्ञानाधिष्ठातृदेवं च हरेस्संसेव्य शङ्करम् ॥ अचिराद्विष्णुभक्तिं च प्राप्नुवन्ति महेश्वरात् ॥ २५ ॥ सेवन्ते सगुणं सत्त्वं विष्णुं विषयिणं तदा ॥ सत्त्वज्ञानाच्च पश्यन्ति ज्ञानं वै निर्म्मलं नराः ॥ ॥ २६ ॥ निषेव्य सगुणं विष्णुं सात्त्विका वैष्णवा नराः ॥ लभन्ते निर्गुणे भक्तिं श्रीकृष्णे प्रकृतेः परे ॥ २७ ॥ गृह्णन्ति सन्तस्तद्भक्ता मन्त्रं तस्य निरामयम् ॥ निषेव्य निर्गुणं देवं ते भवन्ति च निर्गुणाः ॥ २८ ॥ असंख्यब्रह्मणां पातं ते च पश्यन्ति वैष्णवाः ॥ दास्यं कुर्वन्ति सततं गोलोके च निरामये ॥ २९ ॥ कृष्णभक्तात्कृष्णमन्त्रं यो गृह्णाति नरोत्तमः ॥ पुरुषाणां सहस्रं च स्वपितॄणां समुद्धरेत् ॥ ३० ॥ मातामहानां साहस्रमुद्धरेन्मातरं तथा ॥ दासादिकं समुद्धृत्य गोलोकं स प्रयाति च ॥ ३१ ॥ भवार्णवे महाघोरे कर्णधारस्वरूपिणी ॥ दीनान्पारयते नित्यं कृष्णभक्त्या च नौकया ॥ ३२ ॥ स्वकर्मबन्धनं छेत्तुं वैष्णवानां च वैष्णवी ॥ तीक्ष्णशस्त्रस्वरूपा सा कृष्णस्य परमात्मनः ॥ ३३ ॥ विवेचिका चावरणी शक्तेः शक्तिर्द्विधा नृप ॥ पूर्वं ददाति भक्ताय चेतराय परात्परा ॥ ३४ ॥ सत्यस्वरूपः श्रीकृष्णस्तस्मात्सर्वं च नश्वरम् ॥ बुद्धिर्विवेचिकेत्येवं वैष्णवानां सनातनी ॥ ३५ ॥ नित्यरूपा ममेयं श्रीरिति चावरणी च धीः ॥ अवैष्णवानामसतां कर्म्मभोगभुजामहो ॥ ३६ ॥ अहं प्रचेतसः पुत्रः पौत्रश्च ब्रह्मणो नृप ॥ भजामि कृष्णमात्मानं ज्ञानं संप्राप्य शङ्करात् ॥ ३७ ॥ गच्छ राजन्नदीतीरं भज दुर्गां सनातनीम् ॥ बुद्धिमावरणीं तुभ्यं देवो दास्यति कामिने ॥ ३८ ॥ निष्कामाय च वैश्याय वैष्णवाय च वैष्णवी ॥ बुद्धिं विवेचिकां शुद्धां दास्यत्येव कृपामयी॥ ३९॥ इत्युक्त्वा च मुनिश्रेष्ठो ददौ ताभ्यां कृपानिधिः ॥ पूजाविधानं दुर्गायाः स्तोत्रं च कवचं मनुम् ॥ ॥ ४० ॥ वैश्यो मुक्तिं च संप्राप तां निषेव्य कृपामयीम् ॥ राजा राज्यं मनुत्वं च परमैश्वर्य्यमीप्सितम् ॥ ४१ ॥ इत्येवं कथितं सर्वं दुर्गोपाख्यानमुत्तमम् ॥ सुखदं मोक्षदं सारं किं भूयः श्रोतुमिच्छसि ॥ ४२ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृति

---

१ सतामपीति पाठः ।

खण्डे नारदनारायणसंवादे दुर्गोपाख्याने सुरथमेधस्संवादे सुरथवैश्ययोरभिलषितसिद्धिर्नाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ नारद उवाच ॥ नारायण महाभाग वद वेदविदां वर ॥ राजा केन प्रकारेण सिषेवे प्रकृतिं पराम् ॥ १ ॥ समाधिर्नाम वैश्यो वा निष्कामं निर्गुणं विभुम् ॥ भेजे केन प्रकारेण प्रकृतेरुपदेशतः ॥ २ ॥ किं वा पूजाविधानं च ध्यानं वा मनुरेव च ॥ किं स्तोत्रं कवचं किं वा ददौ राज्ञे महामुनिः ॥ ३ ॥ वैश्याय प्रकृतिस्तस्मै किं वा ज्ञानं ददौ परम् ॥ साक्षाद्बभूव सहसा केन वा प्रकृतिस्तयोः ॥ ४ ॥ ज्ञानं संप्राप्य वैश्यश्च किं पदं प्राप दुर्लभम् ॥ गतिर्बभूव राज्ञश्च का वा तां च शृणोम्यहम् ॥ ५ ॥ श्रीनारायण उवाच ॥ राजा वैश्यश्च संप्राप्य मन्त्रं वै मेधसो मुनेः ॥ स्तोत्रं च कवचं देव्या ध्यानं चैव पुरस्क्रियाम् ॥ जजाप परमं मन्त्रं राजा वैश्यश्च पुष्करे ॥ ६ ॥ स्नात्वा त्रिकालं वर्षं च ततः शुद्धो बभूव सः ॥ साक्षाद्बभूव तत्रैव मूलप्रकृतिरीश्वरी ॥ ७ ॥ राज्ञे ददौ राज्यवरं मनुत्वं वाञ्छितं सुखम् ॥ ज्ञानं निगूढं वैश्याय ददौ चातिसुदुर्लभम् ॥ ८ ॥ यद्दत्तं शूलिने पूर्वं कृष्णेन परमात्मना ॥ निराहारमतिक्लिष्टं दृष्ट्वा वैश्यं कृपामयी ॥ ९ ॥ रुरोद कृत्वा क्रोडे तमचेष्टं श्वासवर्जितम् ॥ चेतनां कुरु भो वत्सेत्युच्चार्य्य च पुनः पुनः ॥१०॥ चेतनां च ददौ तस्मै स्वयं चैतन्यरूपिणी ॥ संप्राप्य चेतनां वैश्यो रुरोद प्रकृतेः पुरः ॥ ११ ॥ तमुवाच प्रसन्नाऽसौ कृपयाऽतिकृपामयी ॥ १२ ॥ श्रीप्रकृतिरुवाच ॥ वरं वृणुष्व हे वत्स यत्ते मनसि वर्त्तते ॥ ब्रह्मत्वममरत्वं वा ततो वाऽतिसुदुर्लभम् ॥ १३ ॥ इन्द्रत्वं वा मनुत्वं वा सर्वसिद्धत्वमेव च ॥ तुच्छं तुभ्यं न दास्यामि नश्वरं बालवञ्चनम् ॥ १४ ॥ वैश्य उवाच ॥ ब्रह्मत्वममरत्वं वा मातर्मे नहि वाञ्छितम् ॥ ततोऽतिदुर्लभं किं वा न जाने तदभीप्सितम् ॥ १५ ॥ त्वय्येव शरणापन्नो देहि यद्वाञ्छितं तव ॥ अनश्वरं सर्वसारं वरं मे दातुमर्हसि ॥ १६ ॥ प्रकृतिरुवाच ॥ अदेयं नास्ति मे तुभ्यं दास्यामि मम वाञ्छितम् ॥ यतो यास्यसि गोलोकं पदमेव सुदुर्लभम् ॥ १७ ॥ सर्वसारं च यज्ज्ञानं सुरर्षीणां सुदुर्लभम् ॥ तद्गृह्यतां महाभाग गच्छ वत्स हरेः पदम् ॥ १८ ॥ स्मरणं वन्दनं ध्यानमर्चनं गुणकीर्त्तनम् ॥ श्रवणं भावनं

सेवा कृष्णे सर्वनिवेदनम् ॥१९॥ एतदेवं वैष्णवानां नवधा भक्तिलक्षणम् ॥ जन्ममृत्युजराव्याधियमताडनखण्डनम् ॥२०॥ आयुर्ह
रति लोकानां रविरेव हि सन्ततम् ॥ नवधा भक्तिहीनानामसतां पापिनामपि ॥ २१ ॥ भक्तास्तद्गतचित्ताश्च वैष्णवाश्चिरजीविनः ॥
जीवन्मुक्ताश्च निष्पापा जन्मादिपरिवर्जिताः ॥ २२ ॥ शिवः शेषश्च धर्मश्च ब्रह्मा विष्णुर्महान्विराट् ॥ सनत्कुमारः कपिलः सन
कश्च सनन्दनः ॥ २३ ॥ वोढुः पञ्चशिखो दक्षो नारदश्च सनातनः ॥ भृगुर्मरीचिर्दुर्वासाः कश्यपः पुलहोऽङ्गिराः ॥ २४ ॥ मेधावी
लोमशः शुक्रो वसिष्ठः क्रतुरेव च ॥ बृहस्पतिः कर्दमश्च शक्तिरत्रिः पराशरः ॥ २५ ॥ मार्कण्डेयो बलिश्चैव प्रह्ला
दश्च गणेश्वरः ॥ यमः सूर्य्यश्च वरुणो वायुश्चन्द्रो हुताशनः ॥ २६ ॥ अकूपार उलूकश्च नाडीजंघश्च वायुजः ॥ नरनारा
यणौ कूर्म्म इन्द्रद्युम्नो विभीषणः ॥ २७ ॥ नवधा भक्तियुक्ताश्च कृष्णस्य परमात्मनः ॥ एते महान्तो धर्मिष्ठा भक्तानां प्रवरा
स्तथा ॥ २८ ॥ ये तद्भक्तास्ते तदंशा जीवन्मुक्ताश्च सन्ततम् ॥ पापापहारास्तीर्थानां पृथिव्याश्च विशां पते ॥ २९ ॥
ऊर्ध्वं च सप्त स्वर्गाश्च सप्तद्वीपा वसुन्धरा ॥ अधस्सप्त च पाताला एतद्ब्रह्माण्डमेव च ॥ ३० ॥ एवंविधानां विश्वानां संख्या
नास्त्येव पुत्रक ॥ एवं च प्रतिविश्वेषु ब्रह्मविष्णुशिवादयः॥३१॥ देवा देवर्षयश्चैव मनवो मानवादयः ॥ सर्वाश्रमाश्च सर्वत्र सन्ति
बद्धाश्च मायया ॥ ३२ ॥ महाविष्णोर्लोमकूपे सन्ति विश्वानि यस्य च ॥ स षोडशांशः कृष्णस्य चात्मनश्च महाविराट् ॥
॥ ३३ ॥ भज सत्यं परं ब्रह्म नित्यं निर्गुणमच्युतम् ॥ प्रकृतेः परमीशानं कृष्णमात्मानमीप्सितम् ॥ ३४ ॥ निरीहं च निराकारं
निर्विकारं निरञ्जनम् ॥ निष्कामं निर्विरोधं च नित्यानन्दं सनातनम् ॥ ३५ ॥ स्वेच्छामयं सर्वरूपं भक्तानुग्रहविग्रहम् ॥ तेजस्स्व
रूपं परमं दातारं सर्वसम्पदाम् ॥ ३६ ॥ ध्यानासाध्यं दुराराध्यं शिवादीनां च योगिनाम् ॥ सर्वेश्वरं सर्वपूज्यं सर्वेषां सर्वकाम
दम् ॥ ३७ ॥ सर्वाधारं च सर्वज्ञं सर्वानन्दकरं परम् ॥ सर्वधर्मप्रदं सर्वं सर्वज्ञं प्राणरूपिणम् ॥ ३८ ॥ सर्वधर्मस्वरूपं च सर्वकार
णकारणम् ॥ सुखदं मोक्षदं सारं पररूपं च भक्तिदम् ॥ ३९ ॥ दास्यदं धर्मदं चैव सर्वसिद्धिप्रदं सताम् ॥ सर्वं तदतिरिक्तं च

नश्वरं कृत्रिमं सदा ॥ ४० ॥ परात्परतरं शुद्धं परिपूर्णतमं शिवम् ॥ यथासुखं गच्छ वत्स भगवन्तमधोक्षजम् ॥ ४१ ॥ कृष्णेति द्व्यक्षरं मन्त्रं गृहीत्वा कृष्णदास्यदम् ॥ पुष्करं दुष्करं गत्वा दशलक्षमिमं जप ॥ ४२ ॥ दशलक्षजपेनैव मन्त्रसिद्धिर्भवेत्तव ॥ इत्युक्त्वा सा भगवती तत्रैवान्तरधीयत ॥४३॥ वैश्यो नत्वा च तां भक्त्या चागमत्पुष्करं मुने ॥ पुष्करे दुष्करं तप्त्वा स लेभे कृष्णमीश्वरम् ॥ भगवत्याः प्रसादेन कृष्णदासो बभूव सः ॥ ४४ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे दुर्गोपाख्याने सुरथसमाधिमेधस्संवादे प्रकृतिवैश्यसंवादकथनं नाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

नारायण उवाच ॥ राजा येन क्रमेणैव भेजे तां प्रकृतिं पराम् ॥ तच्छ्रूयतां महाभाग वेदोक्तं क्रममेव च ॥ १ ॥ स्नात्वाऽऽचम्य महाराजः कृत्वा न्यासत्रयं तदा ॥ स्वकराङ्गाङ्गमन्त्राणां भूतशुद्धिं चकार सः ॥ २ ॥ प्राणायामं ततः कृत्वा कृत्वा च शङ्खशोधनम् ॥ ध्यात्वा देवीं च मृन्मय्यां चकारावाहनं तदा ॥ ३ ॥ पुनर्ध्यात्वा च भक्त्या च पूजयामास भक्तितः ॥ देव्याश्च दक्षिणे भागे संस्थाप्य कमलालयाम् ॥ ४ ॥ संपूज्य भक्तिभावेन भक्त्या परमधार्मिकः ॥ देवषट्कं समावाह्य देव्याश्च पुरतो घटे ॥ ५ ॥ भक्त्या च पूजयामास विधिपूर्वं च नारद ॥ गणेशं च दिनेशं च वह्निं विष्णुं शिवं शिवाम् ॥ ६ ॥ देवषट्कं च संपूज्य नमस्कृत्य विचक्षणः ॥ तदा ध्यायेन्महादेवीं ध्यानेनानेन भक्तितः ॥ ७ ॥ ध्यानं च सामवेदोक्तं परं कल्पतरुं मुने ॥ ध्यायेन्नित्यं महादेवीं मूलप्रकृतिमीश्वरीम् ॥ ॥ ८ ॥ ब्रह्मविष्णुशिवादीनां पूज्यां वन्द्यां सनातनीम् ॥ नारायणीं विष्णुमायां वैष्णवीं विष्णुभक्तिदाम् ॥ ९ ॥ सर्वस्वरूपां सर्वेषां सर्वाधारां परात्पराम् ॥ सर्वविद्यासर्वमन्त्रसर्वशक्तिस्वरूपिणीम्॥१०॥सगुणां निर्गुणां सत्यां वरां स्वेच्छामयीं सतीम् ॥ महाविष्णोश्च जननीं कृष्णस्यार्द्धाङ्गसम्भवाम्॥११॥ कृष्णप्रियां कृष्णशक्तिं कृष्णबुद्ध्यधिदेवताम् ॥ कृष्णस्तुतां कृष्णपूज्यां कृष्णवन्द्यां कृपामयीम् ॥ १२ ॥ तप्तकाञ्चनवर्णाभां कोटिसूर्य्यसमप्रभाम् ॥ ईषद्धास्यप्रसन्नास्यां भक्तानुग्रहकारिकाम् ॥ १३ ॥ दुर्गां शतभुजां देवीं महद्दुर्गतिनाशिनीम् ॥ त्रिलोचनप्रियां साध्वीं त्रिगुणां च त्रिलोचनाम् ॥ १४ ॥ त्रिलोचनप्राणरूपां शुद्धार्द्धचन्द्रशेखराम् ॥

बिभ्रतीं कबरीभारं मालतीमाल्यमण्डितम् ॥ १५ ॥ वर्त्तुलं वामवक्त्रं च शम्भोर्मानसमोहिनीम् ॥ रत्नकुण्डलयुग्मेन गण्डस्थलविराजिताम् ॥ १६ ॥ नासादक्षिणभागेन बिभ्रतीं गजमौक्तिकम् ॥ अमूल्यरत्नं बहुलं बिभ्रतीं श्रवणोपरि ॥ १७ ॥ मुक्तापंक्तिविनिन्द्यैकदन्तपंक्तिसुशोभिताम् ॥ पक्वबिम्बाधरोष्ठीं च सुप्रसन्नां सुमंगलाम् ॥ १८ ॥ चित्रपत्रावलीरम्यकपोलयुगलोज्ज्वलाम् ॥ रत्नकेयूरवलयरत्नमञ्जीररञ्जिताम् ॥ १९ ॥ रत्नकङ्कणभूषाढ्यां रत्नपा[1]शकशोभिताम् ॥ रत्नांगुलीयनिकरैः करांगुलिचयोज्ज्वलाम् ॥ ॥ २० ॥ पादाङ्गुलिनखासक्तालक्तकरेखासुशोभनाम् ॥ वह्निशुद्धांशुकाधानां गन्धचन्दनचर्चिताम् ॥ २१ ॥ बिभ्रतीं स्तनयुग्मं च कस्तूरीबिन्दुशोभितम् ॥ सर्वरूपगुणवतीं गजेन्द्रमन्दगामिनीम् ॥ २२ ॥ अतीव कान्तां शान्तां च नितान्तां योगसिद्धिषु ॥ विधातुश्च विधात्रीं च सर्वधात्रीं च शंकरीम् ॥ २३ ॥ शरत्पार्वणचन्द्रास्यामतीव सुमनोहराम् ॥ कस्तूरीबिन्दुभिः सार्द्धमधश्चन्दनबिन्दुना ॥ २४ ॥ सिन्दूरबिन्दुना शश्वद्भालमध्यस्थलोज्ज्वलाम् ॥ शरन्मध्याह्नकमलप्रभामोचनलोचनाम् ॥ २५ ॥ चारुकज्जलरेखाभ्यां सर्वतश्च समुज्ज्वलाम् ॥ कोटिकन्दर्पलावण्यलीलानिन्दितविग्रहाम् ॥ २६ ॥ रत्नसिंहासनस्थां च सद्रत्नमुकुटोज्ज्वलाम् ॥ सृष्टौ स्रष्टुः शि[2]ल्परूपां दयां पातुश्च पालने ॥ २७ ॥ संहारकाले संहर्त्तुः परां संहाररूपिणीम् ॥ निशुम्भशुम्भमथिनीं महिषासुरमर्दिनीम् ॥ २८ ॥ पुरा त्रिपुरयुद्धे च संस्तुतां त्रिपुरारिणा ॥ मधुकैटभयोर्युद्धे विष्णुशक्तिस्वरूपिणीम् ॥ २९ ॥ सर्वदैत्यनिहन्त्रीं च रक्तबीजविनाशिनीम् ॥ नृसिंहशक्तिरूपां च हिरण्यकशिपोर्वधे ॥३०॥ वराहशक्तिं वाराहे हिरण्याक्षवधे तथा॥ परब्रह्मस्वरूपां च सर्वशक्तिं सदा भजे ॥ ३१ ॥ इति ध्यात्वा स्वशिरसि पुष्पं दत्त्वा विचक्षणः ॥ पुनर्ध्यात्वा चैव भक्त्या कुर्य्यादावाहनं ततः ॥ ३२ ॥ प्रकृतेः प्रतिमां धृत्वा मन्त्रमेवं पठेन्नरः ॥ जीवन्यासं ततः कुर्य्यान्मनुनाऽनेन यत्नतः ॥ ३३ ॥ एह्येहि भगवत्यम्ब शिवलोकात्सनातनि ॥ गृहाण मम पूजां च शारदीयां सुरेश्वरि ॥ ३४ ॥ इहागच्छ जगत्पूज्ये तिष्ठ तिष्ठ महेश्वरि ॥

---

[1] यावक इति पाठः । [2] सृष्टिरूपामिति पाठः ।

हे मातरस्यामर्चायां सन्निरुद्धा भवाम्बिके ॥ ३५ ॥ इहागच्छन्तु त्वत्प्राणाश्चाधिप्राणैः सहाच्युते ॥ इहागच्छन्तु त्वरितं तवैव सर्व
शक्तयः ॥ ३६ ॥ ॐ ह्रीं श्रीं क्लीं च दुर्गायै वह्निजायान्तमेव च ॥ समुच्चार्य्योरसि प्राणाः सन्तिष्ठन्तु सदाशिवे ॥ ३७ ॥ सर्वे
न्द्रियाधिदेवास्ते इहागच्छन्तु चण्डिके ॥ ते शक्तयोऽत्रागच्छन्तु इहागच्छन्तु ईश्वराः ॥ ३८ ॥ स इहागच्छेत्यावाह्य परिहारं करोति
च ॥ मन्त्रेणानेन विप्रेन्द्र तच्छृणुष्व समाहितः ॥ ३९ ॥ स्वागतं भगवत्यम्ब शिवलोकाच्छिवप्रिये ॥ प्रसादं कुरु मां भद्रे भद्र
कालि नमोऽस्तु ते ॥ ४० ॥ धन्योऽहं कृतकृत्योऽहं सफलं जीवनं मम ॥ आगताऽसि यतो दुर्गे माहेश्वरि मदालयम् ॥ ४१ ॥
अद्य मे सफलं जन्म सार्थकं जीवनं मम ॥ पूजयामि यतो दुर्गां पुण्यक्षेत्रे च भारते ॥ ४२ ॥ भारते[1] भवतीं पूज्यां दुर्गां यः
पूजयेद् बुधः ॥ सोऽन्ते याति च गोलोकं परमैश्वर्य्यवानिह ॥४३॥ कृत्वा च वैष्णवीपूजां विष्णुलोकं व्रजेत्सुधीः ॥ माहेश्वरीं च
संपूज्य शिवलोकं च गच्छति ॥ ४४ ॥ सात्त्विकी राजसी चैव त्रिधा पूजा च तामसी ॥ भगवत्याश्च वेदोक्ता चोत्तमा मध्यमा
ऽधमा ॥ ४५ ॥ सात्त्विकी वैष्णवानां च शाक्तादीनां च राजसी ॥ अदीक्षितानामसतामन्येषां तामसी स्मृता ॥ ४६ ॥ जीवहत्या
विहीना या वरा पूजा तु वैष्णवी ॥ वैष्णवा यान्ति गोलोकं वैष्णवीबलिदानतः ॥ ४७ ॥ माहेश्वरी राजसी च बलिदानसम
न्विता ॥ शाक्तादयो राजसाश्च कैलासं यान्ति ते तथा ॥ ४८ ॥ किरातास्त्रिदिवं यान्ति तामस्या पूजया तया ॥ त्वमेव जगतां
मातश्चतुर्वर्गफलप्रदा ॥ ४९ ॥ सर्वशक्तिस्वरूपा च कृष्णस्य परमात्मनः ॥ जन्ममृत्युजराव्याधिहरा त्वं च परात्परा ॥ ५० ॥
सुखदा मोक्षदा भद्रा कृष्णभक्तिप्रदा सदा ॥ नारायणि महामाये दुर्गे दुर्गतिनाशिनि ॥ ५१ ॥ दुर्गेति स्मृतिमात्रेण याति दुर्गं
नृणामिह ॥ इति कृत्वा परीहारं देव्या वामे च साधकः ॥ ५२ ॥ त्रिपद्या उपरिष्टात्तु शंखं संस्थापयेत्तु सः ॥ तत्र दत्त्वा जलं
पूर्णं दूर्वां पुष्पं च चन्दनम् ॥ ५३ ॥ धृत्वा दक्षिणहस्तेन मन्त्रमेवं पठेन्नरः ॥ पुण्यस्त्वं शंख पुण्यानां मङ्गलानां च मङ्गलम् ॥

---

[1] भारतीमिति पाठः ।

प्रभूतः शंखचूडास्त्वं पुरा कल्पे पवित्रकः ॥ ५४ ॥ ततोऽर्घ्यपात्रं संस्थाप्य विधिनाऽनेन पण्डितः ॥ दत्त्वा संपूजयेद्देवीमुपचारांश्च षोडश ॥५५॥ त्रिकोणमण्डलं कृत्वा सजलेन कुशेन च ॥ कूर्मं शेषं धरित्रीं च पूजयेत्तत्र धार्मिकः ॥ ५६ ॥ त्रिपदीं स्थापयेत्तत्र त्रिपद्यां शंखमेव च ॥ शंखे त्रिभागतोयं च दत्त्वा संपूजयेत्ततः ॥ ५७ ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति ॥ नर्म्मदे सिन्धुकावेरि चन्द्रभागे च कौशिकि ॥५८॥ स्वर्णरेखे कनखले पारिभद्रे च गण्डकि ॥ श्वेतगङ्गे चन्द्ररेखे पम्पे चम्पे च गोमति ॥ ॥५९॥ पद्मावति त्रिपर्णाशे विपाशे विरजे प्रभे ॥ शतह्रदे चेलगंगे जलेऽस्मिन्सन्निधिं कुरु ॥६०॥ वह्निं सूर्य्यं च चन्द्रं च विष्णुं च वरुणं शिवम् ॥ पूजयेत्तत्र तोये च तुलस्या चन्दनेन च ॥ नैवेद्यानि च सर्वाणि प्रोक्षयेत्तज्जलेन च॥६१॥प्रत्येकं वै ततो दद्यादुपचारांश्च षोडश ॥ आसनं वसनं पाद्यं स्नानीयमनुलेपनम् ॥ ६२ ॥ मधुपर्कं गन्धमर्घ्यं पुष्पं नैवेद्यमीप्सितम् ॥ पुनराचमनीयं च ताम्बूलं रत्नभूषणम् ॥ ६३ ॥ धूपं प्रदीपं तल्पं चेत्युपचारास्तु षोडश ॥ ६४ ॥ अमूल्यरत्नसंक्लृप्तं नानाचित्रविराजितम् ॥ वरं सिंहासनं श्रेष्ठं गृह्यतां शङ्करप्रिये ॥ ६५ ॥ अनन्तसूत्रप्रभवमीश्वरेच्छाविनिर्मितम् ॥ ज्वलदग्निविशुद्धं च वसनं गृह्यतां शिवे ॥ ६६ ॥ अमूल्यरत्नपात्रस्थं निर्मलं जाह्नवीजलम् ॥ पादप्रक्षालनार्थाय दुर्गे देवि प्रगृह्यताम् ॥ ॥ ६७ ॥ सुगन्धामलकीस्निग्धद्रवमेतत्सुदुर्लभम् ॥ सुपक्वं विष्णुतैलं च गृह्यतां परमेश्वरि ॥ ६८ ॥ कस्तूरीकुंकुमाक्तं च सुगन्धि द्रुतचन्दनम् ॥ सुवासितं जगन्मातर्गृह्यतामनुलेपनम् ॥ ६९ ॥ माध्वीकं रत्नपात्रस्थं सु पवित्रं सुमङ्गलम् ॥ मधुपर्कं महादेवि गृह्यतां प्रीतिपूर्वकम् ॥ ७० ॥ सुगन्धमूलचूर्णं च सुगन्धद्रव्यसंयुतम् ॥ सुपवित्रं मङ्गलार्हं देवि गन्धं गृहाण मे ॥ ७१ ॥ पवित्रं शंखपात्रस्थं दूर्वापुष्पाक्षतान्वितम् ॥ स्वर्गमन्दाकिनीतोयमर्घ्यं चण्डि गृहाण मे ॥ ७२ ॥ सुगन्धि पुष्पश्रेष्ठं च पारिजाततरूद्भवम् ॥ नानापुष्पादिमाल्यानि गृह्यन्तां जगदम्बिके ॥७३॥ दिव्यं सिद्धान्नमा[1]मान्नं पिष्टकं पायसा

---

[1] माषान्नमिति पाठः ।

दिकम् ॥ मिष्टान्नं लड्डुकफलं नैवेद्यं गृह्यतां शिवे ॥ ७४ ॥ सुवासितं शीततोयं कर्पूरादिसुसंस्कृतम्॥मया निवेदितं भक्त्या गृह्यतां शैलकन्यके ॥ ७५ ॥ गुवाकपर्णचूर्णं च कर्पूरादिसुवासितम् ॥ सर्वभोगकरं रम्यं ताम्बूलं देवि गृह्यताम् ॥ ७६ ॥ अमूल्यरत्नसारैश्च खचितं चेश्वरेच्छया ॥ सर्वाङ्गशोभनकरं भूषणं देवि गृह्यताम् ॥ ७७ ॥ तरुनिर्य्यासचूर्णं च गन्धवस्तुसमन्वितम् ॥ हुताशनशिखाशुद्धं धूपं देवि च गृह्यताम् ॥ ७८ ॥ दिव्यरत्नविशेषं च सान्द्रध्वान्तनिवारकम् ॥ सुपवित्रं प्रदीपं च गृह्यतां परमेश्वरि ॥ ७९ ॥ रत्नसारगणाकीर्णं दिव्यं पर्य्यङ्कमुत्तमम् ॥ सूक्ष्मवस्त्रैश्च संस्यूतं देवि तल्पं प्रगृह्यताम् ॥ ८० ॥ एवं संपूज्य तां दुर्गां दद्यात्पुष्पाञ्जलिं मुने ॥ ततोऽष्टनायका देवीर्यत्नतः परिपूजयेत् ॥ ८१ ॥ उग्रचण्डां प्रचण्डां च चण्डोग्रां चण्डनायिकाम् ॥ अतिचण्डां च चण्डां च चण्डां चण्डवतीं तथा ॥८२॥ पद्मे चाष्टदले चैताः प्रागादिक्रमतस्तथा॥पञ्चोपचारैः संपूज्य भैरवान्मध्यदेशतः॥८३॥ आदौ महाभैरवं च तथा संहारभैरवम् ॥ असितांगभैरवं च रुरुभैरवमेव च ॥ ८४ ॥ कालभैरवमप्येवं क्रोधभैरवमेव च ॥ ताम्रचूडं चन्द्रचूडमन्ते वै भैरवद्वयम् ॥ ८५ ॥ एतान्संपूज्य मध्ये वै नव शक्तीश्च पूजयेत् ॥ तत्र पद्मे चाष्टदले मध्ये वै भक्तिपूर्वकम् ॥ ८६ ॥ ब्रह्माणीं वैष्णवीं चैव रौद्रीं माहेश्वरीं तथा ॥ नारसिंहीं च वाराहीमिन्द्राणीं कार्त्तिकीं तथा ॥ ८७ ॥ सर्वशक्तिस्वरूपां च प्रधानां सर्वमङ्गलाम् ॥ नव शक्तीश्च संपूज्य घटे देवांश्च पूजयेत् ॥ ८८ ॥ शङ्करं कार्त्तिकेयं च सूर्य्यं सोमं हुताशनम् ॥ वायुं च वरुणं चैव देव्याश्चेटीं बटुं तथा ॥ ८९ ॥ चतुष्षष्टिं योगिनीनां संपूज्य विधिपूर्वकम् ॥ यथाशक्ति बलिं दत्त्वा करोति स्तवनं बुधः ॥ ९० ॥ कवचं च गले बद्ध्वा पठित्वा भक्तिपूर्वकम् ॥ ततः कृत्वा परीहारं नमस्कुर्य्याद्विचक्षणः ॥ ९१ ॥ बलिदानविधानं च श्रूयतां मुनिसत्तम ॥ मायार्तिं महिषं छागं दद्यान्मेषादिकं शुभम् ॥ ९२ ॥ सहस्रवर्षं सुप्रीता दुर्गा मायातिदानतः ॥ महिषाच्छतवर्षं च दशवर्षं च छागलात् ॥ ९३ ॥ वर्षं मेषेण कूष्माण्डैः पक्षिभिर्हरिणैस्तथा ॥दशवर्षं कृष्णसारैः सहस्राब्दं च गण्डकैः ॥९४॥ कृत्रिमैः पिष्टकलितैः षण्मासं पशुभिस्तथा ॥ मासं सुपक्वादिफलैरक्षतैरिति नारद ॥ ९५ ॥ युवकं व्याधिहीनं च सशृंगं लक्षणा

न्वितम् ॥ विशुद्धमविकारांगं सुवर्णं पुष्टमेव च ॥ ९६ ॥ शिशुना बलिना दातुर्हन्ति पुत्रं च चण्डिका ॥ वृद्धेन वै गुरुजनं कृशेना
पीष्टबान्धवान् ॥ ९७ ॥ धनं चैवाधिकांगेन हीनांगेन प्रजास्तथा ॥ कामिनीं शृंगभंगेन काणेन भ्रातरं तथा ॥ ९८ ॥ घुटिकेन
भवेन्मृत्युर्विघ्नं स्याच्चित्रमस्तकैः ॥ हन्ति मित्रं ताम्रपृष्ठैर्भ्रष्टश्रीः पुच्छहीनतः ॥ ९९ ॥ मायातीनां स्वरूपं च श्रूयतां मुनिसत्तम ॥
वक्ष्याम्यथर्ववेदोक्तं फलहानिर्व्यतिक्रमे ॥ १०० ॥ पितृमातृविहीनं च युवकं व्याधिवर्जितम् ॥ विवाहितं दीक्षितं च परदारविहीन
कम् ॥ १०१ ॥ अजारजं विशुद्धं च सच्छूद्रपरिपोषितम् ॥ तद्बन्धुभ्यो धनं दत्त्वा क्रीतं मूल्यातिरेकतः ॥ १०२ ॥ स्नापयित्वा च
तं कर्त्ता पूजयेद्वस्त्रचन्दनैः ॥ माल्यैर्धूपैश्च सिन्दूरैर्दधिगोरोचनादिभिः ॥ १०३ ॥ तं च वर्षं भ्रामयित्वा भृत्यद्वारेण यत्नतः ॥ वर्षा
न्ते च समुत्सृज्य दुर्गायै तं निवेदयेत् ॥ १०४ ॥ अष्टमीनवमीसन्धौ दद्यान्मायातिमेव च ॥ इत्येवं कथितं सर्वं बलिदानं प्रसङ्गतः
॥ १०५ ॥ बलिं स्तुत्वा च दत्त्वा च धृत्वा च कवचं बुधः ॥ प्रणम्य दण्डवद्भूमौ दद्याद्विप्राय दक्षिणाम् ॥ १०६ ॥ इति श्रीब्रह्मवै
वर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे दुर्गोपाख्याने पूजाविधिबलिपशुलक्षणविशेषो नाम चतुष्षष्टितमोऽध्यायः
॥६४॥ नारद उवाच ॥ श्रुतं सर्वं महाभाग सुधारसपरं वरम् ॥ स्तोत्रं च कवचं पूजाफलं कालं वद प्रभो ॥१॥ नारायण उवाच ॥
आर्द्रायां बोधयेद्देवीं मूलेनैव प्रवेशयेत् ॥ उत्तरेणार्चयित्वा तां श्रवणायां विसर्जयेत् ॥२॥ आर्द्रायुक्तनवम्यां तु कृत्वा देव्याश्च बोध
नम् ॥ पूजायाः शतवार्षिक्याः फलमाप्नोति मानवः ॥ ३ ॥ मूलायां तु प्रवेशे च नरमेधफलं लभेत् ॥ ४ ॥ कृत्वा विसर्जनं देव्याः
श्रवणायां च मानवः॥लक्ष्मीं च पुत्रपौत्रांश्च लभते नात्र संशयः॥५॥भुवः प्रदक्षिणं पुण्यं पूजायां लभते नरः ॥ नक्षत्रयोगाभावे तु
पार्वत्याश्चैव नारद ॥६॥ नवम्यां बोधनं कृत्वा पक्षं संपूज्य मानवः॥अश्वमेधफलावाप्त्यै दशम्यां च विसर्जयेत् ॥७॥ सप्तम्यां पूजनं
कृत्वा बलिं दद्याद्विचक्षणः ॥ अष्टम्यां पूजनं शस्तं बलिदानविवर्जितम् ॥८॥ अष्टम्यां बलिदानेन विपत्तिर्जायते नृणाम् ॥ दद्याद्वि
चक्षणो भक्त्या नवम्यां विधिवद्बलिम्॥९॥बलिदानेन विप्रेन्द्र दुर्गाप्रीतिर्भवेन्नृणाम्॥हिंसाजन्यं न पापं च लभते यज्ञकर्मणि॥१०॥

उत्सर्गकर्त्ता दाता च च्छेत्ता पोष्टा च रक्षकः ॥ अग्रे पश्चान्निबद्धा च सतैतेऽवधकारिणः ॥ ११ ॥ यो यं हन्ति स तं हन्ति नेति वेदोक्तमेव च ॥ कुर्वन्ति वैष्णवीं पूजां वैष्णवास्तेन हेतुना ॥ १२ ॥ एवं संपूज्य सुरथः पूर्णं वर्षं च भक्तितः ॥ कवचं च गले बद्ध्वा तुष्टाव परमेश्वरीम् ॥ १३ ॥ स्तोत्रेण परितुष्टा सा तस्य साक्षाद्बभूव ह ॥ स ददर्श पुरो देवीं ग्रीष्मसूर्य्यसमप्रभाम् ॥ १४ ॥ तेजस्वरूपां परमां सगुणां निर्गुणां वराम् ॥ दृष्ट्वा तां कमनीयां च तेजोमण्डलमध्यतः ॥ १५ ॥ स्वेच्छामयीं कृपारूपां भक्तानुग्रहकारिणीम् ॥ पुनस्तुष्टाव राजेन्द्रो भक्तिनम्रात्मकन्धरः ॥ १६ ॥ स्तवेन परितुष्टा सा सस्मिता भक्तिपूर्वकम् ॥ उवाच सत्यं राजेन्द्रं कृपया जगदम्बिका ॥ १७ ॥ प्रकृतिरुवाच ॥ साक्षात्संप्राप्य मां राजन्वृणोषि विभवं वरम् ॥ ददामि तुभ्यं विभवं साम्प्रतं वाञ्छितं तव॥१८॥निर्जित्य सर्वाञ्छत्रूंश्च लब्ध्वा राज्यमकण्टकम् ॥ भविष्यसि महाराज सावर्णिर्मनुरष्टमः॥१९॥दास्यामि तुभ्यं ज्ञानं च परिणामे नराधिप ॥ भक्तिं[1] दास्यं च परमे श्रीकृष्णे परमात्मनि ॥ २० ॥ वृणोति विभवं यो हि साक्षान्मां प्राप्य मन्दधीः ॥ मायया वञ्चितः सोऽपि विषमत्त्यमृतं त्यजेत् ॥ २१ ॥ ब्रह्मादिस्तम्बपर्य्यन्तं सर्वं नश्वरमेव च ॥ नित्यं सत्यं परं ब्रह्म कृष्णं निर्गुणमेव च ॥ २२ ॥ ब्रह्मविष्णुशिवादीनामहमाद्या परात्परा ॥ सगुणा निर्गुणा चापि वरा स्वेच्छामयी सदा ॥२३॥ नित्याऽनित्या सर्वरूपा सर्वकारणकारणम् ॥ बीजरूपा च सर्वेषां मूलप्रकृतिरीश्वरी ॥ २४ ॥ पुण्ये वृन्दावने रम्ये गोलोके रासमण्डले॥ राधा प्राणाधिकाऽहं च कृष्णस्य परमात्मनः ॥ २५ ॥ अहं दुर्गा विष्णुमाया बुद्ध्यधिष्ठातृदेवता ॥ अहं लक्ष्मीश्च वैकुण्ठे स्वयं देवी सरस्वती ॥ २६ ॥ सावित्री वेदमाताऽहं ब्रह्माणी ब्रह्मलोकतः ॥ अहं गङ्गा च तुलसी सर्वाधारा वसुन्धरा ॥ २७ ॥ नानाविधाऽहं कलया मायया सर्वयोषितः ॥ साऽहं कृष्णेन संसृष्टा नृप भ्रूभंगलीलया ॥२८॥ भ्रूभंगलीलया सृष्टो येन पुंसा महान्विराट्॥

---

[1] मुक्ति दास्यं च परममिति पाठः ।

लोम्नां कूपेषु विश्वानि यस्य सन्ति हि नित्यशः ॥ २९ ॥ असंख्यानि च तान्येव कृत्रिमाणि च मायया ॥ अनित्ये नित्यबुद्धिं
च सर्वे कुर्वन्ति सन्ततम् ॥ ३० ॥ सप्तसागरसंयुक्ता सप्तद्वीपा वसुन्धरा ॥ तदधः सप्त पातालाः स्वर्लोकाश्चैव सप्त च ॥ ३१ ॥
एवं विश्वं बहुविधं ब्रह्माण्डं ब्रह्मणा कृतम् ॥ प्रत्येकं सर्वविध्यण्डे ब्रह्मविष्णुशिवादयः ॥३२॥ सर्वेषामीश्वरः कृष्ण इति ज्ञानं परा
त्परम् ॥ वेदानां च व्रतानां च तीर्थानां तपसां तथा ॥३३॥ देवानां चैव सर्वेषां सारः कृष्ण इति स्मृतः ॥ तद्भक्तिहीनो यो मूढः स
च जीवन्मृतो ध्रुवम् ॥ ३४ ॥ पवित्राणि च तीर्थानि तद्भक्तस्पर्शवायुना ॥ तन्मन्त्रोपासकश्चैव जीवन्मुक्त इति स्मृतः ॥ ३५ ॥
मन्त्रग्रहणमात्रेण नरो नारायणो भवेत् ॥ विना जपेन तपसा विना तीर्थेन पूजया ॥ ३६ ॥ मातामहानां शतकं पितॄणां च स
हस्रकम् ॥ पुंसामेवं समुद्धृत्य गोलोकं च स गच्छति ॥ ३७ ॥ इदं ज्ञानं सारभूतं कथितं कथितं ते नराधिप ॥ मन्वन्तरान्ते
भोगान्ते भक्तिं दास्यामि ते हरौ ॥ ३८ ॥ नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि ॥ अवश्यमेव भोक्तव्यं कृतं कर्म्म शुभाशुभम् ॥
॥ ३९ ॥ अहं यमनुगृह्णामि तस्मै दास्यामि निर्मलाम् ॥ निश्चलां सुदृढां भक्तिं श्रीकृष्णे परमात्मनि ॥ ४० ॥ करोमि वञ्चनां
यं यं तेभ्यो दास्यामि सम्पदम् ॥ प्रातः स्वप्नस्वरूपां च मिथ्येति भ्रमरूपिणीम् ॥ ४१ ॥ इति ते कथितं ज्ञानं गच्छ वत्स यथा
सुखम्॥ इत्युक्त्वा च महादेवी तत्रैवान्तरधीयत॥४२॥राजा संप्राप्य राज्यं च नत्वा तां प्रययौ गृहम् ॥ इति ते कथितं वत्स दुर्गोपा
ख्यानमुत्तमम् ॥ ४३ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे दुर्गोपाख्याने प्रकृतिसुरथसंवादे
ज्ञानकथनं नाम पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥ नारद उवाच ॥ श्रुतं सर्वं नावशिष्टं किञ्चिदेव हि निश्चितम् ॥ प्रकृतेः कवचं
स्तोत्रं ब्रूहि मे मुनिसत्तम ॥ १ ॥ नारायण उवाच ॥ पुरा स्तुता सा गोलोके कृष्णेन परमात्मना ॥ संपूज्य मधुमासे च संप्रीते
रासमण्डले ॥ मधुकैटभयोर्युद्धे द्वितीये विष्णुना पुरा ॥ २ ॥ तत्रैव काले सा दुर्गा ब्रह्मणा प्राणसङ्कटे ॥ चतुर्थे संस्तुता देवी

भक्त्या च त्रिपुरारिणा ॥ ३ ॥ पुरा त्रिपुरयुद्धे च महाघोरतरे मुने ॥ पञ्चमे संस्तुता देवी वृत्रासुरवधे तथा ॥ ४ ॥ शक्रेण सर्वदेवैश्च घोरे च प्राणसङ्कटे ॥ तदा मुनीन्द्रैर्मनुभिर्मानवैः सुरथादिभिः ॥ ५ ॥ संस्तुता पूजिता सा च कल्पे कल्पे परात्परा ॥ स्तोत्रं च श्रूयतां ब्रह्मन्सर्वविघ्नविनाशकम् ॥ सुखदं मोक्षदं सारं भवसन्तारकारणम् ॥ ६ ॥ श्रीकृष्ण उवाच ॥ त्वमेव सर्वजननी मूलप्रकृतिरीश्वरी ॥ त्वमेवाद्या सृष्टिविधौ स्वेच्छया त्रिगुणात्मिका ॥ ७ ॥ कार्य्यार्थे सगुणा त्वं च वस्तुतो निर्गुणा स्वयम् ॥ परब्रह्मस्वरूपा त्वं सत्या नित्या सनातनी ॥ ८ ॥ तेजस्स्वरूपा परमा भक्तानुग्रहविग्रहा ॥ सर्वस्वरूपा सर्वेशा सर्वाधारा परात्परा ॥ ९ ॥ सर्वबीजस्वरूपा च सर्वपूज्या निराश्रया ॥ सर्वज्ञा सर्वतोभद्रा सर्वमंगलमंगलः ॥ १० ॥ सर्वबुद्धिस्वरूपा च सर्वशक्तिस्वरूपिणी ॥ सर्वज्ञानप्रदा देवी सर्वज्ञा सर्वभाविनी ॥ ११ ॥ त्वं स्वाहा देवदाने च पितृदाने स्वधा स्वयम् ॥ दक्षिणा सर्वदाने च सर्वशक्तिस्वरूपिणी ॥ १२ ॥ निद्रा त्वं च दया त्वं च तृष्णा त्वं चात्मनः प्रिया ॥ क्षुत्क्षान्तिः शान्तिरीशा च शान्तिः सृष्टिश्च शाश्वती ॥ १३ ॥ श्रद्धा पुष्टिश्च तन्द्रा च लज्जा शोभा दया तथा ॥ सतां सम्पत्स्वरूपा श्रीर्विपत्तिरसतामिह ॥ १४ ॥ प्रीतिरूपा पुण्यवतां पापिनां कलहाङ्कुरा ॥ शश्वत्कर्ममयी शक्तिः सर्वदा सर्वजीविनाम् ॥ १५ ॥ देवेभ्यः स्वपदो दात्री धातुर्धात्री कृपामयी ॥ हिताय सर्वदेवानां सर्वासुरविनाशिनी ॥१६॥ योगिनिद्रा योगरूपा योगदात्री च योगिनाम् ॥ सिद्धिस्वरूपा सिद्धानां सिद्धिदा सिद्धयोगिनी॥१७॥ ब्रह्माणी माहेश्वरी च विष्णुमाया च वैष्णवी ॥ भद्रदा भद्रकाली च सर्वलोकभयंकरी ॥१८॥ ग्रामे ग्रामे ग्रामदेवी गृहदेवी गृहे गृहे ॥ सतां कीर्त्तिः प्रतिष्ठा च निन्दा त्वमसतां सदा ॥ १९ ॥ महायुद्धे महामारी दुष्टसंहाररूपिणी ॥ रक्षास्वरूपा शिष्टानां मातेव हितकारिणी ॥ २० ॥ वन्द्या पूज्या स्तुता त्वं च ब्रह्मादीनां च सर्वदा ॥ ब्रह्मण्यरूपा विप्राणां तपस्या च तपस्विनाम् ॥ २१ ॥ विद्या विद्यावतां त्वं च बुद्धिर्बुद्धिमतां सताम् ॥ मेधा स्मृतिस्वरूपा च प्रतिभा प्रतिभावताम् ॥ २२ ॥ राज्ञां

प्रतापरूपा च विशां वाणिज्यरूपिणी ॥ सृष्टौ सृष्टिस्वरूपा त्वं रक्षारूपा च पालने ॥२३॥ तथाऽन्ते त्वं महामारी विश्वे विश्वैश्च पूजिते॥ कालरात्रिर्महारात्रिर्मोहरात्रिश्च मोहिनी॥२४॥दुरत्यया मे माया त्वं यया संमोहितं जगत्॥यया मुग्धो हि विद्वांश्च मोक्षमार्गं न पश्यति॥२५॥इत्यात्मना कृतं स्तोत्रं दुर्गाया दुर्गनाशनम् ॥ पूजाकाले पठेद्यो हि सिद्धिर्भवति वाञ्छिता[1] ॥२६॥ वन्ध्या च काकवन्ध्या च मृतवत्सा च दुर्भगा॥श्रुत्वा स्तोत्रं वर्षमेकं सुपुत्रं लभते ध्रुवम्॥२७॥कारागारे महाघोरे यो बद्धो दृढबन्धने॥ श्रुत्वा स्तोत्रं मासमेकं बन्धनान्मुच्यते ध्रुवम् ॥२८॥ यक्ष्मग्रस्तो गलत्कुष्ठी महाशूली महाज्वरी ॥ श्रुत्वा स्तोत्रं वर्षमेकं सद्यो रोगात्प्रमुच्यते ॥ ॥ २९ ॥ पुत्रभेदे प्रजाभेदे पत्नीभेदे च दुर्गतः ॥ श्रुत्वा स्तोत्रं मासमेकं लभते नात्र संशयः ॥ ३० ॥ राजद्वारे श्मशाने च महारण्ये रणस्थले ॥ हिंस्रजन्तुसमीपे च श्रुत्वा स्तोत्रं प्रमुच्यते ॥३१॥ गृहदाहे च दावाग्नौ दस्युसैन्यसमन्विते ॥ स्तोत्रश्रवणमात्रेण लभते नात्र संशयः ॥३२॥ महादरिद्रो मूर्खश्च वर्षं स्तोत्रं पठेत्तु यः ॥ विद्यावान्धनवांश्चैव स भवेन्नात्र संशयः ॥३३॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे दुर्गोपाख्याने दुर्गास्तोत्रं नाम षट्षष्टितमोऽध्यायः ॥६६॥ नारद उवाच ॥ भगवन्सर्वधर्म्मज्ञ सर्वज्ञानविशारद ॥ ब्रह्माण्डमोहनं नाम प्रकृतेः कवचं वद ॥ १ ॥ नारायण उवाच ॥ शृणु वक्ष्यामि हे वत्स कवचं च सुदुर्लभम् ॥ श्रीकृष्णेनैव कथितं कृपया ब्रह्मणे पुरा ॥ २ ॥ ब्रह्मणा कथितं सर्वं[2] धर्मार्थं जाह्नवीतटे ॥ धर्म्मेण दत्तं मह्यं च कृपया पुष्करे प्रभुः ॥ ३ ॥ त्रिपुरारिश्च यद्धृत्वा जघान त्रिपुरं पुरा ॥ मुमोच धाता यद्धृत्वा मधुकैटभयोर्भयम् ॥ जघान रक्तबीजं तं यद्धृत्वा भद्रकालिका ॥ ४ ॥ यद्धृत्वा तु महेन्द्रश्च संप्राप कमलालयाम् ॥ यद्धृत्वा च महाकालश्चिरजीवी च धार्मिकः ॥ ॥ ५ ॥ यद्धृत्वा च महाज्ञानी नन्दी सानन्दपूर्वकम् ॥ यद्धृत्वा च महायोद्धा रामः[3] शत्रुभयङ्करः ॥ ६ ॥ यद्धृत्वा शिवतुल्यश्च

---

१ सिद्धं भवति वाञ्छितमिति पाठः । २ पूर्वमिति पाठः । ३ बाण इति पाठः ।

दुर्वासा ज्ञानिनां वरः ॥ ॐ दुर्गेति चतुर्थ्यन्तं स्वाहान्तो मे शिरोऽवतु ॥ ७ ॥ मन्त्रः षडक्षरोऽयं च भक्तानां कल्पपादपः ॥ विचारो नास्ति वेदेषु ग्रहणे च मनोर्मुने ॥८॥ मन्त्रग्रहणमात्रेण विष्णु[1]तुल्यो भवेन्नरः ॥ मम वक्त्रं सदा पातु चों दुर्गायै नमोऽन्ततः ॥ ॥ ९ ॥ ॐ दुर्गे रक्षयति च कण्ठं पातु सदा मम ॥ ॐ-ह्रीं श्रीमिति मन्त्रोऽयं स्कन्धं पातु निरन्तरम् ॥ १० ॥ ॐ ह्रीं श्रीं क्लीमिति पृष्ठं च पातु मे सर्वतः सदा ॥ ह्रीं मे वक्षःस्थलं पातु हस्तं श्रीमिति सन्ततम् ॥ ११ ॥ ॐ श्रीं ह्रीं क्लीं पातु सर्वाङ्गं स्वप्ने जागरणे तथा ॥ प्राच्यं मां प्रकृतिः पातु पातु वह्नौ च चण्डिका ॥ १२ ॥ दक्षिणे भद्रकाली च नैर्ऋत्यां च महेश्वरी ॥ वारुण्यां पातु वाराही वायव्यां सर्वमङ्गला ॥१३॥ उत्तरे वैष्णवी पातु तथैशान्यां शिवप्रिया ॥ जले स्थले चान्तरिक्षे पातु मां जगदम्बिका ॥१४॥ इति ते कथितं वत्स कवचं च सुदुर्लभम् ॥ यस्मै कस्मै न दातव्यं प्रवक्तव्यं न कस्यचित् ॥ १५ ॥ गुरुमभ्यर्च्य विधिवद्वस्त्रालंकारचन्दनैः ॥ कवचं धारयेद्यस्तु सोऽपि विष्णुर्न संशयः ॥ १६ ॥ भ्रमणे सर्वतीर्थानां पृथिव्याश्च प्रदक्षिणे ॥ यत्फलं लभते लोकस्तदेतद्धारणान्मुने ॥ १७ ॥ पञ्चलक्षजपेनैव सिद्धमेतद्भवेद्ध्रुवम् ॥ लोके च सिद्धकवचं नास्त्रं विध्यति संकटे ॥ १८ ॥ न तस्य मृत्युर्भवति जले वह्नौ विषेद्ध्रुवम् ॥ जीवन्मुक्तो भवेत्सोऽपि सर्वसिद्धेश्वरः स्वयम् ॥ १९ ॥ यदि स्यात्सिद्धकवचो विष्णुतुल्यो भवेद्ध्रुवम् ॥ कथितं प्रकृतेः खण्डं सुधाखण्डात्परं मुने ॥ २० ॥ या चैव मूलप्रकृतिर्यस्याः पुत्रो गणेश्वरः ॥ कृत्वा कृष्णव्रतं सा च लेभे गणपतिं सुतम् ॥ २१ ॥ स्वांशेन कृष्णो भगवान्बभूव च गणेश्वरः ॥ श्रुत्वा च प्रकृतेः खण्डं सुश्राव्यं च सुधोपमम् ॥ २२ ॥ भोजयित्वा च दध्यन्नं तस्मै दद्याच्च काञ्चनम् ॥ सवत्सां सुरभिं रम्यां दद्याद्वै भक्तिपूर्वकम् ॥ २३ ॥ वासोऽलंकाररत्नैश्च तोषयेद्वाचकं मुने ॥ पुष्पालंकारवसनैरुपहारगणैस्तथा ॥ २४ ॥ पुस्तकं पूजयेदेवं भक्तिश्रद्धासमन्वितः ॥ एवं कृत्वा यः शृणोति तस्य

---

[1] शिवतुल्य इति पाठः ।

विष्णुः प्रसीदति ॥ २५ ॥ वर्द्धते पुत्रपौत्रादिर्यशस्वी तत्प्रसादतः ॥ लक्ष्मीर्वसति तद्गेहे ह्यन्ते गोलोकमाप्नुयात् ॥ लभेत्कृष्णस्य दास्यं स भक्तिं कृष्णे सुनिश्चलाम् ॥ २६ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे प्रकृतिखण्डे नारदनारायणसंवादे दुर्गोपाख्याने ब्रह्माण्ड मोहनकवचं नाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ॥ ॥ ॥

॥ समाप्तश्चायं श्रीब्रह्मवैवर्त्ते महापुराण प्रकृतिखण्डो द्वितीयः ॥

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजेन क्षेमराजेन श्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर"-स्टीम्-मुद्रणयन्त्रालयेऽङ्कयित्वा प्रकाशितम्।
संवत् १९८८, शकाब्दाः १८५३.

॥ अथ श्रीब्रह्मवैवर्ते महापुराणे तृतीयो गणपतिखण्डः प्रारभ्यते ॥



गणपति व परशुराम युद्ध.

शंकर.
पार्वती
शि. पा.
ग.
विष्णु.

श्रीगणेशाय नमः ॥ श्रीमद्वेङ्कटेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥ अथ ब्रह्मवैवर्त्ते महापुराणे तृतीयं गणपतिखण्डं प्रारभ्यते ॥
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १ ॥ नारद उवाच ॥ श्रुतं प्रकृति
खण्डं तदमृतार्णवमुत्तमम् ॥ सर्वोत्कृष्टमभीष्टं च मूढानां ज्ञानवर्द्धनम् ॥ २ ॥ अधुना श्रीगणेशस्य खण्डं श्रोतुमिहागतः ॥ तज्जन्म
चरितं नृणां सर्वमलङ्गमङ्गलम् ॥ ३ ॥ कथं जज्ञे सुरश्रेष्ठः पार्वत्या उदरे शुभे ॥ देवी केन प्रकारेण चालभत्तादृशं सुतम् ॥
॥ ४ ॥ स चांशः कस्य देवस्य कथं जन्म ललाभ सः ॥ अयोनिसम्भवः किं वा किं वाऽसौ योनिसम्भवः ॥ ५ ॥ किं वा
तद्ब्रह्मतेजो वा किं तस्य च पराक्रमः ॥ का तपस्या च किं ज्ञानं किं वा तन्निर्म्मलं यशः ॥ ६ ॥ कथं तस्य पुरःपूजा विश्वेषु निखि
लेषु च ॥ स्थिते नारायणे शम्भौ जगदीशे च धातरि ॥ ७ ॥ पुराणेषु निगूढं च तज्जन्म परिकीर्त्तितम् ॥ कथं वा गजवक्त्रोऽयमेक
दन्तो महोदरः ॥८॥ एतत्सर्वं समाचक्ष्व श्रोतुं कौतूहलं मम ॥ सुविस्तीर्णं महाभाग तदतीव मनोहरम् ॥९॥ श्रीनारायण उवाच ॥
शृणु नारद वक्ष्यामि रहस्यं परमाद्भुतम् ॥ पापसन्तापहरणं सर्वविघ्नविनाशनम् ॥ १० ॥ सर्वमङ्गलदं सारं सर्वश्रुतिमनोहरम् ॥
सुखदं मोक्षबीजं च पापमूलनिकृन्तनम् ॥ ११ ॥ दैत्यार्दितानां देवानां तेजोराशिसमुद्भवा ॥ देवी संहत्य दैत्यौघान्दक्षकन्या
बभूव ह ॥ १२ ॥ सा च नाम्ना सती देवी स्वामिनो निन्दया पुरा ॥ देहं संत्यज्य योगेन जाता शैलप्रियोदरे ॥ १३ ॥ शङ्कराय
ददौ तां च पार्वतीं पर्वतो मुदा ॥ तां गृहीत्वा महादेवो जगाम विजनं वनम् ॥१४॥ शय्यां रतिकरीं कृत्वा पुष्पचन्दनचर्चिताम् ॥
स रेमे नर्म्मदातीरे पुष्पोद्याने तया सह ॥१५॥ सहस्रवर्षपर्य्यन्तं दैवमानेन नारद ॥ तयोर्बभूव शृंगारो विपरीतादिको महान् ॥
॥ १६ ॥ दुर्गांगस्पर्शमात्रेण मदनान्मूर्च्छितः शिवः ॥ मूर्च्छिता सा शिवस्पर्शाद्बुबुधे न दिवानिशम् ॥ १७ ॥ हंसकारण्डवाकीर्णे
पुंस्कोकिलरुताकुले ॥ नानापुष्पविकासाढ्ये भ्रमरध्वनिगुञ्जिते ॥ १८ ॥ सुगन्धिकुसुमाश्लेषिवायुना सुरभीकृते ॥ अतीव सुखदे

---

१ व्रतेनाथेति च पाठः ।

तत्र सर्वजन्तुविवर्जिते ॥ १९ ॥ दृष्ट्वा तयोस्तच्छृङ्गारं चिन्तां प्रापुः सुराः पराम् ॥ ब्रह्माणं च पुरस्कृत्य ययुर्नारायणान्तिकम् ॥
॥ २० ॥ तं नत्वा कथयामास ब्रह्मा वृत्तान्तमीप्सितम् ॥ संतस्थुर्दैवताः सर्वाश्चित्रपुत्तलिका यथा ॥ २१ ॥ ब्रह्मोवाच ॥ सहस्रवर्षं
पर्य्यन्तं देवमानेन शङ्करः ॥ रतौ रतश्च निश्चेष्टो न योगी विरराम ह ॥ २२ ॥ मैथुनस्य विरामे च दम्पत्योर्जगदीश्वर ॥ किम्भूतं
भविताऽपत्यं तथ्यं[१] कथितुमर्हसि ॥ २३ ॥ श्रीभगवानुवाच ॥ चिन्ता नास्ति जगद्धातः सर्वं भद्रं भविष्यति ॥ मयि ये शरणा
पन्नास्तेषां दुःखं कुतो विधे ॥ २४ ॥ येनोपायेन तद्वीर्य्यं भूमौ पतति निश्चितम् ॥ तत्कुरुष्व प्रयत्नेन सार्द्धं देवगणेन च ॥२५॥
यदा च शम्भोर्वीर्य्यं तत्पार्वत्या उदरे पतेत् ॥ ततोऽपत्यं च भविता सुरासुरविमर्दकम् ॥२६॥ ततः शक्रादयः सर्वे सुरा नारयणा
ज्ञया ॥ प्रययुर्नर्म्मदातीरं ययौ ब्रह्मा निजालयम् ॥ २७ ॥ तत्रैव पर्वतद्रोणीबहिर्देशे सुराः पराः ॥ विषण्णवदनाः सर्वे बभूवुर्भय
कातराः ॥ २८ ॥ शक्रो[२] राजा कुबेरं च कुबेरो वरुणं तथा ॥ समीरणं च वरुणो यमं चैव समीरणः ॥ २९ ॥ हुताशनं यमश्चैव
भास्करं च हुताशनः ॥ चन्द्रं तथा भास्करश्च त्वीशानं चन्द्र एव च ॥ ३० ॥ एवं देवाः प्रेरयन्ति देवांश्च रतिभञ्जने ॥ हरशृंगार
भंगं च कुर्वित्युक्त्वा परस्परम् ॥ ३१ ॥ द्वारि स्थितो वक्रशिराः शक्रः[३] प्राह महेश्वरम् ॥ ३२ ॥ इन्द्र उवाच ॥ किं करोषि महादेव
योगीश्वर नमोऽस्तु ते ॥ जगदीश जगद्बीज भक्तानां भयभञ्जन ॥ ३३ ॥ हरिर्जगामेत्युक्त्वा तमाजगाम च भास्करः ॥ उवाच
भीतो द्वारस्थो भयार्त्तो वक्रचक्षुषा ॥३४॥ श्रीसूर्य्य उवाच ॥ किं करोषि महादेव जगतां परिपालक ॥ सुरश्रेष्ठ महाभाग पार्वतीश
नमोऽस्तु ते ॥ ३५ ॥ इत्येवमुक्त्वा श्रीसूर्य्यः स जगाम भयात्ततः ॥ आजगाम तथा चन्द्र अवोचर्द्धककन्धरः[४] ॥ ३६ ॥ चन्द्र
उवाच ॥ किं करोषि त्रिलोकेश त्रिलोचन नमोऽस्तु ते ॥ आत्माराम[५] स्वयंपूर्ण पुण्यश्रवणकीर्त्तन ॥ ३७ ॥ इत्येवमुक्त्वा भीतश्च विर
राम निशापतिः ॥ समीरणोऽपि द्वारस्थस्संवीक्ष्योवाच सादरम् ॥ ३८ ॥ पवन उवाच ॥ किं करोषि जगन्नाथ जगद्वन्द्यो नमो

पाठान्तराणि—१ तन्नः । २ शक्रः कुबेरमवदत् । ३ स्वयं प्रोवाच सादरम् । ४ नतकन्धरः । ५ स्वात्मारामः ।

ऽस्तु ते ॥ धर्मार्थकाममोक्षाणां बीजरूप सनातन ॥३९॥ इत्येवं स्तवनं श्रुत्वा योगज्ञानविशारदः ॥ त्यक्तुकामो न तत्याज शृङ्गारं
पार्वतीभयात् ॥ ४० ॥ दृष्ट्वा सुरान्भयार्त्तंश्च पुनः स्तोतुं समुद्यतान् ॥ विजहौ सुखसम्भोगं कण्ठलग्नां च पार्वतीम् ॥ ४१ ॥ उत्तिष्ठतो
महेशस्य त्रासलज्जायुतस्य च ॥ भूमौ पपात तद्वीर्य्यं ततः स्कन्दो बभूव ह ॥ ४२ ॥ पश्चात्तां कथयिष्यामि कथामतिमनोहराम् ॥
स्कन्दजन्मप्रसङ्गे च साम्प्रतं वाञ्छितं शृणु ॥ ४३ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे
प्रथमोऽध्यायः ॥ १ ॥ नारायण उवाच ॥ त्यक्त्वा रतिं महादेवो ददर्श पुरतः सुरान् ॥ पलायध्वमिति प्राह कृपया पार्वतीभयात् ॥
॥ १ ॥ देवाः पलायिता भीताः पार्वतीशापहेतुना ॥ सर्वब्रह्माण्डसंहर्त्ता चकम्पे पार्वतीभयात् ॥ २ ॥ तल्पादुत्थाय सा दुर्गा न
च दृष्ट्वा पुरस्सुरान् ॥ समुत्थितं कोपवह्निं स्तम्भयामास देहतः ॥ ३ ॥ अद्य प्रभृति ते देवा व्यर्थवीर्य्या भवन्त्विति ॥ शशाप
देवी तान्देवानतिरुष्टा बभूव ह ॥ ४ ॥ ततः शिवः शिवां दृष्ट्वा क्रोधसंरक्तलोचनाम् ॥ रुदन्तीं नम्रवदनां लिखन्तीं धरणीतलम्
॥ ५ ॥ शिवस्तां दुःखितां दृष्ट्वा क्रोधसंरक्तलोचनाम् ॥ हस्ते गृहीत्वा देवेशो वासयामास वक्षसि ॥ ६ ॥ अतीव भीतः संत्रस्त
उवाच मधुरं वचः ॥ शंकर उवाच ॥ कथं रुष्टा गिरिश्रेष्ठकन्ये धन्ये मनोहरे॥७॥ मम सौभाग्यरूपे च प्राणाधिष्ठातृदेवते ॥ किं ते
ऽभीष्टं करिष्यामि वद मां जगदम्बिके ॥८॥ ब्रह्माण्डसंघे निखिले किमसाध्यमिहावयोः ॥ अहो निरपराधं मां प्रसन्ना भव सुन्दरि॥
॥ ९ ॥ दैवादज्ञातदोषस्य शान्तिं मे कर्त्तुमर्हसि ॥ त्वया युक्तः शिवोऽहं च सर्वेषां शिवदायकः ॥ १० ॥ त्वया विना ही[1]श्वरश्च
शवतुल्योऽशिवः सदा ॥ प्रकृतिस्त्वं च बुद्धिस्त्वं शक्तिस्त्वं च क्षमा दया ॥ ११ ॥ तुष्टिस्त्वं च तथा पुष्टिः शान्तिस्त्वं क्षान्तिरेव
च ॥ क्षुत्त्वं छाया तथा निद्रा तन्द्रा श्रद्धा सुरेश्वरि ॥ १२ ॥ सर्वाधारस्वरूपा त्वं सर्वबीजस्वरूपिणी ॥ स्मितपूर्वं वद वचः साम्प्रतं
सरसं शिवे ॥ १३ ॥ त्वत्कोपविषसंदग्धं द्रुतं जीवय मां मृतम् ॥ १४ ॥ शंकरस्य वचः श्रुत्वा क्षमायुक्ता च पार्वती ॥ उवाच

---

[1] न हीनश्चेति पाठः ।

मधुरं देवी हृदयेन विदूयता ॥ १५ ॥ पार्वत्युवाच ॥ किं त्वाऽहं कथयिष्यामि सर्वज्ञं सर्वरूपिणम् ॥ आत्मारामं पूर्णकामं सर्वदेहेष्ववस्थितम् ॥ १६ ॥ कामिनी मानसं काममप्रज्ञं स्वामिनं वदेत् ॥ सर्वेषां हृदयज्ञं च हृदीष्टं कथयामि किम् ॥ १७ ॥ सुगोप्यं सर्वनारीणां लज्जाजननकारणम् ॥ अकथ्यमपि सर्वासां महेश कथयामि ते ॥ १८ ॥ सुखेषु मध्ये स्त्रीणां च विभवेषु सुरेश्वर ॥ सत्पुंसा सह सम्भोगो निर्जनेषु परं सुखम् ॥ १९ ॥ तद्भंगेन च यद्दुःखं तत्समं नास्ति च स्त्रियाः ॥ कान्तानां कान्तविच्छेदशोकः परमदारुणः ॥ २० ॥ कृष्णपक्षे यथा चन्द्रः क्षीयमाणो दिने दिने ॥ तथा कान्तं विना कान्ता क्षीणा कान्त क्षणे क्षणे ॥ २१ ॥ चिन्ताज्वरश्च सर्वेषामुपतापश्च वाससाम् ॥ साध्वीनां कान्तविच्छेदस्तुरगानां च मैथुनम् ॥ २२ ॥ रतिभंगो दुःखमेकं द्वितीयं वीर्य्यपातनम् ॥ दुःखातिरेकि दुःखं च तृतीयमनपत्यता ॥ २३ ॥ त्रैलोक्यकान्तं कान्तं त्वां लब्ध्वाऽपि न च मे सुतः ॥ या स्त्री पुत्रविहीना च जीवनं तन्निरर्थकम् ॥ २४ ॥ जन्मान्तरसुखं पुण्यं तपोदानसमुद्भवम् ॥ सद्वंशजातपुत्रश्च परत्रेह सुखप्रदः ॥ २५ ॥ सुपुत्रः स्वामिनोंऽशश्च स्वामितुल्यसुखप्रदः ॥ कुपुत्रश्च कुलाङ्गारो मनस्तापाय केवलम् ॥ २६ ॥ स्वामी स्वांशेन सुस्त्रीणां गर्भे जन्म लभेद्ध्रुवम् ॥ साध्वी स्त्री मातृतुल्या च सततं हितकारिणी ॥ २७ ॥ असाध्वी वैरितुल्या च शश्वत्सन्तापदायिनी ॥ सुखदुष्टा योनिदुष्टा चासाध्वीति त्रिधा स्मृता ॥ २८ ॥ किमुपायं करिष्यामि वद योगीश्वरेश्वर ॥ उपायसिन्धो तपसां सर्वेषां च फलप्रद ॥ २९ ॥ इत्युक्त्वा पार्वती देवी नम्रवक्त्रा बभूव ह ॥ प्रहस्य शंकरो देवो बोधयामास पार्वतीम् ॥ ३० ॥ सत्पुत्रबीजं सुखदं तापनाशनकारणम् ॥ मितं स्निग्धं सुरुचिरं प्रवक्तुमुपचक्रमे ॥ ३१ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारद नारायणसंवादे द्वितीयोऽध्यायः ॥ २ ॥ श्रीमहादेव उवाच ॥ शृणु पार्वति वक्ष्यामि तव भद्रं भविष्यति ॥ उपायतः कार्य्यसिद्धिर्भवत्येव जगत्रये ॥ १ ॥ सर्ववांछितसिद्धेस्तु बीजरूपं सुमङ्गलम् ॥ मनसः प्रीतिजनकमुपायं कथयामि ते ॥२॥ हरेराराधनं कृत्वा व्रतं कुरु वरानने ॥ व्रतं च पुण्यकं नाम वर्षमेकं करिष्यसि॥३॥महाकठोरबीजं च वाञ्छाकल्पतरुं परम् ॥ सुखदं पुण्यदं सारं पुत्रदं

सर्वसौख्यदम् ॥४॥ नदीनां च यथा गंगा देवानां च हरिर्यथा ॥ वैष्णवानां यथाहं च देवीनां त्वं यथा प्रिये ॥५॥ वर्णानां च यथा
विप्रस्तीर्थानां पुष्करं यथा ॥ पुष्पाणां पारिजातं च पत्राणां तुलसी यथा ॥ ६ ॥ यथा पुण्यप्रदानां च तिथिरेकादशी स्मृता ॥
विवारश्च वाराणां यथा पुण्यप्रदः शिवे ॥ मासानां मार्गशीर्षश्चाप्यृतूनां माधवो यथा ॥ ७ ॥ संवत्सरो वत्सराणां युगानां
च कृतं यथा ॥ विद्याप्रदश्च पूज्यानां गुरूणां जननी यथा ॥ साध्वी पत्नी यथाप्तानां विश्वस्तानां मनो यथा ॥ ८ ॥ यथा
धनानां रत्नं च प्रियाणां च यथा पतिः ॥ यथा पुत्रश्च बन्धूनां वृक्षाणां कल्पपादपः ॥९॥ फलानां वै चूतफलं वर्षाणां भारतं तथा॥
वृन्दावनं वनानां च शतरूपा च योषिताम् ॥ १० ॥ यथा काशी पुरीणां च सूर्य्यस्तेजस्विनां यथा ॥ यथेन्दुः सुखदानां च सुन्द
राणां च मन्मथः ॥ ११ ॥ शास्त्राणां च यथा वेदाः सिद्धानां कपिलो यथा ॥ हनूमान्वानराणां च क्षेत्राणां ब्राह्मणाननम् ॥ १२ ॥
यशोदानां यथा विद्या कविता च मनोहरा ॥ आकाशो व्यापकानां च ह्यंगानां लोचनं यथा ॥ १३ ॥ विभवानां हरिकथा सुखानां
हरिचिन्तनम् ॥ स्पर्शानां पुत्रसंस्पर्शो हिंस्राणां च यथा खलः ॥१४॥ पापानां च यथा मिथ्या पापिनां पुंश्चली यथा ॥ पुण्यानां
च यथा सत्यं तपसां हरिसेवनम् ॥ १५ ॥ यथा घृतं च गव्यानां यथा ब्रह्मा तपस्विनाम्॥अमृतं भक्ष्यवस्तूनां सस्यानां धान्यकं
यथा ॥ १६ ॥ पुण्यदानां यथा तोयं शुद्धानां च हुताशनः ॥ सुवर्णं तैजसानां च मिष्टानां प्रियभाषणम् ॥ १७ ॥ गरुडः पक्षिणां
चैव हस्तिनामिन्द्रवाहनम् ॥ योगिनां च कुमारश्च देवर्षीणां च नारदः ॥ १८ ॥ गन्धर्वाणां चित्ररथो जीवो बुद्धिमतां यथा ॥
सुकवीनां यथा शुक्रः काव्यानां च पुराणकम् ॥ १९ ॥ स्रोतस्वतां समुद्रश्च यथा पृथ्वी क्षमावताम् ॥ लाभानां च यथा मुक्तिर्हरि
भक्तिश्च सम्पदाम् ॥ २० ॥ पवित्राणां वैष्णवाश्च वर्णानां प्रणवो यथा ॥ विष्णुमन्त्रश्च मन्त्राणां बीजानां प्रकृतिर्यथा ॥ २१ ॥
विदुषां च यथा वाणी गायत्री छन्दसां यथा ॥ यथा कुबेरो यक्षाणां सर्पाणां वासुकिर्यथा ॥ २२ ॥ यथा पिता ते शैलानां गवां
च सुरभिर्यथा ॥ वेदानां सामवेदश्च तृणानां च यथा कुशः ॥ २३ ॥ सुखदानां यथा लक्ष्मीर्मनो वै शीघ्रगामिनाम् ॥ अक्षराणा

मकारश्च यथा तातो हितैषिणाम् ॥ २४ ॥ शालग्रामश्च मूर्तीनां पशूनां विष्णुपञ्जरः ॥ चतुष्पदानां पञ्चास्यो मानवो जीविनां यथा ॥ २५ ॥ यथा स्वान्तं चेन्द्रियाणां मन्दाग्निश्च रुजां यथा ॥ बलिनां च यथा शक्तिरहं शक्तिमतां तथा ॥ २६ ॥ महान्विराट् च स्थूलानां सूक्ष्माणां परमाणुकः ॥ यथेन्द्र आदितेयानां दैत्यानां च बलिर्यथा ॥ २७ ॥ यथा दधीचिर्दातॄणां प्रह्लादश्चैव साधुषु ॥ ब्रह्मास्त्रं च यथाऽस्त्राणां चक्राणां च सुदर्शनम् ॥ २८॥ नृणां राजा रामचन्द्रो धन्विनां[1] लक्ष्मणो यथा ॥ सर्वाधारः सर्वसेव्यः सर्वबीजं च सर्वदः॥सर्वसारो यथा कृष्णो व्रतानां पुण्यकं यथा॥२९॥व्रतं कुरु महाभागे त्रिषु लोकेषु दुर्लभम् ॥ सर्वश्रेष्ठश्च पुत्रस्ते व्रतादेव भविष्यति ॥ ३० ॥ व्रताराध्यश्च वै कृष्णः सर्वेषां वाञ्छितप्रदः ॥ जनो यत्सेवनान्मुक्तः पितृभिः कोटिभिः सह॥ ॥ ३१ ॥ हरिमन्त्रं गृहीत्वा च हरिसेवां करोति यः ॥ भारते जन्म सफलं स्वात्मनः स करोति च ॥ ३२ ॥ उद्धृत्य कोटिपुरुषान्वैकुण्ठं याति निश्चितम् ॥ श्रीकृष्णपार्षदो भूत्वा सुखं तत्रैव मोदते ॥ ३३ ॥ सहोदरान्स्वभृत्यांश्च स्वबन्धून्सहचारिणः॥ स्वस्त्रियश्च समुद्धृत्य भक्तो याति हरेः पदम् ॥ ३४ ॥ तस्माद्गृहाण गिरिजे हरेर्म्मन्त्रं सुदुर्लभम् ॥ जप मन्त्रं व्रते तत्र पितॄणां मुक्तिकारणम्॥ ॥ ३५ ॥ इत्युक्त्वा शंकरो देवो गत्वा गिरिजया सह ॥ शीघ्रं च जाह्नवीतीरं हरेर्म्मन्त्रं मनोहरम् ॥ ३६ ॥ तस्यै ददौ च संप्रीत्या कवचं स्तोत्रसंयुतम् ॥ पूजाविधाननियमं कथयामास तां मुने ॥ ३७ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे तृतीयोऽध्यायः ॥ ३ ॥ नारायण उवाच ॥ श्रुत्वा व्रतविधानं च दुर्गा संहृष्टमानसा ॥ सर्वं व्रतविधानं च संप्रष्टुमुपचक्रमे ॥ १ ॥ पार्वत्युवाच ॥ सर्वं व्रतविधानं मां वद वेदविदां वर ॥ हे नाथ करुणा सिन्धो दीनबन्धो परात्पर ॥ २ ॥ कानि व्रतोपयुक्तानि द्रव्याणि च फलानि च ॥ सनियमं सभक्ष्यं च विधानं तत्फलं प्रभो॥३॥देहि मह्यं विनीतायै नियुक्तं सत्पुरोहितम्॥ पुष्पोपहारान्विप्रांश्च द्रव्याहरणकिंकरान् ॥ ४ ॥ अन्यानि चोपयुक्तानि मयाऽज्ञातानि यानि च ॥ सन्नियोजय तत्सर्वं स्त्रीणां

---

[1] वीराणामिति पाठः ।

स्वामी च सर्वदः ॥ ९ ॥ पिता कौमारकाले च सदा पालनकारकः ॥ भर्त्ता मध्ये सुतः शेषे त्रिधाऽवस्था सुयोषिताम् ॥ ६ ॥ तातोऽशोकः प्राणतुल्यां दत्त्वा सत्स्वामिने सुताम् ॥ स्वामी निर्वृतिमाप्नोति संन्यस्य स्वसुते प्रियाम् ॥ ७ ॥ बन्धुत्रययुता या स्त्री सा च भाग्यवती परा ॥ किञ्चिद्विहीना मध्या च सर्वहीनाऽधमा भुवि॥८॥ एतेषां च समीपस्था प्रशंस्या सा जगत्त्रये ॥ निन्दिताऽन्येषु संन्यस्ता सर्वमेतच्छ्रुतौ श्रुतम्॥९॥सर्वात्मा भगवांस्त्वं च सर्वसाक्षी च सर्ववित्॥देहि मह्यं पुत्रवरं स्वात्मनिर्वृतिहेतुकम्॥१०॥ स्वात्मबोधानुमानेन महात्मनि निवेदितम्॥सर्वान्तराभिप्रायज्ञं बोधज्ञं बोधयामि किम्॥११॥इत्युक्त्वा पार्वती प्रीत्या पपात स्वामिनः पदे ॥ कृपासिन्धुश्च भगवान्प्रवक्तुमुपचक्रमे॥१२॥श्रीमहादेव उवाच ॥ शृणु देवि प्रवक्ष्यामि विधानं नियमं फलम् ॥ फलानि चैव द्रव्याणि व्रतयोग्यानि यानि च ॥ १३ ॥ विप्राणां शतकं शुद्धं फलपुष्पोपहारकम् ॥किंकराणां च शतकं द्रव्याहरणकारकम्॥१४॥ दासीनां शतकं लक्षं नियुक्तं च पुरोहितम् ॥ सर्वव्रतविधानज्ञं वेदवेदान्तपारगम् ॥ १५ ॥ प्रवरं हरिभक्तानां सर्वज्ञं ज्ञानिनां वरम्॥ सनत्कुमारं मत्तुल्यं गृहाण व्रतहेतवे॥१६॥देवि शुद्धे च काले च परं नियमपूर्वकम्॥माघशुक्लत्रयोदश्यां व्रतारम्भः शुभः प्रिये॥१७॥ गात्रं सुनिर्म्मलं कृत्वा शिरस्संस्कारपूर्वकम् ॥ उपोष्य पूर्वदिवसे वस्त्रं संशोध्य यत्नतः ॥ १८ ॥ अरुणोदयवेलायां तल्पादुत्थाय सुव्रती ॥ मुखप्रक्षालनं कृत्वा स्नात्वा वै निर्मले जले॥१९॥आचम्य यत्नपूतो हि हरिस्मरणपूर्वकम् ॥ दत्त्वाऽर्घ्यं हरये भक्त्या गृहमागत्य सत्वम्॥२०॥धौते च वाससी धृत्वा ह्युपविश्यासने शुचौ॥आचम्य तिलकं धृत्वा समाप्य स्वाह्निकं पुनः ॥२१॥ घटं संस्थाप्य विधिवत्स्वस्तिवाचनपूर्वकम् ॥ पुरोहितस्य वरणं पुरः कृत्वा प्रयत्नतः ॥२२॥ सङ्कल्पं वेदविहितं व्रतमेतत्समाचरेत् ॥ व्रते द्रव्याणि नित्यानि चोपचारास्तु षोडश ॥२३॥ देयानि नित्यं देवेशि कृष्णाय परमात्मने ॥ आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ॥२४॥ स्नानीयं मधुपर्कं च वस्त्राण्याभरणानि च ॥ सुगन्धि पुष्पधूपं च दीपनैवेद्यचन्दनम् ॥ २५ ॥ यज्ञसूत्रं च ताम्बूलं कर्पूरादिसुवासितम् ॥ द्रव्याण्येतानि पूजायाश्चाङ्गरूपाणि सुन्दरि ॥२६॥ देवि किञ्चिद्विहीनेन चाङ्गहानिः प्रजायते ॥ अंगहीनं च यत्कर्म्म चाङ्गहीनो

यथा नरः ॥ अंगहीने च कार्य्यें च फलहानिः प्रजायते ॥ २७ ॥ अष्टोत्तरशतं पुष्पं पारिजातस्य विष्णवे ॥ देयं प्रतिदिनं दुर्गे स्वात्मनो रूपहेतवे ॥ २८ ॥ श्वेतचम्पकपुष्पाणां लक्षमक्षतमीप्सितम् ॥ प्रदेयं हरये भक्त्या वर्णसौन्दर्य्यहेतवे ॥ २९ ॥ सहस्रपत्रपद्मानामक्षतं लक्षकं तथा ॥ भक्त्या देयं च हरये मुखसौन्दर्य्यहेतवे ॥ ३० ॥ अमूल्यरत्नरचितं दर्पणानां सहस्रकम् ॥ देयं नारायणायैव नेत्रयोर्दीप्तिहेतवे ॥ ३१ ॥ नीलोत्पलानां लक्षं च देयं कृष्णाय भक्तितः ॥ व्रताङ्गभूतं देवेशि चक्षुषो रूपहेतवे ॥ ॥ ३२ ॥ हिमालयोद्भवं लक्षं रुचिरं श्वेतचामरम् ॥ प्रदेयं केशवायैव केशसौन्दर्य्यहेतवे ॥ ३३ ॥ अमूल्यरत्नरचितं पुटकानां सहस्रकम् ॥ प्रदेयं गोपिकेशाय नासासौन्दर्यहेतवे ॥ ३४ ॥ बन्धूकपुष्पलक्षं च देयं राधेश्वराय च ॥ सौम्यौष्ठाधरयोश्चैव वर्णसौन्दर्यहेतवे ॥ ३५ ॥ मुक्ताफलानां लक्षं च दन्तसौन्दर्यहेतवे ॥ देयं गोलोकनाथाय शैलजे भक्तिपूर्वकम् ॥ ३६ ॥ रत्नगण्डूषलक्षं च गण्डसौन्दर्य्यहेतवे ॥ महेश्वराय दातव्यं व्रते शैलेन्द्रकन्यके ॥ ३७ ॥ रत्नपाशकलक्षं च देयं ब्रह्मेश्वराय च ॥ ओष्ठाधःस्थलरूपाय व्रती प्राणेशि भक्तितः ॥ ३८ ॥ कर्णभूषणलक्षं च रत्नसारविनिर्म्मितम् ॥ देयं सर्वेश्वरायैव कर्णसौन्दर्य्यहेतवे ॥३९॥ माध्वीककलशानां च लक्षं रत्नविनिर्म्मितम् ॥ देयं विश्वेश्वरायैव स्वरसौन्दर्य्यहेतवे ॥४०॥ सुधापूर्णं च कुम्भानां सहस्रं रत्ननिर्म्मितम् ॥ देयं कृष्णाय देवेशि वाक्यसौन्दर्य्यहेतवे ॥ ४१ ॥ रत्नप्रदीपलक्षं च गोपवेषविधायिने ॥ देयं किशोरवेषाय दृष्टिसौन्दर्य्यहेतवे ॥ ४२ ॥ धत्तूरकुसुमाकारं रत्नपात्रसहस्रकम् ॥ देयं गोरक्षकायैव बलसौन्दर्य्यहेतवे ॥ ४३ ॥ सद्रत्नसाररचितं पद्मनालसहस्रकम् ॥ देयं चण्ड[1]कपालाय बाहुसौन्दर्य्यहेतवे ॥ ४४ ॥ लक्षं च रक्तपद्मानां करसौन्दर्य्यहेतवे ॥ देयं गोपांगनेशाय नारायणि हरिव्रते ॥ ४५ ॥ अंगुलीयकलक्षं च रत्नसारविनिर्म्मितम् ॥ अंगुलीनां च रूपार्थं देयं देवेश्वराय च ॥ ४६ ॥ मणीन्द्रसारलक्षं च श्वेतवर्णं मनोहरम् ॥ देयं मुनीन्द्रनाथाय नखसौन्दर्य्यहेतवे ॥ ४७ ॥ सद्रत्नसारहाराणां लक्षं चातिमनोहरम् ॥ देयं मदनमोहा

---

[1] स्वर्णकपालायेति पाठः ।

य वक्षःसौन्दर्य्यहेतवे ॥ ४८ ॥ सुपक्कश्रीफलानां च लक्षं च सुमनोहरम् ॥ देयं सिद्धेन्द्रनाथाय स्तनसौन्दर्य्यहेतवे ॥ ४९ ॥ सद्रत्नव
तुलाकारपत्रलक्षं मनोहरम् ॥ देयं पद्मालयेशाय देहसौन्दर्य्यहेतवे ॥ ५० ॥ सद्रत्नसाररचितं नाभीनां च सहस्रकम् ॥ प्रदेयं पद्म
नाभाय नाभिसौन्दर्य्यहेतवे ॥ ५१ ॥ सद्रत्नसाररचितं रथचक्रसहस्रकम् ॥ नितम्बसौन्दर्य्यार्थं च देयं वै चक्रपाणये ॥ ५२ ॥
सुवर्णरम्भास्तम्भानां लक्षं च सुमनोहरम् ॥ प्रदेयं श्रीनिवासाय श्रोणिसौन्दर्य्यहेतवे ॥ ५३ ॥ शतपत्रस्थलाब्जानां लक्षमम्लान
मक्षतम् ॥ प्रदेयं पद्मनेत्राय पादसौन्दर्य्यहेतवे ॥ ५४ ॥ सुवर्णरचितानां च खञ्जनानां सहस्रकम् ॥ गतिसौन्दर्य्यहे
त्वर्थं देयं लक्ष्मीश्वराय च ॥ ५५ ॥ राजहंससहस्रं च गजेन्द्राणां सहस्रकम् ॥ सुवर्णरचितं देयं हरये गतिहेतवे ॥
॥ ५६ ॥ सुवर्णच्छत्रलक्षं च देयं नारायणाय च ॥ विचित्रं रत्नसारेण मूर्द्धसौन्दर्य्यहेतवे ॥ ५७ ॥ मालतीनां च
कुसुममक्षतं लक्ष्मीश्वरि ॥ देयं वृन्दावनेशाय हास्य सौन्दर्य्यहेतवे ॥ ५८ ॥ अमूल्यरत्नलक्षं च देयं नारायणाय वै ॥
सुव्रते व्रतपूर्णार्थं शीलसौन्दर्य्यहेतवे ॥ ५९ ॥ स्वच्छस्फटिकसङ्काशं मणीन्द्रश्रेष्ठलक्षकम् ॥ देयं मुनीन्द्रनाथाय मनस्सौ
न्दर्य्यहेतवे ॥ ६० ॥ प्रवालसारसंकाशं मणिसारसहस्रकम् ॥ देयं कृष्णाय भक्त्या च प्रियारागविवृद्धये ॥ ६१ ॥ माणिक्यसा
रलक्षं च देयं कृष्णाय यत्नतः ॥ जन्मनः कोटिपर्य्यन्तं स्वामिसौभाग्यहेतवे ॥ ६२ ॥ कूष्माण्डं नारिकेलं च जम्बीरं श्रीफलं
तथा ॥ फलान्येतानि देयानि हरये पुत्रहेतवे ॥ ६३ ॥ रत्नेन्द्रसारलक्षं च देयं कृष्णाय यत्नतः ॥ असंख्यजन्मपर्य्यन्तं स्वामिनो
धनवृद्धये ॥ ६४ ॥ वाद्यं नानाप्रकारं च कांस्यतालादिकं परम् ॥ व्रते सम्पत्तिवृद्ध्यर्थं श्रीहरिं श्रावयेद्व्रती ॥६५॥ पायसं पिष्टकं
सर्पिःशर्करात्कं मनोहरम् ॥ प्रदेयं हरये भक्त्या स्वामिनो भोगवृद्धये ॥ ६६ ॥ सुगन्धिपुष्पमालानां लक्षमक्षतमीप्सितम् ॥ प्रदेयं
हरये भक्त्या हरिभक्तिविवृद्धये ॥ ६७ ॥ नैवेद्यानि च देयानि स्वादूनि मधुराणि च ॥ श्रीकृष्णप्रीतिप्राप्त्यर्थं दुर्गे नानाविधानि
च ॥ ६८ ॥ नानाविधानि पुष्पाणि तुलसीसंयुतानि च ॥ श्रीकृष्णप्रीतये भक्त्या व्रते देयानि सुव्रते ॥ ६९ ॥ ब्राह्मणानां सहस्रं

च प्रत्यहं भोजयेद्व्रती ॥ स्वात्मनः सस्यवृद्ध्यर्थं व्रतं जन्मनि जन्मनि ॥ ७० ॥ पुष्पाञ्जलिशतं देयं नित्यं पूर्णं च पूजने ॥ प्रणामशतकं देवि कर्त्तव्यं भक्तिवृद्धये ॥ ७१ ॥ षण्मासांश्च हविष्यान्नं मासान्पञ्च फलादिकम् ॥ हविः पक्षं जलं पक्षं व्रते भक्षेच्च सुव्रते ॥ ७२ ॥ रत्नप्रदीपशतकं वह्निं दद्याद्दिवानिशम् ॥ रात्रौ कुशासनं कृत्वा नित्यं जागरणं व्रते ॥ ७३ ॥ स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ॥ संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरित्यपि ॥ ७४ ॥ स्वप्नमैथुनकं त्याज्यं व्रतिना व्रतशुद्धये ॥ सम्पूर्णे च व्रते देवि प्रतिष्ठा तदनन्तरम् ॥ ७५ ॥ त्रिशतं वै षष्ट्यधिकं रल्लकं वस्त्रसंयुतम् ॥ सभोज्यं सोपवीतं च सोपहारं ददात्वयम् ॥ ७६ ॥ त्रिशतं वै षष्ट्यधिकसहस्रं विप्रभोजनम् ॥ त्रिशतं वै षष्ट्यधिकं सहस्रं तिलहोमकम् ॥ ७७ ॥ त्रिशतं वै षष्ट्यधिकं सहस्रं स्वर्णमेव च ॥ देया व्रतसमाप्तौ च दक्षिणा विधिबोधिता ॥ ७८ ॥ अन्यां समाप्तिदिवसे कथयिष्यामि दक्षिणाम् ॥ एतद्व्रतफलं देवि दृढा भक्तिर्हरौ भवेत् ॥ ७९ ॥ हरितुल्यो भवेत्पुत्रो विख्यातो भुवनत्रये ॥ सौन्दर्य्यं स्वामिसौभाग्यमैश्वर्य्यं विपुलं धनम् ॥ ८० ॥ सर्ववाञ्छितसिद्धीनां बीजं जन्मनि जन्मनि ॥ इत्येवं कथितं देवि व्रतं कुरु महेश्वरि ॥ ८१ ॥ पुत्रस्ते भविता साध्वीत्युक्त्वा स विरराम ह ॥ ८२ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे पुण्यकव्रतविधानं नाम चतुर्थोऽध्यायः ॥ ४ ॥

नारायण उवाच ॥ श्रुत्वा व्रतविधाने च दुर्गा संहृष्टमानसा ॥ पुनः पप्रच्छ कान्तं सा दिव्यां व्रतकथां शुभाम् ॥ १ ॥ श्रीपार्वत्युवाच ॥ किमद्भुतं व्रतं नाथ विधानफलमस्य च ॥ अधिकां तत्कथां ब्रूहि व्रतं केन प्रकाशितम् ॥ २ ॥ अथ पुण्यकव्रतकथा ॥ श्रीमहादेव उवाच ॥ शतरूपा मनोः पत्नी पुत्रदुःखेन दुःखिता ॥ ब्रह्मणः स्थानमागत्य सा ब्रह्माणमुवाच ह ॥ ३ ॥ शतरूपोवाच ॥ ब्रह्मन्केन प्रकारेण वन्ध्यायाश्च सुतो भवेत् ॥ तन्मे ब्रूहि जगद्धातः सृष्टिकारणकारण ॥४॥ तज्जन्म निष्फलं ब्रह्मन्नैश्वर्य्यं धनमेव च ॥ किंचिन्न शोभते गेहे विना पुत्रेण पुत्रिणाम् ॥५॥ तपोदानोद्भवं पुण्यं जन्मांतरसुखावहम् ॥ सुखदो मोक्षः प्रीतिदाता पुत्रश्च पुत्रिणाम् ॥ ६ ॥ पुत्री पुत्रमुखं दृष्ट्वा चाश्वमेधशतोद्भवम् ॥ फलं पुन्नामनर

कत्राणहेतुं लभेद्ध्रुवम् ॥ ७ ॥ पुत्रोत्पत्तेरुपायं वै वद मां तापसंयुताम् ॥ तदा भद्रं न चेद्भर्त्रा सह यास्यामि काननम् ॥ ८ ॥ गृहाण राज्यमैश्वर्य्यं धनं पृथ्वीं प्रजावहाम् ॥ किमेतेनावयोस्तात विना पुत्रैरपुत्रिणोः ॥ ९ ॥ अपुत्रिणो मुखं द्रष्टुं विद्वान्नोत्सहतेऽशिवम् ॥ मुखं दर्शयितुं लज्जां समवाप्नोत्यपुत्रकः ॥ १० ॥ अथवा गरलं भुक्त्वा प्रवेक्ष्यामि हुताशनम् ॥ अपुत्रपौत्रमशिवं गृहं स्यात्स्त्रीविहीनकम् ॥ ११ ॥ इत्येवमुक्त्वा सा साक्षाद्ब्रह्मणोऽग्रे रुरोद ह ॥ कृपानिधिश्च तां दृष्ट्वा प्रवक्तुमुपचक्रमे ॥१२॥ ब्रह्मोवाच ॥ शृणु वत्से प्रवक्ष्यामि पुत्रोपायं सुखावहम् ॥ सर्वैश्वर्य्यादिबीजं च सर्ववाञ्छाप्रदं शुभम् ॥१३॥ माघशुक्लत्रयोदश्यां व्रतमेतत्सुपुण्यकम् ॥ कर्तव्यं शुक्लकाले च कृष्णमाराध्य सर्वदम् ॥ १४ ॥ संवत्सरं च कर्तव्यं सर्वविघ्नविनाशनम् ॥ द्रव्याणि वेदैरुक्तानि व्रते देयानि सुव्रते ॥ १५ ॥ व्रतं च काण्वशाखोक्तं सर्ववाञ्छितसिद्धिदम् ॥ कृत्वा पुत्रं लभ शुभे विष्णुतुल्यपराक्रमम् ॥ ॥ १६ ॥ ब्रह्मणश्च वचः श्रुत्वा सा कृत्वा व्रतमुत्तमम् ॥ प्रियव्रतोत्तानपादौ लेभे पुत्रौ मनोहरौ ॥ १७ ॥ व्रतं कृत्वा देवहूतिर्लेभे सिद्धेश्वरं सुतम् ॥ नारायणांशं कपिलं पुण्यकं पुण्यदं शुभम् ॥ १८ ॥ अरुन्धतीदं कृत्वा तु लेभे शक्तिसुतं शुभा ॥ शक्तिकान्ता व्रतं कृत्वा सुतं लेभे पराशरम् ॥ १९ ॥ अदितिश्च व्रतं कृत्वा लेभे वामनकं सुतम्॥शची जयन्तं पुत्रं च लेभे कृत्वेदमीश्वरी ॥२०॥ उत्तानपादपत्नीदं कृत्वा लेभे ध्रुवं सुतम् ॥ कुबेरजाया कृत्वेदं लेभे च नलकूबरम् ॥ २१ ॥ सूर्य्यपत्नी मनुं लेभे कृत्वेदं व्रतमुत्तमम् ॥ अत्रिपत्नी सुतं चन्द्रं लेभे कृत्वेदमुत्तमम् ॥ २२ ॥ लेभे चांगिरसः पत्नी कृत्वेदं व्रतमुत्तमम् ॥ बृहस्पतिं सुरगुरुं पुत्रमस्य प्रभावतः ॥ २३ ॥ भृगोर्भार्य्या व्रतं कृत्वा लेभे दैत्यगुरुं सुतम् ॥ शुक्रं नारायणांशं च सर्वतेजस्विनां वरम् ॥२४॥ इत्येवं कथितं देवि व्रतानां व्रतमुत्तमम् ॥ त्वमेवं कुरु कल्याणि हिमालयसुते शुभे॥२५॥साध्यं राजेन्द्रपत्नीनां देवीनां च सुखावहम् ॥ व्रतमेतन्महासाध्वि साध्वीनां प्राणतः प्रियम् ॥ २६ ॥ व्रतस्यास्य प्रभावेण स्वयं गोपाङ्गनेश्वरः ॥ ईश्वरः सर्वभूतानां तव पुत्रो भविष्यति ॥ ॥ २७ ॥ इत्युक्त्वा शंकरस्तत्र विरराम च नारद ॥ व्रतं चकार सा देवी प्रहृष्टा शङ्कराज्ञया ॥ २८ ॥ इत्येवं कथितं सर्वं किं भूयः

श्रोतुमिच्छसि ॥ सुखदं मोक्षदं सारं गणेशजनिकारणम् ॥ २९ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायण
संवादे पुण्यकव्रतकथनं नाम पञ्चमोऽध्यायः ॥ ५ ॥ शौनक उवाच ॥ नारायणवचः श्रुत्वा नारदो हृष्टमानसः ॥ किं पप्रच्छ पुनः
साधो तन्मे ब्रूहि तपोधन ॥ १ ॥ सूत उवाच ॥ नारायणवचः श्रुत्वा नारदो हृष्टमानसः ॥ व्रतारम्भविधानं च संप्रष्टुमुपचक्रमे ॥
॥ २ ॥ नारद उवाच ॥ कृतं केन प्रकारेण व्रतमेतच्छुभावहम्॥तन्मे ब्रूहि मुनिश्रेष्ठ पार्वत्या भर्तुराज्ञया ॥३॥ ललाभ जन्म भूतेशः
कृते सुव्रतया व्रते ॥ ब्रह्मन्केन प्रकारेण तन्नः शंसितुमर्हसि ॥ ४ ॥ नारायण उवाच॥कथयित्वा कथां दिव्यां विधानं च व्रतस्य च ॥
स्वयं विधाता तपसां जगाम तपसे शिवः ॥ ५ ॥ हरेराराधनव्यग्रो मूर्त्तिभेदधरो हरिः ॥ हरिभावनशीलश्च हरिध्यानपरायणः ॥
॥ ६ ॥ परमानन्दपूर्णश्च ज्ञानानन्दः सनातनः ॥ दिवानिशं न जानाति हरिमन्त्रं बहिः स्मरन् ॥ ७ ॥ प्रहृष्टमनसा देवी पार्वती
भर्तुराज्ञया ॥ किङ्करान्प्रेरयामास विप्रांश्च व्रतहेतवे ॥ ८ ॥ आनीय सर्वद्रव्याणि व्रते योग्यानि यानि च॥व्रतं कर्तुं समारेभे शुभदा
सा शुभे क्षणे ॥ ९ ॥ सनत्कुमारो भगवानाजगाम विधेः सुतः ॥ मूर्त्तिमांस्तेजसां राशिः प्रज्वलन्ब्रह्मतेजसा ॥१०॥ ब्रह्माऽऽजगाम
हृष्टश्च ब्रह्मलोकात्सभार्य्यकः ॥ अतित्रस्तो हि भगवानाजगाम महेश्वरः ॥ ११ ॥ विष्णुः क्षीरोदशायी च सलक्ष्मीकश्चतुर्भुजः ॥
भगवाञ्जगतां पाता शास्ता भर्त्ता सपार्षदः ॥ १२ ॥ वनमालाधरः श्यामो भूषितो रत्नभूषणैः ॥ तथा सम्भृतसम्भारो रत्नयानेन
नारद ॥ १३ ॥ सनकश्च सनन्दश्च कपिलश्च सनातनः ॥ आसुरिश्च क्रतुर्हंसो वोढुः पञ्चशिखोऽरुणिः ॥ १४ ॥ यतिश्च सुमतिश्चैव
वसिष्ठश्च सहानुगः ॥ पुलहश्च पुलस्त्यश्चाप्यत्रिश्च भृगुरंगिराः ॥ १५ ॥ अगस्त्यश्च प्रचेताश्च दुर्वासाश्च्यवनस्तथा ॥ मरीचिः
कश्यपः कण्वो जरत्कारुश्च गौतमः ॥ १६ ॥ बृहस्पतिरुतथ्यश्च संवर्तः सौभरिस्तथा ॥ जाबालिर्जमदग्निश्च जैगीषव्यश्च देवलः ॥
॥ १७ ॥ गोका[1]मुखो वक्ररथः पारिभद्रः पराशरः ॥ विश्वामित्रो वामदेव ऋष्यशृंगो विभाण्डकः ॥ १८ ॥ मार्कण्डेयो मृकण्डुश्च

---

१ गोकामुखश्चक्रकर इति पाठः ।

पुष्करो[1] लोमशस्तथा ॥ कौत्सो वत्सश्च दक्षश्च बालाग्निरघमर्षणः ॥ १९ ॥ कात्यायनः कणादश्च पाणिनिः शाकटायनः ॥ शंकुरापिशलिश्चैव शाकल्यः शङ्ख एव च ॥ २० ॥ एते चान्ये च बहवः सशिष्या मुनयो मुने ॥ आवां च धर्म्मपुत्रौ च नरनारायणौ समौ ॥ २१ ॥ दिक्पालाश्च तथा देवा यक्षगन्धर्वकिन्नराः ॥ आजग्मुः पर्वताः सर्वे सगणाः पार्वतीव्रते ॥ २२ ॥ हिमालयः शैलराजः सापत्यश्च सभार्य्यकः ॥ सगणः सानुगश्चैव रत्नभूषणभूषितः ॥ २३ ॥ तथा सम्भृतसम्भारो नानाद्रव्यसमन्वितः ॥ मणिमाणिक्यरत्नानि व्रते योग्यानि यानि च ॥ २४ ॥ नानाप्रकारवस्तूनि जगत्यां दुर्लभानि च ॥ लक्षं च गजरत्नानामश्वरत्नं त्रिलक्षकम् ॥ २५ ॥ दशलक्षं गवां रत्नं शतलक्षं सुवर्णकम् ॥ रुचकानां हीरकाणां स्पर्शानां च तथैव च ॥ २६ ॥ मुक्तानां च चतुर्लक्षं कौस्तुभानां सहस्रकम् ॥ सुस्वादुनानाद्रव्याणां लक्षभाराणि कौतुकी ॥ अनन्तरत्नप्रभव आजगाम सुताव्रते ॥२७॥ ब्राह्मणा मनवः सिद्धा नागा विद्याधरास्तथा ॥ संन्यासिनो भिक्षुकाश्च बन्दिनः पार्वतीव्रते ॥ २८ ॥ विद्याधरी नर्त्तकी च नर्त्तकाऽप्सरसां गणाः ॥ नानाविधा वाद्यभाण्डा आजग्मुः शिवमन्दिरम् ॥ २९ ॥ कैलासराजमार्गं च चन्दनेन सुसंस्कृतम् ॥ आम्रपल्लवसूत्राढ्यं कदलीस्तम्भशोभितम् ॥ ३० ॥ दूर्वाधान्यफलैः पर्णलाजपुष्पैर्विभूषितम् ॥ निर्मितं पद्मरागेण ददृशुस्ते गणा मुदा ॥ ३१ ॥ उच्चैः सिंहासनेष्वेते पूजिताः शङ्करेण च ॥ कैलासवासिनः सर्वे परमानन्दसंयुताः ॥ ३२ ॥ दानाध्यक्षः शुनासीरः कुबेरः कोशरक्षकः ॥ आदेष्टा च स्वयं सूर्य्यः परिवेष्टा जलाधिपः ॥ ३३ ॥ दध्नां नद्यः सहस्राणि दुग्धानां च तथैव च ॥ सहस्राणि घृतानां च गुडानां च शतानि च ॥ ३४ ॥ माध्वीकानां सहस्राणि तैलानां च शतानि च ॥ लक्षाणि चैव तक्राणां बभूवुः पार्वतीव्रते ॥३५॥ पीयूषाणां च कुम्भानि शतलक्षाणि नारद ॥ मिष्टान्नानां शर्कराणां बभूवुर्लक्षराशयः ॥ यवगोधूमचूर्णानां घृताक्तानां च नारद ॥ ३६ ॥ स्वस्तिकानां च पूर्णानां बभूवुर्लक्षराशयः ॥ गुडसंस्कृतलाजानां बभूवुः कोटिराशयः ॥ ३७ ॥ शालीनां पृथुकानां च राशीनां दशकोटयः॥

---

[1] प्रस्कण्व इति पाठः ।

वरतण्डुलराशीनां मुने संख्या न विद्यते ॥ ३८ ॥ स्वर्णरौप्यप्रवालानां मणीनां च महामुने ॥ बभूवुः पर्वतास्तत्र कैलासे पार्वती व्रते ॥ ३९ ॥ पायसं पिष्टकं चैव शाल्यन्नं सुमनोहरम् ॥ चकार लक्ष्मीः पाकं च व्यञ्जनं घृतसंस्कृतम् ॥ ४० ॥ बुभुजे देवर्षिगणैः शिवो नारायणेन च ॥ बभूवुर्लक्षविप्राश्च परिवेषणकारकाः ॥ ४१ ॥ ताम्बूलं च ददौ तेभ्यः कर्पूरादिसुवासितम् ॥ रत्नसिंहासनस्थेभ्यो विप्रलक्षाः सुदक्षकाः ॥ ४२ ॥ रत्नसिंहासनस्थं च विष्णुं क्षीरोदशायिनम् ॥ सेव्यमानं पार्षदैश्च सस्मितैः श्वेतचामरैः ॥ ४३ ॥ ऋषिभिः स्तूयमानं च सिद्धैर्देवगणैस्तथा ॥ विद्याधरीणां नृत्यानि पश्यन्तं सस्मितं मुदा ॥ ४४ ॥ गन्धर्वाणां च संगीतं श्रुतवन्तं मनोहरम् ॥ पप्रच्छ शङ्करो ब्रह्मन्ब्रह्मेशं प्रीतिपूर्वकम् ॥ ४५ ॥ ब्रह्मणा प्रेरितो युक्तं व्रतं कर्त्तव्यमीप्सितम् ॥ देवर्षिगणपूर्णायां सभायां संपुटाञ्जलिः ॥ ४६ ॥ श्रीमहादेव उवाच ॥ मदीयं वचनं नाथ श्रीनिवास शृणु प्रभो ॥ तपस्स्वरूप तपसां कर्मणां च फलप्रद ॥ ४७ ॥ व्रतानां जपयज्ञानां पूजानां सर्वपूजित ॥ सर्वेषां बीजरूपेण वाञ्छाकल्पतरो हरे ॥ ४८॥ सुपुण्यं च व्रतं कर्त्तुं ब्रह्मन्निच्छति पार्वती ॥ पुत्रार्थिनी सा शोकार्त्ता हृदयेन विदूयता ॥ ४९ ॥ रतिभंगे कृते देवैर्व्यर्थवीर्य्यशुचार्दिता ॥ प्रबोधिता मया साध्वी विविधैर्वचनामृतैः ॥ ५० ॥ सत्पुत्रं स्वामिसौभाग्यं सुव्रता याचते व्रते ॥ ताभ्यां विना न सन्तुष्टा स्वप्राणांस्त्यक्तुमिच्छति ॥ ५१ ॥ पुरा त्यक्त्वा स्वदेहं च पितृयज्ञे च मानिनी ॥ मन्निन्दया हिमवति पुनर्जन्म ललाभ सा ॥ ५२ ॥ सर्वं जानासि वृत्तान्तं सर्वज्ञं त्वां वदामि किम् ॥ दीनां तां वद तत्त्वज्ञ परिणामशुभप्रदाम् ॥ ५३ ॥ दुर्निवार्य्यश्च सर्वेशस्त्रीस्वभावश्च चापलः॥दुस्त्यज्यं योगिभिः सिद्धैरस्माभिश्च तपस्विभिः ॥ ५४ ॥ जितेन्द्रियैर्जितक्रोधैः स्त्रीरूपं मोहकारणम् ॥ सर्वमायाकरण्डं च कामवर्द्धनकारणम् ॥ ५५ ॥ ब्रह्मास्त्रं कामदेवस्य दुर्भेद्यं जयकारणम् ॥ सुनिर्मितं च विधिना सर्वाद्यं विधिपूर्वकम् ॥ ५६ ॥ मोक्षद्वारकपाटं च हरिभक्तिनिरोधनम् ॥ संसारबन्धनस्तम्भरज्जुरूपमकृन्तनम् ॥ ५७ ॥ वैराग्यनाशबीजं च शश्वद्रागविवर्द्धनम् ॥ पत्तनं साहसानां च दोषाणामालयं सदा ॥ ५८ ॥ अप्रत्ययानां क्षेत्रं च स्वयं कपटमूर्तिमत् ॥ अहङ्काराश्रयं शश्वद्विषकुम्भं सुधामुखम् ॥ ५९ ॥

सर्वैरसाध्यमानं च दुराराध्यं च सर्वदा ॥ स्वकार्य्यसाध्याचाराढयं कलहांकुरकारणम् ॥ ६० ॥ सर्वं निवेदितं ब्रह्मन्कर्त्तव्यं वक्तुमर्हसि ॥ कार्य्यं सर्वं परामर्शं परिणामसुखावहम् ॥ ६१ ॥ श्रीनारायण उवाच ॥ इत्येवमुक्त्वा भगवान्निरीक्ष्य ब्रह्मणो मुखम् ॥ विरराम सभामध्ये स्तुत्वा च कमलापतिम् ॥ ६२ ॥ शङ्करस्य वचः श्रुत्वा प्रहस्य जगदीश्वरः ॥ हितं च नीतिवचनं प्रवक्तुमुपचक्रमे ॥ ६३ ॥ श्रीविष्णुरुवाच ॥ सुपुण्यकव्रतं सारं सतीसन्तानहेतवे ॥ स्वामिसौभाग्यबीजं च पत्नी ते कर्तुमिच्छति ॥ ६४ ॥ सर्वासाध्यं दुराराध्यं सर्वकामफलप्रदम् ॥ सुखदं सुखसारं च मोक्षदं पार्वतीश्वर ॥ ६५ ॥ आत्मा साक्षिस्वरूपश्च ज्योतीरूपः सनातनः ॥ निराश्रयश्च निर्लिप्तो निरुपाधिर्निरामयः ॥ ६६ ॥ भक्तप्राणश्च भक्तेशो भक्तानुग्रहकारकः॥ दुराराध्यो हि योऽन्येषां भक्तानामतिसाधकः ॥ ६७ ॥ भक्त्यधीनो हि भगवान्सर्वसिद्धो हि निष्फलः ॥ ते यस्य च कलाः पुंसो ब्रह्मविष्णुमहेश्वराः ॥ ६८ ॥ महान्विराडचदंशश्च निर्लिप्तः प्रकृतेः परः ॥ अव्ययो निग्रहश्चोग्रो भक्तानुग्रहविग्रहः ॥ ६९ ॥ उग्रग्रहो ग्रहाणां च ग्रहनिग्रहकारकः॥ [1]त्रिकोटिजन्ममध्ये च न साध्यो भवता विना ॥ ७० ॥ लब्ध्वा हि भारते जन्म हरिभक्तिं लभेन्नरः ॥ सेवनं क्षुद्रदेवानां कृत्वा सप्तसु जन्मसु ॥ ७१ ॥ सूर्य्यमन्त्रमवाप्नोति केवलं स तदाशिषा ॥ सूर्य्यमन्त्रं समाराध्य त्रिषु जन्मसु भारते ॥ ७२ ॥ प्राप्नोति शैवं मन्त्रं च सर्वदं मानवो मुदा ॥ संसेव्य परया भक्त्या त्वामेवं सप्तजन्मसु ॥ ७३ ॥ प्राप्नोति मायामन्त्रं च त्वत्पदाब्जप्रसादतः ॥ शतं जन्मसु चाराध्य मायां नारायणीं पराम् ॥ ७४ ॥ नारायणकलां सेव्यां समवाप्नोति मानवः ॥ कलां निषेव्य वर्षेऽत्र पुण्यक्षेत्रे सुदुर्लभे ॥ ७५ ॥ कृष्णभक्तिमवाप्नोति भक्तसंसर्गहैतुकीम् ॥ संप्राप्य भक्तिं निष्पक्वां भ्रामंभ्रामं च भारते ॥ ७६ ॥ प्राप्नोति परिपक्वां च भक्तिं भक्तनिषेवया ॥ तदा भक्तप्रसादेन देवानामाशिषा शिव ॥ श्रीकृष्णमन्त्रं प्राप्नोति निर्वाणफलदं परम् ॥ ७७ ॥ कृष्णव्रतं कृष्णमन्त्रं सर्वकामफलप्रदम् ॥ कृष्णतुल्यो भवेद्भक्तश्चिरं कृष्णनिषे

---

[1] त्रिकोटिजन्मसाध्यश्च न साध्यो भारतं विनेति पाठः ।

वया ॥ ७८ ॥ महति प्रलये पातः सर्वेषां वै सुनिश्चितम् ॥ न पातः कृष्णभक्तानां साधूनामविनाशिनाम् ॥ ७९ ॥ अविनाशिनि गोलोके मोदन्ते कृष्णकिंकराः ॥ हसन्ति ते सुनिश्चिन्ता देवान्ब्रह्मादिकाञ्छिव ॥८०॥ त्वं संहर्त्ता च सर्वेषां न भक्तानां महेश्वर ॥ माया मोहयते सर्वान्भक्तान्न कृपया मम ॥ ८१ ॥ माया नारायणी माता सर्वेषां कृष्णभक्तिदा ॥ न कृष्णभक्तिं प्राप्नोति विना मायानिषेवणम् ॥ ८२ ॥ सा च नारायणी माया मूलप्रकृतिरीश्वरी ॥ कृष्णप्रिया कृष्णभक्ता कृष्णतुल्याऽविनाशिनी ॥ ८३ ॥ सा च तेजस्स्वरूपा च स्वेच्छाविग्रहधारिणी ॥ आविर्भूता च देवानां तेजसाऽसुरनिग्रहे ॥ ८४ ॥ निहत्य दैत्यसंघांश्च दक्षपत्न्यां च भारते ॥ ललाभ दक्षस्तपसा जन्म चानेकजन्मनः ॥ ॥ ८५ ॥ त्यक्त्वा देहं पितुर्यज्ञे सा सती तव निन्दया ॥ जगाम देवी गोलोकं कृष्णशक्तिः सनातनी ॥ ८६ ॥ गृहीत्वा विग्रहं तस्या गुणरूपाश्रयं परम् ॥ भ्रामंभ्रामं भारते त्वं विषण्णोऽभूः पुरा हर ॥ ८७ ॥ प्रबोधितो मया त्वं च श्रीशैलेषु सरित्तटे ॥ ललाभ जन्म सा शैलकान्तायामचिरेण च ॥ ८८ ॥ करोतु पुण्यकं साध्वी सुव्रता सुव्रतं शिवा ॥ राजसूयसहस्राणां पुण्यं शंकर पुण्यके ॥ ८९ ॥ राजसूयसहस्राणां व्रते यत्र धनव्ययः ॥ न साध्यं सर्वसाध्वीनां व्रतमेतत्त्रिलोचन ॥ ९० ॥ स्वयं भूतेशनाथस्त्वं पुण्यकस्य प्रभावतः ॥ पार्वतीगर्भजातश्च वरः पुत्रो भविष्यति ॥ ९१ ॥ स्वयं देवगणानां स यस्मादीशः कृपानिधिः ॥ गणेश इति विख्यातो भविष्यति जगत्त्रये॥९२॥यस्य स्मरणमात्रेण विघ्ननाशो भवेद्ध्रुवम्॥ जगतां हेतुनाऽनेन विघ्ननिघ्नाभिधो विभुः ॥९३॥ नानाविधानि द्रव्याणि यस्माद्देयानि पुण्यके॥भुक्त्वा लम्बोदरत्वं च तेन लम्बोदरः स्मृतः॥९४॥ शनिदृष्ट्या शिरश्छेदाद्गजवक्त्रेण योजितः ॥गजाननः शिशुस्तेन सर्वेषां सर्वसिद्धिदः ॥९५॥ दूत भङ्गः परशुना पशुरामस्य वै यतः ॥ हेतुना तेन विख्यातश्चैकदन्ताभिधः शिशुः ॥ ९६ ॥ पूज्यश्च सर्वदेवानामस्माकं जगतां विभुः ॥ सर्वाग्रे पूजनं तस्य भविता मद्वरेण वै ॥ ९७ ॥ पूजासु सर्वदेवानामग्रे संपूज्य तं जनः ॥ पूजाफलमवाप्नोति निर्विघ्नेन वृथाऽन्यथा ॥ ९८ ॥ गणेशं च दिनेशं च विष्णुं शम्भुं हुताशनम् ॥ दुर्गामेतान्सन्निषेव्य पूजयेद्देवतान्तरम् ॥ ९९ ॥ गणेशपूजने विघ्नं निर्मूलं जगतां

भवेत् ॥ निर्व्याधिः सूर्य्यपूजायां शुचिः श्रीविष्णुपूजने ॥ १०० ॥ मोक्षश्च पापनाशश्च यशश्चैश्वर्यमुत्तमम् ॥ तत्त्वज्ञानं सुतृतीनां बीजं शंकरपूजनात् ॥ १०१ ॥ स्वबुद्धिशुद्धिजननं कीर्त्तितं वह्निपूजनम् ॥ विधिसंस्कृतवह्नेस्तु पूजातो ज्ञानतो मृतिः ॥ १०२ ॥ दाता भोक्ता च भवति शंकराग्निनिषेवणात् ॥ हरिभक्तिप्रदं चैव परं दुर्गार्च्चनं शिवम् ॥ १०३ ॥ विपरीतं त्रिजगतामेतेषां पूजनं विना ॥ एवं क्रमो महादेव कल्पे कल्पेऽस्ति निश्चितम् ॥ १०४ ॥ एते शश्वद्विद्यमाना नित्याः सृष्टिपरायणाः ॥ आविर्भावतिरोभावौ चैतेषामीश्वरेच्छया ॥ ॥ १०५ ॥ इत्युक्त्वा श्रीहरिस्तत्र विरराम सभातले ॥ प्रहृष्टा देवता विप्राः पार्वत्या सह शंकरः ॥ १०६ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणेशखण्डे नारदनारायणसंवादे व्रताज्ञाग्रहणं नाम षष्ठोऽध्यायः ॥ ६ ॥ नारायण उवाच ॥ हरेराज्ञां समादाय हरः संहृष्टमानसः ॥ उवाच पार्वतीं प्रीत्या हरिसंलापमङ्गलम् ॥ १ ॥ शिवाज्ञां च समादाय शिवा संहृष्टमानसा ॥ वाद्यं च वादयामास मंगलं मंगलव्रते ॥ २ ॥ सुस्नाता सुदती शुद्धा बिभ्रती धौतवाससी ॥ संस्थाप्य रत्नकलशं शुक्लधान्योपरि स्थिरम् ॥ ३ ॥ आम्रपल्लवसंयुक्तं फलाक्षतसुशोभितम् ॥ चन्दनागुरुकस्तूरीकुंकुमेन विराजितम् ॥ ४ ॥ रत्नासनस्था रत्नाढ्या रत्नोद्भवसुता सती ॥ रत्नसिंहासनस्थांश्च संपूज्य मुनिपुंगवान् ॥ ५ ॥ रत्नसिंहासनस्थं च संपूज्य सुपुरोहितम् ॥ चन्दनागुरुकस्तूरीरत्नभूषणभूषितम् ॥ ६ ॥ संस्थाप्य पुरतो भक्त्या दिक्पालान्रत्नभूषितान् ॥ देवान्नरांश्च नागांश्च समर्च्च्य विधिबोधितम् ॥ ७ ॥ समर्च्च्य परया भक्त्या ब्रह्मविष्णुमहेश्वरान् ॥ चन्दनागुरुकस्तूरीकुंकुमेन विराजितान् ॥ ८ ॥ वह्निशुद्धैस्सुवस्त्रैश्च सद्रत्नैर्भूषणैस्तथा ॥ पूजाद्रव्यैश्च विविधैः पूजितान्पुण्यके मुने ॥ समारेभे व्रतं देवी स्वस्तिवाचनपूर्वकम् ॥ ९ ॥ आवाह्याभीष्टदेवं तं श्रीकृष्णं मंगले घटे ॥ भक्त्या ददौ क्रमेणैव चोपचारांस्तु षोडश ॥ १० ॥ यानि व्रते विधेयानि देयानि विविधानि च ॥ प्रददौ तानि सर्वाणि प्रत्येकं फलदानि च ॥ ११ ॥ व्रतोक्तमुपहारं च दुर्लभं भुवनत्रये ॥ तच्च सर्वं ददौ भक्त्या सुव्रते सुव्रता सती ॥ १२ ॥ दत्त्वा द्रव्याणि सर्वाणि वेदमन्त्रेण सा सती ॥ होमं च

कारयामास त्रिलक्षं तिलसर्पिषा ॥ ब्राह्मणान्भोजयामास पूजयित्वाऽतिथींस्तथा ॥ १३ ॥ भोजयामास सा देवी सुव्रते सुव्रता सती ॥ प्रत्यहं सविधानं च चक्रे सा पूर्णवत्सरम् ॥ १४ ॥ समाप्तिदिवसे विप्रस्तमुवाच पुरोहितः ॥ सुव्रते सुव्रते मह्यं देहि त्वं पतिदक्षिणाम् ॥ १५ ॥ इति तद्वचनं श्रुत्वा विलप्य सुरसंसदि ॥ मूर्च्छां प्राप महामाया मायामोहितचेतसा ॥१६॥ तां च ते मूर्च्छितां दृष्ट्वा प्रहस्य मुनिपुंगवाः ॥ शङ्करं प्रेषयामास ब्रह्मा विष्णुश्च नारद ॥ १७ ॥ संप्रार्थितः सभासद्भिः शिवां बोधयितुं तदा ॥ शिवः समुद्यमं चक्रे प्रवक्तुं वदतां वरः ॥१८॥ श्रीमहादेव उवाच ॥ उत्तिष्ठ भद्रे भद्रं ते भविष्यति न संशयः ॥ साम्प्रतं चेतनं कृत्वा मदीयं वचनं शृणु ॥ १९ ॥ शिवः शिवां तामित्युक्त्वा शुष्ककण्ठौष्ठतालुकाम् ॥ वक्षसि स्थापयामास कारयामास चेतनाम् ॥ २० ॥ हितं सत्यं मितं सर्वं परिणामसुखावहम् ॥ यशस्करं च फलदं प्रवक्तुमुपचक्रमे ॥ ॥ २१ ॥ शृणु देवि प्रवक्ष्यामि यद्वेदेन निरूपितम् ॥ सर्वसम्मतमिष्टं च धर्मार्थं धर्म्मसंसदि ॥ २२ ॥ सर्वेषां कर्म्मणां देवि सारभूता च दक्षिणा ॥ यशोदा फलदा नित्यं धर्मिष्ठे धर्म्मकर्म्मणि ॥ २३ ॥ दैवं वा पैतृकं वाऽपि नित्यं नैमित्तिकं प्रिये ॥ यत्कर्म्म दक्षिणाहीनं तत्सर्वं निष्फलं भवेत् ॥ दाता च कर्म्मणा तेन कालसूत्रं व्रजेद्ध्रुवम् ॥ २४ ॥ अथान्ते दैन्यमाप्नोति शत्रुणा परिपीडितः ॥ दक्षिणा विप्रमुद्दिश्य तत्कालं तु न दीयते ॥ २५ ॥ तन्मुहूर्त्ते व्यतीते तु दक्षिणा द्विगुणा भवेत् ॥ चतुर्गुणा दिनातीते पक्षे शतगुणा भवेत् ॥ २६ ॥ मासे पञ्चशतघ्ना स्यात्षण्मासे तच्चतुर्गुणा ॥ संवत्सरे व्यतीते तु कर्म्म तन्निष्फलं भवेत् ॥ २७ ॥ दाता च नरकं याति यावद्वर्षसहस्रकम् ॥ पुत्रपौत्रधनैश्वर्य्यं क्षयमाप्नोति पातकात् ॥ धर्मो नष्टो भवेत्तस्य धर्म्महीने च कर्म्मणि ॥ २८ ॥ श्रीविष्णुरुवाच ॥ रक्ष स्वधर्मं धर्मिष्ठे धर्मज्ञे धर्मकर्मणि ॥ सर्वेषां च भवेद्रक्षा स्वधर्मपरिपालने ॥ २९ ॥ ब्रह्मोवाच ॥ यश्च केन निमित्तेन न धर्मं परिरक्षति ॥ धर्मे नष्टे च धर्मज्ञे तस्य कर्ता विनश्यति ॥ ३० ॥ धर्म उवाच ॥ मां रक्ष यत्नतः साध्वि प्रदाय पति

---

१ सर्वमिति पाठः ।

दक्षिणाम् ॥ मयि स्थिते महासाध्वि सर्वं भद्रं भविष्यति ॥ ३१ ॥ देवा ऊचुः ॥ धर्मं रक्ष महासाध्वि कुरु पूर्णं व्रतं सति ॥ वयं तव व्रते पूर्णे कुर्मस्त्वां पूर्णमानसाम् ॥३२॥ मुनय ऊचुः ॥ कृत्वा साध्वि पूर्णहोमं देहि विप्राय दक्षिणाम् ॥ स्थितेष्वस्मासु धर्मज्ञे किमभद्रं भविष्यति ॥३३॥ सनत्कुमार उवाच ॥ शिवे शिवं देहि मह्यं न चेद्व्रतफलं त्यज ॥ सुचिरं संचितस्यापि स्वात्मनस्तपसः फलम् ॥ ३४ ॥ कर्मण्यदक्षिणे साध्वि यागस्याहं तु तत्फलम् ॥ प्राप्स्यामि यजमानस्य संपूर्णं कर्मणः फलम् ॥ ३५ ॥ पार्वत्युवाच ॥ किं कर्म्मणा मे देवेशाः किं मे दक्षिणया मुने ॥ किं पुत्रेण च धर्मेण यत्र भर्त्ता च दक्षिणा ॥ ३६ ॥ वृक्षार्चने फलं किं वै यदि भूमिर्न चार्च्यते ॥ गते च कारणे कार्य्यं कुतः सस्यं कुतः फलम् ॥ ३७ ॥ प्राणास्त्यक्ताः स्वेच्छया चेद्देहैस्स्यात्किं प्रयोजनम् ॥ दृष्टिशक्तिविहीनेन चक्षुषा किं प्रयोजनम् ॥३८॥ शतपुत्रसमः स्वामी साध्वीनां च सुरेश्वराः ॥ यदि भर्त्ता व्रते देयः किं व्रतेन सुतेन वा ॥ ३९ ॥ भर्तुर्वंशश्च तनयः केवलं भर्तृमूलकः ॥ यत्र मूलं भवेद्भ्रष्टं तद्वाणिज्यं च निष्फलम् ॥ ४० ॥ श्रीविष्णुरुवाच ॥ पुत्रादपि परः स्वामी धर्मश्च स्वामिनः परः ॥ नष्टे धर्मे च धर्मिष्ठे स्वामिना किं सुतेन वा ॥४१॥ ब्रह्मोवाच ॥ स्वामिनश्च परो धर्मो धर्मात्सत्यं च सुव्रते॥सत्यं संकल्पितं कर्म न तु भ्रष्टं कुरु व्रतम्॥४२॥ पार्वत्युवाच॥निरूपितश्च वेदेषु स्वशब्दो धनवाचकः॥तद्यस्यास्तीति स स्वामी वेदज्ञ शृणु मद्वचः॥४३॥तस्य दाता सदा स्वामी न च स्वस्वामितां लभेत्॥अहोऽव्यवस्था भवतां वेदज्ञानामबोधतः ॥४४॥ धर्म्म उवाच ॥ पत्नी विनाऽन्यं स्वं साध्वि स्वामिनं दातुमक्षमा ॥ दम्पती ध्रुवमेकाङ्गौ द्वयोर्दाने द्वकौ समौ ॥ ४५ ॥ पार्वत्युवाच ॥ पिता ददाति जामात्रे स च गृह्णाति तत्सुताम् ॥ न श्रुतं विपरीतं च श्रुतौ श्रुतिपरायणाः ॥ ४६ ॥ देवा ऊचुः ॥ बुद्धिस्वरूपा त्वं दुर्गे बुद्धिमन्तो वयं त्वया ॥ वेदज्ञे वेदवादेषु के वा त्वां जेतुमीश्वराः ॥४७॥ निरूपिता पुण्यके तु व्रते स्वामी च दक्षिणा॥ श्रुतौ श्रुतो यः स धर्मो विपरीतो ह्यधर्मकः॥४८॥ पार्वत्युवाच ॥ केवलं वेदमाश्रित्य कः करोति विनिर्णयम्॥ बलवाँल्लौकिको वेदाल्लोकाचारं च कस्त्यजेत् ॥ ४९ ॥ वेदे प्रकृतिपुंसोश्च गरीयान्पुरुषो ध्रुवम् ॥ निबोधत सुराः प्राज्ञा

बालाहं कथयामि किम् ॥ ९० ॥ बृहस्पतिरुवाच ॥ न पुमांसं विना सृष्टिर्न साध्वि प्रकृतिं विना ॥ श्रीकृष्णश्च द्वयोः स्रष्टा समौ
प्रकृतिपूरुषौ ॥ ९१ ॥ पार्वत्युवाच ॥ सर्वस्रष्टा च यः कृष्णः सोंऽशेन सगुणः पुमान् ॥ पुमान्गरीयान्प्रकृतेस्तथैव न
ततश्च सा ॥ ९२ ॥ एतस्मिन्नन्तरे देवा मुनयस्तत्र संसदि ॥ रत्नेन्द्रसाररचितमाकाशे ददृशू रथम् ॥ ९३ ॥
पार्षदैस्संपरिवृतं युतं श्यामैश्चतुर्भुजैः ॥ वनमालापरिवृतै रत्नभूषणभूषितैः ॥ अवरुह्य मुदा यानादाजगाम सभातलम् ॥ ९४ ॥
तुष्टुवुस्तं सुरेन्द्रास्ते देवं वैकुण्ठवासिनम् ॥ शंखचक्रगदापद्मधरमीशं चतुर्भुजम् ॥ ९५ ॥ लक्ष्मीसरस्वतीकान्तं शान्तं तं सुमनोहरम् ॥
सुखदृश्यमभक्तानामदृश्यं कोटिजन्मभिः ॥ ९६ ॥ कोटिकन्दर्पलावण्यं कोटिचन्द्रसमप्रभम् ॥ अमूल्यरत्नरचितचारुभूषणभूषितम् ॥
॥ ९७ ॥ सेव्यं ब्रह्मादिदेवैश्च सेवकैः सततं स्तुतम् ॥ तद्भासा संपरिच्छन्नैर्वेष्टितं च सुरर्षिभिः ॥ ९८ ॥ वासयामास
तं ते च रत्नसिंहासने वरे ॥ तं प्रणेमुश्च शिरसा ब्रह्मशक्तिशिवादयः ॥ ९९ ॥ सम्पुटाञ्जलयः सर्वे पुलकाङ्काश्रुलोचनाः ॥ ६० ॥
सस्मितस्तांश्च पप्रच्छ सर्वं मधुरया गिरा ॥ प्रबोधितः सुबोधज्ञः प्रवक्तुमुपचक्रमे ॥ ६१ ॥ श्रीनारायण उवाच ॥ सह बुद्ध्या
बुद्धिमन्तो न वक्तुमुचितं सुराः॥सर्वे शक्त्या यया विश्वे शक्तिमन्तो हि जीविनः॥६२॥ब्रह्मादितृणपर्य्यन्तं सर्वं प्राकृतिकं जगत् ॥
सत्यं सत्यं विना मां च मया शक्तिः प्रकाशिता ॥ ६३ ॥ आविर्भूता च सा मत्तः सृष्टौ देवी मदिच्छया ॥ तिरोहिता च सा
शेषे सृष्टिसंहरणे मयि ॥ ६४ ॥ प्रकृतिः सृष्टिकर्त्री च सर्वेषां जननी परा ॥ मम तुल्या च मन्माया तेन नारायणी स्मृता ॥
॥ ६५ ॥ सुचिरं तपसा तप्तं शंभुना ध्यायता च माम् ॥ तेन तस्मै मया दत्ता तपसां फलरूपिणी ॥ ६६ ॥ व्रतं च लोकशिक्षार्थमस्या
न स्वार्थमेव च ॥ स्वयं व्रतानां तपसां फलदात्री जगत्त्रये ॥ ६७ ॥ मायया मोहिताः सर्वे किमस्या वास्तवं व्रतम् ॥
साध्यमस्य व्रतफलं कल्पे कल्पे पुनः पुनः ॥ ६८ ॥ सुरेश्वरा मदंशाश्च ब्रह्मशक्तिमहेश्वराः ॥ कलाः कलांशरूपाश्च जीविनश्च
सुरादयः ॥ ६९ ॥ मृदा विना घटं कर्त्तुं कुलालश्च यथाऽक्षमः ॥ विना स्वर्णं स्वर्णकारः कुण्डलं कर्त्तुमक्षमः ॥ ७० ॥ विना

शक्त्या तथाऽहं च स्वसृष्टिं कर्तुमक्षमः ॥ शक्तिप्रधाना सृष्टिश्च सर्वदर्शनसम्मता ॥ ७१ ॥ अहमात्मा हि निर्लिप्तोऽदृश्यः साक्षी च
देहिनाम् ॥ देहाः प्राकृतिकाः सर्वे नश्वराः पाञ्चभौतिकाः ॥ ७२ ॥ अहं नित्यः शरीरी च भानु[1]विग्रहविग्रहः ॥ सर्वाधारा सा
प्रकृतिः सर्वात्माऽहं जगत्सु च ॥७३॥ अहमात्मा मनो ब्रह्मा ज्ञानरूपो महेश्वरः ॥ पञ्च प्राणाः स्वयं विष्णुर्बुद्धिः प्रकृतिरीश्वरी ॥
॥ ७४ ॥ मेधा निद्रादयश्चैताः सर्वाश्च प्रकृतेः कलाः ॥ सा च शैलेन्द्रकन्यैषा त्विति वेदे निरूपितम् ॥ ७५ ॥ अहं गोलोकना
थश्च वैकुण्ठेशः सनातनः ॥ गोपीगोपैः परिवृतस्तत्रैव द्विभुजः स्वयम् ॥ चतुर्भुजोऽत्र देवेशो लक्ष्मीशः पार्षदैर्वृतः ॥ ७६ ॥ ऊर्ध्वं
परश्च वैकुण्ठात्पञ्चाशत्कोटियोजने ॥ ममाश्रयश्च गोलोके यत्राहं गोपिकापतिः ॥ ७७ ॥ व्रताराध्यस्स द्विभुजः स च तत्फलदा
यकः॥यद्रूपं चिन्तयेद्यो हि तच्च तत्फलदायकः॥७८॥व्रतं पूर्णं कुरु शिवे शिवं दत्त्वा च दक्षिणाम्॥पुनः समुचितं मूल्यं दत्त्वा नाथं
ग्रहीष्यसि॥७९॥विष्णुदेहा यथा गावो विष्णुदेहस्तथा शिवः ॥ द्विजाय दत्त्वा गोमूल्यं गृहाण स्वामिनं शुभे॥८०॥ यज्ञपत्नीं यथा
दातुं क्षमः स्वामी सदैव तु ॥ तथा सा स्वामिनं दातुमीश्वरीति श्रुतेर्मतम् ॥८१॥ इत्युक्त्वा स सभामध्ये तत्रैवान्तरधीयत ॥ हृष्टास्ते
सा च संहृष्टा दक्षिणां दातुमुद्यता ॥ ८२ ॥ कृत्वा शिवा पूर्णहोमं सा शिवं दक्षिणां ददौ ॥ स्वस्तीत्युक्त्वा च जग्राह कुमारो देवसं
सदि ॥८३॥ उवाच दुर्गा संत्रस्ता शुष्ककण्ठौष्ठतालुका ॥ कृत्वाञ्जलिपुटा विप्रं हृदयेन विदूयता ॥८४॥ पार्वत्युवाच ॥ गोमूल्यं
मत्पतिसममिति वेदे निरूपितम्॥गवां लक्षं प्रयच्छामि देहि मत्स्वामिनं द्विज॥८५॥तदा दास्यामि विप्रेभ्यो दानानि विविधानि च॥
आत्महीनो हि देहश्च कर्म्म किं कर्तुमीश्वरः॥८६॥सनत्कुमार उवाच ॥ गवां लक्षेण मे देवि वल्गुना किं प्रयोजनम् ॥दत्तस्यामूल्य
रत्नस्य गवां प्रत्यर्पणेन च॥८७॥स्वस्य स्वस्य स्वयं दाता लोकः सर्वो जगत्त्रये॥कर्त्तुरेवेप्सितं कर्म भवेत्किं वा परेच्छया ॥ ८८ ॥
दिगम्बरं पुरः कृत्वा भ्रमिष्यामि जगत्त्रयम्॥बालकानां बालिकानां समूहस्मितकारणम्॥८९॥इत्युक्त्वा ब्रह्मणः पुत्रो गृहीत्वा शङ्करं मुने॥

---

[1] भानुमान् भानुविग्रह इति पाठः ।

सन्निधौ वासयामास तेजस्वी देवसंसदि॥९०॥दृष्ट्वा शिवं गृह्यमाणं कुमारेण च पार्वती॥समुद्यता तनुं त्यक्तुं शुष्ककण्ठौष्ठतालुका॥
॥ ९१ ॥ विचिन्त्य मनसा साध्वीत्येवमेव दुरत्ययम् ॥ न दृष्टोऽभीष्टदेवश्च न च प्राप्तं फलं व्रते ॥ ९२ ॥ एतस्मिन्नन्तरे देवाः
पार्वतीसहितास्तदा ॥ सद्यो ददृशुराकाशे तेजसां निकरं परम् ॥ ९३ ॥ कोटिसूर्य्यप्रभोर्ध्वं च प्रज्वलन्तं दिशो दश ॥ कैलासशैल
पुरतः सर्वदेवादिभिर्युतम् ॥ ९४ ॥ सर्वाश्रयं गणाच्छन्नं विस्तीर्णं मण्डलाकृतिम् ॥ तच्च दृष्ट्वा भगवतस्तुष्टुवुस्ते क्रमेण च ॥
॥ ९५ ॥ विष्णुरुवाच ॥ ब्रह्माण्डानि च सर्वाणि यल्लोमविवरेषु च ॥ सोऽयं ते षोडशांशश्च के वयं यो महाविराट् ॥ ९६ ॥
ब्रह्मोवाच ॥ वेदोपयुक्तं दृश्यं यत्प्रत्यक्षं द्रष्टुमीश्वर ॥ स्तोतुं तद्वर्णितुमहं शक्तः किं स्तौमि तत्परः ॥९७॥ श्रीमहादेव उवाच ॥
ज्ञानाधिष्ठातृदेवोऽहं स्तौमि ज्ञानपरं च किम् ॥ सर्वानिर्वचनीयं तं त्वां च स्वेच्छामयं विभुम् ॥ ९८ ॥ धर्म उवाच ॥
अदृश्यमवतारेषु यद्दृश्यं सर्वजन्तुभिः ॥ किं स्तौमि तेजोरूपं तद्भक्तानुग्रहविग्रहम् ॥ ९९ ॥ देवा उचुः ॥ के वयं त्वत्कलां
शाश्च किं वा त्वां स्तोतुमीश्वराः ॥ स्तोतुं न शक्ता वेदा यं न च शक्ता सरस्वती ॥ १०० ॥ मुनय उचुः ॥ वेदान्पठित्वा
विद्वांसो वयं किं वेदकारणम् ॥ स्तोतुमीशा न वाणी च त्वां वाङ्मनसयोः परम् ॥ १०१ ॥ सरस्वत्युवाच ॥ वागधिष्ठातृदेवीं
मां वदन्ते वेदवादिनः ॥ किञ्चिन्न शक्ता त्वां स्तोतुमहोवाङ्मनसोः परम् ॥ १०२ ॥ सावित्र्युवाच ॥ वेदप्रसूरहं नाथ सृष्टा
त्वत्कलया पुरा ॥ किं स्तौमि स्त्रीस्वभावेन सर्वकारणकारणम्॥१०३॥लक्ष्मीरुवाच ॥ त्वदंशविष्णुकान्ताहं जगत्पोषणकारिणी॥
किं स्तौमि त्वत्कलासृष्टा जगतां बीजकारणम् ॥ १०४ ॥ हिमालय उवाच ॥ हसन्ति सन्तो मां नाथ कर्मणा स्थावरं परम्॥
स्तोतुं समुद्यतं क्षुद्रः किं स्तौमि स्तोतुमक्षमः ॥ १०५ ॥ क्रमेण सर्वे तं स्तुत्वा देवा विररमुर्मुने ॥ देव्यश्च मुनयः सर्वे पार्वती स्तो
तुमुद्यता ॥ १०६ ॥ धौतवस्त्रा जटाभारं बिभ्रती सुव्रता व्रते ॥ प्रेरिता परमात्मानं व्रताराध्यं शिवेन च ॥१०७॥ ज्वलदग्निशिखा
रूपा तेजोमूर्तिमती सती ॥ तपसां फलदा माता जगतां सर्वकर्मणाम् ॥ १०८ ॥ पार्वत्युवाच ॥ कृष्ण जानासि मां भद्रं नाहं त्वां

ज्ञातुमीश्वरी ॥ के वा जानन्ति वेदज्ञा वेदा वा वेदकारकाः ॥१०९॥ त्वदंशास्त्वां न जानन्ति कथं ज्ञास्यन्ति ते कलाः॥ त्वं चापि तत्त्वं जानासि किमन्ये ज्ञातुमीश्वराः ॥ ११० ॥ सूक्ष्मात्सूक्ष्मतमोऽव्यक्तः स्थूलात्स्थूलतमो महान् ॥ विश्वस्त्वं विश्वरूपश्च विश्वबीजं सनातनः ॥ १११ ॥ कार्य्यं त्वं कारणं त्वं च कारणानां च कारणम् ॥ तेजस्स्वरूपो भगवान्निराकारो निराश्रयः ॥ ११२ ॥ निर्लिप्तो निर्गुणः साक्षी स्वात्मारामः परात्परः ॥ प्रकृतीशो विराड्बीजं विराड्रूपस्त्वमेव च ॥ सगुणस्त्वं प्राकृतिकः कलया सृष्टिहेतवे ॥ ११३ ॥ प्रकृतिस्त्वं पुमांस्त्वं च वेदाऽन्यो न क्वचिद्भवेत् ॥ जीवस्त्वं साक्षिणो भोगी स्वात्मनः प्रतिबिम्बकम् ॥ ११४ ॥ कर्म त्वं कर्मबीजं त्वं कर्मणां फलदायकः ॥ ध्यायन्ति योगिनस्तेजस्त्वदीयमशरीरि यत् ॥ केचिच्चतुर्भुजं शान्तं लक्ष्मीकान्तं मनोहरम् ॥ ११५ ॥ वैष्णवाश्चैव साकारं कमनीयं मनोहरम् ॥ शङ्खचक्रगदापद्मधरं पीताम्बरं परम् ॥११६॥ द्विभुजं कमनीयं च किशोरं श्यामसुन्दरम् ॥ शान्तं गोपाङ्गनाकान्तं रत्नभूषणभूषितम् ॥ ११७ ॥ एवं तेजस्विनं भक्ताः सेवन्ते सन्ततं मुदा ॥ ध्यायन्ति योगिनो यत्तत्कुतस्तेजस्विनं विना ॥ ११८ ॥ तत्तेजो बिभ्रतां देव देवानां तेजसा पुरा ॥ आविर्भूता सुराणां च वधाय ब्रह्मणा स्तुता ॥ ११९ ॥ नित्या तेजस्स्वरूपाऽहं धृत्वा वै विग्रहं विभो ॥ स्त्रीरूपं कमनीयं च विधाय समुपस्थिता ॥ १२० ॥ मायया तव मायाऽहं मोहयित्वाऽसुरान्पुरा ॥ निहत्य सर्वाञ्छैलेन्द्रमगमं तं हिमालयम् ॥ १२१ ॥ ततोऽहं संस्तुता देवैस्तारकाक्षेण पीडितैः ॥ अभवं दक्षजायायां शिवस्त्री भवजन्मनि ॥१२२॥ त्यक्त्वा देहं दक्षयज्ञे शिवाऽहं शिवनिन्दया ॥ अभवं शैलजायायां शैलाधीशस्य कर्मणा ॥ १२३ ॥ अनेकतपसा प्राप्तः शिवश्चात्रापि जन्मनि ॥ पाणिं जग्राह मे योगी प्रार्थितो ब्रह्मणा विभुः ॥ १२४ ॥ शृङ्गारजं च तत्तेजो नालभं देवमायया ॥ स्तौमि त्वामेव तेनेश पुत्रदुःखेन दुःखिता ॥ १२५ ॥ व्रते भवद्विधं पुत्रं लब्धुमिच्छामि साम्प्रतम् ॥ देवेन विहिता वेदे सांगे स्वस्वामिदक्षिणा ॥ १२६ ॥ श्रुत्वा सर्वं कृपासिन्धो कृपां मे कर्तुमर्हसि ॥ इत्युक्त्वा पार्वती तत्र विरराम च नारद ॥ १२७ ॥ भारते पार्वतीस्तोत्रं यः शृणोति सुसंयतः ॥ सत्पुत्रं लभते नूनं

विष्णुतुल्यपराक्रमम् ॥ १२८ ॥ संवत्सरं हविष्याशी हरिमभ्यर्च्य भक्तितः ॥ सुपुण्यकव्रतफलं लभते नात्र संशयः ॥ १२९ ॥
विष्णुस्तोत्रमिदं ब्रह्मन्सर्वसम्पत्तिवर्द्धनम् ॥ सुखदं मोक्षदं सारं स्वामिसौभाग्यवर्द्धनम् ॥१३०॥ सर्वसौन्दर्य्यबीजं च यशोराशिवि
वर्द्धनम् ॥ हरिभक्तिप्रदं तत्त्वज्ञानबुद्धिसुखप्रदम् ॥ १३१ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे
पुण्यकव्रते पतिदाने पार्वतीकृतं श्रीकृष्णस्तोत्रकथनं नाम सप्तमोऽध्यायः ॥ ७ ॥ नारायण उवाच ॥ पार्वत्याः स्तवनं श्रुत्वा
श्रीकृष्णः करुणानिधिः ॥ स्वरूपं दर्शयामास सर्वादृश्यं सुदुर्लभम् ॥ १ ॥ स्तुत्वा देवी व्रतपरा कृष्णसंलग्नमानसा ॥
ददर्श तेजसां मध्ये स्वरूपं सर्वमोहनम् ॥ २ ॥ सद्रत्नसाररचिते हीरकेण परिष्कृते ॥ युक्ते माणिक्यमालाभी
रत्नपूर्णे मनोरमे ॥ ३ ॥ पीतांशुकं वह्निशुद्धं वरं वंशकरं परम् ॥ वनमालागलं श्यामं रत्नभूषणभूषितम् ॥ ४ ॥
किशोरवयसं चित्रवेषं वै चन्दनांकितम् ॥ चारुस्मितास्यमीड्यं तच्छारदेन्दुविनिन्दकम् ॥ ५ ॥ मालतीमाल्यसंयुक्तं केकिपिच्छा
वचूडकम् ॥ गोपांगनापरिवृतं राधावक्षस्थलोज्ज्वलम् ॥ ६ ॥ कोटिकन्दर्पलावण्यलीलाधाम मनोहरम् ॥ अतीव हृष्टं सर्वेष्टं भक्ता
नुग्रहकारकम् ॥ ७ ॥ दृष्ट्वा रूपं रूपवती पुत्रं तदनुरूपकम् ॥ मनसा वरयामास वरं संप्राप्य तत्क्षणम् ॥ ८ ॥ वरं दत्त्वा वरेशस्तु
यद्यन्मनसि वाञ्छितम् ॥ दत्त्वाऽभीष्टं सुरेभ्यश्च तत्तेजोऽन्तरधीयत ॥ ९ ॥ कुमारं बोधयित्वा तु देवदेव्यै दिगम्बरम् ॥ ददुर्निरु
पमं तत्र प्रहृष्टायै कृपान्विताः ॥ १० ॥ ब्राह्मणेभ्यो ददौ दुर्गा रत्नानि विविधानि च ॥ सुवर्णानि च भिक्षुभ्यो बन्दिभ्यो विश्वनन्दि
ता ॥ ११ ॥ ब्राह्मणान्भोजयामास देवान्वै पर्वतांस्तथा ॥ शंकरं पूजयामास चोपहारैरनुत्तमैः ॥ १२ ॥ दुन्दुभिं वादयामास
कारयामास मंगलम् ॥ संगीतं गापयामास हरिसम्बन्धि सुन्दरम्॥ १३॥ व्रतं समाप्य सा दुर्गा दत्त्वा दानानि सस्मिता ॥ सर्वांश्च
भोजयित्वा तु बुभुजे स्वामिना सह ॥ १४ ॥ ताम्बूलं च वरं रम्यं कर्पूरादिसुवासितम् ॥ क्रमात्प्रदाय सर्वेभ्यो बुभुजे तेन कौतु
कात् ॥ १५ ॥ पयःफेननिभां शय्यां रम्यां सद्रत्नमञ्चके ॥ पुष्पचन्दनसंयुक्तां कस्तूरीकुंकुमान्विताम् ॥ रहसि स्वामिना सार्द्धं

सुष्वाप परमेश्वरी ॥ ॥ १६ ॥ कैलासस्यैकदेशे च रम्ये चन्दनकानने ॥ सुगन्धिकुसुमाढ्येन वायुना सुरभीकृते ॥ १७ ॥ भ्रमरध्वनिसंयुक्ते पुंस्कोकिलरुताश्रये ॥ व्यहार्षीत्सा सुरसिका तत्र तेन सहाम्बिका ॥ १८ ॥ रेतःपतनकाले च स विष्णुर्विष्णुमायया ॥ विधाय विप्ररूपं तदाजगाम रतेर्गृहम् ॥१९॥ जटावन्तं विना तैलं कुचैलं भिक्षुकं मुने ॥ अतीवशुक्लदशनं तृष्णया परिपीडितम्॥ ॥ २० ॥ अतीव कृशगात्रं च बिभ्रत्तिलकमुज्ज्वलम् ॥ बहुकाकुस्वरं दीनं दैन्यात्कुत्सितमूर्तिमत् ॥ २१ ॥ आजुहाव महादेवमतिवृद्धोऽन्नयाचकः ॥ दण्डावलम्बनं कृत्वा रतिद्वारेऽतिदुर्बलः ॥ २२ ॥ ब्राह्मण उवाच ॥ किं करोषि महादेव रक्ष मां शरणागतम् ॥ सप्तरात्रिव्रतेऽतीते पारणाकांक्षिणं क्षुधा॥२३॥ किं करोषि महादेव हे तात करुणानिधे ॥ पश्य वृद्धं जराग्रस्तं तृषया परिपीडितम्॥ ॥ २४ ॥ मातरुत्तिष्ठ मेऽन्नं त्वं प्रयच्छाद्य शिवं जलम् ॥ अनन्तरत्नोद्भवजे रक्ष मां शरणागतम् ॥ २५ ॥ मातर्मातर्जगन्मातरेहि नाहं स्थितो बहिः ॥ सीदामि तृषया कस्मात्स्थितायामात्ममातरि ॥ २६ ॥ इति काकुस्वरं श्रुत्वा शिवस्योत्तिष्ठतो मुने ॥ पपात वीर्य्यं शय्यायां न योनौ प्रकृतेस्तदा ॥ २७ ॥ उत्तस्थौ पार्वती त्रस्ता सूक्ष्मवस्त्रं पिधाय च ॥ आजगाम बहिर्द्वारं पार्वत्या सह शंकरः ॥ २८ ॥ ददर्श ब्राह्मणं दीनं जरया परिपीडितम् ॥ वृद्धं लुलितगात्रं च बिभ्रतं दण्डमानतम् ॥ २९ ॥ तपस्विनमशान्तं च शुष्ककण्ठोष्ठतालुकम् ॥ कुर्वन्तं परया भक्त्या प्रणामं स्तवनं तयोः ॥ ३० ॥ श्रुत्वा तद्वचनं तत्र नीलकण्ठः सुधोपमम् ॥ उवाच परया प्रीत्या प्रसन्नस्तं प्रहस्य च ॥ ३१ ॥ शंकर उवाच ॥ गृहं ते कुत्र विप्रर्षे वद वेदविदां वर ॥ किन्नाम भवतः क्षिप्रं ज्ञातुमिच्छामि साम्प्रतम् ॥ ३२ ॥ पार्वत्युवाच ॥ आगतोऽसि कुतो विप्र मम भाग्यादुपस्थितः ॥ अद्य मे सफलं जन्म ब्राह्मणो मद्गृहेऽतिथिः ॥ ३३ ॥ अतिथिः पूजितो येन त्रिजगत्तेन पूजितम् ॥ तत्रैवाधिष्ठिता देवा ब्राह्मणा गुरवो द्विज ॥ ३४ ॥ तीर्थान्यतिथिपादेषु शश्वत्तिष्ठन्ति निश्चितम् ॥ तत्पादधौततोयेन मिश्रितानि लभेद्गृही ॥ ३५ ॥ स स्नातः सर्वतीर्थेष सर्वयज्ञेषु दीक्षितः॥अतिथिः पूजितो येन स्वात्मशक्त्या यथोचितम् ॥ ३६ ॥ महादानानि सर्वाणि कृतानि तेन भूतले ॥ अतिथिः पूजितो येन भारते भक्ति

पूर्वकम् ॥ ३७ ॥ नानाप्रकारपुण्यानि वेदोक्तानि च यानि वै ॥ अन्ये चातिथिसेवायाः कलां नार्हन्ति षोडशीम् ॥ ३८ ॥ अपूजि
तोऽतिथियस्य भवनाद्विनिवर्त्तते ॥ पितृदेवाग्नयः पश्चाद्गुरवो यान्त्यपूजिताः ॥ ३९ ॥ यानि कानि च पापानि ब्रह्महत्यादिकानि
च ॥ तानि सर्वाणि लभते नाभ्यर्च्यातिथिमीप्सितम्॥४०॥ ब्राह्मण उवाच ॥ जानासि वेदान्वेदज्ञे वेदोक्तं कुरु पूजनम् ॥ क्षुत्तृड्भ्यां
पीडितो मातर्वचनं च श्रुतौ श्रुतम् ॥ ४१ ॥ व्याधियुक्तो निराहारो यदा वाऽनशनव्रती ॥ मनोरथेनोपहारं भोक्तुमिच्छति
मानवः॥४२॥पार्वत्युवाच ॥ भोक्तुमिच्छसि किं विप्र त्रैलोक्ये च सुदुर्लभम्॥दास्यामि भोक्तुं त्वामद्य मज्जन्म सफलं कुरु ॥४३॥
ब्राह्मण उवाच ॥ व्रते सुव्रतया सर्वमुपहारं समाहृतम् ॥ नानाविधं मिष्टमिष्टं भोक्तु श्रुत्वा समागतः॥४४॥ सुव्रते तव पुत्रोऽहमग्रे मां
पूजयिष्यसि ॥ दत्त्वा मिष्टानि वस्तूनि त्रैलोक्ये दुर्लभानि च ॥ ४५ ॥ ताताः पञ्चविधाः प्रोक्ता मातरो विविधाः स्मृताः ॥ पुत्रः
पञ्चविधः साध्वि कथितो वेदवादिभिः॥४६॥विद्यादाताऽन्नदाता च भयत्राता च जन्मदः ॥ कन्यादाता च वेदोक्ता नराणां पितरः
स्मृताः ॥ ४७ ॥ गुरुपत्नी गर्भधात्री स्तनदात्री पितुः स्वसा ॥ स्वसा मातुः सपत्नी च पुत्रभार्य्याऽन्नदायिका ॥ ४८ ॥ भृत्यः
शिष्यश्च पोष्यश्च वीर्य्यजः शरणागतः ॥ धर्मपुत्राश्च चत्वारो वीर्य्यजो धनभागिति ॥ ४९ ॥ क्षुत्तृड्भ्यां पीडितो मातर्वृद्धोऽहं
शरणागतः ॥ साम्प्रतं तव वन्ध्याया अनाथः पुत्र एव च ॥ ५० ॥ पिष्टकं परमान्नं च सुपक्वानि फलानि च ॥ नानाविधानि
पिष्टानि कालदेशोद्भवानि च ॥ ५१ ॥ पक्वान्नं स्वस्तिकं क्षीरमिक्षुमिक्षुविकारजम् ॥ घृतं दधि च शाल्यन्नं घृतपक्वं च व्यञ्जनम्
॥ ५२ ॥ लड्डुकानि तिलानां च मिष्टान्नैः सगुडानि च ॥ ममाज्ञातानि वस्तूनि सुधया तुल्यकानि च ॥ ५३ ॥ ताम्बूलं च वरं
रम्यं कर्पूरादिसुवासितम् ॥ चलं सुनिर्म्मलं स्वादु द्रव्याण्येतानि वासितम् ॥५४॥ द्रव्याणि यानि भुक्ता मे चारु लम्बोदरं भवेत् ॥
अनन्तरत्नोद्भवजे तानि मह्यं प्रदास्यसि ॥ ५५ ॥ स्वामी ते त्रिजगत्कर्त्ता प्रदाता सर्वसम्पदाम् ॥ महालक्ष्मी स्वरूपा त्वं सर्वै
श्वर्य्यप्रदायिनी ॥ ५६ ॥ रत्नसिंहासनं रम्यममूल्यं रत्नभूषणम् ॥ वह्निशुद्धांशुकं चारु प्रदास्यसि सुदुर्लभम् ॥ ५७ ॥ सुदुर्लभं

हरेर्मन्त्रं हरौ भक्तिं दृढां सति ॥ हरिप्रिया हरेः शक्तिस्त्वमेव सर्वदा स्थिता ॥ ५८ ॥ ज्ञानं मृत्युञ्जयं नाम दातृशक्तिं सुखप्रदाम् ॥
सर्वसिद्धिं च किं मातरदेयं स्वसुताय च ॥ ५९ ॥ मनः सुनिर्मलं कृत्वा धर्मे तपसि सन्ततम् ॥ श्रेष्ठे सर्वं करिष्यामि न कामे जन्म
हेतुके ॥ ६० ॥ स्वकामात्कुरुते कर्म कर्मणो भोग एव च ॥ भोगौ शुभाशुभौ ज्ञेयौ तौ हेतू सुखदुःखयोः ॥६१॥ दुःखं न कस्माद्भ
वति सुखं वा जगदम्बिके ॥ सर्वं स्वकर्मणो भोगस्तेन तद्विरतो बुधः ॥ ६२ ॥ कर्म निर्मूलयन्त्येव सन्तो हि सततं मुदा ॥ हरिभा
वनबुद्धया तत्तपसा भक्तसङ्गतः ॥ ६३ ॥ इन्द्रियद्रव्यसंयोगसुखं विध्वंसनावधि ॥ हरिसंलापरूपं च सुखं तत्सर्वकालिकम् ॥६४॥
हरिस्मरणशीलानां नायुर्याति सतां सती ॥ न तेषामीश्वरः कालो न च मृत्युञ्जयो ध्रुवम् ॥ ६५ ॥ चिरं जीवन्ति ते भक्ता भारते
चिरजीविनः ॥ सर्वसिद्धिं च विज्ञाय स्वच्छन्दं सर्वगामिनः ॥ ६६ ॥ जातिस्मरा हरेर्भक्ता जानते कोटिजन्मनः ॥ कथयन्ति कथां
जन्म लभन्ते स्वेच्छया मुदा ॥ ६७ ॥ परं पुनन्ति ते पूतास्तीर्थानि स्वीयलीलया ॥ पुण्यक्षेत्रेऽत्र सेवायै परार्थं च भ्रमन्ति ते
॥ ६८ ॥ वैष्णवानां पदस्पर्शात्सद्यः पूता वसुन्धरा ॥ कालं गोदोहमात्रं तु तीर्थं यत्र वसन्ति ते ॥ ६९ ॥ गुरोरास्याद्विष्णुमन्त्रः
श्रुतौ यस्य प्रविश्यति ॥ तं वैष्णवं तीर्थपूतं प्रवदन्ति पुराविदः ॥ ७० ॥ पुरुषाणां शतं पूर्वमुद्धरन्ति शतं परम् ॥ लीलया भारते
भक्त्या सोदरान्मातरं तथा ॥ ७१ ॥ मातामहानां पुरुषान्दश पूर्वान्दशापरान् ॥ मातुः प्रसूमुद्धरन्ति दारुणाद्यमताडनात् ॥
॥ ७२ ॥ भक्तदर्शनमाश्लेषं मानवाः प्राप्नुवन्ति ये ॥ ते याताः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षिताः ॥ ७३ ॥ न लिप्ताः पातकैर्भक्ताः
सन्ततं हरिमानसाः ॥ यथाऽग्नयः सर्वभक्ष्या यथा द्रव्येषु वायवः ॥७४॥ त्रिकोटिजन्मनामन्ते प्राप्नोति जन्म मानवम् ॥ प्राप्नोति
भक्तसंगं स मानुषे कोटिजन्मतः ॥ ७५ ॥ भक्तसङ्गाद्भवेद्भक्तेरङ्कुरो जीवितः सती ॥ अभक्तदर्शनादेव स च प्राप्नोति शुष्कताम् ॥
॥ ७६ ॥ पुनः प्रफुल्लतां याति वैष्णवालापमात्रतः ॥ अंकुरश्चाविनाशी च वर्द्धते प्रतिजन्मनि ॥ ७७ ॥ तत्तरोर्वर्द्धमानस्य हरि
दास्यं फलं सति ॥ परिणामे भक्तिपाके पार्षदश्च भवेद्धरेः ॥ ७८॥ महति प्रलये नाशो न भवेत्तस्य निश्चितम् ॥ सर्वसृष्टेश्च संहारे

ब्रह्मलोकस्य वेधसः ॥ ७९ ॥ तस्मान्नारायणे भक्तिं देहि मामम्बिके सदा ॥ न भवेद्विष्णुभक्तिश्च विष्णुमाये त्वया विना ॥८०॥
तद्भन्तं लोकशिक्षार्थं स्वतपस्तव पूजनम् ॥ सर्वेषां फलदात्री त्वं नित्यरूपा सनातनी ॥ ८१ ॥ गणेशरूपः श्रीकृष्णः कल्पे कल्पे
तवात्मजः ॥ त्वत्क्रोडमागतः क्षिप्रमित्युक्त्वाऽन्तरधीयत ॥ ८२ ॥ कृत्वाऽन्तर्धानमीशश्च बालरूपं विधाय सः ॥ जगाम पार्वती
तल्पं मन्दिराभ्यन्तरस्थितम् ॥ ८३ ॥ तल्पस्थे शिववीर्य्यें च मिश्रितः स बभूव ह ॥ ददर्श गेहशिखरं प्रसूते बालके यथा ॥८४॥
शुद्धचम्पकवर्णाभः कोटिचन्द्रसमप्रभः ॥ सुखदृश्यः सर्वजनैश्चक्षूरश्मिविवर्द्धकः ॥ ८५ ॥ अतीव सुन्दरतनुः कामदेवविमोहनः ॥
मुखं निरुपमं बिभ्रच्छारदेन्दुविनिन्दकम् ॥ ८६ ॥ सुन्दरे लोचने बिभ्रच्चारुपद्मविनिन्दके ॥ ओष्ठाधरपुटं बिभ्रत्पक्वबिम्बविनिन्दकम्
॥ ८७ ॥ कपालं च कपोलं च परमं सुमनोहरम् ॥ नासाग्रं रुचिरं बिभ्रद्वीन्द्रचञ्चुविनिन्दकम् ॥ ८८ ॥ त्रैलोक्ये वै निरुपमं
सर्वांगं बिभ्रदुत्तमम् ॥ शयानः शयने रम्ये प्रेरयन्हस्तपादकम् ॥ ८९ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणेशखण्डे
नारदनारायणसंवादे गणेशोत्पत्तिवर्णनं नामाष्टमोऽध्यायः ॥ ८ ॥ नारायण उवाच ॥ हरौ तिरोहिते शर्वाणी दुर्गा
शंकरस्तदा ॥ ब्राह्मणान्वेषणं कृत्वा बभ्राम परितो मुने ॥ १ ॥ पार्वत्युवाच ॥ अये विप्रेन्द्रातिवृद्ध क्व गतोऽसि
क्षुधाऽऽतुरः ॥ हे तात दर्शनं देहि प्राणान्वै रक्ष मे विभो ॥ २ ॥ शिव शीघ्रं समुत्तिष्ठ ब्राह्मणान्वेषणं कुरु ॥ क्षणमुन्मनसोरेष
गतः प्रत्यक्षमावयोः ॥ ३ ॥ अगृहीत्वा गृहात्पूजां गृहिणोऽतिथिरीश्वर ॥ यदि याति क्षुधाऽऽर्त्तश्च तस्य किं जीवनं वृथा
॥ ४ ॥ पितरस्तन्न गृह्णन्ति पिण्डदानं च तर्पणम् ॥ तस्याहुतिं न गृह्णाति वह्निः पुष्पं जलं सुराः ॥ ५ ॥ हव्यं पुष्पं जलं
द्रव्यमशुचेश्च सुरासमम् ॥ अमेध्यसदृशः पिण्डः स्पर्शनं पुण्यनाशनम् ॥ ६ ॥ एतस्मिन्नन्तरे तत्र वाग् बभूवाशरीरिणी ॥ कैवल्ययुक्ता
सा दुर्गा तां शुश्राव शुचाऽऽतुरा ॥ ७ ॥ शान्ता भव जगन्मातस्स्वसुतं पश्य मन्दिरे ॥ कृष्णं गोलोकनाथं तं परिपूर्णतमं
परम् ॥८॥ सुपुण्यकव्रततरोः फलरूपं सनातनम् ॥ यत्तेजो योगिनः शश्वद्ध्यायन्ति सन्ततं मुदा ॥ ९ ॥ ध्यायन्ति वैष्णवा देवा

ब्रह्मविष्णुशिवादयः ॥ यस्य पूज्यस्य सर्वाग्रे कल्पे कल्पे च पूजनम् ॥ १० ॥ यस्य स्मरणमात्रेण सर्वविघ्नो विनश्यति ॥ पुण्यरा
शिस्वरूपं च स्वसुतं पश्य मन्दिरे ॥ ११ ॥ कल्पे कल्पे ध्यायसि यं ज्योतीरूपं सनातनम् ॥ पश्य त्वं मुक्तिदं पुत्रं भक्तानुग्रहवि
ग्रहम् ॥१२॥ तव वाञ्छापूर्णबीजं तपःकल्पतरोः फलम् ॥ सुन्दरं स्वसुतं पश्य कोटिकन्दर्पनिन्दकम् ॥१३॥ नायं विप्रः क्षुधाऽऽर्त्तश्च
विप्ररूपी जनार्दनः ॥ किं वा विलापं कुरुषे क्व वा वृद्धः क्व चातिथिः ॥ सरस्वती त्वेवमुक्त्वा विरराम च नारद ॥ १४ ॥ त्रस्ता
श्रुत्वाऽऽकाशवाणीं जगाम स्वालयं सती ॥ ददर्श बालं पर्य्यङ्के शयानं सस्मितं मुदा॥१५॥पश्यन्तं गेहशिखरं शतचन्द्रसमप्रभम् ॥
स्वप्रभापटलेनैव द्योतयन्तं महीतलम् ॥ १६ ॥ कुर्वन्तं भ्रमणं तल्पे पश्यन्तं स्वेच्छया मुदा ॥ उमेति शब्दं कुर्वन्तं रुदन्तं तं स्तनार्थि
नम् ॥ १७ ॥ दृष्ट्वा तदद्भुतं रूपं त्रस्ता शंकरसन्निधिम् ॥ गत्वा सोवाच गिरिशं सर्वमङ्गलमङ्गला ॥ १८ ॥ पार्वत्युवाच ॥ गृहमा
गच्छ सर्वेश तपसां फलदायकम् ॥ कल्पे कल्पे ध्यायसि यं तं पश्यागत्य मन्दिरम् ॥ १९ ॥ शीघ्रं पुत्रमुखं पश्य पुण्यबीजं महोत्स
वम् ॥ पुन्नामनरकत्राणकारणं भवतारणम् ॥ २० ॥ स्नानं च सर्वतीर्थेषु सर्वयज्ञेषु दीक्षणम् ॥ पुत्रसंदर्शनस्यास्य कलां नार्हति
षोडशीम् ॥ २१ ॥ सर्वदानेन यत्पुण्यं क्ष्माप्रदक्षिणतश्च यत् ॥ पुत्रदर्शनपुण्यस्य कलां नार्हति षोडशीम् ॥ २२ ॥ सर्वैस्तपोभिर्य
त्पुण्यं यदेवानशनैर्व्रतैः ॥ सत्पुत्रोद्भवपुण्यस्य कलां नार्हति षोडशीम् ॥ २३ ॥ यद्विप्रभोजनैः पुण्यं यदेव सुरसेवनैः ॥ सत्पुत्रप्राप्तिपु
ण्यस्य कलां नार्हति षोडशीम् ॥ २४ ॥ पार्वत्या वचनं श्रुत्वा शिवः संहृष्टमानसः ॥ आजगाम स्वभवनं क्षिप्रं वै कान्तया सह ॥
ददर्श तल्पे स्वसुतं तप्तकाञ्चनसन्निभम् ॥ २५ ॥ हृदयस्थं च यद्रूपं तदेवातिमनोहरम् ॥ दुर्गा तल्पात्समादाय कृत्वा वक्षसि तं सुतम्॥
चुचुम्बानन्दजलधौ निमग्ना सेत्युवाच तम् ॥ २६ ॥ संप्राप्यामूल्यरत्नं त्वां पूर्णमेव सनातनम् ॥ यथा मनो दरिद्रस्य सहसा प्राप्य
सद्धनम् ॥ २७ ॥ कान्ते सुचिरमायाते प्रोषिते योषितो यथा ॥ मानसं परिपूर्णं च बभूव च तथा मम ॥ २८ ॥ सुचिरं गतमाया
तमेकपुत्रा कथा सुतम् ॥ दृष्ट्वा तुष्टा यथा वत्स तथाऽहमपि साम्प्रतम् ॥ २९ ॥ सद्रत्नं सुचिरं भ्रष्टं प्राप्य हृष्टो यथा जनः ॥

अनावृष्टौ सुवृष्टिं च संप्राप्याहं तथा सुतम् ॥ ३० ॥ यथा सुचिरमन्धानां स्थितानां च निराश्रये ॥ चक्षुस्सुनिर्म्मलं प्राप्य मनः पूर्णं तथैव मे ॥ ३१ ॥ दुस्तरे सागरे घोरे पतितस्य च संकटे ॥ अनौकस्य प्राप्य नौकां मनः पूर्णं तथा मम ॥ ३२ ॥ तृष्णया शुष्ककण्ठानां सुचिराच्च सुशीतलम्॥सुवासितं जलं प्राप्य मनः पूर्णं तथा मम॥३३॥दावाग्निपतितानां च स्थितानां च निराश्रये ॥ निरग्निमाश्रयं प्राप्य मनः पूर्णं तथा मम ॥ ३४ ॥ चिरं बुभुक्षितानां च व्रतोपोषणकारिणाम् ॥३५॥ सदन्नं पुरतो दृष्ट्वा मनः पूर्णं तथा मम ॥ इत्युक्त्वा पार्वती तत्र क्रोडे कृत्वा स्वबालकम् ॥३६॥ प्रीत्या स्तनं ददौ तस्मै परमानन्दमानसा ॥ क्रोडे चकार भगवान्बालकं हृष्टमानसः ॥ ३७ ॥ चुचुम्ब गण्डे वेदोक्तं युयुजे चाशिषं मुदा ॥ ३८ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे बालगणेशदर्शनं नाम नवमोऽध्यायः ॥ ९ ॥

नारायण उवाच ॥ तौ दम्पती बहिर्गत्वा पुत्रमङ्गलहेतवे॥ विविधानि च रत्नानि द्विजेभ्यो ददतुर्मुदा ॥ १ ॥ बन्दिभ्यो भिक्षुकेभ्यश्च दानानि विविधानि च ॥ नानाविधानि वाद्यानि वादयामास शङ्करः ॥ २ ॥ हिमालयश्च रत्नानां ददौ लक्षं द्विजातये ॥ सहस्रं च गजेन्द्राणामश्वानां च त्रिलक्षकम् ॥ ३ ॥ दशलक्षं गवां चैव पञ्चलक्षं सुवर्णकम् ॥ मुक्तामाणिक्यरत्नानि मणिश्रेष्ठानि यानि च ॥ ४ ॥ अन्यान्यपि च दानानि वस्त्राण्याभरणानि च ॥ सर्वाण्यमूल्यरत्नानि क्षीरोदोत्पत्तिकानि च ॥ ५ ॥ ब्राह्मणेभ्यो ददौ विष्णुः कौस्तुभं कौतुकान्वितः ॥ ब्रह्मा विशिष्टदानानि विप्राणां वाञ्छितानि च ॥ सुदुर्लभानि सृष्टौ च ब्राह्मणेभ्यो ददौ मुदा ॥ ६ ॥ धर्मः सूर्य्यश्च शक्रश्च देवाश्च मुनयस्तथा ॥ गन्धर्वाः पर्वता देव्यो ददुर्दानं क्रमेण च ॥ ७ ॥ माणिक्यानां सहस्राणि रत्नानां च शतानि च ॥ शतानि कौस्तुभानां च हीरकाणां शतानि च ॥ ८ ॥ हरिद्वर्णमणीन्द्राणां सहस्राणि मुदाऽन्विताः ॥ ॥ ९ ॥ गवां रत्नानि लक्षाणि गजरत्नसहस्रकम् ॥ अमूल्यान्यन्यैरत्नानि श्वेतवर्णानि कौतुकात् ॥ १० ॥ शतलक्षं सुवर्णानां वह्नि

---

१ अश्वरत्नानीति पाठः ।

शुद्धांशुकानि च ॥ ब्राह्मणेभ्यो ददौ ब्रह्मा तत्र क्षीरोदधिर्मुदा ॥ ११ ॥ हारं चामूल्यरत्नानां त्रिषु लोकेषु दुर्लभम् ॥ अतीव
निर्मलं सारं सूर्य्यभानुविनिन्दकम् ॥१२॥ परिष्कृतं च माणिक्यैर्हीरकैश्च विराजितम् ॥ रम्यं कौस्तुभमध्यस्थं ददौ देवी सरस्वती॥
॥ १३ ॥ त्रैलोक्यसारं हारं च सद्रत्नगणनिर्मितम् ॥ भूषणानि च सर्व्वाणि सा सावित्री ददौ मुदा ॥ १४ ॥ लक्षं सुवर्णलोष्ठानां
धनानि विविधानि च ॥ शतान्यमूल्यरत्नानां कुबेरश्च ददौ मुदा ॥ १५ ॥ दानानि दत्त्वा विप्रेभ्यस्ते सर्वे ददृशुः शिशुम् ॥ पर
मानन्दसंयुक्ताः शिवपुत्रोत्सवे मुने ॥ १६ ॥ भारं वोढुमशक्ताश्च ब्राह्मणा बन्दिनस्तथा ॥ स्थायंस्थायं च गच्छन्तो धनानि पथि
कातराः ॥ १७ ॥ कथयन्ति कथाः सर्वे विश्रान्ताः पूर्वदायिनाम् ॥ वृद्धाः शृण्वन्ति मुदिता युवानो भिक्षुका मुने ॥ १८ ॥ विष्णुः
प्रमुदितस्तत्र वादयामास दुन्दुभिम् ॥ संगीतं पाययामास कारयामास नर्तनम् ॥ वेदांश्च पाठयामास पुराणानि च नारद ॥ १९ ॥
मुनीन्द्रानानयामास पूजयामास तान्मुदा ॥ आशिषं दापयामास कारयामास मङ्गलम्॥ सार्द्धं देवैश्च देवीभिर्ददौ तस्मै शुभाशिषः ॥
॥ २० ॥ विष्णुरुवाच ॥ शिवेन तुल्यं ज्ञानं ते परमायुश्च बालक ॥ पराक्रमे मया तुल्यः सर्वसिद्धीश्वरो भव ॥ २१ ॥ ब्रह्मोवाच ॥
यशसा ते जगत्पूर्णं सर्वपूज्यो भवाचिरम् ॥ सर्वेषां पुरतः पूजा भवत्वतिसुदुर्लभा ॥ २२ ॥ धर्म्म उवाच ॥ मया तुल्यः सुधार्मिष्ठो
भवान्भवतु दुर्लभः ॥ सर्वज्ञश्च दयायुक्तो हरिभक्तो हरेः समः॥२३॥ महादेव उवाच ॥ दाता भव मया तुल्यो हरिभक्तश्च बुद्धिमान्॥
विद्यावान्पुण्यवाञ्छान्तो दान्तश्च प्राणवल्लभ ॥ २४ ॥ लक्ष्मीरुवाच ॥ मम स्थितिश्च गेहे ते देहे भवतु शाश्वती ॥ पतिव्रता
मया तुल्या शान्ता कान्ता मनोहरा ॥ २५ ॥ सरस्वत्युवाच ॥ मया तुल्या सुकविता धारणाशक्तिरेव च ॥ स्मृतिर्विवेचनाशक्तिर्भ
वत्वतितरां सुत ॥ २६ ॥ सावित्र्युवाच ॥ वत्साहं वेदजननी वेदज्ञानी भवाचिरम् ॥ मन्मन्त्रजपशीलश्च प्रवरो वेदवादिनाम् ॥
॥ २७ ॥ हिमालय उवाच ॥ श्रीकृष्णेऽतिमतिः शश्वद्भक्तिर्भवतु शाश्वती ॥ श्रीकृष्णतुल्यो गुणवान्भव कृष्णपरायणः ॥ २८ ॥
मेनकोवाच ॥ समुद्रतुल्यो गाम्भीर्य्ये कामतुल्यश्च रूपवान् ॥ श्रीयुक्तः श्रीपतिसमो धर्म्मे धर्मसमो भव ॥ २९ ॥ वसुन्धरोवाच ॥

क्षमाशीलो मया तुल्यः शरण्यः सर्वरत्नवान् ॥ निर्विघ्नो विघ्ननिघ्नश्च भव वत्स शुभाश्रयः ॥ ३० ॥ पार्वत्युवाच ॥ तातुल्यम
हायोगी सिद्धः सिद्धिप्रदः शुभः ॥ मृत्युञ्जयश्च भगवान्भवत्वतिविशारदः॥३१॥ऋषयो मुनयः सिद्धाः सर्वे युयुजुराशिषः॥ ब्राह्मणा
बन्दिनश्चैव युयुजुः सर्वमङ्गलम् ॥३२॥ सर्वं ते कथितं वत्स सर्वमङ्गलमङ्गलम् ॥ गणेशजन्मकथनं सर्वविघ्नविनाशनम् ॥३३॥ इमं
सुमंगलाध्यक्षं यः शृणोति सुखं यतः ॥ सर्वमंगलसंयुक्तः स भवेन्मंगलालयः ॥ ३४ ॥ अपुत्रो लभते पुत्रमधनो लभते धनम्॥
कृपणो लभते सत्त्वं शश्वत्सम्पत्प्रदायि च ॥ ३५ ॥ भार्य्यार्थी लभते भार्य्यां प्रजार्थी लभते प्रजाम् ॥ आरोग्यं लभते रोगी
सौभाग्ये दुर्भगा लभेत् ॥ ३६ ॥ भ्रष्टपुत्रं नष्टधनं प्रोषितं च प्रियं लभेत् ॥ शोकाविष्टः सदाऽऽनन्दं लभते नात्र संशयः ॥ ३७ ॥
यत्पुण्यं लभते मर्त्यो गणेशाख्यानकश्रुतौ ॥ तत्फलं लभते नूनमध्यायश्रवणान्मुने ॥ ३८ ॥ अयं च मङ्गलाध्यायो यस्य गेहे
च तिष्ठति ॥ सदा मङ्गलसंयुक्तः स भवेन्नात्र संशयः ॥ ३९ ॥ यात्राकाले च पुण्याहे यः शृणोति समाहितः ॥ सर्वाभीष्टं स
लभते श्रीगणेशप्रसादतः ॥४० ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणेशखण्डे नारदनारायणसंवादे गणेशोद्भवमंगलं नाम
दशमोऽध्यायः ॥ १० ॥ नारायण उवाच ॥ हरिस्तमाशिषं कृत्वा रत्नसिंहासने वरे ॥ देवैश्च मुनिभिः सार्द्धमवसत्तत्र
संसदि ॥ १ ॥ दक्षिणे शंकरस्तस्य वामे ब्रह्मा प्रजापतिः ॥ पुरतो जगतां साक्षी धर्मो धर्मवतां वरः ॥ २ ॥ तथा धर्मसमीपे च
सूर्य्यः शक्रः कलानिधिः ॥ देवाश्च मुनयो ब्रह्मन्नूषुः शैलाः सुखासने ॥ ३ ॥ ननर्त्त नर्त्तकश्रेणी जगुर्गन्धर्व किन्नराः ॥ श्रुति
सारं श्रुतिसुखं तुष्टुवुः श्रुतयो हरिम् ॥ ४ ॥ एतस्मिन्नन्तरे तत्र द्रष्टुं शङ्करनन्दनम् ॥ आजगाम महायोगी सूर्य्यपुत्रः
शनैश्चरः ॥ ५ ॥ अत्यन्तनम्रवदन ईषन्मुद्रितलोचनः ॥ अन्तर्बहिः स्मरन्कृष्णं कृष्णैकगतमानसः ॥ ६ ॥ तपःफलाशी तेजस्वी
ज्वलदग्निशिखोपमः ॥ अतीव सुन्दरः श्यामः पीताम्बरधरो वरः ॥ ७ ॥ प्रणम्य विष्णुं ब्रह्माणं शिवं धर्मं रविं सुरान् ॥ मुनीन्द्रा
न्बालकं द्रष्टुं जगाम तदनुज्ञया ॥८॥ प्रधानद्वारमासाद्य शिवतुल्यपराक्रमम् ॥ द्वाःस्थं वै शूलहस्तं च विशालाक्षमुवाच ह ॥ ९ ॥

शनैश्वर उवाच ॥ शिवाज्ञया शिशुं द्रष्टुं यामि शंकरकिंकर ॥ विष्णुप्रमुखदेवानां मुनीनामनुरोधतः ॥ १० ॥ आज्ञां देहि च मां गन्तुं पार्वतीसन्निधिं बुध ॥ पुनर्यामि शिशुं दृष्ट्वा विषयासक्तमानसः ॥ ११ ॥ विशालाक्ष उवाच ॥ आज्ञावहो न देवानां नाहं शंकरकिंकरः ॥ मार्गं दातुं न शक्तोऽहं विना मन्मातुराज्ञया ॥ १२ ॥ इत्युक्त्वाऽभ्यन्तरभ्येत्य प्रेरितः स शिवाज्ञया ॥ ददौ मार्गं ग्रहेशाय विशालाक्षो मुदा ततः ॥ १३ ॥ शनिरभ्यन्तरं गत्वा चानमन्नम्रकन्धरः ॥ रत्नसिंहासनस्थां च पार्वतीं सस्मितां मुदा ॥ १४ ॥ सखीभिः पञ्चभिः शश्वत्सेवितां श्वेतचामरैः ॥ सखीदत्तं च ताम्बूलमुपभुज्य सुवासितम् ॥१५॥ वह्निशुद्धांशुकाधानां रत्नभूषणभूषिताम् ॥ पश्यन्तीं नर्त्तकीनृत्यं पुत्रं धृत्वा च वक्षसि ॥ १६ ॥ नतं सूर्य्यसुतं दृष्ट्वा दुर्गा संभाष्य सत्वरम् ॥ शुभाशिषं ददौ तस्मै पृष्ट्वा तन्मंगलं शुभम् ॥ १७ ॥ पार्वत्युवाच ॥ कथमानम्रवक्त्रस्त्वं श्रोतुमिच्छामि साम्प्रतम् ॥ किं न पश्यसि मां साधो बालकं वा ग्रहेश्वर ॥ १८ ॥ शनिरुवाच ॥ सर्वे स्वकर्मणा साध्वि भुञ्जते तपसः फलम् ॥ शुभाशुभं च यत्कर्म कोटिकल्पैर्न लुप्यते ॥ १९ ॥ कर्मणा जायते जन्तुर्ब्रह्मेन्द्रार्य्यममन्दिरे ॥ कर्मणा नरगेहेषु पश्वादिषु च कर्मणा ॥ २० ॥ कर्मणा नरकं याति वैकुण्ठं याति कर्मणा ॥ स्वकर्मणा च राजेन्द्रो भृत्यश्चापि स्वकर्मणा ॥ २१ ॥ कर्मणा सुन्दरः शश्वद्व्याधियुक्तः स्वकर्मणा ॥ कर्मणा विषयी मातर्निर्लिप्तश्च स्वकर्मणा ॥ २२ ॥ कर्मणा धनवाँल्लोको दैन्ययुक्तः स्वकर्मणा ॥ कर्मणा सत्कुटुम्बी च कर्मणा बन्धुकण्टकः ॥ २३ ॥ सुभार्यश्च सुपुत्रश्च सुखी शश्वत्स्वकर्मणा ॥ अपुत्रकश्च कुस्त्रीको निस्त्रीकश्च स्वकर्मणा ॥ २४ ॥ इतिहासं चातिगोप्यं शृणु शङ्करवल्लभे ॥ अकथ्यं जननीपार्श्वे लज्जाजनककारणम् ॥ २५ ॥ आबाल्यात्कृष्णभक्तोऽहं कृष्णध्यानैकमानसः ॥ तपस्यासु रतश्शश्वद्विषयेऽपि रतः सदा ॥ २६ ॥ पिता ददौ विवाहे तु कन्यां चित्ररथस्य च ॥ अतितेजस्विनी शश्वत्तपस्यासु रता सती ॥ २७ ॥ एकदा सा त्वृतुस्नाता सुवेषं स्वं विधाय च ॥ रत्नालङ्कारसंयुक्ता मुनिमानसमोहिनी ॥ २८ ॥ हरेः पादं ध्यायमानं पश्यन्ती मदमोहिता ॥ मत्समीपं समागत्य सस्मिता लोललोचना ॥२९॥ शशाप

मामपश्यन्तमृतुनाशाच्च कोपतः ॥ बाह्यज्ञानविहीनं च ध्यानसंलग्नमानसम् ॥ ३० ॥ न दृष्टाऽहं त्वया येन न कृतं ह्यृतुरक्षणम् त्वया दृष्टं च यद्वस्तु मूढ सर्वं विनश्यति ॥ ३१ ॥ अहं च विरतो ध्यानात्तोषयंस्तां तदा सतीम् ॥ शापं मोक्तुं न शक्ता सा पश्चात्तापमवाप ह ॥ ३२ ॥ तेन मातर्न पश्यामि किञ्चिद्वस्तु स्वचक्षुषा ॥ ततः प्रकृतिनम्रास्यः प्राणिहिंसाभयादहम् ॥ ३३ ॥ शनैश्चरवचः श्रुत्वा चाहस[1]पार्वती मुने ॥ उच्चैः प्रजहसुः सर्वा नर्त्तकीकिन्नरीगणाः ॥ ३४ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे शनिपार्वतीसंवादे श रधोदृष्टौ कारणकथनं नामैकादशोऽध्यायः ॥ ११ ॥ नारायण उवाच ॥ दुर्गा तद्वचनं श्रुत्वा सस्मार हरिमीश्वरम् ॥ ईश्वरेच्छावशीभूतं जगदेवेत्युवाच ह॥१॥सा च देवी दैववशा शनिं प्रोवाच कौतुकात्॥ पश्य मां मच्छिशुमिति निषेकः केन वार्य्यते॥२॥ पार्वत्या वचनं श्रुत्वा शनिर्मेने हृदा स्वयम् ॥ पश्यामि किं न पश्यामि पार्वती सुतमित्यहो ॥ यदि बालो मया दृष्टस्तस्य विघ्नो भवेद्ध्रुवम्॥३॥अन्यथा सुप्रशस्तं च पुरतः स्वात्मरक्षणम् ॥ इत्येवमुक्त्वा धर्मिष्ठो धर्मं कृत्वा तु साक्षिणम्॥बालं द्रष्टुं मनश्चक्रे न तु तन्मातरं शनिः॥४॥विषण्णमानसः पूर्वं शुष्ककण्ठौष्ठतालुकः॥सव्यलोचनकोणेन ददर्श च शिशोर्मुखम् ॥५॥ शनेश्च दृष्टिमात्रेण चिच्छिदे मस्तकं मुने ॥ चक्षुर्निमीलयामास तस्थौ नम्राननः शनिः॥६॥तस्थौ च पार्वतीक्रोडे तत्सर्वाङ्गं सलोहितम्॥विवेश मस्तकं कृष्णे गत्वा गोलोकमीप्सितम्॥७॥मूच्छा संप्राप सा देवी विलप्य च भृशं मुहुः॥ मत्तेवं च पृथिव्यां तु कृत्वा वक्षसि बालकम् ॥ ८ ॥ विस्मितास्ते सुराः सर्वे चित्रपुत्तलिका यथा ॥ देव्यश्च शैलागन्धर्वाः सर्वे कैलासवासिनः ॥ ९ ॥ तान्सर्वान्मूर्च्छितान्दृष्ट्वैवारुह्य गरुडं हरिः ॥ जगाम पुष्पभद्रां स चोत्तरस्यां दिशि स्थिताम् ॥ १० ॥ पुष्पभद्रानदीतीरे ह्यपश्यत्कानने स्थितम् ॥ गजेन्द्रं निद्रितं तत्र शयानं हस्तिनीयुतम् ॥ ११ ॥ तथोदक्छिरसं रम्यं मूर्च्छितं सुरतश्रमात् ॥ परितः शावकान्कृत्वा परमानन्दमानसम् ॥ १२ ॥ शीघ्रं सुदर्शनेनैव चिच्छिदे तच्छिरो मुदा ॥ स्थापयामास गरुडे

---

[1] मृतेवेति पाठः ।

रुधिराक्तं मनोहरम् ॥ १३ ॥ गजच्छिन्नाङ्गविक्षेपात्प्रबोधं प्राप्य हस्तिनी ॥ शावकान्बोधयामास चाशुभं वदती तदा ॥ रुरोद
शावकैः सार्द्धं सा विलप्य शुचातुरा ॥ १४ ॥ तुष्टाव कमलाकान्तं शान्तं सस्मितमीश्वरम् ॥ शंखचक्रगदापद्मधरं पीताम्बरं परम् ॥
गरुडस्थं जगत्कान्तं भ्रामयन्तं सुदर्शनम् ॥ १५ ॥ निषेकं खण्डितुं शक्तं निषेकजनकं विभुम् ॥ निषेकभोगदातारं भोगनिस्तारकारणम्
॥ १६ ॥ प्रभुस्तत्स्तवनात्तुष्टस्तस्यै विप्र वरं ददौ ॥ मुण्डात्तुण्डं पृथक्कृत्य युयुजेऽन्यगजस्य च ॥ १७ ॥ जीवयामास तं तत्र
ब्रह्मज्ञानेन सर्ववित् ॥ सर्वांगे योजयामास गजस्य चरणाम्बुजम् ॥ १८ ॥ त्वं जीवाकल्पपर्य्यन्तं परिवारैः समं गज ॥ इत्युक्त्वा च
मनोयायी कैलासं ह्याजगाम सः ॥ १९ ॥ आहृत्य पार्वतीहस्ताद्बालं कृत्वा स्ववक्षसि ॥ रुचिरं तच्छिरस्सम्यग्योजयामास बालके
॥ २० ॥ ब्रह्मस्वरूपो भगवान्ब्रह्मज्ञानेन लीलया ॥ जीवयामास तं शीघ्रं हुंकारोच्चारणेन च ॥ २१ ॥ पार्वतीं बोधयित्वा तु कृत्वा
क्रोडे च तं शिशुम् ॥ बोधयामास तां कृष्ण आध्यात्मिकविबोधनैः ॥ २२ ॥ विष्णुरुवाच ॥ ब्रह्मादिकीटपर्य्यन्तं फलं भुङ्क्ते
स्वकर्मणः ॥ जगद्बुद्धिस्वरूपाऽसि त्वं न जानासि किं शिव ॥ २३ ॥ कल्पकोटिशतं भोगी जीविनां तत्स्वकर्मणा ॥ उपस्थितो भवेन्नित्यं
प्रतियोनौ शुभाशुभैः ॥ २४ ॥ इन्द्रः स्वकर्मणा कीटयोनौ जन्म लभेत्सति ॥ कीटश्चापि भवेदिन्द्रः पूर्वकर्मफलेन वै॥२५॥
सिंहोऽपि मक्षिकां हन्तुमक्षमः प्राक्तनं विना ॥ मशको हस्तिनं हन्तुं क्षमः स्वप्राक्तनेन च ॥२६॥ सुखं दुःखं भयं शोकमानन्दं कर्मणः
फलम् ॥ सुकर्मणः सुखं हर्षमितरे पापकर्मणः ॥ २७ ॥ इहैव कर्मणो भोगः परत्र च शुभाशुभैः ॥ कर्मोपार्जनयोग्यं च पुण्यक्षेत्रं च
भारतम् ॥ २८ ॥ कर्मणः फलदाता च विधाता च विधेरपि ॥ मृत्योर्मृत्युः कालकालो निषेकस्य निषेककृत् ॥ २९ ॥ संहर्तुरपि
संहर्त्ता पातुः पाता परात्परः ॥ गोलोकनाथः श्रीकृष्णः परिपूर्णतमः स्वयम् ॥३०॥ वयं यस्य कलाः पुंसो ब्रह्मविष्णुमहेश्वराः ॥
महाविराड्यदंशश्च यल्लोमविवरे जगत् ॥ ३१ ॥ कलांशाः केऽपि तद्धर्मे कलांशांशाश्च केचन ॥ चराचरं जगत्सर्वं तत्र तस्थौ
विनायकः ॥ ३२ ॥ श्रीविष्णोर्वचनं श्रुत्वा परितुष्टा च पार्वती ॥ स्तनं ददौ च शिशवे तं प्रणम्य गदाधरम् ॥ ३३ ॥ तुष्टाव

पार्वती तुष्टा प्रेरिता शंकरेण च ॥ कृताञ्जलिपुटा भक्त्या विष्णुं तं कमलापतिम् ॥३४॥ आशिषं युयुजे विष्णुः शिशुं च शिशुमातरम् ॥ ददौ गले बालकस्य कौस्तुभं च स्वभूषणम् ॥३५॥ ब्रह्मा ददौ स्वमुकुटं धर्मो वै रत्नभूषणम्॥क्रमेण देव्यो रत्नानि ददुः सर्वे यथोचितम्॥३६॥तुष्टाव तं महादेवश्चात्यन्तं हृष्टमानसः॥ देवाश्च मुनयः शैला गन्धर्वाः सर्वयोषितः॥३७॥दृष्ट्वा शिवाः शिवा चैव बालकं मृतजीवितम् ॥ ब्राह्मणेभ्यो ददौ तत्र कोटिरत्नानि नारद ॥३८॥ अश्वानां च गजानां च सहस्राणि शतानि च ॥ बन्दिभ्यः प्रददौ तत्र बालके मृतजीविते ॥३९॥ हिमालयश्च संतुष्टो हृष्टा देवाश्च तत्र वै ॥ ददुर्दानानि विप्रेभ्यो बन्दिभ्यः सर्वयोषितः॥४०॥ ब्राह्मणान्भोजयामास कारयामास मङ्गलम् ॥ वेदांश्च पाठयामास पुराणानि रमापतिः ॥ ४१ ॥ शनिं संलज्जितं दृष्ट्वा पार्वती कोपशालिनी ॥ शशाप च सभामध्येऽप्यङ्गहीनो भवेति च ॥ ४२ ॥ दृष्ट्वा शप्तं शनिं सूर्य्यः कश्यपश्च यमस्तथा ॥ तेऽतिरुष्टाः समुत्तस्थुर्गामुकाः शङ्करालयात् ॥ ४३ ॥ रक्ताक्षास्ते रक्तमुखाः कोपप्रस्फुरिताधराः ॥ तां धर्म साक्षिणं कृत्वा विष्णुं संशप्तुमुद्यताः ॥ ४४ ॥ ब्रह्मा तान्बोधयामास विष्णुना प्रेरितः सुरैः ॥ रक्तास्यां पार्वतीं चैव कोपप्रस्फुरिताधराम् ॥ ४५ ॥ ब्रह्माणमूचुस्ते तत्र क्रमेण समयोचितम् ॥ भीरवो देवताः सर्वे मुनयः पर्वतास्तथा ॥ कश्यप उवाच ॥ दुर्दृष्टोऽयं प्राक्तनेन पत्नीशापेन सर्वदा ॥ बालं ददर्श यत्नेन तस्य वै मातुराज्ञया ॥ ४७ ॥ श्रीसूर्य्य उवाच ॥ तं धर्मं साक्षिणं कृत्वा सूनोर्वै मातुराज्ञया ॥ यत्पुत्रोऽतिप्रयत्नेन ह्यपश्यत्पार्वतीसुतम् ॥ ४८ ॥ यथा निरपराधेन मत्पुत्रं सा शशाप ह ॥ तत्पुत्रस्यांगभंगश्च भविष्यति न संशयः ॥ ४९ ॥ यम उवाच ॥ प्रदाय स्वयमाज्ञां च शशापेयं स्वयं कथम् ॥ वयं शपामः कोऽधर्मो जिघांसोश्च विहिंसने ॥ ५० ॥ ब्रह्मोवाच ॥ शशाप पार्वती रुष्टा स्त्रीस्वभावाच्च चापलात् ॥ सर्वेषां वचनेनैव क्षन्तुमर्हन्तु साधवः ॥ ५१ ॥ दुर्गे दत्त्वा त्वमाज्ञां च पुत्रदर्शनहेतवे ॥ कथं शपसि निर्दोषमतिथिं त्वद्गृहागतम् ॥ ५२ ॥ इत्युक्त्वा शनिमादाय बोधयित्वा च पार्वतीम् ॥ तां तं समर्पणं चक्रे शापमोचनहेतवे ॥ ५३ ॥ बभूव पार्वती तुष्टा ब्रह्मणो वचनान्मुने॥शान्ता बभूवुस्ते तत्र दिनेशयमकश्यपाः॥५४॥उवाच पार्वती तत्र सन्तु

ष्टा तं शनैश्चरम् ॥ प्रसादिता शिवेनैव ब्रह्मणा परिसेविता ॥ ९५ ॥ पार्वत्युवाच ॥ ग्रहराजो भव शने मद्वरेण हरिप्रियः ॥ चिरजीवी च योगीन्द्रो हरिभक्तस्य का विपत् ॥ ९६ ॥ अद्यप्रभृति निर्विघ्ना हरौ भक्तिर्दृढाऽस्तु ते ॥ शापोऽमोघस्ततो मेऽद्य किञ्चित्खञ्जो भविष्यसि ॥ ९७ ॥ इत्युक्त्वा पार्वती तुष्टा बालं धृत्वा च वक्षसि ॥ उवास योषितां मध्ये तस्मै दत्त्वा शुभाशिषः ॥ ९८ ॥ शनिर्जगाम देवानां समीपं हृष्टमानसः ॥ प्रणम्य भक्त्या तां ब्रह्मन्नम्बिकां जगदम्बिकाम् ॥ ९९ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे शनिकृतगणेशदर्शनतज्जातगणेशशिरःपतनविष्णुकृतगणेशशिरोयोजनशनिशापादिकथनं नाम द्वादशोऽध्यायः ॥ १२ ॥ नारायण उवाच ॥ अथ विष्णुः शुभे काले देवैश्च मुनिभिः सह ॥ पूजयामास तं बालमुपहारैरनुत्तमैः ॥ १ ॥ सर्वाग्रे तव पूजा च मया दत्ता सुरोत्तम ॥ सर्वपूज्यश्च योगीन्द्रो भव वत्सेत्युवाच तम् ॥ २ ॥ वनमालां ददौ तस्मै ब्रह्मज्ञानं च मुक्तिदम् ॥ सर्वसिद्धिं प्रदायैव चकारात्मसमं हरिः ॥ ३ ॥ ददौ द्रव्याणि चारूणि चोपचारांश्च षोडश ॥ नामभिः स्तवनं चक्रे मुनिभिश्च समं सुरैः ॥ ४ ॥ विघ्नेशश्च गणेशश्च हेरम्बश्च गजाननः ॥ लम्बोदरश्चैकदन्तः शूर्पकर्णो विनायकः ॥ ५ ॥ एतान्यष्टौ च नामानि सर्वसिद्धिप्रदानि च ॥ आशिषं दापयामास चानयामास तान्मुनीन् ॥ ६ ॥ सिद्धासनं ददौ धर्मस्तस्मै ब्रह्माकमण्डलुम् ॥ शङ्करो योगपट्टं च तत्त्वज्ञानं सुदुर्लभम् ॥ ७ ॥ रत्नसिंहासनं शक्रः सूर्य्यश्च मणिकुण्डले ॥ माणिक्यमालां चन्द्रश्च कुबेरश्च किरीटकम् ॥ ८ ॥ वह्निशुद्धं च वसनं ददौ तस्मै हुताशनः ॥ रत्नच्छत्रं च वरुणो वायू रत्नाङ्गुलीयकम् ॥ ९ ॥ क्षीरोदोद्भवसद्रत्नरचितं वलयं वरम् ॥ मञ्जीरं चापि केयूरं ददौ पद्मालया मुने ॥ १० ॥ कण्ठभूषां च सावित्री भारती हारमुज्ज्वलम् ॥ क्रमेण सर्वदेवाश्च देव्यश्च[१] यौतकं ददुः ॥ ११ ॥ मुनयः पर्वताश्चैव रत्नानि विविधानि च ॥ वसुन्धरा ददौ तस्मै वाहनाय च मूषकम् ॥ १२ ॥ क्रमेण देवा देव्यश्च मुनयः पर्वतादयः ॥ गन्धर्वाः किन्नरा यक्षा मनवो मानवास्तथा ॥ १३ ॥

---

[१] भूषणं ददुः इति पाठः ।

नानाविधानि द्रव्याणि स्वादूनि मधुराणि च ॥ पूजां चक्रुश्च ते सर्वे क्रमाद्वै भक्तिपूर्वकम् ॥ १४ ॥ पार्वती जगतां माता
स्मेराननसरोरुहा ॥ रत्नसिंहासने पुत्रं वासयामास नारद ॥ १५ ॥ सर्वतीर्थोदकै रत्नकलशावर्जितैः स्तुतैः ॥ स्नापयामास वेदोक्त
मन्त्रेण मुनिभिस्तदा ॥ अग्निशुद्धे च वसने ददौ तस्मै सती मुदा ॥ १६ ॥ गोदावर्युदकैः पाद्यमर्घ्यं गंगोदकेन च ॥ दूर्वाभिरक्ष
तापुष्पैश्चन्दनेन समन्वितम् ॥ १७ ॥ पुष्करोदकमानीय पुनराचमनीयकम् ॥ मधुपर्कं रत्नपात्रैरासवं शर्करान्वितम् ॥ १८ ॥
स्नानीयं विष्णुतैलं च स्ववैद्याभ्यां विनिर्मितम् ॥ अमूल्यरत्नरचितं चारु भूषाकदम्बकम् ॥ १९ ॥ पारिजातप्रसूनानामन्येषां शत
कानि च ॥ मालतीचम्पकादीनां पुष्पाणि विविधानि च ॥ पूजार्हाणि च पत्राणि तुलसीसहितानि च ॥ २० ॥ चन्दनागुरुकस्तूरी
कुंकुमानि च सादरम् ॥ रत्नप्रदीपनिकरं धूपं च परितो ददौ ॥ २१ ॥ नैवेद्यं तत्प्रियं चैव तिललड्डुकपर्वतान् ॥ यवगोधूमचूर्णानां
लड्डुकानां च पर्वतान् ॥ २२ ॥ पक्वान्नानां पर्वताश्च सुस्वादुसुमनोहरान् ॥ पर्वतान्स्वस्तिकानां च सुस्वादुशर्करान्वितान् ॥ २३ ॥
गुडाक्तानां च लाजानां पृथुकानां च पर्वतान् ॥ शाल्यन्नानां पिष्टकानां पर्वतान्व्यञ्जनैः सह ॥ पयोभृत्कलशानां च लक्षाणि प्रददौ
मुदा ॥ २४ ॥ लक्षाणि दधिपूर्णानां कलशानां च पूजने ॥ मधुभृत्कलशानां च त्रिलक्षाणि च सुन्दरी ॥ २५ ॥ सर्पिस्सुवर्णकुम्भानां
पंचलक्षाणि सादरम् ॥ दाडिमानां श्रीफलानामसंख्यानि फलानि च ॥ २६ ॥ खर्जूराणां कपित्थानां जम्बूनां विविधानि च ॥
आम्राणां पनसानां च कदलीनां च नारद ॥ फलानि नारिकेलानामसंख्यानि ददौ मुदा ॥ २७॥ अन्यानि परिपक्वानि कालदेशोद्भ
वानि च ॥ ददौ तानि महाभाग स्वादूनि मधुराणि च ॥ २८ ॥ स्वच्छं सुनिर्मलं चैव कर्पूरादिसुवासितम् ॥ गङ्गाजलं च पानार्थं पुन
राचमनीयकम् ॥ २९ ॥ ताम्बूलं च वरं रम्यं कर्पूरादिसुवासितम् ॥ सुवर्णपात्रशतकं भक्ष्यपूर्णं च नारद ॥ ३० ॥ शैलराजप्रिया
मात्याः पुपूजुः शैलजात्मजम् ॥३१॥ ॐ--श्रीं ह्रीं क्लीं गणेश्वराय ब्रह्मरूपाय चारवे ॥ सर्वसिद्धिप्रदेशाय विघ्नेशाय नमो नमः ॥३२॥
इत्यनेनैव मन्त्रेण दत्त्वा द्रव्याणि भक्तितः॥सर्वे प्रमुदितास्तत्र ब्रह्मविष्णुशिवादयः॥३३॥द्वात्रिंशदक्षरो मालामन्त्रोऽयं सर्वकामद॥धर्मार्थ

काममोक्षाणां फलदः सर्वसिद्धिदः ॥३४॥ पञ्चलक्षजपेनैव मन्त्रसिद्धिस्तु मन्त्रिणः॥मन्त्रसिद्धिर्भवेद्यस्य स च विष्णुश्च भारते॥३५॥
विघ्नानि च पलायन्ते तन्नामस्मरणेन च ॥ महावाग्ग्मी महासिद्धिः सर्वसिद्धिसमन्वितः ॥ ३६ ॥ वाक्पतिर्गुरुतां याति तस्य
साक्षात्सुनिश्चितम् ॥ महाकवीन्द्रो गुणवान्विदुषां च गुरोर्गुरुः ॥ ३७ ॥ संपूज्यानेन मन्त्रेण देवा आनन्दसंप्लुताः ॥ नानाविधानि
वाद्यानि वादयामासुरुत्सवे ॥३८॥ ब्राह्मणान्भोजयामासुः कारयामासुरुत्सवम् ॥ ददुर्दानानि तेभ्यश्च बन्दिभ्यश्च विशेषतः ॥३९॥
नारायण उवाच ॥ अथ विष्णुः सभामध्ये तं सम्पूज्य गणेश्वरम् ॥ तुष्टाव परया भक्त्या सर्वविघ्नविनाशकम् ॥ ४० ॥ ईश त्वां
स्तोतुमिच्छामि ब्रह्मज्योतिः सनातनम् ॥ नैव वर्णयितुं शक्तोऽस्म्यनुरूपमनीहकम् ॥ ४१ ॥ प्रवरं सर्वदेवानां सिद्धानां योगिनां
गुरुम् ॥ सर्वस्वरूपं सर्वेशं ज्ञानराशिस्वरूपिणम् ॥ ४२ ॥ अव्यक्तमक्षरं नित्यं सत्यमात्मस्वरूपिणम् ॥ वायुतुल्यं च निर्लिप्तं
चाक्षतं सर्वसाक्षिणम् ॥ ४३ ॥ संसारार्णवपारे च मायापोते सुदुर्लभे ॥ कर्णधारस्वरूपं च भक्तानुग्रहकारकम् ॥ ४४ ॥ वरं वरेण्यं
वरदं वरदानामपीश्वरम् ॥ सिद्धं सिद्धिस्वरूपं च सिद्धिदं सिद्धिसाधनम् ॥ ४५ ॥ ध्यानातिरिक्तं ध्येयं च ध्यानासाध्यं च धार्मि
कम् ॥ धर्मस्वरूपं धर्मज्ञं धर्माधर्मफलप्रदम् ॥४६॥ बीजं संसारवृक्षाणामंकुरं च तदाश्रयम् ॥ स्त्रीपुंनपुंसकानां च रूपमेतदतीन्द्रि
यम् ॥ ४७ ॥ सर्वाद्यमग्रपूज्यं च सर्वपूज्यं गुणार्णवम् ॥ स्वेच्छया सगुणं ब्रह्म निर्गुणं स्वेच्छया पुनः ॥४८॥ स्वयं प्रकृतिरूपं च
प्राकृतं प्रकृतेः परम् ॥ त्वां स्तोतुमक्षमोऽनन्तः सहस्रवदनैरपि ॥ ४९ ॥ न क्षमः पञ्चवक्त्रश्च न क्षमश्चतुराननः ॥ सरस्वती न
शक्ता च न शक्तोऽहं तव स्तुतौ ॥ न शक्ताश्च चतुर्वेदाः के वा ते वेदवादिनः ॥५०॥ इत्येवं स्तवनं कृत्वा मुनीशसुरसंसदि ॥ सुरे
शश्च सुरैः सार्द्धं विरराम रमापतिः ॥५१॥ इदं विष्णुकृतं स्तोत्रं गणेशस्य च यः पठेत् ॥ सायं प्रातश्च मध्याह्ने भक्तियुक्तः समा
हितः ॥ ५२ ॥ तद्विघ्ननाशं कुरुते विघ्नेशः सततं मुने ॥ वर्द्धते सर्वकल्याणं कल्याणजनकः सदा ॥ ५३ ॥ यात्राकाले पठित्वा यो
याति तद्भक्तिपूर्वकम् ॥ तस्य सर्वाभीष्टसिद्धिर्भवत्येव न संशयः ॥ ५४ ॥ तेन दृष्टं च दुस्स्वप्नं सुस्वप्नमुपजायते ॥ कदाऽपि न

भवेत्तस्य ग्रहपीडा च दारुणा ॥ ५५ ॥ भवेद्विनाशः शत्रूणां बन्धूनां चापि वर्द्धनम् ॥ शश्वद्विघ्नविनाशश्च शश्वत्सम्यग्विवर्द्ध
नम् ॥ ५६ ॥ स्थिरा भवेद्गृहे लक्ष्मीः पुत्रपौत्रविवर्द्धनम् ॥ सर्वैश्वर्य्यमिह प्राप्य ह्यन्ते विष्णुपदं लभेत् ॥ ५७ ॥ फलं चापि च
तीर्थानां यज्ञानां यद्भवेद्ध्रुवम् ॥ महतां सर्वदानानां तद्गणेशप्रसादतः ॥५८॥ नारद उवाच ॥ श्रुतं स्तोत्रं गणेशस्य पूजनं च मनो
हरम् ॥ कवचं श्रोतुमिच्छामि साम्प्रतं भवतारणम् ॥५९॥ नारायण उवाच ॥ पूजायां सुनिवृत्तायां सभामध्ये शनैश्चरः ॥ उवाच
विष्णुं सर्वेषां तारकं जगतां गुरुम् ॥ ६० ॥ शनैश्चर उवाच ॥ सर्वदुःखविनाशाय पापप्रशमनाय च ॥ कवचं विघ्ननिघ्नस्य वद
वेदविदांवर ॥ ६१ ॥ बभूव नो विवादश्च शक्त्या वै मायया सह ॥ तद्विघ्नप्रशमार्थं च कवचं धारयाम्यहम् ॥ ६२ ॥ श्रीविष्णुरु
वाच ॥ विनायकस्य कवचं त्रिषु लोकेषु दुर्लभम् ॥ सुगोप्यं च पुराणेषु दुर्लभं चागमेषु च ॥ ६३ ॥ उक्तं कौथुमशाखायां साम
वेदे मनोहरम् ॥ कवचं विघ्ननाथस्य सर्वविघ्नहरं परम् ॥ ६४ ॥ राज्यं देयं शिरो देयं प्राणा देयाश्च सूर्य्यज ॥ एवम्भूतं च कवचं
न देयं प्राणसङ्कटे ॥ ६५ ॥ आविर्भावस्तिरोभावः स्वेच्छया यस्य मायया ॥ नित्योऽयमेकदन्तश्च कवचं चास्य वत्सक ॥६६॥
पूजाऽस्य नित्या स्तोत्रं च कल्पे कल्पेऽस्ति सन्ततम्॥अस्य वै जन्मनःपूर्वं मुनयश्च सिषेविरे॥६७॥यथा मदवतारेषु जन्मविग्रहधार
णम् ॥ तथा गणेश्वरस्यापि जन्म शैलसुतोदरे ॥ ६८ ॥ यद्धृत्वा मुनयः सर्वे जीवन्मुक्ताश्च भारते ॥ निश्शङ्काश्च सुराः सर्वे शत्रु
पक्षविमर्दकाः ॥ ६९ ॥ कवचं बिभ्रतां मृत्युर्न भिया याति सन्निधिम् ॥ नायुर्व्ययो नाशुभं च ब्रह्माण्डे न पराजयः ॥ ७० ॥ दश
लक्षजपेनैव सिद्धं तु कवचं भवेत् ॥ यो भवेत्सिद्धकवचो मृत्युं जेतुं स च क्षमः ॥ ७१ ॥ सुसिद्धकवचो वाग्ग्मी चिरंजीवी मही
तले ॥ सर्वत्र विजयी पूज्यो भवेद्ग्रहणमात्रतः ॥ ७२ ॥ मालामन्त्रमिमं पुण्यं कवचं मङ्गलं शुभम् ॥ बिभ्रतां सर्वपापानि प्रण
श्यन्ति सुनिश्चितम् ॥ ७३ ॥ भूतप्रेतपिशाचाश्च कूष्माण्डा ब्रह्मराक्षसाः ॥ डाकिनीयोगिनीयक्षवेताला भैरवादयः ॥ ७४ ॥ बाल
ग्रहा ग्रहाश्चैव क्षेत्रपालादयस्तथा ॥ वर्मणः शब्दमात्रेण पलायन्ते च भीरवः ॥७५॥ आधयो व्याधयश्चैव शोकाश्चैव भयावहाः ॥

न यान्ति सन्निधिं तेषां गरुडस्य यथोरगाः ॥ ७६ ॥ ऋजवे गुरुभक्ताय स्वशिष्याय प्रकाशयेत् ॥ खलाय परशिष्याय दत्त्वा मृत्युमवाप्नुयात् ॥ ७७ ॥ संसारमोहकस्यास्य कवचस्य प्रजापतिः ॥ ऋषिश्छन्दश्च बृहती देवो लम्बोदरः स्वयम् ॥ धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः ॥ ७८ ॥ सर्वेषां कवचानां च सारभूतमिदं मुने ॥ ॐ गं हुं श्रीगणेशाय स्वाहा मे पातु मस्तकम् ॥ द्वात्रिंशदक्षरो मन्त्रो ललाटं मे सदाऽवतु ॥ ७९ ॥ ॐ ह्रीं क्लीं श्रीं गमिति वै सततं पातु लोचनम् ॥ तालुके पातु विघ्नेशः सततं धरणीतले ॥ ८० ॥ ॐ ह्रीं श्रीं क्लीमिति परं सन्ततं पातु नासिकाम् ॥ ओं गौं गं शूर्पकर्णाय स्वाहा पात्वधरं मम ॥ दन्तांश्च तालुकां जिह्वां पातु मे षोडशाक्षरः ॥ ८१ ॥ ॐ लं श्रीं लम्बोदरायेति स्वाहा गण्डं सदाऽवतु ॥ ॐ क्लीं ह्रीं विघ्ननाशाय स्वाहा कर्णं सदाऽवतु ॥ ८२ ॥ ॐ-श्रीं गं गजाननायेति स्वाहा स्कन्धं सदाऽवतु ॥ ॐ ह्रीं विनायकायेति स्वाहा पृष्ठं सदाऽवतु ॥ ८३ ॥ ॐ क्लीं ह्रीमिति कङ्कालं पातु वक्षःस्थलं परम् ॥ करौ पादौ सदा पातु सर्वांगं विघ्ननाशकृत् ॥ ८४ ॥ प्राच्यां लम्बोदरः पातु चाग्नेय्यां विघ्ननायकः ॥ दक्षिणे पातु विघ्नेशो नैर्ऋत्यां तु गजाननः ॥ ८५ ॥ पश्चिमे पार्वतीपुत्रो वायव्यां शंकरात्मजः ॥ कृष्णस्यांशश्चोत्तरे च परिपूर्णतमस्य च ॥ ८६ ॥ ऐशान्यामेकदन्तश्च हेरम्बः पातु चोर्ध्वतः ॥ अधो गणाधिपः पातु सर्वपूज्यश्च सर्वतः ॥ स्वप्ने जागरणे चैव पातु मां योगिनां गुरुः ॥ ८७ ॥ इति ते कथितं वत्स सर्वमन्त्रौघविग्रहम् ॥ संसारमोहनं नाम कवचं परमाद्भुतम् ॥८८॥ श्रीकृष्णेन पुरा दत्तं गोलोके रासमण्डले ॥ वृन्दावने विनीताय मह्यं दिनकरात्मज ॥ ८९ ॥ मया दत्तं च तुभ्यं च यस्मै कस्मै न दास्यसि ॥ परं वरं सर्वपूज्यं सर्वसंकटतारणम् ॥ ९० ॥ गुरुमभ्यर्च्य विधिवत्कवचं धारयेत्तु यः ॥ कण्ठे वा दक्षिणे बाहौ सोऽपि विष्णुर्न संशयः ॥ ९१ ॥ अश्वमेधसहस्राणि वाजपेयशतानि च ॥ ग्रहेन्द्र कवचस्यास्य कलां नार्हन्ति षोडशीम् ॥ ९२ ॥ इदं कवचमज्ञात्वा यो भजेच्छंकरात्मजम् ॥ शतलक्षप्रजप्तोऽपि न मन्त्रः सिद्धिदायकः ॥ ९३ ॥ इति संसारमोहनं नाम कवचम् ॥ दत्त्वेदं सूर्य्यपुत्राय विरराम सुरेश्वरः ॥ परमानन्दसंयुक्ता देवास्तस्थुः

समीपतः ॥ ९४ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे गणेशपूजास्तवकवचकथनं नाम त्रयोदशोऽध्यायः
॥१३॥ नारायण उवाच ॥ देवास्तस्यां सभायां च सर्वे संहृष्टमानसाः ॥ गन्धर्वा मुनयः शैलाः पश्यन्तः सुमहोत्सवम्॥
॥ १ ॥ एतस्मिन्नन्तरे दुर्गा स्मेराननसरोरुहा ॥ उवाच विष्णुं प्रणता देवेशं तत्र संसदि ॥२॥ पार्वत्युवाच ॥ त्वं पाता सर्वजगतां
नाथ नाहं जगद्बहिः ॥ कथं मत्स्वामिनो वीर्य्यममोघं रक्षितं प्रभो ॥ ३ ॥ रतिभङ्गे कृते देवैर्ब्रह्मणा प्रेरितैस्त्वया ॥ भूमौ निपतितं
वीर्य्यं केन देवेन वै हृतम् ॥ ४ ॥ सर्वे देवास्त्वत्पुरतस्तदन्विष्यन्तु सादरम् ॥ अराजकं कथमिदं तिष्ठति त्वयि राजनि ॥ ५ ॥
पार्वतीवचनं श्रुत्वा प्रहस्य जगदीश्वरः ॥ उवाच देववर्गं च मुनिवर्गं च तिष्ठति ॥ ६ ॥ श्रीविष्णुरुवाच ॥ देवाः शृणुत मद्वाक्यं
पार्वतीवचनं श्रुतम् ॥ शिवस्यामोघवीर्य्यं यत्तत्पुरा केन निर्हृतम् ॥ ७ ॥ सभामानयत क्षिप्रं न चेद्दण्डमिहार्हथ ॥ स को राजा
न शास्ता यः प्रजाबाध्यश्च पाक्षिकः ॥ ८ ॥ विष्णोस्तद्वचनं श्रुत्वा समालोच्य परस्परम् ॥ ऊचुः सर्वे शिवावाक्यैस्त्रासिताः पुरतो
हरेः ॥ ९ ॥ ब्रह्मोवाच ॥ तद्वीर्य्यं निर्हृतं येन पुण्यभूमौ च भारते ॥ स वञ्चितो भवत्वत्र पुण्याहे पुण्यकर्मणि ॥ १० ॥ श्रीमहादेव
उवाच ॥ मद्वीर्य्यं निर्हृतं येन पुण्यभूमौ च भारते ॥ स वञ्चितो भवत्वत्र सेवने पूजने तव ॥ ११ ॥ यम उवाच ॥ स वञ्चितो भवत्वत्र
शरणागतरक्षणे ॥ एकादशीव्रते चैव तद्वीर्य्यं येन निर्हृतम् ॥१२॥ इन्द्र उवाच ॥ तद्वीर्य्यं निर्हृतं येन पापिनां पापमोचने ॥
भवत्वत्र यशो लुप्तं तत्पुण्यं कर्म सन्ततम् ॥ १३ ॥ वरुण उवाच ॥ भवत्वत्र कलौ जन्म वर्षे स्याद्भारते हरे ॥ शूद्रयाजकपत्न्याश्च
गर्भे तद्येन निर्हृतम् ॥ १४ ॥ कुबेर उवाच ॥ न्यासहारी स भवतु विश्वासघ्नश्च मित्रहा ॥ सत्यघ्नश्च कृतघ्नश्च तद्वीर्य्यं येन
निर्हृतम्॥१५॥ईशान उवाच ॥ परद्रव्यापहारी च स भवत्वत्र भारते ॥ नरघाती गुरुद्रोही तद्वीर्य्यं येन निर्हृतम्॥१६॥ रुद्रा ऊचुः॥
ते मिथ्यावादिनः सन्तु भारते पारदारिकाः ॥ गुरुनिन्दारताः शश्वत्तद्वीर्य्यं यैश्च निर्हृतम् ॥ १७ ॥ कामदेव उवाच ॥ कृत्वा
प्रतिज्ञां यो मूढो न सम्पालयते भ्रमात् ॥ भाजनं तस्य पापस्य स भवेद्येन तद्धृतम् ॥ १८ ॥ स्ववैद्यावूचतुः ॥ मातुः पितुर्गुरोश्चैव

स्त्रीपुत्राणां च पोषणे ॥ भवेतां वञ्चितौ तौ च याभ्यां वीर्य्यं च तद्धृतम् ॥ १९ ॥ सर्वे देवा ऊचुः ॥ मिथ्यासाक्ष्यप्रदातारो
भवन्त्वत्र च भारते ॥ अपुत्रिणो दरिद्राश्च यैश्च वीर्य्यं हि तद्धृतम् ॥ २० ॥ देवपत्न्य ऊचुः ॥ ता निन्दंतु स्वभर्त्तारं
गच्छन्तु परपूरुषम् ॥ सन्तु बुद्धिविहीनाश्च याभिर्वीर्य्यं हि तद्धृतम् ॥ २१ ॥ देवानां वचनं श्रुत्वा देवीनां च हरि
स्स्वयम् ॥ कर्मणां साक्षिणं धर्मं सूर्य्यं चन्द्रं हुताशनम् ॥ २२ ॥ पवनं पृथिवीं तोयं सन्ध्ये रात्रिंदिवं मुने ॥ उवाच
जगतां कर्त्ता पाता शास्ता जगत्त्रये ॥ २३ ॥ श्रीविष्णुरुवाच ॥ देवैर्न निर्हृतं वीर्य्यं तदेतत्केन निर्हृतम् ॥ तदमोघं भ
गवतो महेशस्य जगद्गुरोः ॥ २४ ॥ यूयं च साक्षिणो विश्वे सततं सर्वकर्मणाम् ॥ युष्माभिर्निर्हृतं किं वा किम्भूतं वक्तुमर्हथ
॥ २५ ॥ ईश्वरस्य वचः श्रुत्वा सभायां कम्पिताश्च ते ॥ परस्परं समालोच्य क्रमेणोचुः पुरो हरेः ॥ २६ ॥ श्रीधर्म उवाच ॥ रते
रुत्तिष्ठतो वीर्य्यं पपात वसुधातले ॥ मया ज्ञातममोघं तच्छङ्करस्य प्रकोपतः ॥ २७ ॥ क्षितिरुवाच ॥ वीर्य्यं वोढुमशक्ताऽहं तद्वह्नौ
न्यक्षिपं पुरा ॥ अतीव दुर्वहं ब्रह्मन्नबलां क्षन्तुमर्हसि ॥ २८ ॥ अग्निरुवाच ॥ वीर्य्यं वोढुमशक्तोऽहं न्यक्षिपं शरकानने ॥
दुर्बलस्य जगन्नाथ किं यशः किं च पौरुषम् ॥ २९ ॥ वायुरुवाच ॥ शरेषु पतितं वीर्य्यं सद्यो बालो बभूव ह ॥ अतीव सुन्दरो
विष्णो स्वर्णरेखानदीतटे ॥ ३० ॥ श्रीसूर्य्य उवाच ॥ रुदन्तं बालकं दृष्ट्वाऽगममस्ताचलं प्रति ॥ प्रेरितः कालचक्रेण निशि संस्था
तुमक्षमः ॥ ३१ ॥ चन्द्र उवाच ॥ रुदन्तं बालकं प्राप्य गृहीत्वा कृत्तिकागणः ॥ जगाम स्वालयं विष्णो गच्छन्बदरिकाश्रमात् ॥
॥ ३२ ॥ जलमुवाच ॥ अमुं रुदन्तमानीय स्तनं दत्त्वा स्तनार्थिने ॥ वर्द्धयामासुरीशस्य तं ताः सूर्य्याधिकप्रभम्[1] ॥ ३३ ॥
सन्ध्ये ऊचतुः ॥ अधुना कृत्तिकानां च षण्णां तत्पोष्यपुत्रकः ॥ तन्नाम चक्रुस्ताः प्रेम्णा कार्त्तिकेय इति स्वयम् ॥ ३४ ॥
रात्रिरुवाच ॥ न चक्रुर्बालकं ताश्च लोचनानामगोचरम् ॥ प्राणेभ्योऽपि प्रेमपात्रं यः पोष्टा तस्य पुत्रकः ॥ ३५ ॥ दिनमुवाच ॥

---

१ सूर्यप्रभं प्रभो इति पाठः ।

यानि यानि च वस्तूनि त्रैलोक्ये दुर्लभानि च ॥ प्रशंसितानि स्वादूनि भोजयामासुरेव तम् ॥ ३६ ॥ तेषां तद्वचनं श्रुत्वा सन्तुष्टो
मधुसूदनः ॥ ते सर्वे हरिमित्यूचुः सभार्यां हृष्टमानसाः ॥ ३७ ॥ पुत्रस्य वार्त्तां सम्प्राप्य पार्वती हृष्टमानसा ॥ कोटिरत्नानि
विप्रेभ्यो ददौ बहुधनानि च ॥ ददौ सर्वाणि विप्रेभ्यो वासांसि विविधानि च॥३८॥लक्ष्मीः सरस्वती मेना सावित्री सर्वयोषितः ॥
विष्णुश्च सर्वदेवाश्च ब्राह्मणेभ्यो ददुर्धनम् ॥ ३९ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणेशखण्डे नारदनारायणसंवादे कार्त्तिके
यजन्मकथनं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ नारायण उवाच ॥ पुत्रस्य वार्त्तां सम्प्राप्य पार्वत्या सह शङ्करः ॥ प्रेरितो
विष्णुना देवैर्मुनिभिः पर्वतैर्मुने ॥ १ ॥ दूतान्प्रस्थापयामास महाबलपराक्रमान् ॥ वीरभद्रं विशालाक्षं शङ्कुकर्णं कबन्धकम् ॥ २ ॥
नन्दीश्वरं महाकालं वज्रदन्तं भगन्दरम् ॥ गोधामुखं दधिमुखं ज्वलदग्निशिखोपमम् ॥ ३ ॥ लक्षं च क्षेत्रपालानां भूतानां च त्रिल
क्षकम् ॥ वेतालानां चतुर्लक्षं यक्षाणां पञ्चलक्षकम् ॥ ४ ॥ कूष्माण्डानां चतुर्लक्षं त्रिलक्षं ब्रह्मराक्षसान् ॥ डाकिनीनां चतुर्लक्षं
योगिनीनां त्रिलक्षकम् ॥ ५ ॥ रुद्रांश्च भैरवांश्चैव शिवतुल्यपराक्रमान् ॥ अन्यांश्च विकृताकारानसंख्यानपि नारद ॥ ६ ॥ ते सर्वे
शिवदूताश्च नानाशस्त्रास्त्रपाणयः ॥ कृत्तिकानां च भवनं वेष्टयामासुरुज्ज्वलम् ॥७॥ दृष्ट्वा तान्कृत्तिकाः सर्वा भयविह्वलमानसाः॥
कार्त्तिकेयं च जगृहुर्ज्वलन्तं ब्रह्मतेजसा ॥ ८ ॥ कृत्तिका ऊचुः ॥ वत्स सैन्यान्यसंख्यानि वेष्टयामासुरालयम् ॥ न जानीमो वयं
कस्य करालानि च बालक ॥ ९ ॥ कार्त्तिकेय उवाच ॥ भयं त्यजत कल्याण्यो भयं किं वो मयि स्थिते ॥ दुर्निवार्य्यः कर्मपाको
मातरः केन वार्य्यते ॥१०॥ एतस्मिन्नन्तरे तत्र सेनानीर्नन्दिकेश्वरः ॥ पुरतः कार्त्तिकेयस्य तिष्ठंस्तासामुवाच ह ॥ ११ ॥ नन्दिके
श्वर उवाच ॥ भ्रातः प्रवृत्तिं शृणु मे मातुश्चापि शुभावहाम् ॥ प्रेषितस्य सुरेन्द्रस्य संहर्तुः शंकरस्य च ॥ १२ ॥ कैलासे सर्वदे
वाश्च ब्रह्मविष्णुशिवादयः ॥ सभायां ते वसन्तश्च गणेशोत्सवमङ्गलम् ॥ १३ ॥ शैलेन्द्रकन्या तं विष्णुं जगतां परिपालकम् ॥
संबोध्य कथयामास तवान्वेषणकारणम् ॥ १४ ॥ पप्रच्छ देवान्विष्णुस्तान्क्रमेणावाप्तिहेतवे ॥ प्रत्युत्तरं ददुस्ते तु प्रत्येकं च यथो

चितम् ॥ १५ ॥ त्वमत्र कृत्तिकास्थाने कथयामासुरीश्वरम् ॥ सर्वे धर्मादयो देवा धर्माधर्मस्य साक्षिणः ॥ या बभूव रहःक्रीडा पार्वतीशिवयोः पुरा ॥ १६ ॥ दृष्टस्य च सुरैः शम्भोर्वीर्य्यं भूमौ पपात ह ॥ भूमिस्तदक्षिपद्वह्नौ वह्निश्च शरकानने ॥ ततो लब्धः कृत्तिकाभिरमूभिर्गच्छ साम्प्रतम् ॥१७॥ तवाभिषेकं विष्णुश्च करिष्यति सुरैः सह ॥ शस्त्रं लब्ध्वाऽखिलं देव तारकं संहनिष्यति॥ पुत्रस्त्वं विश्वसंहर्त्तुस्त्वां गोप्तुं न क्षमा इमाः ॥१८॥ नाग्निं गोप्तुं यथा शक्तः शुष्कवृक्षः स्वकोटरे ॥ दीप्तिमांस्त्वं च विश्वेषु तासां गेहेषु शोभसे ॥ यथा पतन्महाकूपे द्विजराजो न राजते ॥ १९ ॥ करोषि जगदालोकं नाच्छन्नोऽस्याङ्गतेजसा ॥ यथा सूर्य्यः कराच्छन्नो न भवेत्पूरुषस्य च ॥ २० ॥ विष्णुस्त्वं च जगद्व्यापी नासां व्याप्योऽसि शाम्भव ॥ यथा न केषां व्याप्यं च तत्सर्वं व्यापकं नभः ॥ २१ ॥ योगीन्द्रो नानुलिप्तस्त्वं भोगी च परिपोषणे ॥ नैव लिप्तो यथाऽऽत्मा च कर्म्मभोगेषु जीविनाम् ॥ २२ ॥ विश्वाधारस्त्वमीशश्च नामृते सम्भवेत्स्थितिः ॥ सागरस्य यथा नद्यां सरितामाश्रयस्य च ॥ २३ ॥ नहि सर्वेश्वरावासः सम्भवेत्कृत्तिकालये ॥ गरुडस्य यथा वासः क्षुद्रे च चटकोदरे ॥ २४ ॥ त्वां च देवा न जानन्ति भक्तानुग्रहविग्रहम् ॥ गुणानां तेजसां राशिं यथा ज्ञानमयोगिनः ॥२५॥ त्वामनिर्वचनीयं च कथं जानन्ति कृत्तिकाः ॥ यथा परां हरेर्भक्तिमभक्ता मूढचेतसः ॥ २६ ॥ भ्रातर्यं यं न जानन्ति ते तं कुर्वन्त्यनादरम् ॥ नाद्रियन्ते यथा भेकास्त्वेकावासं च पङ्कजम् ॥ २७ ॥ कार्त्तिकेय उवाच॥भ्रातः सर्वं विजानामि ज्ञानं त्रैकालिकं च यत्॥ज्ञानी त्वं का प्रशंसा ते यतो मृत्युञ्जयाश्रितः॥२८॥कर्मणा जन्म येषां वा यासु यासु च योनिषु ॥ तासु ते निर्वृतिं भ्रातर्नाप्नुवन्ति च सन्ततम्॥२९॥ ये यत्र सन्ति सन्तो वा मूढा वा कर्मभोगतः॥ तेऽपि तं बहुमन्यन्ते मोहिता विष्णुमायया॥३०॥साम्प्रतं जगतां माता विष्णुमाया सनातनी॥सर्वाद्या विष्णुमाया च सर्वदा विष्णुमङ्गला ॥ ३१ ॥ शैलेन्द्रपत्नी गर्भे सा चालभज्जन्म भारते ॥ दारुणं च तपस्तप्त्वा सम्प्रापच्छङ्करं पतिम् ॥ ३२ ॥ ब्रह्मादितृणपर्य्यन्तं सर्वं मिथ्यैव कृत्रिमम् ॥ सर्वे कृष्णोद्भवाः काले विलीनास्तत्र केवलम् ॥ ३३ ॥ कल्पे कल्पे जगन्माता माता मे प्रति

जन्मनि ॥ यज्जन्ममायया बद्धो नित्यः सृष्टिविधावहम् ॥ ३४ ॥ प्रकृतेरुद्भवास्सत्यं जगत्यां सर्वयोषितः ॥ काश्चिदंशाः कलाः काश्चित्कलांशांशेन काश्चन ॥ ३६ ॥ कृत्तिका ज्ञानवत्यश्च योगिन्यः प्रकृतेः कलाः ॥ स्तनैश्च संवर्द्धितोऽहमुपहारेण सन्ततम् ॥ ॥ ३६ ॥ तासामहं पोष्यपुत्रो मदम्बाः पोषणादिमाः ॥ तस्याश्च प्रकृतेः पुत्रो गतस्त्वत्स्वामिवीर्य्यतः ॥ ३७ ॥ न गर्भजोऽहं शैलेन्द्रकन्याया नन्दिकेश्वर ॥ सा च मे धर्मतो माता तथेमाः सर्वसम्मताः ॥ ३८ ॥ स्तनदात्री गर्भधात्री भक्ष्यदात्री गुरुप्रिया ॥ अभीष्टदेवपत्नी च पितुः पत्नी च कन्यका॥३९॥सगर्भकन्या भगिनी पुत्रपत्नी प्रियाप्रसूः ॥ मातुर्माता पितुर्माता सोदरस्य प्रिया तथा ॥४०॥ मातुः पितुश्च भगिनी मातुलानी तथैव च ॥ जनानां वेदविहिता मातरः षोडश स्मृताः ॥४१॥ इमाश्च सर्वसिद्धिज्ञाः परमैश्वर्य्यसंयुताः ॥ न क्षुद्रा ब्रह्मणः कन्यास्त्रिषु लोकेषु पूजिताः ॥ ४२ ॥ विष्णुना प्रेरितस्त्वं च शम्भोः पुत्रसमो महान् ॥ गच्छ यामि त्वया सार्द्धं द्रक्ष्यामि सुरसंचयम् ॥४३॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणेशखण्डे नारदनारायणसंवादे नन्दिकार्त्तिकेयसंवादो नाम पञ्चदशोऽध्यायः ॥ १५ ॥ नारायण उवाच ॥ इत्येवमुक्त्वा तं शीघ्रं बोधयित्वा च कृत्तिकाः ॥ उवाच किंचिद्दुक्तं च वचनं शङ्करात्मजः ॥ १ ॥ कार्तिकेय उवाच ॥ यास्यामि शंकरस्थानं द्रक्ष्यामि सुरसञ्चयम् ॥ मातरं बन्धुवर्गांश्चाप्याज्ञां मे दत्त मातरः ॥ २ ॥ दैवाधीनं जगत्सर्वं जन्म कर्म शुभावहम् ॥ संयोगश्च वियोगश्च न च दैवात्परं बलम् ॥ ३ ॥ कृष्णायत्तं च तद्दैवं स च दैवात्परस्ततः ॥ भजन्ति सततं सन्तः परमात्मानमीश्वरम् ॥ ४ ॥ दैवं वर्द्धयितुं शक्तः क्षयं कर्त्तुं स्वलीलया ॥ न दैवबद्धस्तद्भक्तश्चाविनाशीति निर्णयः ॥५॥ तस्माद्भजत गोविन्दं मोहं त्यजत दुःखदम्॥सुखदं मोक्षदं सारं जन्ममृत्युभयापहम् ॥ ६ ॥ परमानन्दजननं मोहजालनिकृन्तनम् ॥ शश्वद्भजन्ति यत्सर्वे ब्रह्मविष्णुशिवादयः ॥ ७ ॥ कोऽहं भवाब्धौ युष्माकं का वा यूयं ममात्मिकाः ॥ तत्कर्मस्रोतसां सर्वं पुञ्जीभूतं च फेनवत् ॥ ८ ॥ संश्लेषं वा वियोगं वा सर्वमीश्वरचिन्तया ॥ ब्रह्माण्डमीश्वराधीनं न स्वतन्त्रं विदुर्बुधाः ॥ ९ ॥ जलबुद्बुदवत्सर्वमनित्यं च जगत्त्रयम् ॥ मायामनित्ये कुर्वन्ति मायया मूढचेतसः ॥ १० ॥

सन्तस्तत्र न लिप्यन्ते वायुवत्कृष्णचेतसः ॥ तस्मान्मोहं परित्यज्य चाज्ञप्तिं दत्त मातरः ॥ ११ ॥ इत्येवमुक्त्वा ता नत्वा सार्द्धं शङ्करपार्षदैः ॥ यात्रां चकार भगवान्मनसा श्रीहरिं स्मरन् ॥ १२ ॥ एतस्मिन्नन्तरे तत्र ददर्श रथमुत्तमम् ॥ विश्वकर्मकृतं रम्यं हीरकेण विराजितम् ॥ १३ ॥ सद्रत्नसाररचितं माणिक्येन विराजितम् ॥ पारिजातप्रसूनानां मालाजालैश्च शोभितम् ॥ १४ ॥ मणीन्द्रदर्पणः श्वेतचामरैरतिदीपितम् ॥ क्रीडार्हमन्दिरै रम्यैश्चित्रितैश्चित्रितं वरम् ॥ १५ ॥ शतचक्रं सुविस्तीर्णं मनोयायि मनोहरम् ॥ प्रस्थापितं च पार्वत्या वेष्टितं पार्षदैर्वरैः ॥ १६ ॥ समारुहन्तं यानं ता हृदयेन विदूयता ॥ सहसा चेतनां प्राप्य मुक्तकेश्यः शुचाऽऽतुराः ॥ १७ ॥ दृष्ट्वा च स्वपुरः स्कन्दं स्तंभिताश्चातिशोकतः ॥ उन्मत्ता इव तत्रैव वक्तुमारेभिरे भिया ॥ १८ ॥ कृत्तिका ऊचुः ॥ किं कुर्मः क्व च यास्यामो वयं वत्स त्वदाश्रयाः ॥ विहायास्मान्क्व यासि त्वं नायं धर्म्मस्तवाधुना ॥ १९ ॥ स्नेहेन वर्द्धितोऽस्माभिः पुत्रोऽस्माकं स्वधर्मतः ॥ नायं धर्मो मातृवर्गाननुरक्तः सुतस्त्यजेत् ॥ २० ॥ इत्युक्त्वा कृत्तिकाः सर्वाः कृत्वा वक्षसि तं सुतम् ॥ पुनर्मूर्च्छामवापुस्ताः सुतविच्छेददारुणम् ॥ २१ ॥ कुमारो बोधयित्वा ता अध्यात्मवचनेन वै ॥ ताभिश्च पार्षदैः सार्द्धमारुरोह रथं मुने ॥ २२ ॥ पूर्णकुम्भं द्विजं वेश्यां शुक्लधान्यानि दर्पणम् ॥ दध्याज्यं मधु लाजांश्च पुष्पं दूर्वाक्षतान्सितान् ॥ २३ ॥ वृषं गजेन्द्रं तुरगं ज्वलदग्निं सुवर्णकम् ॥ पूर्णं च परिपक्वानि फलानि विविधानि च ॥ २४ ॥ पतिपुत्रवतीं नारीं प्रदीपं मणिमुत्तमम् ॥ मुक्तां प्रसूनमालां च सद्योमांसं च चन्दनम् ॥ २५ ॥ ददर्शैतानि वस्तूनि मङ्गलानि पुरो मुने ॥ शृगालं नकुलं कुम्भं शवं वामे शुभावहम् ॥ २६ ॥ राजहंसं मयूरं च खञ्जनं च शुकं पिकम् ॥ पारावतं शङ्खचिह्नं चक्रवाकं च मङ्गलम् ॥ २७ ॥ कृष्णसारं च सुरभिं चमरीं श्वेतचामरम् ॥ धेनुं च वत्ससंयुक्तां पताकां दक्षिणे शुभाम् ॥ ॥ २८ ॥ नानाप्रकारवाद्यं चाप्यश्रौषीन्मंगलध्वनिम् ॥ मनोहरं च संगीतं घण्टाशंखध्वनिं तथा ॥ २९ ॥ दृष्ट्वा श्रुत्वा मङ्गलं स ह्यगमत्तातमन्दिरम् ॥ क्षणेनानन्दयुक्तश्च मनोयायिरथेन च ॥ ३० ॥ कुमारः प्राप्य कैलासं न्यग्रोधाक्षयमूलके ॥ क्षणं तस्थौ कृत्ति

काभिः पार्षदप्रवरैः सह ॥ ३१ ॥ पार्वती मंगलं कृत्वा राजमार्गं मनोहरम् ॥ पद्मरागैरिन्द्रनीलैः संस्कृतं परितः पुरम् ॥ ३२ ॥
रम्भास्तम्भसमूहैश्च पट्टसूत्रांशुकैस्तथा ॥ श्रीखण्डपल्लवैर्युक्तं पूर्णकुम्भैः सुशोभितम् ॥ ३३ ॥ पूर्णकुम्भजलैर्व्याप्तं सिक्तं चन्दनवा
रिभिः ॥ असंख्यरत्नदीपैश्च मणिराजैर्विराजितम् ॥ ३४ ॥ नटनर्त्तकवेश्यानामुत्सवैः संकुलं सदा ॥ बन्दिभिर्विप्रवर्गैश्च दूर्वापुष्पकरै
र्युतम्॥३५॥पतिपुत्रवतीभिश्च साध्वीभिश्च समन्वितम्॥लक्ष्मीं सरस्वतीं दुर्गां सावित्रीं तुलसीं रतिम्॥३६॥अरुन्धतीमहल्यां च दितिं
तारां मनोरमाम् ॥ अदितिं शतरूपां च शचीं सन्ध्यां च रोहिणीम् ॥ ३७ ॥ अनसूयां तथा स्वाहां संज्ञां वरुणकामिनीम्॥आकूतिं
च प्रसूतिं च देवहूतिं च मेनकाम् ॥ ३८ ॥ तामेकपाटलामेकपर्णां मैनाककामिनीम् ॥ वसुन्धरां च मनसां पुरस्कृत्य समाययौ॥
॥ ३९ ॥ रम्भा तिलोत्तमा मेना घृताची मोहिनी शुभा ॥ उर्वशी रत्नमाला च सुशीला ललिता कला ॥ ४० ॥ कदम्बमाला
सुरसा वनमाला च सुन्दरी ॥ एताश्चान्याश्च बहवो विप्रेन्द्राप्सरसां गणाः ॥ ४१ ॥ संगीतनर्त्तनपराः सस्मिता वेषसंयुताः ॥ करता
लकराः सर्वा जग्मुरानन्दपूर्वकम् ॥ ४२ ॥ देवाश्च मुनयः शैला गन्धर्वाः किन्नरास्तथा ॥ सर्वे ययुः प्रमुदिताः कुमारस्यानुमज्जने
॥ ४३ ॥ नानाप्रकारवाद्यैश्च रुद्रैर्वा पार्षदैः सह ॥ भैरवैः क्षेत्रपालैश्च ययौ सार्द्धं महेश्वरः ॥ ४४ ॥ अथ शक्तिधरो हृष्टो दृष्ट्वा
ऽऽरात्पार्वतीं तदा ॥ अवरुह्य रथात्तूर्णं शिरसा प्रणनाम ह॥४५॥ तं पद्मप्रमुखं देवीगणं च मुनिकामिनीम् ॥ शिवं च परया भक्त्या
सर्वान्संभाष्य यत्नतः ॥ ४६ ॥ कार्त्तिकेयं शिवा दृष्ट्वा क्रोडे कृत्वा चुचुम्ब च ॥ शङ्करश्च सुराः शैला देव्यो वै शैलयोषितः ॥४७॥
पार्वतीप्रमुखा देव्यस्तथा देवश्च शङ्करः ॥ शैलाश्च मुनयः सर्वे ददुस्तस्मै शुभाशिषः ॥ ४८ ॥ कुमारः स गणैः सार्द्धमागत्य च
शिवालयम् ॥ ददर्श तं सभामध्ये विष्णुं क्षीरोदशायिनम्॥४९॥रत्नसिंहासनस्थं च रत्नभूषणभूषितम् ॥ धर्मब्रह्मेन्द्रचन्द्रार्कवह्निदा
य्वादिभिर्युतम् ॥ ५० ॥ ईषद्धास्यं प्रसन्नास्यं भक्तानुग्रहकारकम् ॥ स्तुतं मुनीन्द्रैर्देवेन्द्रैः सेवितं श्वेतचामरैः ॥५१॥ तं दृष्ट्वा जगतां
नाथं भक्तिनम्रात्मकन्धरः ॥ पुलकान्वितसर्वांगः शिरसा प्रणनाम ह ॥ ५२ ॥ विधिं धर्मं च देवांश्च मुनीन्द्रांश्च मुदाऽन्वितान् ॥ प्रण

नाम पृथक्तत्र प्राप तेभ्यश्शुभाशिषः ॥ ५३ ॥ पृथक्संभाष्य सर्वांश्चाप्युवास कनकासने ॥ ददौ धनानि विप्रेभ्यः पार्वत्या सह शङ्करः ॥ ५४ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे कार्त्तिकेयागमनं नाम षोडशोऽध्यायः ॥ १६ ॥

नारायण उवाच ॥ अथ विष्णुर्जगत्कान्तो हृष्टः कृत्वा शुभक्षणम् ॥ रत्नसिंहासने रम्ये वासयामास षण्मुखम् ॥१॥ नानाविधानि वाद्यानि कांस्यतालादिकानि च ॥ नानाविधानि यन्त्राणि वादयामास कौतुकात् ॥ २ ॥ वेदमन्त्राभिषिक्तैश्च सर्वतीर्थोदपूर्णकैः ॥ सद्रत्नकुम्भशतकैः स्नापयामास तं मुदा ॥ ३ ॥ सद्रत्नसारखचितं किरीटं मङ्गलाङ्गदे ॥ अमूल्यरत्नखचितभूषणानि बहूनि च ॥ ४ ॥ वह्निशुद्धांशुके दिव्ये क्षीरोदार्णवसम्भवम् ॥ कौस्तुभं वनमालां च तस्मै चक्रं ददौ मुदा ॥ ५ ॥ ब्रह्मा ददौ यज्ञसूत्रं वेदा वै वेदमातरम् ॥ सन्ध्यामन्त्रं कृष्णमन्त्रं स्तोत्रं च कवचं हरेः ॥ ६ ॥ कमण्डलुं च ब्रह्मास्त्रं विद्यां वै वैरिमर्द्दिनीम् ॥ धर्मो धर्ममतिं दिव्यां सर्वजीवे दयां ददौ ॥ ७ ॥ परं मृत्युञ्जयं ज्ञानं सर्वशास्त्रावबोधनम् ॥ शश्वत्सुखप्रदं तत्त्वज्ञानं च सुमनोहरम् ॥ ८ ॥ योगतत्त्वं सिद्धितत्त्वं ब्रह्मज्ञानं सुदुर्लभम् ॥ शूलं पिनाकं परशुं शक्तिं पाशुपतं धनुः ॥ संहारास्त्रविनिक्षेपं तत्संहारं ददौ शिवः ॥ ९ ॥ श्वेतच्छत्रं रत्नमालां ददौ तस्मै जलेश्वरः ॥ गजेन्द्रं च हयेन्द्रं च सुधाकुम्भं सुधानिधिः ॥ १० ॥ मनोयायिरथं सूर्य्यः सन्नाहं च मनोरमम् ॥ यमदण्डं यमश्चैव महाशक्तिं हुताशनः ॥ नानाशस्त्राण्युपायानि सर्वे देवा ददुर्मुदा ॥ ११ ॥ कामशास्त्रं कामदेवो ददौ तस्मै मुदाऽन्वितः ॥ क्षीरोदोऽमूल्यरत्नानि विशिष्टे रत्ननूपुरे ॥ १२ ॥ पार्वती सस्मिता हृष्टा परमानन्दमानसा ॥ महाविद्यां सुशीलां च विद्यां मेधां दयां स्मृतिम् ॥ १३ ॥ बुद्धिं सुनिर्मलां शान्ति तुष्टिं पुष्टिं क्षमां धृतिम् ॥ सुदृढां च हरौ भक्तिं हरिदास्यं ददौ मुदा ॥ १४॥ प्रजापतिर्देवसेनां रत्नभूषणभूषिताम् ॥ सुविनीतां सुशीलां च सुन्दरीं सुमनोहराम् ॥ १५ ॥ ददौ तस्मै वेदमन्त्रैर्विवाहविधिना स्वयम् ॥ यां वदन्ति महाषष्ठीं पण्डिताः शिशुपालिकाम् ॥ १६ ॥ अभिषिच्य कुमारं च सर्वे देवा ययुर्गृहम् ॥ मुनयश्चैव गन्धर्वाः प्रणम्य जगदीश्वरान् ॥ १७ ॥

नारायणं च ब्रह्माणं धर्मं तुष्टाव शंकरः ॥ प्रणनाम हरिं तात धर्ममालिंग्य नारद॥१८॥प्रीत्या ययौ च शैलेन्द्रः सगणः शंकरार्चितः॥
ये ये तत्रागताः सर्वे ययुरानन्दपूर्वकम् ॥ १९ ॥ परमानन्दसंयुक्तो देव्या सह महेश्वरः ॥ कालान्तरे च तान्सर्वान्पुनरानीय
शंकरः ॥ पुष्टिं ददौ विवाहेन गणेशाय महात्मने॥२०॥ सुताभ्यां सगणैः सार्द्धं पार्वती हृष्टमानसा ॥ सिषेवे स्वामिनः पादपद्मं सा
सर्वकामदम् ॥ २१ ॥ इत्येवं कथितं सर्वं कुमारस्याभिषेचनम् ॥ विवाहः पूजनं तस्य गणेशस्य विवाहकम् ॥ २२ ॥ पार्वतीपुत्र
लाभश्च देवानां च समागमः ॥ का ते मनसि वाञ्छाऽस्ति किं भूयः श्रोतुमिच्छसि ॥ २३ ॥ इतिश्रीब्रह्मवैवर्त्ते महापुराणे तृतीये
गणपतिखण्डे नारदनारायणसंवादे कुमारगणेशविवाहकुमाराभिषेककथनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ नारद उवाच ॥ नारायण
महाभाग वेदवेदांगपारग ॥ पृच्छामि त्वामहं किंचिदतिसन्देहवान्यतः ॥ १ ॥ सुतस्य त्रिदशेशस्य शंकरस्य महात्मनः ॥ विघ्ननि
घ्नस्य यद्विघ्नमीश्वरस्य कथं प्रभो ॥२॥ परिपूर्णतमः श्रीमान्परमात्मा परात्परः ॥ गोलोकनाथः स्वांशेन पार्वतीतनयः स्वयम्॥३॥
अहो भगवतस्तस्य मस्तकच्छेदनं विभो ॥ ग्रहदृष्ट्या ग्रहेशस्य कथं मे वक्तुमर्हसि ॥ ४ ॥ नारायण उवाच ॥ सावधानं शृणु
ब्रह्मन्नितिहासं पुरातनम् ॥ विघ्नेशस्य बभूवेदं विघ्नं येन च नारद ॥ ५ ॥ एकदा शंकरः सूर्य्यं जघान परमक्रुधा ॥ सुमालिमालिह
न्तारं शूलेन बहुवत्सलः ॥ ६ ॥ श्रीसूर्य्योऽमोघशूलेनाशनितुल्येन तेजसा ॥ जहौ स चेतनां सद्यो रथाच्च निपपात ह ॥ ७ ॥
ददर्श कश्यपः पुत्रं मृतमुत्तानलोचनम् ॥ कृत्वा वक्षसि तं शोकाद्विललाप भृशं मुहुः ॥८॥ हाहाकारं सुराश्चक्रुर्विलेपुर्भयकातराः ॥
अन्धीभूतं जगत्सर्वं बभूव तमसा वृतम् ॥ ९ ॥ निष्प्रभं तनयं दृष्ट्वा चाशपत्कश्यपः शिवम् ॥ तपस्वी ब्रह्मणः पौत्रः
प्रज्वलन्ब्रह्मतेजसा ॥ १० ॥ मत्पुत्रस्य यथा वक्षश्छिन्नं शूलेन तेऽद्य वै ॥ त्वत्पुत्रस्य शिरश्छिन्नं भविष्यति न संशयः ॥ ११ ॥
शिवश्च गलितक्रोधः क्षणेनैवाशुतोषकः ॥ ब्रह्मज्ञानेन तत्सूर्य्यं जीवयामास तत्क्षणात् ॥ १२ ॥ ब्रह्मविष्णुमहेशानामंशश्च त्रिगु
णात्मकः ॥ सूर्य्यश्च चेतनां प्राप्य समुत्तस्थौ पितुः पुरः ॥ १३ ॥ ननाम पितरं भक्त्या शंकरं भक्तवत्सलः ॥ विज्ञाय शम्भोः

शापं च कश्यपं स चुकोप ह ॥ १४ ॥ विषयान्नैव जग्राह कोपेनैवमुवाच ह ॥ विषयांश्च परित्यज्य भजे श्रीकृष्णमीश्वरम् ॥१५॥ सर्वं तुच्छमनित्यं च नश्वरं चेश्वरं विना ॥ विहाय मङ्गलं सत्यं विद्वान्नेच्छेदमंगलम् ॥ १६ ॥ देवैश्च प्रेरितो ब्रह्मा समागत्य ससम्भ्रमः ॥ बोधयित्वा रविं तत्र युयोज विषयेष्वजः ॥ १७ ॥ तस्मै दत्त्वाऽऽशिषश्शम्भुर्ब्रह्मा च स्वालयं मुदा ॥ जगाम कश्यपश्चैव स्वराशिं रविरेव च ॥ १८ ॥ अथ माली सुमाली च व्याधिग्रस्तौ बभूवतुः ॥ श्वित्रौ गलितसर्वांगौ शक्तिहीनौ हतप्रभौ ॥ १९ ॥ तावुवाच स्वयं ब्रह्मा युवां च भजतां रविम् ॥ सूर्य्यकोपेन मलिनौ युवामेवं हतप्रभौ ॥ २० ॥ सूर्य्यस्य कवचं स्तोत्रं सर्वं पूजाविधिं विधिः ॥ जगाम कथयित्वा तौ ब्रह्मलोकं सनातनः ॥२१॥ ततस्तौ पुष्करं गत्वा सिषेवाते रविं मुने ॥ स्नात्वा त्रिकालं भक्त्या च जपन्तौ मन्त्रमुत्तमम् ॥ २२ ॥ ततः सूर्य्याद्वरं प्राप्य निजरूपौ बभूवतुः ॥ इत्येवं कथितं सर्वं किं भूयः श्रोतुमिच्छसि ॥ २३ ॥

इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे विघ्नेशविघ्नकथनं नामाष्टादशोऽध्यायः ॥ १८ ॥

नारद उवाच ॥ किं स्तोत्रं कवचं नाथ ब्रह्मणा लोकसाक्षिणा ॥ दानवाभ्यां पुरा दत्तं सूर्यस्य परमात्मनः ॥ १ ॥ किं वा पूजाविधानं वा किं मन्त्रं व्याधिनाशनम् ॥ सर्वं चास्य महाभाग तन्मे त्वं वक्तुमर्हसि ॥२॥ सूत उवाच ॥ नारदस्य वचः श्रुत्वा भगवान्करुणानिधिः॥स्तोत्रं च कवचं मन्त्रमूचे तत्पूजनक्रमम् ॥३॥ नारायण उवाच॥शृणु नारद वक्ष्यामि सूर्य्यपूजाविधेः क्रमम्॥स्तोत्रं च कवचं सर्वं पापव्याधिविमोचकम् ॥ ४ ॥ सुमालिमालिनौ दैत्यौ व्याधिग्रस्तौ बभूवतुः ॥ विधिं सस्मरतुः स्तोतुं शिवमन्त्रप्रदायकम् ॥ ५ ॥ ब्रह्मा गत्वा च वैकुण्ठं पप्रच्छ कमलापतिम् ॥ शिवं तत्रैव संपश्यन्वसन्तं हरिसन्निधौ ॥ ६ ॥ ब्रह्मोवाच ॥ सुमालिमालिनौ दैत्यौ व्याधिग्रस्तौ बभूवतुः ॥ क उपायो वद हरे तयोर्व्याधिविनाशने ॥ ७ ॥ विष्णुरुवाच ॥ कृत्वा सूर्य्यस्य सेवां च पुष्करे पूर्णवत्सरम् ॥ व्याधिहन्तुर्मदंशस्य तौ च मुक्तौ भविष्यतः ॥ ८ ॥ शंकर उवाच ॥ सूर्यस्तोत्रं च कवचं मन्त्रं कल्पतरुं

परम् ॥ देहि ताभ्यां जगत्कान्त व्याधिहन्तुर्महात्मनः ॥ ९ ॥ आरोत्सम्पत्प्रदातारौ सर्वदाता हरिः स्वयम् ॥ व्याधिहन्ता दिनकरो
यस्य यो विषयो विधे ॥ १० ॥ तयोस्तु मन्त्रं संप्राप्य ययौ दैत्यगृहं विधिः ॥ तदा प्रणम्य तं दृष्ट्वा तस्मै ददतुरासनम् ॥ ११ ॥
तावुवाच स्वयं ब्रह्मा रोगग्रस्तौ दयानिधिः ॥ स्तब्धावाहाररहितौ पूयदुर्गन्धसंयुतौ ॥ १२ ॥ ब्रह्मोवाच ॥ गृहीत्वा कवचं स्तोत्रं
मन्त्रं पूजाविधिक्रमम् ॥ गत्वा हि पुष्करं वत्सौ भजथः प्रणतौ रविम् ॥ १३ ॥ तावूचतुः ॥ भजावः केन विधिना केन मन्त्रेण वा
विधे ॥ किं स्तोत्रं कवचं किं वा तदावाभ्यां वदाधुना ॥ १४ ॥ ब्रह्मोवाच ॥ कृत्वा त्रिकालं स्नानं च मन्त्रेणानेन भास्करम् ॥
संसेव्य भास्करं भक्त्या नीरुजौ च भविष्यथः ॥ १५ ॥ ॐ ह्रीं नमो भगवते सूर्य्याय परमात्मने स्वाहा ॥ इत्यनेन च मन्त्रेण
सावधानं दिवाकरम् ॥ संपूज्य भक्त्या दत्त्वा वै चोपहारांस्तु षोडश ॥ एवं संवत्सरं यावद्ध्रुवं मुक्तौ भविष्यथः ॥ १६ ॥ अपूर्वं
कवचं तस्य युवाभ्यां प्रददाम्यहम् ॥ यद्दत्तं गुरुणा पूर्वमिन्द्राय प्रीतिपूर्वकम् ॥ १७ ॥ तत्सहस्रभगाङ्गाय शापेन गौतमस्य च ॥
अहल्याहरणेनैव पापयुक्ताय सङ्कटे ॥ १८ ॥ बृहस्पतिरुवाच ॥ इन्द्र शृणु प्रवक्ष्यामि कवचं परमाद्भुतम् ॥ यद्धृत्वा मुनयः पूता
जीवन्मुक्ताश्च भारते ॥ १९ ॥ कवचं बिभ्रतो व्याधिर्न भिया याति सन्निधिम् ॥ यथा दृष्ट्वा वैनतेयं पलायन्ते भुजङ्गमाः ॥ २० ॥
शुद्धाय गुरुभक्ताय स्वशिष्याय प्रकाशयेत् ॥ खलाय परशिष्याय दत्त्वा मृत्युमवाप्नुयात् ॥ २१ ॥ जगद्विलक्षणस्यास्य कवचस्य
प्रजापतिः ॥ ऋषिश्छन्दश्च गायत्री देवो दिनकरः स्वयम् ॥ व्याधिप्रणाशे सौन्दर्य्ये विनियोगः प्रकीर्त्तितः ॥ २२ ॥ सद्योरोगहरं
सारं सर्वपापप्रणाशनम् ॥ ॐ क्लीं ह्रीं श्रीं श्रीसूर्य्याय स्वाहा मे पातु मस्तकम् ॥ २३ ॥ अष्टादशाक्षरो मन्त्रः कपालं मे सदाऽवतु ॥
ॐ ह्रीं ह्रीं श्रीं श्रीं सूर्य्याय स्वाहा मे पातु नासिकाम् ॥ २४ ॥ चक्षुर्मे पातु सूर्य्यश्च तारकां च विकर्त्तनः ॥ भास्करो मेऽधरं पातु
दन्तान्दिनकरः सदा ॥ २५ ॥ प्रचण्डः पातु गण्डं मे मार्त्तण्डः कर्णमेव च ॥ मिहिरश्च सदा स्कन्धे जंघे पूषा सदाऽवतु ॥२६॥

---

१ आवामिति पाठः।

वक्षः पातु रविः शश्वन्नाभिं सूर्य्यः स्वयं सदा॥कंकालं मे सदा पातु सर्वदेवनमस्कृतः॥२७॥करौ पातु सदा ब्रध्नः पातु पादौ प्रभाकरः॥विभाकरो मे सर्वांगं पातु सन्ततमीश्वरः॥२८॥इति ते कथितं वत्स कवचं सुमनोहरम्॥जगद्विलक्षणं नाम त्रिजगत्सु सुदुर्लभम् ॥२९॥ पुरा दत्तं च मनवे पुलस्त्येन तु पुष्करे ॥ मया दत्तं च तुभ्यं तद्यस्मै कस्मै न देहि भोः ॥ ३० ॥ व्याधितो मुच्यसे त्वं च कवचस्य प्रसादतः ॥ भवानरोगी श्रीमांश्च भविष्यति न संशयः ॥ ३१ ॥ लक्षवर्षहविष्येण यत्फलं लभते नरः ॥ तत्फलं लभते नूनं कवचस्यास्य धारणात् ॥ ३२ ॥ इदं कवचमज्ञात्वा यो मूढो भास्करं यजेत् ॥ दशलक्षप्रजप्तोऽपि मन्त्रसिद्धिर्न जायते ॥ ३३ ॥ ब्रह्मोवाच ॥ धृत्वेदं कवचं वत्सौ कृत्वा च स्तवनं रवेः ॥ युवां व्याधिविनिर्मुक्तौ निश्चितं तु भविष्यथः ॥ ३४ ॥ स्तवनं सामवेदोक्तं सूर्य्यस्य व्याधिमोचनम् ॥ सर्वपापहरं सारं धनारोग्यकरं परम् ॥ ३५ ॥ ब्रह्मोवाच ॥ तं ब्रह्म परमं धाम ज्योतीरूपं सनातनम् ॥ त्वामहं स्तोतुमिच्छामि भक्तानुग्रहकारकम् ॥ ३६ ॥ त्रैलोक्यलोचनं लोकनाथं पापविमोचनम् ॥ तपसां फलदातारं दुःखदं पापिनां सदा ॥ ३७ ॥ कर्मानुरूपफलदं कर्मबीजं दयानिधिम् ॥ कर्मरूपं क्रियारूपमरूपं कर्मबीजकम् ॥ ३८ ॥ ब्रह्मविष्णुमहेशानामंशं च त्रिगुणात्मकम् ॥ व्याधिदं व्याधिहन्तारं शोकमोहभयापहम् ॥ सुखदं मोक्षदं सारं भक्तिदं सर्वकामदम् ॥ ३९ ॥ सर्वेश्वरं सर्वरूपं साक्षिणं सर्वकर्मणाम् ॥ प्रत्यक्षं सर्वलोकानामप्रत्यक्षं मनोहरम् ॥ ४० ॥ शश्वद्रसहरं पश्चाद्रसदं सर्वसिद्धिदम् ॥ सिद्धि स्वरूपं सिद्धेशं सिद्धानां परमं गुरुम् ॥ ४१ ॥ स्तवराजमिदं प्रोक्तं गुह्याद्गुह्यतरं परम् ॥ त्रिसन्ध्यं यः पठेन्नित्यं व्याधिभ्यस्स प्रमुच्यते ॥ ४२ ॥ आन्ध्यं कुष्ठं च दारिद्र्यं रोगः शोको भयं कलिः ॥ तस्य नश्यति विश्वेश श्रीसूर्य्य कृपया ध्रुवम् ॥ ४३ ॥ महाकुष्ठी च गलितश्चक्षुर्हीनो महाव्रणी ॥ यक्ष्मग्रस्तो महाशूली नानाव्याधियुतोऽपि वा ॥ ४४ ॥ मासं कृत्वा हविष्यान्नं श्रुत्वाऽतो मुच्यते ध्रुवम् ॥ स्नानं च सर्वतीर्थानां लभते नात्र संशयः ॥ ॥४५॥ पुष्करं गच्छतं शीघ्रं भास्करं भजतं सुतौ ॥ इत्येवमुक्त्वा स विधिर्जगाम स्वालयं मुदा ॥४६॥ तौ निषेव्य दिनेशं तं नीरु

जौ संबभूवतुः ॥इत्येवं कथितं वत्स किं भूयः श्रोतुमिच्छसि॥४७॥ सर्वविघ्नहरं सारं विघ्नेशं विघ्ननाशनम्॥स्तोत्रेणानेन तं स्तुत्वा
मुच्यते नात्र संशयः ॥ ४८ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे विघ्नकारणकथनं नामैकोनविंशतितमोऽध्यायः ॥ १९ ॥
नारद उवाच ॥ हरेरंशसमुत्पन्नो हरितुल्यो भवान्धिया ॥ तेजसा विक्रमेणैव मत्प्रश्नं श्रोतुमर्हसि
॥१॥ विघ्ननिघ्नस्य यद्विघ्नं श्रुतं तत्परमाद्भुतम् ॥ तद्विघ्नकारणं चैव विश्वकारणवक्त्रतः ॥ २ ॥ अधुना श्रोतुमिच्छामि परं
सन्देहभञ्जनम् ॥ त्रैलोक्यनाथतनये गजास्यायोजनार्थकम् ॥ ३ ॥ स्थितेष्वन्येषु बहुषु जन्तुष्वब्जभुवः पते ॥ सुप्राणिनां सुरूपेषु
नानारूपेषु रूपिणाम् ॥ ४ ॥ श्रीनारायण उवाच ॥ गजास्ययोजनायाश्च कारणं शृणु नारद ॥ गोप्यं सर्वपुराणेषु वेदेषु च
सुदुर्लभम् ॥५॥ तारणं सर्वदुःखानां कारणं सर्वसम्पदाम् ॥ हारणं विपदां चैव रहस्यं पापमोचनम् ॥ ६ ॥ महालक्ष्म्याश्च चरितं
सर्वमङ्गलमङ्गलम् ॥ सुखदं मोक्षदं चैव चतुर्वर्गफलप्रदम् ॥७॥ शृणु तात प्रवक्ष्येऽहमितिहासं पुरातनम् ॥ रहस्यं पाद्मकल्पस्य पुरा
तातमुखाच्छ्रुतम् ॥ ८ ॥ एकदैव महेन्द्रश्च पुष्पभद्रां नदीं ययौ ॥ महासम्पन्मदोन्मत्तः कामी राजश्रियाऽन्वितः ॥ ९ ॥ तत्तीरेऽतिरहःस्थाने
पुष्पोद्याने मनोहरे ॥ अतीव दुर्गमेऽरण्ये सर्वजन्तुविवर्जिते ॥ १० ॥ भ्रमरध्वनिसंयुक्ते पुंस्कोकिलरुतश्रवे ॥ सुगन्धिपुष्पसम्श्लिष्टवायुना
सुरभीकृते ॥ ११ ॥ ददर्श रम्भां तत्रैव चन्द्रलोकात्समागताम् ॥ सुरतश्रमविश्रान्तिकामुकीं कामकामुकीम् ॥
॥ १२ ॥ इच्छन्तीमीप्सितां क्रीडां गच्छन्तीं मदनाश्रमम् ॥ एकाकिनीमुन्मनस्कां मन्मथोद्धतमानसाम् ॥ १३ ॥ सुश्रोणीं सुदतीं
श्यामां बिम्बाधरसरोरुहाम्॥बृहन्नितम्बभारार्त्तां मत्तवारणगामिनीम्॥१४॥सस्मितास्यशरच्चन्द्रां सुकटाक्षं च बिभ्रतीम्॥बिभ्रतीं कबरीं
रम्यां मालतीमाल्यशोभिताम् ॥ १५ ॥ वह्निशुद्धांशुकधरां रत्नभूषणभूषिताम् ॥ कस्तूरीबिन्दुना सार्द्धं सिन्दूरं बिभ्रतीं मुदा ॥
॥ १६ ॥ नीलोत्पलदलश्यामकज्जलोज्ज्वललोचनाम् ॥ मणिकुण्डलयुग्माढ्यगण्डस्थलविराजिताम् ॥ १७ ॥ अत्युन्नतं सुकठिनं
पत्रराजिविराजितम् ॥ सुखदं रसिकानां च स्तनयुग्मं च बिभ्रतीम् ॥ १८ ॥ सर्वशोभां सुवेषाढ्यां सुभगां सुरतोत्सुकाम् ॥ प्राणा

धिकां च देवानां स्वच्छां स्वच्छन्दगामिनीम् ॥ १९ ॥ वरामप्सरसां रम्यामतीव स्थिरयौवनाम् ॥ गुणरूपवतीं शान्तां मुनिमानसमोहिनीम् ॥२०॥ दृष्ट्वा तामतिवेषाढ्यां तत्कटाक्षेण पीडितः ॥ इन्द्रोऽतीन्द्रियचापल्यात्प्रवक्तुमुपचक्रमे ॥ २१ ॥ इन्द्र उवाच ॥ क्व गच्छसि वरारोहे क्व गताऽसि मनोहरे ॥ मया दृष्टा हि सुचिरात्कल्याणि सुभगेऽधुना ॥ २२ ॥ तवान्वेषणकर्त्ताऽहं श्रुत्वा वाचिकमग्रतः ॥ त्वदासक्तमनाश्चास्मि नान्यां वै गणयामि च ॥ २३ ॥ सुवासितजलार्थी यः किमिच्छेत्पङ्किलं जलम् ॥ पङ्कं नेच्छेच्चन्दनार्थी पङ्कजार्थी न चोत्पलम् ॥ २४ ॥ सुधार्थी न सुरामिच्छेद्दुग्धार्थी नाविलं जलम् ॥ सुगन्धिपुष्पशायी यो ह्यस्त्र तल्पं न चेच्छति ॥ २५ ॥ स्वर्गी च नरकं नेच्छेत्सुभोगी दुष्टभोजनम् ॥ पण्डितैः सह संवासी नेच्छेत्स्त्रीसन्निधिं नरः ॥ विहाय रत्नाभरणं कोऽपीच्छेल्लोहभूषणम् ॥ २६ ॥ त्वां नाश्लिष्य महाविज्ञां कां मूढो गन्तुमिच्छति॥ विहाय गङ्गां को विज्ञो नदीमन्यां च वांछति ॥ २७ ॥ इन्द्रियैश्चेन्द्रियरतिं वर्द्धयन्तीं पदे पदे ॥ वरं प्रार्थयितारश्च प्राणिनश्च सुखार्थिनः ॥२८॥ इत्येवमुक्त्वा भगवानवरुह्य गजेश्वरात् ॥ कामयुक्तश्च पुरतस्तस्थौ तस्याश्च नारद ॥ २९ ॥ श्रुत्वा तद्वचनं रम्भा महाशृङ्गारलोलुपा ॥ जहासानम्रवदना पुलकाञ्चितविग्रहा ॥ ३० ॥ स्मेराननाकटाक्षेण स्तनोर्वोर्दर्शनेन च ॥ नर्मोक्तिगर्भवाक्येन चाहरत्तस्य चेतनाम् ॥ ३१ ॥ मितं सारं सुमधुरं सुस्निग्धं कोमलं प्रियम् ॥ पुरुषायत्तबीजं च प्रवक्तुमुपचक्रमे ॥ ३२ ॥ रम्भोवाच ॥ यास्यामि वाञ्छितं यत्र प्रश्नेन तव किं फलम् ॥ नाहं सन्तोषजननी धूर्त्तानां दुष्टमित्रता ॥ ३३ ॥ यथा मधुकरो लोभात्सर्वपुष्पासवं लभेत् ॥ स्वादु यत्रातिरिक्तं स तत्र तिष्ठति सन्ततम् ॥ ३४ ॥ तथैव कामुकी लोके भ्रमेद्भ्रमरवत्सदा ॥ चाञ्चल्यात्स हि कास्वेव वायुवद्रसमाहरेत् ॥ ३५ ॥ सुपुमानङ्गवत्स्त्रीणां यथा शाखाश्च शाखिषु ॥ कामुकी काकवल्लोलः फलं भुक्त्वा प्रयाति च ॥ ३६ ॥ स्वकार्य्यमुद्धरेद्यावत्तावद्वा स प्रयोजनम् ॥ स्थितिः कर्म्यानुरोधेन यथा काष्ठे हुताशनः ॥ ३७॥ यावत्तडागे तोयानि तावद्यादांसि तेषु च ॥ शोषारम्भे च तोयानां यान्ति स्थानान्तरं पुनः ॥ ३८ ॥ त्वं देवानामीश्वरोऽसि कामिनीनां च वाञ्छितः ॥ पुमांसं रसिकं शश्वद्वाञ्छन्ति रसिकाः

सुखात् ॥ ३९ ॥ युवानं रसिकं शान्तं सुवेषं सुन्दरं प्रियम् ॥ गुणिनं धनिनं स्वच्छं कान्तमिच्छति कामिनी ॥ ४० ॥ दुश्शीलं रोगिणं वृद्धं रतिशक्तिवियोजितम् ॥ अदातारमविज्ञं[1] च नैव वाञ्छन्ति योषितः ॥ ४१ ॥ का मूढा न च वाञ्छन्ति त्वामेवं गुणसागरम् ॥ तवाज्ञाकारिणीं दासीं गृहाणात्र यथासुखम् ॥ ४२ ॥ इत्युक्त्वा सस्मिता सा च तं पपौ वक्रचक्षुषा ॥ कामाग्निदग्धा विगलल्लज्जा तस्थौ समीपतः ॥ ४३ ॥ ज्ञात्वा भावं स्मरार्त्तायाः स्मरशास्त्रविशारदः ॥ गृहीत्वा तां पुष्पतल्पे विजहार तया सह ॥ ४४ ॥ चुचुम्ब रहसि प्रौढां नग्नां च सुभगां वराम् ॥ पक्वबिम्बाधरौष्ठीं च सुदत्या चुंबितस्तया ॥ ४५ ॥ नानाप्रकारशृङ्गाराद्विपरीतादिकान्मुने ॥ सुखी बभूव तस्यां वै शृंगारो मूर्त्तिमानिव ॥ ४६ ॥ तौ कामाहितचित्तौ नो बुबुधाते दिवानिशम् ॥ अन्योन्यगतचित्तौ च कामार्तौ ज्ञानवर्जितौ ॥ ४७ ॥ स च कृत्वा स्थले क्रीडां तया सह सुरेश्वरः॥ ययौ जलविहारार्थं पुष्पभद्रानदीजलम् ॥ ४८ ॥ स चकार जलक्रीडां तया सह मुदा क्षणम् ॥ जलात्स्थले स्थलात्तोये विजहार पुनः पुनः ॥४९॥ एतस्मिन्नन्तरे तेन वर्त्मना मुनिपुंगवः ॥ सशिष्यो याति दुर्वासा वैकुण्ठाच्छङ्करालयम् ॥ ५० ॥ तं च दृष्ट्वा मुनीन्द्रं च देवेन्द्रः स्तब्धमानसः ॥ ननामागत्य सहसा ददौ तस्मै स चाशिषः ॥ ५१ ॥ पारिजातप्रसूनं यद्दत्त नारायणेन वै ॥ तच्च दत्तं महेन्द्राय मुनीन्द्रेण महात्मना ॥५२॥ दत्त्वा पुष्पं महाभागस्तमुवाच कृपानिधिः॥माहात्म्यं तस्य यत्किंचिदपूर्वं मुनिसत्तमः ॥५३॥ दुर्वासा उवाच ॥ सर्वविघ्नहरं पुष्पं नारायणनिवेदितम ॥ मूर्ध्नीदं यस्य देवेन्द्र जयस्तस्यैव सर्वतः ॥ ५४ ॥ पुरःपूजा च सर्वेषां देवानामग्रणीर्भवेत्॥ तच्छायेव महालक्ष्मीर्न जहाति कदाऽपि तम् ॥५५॥ ज्ञानेन तेजसा बुद्ध्या विक्रमेण बलेन च ॥ सर्वदेवाधिकः श्रीमान्हरितुल्यपराक्रमः ॥ ५६ ॥ भक्त्या मूर्ध्नि न गृह्णाति योऽहंकारेण पामरः ॥ नैवेद्यं च हरेरेव स भ्रष्टश्रीः स्वजातिभिः ॥ इत्युक्त्वा शंकरांशश्च ह्यगमच्छंकरालयम् ॥५७॥ ततस रम्भांतिके तिष्ठंश्चिक्षेप गजमस्तके ॥ तेन भ्रष्टश्रियं दृष्ट्वा सा जगाम सुरालयम्॥५८॥

---

[1] अविचारमिति पाठः ।

पुंश्चली योग्यमिच्छन्ती नापरं चञ्चलाऽधमा ॥ देवराजं परित्यज्य गजराजो महाबली ॥ ५९ ॥ प्रविवेश महारण्यं तं निक्षिप्य स्वतेजसा ॥ तत्रैव करिणीं प्राप्य मत्तः संबुभुजे बलात् ॥ ६० ॥ साऽतो बभूव वशगा योषिज्जातिः सुखार्थिनी ॥ तयोर्बभूवापत्यानां निवहस्तत्र कानने ॥ ६१ ॥ हरिस्तन्मस्तकं छित्त्वा योजयामास बालके ॥ इत्येवं कथितं वत्स किं भूयः श्रोतुमिच्छसि ॥ गजास्ययोजनायाश्च कारणं पापनाशनम् ॥ ६२ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे गणपतेर्गजास्ययोजनाहेतुकथनं नाम विंशतितमोऽध्यायः ॥२०॥

नारद उवाच ॥ ते देवा ब्रह्मशापेन निःश्रीकाः केन वा प्रभो ॥ बभूवुस्तद्रहस्यं च गोपनीयं सुदुर्लभम् ॥ १ ॥ कथं वा प्रापुरेते तां कमलां जगतां प्रसूम् ॥ किं चकार महेन्द्रश्च तद्भवान्वक्तुमर्हति ॥ २ ॥ नारायण उवाच ॥ गजेन्द्रेण पराभूतो रम्भया च सुमन्दधीः ॥ भ्रष्टश्रीर्दैन्ययुक्तश्च स जगामामरावतीम् ॥ ॥ ३ ॥ तां ददर्श निरानन्दो निरानन्दां पुरीं मुने ॥ दैन्यग्रस्तां बन्धुहीनां वैरिवर्गैः समाकुलाम् ॥ ४ ॥ इति श्रुत्वा दूतमुखाज्जगाम गुरुमन्दिरम् ॥ तेन देवगणैः सार्द्धं जगाम ब्रह्मणः सभाम् ॥ ५ ॥ गत्वा ननाम तं शक्रः सुरैः सार्द्धं तथा गुरुः ॥ तुष्टाव वेदवाक्यैश्च स्तोत्रेणापि च संयतः ॥ ६ ॥ प्रवृत्तिं कथयामास वाक्पतिस्तं प्रजापतिम् ॥ श्रुत्वा ब्रह्मा नम्रवक्त्रः प्रवक्तुमुपचक्रमे ॥ ७ ॥ ब्रह्मोवाच ॥ मत्प्रपौत्रोऽसि देवेन्द्र शश्वद्राजञ्छ्रिया ज्वलन् ॥ लक्ष्मीसमशचीभर्त्ता परस्त्रीलोलुपः सदा ॥ ८ ॥ गौतमस्याभिशापेन भगांगः सुरसंसदि ॥ पुनर्लज्जाविहीनस्त्वं परस्त्रीरतिलोलुपः ॥ ९ ॥ यः परस्त्रीषु निरतस्तस्य श्रीर्वा कुतो यशः ॥ स च निन्द्यः पापयुक्तः शश्वत्सर्वसभासु च ॥ १० ॥ नैवेद्यं श्रीहरेरेव दत्तं दुर्वाससा च ते ॥ गजमूर्ध्नि त्वया न्यस्तं रम्भयाऽऽहृतचेतसा ॥ ११ ॥ क्व सा रम्भा सर्वभोग्या क्वाधुना त्वं श्रिया हतः ॥ सर्वसौख्यप्रदात्री त्वां गता त्यक्त्वा क्षणेन सा ॥ १२ ॥ वेश्या सश्रीकमिच्छन्ती निःश्रीकं न च चञ्चला ॥ नवं नवं प्रार्थयन्ती परिनिन्द्य पुरातनम् ॥ १३ ॥ यद्गतं तद्गतं वत्स निष्पन्नं न निवर्त्तते ॥ भज नारायणं भक्त्या पद्मायाः प्राप्तिहेतवे ॥१४॥ इत्युक्त्वा तं जगत्स्रष्टुः स्तोत्रं च कवचं ददौ ॥ नारायणस्य

मन्त्रं च नारायणपरायणः ॥१५॥ स तैः सार्द्धं च गुरुणा ह्यजपन्मन्त्रमीप्सितम् ॥ गृहीत्वा कवचं तेन पर्यष्टौत्पुष्करे हरिम् ॥१६॥
वर्षमेकं निराहारो भारते पुण्यदे शुभे ॥ सिषेवे कमलाकान्तं कमलाप्राप्तिहेतवे ॥ १७ ॥ आगत्य तं हरिस्तस्मै वाञ्छितं च वरं
ददौ ॥ लक्ष्मीस्तोत्रं च कवचं मन्त्रमैश्वर्य्यवर्द्धनम् ॥ १८ ॥ दत्त्वा जगाम वैकुण्ठमिन्द्रः क्षीरोदमेव च ॥ गृहीत्वा कवचं स्तुत्वा
प्राप पद्मालयां मुने ॥ १९ ॥ सुरेश्वरोऽरिं जित्वा वै ह्यलभच्चामरावतीम् ॥ प्रत्येकं च सुराः सर्वे स्वालयं प्रापुरीप्सितम् ॥ २० ॥
इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे शक्रलक्ष्मीप्राप्तिर्नामैकविंशतितमोऽध्यायः ॥ २१ ॥ नारद
उवाच ॥ आविर्भूय हरिस्तस्मै किं स्तोत्रं कवचं ददौ ॥ महालक्ष्म्याश्च लक्ष्मीशस्तन्मे ब्रूहि तपोधन ॥ १ ॥ नारायण उवाच ॥
पुष्करे च तपस्तप्त्वा विरराम सुरेश्वरः ॥ आविर्बभूव तत्रैव क्लिष्टं दृष्ट्वा हरिः स्वयम् ॥२॥ तमुवाच हृषीकेशो वरं वृणु यथेप्सितम् ॥
स च वव्रे वरं लक्ष्मीमीशस्तस्मै ददौ मुदा ॥ ३ ॥ वरं दत्त्वा हृषीकेशः प्रवक्तुमुपचक्रमे ॥ हितं सत्यं च सारं च परिणामसुखा
वहम् ॥ ४ ॥ श्रीमधुसूदन उवाच ॥ गृहाण कवचं शक्र सर्वदुःखविनाशनम् ॥ परमैश्वर्य्यजनकं सर्वशत्रुविमर्दनम् ॥ ५ ॥ ब्रह्मणे
च पुरा दत्तं विष्टपे च जलप्लुते ॥ यद्धृत्वा जगतां श्रेष्ठः सर्वैश्वर्य्ययुतो विधिः ॥६॥ बभूवुर्मनवः सर्वे सर्वैश्वर्य्ययुता यतः ॥ सर्वै
श्वर्य्यप्रदस्यास्य कवचस्य ऋषिर्विधिः ॥ ७ ॥ पङ्क्तिश्छन्दश्च सा देवी स्वयं पद्मालया वरा ॥ सिद्ध्यैश्वर्य्यसुखेष्वेव विनियोगः
प्रकीर्त्तितः ॥ यद्धृत्वा कवचं लोकः सर्वत्र विजयी भवेत् ॥ ८ ॥ मस्तकं पातु मे पद्मा कण्ठं पातु हरिप्रिया ॥ नासिकां पातु मे
लक्ष्मीः कमला पातु लोचने ॥ ९ ॥ केशान्केशवकान्ता च कपालं कमलालया ॥ जगत्प्रसूर्गण्डयुग्मं स्कन्धं सम्पत्प्रदा सदा ॥
॥ १० ॥ ॐ श्रीं कमलवासिन्यै स्वाहा पृष्ठं सदाऽवतु ॥ ॐ ह्रीं श्रीं पद्मालयायै स्वाहा वक्षः सदाऽवतु ॥ पातु श्रीर्मम कङ्कालं
बाहुयुग्मं च ते नमः ॥ ११ ॥ ॐ ह्रीं श्रीं लक्ष्म्यै नमः पादौ पातु मे संततं चिरम् ॥ ॐ ह्रीं श्रीं नमः पद्मायै स्वाहा पातु
नितम्बकम् ॥ १२ ॥ ॐ श्रीं महालक्ष्म्यै स्वाहा सर्वाङ्गं पातु मे सदा ॥ ॐ ह्रीं श्रीं क्लीं महालक्ष्म्यै स्वाहा मां पातु सर्वतः ॥१३॥

इति ते कथितं वत्स सर्वसम्पत्करं परम् ॥ सर्वैश्वर्य्यप्रदं नाम कवचं परमाद्भुतम् ॥१४॥ गुरुमभ्यर्च्य विधिवत्कवचं धारयेत्तु यः॥ कण्ठे वा दक्षिणे बाहौ स सर्वविजयी भवेत् ॥ १५ ॥ महालक्ष्मीर्गृहं तस्य न जहाति कदाचन ॥ तस्य च्छायेव सततं सा च जन्मनि जन्मनि ॥ १६ ॥ इदं कवचमज्ञात्वा भजेल्लक्ष्मीं स मन्दधीः ॥ शतलक्षप्रजापेऽपि न मन्त्रः सिद्धिदायकः ॥ १७ ॥ नारायण उवाच ॥ दत्त्वा तस्मै च कवचं मन्त्रं वै षोडशाक्षरम् ॥ सन्तुष्टश्च जगन्नाथो जगतां हितकारणम् ॥१८॥ ॐ ह्रीं श्रीं क्लीं नमो महालक्ष्म्यै स्वाहा॥ददौ तस्मै च कृपया चेन्द्राय च महामुने ॥ १९ ॥ ध्यानं च सामवेदोक्तं गोपनीयं सुदुर्लभम् ॥ सिद्धैर्मुनीन्द्रै र्दुष्प्राप्यं ध्रुवं सिद्धिप्रदं शुभम् ॥ २० ॥ श्वेतचम्पकवर्णाभां शतचन्द्रसमप्रभाम् ॥ वह्निशुद्धांशुकाधानां रत्नभूषणभूषिताम् ॥२१॥ ईषद्धास्यप्रसन्नास्यां भक्तानुग्रहकारिकाम् ॥ सहस्रदलपद्मस्थां स्वस्थां च सुमनोहराम् ॥ २२ ॥ शान्तां च श्रीहरेः कान्तां तां भजेज्जगतां प्रसूम् ॥२३॥ ध्यानेनानेन देवेन्द्रो ध्यात्वा लक्ष्मीं मनोहराम् ॥ भक्त्या संपूज्य तस्यै च चोपचारांस्तु षोडश ॥२४॥ स्तुत्वाऽनेन स्तवेनैव वक्ष्यमाणेन वासव ॥ नत्वा वरं गृहीत्वा च लभिष्यसि च निर्वृतिम् ॥ २५ ॥ स्तवनं शृणु देवेन्द्र महालक्ष्म्याः सुखप्रदम्॥कथयामि सुगोप्यं च त्रिषु लोकेषु दुर्लभम् ॥२६॥ नारायण उवाच॥ देवि त्वां स्तोतुमिच्छामि न[1] क्षमाः स्तोतुमीश्वराः ॥ बुद्धेरगोचरां सूक्ष्मां तेजोरूपां सनातनीम् ॥ अनिवार्य्यगुणाढ्यां च को वा निर्वक्तुमीश्वरः ॥ २७ ॥ स्वेच्छामयीं निराकारां भक्तानुग्रहविग्रहाम् ॥ स्तौमि वाङ्मनसापारां किं वाऽहं जगदम्बिके॥२८॥परां चतुर्णां वेदानां पारबीजं भवार्णवे ॥ सर्वसस्याधिदेवीं च सर्वासामपि सम्पदाम् ॥२९॥ योगिनां चैव योगानां ज्ञानानां ज्ञानिनां तथा ॥ वेदानां वै वेदविदां जननीं वर्णयामि किम्॥३०॥यया विना जगत्सर्वमबीजं निष्फलं ध्रुवम् ॥ यया स्तनंधयानां च विना मात्रा सुखं भवेत् ॥ ३१ ॥ प्रसीद जगतां माता रक्षास्मानतिकातरान् ॥ वयं त्वच्चरणाम्भोजे प्रपन्नाः शरण गताः ॥ ३२ ॥ नमः शक्तिस्वरूपायै जगन्मात्रे नमो नमः ॥ ज्ञानदायै बुद्धिदायै सर्वदायै नमो

---

[1] न क्षमः स्तोतुमिति पाठः ।

नमः ॥३३॥ हरिभक्तिप्रदायिन्यै मुक्तिदायै नमो नमः॥सर्वज्ञायै सर्वदायै महालक्ष्म्यै नमो नमः ॥ ३४ ॥ कुपुत्राः कुत्रचित्सन्ति न
कुत्रापि कुमातरः॥ कुत्र माता पुत्रदोषं तं विहाय च गच्छति ॥३५॥ स्तनन्धयेभ्य इव मे हे मातर्देहि दर्शनम् ॥ कृपां कुरु कृपासिन्धो त्वम
स्मान्भक्तवत्सले ॥३६॥इत्येवं कथितं वत्स पद्मायाश्च शुभावहम् ॥ सुखदं मोक्षदं सारं शुभदं सम्पदः प्रदम् ॥३७॥ इदं स्तोत्रं महापुण्यं
पूजाकाले च यः पठेत् ॥ महालक्ष्मीर्गृहं तस्य न जहाति कदाचन ॥ ३८ ॥ इत्युक्त्वा श्रीहरिस्तं च तत्रैवान्तरधीयत ॥ देवो जगाम
क्षीरोदं सुरैः सार्द्धं तदाज्ञया ॥ ३९ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे लक्ष्मीस्तवकवचपूजा
कथनं नाम द्वाविंशतितमोऽध्यायः ॥ २२ ॥ नारायण उवाच ॥ इन्द्रश्च गुरुणा सार्द्धं सुरैस्संहृष्टमानसः ॥ जागम शीघ्रं पद्मायै
तीरं क्षीरपयोनिधेः॥ कवचं च गले बद्ध्वा सद्रत्नगुटिकान्वितम् ॥ मनसा स्तवनं दिव्यं स्मारं स्मारं पुनः पुनः॥१॥ते सर्वे भक्तियुक्ता
श्च तुष्टुवुः कमलालयाम् ॥ साश्रुनेत्राश्च दीनाश्च भक्तिनम्रात्मकन्धराः ॥२॥ सा तेषां स्तवनं श्रुत्वा सद्यः साक्षाद्बभूव ह ॥ सहस्रदल
पद्मस्था शतचन्द्रसमप्रभा ॥ ३ ॥ जगद्व्याप्तं सुप्रभया जगन्मात्रं यया मुने ॥ तानुवाच जगद्धात्री हितं सारं यथोचितम् ॥ ४ ॥ श्री
महालक्ष्मीरुवाच॥वत्सा नेच्छामि वो गेहान्गन्तुं नैवं क्षमाऽधुना ॥ भ्रष्टान्दृष्ट्वा ब्रह्मशापाद्बिभेमि ब्रह्मशापतः ॥५॥ प्राणा मे ब्राह्मणाः
सर्वे शश्वत्पुत्राधिकं प्रियाः ॥ विप्रदत्तं च यत्किञ्चिदुपजीव्यं सदैव च ॥ ६ ॥ विप्रा ब्रुवन्तु मां तुष्टा यास्यामि भवदाज्ञया ॥ न मे
पूजां ध्रुवं कर्तुं क्षमास्ते च तपस्विनः ॥ ७ ॥ गुरुभिर्ब्राह्मणैर्देवैर्भिक्षुभिर्वैष्णवैस्तथा ॥ यद्यभाग्यं भवेद्दैवात्ते शप्ताः सन्ति तैस्सदा ॥ ८॥
नारायणश्च भगवान्बिभेति ब्रह्मशापतः ॥ सर्वबीजं च भगवान्सर्वेशश्च सनातनः ॥ ९ ॥ एतस्मिन्नन्तरे ब्रह्मन्ब्राह्मणा हृष्टमानसाः॥
आजग्मुः सस्मिताः सर्वे ज्वलन्तो ब्रह्मतेजसा॥१०॥अंगिराश्च प्रचेताश्च क्रतुश्च भृगुरेव च ॥ पुलहश्च पुलस्त्यश्च मरीचिश्चात्रि
रेव च ॥ ११॥ सनकश्च सनन्दश्च तृतीयश्च सनातनः ॥ सनत्कुमारो भगवान्साक्षान्नारायणात्मकः ॥ १२ ॥ कपिलश्चासुरिश्चैव
वोढुः पञ्चशिखस्तथा ॥ दुर्वासाः कश्यपोऽगस्त्यो गौतमः कण्व एव च ॥ १३ ॥ और्वः कात्यायनश्चैव कणादः पाणिनिस्तथा ॥

मार्कण्डेयो लोमशश्च वसिष्ठो भगवान्स्वयम् ॥ १४ ॥ ब्राह्मणा विविधैर्द्रव्यैः पूजयामासुरीश्वरीम् ॥ देवाश्चारण्यनैवेद्यैरुपहारेण
भक्तितः ॥ १५ ॥ स्तुत्वा मुनीन्द्रास्तां भक्त्या चक्रुराराधनं मुदा ॥ आगच्छ देवभवनं मर्त्यं च जगदम्बिके ॥ १६ ॥ तेषां
तद्वचनं श्रुत्वा तानुवाच जगत्प्रसूः ॥ परितुष्टा गाङ्गुकी च निर्भया ब्राह्मणाज्ञया ॥ १७ ॥ श्रीमहालक्ष्मीरुवाच ॥ गृहान्यास्यामि
देवानां युष्माकं चाज्ञया द्विजाः ॥ येषां गेहं न गच्छामि शृणुध्वं भारतेषु च ॥ १८ ॥ स्थिरा पुण्यवतां गेहे सुनीतिपथवेदिनाम्॥
गृहस्थानां नृपाणां वा पुत्रवत्पालयामि तान् ॥ १९ ॥ यं यं रुष्टो गुरुर्देवो माता तातश्च बान्धवाः ॥ अतिथिः पितृलोकश्च यामि
तस्य न मन्दिरम् ॥ २० ॥ मिथ्यावादी च यः शश्वदनध्यायी च यः सदा ॥ सत्त्वहीनश्च दुश्शीलो न गेहं तस्य याम्यहम्॥२१॥
सत्यहीनः स्थाप्यहारी मिथ्यासाक्ष्यप्रदायकः ॥ विश्वासघ्नः कृतघ्नो यो यामि तस्य न मन्दिरम् ॥२२॥ चिन्ताग्रस्तो भयग्रस्तः
शत्रुग्रस्तोऽतिपातकी ॥ ऋणग्रस्तोऽतिकृपणो न गेहं यामि पापिनाम् ॥२३॥ दीक्षाहीनश्च शोकार्त्तो मन्दधीः स्त्रीजितः सदा ॥ न
याम्यपि कदा गेहं पुंश्चल्याः पतिपुत्रयोः ॥ २४ ॥ यो दुर्वाक्कलहाविष्टः कलिः शश्वद्यदालये ॥ स्त्री प्रधाना गृहे यस्य यामि तस्य
न मन्दिरम् ॥ २५ ॥ यत्र नास्ति हरेः पूजा तदीयगुणकीर्त्तनम् ॥ नोत्सुकस्तत्प्रशंसायां यामि तस्य न मन्दिरम् ॥ २६ ॥
कन्यान्नवेदविक्रेता नरघाती च हिंसकः ॥ नरकागारसदृशं यामि तस्य न मन्दिरम् ॥ २७ ॥ मातरं पितरं भार्यां गुरुपत्नीं गुरुं
सुतम् ॥ अनाथां भगिनीं कन्यामनन्याश्रयबान्धवान् ॥ २८ ॥ कार्पण्याद्यो न पुष्णाति सञ्चयं कुरुते सदा ॥ तद्गेहान्नरकागारा
न्यामि तान्न मुनीश्वराः ॥ २९ ॥ दशनं वसनं यस्य समलं रूक्षमस्तकम् ॥ विकृतौ ग्रासहासौ च यामि तस्य न मन्दिरम्॥३०॥
मूत्रं पुरीषमुत्सृज्य यस्तत्पश्यति मन्दधीः ॥ यः शेते स्निग्धपादेन यामि तस्य न मन्दिरम् ॥ ३१ ॥ अधौतपादशायी यो नग्नः
शेतेऽतिनिद्रितः ॥ सन्ध्याशायी दिवाशायी यामि तस्य न मन्दिरम् ॥ ३२ ॥ मूर्ध्नि तैलं पुरो दत्त्वा योऽन्यदङ्गमुपस्पृशेत् ॥
ददाति पश्चाद्गात्रे वा यामि तस्य न मन्दिरम् ॥ ३३ ॥ दत्त्वा तैलं मूर्ध्नि गात्रे विण्मूत्रं यः समुत्सृजेत् ॥ प्रणमेदाहरेत्पुष्पं यामि

तस्य न मन्दिरम् ॥ ३४ ॥ तृण छिनत्ति नखरैर्नखरैर्विलिखेन्महीम् ॥ गात्रे पादे मलं यस्य यामि तस्य न मन्दिरम् ॥ ३५ ॥ स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं सुरस्य च ॥ यो हरेज्ज्ञानशीलश्च यामि तस्य न मन्दिरम् ॥ ३६ ॥ यत्कर्म दक्षिणाहीनं कुरुते मूढधीः शठः ॥ स पापी पुण्यहीनश्च यामि तस्य न मन्दिरम् ॥ ३७ ॥ मन्त्रविद्योपजीवी च ग्रामयाजी चिकित्सकः ॥ सूपकृद्देवलश्चैव यामि तस्य न मन्दिरम् ॥ ३८ ॥ विवाहं धर्मकार्य्यं वा यो निहन्ति च कोपतः ॥ दिवामैथुनकारी यो यामि तस्य न मन्दिरम् ॥३९॥ इत्युक्त्वा सा महालक्ष्मीरन्तर्द्धानं जगाम ह ॥ ददौ दृष्टिं च देवानां गृहे मर्त्ये च नारद ॥४०॥ तां प्रणम्य सुराः सर्वे मुनयश्च मुदाऽन्विताः ॥ प्रजग्मुः स्वालयं शीघ्रं शत्रुत्यक्तं सुहृद्युतम् ॥४१॥ नेदुर्दुन्दुभयः स्वर्गे बभूवुः पुष्पवृष्टयः॥प्रापुर्देवाः स्वराज्यं च निश्चलां कमलां मुने ॥ ४२ ॥ इत्येवं कथितं वत्स लक्ष्मीचरितमुत्तमम् ॥ सुखदं मोक्षदं सारं किं पुनः श्रोतुमिच्छसि ॥ ४३ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे गणपतेर्गजास्यत्वकारणलक्ष्मीब्राह्मणविरोधादिलक्ष्मीचरित्रकथनं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

नारद उवाच ॥ नारायण महाभाग हरेरंशसमुद्भव ॥ सर्वं श्रुतं त्वत्प्रसादाद्गणेशचरितं शुभम् ॥१॥ दन्तद्वययुतं वक्त्रं गजराजस्य बालके ॥ विष्णुना योजितं ब्रह्मन्नेकदन्तः कथं शिशुः ॥२॥ कुतो गतोऽस्य दन्तोऽन्यस्तद्भवान्वक्तुमर्हति ॥ सर्वेश्वरस्त्वं सर्वज्ञः कृपावान्भक्तवत्सलः ॥ ३ ॥ सूत उवाच ॥ नारदस्य वचः श्रुत्वा स्मेराननसरोरुहः ॥ एकदन्तस्य चरितं प्रवक्तुमुपचक्रमे ॥ ४ ॥ नारायण उवाच ॥ शृणु नारद वक्ष्येऽहमितिहासं पुरातनम् ॥ एकदन्तस्य चरितं सर्वमंगलमंगलम् ॥ ५ ॥ एकदा कार्त्तवीर्य्यश्च जगाम मृगयां मुने ॥ मृगान्निहत्य बहुलान्परिश्रान्तो बभूव सः ॥ ६ ॥ निशामुखे दिनेऽतीते तत्र तस्थौ वने नृपः ॥ जमदग्न्याश्रमाभ्याशे चोपोष्यानीकसंयुतः ॥७॥ प्रातः सरोवरे राजा स्नातः शुचिरलंकृतः ॥ तदाऽऽत्रेयेण दत्तं च ह्यजपद्भक्तितो मनुम् ॥ ८ ॥ मुनिर्ददर्श राजानं शुष्ककण्ठौष्ठतालुकम् ॥ प्रीत्याऽऽदरेण मृदुलं पप्रच्छ कुशलं मुनिः ॥ ९ ॥ ननाम सम्भ्रमाद्राजा मुनिं सूर्य्यसमप्रभम् ॥ स च तस्मै ददौ प्रीत्या प्रणताय शुभाशिषः ॥ १० ॥

वृत्तान्तं कथयामास राजा चानशनादिकम् ॥ संभ्रमेणैव मुनिना त्रस्तो राजा निमन्त्रितः ॥ ११ ॥ विज्ञाप्य तं मुनिश्रेष्ठः प्रययौ स्वालयं मुदा ॥ एतद्वृत्तं कामधेनुं कथयामास भीतवत् ॥१२॥ उवाच सा मुनिं भीतं भयं किं ते मम स्थितौ ॥ जगद्भोजयितुं शक्तस्त्वं मया को नृपो मुने ॥ १३ ॥ राजभोजनयोग्यार्हं यद्यद्द्रव्यं प्रयाचसे ॥ सर्वं तुभ्यं प्रदास्यामि त्रिषु लोकेषु दुर्लभम् ॥ १४ ॥ सौवर्णानि च रौप्याणि पात्राणि विविधानि च ॥ भोजनार्हाण्यसंख्यानि पाकपात्राणि यानि च ॥ १५ ॥ पात्राणि स्वादुपूर्णानि प्रददौ मुनये च सा ॥ नानाविधानि स्वादूनि परिपक्वफलानि च ॥ १६ ॥ पनसाम्रश्रीफलानि नारिकेलादिकानि च ॥ राशीभूतान्यसंख्यानि स्वादुलड्डुकराशयः ॥ १७ ॥ यवगोधूमचूर्णानां भक्ष्याणि विविधानि च ॥ पक्वान्नानां पर्वतांश्च परमान्नस्य कन्दरान् ॥ १८ ॥ दुग्धानां च घृतानां च नदीर्दध्नां ददौ मुदा ॥ शर्कराणां तथा राशिं मोदकानां च पर्वतान् ॥ १९ ॥ पृथुकानां सुशालीनां पर्वतान्प्रददौ मुदा ॥ ताम्बूलं च ददौ पूर्णं कर्पूरादिसुवासितम् ॥ २० ॥ नृपयोग्यं कौतुकाच्च सुन्दरं वस्त्रभूषणम् ॥ मुनिः सम्भृतसम्भारो दत्त्वा द्रव्यं मनोहरम् ॥ २१ ॥ भोजयामास राजानं ससैन्यमपि लीलया ॥ यद्यत्सुदुर्लभं वस्तु परिपूर्णं नृपेश्वरः ॥ जगाम विस्मयं राजा दृष्ट्वा पात्राण्युवाच ह ॥ २२ ॥ राजोवाच ॥ द्रव्याण्येतानि सचिव दुर्लभान्यश्रुतानि च ॥ ममासाध्यानि सहसा क्वागतान्यवलोकय ॥ २३ ॥ नृपाज्ञया च सचिवः सर्वं दृष्ट्वा मुनेर्गृहे ॥ राजानं कथयामास वृत्तान्तं महदद्भुतम् ॥ २४ ॥ सचिव उवाच ॥ दृष्टं सर्वं महाराज निबोध मुनिमन्दिरम् ॥ वह्निकुण्डं यज्ञकाष्ठकुशपुष्पफलान्वितम् ॥२५॥ कृष्णचर्मस्रुवस्रुग्भिः शिष्यसंघैश्च संकुलम् ॥ तैजसाधारसस्यादिसर्वसम्पद्विवर्जितम् ॥ २६ ॥ वृक्षचर्मपरीधाना दृष्टाः सर्वे जटाधराः ॥ गृहैकदेशे दृष्टा सा कपिलैका मनोहरा ॥ २७ ॥ चार्वंगी चन्द्रवर्णाभा रक्तपङ्कजलोचना ॥ ज्वलन्ती तेजसा तत्र पूर्णचन्द्रसमप्रभा ॥ २८ ॥ सर्वसम्पद्गुणाधारा साक्षादिव हरिप्रिया ॥ इत्येवं बोधितो राजा दुर्बुद्धिः सचिवाज्ञया ॥ २९ ॥ मुनिं ययाचे तां धेनुं निबद्धः कालपाशतः ॥ किं वा पुण्यं च का बुद्धिः कः कालः सर्वतो बली॥३०॥पुण्यवान्बुद्धिमान्दैवाद्राजेन्द्रो

ऽयाचत द्विजम् ॥ पुण्यात्प्रजायते कर्म पुण्यरूपं च भारते ॥ ३१ ॥ पापात्प्रजायते कर्म पापरूपं भयावहम् ॥ पुण्यात्कृत्वा स्वर्ग
भोगं जन्म पुण्यस्थले नृणाम् ॥ ३२ ॥ पापाद्भुक्त्वा च नरकं कुत्सितं जन्म जीविनाम् ॥ जीविनां निष्कृतिर्नास्ति स्थिते कर्मणि
नारद ॥ ३३ ॥ तेन कुर्वन्ति सन्तश्च सन्ततं कर्मणः क्षयम् ॥ सा विद्या तत्तपो ज्ञानं स गुरुः स च बान्धवः ॥ ३४ ॥ सा माता
स पिता पुत्रस्तत्क्षयं कारयेत्तु यः ॥ जीविनां दारुणो रोगः कर्मभोगः शुभाशुभः ॥ ३५ ॥ भक्तवैद्यस्तं निहन्ति कृष्णभक्तिरसा
यनात् ॥ माया ददाति तां भक्तिं प्रतिजन्मनि सेविता ॥ ३६ ॥ परितुष्टा जगद्धात्री भक्तेभ्यो बुद्धिदायिनी ॥ परा परम
भक्ताय माया यस्मै ददाति च ॥३७॥ मायां तस्मै मोहयितुं न विवेकं कदाचन ॥ मायाविमोहितो राजा मुनिमानीय यत्नतः ॥
॥ ३८ ॥ उवाच विनयाद्भक्त्या कृताञ्जलिपुटो मुदा ॥ ३९ ॥ राजोवाच ॥ देहि भिक्षां कल्पतरो कामधेनुं च कामदाम् ॥ मह्यं भ
क्ताय भक्तेश भक्तानुग्रहकारक ॥४०॥ युष्मद्विधानां दातॄणामदेयं नास्ति भारते ॥ दधीचिर्देवताभ्यश्च ददौ स्वास्थि पुरा श्रुतम् ॥
॥ ४१ ॥ भ्रूभंगलीलामात्रेण तपोराशे तपोधन ॥ समूहं कामधेनूनां स्रष्टुं शक्तोऽसि भारते ॥ ४२ ॥ मुनिरुवाच ॥ अहो व्यतिक्रमं
राजन्ब्रवीषि शठ वञ्चक ॥ दानं दास्यामि विप्रोऽहं क्षत्रियाय कथं नृप ॥ ४३ ॥ कृष्णेन दत्ता गोलोके ब्रह्मणे परमात्मना ॥
कामधेनुरियं यज्ञे न देया प्राणतः प्रिया ॥ ४४ ॥ ब्रह्मणा भृगवे दत्ता प्रियपुत्राय भूमिप ॥ मह्यं दत्ता च भृगुणा कपिला पैतृकी
मम ॥४५॥ गोलोकजा कामधेनुर्दुर्लभा भुवनत्रये॥लीलामात्रात्कथमहं कपिलां स्रष्टुमीश्वरः ॥ ४६ ॥ नाहं रे हालिको मूढस्तुत्या
नोत्थापितो बुधः ॥ क्षणेन भस्मसात्कर्तुं क्षमोऽहमतिथिं विना ॥ ४७ ॥ गृहं गच्छ गृहं गच्छ मे कोपं नैव वर्द्धय ॥ पुत्र
दारादिकं पश्य दैवबाधित पामर ॥४८॥ मुनेस्तद्वचनं श्रुत्वा चुकोप स नराधिपः ॥ नत्वा मुनिं सैन्यमध्यं प्रययौ विधिबाधितः ॥
॥ ४९ ॥ गत्वा सैन्यसकाशं स कोपप्रस्फुरिताधरः ॥ किङ्करान्प्रेषयामास धेनुमानयितुं बलात् ॥ ५० ॥ कपिलासन्निधिं
गत्वा रुरोद मुनिपुंगवः ॥ कथयामास वृत्तान्तं शोकेन हतचेतनः ॥ ५१ ॥ रुदन्तं ब्राह्मणं दृष्ट्वा सुरभिस्तमुवाच ह ॥ साक्षाल्लक्ष्मी

स्वरूपा सा भक्तानुग्रहकारिका ॥९२॥ सुरभिरुवाच ॥ इन्द्रो वा हालिको वाऽपि वस्तु स्वं दातुमीश्वरः ॥ शास्ता पालयिता दाता
स्ववस्तूनां च सन्ततम् ॥९३॥ स्वेच्छया चेन्नृपेन्द्राय मां ददासि तपोधन ॥ तेन सार्द्धं गमिष्यामि स्वेच्छया च तवाज्ञया ॥९४॥
अथवा न ददासि त्वं न गमिष्यामि ते गृहात् ॥ मत्तो दत्तेन सैन्येन दूरीकुरु नृपं द्विषम् ॥ ९५ ॥ कथं रोदिषि सर्वज्ञ मायामोहि
तचेतनः ॥ संयोगश्च वियोगश्च कालसाध्यो न चात्मनः ॥ ९६ ॥ त्वं वा को मे तवाहं का सम्बन्धः कालयोजितः ॥ यावदेव हि
सम्बन्धो ममत्वं तावदेव हि ॥९७॥ मनो जानाति यद्द्रव्यमात्मीयं चेति केवलम् ॥ दुःखं च तस्य विच्छेदाद्यावत्स्वत्वं च तत्र वै ॥
॥ ९८ ॥ इत्युक्त्वा कामधेनुश्च सुषाव विविधानि च ॥ शस्त्राण्यस्त्राणि सैन्यानि सूर्यतुल्यप्रभाणि च ॥९९॥ निर्गताः कपिलावक्त्रा
त्त्रिकोटयः खड्गधारिणाम् ॥ विनिस्सृता नासिकायाः शूलिनः पञ्च कोटयः ॥ ६० ॥ विनिस्सृता लोचनाभ्यां शतकोटिधनुर्द्धराः॥
कपालान्निस्सृता वीरास्त्रिकोटयो दण्डधारिणाम् ॥ ६१ ॥ वक्षस्स्थलान्निस्सृताश्च त्रिकोटयश्शक्तिधारिणाम् ॥ शतकोटयो गदा
हस्ताः पृष्ठदेशाद्विनिर्गताः॥६२॥विनिस्सृताः पादतलाद्वाद्यभाण्डाः सहस्रशः ॥ जंघादेशान्निस्सृताश्च त्रिकोटयो राजपुत्रकाः ॥ ६३ ॥
विनिर्गता गुह्यदेशात्त्रिकोटिम्लेच्छजातयः॥दत्त्वा सैन्यानि कपिला मुनये चाभयं ददौ॥युद्धं कुर्वन्तु सैन्यानि त्वं न याहीत्युवाच ह॥६४॥
मुनिः सम्भृतसम्भारैर्हर्षयुक्तो बभूव ह॥नृपेण प्रेरितो भृत्यो नृपं सर्वमुवाच ह॥६५॥कपिलासैन्यवृत्तान्तमात्मवर्गपराजयम्॥तच्छ्रुत्वा
नृपशार्दूलस्त्रस्तः कातरमानसः ॥ दूतान्संप्रेष्य सैन्यानि चाजहार स्वदेशतः॥६६॥इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे
नारदनारायणसंवाद एकदन्तत्वप्रश्नप्रसङ्गे जदमग्निकार्त्तवीर्ययुद्धारंभवर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ नारायण उवाच ॥ हरिं
स्मरन्कार्तवीर्य्यो हृदयेन विदूयता ॥ दूतं प्रस्थापयामास कुपितो मुनिसन्निधिम् ॥ १ ॥ युद्धं देहि मुनिश्रेष्ठ किं वा धेनुं च वाञ्छि
ताम् ॥ मह्यं भृत्यायातिथये सुविचार्य्य यथोचितम् ॥२॥ दूतस्य वचनं श्रुत्वा जहास मुनिपुंगवः ॥ हितं सत्यं नीतिसारं सर्वं दूत
मुवाच ह ॥ ३ ॥ मुनिरुवाच ॥ हृष्टो नृपो निराहारः समानीतो मया गृहम् ॥ विविधं च यथाशक्त्या भोजितश्च यथोचितम् ॥ ४ ॥

कपिलां याचते राजा मम प्राणाधिकां प्रियाम् ॥ तां दातुमक्षमो दूत युद्धं दास्यामि निश्चितम् ॥ ५ ॥ मुनेस्तद्वचनं श्रुत्वा दूतः सर्वमुवाच ह ॥ नृपेन्द्रं च सभामध्ये सन्नाहैस्संयुतं भिया ॥६॥ मुनिश्च कपिलामाह साम्प्रतं किङ्करोम्यहम् ॥ कर्णधारं विना नौका तथा सैन्यं विना मया॥७॥कपिला च ददौ तस्मै शस्त्राणि विविधानि च॥युद्धशास्त्रोपदेशं च सन्धानं चौपयोगिकम्॥८॥जयं भवतु ते विप्र युद्धे जेष्यसि निश्चितम् ॥ तव मृत्युर्न भविता सत्यमस्त्रं विना मुने ॥९ ॥ नृपेण सार्द्धं ते युद्धमयुक्तं ब्राह्मणस्य च ॥ दत्तात्रेयस्य शिष्येण व्यर्थं वै शक्तिधारिणा ॥ इत्युक्ता कपिला ब्रह्मन्विरराम मनस्विनी ॥ १० ॥ मुनिर्मनस्वी सैन्यं च सज्जीकृत्य ततो मुने ॥ गृहीत्वा सर्वसैन्यं च स जगाम रणाजिरम्॥११॥राजा जगाम युद्धाय ननाम मुनिपुंगवम् ॥ उभयोः सैन्ययोर्युद्धं बभूव बहुदुष्करम् ॥ १२ ॥ राजसैन्यं जितं सर्वं कपिलासेनया बलात् ॥ विचित्रं च रथं राज्ञो बभञ्जे लीलया रणे ॥ १३ ॥ धनुश्चिच्छेद सज्यं तत्सा सेना कापिली मुदा ॥ नृपेन्द्रः कापिलेयानि जेतुं सैन्यानि चाक्षमः ॥ १४ ॥ सैन्यानि तं शस्त्रवृष्ट्या न्यस्तशस्त्रं चकार ह ॥ शरवृष्ट्या शस्त्रवृष्ट्या राजा मूर्च्छामवाप ह ॥ १५ ॥ किञ्चिच्छिष्टं बलं राज्ञः किंचिदेव पलायितम् ॥ मुनीन्द्रो मूर्च्छितं दृष्ट्वा नृपेन्द्रमतिथिं मुने ॥ १६ ॥ कृपानिधिश्च कृपया तत्सैन्यं सञ्जहार च ॥ गत्वा सैन्यं विलीनं च कपिलायां च कृत्रिमम् ॥ १७ ॥ नृपाय मुनिना शीघ्रं दत्ताश्चरणरेणवः ॥ आशीर्वादं प्रदत्तं च जयोऽस्त्विति कृपालुना ॥ कमण्डलु जलं प्रोक्ष्य जीवयामास तं नृपम् ॥ १८ ॥ स राजा चेतनां प्राप्य समुत्थाय रणाजिरात् ॥ मूर्ध्ना ननाम भक्त्या च मुनिश्रेष्ठं कृताञ्जलिः ॥ १९ ॥ मुनिः शुभाशिषं दत्त्वा राजानं त्वालिलिङ्ग सः ॥ पुनस्तं स्नापयित्वा च भोजयामास यत्नतः ॥ २० ॥ नवनीतं हि हृदयं ब्राह्मणानां तु सन्ततम् ॥ अन्येषां क्षुरधाराभमसाध्यं दारुणं सदा ॥ उवाच तं मुनिश्रेष्ठो गृहं गच्छ धराधिप॥ ॥ २१ ॥ राजोवाच ॥ रणं देहि महाबाहो धेनुं किं वा मयेप्सिताम् ॥ २२ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे जमदग्निकार्तवीर्यार्जुनयुद्धवर्णनं नाम पञ्चविंशोऽध्यायः ॥ २५ ॥ नारायण उवाच ॥ हरिं स्मरन्मुनिश्रेष्ठो

वाक्यं श्रुत्वा च भूभृतः ॥ हितं सत्यं नीतिसारं प्रवक्तुमुपचक्रमे ॥ १ ॥ मुनिरुवाच ॥ गृहं गच्छ महाभाग रक्ष धर्मं सनातनम् ॥ सर्वसम्पत्स्थिरा शश्वत्स्थिते धर्मे सुनिश्चितम्॥२॥त्वां च दृष्ट्वा निराहारं समानीय गृहं नृप॥तव पूजामकरवं यथाशक्ति विधानतः॥३॥ साम्प्रतं मूर्छितं दृष्ट्वा पादरेणुं शुभाशिषम् ॥ अददां चेतयाञ्चक्रे वक्तुमेवोचितं न च ॥ ४ ॥ नृपस्तद्वचनं श्रुत्वा प्रणम्य मुनिपुंगवम् ॥ रथमन्यं त्वारुरोह युद्धं देहीत्युवाच ह ॥५॥ मुनिः कृत्वा च सन्नाहं तं योद्धुमुपचक्रमे ॥ राजा तं युयुधे तत्र कोपेनाहतचेतनः ॥ ६ ॥ कपिलादत्तशस्त्रेण न्यस्तशस्त्रं चकार तम् ॥ कपिलादत्तया शक्त्या पुनर्मूर्च्छामवाप च ॥ ७ ॥ पुनश्च चेतनां प्राप्य राजा राजीवलोचनः ॥ मुनिना युयुधे तत्र कोपेन पुनरेव च ॥ ८ ॥ आग्नेयं योजयामास समरे नृपपुंगवः ॥ मुनिर्निर्वापयामास वारुणेन च लीलया ॥ ९ ॥ नृपेन्द्रो वारुणास्त्रं च चिक्षेप समरे मुनौ ॥ वायव्यास्त्रेण स मुनिः शमयामास लीलया ॥ १० ॥ वायव्यास्त्रं नृपश्रेष्ठश्चिक्षेप समरे तदा ॥ गान्धर्वेण मुनिश्रेष्ठः शमयामास तत्क्षणम् ॥ ११ ॥ नागास्त्रं च नृपश्रेष्ठश्चिक्षेप रणमूर्द्धनि ॥ गारुडेन मुनिश्रेष्ठो निजघान क्षणान्मुदा ॥ १२ ॥ माहेश्वरं महास्त्रं च शतसूर्य्यसमप्रभम् ॥ चिक्षेप नृपतिश्रेष्ठो द्योतयन्तं दिशो दश ॥१३॥ वैष्णवास्त्रेण दिव्येन त्रिलोकव्यापकेन च ॥ मुनिर्निर्वापयामास बहुयत्नेन नारद ॥१४॥ मुनिर्नारायणास्त्रं च चिक्षिपे मन्त्रपूर्वकम् ॥ शस्त्रं दृष्ट्वा महाराजो ननाम शरणं ययौ ॥ १५ ॥ ऊर्ध्वं च भ्रमणं कृत्वा क्षणं दीप्त्वा दिशो दश ॥ प्रलयाग्निसमं तत्र स्वयमन्तरधीयत ॥१६॥ जृम्भणास्त्रं च स मुनिश्चिक्षेप रणमूर्द्धनि ॥ निद्रां प्रापत्तेन राजा सुष्वाप च मृतो यथा॥१७॥ दृष्ट्वा नृपं निद्रितं तं चार्द्धचन्द्रेण तत्क्षणम् ॥ चिच्छेद सारथिं यानं धनुर्बाणं मुनिस्तदा ॥ १८॥ मुकुटं च क्षुरप्रेण च्छत्रं सन्नाहमेव च ॥ अस्त्रं तूणं वाजिगणं विविधे न च भूभृतः ॥ १९ ॥ मुनिस्तत्सचिवान्सर्वान्नागास्त्रेणैव लीलया ॥ निबध्य स्थापयामास प्रहस्य समरस्थले ॥२०॥ मुनिस्तं बोधयामास सुमन्त्रेणैव लीलया ॥ निबद्धसर्वामात्यानां दर्शयामास भूमिपम् ॥ २१ ॥ दर्शयित्वा नृपं तांश्च मोचयामास तत्क्षणम्॥ नृपेन्द्रमाशिषं कृत्वा गृहं गच्छेत्युवाच ह ॥२२॥ राजा कोपात्समुत्थाय शूलमुद्यम्य यत्नतः ॥ चिक्षेप

तं मुनिश्रेष्ठं मुनिः शक्त्या जघान तम् ॥२३॥ एतस्मिन्नन्तरे ब्रह्मा समागत्य रणस्थलम् ॥ स प्रीतिं जनयामास सुनीत्या च परस्परम् ॥२४॥ मुनिर्ननाम ब्रह्माणं सन्तुष्टश्च रणस्थले ॥ राजा नत्वा विधिं चर्षिं स्वपुरं प्रययौ तदा ॥२५॥ मुनिर्ययौ स्वाश्रमं च स्वलोकं कमलोद्भवः ॥ इत्येवं कथितं किंचिदपरं कथयामि ते ॥२६॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे जमदग्निकार्तवीर्ययुद्धोपशमवर्णनं नाम षड्विंशोऽध्यायः ॥ २६ ॥ नारायण उवाच ॥ हरिं स्मृत्वा गृहं गत्वा राजा विस्मितमानसः ॥ आजगाम महारण्ये जमदग्न्याश्रमं पुनः ॥ १ ॥ रथानां च चतुर्लक्षं रथिनां दशलक्षकम् ॥ अश्वेन्द्राणां गजेन्द्राणां पदातीनामसंख्यकम् ॥२॥ राजेन्द्राणां सहस्रं च महाबलपराक्रमम् ॥ महासमृद्धियुक्तश्च त्रैलोक्यं जेतुमीश्वरः ॥३॥ सर्वतो वेष्टयामास जमदग्न्याश्रमं मुदा ॥ रथस्थो वर्मयुक्तश्च कार्त्तवीर्य्यार्जुनः स्वयम् ॥ ४ ॥ सैन्यशब्दैर्वाद्यशब्दैर्महाकोलाहलैर्मुने ॥ जमदग्न्याश्रमस्थाश्च मूर्च्छामापुर्भयेन च ॥ ५ ॥ कुटीं प्रविश्य बलवान्गृहीत्वा कपिलां शुभाम् ॥ पुरं गन्तुं मनश्चक्रे दुर्बुद्धिरसदाश्रयः ॥ ६ ॥ समुत्तस्थौ मुनिश्रेष्ठो गृहीत्वा सशरं धनुः ॥ एकाकी मुक्तगात्रश्च धेनुं नत्वा हरिं स्मरन् ॥७॥ आश्रमस्थाञ्जनान्सर्वान्समाश्वास्य च यत्नतः ॥ आजगाम रणस्थानं निश्शङ्को नृपतेः पुरः ॥८॥ निर्ममे शरजालं च स मुनिर्मन्त्रपूर्वकम् ॥ आच्छादयत्स्वाश्रमं तैर्मानवं वर्मणा यथा ॥ ९ ॥ अपरं शरजालं च निर्ममे मुनिपुङ्गवः ॥ तैरेव वारयामास सर्वसैन्यं यथाक्रमम् ॥ १० ॥ मुनिना शरजालेन सर्वसैन्यं समावृतम् ॥ तानि सर्वाणि गुप्तानि यथा पत्राणि पञ्जरे ॥ ११ ॥ राजा दृष्ट्वा मुनिश्रेष्ठमवरुह्य रथात्पुरः ॥ सार्द्धं नृपेन्द्रैर्भक्त्या च प्रणनाम कृताञ्जलिः॥१२॥ नत्वाऽऽरुरोह यानं स मुनेः प्राप्य शुभाशिषः ॥ आरुह्य च नृपश्रेष्ठः स्वयानं हृष्टमानसः ॥ ॥१३॥नृपैः सार्द्धं नृपश्रेष्ठश्चिक्षेप मुनिपुङ्गवे॥अस्त्रं शस्त्रं गदां शक्तिं जघान क्रीडया मुनिः ॥ मुनिश्चिक्षेप दिव्यास्त्रं चिच्छिदे लीलया नृपः ॥ १४ ॥ शूलं चिक्षेप नृपतिस्तज्जघान तदा मुनिः ॥ अपरं शरजालं च निर्ममे मुनिपुङ्गवः ॥ १५ ॥ शस्त्रौघैर्दुर्निवार्य्यैश्च खण्डं खण्डं चकार च सः ॥ निबद्धाश्शरजालेन न च शक्ताः पलायितुम् ॥ १६ ॥ जृम्भणास्त्रेण मुनिना ते च सर्वे विजृ

म्भिताः ॥ हस्त्यश्वरथपादातसहितं सर्वसैन्यकम् ॥१७॥ राजानं निद्रितं दृष्ट्वा न जघान मुनीश्वरः ॥ गृहीत्वा कपिलां हृष्टो रुदन्तीं शोकमूर्च्छिताम् ॥ बोधयित्वा पुरः कृत्वा स्वाश्रमं गन्तुमुद्यतः ॥ १८ ॥ एतस्मिन्नन्तरे राजा चेतनां प्राप्य नारद ॥ निवारयामास मुनिं गृहीत्वा सशरं धनुः ॥ १९ ॥ जगाम कपिला त्रस्ता स्वस्थानं च रणाजिरात् ॥ मुनिश्च तस्थौ निश्शङ्को गृहीत्वा सशरं धनुः ॥ २० ॥ ब्रह्मास्त्रं च नृपश्रेष्ठः स चिक्षेप मुनौ तदा ॥ ब्रह्मास्त्रेण मुनीन्द्रस्य सद्यो निर्वाणतां गतम् ॥२१॥ दिव्यास्त्रेण मुनिश्रेष्ठो नृपस्य सशरं धनुः ॥ रथं च सारथिं चैव चिच्छिदे वर्म दुर्वहम् ॥ २२ ॥ अथ राजा महाक्रुद्धो ददर्श स्वसमीपतः ॥ दत्तेन दत्तां शक्तिं तामेकपूरुषघातिनीम् ॥२३॥ जग्राह नत्वा दत्तं तं स नत्वा शक्तिमुल्बणाम् ॥ चूर्णयामास तत्रैव शतसूर्य्यसमप्रभाम् ॥ ॥ २४ ॥ यत्तेजः सर्वदेवानां तेजो नारायणस्य च ॥ शम्भोश्च ब्रह्मणश्चैव मायायाश्चैव नारद ॥ २५ ॥ तत्रैवावाहयामास स योगी मन्त्रपूर्वकम् ॥ तेजसा द्योतयामास गगनं च दिशो दश ॥२६॥ दृष्ट्वा क्षिपन्तीं तां देवा हाहाकारेण चुक्रुशुः ॥ आकाशस्थाश्च समरं पश्यन्तो दुःखिता हृदा ॥ २७ ॥ चिक्षेप तां चूर्णयित्वा कार्तवीर्य्यार्जुनः स्वयम् ॥ सद्यः पपात सा शक्तिर्ज्वलन्ती मुनिवक्षसि ॥ २८ ॥ विदार्य्योरो मुनेः शक्तिर्जगाम हरिसन्निधिम् ॥ दत्ताय हरिणा दत्ता शस्त्रास्त्रनिधये तदा ॥ २९ ॥ मूर्च्छां सम्प्राप्य स मुनिः प्राणांस्तत्याज तत्क्षणम् ॥ तेजोऽम्बरे भ्रमित्वा च ब्रह्मलोकं जगाम ह ॥३०॥ युद्धे मुनिं मृतं दृष्ट्वा रुरोद कपिला मुहुः॥ हे तात तातेत्युच्चार्य्य गोलोकं सा जगाम ह ॥ ३१ ॥ सर्वं सा कथयामास गोलोके कृष्णमीश्वरम् ॥ रत्नसिंहासनस्थं तं गोपैर्गोपीभिरावृतम् ॥ ३२ ॥ कृष्णेन ब्रह्मणे दत्ता ब्रह्मणा भृगवे पुरा ॥ सा प्रीत्या पुष्करे ब्रह्मन्भृगुणा जमदग्नये ॥ ३३ ॥ नत्वा च कामधेनूनां समूहं सा जगाम ह ॥ तदश्रुबिन्दुना मर्त्त्ये रत्नसंघो बभूव ह ॥३४॥ अथ राजा तं निहत्य बोधयित्वा स्वसैन्यकम् ॥ प्रायश्चित्तं विनिर्वर्त्य जगाम स्वपुरं मुदा ॥ ३५ ॥ प्राणनाथं मृतं श्रुत्वा जगाम रेणुका सती॥ मुनिं वक्षसि संस्थाप्य क्षणं मूर्च्छामवाप सा ॥ ३६ ॥ ततः सा चेतनां प्राप्य न रुरोद पतिव्रता ॥ एहि वत्स भृगो राम राम रामेत्युवाच ह ॥ ३७ ॥ आजगाम

भृगुस्तूर्णं क्षणार्द्धे पुष्करादहो ॥ ननाम मातरं भक्त्या मनीयायां च योगवित् ॥ ३८ ॥ दृष्ट्वा रामो मृतं तातं शोकार्तां जननीं
सतीम् ॥ आकर्ण्य रणवृत्तान्तं प्रयान्तीं कपिलां शुचा ॥ ३९ ॥ विललाप भृशं तत्र हे तात जननीति च ॥ चितां चकार योगी
न्द्रश्चन्दनैराज्यसंयुताम् ॥ ४० ॥ रेणुका राममादाय तूर्णं कृत्वा स्ववक्षसि ॥ चुचुम्ब गण्डे शिरसि रुरोदोच्चैर्भृशं मुहुः ॥ ४१ ॥
राम राम महाबाहो क्व यामि त्वां विहाय च ॥ वत्स वत्सेति कृत्वैवं विललाप भृशं मुहुः ॥ ४२ ॥ मत्प्राणाधिक हे वत्स मदीयं
वचनं शृणु ॥ पित्रोः शेषक्रियां कृत्वा याया युद्धं न पुत्रक ॥ ४३ ॥ गृहे तिष्ठ सुखं वत्स तपस्यां कुरु शाश्वतीम् ॥ समरं नैव
सुखदं दारुणैः क्षत्रियैः सह ॥ ४४ ॥ मातुर्वचनमश्रुत्वा प्रतिज्ञां तां चकार ह ॥ त्रिस्सप्तकृत्वो निर्भूपां करिष्यामि ध्रुवं महीम् ॥
॥ ४५ ॥ कार्तवीर्य्यं हनिष्यामि लीलया क्षत्रियाधमम् ॥ पितॄंश्च तर्पयिष्यामि क्षत्रियक्षतजैस्तथा ॥ ४६ ॥ इत्युदीर्य्य पुरो मातु
र्विललाप मुहुर्मुहुः ॥ हितं तथ्यं नीतिसारं बोधयामास मातरम् ॥ ४७ ॥ राम उवाच ॥ पितुः शासनहन्तारं पितुर्वधविधायकम् ॥
यो न हन्ति महामूढो रौरवं स व्रजेद् ध्रुवम् ॥४८॥ अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ॥ क्षेत्रदारापहारी च पितृबन्धुविहिंसकः
॥ ४९ ॥ सततं मन्दकारी च निन्दकः कटुजल्पकः॥ एकादशैते पापिष्ठा वधार्हा वेदसम्मताः ॥ ५० ॥ द्विजानां द्रविणादानं स्थाना
न्निर्वासनं सति ॥ वपनं ताडनं चैव वधमाहुर्मनीषिणः ॥ ५१ ॥ एतस्मिन्नन्तरे तत्र चाजगाम भृगुः स्वयम् ॥ अति
त्रस्तो मनस्वी च हृदयेन विदूयता ॥ ५२ ॥ दृष्ट्वा तं रेणुकारामौ विनतौ संबभूवतुः ॥ स ताबुवाच वेदोक्तं पर
लोकहिताय च ॥ ५३ ॥ भृगुरुवाच ॥ मद्वंशजातो ज्ञानी त्वं कथं विलपसे सुत ॥ जलबुद्बुदवत्सर्वं संसारे च
चराचरम् ॥ ५४ ॥ सत्यसारं सत्यबीजं कृष्णं चिन्तय पुत्रक ॥ यद् गतं तद्गतं वत्स गतं नैवागमिष्यति ॥ ५५ ॥
यद्भवेत्तद्भवत्येव भविता यद्भविष्यति ॥ पूर्वार्जितं स्वीयकर्म फलं केन निवार्य्यते ॥ ५६ ॥ भूतं भव्यं भविष्यं च यत्कृष्णेन
निरूपितम् ॥ निरूपितं यत्तत्कर्म केन वत्स निवार्यते ॥ ५७ ॥ मायाबीजं मायिनां च शरीरं पाञ्चभौतिकम् ॥ संकेतपूर्वकं नाम

प्रातः स्वप्नसमं सुत ॥ ५८ ॥ क्षुधा[1] निद्रा दया शान्तिः क्षमा कान्त्यादयस्तथा ॥ यान्ति प्राणा मनो ज्ञानं प्रयाते परमात्मनि
॥ ५९ ॥ बुद्धिश्च शक्तयः सर्वा राजेन्द्रमिव किंकराः ॥ सर्वे तमनुगच्छन्ति तं कृष्णं भज यत्नतः ॥ ६० ॥ के वा केषां च
पितरः के वा केषां सुताः सुत ॥ कर्मभिः प्रेरिताः सर्वे भवाब्धौ दुस्तरे परम् ॥ ६१ ॥ ज्ञानिनो मा रुदन्त्येव मा रोदीः पुत्र
साम्प्रतम् ॥ रोदनाश्रुप्रपतनान्मृतानां नरकं ध्रुवम् ॥ ६२ ॥ संकेताख्योच्चारणेन यद्वदन्ति च बान्धवाः ॥ शतवर्षं रुदित्वा तं
प्राप्नुवन्ति न निश्चितम् ॥ पार्थिवांशं च पृथिवी गृह्णात्यस्थित्वचादिकम् ॥ ६३ ॥ तोयांशं च तथा तोयं शून्यांशं गगनं तथा ॥
वाय्वंशं च तथा वायुस्तेजस्तेजोंशकं तथा ॥ ६४ ॥ सर्वे विलीनाः सर्वेषु को वाऽऽयास्यति रोदनात् ॥ नामश्रुतियशःकर्म
कथामात्रावशेषितः ॥ ६५ ॥ वेदोक्तं चैव यत्कर्म कुरु तत्पारलौकिकम् ॥ स च बन्धुः स पुत्रश्च परलोकहिताय यः ॥ ६६ ॥
भृगोस्तद्वचनं श्रुत्वा शोकं तत्याज तत्क्षणम् ॥ रेणुका च महासाध्वी तं वक्तुमुपचक्रमे ॥ ६७ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे
तृतीये गणपतिखण्डे नारदनारायणसंवादे जमदग्निसंहारपरशुरामप्रतिज्ञादिवर्णनं नाम सप्तविंशोऽध्यायः ॥ २७ ॥ रेणुकोवाच ॥
ब्रह्मन्ननुगमिष्यामि प्राणनाथस्य साम्प्रतम् ॥ ऋतोश्चतुर्थदिवसे मृतोऽयं चाद्य मानदः ॥ १ ॥ कर्त्तव्या का व्यवस्थाऽत्र वद वेद
विदां वर ॥ त्वमागतो मे सहसा पुण्येन कतिजन्मनाम् ॥२॥ भृगुरुवाच ॥ अहो पुण्यवतो भर्तुरनुगच्छ महासति ॥ चतुर्थदिवसे
शुद्धं स्वामिनः सर्वकर्मसु ॥ ३ ॥ शुद्धा भर्तुश्चतुर्थेऽह्नि न शुद्धा दैवपित्र्ययोः ॥ दैवे कर्मणि पित्र्ये च पञ्चमेऽह्नि विशुद्ध्यति
॥ ४ ॥ व्यालग्राही यथा व्यालं बिलादुद्धरते बलात् ॥ तद्वत्स्वामिनमादाय साध्वी स्वर्गं प्रयाति च ॥५॥ मोदते स्वामिना तत्र
यावदिन्द्राश्चतुर्दश ॥ अत ऊर्ध्वं कर्मभोगं भुङ्क्ष्व साध्वि शुभाशुभम् ॥ ६ ॥ स पुत्रो भक्तिदाता यः सा च स्त्री याऽनुगच्छति ॥
स बन्धुर्दानदाता यः स शिष्यो गुरुमर्चयेत् ॥ ७ ॥ सोऽभीष्टदेवो यो रक्षेत्स राजा पालयेत्प्रजाः ॥ स च स्वामी प्रियां धर्मे

---

१ क्षुन्निद्रातृड्दयाशान्तिरिति पाठः ।

मतिं दातुमिहेश्वरः ॥ ८ ॥ स गुरुर्धर्मदाता यो हरिभक्तिप्रदायकः ॥ एते प्रशंस्या वेदेषु पुराणेषु च निश्चितम् ॥ ९ ॥ रेणुकोवाच ॥ गन्तुं स्वस्वामिना सार्द्धं का शक्ता भारते मुने ॥ का वाऽप्यशक्ता नारीषु तन्मे ब्रूहि तपोधन ॥ १० ॥ भृगुरुवाच ॥ बालापत्याश्च गर्भिण्यो ह्यदृष्टऋतवस्तथा ॥ रजस्वला च कुलटा गलितव्याधिसंयुता ॥ ११ ॥ पतिसेवाविहीना या ह्यभक्ता कटुभाषिणी ॥ एता गच्छन्ति चेद्दैवान्न कान्तं प्राप्नुवन्ति ताः ॥ १२ ॥ संस्कृताग्निं पुरो दत्त्वा चितासु शयितं पतिम् ॥ कान्तास्तमनुगच्छन्ति कान्ताश्चेत्प्राप्नुवन्ति ताः ॥ १३ ॥ अनुगच्छन्ति याः कान्तं तमेव प्राप्नुवन्ति ताः ॥ सार्द्धं कृत्वा पुण्यभोगं दिवि जन्मनि जन्मनि ॥ १४ ॥ इयं ते कथिता साध्वि व्यवस्था गृहिणां ध्रुवम् ॥ तीर्थे ज्ञानमृतानां च वैष्णवानां गतिं शृणु॥ ॥ १५ ॥ या साध्वी वैष्णवं कान्तं यत्र यत्रानुगच्छति ॥ प्रयाति स्वामिना सार्द्धं वैकुण्ठे हरिसन्निधिम् ॥ १६ ॥ विशेषो नास्ति भक्तानां तीर्थे वाऽन्यत्र नारद ॥ मरणेन फलं तुल्यं मुक्तानां कृष्णभाविनाम् ॥ १७ ॥ तयोः पातो नास्ति तस्मान्महति प्रलयं सति ॥ नारायणं तं भजेत पुमान्स्त्री कमलालयाम् ॥ १८ ॥ तीर्थे ज्ञानमृतश्चापि वैकुण्ठं याति निश्चितम् ॥ सभार्यो मोदते तत्र यावद्वै ब्रह्मणां शतम् ॥ १९ ॥ इत्युक्त्वा रेणुकां तत्र जामदग्न्यमुवाच ह ॥ वेदोक्तं वचनं सर्वं स भृगुः समयोचितम् ॥ २० ॥ एहि वत्स महाभाग त्यज शोकममङ्गलम् ॥ उत्तानं कुरु तातं च दक्षिणाशिरसं भृगो ॥ २१ ॥ वस्त्रयज्ञोपवीतं च नूतनं परिधापय ॥ अनश्रुनयनो भूत्वा सन्तिष्ठन्दक्षिणामुखः ॥ २२ ॥ अरणीसंभवाग्निं च गृहाण प्रीतिपूर्वकम् ॥ पृथिव्यां यानि तीर्थानि सर्वेषां स्मरणं कुरु ॥ २३ ॥ गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः ॥ कुरुक्षेत्रं च गङ्गां च यमुनां च सरिद्वराम् ॥२४॥ कौशिकीं चन्द्रभागां च सर्वपापप्रणाशिनीम् ॥ गण्डकीमथ काशीं च पनसां सरयूं तथा ॥ २५ ॥ पुष्पभद्रां च भद्रां च नर्मदां च सरस्वतीम् ॥ गोदावरीं च कावेरीं स्वर्णरेखां च पुष्करम् ॥ २६ ॥ रैवतं च वराहं च श्रीशैलं गन्धमादनम् ॥ हिमालयं च कैलासं सुमेरुं रत्नपर्वतम् ॥ २७ ॥ वाराणसीं प्रयागं च पुण्यं बृन्दावनं वनम् ॥ हरिद्वारं च बदरीं स्मारंस्मारं

पुनः पुनः ॥ २८ ॥ चन्दनागरुकस्तूरीसुगन्धिकुसुमं तथा ॥ प्रदाय वाससाऽऽच्छाद्य स्थापयैनं चितोपरि ॥ २९ ॥
कर्णाक्षिनासिकास्ये त्वं शलाकां च हिरण्मयीम् ॥ कृत्वा निर्मन्थनं तात विप्रेभ्यो देहि सादरम् ॥३०॥ सतिलं ताम्रपात्रं च धेनुं
च रजतं तथा ॥ सदक्षिणं सुवर्णं च दत्त्वाऽग्निं देह्यकातरः ॥ ३१ ॥ ॐ कृत्वा दुष्कृतं[1] कर्म्म जानता वाऽप्यजानता ॥ मृत्युकाल
वशं प्राप्य नरं पञ्चत्वमागतम् ॥ ३२ ॥ धर्माधर्मसमायुक्तं लोभमोहसमावृतम् ॥ दह सर्वाणि गात्राणि दिव्याँल्लोकान्स गच्छतु ॥
॥ ३३ ॥ इमं मन्त्रं पठित्वा तु तातं कृत्वा प्रदक्षिणम् ॥ मन्त्रेणानेन देह्यग्निं जनकाय हरिं स्मरन् ॥ ३४ ॥ ॐ अस्मत्कुले त्वं
जातोऽसि त्वदीयो जायतां पुनः ॥ असौ स्वर्गाय लोकाय स्वाहेति वद साम्प्रतम् ॥३५॥ अग्निं देहि शिरःस्थाने हे भृगो भ्रातृभिः
सह ॥ तच्चकार भृगुः सर्वं सगोत्रैराज्ञया भृगोः ॥ ३६ ॥ अथ पुत्रं रेणुका सा कृत्वा तत्र स्ववक्षसि ॥ उवाच किंचिद्वचनं परिणा
मसुखावहम् ॥ ३७ ॥ अविरोधो भवाब्धौ च सर्वमङ्गलमङ्गलम् ॥ विरोधो नाशबीजं च सर्वोपद्रवकारणम् ॥ ३८ ॥ अकर्तव्यो
विरोधो वै दारुणैः क्षत्रियैः सह ॥ प्रतिज्ञा चैव कर्त्तव्या मदीये वचने श्रुते ॥३९ ॥आलोच्य ब्रह्मणा सार्द्धं भृगुणा दिव्यमन्त्रिणा ॥
यथोचितं च कर्तव्यं सद्भिरालोचनं शुभम् ॥४०॥ इत्युक्त्वा तं परित्यज्य कान्तं कृत्वा स्ववक्षसि ॥ सा सुष्वाप चितायां च पश्यन्ती
तं हरिस्मृतिः ॥४१॥ वह्निं ददौ चितायां च स रामो भ्रातृभिः सह ॥ भ्रातृभिः पितृशिष्यैश्च सार्द्धं स विललाप च ॥ ४२ ॥ राम
रामेति रामेति वाक्यमुच्चार्य्य सा सती ॥ पुरस्ताज्जामदग्न्यस्य भस्मीभूता बभूव सा ॥४३॥ भर्तुर्नाम समाकर्ण्य तत्राजग्मुर्हरेश्वराः॥
रथस्थाः श्यामवर्णाश्च सर्वे चारुचतुर्भुजाः ॥ ४४ ॥ शङ्खचक्रगदापद्मधारिणो वनमालिनः ॥ किरीटिनः कुण्डलिनः पीतकौशेयवा
ससः ॥४५॥रथे कृत्वा रेणुकां तां गत्वा ते ब्रह्मणः पदम् ॥ जमदग्निं समादाय प्रजग्मुर्हरिसन्निधिम् ॥४६॥ तौ दम्पती च वैकुण्ठे
तस्थतुर्हरिसन्निधौ ॥ कृत्वा दास्यं हरेः शश्वत्सर्वमङ्गलमङ्गलम् ॥ ४७ ॥ अथ रामो ब्राह्मणैश्च भृगुणा सह नारद ॥ पित्रोः शेष

---

[1] सुकृतमिति पाठः ।

क्रियां कृत्वा ब्राह्मणेभ्यो धनं ददौ ॥ ४८ ॥ गोभूहिरण्यवासांसि दिव्यशय्यां मनोरमाम् ॥ सुवर्णाधारसहितां जलमन्नं च चन्दनम् ॥ ४९ ॥ रत्नदीपं रौप्यशैलं सुवर्णासनमुत्तमम् ॥ सुवर्णाधारसहितं ताम्बूलं च सुवासितम् ॥५०॥ छत्रं च पादुके चैव फलं माल्यं मनोहरम् ॥ फलं मूलादिकं चैव मिष्टान्नं च मनोहरम् ॥ ब्राह्मणेभ्यो धनं दत्त्वा ब्रह्मलोकं जगाम सः ॥ ५१ ॥ ददर्श ब्रह्मलोकं स शातकुम्भविनिर्मितम् ॥ स्वर्णप्राकारसंयुक्तं स्वर्णस्तम्भैर्विभूषितम् ॥ ५२ ॥ ददर्श तत्र ब्रह्माणं ज्वलन्तं ब्रह्मतेजसा॥ रत्नसिंहासनस्थं च रत्नभूषणभूषितम् ॥ ५३ ॥ सिद्धैस्तपश्चान्द्रायणैर्ऋषीन्द्रैः परिवेष्टितम् ॥ विद्याधरीणां नृत्यं च पश्यन्तं सस्मितं मुदा ॥५४॥ संगीतमुपशृण्वन्तं गीयमानं च गायकैः ॥ चन्दनागरुकस्तूरीकुंकुमेन विराजितम् ॥५५॥ तपसां फलदातारं दातारं सर्वसम्पदाम् ॥ धातारं सर्वजगतां कर्तारं चेश्वरं परम् ॥ ५६ ॥ परिपूर्णतमं ब्रह्म जपन्तं कृष्णमीश्वरम् ॥ गुह्ययोगं प्रवोचन्तं पृच्छन्तं शिष्यमण्डलम् ॥ ५७ ॥ दृष्ट्वा तमव्ययं भक्त्या प्रणनाम भृगुः पुरः ॥ उच्चैश्च रोदनं कृत्वा स्ववृत्तान्तमुवाच ह॥ ॥ ५८ ॥ भृगुरुवाच ॥ ब्रह्मंस्त्वद्वंशजातोऽहं जमदग्निसुतो विधे ॥ पितामहस्त्वमस्माकं सर्वज्ञं कथयामि किम् ॥ ५९ ॥ मृगयामागतं भूपं पिता मे चोपवासिनम् ॥ पारणां कारयामास कपिलादत्तवस्तुना ॥ ६० ॥ स राजा कपिलालोभात्कार्तवीर्य्यार्जुनः स्वयम् ॥ घातयामास मत्तातमित्युक्त्वोच्चै रुरोद सः ॥६१॥ निरुध्य बाष्पं स पुनरुवाच करुणानिधिः ॥ माता मेऽनुगता साध्वी मां विहाय जगद्गुरो ॥ ६२ ॥ अधुनाऽहमनाथश्च त्वं मे माता पिता गुरुः ॥ कर्ता पालयिता दाता पाहि मां शरणागतम् ॥६३॥ आगतोऽहं तव सभां प्रमातुर्मातुराज्ञया ॥ उपायेन जगन्नाथ मद्वैरिहननं कुरु ॥६४॥ स राजा स च धर्मिष्ठः स दयालुर्यशस्करः ॥ स पूज्यः स स्थिरश्रीश्च यो दीनं परिपालयेत् ॥ ६५ ॥ धनिदीनौ समं दृष्ट्वा यः प्रजां न च पालयेत् ॥ तद्देहाद्याति रुष्टा श्रीः स भवेद्भ्रष्टराज्यकः ॥ ६६ ॥ श्रुत्वा विप्रबटोर्वाक्यं करुणासागरो विधिः ॥ दत्त्वा शुभाशिषं तस्मै वासयामास वक्षसि ॥ ६७ ॥ श्रुत्वा भृगोः प्रतिज्ञां च विस्मितश्चतुराननः ॥ अतीव दुष्करां घोरां बहुजीवविघातिनीम् ॥ ६८ ॥ कर्मणा तद्भवेत्सर्वमिति कृत्वा

तु मानसे ॥ उवाच जामदग्न्यं तं परिणामसुखावहम् ॥६९॥ ब्रह्मोवाच ॥ प्रतिज्ञा दुष्करा वत्स बहुजीवविघातिनी॥सृष्टिरेषा भगवतः
सम्भवेदीश्वरेच्छया ॥ ७० ॥ सृष्टिः सृष्टा मया पुत्र क्लेशेनैवेश्वराज्ञया ॥ सृष्टिलुप्तौ प्रतिज्ञा ते दारुणाऽकरुणा परा ॥ ७१ ॥
त्रिस्सप्तकृत्वो निर्भूपां कर्तुमिच्छसि मेदिनीम् ॥ एकक्षत्त्रियदोषेण तज्जातिं हन्तुमिच्छसि ॥ ७२ ॥ ब्रह्मक्षत्त्रियविट्छूद्रैर्नित्या
सृष्टिश्चतुर्विधैः ॥ आविर्भूता तिरोभूता हरेरेव पुनः पुनः ॥ ७३ ॥ अन्यथा त्वत्प्रतिज्ञा च भविता प्राक्तनेन ते ॥ बह्वायासेन ते
कार्य्यसिद्धिर्भवितुमर्हति ॥ ७४ ॥ शिवलोकं गच्छ वत्स शङ्करं शरणं व्रज ॥ पृथिव्यां बहवो भूपाः सन्ति शङ्करकिङ्कराः ॥
॥ ७५ ॥ विनऽज्ञाया महेशस्य को वा तान्हन्तुमीश्वरः ॥ बिभ्रतः कवचं दिव्यं शक्तेर्वै शङ्करस्य च ॥ ७६ ॥ उपायं कुरु यत्नेन
जयबीजं शुभावहम् ॥ उपायतः समारब्धाः सर्वे सिद्ध्यन्त्युपक्रमाः ॥ ७७ ॥ श्रीकृष्णमन्त्रकवचग्रहणं कुरु शङ्करात् ॥ दुर्लभं
वैष्णवं तेजः शैवं शाक्तं विजेष्यति ॥ ७८ ॥ गुरुस्ते जगतां नाथः शिवो जन्मनि जन्मनि ॥ मन्त्रो मत्तो न युक्तस्ते यो युक्तः
स भवेद्विधिः ॥ ७९ ॥ कर्मणा लभ्यते मन्त्रः कर्मणा लभ्यते गुरुः ॥ स्वयमेवोपतिष्ठन्ते ये येषां तेषु ते ध्रुवम् ॥ ८० ॥ त्रैलोक्य
विजयं नाम गृहीत्वा कवचं वरम् ॥ त्रिस्सप्तकृत्वो निर्भूपां करिष्यसि महीं भृगो ॥ ८१ ॥ दिव्यं पाशुपतं तुभ्यं दाता दास्यति
शंकरः ॥ तेन दत्तेन मन्त्रेण क्षत्रसंघं विजेष्यसि ॥ ८२ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे
भृगोर्ब्रह्मलोकगमने ब्रह्मोक्तोपायवर्णनं नामाष्टाविंशोऽध्यायः ॥ २८ ॥ नारायण उवाच ॥ ब्रह्मणो वचनं श्रुत्वा प्रणम्य च जगद्गुरुम्॥
स्फीतस्तस्माद्वरं प्राप्य शिवलोकं जगाम सः ॥ १ ॥ लक्षयोजनमूर्ध्वं च ब्रह्मलोकाद्विलक्षणम् ॥ अनिर्वाच्यसुशोभाढ्यं वायवा
धारं मनोहरम् ॥ २ ॥ वैकुण्ठं दक्षिणे यस्य गौरीलोकश्च वामतः ॥ यदधो ध्रुवलोकश्च सर्वलोकात्परः स्मृतः ॥ ३ ॥ तेषामूर्ध्वं च
गोलोकः पञ्चाशत्कोटियोजनः ॥ अत ऊर्ध्वं न लोकश्च सर्वोपरि च स स्मृतः ॥ ४ ॥ मनोयायी स योगीन्द्रः शिवलोकं ददर्श ह ॥
उपमानोपमेयाभ्यां रहितं महदद्भुतम् ॥५॥ योगीन्द्राणां वरेण्यैश्च सिद्धविद्याविशारदैः॥कोटिकल्पतपःपूतैः पुण्यवद्भिर्निषेवितम्॥६॥

वेष्टितं कल्पवृक्षाणां समूहैर्वाञ्छितप्रदैः ॥ समूहैः कामधेनूनामसंख्यानां विराजितम् ॥ ७ ॥ पारिजाततरूणां च वनराजिविराजितम् ॥ पुष्पोद्यानायुतैर्युक्तं सदा चातिसुशोभितम् ॥ ८ ॥ मणीन्द्रसाररचितैः शोभितैर्मणिवेदिभिः ॥ राजमार्गशतैर्दिव्यैः सर्वतः परिभूषितम् ॥९॥ मणीन्द्रासारनिर्माणशतकोटिगृहैर्युतम् ॥ नानाचित्रविचित्राढ्यैर्मणीन्द्रकलशोज्ज्वलैः ॥ १० ॥ तन्मध्यदेशे रम्ये च ददर्श शङ्करालयम् ॥ मणीन्द्रसाररचितप्राकारं सुमनोहरम् ॥ ११ ॥ अत्यूर्ध्वमम्बरस्पर्शी क्षीरनीरनिभं परम् ॥ षोडशद्वारसंयुक्तं शोभितं शतमन्दिरैः ॥ १२ ॥ अमूल्यरत्नरचितै रत्नसोपानभूषितैः ॥ रत्नस्तम्भकपाटैश्च हीरकेण परिष्कृतैः ॥ १३ ॥ माणिक्यजालमालाभिः सद्रत्नकलशोज्ज्वलैः ॥ नानाविचित्रचित्रेण चित्रितैः सुमनोहरैः ॥ १४ ॥ आलयस्य पुरस्तत्र सिंहद्वारं ददर्श सः ॥ रत्नेन्द्रसारखचितकपाटैश्च विराजितैः ॥ १५ ॥ शोभितं वेदिकाभिश्च बाह्याभ्यन्तरतः सदा ॥ रचिताभिः पद्मरागैर्महामरकतैर्गृहम् ॥ १६ ॥ नानाप्रकारचित्रेण चित्रितं सुमनोहरम् ॥ करालरूपावद्राक्षीद् द्वारपालौ भयंकरौ ॥ ॥ १७ ॥ महाकरालदन्तास्यौ विरक्तौ रक्तलोचनौ ॥ दग्धशैलप्रतीकाशौ महाबलपराक्रमौ ॥ १८ ॥ विभूतिभूषितांगौ च व्याघ्रचर्माम्बरौ वरौ ॥ पिङ्गलाक्षौ विशालाक्षौ जटिलौ च त्रिलोचनौ ॥१९॥ त्रिशूलपट्टिशधरौ ज्वलन्तौ ब्रह्मतेजसा ॥ तौ दृष्ट्वा मनसा भीतस्त्रस्तः किञ्चिदुवाच ह ॥ २० ॥ विनयेन विनीतश्च दुर्विनीतौ महाबलौ ॥ आत्मनः सर्ववृत्तान्तं कथयामास तत्पुरः ॥ ॥ २१ ॥ विप्रस्य वचनं श्रुत्वा कृपायुक्तौ बभूवतुः ॥ गृहीत्वाऽऽज्ञां चरद्वारा शंकरस्य महात्मनः ॥ २२ ॥ प्रवेष्टुमाज्ञां ददतुरीश्वरानुचरौ वरौ ॥ भृगुस्तदाज्ञामादाय प्रविवेश हरिं स्मरन् ॥ २३ ॥ प्रत्येकं षोडश द्वारो ददर्श सुमनोहराः ॥ द्वारपालैर्नियुक्ताश्च नानाचित्रविचित्रिताः ॥ २४ ॥ दृष्ट्वा ता महदाश्चर्य्यादपश्यच्छूलिनः सभाम् ॥ नानासिद्धगणाकीर्णां महर्षिगणसेविताम् ॥ २५ ॥ पारिजातसुगन्धाढ्यवायुना सुरभीकृताम् ॥ ददर्श तत्र देवेशं शङ्करं चन्द्रशेखरम् ॥ २६ ॥ त्रिशूलपट्टिशधरं व्याघ्रचर्माम्बरं परम्॥ विभूतिभूषितांगं तं नागयज्ञोपवीतिनम् ॥ रत्नसिंहासनस्थं च रत्नभूषणभूषितम् ॥२७॥ महाशिवं शिवकरं शिवबीजं शिवाश्रयम्॥

आत्मारामं पूर्णकामं सूर्य्यकोटिसमप्रभम् ॥ २८ ॥ ईषद्धास्यं प्रसन्नास्यं भक्तानुग्रहकातरम् ॥ शश्वज्ज्योतिस्स्वरूपं च लोकानुग्रहविग्रहम्॥२९॥धृतवन्तं जटाजालं दक्षकन्यासमन्वितम् ॥ तपसां फलदातारं दातारं सर्वसम्पदाम् ॥३०॥ शुद्धस्फटिकसंकाशं पञ्चवक्त्रं त्रिलोचनम् ॥ गुह्यं ब्रह्म प्रवोचन्तं ।शिष्येभ्यस्तत्त्वमुद्रया ॥ ३१ ॥ स्तूयमानं च योगीन्द्रैः सिद्धेन्द्रैः परिसेवितम् ॥ पार्षदप्रवरैश्शश्वत्सेवितं श्वेतचामरैः॥३२॥ध्यायमानं परं ब्रह्म परिपूर्णतमं परम् ॥स्वेच्छामयं गुणातीतं जरामृत्युहरं परम्॥३३॥ज्योतीरूपं च सर्वाद्यं श्रीकृष्णं प्रकृतेः परम् ॥ ध्यायन्तं परमानन्दं पुलकाञ्चितविग्रहम् ॥ सुस्वरं साश्रुनेत्रं तमुद्गायन्तं गुणार्णवम् ॥ ३४ ॥ भूतेन्द्रैर्वै रुद्रगणैः क्षेत्रपालैश्च वेष्टितम् ॥ मूर्ध्ना ननाम परशुरामो दृष्ट्वा तमादरात् ॥ ३५ ॥ तद्वामे कार्त्तिकेयं च दक्षिणे च गणेश्वरम् ॥ नन्दीश्वरं महाकालं वीरभद्रं च तत्पुरः ॥ अंके ददर्श कान्तां तां गौरीं शैलेन्द्रकन्यकाम् ॥ ३६ ॥ ननाम सर्वान्मूर्ध्ना च भक्त्या च परया मुदा ॥ दृष्ट्वा हरं परं तोषात्स्तोतुं समुपचक्रमे ॥३७॥ सगद्गदपदं दीनस्साश्रुनेत्रोऽतिकातरः ॥ कृताञ्जलिपुटः शान्तः शोकार्त्तः शोकनाशनम् ॥ ३८ ॥ परशुराम उवाच ॥ ईश त्वां स्तोतुमिच्छामि सर्वथा स्तोतुमक्षमः ॥ अक्षराक्षयबीजं च किं वा स्तौमि निरीहकम् ॥३९॥ न योजनां कर्त्तुमीशो देवेशं स्तौमि मूढधीः ॥ वेदा न शक्ता यं स्तोतुं कस्त्वां स्तोतुमिहेश्वरः ॥ ॥४०॥ वाग्बुद्धिमनसां दूरं सारात्सारं परात्परम् ॥ ज्ञानमात्रेण साध्यं च सिद्धं सिद्धैर्निषेवितम्॥ ४१॥ यमाकाशमिवाद्यन्तमध्यहीनं तथाऽव्ययम् ॥ विश्वतन्त्रमतन्त्रं च स्वतन्त्रं तन्त्रबीजकम् ॥ ४२ ॥ ध्यानासाध्यं दुराराध्यमतिसाध्यं कृपानिधिम् ॥ त्राहि मां करुणासिन्धो दीनबन्धोऽतिदीनकम् ॥ ४३ ॥ अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥ स्वप्नेऽप्यदृष्टं भक्तैश्चाधुना पश्यामि चक्षुषा ॥ ४४ ॥ शक्रादयः सुरगणाः कलया यस्य सम्भवाः ॥ चराचराः कलांशेन तं नमामि महेश्वरम् ॥ ४५ ॥ स्त्रीरूपं क्लीबरूपं च पौरुषं च बिभर्ति यः ॥ सर्वाधारं सर्वरूपं तं नमामि महेश्वरम् ॥ ४६ ॥ यं भास्करस्वरूपं च शशिरूपं हुताशनम् ॥ जलरूपं वायुरूपं तं नमामि महेश्वरम् ॥ ४७ ॥ अनन्तविश्वसृष्टीनां संहर्तारं भयंकरम् ॥ क्षणेन लीलामात्रेण तं नमामि

महेश्वरम् ॥४८॥ यः कालः कालकालश्च कलिर्बीजं च कालजः॥अजः प्रजश्च यः सर्वस्तं नमामि महेश्वरम्॥४९॥इत्येवमुक्त्वा स भृगुः पपात चरणाम्बुजे ॥ आशिषं च ददौ तस्मै सुप्रसन्नो बभूव सः ॥ ५० ॥ जामदग्न्यकृतं स्तोत्रं यः पठेद्भक्तिसंयुतः ॥ सर्वपापविनिर्मुक्तः शिवलोकं स गच्छति ॥ ५१ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे परशुरामस्य कैलासगमनं नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ शंकर उवाच ॥ कस्त्वं बटो कस्य पुत्रः क्व वासः स्तवनं कथम् ॥ किं वा तेऽहं करिष्यामि वाञ्छितं वद साम्प्रतम् ॥ १ ॥ पार्वत्युवाच ॥ शोकाकुलं त्वां पश्यामि विमनस्कं सुविस्मितम् ॥ वयसाऽतिशिशुं शान्तं गुणेन गुणिनां वरम्॥२॥भृगुरुवाच ॥ जमदग्निसुतोऽहं च भृगुवंशसमुद्भवः॥रेणुकाऽम्बा मे परशुरामोऽहं नामतः प्रभो ॥३॥ क्रीणीहि मां दयासिन्धो विद्यापण्येन किंकरम् ॥ त्वामीश शरणापन्नं रक्ष मां दीनवत्सल ॥ ४ ॥ मृगयामागतं भूपं पिता मे चोपवासिनम् ॥ चकारातिथ्यमानीय कपिलादत्तवस्तुना ॥ ५ ॥ राजा तं कपिलालोभाद्घातयामास मन्दधीः ॥ कपिला तं मृतं दृष्ट्वा गोलोकं च जगाम सा ॥६॥ माताऽनुगमनं चक्रे ह्यनाथोऽहं च साम्प्रतम् ॥ त्वं मे पिता शिवा माता रक्ष मां पुत्रवत्प्रभो ॥ ७ ॥ मया कृता प्रतिज्ञा च शोकेनैवातिदुष्करा ॥ त्रिस्सप्तकृत्वो निर्भूपां करिष्यामि महीमिति ॥ ८ ॥ कार्तवीर्य्यं हनिष्यामि समरे तातघातकम् ॥ इत्येतत्परिपूर्णं मे भगवान्कर्तुमर्हति ॥ ९ ॥ ब्राह्मणस्य वचः श्रुत्वा दृष्ट्वा दुर्गामुखं हरः ॥ बभूवानम्रवक्त्रश्च सा च शुष्कौष्ठतालुका ॥ १० ॥ पार्वत्युवाच ॥ तपस्विन्विप्रपुत्रस्त्वं निर्भूपां कर्तुमिच्छसि ॥ त्रिस्सप्तकृत्वः कोपेन साहसस्ते महान्बटो ॥ ११ ॥ हन्तुमिच्छसि निःशस्त्रः सहस्रार्जुनमीश्वरम् ॥ भ्रूभङ्गलीलया यस्य रावणस्य पराजयः ॥ १२ ॥ तस्मै प्रदत्तं दत्तेन श्रीहरेः कवचं बटो ॥ शक्तिरव्यर्थरूपा च यया ते हिंसितः पिता ॥ १३ ॥ हरेर्मन्त्रं संस्तवनं यः पठेच्च दिवानिशम् ॥ को वा शक्नोति तं हन्तुं न पश्यामीह भूतले ॥ १४ ॥ अये विप्र गृहं गच्छ किं करिष्यति शंकरः ॥ अन्ये भूपाश्च मद्भृत्याः का भीस्तेषां मयि स्थिते॥१५॥काल्युवाच॥अये विप्र बटो जाल्म निर्भूपान्कर्तुमिच्छसि॥यथा हि वामनश्चन्द्रं करेणाहर्तुमिच्छति॥१६॥

कृतयज्ञान्महापुण्यान्महाबलपराक्रमान् ॥ दिगम्बरसहायेन मद्भृत्यान्हन्तुमिच्छसि ॥ १७ ॥ स तयोर्वचनं श्रुत्वा रुरो
दोच्चैश्च शोकतः ॥ सहसा पुरतस्तेषां प्राणांस्त्यक्तुं समुद्यतः ॥ १८ ॥ विप्रस्य रोदनं श्रुत्वा शंकरः करुणानिधिः ॥ पश्यन्दुर्गां च
कालीं च ज्ञात्वाऽऽशयमथो विभुः ॥ १९ ॥ तयोरनुमतिं प्राप्य सर्वेशो भक्तवत्सलः ॥ जमदग्निसुतं सद्यः प्रवक्तु
मुपचक्रमे ॥ २० ॥ शंकर उवाच ॥ अद्यप्रभृति हे वत्स त्वं मे पुत्रसमो महान् ॥ दास्यामि मन्त्रं गुह्यं ते त्रिषु
लोकेषु दुर्लभम् ॥ २१ ॥ एवंभूतं च कवचं दास्यामि परमाद्भुतम् ॥ लीलया मत्प्रसादेन कार्त्तवीर्य्यं हनिष्यसि ॥ २२ ॥
त्रिस्सप्तकृत्वो निर्भूपां करिष्यसि महीं द्विज ॥ जगत्ते यशसा पूर्णं भविष्यति न संशयः ॥ २३ ॥ इत्युक्त्वा शंकरस्तस्मै ददौ
मन्त्रं सुदुर्लभम् ॥ त्रैलोक्यविजयं नाम कवचं परमाद्भुतम् ॥ २४ ॥ स्तवं पूजाविधानं च पुरश्चरणपूर्वकम् ॥ मन्त्रसिद्धेरनुष्ठानं
यथावन्नियमक्रमम् ॥ २५ ॥ सिद्धिस्थानं कालसंख्यं कथयामास नारद ॥ वेदवेदाङ्गादिकं च पाठयामास तत्क्षणम् ॥ २६ ॥ नाग
पाशं पाशुपतं ब्रह्मास्त्रं च सुदुर्लभम् ॥ नारायणास्त्रमाग्नेयं वायव्यं वारुणं तथा ॥ २७ ॥ गान्धर्वं गारुडं चैव जृम्भणास्त्रं तथैव च ॥
गदां शक्तिं च परशुं शूलमव्यर्थमुत्तमम् ॥ २८ ॥ नानाप्रकारशस्त्रास्त्रमन्त्रं च विधिपूर्वकम् ॥ शस्त्रास्त्राणां च संहारं तूणी चाक्षयसा
यकौ ॥ २९ ॥ आत्मरक्षणसन्धानं संग्रामविजयक्रमम् ॥ मायायुद्धं च विविधं हुंकारं मन्त्रपूर्वकम् ॥ ३० ॥ रक्षणं च स्वसैन्यानां
परसैन्यविमर्दनम् ॥ नानाप्रकारमतुलमुपायं रणसंकटे ॥ संहारे मोहिनीं विद्यां ददौ मृत्युहरां हरः ॥ ३१ ॥ स्थित्वा चिरं गुरोर्वासे
सर्वविद्यां विबोध्य सः ॥ तीर्थे कृत्वा मन्त्रसिद्धिं तांश्च नत्वा जगाम सः ॥३२॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे
नारदनारायणसंवादे परशुरामस्य शिवदत्तास्त्रशस्त्रादिप्राप्तिवर्णनं नाम त्रिंशत्तमोऽध्यायः ॥३०॥ नारद उवाच॥भगवन्छ्रोतुमिच्छामि
किं मन्त्रं भगवान्हरः ॥ कृपयाऽदात्परशुरामाय स्तोत्रं च वर्म च ॥ १॥ को वाऽस्य मन्त्रस्याराध्यः किं फलं कवचस्य च ॥ स्तव
नस्य फलं किं वा तद्भवान्वक्तुमर्हति ॥ २ ॥ नारायण उवाच ॥ मन्त्राराध्यो हि भगवान्परिपूर्णतमः स्वयम् ॥ गोलोकनाथः

श्रीकृष्णो गोपगोपीश्वरः प्रभुः ॥ ३ ॥ त्रैलोक्यविजयं नाम कवचं परमाद्भुतम् ॥ स्तवराजं महापुण्यं भूतियोगसमुद्भवम् ॥ ४ ॥ मन्त्रं कल्पतरुं नाम सर्वकामफलप्रदम् ॥ ददौ परशुरामाय रत्नपर्वतसन्निधौ ॥ ५ ॥ स्वयंप्रभानदीतीरे पारिजातवनान्तरे ॥ आश्रमे लोकदेवस्य माधवस्य च सन्निधौ ॥ ६ ॥ महादेव उवाच ॥ वत्सागच्छ महाभाग भृगुवंशसमुद्भव ॥ पुत्राधिकोऽसि प्रेम्णा मे कवचग्रहणं कुरु ॥ ७ ॥ शृणु राम प्रवक्ष्यामि ब्रह्माण्डे परमाद्भुतम् ॥ त्रैलोक्यविजयं नाम श्रीकृष्णस्य जयावहम् ॥ ८ ॥ श्रीकृष्णेन पुरा दत्तं गोलोके राधिकाश्रमे ॥ रासमण्डलमध्ये च मह्यं वृन्दावने वने ॥ ९ ॥ अतिगुह्यतरं तत्त्वं सर्वमन्त्रौघविग्रहम् ॥ पुण्यात्पुण्यतरं चैव परं स्नेहाद्ददामि ते ॥ १० ॥ यद्धृत्वा पठनाद्देवी मूलप्रकृतिरीश्वरी ॥ शुम्भं निशुम्भं महिषं रक्तबीजं जघान ह ॥ ११ ॥ यद्धृत्वाऽहं च जगतां संहर्त्ता सर्वतत्त्ववित् ॥ अवध्यं त्रिपुरं पूर्वं दुरन्तमपि लीलया ॥ १२ ॥ यद्धृत्वा पठनाद्ब्रह्मा ससृजे सृष्टिमुत्तमाम् ॥ यद्धृत्वा भगवाञ्छेषो विधत्ते विश्वमेव च ॥ १३ ॥ यद्धृत्वा कूर्मराजश्च शेषं धत्ते हि लीलया ॥ यद्धृत्वा भगवान्वायुर्विश्वाधारो विभुः स्वयम् ॥ १४ ॥ यद्धृत्वा वरुणः सिद्धः कुबेरश्च धनेश्वरः ॥ यद्धृत्वा पठनादिन्द्रो देवानामधिपः स्वयम् ॥ ॥ १५ ॥ यद्धृत्वा भाति भुवने तेजोराशिः स्वयं रविः ॥ यद्धृत्वा पठनाच्चन्द्रो महाबलपराक्रमः ॥ १६ ॥ अगस्त्यः सागरान्सप्त यद्धृत्वा पठनात्पपौ ॥ चकार तेजसा जीर्णं दैत्यं वातापिसंज्ञकम् ॥ १७ ॥ यद्धृत्वा पठनाद्देवी सर्वाधारा वसुन्धरा ॥ यद्धृत्वा पठनात्पूता गङ्गा भुवनपावनी ॥ १८ ॥ यद्धृत्वा जगतां साक्षी धर्मो धर्मभृतां वरः ॥ सर्वविद्याधिदेवी सा यद्ध धृत्वा सरस्वती ॥ १९ ॥ यद्धृत्वा जगतां लक्ष्मीरन्नदात्री परात्परा ॥ यद्धृत्वा पठनाद्वेदान्सावित्री सा सुषाव च ॥ २० ॥ वेदाश्च धर्म्मवक्तारो यद्धृत्वा पठनाद्भृगो ॥ यद्धृत्वा पठनाच्छुद्धस्तेजस्वी हव्यवाहनः ॥ सनत्कुमारो भगवान्यद्धृत्वा ज्ञानिनां वरः ॥ २१ ॥ दातव्यं कृष्णभक्ताय साधवे च महात्मने ॥ शठाय परशिष्याय दत्त्वा मृत्युमवाप्नुयात् ॥ २२ ॥ त्रैलोक्यविजयस्यास्य कवचस्य प्रजापतिः ॥ ऋषिश्छन्दश्च गायत्री देवो रासेश्वरः स्वयम् ॥ २३ ॥ त्रैलोक्यविजयप्राप्तौ विनियोगः प्रकीर्त्तितः ॥ परात्परं च कवचं त्रिषु लोकेषु दुर्लभम् ॥ २४ ॥

प्रणवो मे शिरः पातु श्रीकृष्णाय नमः सदा ॥ पायात्कपालं कृष्णाय स्वाहा पञ्चाक्षरः स्मृतः ॥२५॥ कृष्णेति पातु नेत्रे च
कृष्ण स्वाहेति तारकम् ॥ हरये नम इत्येवं भ्रूलतां पातु मे सदा ॥ २६ ॥ ॐ गोविंदाय स्वाहेति नासिकां पातु सन्ततम् ॥ गोपा
लाय नमो गण्डौ पातु मे सर्वतः सदा ॥ २७ ॥ ॐ-नमो गोपाङ्गनेशाय कर्णौ पातु सदा मम ॥ ॐ कृष्णाय नमः शश्वत्पातु
मेऽधरयुग्मकम् ॥ २८ ॥ ॐ गोविन्दाय स्वाहेति दन्तौघं मे सदाऽवतु ॥ पातु कृष्णाय दन्ताधो दन्तोर्ध्वं क्लीं सदाऽवतु ॥ २९ ॥
ॐ श्रीकृष्णाय स्वाहेति जिह्विकां पातु मे सदा॥रासेश्वराय स्वाहेति तालुकं पातु मे सदा॥३०॥राधिकेशाय स्वाहेति कण्ठं पातु सदा
मम ॥ नमो गोपाङ्गनेशाय वक्षः पातु सदा मम॥३१॥ॐ गोपेशाय स्वाहेति स्कन्धं पातु सदा मम॥नमः किशोरवेषाय स्वाहा पृष्ठं
सदाऽवतु॥३२॥उदरं पातु मे नित्यं मुकुन्दाय नमः सदा॥ ॐ-ह्रीं क्लीं कृष्णाय स्वाहेति करौ पातु सदा मम ॥३३॥ ॐ विष्णवे
नमो बाहुयुग्मं पातु सदा मम॥ॐ ह्रीं भगवते स्वाहा नखरं पातु मे सदा॥३४॥ॐ नमो नारायणायेति नखरन्ध्रं सदाऽवतु॥ॐ ह्रीं ह्रीं प
द्मनाभाय नाभिं पातु सदा मम ॥ ३५ ॥ ॐ सर्वेशाय स्वाहेति कङ्कालं पातु मे सदा ॥-ॐ गोपीरमणाय स्वाहा नितम्बं पातु मे
सदा ॥ ३६ ॥ ॐ-गोपीरमणनाथाय पादौ पातु सदा मम ॥ ॐ ह्रीं क्लीं रसिकेशाय स्वाहा सर्वं सदाऽवतु ॥ ३७ ॥ ॐ केशवाय
स्वाहेति मम केशान्सदाऽवतु ॥ नमः कृष्णाय स्वाहेति ब्रह्मरन्ध्रं सदाऽवतु ॥ ३८॥ ॐ माधवाय स्वाहेति मे लोमानि सदाऽवतु॥
ॐ ह्रीं श्रीं रसिकेशाय स्वाहा सर्वं सदाऽवतु ॥ ३९ ॥ परिपूर्णतमः कृष्णः प्राच्यां मां सर्वदाऽवतु ॥ स्वयं गोलोकनाथो मामा
ग्नेय्यां दिशि रक्षतु ॥ ४० ॥ पूर्णब्रह्मस्वरूपश्च दक्षिणे मां सदाऽवतु ॥ नैर्ऋत्यां पातु मां कृष्णः पश्चिमे पातु मां हरिः ॥ ४१ ॥
गोविन्दः पातु मां शश्वद्वायव्यां दिशि नित्यशः ॥ उत्तरे मां सदा पातु रसिकानां शिरोमणिः ॥ ४२ ॥ ऐशान्यां मां सदा पातु
वृन्दावनविहारकृत् ॥ वृन्दावनीप्राणनाथः पातु मामूर्ध्वदेशतः ॥ ४३ ॥ सदैव माधवः पातु बलिहारी महाबलः ॥ जले स्थले
चान्तरिक्षे नृसिंहः पातु मां सदा ॥ ४४ ॥ स्वप्ने जागरणे शश्वत्पातु मां माधवः सदा ॥ सर्वान्तरात्मा निर्लिप्तः पातु मां सर्वतो

विभुः ॥ ४९ ॥ इति ते कथितं वत्स सर्वमन्त्रौघविग्रहम् ॥ त्रैलोक्यविजयं नाम कवचं परमाद्भुतम् ॥ ४६ ॥ मया श्रुतं कृष्णवक्त्रा
त्प्रवक्तव्यं न कस्यचित् ॥ गुरुमभ्यर्च्य विधिवत्कवचं धारयेत्तु यः ॥ ४७ ॥ कण्ठे वा दक्षिणे बाहौ सोऽपि विष्णुर्न संशयः ॥ स
च भक्तो वसेद्यत्र लक्ष्मीर्वाणी वसेत्ततः ॥ ४८ ॥ यदि स्यात्सिद्धकवचो जीवन्मुक्तो भवेत्तु सः ॥ निश्चितं कोटिवर्षाणां पूजायाः
फलमाप्नुयात् ॥ ४९ ॥ राजसूयसहस्राणि वाजपेयशतानि च ॥ अश्वमेधायुतान्येव नरमेधायुतानि च ॥ ५० ॥ महादानानि यान्येव
प्रादक्षिण्यं भुवस्तथा ॥ त्रैलोक्यविजयस्यास्य कलां नार्हन्ति षोडशीम् ॥ ५१ ॥ व्रतोपवासनियमं स्वाध्यायाध्ययनं तपः ॥ स्नानं
च सर्वतीर्थेषु नास्यार्हन्ति कलामपि ॥ ५२ ॥ सिद्धत्वममरत्वं च दासत्वं श्रीहरेरपि ॥ यदि स्यात्सिद्धकवचः सर्वं प्राप्नोति निश्चि
तम् ॥ ५३ ॥ स भवेत्सिद्धकवचो दशलक्षं जपेत्तु यः ॥ यो भवेत्सिद्धकवचः सर्वज्ञः स भवेद्ध्रुवम् ॥ ५४ ॥ इदं कवचम
ज्ञात्वा भजेत्कृष्णं सुमन्दधीः ॥ कोटिकल्पं प्रजप्तोऽपि न मन्त्रः सिद्धिदायकः ॥ ५५ ॥ गृहीत्वा कवचं वत्स महीं निःक्ष
त्रियां कुरु ॥ त्रिस्सप्तकृत्वो निश्शंकः सदानन्दो हि लीलया ॥ ५६ ॥ राज्यं देयं शिरो देयं प्राणा देयाश्च पुत्रक ॥
एवंभूतं च कवचं न देयं प्राणसंकटे ॥ ५७ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे परशुरामाय
श्रीकृष्णकवचप्रदानं नामैकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥ भृगुरुवाच ॥ सम्प्राप्तं कवचं नाथ शश्वत्सर्वाङ्गरक्षणम् ॥ सुखदं मोक्षदं सारं
शत्रुसंहारकारणम् ॥ १ ॥ अधुना भगवन्मन्त्रं स्तोत्रं पूजाविधिं प्रभो ॥ देहि मह्यमनाथाय शरणागतपालक ॥ २ ॥ महादेव उवाच ॥
ॐ श्रीं नमः श्रीकृष्णाय परिपूर्णतमाय स्वाहा ॥ मन्त्रेषु मन्त्रराजोऽयं महान्सप्तदशाक्षरः ॥ ३ ॥ सिद्धोऽयं पञ्चलक्षेण जपेन मुनिपुंगव ॥
तद्दशांशं च हवनं तद्दशांशाभिषेचनम् ॥ तर्पणं तद्दशांशं च तद्दशांशं च मार्जनम् ॥ सुवर्णानां च शतकं पुरश्चरणद
क्षिणा ॥ ४ ॥ मन्त्रसिद्धस्य पुंसश्च विश्वं करतले मुने ॥ शक्तः पातुं समुद्रांश्च विश्वं संहर्तुमीश्वरः ॥ ५ ॥ पाञ्चभौतिकदेहेन
वैकुण्ठं गन्तुमीश्वरः ॥ तस्य संस्पर्शमात्रेण पदपङ्कजरेणुना ॥ पूतानि सर्वतीर्थानि सद्यः पूता वसुन्धरा ॥ ६ ॥ ध्यानं च साम

वेदोक्तं शृणु मन्मुखतो मुने ॥ सर्वेश्वरस्य कृष्णस्य भक्तिमुक्तिप्रदायि च ॥ ७ ॥ नवीनजलदश्यामं नीलेन्दीवरलोचनम् ॥ शरत्पार्वणचन्द्रास्यमीषद्धास्यं मनोहरम् ॥ ८ ॥ कोटिकन्दर्पलावण्यलीलाधाममनोहरम् ॥ रत्नसिंहासनस्थं तं रत्नभूषणभूषितम् ॥ ९ ॥ चन्दनोक्षितसर्वांगं पीताम्बरधरं वरम् ॥ वीक्ष्यमाणं च गोपीभिः सस्मिताभिश्च सन्ततम् ॥ १० ॥ प्रफुल्लमालतीमालावनमालाविभूषितम् ॥ दधतं कुन्दपुष्पाढ्यां चूडां चन्द्रकचर्च्चिताम् ॥ ११ ॥ प्रभां क्षिपन्तीं नभसश्चन्द्रतारान्वितस्य च ॥ रत्नभूषितसर्वांगं राधावक्षःस्थलस्थितम्॥१२॥सिद्धेन्द्रैश्च मुनीन्द्रैश्च देवेन्द्रैः परिसेवितम् ॥ ब्रह्मविष्णुमहेशैश्च श्रुतिभिश्च स्तुतं भजे॥१३॥ध्यानेनानेन तं ध्यात्वा चोपचारांस्तु षोडश ॥ दत्त्वा भक्त्या च संपूज्य सर्वज्ञत्वं लभेत्पुमान् ॥१४॥ अर्घ्यं पाद्यं चासनं च वसनं भूषणं तथा॥ गामर्घ्यं मधुपर्कं च यज्ञसूत्रमनुत्तमम् ॥१५॥ धूपदीपौ च नैवेद्यं पुनराचमनीयकम् ॥ नानाप्रकारपुष्पाणि ताम्बूलं च सुवासितम्॥ ॥१६॥ मनोहरं दिव्यतल्पं कस्तूर्यगरुचन्दनैः भक्त्या भगवते देयं माल्यं पुष्पाञ्जलित्रयम् ॥ १७ ॥ ततः षडंगं सम्पूज्य पश्चात्सम्पूजयेद्गणम्॥श्रीदामानं सुदामानं वसुदामानमेव च॥१८॥हरिभानुं चन्द्रभानुं सूर्य्यभानुं सुभानुकम्॥पार्षदप्रवरान्सप्त पूजयेद्भक्तिभावतः॥१९॥गोपीश्वरीं राधिकां च मूलप्रकृतिमीश्वरीम्॥कृष्णशक्तिं कृष्णपूज्यां पूजयेद्भक्तिपूर्वकम् ॥ २० ॥ गोपगोपीगणं शान्तं मां ब्रह्माणं च पार्वतीम् ॥ लक्ष्मीं सरस्वतीं पृथ्वीं सर्वदेवं सपार्षदम्॥२१॥देवषट्कं समभ्यर्च्य पुनः पञ्चोपचारतः॥ पश्चादेवं क्रमेणैव श्रीकृष्णं पूजयेत्सुधीः ॥२२॥ गणेशं च दिनेशं च वह्निं विष्णुं शिवं शिवाम् ॥ देवषट्कं समभ्यर्च्य चेष्टदेवं च पूजयेत् ॥ २३ ॥ गणेशं विघ्ननाशाय व्याधिनाशाय भास्करम् ॥ आत्मनः शुद्धये वह्निं श्रीविष्णुं मुक्तिहेतवे ॥ २४ ॥ ज्ञानाय शङ्करं दुर्गां परमैश्वर्य्यहेतवे ॥ सम्पूजने फलमिदं विपरीतमपूजने ॥२५॥ ततः कृत्वा परीहारमिष्टदेवं च भक्तितः ॥ स्तोत्रं च सामवेदोक्तं पठेद्भक्त्या च तच्छृणु॥२६॥महादेव उवाच ॥ परं ब्रह्म परं धाम परं ज्योतिः सनातनम्॥निर्लिप्तं परमात्मानं नमाम्यखिलकारणम्॥२७॥स्थूलात्स्थूलतमं देवं सूक्ष्मात्सूक्ष्मतमं परम् ॥ सर्वदृश्यमदृश्यं च स्वेच्छाचारं नमाम्यहम् ॥ २८ ॥ साकारं च निराकारं सगुणं निर्गुणं

प्रभुम् ॥ सर्वाधारं च सर्वं च स्वेच्छारूपं नमाम्यहम् ॥२९॥ अतीव कमनीयं च रूपं निरुपमं विभुम् ॥ करालरूपमत्यन्तं बिभ्रतं
प्रणमाम्यहम् ॥ ३० ॥ कर्म्मणः कर्म्मरूपं तं साक्षिणं सर्वकर्मणः ॥ फलं च फलदातारं सर्वरूपं नमाम्यहम् ॥ ३१ ॥ स्रष्टा
पाता च संहर्ता कलया मूर्तिभेदतः ॥ नानामूर्तिः कलांशेन यः पुमांस्तं नमाम्यहम् ॥ ३२ ॥ स्वयं प्रकृतिरूपश्च मायया च स्वयं
पुमान् ॥ तयोः परं स्वयं शश्वत्तन्नमामि परात्परम् ॥ ३३ ॥ स्त्रीपुन्नपुंसकं रूपं यो बिभर्ति स्वमायया ॥ स्वयं माया स्वयं मायी
यो देवस्तं नमाम्यहम् ॥ ३४ ॥ तारकं सर्वदुःखानां सर्वकारणकारणम् ॥ धारकं सर्वविश्वानां सर्वबीजं नमाम्यहम् ॥ ३५ ॥ तेज
स्विनां रवियों हि सर्वजातिषु वाडवः ॥ नक्षत्राणां च यश्चन्द्रस्तं नमामि जगत्प्रभुम् ॥ ३६ ॥ रुद्राणां वैष्णवानां च ज्ञानिनां यो
हि शङ्करः ॥ नागानां यो हि शेषश्च तं नमामि जगत्पतिम् ॥ ३७ ॥ प्रजापतीनां यो ब्रह्मा सिद्धानां कपिलः स्वयम् ॥ सनत्कु
मारो मुनिषु तं नमामि जगद्गुरुम्॥३८॥देवानां यो हि विष्णुश्च देवीनां प्रकृतिः स्वयम्॥ स्वायम्भुवो मनूनां यो मानवेषु च वैष्णवः॥
नारीणां शतरूपा च बहुरूपं नमाम्यहम् ॥३९॥ ऋतूनां यो वसन्तश्च मासानां मार्गशीर्षकः॥ एकादशी तिथीनां च नमाम्यखिल
रूपिणम् ॥४०॥ सागरः सरितां यश्च पर्वतानां हिमालयः ॥ वसुन्धरा सहिष्णूनां तं सर्वं प्रणमाम्यहम् ॥४१॥ पत्राणां तुलसीपत्रं
दारुरूपेषु चन्दनम् ॥ वृक्षाणां कल्पवृक्षो यस्तं नमामि जगत्पतिम् ॥ ४२ ॥ पुष्पाणां पारिजातश्च सस्यानां धान्यमेव च ॥ अमृतं
भक्ष्यवस्तूनां नानारूपं नमाम्यहम् ॥४३॥ ऐरावतो गजेन्द्राणां वैनतेयश्च पक्षिणाम् ॥ कामधेनुश्च धेनूनां सर्वरूपं नमाम्यहम्॥४४॥
तैजसानां सुवर्णं च धान्यानां यव एव च ॥ यः केसरी पशूनां च वररूपं नमाम्यहम् ॥ ४५ ॥ यक्षाणां च कुबेरो यो ग्रहाणां च
बृहस्पतिः ॥ दिक्पालानां महेन्द्रश्च तं नमामि परं वरम् ॥ ४६ ॥ वेदसंघश्च शास्त्राणां पण्डितानां सरस्वती ॥ अक्षराणामकारो
यस्तं प्रधानं नमाम्यहम् ॥ ४७ ॥ मन्त्राणां विष्णुमन्त्रश्च तीर्थानां जाह्नवी स्वयम् ॥ इन्द्रियाणां मनो यो हि सर्वश्रेष्ठं नमाम्यहम् ॥
॥ ४८ ॥ सुदर्शनं च शस्त्राणां व्याधिनां वैष्णवो ज्वरः ॥ तेजसां ब्रह्मतेजश्च वरेण्यं तं नमाम्यहम् ॥ ४९ ॥ बलं यो वै बलवतां

मनो वै शीघ्रगामिनाम् ॥ कालः कलयतां यो हि तं नमामि विलक्षणम् ॥५०॥ ज्ञानदाता गुरूणां च मातृरूपश्च बन्धुषु ॥ मित्रेषु
जन्मदाता यस्तं सारं प्रणमाम्यहम् ॥५१॥ शिल्पिनां विश्वकर्मा यः कामदेवश्च रूपिणाम् ॥ पतिव्रता च पत्नीनां नमस्यं तं नमाम्यहम्
॥ ५२ ॥ प्रियेषु पुत्ररूपो यो नृपरूपो नरेषु च ॥ शालग्रामश्च यन्त्राणां तं विशिष्टं नमाम्यहम् ॥ ५३ ॥ धर्म्मः कल्याणबीजानां
वेदानां सामवेदकः ॥ धर्म्माणां सत्यरूपो यो विशिष्टं तं नमाम्यहम् ॥ ५४ ॥ जले शैत्यस्वरूपो यो गन्धरूपश्च
भूमिषु ॥ शब्दरूपश्च गगने तं प्रणम्यं नमाम्यहम् ॥ ५५ ॥ क्रतूनां राजसूयो यो गायत्री छन्दसां च यः ॥ गन्धर्व्वाणां चित्ररथस्तं
गरिष्ठं नमाम्यहम् ॥५६॥ क्षीरस्वरूपो गव्यानां पवित्राणां च पावकः॥पुण्यदानां च यः स्तोत्रं तं नमामि शुभप्रदम् ॥५७॥
तृणानां कुशरूपो यो व्याधिरूपश्च वैरिणाम् ॥ गुणानां शान्तरूपो यश्चित्ररूपं नमाम्यहम् ॥ ५८ ॥ तेजोरूपो ज्ञानरूपः सर्वरूपश्च
यो महान्॥ सर्वानिर्वचनीयं च तं नमामि स्वयं विभुम्॥५९॥ सर्वाधारेषु यो वायुर्यथाऽऽत्मा नित्यरूपिणाम् ॥ आकाशो
व्यापकानां यो व्यापकं तं नमाम्यहम् ॥ ६० ॥ वेदानिर्वचनीयं यन्न स्तोतुं पण्डितः क्षमः ॥ यदनिर्वचनीयं च को वा तत्स्तोतुमीश्वरः
॥ ६१ ॥ वेदा न शक्ता यं स्तोतुं जडीभूता सरस्वती ॥ तं च वाङ्मनसापारं को विद्वान्स्तोतुमीश्वरः ॥६२॥ शुद्धतेजस्स्वरूपं
च भक्तानुग्रहविग्रहम् ॥ अतीव कमनीयं च श्यामरूपं नमाम्यहम् ॥६३॥ द्विभुजं मुरलीवक्त्रं किशोरं सस्मितं मुदा ॥ शश्वद्गोपाङ्गनाभिश्च
वीक्ष्यमाणं नमाम्यहम् ॥६४॥ राधया दत्तताम्बूलं भुक्तवन्तं मनोहरम्॥ रत्नसिंहासनस्थं च तमीशं प्रणमाम्यहम्॥६५॥रत्नभूषणभूषाढ्यं
सेवितं श्वेतचामरैः॥पार्षदप्रवरैर्गोपकुमारैस्तं नमाम्यहम्॥६६॥वृन्दावनान्तरे रम्ये रासोल्लाससमुत्सुकम्॥रासमण्डलमध्यस्थं
नमामि रसिकेश्वरम् ॥ ६७ ॥ शतशृङ्गे महाशैले गोलोके रत्नपर्वते ॥ विरजापुलिने रम्ये प्रणमामि विहारिणम्॥६८॥परिपूर्णतमं
शान्तं राधाकान्तं मनोहरम् ॥ सत्यं ब्रह्मस्वरूपं च नित्यं कृष्णं नमाम्यहम् ॥ ६९ ॥ श्रीकृष्णस्य स्तोत्रमिदं त्रिसन्ध्यं यः
पठेन्नरः ॥ धर्मार्थकाममोक्षाणां स दाता भारते भवेत् ॥ ७० ॥ हरिदास्यं हरौ भक्तिं लभेत्स्तोत्रप्रसादतः ॥ इह लोके जगत्पूज्यो

विष्णुतुल्यो भवेद्ध्रुवम् ॥ ७१ ॥ सर्वसिद्धेश्वरः शान्तोऽप्यन्ते याति हरेः पदम् ॥ तेजसा यशसा भाति यथा सूर्य्यो महीतले॥७२॥
जीवन्मुक्तः कृष्णभक्तः स भवेन्नात्र संशयः ॥ अरोगी गुणवान्विद्वान्पुत्रवान्धनवान्सदा ॥ ७३ ॥ षडभिज्ञो दशबलो मनोयायी
भवेद्ध्रुवम् ॥ सर्वज्ञः सर्वदश्चैव स दाता सर्वसम्पदाम् ॥ कल्पवृक्षसमः शश्वद्भवेत्कृष्णप्रसादतः ॥ ७४ ॥ इत्येवं कथितं स्तोत्रं वत्स
त्वं गच्छ पुष्करम् ॥ तत्र कृत्वा मन्त्रसिद्धिं पश्चात्प्राप्स्यसि वाञ्छितम् ॥ ७५ ॥ त्रिःसप्तकृत्वो निर्भूपां कुरु पृथ्वीं यथासुखम् ॥
ममाशिषा मुनिश्रेष्ठ श्रीकृष्णस्य प्रसादतः ॥ ७६ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे स्तव
प्रदानं नाम द्वात्रिंशत्तमोऽध्यायः ॥३२॥ नारायण उवाच ॥ शिवं प्रणम्य स भृगुर्दुर्गां कालीं मुदाऽन्वितः ॥ गत्वा पुष्करतीर्थं च
मन्त्रसिद्धिं चकार ह॥१॥स बभूव निराहारो मासं भक्तिसमन्वितः ॥ ध्यायन्कृष्णपदाम्भोजं वायुरोधं चकार सः ॥२॥ ददर्श चक्षुरु
न्मील्य गगनं तेजसा वृतम् ॥ दिशो दश द्योतयन्तं समाच्छन्नदिवाकरम् ॥३॥ तेजोमण्डलमध्यस्थं रत्नयानं ददर्श ह ॥ ददर्श तत्र
पुरुषमत्यन्तं सुन्दरं वरम्॥४॥ईषद्धास्यप्रसन्नास्यं भक्तानुग्रहकारकम् ॥ प्रणम्य दण्डवन्मूर्ध्ना वरं वव्रे तमीश्वरम् ॥५॥ त्रिःसप्तकृत्वो
निर्भूपां करिष्यामि महीमिति ॥ पादारविन्दे सुदृढां तां भक्तिमनपायिनीम्॥६॥ दास्यं सुदुर्ल्लभं शश्वत्त्वत्पादाब्जे च देहि मे ॥ कृष्ण
स्तस्मै वरं दत्त्वा तत्रैवान्तरधीयत॥७॥भृगुः प्रणम्य भवनं तज्जगाम परात्परम्॥पस्पन्द दक्षिणाङ्गं च परं मङ्गलसूचकम्॥८॥वाञ्छा
प्रतीतिजननं सुस्वप्नं च ददर्श ह ॥ मनः प्रसन्नं स्फीतं च तद्बभूव दिवानिशम् ॥ संभाष्य स्वजनं सर्वं गृहे तस्थौ मुदाऽन्वितः ॥
॥ ९ ॥ स्वशिष्यान्पितृशिष्यांश्च भ्रातृवर्गांश्च बान्धवान् ॥ आनीयानीय विविधान्मन्त्रांश्च स चकार ह ॥१०॥ पौर्वापर्य्यं स्ववृत्तान्तं
तानेवोक्त्वा शुभक्षणे ॥ तैरेव सार्द्धं बलवान्बभूव गमनोन्मुखः ॥ ११ ॥ ददर्श मङ्गलं रामः शुश्राव जयसूचकम् ॥ बुबुधे मनसा
सर्वं स्वजयं वैरिसंक्षयम्॥१२॥यात्राकाले च पुरतः शुश्राव सहसा मुनिः ॥ हरिशब्दं सिंहशब्दं घण्टादुन्दुभिवादनम्॥१३॥आकाश
वाणीसंगीतं जयस्ते भवितेति च ॥ नवेङ्गितं च कल्याणं मेघशब्दं जयावहम् ॥१४॥ चकार यात्रां भगवाञ्छुत्वैवं विविधं शुभम् ॥

ददर्श पुरतो विप्रबन्दिदैवज्ञभिक्षुकान् ॥१५॥ ज्वलत्प्रदीपं दधतीं पतिपुत्रवतीं सतीम्॥पुरो ददर्श स्मेरास्यां नानाभूषणभूषिताम् ॥ ॥ १६ ॥ शिवं शिवां पूर्णकुम्भं चाषं च नकुलं तथा ॥ गच्छन्ददर्श रामश्च यात्रामंगलसूचकम् ॥ १७ ॥ कृष्णसारं गजं सिंहं तुरंगं गण्डकं द्विपम् ॥ चमरीं राजहंसं च चक्रवाकं शुकं पिकम् ॥ १८ ॥ मयूरं खञ्जनं चैव शंखचिल्लं चकोरकम् ॥ पारावतं बलाकं च कारण्डं चातकं चटम् ॥ १९ ॥ सौदामनीं शक्रचापं सूर्यं सूर्यप्रभां शुभाम् ॥ सद्योमांसं सजीवं च मत्स्यं शङ्खं सुवर्णकम् ॥ २० ॥ माणिक्यं रजतं मुक्तां मणीन्द्रं च प्रवालकम् ॥ दधि लाजाञ्छुक्लधान्यं शुक्लपुष्पं च कुङ्कुमम् ॥ २१ ॥ पर्णं पताकां छत्रं च दर्पणं श्वेतचामरम् ॥ धेनुं वत्सप्रयुक्तां च रथस्थं भूमिपं तथा ॥ २२ ॥ दुग्धमाज्यं तथा पूगममृतं पायसं तथा ॥ शालग्रामं पक्वफलं स्वस्तिकं शर्करां मधु ॥२३॥ मार्ज्जारं च वृषेन्द्रं च मेषं पर्वतमूषिकम् ॥ मेघाच्छन्नस्य च रवेरुदयं चन्द्रमण्डलम् ॥ ॥ २४ ॥ कस्तूरीं व्यजनं तोयं हरिद्रां तीर्थमृत्तिकाम् ॥ सिद्धार्थं सर्षपं दूर्वां विप्रबालं च बालिकाम् ॥ २५ ॥ मृगं वेश्यां षट्पदं च कर्पूरं पीतवाससम् ॥ गोमूत्रं गोपुरीषं च गोधूलिं गोपदाङ्कितम् ॥ २६ ॥ गोष्ठं गवां वर्त्म रम्यां गोशालां गोगतिं शुभाम् ॥ भूषणं देवमूर्तिं च ज्वलदग्निं महोत्सवम् ॥२७॥ ताम्रं च स्फटिकं वन्द्यं सिन्दूरं माल्यचन्दनम् ॥ गन्धं च हीरकं रत्नं ददर्श दक्षिणे शुभम् ॥२८॥ सुगन्धिवायोराघ्राणं प्राप विप्राशिषं शुभाम् ॥ २९ ॥ इत्येवं मङ्गलं ज्ञात्वा प्रययौ स मुदाऽन्वितः ॥ अस्तं गते दिनकरे नर्म्मदातीरसन्निधौ॥३०॥तत्राक्षयवटं दिव्यं ददर्श सुमनोहरम् ॥ अत्यूर्ध्वं विस्तृतमतिपुण्याश्रमपदं परम्॥३१॥पौलस्त्यतपसः स्थानं सुगन्धिमरुदन्वितम्॥कार्त्तवीर्य्यार्जुनाभ्याशे तत्र तस्थौ गणैः सह॥३२॥सुष्वाप पुष्पशय्यायां किङ्करैः परिसेवितः॥निद्रां ययौ परिश्रान्तः परमानन्दसंगतः॥३३॥निशातीते च स भृगुश्चारु स्वप्नं ददर्श ह ॥ न चिन्तितं यन्मनसा वायुपित्तकफं विना ॥ ३४ ॥ गजाश्वशैलप्रासादगोवृक्षफलितेषु च ॥ आरुह्यमाणमात्मानं रुदन्तं कृमिभक्षितम् ॥ ३५ ॥ आरुह्यमाणमात्मानं नौकायां चन्दनोक्षितम् ॥ धृतवन्तं पुष्पमालां शोभितं पीतवाससा ॥ ३६ ॥ विण्मूत्रोक्षितसर्वांगं वसापूयसमन्वितम् ॥ वीणां वरां वादयन्तमात्मानं

च ददर्श ह ॥ ३७ ॥ विस्तीर्णपद्मपत्रैश्च स्वं ददर्श सरित्तटे ॥ दध्याज्यमधुसंयुक्तं भुक्तवन्तं च पायसम् ॥ ३८ ॥ भुक्तवन्तं च
ताम्बूलं लभन्तं ब्राह्मणाशिषम्॥फलपुष्पप्रदीपं च पश्यन्तं स्वं ददर्श ह॥३९॥परिपक्वफलं क्षीरमुष्णान्नं शर्करान्वितम् ॥ स्वस्तिकं
भुक्तवन्तं स्वं ददर्श च पुनः पुनः ॥ ४० ॥ जलौकसा वृश्चिकेन मीनेन भुजगेन च ॥ भक्षितं भीतमात्मानं पलायन्तं ददर्श सः ॥
॥ ४१ ॥ ततो ददर्श चात्मानं मण्डलं चन्द्रसूर्य्ययोः ॥ पतिपुत्रवतीं नारीं पश्यन्तं सस्मितं द्विजः ॥ ४२ ॥ सुवेषया कन्यकया स
स्मितेन द्विजेन च ॥ ददर्श श्लिष्टमात्मानं तुष्टेन परितुष्टया ॥ ४३ ॥ फलितं पुष्पितं वृक्षं देवताप्रतिमां नृपम् ॥ गजस्थं च रथस्थं
च पश्यन्तं स्वं ददर्श ह ॥ ४४ ॥ पीतवस्त्रपरीधानां रत्नालङ्कारभूषिताम् ॥ विशन्तीं ब्राह्मणीं गेहं पश्यन्तं स्वं ददर्श ह ॥ ४५ ॥
शंखं च स्फटिकं श्वेतमालां मुक्तां च चन्दनम् ॥ सुवर्णं रजतं रत्नं पश्यन्तं स्वं ददर्श ह ॥ ४६ ॥ गजं वृषं च सर्पं च श्वेतं च
श्वेतचामरम् ॥ नीलोत्पलं दर्पणं च भार्गवो वै ददर्श ह ॥ ४७ ॥ रथस्थं नवरत्नाढ्यं मालतीमाल्यभूषितम् ॥ रत्नसिंहासनस्थं
स्वं भृगुः स्वप्ने ददर्श ह ॥ ४८ ॥ पद्मश्रेणीं पूर्णकुम्भं दधि लाजान्घृतं मधु ॥ पर्णच्छत्रं छत्रिणं च भृगुः स्वप्ने ददर्श ह ॥ ४९ ॥
बकपंक्तिं हंसपंक्तिं कन्यापंक्तिं व्रतान्विताम् ॥ पूजयन्तीं घटं शुभ्रं भृगुः स्वप्ने ददर्श ह ॥ ५० ॥ मण्डपस्थं द्विजगणं पूजयन्तं हरं
हरिम् ॥ जयोऽस्त्वित्युक्तवन्तं तं भृगुः स्वप्ने ददर्श ह ॥ ५१ ॥ सुधावृष्टिं पर्णवृष्टिं फलवृष्टिं च शाश्वतीम् ॥ पुष्पचन्दनवृष्टिं च
भृगुः स्वप्ने ददर्श ह ॥ ५२ ॥ सद्योमांसं जीवमत्स्यं मयूरं श्वेतखञ्जनम् ॥ सरोवरं च तीर्थानि भृगुः स्वप्ने ददर्श ह ॥ ५३ ॥
पारावतं शुकं चाषं शंखं चिल्लं च चातकम् ॥ व्याघ्रं सिंहं च सुरभीं भृगुः स्वप्ने ददर्श ह ॥५४॥ गोरोचनां हरिद्रां च शुक्लधान्या
चलं वरम् ॥ ज्वलदग्निं तथा दूर्वां भृगुः स्वप्ने ददर्श ह ॥५५॥ देवालयसमूहं च शिवलिंगं च पूजितम् ॥ अर्चितां मृन्मयीं शैवां
भृगुः स्वप्ने ददर्श ह ॥ ५६ ॥ यवगोधूमचूर्णानां भक्ष्याणि विविधानि च ॥ भृगुर्ददर्श स्वप्ने च बुभुजे च पुनः पुनः ॥ ५७ ॥
दिव्यवस्त्रपरीधाना रत्नभूषणभूषिताः ॥ अगम्यागमनं स्वप्ने चकार भृगुनन्दनः ॥५८॥ ददर्श नर्त्तकीं वेश्यां रुधिरं च सुरां पपौ ॥

रुधिरोक्षितसर्वाङ्गः स्वप्ने च भृगुनन्दनः ॥ ५९ ॥ पक्षिणां पीतवर्णानां मानुषाणां च नारद ॥ मांसानि बुभुजे रामो हृष्टः स्वप्नेऽरुणोदये ॥ ६० ॥ अकस्मान्निगडैर्बद्धं क्षतं शस्त्रेण स्वं पुनः ॥ दृष्ट्वा च बुबुधे प्रातः समुत्तस्थौ हरिं स्मरन् ॥ ६१ ॥ अतीव हृष्टः स्वप्नेन प्रातःकृत्यं चकार सः ॥ मनसा बुबुधे सर्वं विजेष्यामि रिपुं ध्रुवम् ॥ ६२ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे त्रयस्त्रिंशत्तमोऽध्यायः ॥ ३३ ॥ नारायण उवाच ॥ स प्रातराह्निकं कृत्वा समालोच्य च तैः सह ॥ दूतं प्रस्थापयामास कार्त्तवीर्य्याश्रमं भृगुः ॥१॥ स दूतः शीघ्रमागत्य वसन्तं राजसंसदि ॥ वेष्टितं सचिवैः सार्द्धमुवाच नृपतीश्वरम् ॥ २ ॥ रामदूत उवाच ॥ नर्म्मदातीरसान्निध्ये न्यग्रोधाक्षयमूलके ॥ स भृगुर्भ्रातृभिः सार्द्धं तत्र त्वं गन्तुमर्हसि ॥ ३ ॥ युद्धं कुरु महाराज ज्ञातिभिर्ज्ञातिभिः सह ॥ त्रिस्सप्तकृत्वो निर्भूपां करिष्यति महीमिति ॥ ४ ॥ इत्युक्त्वा रामदूतश्चाप्यगच्छद्रामसन्निधिम् ॥ राजा विधाय सन्नाहं समरं गन्तुमुद्यतः ॥ ५ ॥ गच्छन्तं समरं दृष्ट्वा प्राणेशं सा मनोरमा ॥ तमेव वारयामास वासयामास सन्निधौ ॥ ६ ॥ राजा मनोरमां दृष्ट्वा प्रसन्नवदनेक्षणः ॥ तामुवाच सभामध्ये वाक्यं मानसिकं मुने ॥ ७ ॥ कार्त्तवीर्य्यार्जुन उवाच॥ मामेवाह्वयते कान्ते जमदग्निसुतो महान् ॥ स तिष्ठन्नर्म्मदातीरे रणाय भ्रातृभिः सह ॥ ८ ॥ सम्प्राप्य शङ्कराच्छस्त्रं मन्त्रं च कवचं हरेः ॥ त्रिस्सप्तकृत्वो निर्भूपां कर्तुमिच्छति मेदिनीम् ॥ ९ ॥ आन्दोलयन्ति मे प्राणा मनः संक्षुभितं मुहुः ॥ शश्वत्स्फुरति वामाङ्गं दृष्टं स्वप्नं शृणु प्रिये ॥ १० ॥ तैलाभ्यङ्गितमात्मानमपश्यं गर्दभोपरि ॥ औढपुष्पस्य माल्यं च बिभ्रतं रक्तचन्दनम् ॥ ११ ॥ रक्तवस्त्रपरीधानं लोहालङ्कारभूषितम् ॥ क्रीडन्तं च हसन्तं च निर्वाणाङ्गारराशिना ॥ १२ ॥ भस्माच्छन्नां च पृथिवीं जपापुष्पान्वितां सति ॥ रहितं चन्द्रसूर्य्याभ्यां रक्तसन्ध्यान्वितं नभः ॥ १३ ॥ मुक्तकेशां च नृत्यन्तीं विधवां छिन्ननासिकाम् ॥ रक्तवस्त्रपरीधानामपश्यं चाट्टहासिनीम् ॥ १४ ॥ स्मशानमग्निरहितां चितां भस्मसमन्विताम् ॥ भस्मवृष्टिमसृग्वृष्टिमग्निवृष्टिमपर्वाश्वरि ॥ १५ ॥ पक्वतालफलाकीर्णां पृथिवीमस्थिसंयुताम्॥अपश्यं कर्परौघं च छिन्नकेशनखान्वितम् ॥१६॥ पर्वतं लवणानां च राशीभूतं कपर्दकम्॥चूर्णानां

चैव तैलानामदृशं कन्दरं निशि ॥१७॥ अदृशं पुष्पितं वृक्षमशोककरवीरयोः ॥ तालवृक्षं च फलितं तत्र चैव पतत्फलम् ॥ १८ ॥
स्वकरात्पूर्णकलशः पपात च बभञ्ज च ॥ इत्यपश्यं च गगनात्सम्पतच्चन्द्रमण्डलम् ॥१९॥ अपश्यमम्बरात्सूर्य्यमण्डलं समभ्यत
द्भुवि ॥ उल्कापातं धूमकेतुं ग्रहणं चन्द्रसूर्य्ययोः ॥ २० ॥ विकृताकारपुरुषं विकटास्यं दिगम्बरम् ॥ आगच्छन्तं चाग्रतस्तमपश्यं
च भयानकम् ॥ २१ ॥ बाला द्वादशवर्षीया वस्त्रभूषणभूषिता ॥ संरुष्टा याति मद्गेहादित्यपश्यमहं निशि ॥ २२ ॥ आज्ञां त्वं
देहि राजेन्द्र त्वद्गेहाद्यामि काननम् ॥ वदसि त्वं मामिति च निश्यपश्यमहं शुचा ॥ २३ ॥ रुष्टो विप्रो मां शपते संन्यासी च
तथा गुरुः ॥ भित्तौ पुत्तलिकाश्चित्रा नृत्यन्तीश्च ददर्श ह ॥ २४ ॥ चञ्चलानां च गृध्राणां काकानां निकरैः सदा ॥ पीडितं महि
षाणां च स्वमपश्यमहं निशि ॥ २५ ॥ पीडितं तैलयन्त्रेण भ्रामितं तैलकारिणा ॥ दिगम्बरान्पाशहस्तानपश्यमहमीश्वरि ॥ २६ ॥
नृत्यन्ति गायकाः सर्वे गानं गायन्ति मे गृहे ॥ विवाहं परमानन्दमित्यपश्यमहं निशि ॥ २७ ॥ रमणं कुर्वतो लोकान्केशाकेशि
च कुर्वतः ॥ अदृशं समरं रात्रौ काकानां च शुनामपि ॥ २८ ॥ मोटकानि च पिण्डानि श्मशानं शवसंयुतम् ॥ रक्तवस्त्रं शुक्लव
स्त्रमपश्यं निशि कामिनि ॥ २९ ॥ कृष्णाम्बरा कृष्णवर्णा नग्ना वै मुक्तकेशिनी॥विधवाऽऽश्लिष्यति च मामपश्यं निशि शोभने ॥
॥ ३० ॥ नापितो मुण्डते मुण्डं श्मश्रुश्रेणीं च मे प्रिये ॥ वक्षःस्थलं च नखरमित्यपश्यमहं निशि ॥ ३१ ॥ पादुका चर्मरज्जूना
मपश्यं राशिमुल्बणम् ॥ चक्रं भ्रमन्तं भूमौ च कुलालस्येति सुन्दरि ॥ ३२ ॥ वात्यया घूर्णमानं च शुष्कवृक्षं तमुत्थितम् ॥
पूर्णमानं कबन्धं वै चापश्यं निशि सुव्रते ॥ ३३ ॥ ग्रथितां मुण्डमालां च चूर्णमानां च वात्यया ॥ अतीव घोरदशनामप्यपश्य
महं वरे ॥ ३४ ॥ भूतप्रेता मुक्तकेशा वमन्तश्च हुताशनम् ॥ मां भीषयन्ति सततमित्यपश्यमहं निशि ॥ ३५ ॥ दग्धजीवं दग्ध
वृक्षं व्याधिग्रस्तं नरं परम् ॥ अङ्गहीनं च वृषलमप्यपश्यमहं निशि ॥ ३६ ॥ गेहपर्वतवृक्षाणां सहसा पतनं परम् ॥ मुहुर्मुहुर्वज्र
पातमप्यपश्यमहं निशि ॥ ३७ ॥ कुक्कुराणां शृगालानां रोदनं च मुहुर्मुहुः ॥ गृहे गृहे च नियतमपश्यं सर्वतो निशि ॥ ३८ ॥

अधश्शिरस्तूर्द्ध्वपादं मुक्तकेशं दिगम्बरम् ॥ भूमौ भ्रमन्तं गच्छन्तं चाप्यपश्यमहं नरम् ॥ ३९ ॥ विकृताकारशब्दं च ग्रामादौ देव
रोदनम् ॥ प्रातः श्रुत्वैवावबुद्धः क उपायो वदाधुना ॥ ४० ॥ नृपतेर्वचनं श्रुत्वा हृदयेन विदूयता ॥ सगद्गदं च रुदती तमुवाच
नृपेश्वरम् ॥ ४१ ॥ मनोरमोवाच ॥ हे नाथ रमणश्रेष्ठ श्रेष्ठ सर्वमहीभृताम् ॥ प्राणातिरेक प्राणेश शृणु वाक्यं शुभावहम् ॥४२॥
नारायणांशो भगवाञ्जामदग्न्यो महाबली ॥ सृष्टिसंहर्तुरीशस्य शिष्योऽयं जगतः प्रभोः ॥ ४३ ॥ त्रिःसप्तकृत्वो निर्भूपां करिष्यामि
महीमिति ॥ प्रतिज्ञा यस्य रामस्य तेन सार्द्धं रणं त्यज ॥ ४४ ॥ पापिनं रावणं जित्वा शूरं त्वमपि मन्यसे ॥ स त्वया
न जितो नाथ स्वपापेन पराजितः ॥ ४५ ॥ यो न रक्षति धर्म्मं च तस्य को रक्षिता भुवि ॥ स नश्यति स्वयं मूढो जीवन्नपि
मृतो हि सः ॥ ४६ ॥ शुभाशुभस्य सततं साक्षी धर्म्मस्य कर्म्मणः ॥ आत्मारामः स्थितः स्वान्तो मूढस्त्वं नहि पश्यसि ॥४७॥
पुत्रदारादिकं यद्यत्सर्वैश्वर्य्यं सुधर्म्मिणाम् ॥ जलबुद्बुदवत्सर्वमनित्यं नश्वरं नृप ॥४८॥ संसारं स्वप्नसदृशं मत्वा सन्तोऽत्र भारते॥
ध्यायन्ति सततं धर्म्मं तपः कुर्वन्ति भक्तितः ॥ ४९ ॥ दत्तेन दत्तं यज्ज्ञानं तत्सर्वं विस्मृतं त्वया ॥ अस्ति चेद्विप्रहिंसायां कुबुद्धे
त्वन्मनः कथम् ॥ ५० ॥ सुखार्थे मृगयां गत्वा तत्रोपोष्य द्विजाश्रमे ॥ भुक्त्वा मिष्टमपूर्वं च हतो विप्रो निरर्थकम् ॥ ५१ ॥ गुरुविप्रसुराणां
च यः करोति पराभवम् ॥ अभीष्टदेवस्तं रुष्टो विपत्तिस्तस्य सन्निधौ ॥ ५२ ॥ स्मरणं कुरु राजेन्द्र दत्तात्रेयपदाम्बुजम्
॥ गुरौ भक्तिश्च सर्वेषां सर्वविघ्नविनाशिनी ॥ ५३ ॥ गुरुदेवं समभ्यर्च्य तं भृगुं शरणं व्रज ॥ विप्रे देवे प्रसन्ने च क्षत्रियाणां
नहि क्षतिः ॥ ५४ ॥ विप्रस्य किंकरो भूपो वैश्यो भूपस्य भूमिप ॥ सर्वेषां किङ्कराः शूद्रा ब्राह्मणस्य विशेषतः ॥ ५५ ॥ अयशः
शरणं शश्वत्क्षत्रियस्य च क्षत्रिये ॥ महद्यशस्तच्छरणं गुरुदेवद्विजेषु च ॥ ५६ ॥ ब्राह्मणं भज राजेन्द्र गरीयांसं सुरादपि ॥ ब्राह्मणे
परितुष्टे च सन्तुष्टाः सर्वदेवताः॥५७॥इत्येवमुक्त्वा राजेन्द्रं क्रोडे कृत्वा महासती॥मुहुर्मुहुर्मुखं दृष्ट्वा विललाप रुरोद च ॥५८॥ क्षणं
तिष्ठ महाराज पुनरेवमुवाच सा ॥ स्नानं कुरु महाराज भोजयिष्यामि वाञ्छितम् ॥ ५९ ॥ चन्दनागुरुकस्तूरीकर्पूरैः कुंकुमैर्यु

तम् ॥ अनुलेपं करिष्यामि सर्वांगे तव सुन्दर ॥६०॥ क्षणं सिंहासने तिष्ठ क्षणं वक्षसि मे प्रभो ॥ सभायां पुष्परचिते तल्पे पश्यामि
शोभनम् ॥ ६१ ॥ शतपुत्राधिकः प्रेम्णा सतीनां वै पतिर्नृप ॥ निरूपितो भगवता वेदेषु हरिणा स्वयम् ॥ ६२ ॥ मनोरमावचः
श्रुत्वा राजा परमपण्डितः ॥ बोधयामास तां राज्ञीं ददौ प्रत्युत्तरं पुनः ॥ ६३ ॥ कार्त्तवीर्य्यार्जुन उवाच ॥ शृणु कान्ते प्रवक्ष्यामि
श्रुतं सर्वं त्वयेरितम् ॥ शोकार्त्तानां च वचनं न प्रशंस्यं सभासु च ॥ ६४ ॥ सुखं दुःखं भयं शोकः कलहः प्रीतिरेव च ॥ कर्म
भोगार्हकालेन सर्वं भवति सुन्दरि ॥ ६५ ॥ कालो ददाति राजत्वं कालो मृत्युं पुनर्भवम् ॥ कालः सृजति संसारं कालः संहरते
पुनः ॥ ६६ ॥ करोति पालनं कालः कालरूपी जनार्दनः ॥ कालस्य कालः श्रीकृष्णो विधातुर्विधिरेव च ॥ ६७ ॥ संहर्तुर्त्तांऽपि
संहर्त्ता पातुः पाता च कर्मकृत् ॥ स कर्मणां कर्मरूपी ददाति तपसां फलम् ॥ कः केन हन्यते जन्तुः कर्मणा वै विना सति॥
॥ ६८ ॥ स्रष्टा सृजति सृष्टिं च संहर्त्ता संहरेत्पुनः ॥ पाता पाति च भूतानि यस्याज्ञां परिपालयेत् ॥ ६९ ॥ यस्याज्ञया वाति
वातः सन्ततं भयविह्वलः ॥ शश्वत्सञ्चरते मृत्युः सूर्य्यस्तपति सन्ततम् ॥ ७० ॥ वर्षतीन्द्रो दहत्यग्निः कालो भ्रमति भीतवत् ॥
तिष्ठन्ति स्थावराः सर्वे चरन्ति सततं चराः ॥ ७१ ॥ वृक्षाश्च पुष्पिताः काले फलिताः पल्लवान्विताः ॥ शुष्यन्ति कालतः
काले वर्द्धन्ते च तदाज्ञया ॥७२॥ आविर्भूता तिरोभूता सृष्टिरेव तदाज्ञया ॥ तस्याज्ञया भवेत्सर्वं न किञ्चित्स्वेच्छया नृणाम् ॥
॥ ७३ ॥ नारायणांशो भगवाञ्जामदग्न्यो महाबलः ॥ त्रिस्सप्तकृत्वो निर्भूपां करिष्यति महीमिति ॥ ७४ ॥ प्रतिज्ञा विफला
तस्य न भवेत्तु कदाचन ॥ निश्चितं तस्य वध्योऽहमिति जानामि सुव्रते ॥ ७५ ॥ ज्ञात्वा सर्वं भविष्यं च शरणं यामि तत्क
थम् ॥ प्रतिष्ठितानां चाकीर्त्तिर्मरणादतिरिच्यते ॥ ७६ ॥ इत्येवमुक्त्वा राजेन्द्रः समरं गन्तुमुद्यतः ॥ वाद्यं च वादयामास कारया
मास मंगलम् ॥ ७७ ॥ शतकोटिर्नृपाणां च राजेन्द्राणां त्रिलक्षकम् ॥ अक्षौहिणीनां शतकं महाबलपराक्रमम् ॥ ७८ ॥ अश्वानां
च गजानां च पदातीनां तथैव च ॥ असंख्यकं रथानां च गृहीत्वा गन्तुमुद्यतः ॥ ७९ ॥ बभूव स्तिमिता साध्वी दृष्ट्वा तं गमनो

Digitization by eGangotri. Funding [illegible]-Delhi

न्मुखम् ॥ धृतवन्तं च सन्नाहमक्षयं सशरं धनुः ॥ ८० ॥ क्रीडागारे क्षणं तस्थौ कृत्वा कान्तं स्ववक्षसि ॥ पश्यन्ती तन्मुखाम्भोजं चुचुम्ब च मुहुर्मुहुः ॥ ८१ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे कार्तवीर्यार्जुनसंनाहो नाम चतुस्त्रिंशत्तमोऽध्यायः ॥ ३४ ॥ नारायण उवाच ॥ मनोरमा प्राणनाथं क्षणं कृत्वा स्ववक्षसि ॥ भविष्यं मनसा चक्रे यद्यत्स्वामिमुखाच्छुतम् ॥ १ ॥ पुत्रांश्च पुरतः कृत्वा बान्धवांश्च स्वकिंकरान् ॥ सस्मार सा हरिपदं मेने सत्यं भवेन्मुने ॥२॥ योगेन भित्त्वा षट्चक्रं वायुं संस्थाप्य मूर्द्धनि ॥ ब्रह्मरन्ध्रस्थकमले सहस्रदलसंयुते ॥ ३ ॥ स्वान्तमाकृष्य विषयाज्जलबुद्बुदसन्निभात् ॥ संस्थाप्य बद्धा ज्ञानेन लोलं ब्रह्मणि निष्कले ॥ ४ ॥ द्विविधं कर्म संन्यस्य निर्मूलमपुनर्भवम् ॥ तत्र प्राणांश्च तत्याज न च प्राणाधिकं प्रियम् ॥ ५ ॥ स राजा तां मृतां दृष्ट्वा विललाप रुरोद च ॥ सन्नाहं संपरित्यज्य कृत्वा वक्षस्युवाच ताम् ॥६॥ राजोवाच ॥ मनोरमे समुत्तिष्ठ न यास्यामि रणाजिरम् ॥ सचेतना मां पश्येति विलपन्तं मुहुर्मुहुः ॥ ७ ॥ मनोरमे समुत्तिष्ठ मया सार्द्धं गृहं व्रज ॥ न करिष्यामि समरं भृगुणा सह भामिनि ॥ ८ ॥ मनोरमे समुत्तिष्ठ श्रीशैलं व्रज सुन्दरि ॥ तत्र क्रीडां करिष्यामि त्वया सार्द्धं यथा पुरा ॥ ९ ॥ मनोरमे समुत्तिष्ठ व्रज गोदावरीं प्रिये ॥ जलक्रीडां करिष्यामि त्वया सार्धं यथा पुरा ॥ १० ॥ मनोरमे समुत्तिष्ठ नन्दनं व्रज सुन्दरि ॥ पुष्पभद्रानदीतीरे विहरिष्यामि निर्जने ॥ ११ ॥ मनोरमे समुत्तिष्ठ मलयं व्रज सुन्दरि ॥ त्वया सार्द्धं रमिष्येऽहं तत्र चन्दनकानने ॥ १२ ॥ शीतेन गन्धयुक्तेन वायुना सुरभीकृते ॥ भ्रमरध्वनिसंयुक्ते पुंस्कोकिलरुतश्रिते ॥ १३ ॥ चन्दनागुरुकस्तूरीकुंकुमालेपनं कुरु ॥ चन्दनोक्षितसर्वाङ्गं पश्य मां सस्मिते सति ॥ १४ ॥ सुधातुल्यं सुमधुरं वचनं रचय प्रिये ॥ कुटिलभ्रूविकारं च कथं न कुरुषेऽधुना ॥ १५ ॥ नृपस्य रोदनं श्रुत्वा वाग्बभूवाशरीरिणी ॥ स्थिरीभव महाराज कुरुषे रोदनं कथम् ॥ १६ ॥ त्वं महाज्ञानिनां श्रेष्ठो दत्तात्रेयप्रसादतः ॥ जलबुद्बुदवत्सर्वं संसारं पश्य शोभनम् ॥ १७ ॥ कमलांशा च सा साध्वी जगाम कमलालयम् ॥ त्वमेव गच्छ वैकुण्ठं रणं कृत्वा रणाजिरे ॥ १८ ॥ इत्येवं वचनं

श्रुत्वा जहौ शोकं नराधिपः ॥ ततश्चन्दनकाष्ठेन चितां दिव्यां चकार ह ॥ १९ ॥ संस्काराग्निं कारयित्वा पुत्रद्वारा ददाह ताम् ॥ नानाविधानि रत्नानि ब्राह्मणेभ्यो ददौ मुदा ॥ २० ॥ नानाविधानि दानानि वस्त्राणि विविधानि च ॥ मनोरमायाः पुण्येन ब्राह्मणेभ्यो ददौ मुदा ॥२१॥ भुज्यतां भुज्यतां शश्वद्दीयतां दीयतामिति ॥ शब्दो बभूव सर्वत्र कार्त्तवीर्य्याश्रमे मुने ॥२२॥ कोषेषु स्वाधिकारेषु स्थितं यद्यद्धनं तदा ॥ मनोरमायाः पुण्येन ब्राह्मणेभ्यो ददौ मुदा ॥ २३ ॥ राजा जगाम समरं हृदयेन विदूयता ॥ सार्धं सैन्यसमूहैश्च वाद्यभाण्डैरसंख्यकैः ॥२४॥ ददर्श मङ्गलं राजा पुरो वर्त्मनि वर्त्मनि ॥ ययौ तथापि समरं नाजगाम गृहं पुनः॥२५॥ मुक्तकेशीं छिन्ननासां रुदतीं च दिगम्बराम् ॥ कृष्णवस्त्रपरीधानामपरां विधवामपि ॥ २६ ॥ मुखदुष्टां योनिदुष्टां व्याधियुक्तां च कुट्टिनीम् ॥ पतिपुत्रविहीनां च डाकिनीं पुंश्चलीं तथा ॥ २७ ॥ कुम्भकारं तैलकारं व्याधं सर्पोपजीविनम् ॥ कुचैलमतिरूक्षांगं नग्नं काषायवासिनम् ॥ २८ ॥ वसाविक्रयिणं चैव कन्याविक्रयिणं तथा ॥ चितादग्धं शवं भस्म निर्वाणाङ्गारमेव च॥२९॥सर्पक्षतं नरं सर्पं गोधां च शशकं विषम्॥श्राद्धपाकं च पिण्डं च मोटकं च तिलांस्तथा ॥३०॥देवलं वृषवाहं च शूद्रश्राद्धान्नभोजिनम् ॥शूद्रान्नपाचकं शूद्रयाजकं ग्रामयाजकम्॥३१॥कुशपुत्तलिकां चैव शवदाहनकारिणम् ॥ शून्यकुम्भं भग्नकुम्भं तैलं लवणमस्थि च॥३२॥ कार्पासं कच्छपं चूर्णं कुक्कुरं शब्दकारिणम् ॥ दक्षिणे च सृगालं च कुर्वन्तं भैरवं रवम् ॥३३॥ कपर्दकं च क्षौरं च च्छिन्नकेशं नखं मलम् ॥ कलहं च विलापं च तथा तत्कारिणं जनम् ॥ ३४ ॥ अमङ्गलं रुदन्तं च रुदन्तं शोककारिणम् ॥ ३५ ॥ मिथ्यासाक्ष्यप्रदातारं चौरं च नरघातिनम्॥पुंश्चलीपतिपुत्रौ च पुंश्चल्योदनभोजिनम् ॥ ३६ ॥ देवतागुरुविप्राणां वस्तुवित्तापहारिणम् ॥दत्तापहारिणं दस्युं हिंसकं सूचकं खलम् ॥ ३७ ॥ पितृमातृविरक्तं च द्विजाश्वत्थविघातिनम् ॥ सत्यघ्नं च कृतघ्नं च स्थाप्यस्याप्यपहारिणम् ॥ ३८ ॥ विप्रमित्रद्रोहमेवं क्षतं विश्वासघातकम् ॥ गुरुदेवद्विजानां च निन्दकं स्वांगघातकम् ॥ ३९ ॥ जीवानां घातकं चैव स्वांगहीनं च निर्दयम्॥व्रतोपवासहीनं च दीक्षाहीनं नपुंसकम् ॥४०॥गलितव्याधिगात्रं च काणं बधिरमेव च ॥ पुल्कसं छिन्नलिङ्गं

च सुरामत्तं सुरां तथा ॥४१॥ क्षिप्तं वमन्तं रुधिरं महिषं गर्द्दभं तथा ॥ मूत्रं पुरीषं श्लेष्माणं हृक्षिगं नृकपालकम् ॥४२॥ चण्डवातं रक्तवृष्टिं वाद्यं वै वृक्षपातनम् ॥ वृकं च सूकरं गृध्रं श्येनं कङ्कं च भल्लुकम्॥४३॥पाशं च शुष्ककाष्ठं च वायसं गन्धकं तथा॥४४॥ प्रतिग्राहिब्राह्मणं च तन्त्रमन्त्रोपजीविनम्॥ वैद्यं च रक्तपुष्पं चाप्यौषधं तुषमेव च॥४५॥कुवार्त्तां मृतवार्तां च विप्रशापं च दारुणम्॥ दुर्गन्धिवातं दुश्शब्दं राजाऽपश्यत्स वर्त्मनि ॥ ४६ ॥ मनश्च कुत्सितं प्राणाः क्षुभिताश्च निरन्तरम्॥वामांगस्पन्दनं देहजाडयं राज्ञो बभूव ह ॥ ४७ ॥ तथाऽपि राजा निश्शङ्को ददर्श समराङ्गणम् ॥ सर्वसैन्यसमायुक्तः प्रविवेश रणाजिरम् ॥ ४८ ॥ अवरुह्य रथात्तूर्णं दृष्ट्वा च पुरतो भृगुम् ॥ ननाम दण्डवद्भूमौ राजेन्द्रैः सह भक्तितः ॥ ४९ ॥ आशिषं युयुजे रामः स्वर्गं याहीति वाञ्छितम् ॥ तेषां सह्यं तद्बभूवुर्दुर्लंघ्या ब्राह्मणाशिषः ॥ ५० ॥ भृगुं प्रणम्य राजेन्द्रो राजेन्द्रैः सह तत्क्षणात् ॥ आरुरोह रथं तूर्णं नानायुधसमन्वितम् ॥ ५१ ॥ नानाप्रकारवाद्यं च दुन्दुभिं मुरजादिकम् ॥ वादयामास सहसा ब्राह्मणेभ्यो ददौ धनम् ॥ ५२ ॥ उवाच रामो राजेन्द्रं राजेन्द्राणां च संसदि ॥ हितं सत्यं नीतिसारं वाक्यं वेदविदां वरः ॥ ५३ ॥ परशुराम उवाच ॥ शृणु राजेन्द्र धर्मिष्ठ चन्द्रवंशसमुद्भव ॥ विष्णोरंशस्य शिष्यस्त्वं दत्तात्रेयस्य धीमतः ॥ ५४ ॥ स्वयं विद्वांश्च वेदांश्च श्रुत्वा वेदविदो मुखात् ॥ कथं दुर्बुद्धिरधुना सज्जनानां विहिंसना ॥ ५५ ॥ त्वं पूर्वमहनो लोभान्निरीहं ब्राह्मणं कथम् ॥ ब्राह्मणी शोकसन्तप्ता भर्त्रा सार्द्धं गता सती ॥ ५६ ॥ किं भविष्यति ते भूप परत्रैवानयोर्वधात् ॥ सर्वं मिथ्यैव संसारं पद्मपत्रे यथा जलम् ॥ ५७ ॥ सत्कीर्त्तिश्चाथ दुष्कीर्तिः कथामात्रावशेषिता ॥ विडम्बना वा किमतो दुष्कीर्त्तेश्च सतामहो ॥ ५८ ॥ क्व गता कपिला त्वं क्व क्व विवादो मुनिः कुतः ॥ यत्कृतं विदुषा राज्ञा न कृतं हालिकेन तत् ॥ ५९ ॥ त्वामुपोषितमीशं हि दृष्ट्वा तातो हि धार्मिकः ॥ पारणां कारयामास दत्तं तस्य फलं त्वया ॥ ६० ॥ अधीतं विधिवद्दत्तं ब्राह्मणेभ्यो दिने दिने ॥ जगत्ते यशसा पूर्णमयशो वार्द्धके कथम् ॥ ॥ ६१ ॥ दाता वरिष्ठो धर्म्मिष्ठो यशस्वी पुण्यवान्सुधीः ॥ कार्त्तवीर्यार्जुनसमो न भूतो न भविष्यति ॥ ६२ ॥ पुरातना वदन्तीति

बन्दिनो धरणीतले ॥ यो विख्यातः पुराणेषु तस्य दुष्कीर्त्तिरीदृशी ॥ ६३ ॥ दुर्वाक्यं दुःसहं राजंस्तीक्ष्णास्त्रादपि जीविनाम् ॥
संकटेऽपि सतां वक्राद्द्विरुक्तिर्न विनिर्गता ॥ ६४ ॥ न ददामि द्विरुक्तिं ते प्रकृतं कथयाम्यहम् ॥ उत्तरं देहि राजेन्द्र मह्यं राजेन्द्रसं
सदि ॥ ६५ ॥ सूर्य्यचन्द्रमनूनां च वंशजाः सन्ति संसदि ॥ सत्यं वद सभायां च शृण्वन्तु पितरः सुराः ॥ ६६ ॥ शृण्वन्तु सर्वे
राजेन्द्राः सदसद्वक्तुमीश्वराः ॥ पश्यन्तो हि समं सन्तः पाक्षिकं न वदन्ति च ॥ ६७ ॥ इत्युक्त्वा रैणुकेयश्च विरराम रणस्थले ॥
राजा बृहस्पतिसमः प्रवक्तुमुपचक्रमे ॥ ६८ ॥ कार्त्तवीर्य्यार्जुन उवाच ॥ शृणु राम हरेरंशो हरिभक्तो जितेन्द्रियः ॥ श्रुतो धर्मो
मुखाद्येषां त्वं च तेषां गुरोर्गुरुः ॥ ६९ ॥ कर्म्मणा वाऽप्यसद्बुध्या करोति ब्रह्मभावनाम् ॥ स्वधर्म्मनिरतः शुद्धस्तस्माद्ब्राह्मण
उच्चते ॥ ७० ॥ अन्तर्बहिश्च मननात्कुरुत कर्म्म नित्यशः ॥ मौनी शश्वद्वदेत्काले यो वै स मुनिरुच्यते ॥ ७१ ॥
स्वर्णे लोष्टे गृहेऽरण्ये पंके सुस्निग्धचन्दने ॥ समताभावना यस्य स योगी परिकीर्त्तितः ॥७२॥ सर्वजीवेषु यो विष्णुं भावयेत्समता
धिया ॥ हरौ करोति भक्तिं च हरिभक्तः स च स्मृतः ॥७३॥ तपोधनं ब्राह्मणानां तपः कल्पतरुर्यथा ॥ तपस्या कामधेनुश्च सन्ततं
तपसि स्पृहा ॥७४॥ ऐश्वर्य्ये क्षत्रियाणां च वाणिज्ये च तथा विशाम् ॥ क्षत्रियाणां च तपसि स्पृहाऽतीवाऽप्रशंसिता ॥७५॥ ब्राह्मणानां
विवादे च स्पृहाऽतीव विनिन्दिता ॥७६॥ रागी राजसिकं कार्य्यं कुरुते कर्म्म रागतः ॥ रागान्धो यो राजसिकस्तेन राजा प्रकीर्तितः
॥७७॥ रागतः कामधेनुश्च मया वै याचिता मुने ॥ को दोष एक मे जातः क्षत्रियस्यानुरागिणः ॥७८॥ कुतः कस्य मुनेरस्ति कामधेनु
स्त्वया विना ॥ स्पृहा रणे वा भोगे वा युष्माकं च व्यतिक्रमः ॥७९॥ त्रिंशदक्षौहिणीं सेनां राजेन्द्राणां त्रिकोटिकाम् ॥ निहत्यायान्तमेकं मां
न हन्तुं सहनं मुने ॥८०॥ आत्मानं हन्तुमायान्तमपि वेदांगपारगम् ॥ न दोषो हनने तस्य न तेन ब्रह्महाऽभवम् ॥ ८१ ॥ प्रायश्चित्तं
हिंसकानां न वेदेषु निरूपितम् ॥ वधः समुचितस्तेषामित्याह कमलोद्भवः ॥ ८२ ॥ पित्रा ते निहता भूपा महाबलपराक्रमाः ॥
इदानीं राजपुत्राश्च शिशवोऽत्र समागताः ॥८३॥ त्रिःसप्तकृत्वो निर्भूपां कृत्स्नां कर्तुं महीमिति ॥ त्वया कृता प्रतिज्ञा या तस्यास्त्वं

पालनं कुरु ॥ ८४ ॥ क्षत्रियाणां रणो धर्मो रणे मृत्युर्न गर्हितः ॥ रणे स्वाहा ब्राह्मणानां लोके वेदे विडम्बना ॥ ८५ ॥ तपोधनानां
विप्राणां वाग्बलानां युगे युगे ॥ शान्तिः स्वस्त्ययनं कर्म्म विप्रधर्मो न संगरः ॥ ८६ ॥ क्षत्रियाणां बलं युद्धं व्यापारश्च बलं
विशाम् ॥ भिक्षा बलं भिक्षुकाणां शूद्राणां विप्रसेवनम् ॥ ८७ ॥ हरौ भक्तिर्हरेर्दास्यं वैष्णवानां बलं हरिः ॥ हिंसा बलं खलानां
च तपस्या च तपस्विनाम् ॥ ८८ ॥ बलं वेषश्च वेश्यानां योषितां यौवनं बलम् ॥ बलं प्रतापो भूपानां बालानां रोदनं बलम्
॥ ८९ ॥ सतां सत्यं बलं मिथ्या बलमेवासतां सदा ॥ अनुगानामनुगमः स्वल्पस्वानां च सञ्चयः ॥ ९० ॥ विद्या बलं पण्डितानां
धैर्य्यं साहसिनां बलम् ॥ ९१ ॥ धनं बलं च धनिनां शुचीनां च विशेषतः ॥ बलं विवेकः शान्तानां गुणिनां बलमेकता
॥ ९२ ॥ गुणो बलं च गुणिनां चौराणां चौर्य्यमेव च ॥ प्रियवाक्यं च कापट्यमधर्म्मः पुंश्चलीबलम् ॥ ९३ ॥ हिंसा च हिंस्रजन्तूनां
सतीनां पतिसेवनम् ॥ वरशापौ सुराणां च शिष्याणां गुरुसेवनम् ॥ ९४ ॥ बलं धर्मो गृहस्थानां भृत्यानां राजसेवनम् ॥
बलं स्तवः स्तावकानां ब्रह्म च ब्रह्मचारिणाम् ॥ ९५ ॥ यतीनां च सदाचारो न्यासः संन्यासिनां बलम् ॥ पापं बलं पातकिनाम
शक्तानां हरिर्बलम् ॥ ९६ ॥ पुण्यं बलं पुण्यवतां प्रजानां नृपतिर्बलम् ॥ फलं बलं च वृक्षाणां जलजानां जलं बलम् ॥ ९७ ॥
जलं बलं च सस्यानां मत्स्यानां च जलं बलम् ॥ शान्तिर्बलं च भूपानां विप्राणां च विशेषतः ॥ ९८ ॥ विप्रः शान्तो रणोद्योगी
नैव दृष्टो न च श्रुतः ॥ स्थिते नारायणे देवे बभूवान्यविपर्य्ययः ॥ ९९ ॥ इत्येवमुक्त्वा राजेन्द्रो विरराम रणाजिरे ॥ तस्य तद्वचनं
श्रुत्वा सद्यस्तूष्णीं बभूव ह ॥ १०० ॥ रामस्य भ्रातरः सर्वे तीक्ष्णशस्त्रासिपाणयः ॥ आरेभिरे रणं कर्त्तुं महावीरास्तदाज्ञया
॥ १०१ ॥ रणोन्मुखांश्च तान्दृष्ट्वा मत्स्यराजो महाबलः ॥ समारेभे रणं कर्तुं मङ्गलो मङ्गलालयः ॥ १०२ ॥ शरजालेन राजेन्द्रो
वारयामास तानपि ॥ चिच्छिदुः शरजालं च जमदग्निसुतास्तदा ॥ १०३ ॥ राजा चिक्षेप दिव्यास्त्रं शतसूर्य्यप्रभं मुने ॥ माहेश्वरेण
मुनयश्चिच्छिदुश्चैव लीलया॥१०४॥दिव्यास्त्रेणैव मुनयश्चिच्छिदुः सशरं धनुः॥रथं च सारथिं चैव राज्ञः सन्नाहमेव च॥१०५॥

न्यस्तशस्त्रं नृपं दृष्ट्वा मुनयो हर्षविह्वलाः ॥ दधार शूलिनः शूलं मत्स्यराजजिघांसया ॥ १०६ ॥ शूलनिक्षेपसमये वाग्बभूवाशरीरिणी ॥ शूलं त्यजत विप्रेन्द्राः शिवस्याव्यर्थमेव च ॥ १०७ ॥ शिवस्य कवचं दिव्यं दत्तं दुर्वाससा पुरा ॥ मत्स्यराजगलेऽस्त्येतत्सर्वावयवरक्षकम् ॥ १०८ ॥ प्राणानां च प्रदातारं कवचं याचतं नृपम् ॥ तदा निक्षिप्तशूलं च जघान नृपतिश्चिरम् ॥ १०९ ॥ तच्छूलं तं नृपं प्राप्य शतखण्डं गतं मुने ॥ श्रुत्वैवाकाशवाणीं च शृङ्गी संन्यासवेषकृत् ॥ ११० ॥ ययाचे कवचं भूपं जमदग्निसुतो महान् ॥ राजा ददौ च कवचं ब्रह्माण्डविजयं परम् ॥ १११ ॥ गृहीत्वा कवचं तच्च शूलेनैव जघान ह ॥ पपात मत्स्यराजश्च शतचन्द्रसमाननः ॥ महाबलिष्ठो गुणवांश्चन्द्रवंशसमुद्भवः ॥ ११२ ॥ नारद उवाच ॥ शिवस्य कवचं ब्रूहि मत्स्यराजेन यद्धृतम् ॥ नारायण महाभाग श्रोतुं कौतूहलं मम ॥ ११३ ॥ नारायण उवाच ॥ कवचं शृणु विप्रेन्द्र शङ्करस्य महात्मनः ॥ ब्रह्माण्डविजयं नाम सर्वावयवरक्षणम् ॥ ११४ ॥ पुरा दुर्वाससा दत्तं मत्स्यराजाय धीमते ॥ दत्त्वा षडक्षरं मन्त्रं सर्वपापप्रणाशनम् ॥ ११५ ॥ स्थिते च कवचे देहे नास्ति मृत्युश्च जीविनाम् ॥ अस्त्रे शस्त्रे जले वह्नौ सिद्धिश्चेन्नास्ति संशयः ॥ ११६ ॥ यद्धृत्वा पठनाद्बाणः शिवत्वं प्राप लीलया ॥ बभूव शिवतुल्यश्च यद्धृत्वा नन्दिकेश्वरः ॥ ११७ ॥ वीरश्रेष्ठो वीरभद्रः साम्बोऽभूद्धारणाद्यतः ॥ त्रैलोक्यविजयी राजा हिरण्यकशिपुः स्वयम् ॥ ॥ ११८ ॥ हिरण्याक्षश्च विजयी चाभवद्धारणाद्धि सः ॥ यद्धृत्वा पठनात्सिद्धो दुर्वासा विश्वपूजितः ॥ ११९ ॥ जैगीषव्यो महायोगी पठनाद्धारणाद्यतः ॥ यद्धृत्वा वामदेवश्च देवलः पवनः स्वयम् ॥ अगस्त्यश्च पुलस्त्यश्चाप्यभवद्विश्वपूजितः ॥ १२० ॥ ॐ नमः शिवायेति च मस्तकं मे सदाऽवतु ॥ ॐ नमः शिवायेति च स्वाहा भालं सदाऽवतु ॥ १२१ ॥ ॐ ह्रीं श्रीं क्लीं शिवायेति स्वाहा नेत्रे सदाऽवतु ॥ ॐ ह्रीं श्रीं हूँ शिवायेति नमो मे पातु नासिकाम् ॥ १२२ ॥ ॐ नमः शिवाय शान्ताय स्वाहा कण्ठं सदाऽवतु ॥ ॐ ह्रीं श्रीं हूँ संहारकर्त्रे स्वाहा कर्णौ सदाऽवतु ॥ १२३ ॥ ॐ ह्रीं श्रीं पञ्चवक्त्राय स्वाहा दन्तं सदाऽवतु ॥ ॐ ह्रीं

महेशाय स्वाहा चाधरं पातु मे सदा ॥ १२४ ॥ ॐ ह्रीं श्रीं क्लीं त्रिनेत्राय स्वाहा केशान्सदाऽवतु ॥ ॐ ह्रीं ऐं महादेवाय स्वाहा वक्षः सदाऽवतु ॥ १२५ ॥ ॐ ह्रीं श्रीं क्लीं मैं रुद्राय स्वाहा नाभिं सदाऽवतु ॥ ॐ ह्रीं मैं श्रीमीश्वराय स्वाहा पृष्ठं सदाऽवतु ॥ ॥ १२६ ॥ ॐ ह्रीं क्लीं मृत्युञ्जयाय स्वाहा भ्रुवौ बाहू सदाऽवतु ॥ ॐ ह्रीं श्रीं ह्रीमीशानाय स्वाहा पार्श्वं सदाऽवतु ॥१२७॥ ॐह्रीमीश्वराय स्वाहा चोदरं पातु मे सदा ॥ ॐ श्रीं ह्रीं मृत्युञ्जयाय स्वाहा बाहू सदाऽवतु ॥ १२८ ॥ ॐ ह्रीं श्रीं क्लीमीश्वराय स्वाहा पातु करौ मम ॥ ॐ महेश्वराय रुद्राय नितम्बं पातु मे सदा ॥ १२९ ॥ ॐ ह्रीं श्रीं भूतनाथाय स्वाहा पादौ सदाऽवतु ॥ ॐ सर्वेश्वराय सर्वाय स्वाहा पादौ सदाऽवतु ॥ १३० ॥ प्राच्यां मां पातु भूतेश आग्नेय्यां पातु शङ्करः ॥ दक्षिणे पातु मां रुद्रो नैर्ऋत्यां स्थाणुरेव च ॥ १३१ ॥ पश्चिमे खण्डपरशुर्वायव्यां चन्द्रशेखरः ॥ उत्तरे गिरिशः पातु चैशान्यामीश्वरः स्वयम् ॥ १३२ ॥ ऊर्ध्वे मृडः सदा पातु चाधो मृत्युञ्जयः स्वयम् ॥ जले स्थले चान्तरिक्षे स्वप्ने जागरणे सदा ॥ १३३ ॥ पिनाकी पातु मां प्रीत्या भक्तं सवै भक्तवत्सलः ॥ इति ते कथितं वत्स कवचं परमाद्भुतम् ॥ १३४ ॥ दशलक्षजपेनैव सिद्धिर्भवति निश्चितम् ॥ यदि स्यात्सिद्धकवचो रुद्रतुल्यो भवेद्ध्रुवम् ॥ १३५ ॥ तव स्नेहान्मयाऽऽख्यातं प्रवक्तव्यं न कस्यचित् ॥ कवचं काण्वशाखोक्तमतिगोप्यं सुदुर्लभम् ॥ १३६ ॥ अश्वमेधसहस्राणि राजसूयशतानि च ॥ सर्वाणि कवचस्यास्य कलां नार्हन्ति षोडशीम् ॥ १३७ ॥ कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः ॥ सर्वज्ञः सर्वसिद्धीशो मनोयायी भवेद्ध्रुवम् ॥ १३८ ॥ इदं कवचमज्ञात्वा भजेद्यः शङ्करप्रभुम् ॥ शतलक्षं प्रजप्तोऽपि न मन्त्रः सिद्धिदायकः ॥ १३९ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे शङ्करकवचप्रकथनं नाम पञ्चत्रिंशोऽध्यायः ॥३५॥ नारायण उवाच ॥ मत्स्यराजे निपतिते राजा युद्धविशारदः ॥ राजेन्द्रान्प्रेषयामास युद्धे शस्त्रविशारदान् ॥ १ ॥ बृहद्बलं सोमदत्तं विदर्भं मिथिलेश्वरम् ॥ निषधाधिपतिं चैव मगधाधिपतिं तथा ॥ २ ॥ आययुः समरे योद्धुं जामदग्न्यं महारथाः ॥ त्रितयाक्षौहिणीभिश्च सेनाभिः सह नारद ॥३॥ रामस्य भ्रातरः सर्वे वीरास्तीक्ष्णास्त्रपाणयः ॥

वारयामासुरस्त्रैश्च तानेव रणमूर्द्धनि ॥ ४ ॥ ते वीराः शरजालेन दिव्यास्त्रेण प्रयत्नतः ॥ वारयामासुरेकैकं भ्रातृवर्गान्भृगोस्तथा ॥
॥ ५ ॥ आययौ समरे शीघ्रं दृष्ट्वा तांश्च पराजितान् ॥ पिनाकहस्तः स भृगुर्ज्वलदग्निशिखोपमः ॥६॥ चिक्षेप नागपाशं च जाम
दग्न्यो महाबलः ॥ चिच्छेद तं गारुडेन सोमदत्तो महाबलः ॥ ७ ॥ भृगुः शङ्करशूलेन सोमदत्तं जघान ह ॥ बृहद्बलं च गदया
विदर्भं मुष्टिभिस्तथा ॥ ८ ॥ मैथिलं मुद्गरेणैव शक्त्या वै नैषधं तथा ॥ मागधं चरणोद्घातैरस्त्रजालेन सैनिकान् ॥ ९ ॥ निहत्य
निखिलान्भूपान्संहाराग्निसमो रणे ॥ दुद्राव कार्त्तवीर्य्यं च जामदग्न्यो महाबलः ॥ १० ॥ दृष्ट्वा तं योद्धुमायान्तं राजानश्च महा
रथाः ॥ आययुः समरं कर्त्तुं कार्त्तवीर्य्यं निवार्य्य च ॥ ११॥ कान्यकुब्जाश्च शतशः सौराष्ट्राः शतशस्तथा ॥ राष्ट्रीयाः शतशश्चैव
वीरेन्द्राः शतशस्तथा ॥ १२ ॥ सौम्या वाङ्गाश्च शतशो महाराष्ट्रास्तथा दश ॥ तथा गुर्जरजातीयाः कलिङ्गाः शतशस्तथा ॥
॥ १३ ॥ कृत्वा तु शरजालं च भृगुश्चिच्छेद तत्क्षणम् ॥ तं छित्त्वाऽभ्युत्थितो रामो नीहारमिव भास्करः ॥ १४ ॥ त्रिरात्रं
युयुधे रामस्तैः सार्द्धं समराजिरे ॥ द्वादशाक्षौहिणीं सेनां तथा चिच्छेद पर्शुना ॥ १५ ॥ रम्भास्तम्भसमूहं च यथा खड्गेन
लीलया ॥ छित्त्वा सेनां भूपवर्गं जघान शिवशूलतः ॥१६॥ सर्वांस्तान्निहतान्दृष्ट्वा सूर्य्यवंशसमुद्भवः ॥ आजगाम सुचन्द्रश्च लक्ष
राजेन्द्रसंयुतः ॥ १७ ॥ द्वादशाक्षौहिणीभिश्च सेनाभिः सह संयुगे ॥ कोपेन युयुधे रामं सिंहं सिंहो यथा रणे ॥ १८ ॥ भृगुः
शङ्करशूलेन नृपलक्षं निहत्य च ॥ द्वादशाक्षौहिणीं सेनामहन्वै पर्शुना बली ॥१९॥ निहत्य सर्वाः सेनाश्च सुचन्द्रं युयुधे बली ॥
नागास्त्रं प्रेरयामास निहन्तुं तं भृगुः स्वयम् ॥ २० ॥ नागपाशं च चिच्छेद गारुडेन नृपेश्वरः ॥ जहास च भृगुं राजा समरे च पुनः
पुनः ॥ २१ ॥ भृगुर्नारायणास्त्रं च चिक्षेप रणमूर्धनि ॥ अस्त्रं ययौ तं निहन्तुं शतसूर्यसमप्रभम् ॥ २२ ॥ दृष्ट्वाऽस्त्रं नृपशार्दूल
श्चावरुह्य रथात्क्षणात् ॥ न्यस्तशस्त्रः प्रणमच्च स्तुत्वा नारायणं शिवम् ॥ २३ ॥ तमेव प्रणतं त्यक्त्वा ययौ नारायणान्तिकम् ॥
अस्त्रराजो भगवतो रामः संप्राप विस्मयम् ॥ २४ ॥ भृगुः शक्तिं च मुसलं तोमरं पट्टिशं तथा ॥ गदां पर्शुं च कोपेन चिक्षिपे

तज्जिघांसया ॥ २५ ॥ जग्राह काली तान्सर्वान्सुचन्द्रस्यन्दनस्थिता ॥ चिक्षेप शिवशूलं स नृपमाल्यं बभूव तत् ॥ २६ ॥ ददर्श पुरतो रामो भद्रकालीं जगत्प्रसूम् ॥ वहन्तीं मुण्डमालां च विकटास्यां भयंकरीम् ॥ २७ ॥ विहाय शस्त्रमस्त्रं च पिनाकं च भृगुस्तदा ॥ तुष्टाव तां महामायां भक्तिनम्रात्मकन्धरः ॥ २८ ॥ परशुराम उवाच ॥ नमः शङ्करकान्तायै सारायै ते नमो नमः ॥ नमो दुर्गतिनाशिन्यै मायायै ते नमो नमः ॥ २९ ॥ नमो नमो जगद्धात्र्यै जगत्कर्त्र्यै नमो नमः ॥ नमोऽस्तु ते जगन्मात्रे कारणायै नमो नमः ॥ ३० ॥ प्रसीद जगतां मातः सृष्टिसंहारकारिणि ॥ त्वत्पादौ शरणं यामि प्रतिज्ञां सार्थिकां कुरु ॥ ३१ ॥ त्वयि मे विमुखायां च को मां रक्षितुमीश्वरः ॥ त्वं प्रसन्ना भव शुभे मां भक्तं भक्तवत्सले ॥ ३२ ॥ युष्माभिः शिवलोके च मह्यं दत्तो वरः पुरा ॥ तं वरं सफलं कर्तुं त्वमर्हसि वरानने ॥ ३३ ॥ रेणुकेयस्तवं श्रुत्वा प्रसन्नाऽभव[१]दम्बिका ॥ मा भैरित्येवमुक्त्वा तु तत्रैवान्तरधीयत ॥ ३४ ॥ एतद्भृगुकृतं स्तोत्रं भक्तियुक्तश्च यः पठेत् ॥ महाभयात्समुत्तीर्णः स भवेदेव लीलया ॥ ३५ ॥ स पूजितश्च त्रैलोक्ये तत्रैव विजयी भवेत् ॥ ज्ञानिश्रेष्ठो भवेच्चैव वैरिपक्षविमर्दकः ॥ ३६ ॥ एतस्मिन्नन्तरे ब्रह्मा भृगुं धर्मभृतां वरम् ॥ आगत्य कथयामास रहस्यं राममेव च ॥ ३७ ॥ ब्रह्मोवाच ॥ शृणु राम महाभाग रहस्यं पूर्वमेव च ॥ सुचन्द्रजयहेतुं च प्रतिज्ञाफलमेव च ॥ ३८ ॥ दशाक्षरी महाविद्या दत्ता दुर्वाससा पुरा ॥ सुचन्द्रायैत्र कवचं भद्रकाल्याः सुदुर्लभम् ॥ ३९ ॥ कवचं भद्रकाल्याश्च देवानां च सुदुर्लभम् ॥ कवचं तद्गले यस्य सर्वशत्रुविमर्दकम् ॥ ४० ॥ अतीव पूज्यं शस्तं च त्रैलोक्यजयकारणम् ॥ तस्मिन्स्थिते च कवचे कस्त्वं जेतुमलं भुवि ॥ ४१ ॥ भृगो गच्छतु भिक्षार्थं करोतु प्रार्थनां नृपम् ॥ सूर्य्यवंशोद्भवो राजा दाता परमधार्मिकः ॥ ४२ ॥ प्राणांश्च कवचं मन्त्रं सर्वं दास्यति निश्चितम् ॥ ४३ ॥ भृगुः संन्यासिवेषेण गत्वा राजान्तिकं मुने ॥ भिक्षां चकार मन्त्रं च कवचं

---

[१] ऽभूच्च चण्डिकेति पाठः ।

परमाद्भुतम् ॥ ४४ ॥ राजा ददौ च तन्मन्त्रं कवचं परमादरात् ॥ ततः शङ्करशूलेन तं जघान नृपं भृगुः ॥ ४५ ॥ इति श्रीब्रह्मवै
वर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे भृगुकार्तवीर्य्ययुद्धवर्णनं नाम षट्त्रिंशत्तमोऽध्यायः ॥ ३६ ॥ नारद उवाच॥
कवचं श्रोतुमिच्छामि तां च विद्यां दशाक्षरीम् ॥ नाथ त्वत्तो हि सर्वज्ञ भद्रकाल्याश्च साम्प्रतम् ॥ १ ॥ नारायण उवाच ॥ शृणु
नारद वक्ष्यामि महाविद्यां दशाक्षरीम् ॥ गोपनीयं च कवचं त्रिषु लोकेषु दुर्लभम् ॥ २ ॥ ॐ ह्रीं श्रीं क्लीं कालिकायै स्वाहेति च
दशाक्षरीम् ॥ दुर्वासा हि ददौ राज्ञे पुष्करे सूर्य्यपर्वणि ॥३॥ दशलक्षजपेनैव मन्त्रसिद्धिः कृता पुरा ॥ पञ्चलक्षजपेनैव पठन्कवच
मुत्तमम् ॥४॥ बभूव सिद्धकवचोऽप्ययोध्यामाजगाम सः ॥ कृत्स्नां हि पृथिवीं जिग्ये कवचस्य प्रभावतः ॥ ५ ॥ नारद उवाच ॥
श्रुता दशाक्षरी विद्या त्रिषु लोकेषु दुर्लभा ॥ अधुना श्रोतुमिच्छामि कवचं ब्रूहि मे प्रभो ॥ ६ ॥ नारायण उवाच ॥ शृणु वक्ष्या
मि विप्रेन्द्र कवचं परमाद्भुतम् ॥ नारायणेन यद्दत्तं कृपया शूलिने पुरा ॥ ७ ॥ त्रिपुरस्य वधे घोरे शिवस्य विजयाय च ॥
तदेव शूलिना दत्तं पुरा दुर्वाससे मुने ॥८॥ दुर्वाससा च यद्दत्तं सुचन्द्राय महात्मने ॥ अतिगुह्यतरं तत्त्वं सर्वमन्त्रौघविग्रहम् ॥
॥९॥ ॐ ह्रीं श्रीं क्लीं कालिकायै स्वाहा मे पातु मस्तकम् ॥ क्लीं कपालं सदा पातु ह्रीं ह्रीं ह्रीमिति लोचने ॥ १० ॥ ॐ ह्रीं त्रिलो
चने स्वाहा नासिकां मे सदाऽवतु ॥ क्लीं कालिके रक्ष रक्ष स्वाहा दन्तान्सदाऽवतु ॥ ११ ॥ क्लीं भद्रकालिके स्वाहा पातु मेऽधरयुग्म
कम् ॥ ॐ ह्रीं ह्रीं क्लीं कालिकायै स्वाहा कण्ठं सदाऽवतु ॥ १२ ॥ ॐ ह्रीं कालिकायै स्वाहा कर्णयुग्मं सदाऽवतु ॥ ॐ क्रीं क्रीं
क्लीं काल्यै स्वाहा स्कन्धं पातु सदा मम ॥ १३ ॥ ॐ क्रीं भद्रकाल्यै स्वाहा मम वक्षः सदाऽवतु ॥ ॐ क्लीं कालिकायै स्वाहा मम
नाभिं सदाऽवतु ॥ १४ ॥ ॐ ह्रीं कालिकायै स्वाहा मम पृष्ठं सदाऽवतु ॥ रक्तबीजविनाशिन्यै स्वाहा हस्तौ सदाऽवतु ॥ १५ ॥
ॐ ह्रीं क्लीं मुण्डमालिन्यै स्वाहा पादौ सदावतु ॥ ॐ ह्रीं चामुण्डायै स्वाहा सर्वाङ्गं मे सदाऽवतु॥१६॥प्राच्यां पातु महाकाली चाग्नेय्यां रक्त

---

१ क्रीं क्रीं क्रीं क्रीमिति पाठः ।

दन्तिका ॥ दक्षिणे पातु चामुण्डा नैर्ऋत्यां पातु कालिका ॥ १७ ॥ श्यामा च वारुणे पातु वायव्यां पातु चण्डिका ॥ उत्तरे
विकटास्या चाप्यैशान्यां साट्टहासिनी ॥ १८ ॥ पातूर्ध्वं लोलजिह्वा सा मायाऽऽद्या पात्वधः सदा ॥ जले स्थले चान्तरिक्षे
पातु विश्वप्रसूः सदा ॥ १९ ॥ इति ते कथितं वत्स सर्वमन्त्रौघविग्रहम् ॥ सर्वेषां कवचानां च सारभूतं परात्परम् ॥२०॥ सप्तद्वीपे
श्वरो राजा सुचन्द्रोऽस्य प्रभावतः ॥ कवचस्य प्रभावेन मान्धाता पृथिवीपतिः ॥ २१ ॥ प्रचेता लोमशश्चैव यतः सिद्धो बभूव
ह ॥ यतो हि योगिनां श्रेष्ठः सौभरिः पिप्पलायनः ॥ २२ ॥ यदि स्यात्सिद्धकवचः सर्वसिद्धीश्वरो भवेत् ॥ महादानानि सर्वाणि
तपांस्येवं व्रतानि च ॥ निश्चितं कवचस्यास्य कलां नार्हन्ति षोडशीम् ॥ २३ ॥ इदं कवचमज्ञात्वा भजेत्कालीं जगत्प्रसूम् ॥
शतलक्षं प्रजप्तोऽपि न मन्त्रः सिद्धिदायकः ॥ २४ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे भद्र
कालीकवचनिरूपणं नाम सप्तत्रिंशत्तमोऽध्यायः ॥ ३७ ॥ नारायण उवाच ॥ सुचन्द्रे पतिते ब्रह्मन्राजेन्द्राणां शिरोमणौ ॥ अगम
त्पुष्कराक्षस्तु सेनात्र्यक्षौहिणीयुतः ॥ १ ॥ सूर्य्यवंशोद्भवो राजा सुचन्द्रतनयो महान् ॥ महालक्ष्मीसेवकश्च लक्ष्मीवान्सूर्य्यसन्निभः
॥ २ ॥ महालक्ष्म्याश्च कवचं गले यस्य मनोहरम् ॥ परमैश्वर्य्यसंयुक्तस्त्रैलोक्यविजयी ततः ॥३॥ तं दृष्ट्वा भ्रातरः सर्वे रैणुकेयस्य
धीमतः ॥ आययुः समरं कर्त्तुं नानाशस्त्रास्त्रपाणयः ॥४॥ राजेन्द्रः शरजालेन च्छेदयामास तांस्तथा ॥ चिच्छिदुः शरजालं च ते
वीराश्चैव लीलया ॥ ५ ॥ चिच्छिदुः स्यन्दनं राज्ञस्ते वीराः पञ्चबाणतः ॥ सारथिं पञ्चबाणेन रथाश्वं दशबाणतः ॥ ६ ॥ तद्धनुः
सप्तबाणेन तूर्णं वै पञ्चबाणतः ॥ चिच्छिदुस्तद्भ्रातृवर्गान्विप्राः शङ्करशूलतः ॥७॥ ते च त्र्यक्षौहिणीं सेनां निजघ्नुश्चापि लीलया ॥
हन्तुं नृपेन्द्रं ते वीराः शिवशूलं निचिक्षिपुः ॥ गले बभूव तच्छूलं राज्ञः पुष्करमालिका ॥ ८ ॥ शक्तिं च परिघं चैव भुशुण्डीं
मुद्गरं तथा ॥ गदां च चिक्षिपुर्विप्राः कोपेन ज्वलदग्नयः ॥ ९ ॥ तानि शस्त्राणि चूर्णानि क्ष्माभृतो देहयोगतः ॥ विस्मिता भ्रातरः
सर्वे भृगोरेव महामुने ॥१०॥ रथं धनुश्च शस्त्राणि चास्त्राणि विविधानि च ॥ सेनां प्रस्थापयामास कार्त्तवीर्य्यार्जुनः स्वयम्॥११॥

राजा स्यन्दनमारुह्य पुष्कराक्षो महाबलः ॥ चकार शरजालं च महाघोरतरं मुने ॥ १२ ॥ चिच्छिदुः शरजालं
ते वीराः शस्त्रास्त्रपाणयः ॥ राजा प्रस्वापनेनैव निद्रितांस्तांश्चकार ह ॥ १३ ॥ भ्रातॄंश्च निद्रितान्दृष्ट्वा जामदग्न्यो महाबलः ॥
क्षतविक्षतसर्वांगान्बोधायामास तत्त्वतः ॥१४॥ बोधयित्वा तान्निवार्य्य जगाम रणमूर्द्धनि ॥ चिक्षेप पर्शुं कोपेन शीघ्रं राजजिघांसया॥१५॥छित्त्वा राज्ञः किरीटं च पर्शुर्भूमौ पपात ह॥जग्राह परशुं शीघ्रं जामदग्न्यो महाबलः॥१६॥तदा शङ्करशूलं च चिक्षिपे
मन्त्रपूर्वकम् ॥ नृपस्य कुण्डलं छित्त्वा जगाम शिवसन्निधिम्॥१७॥राजा निहन्तुं तं रामं शरजालं चकार ह ॥ चिच्छेद शरजालं
च रैणुकेयश्च लीलया ॥१८॥ क्रमेण राजा नानास्त्रं चिक्षिपे मन्त्रपूर्वकम्॥तच्चिच्छेद क्रमेणैव भृगुः शस्त्रभृतां वरः॥१९॥भृगुश्चिक्षेप
नानास्त्रं महासन्धानपूर्वकम् ॥ तच्चिच्छेद महाराजः सन्धानेनैव लीलया ॥ २० ॥ रामश्चिक्षेप सन्धाय ब्रह्मास्त्रं मन्त्रपूर्वकम् ॥
राजा निर्वापणं चक्रे सन्धानेनैव लीलया ॥२१॥ सर्वाण्यस्त्राणि शस्त्राणि रामः पाशुपतं विना ॥ चिक्षेप कोपविभ्रांतो भूपश्चिच्छेद तानि च ॥ २२ ॥ रामः स्तुत्वा शिवं नत्वाऽऽददे पाशुपतं मुने ॥ नारायणश्च भगवानवोचद्विप्ररूपधृक् ॥ २३ ॥ ब्राह्मण
उवाच ॥ किं करोषि भृगो वत्स त्वमेवं ज्ञानिनां वरः ॥ नरं हन्तुं पाशुपतं कोपात्किं क्षिपसि भ्रमात् ॥ २४ ॥ विश्वं पाशुपतेनैव
भवेद्भस्म च सत्वरम् ॥ सर्वघ्नं स्याच्छस्त्रमिदं विना श्रीकृष्णमीश्वरम् ॥ २५ ॥ अहो पाशुपतं जेतुं नालमेव सुदर्शनम् ॥ हरेः
सुदर्शनं चैव सर्वास्त्रपरिमर्दकम् ॥२६॥ खट्वांगिनः पाशुपातं हरेरेव सुदर्शनम् ॥ एते प्रधाने सर्वेषामस्त्राणां च जगत्त्रये ॥ २७ ॥
त्यज पाशुपतं ब्रह्मन्मदीयं वचनं शृणु ॥ यथा जेष्यसि राजानं पुष्कराक्षं महाबलम् ॥ २८ ॥ कार्त्तवीर्य्यमजेतारं यथा जेष्यसि
साम्प्रतम् ॥ श्रूयतां सावधानेन तत्सर्वं कथयामि ते ॥ २९ ॥ महालक्ष्म्याश्च कवचं त्रिषु लोकेषु दुर्लभम् ॥ भक्त्या च पुष्करा
क्षेण धृतं कण्ठे विधानतः ॥ ३० ॥ परं दुर्गतिनाशिन्याः कवचं परमाद्भुतम् ॥ धृतं च दक्षिणे बाहौ पुष्कराक्षसुतेन च ॥ ३१ ॥
कवचस्य प्रभावेण विश्वं जेतुं क्षमौ च तौ ॥ को जेता च त्रिभुवने देहे च कवचे स्थिते ॥ ३२ ॥ अहं

यास्यामि भिक्षार्थं सन्निधाने तयोर्मुने ॥ करिष्यामि च तद्भिक्षां प्रतिज्ञा सफलाऽस्तु ते ॥ ३३ ॥ ब्राह्मणस्य
वचः श्रुत्वा रामः संत्रस्तमानसः ॥ उवाच ब्राह्मणं वृद्धं हृदयेन विदूयता ॥ ३४ ॥ परशुराम उवाच ॥ न जानामि
महाप्राज्ञ कस्त्वं ब्राह्मणरूपधृक् ॥ शीघ्रं च ब्रूहि मां मूढं तदा गच्छ नृपान्तिकम् ॥ ३५ ॥ जामदग्न्यवचः श्रुत्वा प्र
हस्य ब्राह्मणः स्वयम् ॥ उक्त्वा चाहं विष्णुरिति ययौ भिक्षितुमीश्वरः ॥ ३६ ॥ गत्वा तयोः सन्निधानं ययाचे कवचे च तौ ॥ दद
तुस्तौ च कवचे विष्णवे विष्णुमायया ॥ गृहीत्वा कवचे विष्णुर्वैकुण्ठं निर्जगाम सः ॥ ३७ ॥ नारद उवाच ॥ महालक्ष्म्याश्च कवचं
केन दत्तं महामुने ॥ पुष्कराक्षाय भूपाय श्रोतुं कौतूहलं मम ॥ ३८ ॥ कवचं चापि दुर्गायाः पुष्कराक्षसुताय च ॥ दुर्लभं केन वा
दत्तं तद्भवान्वक्तुमर्हसि ॥ ३९ ॥ कवचं चापि किम्भूतं तयोर्वा तस्य किं फलम् ॥ मन्त्रौ तु किंप्रकारौ च तन्मे ब्रूहि जगद्गुरो ॥
॥ ४० ॥ नारायण उवाच ॥ दत्तं सनत्कुमारेण पुष्कराक्षाय धीमते ॥ महालक्ष्म्याश्च कवचं मन्त्रश्चापि दशाक्षरः ॥ ४१ ॥ स्तवनं
चापि गोप्यं वै प्रोक्तं तच्चरितं च यत् ॥ ध्यानं च सामवेदोक्तं पूजां चैव मनोहराम् ॥ ४२ ॥ दुर्गायाश्चापि कवचं दत्तं दुर्वाससा
पुरा ॥ स्तवनं चापि गोप्यं च मन्त्रश्चापि दशाक्षरः ॥ ४३ ॥ पश्चाच्छ्रोष्यसि तत्सर्वं देव्याश्च परमाद्भुतम् ॥ महायुद्धसमारम्भे दत्तं
प्रार्थनया च यत् ॥ ४४ ॥ महालक्ष्म्याश्च मन्त्रं च शृणु तं कथयामि ते ॥ ॐ श्रीं कमलवासिन्यै स्वाहेति परमाद्भुतम् ॥ ४५ ॥
ध्यानं च सामवेदोक्तं शृणु पूजाविधिं मुने ॥ दत्तं तस्मै कुमारेण पुष्कराक्षाय धीमते ॥ ४६ ॥ सहस्रदलपद्मस्थां पद्मनाभप्रियां
सतीम् ॥ पद्मालयां पद्मवक्त्रां पद्मपत्राभलोचनाम् ॥ ४७ ॥ पद्मपुष्पप्रियां पद्मपुष्पतल्पाधिशायिनीम् ॥ पद्मिनीं पद्महस्तां च पद्ममा
लाविभूषिताम् ॥ ४८ ॥ पद्मभूषणभूषाढ्यां पद्मशोभाविवर्द्धनीम् ॥ पद्माटवीं प्रपश्यन्तीं सस्मितां तां भजे मुदा ॥ ४९ ॥ चन्द
नाष्टदले पद्मे पद्मपुष्पेण पूजयेत् ॥ गणं सम्पूज्य दत्त्वा चैवोपचारांश्च षोडश ॥ ५० ॥ ततः स्तुत्वा च प्रणमेत्साधको भक्तिपूर्व
कम् ॥ कवचं श्रूयतां ब्रह्मन्सर्वसारं वदामि ते ॥ ५१ ॥ शृणु विप्रेन्द्र पद्मायाः कवचं परमं शुभम् ॥ पद्मनाभेन यद्दत्तं

ब्रह्मणे नाभिपद्मके ॥ ५२ ॥ सम्प्राप्य कवचं ब्रह्मा तत्पद्मे ससृजे जगत् ॥ पद्मालयाप्रसादेन सलक्ष्मीको बभूव सः ॥ ५३ ॥
पद्मालयावरं प्राप्य पाद्मश्च जगतां प्रभुः ॥ पाद्मेन पद्मकल्पे च कवचं परमाद्भुतम् ॥५४॥ दत्तं सनत्कुमाराय प्रियपुत्राय धीमते ॥
कुमारेण च यद्दत्तं पुष्कराय च नारद ॥ ५५ ॥ यद्धृत्वा पाठनाद् ब्रह्मा सर्वसिद्धेश्वरो महान् ॥ परमैश्वर्य्यसंयुक्तः सर्वसम्पत्सम
न्वितः ॥ ५६ ॥ यद्धृत्वा च धनाध्यक्षः कुबेरश्च धनाधिपः ॥ स्वायम्भुवो मनुः श्रीमान्पठनाद्धारणाद्यतः ॥ ५७ ॥ प्रियव्रतोत्तान
पादौ लक्ष्मीवन्तौ यतो मुने ॥ पृथुः पृथ्वीपतिः सद्यो ह्यभवद्धारणाद्यतः ॥ ५८ ॥ कवचस्य प्रसादेन स्वयं दक्षः प्रजापतिः ॥
धर्म्मश्च कर्म्मणां साक्षी पाता यस्य प्रसादतः ॥ ५९ ॥ यद्धृत्वा दक्षिणे बाहौ विष्णुः क्षीरोदशायितः ॥ भक्त्या विधत्ते कण्ठे च
शेषो नारायणांशकः ॥ ६० ॥ यद्धृत्वा वामनं लेभे कश्यपश्च प्रजापतिः ॥ सर्वदेवाधिपः श्रीमान्महेन्द्रो धारणाद्यतः ॥ ६१ ॥
राजा मरुत्तो भगवानभवद्धारणाद्यतः ॥ त्रैलोक्याधिपतिः श्रीमान्नहुषो यस्य धारणात् ॥ ६२ ॥ विश्वं विजिग्ये खट्वाङ्गः पठनाद्धार
णाद्यतः ॥ मुचुकुन्दो यतः श्रीमान्मान्धातृतनयो महान् ॥ ६३ ॥ सर्वसम्पत्पदस्यास्य कवचस्य प्रजापतिः ॥ ऋषिश्छन्दश्च
बृहती देवी पद्मालया स्वयम् ॥ ६४ ॥ धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः ॥ पुण्यबीजं च महतां कवचं परमाद्भुतम् ॥६५॥
ॐ ह्रीं कमलवासिन्यै स्वाहा मे पातु मस्तकम्॥श्रीं मे पातु कपालं च लोचने श्रीं श्रियै नमः॥६६॥ॐ श्रीं श्रियै स्वाहेतिच कर्ण
युग्मं सदाऽवतु॥ॐ श्रीं क्लीं महालक्ष्म्यै स्वाहा मे पातु नासिकाम्॥६७॥ॐ श्रीं पद्मालयायै च स्वाहा दन्तान्सदाऽवतु ॥ ॐ श्रीं
कृष्णप्रियायै च दन्तरन्ध्रं सदाऽवतु॥६८॥ॐ श्रीं नारायणेशायै मम कण्ठं सदाऽवतु ॐ श्रीं केशवकान्तायै मम स्कन्धं सदाऽवतु॥
॥६९॥ ॐ श्रीं पद्मनिवासिन्यै स्वाहा नाभिं सदाऽवतु॥ॐ ह्रीं श्रीं संसारमात्रे मम वक्षः सदाऽवतु॥७०॥ओं श्रीं मों कृष्णकान्तायै
स्वाहा पृष्ठं सदाऽवतु ॥ ओं ह्रीं श्रीं श्रियै स्वाहा च मम हस्तौ सदाऽवतु ॥ ७१ ॥ ॐ[1] श्रीनिवासकान्तायै मम पदौ सदाऽवतु ॥

---

[1] श्रीमिति पाठः ।

ॐ ह्रीं श्रीं क्लीं श्रियै स्वाहा सर्वाङ्गं मे सदाऽवतु ॥ ७२ ॥ प्राच्यां पातु महालक्ष्मीराग्नेय्यां कमलालया ॥ पद्मा मां दक्षिणे पातु नैर्ऋत्यां श्रीर्हरिप्रिया ॥ ७३ ॥ पद्मालया पश्चिमे मां वायव्यां पातु सा स्वयम् ॥ उत्तरे कमला पातु चैशान्यां सिन्धुकन्यका ॥ ७४ ॥ नारायणी च पातूर्ध्वमधो विष्णुप्रियाऽवतु ॥ सन्ततं सर्वतः पातु विष्णुप्राणाधिका मम ॥ ॥ ७५ ॥ इति ते कथितं वत्स सर्वमन्त्रौघविग्रहम् ॥ सर्वैश्वर्यप्रदं नाम कवचं परमाद्भुतम् ॥ ७६ ॥ सुवर्णपर्वतं दत्त्वा मेरुतुल्यं द्विजातये ॥ यत्फलं लभते धर्मी कवचेन ततोऽधिकम् ॥ ७७ ॥ गुरुमभ्यर्च्य विधिवत्कवचं धारयेत्तु यः ॥ कण्ठे वा दक्षिणे बाहौ स श्रीमान्प्रतिजन्मनि ॥ ७८ ॥ अस्ति लक्ष्मीर्गृहे तस्य निश्चला शतपूरुषम् ॥ देवेन्द्रैश्चासुरेन्द्रैश्च सोऽवध्यो निश्चितं भवेत् ॥ ७९ ॥ स सर्वपुण्यवान्धीमान्सर्वयज्ञेषु दीक्षितः ॥ स स्नातः सर्वतीर्थेषु यस्येदं कवचं गले ॥ ८० ॥ यस्मै कस्मै न दातव्यं लोभमोहभयैरपि ॥ गुरुभक्ताय शिष्याय शरण्याय प्रकाशयेत् ॥ ८१ ॥ इदं कवचमज्ञात्वा जपेल्लक्ष्मीं जगत्प्रसूम् ॥ कोटिसंख्यं प्रजप्तोऽपि न मन्त्रः सिद्धिदायकः ॥ ८२ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे श्रीलक्ष्मीकवचवर्णनं नामाष्टात्रिंशत्तमोऽध्यायः ॥ ३८ ॥ नारद उवाच ॥ कवचं कथितं ब्रह्मन्पद्मायाश्च मनोहरम् ॥ परं दुर्गतिनाशिन्याः कवचं कथय प्रभो ॥ १ ॥ पद्माक्षप्राणतुल्यं च जीवनं बलकारणम् ॥ कवचानां च यत्सारं दुर्गसेवनकारणम् ॥ २ ॥ नारायण उवाच ॥ शृणु नारद वक्ष्यामि दुर्गायाः कवचं शुभम् ॥ श्रीकृष्णेनैव यद्दत्तं गोलोके ब्रह्मणे पुरा ॥ ३ ॥ ब्रह्मा त्रिपुरसंग्रामे शंकराय ददौ पुरा ॥ जघान त्रिपुरं रुद्रो यद्धृत्वा भक्तिपूर्वकम् ॥ ४ ॥ हरो ददौ गौतमाय पद्माक्षाय च गौतमः ॥ यतो बभूव पद्माक्षः सप्तद्वीपेश्वरो जयी ॥ ५ ॥ यद्धृत्वा पठनाद्ब्रह्मा ज्ञानवाञ्छक्तिमान्भुवि ॥ शिवो बभूव सर्वज्ञो योगिनां च गुरुर्यतः ॥ शिवतुल्यो गौतमश्च बभूव मुनिसत्तमः ॥ ६ ॥ ब्रह्माण्डविजयस्यास्य कवचस्य प्रजापतिः ॥ ऋषिश्छन्दश्च गायत्री देवी दुर्गतिनाशिनी ॥ ७ ॥ ब्रह्माण्डविजये चैव विनियोगः प्रकीर्तितः ॥ पुण्यतीर्थं च महतां कवचं परमाद्भुतम् ॥ ८ ॥

CC-0. Rao Acharya Kathmandu Collection

ॐ ह्रीं दुर्गतिनाशिन्यै स्वाहा मे पातु मस्तकम् ॥ ॐ ह्रीं मे पातु कपालं चाप्यों ह्रीं श्रीं पातु लोचने॥९॥पातु मे कर्णयुग्मं चाप्यों
दुर्गायै नमः सदा॥ॐ ह्रीं श्रीमिति नासां मे सदा पातु च सर्वतः॥१०॥ह्रीं श्रीं ह्रूमिति दन्तांश्च पातु क्लीमोष्ठयुग्मकम्॥क्लीं क्लीं क्लीं
पातु कण्ठं च दुर्गे रक्षतु गण्डके॥११॥स्कन्धं महाकालि दुर्गे स्वाहा पातु निरन्तरम् ॥ वक्षो विपद्विनाशिन्यै स्वाहा मे पातु सर्व
तः॥१२॥दुर्गे दुर्गे रक्ष पार्श्वौ स्वाहा नाभिं सदाऽवतु॥दुर्गे दुर्गे देहि रक्षां पृष्ठं मे पातु सर्वतः॥१३॥ ॐ ह्रीं दुर्गायै स्वाहा च हस्तौ
पादौ सदाऽवतु ॥ ॐ ह्रीं दुर्गायै स्वाहा च सर्वांगं मे सदाऽवतु ॥ १४ ॥ प्राच्यां पातु महामाया चाग्नेय्यां पातु कालिका ॥
दक्षिणे दक्षकन्या च नैर्ऋत्यां शिवसुन्दरी ॥ १५ ॥ पश्चिमे पार्वती पातु वाराही वारुणे सदा ॥ कुबेरमाता कौबेर्यामैशान्यामीश्वरी
सदा ॥ १६ ॥ ऊर्ध्वं नारायणी पातु त्वम्बिकाऽधः सदाऽवतु ॥ ज्ञानं ज्ञानप्रदा पातु स्वप्ने निद्रा सदाऽवतु ॥ १७॥ इति ते कथितं
वत्स सर्वमन्त्रौघविग्रहम् ॥ ब्रह्माण्डविजयं नाम कवचं परमाद्भुतम् ॥ १८ ॥ सुस्नातः सर्वतीर्थेषु सर्वयज्ञेषु यत्फलम् ॥ सर्वव्रतो
पवासे च तत्फलं लभते नरः ॥ १९ ॥ गुरुमभ्यर्च्य विधिवद्वस्त्रालंकारचन्दनैः ॥ कण्ठे वा दक्षिणे बाहौ कवचं धारयेत्तु यः ॥२०॥
स च त्रैलोक्यविजयी सर्वशत्रुप्रमर्दकः॥इदं कवचमज्ञात्वा भजेद्दुर्गतिनाशिनीम्॥२१॥शतलक्षं प्रजप्तोऽपि न मन्त्रः सिद्धिदायकः॥
॥ २२ ॥ कवचं काण्वशाखोक्तमुक्तं नारद सिद्धिदम् ॥ यस्मै कस्मै न दातव्यं गोपनीयं सुदुर्लभम् ॥२३॥ इति श्रीब्रह्मवैवर्त्ते महापु
राणे तृतीये गणपतिखण्डे नारदनारायणसंवादे दुर्गतिनाशिनीकवचं नामैकोनचत्वारिंशत्तमोऽध्यायः ॥ ३९ ॥ नारायण उवाच ॥
तं गृहीत्वा तदा विष्णौ वैकुण्ठं च गते सति॥सपुत्रं च सहस्राक्षं जघान भृगुनन्दनः॥१॥कृत्वा युद्धं तु सप्ताहं ब्रह्मास्त्रेण प्रयत्नतः॥
राजा कवचहीनोऽपि सपुत्रश्च पपात ह॥२॥पतिते तु सहस्राक्षे कार्तवीर्यार्जुनः स्वयम्॥आजगाम महावीरो द्विलक्षाक्षौहिणीयुतः॥
॥३॥सुवर्णरथमारुह्य रत्नसारपरिच्छदम् ॥ नानास्त्रं परितः कृत्वा तस्थौ समरमूर्द्धनि॥४॥समरे तं परशुरामो राजेन्द्रं च ददर्श ह ॥
रत्नालंकारभूषाढ्यै राजेन्द्राणां च कोटिभिः ॥५॥ रत्नातपत्रभूषाढ्यं रत्नालंकारभूषितम् ॥ चन्दनोक्षितसर्वांगं सस्मितं सुमनोह

रम् ॥ ६ ॥ राजा दृष्ट्वा मुनीन्द्रं तमवरुह्य रथादहो ॥ प्रणम्य रथमारुह्य तस्थौ नृपगणैः सह ॥ ७ ॥ ददौ शुभाशिषं तस्मै रामश्च समयोचितम् ॥ प्रोवाच च गतार्थं तं स्वर्गं गच्छेति सानुगः॥८॥ उभयोः सेनयोर्युद्धमभवत्तत्र नारद ॥ पलायिता रामशिष्या भ्रातरश्च महाबलाः ॥ क्षतविक्षतसर्वाङ्गाः कार्त्तवीर्य्यप्रपीडिताः ॥ ९ ॥ नृपस्य शरजालेन रामः शस्त्रभृतां वरः ॥ न ददर्श स्वसैन्यं च राजसैन्यं तथैव च ॥ १० ॥ चिक्षेप रामश्चाग्नेयं बभूवाग्निमयं रणे ॥ निर्वापयामास राजा वारुणेनैव लीलया ॥ ११ ॥ चिक्षेप रामो गान्धर्वं शैलसर्पसमन्वितम् ॥ वायव्येन महाराजः प्रेरयामास लीलया ॥ १२ ॥ चिक्षेप रामो नागास्त्रं दुर्निवार्य्यं भयंकरम् ॥ गारुडेन महाराजः प्रेरयामास लीलया ॥ १३ ॥ माहेश्वरं च भगवांश्चिक्षेप भृगुनन्दनः ॥ निर्वापयामास राजा वैष्णवास्त्रेण लीलया ॥ १४ ॥ ब्रह्मास्त्रं चिक्षिपे रामो नृपनाशाय नारद ॥ ब्रह्मास्त्रेण च शान्तं तत्प्राणनिर्वापणं रणे ॥ १५ ॥ दत्तदत्तं च यच्छूलमव्यर्थं मन्त्रपूर्वकम् ॥ जग्राह राजा परशुरामनाशाय संयुगे ॥ १६ ॥ शूलं ददर्श रामश्च शतसूर्य्यसमप्रभम् ॥ प्रलयाग्निशिखोद्रिक्तं दुर्निवार्य्यं सुरैरपि ॥ १७ ॥ पपात शूलं समरे रामस्योपरि नारद ॥ मूर्च्छामवाप स भृगुः पपात च हरिं स्मरन् ॥ १८ ॥ पतिते तु तदा रामे सर्वे देवा भयाकुलाः ॥ आजग्मुः समरं तत्र ब्रह्मविष्णुमहेश्वराः ॥ १९ ॥ शङ्करश्च महाज्ञानी महाज्ञानेन लीलया ॥ ब्राह्मणं जीवयामास तूर्णं नारायणाज्ञया ॥ २० ॥ भृगुश्च चेतनां प्राप्य ददर्श पुरतः सुरान् ॥ प्रणनाम परं भक्त्या लज्जानम्रात्मकन्धरः ॥ २१ ॥ राजा दृष्ट्वा सुरेशांश्च भक्तिनम्रात्मकन्धरः ॥ प्रणम्य शिरसा मूर्ध्ना तुष्टाव च सुरेश्वरान् ॥ २२ ॥ तत्राजगाम भगवान्दत्तात्रेयो रणस्थलम् ॥ शिष्यरक्षानिमित्तेन कृपालुर्भक्तवत्सलः ॥ २३ ॥ भृगुः पाशुपतास्त्रं च सोऽग्रहीत्कोपसंयुतः ॥ दत्तदत्तेन दृष्टेन बभूव स्तम्भितो भृगुः ॥२४॥ ददर्श स्तम्भितो रामो राजानं रणमूर्द्धनि ॥ नानापार्षदयुक्तेन कृष्णेनाऽऽरक्षितं रणे ॥२५॥ सुदर्शनं प्रज्वलन्तं भ्रमणं कुर्वता सदा ॥ सस्मितेन स्तुतेनैव ब्रह्मविष्णुमहेश्वरैः ॥ ॥ २६ ॥ गोपालशतयुक्तेन गोपवेषविधारिणा ॥ नवीनजलदाभेन वंशीहस्तेन गायता ॥ २७ ॥ एतस्मिन्नन्तरे तत्र वाग्बभूवाश

रीरिणी ॥ दत्तेन दत्तं कवचं कृष्णस्य परमात्मनः ॥ २८ ॥ राज्ञोऽस्ति दक्षिणे बाहौ सद्रत्नगुटिकान्वितम् ॥ गृहीतकवचे शम्भौ
भिक्षया योगिनां गुरौ ॥ २९ ॥ तदा हन्तुं नृपं शक्तो भृगुश्चेति च नारद ॥ श्रुत्वाऽशरीरिणीं वाणीं शङ्करो द्विजरूपधृक्॥ ३० ॥
भिक्षां कृत्वा तु कवचमानीय च नृपस्य च ॥ शम्भुना भृगवे दत्तं कृष्णस्य कवचं च यत् ॥ ३१ ॥ एतस्मिन्नन्तरे देवा जग्मुः
स्वस्थानमुत्तमम् ॥ प्रत्युवाचापि परशुरामो वै समरे नृपम् ॥३२॥ परशुराम उवाच ॥ राजेन्द्रोत्तिष्ठ समरं कुरु साहसपूर्वकम् ॥
कालभेदे जयो नृणां कालभेदे पराजयः॥३३॥अधीतं विधिवद्दत्तं कृत्स्ना पृथ्वी सुशासिता ॥ सम्यक्कृतश्च संग्रामस्त्वयाऽहं मूर्च्छितो
ऽधुना॥ ३४ ॥ जिताः सर्वे च राजेन्द्रा लीलया रावणो जितः ॥ जितोऽहं दत्तशूलेन शम्भुना जीवितः पुनः ॥ ३५ ॥ रामस्य वचनं
श्रुत्वा राजा परमधार्म्मिकः ॥ मूर्ध्ना प्रणम्य तं भक्त्या यथार्थोक्तिमुवाच ह ॥ ३६ ॥ राजोवाच ॥ किमधीतं तथा दत्तं का वा पृथ्वी
सुशासिता ॥ गताः कतिविधा भूपा मादृशा धरणीतले ॥ ३७ ॥ बुद्धिस्तेजो विक्रमश्च विविधा रणमन्त्रणा ॥ श्रीरैश्वर्य्यं तथा ज्ञानं
दानशक्तिश्च लौकिकम् ॥ ३८ ॥ आचारो विनयो विद्या प्रतिष्ठा परमं तपः ॥ सर्वं मनोरमासंगे गतमेव मम प्रभो ॥ ३९ ॥ सा च
स्त्री प्राणतुल्या मे साध्वी पद्मांशसम्भवा ॥ यज्ञेषु पत्नी मातेव स्नेहे क्रीडति संगिनी ॥४०॥ आबाल्यात्संगिनी शश्वच्छयने भोजने
रणे ॥ तां विना प्राणहीनोऽहं विषहीनो यथोरगः ॥ ४१ ॥ त्वया न दृष्टं युद्धं मे पुरेयं शोचना स्थिता ॥ द्वितीया शोचना विप्र
हतोऽहं ब्राह्मणेन च ॥ ४२ ॥ काले सिंहः सृगालं च सृगालः सिंहमेव च ॥ काले व्याघ्रं हन्ति मृगो गजेन्द्रं हरिणस्तथा ॥ ४३ ॥
महिषं मक्षिका काले गरुडं च तथोरगः ॥ किङ्करः स्तौति राजेन्द्रं काले राजा च किंकरम्॥ ४४ ॥ इन्द्रं च मानवः काले काले ब्रह्मा
मरिष्यति ॥ तिरोभूत्वा सा प्रकृतिः काले श्रीकृष्णविग्रहे ॥ ४५ ॥ मरिष्यन्ति सुराः सर्वे त्रिलोकस्थाश्चराचराः ॥ सर्वे काले लयं
यान्ति कालो हि दुरतिक्रमः॥४६॥कालस्य कालः श्रीकृष्णः स्रष्टुः स्रष्टा यथेच्छया॥संहर्ता चैव संहर्तुः पातुः पाता परात्परः॥४७॥

महास्थूलात्स्थूलतमः सूक्ष्मात्सूक्ष्मतमः कृशः ॥ परमाणु[१]परः कालः कालस्स्यात्कालभेदकः ॥ ४८ ॥ यस्य लोमानि विश्वानि स पुमांश्च महाविराट् ॥ तेजसा षोडशांशश्च कृष्णस्य परमात्मनः ॥४९॥ ततः क्षुद्रविराड् जातः सर्वेषां कारणं परम् ॥ यः स्रष्टा च स्वयं ब्रह्मा यन्नाभिकमलोद्भवः ॥ ५० ॥ नाभेः कमलदण्डस्य योऽन्तं न प्राप यत्नतः ॥ भ्रमणाल्लक्षवर्षं च ततः स्वस्थानसंस्थितः ॥ ५१ ॥ तपश्चक्रे ततस्तत्र लक्षवर्षं च वायुभुक् ॥ ततो ददर्श गोलोकं श्रीकृष्णं च सपार्षदम् ॥ ॥ ५२ ॥ गोपगोपीपरिवृतं द्विभुजं मुरलीधरम् ॥ रत्नसिंहासनस्थं, च राधावक्षःस्थलस्थितम् ॥ ५३ ॥ दृष्ट्वाऽनुज्ञां गृहीत्वा च प्रणम्य च पुनः पुनः ॥ ईश्वरेच्छां च विज्ञाय स्रष्टुं सृष्टिं मनो दधे ॥ ५४ ॥ यः शिवः सृष्टिसंहर्त्ता स च स्रष्टुर्ललाटजः ॥ विष्णुः पाता क्षुद्रविराट् श्वेतद्वीपनिवासकृत् ॥ ५५ ॥ सृष्टिकारणभूताश्च ब्रह्मविष्णुमहेश्वराः ॥ सन्ति विश्वेषु सर्वेषु श्रीकृष्णस्य कलोद्भवाः ॥५६॥ तेऽपि देवाः प्राकृतिकाः प्राकृतश्च महाविराट् ॥ सर्वप्रसूतिः प्रकृतिः श्रीकृष्णः प्रकृतेः परः ॥५७॥ न शक्तः परमेशोऽपि तां शक्तिं प्रकृतिं विना ॥ सृष्टिं विधातुं मायेशो न सृष्टिर्मायया विना ॥ ५८ ॥ सा च कृष्णे तिरोभूय सृष्टिसंहारकारके ॥ साऽऽविर्भूता सृष्टिकाले सा च नित्या महेश्वरी ॥५९॥ कुलालश्च कटं कर्तुं यथाऽशक्तो मृदं विना ॥ स्वर्णं विना स्वर्णकारः कुण्डलं कर्तुमक्षमः ॥ ६० ॥ सा च शक्तिः सृष्टिकाले पञ्चधा चेश्वरेच्छया ॥ राधा पद्मा च सावित्री दुर्गा देवी सरस्वती ॥ ६१ ॥ प्राणाधिष्ठातृदेवी या कृष्णस्य परमात्मनः ॥ प्राणाधिकप्रियतमा सा राधा परिकीर्त्तिता ॥ ६२ ॥ ऐश्वर्य्याधिष्ठातृदेवी सर्वमङ्गलकारिणी ॥ परमानन्दरूपा च सा लक्ष्मीः परिकीर्त्तिता ॥६३॥ विद्याधिष्ठातृदेवी या परमेशस्य दुर्लभा ॥ या माता वेदशास्त्राणां सा सावित्री प्रकीर्तिता ॥ ६४ ॥ बुद्ध्यधिष्ठातृदेवी या सर्वशक्तिस्वरूपिणी ॥ सर्वज्ञानात्मिका सर्वा सा दुर्गा दुर्गनाशिनी ॥ ॥ ६५ ॥ वागधिष्ठातृदेवी या शास्त्रज्ञानप्रदा सदा ॥ कृष्णकण्ठोद्भवा सा स्याद्या च देवी सरस्वती ॥ ६६ ॥ पञ्चधाऽऽदौ स्वयं देवी

---

[१] पुराणः परम इति पाठः ।

मूलप्रकृतिरीश्वरी ॥ ततः सृष्टिक्रमेणैव बहुधा कलया च सा ॥ ६७ ॥ योषितः प्रकृतेरंशाः पुमांसः पुरुषस्य च ॥ मायया सृष्टि
काले च तद्विना न भवेद्भवः॥६८॥सृष्टिश्च प्रतिविश्वेषु ब्रह्मन्ब्रह्मोद्भवा सदा ॥ पाता विष्णुश्च संहर्त्ता शिवः शश्वच्छिवप्रदः ॥६९॥
दत्तदत्तं ज्ञानमिदं राम मह्यं च पुष्करे ॥ दीक्षाकाले च माघ्यां च मुनिप्रवरसन्निधौ ॥ ७० ॥ इत्युक्त्वा कार्त्तवीर्यश्च रामं नत्वा
च सस्मितः ॥ आरुरोह रथं शीघ्रं गृहीत्वा सशरं धनुः ॥ ७१ ॥ रामस्ततो राजसैन्यं ब्रह्मास्त्रेण जघान ह ॥ नृपं पाशुपतेनैव
लीलया श्रीहरिं स्मरन् ॥ ७२ ॥ एवं त्रिस्सप्तकृत्वश्च क्रमेण च वसुन्धराम् ॥ रामश्चकार निर्भूपां लीलया च शिवं स्मरन् ॥ ७३ ॥
गर्भस्थं मातुरङ्कस्थं शिशुं वृद्धं च मध्यमम् ॥ जघान क्षत्रियं रामः प्रतिज्ञापालनाय वै ॥ ७४ ॥ कार्त्तवीर्यश्च गोलोकं त्वगमत्कृ
ष्णसन्निधिम् ॥ जगाम तोषात्परशुरामश्च श्रीहरिं स्मरन् ॥ ७५ ॥ त्रिस्सप्तकृत्वो निर्भूपां महीं दृष्ट्वा महेश्वरः ॥ रमणं तेन परशु
रामं दृष्ट्वा च कातरम् ॥ ७६ ॥ देवाश्च मुनयो देव्यः सिद्धगन्धर्वकिन्नराः ॥ सर्वे चक्रुः पुष्पवृष्टिं राममूर्ध्नि च नारद ॥ ७७ ॥
स्वर्गे दुन्दुभयो नेदुर्हर्षशब्दो बभूव ह॥यशसा चैव परशुरामस्यापूरितं जगत् ॥७८॥ ब्रह्मा भृगुश्च शुक्रश्च वाल्मीकिश्च्यवनस्तथा॥
जमदग्निर्ब्रह्मलोकादाजगाम प्रहर्षितः॥७९॥पुलकाञ्चितसर्वाङ्गाः सानन्दाश्च समन्विताः ॥ दूर्वापुष्पकराः सर्वे कुर्वन्तो मंगलाशिषः॥
॥ ८० ॥ प्रणनाम च तान्रामो दण्डवत्पतितो भुवि ॥ क्रोडे चकार ब्रह्माऽऽदौ क्रमात्तातेति संवदन् ॥ ८१ ॥ तमुवाचाथ परशुरामं
ब्रह्मा जगद्गुरुः ॥ वेदसारं नीतियुतं परिणामसुखावहम् ॥ ८२ ॥ ब्रह्मोवाच ॥ शृणु राम प्रवक्ष्यामि सर्वसम्पत्करं परम् ॥ काण्व
शाखोक्तवचनं सत्यं वै सर्वसम्मतम् ॥८३॥ पूज्यानामेव सर्वेषामिष्टः पूज्यतमः परः ॥ जनको जन्मदानाच्च पालनाच्च पिता स्मृतः
॥ ८४ ॥ गरीयाञ्जन्मदातुश्च सोऽन्नदाता पिता मुने ॥ विनाऽन्नं नश्वरो देहो नित्यं[1] च पितुरुद्भवः ॥ ८५ ॥ तयोः शतगुणं माता
पूज्या मान्या च वन्दिता ॥ गर्भधारणपोषाभ्यां सैव प्रोक्ता गरीयसी ॥ ८६ ॥ तेभ्यः शतगुणं पूज्योऽभीष्टदेवः श्रुतौ श्रुतः ॥

---

[1] न नित्यं पितुरुद्भवः ।

ज्ञानविद्यामन्त्रदाताऽभीष्टदेवात्परो गुरुः ॥ ८७ ॥ गुरुवद्गुरुपुत्रश्च गुरुपत्नी ततोऽधिका ॥ देवे रुष्टे गुरू रक्षेद्गुरौ रुष्टे न कश्चन ॥ ८८ ॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ॥ गुरुरेव परं ब्रह्म ब्राह्मणेभ्यः प्रियः परः ॥ ८९ ॥ गुरुर्ज्ञानं ददात्येव ज्ञानं च हरिभक्तिदम् ॥ हरिभक्तिप्रदाता यः को वा[1] बन्धुस्ततः परम् ॥ ९० ॥ अज्ञानतिमिराच्छन्नो ज्ञानदीपं यतो लभेत् ॥ लब्ध्वा च निर्मलं पश्येत्को वा बन्धुस्ततः[2] परः ॥ ९१ ॥ गुरुदत्तं सुमन्त्रं च जप्त्वा ज्ञानं[3] ततो लभेत् ॥ सर्वज्ञत्वाच्च सिद्धिं च को वा बन्धुस्ततोऽधिकः ॥ ९२ ॥ सुखं जयति सर्वत्र विद्यया गुरुदत्तया ॥ यया पूज्योऽपि जगति को वा बन्धुस्ततोऽधिकः ॥ ९३ ॥ विद्यान्धो वा धनान्धो वा यो मूढो न यजेद्गुरुम् ॥ ब्रह्महत्यादिकं पापं लभते नात्र संशयः ॥ ९४ ॥ दरिद्रं पतितं क्षुद्रं नरबुद्ध्या भजेद्गुरुम् ॥ तीर्थस्नातोऽपि न शुचिर्नाधिकारी च कर्मसु ॥ ९५ ॥ अभीष्टदेवः श्रीकृष्णो गुरुस्ते शङ्करः स्वयम् ॥ शरणं गच्छ हे पुत्र देवपूज्यतमं गुरुम् ॥ ९६ ॥ त्रिस्सप्तकृत्वो निर्भूपा त्वया पृथ्वी कृता यतः ॥ प्राप्ता[4] त्वया हरेर्भक्तिस्तं शिवं शरणं व्रज ॥ ९७ ॥ शिवां च शिवरूपं च शिवदं शिवकारणम् ॥ शिवाराध्यं शिवं शान्तं गुरुं त्वं शरणं व्रज ॥ ९८ ॥ गोलोकनाथो भगवानंशेन शिवरूपधृक् ॥ य इष्टदेवः स गुरुस्तमेव शरणं व्रज ॥ ९९ ॥ आत्मा कृष्णः शिवो ज्ञानं मनोऽहं सर्वजीविषु ॥ प्राणा विष्णोस्सा प्रकृतिस्सर्वशक्तियुता सुत ॥ १०० ॥ ज्ञानदं ज्ञानरूपं च ज्ञानबीजं सनातनम् ॥ मृत्युञ्जयं कालकालं तं गुरुं शरणं व्रज ॥ १०१ ॥ ब्रह्मज्योतिस्स्वरूपं तं भक्तानुग्रहविग्रहम् ॥ शरणं व्रज सर्वज्ञं भगवन्तं सनातनम् ॥ १०२ ॥ प्रकृतिर्लक्षवर्षं च तपस्तप्त्वा यमीश्वरम् ॥ कान्तं प्रियपतिं लेभे तं गुरुं शरणं व्रज ॥ १०३ ॥ इत्युक्त्वा मुनिभिः सार्द्धं जगाम कमलोद्भवः ॥ रामश्च गन्तुं कैलासं मनश्चक्रे च नारद ॥ १०४ ॥ इति श्रीब्रह्मवैवर्त्ते तृतीये गणेशखण्डे नारदनारा

---

१ सैव वन्द्यस्ततोऽधिकः । २ वन्द्य इति पाठः । ३ जप्त्वाऽऽनन्दमिति पाठः । ४ प्राप्ताऽचलेति पाठः ।

यणसंवादे भृगोः कैलासगमनोपदेशो नाम चत्वारिंशत्तमोऽध्यायः ॥ ४० ॥ नारायण उवाच ॥ हरेश्च कवचं धृत्वा कृत्वा निः
क्षत्रियां महीम् ॥ रामो जगाम कैलासं नमस्कर्त्तुं शिवं गुरुम् ॥१॥ गुरुपत्नीं शिवामम्बां द्रष्टुं गुरुसुतौ च तौ ॥ गुणैर्नारायणसमौ
कार्त्तिकेयगणेश्वरौ ॥ २ ॥ मनोयायी महात्मा स भृगुस्संप्राप्य तत्क्षणम् ॥ ददर्श पर्वतं रम्यमतीव सुमनोहरम् ॥ ३ ॥ शुद्धस्फ
टिकसङ्काशैर्मणिभिः सुमनोहरैः ॥ सुवर्णभूमिसदृशै राजमार्गैर्विराजितम् ॥ ४ ॥ सिन्दूरारुणवर्णैश्च वेष्टितं मणिवेदिभिः ॥ संयुक्तं
मुक्तानिकरैः पूरितं मणिमण्डपैः ॥ ५ ॥ यक्षाणामालयैर्दिव्यैः संयुक्तं शतकोटिभिः ॥ कपाटस्तम्भसोपानैः शोभितैर्मणिनिर्मितैः॥
॥६॥सुवर्णकलशैर्दिव्यै राजतैः श्वेतचामरैः॥रत्नकाञ्चनपूर्णैश्च यक्षेन्द्रगणवेष्टितैः॥७॥रत्नभूषणभूषाढ्यैर्दीपितैः सुन्दरीगणैः॥बालिका
भिर्बालकैश्च चित्रपुत्तलिकाकरैः ॥८॥ क्रीडद्भिः सस्मितैः शश्वत्स्वच्छन्दं च विराजितैः ॥ पारिजातद्रुमगणैः स्वर्णदीतीरनीरजैः॥
॥ ९ ॥ आकीर्णं पुष्पजालैश्च पुष्पितैश्च सुगन्धिभिः ॥ कल्पवृक्षाश्रितैः सिद्धैः कामधेनुपुरस्कृतैः ॥ १० ॥ सिद्धविद्यासु निपुणैः
पुण्यवद्भिर्निषेवितम् ॥ त्रिलक्षयोजनोच्छ्रायैर्वटवृक्षैरथाक्षयैः ॥ ११ ॥ शतयोजनविस्तीर्णैः शतस्कन्धसमन्वितैः ॥ असंख्यशाखानि
करैरसंख्यफलसंयुतैः ॥ १२ ॥ नानापक्षिगणाकीर्णैः सुमनोहरशब्दितैः ॥ कम्पितैः शीतवातेन मण्डितं च सुगन्धिना ॥ १३ ॥
पुष्पोद्यानसहस्रेण सरसां च शतेन च ॥ सिद्धेन्द्रालयलक्षैश्च मणिरत्नविकारजैः ॥ १४ ॥ रामश्च दृष्ट्वा नगरमतिसंहृष्टमानसः ॥
ददर्श पुरतो रम्यं श्रीयुक्तं शंकरालयम् ॥१५॥ सुवर्णमूल्यशतकैर्मणिभिः स्वर्णवर्णकैः ॥ खचितं रत्नसारैश्च रचितं विश्वकर्मणा ॥
॥ १६ ॥ त्रिपञ्चयोजनोच्छ्रायं चतुर्योजनविस्तृतम् ॥ चतुरस्रं चतुष्कोणं प्राकारं सुमनोहरम् ॥ १७ ॥ द्वारं रत्नकपाटेन नाना
चित्रान्वितेन च ॥ मणीन्द्रवेदिभिर्युक्तं मणिस्तम्भविराजितैः ॥ १८ ॥ तद्दक्षिणे वृषेन्द्रं च वामे सिंहं च नारद ॥ नन्दीश्वरं महा
कालं पिङ्गलाक्षं भयंकरम् ॥१९॥ विशालाक्षं च बाणं च विरूपाक्षं महाबलम् ॥ विकटाक्षं भास्कराक्षं रक्ताक्षं विकटोदरम् ॥ २० ॥

संहारभैरवं कालभैरवं च भयङ्करम् ॥ रुरुभैरवमीशाभं महाभैरवमेव च ॥ २१ ॥ कृष्णाङ्गभैरवं चैव क्रोधभैरवमुल्बणम् ॥
कपालभैरवं चैव रुद्रभैरवमेव च ॥ २२ ॥ सिद्धेंद्रादीन्रुद्रगणान्विद्याधरसुगुह्यकान् ॥ भूतान्प्रेतान्पिशाचांश्च कूष्माण्डान्ब्रह्मराक्ष
सान् ॥२३॥ वेतालान्दानवांश्चैव योगीन्द्रांश्च जटाधरान् ॥ यक्षान्किम्पुरुषांश्चैव किन्नरांश्च ददर्श ह ॥२४॥ तान्दृष्ट्वा नन्दिकेशाज्ञां
गृहीत्वा भृगुनन्दनः ॥ तान्सम्भाष्याभ्यन्तरं च जगामानन्दसंप्लुतः ॥ २५ ॥ रत्नेन्द्रसारखचितं ददर्श शतमन्दिरम् ॥ अमूल्य
रत्नकलशैर्ज्वलद्भिश्च विराजितम् ॥ २६ ॥ अमूल्यरत्नरचितैर्मुक्तानिर्म्मलदर्पणैः ॥ हीरसारविकारैश्च कपाटैश्च विराजितम् ॥
॥ २७ ॥ गोरोचनाभिर्मणिभिर्युतं स्तम्भसहस्रकैः ॥ मणिसारविकारैश्च सोपानैः परिशोभितम् ॥ २८ ॥ ददर्शाभ्यन्तरं द्वारं
नानाचित्रैश्च चित्रितम् ॥ माणिक्यमुक्ताग्रथितैर्मालाजालैर्विराजितम् ॥ २९ ॥ ददर्श कार्त्तिकेयं च वामे दक्षे गणेश्वरम् ॥ वीर
भद्रं महाकायं शिवतुल्यपराक्रमम् ॥ ३० ॥ प्रधानपार्षदगणान्क्षेत्रपालांश्च नारद ॥ रत्नसिंहासनस्थांश्च रत्नभूषणभूषितान्॥
॥ ३१ ॥ तान्सम्भाष्य भृगुः शीघ्रं महाबलपराक्रमः ॥ पर्शुहस्तस्स परशुरामो गन्तुं समुद्यतः ॥ ३२ ॥ गच्छन्तं तं गणेशश्च
क्षणं तिष्ठेत्युवाच ह ॥ निद्रितो निद्रया युक्तो महादेवोऽधुनेति च ॥ ३३ ॥ ईश्वराज्ञां गृहीत्वाऽहमत्रागत्य क्षणान्तरे ॥ त्वया
सार्द्धं गमिष्यामि भ्रातस्तिष्ठात्र साम्प्रतम्॥३४॥गणेशवाक्यं परशुरामश्श्रुत्वा महाबलः ॥ बृहस्पतिसमो वक्ता प्रवक्तुमुपचक्रमे॥
॥३५॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे कैलासवर्णनं नामैकचत्वारिंशत्तमोऽध्यायः ॥ ४१ ॥
परशुराम उवाच ॥ यास्याम्यन्तःपुरं भ्रातः प्रणामं कर्तुमीश्वरम् ॥ प्रणम्य मातरं भक्त्या यास्यामि त्वरितं गृहम्॥१॥ त्रिस्सप्तकृत्वो
निर्भूपां कृत्वा पृथ्वीं च लीलया ॥ कार्त्तवीर्य्यः सुचन्द्रश्च हतो यस्य प्रसादतः ॥ २ ॥ नानाविद्या यतो लब्धा नानाशस्त्रं सुदुर्ल
भम् ॥ तं गुरुं जगतां नाथं द्रष्टुमिच्छामि साम्प्रतम्॥३॥सगुणं निर्गुणं चैव भक्तानुग्रहविग्रहम्॥ सत्यं सत्यस्वरूपं च ब्रह्म ज्योतिः

सनातनम् ॥४॥ स्वेच्छामयं दयासिन्धुं दीनबन्धुं मुनीश्वरम्॥आत्मारामं पूर्णकामं व्यक्ताव्यक्तं परात्परम् ॥५॥ परापराणां स्रष्टारं
पुरुहूतं पुरस्कृतम् ॥ पुराणं परमात्मानमीशानं त्वादिमव्ययम्॥६॥सर्वमङ्गलमाङ्गल्यं सर्वमंगलकारणम् ॥सर्वमंगलदं शान्तं सर्वैश्व
र्य्यप्रदं वरम् ॥ ७ ॥ आशुतोषं प्रसन्नास्यं शरणागतवत्सलम् ॥ भक्ताभयप्रदं भक्तवत्सलं समदर्शनम् ॥८॥ इत्थं परशुरामोऽस्था
दुक्त्वा गणपतेः पुरः ॥ वाचा मधुरया तत्र समुवाच गणेश्वरः ॥ ९ ॥ क्षणं तिष्ठ क्षणं तिष्ठ शृणु भ्रातरिदं वचः ॥ रहःस्थलस्थितो
नैव द्रष्टव्यः स्त्रीयुतः पुमान् ॥ १० ॥ स्त्रीसंयुक्तं च पुरुषं यः पश्यति नराधमः ॥ करोति रसभङ्गं वा कालसूत्रं व्रजेद्ध्रुवम् ॥११॥
तत्र तिष्ठति पापीयान्यावच्चन्द्रदिवाकरम् ॥ विशेषतश्च पितरं गुरुं भूतपतिं द्विज ॥ १२ ॥ रहः सुरतसंसक्तं नहि पश्येद्विचक्षणः ॥
कामतः कोपतो वाऽपि यः पश्येत्सुरतोन्मुखम् ॥ १३ ॥ स्त्रीविच्छेदो भवेत्तस्य ध्रुवं सप्तसु जन्मसु ॥ श्रोणीवक्षस्थलं वक्त्रं यः
पश्यति परस्त्रियः ॥ कामतोऽपि विमूढश्च सोऽन्धो भवति निश्चितम् ॥ १४ ॥ गणेशस्य वचः श्रुत्वा प्रहस्य भृगुनन्दनः ॥ तमु
वाच महाकोपान्निष्ठुरं वचनं मुने ॥ १५ ॥ परशुराम उवाच ॥ अहो श्रुतं किं वचनमपूर्वं नीतिसंयुतम् ॥ इदमेवमहो नैवं श्रुतमी
श्वरवक्त्रतः ॥ १६ ॥ श्रुतं श्रुतौ वाक्यमिदं कामिनां च विकारिणाम् ॥ निर्विकारस्य च शिशोर्न दोषः कश्चिदेव हि ॥ यास्या
म्यन्तःपुरं भ्रातस्तव किं तिष्ठ बालक ॥ १७ ॥ यथादृष्टि करिष्यामि मत्कार्य्यं समयोचितम् ॥ तवैव तातो माता चेत्येवं
नैव निरूपितम् ॥१८॥ जगतां पितरौ तौ च पार्वतीपरमेश्वरौ ॥ पार्वती स्त्री पुमाञ्छम्भुरिति केनं निरूपितः ॥ १९ ॥ सर्वरूपः
शङ्करश्च सर्वारूपा च पार्वती ॥ गुणातीतस्य का क्रीडा तद्भंगो वा कुतो विभो ॥ २० ॥ क्रीडा लज्जा भीतिभंगो ग्राम्यस्यैव न
चेशितुः ॥ स्तनन्धयं च मां दृष्ट्वा पित्रोर्लज्जा कुतो भवेत् ॥ २१ ॥ लज्जायाश्च कुतो लज्जा लज्जेशस्य च सा कुतः ॥
लज्जा लज्जां किमाप्नोति तापं किं वा हुताशनः ॥ २२ ॥ शीतं शैत्यमहो भ्रातर्निदाघो दाहमेव च ॥ भीतिर्भीतिमवाप्नोति मृत्यो

मृत्युर्बिभेति किम् ॥ २३ ॥ कुतो ज्वरो ज्वरं हन्ति व्याधिं व्याधिश्च जीर्य्यति ॥ संहर्त्ता नापि संहर्त्तुः कालः कालाद्बिभेति किम् ॥ ॥ २४ ॥ स्रष्टारं सृजते स्रष्टा पाता किं पाति ते मते ॥ क्षुत्क्षुधं समवाप्नोति तृष्णा तृष्णां प्रयाति किम् ॥ २५ ॥ निद्रा निद्रां च शोभां श्रीः शान्तिः शांतिं च ते मते ॥ पुष्टिः पुष्टिं किमाप्नोति तुष्टिस्तुष्टिं क्षमा क्षमाम्॥ आत्मनः परमात्माऽस्ति शक्तिः शक्त्या बिभेति किम् ॥ २६ ॥ कामक्रोधौ लोभमोहौ स्वात्मनैते न बाधिताः ॥ दया न बद्धा दयया नेच्छा बद्धेच्छया प्रभो ॥ २७ ॥ ज्ञानबुद्ध्योः को विकारो जरां नो बाधते जरा ॥ चिन्ता न चिन्तया ग्रस्ता चक्षुश्चक्षुर्न पश्यति ॥ २८ ॥ हर्षो मुदं किं प्राप्नोति शोकं शोको न बाधते ॥ का विपत्तिर्विपत्तेश्च सम्पत्तिः सम्पदः कुतः ॥ २९ ॥ मेधाया धारणा शक्तिः स्मृतेर्वा स्मरणं कुतः ॥ न दग्धः स्वप्रतापेन विवस्वानिति सम्मतः ॥ ३० ॥ विपरीतमतो भ्रातस्त्वयैवाचरितोऽधुना ॥ न श्रुतोऽयं गुरुमुखान्न दृष्टो न श्रुतौ श्रुतः ॥ ३१ ॥ इत्युक्त्वा चापि परशुरामश्शश्वत्प्रहस्य सः ॥ शीघ्रं गन्तुं मनश्चक्रे तद्गृहाभ्यन्तरं मुदा ॥ ३२ ॥ तच्च रामवचः श्रुत्वा जितक्रोधो गणेश्वरः ॥ शुद्धसत्त्वस्वरूपश्च प्रहस्य तमुवाच ह ॥ ३३ ॥ गणपतिरुवाच ॥ अज्ञानतिमिराच्छन्नो ज्ञानं प्राप्नोति तद्विदः ॥ पितुर्भ्रातुर्मुखाज्ज्ञानं दुर्लभं भाग्यवाँल्लभेत् ॥ ३४ ॥ श्रुतं ज्ञानं विशिष्टं च ज्ञानिनामपि दुर्लभम् ॥ किञ्चिन्मे त्वं मन्दबुद्धेः शृणु भ्रातर्निवेदनम् ॥ ३५ ॥ यो निर्गुणः स निर्लिप्तः शक्तिभिर्न हि संयुतः ॥ सिसृक्षुराश्रितश्शक्त्या निर्गुणः सगुणो भवेत् ॥ ३६ ॥ यावन्ति च शरीराणि भोगार्हाणि महामुने ॥ प्राकृतानि च सर्वाणि विना श्रीकृष्णविग्रहम् ॥ ३७ ॥ ध्यायन्ति योगिनस्तं च शुद्धज्योतिस्स्वरूपिणम् ॥ हस्तपादादिरहितं निर्गुणं प्रकृतेः परम् ॥ ३८ ॥ वैष्णवास्तं नमस्यन्ति भक्तानुग्रहकारकम् ॥ कुतो बभूव तज्ज्योतिरहो तेजस्विनो विना ॥ ३९ ॥ ज्योतिरभ्यन्तरे नित्यं शरीरं श्यामसुन्दरम् ॥ द्विभुजं मुरलीहस्तं सस्मितं पीतवाससम्॥ ४० ॥अतीवामूल्यसद्रत्नभूषणैश्च विभूषितम्॥ज्योतिरभ्यन्तरे मूर्तिं पश्यन्ति कृपया विभोः॥ ४१ ॥तदा दास्ये नियुक्तास्ते

भवन्त्येवेश्वरेच्छया ॥ योगस्तपो वा दास्यस्य कलां नार्हन्ति षोडशीम् ॥ ४२ ॥ यदा सृष्ट्युन्मुखः कृष्णः ससृजे प्रकृतिं मुदा ॥ तद्योनौ ह्यर्पितं वीर्य्यं वीर्य्याड्डिम्भो बभूव ह ॥ ४३ ॥ दिव्येन लक्षवर्षेण गर्भाड्डिम्भो विनिर्गतः ॥ तदा बभूव निश्श्वासस्ततो वायुर्बभूव ह ॥ ४४ ॥ निश्श्वासेन समं भ्रातर्मुखबिन्दुर्विनिर्गतः ॥ ततो बभूव सहसा जलराशिर्हरेः पुरः ॥ ४५ ॥ तज्जले च स्थितो डिम्भो दिव्यवर्षाणि लक्षकम् ॥ ततो बभूव सहसा विश्वाधारो महाविराट् ॥ ४६ ॥ यावन्ति गात्रलोमानि तस्य सन्ति महात्मनः ॥ ब्रह्माण्डानि च तावन्ति विद्यमानानि निश्चितम् ॥ ४७ ॥ तत्रैव प्रतिविध्यण्डे ब्रह्मविष्णुमहेश्वराः ॥ देवाश्च मुनयश्चैव विद्यमानाश्चराचराः॥४८॥महाविराडाश्रयश्च सर्वस्य च जनस्य च॥निश्श्वासवायुर्भगवान्बभूव श्रीहरेर्मुने॥४९॥महाविष्णुश्च कलया ततः क्षुद्रविराडभूत् ॥ तन्नाभिकमले ब्रह्मा शंकरस्तल्ललाटजः॥५०॥विष्णुस्तदंशः पाता यः श्वेतद्वीपनिवासकृत् ॥ एवं ते प्रतिविध्यण्डे ब्रह्मविष्णुमहेश्वराः ॥ ५१ ॥ स्वयं च स्वांशकलया नानामूर्त्तिधरो हरिः ॥ तदाऽभवच्च सगुणः सर्वशक्तियुतस्तदा ॥ ५२ ॥ कथं लज्जादिरहितः स च स्वेच्छामयो महान् ॥ सर्वदा सर्वभोगार्हः सर्वशक्तिसमन्वितः ॥ ५३ ॥ लज्जा नास्त्येव लज्जाया मतोऽयं सर्वसम्मतः ॥ या च लज्जावती देवी तस्य लज्जा कुतो गता ॥ ५४ ॥ सर्वशक्तिमती दुर्गा प्रकृत्या सा च शैलजा ॥ तस्या लज्जादयः सन्ति सर्वदा सर्वसम्मताः ॥ ५५ ॥ पञ्चधा प्रकृतिर्या च श्रीकृष्णस्य बभूव ह ॥ राधा पद्मा च सावित्री दुर्गा देवी सरस्वती ॥ ५६ ॥ प्राणाधिष्ठातृदेवी या कृष्णस्य परमात्मनः॥प्राणाधिका प्रिया सा च राधाऽऽस्ते तस्य वक्षसि ॥ ५७ ॥ विद्याधिष्ठातृदेवी या सावित्री ब्रह्मणः प्रिया ॥ लक्ष्मीर्नारायणस्यैव सर्वसम्पत्स्वरूपिणी ॥ ५८ ॥ सरस्वती द्विधा भूत्वा कृष्णस्य मुखनिर्गता ॥ सावित्री ब्रह्मणः कान्ता स्वयं नारायणस्य च ॥ ५९ ॥ बुद्ध्यधिष्ठातृदेवी या ज्ञानसूः शक्तिसंयुता ॥ सा दुर्गा शूलिनः कान्ता तस्या लज्जा कुतो गता ॥६०॥ प्रकृतिः पञ्चधा भ्रातर्गोलोके च बभूव ह॥इमाः प्रधानाः कलया बभूवुर्नैकधा यतः॥६१॥

विप्रेन्द्र नित्यं वैकुण्ठं ब्रह्माण्डात्परमुच्यते ॥ अविनाशि स्थलं शश्वल्लये प्राकृतिके ध्रुवम् ॥ ६२ ॥ तत्र नारायणो देवः कृष्णार्द्धांशश्चतुर्भुजः ॥ वनमाली पीतवासाः शक्त्या वै पद्मया सह ॥ ६३ ॥ स्वयं कृष्णश्च गोलोके द्विभुजः श्यामसुन्दरः॥सस्मितो मुरलीहस्तो राधावक्षःस्थलस्थितः ॥ ६४ ॥ शश्वद्गोगोपगोपीभिः संयुक्तो गोपरूपधृक् ॥ परिपूर्णतमः श्रीमान्निर्गुणः प्रकृतेः परः ॥ ६५ ॥ स्वेच्छामयः स्वतन्त्रस्तु परमानन्दरूपधृक् ॥ सुराः कलोद्भवा यस्य षोडशांशो महाविराट् ॥ ६६ ॥ यतो भवन्ति विश्वानि स्थूलसूक्ष्मादिकानि च ॥ पुनस्तत्र प्रलीयन्त एवमेव मुहुर्मुहुः ॥ ६७ ॥ गोलोक ऊर्ध्ववैकुण्ठात्पञ्चाशत्कोटियोजनः ॥ नास्ति लोकस्तदूर्ध्वं च नास्ति कृष्णात्परः प्रभुः ॥ ६८ ॥ इदं श्रुतं शम्भुवक्त्रान्मया ते कथितं द्विज ॥ क्षणं तिष्ठाधुना भ्रातरीश्वरः सुरतोन्मुखः ॥ ६९ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे गणेशपरशुरामसंवादो नाम द्विचत्वारिंशत्तमोऽध्यायः ॥ ४२ ॥ नारायण उवाच ॥ गणेशवचनं श्रुत्वा स तदा रागतः सुधीः ॥ पर्शुहस्तस्स वै रामो निर्भयो गन्तुमुद्यतः ॥ १ ॥ गणेश्वरस्तदा दृष्ट्वा शीघ्रमुत्थाय यत्नतः ॥ वारयामास स प्रीत्या चकार विनयं पुनः ॥ २ ॥ रामस्तं प्रेरयामास हुंकृत्वा तु पुनः पुनः ॥ बभूव च ततस्तत्र वाग्युद्धं हस्तकर्षणैः ॥ ३ ॥ पर्शुनिक्षेपणं कर्तुं मनश्चक्रे भृगुस्तदा ॥ हाहा कृत्वा कार्त्तिकेयो बोधयामास संसदि ॥ ४ ॥ अव्यर्थमस्त्रं हे भ्रातर्गुरुपुत्रे कथं क्षिपेः ॥ गुरुवद्गुरुपुत्रं च मा भवान्हन्तुमर्हति ॥ ५ ॥ पर्शुं क्षिपन्तं कुपितं रक्तपङ्कजदलेक्षणम् ॥ गणेशो रोधयामास निवर्त्तस्वेत्युवाच तम् ॥ ६ ॥ पुनर्गणेशं रामश्च प्रेरयामास कोपतः ॥ पपात पुरतो वेगान्मानहीनो गजाननः ॥ ७ ॥ गजाननः समुत्थाय धर्मं कृत्वा तु सक्षिणम् ॥ पुनस्तं बोधयामास जितक्रोधः शिवात्मजः ॥ ८ ॥ निवर्त्तस्व निवर्त्तस्वेत्युच्चार्य्य च पुनः पुनः ॥ प्रवेशने ते का शक्तिरीश्वराज्ञां विना प्रभो ॥ ९ ॥ मम भ्राता त्वमतिथिर्विद्यासम्बन्धतो ध्रुवम् ॥ ईश्वरप्रियशिष्यश्च सोढं वै तेन हेतुना ॥ १० ॥ न ह्यहं कार्त्तवीर्य्यश्च भूपास्ते क्षुद्रजन्तवः ॥ अतो विप्र

न जानासि मां च विश्वेश्वरात्मजम् ॥ ११ ॥ क्षणं तिष्ठ निवर्त्तस्व समरे ब्राह्मणातिथे ॥ क्षणान्तरे त्वया सार्द्धं यास्यामीश्वरसन्निधिम् ॥ १२ ॥ नारायण उवाच ॥ हेरम्बवचनं श्रुत्वा प्रजहास पुनः पुनः॥पर्शुं क्षेप्तुं मनश्चक्रे प्रणम्य हरिशङ्करौ ॥१३॥ पर्शुं क्षिपन्तं कोपेन तं च रामं गजाननः ॥ दृष्ट्वा मुमूर्षुं देवेशो धर्मं कृत्वा तु साक्षिणम् ॥ १४ ॥ योगेन वर्द्धयामास शुण्डां तां कोटियोजनाम् ॥ योगीन्द्रस्तत्र सन्तिष्ठन्भ्रामयित्वा पुनः पुनः ॥ १५ ॥ शतधा वेष्टयित्वा तु भ्रामयित्वा तु तत्र वै ॥ ऊर्द्ध्वमुत्तोल्य वेगेन क्षुद्राहिं गरुडो यथा ॥ १६ ॥ सप्तद्वीपांश्च शैलांश्च मेरुं चाखिलसागरान् ॥क्षणेन दर्शयामास रामं योगपराहतम् ॥ १७ ॥ हस्तपादाद्यनाथं तं जडं सर्वांगकम्पितम् ॥ पुनस्तं भ्रामयामास दर्पितं दर्पनाशनः ॥ १८ ॥ भूर्लोकं च भुवर्लोकं स्वर्लोकं च सुरेश्वरः ॥ जनोलोकं तपोलोकं ध्रुवलोकं च तत्परम् ॥ १९ ॥ गौरीलोकं शम्भुलोकं दर्शयामास नारद ॥ दर्शयित्वा तु विध्यण्डं स पपौ सप्त सागरान् ॥ २० ॥ पुनरुद्गिरणं चक्रे सनक्रमकरोदकम् ॥ तत्र तं पातयामास गम्भीरे सागरोदके ॥ २१ ॥ मुमूर्षुं तं सन्तरन्तं पुनर्ज्जग्राह लीलया ॥ पुनस्तत्र भ्रामयित्वा ब्रह्माण्डादूर्द्ध्वमप्यमुम् ॥ २२ ॥ वैकुण्ठं दर्शयामास सलक्ष्मीकं चतुर्भुजम् ॥ क्षणं तत्र भ्रामयित्वा योगीन्द्रो योगमायया ॥ २३ ॥ पुनः करं च योगेन वर्द्धयामास लीलया ॥ गोलोकं दर्शयामास विरजां च नदीश्वरीम् ॥ २४ ॥ वृन्दावनं शृङ्गशतं शैलेन्द्रं रासमण्डलम् ॥ गोपीगोपादिभिः सार्द्धं श्रीकृष्णं श्यामसुन्दरम् ॥ २५ ॥ द्विभुजं मुरलीहस्तं सस्मितं सुमनोहरम् ॥ रत्नसिंहासनस्थं च रत्नभूषणभूषितम् ॥ २६ ॥ तेजसा कोटिसूर्य्याभं राधावक्षःस्थलस्थितम् ॥ एवं कृष्णं दर्शयित्वा प्रणमय्य पुनः पुनः ॥ २७ ॥ क्षणेन लम्बमानं च भ्रामयित्वा पुनः पुनः ॥ दृष्ट्वा कृष्णं चेष्टदेवं सर्वपापप्रणाशनम् ॥ भ्रूणहत्यादिकं पापं भृगोर्दूरं चकार ह ॥ २८ ॥ न भवेद्यातना नष्टा विना भोगेन पापजा ॥ स्वल्पां च बुभुजे रामो गताऽन्या कृष्णदर्शनात् ॥ २९ ॥ क्षणेन चेतनां प्राप्य भुवि वेगात्पपात ह ॥

बभूव दूरीभूतं च गणेशस्तम्भनं भृगोः ॥ ३० ॥ सस्मार कवचं स्तोत्रं गुरुदत्तं सुदुर्लभम् ॥ अभीष्टदेवं श्रीकृष्णं गुरुं शम्भुं जगद्गुरुम् ॥ ३१ ॥ चिक्षेप पर्शुमव्यर्थं शिवतुल्यं च तेजसा ॥ ग्रीष्ममध्याह्नमार्तण्डप्रभाशतगुणं मुने ॥ ३२ ॥ पितुरव्यर्थमस्त्रं च दृष्ट्वा गणपतिः स्वयम् ॥ जग्राह वामदन्तेन नास्त्रं व्यर्थं चकार ह ॥ ३३ ॥ निपात्य पर्शुर्वेगेन च्छित्त्वा दन्तं समूलकम् ॥ जगाम रामहस्तं च महादेवबलेन च ॥ ३४ ॥ हाहेति शब्दमाकाशे देवाश्चक्रुर्महाभिया ॥ वीरभद्रः कार्त्तिकेयः क्षेत्रपालाश्च पार्षदाः ॥ ॥ ३५ ॥ पपात भूमौ दन्तश्च सरक्तः शब्दयंस्तदा ॥ पपात गैरिकायुक्तो यथा स्फटिकपर्वतः ॥३६॥ शब्देन महता विप्र चकम्पे पृथिवी भिया ॥ कैलासस्था जनाः सर्वे मूर्च्छामापुः क्षणं भिया ॥ ३७ ॥ निद्रा बभञ्ज तत्काले निद्रेशस्य जगत्प्रभोः ॥ आजगाम बहिः शम्भुः पार्वत्या सह सम्भ्रमात् ॥३८॥ पुरो ददर्श हेरम्बं लोहितास्यं क्षतेन तम् ॥ भग्नदन्तं जितक्रोधं सस्मितं लज्जितं मुने ॥ ३९ ॥ पप्रच्छ पार्वती शीघ्रं स्कन्दं किमिति पुत्रक ॥ स च तां कथयामास वार्तां पौर्वापरीं भिया ॥ ४० ॥ चुकोप दुर्गा कृपया रुरोद च मुहुर्मुहुः ॥ उवाच शम्भोः पुरतः पुत्रं कृत्वा स्ववक्षसि ॥ ४१ ॥ सम्बोध्य शम्भुं शोकेन भिया विनयपूर्वकम् ॥ उवाच प्रणता साध्वी प्रणतार्तिहरं पतिम् ॥ ४२ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे गणेशदन्तभङ्गकारणवर्णनं नाम त्रिचत्वारिंशत्तमोऽध्यायः ॥ ४३ ॥ पार्वत्युवाच ॥ सर्वे जानन्ति जगति दुर्गां शङ्करकिंकरीम् ॥ अपेक्षारहिता दासी तस्या वै जीवनं वृथा ॥ १ ॥ ईश्वरस्य समाः सर्वास्तृणपर्वतजातयः ॥ दासीपुत्रस्य शिष्यस्य दोषः कस्येति च प्रभो ॥ २ ॥ विचारं कर्तुमुचितं त्वं च धर्मविदां वरः ॥ वीरभद्रः कार्त्तिकेयः पार्षदाः सन्ति साक्षिणः ॥३॥ साक्ष्ये मिथ्यां को वदेद्वा द्वावेषां भ्रातरौ समौ ॥ साक्ष्ये समे शत्रुमित्रे सतां धर्मनिरूपणे ॥ ४ ॥ साक्षी सभायां यत्साक्ष्यं जानन्नप्यन्यथा वदेत् ॥ कामतः क्रोधतो वाऽपि लोभेन च भयेन च ॥ ५ ॥ स याति कुम्भीपाकं च निपात्य शतपूरुषम् ॥ तैश्च सार्द्धं वसेत्तत्र यावच्चन्द्र

दिवाकरम् ॥ ६ ॥ अहं विबोधितुं शक्ता यन्निर्णेत्री द्वयोरपि ॥ तथाऽपि तव साक्षात्तु ममाज्ञा निन्दिता श्रुतौ ॥ ७ ॥ किंकराणां प्रभा तत्र नृपे वसति संसदि ॥ उदिते भास्करे पृथ्व्यां खद्योतो हि यथा प्रभो ॥ ८ ॥ सुचिरं तपसा प्राप्तं त्वदीयं चरणाम्बुजम् ॥ परित्यागभयेनैव सन्ततं भीतया मया ॥ ९ ॥ यत्किंचित्कोपशोकाभ्यामुक्तं मोहेन तत्परम् ॥ तत्क्षमस्व जगन्नाथ पुत्रस्नेहाच्च दारुणात् ॥ १० ॥ त्वया यदि परित्यक्ता तदा पुत्रेण तेन किम् ॥ साध्व्याः सद्वंशजायाश्च शतपुत्राधिकः पतिः ॥ ११ ॥ असद्वंशप्रसूता या दुश्शीला ज्ञानवर्जिता ॥ स्वामिनं मन्यते नासौ पित्रोर्दोषेण कुत्सिता ॥ १२ ॥ कुत्सितं पतितं मूढं दरिद्रं रोगिणं जडम् ॥ कुलजा विष्णुतुल्यं च कान्तं पश्यति सन्ततम् ॥ १३ ॥ हुताशनो वा सूर्य्यो वा सर्वतेजस्विनां वरः ॥ पतिव्रतातेजसश्च कलां नार्हन्ति षोडशीम्॥१४॥ महादानानि पुण्यानि व्रतान्यनशनानि च ॥ तपांसि पतिसेवायाः कलां नार्हन्ति षोडशीम्॥१५॥पुत्रो वाऽपि पिता वाऽपि बान्धवोऽथ सहोदरः ॥ योषितां कुलजातानां न कश्चित्स्वामिनः समः ॥ १६ ॥ इत्युक्त्वा स्वामिनं दुर्गा ददर्श पुरतो भृगुम् ॥ शम्भोः पदाब्जं सेवन्तं निर्भयं तमुवाच ह ॥१७॥ पार्वत्युवाच ॥ अहो राम महाभाग ब्रह्मवंश्योऽसि पण्डितः ॥ पुत्रोऽसि जमदग्नेश्च शिष्यो वै योगिनां गुरोः ॥१८॥ माता ते रेणुका साध्वी पद्मांशा सत्कुलोद्भवा ॥ मातामहो वैष्णवश्च मातुलश्च ततोऽधिकः ॥ ॥ १९ ॥ त्वं च रेणुकभूपस्य मनुवंशोद्भवस्य च ॥ दौहित्रो मातुलः साधुः शूरो विष्णुपदाश्रयः ॥ २० ॥ कस्य दोषेण दुर्द्धर्षस्त्वं न जानेऽप्यशुद्धधीः ॥ येषां दोषैर्जनो दुष्टस्तमृते शुद्धमानसः ॥ २१ ॥ अमोघं प्राप्य पर्शुं च गुरुं च करुणानिधिम् ॥ परीक्षां क्षत्त्रिये कृत्वा बभूवास्य सुते पुनः ॥ २२ ॥ गुरवे दक्षिणादानमुचितं च श्रुतौ श्रुतम् ॥ भग्नो दन्तस्तत्सुतस्य च्छिन्धि मस्तकमप्यहो ॥ २३ ॥ गणेश्वरं रणे जित्वा स्थितश्चेदावयोः पुरः ॥ स त्वं लब्ध्वाऽऽशिषो लोके पूजितोऽभूर्जगत्त्रये॥२४॥ पर्शुनाऽमोघवीर्य्येण शङ्करस्य वरेण च ॥ हन्तुं शक्तः सृगालश्च सिंहं शार्दूलमाखुभुक्॥२५॥त्वद्विधं लक्षकोटिं च हन्तुं शक्तो गणेश्वरः ॥ जितेन्द्रियाणां प्रवरो

नहि हन्ति च मक्षिकाम् ॥ २६ ॥ तेजसा कृष्णतुल्योऽयं कृष्णांशश्च गणेश्वरः ॥ देवाश्चान्ये कृष्णकलाः पूजाऽस्य पुरत
स्ततः ॥ २७ ॥ व्रतप्रभावतः प्राप्तः शङ्करस्य वरेण च ॥ शोकेनातिकठोरेण नहि सम्पद्विनाऽऽपदम् ॥ २८ ॥ इत्युक्त्वा पार्वती
रोषात्तं रामं हन्तुमुद्यता ॥ रामः सस्मार तं कृष्णं प्रणम्य मनसा गुरुम् ॥२९॥ एतस्मिन्नन्तरे दुर्गा ददर्श पुरतो द्विजम् ॥ अतीव
वामनं बालं सूर्य्यकोटिसमप्रभम् ॥ ३० ॥ शुक्लदन्तं शुक्लवासं शुक्लयज्ञोपवीतिनम् ॥ दण्डिनं छत्रिणं चैव सुप्रभं तिलकोज्ज्वलम् ॥
॥ ३१ ॥ दधतं तुलसीमालां सस्मितं सुमनोहरम् ॥ रत्नकेयूरवलयं रत्नमालाविभूषितम् ॥ ३२ ॥ रत्ननूपुरपादं च सद्रत्नमुकुटो
ज्ज्वलम् ॥ रत्नकुण्डलयुग्माढ्यगण्डस्थलविराजितम् ॥ ३३ ॥ स्थिरमुद्रां दर्शयन्तं भक्तवामकरेण च ॥ दक्षिणेऽभयमुद्रां च
भक्तेशं भक्तवत्सलम् ॥ ३४ ॥ बालिकाबालकगणैर्नागरैः सस्मितैर्युतम् ॥ कैलासवासिभिः सर्वैरावृद्धैरीक्षितं मुदा ॥ ३५ ॥ तं
दृष्ट्वा सम्भ्रमाच्छम्भुः सभृत्यः सहपुत्रकः ॥ मूर्ध्ना भक्त्या प्राणमच्च दुर्गायै दण्डवद्भुवि ॥ ३६ ॥ आशिषं प्रददौ बालः सर्वेभ्यो
वाञ्छितप्रदाम् ॥ तं दृष्ट्वा बालकाः सर्वे महाश्चर्य्यं ययुर्भिया ॥ ३७ ॥ दत्त्वा तस्मै शिवो भक्त्या तूपचारांस्तु षोडश ॥ पूजां
चकार श्रुत्युक्तां परिपूर्णतमस्य च ॥ ३८ ॥ तुष्टाव काण्वशाखोक्तस्तोत्रेण नतकन्धरः ॥ पुलकाङ्कितसर्वांगो भगवन्तं सनातनम् ॥
॥ ३९ ॥ रत्नसिंहासनस्थं च प्रावोचच्छङ्करः स्वयम् ॥ अतीव तेजसाऽत्यन्तं प्रच्छन्नाकृतिमेव च ॥ ४० ॥ शंकर उवाच ॥
आत्मारामेषु कुशलप्रश्नोऽतीव विडम्बनम् ॥ ते शश्वत्कुशलाधाराः कुशलाः कुशलप्रदाः ॥ ४१ ॥ अद्य मे सफलं जन्म जीवितं च
सुजीवितम् ॥ प्राप्तस्त्वमतिथिब्रह्मन्कृष्णसेवाफलोदयात् ॥ ४२ ॥ परिपूर्णतमः कृष्णो लोकनिस्तारहेतवे ॥ पुण्यक्षेत्रे हि कलया
भारते च कृपानिधिः ॥ ४३ ॥ अतिथिः पूजितो येन पूजिताः सर्वदेवताः ॥ अतिथिर्यस्य सन्तुष्टस्तस्य तुष्टो हरिः स्वयम् ॥ ४४॥
स्नानेन सर्वतीर्थेषु सर्वदानेन यत्फलम् ॥ सर्वव्रतोपवासेन सर्वयज्ञेषु दीक्षया ॥ ४५ ॥ सर्वैस्तपोभिर्विविधैर्नित्यैर्नैमित्तिकादिभिः ॥

तदेवातिथिसेवायाः कलां नार्हन्ति षोडशीम् ॥ ४६ ॥ अतिथिर्यस्य भग्नाशो याति रुष्टश्च मन्दिरात् ॥ कोटिजन्मार्जितं पुण्यं तस्य
नश्यति निश्चितम् ॥ ४७ ॥ स्त्रीगोघ्नश्च कृतघ्नश्च ब्रह्मघ्नो गुरुतल्पगः ॥ पितृमातृगुरूणां च निन्दको नरघातकः ॥ ४८ ॥ सन्ध्या
हीनः स्वघाती च सत्यघ्नो हरिनिन्दकः ॥ ब्रह्मस्वस्थाप्यहारी च मिथ्यासाक्ष्यप्रदायकः ॥ ४९ ॥ मित्रद्रोही कृतघ्नश्च वृषवाहश्च
सूपकृत् ॥ शवदाही ग्रामयाजी ब्राह्मणो वृषलीपतिः ॥ ५० ॥ शूद्रश्राद्धान्नभोजी च शूद्रश्राद्धेषु भोजकः ॥ कन्याविक्रयकारी च
श्रीहरेर्नामविक्रयी ॥ ५१ ॥ लाक्षामांसतिलानां च लवणस्य तिलस्य च ॥ विक्रेता ब्राह्मणश्चैव तुरगाणां गवां तथा ॥ ५२ ॥
एकादशीकृष्णसेवाहीनो विप्रश्च भारते॥एते महापातकिनस्त्रिषु लोकेषु निन्दिताः॥५३॥कालसूत्रे च नरके पतन्ति ब्रह्मणां शतम् ॥
एतेभ्योऽप्यधिकः सोऽपि यश्चातिथिपराङ्मुखः ॥ ५४ ॥ नारायण उवाच ॥ शङ्करस्य वचः श्रुत्वा सन्तुष्टः श्रीहरिः स्वयम् ॥
मेघगम्भीरया वाचा तमुवाच जगत्पतिः ॥ ५५ ॥ विष्णुरुवाच ॥ श्वेतद्वीपादागतोऽहं ज्ञात्वा कोलाहलं च वः ॥ अस्य रामस्य
रक्षार्थं कृष्णभक्तस्य साम्प्रतम् ॥ ५६ ॥ नैतेषां कृष्णभक्तानामशुभं विद्यते क्वचित् ॥ रक्षामि तांश्चक्रहस्तो गुरुमन्यं विना शिव
॥ ५७ ॥ नाहं पाता गुरौ रुष्टे बलवद्गुरुहेलनम् ॥ तत्परः पातकी नास्ति सेवाहीनो गुरोश्च यः ॥ ५८ ॥ मान्यः पूज्यश्च सर्वेभ्यः
सर्वेषां जनको भवेत् ॥ अहो यस्य प्रसादेन सर्वान्पश्यति मानवः ॥ ५९ ॥ जनको जन्मदानाच्च पालनाच्च पिता नृणाम् ॥ ततो
विस्तारकरणात्कलया स प्रजापतिः ॥ ६० ॥ पितुः शतगुणं माता पोषणाद्गर्भधारणात् ॥ वन्द्या पूज्या च मान्या च प्रसूस्स्याद्वै
वसुन्धरा ॥ ६१ ॥ मातुः शतगुणं वन्द्यः पूज्यो मान्योऽन्नदायकः ॥ यद्विना नश्वरो देहो विष्णुश्च कलयाऽन्नदः ॥ ६२ ॥ अन्नदातुः
शतगुणोऽभीष्टदेवः परः स्मृतः ॥ गुरुस्तस्माच्छतगुणो विद्यामन्त्रप्रदायकः ॥ ६३ ॥ अज्ञानतिमिराच्छन्नं ज्ञानदीपेन चक्षुषा ॥ यः
सर्वार्थं दर्शयति तत्परो नैव बान्धवः ॥६४॥ गुरुदत्तेन मन्त्रेण तपसेष्टसुखं लभेत् ॥ सर्वज्ञत्वं सर्वसिद्धिं तत्परो नैव बान्धवः॥६५॥

सर्वं जयति सर्वत्र विद्यया गुरुदत्तया ॥ तस्मात्पूज्यो हि जगति को वा बन्धुस्ततोऽधिकः ॥ ६६ ॥ विद्यान्धो वा धनान्धो वा यो मूढो न भजेद्गुरुम् ॥ ब्रह्महत्यादिभिः पापैः स लिप्तो नात्र संशयः ॥ ६७ ॥ दरिद्रं पतितं क्षुद्रं नरबुद्ध्याऽऽचरेद्गुरुम् ॥ तीर्थस्नातोऽपि न शुचिर्नाधिकारी च कर्म्मसु ॥ ६८ ॥ पितरं मातरं भार्य्यां गुरुपत्नीं गुरुं परम् ॥ यो न पुष्णाति कापट्यात्स महापातकी शिव ॥ ६९ ॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ॥ गुरुरेव परं ब्रह्म गुरुर्भास्कररूपकः ॥ ७० ॥ गुरुश्चन्द्रस्तथेन्द्रश्च वायुश्च वरुणोऽनलः ॥ सर्वरूपो हि भगवान्परमात्मा स्वयं गुरुः ॥ ७१ ॥ नास्ति वेदात्परं शास्त्रं नहि कृष्णात्परः सुरः ॥ नास्ति गङ्गासमं तीर्थं न पुष्पं तुलसीदलात् ॥ ७२ ॥ नास्ति क्षमावती भूमेः पुत्रान्नास्त्यपरः प्रियः ॥ न च दैवात्परा शक्तिर्नैकादश्याः परं व्रतम् ॥ ७३ ॥ शालग्रामात्परो यन्त्रो न क्षेत्रं भारतात्परम् ॥ परं पुण्यस्थलानां च पुण्यं वृन्दावनं यथा ॥ ७४ ॥ मोक्षदानां यथा काशी वैष्णवानां यथा शिवः ॥ न पार्वत्याः परा साध्वी न गणेशात्परो वशी ॥७५॥ न च विद्यासमो बन्धुर्नास्ति कश्चिद्गुरोः परः ॥ विद्यादातुः पुत्रदारौ तत्समौ नात्र संशयः ॥ ७६ ॥ गुरुस्त्रियां च पुत्रे चाप्यभवद्वामहेलनम् ॥ परं सम्मार्ज्जनं कर्तुमागतोऽहं तवालयम् ॥ ७७ ॥ नारायण उवाच ॥ इत्येवमुक्त्वा शम्भुं च दुर्गां सम्बोध्य नारद ॥ उवाच भगवांस्तत्र सत्यसारं परं वचः ॥ ७८ ॥ श्रीविष्णुरुवाच ॥ शृणु देवि प्रवक्ष्यामि मदीयं वचनं शुभम् ॥ नीतियुक्तं वेदसारं परिणामसुखावहम् ॥ ७९ ॥ यथा ते गजवक्त्रश्च कार्त्तिकेयश्च पार्वति ॥ तथा परशुरामश्च भार्गवो नात्र संशयः ॥ ८० ॥ नास्त्येषु स्नेहभेदश्च तव वा शंकरस्य च ॥ विचार्य्य सर्वं सर्वज्ञे कुरु मातर्यथोचितम् ॥ ८१ ॥ पुत्रेण सार्द्धं पुत्रस्य विवादो दैवदोषतः ॥ दैवं हन्तुं को हि शक्तो दैवं च बलवत्तरम् ॥ ८२ ॥ पुत्राभिधानं वेदेषु पश्य वत्से वरानने ॥ एकदन्त इति ख्यातं सर्वदेवनमस्कृतम् ॥ ८३ ॥ पुत्रनामाष्टकं स्तोत्रं सामवेदोक्तमीश्वरि ॥ शृणु

ष्वावहितं मातः सर्वविघ्नहरं परम् ॥ ८४ ॥ विष्णुरुवाच ॥ गणेशमेकदन्तं च हेरम्बं विघ्ननायकम् ॥ लम्बोदरं शूर्पकर्णं गजवक्त्रं
गुहाग्रजम् ॥ ८५ ॥ अष्टाख्यार्थं च पुत्रस्य शृणु मातर्हरप्रिये ॥ स्तोत्राणां सारभूतं च सर्वविघ्नहरं परम् ॥ ८६ ॥ ज्ञानार्थवा
चको गश्च णश्च निर्वाणवाचकः ॥ तयोरीशं परं ब्रह्म गणेशं प्रणमाम्यहम् ॥ ८७ ॥ एकशब्दः प्रधानार्थो दन्तश्च बलवा
चकः ॥ बलं प्रधानं सर्वस्मादेकदन्तं नमाम्यहम् ॥ ८८ ॥ दीनार्थवाचको हेश्च रम्बः पालकवाचकः ॥ पालकं दीनलोकानां
हेरम्बं प्रणमाम्यहम् ॥ ८९ ॥ विपत्तिवाचको विघ्नो नायकः खण्डनार्थकः ॥ विपत्खण्डनकारं तं प्रणमे विघ्ननायकम् ॥
॥ ९० ॥ विष्णुदत्तैश्च नैवेद्यैर्यस्य लम्बं पुरोदरम् ॥ पित्रा दत्तैश्च विविधैर्वन्दे लम्बोदरं च तम् ॥ ९१ ॥ शूर्पाकारौ च यत्कर्णौ
विघ्नवारणकारकौ ॥ सम्पदौ ज्ञानरूपौ च शूर्पकर्णं नमाम्यहम् ॥९२॥ विष्णुप्रसादं मुनिना दत्तं यन्मूर्ध्नि पुष्पकम् ॥ तद्गजेन्द्रमुखं
कान्तं गजवक्त्रं नमाम्यहम् ॥ ९३ ॥ गुहस्याग्रे च जातोऽयमाविर्भूतो हरालये ॥ वन्दे गुहाग्रजं देवं सर्वदेवाग्रपूजितम् ॥
॥ ९४ ॥ एतन्नामाष्टकं दुर्गे नानाशक्तियुतं परम् ॥ एतन्नामाष्टकं स्तोत्रं नानार्थसहितं शुभम् ॥ ९५ ॥ त्रिसन्ध्यं यः पठेन्नित्यं
स सुखी सर्वतो जयी ॥ ततो विघ्नाः पलायन्ते वैनतेयाद्यथोरगाः ॥ ९६ ॥ गणेश्वरप्रसादेन महाज्ञानी भवेद्ध्रुवम् ॥ पुत्रार्थी लभते
पुत्रं भार्य्यार्थी कुशलां स्त्रियम् ॥९७॥ महाजडः कवीन्द्रश्च विद्यावांश्च भवेद्ध्रुवम् ॥ पुत्रस्त्वं पश्य वेदे च तथा कोपं च नो कुरु ॥
॥ ९८ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे गणेशस्तोत्रकथनं नाम चतुश्चत्वारिंशत्तमोऽध्यायः
॥ ४४ ॥ नारायण उवाच ॥ पार्वतीं बोधयित्वा तु विष्णू राममुवाच ह ॥ हितं सारं नीतिसारं परिणामसुखावहम् ॥ १ ॥ विष्णु
रुवाच ॥ राम त्वमधुना सत्यमपराधी श्रुतेर्म्मतं ॥ कोपात्कृत्वा दन्तभङ्गं गणेशस्य स्थितोऽशिव ॥ २ ॥ स्तोत्रेणैव मयोक्तेन
स्तुत्वा गणपतिं परम् ॥ काण्वशाखोक्तविधिना स्तुहि दुर्गां जगत्प्रसूम् ॥ ३ ॥ श्रीकृष्णस्य परा शक्तिर्बुद्धिरूपा जगत्प्रभोः ॥

अस्यां च तव रुष्टायां हता बुद्धिर्भविष्यति ॥ ४ ॥ सर्वशक्तिस्वरूपेयमनया शक्तिमज्जगत्॥अनया शक्तिमान्कृष्णो निर्गुणः प्रकृतेः परः ॥ ५ ॥ सृष्टिं कर्तुं न शक्तश्च ब्रह्मा शक्त्याऽनया विना ॥ वयमस्यां प्रसूताश्च ब्रह्मविष्णुमहेश्वराः ॥ ६ ॥ सुरसंघेऽसुरग्रस्ते काले घोरतरे द्विज ॥ तेजस्सु सर्वदेवानामाविर्भूता पुरा सती ॥ ७ ॥ कृष्णाज्ञयाऽसुरान्हत्वा दत्त्वा तेभ्यः पदं ततः ॥ दक्षपत्न्यां जनिं लेभे दक्षस्य तपसा पुरा ॥ ८ ॥ भार्य्या भूत्वा शंकरस्य पुन : पत्युश्च निन्दया ॥ देहं त्यक्त्वा शैलपत्न्यां जनिं लेभे पुरा सती ॥ ९ ॥ शंकरस्तपसा लब्धो योगीन्द्राणां गुरोर्गुरुः ॥ लब्धो गणपतिः पुत्रः कृष्णांशः कृष्णसेवया ॥ १० ॥ यं ध्यायस्येव नित्यं किं तं न जानासि बालक ॥ स एव भगवान्कृष्णश्चांशेन गिरिजासुतः ॥ ११ ॥ कृताञ्जलिर्नतो भूत्वा स्तुहि दुर्गां शिवप्रियाम् ॥ शिवां शिवप्रदां शैवां शिवबीजां शिवेश्वरीम् ॥ १२ ॥ शिवायाः स्तोत्रराजेन पुरा शूलिकृतेन वै ॥ त्रिपुरस्य वधे घोरे ब्रह्मणा प्रेरितेन च ॥ १३ ॥ इत्युक्त्वा श्रीपदं शीघ्रं जगाम श्रीनिकेतनम् ॥ गते हरौ हरिं स्मृत्वा रामस्तां स्तोतुमुद्यतः ॥ १४ ॥ स्तोत्रेण विष्णुदत्तेन सर्वविघ्नहरेण च ॥ धर्म्मार्थकाममोक्षाणां कारणेन च नारद ॥ १५ ॥ कृताञ्जलिपुटो भूत्वा स्नात्वा गङ्गोदके शुभे ॥ गुरुं प्रणम्य भक्तेशं धृत्वा धौते च वाससी ॥१६॥ आचम्य नत्वा मूर्ध्ना तां भक्तिनम्रात्मकन्धरः ॥ पुलकाञ्चितसर्वांगश्चानन्दाश्रुसमन्वितः ॥१७॥ परशुराम उवाच ॥ श्रीकृष्णस्य च गोलोके परिपूर्णतमस्य च ॥ आविर्भूता विग्रहतः पुरा सृष्ट्युन्मुखस्य च ॥ १८ ॥ सूर्य्यकोटिप्रभायुक्ता वस्त्रालङ्कारभूषिता ॥ वह्निशुद्धांशुकाधाना सस्मिता सुमनोहरा ॥ १९ ॥ नवयौवनसम्पन्ना सिन्दूरारुण्यशोभिता ॥ ललितं कबरीभारं मालतीमाल्यमण्डितम् ॥ २० ॥ अहोऽनिर्वचनीया त्वं चारुमूर्त्तिं च बिभ्रती ॥ मोक्षप्रदा मुमुक्षूणां महाविष्णोर्विधिः स्वयम् ॥ २१ ॥ मुमोह क्षणमात्रेण दृष्ट्वा त्वां सर्वमोहिनीम् ॥ बालैस्संभूय सहसा सस्मिता धाविता पुरा ॥ २२ ॥ सद्भिः ख्याता तेन राधा मूलप्रकृतिरीश्वरी ॥ कृष्णस्तां सहसा भीतो वीर्य्याधानं चकार ह ॥ २३ ॥ ततो डिम्भं मह

ज्जज्ञे ततो जातो महाविराट् ॥ यस्यैव लोमकूपेषु ब्रह्माण्डान्यखिलानि च ॥ २४ ॥ राधारतिक्रमेणैव तन्निश्श्वासो बभूव ह ॥ स नि
श्श्वासो महावायुः स विराड् विश्वधारकः ॥ २५ ॥ भयघर्म्मजलेनैव पुप्लुवे विश्वगोलकम् ॥ स विराड् विश्वनिलयो जलराशिर्ब
भूव ह ॥ २६ ॥ ततस्त्वं पञ्चधाभूय पञ्चमूर्तीश्च बिभ्रती॥प्राणाधिष्ठातृमूर्तिर्या कृष्णस्य परमात्मनः ॥ कृष्णप्राणाधिकां राधां तां
वदन्ति पुराविदः ॥ २७ ॥ वेदाधिष्ठातृमूर्तिर्या वेदशास्त्रप्रसूरपि ॥ तां सावित्रीं शुद्धरूपां प्रवदन्ति मनीषिणः ॥ २८ ॥ ऐश्वर्य्याधि
ष्ठातृमूर्तिः शान्तिस्त्वं शान्तरूपिणी ॥ लक्ष्मीं वदन्ति सन्तस्तां शुद्धां सत्त्वस्वरूपिणीम् ॥ २९ ॥ रागाधिष्ठातृदेवी या शुक्लमूर्तिस्स
तां प्रसूः ॥ सरस्वतीं तां शास्त्रज्ञां शास्त्रज्ञाः प्रवदन्त्यहो ॥ ३० ॥ बुद्धिर्विद्या सर्वशक्तेर्या मूर्तिरधिदेवता ॥ सर्वमङ्गलमङ्गल्या सर्व
मङ्गलरूपिणी ॥ ३१ ॥ सर्वमङ्गलबीजस्य शिवस्य निलयेऽधुना ॥३२॥ शिवे शिवास्वरूपा त्वं लक्ष्मीर्नारायणान्तिके ॥ सरस्वती
च सावित्री वेदसूर्ब्रह्मणः प्रिया ॥३३॥ राधा रासेश्वरस्यैव परिपूर्णतमस्य च ॥ परमानन्दरूपस्य परमानन्दरूपिणी ॥३४॥ त्वत्कलां
शांशकलया देवानामपि योषितः ॥ ३५ ॥ त्वं विद्या योषितः सर्वास्सर्वेषां बीजरूपिणी ॥ छाया सूर्य्यस्य चन्द्रस्य रोहिणी सर्व
मोहिनी॥३६॥शची शक्रस्य कामस्य कामिनी रतिरीश्वरी॥वरुणानी जलेशस्य वायोः स्त्री प्राणवल्लभा॥३७॥वह्नेः प्रिया हि स्वाहा
च कुबेरस्य च सुन्दरी॥यमस्य तु सुशीला च नैर्ऋतस्य च कैटभी ॥३८॥ ऐशानी स्याच्छशिकला शतरूपा मनोः प्रिया॥देवहूतिः
कर्दमस्य वसिष्ठस्याप्यरुन्धती ॥ ३९ ॥ लोपामुद्राऽप्यगस्त्यस्य देवमाताऽदितिस्तथा ॥ अहल्या गौतमस्यापि सर्वाधारा वसुन्धरा
॥ ४० ॥ गङ्गा च तुलसी चापि पृथिव्यां या सरिद्वरा ॥ एताः सर्वाश्च या ह्यन्याः सर्वास्त्वत्कलयाऽम्बिके ॥ ४१ ॥ गृहलक्ष्मी
गृहे नृणां राजलक्ष्मीश्च राजसु ॥ तपस्विनां तपस्या त्वं गायत्री ब्राह्मणस्य च ॥ ४२ ॥ सतां सत्त्वस्वरूपा त्वमसतां कलहाङ्कुरा ॥
ज्योतीरूपा निर्गुणस्य शक्तिस्त्वं सगुणस्य च ॥ ४३ ॥ सूर्य्ये प्रभास्वरूपा त्वं दाहिका च हुताशने ॥ जले शैत्यस्वरूपा च शोभा

रूपा निशाकरे ॥ ४४ ॥ त्वं भूमौ गन्धरूपा चाप्याकाशे शब्दरूपिणी ॥ क्षुत्पिपासादयस्त्वं च जीविनां सर्वशक्तयः ॥ ४५ ॥ सर्वबीजस्वरूपा त्वं संसारे साररूपिणी ॥ स्मृतिर्मेधा च बुद्धिर्वा ज्ञानशक्तिर्विपश्चिताम् ॥ ४६ ॥ कृष्णेन विद्या या दत्ता सर्वज्ञानप्रसूः शुभा ॥ शूलिने कृपया सा त्वं यया मृत्युञ्जयः शिवः ॥४७॥ सृष्टिपालनसंहारशक्तयस्त्रिविधाश्च याः ॥ ब्रह्मविष्णुमहेशानां सा त्वमेव नमोऽस्तु ते ॥ ४८ ॥ मधुकैटभभीत्या च त्रस्तो धाता प्रकम्पितः ॥ स्तुत्वा मुक्तश्च यां देवीं तां मूर्ध्ना प्रणमाम्यहम् ॥ ४९ ॥ मधुकैटभयोर्युद्धे त्राताऽसौ विष्णुरीश्वरीम् ॥ बभूव शक्तिमान्स्तुत्वा त्वां दुर्गां प्रणमाम्यहम् ॥ ५० ॥ त्रिपुरस्य महायुद्धे सरथे पतिते शिवे ॥ यां तुष्टुवुः सुराः सर्वैः तां दुर्गां प्रणमाम्यहम् ॥ ५१ ॥ विष्णुना वृषरूपेण स्वयं शम्भुः समुत्थितः ॥ जघान त्रिपुरं स्तुत्वा तां दुर्गां प्रणमाम्यहम् ॥ ५२ ॥ यदाज्ञया वाति वातः सूर्य्यस्तपति सन्ततम् ॥ वर्षतीन्द्रो दहत्यग्निस्तां दुर्गां प्रणमाम्यहम् ॥ ५३ ॥ यदाज्ञया हि कालश्च शश्वद्भ्रमति वेगतः ॥ मृत्युश्चरति जन्तूनां तां दुर्गां प्रणमाम्यहम्॥ ॥ ५४ ॥ स्रष्टा सृजति सृष्टिं च पाता पाति यदाज्ञया ॥ संहर्त्ता संहरेत्काले तां दुर्गां प्रणमाम्यहम् ॥ ५५ ॥ ज्योतिस्स्वरूपो भगवाञ्छ्रीकृष्णो निर्गुणः स्वयम् ॥ यया विना न शक्तश्च सृष्टिं कर्तुं नमामि ताम् ॥ ५६ ॥ रक्ष रक्ष जगन्मातरपराधं क्षमस्व मे ॥ शिशूनामपराधेन कुतो माता हि कुप्यति ॥ ५७ ॥ उक्त्वा परशुरामश्चेति नत्वा तां रुरोद ह ॥ तुष्टा दुर्गा संभ्रमेण चाभयं च वरं ददौ ॥ ५८ ॥ अमरो भव हे पुत्र वत्स सुस्थिरतां व्रज ॥ सर्वप्रसादात्सर्वत्र जयोऽस्तु तव सन्ततम् ॥ ५९ ॥ सर्वान्त रात्मा भगवांस्तुष्टस्स्यात्सन्ततं हरिः ॥ भक्तिर्भवतु ते कृष्णे शिवदे च शिवे गुरौ ॥ ६० ॥ इष्टदेवे गुरौ यस्य भक्तिर्भवति शाश्वती ॥ तं हन्तुं नहि शक्ता वा रुष्टा वा सर्वदेवताः ॥ ६१ ॥ श्रीकृष्णस्य च भक्तस्त्वं शिष्यो वै शंकरस्य च ॥ गुरुपत्नीं स्तौषि यस्मात्कस्त्वां हन्तुमिहेश्वरः ॥ ६२ ॥ अहो न कृष्णभक्तानामशुभं विद्यते क्वचित् ॥ अन्य

देवेषु ये भक्ता न भक्ता वा निरङ्कुशाः ॥ ६३ ॥ चन्द्रमा बलवांस्तुष्टो येषां भाग्यवतां भृगो ॥ तेषां तारागणा रुष्टाः किं कुर्वंति च
दुर्बलाः॥६४॥ यस्मै तुष्टः पालयति नरदेवो महान्सुखी ॥ तस्य किं वा करिष्यन्ति रुष्टा भृत्याश्च दुर्बलाः॥६५॥ इत्युक्त्वा पार्वती
तुष्टा दत्त्वा रामाय चाशिषम् ॥ जगामान्तःपुरं तूर्णं हर्षशब्दो बभूव ह ॥६६॥ स्तोत्रं वै काण्वशाखोक्तं पूजाकाले च यः पठेत् ॥
यात्राकाले तथा प्रातर्वाञ्छितार्थं लभेद्ध्रुवम् ॥६७॥ पुत्रार्थी लभते पुत्रं कन्यार्थी कन्यकां लभेत् ॥ विद्यार्थी लभते विद्यां प्रजार्थी
चाप्नुयात्प्रजाः ॥ भ्रष्टराज्यो लभेद्राज्यं नष्टवित्तो धनं लभेत् ॥६८॥ यस्य रुष्टो गुरुर्दैवो राजा वा बान्धवोऽथवा ॥ तस्मै तुष्टश्च
वरदः स्तोत्रराजप्रसादतः ॥ ६९ ॥ दस्युग्रस्तः फणिग्रस्तश्शत्रुग्रस्तो भयानकः ॥ व्याधिग्रस्तो भवेन्मुक्तः स्तोत्रस्मरणमात्रतः ॥
॥ ७० ॥ राजद्वारे श्मशाने च कारागारे च बन्धने ॥ जलराशौ निमग्नश्च मुक्तस्तत्स्मृतिमात्रतः ॥७१॥ स्वामिभेदे पुत्रभेदे मित्र
भेदे च दारुणे ॥ स्तोत्रस्मरणमात्रेण वाञ्छितार्थं लभेद्ध्रुवम् ॥ ७२ ॥ कृत्वा हविष्यं वर्षं च स्तोत्रराजं शृणोति या ॥ भक्त्या
दुर्गां च सम्पूज्य महावन्ध्या प्रसूयते ॥ ७३ ॥ लभते सा दिव्यपुत्रं ज्ञानिनं चिरजीविनम् ॥ असौभाग्या च सौभाग्यं षण्मासश्र
वणाल्लभेत् ॥७४॥ नवमासं काकवन्ध्या मृतवत्सा च भक्तितः ॥ स्तोत्रराजं या शृणोति सा पुत्रं लभते ध्रुवम् ॥७५॥ कन्यामाता
पुत्रहीना पञ्चमासं शृणोति या ॥ घटे सम्पूज्य दुर्गां च सा पुत्रं लभते ध्रुवम् ॥ ७६ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गण
पतिखण्डे नारदनारायणसंवादे परशुरामकृतदुर्गास्तोत्रं नाम पञ्चचत्वारिंशत्तमोऽध्यायः ॥ ४५ ॥ नारायण उवाच ॥ स्तुत्वा तां प
र्शुरामोऽसौ हर्षसंफुल्लमानसः ॥ स्तोत्रेण हरिणोक्तेन स तुष्टाव गणाधिपम् ॥ १ ॥ पूजां चकार भक्त्या च नैवेद्यैर्विविधैरपि ॥ धूपै
र्दीपैश्च गन्धैश्च पुष्पैश्च तुलसीं विना ॥ २ ॥ सम्पूज्य भ्रातरं भक्त्या स रामः शंकराज्ञया ॥ गुरुपत्नीं गुरुं नत्वा गमनं कर्तुमु
द्यतः ॥ ३ ॥ नारद उवाच ॥ पूजां भगवतश्चक्रे रामो गणपतेर्यदा ॥ नैवेद्यैर्विविधैः पुष्पैस्तुलसीं च विना कथम् ॥ ४ ॥ तुलसी

सर्वपुष्पाणां मान्या धन्या मनोहरा ॥ कथं पूजां सारभूतां न गृह्णाति गणेश्वरः ॥ ५ ॥ नारायण उवाच ॥ शृणु नारद वक्ष्येऽहमितिहासं पुरातनम् ॥ ब्रह्मकल्पस्य वृत्तान्तं निगूढं च मनोहरम् ॥६॥ एकदा तुलसी देवी प्रोद्भिन्ननवयौवना ॥ तीर्थं भ्रमन्ती तपसा नारायणपरायणा ॥ ७ ॥ ददर्श गङ्गातीरे सा गणेशं यौवनान्वितम् ॥ अतीव सुन्दरं शुद्धं सस्मितं पीतवाससम् ॥ ८ ॥ चन्दनोक्षितसर्वांगं रत्नभूषणभूषितम् ॥ ध्यायन्तं कृष्णपादाब्जं जन्ममृत्युजरापहम् ॥ ९ ॥ जितेन्द्रियाणां प्रवरं योगीन्द्राणां गुरोर्गुरुम् ॥ सुरूपहार्य्यं निष्कामं सकामा तमुवाच ह ॥ १० ॥ तुलस्युवाच ॥ अहो ध्यायसि किं देव शान्तरूप गजानन ॥ कथं लम्बोदरो देहो गजवक्रं कथं तव ॥ ११ ॥ एकदन्तः कथं वक्रे वदामुत्र च कारणम् ॥ त्यज ध्यानं महाभाग सायंकाल उपस्थितः ॥ १२ ॥ इत्युक्त्वा तुलसी देवी प्रजहास पुनः पुनः ॥ परं चेतसि दग्धा सा कामबाणैः सुदारुणैः ॥ १३ ॥ गणेशस्य प्रधानांगे दत्त्वा किञ्चिज्जलं मुने ॥ जघान तर्जन्यग्रेण निष्पन्दं कृष्णमानसम् ॥ १४ ॥ बभूव ध्यानभग्नं च तस्य नारद चेतनम् ॥ दुःखं च ध्यानभेदेन तद्विच्छेदो हि शोकदः ॥ १५ ॥ ध्यानं त्यक्त्वा हरिं स्मृत्वा चापश्यत्कामिनीं पुरः ॥ नवयौवनसम्पन्नां सस्मितां कामपीडिताम् ॥ ॥ १६ ॥ लम्बोदरश्च तां दृष्ट्वा परं विनयपूर्वकम् ॥ उवाच सस्मितः शान्तः शान्तां कामातुरां वशी ॥ १७ ॥ गणेश्वर उवाच ॥ का त्वं वत्से कस्य कन्या मातर्मां ब्रूहि किं शुभे ॥ पापदोऽशुभदः शश्वद्ध्यानभंगस्तपस्विनाम् ॥ १८ ॥ कृष्णः करोतु कल्याणं हन्तु विघ्नं कृपानिधिः ॥ तद्ध्यानभंगजाद्दोषान्नाशुभं स्यात्तु ते शुभे ॥ १९ ॥ गणेशवचनं श्रुत्वा तमुवाच स्मरातुरा ॥ सस्मितं सकटाक्षं च देवं मधुरया गिरा ॥ २० ॥ तुलस्युवाच ॥ धर्मात्मजस्य कन्याऽहमप्रौढा च तपस्विनी ॥ तपस्या मे स्वामिनोऽर्थे त्वं स्वामी भव मे प्रभो ॥ २१ ॥ तुलसीवचनं श्रुत्वा गणेशः श्रीहरिं स्मरन् ॥ तामुवाच महाप्राज्ञः प्राज्ञीं मधुरया गिरा ॥ २२ ॥ गणेश उवाच ॥ हे मातर्नास्ति मे वाञ्छा घोरे दारपरिग्रहे ॥ दारग्रहो हि दुःखाय न सुखाय कदाचन ॥ २३ ॥ हरिभक्तेर्व्य

वायश्च तपस्यानाशकारकः ॥ मोक्षद्वारकपाटश्च भवबन्धनपाशकः ॥ २४ ॥ गर्भवासकरः शश्वत्तत्त्वज्ञाननिकृन्तकः ॥ संशयानां समारम्भो यस्त्याज्यो वृषलैरपि ॥ २५ ॥ गेहोऽयं कारणानां च सर्वमायाकरण्डकम् ॥ साहसानां समूहश्च दोषाणां च विशेषतः ॥ २६ ॥ निवर्त्तस्व महाभागे पश्यान्यं कामुकं पतिम् ॥ कामुकेनैव कामुक्याः संगमो गुणवान्भवेत् ॥ २७ ॥ इत्येवं वचनं श्रुत्वा कोपात्सा तं शशाप ह ॥ दारास्ते भविताऽसाध्वी गणेश्वर न संशयः ॥ २८ ॥ इत्याकर्ण्य सुरश्रेष्ठस्तां शशाप शिवात्मजः ॥ देवि त्वमसुरग्रस्ता भविष्यसि न संशयः ॥ २९ ॥ तत्पश्चान्महतां शापाद्वृक्षस्त्वं भवितेति च ॥ महातपस्वीत्युक्त्वा तां विरराम च नारद ॥ ३० ॥ शापं श्रुत्वा तु तुलसी सा रुरोद पुनः पुनः ॥ तुष्टाव च सुरश्रेष्ठं स प्रसन्न उवाच ताम् ॥ ३१ ॥ गणेश्वर उवाच ॥ पुष्पाणां सारभूता त्वं भविष्यसि मनोरमे ॥ कलांशेन महाभागे स्वयं नारायणप्रिया ॥ ३२ ॥ प्रिया त्वं सर्वदेवानां श्रीकृष्णस्य विशेषतः ॥ [1]पूजा विमुक्तिदा नृणां मया भोग्या न नित्यशः ॥ ३३ ॥ इत्युक्त्वा तां सुरश्रेष्ठो जगाम तपसे पुनः ॥ हरेराराधनव्यग्रो बदरीसन्निधिं ययौ ॥ ३४ ॥ जगाम तुलसी देवी हृदयेन विदूयता ॥ निराहारा तपश्चक्रे पुष्करे लक्षवर्षकम् ॥ ३५ ॥ पश्चान्मुनीन्द्रशापेन गणेशस्य च नारद ॥ सा प्रिया शंखचूडस्य बभूव सुचिरं मुने ॥ ३६ ॥ ततः शङ्करशूलेन स ममारासुरेश्वरः ॥ सा कलांशेन वृक्षत्वं ययौ नारायणप्रिया ॥ ३७ ॥ कथितश्चेतिहासस्ते श्रुतो धर्ममुखात्पुरा ॥ मोक्षप्रदश्च सारश्च पुराणेन प्रकीर्तितः ॥ ३८ ॥ ततः परशुरामोऽसौ जगाम तपसे वनम् ॥ प्रणम्य शङ्करं दुर्गां संपूज्य च गणेश्वरम् ॥ ३९ ॥ पूजितो वन्दितः सर्वैः सुरेन्द्रमुनिपुङ्गवैः ॥ पार्वतीशिवसान्निध्ये सुखं तस्थौ गणेश्वरः ॥ ४० ॥ इदं गणपतेः खण्डं यः शृणोति समाहितः ॥ स राजसूययज्ञस्य फलमाप्नोति निश्चितम् ॥ ४१ ॥ अपुत्रो लभते पुत्रं श्रीगणेश

---

१ पूतेति पाठः ।

प्रसादतः ॥ धीरं वीरं च धनिनं गुणिनं चिरजीविनम् ॥ ४२ ॥ यशस्विनं पुत्रिणं च विद्वांसं सुकवीश्वरम् ॥ जितेन्द्रियाणां प्रवरं दातारं सर्वसम्पदाम् ॥ ४३ ॥ सुशीलं च सदाचारं प्रशंस्यं वैष्णवं लभेत् ॥ अहिंसकं दयालुं च तत्त्वज्ञानविशारदम् ॥ ४४ ॥ भक्त्या गणेशं संपूज्य वस्त्रालङ्कारचन्दनैः ॥ श्रुत्वा गणपतेः खण्डं महावन्ध्या प्रसूयते ॥ ४५ ॥ मृतवत्सा काकवन्ध्या ब्रह्मन्पुत्रं लभेद्ध्रुवम् ॥ अदूष्यदूषणपरा शुद्धा चैव लभेत्सुतम् ॥ ४६ ॥ संपूर्णं ब्रह्मवैवर्तं श्रुत्वा यल्लभते फलम् ॥ तत्फलं लभते मर्त्यः श्रुत्वेदं खण्डमुत्तमम् ॥४७॥ वाञ्छां कृत्वा तु मनसि शृणोति परमास्थितः ॥ तस्मै ददाति सर्वेष्टं सुरश्रेष्ठो गणेश्वरः ॥४८॥ श्रुत्वा गणपतेः खण्डं विघ्ननाशाय यत्नतः ॥ स्वर्णयज्ञोपवीतं च श्वेतच्छत्रं च माल्यकम् ॥ ४९ ॥ प्रदीयते वाचकाय स्वस्तिकं तिललड्डुकान् ॥ परिपक्कफलान्येव देशकालोद्भवानि च ॥५०॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे परशुरामागमनैतत्खण्डश्रवणफलवर्णनं नाम षट्चत्वारिंशत्तमोऽध्यायः ॥ ४६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

❀ इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीयं गणपतिखण्डं समाप्तम् ❀ ॥

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजेन क्षेमराजेन श्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर"-स्टीम्-मुद्रणयन्त्रालयेऽङ्कयित्वा प्रकाशितम्।
संवत् १९८८, शकाब्दाः १८५३.

विक्रय्यपुस्तकानि–पुराणग्रन्थाः।

नाम.	की. रु. आ.
शिवमहापुराण–मूल बडा २४००० ग्रंथ–इसमें विश्वेश्वर संहिता २०००, रुद्रसंहिता १०५३०, शतरुद्र संहिता २१५०, कोटिरुद्र संहिता २२४०, उमा संहिता १८४०, कैलाश संहिता १२४० और वायवीय संहिता ४००० है। बहुत परिश्रमसे यह अलभ्य ग्रंथ मिलाहै और बहुत विद्वानोंकी संमति से शुद्ध किया गया है।	१०–०
शिवमहापुराण–उपरोक्त सर्वालंकारोंसे भूषित और विद्यावारिधि पं० ज्वालाप्रसादजीमिश्रकृत सरल भाषाटीका सहित।	२५–०
शिवपुराण–भाषा वार्त्तिक–विद्यावारिधि पं० ज्वालाप्रसादजीमिश्र कृत जिल्द सहित। शिवभक्तोंको अवश्य लेना चाहिये। यह ग्रंथ पहलेसे बहुत बडा होगया है।	१२–०
मार्कण्डेयपुराण–मूल तथा दुर्गासप्तशतीके १३ अध्याय संस्कृत टीका सहित। इसमें मार्कण्डेय और जैमिनिका सतसंग और संवाद, अप्सराओं पर दुर्वासामुनिका शाप कंक के मारे जाने पर विद्युत रूप राक्षसका मारा जाना, पक्षियोंके जन्म और चरित्र और देवीजीका माहात्म्य इत्यादि अनेक विषय हैं।	४–०

जाहि ॥२४६॥

नाम.	की रु. आ.
मार्कण्डेयपुराण–उपरोक्त सर्वालंकारोंसे युक्त अनेक ग्रंथोंके टीकाकार व रचयिता पं० कन्हैयालालजीमिश्रकृत भाषाटीकासहित ।	७–०
मार्कण्डेयपुराण–भाषा वार्त्तिक । श्लोकांक तथा अध्यायके आदि अन्तके मूल श्लोक सहित जिल्द समेत पं० कन्हैयालालजी मिश्र कृत ।	५–०
आदिपुराण–उपरोक्त सर्वालंकारोंसे युक्त हिन्दीके सुलेखक पं० श्यामसुन्दरलालजी त्रिपाठीकृत अत्यन्त सरल भाषानुवाद सहित ।	२–८
आदिपुराण–केवल भाषा (वार्त्तिक) ...	१–१२

नाम.	की. रु. आ.
कल्किपुराण–अनेक ग्रंथोंके अनुवादक तथा लेखक पं० बलदेवप्रसादजी मिश्रकृत भाषाटीकासहित । इसमें कल्किमहाराज कलियुगान्तमें अवतार ले दुष्टोंका संहार करेंगे यह पूर्णतया वर्णित है । ...	२–८
कल्किपुराण–केवल भाषा (वार्त्तिक) ...	०–१२
आदिपुराण–मूल इसमें पुराणोंका सार व्यासजीने २९ अध्यायोंमें वर्णन किया है । कलियुगके दोषोंका ऐसा रूप दर्शायाहै कि पढते पढते मन मुग्ध हो जाताहै । श्रीकृष्ण भगवानके जन्मसे लेकर उनकी अनेक लीला और रामावतारकी चर्चा तथा वैष्णवोंकी अनेक चित्ताकर्षक परमोपयोगी कथा हैं	१–०

रात. ॥२४६॥

पुस्तक मिलनेका ठिकाना–

खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम्–प्रेस, बम्बई.

गंगाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर"–प्रेस, कल्याण–बम्बई.

॥ अथ ब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंडप्रारंभः ॥


अंबिका
गोपा
रासक्रीडा
धनुर्भंगः
कुवलयापीड
अरिष्टासुरः
कृ.
मु.
चा.
कृ.
कं.
कृ.
केशी
गोप्यः
अक्रूरः
गोप्यः
गोप्यः
उद्धवः
पांडवाः
अक्रूरः

॥ अथ ब्रह्मवैवर्तीयकृष्णजन्मखण्डानुक्रमणिकाप्रारंभः ॥

अथ ब्रह्मवैवर्तमहापुराणान्तर्गतश्रीकृष्णजन्मखंडविषयानुक्रमणिका ।

पत्रम्	अध्यायः	विषयाः	श्लोकाः
१	१	नारदस्य नारायणं प्रति श्रीकृष्णजन्मखंडकथाविषयकप्रश्नः, श्रीनारायणकृता विष्णुवैष्णवयोर्गुणप्रशंसा च	६५
२	२	यतो हरेर्गोपवेषेण गोकुलागमनं तथा येन राधा गोपालिका जाता तत्कारणकथनं, नारदस्य श्रीदाम्नो राधायाश्च कलहविषयप्रश्नः, रत्नमंडपे विरजासक्तं श्रीहरिं सखीमुखाच्छ्रुत्वा कुपिताया राधिकाया रत्नमंडपगमनं, राधाशब्दश्रवणतो हरेरदर्शनं दृष्ट्वा भीत्या विरजया कृतं प्राणत्यागपूर्वक नदीरूपधारणं च	६८
४	३	सप्तसमुद्रोत्पत्तिः, कोपमंदिरद्वारि श्रीदाम्ना सहागतं हरिंप्रति पुनः पुना राधोक्तिः, हरिं निर्गमयितुमाज्ञप्तानां सखीनां तं प्रति वचनानि राधां प्रति श्रीहरिमहत्त्ववर्णनात्मकं श्रीदाम्नो वचनं, राधाश्रीदाम्नोः परस्परं शापः,शापदुःखाकुलौ राधाश्रीदामानौ प्रति समाधानकारकं श्रीहरिवचनं च	११७
७	४	सुरैः सह शरणागतां धरां प्रति ब्रह्मणो वचनम्, ब्रह्मप्रश्नतस्तस्मै केषां भारो मेऽसह्यस्तद्धरया कथनम्, धरया सुरसंघैश्च सह शिवलोकं गतेन ब्रह्मणा शिवाय धरावृत्तकथनम्, ससुरधराणां ब्रह्मेशधर्माणां वैकुंठे गमनम्, ब्रह्मेशधर्मकृतं श्रीहरिस्तोत्रम्, श्रीहर्याज्ञया सर्वदेवानां गोलोकगमनं गोलोकवर्णनं च	१८०
१२	५	राधामंदिरषोडशद्वाराणां वर्णनम्, षोडशद्वारातिक्रमोत्तरं राधाभ्यंतरगृहे देवानां गमनं, राधामंदिरवर्णनम्, देवै राधामंदिरे श्रीकृष्णतेजःस्वरूपस्य दर्शनं, ब्रह्मेशधर्मकृतः श्रीकृष्णस्तवराजः, तत्पठनफलकथनं च	१२६
१५	६	पूर्वदृष्टतेजःस्वरूपमध्ये देवैरालोकितायाः कृष्णमूर्तेर्वर्णनम्, सुरकृतस्तवतुष्टेन श्रीकृष्णेन देवेभ्योऽभयदानम्, पृथिव्यामवतरणार्थं राधादिगोलोकस्थजनान् प्रति कृष्णस्याज्ञावचनम्, गोलोकसमागतानां नारायणविष्णुसंकर्षणानां श्रीकृष्णदेहे लीनता पृथिव्यां स्वस्वांशेनावतरणार्थं सकलदेवताभ्यः श्रीकृष्णस्याज्ञा, केन कुत्र किंनाम्नावतरणं कर्तव्यमिति ब्रह्मप्रश्नतः कृष्णेन तत्कथनम्, भाविविरहकातरया	

पत्रम्	अध्यायः	विषयाः	श्लोकाः
		रुदतीं राधांप्रति श्रीकृष्णस्य बोधवचनम्,कृष्णाज्ञया सकलदेवतानां स्वस्वस्थाने गमनम्,कृष्णाज्ञया गोलोकाद्गोपगोपीगणैः सह राधाया गोकुले गमनम्, श्रीहरेर्मथुरागमनं च	२७८
२२	७	श्रीकृष्णजन्माख्यानम्	१३२
२५	८	श्रीकृष्णजन्माष्टमीव्रतोपवासविधानकथनम्	८६
२७	९	नारदप्रश्नतो नारायणेन नन्दयशोदारोहिणीनां जन्मांतरवृत्तकथनम् बलदेवजन्माख्यानम्, नन्दपुत्रोत्सवकथनं च	८०
२९	१०	कंसप्रेरणया कृष्णं हंतुं नन्दगृहमागतायाः पूतनायाः कृष्णकृतस्तनपानेन मोक्षः पूतनाया जन्मान्तरकथनं च	४६
३१	११	तृष्णावर्तदैत्यवधः तज्जन्मांतरवृत्तकथनं च	३५
,,	१२	शकटासुरभंजनम्, योगनिद्रोक्तकवचन्यासश्च	४२
३३	१३	वसुदेवकृतप्रार्थनया श्रीकृष्णस्य नामकरणादिसंस्कारकरणार्थं गर्गस्य नंदगृहे गमनम् गर्गेण स्वागमनप्रयोजनस्यश्रीकृष्णनामार्थस्य तथा पुरा शिवमुखाच्छ्रुतस्य गोलोकवृत्तस्य च नंदयशोदाभ्यां कथनम् ,गर्गाज्ञया नंदेन कृष्णस्य नामकरणादिसंस्करणम्, गर्गकृतश्रीकृष्णस्तोत्रम्, गर्गस्य स्वगृहगमनम्	२४७
३९	१४	यमलार्जुनभंजनं, नलकूबरमोक्षः, वृक्षाख्यानं च	५४
४०	१५	भांडीरवने राधाकृष्णयोर्विवाहः, नवसंगमप्रस्तावश्च	१७८
४४	१६	बकासुरवधः, प्रलंबासुरवधः केशिदैत्यवधः, एतेषां जन्मान्तरवृत्तांतः, पार्वत्या कृतस्य त्रैमासिकनामव्रतस्याविधिः, नन्दाज्ञया सर्वव्रजजनानां वृंदावने गमनं च	१७८

पत्रम्	अध्यायः	विषयाः	श्लोकाः
४९	१७	वृन्दावनवर्णनं तन्मध्येप्रसंगात्कलावत्या इतिहासः, वृन्दावननाम्नो व्युत्पत्त्यादि, राधायाः षोडशनामात्मकं स्तोत्रम्, तन्नाम्नां व्युत्पत्तिश्च	२६३
५५	१८	विप्रपत्नीमोक्षप्रस्तावः तन्मध्येविप्रपत्नीकृतं श्रीकृष्णस्तोत्रम्	१३१
५८	१९	कालियदर्पणदमनं, दावाग्निभक्षणं च	१८७
६३	२०	ब्रह्मणा गोवत्सबालहरणप्रसंगतः कृतं श्रीकृष्णस्तोत्रम्	५९
६४	२१	इंद्रयागभंजनम्, गोवर्धनोद्धरणं च	२३३
७०	२२	धेनुकासुरवधः	१०२
७२	२३	तिलोत्तमाबलिपुत्रयोर्ब्रह्मशापप्रस्तावः धेनुकासुरस्य पूर्वजन्मवृत्तांतश्च	१५०
७६	२४	प्रसंगतोदुर्वासस आख्यानं, बलिपुत्रमोक्षश्च	९०
७८	२५	दुर्वाससं प्रत्यौर्वऋषेः शापस्तत्प्रसंगेनांबरीषाख्यानकथनं च	१५८
८२	२६	अंबरीषाख्यानप्रसंगतः एकादशीव्रतनिरूपणं च	९३
८४	२७	गोपीवस्त्रापहरणाख्यानं, तन्मध्ये गोपीकृतं सर्वमंगलस्तोत्रम्, गौरीव्रतविधानादिकथनं, राधाकृतं पार्वतीस्तोत्रम्, श्रीकृष्णेन गोपिकाभ्योऽभीष्टवरदानं च	२४३
९०	२८	रासक्रीडाख्यानम्	१७०
९४	२९	अष्टावक्रमुनिमोक्षणाख्यानम्	५३
९६	३०	राधाप्रश्नतोऽष्टावक्रस्येतिहासकथनम्	११२
९८	३१	राधाप्रश्नतः कृष्णेन ब्रह्मणः शापकारणकथनम्, तत्र प्रसंगात् सुचंद्रराजवृत्तकथनम्, मोहिन्या विरहातुरावस्थामोहिनी-	

पत्रम्	अध्यायः	विषयाः	श्लोकाः
		व्रतं कामदेवस्तोत्रं च	७९
१००	३२	ब्रह्ममोहिनीसंवादः	८३
१०२	३३	मोहिन्या ब्रह्मणे शापदानम्, ब्रह्मदर्पहरणं च	७६
१०४	३४	जाह्नवीजन्माख्यानम्	४५
१०५	३५	राधाकृष्णसंवादरूपेण ब्रह्मभारत्योरुपाख्यानम्	१०२
१०८	३६	शंकरदर्पविमोचनकथनम्, शंकरप्रशंसा च	११७
११०	३७	हरनिर्माल्यशापप्रसंगः	५५
११२	३८	सतीगर्वापहरणम्, पार्वत्याः हिमालयाज्जन्म, पार्वत्याः स्वसौंदर्याभिमानः, शिवदर्शनार्थं हिमाचलस्य अक्षयवटांतिके गमनम् हिमालयकृतं शिवस्तोत्रञ्च	७९
११४	३९	शिवसौंदर्यवर्णनम्, शिवसंनिधौ पार्वत्या गमनं, शिवकोपाग्निना कामदाहः, पार्वतीगर्वापहारश्च	६५
११५	४०	पार्वत्यास्तपस्याप्रकारः, शंकरस्य नर्तकवेषेण हिमाचलगृहगमनश्च	१५३
११९	४१	देवप्रार्थनात्मनिंदाकरणार्थं शिवस्य हिमाचलप्रतिगमनम्, तत्कृतशिवनिंदाश्रवणेन हिमगिरौ शिवाय कन्यां दातुं कलुषितचित्तजाते तस्मा अरुंधतिवसिष्ठप्रभृतिभिः कृतः शिवस्तुतिपूर्वक उपदेशः, तत्प्रसंगादनरण्यराज्ञो वृत्तकथनं च	१४५
१२२	४२	अनरण्यकन्यायाः पद्मायाः पातिव्रतादिवृत्तकथनोत्तरं पार्वत्याः पूर्वजन्मांतरीयसतीदेहत्यागस्य कथनम्	९५
१२४	४३	सत्यर्थं शिवस्य शोकः नारायणोपदेशतः शिवेन कृतं प्रकृत्याः स्तोत्रम्, शिवशोकापनोदनं च	१०८
१२७	४४	अरुंधतीवसिष्ठादृषिकृतबोधतः प्रसन्नचित्तेन हिमाचलेन शिवाय स्तोत्रपूर्वकं यथाविधि पार्वतीप्रदानम्	७१
१२९	४५	भवानीशंकरविवाहोत्सवः, भस्मतां नीतस्य कामस्य संजीवनं	८५
१३१	४६	रतिमन्मथयोर्विलासवर्णनम्, उमाशंकरयोर्विलासवर्णनम् सुरनारायणं संवादप्रसंगतः स्त्रीपुंसोरतिभंगदोषस्य कथनञ्च	६९
१३२	४७	इन्द्रगर्वापहरणकथनम्	१६०
१३६	४८	सूर्यदर्पापहरणकथनम्	१८
१३७	४९	अग्निदर्पापहरणकथनम्	१७
१३७	५०	दुर्वाससो गर्वापहारकथनम्	२३
१३८	५१	धन्वंतरिगर्वापहारकथनप्रसंगतो मनसाया विजयः	७२
१४०	५२	राधामाधवरासवर्णनप्रसङ्गतो राधाकृष्णादिनाम्नि कृष्णनाम्नः पूर्वं राधानाम्न उच्चारणे निमित्तकथनम्	४१
१४१	५३	गोपीभिः सह राधाकृष्णयोर्भांडीरादिवनेषु गमनम् तत्रतत्र कृतानां विहाराणां वर्णनं च	५४
१४२	५४	श्रीकृष्णस्य मथुरागमनादारभ्य गोलोकगमनांतचरितानां संक्षेपतः कथनम्	३०

अथोत्तरार्द्धम् ।

पत्रम्	अध्यायः	विषयाः	श्लोकाः
१४५	५५	श्रीकृष्णप्रभाववर्णनम् … … … … … …	३०
१४५	५६	भवद्गुणवर्णनात्मकं विष्णुब्रह्मशेषेशधर्मयमसांबचंद्रसूर्यगरुडचन्द्रगुरुदुर्वासोजयविजयसुरासुरनारदकामलक्ष्मणकार्तवीर्यपार्थबाणभृगुपरशुरामसुमेरुसमुद्रवरुणसरस्वतीदुर्गामहालक्ष्मीक्रमेण संक्षेपतो गर्वापहरणकथनम् देवकृतंलक्ष्मीस्तोत्रं च … … … … … …	९०
१४७	५७	महालक्ष्म्या ब्रह्मणे स्वापमानकथनम्, पतिव्रतावर्णनम्, ब्रह्मप्रार्थनया भगवताकृतं महालक्ष्म्याःसमाधानम्, जयदौवारिकायाभयदानं च … … … … … … …	३८
१४८	५८	धरासावित्रीगंगामनसाराधानां क्रमेण संक्षेपतो दर्पापहरणवृत्तकथनम् … … … … … … …	१५
१४९	५९	इंद्रगर्वापहारकथनप्रसंगतोगुरुकोपादिंद्रस्य राज्यभ्रष्टतादिवृत्तम्,इंद्रपदाधिरूढस्य नहुषस्य शचीं प्रति तदंगसंगेच्छया संभाषणम्, शच्या नहुषाय सद्बोधरूपं चातुर्वर्ण्यादिधर्मकथनम्, नहुषनिर्बंधभीत्या गुरुं शरणागतया शच्याकृतं गुरुस्तोत्रं च	१७६
१५३	६०	गुरुणा शच्यै अभयदानम्, गुरूपदिष्टशचीसंदेशतःसप्तर्षिवाह्ययानेनशचीगृहं गच्छतो नहुषस्य मार्गे दुर्वासःशापात्सर्पयोनौ गमनम्, इंद्रस्य पुनः स्वपदारोहणम्, सोमयोगविधानफलकथनं च … … … …	५९
१५४	६१	पुनश्चबालिद्वारा शक्रदर्पभंजनंतथाहल्योपहासादिकथनपूर्वकशक्रदर्पहरणवृत्तं च … … … … … …	५७
१५६	६२	अहल्योद्धारकथाप्रसंगतो रामावतारचरितकथनम् … …	९९
१५८	६३	कंसेन रात्रौ दृष्टानां दुःस्वप्नानां सभासदेभ्यः कथनम् …	३०
१५९	६४	पुरोहितवचनात्कंसस्यधनुर्यागकरणार्थं प्रवृत्तिः श्रीकृष्णनयनार्थमक्रूरस्य नियोजनम्, कंसेन धनुर्यागमहोत्सवार्थमाहूतानां मुनिनृपजनानां मथुरायामागमनं … … …	५८
१६०	६५	कृष्णाह्वानार्थं प्रेरितस्याक्रूरस्य हर्षोत्कर्षः … … …	३८
१६१	६६	रासे दुःस्वप्नदर्शनभीतयाराधया दृष्टदुःस्वप्नस्य कृष्णायकथनम् कृष्णेन कृतं राधायाः समाधानं च … … …	२५
१६२	६७	श्रीकृष्णसंगात्तृप्तमनस्कया राधया कृतं कृष्णस्तवनं, श्रीकृष्णेन राधायै आध्यात्मिकोपदेशश्च … … … …	८२
१६४	६८	गृहगमनार्थमुद्यतं कृष्णंप्रति तद्विरहशोकातुराया राधाया वचनम् कृष्णेन तच्छोकापनोदनं च … … … …	३१
१६५	६९	राधाकृष्णयोः क्रीडावर्णनम्, राधाविरहकातरतया तां वक्षसि कृत्वा सुप्तं कृष्णं प्रबोधयितुं ब्रम्हादिदेवानामागमनम्, ब्रह्मदेवकृता स्तुतिपूर्विका व्रजगमनार्थप्रार्थना, राधाया विरहावस्था, पुनश्च श्रीकृष्णक्रीडा, रत्नमालाकृष्णयोः संभाषणम्, श्रीकृष्णस्य गृहंप्रति गमनं च … … … …	९०

पत्रम्	अध्यायः	विषयाः	श्लोकाः
१६७	७०	अक्रूरदृष्टस्वप्नस्य वर्णनम्, अक्रूरस्य व्रजगमनम्, नंदकृतमक्रूरातिथ्यम्, अक्ररदृष्टायाः श्रीकृष्णमूर्तेर्वर्णनम्, अक्ररकृतं श्रीकृष्णस्तोत्रम् सहक्ररयो रामकृष्णयोर्मथुरागमनोद्योगं दृष्ट्वा कुपितराधोप्रषितगोपीभिः कृता अक्रूरस्यरथभंगांगभंगादिदुर्व्यवस्था, पुनःसर्वजनसमाधनपूर्वकंतद्दिने श्रीकृष्णस्य ब्रजावस्थानं च	९०
१६९	७१	श्रीकृष्णस्य मथुरायात्रामंगलवर्णनम्	२३
१६९	७२	मथुरापुरीवर्णनम्, कृष्णस्यःमथुराप्रवेशः, कृष्णकृपयाकुब्जायाः सुरूपता, कृष्णस्य कुब्जागृहे गमनादि, कृष्णेन मालाकाराय वरदानम्, रजकमोक्षः, कुब्जाकृष्णयोर्विलासः, कंसदृष्टदुष्टस्वप्नस्य कथनम्, कृष्णकृतो धनुर्भंगगजमल्लसारणपूर्वकः कंसवधः, उग्रसेनायराजपददानम्, कंसमात्रादीनां शोकः सर्वजनकृता कृष्णस्तुतिः, रामकृष्णयोर्वसुदेवांतिकगमनं च	११५
१७२	७३	पुत्रविच्छेदकातरं नंदंप्रति कृष्णेन कृत आध्यात्मिकबोधः नंदस्य व्रजगमनम्, नंदकथितकृष्णसंदेशेन यशोदाराधयोः शोकार्निवृत्तिः, यशोदाप्रेरणया नंदस्यकृष्णप्रति पुनरागमनम्	१०३
१७५	७४	श्रीकृष्णनंदयोः संवादःतत्र कृष्णोक्तज्ञानश्रवणोत्तरं नंदस्य सांसारिकज्ञानकथनम्	२६
१७५	७५	भगवता नंदाय सांसारिकज्ञानकथनम्	१०५
१७८	७६	दर्शनार्हवस्तुनिरूपणम्, कस्मिन्दिने कस्य दर्शने कृते मुक्तिर्भवति तत्कथनम्, कस्य दानस्य किंफलं तन्निरूपणं च	८२
१८०	७७	सुस्वप्नकथनम्	७६
१८२	७८	भगवता नंदायाध्यात्मिकज्ञानकथनम्, सर्वसिद्धिदमन्त्रनिरूपणम्, येषां दर्शनं पापजनकं तेषां कथनंच	६२
१८३	७९	भगवता नन्दप्रश्नतो राहुग्रस्तसूर्यदर्शननिषेधहेतुकथनम्	६२
१८५	८०	भगवता नन्दाय भाद्रशुक्लचतुर्थीचन्द्रदर्शनानिषेधस्य हेतुं वक्तुं चंद्रकृततारापहरणस्य वृत्तांतकथनम्	३८
१८५	८१	ताराहरणप्रसंगेनैव देवासुरयोर्युद्धोद्योगात्तारामोचनांतं वृत्तकथनम्	६७
१८७	८२	दुःस्वप्नकथनम्, तच्छांतिनिरूपणंच	५७
१८८	८३	नन्दप्रश्नतो विप्रवैष्णवक्षात्रियविट्शूद्रसंन्यासिविधवाधर्माणां कथनम्, पतिव्रताधर्मकथनं च	१४८
१९२	८४	गृहस्थगृहिणीशिष्यपुत्रकन्याधर्माणां कथनम्, स्त्रीणां त्रिविधत्वकथनम्, भक्तत्रैविध्यकथनम्, ब्रह्मांडरचनाख्यानंच	१३६
१९५	८५	चतुर्वर्णानांभक्ष्याभक्ष्यकथनम्, कर्मविपाकनिरूपणं च	२१२
२००	८६	केदारराजकन्योपाख्यानम् (वृंदोपाख्यानम्)	१५१
२०४	८७	भगवन्नंदसंवाद सति तत्र सनत्कुमारादीनामागमनम्, कृष्णसनत्कुमारसंवादश्रवणतो विस्मितांतरस्य नन्दस्य मोहावस्था च	८२

पत्रम्	अध्यायः	विषयाः	श्लोकाः
२०७	८८	श्रीकृष्णेन नन्दाय दुर्गास्तोत्रराजस्य दानम्	७५
२०८	८९	श्रीकृष्णकृता नन्दप्रार्थना तथा व्रजजनैः सह गोलोकं गमिष्यसीति नन्दाय वरप्रदानम्	१९
२०८	९०	चतुर्युगानां क्रमतो धर्मकथनम्, कलेर्गुणदोषकथनम्, कृष्णेन व्रजगमनार्थं प्रार्थितस्य नन्दस्य पुनः कृष्णंप्रतिवचनञ्च ...	८१
२१०	९१	देवकीवसुदेवयोर्नंदंप्रतिसम्भाषणम्, अध्यात्मज्ञानकथनेन व्रजजनान् बोधयितुं व्रजगमने उद्धवं प्रति कृष्णस्याज्ञा ...	१४
२१०	९२	श्रीकृष्णाज्ञयोद्धवस्य व्रजगमनम्, ऊद्धवोक्तरामकृष्णशुभवृत्तश्रवणादानंदिताभ्यां यशोदारोहिणीभ्यां कृतो महोत्सवः, सर्वजनान्समाश्वास्य तैः सहोद्धवस्य राधामंन्दिरगमनम्, उद्धवकृतं राधास्तोत्रं च	९३
२१३	९३	राधोद्धवसंवादः—तत्र उद्धवं प्रति राधाया कृष्णकुशलप्रश्नः, उद्धवोक्तकृष्णकुशलश्रवणाद्राधाया विरहमूर्च्छावस्था पुनः पुनः उद्धवस्य राधां प्रति समाधानकारकं वचनम्, तद्वचनतुष्टया राधयोद्धवाय नानालङ्कारदानम् स्वविरहावस्थाकथनं च; विरहदुःखेन राधाया अचेतनपतनं च ...	१००
२१५	९४	मृतामिव मूर्च्छितां राधां प्रति उद्धवस्य माधव्यादिराधासखीनां च भाषणानि, उद्धवं प्रति कृष्णतत्स्वरूपवर्णनात्मकं माधव्या वचनम्, उद्धवकृता गोपीनां प्रशंसा, कलावत्योद्धवाय पूर्वजन्मवृत्तान्तस्य कथनम्, उद्धवकृतराधाप्रार्थना च ...	११८
२१८	९५	उद्धवं प्रति राधायाः स्वदुःखनिवेदनात्मकंवचनम् मथुरागमनोन्मुखमुद्धवं प्रति माधव्युक्तिः राधिकांप्रति उद्धवस्य भवाब्धितरणोपाययाञ्जसा, राधयोद्धवाय भवतरणोपायकथनपूर्वकं कालगतिनिवेदनम्	१०६
२२१	९७	मथुरागमनोत्कायोद्धवाय राधाकृतो ज्ञानोपदेशः, उद्धवकृतं राधाभक्तवर्णनम्, उद्धवनिर्गमनोत्तरं राधायाः शोकावस्था च	६५
२२३	९८	उद्धवस्य मथुरायां गमनम्, श्रीकृष्णस्योद्धवं प्रति व्रजजनकुशलादिप्रश्नाः, श्रीकृष्णं प्रति राधाप्रेमवर्णनात्मकमुद्धवस्य वचनम्, श्रीकृष्णो यशोदाराधादिव्रजजनानां स्वप्ने गत्वा तान्समाश्वासनज्ञानदानादियथोचितकर्मभिः संतोष्य पुनर्मथुरां ययाविति सविस्तरं कथनं च	४४
२२४	९९	रामकृष्णोपनयनोत्सवःतत्रादौ वसुदेवगृहे गर्गागमनम् गर्गवचनान्मङ्गलपत्रिकाप्रेषणेनामन्त्रितानां बांधवादीनां राज्ञां तथा कृष्णस्मृतानां देवमुनिसिद्धर्ष्यादीनां च सदाराणामागमनम् वसुदेवकृतं यथोचितंसर्वातिथ्यम् शुभकर्मारंभे गणेशपूजनं च	५८
२२५	१००	देवक्यादिस्त्रीभिः कृतं गौर्यादीनां पूजनम् ब्रह्मादिदेवगणैः कृतं भगवत्स्तोत्रं च	३४
२२६	१०१	रामकृष्णयोरुपनयनसंस्कारविधानानंन्तरं सर्वेषां स्वस्वगृहगमनम्	४२

पत्रम्	अध्यायः	विषयाः	श्लोकाः
२२७	१०२	रामकृष्णयोर्विद्याभ्यासार्थं सांदीपनिगुरुगृहगमनम्,तत्रगुरुणा तत्पत्न्या च कृता कृष्णस्तुतिः, ततोऽधीतसकलविद्याभ्यां रामकृष्णाभ्यां कृतं गुरुदक्षिणादानं, सदारस्य सांदीपनेर्गोलोकगमनं च	३३
२२८	१०३	गुरुगृहान्मथुरागमनोत्तरं गोपवेषत्यागपूर्वकं गृहीतनृपवेषस्य कृष्णस्य सान्निधौ स्मृतिमात्रतः सुदर्शन–गरुड–विश्वकर्म, समुद्राणामागमनम्, समुद्रं प्रति द्वारकानगरार्थस्थलयाचना, द्वारकांनिर्मातुं विश्वकर्माणं प्रत्याज्ञा, द्वारकापुरं कीदृग्गुणविशिष्टं कर्तव्यं तद्विश्वकर्मणे कथनम्, विश्वकर्मप्रश्नतः कृष्णेन गृहादिनिर्माणशास्त्रनिरूपणं च	८१
२३०	१०४	द्वारकादर्शनार्थं ब्रह्मादिदेवानामागमनम्, द्वारकावर्णनम्, श्रीकृष्णेच्छाबलेनोग्रसेनादियादवानां तथा देवमुनिसिद्धार्षिनृपनराणां द्वाराकानिकटवटमूलेऽकस्मात्प्राप्तिः, द्वारकाप्रवेशार्थं कृष्णोग्रसेनयोः सम्भाषणम्, कृष्णाज्ञया द्वारकाप्रवेशोत्तरमुग्रसेनाभिषेकोत्सवश्च	९९
२३२	१०५	रुक्मिण्युद्वाहाख्यानम्–तत्र रुक्मिणीसौंदर्यप्रशंसा, भीष्मकस्य सुतमंत्रिपुरोहितादिजनान् प्रति रुक्मिण्यर्थं वरवरणप्रश्नः रुक्मिणीश्रीकृष्णाय देयेति तन्महत्त्ववर्णनपूर्वकं शतानंदस्य वचनम्, तद्वचनतुष्टेन भीष्मकेण कृतो भूरत्नादिदानं ततः शतानंदस्य सन्मानः, तद्वचनरुष्टस्य रुक्मिणः पितरं प्रति शिशुपालाय कन्या देयेति विप्रकृष्णभर्त्सनपूर्वकं वचनम्, सर्वत्रामंत्रणपत्रिकाप्रेषणम्, कृष्णाह्वानार्थं भीष्मकेण विप्रद्वारागूढप्रेषितपत्रिकायादर्शनेनरामकृष्णोग्रसेनादीनां कुंडिनयात्रार्थं सज्जता च	८६
२३४	१०६	तत्समय एव रेवतीबलरामयोर्विवाहःततःसपरिवारस्य कृष्णस्य कुंडिनपुरांतिके गमनम्, तदागमनकुपितानां रुक्मिशाल्वशिशुपालानां कृष्णोपहासरूपं वचनं च	२७
२३५	१०७	तदुपहासवचनरुष्टेन बलभद्रेण रुक्मिशाल्वादिदुष्टानां मर्दनम्,शतानंदेन पुरप्रवेशितानां सकृष्णवरयात्रिकाणां भीष्मकेण कृतो वासोन्नदानादिना सत्कारः,वसुदेवभीष्मकयोर्दैवकप्रतिष्ठादिकृत्यम्,विवाहमंडपे श्रीकृष्णागमनम्, मंडपवर्णनम्, कृष्णोद्वाहदर्शनार्थमागतान् ब्राह्मणादीन् प्रति तत्स्तवनात्मकं भीष्मकवचनम्,भीष्मककृतं श्रीकृष्णस्तोत्रं च ...	१०१
२३७	१०८	श्रीकृष्णाय कन्यादानविधिना रुक्मिणीसमर्पणम्... ...	१४
१३८	१०९	कन्यादानोत्तरं रुक्मिणीमात्रादिभिः कृतो वधूवरयोःसुवेषकरणादिमङ्गलोत्सवः, श्रीकृष्णं प्रति पार्वतीसरस्वतीलोपामुद्रादिदेवर्षिस्त्रीणामुपहासवचनानि, सर्वेभ्यो भोजन-	

पत्रम्	अध्यायः	विषयाः	श्लोकाः
		दानम्, सदारे श्रीकृष्णे द्वारकागमनोद्युक्ते सति रुक्मिणींप्रति मातुर्वचनम्, भीष्मकृतयौतुकदानस्य कथनम्, द्वारकागमनोत्तरं वधूगृहप्रवेशादिमंगलोत्सवश्च	४९
२३९	११०	यशोदायाः श्रीकृष्णंप्रति ज्ञानयाच्ञोक्तिः, कृष्णाज्ञया यशोदानंदयो राधांतिके गमनम्, राधायाः तत्कालीनस्थितेर्वर्णनम्, यशोदानन्दाभ्यां राधायाः संवादश्च	३९
२४०	१११	राधया यशोदायै भक्तिज्ञानोपदेशः तथा वरदानपूर्वकं स्वनामव्युत्पत्तिकथनं च	६३
२४१	११२	प्रद्युम्नोत्पत्तिः, शंबरासुरवधः, मायावतीमोक्षणम्, सत्यभामादिसप्ताधिकशतोत्तरषोडशसहस्रस्त्रीणां पाणिग्रहणम् द्वारकां गतस्य दुर्वासस एकानशया विवाहः, दुर्वासःकृतं श्रीकृष्णस्तोत्रम्, श्रीकृष्णेन कृता दुर्वाससं प्रति बोधश्च ...	६०
२४३	११३	दुर्वाससः कैलासे गमनम्, दुर्वाससं प्रति पार्वत्या वचनम्, दुर्वाससः पुनर्द्वारकागमनम्, श्रीकृष्णस्य हास्तनापुरे गमनम्, धर्मयज्ञे शिशुपालदंतवक्रयोर्वधः, शिशुपालस्य जीवात्मनाकृतं श्रीकृष्णस्तोत्रम्, श्रीकृष्णस्य लोकातीतचारित्राणां संक्षेपतः कथनं च	६१
२४४	११४	ऊषाहरणाख्यानम्—तत्र—अनिरुद्धस्य स्वप्नदृष्टोषया संवादः अनिरुद्धस्योषाविरहजावस्थां दृष्ट्वा भीता देवकीरुक्मिण्यादियोषितः प्रति कृष्णवचनम्, ऊषायै कृष्णदर्शितस्वप्नस्य प्रकारः, ऊषांप्रति चित्रलेखाया वचनम्, गणेशशिवयोः संभाषणम, चित्रलेखयानिरुद्धस्योषांप्रतिनयनम् श्रीकृष्णस्य शोणितपुरप्रयाणम्, ऊषानिरुद्धयोरतिक्रीडा च	९४
२४७	१९५	ऊषासंरक्षकदूतानां बाणं प्रति वचनम्, ऊषाचेष्टितश्रवणतो बाणे कुपिते सति तंप्रति शिवगौरीस्कंदगणेशानां बोधवचनानि, बाणस्य प्रतिज्ञावचनम् बाणंप्रति कोटरीमातुर्बोधवचनम्, बाणस्ययुद्धोद्योगः, पार्वतीदूतवचनेनानिरुद्धसन्नद्धता, अनिरुद्धं प्रतिरामकृष्णनिंदात्मकं बाणस्य वचनम्, तन्निंदाखंडनरूपमनिरुद्धस्य वचनं च	११६
२५०	११६	रणांगणे बाणप्रश्नतोऽनिरुद्धेन द्रौपदीरत्योः पूर्वेतिहासस्यकथनम्, अनिरुद्धेन सुभद्रहननपूर्वको बाणकुंभांडकार्त्तिकेयादिवीराणां पराभवश्च	५४
२५१	११७	बाणयुद्धप्रसंगतो हरलंबोदरसंवादः	२०
२५१	११८	बाणस्कंदादिगणवेष्टिताय शिवाय मणिभद्रदत्तेन कृष्णागमनवार्तायाः कथनम्, बाणासुरसंरक्षणार्थं पार्वतीस्कंदगणेशादीन् प्रति शिवोक्तिः बाणेन सोषोऽनिरुद्धः श्रीकृष्णाय देय इतिबुद्ध्याकृष्णमहत्त्ववर्णनरूपं पार्वत्या वचनं च ...	४०

पत्रम्	अध्यायः	विषयाः	श्लोकाः
२५२	११९	गौर्युक्त्यनुमोदनात्मकं शिववचनम्, तत्समये तत्सभायां प्राप्तस्यबलेः शिवकृता स्तुतिः शिवंप्रति बलिवचनम्, बलिदैत्यकृतं शिवस्तोत्रं, स्तोत्रतुष्टेन भगवता बलयेऽभयदानम्, स्तोत्रपठनफलकथनं च	७५
२५४	१२०	कृष्णेन शिवं प्रतिदूतप्रेषणम्, शिवंप्रति कृष्णदूतस्य वचनम्, बाणं प्रति पार्वत्युक्तिः बाणकृष्णयोर्युद्धप्रकारः, शिवेन शरण प्रापिताय बाणाय कृष्णेनाजरामरत्ववरदानं, शिवाज्ञया बाणकृत ऊषानिरुद्धविवाहोत्सवश्च	७९
२५६	१२१	सुधर्मसभास्थितायकृष्णाय विप्रेणशृगालवासुदेवस्य संदेशकथनम्, शृगालनगरे कृष्णस्य गमनम्, शृगालकृष्णयोः संभाषणपूर्वकः समरः, शृगालमोक्षणं च	५२
२५७	१२२	नारदप्रश्नतो नारायणेन स्यमंतकोपाख्यानकथनम्	३२
२५८	१२३	नारदस्य नारायणं प्रतिगणेशपूजाव्याख्यानप्रश्नः, सिद्धाश्रमे सदाराणां देवासिद्धयोगिमुनिनरेंद्रगोपयादवादीनां गणेशपूजनार्थं सिद्धश्रमे आगमनम्, तत्रराधाकृतं यथाविधिगणेशपूजनंच	६०
२६०	१२४	पूजनतुष्टगणेशस्य राधांप्रति तत्स्तुतिपूर्वकं वचनम् , सिद्धाश्रमरक्षकशिवदूतेन ब्रह्माशिवकृष्णादीन्प्रति राधाकृतपूजनस्य कथनम्, सर्वजनैर्गणेशस्य पूजनम् पार्वत्या राधायै वरप्रदानम्, श्रीदामशापमुक्तराधायाः पार्वत्याज्ञयासखोभिः सुवेषकरणम्, सर्वजनप्रश्नतः कृष्णेन राधायाः पूर्ववृत्तस्य कथनम्, तदाऽखिलजनदृष्टाया राधारूपस्थितेर्वर्णनम्, ब्रह्मेशशेषादिकृतंराधास्तोत्रं च	१११
२६२	१२५	शिवब्रह्मासिद्धमुनींद्रान् प्रतिदेवकीवसुदेवयोः प्रश्नः वसुदेवं प्रति शिवोक्तिः, शिवाज्ञया वसुदेवकृतो राजसूययज्ञः, सनत्कुमाराज्ञया यज्ञपूर्त्यर्थं वसुदेवेन सर्वस्वदानं च	५४
२६४	१२६	सिद्धाश्रमाद्रुक्मिण्यादिस्त्रीभिः सह कृष्णस्यांशतो द्वारकायां गमनम्, ततः पूर्णस्य कृष्णस्य नन्दादिव्रजजनान्यथोचितं वचनम्, पित्रोरनुमतेन कृष्णस्य राधास्थानगमनम्, कृष्णदर्शनतुष्टया राधयाकृतः प्रणामपूर्वकःकृष्णस्तवः, रत्नसिंहासनोपविष्टस्य राधाकृष्णस्य सखीकृतसेवायाः प्रकारः, राधायाः कृष्णं प्रति कुशलप्रश्नादिवचनम्, श्रीकृष्णेन राधायै आध्यात्मिककथनं च	१०३
२६६	१२७	राधाकृष्णयोः शृङ्गारकथनम्, श्रीकृष्णेन राधया सह नानावनोपवनारामशैलद्रोणीसमुद्रनदनदीसरोद्वीपपुरग्रामादिषुविहारकरणम्, पुनःकृष्णस्य राधयासह गोकुलागमनम् व्रजजनकृष्णसंमेलनस्याद्भुतप्रकारः	४५

पत्रम्	अध्यायः	विषयाः	श्लोकाः
२६७	१२८	भांडीरवने व्रजजनसमक्षं नंदं बोधयता कृष्णेन कलिदोषाणां निरूपणम्, अकस्मात्प्राप्तेनाद्भुतरथेन राधादिसर्वगोपीनां गोलोके गमनं च … … …	५३
२६८	१२९	पुनः कृष्णेन गोकुलजनानां समाश्वासनम्, भांडीरवने ब्रह्मेशादिभिः कृता कृष्णस्य प्रार्थना, ब्रह्मशापेन यादवनिधनं, द्वारकालयादिवृत्तम्, पांडवमोक्षणम्, कलिप्राप्तिभीतया रुदतीर्जाह्नव्यादिपुण्यनदीः प्रति समाधानात्मकं कृष्णवचनम्, श्रीकृष्णस्य निजधामगमनम् … … …	१११
२७१	१३०	नारायणाज्ञया नारदेन सृंजयकन्यायाः पाणिग्रहणम्, सनत्कुमारेण स्वाश्रमसन्नाय नारदाय कृतः सद्बोधपूर्वकः कृष्णमन्त्रोपदेशः, तपसे गतं नारदं प्रति कृष्णध्याननिरूपणात्मकं शिवस्य वचनम् … … …	६०
२७२	१३१	शौनकाद्यृषिप्रश्नतः सूतेन वह्निसुवर्णयोरुत्पत्तिकथनम् …	३८
२७३	१३२	शौनकादिकृतप्रश्नानां सूतेन पुनरेतदखिलब्रह्मवैवर्तपुराणस्य कथानां क्रमेण संक्षेपतः कथनम् … … …	९०
२७५	१३३	शौनकादिकानां प्रश्नतः सूतेन पुराणलक्षणसंख्यादिकथनम्, एतत्पुराणप्रशंसा एतत्पुराणश्रवणपठनफलवर्णनम्, एतत्पुराणश्रवणविधिकथनं च … … …	७४

इति श्रीब्रह्मवैवर्तमहापुराणान्तर्गतश्रीकृष्णजन्मखण्डविषयानुक्रमणिका समाप्ता ।

इति ब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डानुक्रमणिका समाप्ता।

॥ श्रीगणेशाय नमः ॥ ॥ श्रीसरस्वत्यै नमः ॥ ॥ श्रीगोपीजनवल्लभाय नमः ॥ ॥ अथ ब्रह्मवैवर्तीयश्रीकृष्णजन्मखण्डप्रारंभः ॥
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १ ॥ नारद उवाच ॥ ॥ श्रुतं प्रथमतो
ब्रह्मन्ब्रह्मखण्डं मनोहरम् ॥ ब्रह्मणो वदनांभोजात्परमाद्भुतमेव च ॥१॥ ततस्तद्वचनात्तूर्णं समागत्य तवांतिकम् ॥ श्रुतं प्रकृतिखण्डं च
सुधाखंडात्परं वरम् ॥ २ ॥ ततो गणपतेः खंडमखंडभवखंडनम् ॥ न मे तृप्तं मनो लोलं विशिष्टं श्रोतुमिच्छति ॥ ३ ॥
श्रीकृष्णजन्मखंडं च जन्मादेः खंडनं नृणाम् ॥ प्रदीपं सर्वतत्त्वानां कर्मघ्नं हरिभक्तिदम् ॥ ४ ॥ सद्यो वैराग्यजननं भवरोगनिकृंत
नम् ॥ कारणं मुक्तिबीजानां भवाब्धेस्तारणं परम् ॥ ५ ॥ कर्मोपभोगरोगाणां खंडने च रसायनम् ॥ श्रीकृष्णचरणांभोजप्राप्तिसोपान
कारणम् ॥ ६ ॥ जीवनं वैष्णवानां च जगतां पावनं परम् ॥ वद विस्तार्य मां भक्तं शिष्यं च शरणागतम् ॥ ७ ॥ केन वा प्रार्थितः
कृष्ण आजगाम महीतलम् ॥ सर्वांशैरेक एवेशः परिपूर्णतमः स्वयम् ॥८॥ युगे कुत्र कुतो हेतोः कुत्र वाऽऽविर्बभूव ह ॥ वसुदेवोऽस्य
जनकः को वा का वा च देवकी ॥ ९ ॥ वद कस्य कुले जन्म मायया सुविडंबनम् ॥ किं चकार समागत्य केन रूपेण वा हरिः ॥
॥ १० ॥ जगाम गोकुलं कंसभयेन सूतिकागृहात् ॥ कथं कंसात्कीटतुल्याद्भयेशस्य भयं मुने ॥ ११ ॥ हरिर्वा गोपवेषेण गोकुले
किं चकार ह ॥ कुतो गोपाङ्गनासार्धं विजहार जगत्पतिः ॥१२॥ का वा गोपांगना के वा गोपाला बालरूपिणः ॥ का वा यशोदा
को नंदः किं वा पुण्यं चकार ह ॥१३॥ कथं राधा पुण्यवती देवी गोकुलवासिनी[1] ॥ व्रजे वा व्रजकन्या सा बभूव प्रेयसो हरेः॥१४॥
कथं गोप्यो दुराराध्यं संप्रापुरीश्वरं परम् ॥ कथं तांश्च परित्यज्य जगाम मथुरां पुनः ॥ १५ ॥ भारावतरणं कृत्वा किं विधाय
जगाम सः ॥ कथयस्व महाभाग पुण्यश्रवणकीर्तन ॥ १६ ॥ सुदुर्लभां हरिकथां तरणिं भवसागरे ॥ निषेकभोगनिगडक्लेशच्छेदन
कर्तनीम् ॥ १७॥ पापेंधनानां दहने ज्वलदग्निशिखामिव ॥ पुंसां श्रुतवतां कोटिजन्मकिल्बिषनाशिनीम् ॥ १८ ॥

---

[1] गोलोकवासिनी इति पाठान्तरम् ।

मुक्तिं कर्णसुधारम्यां शोकसागरनाशिनीम् ॥ मह्यं भक्ताय शिष्याय ज्ञानं देहि कृपानिधे ॥ १९ ॥ तपोजपमहादानात्पृथिव्यां
तीर्थदर्शनात् ॥ श्रुतिपाठादनशनाद्व्रताद्देवार्चनादपि ॥ २० ॥ दीक्षायाः सर्वयज्ञेषु यत्फलं लभते नरः ॥ षोडशीं ज्ञानदानस्य कलां
नार्हति तत्फलम् ॥ २१ ॥ पित्राऽहं प्रेषितो ज्ञानादानाय तव सन्निधिम् ॥ सुधासमुद्रं संप्राप्य को वाऽन्यत्पातुमिच्छति ॥ २२ ॥
श्रीनारायण उवाच ॥ ॥ मया ज्ञातोऽसि धन्यस्त्वं पुण्यराशिः सुमूर्तिमान् ॥ करोषि भ्रमणं लोकान्पावितुं कुलपावन ॥ २३ ॥
जनानां हृदयं सद्यः सुव्यक्तं वचनेन वै ॥ शिष्ये कलत्रे कन्यायां दौहित्रे बांधवेऽपि च ॥ २४ ॥ पुत्रे पौत्रे च वचसि प्रतापे
चा[1]पदि स्त्रियाम् ॥ वृ[2]द्धौ वैरिणि विद्यायां ज्ञायते हृदयं नृणाम् ॥ २५ ॥ जीवन्मुक्तोऽसि पूतस्त्वं शुद्धभक्तो गदाभृतः ॥ पुनासि
पादरजसा सर्वाधारां वसुन्धराम् ॥ २६ ॥ पुनासि लोकान्त्सर्वांश्च स्वीयविग्रहदर्शनात् ॥ सुमंगलां हरिकथां तेन त्वं श्रोतुमि
च्छसि ॥ २७ ॥ यत्र कृष्णकथाः संति तत्रैव सर्वदेवताः ॥ ऋषयो मुनयश्चैव तीर्थानि निखिलानि च ॥ २८ ॥ कथाः श्रुत्वा कथांते
ते यांति सन्तो निरापदम् ॥ भवंति तानि तीर्थानि येषु कृष्णकथाः शुभाः ॥ २९ ॥ सद्यः कृष्णकथावक्ता स्वस्य पुंसां शतं शतम्
समुद्धृत्य श्रुतवतां पुनाति निखिलं कुलम् ॥ ३० ॥ प्रष्टा तु प्रश्नमात्रेण पुनाति कुलमात्मनः ॥ श्रोता श्रवणमात्रेण स्वकुलं स्व
स्वबांधवान् ॥ ३१ ॥ शतजन्मतपस्त[3]प्तो जन्मेदं भारते लभेत् ॥ करोति सफलं जन्म श्रुत्वा हरिकथामृतम् ॥ ३२ ॥ अर्चनं वंदनं
मन्त्रजपः सेवनमेव च ॥ स्मरणं कीर्तनं शश्वद्गुणश्रवणमीप्सितम् ॥ ३३ ॥ निवेदनं तस्य दास्यं नवधा भक्तिलक्षणम् ॥ करोति
जन्म सुफलं कृत्वैतानि च नारद ॥ ३४ ॥ न च विघ्नो भवेत्तस्य परमायुर्न नश्यति ॥ न याति तत्पुरः कालो वैनतेयमिवो
रगः ॥ ३५ ॥ न जहाति समीपं च क्षणं तस्य हरिः स्वयम् ॥ उपतिष्ठंति तूर्णं तमणिमादिकसिद्धयः ॥ ३६ ॥ सुदर्शनं भ्रमत्येव
तस्य पार्श्वे दिवानिशम् ॥ कृष्णाज्ञया च रक्षार्थं को वा किं कर्तुमीश्वरः ॥ ३७ ॥ न यांति तत्समीपं च स्वप्नेऽपि यमकिंकराः ॥

---

[1] यशसि श्रियाम्—इति पाठान्तरम्। [2] बुद्धौ—इति पाठान्तरम्। [3] तपःपूतः—इति पाठान्तरम्।

ज्वलदग्निं यथा दृष्ट्वा शलभा न व्रजंति तम् ॥ ३८ ॥ व्याधयो विपदः शोका विघ्नाश्च न प्रयांति तम् ॥ न याति तत्समीपं च मृत्युर्मृत्युभयान्मुने ॥ ३९ ॥ ऋषयो मुनयः सिद्धाः सन्तुष्टाः सर्वदेवताः ॥ स च सर्वत्र निःशंकः सुखी कृष्णप्रसादतः ॥ ४० ॥ तव कृष्णकथायां च रतिरात्यंतिकी सदा ॥ जनकस्य स्वभावो हि जन्ये तिष्ठति निश्चितम् ॥ ४१ ॥ विप्रेंद्र का प्रशंसेयं जन्म ते ब्रह्ममानसे ॥ यत्र यत्र कुले जन्म तन्मतिस्तादृशी भवेत् ॥ ४२ ॥ पिता विधाता जगतां कृष्णपादाब्जसेवया ॥ नित्यं करोति यः शश्वन्नवधा भक्तिलक्षणम् ॥ ४३ ॥ रतिः कृष्णकथायां च यस्याश्रुपुलकोद्गमः ॥ मनो निमग्नं तत्रैव स भक्तः कथितो बुधैः ॥४४॥पुत्रदारादिकं सर्वं जानाति श्री[1]हरेरिति ॥ आत्मना मनसा वाचा स भक्तः कथितो बुधैः ॥ ४५ ॥ निर्जने तीर्थसंपर्कै निःसंगा ये मुदाऽन्विताः ॥ ध्यायंते चरणांभोजं श्रीहरेस्ते च वैष्णवाः ॥४६॥ दयाऽस्ति सर्वजीवेषु सर्वं कृष्णमयं जगत् ॥ यो जानाति महाज्ञानी स भक्तो वैष्णवो मतः ॥४७॥ शश्वद्ये नाम गायंति गुणं मंत्रं जपंति च ॥ कुर्वंति श्रवणं गाथा वदंति तेऽतिवैष्णवाः ॥ ४८ ॥ लब्धानीष्टानि वस्तूनि प्रदातुं हरये मुदा ॥ तूर्णं यस्य मनो हृष्टं स भक्तो ज्ञानिनां वरः ॥ ४९ ॥ यन्मनो हरिपादाब्जे स्वप्ने ज्ञाने दिवानिशम् ॥ पूर्वकर्मोपभोगं च बहिर्भुङ्क्ते स वैष्णवः ॥ ५० ॥ गुरुवक्त्राद्विष्णुमंत्रो यस्य कर्णे विशत्यलम् ॥ तं वैष्णवं महापूतं प्रवदंति मनीषिणः ॥ ५१ ॥ पूर्वान्सप्त परान्सप्त सप्त मातामहादिकान् ॥ सोदरानुद्धरेद्भक्तः स्वप्रसूं च प्रसूप्रसूम् ॥५२॥ कलत्रं कन्यकां बंधुं शिष्यं दौहित्रमात्मनः ॥ किंकरान्किंकरीश्चैवमुद्धरेद्वैष्णवः सदा ॥ ५३ ॥ सदा वांछंति तीर्थानि वैष्णवस्पर्शदर्शने ॥ पापिदत्तानि पापानि तेषां नश्यंति संगतः ॥ ५४ ॥ गोदोहनक्षणं यावद्यत्र तिष्ठंति वैष्णवाः ॥ तत्र सर्वाणि तीर्थानि संति तावन्महीतले ॥५५॥ ध्रुवं तत्र मृतः पापी मुक्तो याति हरेः पदम् ॥ तथैव ज्ञानगंगायामंते कृष्णस्मृतौ यथा ॥५६॥ तुलसीकानने गोष्ठे श्रीकृष्णमंदिरे [2]परे॥वृंदारण्ये हरिद्वारे तीर्थेष्वन्येषु वा यथा ॥५७॥ पापानि पापिनां यांति तीर्थस्नाना

---

[1] यो हरेरिव- इति पाठान्तरम् । [2] पदे इति वा पाठः ।

वगाहनात् ॥ तेषां पापानि नश्यंति वैष्णवस्पर्शवायुना ॥५८॥ न हि स्थातु शक्तुवंति पापान्येव कृतानि च ॥ ज्वलदग्नौ यथा
क्षिप्रं शुष्काणि हि तृणानि च ॥५९॥ भक्तं वर्त्मनि गच्छंतं ये ये पश्यंति मानवाः॥सप्तजन्मार्जिताघानि तेषां नश्यंति निश्चितम्
॥६०॥ ये निंदंति हृषीकेशं तद्भक्तं पुण्यरूपिणम् ॥ शतजन्मार्जितं पुण्यं तेषां नश्यति निश्चितम् ॥ ६१ ॥ ते पच्यंते महाघोरे
कुंभीपाके भयानके ॥ भक्षिताः कीटसंघेन यावच्चंद्रदिवाकरौ ॥ ६२ ॥ तस्य दर्शनमात्रेण पुण्यं नश्यति निश्चितम् ॥ गंगां स्नात्वा
रविं नत्वा तदा विद्वान्विशुध्यति ॥ ६३ ॥ वैष्णवस्पर्शमात्रेण मुक्तो भवति पातकी ॥ तस्य पापानि हंत्येव स्वांतःस्थो मधुसूदनः॥
॥ ६४ ॥इत्येवं कथितो विप्र विष्णुवैष्णवयोर्गुणः ॥ अधुना श्रीहरेर्जन्म निबोध कथयामि ते ॥ ६५ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे
श्रीकृष्णजन्मखंडे नारायणनारदसंवादे विष्णुवैष्णवयोर्गुणप्रशंसाप्रस्ताववर्णनं नाम प्रथमोऽध्यायः ॥ १ ॥ छ ॥ छ ॥ ॥
श्रीनारायण उवाच ॥ ॥ येन वा प्रार्थितः कृष्ण आजगाम महीतलम् ॥ यं यं विधाय भूमौ स जगाम स्वालयं विभुः ॥ १॥ भारावतरणोपायं
दुष्टानां च वधोद्यमम् ॥ सर्वं ते कथयिष्यामि सुविचार्य विधानतः ॥ २ ॥ अधुना गोपवेषं च गोकुलागमनं हरेः ॥ राधा
गोपालिका येन निबोध कथयामि ते ॥ ३ ॥ शंखचूडवधं पूर्वं संक्षेपात्कथितं श्रुतम् ॥ अधुना तत्सुविस्तार्य निबोध कथयामि ते ॥
॥ ४ ॥ श्रीदाम्नः कलहश्चैव बभूव राधया सह ॥ श्रीदामा शंखचूडश्च शापात्तस्या बभूव ह ॥ ५ ॥ राधां शशाप श्रीदामा याहि
योनिं च मानवीम् ॥ व्रजे व्रजांगना भूत्वा विचरस्व महीतले ॥ ६ ॥ भीता श्रीदामशापात्सा श्रीकृष्णं समुवाच ह ॥ गोपीरूपा
भविष्यामि श्रीदामा मां शशाप ह ॥ ७ ॥ कमुपायं करिष्यामि वद मां भयभंजन ॥ त्वया विना कथमहं धरिष्यामि स्वजीवनम्
॥ ८ ॥ क्षणमेकं युगशतं कालनाथ त्वया विना ॥ चक्षुर्निमेषविरहाद्भवेदंधं मनो मम ॥ ९॥ शरत्पार्वणचंद्राभं सुधापूर्णाननं तव ॥
नाथ चक्षुश्चकोराभ्यां पिबाम्यहमहर्निशम् ॥ १० ॥ त्वमात्मा मे मनः प्राणा देहमात्रं वहाम्यहम् ॥ दृष्टिशक्तिश्च चक्षुस्त्वं जीवनं
परमं धनम् ॥११॥ स्वप्ने ज्ञाने त्वयि मनः स्मरामि त्वत्पदांबुजम् ॥ तव दास्यं विना नाथ न जीवामि क्षणं विभो ॥ १२ ॥

कृष्णस्तद्वचनं श्रुत्वा बोधयामास सुंदरीम् ॥ वक्षसि प्रेयसीं कृत्वा चकार निर्भयां च ताम् ॥१३॥ महीतलं गमिष्यामि वाराहे च वरानने ॥ मया सार्धं भूगमनं जन्म तेऽपि निरूपितम् ॥१४॥ व्रजं गत्वा व्रजे देवि विहरिष्यामि कानने ॥ मम प्राणाधिका त्वं च भयं किं ते मयि स्थिते ॥१५॥ तामित्युक्त्वा हरिस्तत्र विरराम जगत्पतिः ॥ अतो हेतोर्जगन्नाथो जगाम नंदगोकुलम्॥ १६ ॥ किं वा तस्य भयं कंसाद्भयांतकारकस्य च ॥ माया भयच्छलेनैव जगाम राधिकांतिकम् ॥ १७ ॥ विजहार तया सार्धं गोपवेषं विधाय सः ॥ सह गोपांगनाभिश्च प्रतिज्ञापालनाय च ॥१८॥ ब्रह्मणा प्रार्थितः कृष्णः समागत्य महीतलम् ॥ भारावतरणं कृत्वा जगाम स्वालयं विभुः ॥ १९ ॥ नारद उवाच ॥ श्रीदाम्नः कलहश्चैव कथं वा राधया सह ॥ संक्षेपात्कथितं पूर्वं संव्यस्य कथयाधुना ॥ २० ॥ ॥ श्रीनारायण उवाच ॥ एकदा राधया सार्धं गोलोके श्रीहरिः स्वयम् ॥ विजहार महारण्ये निर्जने रासमंडले ॥ ॥ २१ ॥ राधिकासुखसंभोगाद् बुबुधे न स्वकं परम्॥कृत्वा विहारं श्रीकृष्णस्तामपृष्ट्वा विहाय च॥२२॥गोपिकां विरजामन्यां शृङ्गारार्थं जगाम ह ॥ वृंदारण्ये च विरजा सुभगा राधिकासमा ॥२३॥ तस्या वयस्याः सुंदर्यो गोपीनां शतकोटयः ॥ कृष्णप्राणाधिका गोपी धन्या मान्या च योषिताम् ॥२४॥ रत्नसिंहासनस्था सा ददर्श हरिमन्तिके॥ददर्श श्रीहरिस्तां च शरच्चंद्रनिभाननाम् ॥२५॥ मनोहरां सस्मितां च पश्यंतीं वक्रचक्षुषा ॥ सदा षोडशवर्षीयां प्रोद्भिन्नवयौवनाम् ॥२६॥ रत्नालंकारशोभाढ्यां भूषितां शुक्लवाससा ॥ पुलकांकितसर्वांगीं कामबाणप्रपीडिताम् ॥२७॥ दृष्ट्वा तां श्रीहरिस्तूर्णं विजहार तया सह ॥ पुष्पतल्पे महारण्ये निर्जने रत्नमंडपे ॥२८॥ मूर्च्छामवाप विरजा कृष्णशृंगारकौतुकात् ॥ कृत्वा वक्षसि प्राणेशं कोटिकंदर्पसन्निभम् ॥ २९ ॥ तया सक्तं श्रीहरिं च रत्नमंडपसंस्थितम् ॥ दृष्ट्वा च राधिकाल्यश्च चक्रुस्तां च निवेदनम् ॥ ३० ॥ तासां च वचनं श्रुत्वा सुष्वाप च चुकोप ह ॥ भृशं रुरोद सा देवी रक्तपंकजलोचना ॥ ३१ ॥ ता उवाच महादेवी मां तं दर्शयितुं क्षमाः ॥ यदि सत्यं ब्रूत यूयं मया सार्धं प्रगच्छत ॥ ३२ ॥ करिष्यामि फलं गोप्याः कृष्णस्य च यथोचितम् ॥ को रक्षिताऽद्य तस्याश्च मयि शास्ति प्रकुर्वति ॥ ३३ ॥ शीघ्रमानयताल्यश्च

तया सार्द्धं हरिं प्रियम् ॥ अंतर्वक्रं सस्मितं च विषकुंभं सुधामुखम् ॥ ३४ ॥ मदाश्रयं समागंतुं यूयं दासं न दास्यथ ॥ तमेव
मंडपं रम्यं यात संरक्षतेश्वरम् ॥ ३५ ॥ राधिकावचनं श्रुत्वा काश्चिद्गोप्यो भयान्विताः ॥ ताः सर्वाः संपुटांजल्यो भक्तिनम्रात्म
कंधराः ॥ तामूचुः पुरतः स्थित्वा सर्वा एव प्रियां सतीम् ॥ ३६ ॥ ॥ आल्य ऊचुः ॥ वयं तं दर्शयिष्यामो विरजासहितं
विभुम् ॥ ३७ ॥ तासां च वचनं श्रुत्वा रथमारुह्य सुंदरी ॥ जगाम सार्धं गोपीभिस्त्रिषष्टिशतकोटिभिः ॥ ३८ ॥ रत्नेंद्रसाररचितं
कोटिसूर्यसमप्रभम् ॥ मणींद्रसाररचितं कलशानां त्रिकोटिभिः ॥ ३९ ॥ राजितं चित्रराजीभिर्वैजयंतीविराजितम् ॥ लक्षचक्रस
मायुक्तं मनोयायि मनोहरम् ॥ ४० ॥ मणिसारविकारैश्च कोटिस्तंभैः सुशोभितम् ॥ नानाचित्रविचित्रैश्च सहितैः सुमनोहरैः
॥ ४१ ॥ सिंदूराकारमणिभिर्मध्यदेशे विभूषितैः ॥ रत्नकृत्रिमसिंहैश्च रथचक्रोर्ध्वसंस्थितैः ॥ ४२ ॥ चतुर्लक्षपरिमितैश्चित्रघं
टासमन्वितैः ॥ चित्रपुत्तलिशोभाढ्यैर्विचित्रैश्च विराजितम् ॥ ४३ ॥ रतिमंदिरलक्षैश्च रत्नसारविनिर्मितैः ॥ मणिसारकपाटैश्च
शोभितैश्चित्रवाजिभिः ॥ ४४ ॥ मणींद्रसारकलशैः शेखरोज्ज्वलितैर्युतम् ॥ भोगद्रव्यसमायुक्तं वेषद्रव्यसमन्वितम् ॥ ४५ ॥
शोभितं रत्नशय्याभी रत्नपात्रघटान्वितम् ॥ हरिन्मणीनां वेदीनां समूहेन समन्वितम् ॥ ४६ ॥ कुंकुमाभमणीनां च सोपानैः कोटि
भिर्युतम् ॥ स्यमंतकैः कौस्तुभैश्च रुचकैः प्रवरैस्तथा ॥ ४७ ॥ पद्मकृत्रिमकोटीनां शतकैश्च सुशोभितम् ॥ चित्रकाननवापीभि
र्विशिष्टाभिर्विराजितम् ॥ ४८ ॥ रत्नेंद्रसाररचितकलशोज्ज्वलशेखरम् ॥ शतयोजनमूर्ध्वं च दशयोजनविस्तृतम् ॥ ४९ ॥ पारि
जातप्रसूनानां मालाकोटिविराजितम् ॥ कुंदानां करवीराणां यूथिकानां तथैव च ॥ ५० ॥ सुचारुचंपकानां च नागेशानां मनो
हरैः ॥ मल्लिकानां मालतीनां माधवीनां सुगंधिनाम् ॥ ५१ ॥ कदंबानां च मालानां कदंबैश्च विराजितम् ॥ सहस्रदलपद्मानां
मालाभिश्च विराजितम् ॥ ५२ ॥ चित्रपुष्पोद्यानसरःकाननैश्च विभूषितम् ॥ सर्वेषां स्यंदनानां च श्रेष्ठं वायुवहं परम् ॥ ५३ ॥
तत्सूक्ष्मवस्त्रसाराणां वरैराच्छादितं परम् ॥ रत्नदर्पणलक्षाणां शतकैश्च समन्वितम् ॥ ५४ ॥ श्वेतचामरकोटीभिर्वज्रकोटिभिरन्वितम् ॥

चन्दनागरुकस्तूरीकुंकुमद्रवचर्चितैः ॥ ५५ ॥ पारिजातप्रसूनानां कोटितल्पविराजितम् ॥ कोटिघंटासमायुक्तं पताकाकोटिभिर्यु
तम् ॥ ५६ ॥ रत्नशय्याकोटिभिश्च चित्रवज्रपरिच्छदैः ॥ चंदनाक्तैश्चंपकानां कुंकुमैश्च विचित्रितैः ॥ ५७ ॥ पुष्पोपधानसंयुक्तैः
शृंगारार्हाभिरन्वितम् ॥ अदृश्यैरश्रुतैर्द्रव्यैः सुंदरैश्च विभूषितम् ॥ ५८ ॥ एवंभूताद्रथात्तूर्णमवरुह्य हरिप्रिया ॥ जगाम सहसा देवी तं
रत्नमंडपं मुने ॥ ५९ ॥ द्वारे नियुक्तं ददृशे द्वारपालं मनोहरम् ॥ लक्षगोपैः परिवृतं स्मेराननसरोरुहम् ॥ ६० ॥ गोपं श्रीदाम
नामानं श्रीकृष्णप्रियकिंकरम् ॥ तमुवाच रुषा देवी रक्तपंकजलोचना ॥ ६१ ॥ गच्छ दूरं गच्छ दूरं रतिलंपटकिंकर ॥ कीदृशीं
मत्परां कांतां द्रक्ष्यामि त्वत्प्रभोरहम् ॥ ६२ ॥ राधिकावचनं श्रुत्वा निःशंकः पुरतः स्थितः ॥ तामेव न ददौ गंतुं वेत्रपाणि
र्महाबलः ॥ ६३ ॥ तूर्णं च राधिकाल्यश्च श्रीदामानं सकिंकरम् ॥ बलेन प्रेरयामासुः कोपेन स्फुरिताधराः ॥ ६४ ॥ श्रुत्वा
कोलाहलं शब्दं गोपिकानां हरिः स्वयम् ॥ ज्ञात्वा च कोपितां राधामंतर्धानं चकार ह ॥ ६५ ॥ विरजा राधिकाशब्दादंतर्धानं
हरेरपि ॥ दृष्ट्वा राधां भयार्ता सा जहौ प्राणांश्च योगतः ॥ ६६ ॥ सद्यस्तत्र सरिद्रूपं तच्छरीरं बभूव ह ॥ व्याप्तं च वर्तुलाकारं तया
गोलोकमेव च ॥ ६७ ॥ कोटियोजनविस्तीर्णं प्रस्थेऽतिनिम्नमेव च ॥ दैर्घ्यैं दशगुणं चारु नानारत्नाकरं परम् ॥ ६८ ॥ ॥ इति
श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंडे नारायणनारदसंवादे विरजानदप्रस्तावववर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ श्रीनारायण
उवाच ॥ ॥ राधा रतिगृहं गत्वा न ददर्श हरिं मुने ॥ विरजां च सरिद्रूपां दृष्ट्वा गेहं जगाम सा॥१॥श्रीकृष्णो विरजां दृष्ट्वा सरिद्रूपां
प्रियां सतीम् ॥ उच्चै रुरोद विरजातीरे नीरमनोहरे॥२॥ममांतिकं समागच्छ प्रेयसीनां परे वरे ॥ त्वया विनाऽहं सुभगे कथं जीवामि
सुंदरि ॥ ३ ॥ नद्यधिष्ठात्रि देवि त्वं भव मूर्तिमती सती ॥ ममाशिषा रूपवती सुंदरी योषितां वरा॥४॥ पूर्वरूपाच्च सौभाग्यादिदानीं
सुभगा भव ॥ पुरातनं शरीरं ते सरिद्रूपमभूत्सति ॥५॥ जलादुत्थाय चागच्छ विधाय तनुमुत्तमाम्[1] ॥ अष्टौ सिद्धीर्मया दत्ताः सुरसं

---

[1] नूतनां तनुम्—इति वा पाठः ।

दरि सत्वरम् ॥ ६ ॥ कृष्णाज्ञया च विरजा विधाय तनुमुत्तमाम् ॥ आजगाम हरेरग्रे साक्षाद्राधेव सुंदरी ॥ ७ ॥ पीतवस्त्रपरीधाना
स्मेराननसरोरुहा ॥ पश्यंतं प्राणनाथं च पश्यंती वक्रचक्षुषा ॥ ८ ॥ नितंबश्रोणिभारार्ता पीनोन्नतपयोधरा ॥ मानिनी मानिनीनां
च गजेंद्रमंदगामिनी ॥ ९ ॥ सुंदरी सुंदरीणां च धन्या मान्या च योषिताम् ॥ चारुचंपकवर्णाभा पक्वबिंबाधरा वरा ॥१०॥ पक्व
दाडिमबीजाभदंतपंक्तिमनोहरा ॥ शरत्पार्वणचंद्रास्या फुल्लेंदीवरलोचना ॥ ११ ॥ कस्तूरीबिंदुना सार्धं सिंदूरबिंदुभूषिता ॥ चारुपत्रक
शोभाढ्या सुचारुकबरीयुता ॥ १२ ॥ रत्नकुंडलगंडस्था भूषिता रत्नमालया ॥ गजमौक्तिकनासाग्रा मुक्ताहारविराजिता ॥ १३ ॥
रत्नकंकणकेयूरचारुशंखकरोज्ज्वला ॥ किंकिणीजालशब्दाढ्या रत्नमंजीररंजिता ॥ १४ ॥ तां च रूपवतीं दृष्ट्वा प्रेमोद्रेका
ज्जगत्पतिः ॥ चकारालिंगनं तूर्णं चुचुंब च मुहुर्मुहुः ॥१५॥ नानाप्रकारशृंगारं विपरीतादिकं विभुः ॥ रहसि प्रेयसीं प्राप्य चकार
च पुनः पुनः ॥ १६ ॥ विरजा सा रजोयुक्ता धृत्वा वीर्यममोघकम् ॥ सद्यो बभूव तत्रैव धन्या गर्भवती सती ॥ १७ ॥ दधार गर्भमी
शस्य दिव्यं वर्षशतं च सा ॥ ततः सुषाव तत्रैव पुत्रान्सप्त मनोहरान् ॥ १८ ॥ माता सा सप्तपुत्राणां श्रीकृष्णस्य प्रिया सती ॥
तस्थौ तत्र सुखासीना सार्द्धं पुत्रैश्च सप्तभिः ॥ १९ ॥ एकदा हरिणा सार्द्धं वृंदारण्ये च निर्जने ॥ विजहार पुनः साध्वी शृंगारा
सक्तमानसा ॥ २० ॥ एतस्मिन्नंतरे तत्र मातुः क्रोडं जगाम ह ॥ कनिष्ठपुत्रस्तस्याश्च भ्रातृभिः पीडितो, भिया ॥ २१ ॥
भीतं स्वतनयं दृष्ट्वा तत्याज तां कृपानिधिः ॥ क्रोडे चकार बालं सा कृष्णो राधागृहं ययौ ॥ २२ ॥ प्रबोध्य बालं सा साध्वी न
ददर्शांतिके प्रियम् ॥ विललाप भृशं तत्र शृंगारातृप्तमानसा ॥ २३ ॥ शशाप स्वसुतं कोपाल्लवणोदो भविष्यसि ॥ कदाऽपि ते जलं
केचिन्न खादिष्यंति जीविनः ॥ २४ ॥ शशाप बालान्सर्वांश्च यांतु मूढा महीतलम् ॥ गच्छध्वं च महीं मूढा जंबुद्वीपं मनोह
रम् ॥ २५ ॥ स्थितिर्नैकत्र युष्माकं भविष्यति पृथक्पृथक् ॥ द्वीपे द्वीपे स्थितिं कृत्वा तिष्ठंतु सुखिनः सदा ॥ २६ ॥ द्वीपस्थाभि
र्नदीभिश्च सह क्रीडंतु निर्जने ॥ कनिष्ठो मातृशापाच्च लवणोदो बभूव ह ॥ २७ ॥ कनिष्ठः कथयामास मातृशापं च

बालकान् ॥ आजग्मुर्दुःखिताः सर्वे मातृस्थानं च बालकाः॥२८॥श्रुत्वा विवरणं सर्वे प्रजग्मुर्धरणीतलम् ॥ प्रणम्य चरणं मातुर्भक्ति
नम्रात्ममूर्तयः ॥ २९ ॥ सप्तद्वीपसमुद्राश्च सप्त तस्थुर्विभागशः ॥ कनिष्ठाद्वृद्धपर्यंतं द्विगुणं द्विगुणं मुने ॥ ३० ॥ लवणेक्षुसुरा
सर्पिर्दधिदुग्धजलार्णवाः ॥ एतेषां च जलं पृथ्व्यां सस्यार्थं च भविष्यति ॥ ३१ ॥ व्याप्ताः समुद्राः सप्तैव सप्तद्वीपां वसुंधराम् ॥
रुरुदुर्बालकाः सर्वे मातृभ्रातृशुचाऽन्विताः ॥ ३२ ॥ रुरोद च भृशं साध्वी पुत्रविच्छेदकातरा ॥ मूर्च्छामवाप शोकेन पुत्राणां भर्तुरेव
च ॥ ३३ ॥ तां शोकसागरे मग्नां विज्ञाय राधिकापतिः ॥ आजगाम पुनस्तस्याः स्मेराननसरोरुहः ॥ ३४ ॥ दृष्ट्वा हरिं सा त
त्याज शोकं रोदनमेव च ॥ आनन्दसागरे मग्ना दृष्ट्वा कांतं बभूव ह ॥३५॥ चकार श्रीहरिं क्रोडे विजहार स्मरातुरा ॥ तां च पुत्र
परित्यक्तां हरिस्तुष्टो बभूव ह ॥ ३६ ॥ वरं तस्यै ददौ प्रीत्या प्रसन्नवदनेक्षणः ॥ कांते नित्यं तव स्थानमागमिष्यामि निश्चि
तम् ॥ ३७ ॥ यथा राधा तत्समा त्वं भविष्यसि प्रिया मम ॥ पुत्रान्द्रक्ष्यसि नित्यं त्वं मद्वरस्य प्रसादतः ॥ ३८ ॥ इत्युक्तवंतं
श्रीकृष्णं वसंतं विरजांतिके ॥ दृष्ट्वा राधावयस्याश्च कथयामासुरीश्वरम् ॥ ३९ ॥ श्रुत्वा रुरोष सा देवी सुष्वाप क्रोधमंदिरे ॥ एत
स्मिन्नंतरे कृष्णो जगाम राधिकांतिकम् ॥ ४० ॥ स तस्थौ राधिकाद्वारे श्रीदाम्ना सह नारद ॥ रासेश्वरी हरिं दृष्ट्वा [1]रुष्टोवाच प्रियं
पुरः ॥ ४१ ॥ मत्तो बहुतराः कांता गोलोके संति ते हरे ॥ याहि तासां सन्निधानं मया ते किं प्रयोजनम् ॥ ४२ ॥ विरजा प्रेयसी
कांता सरिद्रूपा बभूव ह ॥ देहं त्यक्त्वा मम भयात्तथाऽपि याहि तां प्रति ॥ ४३ ॥ तत्तीरे मंदिरं कृत्वा तिष्ठ तिष्ठ च याहि ताम् ॥
नदी बभूव सा त्वं च नदो भवितुमर्हसि ॥ ४४ ॥ नदस्य नद्या सार्द्धं च संगमो गुणवान्भवेत् ॥ स्वजातौ परमा प्रीतिः शयने भोजने
सुखात् ॥ ४५ ॥ देवचूडामणेः क्रीडा नद्या [2]सार्द्धमहो बत ॥ महाजनः स्मेरमुखः श्रुत्वा सद्यो भविष्यति ॥ ४६ ॥ ये त्वां वदंति
सर्वेशं ते किं जानंति तत्त्वतः ॥ भगवान्सर्वभूतात्मा नदीं संभोक्तुमिच्छति ॥ ४७ ॥ इत्युक्त्वा राधिका देवी विरराम

---

[1] रुष्टोवाचाप्रियं तदा—इति पाठान्तरम् । [2] सार्धं मयेरितम्—इति वा पाठः ।

रुषाऽन्विता ॥ नोत्तस्थौ भूमिशयनाद्गोपीलक्षसमन्विता ॥४८॥ काश्चिच्चामरहस्ताश्च काश्चित्सूक्ष्मांशुकांबराः ॥ काश्चित्तांबूलहस्ताश्च काश्चिन्मालाकरा वराः ॥ ४९ ॥ वासितोदकराः काश्चित्काश्चित्पद्मकरा वराः ॥ काश्चित्सिंदूरहस्ताश्च पानहस्ताश्च काश्चन ॥ ५० ॥ रत्ना[1]लंकारहस्ताश्च काश्चित्कज्जलवाहिकाः ॥ वेणुवीणाकराः काश्चित्काश्चित्कंकतिकाकराः ॥ ५१ ॥ काश्चिदार्वीरहस्ताश्च यंत्रहस्ताश्च काश्चन ॥ सुगंधितैलहस्ताश्च काश्चन प्रमदोत्तमाः ॥ ५२ ॥ करतालकराः काश्चिद्डिंडुहस्ताश्च काश्चन ॥ काश्चिन्मृदंग[2]मुरजमुरलीतानकारिकाः ॥ ५३ ॥ संगीतनिपुणाः काश्चित्काश्चिन्नर्तनतत्पराः ॥ क्रीडावस्तुकराः काश्चिन्मधुहस्ताश्च काश्चन ॥ ५४ ॥ सुधापात्रकराः काश्चिदंघ्रिपीठकराः पराः ॥ वेषवस्तुकराः काश्चित्काश्चिच्चरणसेविकाः ॥ ५५ ॥ पुटांजलिकराः काश्चित्काश्चित्स्तुतिपरा वराः ॥ एवं कतिविधाः संति राधिकापुरतो मुने ॥ ५६ ॥ बहिर्देशस्थिताः काश्चित्कोटिशः कोटिशः सदा ॥ काश्चिद्द्वारनियुक्ताश्च वयस्या वेत्रधारिकाः ॥ ५७ ॥ कृष्णमभ्यंतरं गंतुं न ददुर्द्वारसंस्थिताः[3] ॥ पुरःस्थितं तं प्राणेशं राधा पुनरुवाच सा ॥ नानुरूपमत्यकथ्यमयोग्यमतिकर्कशम् ॥ ५८ ॥ ॥ राधिकोवाच ॥ हे कृष्ण विरजाकांत गच्छ मत्पुरतो हरे ॥ कथं दुनोषि मां लोल रतिचौरातिलंपट ॥ ५९ ॥ शीघ्रं पद्मावतीं गच्छ रत्नमालां मनोरमाम् ॥ अथवा वनमालां वा रूपेणाप्रतिमां व्रज ॥ ६० ॥ हे नदीकांत देवेश देवानां च गुरोर्गुरो ॥ मया ज्ञातोऽसि भद्रं ते गच्छ गच्छ ममाश्रमात्[4] ॥ ६१ ॥ शश्वत्ते मानुषाणां च व्यवहारस्य लंपट ॥ लभतां मानुषीं योनिं गोलोकाद्व्रज भारतम् ॥ ६२ ॥ हे सुशीले शशिकले हे पद्मावति माधवि ॥ निवार्यतां च धूर्तोऽयं किमस्यात्र प्रयोजनम् ॥ ६३ ॥ राधिकावचनं श्रुत्वा तमूचुर्गोपिका हरिम् ॥ हितं तथ्यं च विनयं सारं यत्समयोचितम् ॥ ६४ ॥ काश्चिदूचुरिति हरे गच्छ स्थानांतरं क्षणम् ॥ राधाकोपापनयने ह्यागमिष्यामहे वयम् ॥ ६५ ॥ काश्चिदूचुरिति प्रीत्या क्षणं गच्छ गृहांतरम् ॥ त्वयैव वर्धिता राधा त्वां विना कं च [5]वक्ष्यति ॥ ६६ ॥

---

[1] माल्यालंकारहस्ताः—इति पा० । [2] मधुरेति पा० । [3] संस्थितम्—इति पा० । [4] ममाश्रयात्—इति पा० । [5] कश्च रक्षतीति पा० ।

काश्चिदूचुरिति प्रेम्णा राधिकायां हरिं मुने ॥ क्षणं वृंदावनं गच्छ मानापनयनावधि ॥ ६७ ॥ काश्चिदित्यूचुरीशं च परिहास परं वचः ॥ मानापनयनं भक्त्या मानिन्याः[1] कुरु कामुक ॥ ६८ ॥ काश्चनोचुरितीशं तं याहि जायांतरं तव ॥ लोलुपस्य कथं नाथ करिष्यामो यथोचितम् ॥ ६९ ॥ काश्चनोचुरिति हरिं सस्मितं पुरतः स्थितम् ॥ गत्वा समीपमुत्थाय मानापनयनं कुरु ॥ ७० ॥ काश्चनोचुरिति प्राणनाथं गोप्यो दुरक्षरम् ॥ कः क्षमः सांप्रतं द्रष्टुं राधिकामुखपंकजम् ॥ ७१ ॥ काश्चनोचुरिति विभुं व्रज स्थानांतरं हरे ॥ कोपापनयने काले पुनरागमनं तव ॥ ७२ ॥ काश्चनोचुरितीदं तं प्रगल्भाः प्रमदोत्तमाः ॥ वयं त्वां दारयिष्यामो न चेद्याहि गृहांतरम् ॥ ७३ ॥ काश्चिन्निवारयामासुर्माधवं प्रमदोत्तमाः ॥ स्मितवक्त्रं च सर्वेशं स्वस्थम क्रोधमीश्वरम् ॥ ७४ ॥ गोपीभिर्वार्यमाणे च जगत्कारणकारणे ॥ सद्यश्चुकोप श्रीदामा हरौ गेहांतरं गते ॥ ७५ ॥ कोपादुवाच श्रीदामा राधिकां परमेश्वरीम् ॥ रक्तपद्मेक्षणां रुष्टां रक्तपंकजलोचनाम्[2] ॥ ७६ ॥ ॥ श्रीदामोवाच ॥ ॥ कथं वदसि मातस्त्वं कटुवाक्यं मदीश्वरम् ॥ विचारणां विना देवि करोषि भर्त्सनं वृथा ॥ ७७ ॥ ब्रह्मानंतेशदेवेशं[3] जगत्कारणकारणम् ॥ वाणीपद्मालयामायाप्रकृतीशं च निर्गुणम् ॥ ७८ ॥ स्वात्मारामं पूर्णकामं करोषि त्वं विडंबनम् ॥ देवीनां प्रवरा त्वं च निबोध यस्य सेवया ॥ ७९ ॥ यस्य पादार्चनेनैव सर्वेषामीश्वरी परा ॥ तन्न जानासि कल्याणि किमहं वक्तुमीश्वरः ॥ ८० ॥ भ्रूभंगलीलया कृष्णः स्रष्टुं शक्तश्च त्वद्विधाः ॥ कोटिशः कोटिशो देव्यस्तं न जानासि निर्गुणम् ॥ ८१ ॥ वैकुंठे श्रीहरेरस्य चरणांबुजमार्जनम् ॥ करोति केशैः शश्वच्छ्रीः सेवनं भक्तिपूर्वकम् ॥ ८२ ॥ सरस्वती च स्तवनैः कर्णपीयूषसुंदरैः ॥ सततं स्तौति यं भक्त्या न जानासि तमीश्वरम् ॥ ८३ ॥ भीता च प्रकृतिर्माया सर्वेषां बीज[4]रूपिणी ॥ सततं स्तौति यं भक्त्या तं न जानासि मानिनि ॥ ८४ ॥ स्तुवंति सततं वेदा महिम्नः षोडशीं कलाम् ॥ कदापि न विजानंति तं न जानासि भामिनि ॥ ८५ ॥

---

१ कामिन्याः—इ० पा० । २ रक्तपंकजलोचनः—इ० पा० । ३ धर्मेशम्—इति पा० । ४ जीवेति पा० ।

वक्त्रैश्चतुर्भिर्यं ब्रह्मा वेदानां जनको विभुः ॥ [1]स्तौति सेवां च कुरुते चरणांबुजमीश्वरि ॥ ८६ ॥ शंकरः पंचभिर्वक्त्रैः स्तौति
यं योगिनां गुरुः ॥ साश्रुपूर्णः सपुलकः सेवते चरणांबुजम् ॥ ८७ ॥ शेषः सहस्रवदनैः परमात्मानमीश्वरम् ॥ सततं स्तौति यं
भक्त्या सेवते चरणांबुजम् ॥ ८८ ॥ धर्मःपाता च सर्वेषां साक्षी च जगतां पतिः ॥ भक्त्या च चरणांभोजं सेवते सततं मुदा॥८९॥
श्वेतद्वीपनिवासी यः पाता विष्णुः स्वयं विभुः ॥ तस्यां[2]शश्च तथा यं यं धार्यतेऽप्यक्षरं परम् ॥९०॥ सुरासुरमुनींद्राश्च मनवो मानवा
बुधाः ॥ सेवंते न हि पश्यंति स्वप्नेऽपि चरणांबुजम्॥९१॥क्षिप्रं रोषं परित्यज्य भज पादांबुजं हरेः॥भ्रूभंगलीलामात्रेण सृष्टिसंहर्तुरेव
च ॥ ९२ ॥ निमेषमात्रादस्यैव ब्रह्मणः प[3]तनं भवेत् ॥ यस्यैकदिवसेऽप्यष्टाविंशतींद्राः पतंत्यपि ॥ ९३ ॥ एवमष्टोत्तरशतमायुर्य
स्य जगद्विधेः ॥ त्वं वा काऽन्याश्च वा राधे मदीश्वरवशेऽखिलम् ॥९४॥ श्रीदाम्नो वचनं श्रुत्वा केवलं कटु[4]मुज्ज्वलम् ॥सद्यश्चुकोप
सा ब्रह्मन्सद्यः प्राणेश्वरी हरेः ॥ ९५ ॥ रासेश्वरी बहिर्गत्वा तमुवाच ह निष्ठुरम् ॥ स्फुरदोष्ठी मुक्तकेशी रक्तांभोरुहलोचना ॥९६॥
॥ राधिकोवाच ॥ रेरे जाल्म महामूढ शृणु लंपटकिंकर ॥ त्वं च जानासि सर्वार्थं न जानामि त्वदीश्वरम् ॥ ९७ ॥ त्वदीश्वरश्च
श्रीकृष्णो न ह्यस्माकं व्रजाधम ॥ जानामि जनकं स्तौषि सदा निंदसि मातरम् ॥ ९८ ॥ यथाऽसुराश्च त्रिदशा नित्यं निंदंति संतत
म् ॥ तथा निंदसि मां मूढ तस्मात्त्वमसुरो भव ॥ ९९ ॥ गोप व्रजासुरीं योनिं गोलोकाच्च बहिर्भव ॥ मयाऽद्य शप्तो मूढस्त्वं कस्त्वां
रक्षितुमीश्वरः ॥ १०० ॥ रासेश्वरी तमित्युक्त्वा सुष्वाप विरराम च ॥ वयस्याः सेवयामासुश्चामरै रत्नमुष्टिभिः ॥ १०१ ॥ श्रुत्वा
च वचनं तस्याः कोपेन स्फुरिताधरः ॥ शशाप तां च श्रीदामा व्रज योनिं च मानुषीम् ॥ श्रीदामोवाच ॥ ॥ मानुष्या इव कोप
स्ते तस्मात्त्वं मानुषी भुवि ॥ १०२ ॥ भविष्यसि न संदेहो मया शप्ता त्वमंबिके ॥ छायया कलया वाऽपि परशक्त्या कलंकि
ना ॥ १०३ ॥ मूढा रा[5]पाणपत्नीं त्वां वक्ष्यंति जगतीतले ॥ रापाणः श्रीहरेरंशो वैश्यो वृंदावने वने ॥ १०४ ॥ भविष्यति महायोगी

---

१ स्तौति नित्यं सेवते च–इति पा० ।२ अस्यांशश्च तथा चायं ध्यायतेऽनुक्षणं परम्–इति पा० । ३ पतनं हरेः–इ०पा० । ४ कटुमुल्बणम् इ० पा० । ५ रायाणपत्नीम्–इ०पा० ।

राधाशापेन गर्भजः ॥ गोकुले प्राप्य तं कृष्णं विहरिष्यसि कानने ॥ १०५ ॥ भविता ते वर्षशतं विच्छेदो[1] हरिणा सह ॥ पुनः प्राप्य तमीशं च गोलोकमागमिष्यसि ॥ १०६ ॥ तामित्युक्त्वा च नत्वा च स जगाम हरेः पुरः ॥ गत्वा प्रणम्य श्रीकृष्णं शापाख्यानमुवाच ह ॥ १०७ ॥ आनुपूर्व्यात्तु तत्सर्वं रुरोद च भृशं पुनः ॥ उवाच तं रुदंतं च गच्छध्वं धरणीतलम् ॥ १०८ ॥ न जेता ते त्रिभुवने ह्यसुरेंद्रो भविष्यसि ॥ काले शंकरशूलेन देहं त्यक्त्वा ममांतिकम् ॥ १०९ ॥ आगमिष्यसि पंचाशद्युगांते[2] तु ममाशिषा ॥ श्रीकृष्णस्य वचः श्रुत्वा तमुवाच शुचाऽन्वितः ॥ ११० ॥ त्वद्भक्तिरहितं मां च कदाचिन्न करिष्यसि ॥ इत्युक्त्वा श्रीहरिं नत्वा जगाम स्वाश्रमाद्बहिः ॥ १११ ॥ पश्चाज्जगाम सा देवी रुरोद च पुनःपुनः ॥ क्व यासि वत्सेत्युच्चार्य विललाप भृशं सती ॥११२॥ श्रीदामाऽपि च तां नत्वा रुरोद प्रेमविह्वलः ॥ स एव शंखचूडश्च बभूव तुलसीपतिः ॥ ११३ ॥ गते श्रीदाम्नि सा देवी जगामेश्वरसन्निधिम् ॥ सर्वं निवेदयामास हरिः प्रत्युत्तरं ददौ ॥ ११४ ॥ शोकातुरां च तां कृष्णो बोधयामास प्रेयसीम् ॥ शंखचूडश्च काले न संप्राप पुनरीश्वरम् ॥ ११५ ॥ राधा जगाम धरणीं वाराहे हरिणा सह ॥ वृषभानुगृहे जन्म ललाभ गोकुले मुने ॥ ११६ ॥ इत्येवं कथितं सर्वं श्रीकृष्णाख्यानमंगलम् ॥ सर्वेषां वांछितं सारं किं भूयः श्रोतुमिच्छसि ॥११७॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंडे नारायणनारदसंवादे सप्तसमुद्रजन्मराधाश्रीदामशापोद्भवो नाम तृतीयोऽध्यायः ॥ ३ ॥

॥ नारद उवाच ॥ ॥ केन वा प्रार्थितः कृष्णो महीं च केन हेतुना ॥ आजगाम जगन्नाथो वद वेदविदां वर ॥ १ ॥ ॥ नारायण उवाच ॥ ॥ पुरा वाराहकल्पे सा भाराक्रांता वसुंधरा ॥ भृशं बभूव शोकार्ता ब्रह्माणं शरणं ययौ ॥ २ ॥ सुरैश्चासुरसंतप्तैर्भृशमुद्विग्नमानसैः ॥ सार्द्धं तैस्तां दुर्गमां च जगाम वेधसः सभाम् ॥ ३ ॥ ददर्श तस्यां देवेशं ज्वलंतं ब्रह्मतेजसा ॥ ऋषीन्द्रैश्च मुनीन्द्रैश्च सिद्धेंद्रैः सेवितं मुदा ॥ ४ ॥ अप्सरोगणनृत्यं च पश्यंतं सस्मितं मुदा ॥ गंधर्वाणां च संगीतं श्रुतवंतं मनोहरम् ॥ ५ ॥ जपंतं परमं ब्रह्म

---

[1] विरहो—इति पा० [2] । युगेऽतीते—इति पाठः ।

कृष्ण इत्यक्षरद्वयम् ॥ भक्त्यानंदाश्रुपूर्णं तं पुलकांकितविग्रहम् ॥ ६ ॥ भक्त्या सा त्रिदशैः सार्द्धं प्रणम्य चतुराननम् ॥ सर्वं निवेदनं
चक्रे दैत्यभारादिकं मुने ॥ साऽश्रुपूर्णा सपुलका तुष्टाव च रुरोद च ॥७॥ तामुवाच जगद्धाता कथं स्तौषि च रोदिषि ॥ कथमागमनं
भद्रे वद भद्रं भविष्यति ॥८॥ सुस्थिरा भव कल्याणि भयं किं ते मयि स्थिते॥ आश्वास्य पृथिवीं ब्रह्मा देवान्पप्रच्छ सादरम्
॥ ९ ॥ कथमागमनं देवा युष्माकं मम सन्निधिम् ॥ ब्रह्मणो वचनं श्रुत्वा देवा ऊचुः प्रजापतिम् ॥ १० ॥ भाराक्रांता च वसुधा
दस्युग्रस्ता वयं प्रभो ॥ त्वमेव जगतां स्रष्टा शीघ्रं नो निष्कृतिं कुरु ॥ ११ ॥ गतिस्त्वमस्या भो ब्रह्मन्निर्वृतिं कर्तुमर्हसि ॥ पीडिता
येन भारेण पृथिवीयं पितामह ॥ १२ ॥ वयं तेनैव दुःखार्तास्तद्भारहरणं कुरु ॥ देवानां वचनं श्रुत्वा तां पप्रच्छ जगद्विधिः॥१३॥
दूरीकृत्य भयं वत्से सुखं तिष्ठ ममांतिकम् ॥ केषां भारमशक्ता त्वं सोढुं पंकजलोचने ॥ १४ ॥ अपनेष्यामि तं भद्रे भद्रं ते भविता
ध्रुवम् ॥ तस्य सा वचनं श्रुत्वा तमुवाच स्वपीडनम् ॥ पीडिता येन येनैवं प्रसन्नवदनेक्षणा ॥ १५ ॥ ॥ क्षितिरुवाच ॥ ॥
शृणु तात प्रवक्ष्यामि स्वकीयां मानसीं व्यथाम् ॥ विना बंधुं सविश्वासं नान्यं कथितुमर्हति ॥ १६ ॥ स्त्रीजातिरबला शश्वद्रक्षणीया
स्वबंधुभिः ॥ जनकस्वामिपुत्रैश्च गर्हिताऽन्यैश्च निश्चितम् ॥ १७ ॥ त्वया पृष्टा जगत्तात न लज्जा कथितुं मम ॥
येषां भारैः पीडिताऽहं श्रूयतां कथयामि ते ॥ १८ ॥ कृष्णभक्तिविहीना ये ये च तद्भक्तनिंदकाः ॥ तेषां महापातकिनाम
शक्ता भारवाहने ॥ १९ ॥ स्वधर्माचारहीना ये नित्यकृत्यविवर्जिताः ॥ श्रद्धाहीनाश्च वेदेषु तेषां भारेण पीडिता ॥ २० ॥
पितृमातृगुरुस्त्रीणां पोषणं पुत्रपोष्ययोः ॥ ये न कुर्वंति तेषां च न शक्ता भारवाहने ॥ २१ ॥ ये मिथ्यावादिनस्तात दयासत्यविवर्जिताः
॥ निंदका गुरुदेवानां तेषां भारेण पीडिता ॥२२॥ [1]मित्रद्रोही कृतघ्नश्च मिथ्यासाक्ष्यप्रदायकः ॥ विश्वासघ्नो न्यासहर्ता
तेषां भारेण पीडिता ॥ २३ ॥ कल्याणसूक्त[2]सामानि हरेर्नामैकमंगलम् ॥ कुर्वंति विक्रयं ये वै तेषां भारेण पीडिता ॥ २४ ॥

---

[1] स्थाप्यहारी–इ०पा० । [2] युक्तनामानि–इ० पा० ।

जीवघाती गुरुद्रोही ग्रामयाजी च लुब्धकः ॥ शवदाही शूद्रभोजी तेषां भारेण पीडिता ॥ २५ ॥ [1]पूजायज्ञोपवासादिव्रतानि विविधानि च ॥ ये ये मूढा विहंतारस्तेषां भारेण पीडिता ॥२६॥ सदा द्विषंति ये पापा गोविप्रसुरवैष्णवान् ॥ हरिं हरिकथां भक्तिं तेषां भारेण पीडिता ॥ २७ ॥ [2]शंखादीनां च भारेण पीडिताऽहं यथा विधे ॥ ततोऽधिकानां दैत्यानां भारेण परिपीडिता ॥२८॥ इत्येवं कथितं सर्वं मद्व्यथाया निवेदनम् ॥ त्वया यदि [3]सुपाल्याऽहं प्रतीकारं कुरु प्रभो॥२९॥इत्येवमुक्त्वा वसुधा रुरोद च मुहुर्मुहुः ॥ ब्रह्मा तद्रोदनं दृष्ट्वा तामुवाच कृपानिधिः ॥ ३० ॥ भारं तवापनेष्यामि दस्यूनामप्युपायतः ॥ उपायतोऽपि कार्याणि सिद्ध्यंत्येव वसुन्धरे ॥३१॥ कालेन भारहरणं करिष्यति मदीश्वरः ॥ [4]मन्त्रं मंगलकुम्भं च शिवलिंगं च कुंकुमम् ॥ ३२ ॥ मधुकाष्ठं चंदनं च कस्तूरीं तीर्थमृत्तिकाम् ॥ खड्गगंडकखडं च स्फाटिकं पद्मरागकम् ॥३३॥ इंद्रनीलं सूर्यमणिं रुद्राक्षं कुशमूलकम् ॥ शालग्रामशिलां शंखं तुलसीं प्रतिमां जलम् ॥३४॥ शंखं प्रदीपमालां च शिलामर्च्यां च घंटिकाम्॥निर्माल्यं चैव नैवेद्यं हरिद्वर्णमणिं तथा॥ ग्रंथियुक्तं यज्ञसूत्रं दर्पणं श्वेतचामरम् ॥३५॥ गोरोचनं च मुक्तां च शुक्तिं माणिक्यमेव च ॥ पुराणसंहितां वह्निं कर्पूरं परशुं तथा ॥ ३६ ॥ रजतं कांचनं चैव प्रवालं रत्नमेव च ॥ कुशबीजं तीर्थतोयं गव्यं गोमूत्रगोमयम् ॥ ३७ ॥ त्वयि ये स्थापयिष्यंति मूढाश्चैतानि सुन्दरि ॥ [5]पर्यन्ते कालसूत्रेण वर्षाणामयुतं ध्रुवम् ॥३८॥ ब्रह्मा पृथ्वीं समाश्वास्य देवताभिस्तया सह ॥ जगाम जगतां धाता कैलासं शंकरालयम् ॥ ३९ ॥ गत्वा तमाश्रमं रम्यं ददर्श शंकरं विधिः ॥ वसंतमक्षयवटमूले स्वःसरितस्तटे ॥ ४० ॥ व्याघ्रचर्मपरीधानं दक्षकन्यास्थिभूषणम् ॥ त्रिशूलपट्टिशधरं पंचवक्त्रं त्रिलोचनम् ॥ ४१ ॥ नानासिद्धैः परिवृतं योगींद्रगणसेवितम् ॥ परितोऽप्सरसां नृत्यं पश्यंतं सस्मितं मुदा ॥ ४२ ॥ गंधर्वाणां च संगीतं श्रुतवंतं कुतूहलात् ॥ पश्यंतीं पार्वतीं प्रीत्या पश्यंतं वक्रचक्षुषा ॥ ४३ ॥ जपंतं पञ्चवक्त्रेण हरेर्नामैकमङ्गलम् ॥ मंदाकिनीपद्मबीजमालया पुलकांकितम् ॥ ४४ ॥ एतस्मिन्नंतरे ब्रह्मा

---

१ पूजायज्ञोपवासानां व्रतानां नियमस्य च–इ० पा० । २ शंखचूडस्य–इ० पा० । ३ सनाथाऽहम्–इ० पा० । ४ यंत्रम्–इ० पा० । ५ तिष्ठन्ति कालसूत्रे ते–इ० पा० ।

तस्थावग्रे स धूर्जटेः ॥ पृथिव्या सुरसंघैश्च सार्द्धं प्रणतकंधरैः ॥ ४५ ॥ उत्तस्थौ शंकरः शीघ्रं भक्त्या दृष्ट्वा जगद्गुरुम् ॥ ननाम मूर्ध्ना संप्रीत्या लब्धवानाशिषं ततः ॥ ४६ ॥ प्रणेमुर्देवताः सर्वे शंकरं चंद्रशेखरम् ॥ प्रणनाम धरा भक्त्या चाशिषं युयुजे हरः ॥ ४७ ॥ वृत्तांतं कथयामास पार्वतीशं प्रजापतिः ॥ श्रुत्वा नतमुखस्तूर्णं शंकरो भक्तवत्सलः ॥ ४८ ॥ भक्तापायं समाकर्ण्य पार्वतीपरमेश्वरौ ॥ बभूवतुस्तौ दुःखार्तौ बोधयामास तौ विधिः ॥ ४९ ॥ ततो ब्रह्मा महेशश्च सुरसंघान्वसुंधराम् ॥ गृहं प्रस्थापयामास समाश्वास्य प्रयत्नतः ॥५०॥ ततो देवेश्वरैस्तूर्णमागत्य धर्ममंदिरम् ॥ सह तेन समालोच्य प्रजग्मुर्भवनं हरेः ॥ ५१ ॥ वैकुंठं परमं धाम जरामृत्युहरं परम् ॥ वायुना धार्यमाणं च ब्रह्मांडादूर्ध्वमुत्तमम् ॥ कोटियोजनमूर्ध्वं च ब्रह्मलोकात्सनातनम् ५२ ॥ वर्णनीयं न कविभिर्विचित्रं रत्ननिर्मितम् ॥ पद्मरागैरिंद्रनीलैः राजमार्गैर्विभूषितम् ॥ ५३ ॥ ते मनोयायिनः सर्वे संप्रापुस्तं मनोहरम् ॥ हरेरंतःपुरं गत्वा ददृशुः श्रीहरिं सुराः ॥ ५४ ॥ रत्नसिंहासनस्थं च रत्नालंकारभूषितम् ॥ रत्नकेयूरवलयरत्ननूपुरशोभितम् ॥ ५५ ॥ रत्नकुण्डलयुग्मेन गंडस्थलविराजितम् ॥ पीतवस्त्रपरीधानं वनमालाविभूषितम् ॥ ५६ ॥ शांतं सरस्वतीकांतं लक्ष्मीधृतपदांबुजम् कोटिकंदर्पलीलाभं स्मितवक्त्रं चतुर्भुजम् ॥ ५७ ॥ सुनंदनंदकुमुदैः पार्षदैरुपसेवितम् ॥ चंदनोक्षितसर्वांगं सुरत्नमुकुटोज्ज्वलम् ॥ परमानंदरूपं च भक्तानुग्रहकारकम् ॥ ५८ ॥ तं प्रणेमुः सुरेंद्राश्च भक्त्या ब्रह्मादयो मुने ॥ तुष्टुवुः परया भक्त्या भक्तिनम्रात्मकंधराः ॥ परमानंदभारार्ताः पुलकांचितविग्रहाः ॥ ५९ ॥ ब्रह्मोवाच ॥ ॥ नमामि कमलाकांतं शांतं सर्वेशमच्युतम् ॥ वयं यस्य कलाभेदाः कलांशकलया सुराः ॥६०॥ मनवश्च मुनींद्राश्च मानुषाश्च चराचराः ॥ कलाकलांशकलया भूतास्त्वत्तो निरंजन ॥६१॥ शंकर उवाच ॥ त्वामक्षयमक्षरं वा व्यक्त[1]मव्यक्तमीश्वरम् ॥ अनादिमादिमानंदरूपिणं सर्वरूपिणम् ॥६२॥ अणिमादिकसिद्धीनां कारणं सर्वकारणम्॥ सिद्धिज्ञं सिद्धिदं सिद्धिरूपं कः स्तोतुमीश्वरः॥६३॥ ॥ धर्म उवाच ॥ ॥ वेदे निरूपितं वस्तु वर्णनीयं विचक्षणैः ॥ वेदे निर्वचनीयं यत्त

---

[1] राममव्यक्तमीश्वरम्—इ० पा० ।

न्निर्वक्तुं च कः क्षमः ॥ यस्य संभावनीयं यद्गुणरूपं निरंजनम् ॥ ६४ ॥ तदतिरिक्तं स्तवनं किमहं स्तौमि निर्गुणम् ॥ ब्रह्मादीनामिदं स्तोत्रं षट्श्लोकोक्तं महासुने ॥ ६५ ॥ पठित्वा मुच्यते दुर्गाद्वाञ्छितं च लभेन्नरः ॥ देवानां स्तवनं श्रुत्वा तानुवाच हरिः स्वयम् ॥ ६६ ॥ गोलोकं यात यूयं च यामि पश्चाच्छ्रिया सह ॥ नरनारायणौ तौ द्वौ श्वेतद्वीपनिवासिनौ ॥ ६७ ॥ एते यास्यंति गोलोकं तथा देवी सरस्वती ॥ [1]अनंता मम माया च कार्त्तिकेयो गणाधिपः ॥ सावित्री वेदमाता च पश्चाद्यास्यंति निश्चितम् ॥ ६८ ॥ तत्राहं द्विभुजः कृष्णो गोपीभी राधया सह ॥ अत्राहं कमलायुक्तः सुनंदादिभिरावृतः ॥ ६९ ॥ नारायणश्च कृष्णोऽहं श्वेतद्वीपनिवासकृत् ॥ [2]ममैवैताः कलाः सर्वे देवा ब्रह्मादयः स्मृताः ॥ ७० ॥ कलाकलांशकलया सुरासुरनरादयः ॥ गोलोकं यात यूयं च कार्यसिद्धिर्भविष्यति ॥ ७१ ॥ वयं पश्चाद्गमिष्यामः सर्वेषामिष्टसिद्धये ॥ इत्युक्त्वा वै सभामध्ये विरराम हरिः स्वयम् ॥ ७२ ॥ प्रणम्य देवताः सर्वा जग्मुर्गोलोकमद्भुतम् ॥ विचित्रं परमं धाम जरामृत्युहरं परम् ॥ ७३ ॥ ऊर्ध्वं वैकुंठतो गम्यं पंचाशत्कोटियोजनम् ॥ वायुना धार्यमाणं च निर्मितं स्वेच्छया विभोः ॥ ७४ ॥ तमनिर्वचनीयं च देवास्ते गमनोत्सुकाः ॥ ते मनोयायिनः सर्वे संप्रापुर्विरजातटम् ॥ ७५ ॥ दृष्ट्वा देवाः सरित्तीरं विस्मयं परमं ययुः ॥ शुद्धस्फटिकसंकाशं सुविस्तीर्णं मनोहरम् ॥ ७६ ॥ मुक्तामाणिक्यपरममणिरत्नाकरान्वितम् ॥ कृष्णशुभ्रहरिद्रक्तमणिराजिविराजितम् ॥ ७७ ॥ प्रवालांकुरमुद्भूतं कुत्राचित्सुमनोहरम् ॥ परमामूल्यसद्रत्नाकरराजिविभूषितम् ॥ ७८ ॥ विधेरदृश्यामाश्चर्यं निधिश्रेष्ठाकरान्वितम् ॥ पद्मरागेंद्रनीलानामाकरं कुत्रचिन्मुने ॥ ७९ ॥ कुत्रचिच्च मरकताकरश्रेणीसमन्वितम् ॥ स्यमंतकाकरं कुत्र कुत्राचिद्रुचकाकरम् ॥ ८० ॥ अमूल्यपीतवर्णाभं मणिश्रेण्याकरान्वितम् ॥ रत्नाकरं कुत्रचिच्च कुत्राचित्कौस्तुभाकरम् ॥ ८१ ॥ कुत्र निर्वचनीयानां मणीनामाकरं परम् ॥ कुत्राचित्कुत्रचिद्रम्यविहारस्थलमुत्तमम् ॥ ८२ ॥ दृष्ट्वा तु परमाश्चर्यं जग्मुस्तत्पारमीश्वराः ॥ ददृशुः पर्वतश्रेष्ठं शतशृंगं मनोर

---

१ अनंतः -इ० पा० । २ ममैवामी-इ० पा० ।

मम् ॥ ८३ ॥ पारिजाततरूणां च वनराजिविराजितम् ॥ कल्पवृक्षैः परिवृतं वेष्टितं कामधेनुभिः ॥ ८४ ॥ कोटियोजनमूर्ध्वं च
दैर्घ्यं दशगुणोत्तरम् ॥ शैलप्रस्थपरिमितं पंचाशत्कोटियोजनम् ॥८५॥ प्राकाराकारमस्यैव शिखरे रासमंडलम् ॥ दशयोजनविस्तीर्णं
वर्तुलाकारमुत्तमम् ॥ ८६ ॥ पुष्पोद्यानसहस्रेण पुष्पितेन सुगंधिना ॥ संकुलेन मधुव्राणां समूहेन समन्वितम् ॥ ८७ ॥ सुरत
द्रव्यसंयुक्तै राजितं रतिमंदिरैः ॥ रत्नमंडपकोटीनां सहस्रेण समन्वितम् ॥ ८८ ॥ रत्नसोपानयुक्तेन सद्रत्नकलशेन च ॥ हरिन्मणी
नां स्तंभेन शोभितेन च शोभितम् ॥८९॥ सिंदूरवर्णमणिभिः परितः खचितेन च ॥ इन्द्रनीलैर्मध्यगतैर्मंडितेन मनोहरैः ॥ ९० ॥
रत्नप्राकारसंयुक्तमणिभेदैर्विराजितम् ॥ द्वारैः कपाटसंयुक्तैश्चतुर्भिश्च विराजितम् ॥ ९१ ॥ रज्जुग्रंथिसमायुक्तरसालपल्लवान्वितैः ॥
परितः कदलीस्तंभसमूहैश्च समन्वितम् ॥ ९२ ॥ शुक्लधान्यपर्णजालफलदूर्वांकुरान्वितम् ॥ चंदनागरुकस्तूरीकुंकुमद्रवचार्चि
तम् ॥ ९३ ॥ वेष्टितं गोपकन्यानां समूहैः कोटिशो मुने ॥ रत्नालंकारसंयुक्तै रत्नमालाविराजितैः ॥ ९४ ॥ रत्नकंकणकेयूर
रत्ननूपुरभूषितैः ॥ रत्नकुण्डलयुग्मेन गंडस्थलविराजितैः ॥ ९५ ॥ रत्नांगुलीयललितैर्हस्तांगुलिविराजितैः ॥ [1]रत्नपाशकवृन्दैश्च
विराजितपदांगुलैः ॥ ९६ ॥ भूषितै रत्नभूषाभिः सद्रत्नमुकुटोज्ज्वलैः ॥ गजेंद्रमुक्तालंकारैर्नासिकामध्यराजितैः ॥ ९७ ॥
सिंदूरबिंदुना सार्द्धमलकाधःस्थलोज्ज्वलैः ॥ चारुचम्पकवर्णाभैश्चंदनद्रवचर्चितैः ॥ ९८ ॥ पीतवस्त्रपरीधानैर्बिंबाधरमनोहरैः ॥
शरत्पार्वणचंद्राणां [2]प्रभां मुष्णन्मुखोज्ज्वलैः ॥ ९९ ॥ शरत्प्रफुल्लपद्मानां शोभामोषणलोचनैः[3] ॥ कस्तूरीपात्रिकायुक्तै रेखाक्तकज्ज
लोज्ज्वलैः ॥ १०० ॥ प्रफुल्लमालतीमालाजालैः कबरशोभितैः ॥ मधुलुब्धमधुव्राणां समूहैश्चापि संकुलैः ॥ चारुणा गमनेनैव
गजखंजनगंजनैः ॥ १०१ ॥ वक्रभ्रूभंगसंयोगश्लक्ष्णस्मितसमन्वितैः ॥ पक्वदाडिमबीजाभदंतपंक्तिविराजितैः ॥ १०२ ॥
खगेंद्रचंचुशोभाढ्यनासिकोन्नतभूषितैः ॥ गजेंद्रगंडयुग्माभस्तनभारनतैरिव ॥ १०३ ॥ नितम्बकठिनश्रोणीपीनभारभरानतैः ॥

---

[1] षट्कैश्च पदांगुलिविराजितैः—इ० पा० । [2] प्रभाजुष्टमुखोज्ज्वलैः—इ०पा० । [3] मोचनैः—इ० पा० ।

कंदर्पशरचेष्टाभिर्जर्जरीभूतमानसैः ॥ १०४ ॥ दर्पणैः पूर्णचंद्रास्यसौंदर्यदर्शनोत्सुकैः ॥ राधिकाचरणांभोजसेवासक्तम
नोरथैः ॥१०५॥ सुंदरीणां समूहैश्च रक्षितं राधिकाज्ञया ॥ क्रीडासरोवराणां च लक्षैश्च परिवेष्टितम् ॥ १०६ ॥ श्वेतरक्तैर्लोहि
तैश्च वेष्टितैः पद्मराजितैः ॥ सुकूजद्भिर्मधुव्राणां समूहैः संकुलैः सदा ॥ १०७ ॥ पुष्पोद्यानसहस्रेण पुष्पितेन सम
न्वितम् ॥ कोटिकुंजकुटीरैश्च पुष्पशय्यासमन्वितैः ॥ १०८ ॥ भोगद्रव्यसकर्पूरतांबूलवस्त्रसंयुतैः ॥ रत्नप्रदीपैः परितः श्वेतचामरदर्प
णैः ॥ ॥ १०९ ॥ विचित्रपुष्पमालाभिः शोभितैः शोभितं मुने ॥ तं रासमंडपं दृष्ट्वा जग्मुस्ते पर्वताद्बहिः ॥ ११० ॥ ततो विचक्षणं
रम्यं ददृशुः सुंदरं वनम् ॥ वनं वृंदावनं नाम राधामाधवयोः प्रियम् ॥ १११ ॥ क्रीडास्थानं तयोरेव कल्पवृक्षचयान्वितम् ॥ विर
जातीरनीराक्तैः कंपितं मंदवायुभिः ॥ ११२ ॥ कस्तूरीयुक्तपत्राब्जैः पुष्पौघैः सुरभीकृतम् ॥ नवपल्लवसंसक्तपरपुष्टरुतैर्युतम्॥११३॥
कुत्र हेलिकदंबानां कदंबैः कमनीयकम् ॥ मंदाराणां चंपकानां चन्दनानां तथैव च ॥११४॥ सुगंधिकुसुमानां च गंधेन सुरभीकृतम् ॥
आम्राणां नागरंगाणां पनसानां तथैव च ॥ ११५ ॥ तालानां नारिकेलानां वृंदैर्वृंदारकं वनम् ॥ जंबूनां बदरीणां च खर्जूराणां विशे
षतः ॥ ११६ ॥ गुर्वाकाम्रातकानां च जंबीराणां च नारद ॥ कदलीनां श्रीफलानां दाडिमानां मनोहरैः ॥ ११७ ॥ सुपक्वफलसंयुक्तैः
समूहैश्च विराजितम् ॥ पिप्पलीनां[2] च शालानामश्वत्थानां तथैव च ॥ ११८ ॥ निंबानां शाल्मलीनां च तिंतिडीनां च शोभनैः ॥
अन्येषां तरुभेदानां संकुलैः संकुलं सदा ॥ ११९ ॥ परितः कल्पवृक्षाणां वृन्दैर्वृन्दैर्विराजितम् ॥ मल्लिकामालतीकुंदकेतकीमाधवी
लताः ॥ १२० ॥ एतासां च समूहैश्च यूथिकाभिः समन्वितम् ॥ चारुकुंजकुटीरैस्तैः पंचाशत्कोटिभिर्मुने ॥ १२१ ॥ रत्नप्रदीपदी
पैश्च धूपेन सुरभीकृतैः ॥ शृंगारद्रव्ययुक्तैश्च वासितैर्गंधवायुभिः ॥ १२२ ॥ चंदनाक्तैः पुष्पतल्पैर्मालाजालसमन्वितैः ॥ मधुलुब्धम
धुव्राणां कलशब्दैश्च शब्दितम् ॥ १२३ ॥ रत्नालंकारशोभाढ्यैर्गोपीवृंदैश्च वेष्टितम् ॥ पंचाशत्कोटिगोपीभी रक्षितं राधिका

---

१ वृन्दावनम्–इ० पा० । २ प्रियालानाम्–इ० पा० ।

ज्ञया ॥१२४॥ द्वात्रिंशत्काननं तत्र रम्यं रम्यं मनोहरम् ॥ वृंदावनाभ्यंतरितं निर्जनस्थानमुत्तमम् ॥ १२५ ॥ सुपक्वमधुरस्वादुफलैर्वृंदारकं
मुने ॥ गोष्ठानां च गवां चैव समूहैश्च समन्वितम् ॥१२६॥ पुष्पोद्यानसहस्रेण पुष्पितेन सुगंधिना ॥ मधुलुब्धमधुव्राणां
समूहेन समन्वितम् ॥ ॥ १२७ ॥ पंचाशत्कोटिगोपीनां विलासैश्च विराजितम् ॥ श्रीकृष्णतुल्यरूपाणां सद्रत्नगुंठितैर्वरैः ॥ १२८ ॥
दृष्ट्वा वृंदावनं रम्यं ययुर्गोलोकमीश्वराः ॥ परितो वर्तुलाकारं कोटियोजनविस्तृतम् ॥ १२९ ॥ रत्नप्राकारसंयुक्तं चतुर्द्वारान्वितं
मुने ॥ गोपानां च समूहैश्च द्वारपालैः समन्वितम् ॥ १३० ॥ आश्रमै रत्नखचितैर्नानाभोगसमन्वितैः ॥ गोपीनां कृष्णभृत्यानां पंचाशत्कोटिभिर्युतम्
॥१३१॥ भक्तानां गोपवृन्दानामाश्रमैः शतकोटिभिः ॥ ततोऽधिकसुविस्तीर्णैः सद्रत्नग्रथितैर्युतम्[2] ॥१३२॥ आश्रमैः
पार्षदानां च ततोऽधिकविलक्षणैः ॥ अमूल्यरत्नरचितैः संयुक्तं दशकोटिभिः ॥ १३३ ॥ पार्षदप्रवराणां च श्रीकृष्णरूपधारिणाम् ॥
आश्रमैः कोटिभिर्युक्तं सद्रत्नेन विनिर्मितैः ॥ १३४ ॥ राधिकाशुद्धभक्तानां गोपीनामाश्रमैर्वरैः ॥ सद्रत्नरचितैर्द्रव्यैर्द्वात्रिंशत्कोटिभिर्युतम्
॥१३५॥ तासां च किंकरीणां च भवनैः सुमनोहरैः ॥ मणिरत्नादिरचितैः शोभितं दशकोटिभिः ॥१३६॥ शतजन्मतपःपूता भक्ता
ये भारते भुवि ॥ हरिभक्तिपरा ये च कर्मनिर्वाणकारकाः ॥ १३७ ॥ स्वप्ने ज्ञाने हरेर्ध्याने विविष्टमानसा मुने ॥ राधाकृष्णेति कृष्णेति
प्रजपंतो दिवानिशम् ॥ १३८ ॥ तेषां श्रीकृष्णभक्तानां निवासैः सुमनोहरैः ॥ सद्रत्नमणिनिर्माणैर्नानाभोगसमन्वितैः ॥ १३९ ॥
पुष्पशय्यापुष्पमालाश्वेतचामरशोभितैः ॥ रत्नदर्पणशोभाढ्यैर्हरिन्मणिसमर्पितैः ॥ १४० ॥ अमूल्यरत्नकलशसमूहान्वितशेखरैः ॥
सूक्ष्मवस्त्राभ्यंतरितैः संयुक्तं शतकोटिभिः ॥ १४१ ॥ देवास्तमद्भुतं दृष्ट्वा कियद्दूरं ययुर्मुदा ॥ तत्राक्षयवटं रम्यं ददृशुर्जगदीश्वराः ॥
॥१४२ ॥ पंचयोजनविस्तीर्णमूर्ध्वं तद्द्विगुणं मुने ॥ सहस्रस्कंधसंयुक्तशाखासंस्थासमन्वितम् ॥ १४३ ॥ रक्तपक्वफलाकीर्णं शोभितं
रत्नवेदिभिः ॥ कृष्णस्वरूपांस्तन्मूले ददृशुर्वल्लभाञ्छिशून्[3] ॥ १४४ ॥ पीतवस्त्रपरीधानान्क्रीडासक्तमनोहरान् ॥ चन्दनोक्षितसर्वां

---

१ वृन्दावनम्–इ० पा० । २ ग्रथितैः–इ० पा० । ३ प्रबलान्–इ० पा० ।

गात्रत्नभूषणभूषितान् ॥ १४५ ॥ ददृशुस्तत्र देवेशाः पार्षदप्रवरान्हरेः ॥ ततोऽविदूरे ददृशू राजमार्गं मनोहरम् ॥ १४६ ॥ सिंदूराकारमणिभिः परितो रचितं मुने ॥ इंद्रनीलैः पद्मरागैर्हीरकै रुचकैस्तथा ॥ १४७ ॥ निर्मितैर्वेदिभिर्युक्तं परितो रत्नमंडपम् ॥ चंदनागुरुकस्तूरीकुंकुमद्रवचर्चितम् ॥ १४८ ॥ दधिपूर्णलाजफलपुष्पदूर्वांकुरान्वितम् ॥ सूक्ष्मसूत्रग्रंथियुक्तश्रीखंडपल्लवान्वितम् ॥ १४९ ॥ रंभास्तंभसमूहैश्च कुङ्कुमाक्तैर्विराजितम् ॥ सद्रत्नमंडलघटैः फलशाखासमन्वितैः ॥ १५० ॥ सिंदूरकुङ्कुमाक्तैश्च गंधचंदनचर्चितैः ॥ भूषितैः पुष्पमालाभिः पादपैः परिभूषितम् ॥ १५१ ॥ गोपिकानां समूहैश्च क्रीडासक्तैश्च वेष्टितम् ॥ बहुमूल्येन रत्नेन रत्नसोपाननिर्मितान् ॥ १५२ ॥ वह्निशौचांशुकै रम्यैः श्वेतचामरदर्पणैः ॥ रत्नतल्पविचित्रैश्च पुष्पमाल्यैर्विराजितान् ॥ १५३ ॥ षोडशद्वारसंयुक्तान्द्वारपालैश्च रक्षितान् ॥ परितः परिखायुक्तान्रत्नप्राकारवेष्टितान् ॥ १५४ ॥ चंदनागुरुकस्तूरीकुंकुमद्रवचर्चितान् ॥ गृहान्मनोरमान्दृष्ट्वा ते देवा गमनोत्सुकाः ॥ १५५ ॥ जग्मुः शीघ्रं कियद्दूरं ददृशुः सुन्दरं ततः ॥ आश्रमं राधिकायाश्च रासेश्वर्याश्च नारद ॥ १५६ ॥ देवाधिदेव्या गोपीनां वरायाश्चारुनिर्मितम् ॥ प्राणाधिकायाः कृष्णस्य रम्यद्रव्यमनोहरम् ॥ १५७ ॥ सर्वानिर्वचनीयं च पंडितैर्न निरूपितम् ॥ सुचारुवर्तुलाकारं षड्गव्यूतिप्रमाणकम् ॥ १५८ ॥ शतमंदिरसंयुक्तं ज्वलितं रत्नतेजसा ॥ अमूल्यरत्नसाराणां चयैर्विरचितं वरम् ॥ १५९ ॥ दुर्लंघ्याभिर्गंभीराभिः परिखाभिः सुशोभितम् ॥ कल्पवृक्षैः परिवृतं पुष्पोद्यानशतांतरम् ॥ १६० ॥ सुमूल्यरत्नखचितप्राकारैः परिवेष्टितम् ॥ सद्रत्नवेदिकायुक्तैर्युक्तं द्वारैश्च सप्तभिः ॥ १६१ ॥ संयुक्तं रत्नचित्रैश्च विचित्रैर्वर्तुलं मुने ॥ प्रधानसप्तद्वारेभ्यः क्रमशः क्रमशो मुने ॥ १६२ ॥ सर्वतोऽपि ततस्तत्र षोडशद्वारसंयुतम् ॥ देवा दृष्ट्वा च प्राकारं सहस्रधनुरुच्छ्रितम् ॥ १६३ ॥ सद्रत्नक्षुद्रकलशसमूहैः सुमनोहरैः ॥ प्रदीप्तं तेजसा रम्यं परमं विस्मयं ययुः ॥ १६४ ॥ ततः प्रदक्षिणीकृत्य कियद्दूरं ययुर्मुदा ॥ पुरतो गच्छतां तेषां पश्चाद्भूतस्तदाश्रमः ॥ १६५ ॥ गोपानां गोपिकानां च ददृशुश्चाश्रमान्परान् ॥ अमूल्यरत्नरचिताञ्छतकोटिमितान्मुने ॥ १६६ ॥

दर्शंदर्शं च परितो गोपानां सर्वमाश्रमम् ॥ गोपिकानां चापरं वा रम्यं रम्यं नवं नवम् ॥ १६७ ॥ गोलोकं निखिलं दृष्ट्वा
पुलकांगं ययुः सुराः ॥ तदेव वर्तुलाकारं रम्यं वृंदावनं वनम् ॥ १६८ ॥ ददृशुः शतशृंगं च तद्बाहिर्विरजानदीम् ॥ विरजां
तां ययुर्देवा ददृशुः शून्यमेव च ॥ १६९ ॥ वाय्वाधारं च गोलोकं सद्रत्नमयमद्भुतम् ॥ ईश्वरेच्छाविनिर्माणं राधिकाज्ञा
नुबंधनात् ॥ १७० ॥ युक्तं सहस्रैः सरसां केवलं मंगलालयम् ॥ नृत्यं च ददृशुस्तत्र देवाश्च सुमनोहरम् ॥ १७१ ॥ सुतानं
चारुसंगीतं राधाकृष्णगुणान्वितम् ॥ श्रुत्वैव गीतपीयूषं मूर्छामापुः सुरा मुने ॥ १७२ ॥ क्षणेन चेतनां प्राप्य ते देवाः कृष्ण
मानसाः ॥ ददृशुः परमाश्चर्यं स्थानेस्थाने मनोहरम् ॥ १७३ ॥ ददृशुर्गोपिकाः सर्वा नानावेषविधायिकाः ॥ काश्चिन्मृदंग
हस्ताश्च काश्चिद्वीणाकरा वराः ॥ १७४ ॥ काश्चिच्चामरहस्ताश्च करतालकराः पराः ॥ काश्चिद्यंत्रवाद्यहस्ता रत्ननूपुरशोभिताः
॥ १७५ ॥ सद्रत्नकिंकिणीजालशब्देन शब्दिता वराः ॥ काश्चिन्मस्तककुंभाश्च नृत्यभेदमनोरथाः ॥ १७६ ॥ पुंवेषनायिकाः
काश्चित्काश्चित्तासां च नायिकाः ॥ कृष्णवेषधराः काश्चिद्राधावेषधराः पराः ॥ १७७ ॥ काश्चित्संयोगविरताः काश्चिदालिं
गने रताः ॥ क्रीडासक्ताश्च ता दृष्ट्वा सस्मिता जगदीश्वराः ॥ १७८ ॥ प्रगच्छंतः कियद्दूरं ददृशुश्चाश्रमान्बहून् ॥ राधासखी
नां गेहांश्च प्रधानानां च नारद ॥१७९॥ रूपेणैव गुणेनैव वेषेण यौवनेन च ॥ सौभाग्येनैव वयसा सदृशीनां च तत्र वै
॥ १८० ॥ त्रयस्त्रिंशद्वयस्याश्च राधिकायाश्च गोपिकाः ॥ वेषानिर्वचनीयाश्च तासां नामानि च शृणु ॥ १८१ ॥ सुशीला
च शशिकला यमुना माधवी रती ॥ कदंबमाला कुंती च जाह्नवी च स्वयंप्रभा ॥ १८२ ॥ चंद्रमुखी च सावित्री गायत्री
सुमुखी सुखा ॥ पद्मालया पारिजाता गौरी च सर्वमंगला ॥ १८३ ॥ कालिका कमला दुर्गा भारती च सरस्वती ॥ गंगा
ऽम्बिका मधुमती चंपाऽपर्णा च सुंदरी ॥ १८४ ॥ कृष्णप्रिया सती चैव नंदिनी नंदनेति च ॥ एताः समानाः सद्रत्नरचिता

---

१ पद्ममुखी सावित्री च सुधामुखी ॥ शुभा पद्मा--इ० पा० ।

राधिकाप्रियाः ॥ १८५ ॥ एतासां समरूपाणां रत्नधातुविचित्रितान् ॥ नानाप्रकारचित्रेण चित्रितान्सुमनोहरान् ॥ १८६ ॥
अमूल्यरत्नकलशसमूहैः शिखरोज्ज्वलान् ॥ सद्रत्नरचिताञ्छुभ्रानाश्रमान्ददृशुस्तथा ॥ १८७ ॥ ब्रह्मांडाद्बहिरूर्ध्वं च नास्ति
लोकस्तदूर्ध्वंकः ॥ ऊर्ध्वं शून्यमयं सर्वं तदंता सृष्टिरेव च ॥ १८८ ॥ रसातलेभ्यः सप्तभ्यो नास्त्यधः सृष्टिरेव च ॥ तदधश्च जलं
ध्वांतमगंतव्यमदृश्यकम् ॥ ब्रह्मांडांतं तद्बहिश्च सर्वं मत्तो निशामय ॥ १८९ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंडे
नारायणनारदसंवादे गोलोकवर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥ श्रीनारायण उवाच ॥ गोलोकं निखिलं दृष्ट्वा देवास्ते
हृष्टमानसाः ॥ पुनराजग्मू राधायाः प्रधानद्वारमेव च ॥ १ ॥ सद्रत्नमणिनिर्माणं वेदिकायुग्मसंयुतम् ॥ हरिद्राकारमणिना
वज्रसंमिश्रितेन च ॥ २ ॥ अमूल्यरत्नरचितकपाटेन विभूषितम् ॥ द्वारे नियुक्तं ददृशुर्वीरभानुमनुत्तमम् ॥ ३ ॥ रत्नसिंहासन
स्थं च रत्नाभरणभूषितम् ॥ पीतवस्त्रपरीधानं सद्रत्नमुकुटोज्ज्वलम् ॥ ४ ॥ द्वारं चित्रविचित्रेण विचित्रं परमाद्भुतम् ॥ सर्वं निवेदनं
चक्रुर्दैवा दौवारिकं मुदा ॥ ५ ॥ तानुवाच द्वारपालो निःशंकं त्रिदशेश्वरान् ॥ नाहं विनाऽऽज्ञया गंतुं दातुं सांप्रतमीश्वरः ॥६॥
किंकरान्प्रेषयामास श्रीकृष्णस्थानमेव च ॥ हरेरनुज्ञां संप्राप्य ददौ गंतुं सुरान्मुने ॥ ७ ॥ तं संभाष्य ययुर्दैवा द्वितीयं द्वारमु
त्तमम् ॥ ततोऽधिकं विचित्रं च सुंदरं सुमनोहरम् ॥ ८ ॥ द्वारे नियुक्तं ददृशुश्चंद्रभानुं च नारद ॥ किशोरं श्यामलं चारु
स्वर्णवेत्रधरं वरम् ॥ ९ ॥ रत्नसिंहासनस्थं च रत्नभूषणभूषितम् ॥ गोपानां च समूहेन पंचलक्षेण शोभितम् ॥ १० ॥ तं
संभाष्य ययुर्दैवास्तृतीयं द्वारमुत्तमम् ॥ ततोऽतिसुन्दरं चित्रं ज्वलन्तं मणितेजसा ॥ ११ ॥ द्वारे नियुक्तं ददृशुः सूर्यभानुं च नारद ॥
द्विभुजं मुरलीहस्तं किशोरं श्यामसुन्दरम् ॥ १२ ॥ मणिकुण्डलयुग्मेन कपोलस्थलराजितम् ॥ रत्नदंडकरं श्रेष्ठं प्रेष्यं राधे
शयोः परम् ॥ १३ ॥ नवलक्षेण गोपानां वेष्टितं च नृपेंद्रवत् ॥ तं संभाष्य ययुर्दैवाश्चतुर्थं द्वारमेव च ॥१४॥ तेभ्यो विलक्षणं रम्यं
सुदीप्तं माणितेजसा ॥ अत्यद्भुतविचित्रेण भूषितं सुमनोहरम् ॥ १५ ॥ द्वारे नियुक्तं ददृशुर्वसुभानुं व्रजेश्वरम् ॥ किशोरं सुन्दरवरं

मणिदण्डकरं परम् ॥ १६ ॥ रत्नसिंहासनस्थं च रत्नभूषणभूषितम् ॥ पक्वबिंबाधरोष्ठं च सस्मितं सुमनोहरम् ॥ १७ ॥ तं संभाष्य
ययुर्देवाः पञ्चमं द्वारमेव च ॥ वज्रभित्तिस्थितैश्चित्रविचित्रैर्ज्वलितं परम् ॥ १८ ॥ द्वारपालं च ददृशुर्देवभानुं च तत्र वै ॥ चारु
सिंहासनस्थं च रत्नभूषणभूषितम् ॥ १९ ॥ मयूरपिच्छचूडं च रत्नमालाविभूषितम् ॥ कदंबपुष्पसंसक्तसद्रत्नकुण्डलोज्ज्वलम्
॥ २० ॥ चंदनागरुकस्तूरीकुङ्कुमद्रवचार्चितम् ॥ नृपेंद्रवरतुल्यं च दशलक्षप्रजान्वितम् ॥ २१ ॥ तं वेत्रपाणिं संभाष्य ययुर्देवा
मुदाऽन्विताः ॥ विलक्षणं द्वारषट्कं चित्रराजिविराजितम् ॥ २२ ॥ वज्रभित्तियुग्मयुक्ते पुष्पमाल्यविभूषिते ॥ द्वारे नियुक्तं ददृशुः
शुक्रभानुं व्रजेश्वरम् ॥ २३ ॥ नानालंकारशोभाढ्यं दशलक्षप्रजान्वितम् ॥ श्रीखंडपल्लवासक्तकपोलं कुण्डलोज्ज्वलम् ॥ २४ ॥ तूर्णं
सुरास्तं संभाष्य ययुर्द्वारं च सप्तमम् ॥ नानाप्रकारचित्रं च षड्भ्यश्चातिविलक्षणम् ॥ २५ ॥ द्वारे नियुक्तं ददृशू रत्नभानुं
हरेः प्रियम् ॥ चंदनोक्षितसर्वांगं पुष्पमालाविभूषितम् ॥ भूषितं भूषणै रम्यैर्मणिरत्नमनोहरैः ॥ २६ ॥ गोपैर्द्वादशलक्षैश्च
राजेंद्रमिव राजितम् ॥ रत्नसिंहासनस्थं च स्मेराननसरोरुहम् ॥ २७ ॥ तं वेत्रहस्तं संभाष्य जग्मुर्देवेश्वरा मुदा ॥ विचित्र
मष्टमं द्वार सप्तभ्योऽपि विलक्षणम् ॥ २८ ॥ दौवारिकं ते ददृशुः सुपार्श्वं सुमनोहरम् ॥ सस्मितं सुन्दरवरं श्रीखण्डतिलकोज्ज्व
लम् ॥ २९ ॥ बन्धुजीवाधरोष्ठं च रत्नकुण्डलमंडितम् ॥ सर्वालंकारशोभाढ्यं रत्नदण्डधरं वरम् ॥ ३० ॥ गोपैर्द्वादशलक्षैश्च
किशोरैश्च समन्वितम् ॥ ततःशीघ्रं ययुर्देवा नवमं द्वारमीप्सितम् ॥३१॥ वज्रसद्रत्नरचितं चतुर्वेदिसमन्वितम् ॥ अपूर्वचित्ररचितं[1]माल
जालैर्विराजितम् ॥ ३२ ॥ द्वारपालं च ददृशुः सुबलं ललिताकृतिम् ॥ नानाभूषणशोभाढ्यं[2] भूषणार्हं मनोहरम् ॥ ३३ ॥ वज्रैर्द्वाद
शलक्षैश्च संयुक्त सुमनोहरम् ॥ तं दण्डहस्तं सम्भाष्य सुरा द्वारांतरं ययुः ॥ ३४ ॥ विशिष्टं दशमं द्वारं दृष्ट्वा ते विस्मयं[3] ययुः ॥ ॥ १२ ॥
सर्वानिर्वचनीयं चाप्यदृष्टमश्रुतं मुने ॥ ३५ ॥ ददृशुर्द्वारपालं च सुदामानं च सुन्दरम् ॥ अनिर्वचनीयरूपं कृष्णतुल्यं मनोह

---

१ युक्तं च–इ० पा० । २ भूषाढ्यम्–इ० पा० । ३ विस्मिताः सुराः–इ० पा० ।

रम् ॥ ३६ ॥ गोपविंशतिलक्षाणां समूहैः परिवारितम् ॥ तं दण्डहस्तं दृष्ट्वैव जग्मुर्द्वारांतरं सुराः ॥ ३७ ॥ द्वारमेकादशाख्यं च सुचित्रं महदद्भुतम् ॥ द्वारपालं च तत्रस्थं श्रीदामानं व्रजेश्वरम् ॥ ३८ ॥ राधिकापुत्रतुल्यं च पीतवस्त्रेण भूषितम् ॥ अमूल्यरत्नरचितरत्न[1]सिंहासनस्थितम् ॥ ३९ ॥ अमूल्यरत्नभूषाभिर्भूषितं सुमनोहरम् ॥ चन्दनागुरुकस्तूरीकुंकुमेन विराजितम् ॥ ४० ॥ गण्डस्थलकपोलार्हसद्रत्नकुण्डलोज्ज्वलम् ॥ सद्रत्नश्रेष्ठरचितविचित्रमुकुटोज्ज्वलम् ॥ ४१ ॥ प्रफुल्लमालतीमालाजालैः सर्वांगभूषितम् ॥ कोटिगोपैः परिवृतं राजेन्द्राधिकमुज्ज्वलम् ॥ ४२ ॥ तं संभाष्य ययुर्द्वारं द्वादशाख्यं सुरा मुदा ॥ अमूल्यरत्नरचितवेदिकाभिः समन्वितम् ॥ ४३ ॥ सर्वेषां दुर्लभं चित्रमदृश्यमश्रुतं मुने ॥ वज्रभित्तिस्थितं चित्रं सुन्दरं सुमनोहरम् ॥ ४४ ॥ द्वारे नियुक्ता ददृशुर्देवा गोपांगना वराः ॥ [2]नवयौवनसंपन्ना रत्नाभरणभूषिताः ॥ ४५ ॥ पीतवस्त्रपरीधानाः कबरीभारभूषिताः ॥ सुगंधिमालतीमालाजालैः सर्वांगभूषिताः ॥ ४६ ॥ रत्नकंकणकेयूररत्ननूपुरभूषिताः ॥ रत्नकुंडलयुग्मेन गण्डस्थलविराजिताः ॥ ४७ ॥ चन्दनागुरुकस्तूरीकुंकुमद्रवचर्चिताः ॥ पीनश्रोणीभरानम्रा नितंबाभारपीडिताः ॥ ४८ ॥ गोपीनां शतकोटीनां श्रेष्ठाः प्रेष्ठा हरेरपि ॥ गोपीश्च कोटिशो दृष्ट्वा सुरास्ते विस्मयं ययुः ॥ ४९ ॥ संभाष्य ता मुदा युक्ता ययुर्द्वारांतरं मुने ॥ ततश्च क्रमशो विप्र त्रिषु द्वारेषु तत्र वै ॥ ५० ॥ गोपांगनानां श्रेष्ठाश्च ददृशुः सुमनोहराः ॥ वराणां च वरा रम्या धन्या मान्याश्च शोभनाः ॥ ५१ ॥ सर्वाः सौभाग्ययुक्ताश्च राधिकायाः प्रियाश्च ताः ॥ भूषिता भूषणै रम्यैः प्रोद्भिन्ननवयौवनाः ॥ ५२ ॥ एवं द्वारत्रयं दृष्ट्वा [3]स्वप्नाज्ञानाद्भुताश्रुतम् ॥ अदृश्यमतिरम्यं चाप्यनिरूप्यं विचक्षणैः ॥ ५३ ॥ तास्ताः संभाष्य देवास्ते विस्मिता ययुरीश्वराः ॥ राधिकाभ्यंतरं द्वारं षोडशाख्यं मनोहरम् ॥ ५४ ॥ सर्वासां च प्रधानं च गोप्यं गोपांगनागणैः ॥ त्रयस्त्रिंशद्वयस्यानां निकरैर्वेष्टितं मुने ॥ ५५ ॥ तेषामनिर्वचनीयैर्नानागुणसमन्वितैः ॥ रूपयौवनसंपन्नै रत्नालंकारभूषितैः ॥ ५६ ॥ रत्नकंकण

---

[1] रम्य–इ० पा० । [2] रूपयौवनसंपन्नाः–इ० पा० । [3] सुज्ञानादद्भुताश्रयम्–इ० पा० ।

केयूररत्ननूपुरभूषितैः ॥ सद्रत्नकिंकिणीजालैर्मध्यदेशविभूषितैः ॥ ५७ ॥ रत्नकुंडलयुग्मेन गंडस्थलविराजितैः ॥ प्रफुल्लमालतीमालाजालैर्वक्षस्थलोज्ज्वलैः ॥ ५८ ॥ शरत्पार्वणपद्मानां प्रभां मुष्णन्मुखेंदुभिः ॥ पारिजातप्रसूनानां मालाजालेन वेष्टितैः ॥ ॥ ५९ ॥ पक्वबिंबाधरोष्ठैश्च स्मेराननसरोरुहैः ॥ पक्वदाडिमबीजाभिः शोभितैर्दंतपंक्तिभिः ॥ ६० ॥ चारुचंपकवर्णाभिर्मध्यस्थलकृशैर्मुने ॥ गजमौक्तिकयुक्ताभिर्नासिकाभिर्विराजितैः ॥ ६१ ॥ खगेंद्रचारुचंचूनां शोभामुष्णाभिरेव च ॥ गजेंद्रगंडकठिनस्तनभारभरानतैः ॥ ६२ ॥ पीनश्रोणिभरार्तैश्च मुकुंदपदमानसैः ॥ निमेषरहिता देवा द्वारं च ददृशुश्च ताः ॥६३॥ लसद्रमणिरत्नैश्च वेदिकायुग्मशोभितम् ॥ हरिन्मणीनां स्तंभानां समूहैः संयुतं सदा ॥ ६४ ॥ सिंदूराकारमणिभिर्मध्यस्थलविराजितैः ॥ पारिजातप्रसूनानां मालाजालैर्विभूषितम् ॥ ६५ ॥ तत्संस्पर्शैर्गंधवाहैः सर्वत्र सुरभीकृतम् ॥ दृष्ट्वा तत्परमाश्चर्यं राधिकाभ्यंतरं सुराः ॥ ६६ ॥ श्रीकृष्णचरणांभोजदर्शनैकमनोरथाः ॥ ताः संभाष्य ययुः शीघ्रं पुलकांचितविग्रहाः ॥ ६७ ॥ भक्त्युद्रेकादश्रुपूर्णाः किंचिन्नम्रात्म[1]कंधराः ॥ आरात्ते ददृशुर्देवा राधिकाभ्यंतरं वरम् ॥ ६८ ॥ मंदिराणां च मध्यस्थं चतुःशालं मनोहरम् ॥ अमूल्यरत्नसाराणां सारेण रचितं परम् ॥ ६९ ॥ नानारत्नमणिस्तंभैर्वज्रयुक्तैश्च भूषितम् ॥ पारिजातप्रसूनानां मालाजालैर्विराजितम् ॥ ७० ॥ मुक्तासमूहैर्माणिक्यैः श्वेतचामरदर्पणैः ॥ अमूल्यरत्नसाराणां कलशैर्भूषितं मुने ॥ ७१ ॥ पट्टसूत्रग्रंथियुक्तश्रीखंडपल्लवान्वितैः ॥ मणिस्तंभसमूहैश्च रम्यप्रांगणभूषितम् ॥ ७२ ॥ चंदनागुरुकस्तूरीकुंकुमद्रवसंयुतम् ॥ शुक्लधान्यशुक्लपुष्पप्रवालफलतंडुलैः ॥ ७३ ॥ पर्णदूर्वाक्षतैर्लाजैर्निर्मंछनविभूषितैः ॥ फलयुक्तै रत्नकुंभैः सिंदूरकुंकुमान्वितैः ॥ ७४ ॥ पारिजातप्रसूनानां मालायुक्तैर्विराजितम् ॥ प्रसूनाक्तैर्गंधवाहैः सर्वत्र सुरभीकृतम् ॥ ७५ ॥ सर्वानिर्वचनीयं च यद्द्रव्यमनिरूपितम् ॥ ब्रह्मांडे दुर्लभं यद्यद्वस्तुभिस्तैर्विराजितम् ॥ ७६ ॥ पारिजातप्रसूनानां मालाजालैः सुशोभितम् ॥ रत्नशय्यासु ललिताः सूक्ष्मवस्त्रपरिच्छदाः ॥ ७७ ॥ कोटिशो

---

[1] नम्रास्य–इ० पा०।

रत्नकुंभाश्च रत्नपात्राणि नारद ॥ अमूल्यानि च चारूणि तैस्तैरेव विभूषितम् ॥७८॥ नानाप्रकारवाद्यानां कलनादैर्निनादितम् ॥ स्वर
यंत्रैश्च वीणाभिर्गोपीसंगीतसुश्रुतम् ॥ ७९ ॥ मोहितं वाद्यशब्दैश्च मृदंगानां च नारद ॥ गोपानां कृष्णतुल्यानां समूहैः परिवारितम्
॥८०॥ राधासखीनां गोपीनां वृंदैर्वृंदैर्विराजितम् ॥ राधाकृष्णगुणोद्रेकपदसंगीत्तसुश्रुतम्॥८१॥एवमभ्यंतरं दृष्ट्वा बभूवुर्विस्मिताः सुराः॥
शुश्रुवुर्मधुरं गीतं ददृशुर्नृत्यमुत्तमम् ॥८२॥ तत्र तस्थुः सुराः सर्वे ध्यानैकतानमानसाः ॥ रत्नसिंहासनं रम्यं ददृशुस्त्रिदशेश्वराः ॥ ८३ ॥
धनुःशतप्रमाणं च परितो वर्तुलाकृतिम् ॥ सद्रत्नक्षुद्रकलशसमूहैश्च समन्वितम् ॥ ८४ ॥ चित्रपुत्तलिकापुष्पाचित्रकाननभूषितम् ॥ तत्र
तेजःसमूहं च सूर्यकोटिसमप्रभम् ॥ ८५ ॥ प्रभया ज्वलितं ब्रह्मन्नाश्चर्यं महदद्भुतम् ॥ सप्ततालप्रमाणं तद्व्याप्तमूर्ध्वं समन्ततः॥८६॥
तेजोमुषं च सर्वेषां महाश्रमविवर्जितम् ॥ सर्वव्यापि सर्वबीजं चक्षूरोधकरं परम् ॥८७॥ दृष्ट्वा तेजःस्वरूपं च ते देवा ध्यानतत्पराः ॥
प्रणेमुः परया भक्त्या भक्तिनम्रात्मकंधराः ॥ ८८ ॥ परमानन्दसंयोगादश्रुपूर्णविलोचनाः ॥ पुलकांकितसर्वांगा वांछापूर्णमनोर
थाः ॥ ८९ ॥ नत्वा तेजःस्वरूपं च तमीशं त्रिदशेश्वराः ॥ तत्रोत्थाय ध्यानयुक्ताः प्रतस्थुस्तेजसः पुरः ॥ ९० ॥ ध्यात्वैवं जगतां
धाता बभूव संपुटांजलिः ॥ दक्षिणे शंकरं कृत्वा वामे धर्मं च नारद ॥ ९१ ॥ भक्त्युद्रेकात्प्रतुष्टाव ध्यानैकतानमानसः ॥ परात्परं
गुणातीतं परमात्मानमीश्वरम् ॥ ९२ ॥ ॥ ब्रह्मोवाच ॥ ॥ वरं वरेण्यं वरदं वरदानां च कारणम् ॥ कारणं सर्वभूतानां तेजो
रूपं नमाम्यहम् ॥ ९३ ॥ मंगलं मंगलानां च मंगलं मंगलप्रदम् ॥ समस्तमंगलाधारं तेजोरूपं नमाम्यहम् ॥ ९४ ॥ स्थितं सर्वत्र
निर्लिप्तमात्मरूपं परात्परम् ॥ निरीहमवितर्क्यं च तेजोरूपं नमाम्यहम् ॥ ९५ ॥ सगुणं निर्गुणं ब्रह्म ज्योतीरूपं सनातनम् ॥
साकारं च निराकारं तेजोरूपं नमाम्यहम् ॥ ९६ ॥ तमानिर्वचनीयं च व्यक्तमव्यक्तमेककम् ॥ स्वेच्छामयं सर्वरूपं तेजोरूपं नमा
म्यहम् ॥ ९७ ॥ गुणत्रयविभागाय रूपत्रयधरं परम् ॥ कलया ते कृताः[1] सर्वे किं जानन्ति श्रुतेः परम् ॥ ९८ ॥ सर्वाधारं सर्व

---

[1] सुराः–इ० पा० ।

रूपं सर्वबीजमबीजकम् ॥ सर्वांतकमनन्तं[1] च तेजोरूपं नमाम्यहम् ॥ ९९ ॥ लक्ष्यं षड्गुणरूपं च वर्णनीयं विचक्षणैः ॥ किं वर्ण
यामि लक्ष्यं च तेजोरूपं नमाम्यहम् ॥ १०० ॥ अशरीरं विग्रहवदिंद्रियं यदतींद्रियम् ॥ यदसाक्षि सर्वसाक्षि तेजोरूपं नमाम्य
हम् ॥ १०१ ॥ गमनार्हमपादं यदचक्षुः सर्वदर्शनम् ॥ हस्तास्यहीनं यद्भोक्तृ तेजोरूपं नमाम्यहम् ॥ १०२ ॥ वेदे निरूपितं
वस्तु सन्तः शक्ताश्च वर्णितुम् ॥ वेदेऽनिरूपितं यत्तत्तेजोरूपं नामाम्यहम् ॥ १०३ ॥ सर्वेशं यदनीशं यत्सर्वादि यदनादि
यत् ॥ सर्वात्मकमनात्मं यत्तेजोरूपं नमाम्यहम् ॥ १०४ ॥ अहं विधाता जगतो वेदानां जनकः स्वयम् ॥ पाता धर्मो हरो हर्ता
स्तोतुं शक्ता न केऽपि यत् ॥ १०५ ॥ सेवया तव धर्मोऽयं पालने[2] च निरूपितः ॥ तवाज्ञया च संहर्ता त्वया काले निरूपिते ॥१०६॥
निः[3]शेषोत्पत्तिकर्त्ताऽहं त्वात्पादांभोजसेवया ॥ कर्मिणां फलदाता च त्वं भक्तानां च नः प्रभुः ॥ १०७ ॥ ब्रह्मांडे बिंबसदृशे भूत्वा[4] विष
यिणो वयम् ॥ एवं कतिविधाः संति तेष्वनन्तेषु सेवकाः ॥१०८॥ यथा न संख्या रेणूनां तथा तेषामणीयसाम् ॥ सर्वेषां जनक
श्चेशो यस्तं स्तोतुं च के क्षमाः ॥१०९॥ एकैकलोमविवरे ब्रह्मांडमेकमेककम् ॥ यस्यैव महतो विष्णोः षोडशांशस्तवैव सः ॥११०॥
ध्यायंते योगिनः सर्वे तवैतद्रूपमीप्सितम् ॥ त्वद्भक्तदास्यनिरताः सेवंते चरणांबुजम् ॥ १११ ॥ किशोरं सुंदरतरं यद्रूपं कमनीयक
म् ॥ मंत्रध्यानानुरूपं च दर्शयास्माकमीश्वर ॥ ११२ ॥ नवीनजलदश्यामं पीतांबरधरं वरम् ॥ द्विभुजं मुरलीहस्तं सस्मितं सुमनो
हरम् ॥ ११३ ॥ मयूरपिच्छचूडं च मालतीजालमंडितम् ॥ चंदनागुरुकस्तूरीकुङ्कुमद्रवचर्चितम् ॥ ११४ ॥ अमूल्यरत्नसाराणां
सारभूषणभूषितम् ॥ अमूल्यरत्नरचितकिरीटमुकुटोज्ज्वलम् ॥ ११५ ॥ शरत्प्रफुल्लपद्मानां प्रभामोष्यास्यचंद्रकम् ॥ पक्वबिंबसमाने
न ह्यधरोष्ठेन राजितम् ॥ ११६ ॥ पक्वदाडिमबीजाभदंतपंक्तिमनोहरम् ॥ केलीकदंबमूले च स्थितं रासरसोन्मुखम् ॥ ११७ ॥
गोपीवक्त्रस्मिततनुं राधावक्षःस्थलस्थितम् ॥ एवं वांछितरूपं ते द्रष्टुं को वा न चोत्सुकः ॥११८॥ इत्येवमुक्त्वा विश्वसृट् प्रणनाम

---

१ सर्वांतःकरणं तच्च–इ० पा० । २ रक्षितारं च रक्षति–इ० पा० । ३ निषेकलिपिकर्ताऽहम्–इ० पा० । ४ भूत्वा–इ० पा० ।

पुनः पुनः ॥ एवं स्तोत्रेण तुष्टाव धर्मोऽपि शंकरः स्वयम् ॥११९॥ ननाम भूयोभूयश्च साश्रुपूर्णविलोचनः ॥ तिष्ठंतोऽपि पुनः स्तोत्रं प्रचक्रुस्त्रिदशेश्वराः ॥ १२० ॥ व्याप्तास्तत्राश्रमे सर्वे श्रीकृष्णतेजसा मुने ॥ स्तवराजमिमं नित्यं ब्रह्मेशधर्मेभिः कृतम् ॥ १२१ ॥ पूजाकाले हरेरेवं भक्तियुक्तश्च यः पठेत् ॥ सुदुर्लभां दृढां भक्तिं निश्चलां लभते हरेः ॥ १२२ ॥ सुरासुरमुनींद्राणां दुर्लभं दास्यमेव च ॥ अणिमादिकसिद्धिं च सालोक्यादिचतुष्टयम् ॥१२३॥ इहैव विष्णुतुल्यश्च विख्यातः पूजितो ध्रुवम् ॥ वाक्सिद्धिर्मंत्रसिद्धिश्च भवेत्तस्य सुनिश्चितम् ॥ १२४ ॥ सर्वसौभाग्यसंयुक्तं यशसा पूरितं जगत् ॥ पुत्रश्च विद्या कविता निश्चला कमला तथा॥१२५॥ पत्नी पतिव्रता साध्वी सुशीला सुस्थिराः प्रजाः ॥ कीर्तिश्च चिरकालीना त्वंते कृष्णांतिके गतिः ॥ १२६ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंडे गोलोकवर्णने श्रीकृष्णस्तोत्रराजपठनं नाम पंचमोऽध्यायः ॥ ५ ॥ छ ॥ छ ॥

श्रीनारायण उवाच ॥ ॥ ध्यात्वा स्तुत्वा च तिष्ठंतो देवास्ते तेजसः पुरः ॥ ददृशुस्तेजसो मध्ये शरीरं कमनीयकम् ॥ १ ॥ सजलांभोदवर्णाभं सस्मितं सुमनोहरम् ॥ परमाह्लादकं रूपं त्रैलोक्यचित्तमोहनम् ॥ २ ॥ गंडस्थलकपोलाभ्यां ज्वलन्मकरकुण्डलम् ॥ सद्रत्ननूपुराभ्यां च चरणांभोजराजितम् ॥ ३ ॥ वह्निशुद्धहरिद्राभामूल्यवस्त्रविराजितम् ॥ मणिरत्नेंद्रसाराणां स्वेच्छाकौतुकनिर्मितैः ॥ ४ ॥ भूषितं भूषणै रम्यैस्तद्रूपेणैव भूषितैः ॥ विनोदमुरलीयुक्तबिंबाधरमनोहरम् ॥ ५ ॥ प्रसन्नेक्षणपश्यंतं भक्तानुग्रहकातरम् ॥ सद्रत्नगुटिकायुक्तकवचोरःस्थलोज्ज्वलम् ॥ ६ ॥ कौस्तुभासक्तसद्रत्नप्रदीप्ततेजसोज्ज्वलम् ॥ तत्र तेजसि चार्वंगीं ददृशू राधिकाभिधाम् ॥ ७ ॥ पश्यंतं सस्मितं कांतं पश्यंतीं वक्रचक्षुषा ॥ मुक्तापंक्तिविनिंद्यैकदंतपंक्तिविराजिताम् ॥ ॥ ८ ॥ ईषद्धास्यप्रसन्नास्यां शरत्पंकजलोचनाम् ॥ शरत्पार्वणचन्द्राभाविनिंदास्यमनोहराम् ॥ ९ ॥ बंधुजीवप्रभामुष्टाधरौष्ठरुचिराननाम् ॥ रणन्मंजीरयुग्मेन पादांबुजविराजिताम् ॥ १० ॥ मणींद्राणां प्रभामोषनखराजिविराजिताम् ॥ कुङ्कुमाभासमाच्छा

द्य पदाधोरागभूषिताम् ॥ ११ ॥ अमूल्यरत्नसाराणां रशनां[1]श्रोणिभूषिताम् ॥ हुताशनविशुद्धांशुकामूल्यज्वलितोज्ज्वलाम् ॥ १२ ॥ महामणींद्रसाराणां किङ्किणीमध्यसंयुताम् ॥ सद्रत्नहारकेयूरकरकंकणभूषिताम् ॥ १३ ॥ रत्नेंद्रसाररचितकपोलोज्ज्वलकुण्डलाम् ॥ कर्णोपरि मणीन्द्राणां कर्णभूषणभूषिताम् ॥ १४ ॥ खगेंद्रचंचुनासाग्रगजेंद्रमौक्तिकान्विताम् ॥ मालतीमालया वक्रकबरीभारशोभिताम् ॥ १५ ॥ मालया कौस्तुभेंद्राणां वक्षःस्थलसुशोभिताम् ॥ पारिजातप्रसूनानां मालाजालोज्ज्वलांबराम् ॥ १६ ॥ रत्नांगुलीयनिकरैः करांगुलिविभूषिताम् ॥ दिव्यशंखविकारैश्च चित्ररागविभूषितैः ॥१७॥ सूक्ष्मसूत्राकृतै रम्यैर्भूषितां शंखभूषणैः ॥ सद्रत्नसारगुटिकाराजिसूत्रै[2]सुशोभिताम् ॥ १८॥ प्रतप्तस्वर्णवर्णाभामाच्छाद्य चारुविग्रहाम् ॥ नितम्बश्रोणिललितां पीनस्तननतांबराम् ॥१९॥ भूषितां भूषणैः सर्वैः सौंदर्येण विभूषितैः ॥ विस्मितास्त्रिदशाः सर्वे दृष्ट्वा तामीश्वरीं वराम् ॥ तुष्टुवुस्ते सुराः सर्वे पूर्णसर्वमनोरथाः॥२०॥ ॥ ब्रह्मोवाच ॥ तव चरणसरोजे मन्मनश्चंचरीको भ्रमतु सततमीश प्रेमभक्त्या सरोजे ॥ भुवनविभवभोगात्तापशांत्यौषधायसुहृदसु परिपक्कां देहि भक्तिं च दास्यम् ॥ २१ ॥ ॥ शंकर उवाच ॥ ॥ भवजलनिधिमग्नश्चित्तमीनो मदीयो भ्रमति सततमस्मिन्घोरसंसारकूपे ॥ विषयमतिविनिंद्यं सृष्टिसंहाररूपमपनय तव भक्तिं देहि पादारविंदे ॥ २२ ॥ ॥ धर्म उवाच ॥ तव निजजनसार्द्धं संगमो मे म[3]दीश भवतु विषयबंधच्छेदने तीक्ष्णखड्गः॥तव चरणसरोजे स्थानदानैकहेतुर्जनुषि जनुषि भक्तिं देहि पादारविन्दे ॥२३॥ इत्येवं स्तवनं कृत्वा परिपूर्णैकमानसाः ॥ कामपूरस्य पुरतस्तिष्ठंतो राधिकापतेः ॥ २४ ॥ सुराणां स्तवनं श्रुत्वा तानुवाच कृपानिधिः ॥ हितं तथ्यं च वचनं स्मेराननसरोरुहः ॥ २५ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ तिष्ठतागच्छत सुरा मदीया नात्र संशयः ॥ शिवाश्रयाणां कुशलं प्रष्टुं युक्तं न सांप्रतम् ॥ २६ ॥ निश्चिंता भवतात्रैव का चिंता वो मयि स्थिते ॥ स्थितोऽहं सर्वजीवेषु प्रत्यक्षोऽहं स्तवेन वै ॥ २७ ॥ युष्माकं [4]यमभिप्रायं सर्वं जानामि निश्चितम् ॥ शुभाशुभं

---

[1] पाशकश्रेणिशोभिताम्–इ० पा० । [2] रक्तसूत्राक्तशोभिताम्–इ० पा० । [3] सदैव–इ० पा० । [4] यदभिप्रायम्–इ० पा० ।

च यत्कर्म काले खलु भविष्यति ॥ २८ ॥ महत्क्षुद्रं च यत्कर्म सर्वं कालकृतं सुराः ॥ स्वे स्वे काले च तरवः फलिताः
पुष्पिणः सदा ॥ २९ ॥ परिपक्कफलाः काले काले पक्वफलान्विताः ॥ सुखं दुःखं विपत्संपच्छोकचिंताशुभाशुभम् ॥ ३० ॥
स्वकर्मफलनिष्ठं च सर्वकालेऽप्युपस्थितम् ॥ न हि कस्य प्रियः को वा विप्रियो वा जगत्त्रये ॥ ३१ ॥ काले कार्यवशात्सर्वे
भवंत्येवाप्रियाः प्रियाः ॥ राजानो मनवः पृथ्व्यां दृष्टा युष्माभिरत्र वै ॥ ३२ ॥ स्वकर्मफलपाकेन सर्वे कालवशं गताः ॥
युष्माकमधुना चैव गोलोके यत्क्षणं गतम् ॥ ३३ ॥ पृथिव्यां तत्क्षणेनैव सप्तमन्वंतरं गतम् ॥ इंद्राः सप्त गतास्तत्र देवेंद्र
श्चाष्टमोऽधुना ॥ ३४ ॥ कालचक्रं भ्रमत्येव मदीयं च दिवानिशम् ॥ इन्द्राश्च मानवा भूपाः सर्वे कालवशं गताः ॥ ३५ ॥ कीर्तिः
पृथ्व्यां पुण्यमद्य कथामात्रावशेषितम् ॥ अधुनाऽपि च राजानो दुष्टाश्च हरिनिंदकाः ॥ ३६ ॥ बभूवुर्बहवो भूमौ महाबल
पराक्रमाः ॥ सर्वे यास्यंति राजानः कालांतरवशं ध्रुवम् ॥ ३७ ॥ उपस्थितोऽपि कालोऽयं वातो वाति निरंतरम् ॥ वह्निर्दहति
सूर्यश्च तपत्येव ममाज्ञया ॥ ३८ ॥ व्याधयः संति देहेषु मृत्युश्चरति जंतुषु ॥ वर्षंत्येते जलधराः सर्वे देवा ममाज्ञया ॥ ३९ ॥
ब्राह्मण्यनिष्ठा विप्राश्च तपोनिष्ठास्तपोधनाः ॥ ब्रह्मर्षयो ब्रह्मनिष्ठा योगनिष्ठाश्च योगिनः ॥ ४० ॥ ते सर्वे मद्भयाद्भीताः
स्वकर्मधर्मतत्पराः ॥ मद्भक्ताश्चैव निःशंकाः कर्मनिर्मूलकारकाः ॥ ४१ ॥ देवाः कालस्य कालोऽहं विधाता धातुरेव च ॥
संहारकर्तुः संहर्ता पातुः पाता परात्परः ॥ ४२ ॥ ममाज्ञयाऽयं संहर्ता नाम्ना तेन हरः स्मृतः ॥ त्वं विश्वसृट् सृष्टिहेतोः
पाता धमस्य रक्षणात् ॥ ४३ ॥ ब्रह्मादितृणपर्यन्तं सर्वेषामहमीश्वरः ॥ स्वकर्मफलदाताऽहं कर्मनिर्मूलकारकः ॥ ४४ ॥ अहं
यान्संहरिष्यामि कस्तेषामपि रक्षिता ॥ यानहं पालयिष्यामि तेषां हंता न कोऽपि वा ॥ ४५ ॥ सर्वेषामपि संहर्ता स्रष्टा पाताऽहमेव
च ॥ नाहं शक्तश्च भक्तानां संहारे नित्यदेहिनाम् ॥ ४६ ॥ भक्ता ममानुगा नित्यं मत्पादार्चनतत्पराः ॥ अहं भक्तांतिके शश्वत्तेषां

---

१ कालेन ग्रासं कालांतकस्य च-इ० पा० ।

रक्षणहेतवे ॥ ४७ ॥ सर्वे नश्यंति ब्रह्माण्डे प्रभवंति पुनःपुनः ॥ न मे भक्ताः प्रणश्यन्ति निःशंकाश्च निरापदः ॥ ४८ ॥ अतो
विपश्चितः सर्वे दास्यं वांछंति नो वरम् ॥ ये मां दास्यं प्रयाचंते धन्यास्तेऽन्ये च वंचिताः ॥ ४९ ॥ जन्ममृत्युजराव्याधि
भयं च यमयातना ॥ अन्येषां कर्मिणामस्ति न भक्तानां च कर्हिचित् ॥ ५० ॥ भक्ता न लिप्ताः पापेषु पुण्येषु सर्वकर्मिणः
॥ अहं धुनोमि तेषां च कर्मभोगान्सुनिश्चितम् ॥ ५१ ॥ अहं प्राणश्च भक्तानां भक्ताः प्राणा ममापि च ॥ ध्यायंते
ते च मां नित्यं तान्स्मरामि दिवानिशम् ॥ ५२ ॥ चक्रं सुदर्शनं नाम षोडशारं सुतीक्ष्णकम् ॥ यत्तेजःषोडशांशोऽपि नास्ति
सर्वेषु जीविषु ॥ ५३ ॥ भक्तान्तिके तु तच्चक्रं दत्त्वा रक्षार्थमीप्सितम् ॥ [1]न स्वास्थ्यं न च प्रीतिर्मे यामि तेषां च सन्निधिम्
॥ ५४ ॥ न मे स्वास्थ्यं च वैकुंठे गोलोके राधिकांतिके ॥ यत्र तिष्ठंति भक्तास्ते तत्र तिष्ठाम्यहर्निशम् ॥ ५५ ॥ प्राणेभ्यः
प्रेयसी राधा स्थितोरसि दिवानिशम् ॥ यूयं प्राणाधिका लक्ष्मीर्न मे भक्तात्परा प्रिया ॥ ५६ ॥ भक्तदत्तं च यद्द्रव्यं भक्त्याऽश्नामि
सुरेश्वराः ॥ अभक्तदत्तं नाश्नामि ध्रुवं भुंक्ते बलिं स्वयम् ॥ ५७ ॥ स्त्रीपुत्रस्वजनांस्त्यक्त्वा ध्यायंते मामहर्निशम् ॥ युष्मान्विहाय
तान्नित्यं स्मराम्यहमहर्निशम् ॥ ५८ ॥ [2]दुष्टा यदा मे भक्तानां ब्राह्मणानां गवामपि ॥ क्रतूनां देवतानां च हिंसां कुर्वंति
निश्चितम् ॥ ५९ ॥ तथाऽचिरं ते नश्यंति यथा वह्नौ तृणानि च ॥ न कोऽपि रक्षिता तेषां मयि हंतर्युपस्थिते ॥ ६० ॥ यास्यामि
पृथिवीं देवा यात यूयं स्वमालयम् ॥ यूयं चैवांशरूपेण शीघ्रं गच्छत भूतलम् ॥ ६१ ॥ इत्युक्त्वा जगतां नाथो गोपानाहूय
गोपिकाः ॥ उवाच मधुरं वाक्यं सत्यं यत्समयोचितम् ॥ ६२ ॥ गोपा गोप्यश्च शृणुत यात नंदव्रजं परम् ॥ वृषभानुगृहे
क्षिप्रं गच्छ त्वमपि राधिके ॥ ६३ ॥ वृषभानुप्रिया साध्वी नंदगोपकलावती ॥ सुबलस्य सुता सा च कमलांशसमुद्भवा ॥
॥ ६४ ॥ पितृणां मानसी कन्या धन्या मान्या च योषिताम् ॥ पुरा दुर्वाससः शापाज्जन्म तस्या व्रजे गृहे ॥ ६५ ॥ [3]तस्या गृहे

---

१ तथाऽपि न प्रतीतिर्मे--इ० पा० । २ द्रेष्टारो ये च--इ० पा० । ३ तस्यां लभस्व त्वं जन्म--इ० पा० ।

जन्म लभ शीघ्रं नंदव्रजं व्रज ॥ त्वामहं बालरूपेण गृह्णामि कमलानने ॥ ६६ ॥ त्वं मे प्राणाधिका राधे तव प्राणाधिकोऽप्यहम्॥ न किंचिदावयोर्भिन्नमेकांगं सर्वदैव हि ॥६७॥ श्रुत्वैवं राधिका तत्र रुरोद प्रेमविह्वला ॥ पपौ चक्षुश्चकोराभ्यां मुखचंद्रं हरेर्मुने ॥६८॥ जनुर्लभत गोपाश्च गोप्यश्च पृथिवीतले ॥ गोपानामुत्तमानां च मंदिरे मंदिरे शुभे ॥६९॥ एतस्मिन्नंतरे सर्वे ददृशू रथमुत्तमम् ॥ मणिरत्नेंद्रसारेण हीरकेण विभूषितम् ॥७०॥ श्वेतचामरलक्षेण शोभितं दर्पणायुतैः ॥ सूक्ष्मकाषायवस्त्रेण वह्निशुद्धेन भूषितम् ॥ ॥ ७१ ॥ सद्रत्नकलशानां च सहस्रेण सुशोभितम् ॥ पारिजातप्रसूनानां मालाजालैर्विराजितम् ॥ ७२ ॥ पार्षदप्रवरैर्युक्तं शातकुंभमयं शुभम् ॥ तेजःस्वरूपमतुलं शतसूर्यसमप्रभम् ॥ ७३ ॥ तत्रस्थं पुरुषं श्यामं सुन्दरं कमनीयकम् ॥ शंखचक्रगदापद्मधरं पीतांबरं वरम् ॥ ७४ ॥ किरीटिनं कुण्डलिनं वनमालाविभूषितम् ॥ चंदनागुरुकस्तूरीकुङ्कुमद्रवचर्चितम् ॥ ७५ ॥ चतुर्भुजं स्मेरवक्त्रं भक्तानुग्रहकातरम् ॥ मणिरत्नेंद्रसाराणां सारभूषणभूषितम् ॥ ७६ ॥ देवीं तद्वामतो रम्यां शुक्लवर्णां मनोहराम् ॥ रत्नालंकारशोभाढ्यां शोभितां पीतवाससा ॥ ७७ ॥ शरत्पार्वणचंद्रास्यां शरत्पंकजलोचनाम् ॥ पक्वबिंबाधरोष्ठीं च स्मेरयुक्तां मनोहराम् ॥ ७८ ॥ वेणुवीणाग्रंथहस्तां भक्तानुग्रहकाताराम् ॥ विद्याधिष्ठातृदेवीं च ज्ञानरूपां सरस्वतीम् ॥ ७९ ॥ अपरां दक्षिणे रम्यां शतचंद्रसमप्रभाम् ॥ प्रतप्तस्वर्णवर्णाभां सस्मितां सुमनोहराम् ॥ ८० ॥ सद्रत्नकुण्डलाभ्यां च सुकपोलविराजिताम् ॥ अमूल्यरत्नखचितामूल्यवस्त्रेण भूषिताम् ॥ ८१ ॥ अमूल्यरत्नकेयूरकरकंकणशोभिताम् ॥ सद्रत्नसारमंजीरकलशब्दसमन्विताम् ॥ ८२ ॥ मणींद्रकिंकिणीयुक्तमध्यदेशसमन्विताम् ॥ पारिजातप्रसूनानां मालावक्षःस्थलोज्ज्वलाम् ॥ ८३ ॥ प्रफुल्लमालतीमालासंयुक्तकबरीयुताम् ॥ शरच्चंद्रप्रभामुष्णन्मुखचारुविभूषिताम् ॥ ८४ ॥ कस्तूरीबिंदुसंयुक्तसिन्दूरतिलकान्विताम् ॥ सुचारुकज्जलासक्तशरत्पंकजलोचनाम् ॥ ८५ ॥ सहस्रदलसंसक्तलीलाकमलसंयुताम् ॥ नारायणं च पश्यंतं पश्यंतीं वक्रचक्षुषा ॥ ८६ ॥ अवरुह्य रथात्तूर्णं सस्त्रीकः सहपार्षदः ॥ जगाम च सभां रम्यां गोपगोपीसमन्विताम् ॥ ८७ ॥ देवा गोप्यश्च गोपा

श्च तस्थुः प्रांजलयो मुदा ॥ सामवेदोक्तस्तोत्रेण कृतेन च सुरर्षिभिः ॥ ८८ ॥ गत्वा नारायणो देवो विलीनः कृष्णविग्रहे ॥
दृष्ट्वा च परमाश्चर्यं ते सर्वे विस्मयं ययुः ॥ ८९ ॥ एतस्मिन्नन्तरे तत्र शातकुंभमयाद्रथात् ॥ अवरुह्य स्वयं विष्णुः पाता च जग
तां पतिः ॥ ९० ॥ आजगाम चतुर्बाहुर्वनमालाविभूषितः ॥ पीतांबरधरः श्रीमान्सस्मितः सुमनोहरः ॥ ९१ ॥ सर्वालंकारशोभा
ढ्यः सूर्यकोटिसमप्रभः ॥ उत्तस्थुस्ते च तं दृष्ट्वा तुष्टुवुः प्रणता मुने ॥ ९२ ॥ स चापि लीनस्तत्रैव राधिकेशस्य विग्रहे ॥ ते दृष्ट्वा
महदाश्चर्यं विस्मयं परमं ययुः ॥ ९३ ॥ संविलीने हरेरंगे श्वेतद्वीपनिवासिनि ॥ एतस्मिन्नंतरे तूर्णमाजगाम त्वरान्वितः ॥ ९४ ॥
शुद्धस्फटिकसंकाशो नाम्ना संकर्षणः स्मृतः ॥ सहस्रशीर्षा पुरुषः शतसूर्यसमप्रभः ॥ ९५ ॥ आगतं तुष्टुवुः सर्वे दृष्ट्वा तं विष्णुवि
ग्रहम् ॥ स चागत्य नतस्कंधस्तुष्टाव राधिकेश्वरम् ॥ ९६ ॥ सहस्रमूर्धा भक्त्या च प्रणनाम च नारद ॥ आवां च धर्मपुत्रौ द्वौ नर
नारायणाभिधौ ॥ ९७ ॥ लीनोऽहं कृष्णपादांब्जे बभूव फाल्गुनोऽवरः॥ब्रह्मेशशेषधर्माश्च तस्थुरेकत्र तत्र वै ॥ ९८ ॥ एतस्मिन्नंतरे
देवा ददृशू रथमुत्तमम् ॥ स्वर्णसारविकारं च नानारत्नपरिच्छदम् ॥ ९९ ॥ मणींद्रसारसंयुक्तं वह्निशुद्धांशुकान्वितम् श्वेतचामर
संयुक्तं भूषितं दर्पणान्वितैः ॥ १०० ॥ सद्रत्नसारकलशसमूहेन विराजितम् ॥ पारिजातप्रसूनानां मालाजालैः सुशोभितम् ॥ १०१ ॥
सहस्रचक्रसंयुक्तं मनोयायि मनोहरम् ॥ ग्रीष्ममध्याह्नमार्तंडप्रभामोषकरं वरम् ॥ १०२ ॥ मुक्तामाणिक्यवज्राणां समूहेन
समुज्ज्वलम् ॥ चित्रपुत्तलिकापुष्पसरःकाननचित्रितम् ॥ १०३ ॥ देवानां दानवानां च रथानां प्रवरं मुने ॥ यत्नेन
शंकरप्रीत्या निर्मितं विश्वकर्मणा ॥ १०४ ॥ पंचाशद्योजनोर्ध्वं च चतुर्योजनविस्तृतम् ॥ [1]रतितुल्यवधूयुक्तैः शोभितं रतिमं
दिरैः ॥ १०५ ॥ तत्रस्थां ददृशुर्देवीं रत्नालंकारभूषिताम् ॥ प्रदग्धस्वर्णसाराणां प्रभामोषकरद्युतिम् ॥ १०६ ॥ तेजःस्वरूपा
मतुलां मूलप्रकृतिमीश्वरीम् ॥ सहस्रभुजसंयुक्तां नानायुधसमन्विताम् ॥ १०७ ॥ ईषद्धास्यप्रसन्नास्यां भक्तानुग्रहकातराम् ॥

---

[1] रतितल्पसमायुक्तम्--इ० पा० ।

गंडस्थलक[1]पोलस्थसद्रत्नकुंडलोज्ज्वलाम् ॥ १०८ ॥ रत्नेन्द्रसाररचितक्वणन्मञ्जीररंजिताम् ॥ मणींद्रमेखलायुक्तमध्यदेशसुशोभिताम् ॥ १०९ ॥ सद्रत्नसारकेयूरकरकंकणभूषिताम् ॥ मंदारपुष्पमालाभिरुरःस्थलसमुज्ज्वलाम् ॥ ११० ॥ नितंबकठिनश्रोणीं पीनोन्नतकुचानताम् ॥ शरत्सुधाकराभासविनिंदास्यमनोहराम् ॥ १११ ॥ कज्जलोज्ज्वलरेखाक्तशरत्पंकजलोचनाम् ॥ चंदनागुरुकस्तूरीचित्रपत्रविभूषिताम् ॥ ११२ ॥ मुक्तापंक्तिप्रभामुष्टदंतराजिविराजिताम् ॥ प्रफुल्लमालतीमालासंसक्तकबरीं वराम् ॥११३ ॥ पक्षींद्रचंचुनासाग्रगजेंद्रमौक्तिकान्विताम् ॥ वह्निशुद्धांशुकेनातिज्वलितेन समुज्ज्वलाम् ॥ ११४ ॥ सिंहपृष्ठसमारूढां सुताभ्यां सहितां मुदा ॥ अवरुह्य रथात्तूर्णं श्रीकृष्णं प्रणनाम च ॥ ११५ ॥ सुताभ्यां [2]सहिता देवी समुवास वरानना: ॥ गणेशः कार्त्तिकेयश्च नत्वा कृष्ण परात्परम् ॥ ११६ ॥ ननाम शंकरं धर्ममनंतं कमलोद्भवम् ॥ उत्तस्थुराराद्देवा दृष्ट्वा तौ त्रिदशेश्वरौ ॥ ११७ ॥ आशिषं च ददुर्देवा वासयामासुरंतिके ॥ ताभ्यां सह सदालापं चक्रुर्देवा मुदाऽन्विताः ॥ ११८ ॥ तस्थुर्देवाः सभामध्ये देवस्य पुरतो हरेः ॥ गोपा गोप्यश्च बहुशो बभूवुर्विस्मयाकुलाः ॥ ११९ ॥ उवाच कमलां कृष्णः स्मेराननसरोरुहः ॥ त्वं गच्छ भीष्मकगृहं नानारत्नसमन्वितम् ॥ १२० ॥ वैदर्भ्या उदरे जन्म लभ देवि सनातनि ॥ तव पाणिं ग्रहीष्यामि गत्वाऽहं कुंडिनं सति ॥ १२१ ॥ ता देव्यः पार्वतीं दृष्ट्वा समुत्थाय त्वरान्विताः ॥ रत्नसिंहासने रम्ये वासयामासुरीश्वरीम् ॥ १२२ ॥ विप्रेंद्र पार्वतीलक्ष्मीवागधिष्ठातृदेवताः ॥ तस्थुरेकासने तत्र संभाष्य च यथोचितम् ॥ १२३ ॥ ताश्च संभाषयामासुः संप्रीत्या गोपकन्यकाः ॥ ऊचुर्गोपालिकाः काश्चिन्मुदा तासां च संनिधौ ॥ १२४ ॥ श्रीकृष्णः पार्वतीं तत्र समुवाच जगत्पतिः ॥ देवि त्वमंशरूपेण जन नंदव्रजे शुभे ॥ १२५ ॥ उदरे च यशोदायाः कल्याणी नंदरेतसा ॥ लभ जन्म महामाये सृष्टिसंहारकारिणि ॥ १२६ ॥ ग्रामे ग्रामे च पूजां ते कारयिष्यामि भूतले ॥ कृत्स्ने महीतले

---

[1] कपोलाभ्याम्–इ० पा० । [2] सहसा–इ० पा० ।

भक्त्या नगरेषु वनेषु च ॥ १२७ ॥ तत्राधिष्ठातृदेवीं त्वां पूजयिष्यंति मानवाः ॥ द्रव्यैर्नानाविधैर्दिव्यैर्बलिभिश्च मुदाऽन्विताः
॥ १२८ ॥ त्वद्भूमिस्पर्शमात्रेण सूतिकामंदिरे शिवे ॥ पिता मां तत्र संस्थाप्य त्वामादाय गमिष्यति ॥ १२९ ॥ कंसदर्शन
मात्रेण गमिष्यसि शिवांतिकम् ॥ भारावतरणं कृत्वा गमिष्यामि स्वमाश्रमम् ॥ १३० ॥ इत्युक्त्वा श्रीहरिस्तूर्णमुवाच च षडा
ननम् ॥ अंशरूपेण वत्स त्वं गमिष्यसि महीतलम् ॥ १३१ ॥ जांबवत्याश्च गर्भे च लभ जन्म सुरेश्वर ॥ अंशेन देवताः
सर्वा गच्छंतु धरणीतलम् ॥ १३२ ॥ भारहारं करिष्यामि वसुधायाश्च निश्चितम् ॥ इत्युक्त्वा राधिकानाथस्तस्थौ सिंहासने वरे
॥ १३३ ॥ तस्थुर्देवाश्च देव्यश्च गोपा गोप्यश्च नारद ॥ एतस्मिन्नंतरे ब्रह्मा समुत्तस्थौ हरेः पुरः ॥ पुटांजलिर्जगत्कांतमुवाच विन
यान्वितः ॥ १३४ ॥ ॥ ब्रह्मोवाच ॥ ॥ अवधानं कुरु विभो किंकरस्य निवेदनम् ॥ १३५ ॥ आज्ञां कुरु महाभाग
कस्य कुत्र स्थलं भुवि ॥ भर्ता पातोद्धारकर्ता सेवकानां प्रभुः सदा ॥ १३६ ॥ स भृत्यः सर्वदा भक्त ईश्वराज्ञां करोति यः ॥
के देवाः केन रूपेण देव्यश्च कलया कया ॥ १३७ ॥ कुत्र कस्याभिदेयं च विषयं च महीतले ॥ ब्रह्मणो वचनं श्रुत्वा
प्रत्युवाच जगत्पतिः ॥ १३८ ॥ यत्र यस्यावकाशं च कथयामि विधानतः ॥ श्रीकृष्ण उवाच ॥ ॥ कामदेवो रौक्मिणेयो
रतिर्मायावती सती ॥ १३९ ॥ शंबरस्य गृहे या च छायारूपेण संस्थिता ॥ त्वं तस्य पुत्रो भविता नाम्नाऽनिरुद्ध एव च
॥ १४० ॥ भारती शोणितपुरे बाणपुत्री भविष्यति ॥ अनंतो देवकीगर्भाद्रौहिणेयो जगत्पतिः ॥ १४१ ॥ मायया
गर्भसंकर्षान्नाम्ना संकर्षणः प्रभुः ॥ कालिंदी सूर्यतनया गंगांशेन महीतले ॥ १४२ ॥ अर्द्धांशेनैव तुलसी लक्ष्मणा राज
कन्यका ॥ सावित्री वेदमाता च नाम्ना नाग्नजिती सती ॥ १४३ ॥ वसुंधरा सत्यभामा शैब्या देवी सरस्वती ॥ रोहिणी मित्र
विंदा च भविता राजकन्यका ॥ १४४ ॥ सूर्यपत्नी रत्नमाला कलया च जगत्प्रभोः ॥ स्वाहांशेन सुशीला च रुक्मिण्याद्याः

---

१ जगन्नाथम्–इ० पा० ।

स्त्रियो नव ॥ १४९ ॥ दुर्गांशाद्धांज्जांबवती महिषीणां दश स्मृताः ॥ अर्द्धांशेन शैलपुत्री यातु जांबवतो गृहम् ॥ १४६ ॥
कैलासे शंकराज्ञा च बभूव पार्वतीं पुरा ॥ कैलासगामिनं विष्णुं श्वेतद्वीपनिवासिनम् ॥ आलिंगनं देहि कांते नास्ति दोषो ममा
ज्ञया ॥ १४७ ॥ ॥ ब्रह्मोवाच ॥ कथं शिवाज्ञा तां देवीं बभूव राधिकापते ॥ विष्णोः संभाषणे पूर्वं श्वेतद्वीपनिवासिनः ॥ १४८ ॥
॥ श्रीभगवानुवाच ॥ ॥ पुरा गणेशं द्रष्टुं च प्रजग्मुः सर्वदेवताः ॥ श्वेतद्वीपात्स्वयं विष्णुर्जगाम शंकरालये ॥ १४९ ॥ दृष्ट्वा गणेशं
मुदितः समुवास सुखासने ॥ सुखेन ददृशुः सर्वे त्रैलोक्यमोहनं वपुः ॥ १५० ॥ किरीटिनं कुंडलिनं पीतांबरधरं वरम् ॥ सुंदरं श्याम
रूपं च नवयौवनसंयुतम् ॥ १५१ ॥ चंदनागुरुकस्तूरीकुंकुमद्रवसंयुतम् ॥ रत्नालंकारशोभाढ्यं स्मेराननसरोरुहम् ॥ १५२ ॥ रत्न
सिंहासनस्थं च पार्षदैः परिवेष्टितम् ॥ वंदितं च सुरैः सर्वैः शिवेन पूजितं स्तुतम् ॥१५३॥ तं दृष्ट्वा पार्वती विष्णुं प्रसन्नवदनेक्षणा ॥
मुखमाच्छादितं चक्रे वाससा व्रीडया सती ॥१५४॥ अतीव सुन्दरं रूपं दर्शंदर्शं पुनःपुनः ॥ ददर्श मुखमाच्छाद्य निमेषरहिता
सती ॥ १५५ ॥ परमाद्भुतवेषं च सस्मिता वक्रचक्षुषा ॥ सुखसागरसम्मग्ना बभूव पुलकांचिता ॥१५६॥ क्षणं ददर्श पञ्चास्यं शुभ्र
वर्णं त्रिलोचनम् ॥ त्रिशूलपरिघधरं कन्दर्पकोटिसुन्दरम् ॥ १५७ ॥ क्षणं ददर्श श्यामं तमेकास्यं च द्विलोचनम् ॥ चतुर्भुजं
पीतवस्त्रं वनमालाविभूषितम् ॥ १५८ ॥ एकं ब्रह्म मूर्तिभेदमभेदं वा निरूपितम् ॥ दृष्ट्वा बभूव सा माया सकामा विष्णु
मायया ॥ १५९ ॥ मदंशाश्च त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥ ताभ्यामौत्कर्षपाताच्च श्रेष्ठः सत्त्वगुणात्मकः ॥ १६० ॥
दृष्ट्वा तं पार्वती भक्त्या पुलकांचितविग्रहा ॥ मनसा पूजयामास परमात्मानमीश्वरम् ॥ १६१ ॥ दुर्गांतराभिप्रायं च बुबुधे शंकरः
स्वयम् ॥ सर्वांतरात्मा भगवानंतर्यामी जगत्पतिः ॥ १६२ ॥ दुर्गां निर्जनमाहूय तामुवाच हरः स्वयम् ॥ बोधयामास विविधं हितं
तथ्यमखंडितम् ॥ १६३ ॥ ॥ श्रीशंकर उवाच ॥ ॥ निवेदनं मदीयं च निबोधं शैलकन्यके ॥ शृंगारं देहि भद्रं ते हरये परमा
त्मने ॥ १६४ ॥ अहं ब्रह्मा च विष्णुश्च ब्रह्मैकं च सनातनम् ॥ वेदैको वेदरहितो विषयान्मूर्तिभेदकः ॥ १६५ ॥ एका प्रकृतिः सर्वेषां

माता त्वं सर्वरूपिणी ॥ स्वयंभूरसि वाणी त्वं लक्ष्मीर्नारायणोरसि ॥ १६६ ॥ मम वक्षसि दुर्गा त्वं निबोधाध्यात्मकं
सति ॥ शिवस्य वचनं श्रुत्वा तमुवाच सुरेश्वरी ॥ १६७ ॥ ॥ पार्वत्युवाच ॥ ॥ दीनबंधो कृपासिंधो तव मामकृपा कथम् ॥
सुचिरं तपसा लब्धो नाथस्त्वं जगतां मया ॥ १६८ ॥ मादृशीं किंकरीं नाथ न परित्यक्तुमर्हसि ॥ अयोग्यमीदृशं वाक्यं मा मा
वद महेश्वर ॥ १६९ ॥ तव वाक्यं महादेव करिष्याम्येव पालनम् ॥ देहांतरे जन्म लब्ध्वा भजिष्यामि हरिं हर ॥ १७० ॥ इत्येवं
वचनं श्रुत्वा विरराम महेश्वरः ॥ उच्चैर्जहासाभयदः पार्वत्यै चाभयं ददौ ॥ १७१ ॥ तत्प्रतिज्ञापालनाय पार्वती जांबवद्गृहे ॥
लभिष्यति जनुर्धातर्नाम्ना जांबवती सती ॥ १७२ ॥ ॥ ब्रह्मोवाच ॥ ॥ भूमौ कतिविधे भूपे संस्थिते पार्वती कथम् ॥ ललाभ
भारते जन्म निंदिते भाल्लुके गृहे ॥१७३॥ ॥ श्रीकृष्ण उवाच ॥ ॥ रामावतारे त्रेतायां देवांशाश्च ययुर्महीम् ॥ हिमालयांशो भल्लूको
जांबवान्नाम किंकरः ॥ १७४ ॥ रामस्य वरदानेन चिरंजीवी श्रिया युतः ॥ कोटिसिंहबलाधानं विधत्ते च महाबलः
॥ १७५ ॥ पितुरंशगृहे दुर्गा जगामांशेन भूतलम् ॥ पूर्वं पूर्वस्य वृत्तांतं कथितं शृणु मन्मुखात् ॥ १७६ ॥ सर्वैषां च सुराणां
वै वंशा गच्छंतु भूतलम् ॥ नृपपुत्रा मत्सहाया भविष्यंति रणे विधे ॥ १७७ ॥ कमलाकलया सर्वा भवंतु नृपकन्यकाः ॥ मन्म
हिष्यो भविष्यंति सहस्राणां च षोडश ॥ १७८ ॥ धर्मोऽयमंशरूपेण पांडुपुत्रो युधिष्ठिरः ॥ वायोरंशाद्भीमसेनः स वज्री ह्यर्जुनः
स्वयम् ॥ १७९ ॥ नकुलः सहदेवश्च स्ववैद्यांशसमुद्भवौ ॥ सूर्यांशः कर्णवीरश्च विदुरः स यमः स्वयम् ॥ १८० ॥ दुर्योधनः कलेरंशः
समुद्रांशश्च शंतनुः ॥ अश्वत्थामा शंकरांशो द्रोणो वह्न्यंशसंभवः ॥ १८१ ॥ हुताशनांशो भगवान्धृष्टद्युम्नो महाबलः ॥ चंद्रांशोऽप्य
भिमन्युश्च भीष्मश्चैव वसूद्भवः ॥ १८२ ॥ वसुदेवः कश्यपांशोऽप्यदित्यंशा च देवकी ॥ वस्वंशो नंदगोपश्च यशोदा वसुका
मिनी ॥ १८३ ॥ द्रौपदी कमलांशा च यज्ञकुंडसमुद्भवा ॥ सुभद्रा शतरूपांशा देवकीगर्भसंभवा ॥१८४॥ देवा गच्छंतु पृथिवीमंशेन

---

१ पालयिष्यामि सर्वथा—इ० पा० । २ बलाधारः क्रियते च—इ० पा० ।

भारहारकाः ॥ कलया देवपत्न्यश्च गच्छंतु पृथिवीतलम् ॥ १८५ ॥ इत्येवमुक्त्वा भगवान्विरराम च नारद ॥ सर्वं विवरणं श्रुत्वा
तत्रोवास प्रजापतिः ॥१८६॥ कृष्णस्य वामे वाग्देवी दक्षिणे कमलालया ॥ पुरतो देवताः सर्वाः पार्वती चापि नारद ॥ १८७ ॥
गोप्यो गोपाश्च परितो राधा वक्षःस्थलस्थिता ॥ एतस्मिन्नंतरे सा च तमुवाच व्रजेश्वरी ॥१८८॥ ॥ राधिकोवाच ॥ शृणु नाथ
प्रवक्ष्यामि किंकरी वचनं प्रभो ॥ प्राणा दहंति सततमांदोलयति मे मनः ॥ १८९ ॥ चक्षुर्निमीलनं कर्तुमशक्ता तव दर्शने ॥ त्वया
विना कथं नाथ यास्यामि धरणीतलम् ॥ १९० ॥ कियत्कालांतरेणैव मेलनं मे त्वया सह ॥ प्राणेश्वर ब्रूहि सत्यं भविष्यत्येव
गोकुले ॥ १९१ ॥ निमेषं च युगशतं भविता मे त्वया विना ॥ कं द्रक्ष्यामि क्व यास्यामि को वा मां पालयिष्यति ॥ १९२ ॥
मातरं पितरं बंधुं भ्रातरं भगिनीं सुतम् ॥ त्वया विनाऽहं प्राणेश चिंतयामि न कञ्चन ॥ १९३ ॥ करोषि मायया छन्नां मां
चेन्मायेश भूतले ॥ विस्मृतां विभवं दत्त्वा मे सत्यं शपथं कुरु ॥ १९४ ॥ अनुक्षणं मम मनोमधुपो मधुसूदन ॥ करोतु भ्रमणं
नित्यं समाध्वीके पदांबुजे ॥ १९५ ॥ यत्रयत्र च यस्यां वा योनौ जन्म भवत्विदम् ॥ त्वं स्वस्य स्मरणं दास्यं मह्यं
दास्यसि वांछितम् ॥ १९६ ॥ कृष्णस्त्वं राधिकाऽहं च प्रेमसौभाग्यमावयोः ॥ न विस्मरामि भूमौ च देहि मह्यं
वरं परम् ॥ १९७ ॥ यथा तन्वा सह प्राणाः शरीरं छायया सह ॥ तथाऽऽवयोर्जन्म यातु देहि मह्यं वरं विभो ॥ १९८ ॥
चक्षुर्निमेषविच्छेदो भविता नावयोर्भुवि ॥ तत्रागत्यापि कुत्रापि देहि मह्यं वरं प्रभो ॥ १९९ ॥ मम प्राणैस्तव
तनुः केन वा [1]करुणा हरे ॥ आत्मना मुरलीपादौ मनसा वा विनिर्मितौ ॥ २०० ॥ स्त्रियः कतिविधाः संति पुरुषा वा पुरुष्टुत ॥
नास्ति कुत्रापि कांता वा कांत्या शक्त्या च मादृशी ॥ २०१ ॥ तव देहार्धभागेन केन वाऽहं विनिर्मिता ॥ अयमेवावयोर्भेदो
नास्त्यतस्त्वयि मे मनः ॥ २०२ ॥ ममात्मा मानसं प्राणास्त्वयि संस्थापिता यथा ॥ तवात्ममानसप्राणा मयि वा संस्थिता

---

[1] वार्यंते हरे—इ० पा० ।

स्तथा ॥२०३॥ अतो निमेषविरहादात्मनोर्विक्लवं मनः ॥ प्रदग्धं सन्ततं प्राणा दहंति विरहश्रुतौ ॥ २०४ ॥ इत्येवमुक्त्वा सा देवी
तत्रैव सुरसंसदि ॥ भूयोभूयो रुरोदोच्चैर्धृत्वा तच्चरणांबुजम् ॥ २०५ ॥ क्रोडे कृत्वा तु तां कृष्णो मुखं संमृज्य वाससा ॥ बोधयामास
विविधं सत्यं तथ्यं हितं वचः ॥ २०६ ॥ श्रीकृष्ण उवाच ॥ आध्यात्मिकं परं योगं शोकच्छेदनकारकम् ॥ शृणु देवि प्रवक्ष्या
मि योगींद्राणां च दुर्लभम् ॥ २०७ ॥ आधाराधेययोः सर्वं ब्रह्मांडं पश्य सुन्दरि ॥ आधारव्यतिरेकेण नास्त्याधेयस्य संभवः ॥
॥ २०८ ॥ फलाधारं च पुष्पं च पुष्पाधारं च पल्लवम् ॥ स्कन्धश्च पल्लवाधारः स्कन्धाधारस्तरुः स्वयम् ॥ २०९ ॥ वृक्षाधारो
ऽप्यंकुरश्च जीवशक्तिसमन्वितः ॥ अष्टिरेकांकुराधारश्चाष्ट्याधारो वसुन्धरा ॥ २१० ॥ शेषो वसुन्धराधारः शेषाधारो हि कच्छपः॥
वायुश्च कच्छपाधारो वाय्वाधारोऽहमेव च ॥ २११ ॥ ममाधारस्वरूपा त्वं त्वयि तिष्ठामि सांप्रतम् ॥ त्वं च शक्तिसमूहा च मूलप्रकृ
तिरीश्वरी ॥ २१२ ॥ त्वं शरीरस्वरूपाऽसि त्रिगुणाऽऽधाररूपिणी ॥ तवात्माऽहं निरीहश्च चेष्टावांश्च त्वया सह ॥२१३॥ पुरुषाद्वीर्य
मुत्पन्नं वीर्यात्सन्ततिरेव च ॥ तयोराधाररूपा च कामिनी प्रकृतेः कला ॥ २१४ ॥ विना देहेन क्वात्मा च क्व शरीरं विनाऽऽत्मना॥
प्राधान्यं च तयोर्देवि विना त्वाऽद्य कुतो भवः ॥२१५॥ न कुत्राप्यावयोर्भेदो राधे संसारबीजयोः ॥ यत्रात्मा तत्र देहं च
न भेदो विनयेन किम् ॥ २१६ ॥ यथा क्षीरे च धावल्यं दाहिका च हुताशने ॥ भूमौ गन्धो जले शैत्यं तथा त्वयि मयि
स्थिते ॥ २१७ ॥ धावल्यदुग्धयोरैक्यं दाहिकानलयोर्यथा ॥ भूगन्धजलशैत्यानां नास्ति भेदस्तथाऽऽवयोः ॥ २१८ ॥ मया
विना त्वं निर्जीवा चादृश्योऽहं त्वया विना ॥ त्वया विना भवं कर्तुं नालं सुन्दरि निश्चितम् ॥ २१९ ॥ विना मृदा घटं
कर्तुं यथा नालं कुलालकः ॥ विना स्वर्णं स्वर्णकारोऽलंकारं कर्तुमक्षमः ॥ २२० ॥ स्वयमात्मा यथा नित्यस्तथा त्वं प्रकृतिः
स्वयम् ॥ सर्वशक्तिसमायुक्ता सर्वाधारा सनातनी ॥ २२१ ॥ मम प्राणसमा लक्ष्मीवाणी च सर्वमंगला ॥ ब्रह्मेशानन्तध
र्माश्च त्वं मे प्राणाधिका प्रिया ॥ २२२ ॥ समीपस्था इमे सर्वे सुरा देव्यश्च राधिके ॥ एभ्योऽप्यधिका नो चेत्कथं वक्षः

स्थलस्थिता ॥ २२३ ॥ त्यजाश्रुमोक्षणं राधे भ्रांतिं च निष्फलां सति ॥ विहाय शंकां निःशंकं वृषभानुगृहं व्रज ॥ २२४ ॥
कलावत्याश्च जठरे मासानां नव सुन्दरि ॥ वायुना पूरयित्वा च गर्भं रोधय मायया ॥ २२५ ॥ दशमे समनुप्राप्ते त्वमाविर्भव
भूतले ॥ स्वात्मरूपं परित्यज्य शिशुरूपं विधाय च ॥ २२६ ॥ वायुनिःसारणे काले कलावत्याः समीपतः ॥ भूमौ विवसनीभूय
पतित्वा रोदिषि ध्रुवम् ॥२२७॥ अयोनिसंभवा त्वं च भविता गोकुले सति ॥ अयोनिसंभवोऽहं च नावयोर्गर्भसंस्थितिः ॥ २२८ ॥
भूमिसंस्पृष्टमात्रं मां गोकुले प्रापयिष्यति ॥ तव हेतोर्गमिष्यामि कृत्वा कंसभयं छलम् ॥ २२९ ॥ यशोदामंदिरे मां च सानन्दं
नन्दनंदनम् ॥ नित्यं द्रक्ष्यसि कल्याणि ममाश्लेषणपूर्वकम् ॥ २३० ॥ स्मृतिस्ते भविता काले वरेण मम राधिके ॥ स्वच्छन्दं
विहरिष्यामि नित्यं वृन्दावने वने ॥ २३१ ॥ त्रिःसप्तशतकोटीभिर्गोपीभिर्गोकुलं व्रज ॥ त्रयस्त्रिंशद्वयस्याभिः सुशीलादिभिरेव
च ॥ २३२ ॥ संस्थाप्य संख्यारहिता गोपीर्गोकुल एव च ॥ ता आश्वास्य प्रबोधैश्च मितया च सुधागिरा ॥२३३॥ अहं गोपाल
सुहृदः संस्थाप्यात्रैव राधिके ॥ वसुदेवाश्रमं पश्चाद्यास्यामि मथुरां पुरीम् ॥ २३४ ॥ व्रजं व्रजन्तु क्रीडार्थं मम संगे प्रियात्प्रियाः ॥
बल्लवानां गृहे जन्म लभन्तां गोपकोटयः ॥ २३५ ॥ इत्येवमुक्त्वा श्रीकृष्णो विरराम च नारद ॥ ऊचुर्देवाश्च देव्यश्च गोपा गोप्यश्च
तत्र वै ॥ २३६ ॥ ब्रह्मेशशेषधर्माश्च श्रीकृष्णं तं परात्परम् ॥ शिवापद्मासरस्वत्यस्तुष्टुवुः परया मुदा ॥ २३७ ॥ भक्त्या गोपाश्च
गोप्यश्च विरहज्वरकातराः ॥ तत्र संस्तूय श्रीकृष्णं प्रणेमुः प्रेमविह्वलाः ॥ २३८ ॥ प्राणाधिकं प्रियं कांतं राधापूर्णमनोरथम् ॥
परितुष्टोऽभवद्भक्त्या विरहज्वरकातराम् ॥ २३९ ॥ साश्रुपूर्णातिदीनां च दृष्ट्वा राधां भयाकुलाम् ॥ प्रबोधवचनं श्रुत्यमुवाच तां हरिः
स्वयम् ॥ २४० ॥ ॥ श्रीकृष्ण उवाच ॥ प्राणाधिके महादेवि स्थिरा भव भयं त्यज ॥ यथा त्वं च तथाऽहं च का चिंता ते मयि
स्थिते ॥ २४१ ॥ किं तु ते कथयिष्यामि किंचिदेवास्त्यमंगलम् ॥ वर्षाणां शतकं पूर्णं त्वद्विच्छेदो मया सह ॥ २४२ ॥
श्रीदामशापजन्येन कर्मभोगेन सुन्दरि ॥ भविष्यत्येव मम च मथुरागमनं ततः ॥ २४३ ॥ तत्र भारावतरणं पित्रोर्बंधनमो

चनम् ॥ मालाकारतंतुवायकुब्जिकानां च मोक्षणम् ॥ २४४ ॥ घातयित्वा च यवनं मुचुकुन्दस्य मोक्षणम् ॥ द्वारकायाश्च निर्माणं राजसूयस्य दर्शनम् ॥ २४५ ॥ उद्वाहं राजकन्यानां सहस्राणां च षोडश ॥ दशाधिकशतस्यापि शत्रूणां दमनं तथा ॥ २४६ ॥ मित्रोपकरणं चैव वाराणस्याश्च दाहनम् ॥ हरस्य जृंभणं तत्र बाणस्य भुजकृंतनम् ॥ २४७ ॥ पारिजतस्य हरणं यद्यत्कर्माणि तानि च ॥ गमनं तीर्थयात्रायां मुनिसंघप्रदर्शनम् ॥ २४८ ॥ संभाषणं च बंधूनां यज्ञसंपादनं पितुः ॥ शुभक्षणे पुनस्तत्र त्वया सार्द्धं प्रदर्शनम् ॥ करिष्यामि च तत्रैव गोपिकानां च दर्शनम् ॥ २४९ ॥ तुभ्यमाध्यात्मिकं दत्त्वा पुनः सत्यं त्वया सह ॥ दिवानिशमविच्छेदो मया सार्द्धमतः परम् ॥ २५० ॥ भविष्यति त्वया सार्द्धं पुनरागमनं व्रजे ॥ कांते विच्छेदसमये वर्षाणां शतके सति ॥ २५१ ॥ नित्यं समीलनं स्वप्ने भविष्यति त्वया सह ॥ [1]मम नारायणांशो यस्तस्य यानं च द्वारकाम् ॥ २५२ ॥ शतवर्षांतरे साध्यमेतदेव सुनिश्चितम् ॥ भविष्यति पुनस्तत्र वने [2]रासस्त्वया सह ॥ २५३ ॥ पुनः पित्रोश्च गोपीनां शोकसंमार्जनं परम् ॥ कृत्वा भारावतरणं पुनरागमनं मम ॥ २५४ ॥ त्वया सहापि गोलोकं गोपैर्गोपीभिरेव च ॥ मम नारायणांशस्य वाण्या च पद्मया सह ॥ २५५ ॥ वैकुंठगमनं राधे नित्यस्य परमात्मनः ॥ श्वेतद्वीपं धर्मगेहमंशानां च भविष्यति ॥ २५६ ॥ देवानां चैव देवीनामंशा यास्यंति स्वक्षयम् ॥ पुनः संस्थितिरत्रैव गोलोके मे त्वया सह ॥ २५७ ॥ इत्येवं कथितं सर्वं भविष्यं च शुभाशुभम् ॥ मया निरूपितं यत्तत्कांते केन निवार्यते ॥ २५८ ॥ इत्येवमुक्त्वा श्रीकृष्णः कृत्वा राधां स्ववक्षसि ॥ तस्थौ तस्थुः सुराः सर्वे सुरपत्न्यश्च विस्मिताः ॥ २५९ ॥ उवाच श्रीहरिर्देवान्देवीं च समयोचितम् ॥ देवा गच्छत कार्यार्थं स्वालयं विषयोचितम् ॥ २६० ॥ गच्छ पार्वति कैलासं सुताभ्यां स्वामिना सह ॥ मया नियोजितं कर्म सर्वं काले भविष्यति ॥ २६१ ॥ भविता कलया जन्म सर्वेषां च व्रजेश्वरि ॥ क्षुद्राणां चैव

---

१ मम नारायणांशस्य त्वत्तो—इ० पा० । २ वासः—इ० पा० ।

महतां देवं लंबोदरं विना ॥ २६२ ॥ प्रणम्य श्रीहारिं देवाः स्वालयं प्रययुर्मुदा ॥ लक्ष्मीं सरस्वतीं भक्त्या प्रणम्य पुरुषोत्तमम् ॥ २६३ ॥ हरिणा योजितं कर्म कर्तुं व्यग्रा महीं ययुः ॥ भर्त्रा निरूपितं स्थानं देवानामपि दुर्लभम् ॥ २६४ ॥ उवाच राधिकां कृष्णो वृषभानुगृहं व्रज ॥ गोपगोपीसमूहैश्च सह पूर्वनिरूपितैः ॥ २६५ ॥ अहं यास्यामि मथुरां वसुदेवालयं प्रिये ॥ पश्चात्कंसभयव्याजाद्गोकुलं तव सन्निधिम् ॥ २६६ ॥ राधा प्रणम्य श्रीकृष्णं रक्तपंकजलोचना ॥ भृशं रुरोद पुरतः प्रेमविच्छेदकातरा ॥ २६७ ॥ स्थायंस्थायं क्वचिद्यांती गत्वागत्वा पुनः पुनः ॥ पुनः पुनः समागत्य दर्शंदर्शं हरेर्मुखम् ॥ २६८ ॥ पपौ चक्षुश्चकोराभ्यां निमेषरहिता सती ॥ शरत्पार्वणचंद्राभसुधापूर्णं प्रभोर्मुखम् ॥ २६९ ॥ ततः प्रदक्षिणीकृत्य सप्तधा परमेश्वरी ॥ प्रणम्य सप्तधा चैव पुनस्तस्थौ हरेः पुरः ॥ २७० ॥ आजग्मुर्गोपिकानां च त्रिःसप्तशतकोटयः ॥ आजगाम च गोपानां समूहः कोटिसंख्यकः ॥ २७१ ॥ गोपानां गोपिकनां च समूहैः सह राधिका ॥ पुनः प्रणम्य तं राधा तत्र तस्थौ च नारद ॥ २७२ ॥ त्रयस्त्रिंशद्वयस्याभिर्गोपीभिः सह सुंदरी ॥ गोपानां च समूहैश्च प्रणम्य प्रययौ महीम् ॥ २७३ ॥ हरिणा योजितं स्थानं प्रजग्मुर्नंदगोकुलम् ॥ वृषभानुगृहं राधा गोपीगोपगृहं ययौ ॥ २७४ ॥ महीं गतायां राधायां गोपीभिः सह गोपकैः ॥ बभूव श्रीहरिः सद्यः पृथिवीं गमनोत्सुकः ॥ २७५ ॥ संभाष्य गोपान्गोपीश्च नियोज्य स्वीयकर्मणि ॥ मनोयायी जगन्नाथो जगाम मथुरां हरिः ॥ २७६ ॥ पूर्वं यद्यदपत्यं च देवकीवसुदेवयोः ॥ बभूव सद्यस्तत्कंसः पुत्रषट्कं जघान ह ॥ २७७ ॥ शेषांशं सप्तमं गर्भं मायया॒ऽऽकृष्य गोकुले ॥ निधाय रोहिणीगर्भे जगाम चाज्ञया हरेः ॥२७८॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंडे नारायणनारदसंवादे षष्ठोऽध्यायः ॥ ६ ॥

नारद उवाच ॥ ॥ तस्यातिरेकं कृष्णस्य महत्पुण्यकरं परम् ॥ वद जन्म महाभाग जन्ममृत्युजरापहम् ॥ १ ॥ वसुदेवः कस्य पुत्रः कस्य कन्या च देवकी ॥ को वसुर्देवकी का वा विवाहं चोभयोर्वद ॥ २ ॥ कथं जघान कंसस्तत्पुत्रषट्कं च दारुणः ॥ कस्मिन्दिने हरेर्जन्म श्रोतुमिच्छामि तत्त्वतः ॥ ३ ॥ ॥ श्रीनारायण उवाच ॥ ॥ कश्यपो वसुदेवश्च देवमाता च देवकी ॥ पूर्वपुण्यफलेनैव

प्रापतुः श्रीहरिं सुतम् ॥ ४ ॥ देवमीढान्मारिषायां वसुदेवो महानभूत् ॥ [1]यस्योद्भवे देवसंघो वादयामास दुंदुभिम् ॥ ५ ॥ आनकं
च महाहृष्टाः श्रीहरेर्जनकं च तम् ॥ संतः पुरातनास्तेन वदंत्यानकदुंदुभिम् ॥ ६ ॥ आहुकस्य सुतः श्रीमान्यदुवंशसमुद्भवः ॥
देवको ज्ञानसिंधुश्च तस्य कन्या च देवकी ॥ ७ ॥ गर्गो यदुकुलाचार्यः संबंधं वसुना सह ॥ देवक्याः कारयामास विधिवच्च यथो
दितम् ॥ ८ ॥ महासंभृतसंभारो वसुदेवः शुभे क्षणे ॥ उद्वाहे देवकीं तस्मै देवकः प्रददौ किल ॥ ९ ॥ अश्वानां च सहस्राणि गजानां
च शतानि च ॥ सालंकृतानां दासीनां शतानि सुंदराणि च ॥ १० ॥ नानाविधानि द्रव्याणि रत्नानि विविधानि च ॥ मणिश्रेष्ठानि
वस्त्राणि स्वर्णपात्राणि नारद ॥ ११ ॥ सद्रत्नभूषितां कन्यां शतचंद्रसमप्रभाम् ॥ त्रैलोक्यमोहिनीं धन्यां मान्यां श्रेष्ठां च योषिताम्
॥ १२ ॥ रूपाधारां गुणाधारां सुस्मितां वक्रलोचनाम् ॥ नवसंगमयोग्यां च प्रोद्भिन्ननवयौवनाम् ॥ १३ ॥ तां गृहीत्वा रथे कृत्वा प्रस्थान
समये तदा ॥ कंसो हृष्टः सहचरो भगिन्युद्वाहकर्मणि ॥१४॥ तस्या रथसमीपस्थे कंसे गच्छति तत्क्षणे ॥ कंसं संबोध्य गगने वागभू
वाशरीरिणी ॥१५॥ कथं हृष्टोऽसि राजेंद्र शृणु सत्यं वचो हि[2]तम् ॥ देवक्या ह्यष्टमो गर्भो मृत्युहेतुस्तवैव हि ॥ १६ ॥ श्रुत्वैवं देव
कीं कंसः खड्गहस्तो महाबलः ॥ देववाक्याद्भयात्क्रोधात्पापिष्ठो हंतुमुद्यतः ॥ १७ ॥ तां हंतुमुद्यतं दृष्ट्वा वसुदेवः सुपंडितः ॥ बोधया
मास नीतिज्ञो नीतिशास्त्रविशारदः ॥ १८ ॥ वसुदेव उवाच ॥ राजनीतिं न जानासि शृणु मे वचनं हितम् ॥ यशस्करं च
दोषघ्नं शास्त्रोक्तं समयोचितम् ॥ १९ ॥ अस्या एवाष्टमो गर्भो मृत्युश्चेत्तव भूमिप ॥ इमां च हत्वा दुष्कीर्तिं करोषि त्वं नरः
कथम् ॥२०॥ वधे च क्षुद्रजंतूनां हिंसकानां च पंडितः ॥ कार्षापणं समुत्सृज्य मृत्युकाले प्रमुच्यते ॥ २१ ॥ अहिंसकानां क्षुद्राणां
वधः शतगुणं ध्रुवम् ॥ प्रायश्चित्तं मृत्युकाले कथितं पद्मयोनिना ॥ २२ ॥ वधे विशिष्टजंतूनां पश्वादीनां च कामतः ॥ ततः शतगुणं
पापं निश्चितं मनुरब्रवीत् ॥ २३ ॥ नराणां म्लेच्छजातीनां वधे शतगुणं ततः ॥ म्लेच्छानां च शतानां च यत्पापं लभते वधे ॥ २४ ॥

---

१ मकरोत्तदा—इ० पा० । २ हि तत्—इ० पा० ।

सच्छूद्रैकस्य च वधे तत्पापं लभते पुमान् ॥ सच्छूद्राणां शतानां च यत्पापं लभते वधे ॥ २५ ॥ तत्पापं लभते नूनं
गोवधैकेन निश्चितम् ॥ गवां दशगुणं पापं ब्राह्मणस्य त्रधे भवेत् ॥ २६ ॥ विप्रहत्यासमं पापं स्त्रीवधे लभते नरः ॥ विशेषतो हि
भगिनी पोष्या च शरणागता ॥ २७ ॥ स्त्रीहत्याशतपापं च भवेदस्या वधे नृप ॥ तपो जपं च दानं च पूजनं तीर्थदर्शनम् ॥२८॥
विप्राणां भोजनं होमं स्वर्गार्थं कुरुते बुधः ॥ जलबुद्बुदवत्सर्वं स्वप्नतुल्यसमं भवम् ॥२९॥ पश्यंति सततं संतो धर्मं कुर्वंति यत्न
तः ॥ भगिनीं त्यज धर्मिष्ठ स्ववंशापरभास्कर[1] ॥ ३० ॥ बुधाः कतिविधाः संति सभायां पृच्छयतां नृप ॥ अस्याश्चैवाष्टमो गर्भो
यदपत्यं भविष्यति ॥ ३१ ॥ बंधो तुभ्यं प्रदास्यामि तेन मे किं प्रयोजनम् ॥ अथवा यान्यपत्यानि भवंति ज्ञानिनां वर ॥३२ ॥
तानि सर्वाणि दास्यामि त्वत्तः को मे वरः प्रियः ॥ भगिनीं त्यज राजेंद्र कन्यातुल्यां प्रियां तव ॥ ३३ ॥ मिष्टान्नपानदानेन वर्धिता
मनुजां सदा ॥ वसुदेववचः श्रुत्वा तत्याज भगिनीं नृपः ॥ ३४ ॥ वसुदेवः प्रियां नीत्वा जगाम निजमंदिरे ॥ क्रमादपत्यषट्कं च
यद्यद्भूतं च नारद ॥ ३५ ॥ ददौ तस्मै वसुः सत्यात्स जघान क्रमेण तान् ॥ देवक्याः सप्तमे गर्भे कंसो रक्षां ददौ भिया ॥
॥ ३६ ॥ रोहिणीजठरे माया तमाकृष्य ररक्ष च ॥ रक्षकाः कथयामासुर्गर्भस्रावो बभूव ह ॥ ३७ ॥ तस्माद्बभूव भगवानात्मा संक
र्षणः प्रभुः ॥ तस्या एवाष्टमो गर्भो वायुपूर्णो बभूव ह ॥ ३८ ॥ गते च नवमे मासि दशमे समुपस्थिते ॥ वृद्धिं ददौ च गर्भे च भग
वान्सर्वदर्शनः ॥ ३९ ॥ स्वयं रूपवती देवी सर्वासां योषितां वरा ॥ बभूव दर्शनात्सद्यः सुंदरी सा चतुर्गुणा ॥ ४० ॥ ददर्श देवकीं
कंसः प्रफुल्लवदनेक्षणाम् ॥ तेजसा प्रज्वलंतीं च मायामिव दिशो दश ॥ ४१ ॥ ज्योतिषां संहतिं चैव यथा मूर्तिमतीमिव ॥ दृष्ट्वा
तामसुरेंद्रश्च विस्मयं परमं ययौ ॥ ४२ ॥ अस्माद्गर्भादपत्यं च मृत्युबीजं ममैव च ॥ इत्येवमुक्त्वा कंसश्च ददौ रक्षां प्रयत्नतः ॥
देवकीं वसुदेवं च सप्तद्वारं ररक्ष च ॥ ४३ ॥ पूर्णे च दशमे मासे गर्भः पूर्णो बभूव ह ॥ बभूव सा चलस्पंदा जडरूपा च

---

[1] पद्मभास्कर—इ० पा० ।

नारद ॥ ४४ ॥ गर्भं च वायुना पूर्णं निर्लिप्तो भगवानजित् ॥ हृत्पद्मकोशे देवक्या अधिष्ठानं चकार ह ॥ ४५ ॥ सा विश्वंभरगर्भा च मंदिराभ्यंतरे सती ॥ उवास जडरूपा च क्लेशयुक्ता बभूव ह ॥ ४६ ॥ उवास च क्षणं देवी क्षणमुत्थाय तिष्ठति ॥ क्षणं व्रजति पादैकं क्षणं स्वपिति तत्र वै ॥ ४७ ॥ दृष्ट्वा च देवकीं शीघ्रं वसुदेवो महामनाः ॥ प्रसूतिसमयं ज्ञात्वा सस्मार हरिमीश्वरम् ॥ ४८ ॥ रत्नप्रदीपसंयुक्ते मंदिरे सुमनोहरे ॥ स्थापयामास खड्गं च लोहं तोयं हुताशनम् ॥ ४९ ॥ मंत्रज्ञं च नरं चैव बंधुपत्नीर्भयाकुलः ॥ विद्वांसं ब्राह्मणं चैव त्रस्तो बंधूंश्च सादरम् ॥ ५० ॥ एतस्मिन्नंतरे तस्या रात्रेर्द्वौ प्रहरौ गतौ ॥ व्याप्तं च गगनं मेघैः क्षणद्युतिसमन्वितैः ॥ ५१ ॥ ववुश्च वायवश्चेष्टा ययुर्निद्रां च रक्षकाः ॥ अचेष्टिताश्च शयने मृता इव विचेतनाः ॥५२॥ एतस्मिन्नंतरे तत्र चाजग्मुस्त्रिदशेश्वराः ॥ तुष्टुवुर्धर्मब्रह्मेशा गर्भस्थं परमेश्वरम् ॥ ५३ ॥ ॥ देवा ऊचुः ॥ ॥ जगद्योनिरयोनिस्त्वमनंतोऽव्यय एव च ॥ ज्योतिःस्वरूपो ह्यनघः सगुणो निर्गुणो महान् ॥ ५४ ॥ भक्तानुरोधात्साकारो निराकारो निरंकुशः ॥ निर्व्यूहो निखिलाधारो निःशंको निरुपद्रवः ॥ ५५ ॥ निरुपाधिश्च निर्लिप्तो निरीहो निधनांतकः ॥ स्वात्मारामः पूर्णकामोऽनि[2]मिषो नित्य एव च ॥ ५६ ॥ स्वेच्छामयः सर्वहेतुः सर्वः सर्वगुणाश्रयः ॥ सुखदो दुःखदो दुर्गो दुर्जनांतक एव च ॥ ५७ ॥ सुभगो दुर्भगो वाग्मी दुराराध्यो दुरत्ययः ॥ वेदहेतुश्च वेदाश्च वेदांगो वेदविद्विभुः ॥ ५८ ॥ इत्येवमुक्त्वा देवाश्च प्रणेमुश्च मुहुर्मुहुः ॥ हर्षाश्रुलोचनाः सर्वे ववृषुः कुसुमानि च ॥ ५९ ॥ द्विचत्वारिंशन्नामानि प्रातरुत्थाय यः पठेत् ॥ दृढां भक्तिं हरेर्दास्यं लभते वांछितं फलम् ॥ ६० ॥ इति श्रीब्रह्मवैवर्ते ब्रह्मादिकृतश्रीकृष्णस्तोत्रम् ॥ ॥ नारायण उवाच ॥ इत्येवं स्तवनं कृत्वा देवास्ते स्वालयं ययुः ॥ ६१ ॥ बभूव जलवृष्टिश्च निश्चेष्टा मथुरापुरी ॥ घोरांधकारनिबिडा बभूव यामिनी मुने ॥ ६२ ॥ गते सप्तमुहूर्ते तु चाष्टमे समुपस्थिते ॥ वेदातिरिक्तदुर्ज्ञेये सर्वोत्कृष्टे शुभे क्षणे ॥ ६३ ॥ शुभे ग्रहे दृष्टियुक्तेऽप्यदृष्टे चाशुभग्रहे ॥ अर्धरात्रे समुत्पन्ने रोहिण्या

---

१ स्वयम्—इ० पा० । २ निर्दोषो—इ० पा० ।

मष्टमीतिथौ ॥ ६४ ॥ जयंतीयोगसंयुक्ते चार्धचंद्रोदये मुने ॥ दृष्ट्वादृष्ट्वा क्षणं लग्नं भीताः सूर्यादयस्तदा ॥ ६५ ॥ गगने क्रममुल्लंघ्य
जग्मुर्मीनं शुभावहाः ॥ सुप्रसन्ना ग्रहाः सर्वे बभूवुस्तत्र संस्थिताः ॥६६॥ एकादशास्ते प्रीत्या च मुहूर्ते धातुराज्ञया ॥ ववर्षुश्च जलधरा
ववुर्वाताः सुशीतलाः ॥६७॥ सुप्रसन्ना च पृथिवी प्रसन्नाश्च दिशो दश ॥ ऋषयो [1]मनवश्चैव यक्षगंधर्वकिन्नराः ॥ ६८ ॥ देवा देव्यश्च
मुदिता ननृतुश्चाप्सरोगणाः ॥ जगुर्गंधर्वपतयो विद्याधर्यश्च नारद ॥६९॥ सुखेन सुस्रुवुर्नद्यो जज्वलुश्चाग्नयो मुदा ॥ नेदुर्दुंदुभयो नाके
चानकाश्च मनोहराः ॥ ७० ॥ पारिजातप्रसूनानां महावृष्टिर्बभूव ह ॥ जगाम सूतिकागेहं नारीरूपं विधाय भूः ॥ ७१ ॥ जयशब्दः
शंखशब्दो हरिशब्दो बभूव ह ॥ एतस्मिन्नंतरे तत्र पपात देवकी सती ॥ ७२ ॥ निःससार च वायुश्च देवकीजठरात्ततः ॥ तत्रैव
भगवान्कृष्णो दिव्यरूपं विधाय च ॥ ७३ ॥ हृत्पद्मकोशाद्देवक्या हरिराविर्बभूव ह ॥ अतीव कमनीयं च शरीरं सुमनोहरम् ॥ ७४ ॥
द्विभुजं मुरलीहस्तं स्फुरन्मुकुटकुण्डलम् ॥ ईषद्धास्यं प्रसन्नास्यं भक्तानुग्रहकातरम् ॥७५॥ मणिरत्नेंद्रसाराणां भूषणैश्च विभूषितम्॥
नवीननीरदश्यामं शोभितं पीतवाससा ॥ ७६ ॥ चंदनागुरुकस्तूरीकुंकुमद्रवचर्चितम् ॥ शरत्पार्वणचंद्रास्यं बिंबाधरमनो
हरम् ॥ ७७ ॥ मयूरपिच्छचूडं च सद्रत्नमुकुटोज्ज्वलम् ॥ त्रिभंगवक्रमध्यं च वनमालाविभूषितम् ॥ ७८ ॥ श्रीवत्सवक्षसं चारु
कौस्तुभेन विराजितम् ॥ किशोरवयसं शांतं कान्तं ब्रह्मेशयोः परम् ॥ ७९ ॥ ददर्श वसुदेवश्च देवकीपुरतो मुने॥तुष्टाव परया भक्त्या
विस्मयं परमं ययौ ॥ ८० ॥ कृतांजलिपुटो भूत्वा भक्तिनम्रात्मकंधरः ॥ साश्रुपूर्णः सपुलको देवक्या च स्त्रिया सह ॥ ८१ ॥
॥ वसुदेव उवाच ॥ ॥ [2]त्वामतींद्रियमव्यक्तमक्षरं निर्गुणं विभुम् ॥ ध्यानासाध्यं च सर्वेषां परमात्मानमीश्वरम् ॥ ८२ ॥ स्वेच्छामयं
सर्वरूपं स्वेच्छारूपधरं परम् ॥ निर्लिप्तं परमं ब्रह्म बीजरूपं सनातनम् ॥ ८३ ॥ स्थूलात्स्थूलतरं व्याप्तमतिसूक्ष्ममदर्शनम् ॥ स्थितं
सर्वशरीरेषु साक्षिरूपमदृश्यकम् ॥ ८४ ॥ शरीरवंतं सगुणमशरीरं गुणोत्करम् ॥ प्रकृतिं प्रकृतीशं च प्राकृतं प्रकृतेः परम् ॥८५ ॥

---

[1] मुनयः–इ० पा० । [2] श्रीमंतमिंद्रियातीतम्–इ० पा०. ।

सर्वेशं सर्वरूपं च सर्वांतकरमव्ययम् ॥ सर्वाधारं निराधारं निर्व्यूहं स्तौमि किं विभुम् ॥ ८६ ॥ अनंतः स्तवनेऽशक्तोऽशक्ता देवी सरस्वती ॥ यं वा स्तोतुमशक्तश्च पंचवक्त्रः षडाननः ॥ ८७ ॥ चतुर्मुखो वेदकर्ता यं स्तोतुमक्षमः सदा ॥ गणेशो न समर्थश्च योगींद्राणां गुरोर्गुरुः ॥ ८८ ॥ ऋषयो देवताश्चैव मुनींद्रमनुमानवाः ॥ स्वप्ने तेषामदृश्यं च त्वामेवं किं स्तुवंति ते ॥ ८९ ॥ श्रुतयः स्तवनेऽशक्ताः किं स्तुवंति विपश्चितः ॥ विहायैवं शरीरं च बालो भवितुमर्हसि ॥ ९० ॥ वसुदेवकृतं स्तोत्रं त्रिसंध्यं यः पठेन्नरः ॥ भक्तिं दास्यमवाप्नोति श्रीकृष्णचरणांबुजे ॥ ९१ ॥ विशिष्टपुत्रं लभते हरिदासं गुणान्वितम् ॥ संकटं निस्तरेत्तूर्णं शत्रुभीत्या प्रमुच्यते ॥ ९२ ॥ इति श्रीब्रह्मवैवर्ते वसुदेवकृतं श्रीकृष्णस्तोत्रम् ॥ नारायण उवाच ॥ वसुदेववचः श्रुत्वा तमुवाच हरिः स्वयम् ॥ प्रसन्नवदनः श्रीमान्भक्तानुग्रहकातरः ॥ ९३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ तपसां च फलेनैव पुत्रोऽहं तव सांप्रतम् ॥ वरं वृणीष्व भद्रं ते भविष्यति न संशयः ॥ ९४ ॥ पुरा तपस्विनां श्रेष्ठः सुतपास्त्वं प्रजापतिः ॥ पत्नी ते पृश्निनाम्नी च तपसाऽऽराधितस्त्वया ॥ ९५ ॥ पुत्रो मत्सदृशस्तत्र दृष्ट्वा मां च वृतो बुधैः ॥ मया दत्तो वरस्तुभ्यं मत्समो भविता सुतः ॥ ९६ ॥ दत्त्वा तुभ्यं वरं तात मनसाऽऽलोच्य चिंतितः ॥ मत्समो नास्ति भुवने पुत्रोऽहं तेन हेतुना ॥ ९७ ॥ तपसां च प्रभावेण त्वमेव कश्यपः स्वयम् ॥ सुतपा देवमातेयमदितिश्च पतिव्रता ॥ ९८ ॥ अधुना कश्यपांशस्त्वं वसुदेवः पिता मम ॥ देवकी देवमातेयमदितेरंशसंभवा ॥ ९९ ॥ त्वत्तोऽदित्यां वामनोऽहं पुत्रस्तेंऽशेन संभवः ॥ अधुना परिपूर्णोऽहं पुत्रस्ते तपसां[3] फलात् ॥ १०० ॥ मां वा त्वं पुत्रभावेन ब्रह्मभावेन वा पुनः ॥ मां प्राप्तोऽसि महाप्राज्ञ जीवन्मुक्तो भविष्यसि ॥ १०१ ॥ यशोदाभवनं शीघ्रं मां गृहीत्वा व्रजं व्रज ॥ संस्थाप्य तत्र मां तात मायामादाय स्थापय ॥ १०२ ॥ इत्युक्त्वा श्रीहरिस्तत्र बालरूपो बभूव ह ॥ नग्नं भूमौ शयानं च ददर्श श्यामलं सुतम् ॥ १०३ ॥ दृष्ट्वा स बालकं तत्र मोहितो विष्णुमायया ॥ किं वा कूटं च तंद्रायामपूर्वं सूतिकागृहम् ॥ १०४ ॥ इत्युक्त्वा वसु

---

१ विभो–इति पा० । २ वरः–इति पा० । ३ तपसः–इति पा० ।

देवश्च समालोच्य स्त्रिया सह ॥ गृहीत्वा बालकं क्रोडे जगाम नन्दगोकुलम् ॥ १०५॥ गत्वा नन्दव्रजं शीघ्रं विवेश सूतिकागृहम् ॥ ददर्श शयनाविष्टां यशोदां निद्रयाऽन्विताम् ॥ १०६ ॥ निद्रान्वितं च नन्दं च सर्वं तत्र गृहे स्थितम् ॥ ददर्श बालिकां नम्रां तप्तकांचनसन्निभाम् ॥१०७॥ ईषद्धास्यां प्रसन्नास्यां पश्यन्तीं गृहशेखरम् ॥ तां दृष्ट्वा वसुदेवश्च विस्मयं परमं ययौ ॥ १०८ ॥ संस्थाप्य तत्र पुत्रं च कन्यामादाय सत्वरम् ॥ जगाम मथुरां हृष्टः स्वकांतासूतिकागृहम् ॥ १०९ ॥ स्थापयामास तत्रैव महामायां च बालिकाम् ॥ रोरूयमाणां तामेव दृष्ट्वा हृष्टा च देवकी ॥११०॥ रोदनेनैव सा बाला बोधयामास रक्षकान् ॥ उत्थाय रक्षकाः शीघ्रं बालिकां जगृहुस्तदा ॥ १११ ॥ गृहीत्वा बालिकां ते च प्रजग्मुः कंससन्निधिम् ॥ जगाम देवकी पश्चाद्वसुदेवश्च शोकतः ॥ ११२ ॥ दृष्ट्वा च बालिकां कंसो नातिहृष्टो महामुने ॥ रोरूयमाणां कल्याणीं तद्दया न बभूव ह ॥ ११३ ॥ तां गृहीत्वा च पाषाणे हन्तुं यांतं सुदारुणम् ॥ उवाच वसुदेवश्च देवकी परमादरम् ॥११४॥ भोभोः कंस नृपश्रेष्ठ नीतिशास्त्रविशारद ॥ निबोध वाक्यं सत्यं च नीतियुक्तं मनोरमम् ॥ ११५ ॥ हत्वाऽऽवयोः पुत्रषट्कं दया ते नास्ति बांधव ॥ अधुना चाष्टमे गर्भे बालिकामबलां मम ॥ ११६ ॥ हत्वा तव किमैश्वर्यं भविष्यति महीतले ॥ स्त्रीमेव हंतुमबल किं क्षमा रणमूर्धनि ॥ ११७ ॥ इत्येवमुक्त्वा तं वसुदेवकी च सभातले ॥ रुरोद पुरतस्तत्र कंसस्य च दुरात्मनः ॥ कंसस्तयोर्वचःश्रुत्वा तामुवाच दुरात्मना ॥ ११८ ॥ ॥ कंस उवाच ॥॥ शृणु वाक्यं मदीयं च निबोध बोधयामि ते ॥ ११९ ॥ तृणेन पर्वतं हन्तुं शक्तो धाता च दैवतः ॥ कीटेन सिंहशार्दूलं मशकेन गजं तथा ॥ १२० ॥ शिशुना च महावीरं महांतं क्षुद्रजन्तुभिः ॥ मूषकेन च मार्जारं मंडूकेन भुजंगमम् ॥ १२१ ॥ एवं जन्येन जनकं भक्ष्येणैव च भक्षकम् ॥ वह्निना च जलं नष्टुं वह्निं शुष्कतृणेन च ॥ १२२ ॥ पीताः सप्त समुद्राश्च द्विजेनैकेन जन्तुना ॥ धातुर्गतिर्विचित्रा तु दुर्ज्ञेया भुवनत्रये ॥ १२३ ॥ दैवेन बालिका नष्टुं मां समर्था भविष्यति ॥ बालिकां च वधिष्यामि नात्र कार्या विचारणा ॥ १२४ ॥ इत्येवमुक्त्वा कंसश्च गृहीत्वा बालिकां तदा ॥ हंतुमारब्धवान्कंसस्तमुवाच वसुस्तदा ॥ १२५ ॥

वृथा हिंसितवान्राजन्देहि बालां कृपानिधे ॥ स तच्छ्रुत्वा विचारज्ञः कंसस्तुष्टो महामुने ॥ १२६ ॥ संबोधयन्तं तत्रैव वाग्बभूवा
शरीरिणी ॥ हे कंस हंसि कां मूढ न विज्ञाय हरेर्गतिम् ॥ १२७ ॥ कुत्रचित्त्वन्निहन्ताऽस्ति काले व्यक्तो भविष्यति ॥ श्रुत्वैव
देववाणीं च तत्याज बालिकां नृपः ॥ १२८ ॥ वसुदेवो देवकी च तामादाय मुदाऽन्वितौ ॥ जग्मतुः स्वगृहं तौ च कन्यां कृत्वा
स्ववक्षसि ॥ १२९ ॥ मृतामिव पुनः प्राप्य ब्राह्मणेभ्यो ददौ धनम् ॥ सा परा भगिनी विप्र कृष्णस्य परमात्मनः ॥ १३० ॥
एकानंशेति विख्याता पार्वत्यंशसमुद्भवा ॥ वसुस्तां द्वारकायां तु रुक्मिण्युद्वाहकर्मणि ॥ १३१ ॥ ददौ दुर्वाससे
भक्त्या शंकरांशाय भक्तितः ॥ एवं निगदितं सर्वं कृष्णजन्मानुकीर्तनम् ॥ जन्ममृत्युजरातिघ्नं सुखदं पुण्यदं मुने ॥ १३२ ॥
॥ इति श्रीब्रह्मवैवर्तें महापुराणे कृष्णजन्मखंडे नारायणनारदसंवादे सप्तमोऽध्यायः ॥ ७ ॥ ॥ नारद उवाच ॥ ॥ जन्मा
ष्टमीव्रतं ब्रूहि व्रतानां व्रतमुत्तमम् ॥ फलं जयंतीयोगस्य सामान्येनैव सांप्रतम् ॥ १ ॥ को वा दोषोऽप्यकरणे भोजने
वा महामुने ॥ उपवासफलं किं वा जयंत्यां च सुसंमतम् ॥ २ ॥ व्रतं पूजाविधानं च संयमस्य च सांप्रतम् ॥ उपवासपारणयोः
सुविचार्य वद प्रभो ॥ ३ ॥ ॥ नारायण उवाच ॥ ॥ कृत्वा हविष्यं सप्तम्यां संयतः पारणे तथा ॥ अरुणोदयवेलायां समुत्थाय
परेऽहनि ॥ ४ ॥ प्रातःकृत्यं संविधाय स्नात्वा संकल्पमाचरेत् ॥ व्रतोपवासयोर्ब्रह्मञ्छ्रीकृष्णप्रीतिहेतुकम् ॥ ५ ॥ मन्वादिदिवसे
प्राप्ते यत्फलं स्नानपूजनैः ॥ फलं भाद्रपदेऽष्टम्यां भवेत्कोटिगुणं द्विज ॥ ६ ॥ तस्यां तिथौ वारिमात्रं पितृणां यः प्रयच्छति ॥ गया
श्राद्धं कृतं तेन शताब्दं नात्र संशयः ॥ ७ ॥ स्नात्वा नित्यक्रियां कृत्वा निर्माय सूतिकागृहम् ॥ लोहखंड[1]वह्निजालैर्युक्तं रक्षकसंघकैः ॥
॥ ८ ॥ तत्र द्रव्यं बहुविधं नाभिच्छेदनकर्तनम् ॥ धात्रीस्वरूपां नारीं च यत्नतः स्थापयेद्बुधः ॥ ९ ॥ पूजाद्रव्याणि चारूणि
सोपचाराणि षोडश ॥ फलान्यष्टौ च मिष्टानि द्रव्याण्येव हि नारद ॥ १० ॥ जातीफलं च कंकोलं दाडिमं श्रीफलं तथा ॥ नारि

---

१ लोहखड्गं–इ० पा० । २ नाडी– इ० पा० ।

केरं च जंबीरं कूष्मांडं च सुवांससम् ॥ ११ ॥ आसनं वसनं पाद्यं मधुपर्कं तथैव च ॥ अर्घ्यमाचनीयं च स्नानीयं शयनं तथा
॥ १२ ॥ गंधं पुष्पं च नैवेद्यं तांबूलमनुलेपनम् ॥ धूपदीपौ भूषणं वै चोपचारांश्च षोडश ॥ १३ ॥ पादप्रक्षालनं कृत्वा धृत्वा
धौते च वाससी ॥ आचम्य चासने स्थित्वा स्वस्तिवाचनपूर्वकम् ॥ १४ ॥ घटस्यारोपणं कृत्वा संपूज्य पंच देवताः ॥ घटे
ह्यावाहनं कृत्वा श्रीकृष्णं परमेश्वरम् ॥ १५ ॥ वसुदेवं देवकीं च यशोदां नंदमेव च ॥ रोहिणीं बलदेवं च षष्ठीदेवीं
वसुंधराम् ॥ १६ ॥ रोहिणीं ब्राह्मणीं चैव अष्टमीं स्थानदेवताम् ॥ अश्वत्थाम्ना सह बलिं हनुमंतं विभीषणम् ॥ १७ ॥
कृपं परशुरामं च वेदव्यासं मृकंडकम् ॥ सर्वस्यावाहनं कृत्वा ध्यानं कुर्याद्धरेस्तदा ॥ १८ ॥ पुष्पकं मस्तके न्यस्य पुनर्ध्यायेद्वि
चक्षणः ॥ ध्यानं च सामवेदोक्तं शृणु वक्ष्यामि नारद ॥ १९ ॥ ब्रह्मणा कथितं पूर्वं कुमाराय महात्मने ॥ २० ॥ बालं नीलांबु
जाभमतिशयरुचिरं स्मेरवक्त्रांबुजं तं ब्रह्मेशानंतधर्मैः कतिकतिदिवसैः स्तूयमानं परं यत् ॥ ध्यानासाध्यमृषीन्द्रैर्मुनिगणमनुजैः
सिद्धसंघैरसाध्यं योगींद्राणामचिंत्यमतिशयमतुलं साक्षिरूपं भजेऽहम् ॥ २१ ॥ ध्यात्वा पुष्पं च दत्त्वा च तत्सर्वं च निवेदयेत् ॥
एवं व्रती व्रतं कुर्याच्छृणु मंत्रक्रमं मुने ॥ २२ ॥ आसनं सर्वशोभाढ्यं सद्रत्नमणिनिर्मितम् ॥ विचित्रं च विचित्रेण गृह्यतां शोभनं
हरे ॥ २३ ॥ वसनं वह्निशौचं च निर्मितं विश्वकर्मणा ॥ प्रतप्तस्वर्णखचितं चित्रितं गृह्यतां हरे ॥ २४ ॥ पादप्रक्षालनार्थं च स्वर्ण
पात्रस्थितं जलम् ॥ पवित्रं निर्मलं चारु पाद्यं च गृह्यतां हरे ॥ २५ ॥ मधुसर्पिर्दधिक्षीरं शर्करासंयुतं परम् ॥ स्वर्णपात्रस्थितं
देयं स्नानार्थं गृह्यतां हरे ॥ २६ ॥ दूर्वाक्षतं शुक्लपुष्पं स्वच्छतोयसमन्वितम् ॥ चंदनागुरुकस्तूरीसहितं गृह्यतां हरे ॥ २७ ॥ सुस्वादु
स्वच्छतोयं च वासितं गंधवस्तुना ॥ शुद्धमाचमनीयं च गृह्यतां परमेश्वर ॥ २८ ॥ गंधद्रव्यसमायुक्तं विष्णो तैलं सुवासितम् ॥
आमलक्या द्रवं चैव स्नानीयं गृह्यतां हरे ॥ २९ ॥ सद्रत्नमणिसारेण रचितां सुमनोहराम् ॥ छादितां सूक्ष्मवस्त्रेण शय्यां च गृह्यतां

---

१ मनोहरं–इ० पा० ।

हरे ॥ ३० ॥ चूर्णं[1] च वृक्षभेदानां मूलानां द्रवसंयुतम्[2] ॥ कस्तूरीद्रव[3]संयुक्तं गन्धं[4] च गृह्यतां हरे ॥ ३१ ॥ पुष्पं सुगंधियुक्तं च संयुक्तं[5]
कुंकुमेन च ॥ सुप्रियं सर्वदेवानां सांप्रतं[6] गृह्यतां हरे ॥ ३२ ॥ गृह्यतां स्वस्तिकोक्तं च मिष्टद्रव्यसमन्वितम् ॥ सुपक्कफलसंयुक्तं नैवेद्यं
गृह्यतां हरे ॥ ३३ ॥ लड्डुकं मोदकं चैव सार्पिः क्षीरं गुडं मधु ॥ नवोद्धृतं दधि तक्रं नैवेद्यं गृह्यतां हरे ॥ ३४ ॥ शीतलं शर्करायुक्तं
क्षीरस्वादुसुपक्ककम् ॥ तांबूलं भोगसारं च कर्पूरादिसमन्वितम् ॥ ३५ ॥ भक्त्या निवेदितमिदं गृह्यतां परमेश्वर ॥ चन्दनागुरु
कस्तूरीकुंकुमद्रवसंयुतम् ॥ ३६ ॥ अबीरचूर्णं रुचिरं गृह्यतां परमेश्वर ॥ तरुभेदरसोत्कर्षो गंधयुक्तोऽग्निना सह ॥ ३७ ॥ सुप्रियः
सर्वदेवानां धूपोऽयं गृह्यतां हरे ॥ घोरांधकारनाशैकहेतुरेव शुभावहः ॥ ३८ ॥ सुप्रदीपो दीप्तिकरो दीपोऽयं गृह्यतां हरे ॥ पवित्रं निर्मलं
तोयं कर्पूरादिसमायुतम्[7] ॥ ३९ ॥ जीवनं सर्वबीजानां पानार्थं गृह्यतां हरे ॥ नानापुष्पसमायुक्तं ग्रथितं सूक्ष्मतंतुना ॥ ४० ॥
शरीरभूषणवरं माल्यं च प्रतिगृह्यताम् ॥ दत्त्वा देयानि द्रव्याणि पूजोपयोगितानि च ॥ ४१ ॥ व्रतस्थानस्थितं द्रव्यं हरये देयमेव
च ॥ फलानि तरुबीजानि स्वादूनि सुंदराणि च ॥ ४२ ॥ वंशवृद्धिकराण्येव गृह्यतां परमेश्वर ॥ आवाहितांश्च देवांश्च प्रत्येकं
पूजयेद्व्रती ॥ ४३ ॥ तान्पूज्य भक्तिभावेन दद्यात्पुष्पांजलित्रयम् ॥ सुनंदनंदकुमुदान्गोपान्गोपीश्च राधिकाम् ॥ ४४ ॥ गणेशं
कार्त्तिकेयं च ब्रह्माणं च शिवं शिवाम् ॥ लक्ष्मीं सरस्वतीं चैव दिक्पालांश्च ग्रहांस्तथा ॥ ४५ ॥ शेषं सुदर्शनं चैव पार्षदप्रवरांस्तथा॥
सम्पूज्य सर्वदेवांश्च प्रणम्य दंडवद्भुवि ॥ ब्राह्मणेभ्यश्च नैवेद्यं दत्त्वा दद्याच्च दक्षिणाम् ॥ ४६ ॥ कथां च जन्माध्यायोक्तां शृणुयाद्भक्ति
भावतः ॥ तदा कुशासने स्थित्वा कुर्याज्जागरणं व्रती ॥ ४७ ॥ प्रभाते चाह्निकं कृत्वा संपूज्य श्रीहरिं मुदा ॥ ब्राह्मणान्भोजयित्वा
च कारयेद्धरिकीर्तनम्[8] ॥ ४८ ॥ ॥ नारद उवाच ॥ ॥ व्रतकालव्यवस्थां च वेदोक्तां सर्वसंमताम् ॥ वेदार्थं च समालोच्य संहितां

---

१ सचूर्णो–इ० पा० । २ संयुतः –इ० पा० । ३ संयुक्तो– इ० पा० । ४ गन्धश्च–इ० पा० । ५ वनस्पतिसमुद्भवम्–इ० पा० । ६ गृह्यतां परमेश्वर–इ० पा० ।
७ सुवासितम्–इ० पा० । ८ कुर्याच्छ्रीहरिकीर्तनम्–इ० पा० ।

च पुरातनीम् ॥४९॥ उपवासे जागरणे व्रते किं वा फलं मुने ॥ किं वा पापं तत्र भुक्त्वा वद वेदविदां वर ॥५० ॥ ॥ श्रीनारायण उवाच ॥ ॥ अष्टमी कर्क्षसंयुक्ता रात्र्यर्थे यदि दृश्यते ॥ स एव मुख्यकालश्च तत्र जातः स्वयं हरिः ॥ ५१ ॥ जयं पुण्यं च कुरुते जयंती तेन संस्मृता ॥ तत्रोपोष्य व्रतं कृत्वा कुर्याज्जागरणं बुधः ॥ ५२ ॥ सर्वापवादः कालोऽयं प्रधानः सर्वसंमतः ॥ इति वेदविदां वाणी चेत्युक्ता वेधसा पुरा ॥ ५३ ॥ तत्र जागरणं कृत्वा यश्चोपोष्य व्रतं चरेत् ॥ कोटिजन्मार्जितात्पापान्मुच्यते नात्र संशयः ॥ ५४ ॥ वर्जनीया प्रयत्नेन सप्तमीसहिताष्टमी ॥ सा सर्क्षापि न कर्तव्या सप्तमीसहिताष्टमी ॥ अविद्धायां कऋक्षायां जातो देवकिनंदनः ॥ ५५ ॥ वेदवेदांगगुप्तेतिविशिष्टं मंगलक्षणे ॥ व्यतीते रोहिणीऋक्षे व्रती कुर्याच्च पारणाम् ॥ ५६ ॥ तिथ्यंते च हरिं स्मृत्वा कृत्वा देवार्चनं व्रती ॥ पारणं पावनं पुंसां सर्वपापप्रणाशनम् ॥ ५७ ॥ उपवासांगभूतं च फलदं सिद्धिकारणम् ॥ सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते ॥ ५८ ॥ अन्यथा फलहानिः स्यात्कृते धारणपारणे ॥ न रात्रौ पारणं कुर्यादृते वै रोहिणीव्रतात् ॥५९॥ निशायां पारणं कुर्याद्वर्जयित्वा महानिशाम् ॥ पूर्वाह्णे पारणं शस्तं कृत्वा विप्रसुरार्चनम् ॥ ६० ॥ सर्वेषां संमतं कुर्यादृते वै रोहिणीव्रतम् ॥ बुधसोमसमायुक्ता जयंती यदि लभ्यते ॥६१॥ न कुर्याद्गर्भवासं च तत्र कृत्वा व्रतं व्रती ॥ उदये चाष्टमी किंचिन्नवमी सकला यदि ॥ ६२ ॥ भवेद्बुधेंदुसंयुक्ता प्राजापत्यर्क्षसंयुता ॥ अपि वर्षशतेनापि लभ्यते वा न लभ्यते ॥ ६३ ॥ व्रतं तत्र व्रती कुर्यात्पुंसां कोटिं समुद्धरेत् ॥ नृणां विना व्रतेनापि भक्तानां हीनसंपदाम् ॥ ६४ ॥ कृतेनैवोपवासेन प्रीतो भवति माधवः ॥ भक्त्या नानोपचारेण रात्रौ जागरणेन च ॥ ६५ ॥ फलं ददाति दैत्यारिर्जयन्तीव्रतसंभवम् ॥ वित्तशाठ्यमकुर्वाणः सम्यक्फलमवाप्नुयात् ॥६६॥ कुर्वाणो वित्तशाठ्यं च लभते सदृशं फलम् ॥ अष्टम्यामथ रोहिण्यां न कुर्यात्पारणं बुधः ॥ ६७ ॥ हन्यात्पुराकृतं पुण्यं चोपवासार्जितं फलम् ॥ तिथिरष्टगुणं हंति नक्षत्रं च चतुर्गुणम् ॥ ६८ ॥ तस्मात्प्रयत्नतः कुर्यात्तिथिभांते च पारणम् ॥ महानिशायां प्राप्तायां

---

[१] कर्क्षेण ब्रह्मनक्षत्रेण रोहिणीनक्षत्रेण संयुक्तेत्यर्थः ।

तिथिभांतं यदा भवेत् ॥ ६९ ॥ तृतीयेऽह्नि मुनिश्रेष्ठ पारणं कुरुते बुधः ॥ षण्मुहूर्तें व्यतीते तु रात्रावेव महानिशा ॥ ७० ॥ लभते
ब्रह्महत्यां च तत्र भुक्त्वा च नारद ॥ गोमांसविण्मूत्रसमं तांबूलं च फलं जलम् ॥ ७१ ॥ पुंसामभक्ष्यं शुद्धानामोदनस्य च का
कथा ॥ त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यं च चतुष्टयम् ॥ ७२ ॥ नांडीनां[1] तदुभे सन्ध्ये दिवसाद्यंतसंज्ञिते ॥ जन्माष्टम्यां च शुद्धायां
कृत्वा जागरणं व्रतम् ॥ ७३ ॥ शतजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥ जन्माष्टम्यां च शुद्धायामुपोष्य केवलं नरः ॥ ७४ ॥
अश्वमेधफलं तस्य व्रतं जागरणं विना ॥ यद्बाल्ये यच्च कौमारे यौवने यच्च वार्धके ॥ ७५ ॥ सप्तजन्मकृतात्पापान्मुच्यते नात्र
संशयः ॥ श्रीकृष्णजन्मदिवसे यश्च भुंक्ते नराधमः ॥ ७६ ॥ स भवेन्मातृगामी च ब्रह्महत्याशतं लभेत् ॥ कोटिजन्मार्जितं पुण्यं
तस्य नश्यति निश्चितम् ॥ ७७ ॥ अनर्हश्चाशुचिः शश्वद्दैवे पित्र्ये च कर्मणि ॥ अन्ते वसेत्कालसूत्रे यावच्चंद्रदिवाकरौ ॥ ७८ ॥
कृमिभिः शूलतुल्यैश्च तीक्ष्णदंष्ट्रैश्च भक्षितः ॥ पापी ततः समुत्थाय भारते जन्म चेल्लभेत् ॥ ७९ ॥ षष्टिवर्षसहस्राणि विष्ठायां च
कृमिर्भवेत् ॥ गृध्रकोटिसहस्राणि शतजन्मानि सूकरः ॥ ८० ॥ श्वापदः शतजन्मानि सृगालः सप्त जन्म च ॥ सप्तजन्मसु सर्पश्च
काकश्च सप्तजन्मसु[2] ॥ ८१ ॥ ततो भवेन्नरो मूको गलत्कुष्ठी सदातुरः ॥ ततो भवेत्पशुघ्नश्च व्यालग्राही ततो भवेत् ॥ ८२ ॥ तदंते
च भवेद्दस्युर्धर्महीनश्च[3] गृध्रकः ॥ ततो भवेत्स रजकस्तैलकारस्ततो भवेत् ॥ ८३ ॥ ततो भवेद्देवलको ब्राह्मणश्च सदाऽशुचिः ॥ उपवा
सासमर्थश्चेदेकं विप्रं च भोजयेत् ॥ ८४ ॥ तावद्धनानि वा दद्याद्यद्भुक्तं द्विगुणं भवेत् ॥ सहस्रसंमितां देवीं जपेद्वा प्राणसंयमान् ॥
॥ ८५ ॥ कुर्याद्द्वादशसंख्याकान्यथार्थं तद्व्रते नरः ॥ इत्येवं कथितं वत्स श्रुतं यद्धर्मवक्त्रतः ॥ व्रतोपवासपूजानां विधानमकृते च
यत् ॥ ८६ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे नारायणनारदसंवादे श्रीकृष्णजन्मखण्डे कृष्णजन्माष्टमीव्रतपूजोपवासनिरूपणं नामा
ष्टमोऽध्यायः ॥ ८ ॥ नारद उवाच ॥ संस्थाप्य गोकुले कृष्णं यशोदामंदिरे वसुः ॥ जगाम स्वगृहं नन्दः किं चकार महाँ[4]

---

१ दण्डानाम्—इ० पा० । २ शतजन्मसु—इ० पा० ३ । हीनो नरघ्नकः—इ० पा० । ४ सुतोत्सवम्—इ० पा० ।

प्रभुः ॥ १ ॥ किञ्चकार हरिस्तत्र कतिवर्षस्थितिः प्रभोः ॥ बालक्रीडनकं तस्य वर्णय क्रमशो मुने ॥ २ ॥ पुरा कृता या प्रतिज्ञा
गोलोके राधया सह ॥ तत्कृतं केन विधिना प्रतिज्ञापालनं हरेः ॥ ३ ॥ कीदृग्वृन्दावनं नाम मण्डलं किंविधं वद ॥ रासक्रीडां
जलक्रीडां संव्यस्य वर्णय प्रभो ॥ ४ ॥ नन्दस्तपः किञ्चकार यशोदा चाथ रोहिणी ॥ हरेः पूर्वं च हलिनः कुत्र जन्म बभूव ह ॥
॥ ५ ॥ पीयूषखंडमाख्यानमपूर्वं श्रीहरेः स्मृतम् ॥ विशेषतः कविर्मुखान्नव्यं[1] नूनं पदे पदे ॥ ६ ॥ स्वरासमण्डलक्रीडां वर्णय स्वयमेव
च ॥ परोक्षवर्णनात्काव्यं प्रशस्तं नव्यवर्णनम् ॥७॥ श्रीकृष्णांशो भवान्साक्षाद्योगींद्राणां गुरोर्गुरुः ॥ यो यस्यांशः स च जनस्तस्यैव
सुखतः सुखी ॥ ८ ॥ त्वयैव वर्णितौ पादौ विलीनौ तु युवां हरेः ॥ साक्षाद्गोलोकनाथांशस्त्वमेव तत्समो महान् ॥ ९ ॥ ॥ नारायण
उवाच ॥ ॥ ब्रह्मेशशेषविघ्नेशाः कूर्मौ धर्मोऽहमेव च ॥ नरश्च कार्त्तिकेयश्च श्रीकृष्णांशा वयं नव ॥१०॥ अहो गोलोकनाथस्य महिमा
केन वर्ण्यते ॥ यं स्वयं नो विजानीमो न वेदाः किं विपश्चितः ॥ ११ ॥ सूकरो वामनः कल्किबौद्धः कपिलमीनकौ ॥ एते चांशाः
कलाश्चान्ये संत्येव कतिधा मुने ॥ १२ ॥ कूर्मौ नृसिंहो रामश्च श्वेतद्वीपविराड्विभुः ॥ परिपूर्णतमः कृष्णो वैकुण्ठे गोकुले स्वयम् ॥
॥ १३ ॥ वैकुण्ठे कमलाकांतो रूपभेदाच्चतुर्भुजः ॥ गोलोके गोकुले राधाकांतोऽयं द्विभुजः स्वयम् ॥ १४ ॥ अस्यैव तेजो नित्यं
च चित्ते कुर्वंति योगिनः ॥ भक्ताः पादाम्बुजं तेजः कुतस्तेजस्विनं विना ॥ १५ ॥ शृणु विप्र वर्णयामि यशोदानन्दयोस्तपः ॥
रोहिण्याश्च यतो हेतोर्ददृशुस्ते हरेर्मुखम् ॥ १६ ॥ वसूनां प्रवरो नन्दो नाम्ना द्रोणस्तपोधनः ॥ तस्य पत्नी धरा साध्वी यशोदा सा
तपस्विनी ॥१७॥ रोहिणी सर्पमाता च कद्रूश्च सर्पकारिणी ॥ एतेषां जन्मचरितं निबोध कथयामि ते ॥ १८ ॥ एकदा च धराद्रोणौ
पर्वते गन्धमादने ॥ पुण्यदे भारते वर्षे गौतमाश्रमसन्निधौ ॥ १९ ॥ चक्रतुश्च तपस्तत्र वर्षाणामयुतं मुने ॥ श्रीकृष्णदर्शनार्थं च
निर्जने सुप्रभातटे ॥ २० ॥ न ददर्श हरिं द्रोणो धरा चैव तपस्विनी ॥ कृत्वाग्निकुंडं वैराग्यात्प्रवेष्टुं समुपस्थितौ ॥२१॥ तौ मर्तुकामौ

---

[1] कविमुखे काव्यं नूत्नं पदेपदे—इ० पा० ।

दृष्ट्वा च वाग्बभूवाशरीरिणी ॥ द्रक्ष्यथः श्रीहरिं पृथ्व्यां गोकुले पुत्ररूपिणम् ॥ २२ ॥ जन्मांतरे वसुश्रेष्ठ दुर्दर्शं योगिनां विभुम् ॥
ध्यानासाध्यं च विदुषां ब्रह्मादीनां च वंदितम् ॥ २३ ॥ श्रुत्वैवं तद्धराद्रोणौ जग्मतुः स्वालयं सुखात् ॥ लब्ध्वा तु भारते जन्म
दृष्टं ताभ्यां हरेर्मुखम् ॥ २४ ॥ यशोदानंदयोरेवं कथितं चरितं तव ॥ सुगोप्यं त्रिदशानां च रोहिणीचरितं शृणु ॥ २५ ॥
एकदा देवमाता च पुष्पोत्सवदिने सती ॥ विज्ञापनं चरद्वारा चकार कश्यपं मुने ॥ २६ ॥ सुस्नाता सुंदरी देवी रत्नालंकार
भूषिता ॥ चकार वेषं विविधं ददर्श दर्पणे मुखम् ॥ २७ ॥ कस्तूरीबिंदुना सार्द्धं सिंदूरबिंदुसंयुतम् ॥ रत्नकुंडलशोभाढ्यं
पत्राभरणभूषितम् ॥ २८ ॥ गजमौक्तिकसंयुक्तं नासाग्रं सुमनोहरम् ॥ शरत्पार्वणचंद्रास्यं शरत्पंकजलोचनम् ॥ २९ ॥ वक्रभ्रूभं
गिना युक्तं विचित्रकज्जलोज्ज्वलम् ॥ पक्वदाडिमबीजाभदंतपंक्तिविराजितम् ॥ ३० ॥ पक्वबिंबाधरौष्ठं च सस्मितं सुदरं सदा ॥
अतीव कमनीयं च मुनींद्रचित्तमोहनम् ॥ ३१ ॥ एवंभूतं मुखं दृष्ट्वा सुंदरी स्वगृहे स्थिता ॥ पश्यंती पतिमार्गं च कामबाणप्र
पीडिता ॥ ३२ ॥ शुश्राव वार्तामदितिः कश्यपं कद्रुसंयुतम् ॥ रत्नसारसमारंभे तस्या वक्षस्थले स्थितम् ॥ ३३ ॥ श्रुत्वा
चुकोप साध्वी सा हताशा रतिकातरा ॥ न शशाप पतिं प्रेम्णा शशाप सर्पमातरम् ॥ ३४ ॥ न देवालययोग्या सा धर्मिष्ठा
धर्मनाशिनी ॥ दूरं गच्छतु स्वर्लोकादात्मयोनिं च मानवीम् ॥ ३५ ॥ श्रुत्वैवं सा चरद्वारा शशाप देवमातरम् ॥ सा चैवं
मानवीं योनिं यातु मर्त्यें जरायुताम् ॥ ३६ ॥ कश्यपो बोधयामास कद्रुं च सर्पमातरम् ॥ काले यास्यसि मर्त्यं च मया सह
शुचिस्मिते ॥ ३७ ॥ त्यज भीतिं लभ सुखं द्रक्ष्यसि श्रीहरेर्मुखम् ॥ एवमुक्त्वा कश्यपश्च जगाम चादितेर्गृहम् ॥३८॥ वांछां पूर्णां
च तस्याश्च चकार भगवान्विभुः ॥ ऋतौ तत्र महेंद्रश्च बभूव च सुरर्षभः ॥३९॥ अदितिर्देवकी चैव सर्पमाता च रोहिणी ॥ कश्यपो
वसुदेवश्च श्रीकृष्णजनको महान् ॥ ४० ॥ रहस्यं गोपनीयं च सर्वं निगदितं मुने ॥ अधुना बलदेवस्य जन्माख्यानं मुने
शृणु ॥ ४१ ॥ अनंतस्याप्रमेयस्य सहस्रशिरसः प्रभोः ॥ रोहिणी वसुदेवस्य भार्यारत्नं च प्रेयसी ॥ ४२ ॥ जगाम गोकुलं

साध्वी वसुदेवाज्ञया मुने ॥ संकर्षणस्य रक्षार्थं कंसभीता पलायिता ॥ ४३ ॥ देवक्याः सप्तमं गर्भं माया कृष्णाज्ञया तदा ॥ रोहि
ण्या जठरे तत्र स्थापयामास गोकुले ॥ ४४ ॥ संस्थाप्य च तदा गर्भं कैलासं सा जगाम ह ॥ दिनांतरे कतिपये रोहिणी
नंदमंदिरे ॥ ४५ ॥ सुषाव पुत्रं कृष्णांशं तप्तरौग्याभमीश्वरम् ॥ ईषद्धास्यं प्रसन्नास्यं ज्वलंतं ब्रह्मतेजसा ॥ ४६ ॥ तस्यैव जन्म
मात्रेण देवा मुमुदिरे तदा ॥ स्वर्गे दुंदुभयो नेदुरानका मुरजादयः ॥ ४७ ॥ जयशब्दं शंखशब्दं चक्रुर्देवा मुदान्विताः ॥ नंदो
हृष्टो ब्राह्मणेभ्यो धनं बहुविधं ददौ ॥ ४८ ॥ चिच्छेद नाडीं धात्री च स्नापयामास बालकम् ॥ जयशब्दं जगुर्गोप्यः सर्वाभ
रणभूषिताः ॥ ४९ ॥ परपुत्रोत्सवं नंदश्चकार परमादरात् ॥ तदा यशोदा गोपीभ्यो ब्राह्मणेभ्यो ददौ मुदा ॥ ५० ॥ धनानि
नानावस्तूनि तैलं सिंदूरमेव च ॥ इत्येवं कथितं वत्स यशोदानंदयोस्तपः ॥ ५१ ॥ जन्माख्यानं च हलिनो रोहिणीचरितं
तथा ॥ अधुना ते वांछनीयं नंदपुत्रोत्सवं शृणु ॥ ५२ ॥ सुखदं मोक्षदं सारं जन्ममृत्युजरापहम् ॥ मंगलं कृष्णचरितं वैष्ण
वानां च जीवनम् ॥ ५३ ॥ सर्वाशुभविनाशं च भक्तिदास्यप्रदं हरेः ॥ श्रीकृष्णं वसुदेवश्च संस्थाप्य नंदमंदिरे ॥ ५४ ॥ गृहीत्वा
बालिकां हृष्टो जगाम निजमंदिरम् ॥ कथितं चरितं तस्याः श्रुतं संमुखतो मुने ॥ ५५ ॥ अधुना गोकुले कृष्णचरितं शृणु
मंगलम् ॥ वसुदेवे गृहं याते यशोदा नंद एव च ॥ ५६ ॥ मंगले सूतिकागारे जयागारे जयान्विते ॥ ददर्श पुत्रं भूमिस्थं
नवीननीरदप्रभम् ॥५७॥ अतीव सुंदरं नग्नं पश्यंतं गृहशेखरम् ॥ शरत्पार्वणचंद्रास्यं नीलेंदीवरलोचनम् ॥ ५८ ॥ रुदंतं च हसंतं च
वेणुसंसक्तविग्रहम् ॥ हस्तद्वयं सुविन्यस्तं प्रेमवंतं पदांबुजम् ॥ ५९ ॥ दृष्ट्वा नंदः स्त्रिया सार्द्धं हरिं हृष्टो बभूव ह ॥ धात्री तं
स्नापयामास शीततोयेन बालकम् ॥ ६० ॥ चिच्छेद नाडीं बालस्य हर्षाद्गोप्यो जयं ददुः ॥ आजग्मुर्गोपिकाः सर्वा
बृहच्छ्रोण्यश्चलत्कुचाः ॥ ६१ ॥ बालिकाश्च वयस्यश्च विप्रपत्न्याश्च सूतिकाम् ॥ आशिषं युयुजुः सर्वा ददृशुर्बालकं मुदा ॥ ६२ ॥
क्रोडे चक्रुः प्रशंसंत्य ऊषुस्तत्र च काश्चन ॥ नंदः सचैलः स्नातश्च धृत्वा धौते च वाससी ॥ ६३ ॥ पारंपर्यविधिं तत्र चकार हृष्ट

मानसः ॥ ब्राह्मणान्भोजयामास कारयामास मंगलम् ॥ ६४ ॥ वाद्यानि वादयामास बंदिभ्यश्च ददौ धनम् ॥ ततो नंदश्च
सानंदं ब्राह्मणेभ्यो ददौ धनम् ॥ ६५ ॥ सद्रत्नानि प्रवालानि हीरकाणि च सादरम् ॥ तिलानां पर्वतान्सप्त सुवर्णशतकं
मुने ॥ ६६ ॥ रौप्यं धान्याचलं वस्त्रं गोसहस्रं मनोहरम् ॥ दधि दुग्धं शर्करां च नवनीतं घृतं मधु ॥ ६७ ॥
मिष्टान्नं सल्लड्डुकौघं स्वादूनि मोदकानि च ॥ भूमिं च सर्वसस्याढ्यां वायुवेगांस्तुरंगमान् ॥ ६८ ॥ तांबूलानि च
तैलानि दत्त्वा हृष्टो बभूव ह ॥ रक्षितुं सूतिकागारं योजयामास ब्राह्मणान् ॥ ६९ ॥ तत्र मंत्रज्ञमनुजान्स्थ
विरान्गोपिकागणान् ॥ वेदांश्च पाठयामास हरेर्नामैकमंगलम् ॥ ७० ॥ भक्त्या च ब्राह्मणद्वारा पूजयामास देवताः ॥ गोपा
लिकाश्च वृद्धाश्च रत्नालंकारभूषिताः ॥ ७१ ॥ सस्मिता शीघ्रगामिन्य आजग्मुर्नंदमंदिरम् ॥ नानाविधाश्च गणका ज्योतिः
शास्त्रविशारदाः ॥ ७२ ॥ वाक्सिद्धाः पुस्तककरा आजग्मुर्नंदमंदिरम् ॥ सस्मिता विप्रपत्न्यश्च वयस्याः स्थविरा वराः ॥ ७३ ॥
बालिका बालकयुता आजग्मुर्नंदमंदिरम् ॥ तेभ्योऽपि प्रददौ रत्नं धनानि विविधानि च॥ ७४ ॥ वरवस्त्राणि रौप्याणि गोसहस्राणि
सादरम् ॥ नंदस्तेभ्यो नमस्कृत्य चकार विनयं मुदा ॥ ७५ ॥ आशिषं युयुजुः सर्वे ददृशुर्बालकं परम् ॥ एवं संभृतसंभारो बभूव
व्रजपुंगवः ॥७६॥ गणकैः कारयामास यद्भविष्यं शुभाशुभम् ॥ एवं ववर्ध बालश्च शुक्लपक्षे यथा शशी ॥ ७७ ॥ नंदालये हली चैव
भुक्त मातुः पयोधरम् ॥ तदा च रोहिणी हृष्टा तत्र पुत्रोत्सवे मुदा ॥७८॥ तैलसिंदूरतांबूलं धनं ताभ्यो ददौ मुने ॥ दत्त्वाशिषश्च
शिरसि ताश्च ते स्वालयं ययुः ॥ ७९ ॥ यशोदारोहिणीनंदास्तस्थुर्गेहे मुदान्विताः ॥ ८० ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृ
ष्णजन्मखंडे नारायणनारदसंवादे नंदपुत्रोत्सवो नाम नवमोऽध्यायः ॥ ९ ॥ ॥ श्रीनारायण उवाच ॥ ॥ अथ कंसः सभामध्ये
स्वर्णसिंहासनस्थितः ॥ शुश्राव वाचं गगने सूनृतामशरीरिणीम् ॥ १ ॥ किं करोषि महामूढ चिंतां स्वश्रेयसः कुरु ॥ जातः कालो
धरण्यां ते तिष्ठोपाये नराधिप ॥ २ ॥ नंदाय तनयं दत्त्वा वसुदेवस्तवांतकम् ॥ कन्यामादाय तुभ्यं च दत्त्वा संमायया स्थितः॥३॥

मायांशा कन्यकेयं च वासुदेवः स्वयं हरिः ॥ तव हंता गोकुले च वर्द्धते नंदमंदिरे ॥ ४ ॥ देवक्याः सप्तमो गर्भो वर्द्धते नंदमंदिरे
॥ देवक्याः सप्तमो गर्भो न सुस्रावामृतं सुतम् ॥ ५ ॥ स्थापयामास माया तं रोहिणीजठरे किल ॥ तत्र जातश्च शेषांशो बलदेवो
महाबलः ॥ ६ ॥ गोकुले तौ च वर्द्धेते कालौ ते नंदमंदिरे ॥ श्रुत्वेति वचनं राजा बभूवानम्रकंधरः ॥ ७ ॥ चिंतामवाप सहसा
तत्याजाहारमुन्मनाः ॥ पूतनां च समानीय प्राणेभ्यः प्रेयसीं सतीम् ॥ ८ ॥ उवाच भगिनीं राजा सभामध्ये च नीतिवित् ॥ ॥ कंस
उवाच ॥ ॥ पूतने गोकुलं गच्छ कार्यार्थं नंदमंदिरम् ॥ ९ ॥ विषाक्तं च स्तनं कृत्वा शिशवे देहि सत्वरम् ॥ त्वं मनोयायिनी वत्से
मायाशास्त्रविशारदा ॥ १० ॥ मायामानुषरूपं च विधाय व्रज योगिनि ॥ दुर्वाससो महामंत्रं प्राप्य सर्वत्रगामिनी ॥ ११ ॥ सर्वरूपं
विधातुं त्वं शक्तासि सुप्रतिष्ठिते ॥ इत्युक्त्वा तां महाराजस्तस्थौ संसदि नारद ॥ १२ ॥ जगाम पूतना कंसं प्रणम्य कामचारिणी ॥
तप्तकांचनवर्णाभा नानालंकारभूषिता ॥ १३ ॥ बिभ्रती कबरीभारं मालतीमाल्यसंयुतम् ॥ कस्तूरीबिंदुना युक्तं सिंदूरं दधती मुदा ॥
॥ १४ ॥ मंजीररशनाभ्यां च कलशब्दं प्रकुर्वती ॥ संप्राप्य गोष्ठं दुर्दर्शं नंदालयमनोहरम् ॥ १५ ॥ परिखाभिर्गभीराभिर्दुर्लंघ्याभिश्च
वेष्टितम् ॥ रचितं प्रस्तरैर्दिव्यैर्निर्मितं विश्वकर्मणा ॥ १६ ॥ इंद्रनीलैर्मरकतैः पद्मरागैश्च भूषितम् ॥ सुवर्णकलशैर्दिव्यैश्चित्रितैः
शेखरोज्ज्वलैः ॥ १७ ॥ प्राकारैर्गगनस्पर्शैश्चतुर्द्वारसमन्वितैः ॥ युक्तं लोहकपाटैश्च द्वारपालसमन्वितैः ॥ १८ ॥ वेष्टितं सुन्दरं रम्यं
सुन्दरीगणवेष्टितम् ॥ मुक्तामाणिक्यपरशैः[1] पूर्णरत्नादिभिर्धनैः ॥ १९ ॥ स्वर्णपात्रवटाकीर्णं गवां कोटिभिरान्वितम् ॥ भरणीयैः किंकरैश्च
गोपलक्षैः समन्वितम् ॥ २० ॥ दासीनां च सहस्रैश्च कर्मव्यग्रैः समन्वितम् ॥ प्रविवेशाश्रमं साध्वी सस्मिता सुमनोहरा ।
॥ २१ ॥ दृष्ट्वा तां प्रविशंतीं च गोप्यो[2] दृष्ट्वानुमेनिरे ॥ किं वा पद्मालया दुर्गा कृष्णं द्रष्टुं समागता ॥ २२ ॥ प्रणेमुर्गोपिका गोपाः
पप्रच्छुः कुशलं च ताम् ॥ ददौ सिंहासनं पाद्यं वासयामास तत्र वै ॥ २३ ॥ पप्रच्छ कुशलं सा च गोपानां बालकस्य च ॥ उवास

---

[1] परमैः इ० पा० । [2] गोप्यस्ता बहुमेनिरे इ० पा० ।

सस्मिता साध्वी पाद्यं जग्राह सादरम् ॥ २४ ॥ तामूचुर्गोपिकाः सर्वाः का त्वमीश्वरि सांप्रतम् ॥ वासस्ते कुत्र किं नाम किं वात्र
कर्म नो वद ॥ २५ ॥ तासां च वचनं श्रुत्वा साप्युवाच मनोहरम् ॥ मथुरावसिनी गोपी सांप्रतं विप्रकामिनी ॥ २६ ॥ श्रुतं
वाचिकवक्त्रेण तत्त्वं मंगलसूचकम् ॥ बभूव स्थविरे काले नंदपुत्रो महानिति ॥ २७ ॥ श्रुत्वागताहं तं द्रष्टुमाशिषं कर्तुमीप्सिताम् ॥
पुत्रमानय तं दृष्ट्वा यामि कृत्वा तमाशिषम् ॥ २८ ॥ ब्राह्मणीवचनं श्रुत्वा यशोदा हृष्टमानसा ॥ प्रणमय्य सुतं क्रोडे ददौ
ब्राह्मणयोषितः ॥ २९ ॥ कृत्वा क्रोडे तु तं साध्वी चुचुंब च पुनः पुनः ॥ स्तनं ददौ सुखासीना हरिं पुण्यवती सती ॥
॥ ३० ॥ अहोऽद्भुतोऽयं बालस्त सुन्दरो गोपसुन्दरि ॥ गुणैर्नारायणसमो बालोयमित्युवाच ह ॥ ३१ ॥ कृष्णो विषस्तनं
पीत्वा जहास वक्षसि स्थितः ॥ तस्याः प्राणैः सह पपौ विषक्षीरं सुधामिव ॥ ३२ ॥ तत्याज बालकं साध्वी प्राणांस्त्यक्त्वा
पपात ह ॥ विकृताकारवदना चोत्तानवदना मुने ॥ ३३ ॥ स्थूलदेहं परित्यज्य सूक्ष्मदेहं विवेश सा ॥ आरुरोह रथं शीघ्रं रत्न
सारविनिर्मितम् ॥ ३४ ॥ पार्षदप्रवरैर्दिव्यैर्वेष्टितं सुमनोहरैः ॥ श्वेतचामरलक्षेण शोभितं लक्षदर्पणैः ॥ ३५ ॥ वह्निशौचेन वस्त्रेण
सूक्ष्मेण भूषितं वरम् ॥ नानाचित्रविचित्रैश्च सद्रत्नकलशैर्युतम् ॥ ३६ ॥ सुंदरं शतचक्रं च वलितं रत्नतेजसा ॥ पार्षदास्तां
रथे कृत्वा जग्मुर्गोलोकमुत्तमम् ॥ ३७ ॥ दृष्ट्वा तमद्भुतं लोका गोपिकाश्चातिविस्मिताः ॥ कंसः श्रुत्वा च तत्सर्वं विस्मितश्च
बभूव ह ॥ ३८ ॥ यशोदा बालकं नीत्वा क्रोडे कृत्वा स्तनं ददौ ॥ मंगलं कारयामास विप्रद्वारा शिशोर्मुने ॥ ३९ ॥ ददाह देहं
तस्याश्च नंदः सानंदपूर्वकम् ॥ चंदनागुरुकस्तूरीसमं संप्राप्य सौरभम् ॥ ४० ॥ नारद उवाच ॥ ॥ सा वा का राक्षसीरूपा कथं
पुण्यवती सती ॥ केन पुण्येन तं दृष्ट्वा जगाम कृष्णमंदिरम् ॥ ४१ ॥ ॥ श्रीनारायण उवाच ॥ ॥ बलियज्ञे वामनस्य दृष्ट्वा रूपं
मनोहरम् ॥ बलिकन्या रत्नमाला पुत्रस्नेहं चकार तम् ॥ ४२ ॥ मनसा मानसं चक्रे पुत्रस्य सदृशो मम ॥ पिबेद्यदि स्तनं कृष्णः

---

१ वेष्टितम्—इ० पा० । २ मुने इ० पा० ।

करोमि तं च वक्षसि ॥ ४३ ॥ हरिस्तन्मानसं ज्ञात्वा पपौ जन्मांतरे स्तनम् ॥ ददौ मातृगतिं तस्यै कामपूरः कृपानिधिः ॥ ४४ ॥ दत्त्वा विषस्तनं कृष्णं पूतना राक्षसी मुने ॥ भक्त्या मातृगतिं प्राप कं भजाम विना हरिम् ॥ ४५ ॥ इत्येवं कथितं विप्र श्रीकृष्णगुणकीर्तनम् ॥ पदे पदे सुमधुरं प्रवरं कथयामि ते॥४६॥इति श्रीब्र० म० पु० श्रीकृ०ना०स० पूतनामोक्षो नाम दशमोऽध्यायः॥१०॥

॥ श्रीनारायण उवाच ॥ एकदा गोकुले साध्वी यशोदा नंदगेहिनी ॥ गृहकर्मणि संसक्ता कृत्वा बालं स्ववक्षसि ॥ १ ॥ वात्यारूपं तृणावर्तमागच्छंतं च गोकुलम् ॥ श्रीहरिर्मनसा ज्ञात्वा भारयुक्तो बभूव ह ॥ २ ॥ भाराक्रांता यशोदा च तत्याज बालकं तदा ॥ शयनं कारयित्वा च जगाम यमुनां मुने ॥ ३ ॥ एतस्मिन्नंतरे तत्र वात्यारूपधरोऽसुरः ॥ आदाय तं भ्रामयित्वा गत्वा च शतयोजनम् ॥ ४ ॥ बभंज वृक्षशाखाश्च ह्यंधीभूतं च गोकुलम् ॥ चकार सद्यो मायावी पुनस्तत्र पपात ह ॥ ५ ॥ असुरोऽपि हरिस्पर्शाज्जगाम हरिमंदिरम् ॥ सुंदरं रथमारुह्य कृत्वा कर्मक्षयं स्वकम् ॥ ६ ॥ पांड्यदेशोद्भवो राजा शापाद्दुर्वाससोऽसुरः ॥ श्रीकृष्णचरणस्पर्शाद्गोलोकं स जगाम ह ॥ ७ ॥ वात्यारूपे गते गोपा गोप्यश्च भयविह्वलाः ॥ न दृष्ट्वा बालकं तत्र शयानं शयने मुने॥ ८ ॥सर्वे निजघ्नुः स्वं वक्षस्थलं शोकाकुला भयात् ॥ केचिन्मूर्छामवापुश्च रुरुदुश्चापि केचन ॥ ९ ॥ अन्वेषणं प्रकुर्वंतो ददृशुर्बालकं व्रजे ॥ धूलिधूसरसर्वांगं पुष्पोद्यानांतरस्थितम् ॥ १० ॥ बाह्यैकदेशे सरसस्तीरे नीरसमन्विते ॥ पश्यंतं गगनं शश्वद्रुदंतं भयकातरम् ॥ ११ ॥ गृहीत्वा बालकं नंदः कृत्वा वक्षसि सत्वरम् ॥ दर्शं दर्शं मुखं तस्य रुरोद च शुचाऽन्वितः ॥ १२ ॥ यशोदा रोहिणी शीघ्रं दृष्ट्वा बालं रुरोद च ॥ कृत्वा वक्षसि तद्वक्त्रं चुचुंब च मुहुर्मुहुः ॥ १३ ॥ मंगलं कारयामास स्नापयामास बालकम् ॥ स्तनं ददौ यशोदा च प्रसन्नवदनेक्षणा ॥ १४ ॥ ॥ नारद उवाच ॥ ॥ कथं शशाप दुर्वासाः पांड्यदेशोद्भवं नृपम् ॥ सुविचार्य वद ब्रह्मन्नितिहासं पुरातनम् ॥ १५ ॥ ॥ श्रीनारायण उवाच ॥ ॥ पांड्यदेशाधिपो राजा सहस्राक्षः प्रतापवान् ॥ स्त्रीसहस्रं समादाय कामबाणप्रपीडितः ॥ १६ ॥ मनोहरे निर्जने च पर्वते गंधमादने ॥ विजहार नदीतीरे पुष्पोद्याने

मनोरमे ॥ १७ ॥ न.नाप्रकारश्शृंगारं विपरीतादिकं नृपः ॥ नखदंतक्षतांगं च कमिनीनां चकार सः ॥ १८ ॥ कृत्वा मूर्तिसहस्रं च
योगींद्रो नृपतीश्वरः ॥ कृत्वा स्थलविहारं च जलक्रीडां चकार ह ॥ १९ ॥ नार्यो विवसनाः सर्वा नग्नाश्च नृपयोषितः ॥ विजह्रुश्च
पुष्पभद्रानदीतीरे मनोहरे ॥ २० ॥ एतस्मिन्नंतरे तत्र समायातो महामुनिः ॥ शिष्यलक्षैः परिवृतो गच्छन्वै शंकरं प्रति ॥ २१ ॥
दृष्ट्वा मुनिं महामत्तो नोत्तस्थौ न ननाम ह ॥ वाचा हस्तेन राजा च संभाषां न चकार ह ॥ २२ ॥ दृष्ट्वा चुकोप नृपतिं शशाप
स्फुरिताधरः ॥ असुरो भव पापिष्ठ योगाद्भ्रष्टो भुवं व्रज ॥ २३ ॥ भारते लक्षवर्षं च स्थातव्यं ते नराधम ॥ ततो हरिपदस्पर्शाद्गोलोकं
यास्यसि ध्रुवम् ॥ २४ ॥ स्थानेस्थाने हे महिष्यो जनिं लभत भारते ॥ राजेंद्रगेहे राजेंद्राद्भविष्यथ मनोहराः ॥ २५ ॥
इत्युक्त्वा तु मुनींद्रस्तु जगाम शंकरालयम् ॥ हा हा शब्दं विचक्रुश्च शिष्यसंघाः कृपालवः[1] ॥ २६ ॥ गते मुनींद्रे राजेंद्रो रुरोद च
सरित्तटे ॥ रुरुदू रमणीयाश्च रमण्यो विरहातुराः ॥ ॥ २७ ॥ हे नाथ रमणश्रेष्ठेत्युच्चार्य च पुनः पुनः ॥ त्वां विना वा क्व
यास्यामो वयं त्वं वा क्व यास्यसि ॥ २८ ॥ वयं नो विहरिष्यामस्त्वया सार्द्धं सुनिर्जने ॥ न करिष्यसि राज्यं त्वं न यास्यामो
गृहं वयम् ॥ २९ ॥ शरच्चंद्रप्रभामुष्टं न द्रक्ष्यामो मुखं तव ॥ प्रसारिताभ्यां बाहुभ्यां नानयिष्याम इत्यतः ॥ ३० ॥ इत्युक्त्वा रुरुदुः
सर्वाः पुरस्कृत्य नराधिपम् ॥ मूर्छामवापुश्चरणं धृत्वा राज्ञः सरित्तटे ॥ ३१ ॥ राजाऽग्निकुण्डमाधाय नारीभिः सह नारद ॥
स्मृत्वा हरिपदांभोजं ज्वलदग्निं विवेश ह ॥ ३२ ॥ हाहाकारं सुराः सर्वे विचक्रुर्गगने स्थिताः ॥ इत्यूचुर्मुनयश्चैवं दैवं च बलवत्तरम् ॥ ३३ ॥
स च राजा तृणावर्तो जगाम हरिमंदिरम् ॥ महिष्यो भारते वर्षे लेभिरे जन्म वाञ्छितम् ॥ ३४ ॥ इत्येवं कथितं सर्वं हरेर्माहात्म्य
मुत्तमम् ॥ मोक्षणं नृपतेश्चैव मुनींद्रशापहेतुकम् ॥ ३५ ॥ इति श्रीब्र० म० श्रीकृष्णज० नारायणनारदसंवादे तृणावर्तवधो नामै
कादशोऽध्यायः ॥ ११ ॥ श्रीनारायण उवाच ॥ ॥ एकदा मंदिरे नन्दपत्नी साऽऽनंदपूर्वकम् ॥ कृत्वा वक्षसि गोविंदं क्षुधितं

---

[1] कृपालयाः—इ० पा० ।

च स्तनं ददौ ॥ १ ॥ एतस्मिन्नंतरे गोप्य आजग्मुर्नंदमंदिरम् ॥ स्थविराश्च वयस्याश्च बालिका बालकान्विताः ॥ २ ॥ अतृप्तं बालकं शीघ्रं संन्यस्य शयने सती ॥ प्रणनाम समुत्थाय कर्मण्यौत्थानिके मुदा ॥ ३ ॥ तैलसिंदूरतांबूलं ददौ ताभ्यो मुदाऽन्विता॥ मिष्टवस्तूनि वस्त्राणि भूषणानि[1] च गोपिका ॥ ४ ॥ एतस्मिन्नन्तरे कृष्णो रुरोद क्षुधितस्तदा ॥ प्रेरयित्वा स[2] चरणं मायेशो मायया विभुः ॥५॥ पपात चरणं तस्य प्रवीणे शकटे मुने ॥ विश्वंभरपदाघातात्तच्च चूर्णं बभूव ह ॥ ६ ॥ बभंज शकटं पेतुर्भग्नकाष्ठानि तत्र वै ॥ पपात दधि दुग्धं च नवनीतं घृतं मधु ॥७॥ दृष्ट्वाऽऽश्चर्यं गोपिकाश्च दुद्रुवुर्बालकं भयात्॥ददृशुर्भग्नशकटमिंधनाभ्यंतरे शिशुम्॥८॥ भग्नभांडसमूहं च पतितं बहुगोरसम्[3] ॥ प्रेरयित्वा तु काष्ठानि जग्राह बालकं भिया ॥ ९ ॥ मायारक्षितसर्वांगं रुदितं क्षुधितं क्षुधा॥ स्तनं ददौ यशोदा तं रुरोद च भृशं शुचा ॥ १० ॥ पप्रच्छुर्बालकान्गोपा[4] बभंज शकटं कथम् ॥ किंचिद्धेतुं न पश्यामः[5] सहसेति किमद्भुतम् ॥ ११ ॥ इत्यूचुर्बालकाः सर्वे गोपाः शृणुत मद्वचः ॥ श्रीकृष्णस्य पदाघाताद्बभंज शकटं ध्रुवम् ॥१२॥ श्रुत्वा तद्वचनं गोपा गोप्यश्च जहसुर्मुदा ॥ न हि जग्मुः प्रतीतिं च मिथ्येत्यूचुर्व्रजे प्रजाः ॥ १३ ॥ शिशोः स्वस्त्ययनं कार्यं[6] चक्रुर्ब्राह्मणपुंगवाः ॥ हस्तं दत्त्वा शिशोर्गात्रे पपाठ कवचं द्विजः ॥ १४ ॥ वदामि तत्ते विप्रेन्द्र कवचं सर्वरक्षणम् ॥ यद्दत्तं मायया पूर्वं ब्रह्मणे नाभिपंकजे ॥१५॥ निद्रिते जगतीनाथे जले च जलशायिनि ॥ भीताय स्तुतिकर्त्रे च मधुकैटभयोर्भयात् ॥ १६ ॥ योगनिद्रोवाच ॥ दूरीभूतं कुरु भयं भयं किं ते हरौ स्थिते ॥ स्थितायां मयि च ब्रह्मन्सुखी[7] तिष्ठ जगत्पते ॥१७॥ श्रीहरिः पातु ते वक्रं मस्तकं मधुसूदनः ॥ श्रीकृष्णश्चक्षुषी पातु नासिकां राधिकापतिः ॥ १८ ॥ कर्णयुग्मं च कण्ठं च कपालं पातु माधवः ॥ कपोलं पातु गोविन्दः केशांश्च केशवः स्वयम् ॥१९॥ अधरोष्ठं हृषीकेशो दंतपंक्तिं गदाग्रजः ॥ रासेश्वरश्च रसनां तालुकं[8] वामनो विभुः ॥ २० ॥

---

[1] मोजनानि–इ० पा० । [2] तु–इ० पा० । [3] रस–इ० पा० । [4] पप्रच्छ बालकान् गोपी–इ० पा० । [5] पश्यामि–इ० पा० । [6] तूर्णम्–इ० पा० । [7] सुखम्–इ० पा० । [8] ते हनुम् इ० पा० ।

वक्षः पातु मुकुन्दश्च जठरं पातु दैत्यहा ॥ जनार्दनः पातु नाभिं पातु विष्णुश्च मेहनम् ॥ २१ ॥ नितंबयुग्मं गुह्यं च पातु ते पुरुषोत्तमः ॥ जानुयुग्मं जानकीशः पातु ते सर्वदा विभुः ॥ २२ ॥ हस्तयुग्मं नृसिंहश्च पातु सर्वत्र संकटे ॥ पादयुग्मं वराहश्च पातु ते कमलोद्भवः ॥ २३ ॥ ऊर्ध्वं नारायणः पातु ह्यधस्तात्कमलापतिः ॥ पूर्वस्यां पातु गोपालः पातु वह्नौ दशास्यहा ॥ २४ ॥ वनमाली पातु याम्यां वैकुंठः पातु नैर्ऋतौ ॥ वारुण्यां वासुदेवश्च सतो रक्षाकरः स्वयम् ॥ २५ ॥ पातु ते संततमजो वायव्यां विष्टरश्रवाः ॥ उत्तरे च सदा पातु तेजसा जलजासनः ॥ २६ ॥ ऐशान्यामीश्वरः पातु पातु सर्वत्र शत्रुजित् ॥ जले स्थले चांतरिक्षे निद्रायां पातु राघवः ॥ २७ ॥ इत्येवं कथितं ब्रह्मन्कवचं परमाद्भुतम् ॥ कृष्णेन कृपया दत्तं स्मृतेनैव पुरा मया ॥ २८ ॥ शुंभेन सह संग्रामे निर्लक्ष्ये घोरदारुणे ॥ गगने स्थितया सद्यः प्राप्तिमात्रेण सो जितः ॥ २९ ॥ कवचस्य प्रभावेण धरण्यां पतितो मृतः॥ पूर्वं वर्षशतं खे च कृत्वा युद्धं भयावहम् ॥ ३० ॥ मृते शुंभे च गोविन्दः कृपालुर्गगनस्थितः ॥ मालां[1] च कवचं दत्त्वा गोलोकं स जगाम ह ॥ ३१ ॥ कल्पांतरस्य वृत्तांतं कृपया कथितं मुने ॥ अभ्यंतरभयं नास्ति कवचस्य प्रभावतः ॥ ३२ ॥ कोटिशः कोटिशो नष्टा मया दृष्टाश्च वेधसः ॥ अहं च हरिणा सार्द्धं कल्पेकल्पे स्थिरा सदा ॥ ३३ ॥ इत्युक्त्वा कवचं दत्त्वा साऽन्तर्धानं चकार ह ॥ निःशङ्को नाभिकमले तस्थौ स कमलोद्भवः ॥ ३४ ॥ सुवर्णगुटिकायां च कृत्वेदं कवचं परम् ॥ कण्ठे वा दक्षिणे बाहौ बध्नीयाद्यः सुधीः सदा ॥ ३५ ॥ विषा[2]ग्निजलशत्रुभ्यो भयं तस्य न जायते ॥ जले स्थले चांतरिक्षे निद्रायां रक्षतीश्वरः ॥ ३६ ॥ संग्रामे वज्रपाते च विपत्तौ प्राणसंकटे ॥ कवचस्मरणादेव सद्यो निःशङ्कतां व्रजेत् ॥ ३७ ॥ बद्ध्वेदं कवचं कण्ठे शंकरस्त्रिपुरं पुरा ॥ जघान लीलामात्रेण दुरंतमसुरेश्वरम् ॥ ३८ ॥ बद्ध्वेदं कवचं काली रक्तबीजं चखाद सा ॥ सहस्रशीर्षा धृत्वेदं विश्वं धत्ते तिलं यथा ॥ ३९ ॥ आवां सनत्कुमारश्च धर्मसाक्षी च कर्मणाम् ॥ कवचस्य प्रभा[3]वेण सर्वत्र जयिनो वयम् ॥ ४० ॥

---

[1] माल्यम् इ० पा० । [2] सर्प इ० पा० । [3] प्रसादेन इ० पा०।

तस्य नन्दशिशोः कण्ठे चकार कवचं द्विजः ॥ आत्मनः कवचं कण्ठे दधार च स्वयं हरिः ॥ ४१ ॥ प्रभावः कथितः सर्वः
कवचस्य हरेस्तथा ॥ अनन्तस्याच्युतस्यैव प्रभावमतुलं मुने ॥ ४२ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे
नारायणनारदसंवादे शकटभंजनयोगनिद्रोक्तकवचन्यासो नाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ श्रीनारायण उवाच ॥ ॥
अपरं कृष्णमाहात्म्यं शृणु किंचिन्महामुने ॥ विघ्ननिघ्नं पापहरं महापुण्यकरं परम् ॥ १ ॥ एकदा नन्दपत्नी च कृत्वा
कृष्णं स्ववक्षसि ॥ स्वर्णसिंहासनस्था च क्षुधितं तं स्तनं ददौ ॥ २ ॥ एतस्मिन्नन्तरे तत्र विप्रेंद्रैकः समागतः ॥ वृतः
शिष्यसमूहैश्च प्रज्वलन्ब्रह्मतेजसा ॥ ३ ॥ प्रजपन्परमं ब्रह्म शुद्धस्फटिकमालया ॥ दण्डी छत्री शुक्लवासा दन्तपंक्तिविराजितः
॥ ४ ॥ ज्योतिर्ग्रंथो मूर्तिमांश्च वेदवेदांगपारगः ॥ परिबिभ्रज्जटाजालं तप्तकांचनसन्निभम् ॥ ५ ॥ शरत्पार्वणचंद्रास्यो गौरांगः
पद्मलोचनः ॥ योगीन्द्रो धूर्जटेः शिष्यः शुद्धभक्तो गदाभृतः ॥ ६ ॥ व्याख्यामुद्राकरः श्रीमाञ्छिष्यानध्यापयन्मुदा ॥ वेद
व्याख्यां कतिविधां प्रकुर्वन्निव लीलया ॥ ७ ॥ एकीभूय चतुर्वेदास्तेजसा मूर्तिमानिव ॥ साक्षात्सरस्वतीकण्ठः सिद्धांतैकविशारदः
॥ ८ ॥ ध्यानैकनिष्ठः श्रीकृष्णपादांभोजे दिवानिशम् ॥ जीवन्मुक्तो हि सिद्धेशः सर्वज्ञः सर्वदर्शनः ॥ ९ ॥ तं दृष्ट्वा सा समुत्तस्थौ
यशोदा प्रणनाम च ॥ पाद्यं गां मधुपर्कं च स्वर्णसिंहासनं ददौ ॥ १० ॥ बालकं वंदयामास मुनीन्द्रं सस्मितं मुदा ॥ मुनिश्च
मनसा चक्रे प्रणामशतकं हरिम् ॥ ११ ॥ आशिषं प्रददौ प्रीत्या वेदमंत्रोपयोगिकम् ॥ प्रणनाम च शिष्यांश्च ते तां युयुजुराशिषम्
॥ १२ ॥ शिष्यान्पाद्यादिकं भक्त्या प्रददौ च पृथक्पृथक् ॥ सशिष्यांघ्री च प्रक्षाल्य समुवास सुखासने ॥ १३ ॥ समुद्यता सा प्रष्टुं च पुटा
ञ्जलियुता सती ॥ स्वक्रोडे बालकं कृत्वा भक्तिनम्रात्मकंधरा ॥ १४ ॥ स्वात्मारामं मंगलं च प्रष्टुं यद्यपि न क्षमा ॥ तथाऽपि भवतो
नाम शिवं पृच्छामि सांप्रतम् ॥ १५ ॥ अबलाबुद्धिहीनाया दोषं क्षंतुं सदाऽर्हसि ॥ मूढस्य सततं दोषं क्षमां कुर्वंति साधवः
॥ १६ ॥ अंगिरा वाऽथ वाऽत्रिर्वा मरीचिर्गौतमोऽथ वा ॥ क्रतुः किं वा प्रचेता वा पुलस्त्यः पुलहोऽथवा ॥ १७ ॥ दुर्वासाः कर्दमस्त्वं

वा वशिष्ठो गर्ग एव वा ॥ जैगीषव्यो देवलो वा कपिलो वा स्वयं विभुः ॥ १८ ॥ सनत्कुमारः सनकः सनन्दो वा सनातनः ॥ वोढुः
पंचशिखो वा त्वमासुरिः सौभरिः किमु ॥१९॥ विश्वामित्रोऽथ वाल्मीको वामदेवोऽथ कश्यपः॥ संवर्तः किमुतथ्यो वा किं कचो वा
बृहस्पतिः ॥ २० ॥ भृगुः शुक्रश्च च्यवनो नरनारायणोऽथवा ॥ सक्थिनः पराशरो व्यासः शुकदेवोऽथ जैमिनिः ॥ २१ ॥ मार्कण्डेयो
लोमशश्च कण्वः कात्यायनस्तथा ॥ आस्तीको वा जरत्कारुर्ऋष्यशृंगो विभांडकः ॥ २२ ॥ पौलस्त्यस्त्वमगस्त्यो वा शरद्वान्गिरिरेव च ॥
शमीकोऽरिष्टनेमिश्च माण्डव्यः पैल एव च ॥ २३ ॥ पाणिनिर्वा कणादो वा शाकल्यः शाकटायनः ॥ अष्टावक्रो भागुरिर्वा
सुमन्तुर्वत्स एव वा ॥ २४ ॥ जाबालो याज्ञवल्क्यश्च वैशंपायन एव च ॥ यतिर्हंसी पिप्पलादो मैत्रेयः करुषस्तथा
॥ २५ ॥ उपमन्युर्गौरमुखोऽरुणिरौर्वोऽथ कक्षिवान् ॥ भरद्वाजो वेदशिराः शंकुकर्णोऽथ शौनकः ॥ २६ ॥ एतेषां पुण्यश्लोकानां
को भवान्वद मे प्रभो ॥ प्रत्युत्तरार्हा नाहं चेत्तथाऽपि वक्तुमर्हसि ॥ २७ ॥ किंकरः किंकरी वाऽपि समर्था प्रष्टुमीश्वरम् ॥
यो यस्य सेवानियतः स कं पृच्छति तं विना ॥ २८ ॥ धन्याऽहं कृतकृत्याऽहं सफलं जीवितं[1] मम ॥ त्वत्पादाब्जरजःस्पर्शाज्जन्मकोट्यंहसां
क्षयः ॥ २९ ॥ त्वत्पादोदकसंस्पर्शात्सद्यः पूता वसुंधरा ॥ तवागमनमात्रेण तीर्थीभूतो ममाश्रमः ३० ॥
येये श्रुताः श्रुतौ ब्रह्मञ्छ्रुतिसारा महाजनाः ॥ तेषामेको मया दृष्टः पूर्वपुण्यफलोदयात् ॥ ३१ ॥ शिष्या वेदा मूर्तिमंतो ग्रीष्ममध्याह्नभास्कराः
॥ गोकुलं मत्कुलं सद्यः[2] पुनंति पादरेणुना ॥ ३२ ॥ आशिषं कर्तुमर्हति प्रसन्नमनसा शिशुम् ॥ पूर्णस्वस्त्ययनं
सद्यो विप्राशीर्वचनं ध्रुवम् ॥ ३३ ॥ इत्येवमुक्त्वा नंदस्त्री भक्त्या तस्थौ मुनेः पुरः ॥ नरं[3] प्रस्थापयामास नंदमानयितुं सती
॥ ३४ ॥ यशोदावचनं श्रुत्वा जहास मुनिपुंगवः ॥ जहसुः शिष्यसंघाश्च भासयंतो दिशो दश ॥ ३५ ॥ हितं तथ्यं नीतियुक्तं
महत्[4]पुण्यकरं परम् ॥ तामुवाच मुदा युक्तः शुद्धबुद्धिर्महामुनिः ॥ ३६ ॥ श्रीगर्ग उवाच ॥ ॥ सुधामयं ते वचनं लौकिकं च[5]

---

१ जीवनम्–इ० पा० । २ सर्वम्–इ० पा० । ३ चरम्–इ० पा० । ४ प्रीतिकरम्–इ० पा० । ५ समयोचितम्–इ० पा० ।

कुलोचितम् ॥ यस्य यत्र कुले जन्म स एव तादृशो भवेत् ॥ ३७ ॥ सर्वेषां गोपपद्मानां गिरिभानुश्च भास्करः ॥ पत्नी पद्मासमा तस्य नाम्ना पद्मावती सती ॥३८॥ तस्याः कन्या यशोदा त्वं यशोवर्द्धनकारिणी ॥ बल्लवानां च प्रवरो लब्धो नंदश्च वल्लभः ॥३९॥ नंदो यस्त्वं च या भद्र बालो यो येन वा गतः॥ जानामि निर्जने सर्वं वक्ष्यामि नंदसन्निधिम् ॥४०॥ गर्गोऽहं यदुवंशानां चिरकालं पुरोहितः ॥ प्रस्थापितोऽहं वसुना नान्यसाध्ये च कर्मणि ॥ ४१ ॥ एतस्मिन्नन्तरे नंदः श्रुतमात्रं जगाम ह ॥ ननाम दंडवद्भूमौ मूर्ध्ना तं मुनिपुंगवम् ॥ ४२ ॥ शिष्यान्ननाम मूर्ध्ना च ते तं युयुजुराशिषम् ॥ समुत्थायासनात्तूर्णं यशोदा नंद एव च ॥४३॥ गृहीत्वाऽभ्यंतरं रम्यं जगाम विदुषां वरः ॥ गर्गो नंदो यशोदा च सपुत्रा सा मुदाऽन्विता ॥वाक्यं गर्गस्तदोवाच निगूढं निर्जने मुने॥ ४४ ॥ श्रीगर्ग उवाच ॥ अयि नंद प्रवक्ष्यामि वचनं ते सुखा[2]वहम् ॥ प्रस्थापितोऽहं वसुना येन तच्छ्रूयतामिति ॥४५॥ वसुना सूतिकागारे शिशुः प्रत्यर्पणं कृतः॥ पुत्रोऽयं वसुदेवस्य ज्येष्ठश्च तस्य च ध्रुवम् ॥ ४६ ॥ कन्या ते तेन या नीता मथुरां कंसभीरुणा ॥ अस्यान्नप्राशनायाहं नामानुकरणाय च ॥ गूढेन प्रेषितस्तेन तस्योद्योगं कुरु द्विज ॥४७॥ पूर्णब्रह्मस्वरूपोऽयं शिशुस्ते मायया महीम् ॥ आगत्य भारहरणं कर्ता धात्रा च सेवितः ॥ गोलोकनाथो भगवाञ्छ्रीकृष्णो राधिकापतिः ॥ ४८ ॥ नारायणो यो वैकुंठे कमलाकांत एव च ॥ श्वेतद्वीपनिवासी यः पिता[3] विष्णुश्च सोऽप्यजः ॥ ४९ ॥ कपिलोऽन्ये तदंशाश्च नरनारायणावृषी ॥ सर्वेषां तेजसां राशिर्मूर्तिमानागतः किमु ॥ ५० ॥ तं वसुं दर्शयित्वा च शिशुरूपो बभूव ह ॥ सांप्रतं सूतिकागारादाजगाम तवालयम् ॥ ५१ ॥ अयोनिसंभवश्चायमाविर्भूतो महीतले ॥ वायुपूर्णं मातृगर्भं कृत्वा च मायया हरिः ॥ ५२ ॥ आविर्भूय वसुं मूर्तिं दर्शयित्वा जगाम ह ॥ युगेयुगे वर्णभेदो नामभेदोऽस्य बल्लव ॥५३ ॥ शुक्लः पीतस्तथा रक्त इदानीं कृष्णतां गतः ॥ शुक्लवर्णः सत्ययुगे सु[4]तीव्रतेजसा वृतः ॥ ५४ ॥ त्रेतायां रक्तवर्णोऽयं पीतोऽयं द्वापरे विभुः ॥ कृष्णवर्णः कलौ श्रीमांस्तेजसां राशिरेव च ॥५५॥ परिपूर्णतमं ब्रह्म तेन कृष्ण इति स्मृतः ॥

---

१ वल्लानाम्–इ० पा० । २ शुभावहम्–इ० पा० । ३ पाता–इ० पा० । ४ सुतीव्रः–इ० पा० ।

ब्रह्मणो वाचकः कोऽयमृकारोऽनंतवाचकः ॥ ५६ ॥ शिवस्य वाचकः षश्च नकारो धर्मवाचकः ॥ अकारो विष्णुवचनः श्वेतद्वीपनिवासिनः ॥ ५७ ॥ नरनारायणार्थस्य विसर्गो वाचकः स्मृतः ॥ सर्वेषां तेजसां राशिः सर्वमूर्तिस्वरूपकः ॥ ५८ ॥ सर्वाधारः सर्वबीजस्तेन कृष्ण इति स्मृतः ॥ कर्मनिर्मूलवचनः कृषिर्नो दास्यवाचकः ॥ ५९ ॥ अकारो दातृवचनस्तेन कृष्ण इति स्मृतः ॥ कृषिर्निश्चेष्टवचनो नकारो भक्तिवाचकः ॥ ६० ॥ अकारः प्राप्तिवचनस्तेन कृष्ण इति स्मृतः ॥ कृषिर्निर्वाणवचनो नकारो मोक्षवाचकः ॥ ॥ ६१ ॥ अकारो[1] दातृवचनस्तेन कृष्ण इति स्मृतः ॥ नाम्नां भगवतो नंद कोटीनां स्मरणेन यत् ॥ ६२ ॥ तत्फलं लभते नूनं कृष्णेति स्मरणे नरः ॥ यद्विधं स्मरणात्पुण्यं वचनाच्छ्रवणात्तथा ॥ ६३ ॥ कोटिजन्मांहसो नाशो भवेद्यत्स्मरणादिकात् ॥ विष्णोर्नाम्नां च सर्वेषां सारात्सारं परात्परम् ॥ ६४ ॥ कृष्णेति सुंदरं नाम मंगलं भक्तिदायकम् ॥ ककारोच्चारणाद्भक्तः कैवल्यं मृत्युजन्महम् ॥ ६५ ॥ ऋकाराद्दास्यमतुलं षकाराद्भक्तिमीप्सिताम् ॥ नकारात्सहवासं च तत्समं कालमेव च ॥ ६६ ॥ तत्सारूप्यं विसर्गाच्च लभते नात्र संशयः ॥ ककारोच्चारणादेव वेपंते यमकिंकराः ॥६७॥ ऋकारोक्तेर्न तिष्ठंति षकारात्पातकानि च ॥ नकारोच्चारणाद्रोगा अकारान्मृत्युरेव च ॥ ६८ ॥ ध्रुवं सर्वे पलायंते नामोच्चारणभीरवः ॥ स्मृत्युक्तिश्रवणोद्योगात्कृष्णनाम्नो व्रजेश्वर ॥ ६९ ॥ रथं गृहीत्वा धावंति गोलोकात्कृष्णकिंकराः ॥ पृथिव्या रजसः संख्यां कर्तुं शक्ता विपश्चितः ॥ ७० ॥ नाम्नः प्रभावसंख्यानं संतो वक्तुं न च क्षमाः ॥ पुरा शंकरवक्त्रेण नाम्नोऽस्य महिमा श्रुतः ॥ ७१ ॥ गुणान्नामप्रभावं च किंचिज्जानाति मद्गुरुः ॥ ब्रह्माऽनंतश्च धर्मश्च सुरर्षिमनुमानवाः ॥ ७२ ॥ वेदाः संतो न जानंति महिम्नः षोडशीं कलाम् ॥ इत्येवं कथितो नंद महिमा च सुतस्य च ॥७३॥ यथामति यथाज्ञानं गुरुवक्त्राद्यथा[2] श्रुतम् ॥ कृष्णः पीतांबरः कंसध्वंसी च विष्टरश्रवाः ॥ ७४ ॥ देवकीनंदनः श्रीशो यशोदानंदनो हरिः ॥ सनातनोऽच्युतोऽनंतः[3] सर्वेशः सर्वरूपधृक् ॥ ७५ ॥ सर्वाधारः सर्वगतिः सर्वकारणकारणम् ॥ राधाबंधू राधिकात्मा राधिकाजीवनं

---

१ आकारः प्राप्तिवचनः—इ० पा० । २ मया श्रुतम्—इ० पा० । ३ विष्णुः—इ० पा० ।

स्वयम् ॥ ७६ ॥ राधाप्राणो राधिकेशो राधिकारमणः स्वयम् ॥ राधिकासहचारी च राधामानसपूरणः ॥ ७७ ॥ राधाधनो राधि
कांगो राधिकासक्तमानसः ॥ राधिकाचित्तचोरश्च राधाप्राणाधिकः प्रभुः ॥ ७८ ॥ परिपूर्णतमं ब्रह्म गोविंदो गरुडध्वजः ॥ नामा
न्येतानि कृष्णस्य श्रुतानि मन्मुखा[1]द्धृदि ॥ ७९ ॥ जन्ममृत्युहराण्येव रक्ष नंद शुभेक्षण ॥ कृतं निरूपणं नाम्नां कनिष्ठस्य यथा
श्रुतम् ॥ ८० ॥ ज्येष्ठस्य हलिनो नाम्नः संकेतं शृणु मन्मुखात् ॥ गर्भसंकर्षणादेव नाम्ना संकर्षणः स्मृतः ॥ ८१ ॥ नास्त्यंतोऽस्यैव
वेदेषु तेनानंत इति स्मृतः ॥ बलदेवो बलोद्रेकाद्धली च हलधारणात् ॥ ८२ ॥ शितिवासा नीलवासान्मुसली मुसलायुधात् ॥ रेवत्या
सह संभोगाद्रेवतीरमणः स्वयम् ॥८३॥ रोहिणीगर्भवासात्तु रौहिणेयो महामतिः ॥ इत्येवं ज्येष्ठपुत्रस्य श्रुतं नाम निवेदितम् ॥८४॥
यास्याम्यहं गृहं नंद सुखं तिष्ठ स्वमंदिरे ॥ ब्राह्मणस्य वचः श्रुत्वा नंदः स्तब्धो बभूव ह ॥ ८५ ॥ निश्चेष्टा नंदपत्नी च जहास बालकः
स्वयम् ॥ प्रणम्योवाच नंदस्तं वाक्यं विनयपूर्वकम् ॥ ८६ ॥ पुटांजलियुतो भूत्वा भक्तिनम्रात्मकंधरः ॥ नंद उवाच ॥ गतश्चेत्त्वं
तदा कर्म करिष्यत्येव को महान् ॥८७॥ स्वयं शुभेक्षणं कृत्वा कुरु नाम्नाऽन्नप्राशनम् ॥ यन्नामौघश्च कथितो राधाप्राणादिको दश ॥
॥ ८८ ॥ तस्यापि का वा राधेति कन्यका कस्य च ध्रुवम् ॥ नंदस्य वचनं श्रुत्वा जहास मुनिपुंगवः ॥ निगूढं परमं तत्त्वं रहस्यं कथ
यामि ते ॥ ८९ ॥ ॥ श्रीगर्ग उवाच ॥ ॥ शृणु नंद प्रवक्ष्यामि इतिहासं पुरातनम् ॥ ९० ॥ पुरा गोलोकवृत्तांतं श्रुतं शंकरवक्त्रतः॥
श्रीदाम्नो राधया सार्द्धं बभूव कलहो महान् ॥ ९१ ॥ श्रीदामशापाद्दैवेन गोपी राधा च गोकुले ॥ वृषभानुसुता सा च माता
तस्याः कलावती ॥ ९२ ॥ कृष्णस्यार्द्धांगसंभूता नाथस्य सदृशी सती ॥ गोलोकवासिनी सेयमत्र कृष्णाज्ञयाऽधुना ॥ ९३ ॥
अयोनिसंभवा देवी मूलप्रकृतिरीश्वरी ॥ मातुर्गर्भं वायुपूर्णं कृत्वा च मायया सती ॥ ९४ ॥ वायुनिःसरणे काले धृत्वा च शिशु
विग्रहम् ॥ आविर्बभूव मायेयं पृथ्व्यां कृष्णोपदेशतः ॥ ९५ ॥ वर्धते सा व्रजे राधा शुक्ले चंद्रकला यथा ॥ श्रीकृष्णतेज

---

१ सांप्रतं व्रज–इ० पा० ।

सोऽर्द्धेन सा च मूर्तिमती सती ॥ ९६ ॥ एका मूर्तिर्द्विधाभूता भेदो वेदे निरूपितः ॥ इयं स्त्री सा पुमान् किंवा सा वा कांता पुमान
यम् ॥९७॥ द्वे रूपे तेजसा तुल्ये रूपेण च गुणेन च ॥ पराक्रमेण बुद्ध्या वा ज्ञानेन संपदाऽपि च ॥ ९८ ॥ पुरतो गमनेनैव किंतु
सा वयसाधिका ॥ ध्यायते तामयं शश्वादिमं सा स्मरति प्रियम् ॥ ९९ ॥ रचिता साऽस्य प्राणैश्च तत्प्राणैर्मूर्तिमानयम् ॥ अस्य राधा
नुसारेण गोकुलागमनं परम् ॥ १०० ॥ स्वीकारं सार्थकं कर्तुं गोकुले यत्कृतं पुरा ॥ कंसभीतिच्छलेनैव गोकुलागमनं हरेः॥१०१॥
प्रतिज्ञापालनार्थाय भयेशस्य भयं कुतः ॥ राधाशब्दस्य व्युत्पत्तिः सामवेदे निरूपिता ॥ १०२ ॥ नारायणस्तामुवाच ब्रह्माणं
नाभिपंकजे ॥ ब्रह्मा तां कथयामास ब्रह्मलोके च शंकरम् ॥ १०३ ॥ पुरा कैलासशिखरे मामुवाच महेश्वरः ॥ देवानां दुर्लभां नंद
निशामय वदामि ते ॥ १०४ ॥ सुरासुरमुनींद्राणां वांछितां मुक्तिदां पराम् ॥ रेफो हि कोटिजन्माघं कर्मभोगं शुभाशुभम् ॥१०५॥
आकारो गर्भवासं च मृत्युं च रोगमुत्सृजेत् ॥ धकार आयुषो हानिमाकारो भवबंधनम् ॥ १०६ ॥ श्रवणस्मरणोक्तिभ्यः प्रणश्यति
न संशयः ॥ रेफो हि निश्चलां भक्तिं दास्यं कृष्णपदांबुजे ॥ १०७ ॥ सर्वेप्सितं सदानंदं सर्वसिद्धौघमीश्वरम् ॥ धकारः सहवासं
च तत्तुल्यकालमेव च ॥ १०८ ॥ ददाति सार्ष्टिसारूप्यं तत्त्वज्ञानं हरेः समम्॥आकारस्तेजसां राशिं दानशक्तिं हरौ यथा ॥१०९॥
योगशक्तिं योगमतिं सर्वकालं हरिस्मृतिम् ॥ श्रुत्युक्तिस्मरणाद्योगान्मोहजालं च किल्बिषम् ॥ ११० ॥ रोगशोकमृत्युयमा वेपंते नात्र
संशयः ॥ राधामाधवयोः किंचिद्व्याख्यानं च यतः श्रुतम् ॥ १११ ॥ तदुक्तं च यथाज्ञानं साकल्यं वक्तुमक्षमः॥ आराद् वृंदावने नंद
विवाहो भविताऽनयोः ॥ ११२ ॥ पुरोहितो जगद्धाता कृत्वाऽग्निं साक्षिणं मुदा ॥ कुबेरपुत्रमोक्षं च गव्यस्याहृत्य भक्षणम् ॥
॥ ११३ ॥ हिंसनं धेनुकस्यैव कानने तालभोजनम् ॥ बककेशिप्रलंबानां हिंसनं चाथ लीलया ॥ ११४ ॥ मोक्षणं द्विजपत्नीनां
मिष्टान्नपानभोजनम् ॥ भंजनं शक्रयागस्य शक्राद्गोकुलरक्षणम् ॥ ११५ ॥ गोपीनां वस्त्रहरणं व्रतसंपादनं तथा ॥ ताभ्यः पुनर्वस्त्र
दानं वरदानं यथेप्सितम् ॥ ११६ ॥ चेतसां हरणं तासामयं वश्याः करिष्यति ॥ रासोत्सवं महारम्यं सर्वेषां हर्षवर्द्धनम् ॥ ११७ ॥

पूर्णचन्द्रोदये नक्तं वसंते रासमंडले ॥ गोपीनां नवसंभोगात्कृत्वा पूर्णं मनोरथम् ॥ ११८ ॥ ताभिः सह जलक्रीडां करिष्यति कुतूहलात् ॥ विच्छेदोऽस्य वर्षशतं श्रीदामशापहेतुकम् ॥ ११९ ॥ गोपालैर्गोपिकाभिश्च भविता राधया सह ॥ मथुरागमनं तत्र गोपीनां शोकवर्द्धनम् ॥१२०॥ पुनः प्रबोधनं तासां दानमाध्यात्मिकस्य च ॥ स्यंदनाक्रूरयो रक्षां सद्यस्ताभ्यां करिष्यति ॥१२१॥ रथमारोहणं कृत्वा मथुरागमनं पुनः ॥ पितृभ्रातृव्रजैः सार्द्धं विलंघ्य यमुनां व्रजे ॥ १२२ ॥ अक्रूराय ज्ञानदानं दर्शयित्वा स्वकं जले ॥ कौतुकेन च सायाह्ने नगरात्सर्वदर्शनम् ॥ १२३ ॥ मालाकारतंतुवायकुब्जानां बंधमोक्षणम् ॥ धनुर्भंगं शंकरस्य यागस्थानप्रदर्शनम् ॥ १२४ ॥ हिंसनं गजमल्लानां दर्शनं नृपतेः पुरः॥ कंसस्य हिंसनं सद्यः पित्रोर्निगडमोक्षणम् ॥ १२५ ॥ प्रबोधनं च युष्माकमुग्रसेनाभिषेचनम् ॥ तस्यतस्य वधूनां च ज्ञानाच्छोकापनोदनम् ॥ १२६ ॥ भ्रातुः स्वस्योपनयनं विद्यादानं गुरोर्मुखात् ॥ गुरुपुत्रप्रदानं च पुनरागमनं गृहे ॥ १२७ ॥ छलनं नृपसैन्यानां यवनस्य दुरात्मनः ॥ निर्माणं द्वारकायाश्च मुचुकुंदस्य मोक्षणम् ॥ ॥ १२८ ॥ द्वारकागमनं चैव यादवैः सह कौतुकात् ॥ स्त्रीसंघानां विहरणं ताभिः सार्द्धं च क्रीडनम् ॥ १२९ ॥ सौभाग्यवर्धनं तासां पुत्रपौत्रादिकस्य च ॥ मणिसंबंधिनो मिथ्याकलंकस्य च मोक्षणम् ॥ १३० ॥ साहाय्यं पांडवानां च भारावतरणादिकम् ॥ निष्पन्नं राजसूयस्य धर्मपुत्रस्य लीलया ॥१३१॥ पारिजातस्य हरणं शक्राहंकारमर्दनम् ॥ व्रतपूर्णं च सत्याया बाणस्य भुजकृन्तनम् ॥ १३२ ॥ मर्दनं शिवसैन्यानां हरस्य जृंभणं परम्॥ हरणं बाणपुत्र्याश्चैवानिरुद्धस्य मोक्षणम् ॥ १३३ ॥ वाराणस्याश्च दहनं विप्रदारिद्र्यभंजनम् ॥ विप्रपुत्रप्रदानं च दुष्टानां दमनादिकम् ॥ १३४ ॥ तीर्थयात्राप्रसंगेन युष्माभिः सह दर्शनम् ॥ कृत्वा च राधया सार्धं व्रजमागमिता पुनः ॥ १३५ ॥ प्रस्थापयित्वा द्वारां च परं नारायणांशकम् ॥ सर्वं निष्पादनं कृत्वा गोलोकं राधया सह ॥ १३६॥ गमिष्यत्येव गोलोकं नाथोऽयं जगतां पतिः॥ नारायणश्च वैकुंठं गमिता स्म त्वया सह ॥ १३७ ॥ धर्मगेहमृषी द्वौ च विष्णुः क्षीरोदमेव च ॥ इत्येवं कथितं नंद भविष्यं वेदनिर्णयम् ॥ १३८ ॥ श्रूयतां सांप्रतं कर्म यदर्थं गमनं मम ॥

माघशुक्लचतुर्दश्यां कुरु कर्म शुभे क्षणे ॥ १३९ ॥ गुरुवारे च रेवत्यां विशुद्धे चंद्रतारके ॥ चंद्रस्थे मीनलग्ने च लग्नेशपूर्णदर्शने
॥ १४० ॥ वणिजे करणोत्कृष्टे शुभयोगे मनोहरे ॥ सुदुर्लभे दिने तत्र सर्वोत्कृष्टोपयोगिके ॥ १४१ ॥ आलोच्य पंडितैः सार्द्धं
कुरु कर्म मुदाऽन्वितः ॥ इत्युक्त्वा बहिरागत्य स उवाच मुनीश्वरः ॥ १४२ ॥ हृष्टो नंदो यशोदा च कर्मौद्योगं चकार
ह ॥ एतस्मिन्नंतरे द्रष्टुं गर्गं गोपाश्च गोपिकाः ॥ १४३ ॥ बालका बालिकाश्चैव आजग्मुर्नंदमंदिरम् ॥ ददृशुस्ते मुनिश्रेष्ठं
ग्रीष्ममध्याह्नभास्करम् ॥ १४४ ॥ शिष्यसंघैः परिवृतं ज्वलंतं ब्रह्मतेजसा ॥ गूढयोगं प्रवोचंतं सिद्धाय पृच्छते मुदा ॥
॥ १४५ ॥ पश्यंतं सस्मितं नंदभवनानां परिच्छदम् ॥ स्वर्णसिंहासनस्थं च योगमुद्राधरं वरम् ॥ १४६ ॥ भूतं भव्यं भवि
ष्यं च पश्यंतं ज्ञानचक्षुषा ॥ हृदीश्वरं प्रपश्यन्तं सिद्धं मंत्रप्रभावतः ॥ १४७ ॥ बहिर्यशोदाक्रोडस्थं तादृशं सस्मितं शिशुम् ॥
महेशदत्तध्यानेन यद्रूपं च निरूपितम् ॥ १४८ ॥ तं दृष्ट्वा परमप्रीत्या पूर्णभूतमनोरथम् ॥ साश्रुनेत्रं पुलकितं निमग्नं भक्ति
सागरे ॥ १४९ ॥ हृदि पूजां प्रणामं च कुर्वंतं योगचर्यया ॥ मूर्ध्ना प्रणेमुस्ते तं च स च तानाशिषं ददौ ॥ १५० ॥ आसन
स्थो मुनिस्तस्थौ ते जग्मुः स्वालयं मुदा ॥ नंदः स्वानंदयुक्तश्च बंधून्मंगलपत्रिकाः ॥ १५१ ॥ प्रस्थापयामास शीघ्रमा
राद्दूरस्थितान्मुदा ॥ दधिकुल्यां दुग्धकुल्यां घृतकुल्यां प्रपूरिताम् ॥ १५२ ॥ गुडकुल्यां तैलकुल्यां मधुकुल्यां च विस्तृताम् ॥
नवनीतकुल्यां पूर्णां च तक्रकुल्यां यदृच्छया ॥ १५३ ॥ शर्करोदककुल्यां च परिपूर्णां च लीलया ॥ तंडुलानां च शाली
नामुच्चैश्च शतपर्वतान् ॥ १५४ ॥ पृथुकानां शैलशतं लवणानां च सप्त च ॥ सप्तशैलाच्छर्कराणां लड्डुकानां च सप्त च
॥ १५५ ॥ परिपक्वफलानां च तत्र षोडशपर्वतान् ॥ यवगोधूमचूर्णानां पक्वलड्डुकपिंडकान् ॥ १५६ ॥ मोदकानां च शैलं
च स्वस्तिकानां च पर्वतान् ॥ कपर्दकानामत्युच्चैः शैलान्सप्त च नारद ॥ १५७ ॥ कर्पूरादिकयुक्तानां तांबूलानां च मंदिरम् ॥
विस्तृतं द्वारहीनं च वासितोदकसंयुतम् ॥ १५८ ॥ चंदनागुरुकस्तूरीकुंकुमेन समन्वितम् ॥ नानाविधानि रत्नानि स्वर्णानि

विविधानि च ॥ १५९ ॥ मुक्ताफलानि रम्याणि प्रवालानि मुदाऽन्वितः ॥ नानाविधानि चारूणि वासांसि भूषणानि च ॥ १६० ॥ पुत्रान्नप्राशने नन्दः कारयामास कौतुकात् ॥ संस्कारयुक्तं रुचिरं चन्दनद्रवचर्चितम् ॥ १६१ ॥ प्राङ्गणं कदलीस्तम्भै रसालनवपल्लवैः ॥ ग्रथितैः सूक्ष्मवस्त्रेण वेष्टयामास कौतुकात् ॥ १६२ ॥ युक्तं मङ्गलकुम्भैश्च फलपल्लवसंयुतैः ॥ चन्दनाऽगुरुकस्तूरीपुष्पमालाविराजितैः ॥ १६३ ॥ माल्यानां वरवस्त्राणां राशिभिश्च विराजितम् ॥ गवां च मधुपर्काणामासनानां च नारद ॥ १६४ ॥ फलानां जलकुम्भानां समूहैश्च समन्वितम् ॥ नानाप्रकारैर्वाद्यैश्च दुर्लभैः सुमनोहरैः ॥ १६५ ॥ ढक्कानां दुन्दुभीनां च पटहानां तथैव च ॥ मृदङ्गमुरजादीनामानकानां समूहकैः ॥ १६६ ॥ वंशीसन्नहनीकांस्यशरयन्त्रैश्च शब्दितम् ॥ विद्याधरीणां नृत्येन भृङ्गिमाभ्रमणेन च ॥ १६७ ॥ गन्धर्वनायकानां च संगीतैर्मूर्च्छनायुतैः ॥ स्वर्णसिंहासनानां च रथानां निःस्वनैर्युतम् ॥ १६८ ॥ एतस्मिन्नन्तरे नन्दमुवाच वाचको मुदा ॥ आजग्मुर्बल्लवेन्द्राश्च बान्धवा बल्लवास्तथा ॥ १६९ ॥ अश्वस्थाश्च गजस्थाश्च रथस्थाश्चेति सत्वरम् ॥ आजग्मू राजपुत्राश्च रत्नालङ्कारभूषिताः ॥ १७० ॥ आगतो गिरिभानुश्च सस्त्रीकश्च सकिङ्करः ॥ रथानां च चतुर्लक्षं गजानां च तथैव च ॥ १७१ ॥ तुरङ्गमाणां कोटिश्च शिबिकानां तथैव च ॥ ऋषीन्द्राणां मुनीन्द्राणां विप्राणां च विपश्चिताम् ॥ १७२ ॥ बन्दिनां भिक्षुकाणां च समूहैश्च समीपतः ॥ गोपानां गोपिकानां च संख्यां कर्तुं च कः क्षमः ॥ १७३ ॥ पश्यागत्य बहिर्भूयेत्युवाच प्राङ्गणे स्थितः ॥ श्रुत्वैवं तानुपव्रज्य समानीय व्रजेश्वरः ॥ १७४ ॥ प्राङ्गणे वासयामास पूजयामास सत्वरम् ॥ ऋष्यादिकसमूहं च प्रणम्य शिरसा भुवि ॥ पाद्यादिकं च तेभ्यश्च प्रददौ सुसमाहितः ॥ १७५ ॥ वस्तुभिर्बन्धुभिः पूर्णं बभूव नन्दगोकुलम् ॥ न कोऽपि कस्य शब्दं च श्रोतुं शक्तश्च तत्र वै ॥ १७६ ॥ त्रिमुहूर्तं कुबेरश्च श्रीकृष्णप्रीतये मुदा ॥ चकार स्वर्णवृष्ट्या च परिपूर्णं च गोकुलम् ॥ १७७ ॥ कौतुकापह्नवं चक्रुर्बन्धुवर्गाश्च क्रीडया ॥ आनम्रकन्धराः सर्वे दृष्ट्वा नन्दस्य सम्पदम् ॥ १७८ ॥ नन्दः कृताह्निकः पूतो धृत्वा धौते च वाससी ॥ चन्दनागुरुकस्तूरीकुङ्कुमेनैव भूषितः ॥ १७९ ॥

उवास पादौ प्रक्षाल्य स्वर्णपीठे मनोहरे ॥ गर्गस्य च मुनीन्द्राणां गृहीत्वाऽऽज्ञां व्रजेश्वरः ॥१८०॥ संस्मृत्य विष्णुमाचांतः स्वस्ति
वाचनपूर्वकम् ॥ कृत्वा कर्म च वेदोक्तं भोजयामास बालकम् ॥ १८१ ॥ गर्गवाक्यानुसारेण बालकस्य मुदाऽन्वितः ॥
कृष्णेति मङ्गलं नाम ररक्ष च शुभे क्षणे ॥ १८२ ॥ सघृतं भोजयित्वा च कृत्वा नाम जगत्पतेः ॥ वाद्यानि
वादयामास कारयामास मङ्गलम् ॥ १८३ ॥ नानाविधानि स्वर्णानि धनानि विविधानि च ॥ भक्ष्यद्रव्याणि वासांसि
ब्राह्मणेभ्यो ददौ मुदा ॥ १८४ ॥ बन्दिभ्यो भिक्षुकेभ्यश्च सुवर्णं विपुलं ददौ ॥ भाराक्रान्ताश्च ते सर्वे न शक्ता गन्तुमेव च
॥ १८५ ॥ ब्राह्मणान्बन्धुवर्गांश्च भिक्षुकांश्च विशेषतः ॥ मिष्टान्नं भोजयामास परिपूर्णं मनोहरम् ॥ १८६ ॥ दीयतां दीयतां
चैव खाद्यतां खाद्यतामिति ॥ बभूव शब्दोऽत्युच्चैश्च सततं नन्दगोकुले ॥ १८७ ॥ रत्नानि परिपूर्णानि वासांसि भूषणानि
च ॥ प्रवालानि सुवर्णानि मणिसाराणि यानि च ॥ १८८ ॥ चारूणि स्वर्णपात्राणि कृतानि विश्वकर्मणा ॥ गत्वा गर्गाय विनयं
चकार व्रजपुंगवः ॥ १८९ ॥ शिष्येभ्यः स्वर्णभाराणि प्रददौ विनयान्वितः ॥ द्विजेभ्योऽप्यवशिष्टेभ्यः परिपूर्णानि नारद ॥१९० ॥
॥ ॥ श्रीनारायण उवाच ॥ गृहीत्वा श्रीहरिं गर्गो जगाम निभृतं मुदा ॥ तुष्टाव परया भक्त्या प्रणम्य च तमीश्वरम् ॥ १९१ ॥
साश्रुनेत्रः सपुलको भक्तिनम्रात्मकन्धरः ॥ पुटाञ्जलियुतो भूत्वोवाच कृष्णपदांबुजे ॥ १९२ ॥ गर्ग उवाच ॥ हे कृष्ण जगतां
नाथ भक्तानां भयभञ्जन ॥ प्रसन्नो भव मामीश देहि दास्यं पदाम्बुजे ॥१९३॥ त्वत्पित्रा मे धनं दत्तं तेन मे किं प्रयोजनम् ॥ देहि मे
निश्चलां भक्तिं भक्तानामभयप्रद ॥ १९४ ॥ अणिमादिकसिद्धिषु योगेषु मुक्तिषु प्रभो ॥ ज्ञानतत्त्वेऽमरत्वे वा किञ्चिन्नास्ति स्पृहा
मम ॥ १९५ ॥ इन्द्रत्वे वा मनुत्वे वा स्वर्गलोकफले चिरम् ॥ नास्ति मे मनसो वाञ्छा त्वत्पादसेवनं विना ॥ १९६ ॥ सालोक्यं
सार्ष्टिसारूप्ये सामीप्यैकत्वमीप्सितम् ॥ नाहं गृह्णामि ते ब्रह्मंस्त्वत्पादसेवनं विना ॥१९७॥ गोलोके वापि पाताले वासे नास्ति
मनोरथः ॥ किन्तु ते चरणाम्भोजे सन्ततं स्मृतिरस्तु मे ॥१९८॥ त्वन्मन्त्रं शङ्करात्प्राप्य कतिजन्मफलोदयात् ॥ सर्वज्ञोऽहं सर्व

दर्शी सर्वत्र गतिरस्तु मे ॥ १९९ ॥ कृपां कुरु कृपासिन्धो दीनबन्धो पदाम्बुजे ॥ रक्ष मामभयं दत्त्वा मृत्युर्मे किं करिष्यति ॥ ॥ २०० ॥ सर्वेषामीश्वरः सर्वस्त्वत्पादाम्भोजसेवया ॥ मृत्युञ्जयोऽन्तकालश्च बभूव योगिनां गुरुः ॥२०१॥ ब्रह्मा विधाता जगतां त्वत्पादाम्भोजसेवया ॥ यस्यैकदिवसे ब्रह्मन्पतन्तीन्द्राश्चतुर्दश ॥२०२॥ त्वत्पादसेवया धर्मः साक्षी च सर्वकर्मणाम्॥पाता च फलदाता च जित्वा कालं सुदुर्जयम् ॥२०३॥सहस्रवदनः शेषो यत्पादाम्बुजसेवया ॥ धत्ते सिद्धार्थवद्विश्वं शिवः कण्ठे विषं यथा ॥ ॥ २०४ ॥ सर्वसंपद्विधात्री या देवीनां च परात्परा॥करोति सततं लक्ष्मीः केशैस्त्वत्पादमार्जनम् ॥२०५॥ प्रकृतिर्बीजरूपा सा सर्वेषां शक्तिरूपिणी ॥ स्मारंस्मारं त्वत्पदाब्जं बभूव तत्परा वरा ॥ २०६ ॥ पार्वती सर्वरूपा सा सर्वेषां बुद्धिरूपिणी ॥त्वत्पादसेवया कान्तं ललाभ शिवमीश्वरम् ॥ २०७ ॥ विद्याधिष्ठात्री देवी या ज्ञानमाता सरस्वती ॥ पूज्या बभूव सर्वेषां संपूज्य त्वत्पदाम्बुजम्॥२०८॥ सावित्री वेदजननी पुनाति भुवनत्रयम् ॥ ब्रह्मणो ब्राह्मणानां च गतिस्त्वत्पादसेवया ॥ २०९ ॥ क्षमा जगद्बिभर्त्ति च रत्नगर्भा वसुन्धरा ॥ प्रसूतिः सर्वसस्यानां त्वत्पादपद्मसेवया ॥२१०॥ राधा ममांशसंभूता तव तुल्या च तेजसा ॥ स्थित्वा वक्षसि ते पादं सेवतेऽन्यस्य का कथा ॥ २११ ॥ यथा शर्वादयो देवा देव्यः पद्मादयो यथा ॥ सनाथं कुरु मामीश ईश्वरस्य समा कृपा ॥२१२॥ न यास्यामि गृहं नाथ न गृह्णामि धनं तव ॥ कृत्वा मां रक्ष पादाब्जसेवायां सेवकं रतम् ॥ २१३ ॥ इति स्तुत्वा साश्रुनेत्रः पपात चरणे हरेः ॥ रुरोद च भृशं भक्त्या पुलकाञ्चितविग्रहः ॥ २१४ ॥ गर्गस्य वचनं श्रुत्वा जहास भक्तवत्सलः ॥ उवाच तं स्वयं कृष्णो मयि ते भक्तिरस्त्विति ॥ २१५ ॥ इदं गर्गकृतं स्तोत्रं त्रिसन्ध्यं यः पठेन्नरः ॥ दृढां भक्तिं हरेर्दास्यं स्मृतिं च लभते ध्रुवम् ॥ ॥ २१६ ॥ जन्ममृत्युजरारोगशोकमोहादिसंकटात् ॥ तीर्णो भवति श्रीकृष्णदाससेवनतत्परः ॥ २१७ ॥ कृष्णस्य सहकालं च कृष्णसार्द्धं च मोदते ॥ कदाचिन्न भवेत्तस्य विच्छेदो हरिणा सह ॥ २१८ ॥ श्रीनारायण उवाच ॥ ॥ हरिं मुनिः स्तवं कृत्वा ददौ नन्दाय तं मुदा ॥ उवाच तं गृहं यामि कुर्वाज्ञामिति बल्लव ॥२१९ ॥ अहो विचित्रं संसारो मोहजालेन वेष्टितः ॥ संमीलनं च

विग्रहो नराणां सिन्धुफेनवत् ॥ २२०॥ गर्गस्य वचनं श्रुत्वा रुरोद नन्द एव च ॥ सद्भिच्छेदो हि साधूनां मरणादतिरिच्यते॥२२१॥
सर्वशिष्यैः परिवृतं मुनीन्द्रं गन्तुमुद्यतम् ॥ सर्वे नन्दादयो गोपा रुदन्तो गोपिकास्तदा ॥ २२२ ॥ प्रणेमुः परमप्रीत्या चक्रुस्तं
विनयं मुने ॥ दत्त्वाऽऽशिषं मुनिश्रेष्ठो जगाम मथुरां मुदा ॥ २२३ ॥ ऋषयो मुनयश्चैव बन्धुवर्गाश्च बल्लवाः ॥ सर्वे जग्मुर्धनैः पूर्णाः
स्वालयं हृष्टमानसाः ॥ २२४ ॥ प्रजग्मुर्बन्दिनः सर्वे परिपूर्णमनोरथाः ॥ मिष्टद्रव्यांशुकोत्कृष्टतुरगस्वर्णभूषणैः ॥ २२५ ॥ आकण्ठ
पूर्णा भुक्त्या च भिक्षुका गन्तुमक्षमाः॥ स्वर्णवस्त्रभरोद्रेकपरिश्रान्ता मुदाऽन्विताः॥२२६॥सुमन्दगामिनः केचित्केचिद्भूमौ च शेरते॥
केचिद्वर्त्मनि तिष्ठन्तश्चोत्तिष्ठन्तश्च केचन ॥ २२७ ॥ केचिदूषुः प्रमुदिता हसन्तस्तत्र केचन ॥ कपर्दकानां वस्तूनां शेषांश्चोर्वरितान्ब
हून्॥ २२८॥ केचित्तानाददुः स्थित्वा दर्शयन्तश्च केचन ॥ केचिन्नृत्यं प्रकुर्वन्तो गायन्तस्तत्र केचन॥२२९॥केचिद्बहुविधा गाथाः
कथयन्तः पुरातनाः ॥ मरुत्तश्वेतसगरमांधातॄणां च भूभृताम् ॥ २३० ॥ उत्तानपादनहुषनलादीनां च याः कथाः ॥ श्रीरामस्याश्व
मेधस्य रन्तिदेवस्य कर्मणाम् ॥२३१॥ येषांयेषां नृपाणां च श्रुता वृद्धमुखात्कथाः॥कथयन्तश्च ताः केचिच्छ्रुतवन्तश्च केचन॥२३२ ॥
स्थायंस्थायं गताः केचित्स्वापंस्वापं च केचन ॥ एवं सर्वे प्रमुदिताः प्रजग्मुः स्वालयं मुदा ॥ २३३ ॥ हृष्टो नन्दो यशोदा च बालं
कृत्वा च वक्षसि ॥ तस्थौ स्वमन्दिरे रम्ये कुबेरभवनोपमे ॥ २३४॥ एवं प्रवार्द्धतौ बालौ शुक्लचन्द्रकलोपमौ ॥ गवां पुच्छं च भित्तिं च
धृत्वा चोत्तस्थतुर्मुदा॥२३५॥शब्दार्द्धं वा तदर्द्धं वा क्षमौ वक्तुं दिनेदिने॥पित्रोर्हर्षं च वर्द्धन्तौ गच्छन्तौ प्राङ्गणे मुने॥२३६॥ बालो
द्विपादं पादं वा गन्तुं शक्तो बभूव ह ॥ गन्तुं शक्तो हि जानुभ्यां प्राङ्गणे वा गृहे हरिः ॥२३७॥वर्षाधिको हि वयसा कृष्णात्संकर्षणः
स्वयम् ॥ ततो मुदं वर्द्धयन्तौ वर्द्धितौ च दिनेदिने॥२३८॥व्रजन्तौ गोकुले बालौ प्रहृष्टगमने क्षमौ ॥ उक्तवन्तौ स्फुटं वाक्यं माया
बालकविग्रहौ ॥ २३९ ॥ गर्गो जगाम मथुरां वसुदेवाश्रमं मुने ॥ स तं ननाम पप्रच्छ पुत्रयोः कुशलं तयोः ॥ २४० ॥ मुनिस्तं
कथयामास कुशलं सुमहोत्सवम् ॥ आनन्दाश्रुनिमग्नश्च श्रुतमात्राद्बभूव ह ॥ २४१ ॥ देवकी परमप्रीत्या पप्रच्छ च पुनःपुनः ॥

आनन्दाश्रुनिमग्ना सा रुरोद च मुहुर्मुहुः ॥ २४२ ॥ गर्गस्तावाशिषं दत्त्वा जगाम स्वालयं मुदा ॥ स्वगृहे तस्थतुस्तौ च कुबेरभव
नोपमे ॥ २४३ ॥ श्रीनारायण उवाच ॥ यत्र कल्पे कथा चेयं तत्र त्वमुपबर्हणः ॥ पञ्चाशत्कामिनीनां च पतिर्गन्धर्वपुङ्गवः
॥ २४४ ॥ तासां प्राणाधिकस्त्वं च शृङ्गारनिपुणो युवा ॥ ततोऽभूद्ब्रह्मणः शापाद्दासीपुत्रो द्विजस्य च ॥ २४५ ॥ ततोऽधुना ब्रह्म
पुत्रो वैष्णवोच्छिष्टभोजनात् ॥ सर्वदर्शी च सर्वज्ञः स्मारको हरिसेवया ॥ २४६ ॥ कथितं कृष्णचरितं नामान्नप्राशनादिकम् ॥
जन्ममृत्युजरातिघ्नमपरं कथयामि ते ॥२४७॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे कृष्णान्नप्राशन
वर्णननामकरणप्रस्तावो नाम त्रयोदशोऽध्यायः ॥ १३ ॥ छ ॥ ॥ श्रीनारायण उवाच ॥ एकदा नन्दपत्नी च स्नानार्थं यमुनां
ययौ ॥ गव्यपूर्णं गृहं दृष्ट्वा जहास मधुसूदनः ॥ १ ॥ दधिदुग्धाज्यतक्रं च नवनीतं मनोरमम् ॥ गृहस्थितं च यत्किंचिच्चखाद
मधुसूदनः ॥ २ ॥ मधु हैयङ्गवीनं यत्स्वस्तिकं शकटस्थितम् ॥ भुक्त्वा पीत्वांऽशुकैर्वक्रसंस्कारं कर्तुमुद्यतम् ॥ ३ ॥ ददर्श बालकं
गोपी स्नात्वाऽऽगत्य स्वमन्दिरम् ॥ गव्यशून्यं भग्नभाण्डं मध्वादिरिक्तभाजनम् ॥ ४ ॥ दृष्ट्वा पप्रच्छ बालांश्च अहो कर्मेदमद्भुतम्॥
यूयं वदत सत्यं च कृतं केन सुदारुणम् ॥ ५ ॥ यशोदावचनं श्रुत्वा सर्वमूचुश्च बालकाः ॥ चखाद सत्यं बालस्ते नास्मभ्यं दत्तमेव
च ॥ ६ ॥ बालानां वचनं श्रुत्वा चुकोप नन्दगेहिनी ॥ वेत्रं गृहीत्वा दुद्राव रक्तपङ्कजलोचना ॥ ७ ॥ पलायमानं गोविन्दं ग्रहीतुं
न शशाक ह ॥ ध्यानासाध्यं शिवादीनां दुरापमपि योगिनाम् ॥ ८ ॥ यशोदा भ्रमणं कृत्वा विश्रान्ता घर्मसंयुता ॥ तस्थौ कोपपरा
तात्मा शुष्ककण्ठौष्ठतालुका ॥ ९ ॥ विश्रान्तां मातरं दृष्ट्वा कृपालुः पुरुषोत्तमः ॥ संतस्थौ पुरतो मातुः सस्मितो जगदीश्वरः ॥
॥१०॥ करे धृत्वा च तं देवी समानीय स्वमालयम् ॥ बद्ध्वा वस्त्रेण वृक्षे च तताड मधुसूदनम् ॥११॥ बद्ध्वा कृष्णं यशोदा सा जगाम
स्वालयं प्रति ॥ हरिस्तस्थौ वृक्षमूले जगतां पतिरीश्वरः ॥ १२ ॥ श्रीकृष्णस्पर्शमात्रेण सहसा तत्र नारद ॥ पपात वृक्षः शैलाभः
शब्दं कृत्वा भयानकम् ॥१३॥ सुवेषः पुरुषो दिव्यो वृक्षादाविर्बभूव ह ॥ दिव्यस्यन्दनमारुह्य जगाम स्वालयं पुरः ॥ १४॥ प्रणम्य

जगतीनाथं शातकौम्भपरिच्छदम् ॥ किशोरः सस्मितो गौरो रत्नालङ्कारभूषितः ॥ १५ ॥ सा वृक्षपतनं दृष्ट्वा भिया त्रस्ता व्रजे
श्वरी ॥ क्रोडे चकार बालं तं रुदन्तं श्यामसुन्दरम् ॥१६॥ आजग्मुर्गोकुलस्थाश्च गोपा गोप्यश्च तद्गृहम् ॥ यशोदां भर्त्सयामासुः
शान्तिं चक्रुः शिशोर्मुदा ॥ १७ ॥ अत्यन्तस्थविरे काले तनयोऽयं बभूव ह ॥ धनं धान्यं च रत्नं वा तत्सर्वं पुत्रहेतुकम् ॥ १८ ॥
सुमतिर्नास्ति ते सत्यं ज्ञातं नन्दव्रजेश्वरि ॥ न भक्षितं यत्पुत्रेण तत्सर्वं निष्फलं भुवि ॥१९॥ पुत्रं बद्ध्वा गव्यहेतोर्वृक्षमूले च निष्ठुरे॥
गृहकर्मणि व्यग्रायां दैवाद्वृक्षः पपात ह ॥ २० ॥ वृक्षस्य पतनाद्रोपी भाग्याद्बालोऽपि जीवितः ॥ प्रनष्टे बालके मूढे वस्तूनां किं
प्रयोजनम् ॥ २१ आशिषं युयुजुर्विप्रा बन्दिनश्च शुभावहाम् ॥ द्विजेन कारयामासुर्नामसंकीर्तनं हरेः ॥ २२ ॥ एवं कृत्वा जनाः
सर्वे प्रययुर्निजमन्दिरम् ॥ उवाच पत्नीं नन्दश्च रक्तपङ्कजलोचनः ॥२३॥ नन्द उवाच ॥ यास्यामि तीर्थमद्यैव कण्ठे कृत्वा तु
बालकम् ॥ अथवा त्वं गृहाद्गच्छ त्वया मे किं प्रयोजनम् ॥ २४ ॥ शतकूपाधिका वापी शतवापीसमं सरः ॥ सरःशताधिको
यज्ञः पुत्रो यज्ञशताधिकः ॥ २५ ॥ तपोदानोद्भवं पुण्यं जन्मान्तरसुखप्रदम् ॥ सुखप्रदोऽपि सत्पुत्र इहैव च परत्र च ॥२६॥ पुत्रादपि
परो बन्धुर्न भूतो न भविष्यति ॥ एवमुक्त्वा स्वभार्यां च तस्थौ नन्दः स्वमन्दिरे॥यशोदा रोहिणी चैव नियुक्ता गृहकर्मणि॥२७॥
नारद उवाच ॥ सुवेषः पुरुषः को वा वृक्षरूपी च गोकुले ॥ भगवन्हेतुना केन वृक्षत्वं समवाप ह ॥ २८ ॥ ॥ नारायण उवाच ॥
कुवेरतनयः श्रीमान्नाम्ना यो नलकूबरः ॥ जगाम नन्दनवनं क्रीडार्थं सह रम्भया ॥ २९ ॥ निर्जने सरसस्तीरे पुष्पोद्याने मनोहरे ॥
वटवृक्षसमीपे च सौरभे पुष्पवायुना ॥३०॥ विधाय पुष्पशयनं रत्नदीपैश्च दीपितम् ॥ चन्दनागुरुकस्तूरीकुङ्कुमद्रवसंयुतम् ॥३१॥
परितः पुष्पमाल्यैश्च क्षौमवस्त्रैश्च वेष्टितम् ॥ तत्र रम्भां समानीय विजहार यथेच्छया ॥३२॥ शृङ्गाराष्टप्रकारं च विपरीतादिकं सुखम् ॥
चुम्बनं षट्प्रकारं च यथास्थानं निरूपितम्॥३३॥ अङ्गप्रत्यङ्गसंयोगत्रिविधाश्लेषणं मुदा ॥नखदन्तकरक्रीडां चकार रसिकेश्वरः ॥ ३४ ॥
जलात्स्थले स्थलात्तोये कामशास्त्रविशारदः ॥ रतिभोगं प्रकुर्वन्तं ददर्श देवलो मुनिः॥३५॥ नग्नां रम्भां मुक्तकेशीं पीनश्रोणिपयोधराम्॥

नखदन्तक्षताङ्गीं च पुलकाञ्चितविग्रहाम् ॥३६॥पश्यन्तीं प्राणनाथं च पश्यन्तं सस्मितं मुदा ॥ वक्रभ्रूभङ्गसंयुक्तां कामुकीं च ददर्श ताम्
॥ ३७॥ रत्नकुण्डलयुग्मेन गण्डस्थलविराजिताम् ॥ विचित्ररत्नमाल्यैश्च पुष्पमाल्यैश्च भूषिताम् ॥३८॥ किङ्किणीजालसंयुक्तां सिन्दूर
बिन्दुसंयुताम् ॥ तया युक्तं पुलकितं नोत्तिष्ठन्तं स्मरान्वितम् ॥३९॥वृक्षत्वं याहि पापिष्ठेत्युवाच मुनिपुंगवः॥ शशाप रम्भां कामार्तां
मानुषी त्वं भवेति च ॥४०॥जन्मेजयस्य सुभगा भविता कामिनीति च॥त्वमेव गोकुलं गच्छ वृक्षरूपी भवेति च ॥४१॥ श्रीकृष्ण
स्पर्शमात्रेण पुनरायास्यसि गृहम् ॥ रम्भे त्वमिन्द्रसंयोगात्पुनरायास्यसि ध्रुवम् ॥४२॥ इत्येवमुक्त्वा स मुनिर्जगाम निजमन्दिरम्॥
कुबेरतनयः श्रीमान्स जगाम निजालयम् ॥४३॥ इत्येवं कथितं विप्र रम्भाख्यानं वदामि ते ॥ सुचन्द्रस्य गृहे रम्भा ललाभ जन्म
भारते ॥ ४४ ॥ कन्या लक्ष्मीस्वरूपा च बभूव सुन्दरी वरा ॥ तां च सालंकृतां कृत्वा सुचन्द्रो नृपतीश्वरः ॥४५॥ नानाकौतुकसं
युक्तां ददौ जन्मेजयाय च॥जन्मेजयस्य सुभगा बभूव महिषी वरा ॥ ४६ ॥ स्थानेस्थाने निर्जने च राजा रेमे तया सह ॥ एकदा
नृपतिश्रेष्ठश्चाश्वमेधेन दीक्षितः॥४७॥ अश्वसंगोपनं कृत्वा तस्थौ शक्रश्च मन्दिरे॥यज्ञाश्वं रुचिरं मत्वा कौतुकेन च सुन्दरी ॥४८॥
द्रष्टुं जगाम सा साध्वी चाश्वमेकाकिनी मुदा ॥ शक्रोऽश्वनिकटे भूत्वा धर्षयामास तां सतीम् ॥ ४९ ॥ तया निवार्यमाणश्च रेमे
तत्र तया सह ॥ मूर्च्छामवाप शक्रश्च बुबुधे न दिवानिशम् ॥ ५० ॥ सा च संभोगमात्रेण देहं तत्याज योगतः ॥ नृपस्य लज्जया
भीत्या शक्रः स्वर्गं जगाम ह ॥५१॥ राजा श्रुत्वा मृतां दृष्ट्वा विललाप भृशं मुहुः॥यज्ञं समाप्य विप्रेभ्यो ददौ पूर्णां च दक्षिणाम्॥
॥५२॥ रम्भा च मानवं देहं त्यक्त्वा स्वर्गं जगाम ह ॥ इत्येवं कथितं सर्वं वृक्षार्जुनविभञ्जनम् ॥५३॥ नलकूबरमोक्षश्च रम्भायाश्च
महामुने ॥ पुण्यदं कृष्णचरितं जन्ममृत्युजरापहम् ॥ इत्येवं कथितं सर्वमपरं कथयामि ते ॥ ५४ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे
श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे वृक्षार्जुनभञ्जनं नाम चतुर्दशोऽध्यायः ॥१४॥ श्रीनारायण उवाच ॥ एकदा कृष्णसहि
तो नन्दो वृन्दावनं ययौ॥तत्रोपवनभाण्डीरे चारयामास गोधनम् ॥१॥ सरः सुस्वादुतोयं च पाययामास तत्पपौ ॥ उवास वृक्षमूले

च बालं कृत्वा स्ववक्षसि ॥ २ ॥ एतन्मिन्नन्तरे कृष्णो मायामानुषविग्रहः ॥ चकार माययाऽकस्मान्मेघाच्छन्नं नभो मुने ॥ ३ ॥
मेघावृतं नभो दृष्ट्वा श्यामलं काननान्तरम्॥झंझावातं महाशब्दं वज्रशब्दं च दारुणम्॥४॥वृष्टिधारामतिस्थूलां कम्पमानांश्च पादपान्॥
दृष्ट्वैवं पतितस्कन्धान्नन्दो भयमवाप ह॥५॥कथं यास्यामि गोवत्सान्विहाय स्वाश्रमं बत॥ गृहं यदि न यास्यामि भविता बालकस्य
किम् ॥६॥एवं नन्दे प्रवदति रुरोद श्रीहरिस्तदा॥पयोभिया हरिश्चैव पितुः कण्ठं दधार सः॥७॥एतस्मिन्नन्तरे राधाऽऽजगाम कृष्ण
सन्निधिम् ॥ गमनं कुर्वती राजहंसखञ्जनगञ्जनम् ॥८॥ शरत्पार्वणचन्द्राभामुष्टवक्त्रमनोहरा ॥ शरन्मध्याह्नपद्मानां शोभामोचनलो
चना ॥ ९ ॥ परितस्तारकापक्ष्मविचित्रकज्जलोज्ज्वला ॥ खगेन्द्रचञ्चुचारुश्रीशंसानाशकनासिका ॥ १० ॥ तन्मध्यस्थलशोभार्ह
स्थूलमुक्ताफलोज्ज्वला॥कबरीवेषसंयुक्ता मालतीमाल्यवेष्टिता ॥११॥ ग्रीष्ममध्याह्नमार्तण्डप्रभामुष्टककुण्डला ॥ पक्वबिम्बफलानां च
श्रीमुष्टाधरयुग्मका॥१२॥मुक्तापङ्क्तिप्रभातैकदन्तपङ्क्तिसमुज्ज्वला ॥ ईषत्प्रफुल्लकुन्दानां सुप्रभानाशकस्मिता ॥१३॥कस्तूरीबिन्दु
संयुक्तसिन्दूरबिन्दुभूषिता॥कपालं मल्लिकायुक्तं बिभ्रती श्रीयुतं सती॥१४॥ सुचारुवर्तुलाकारकपोलपुलकान्विता ॥ मणिरत्नेन्द्रसा
राणां हारोरःस्थलभूषिता ॥ १५ ॥ सुचारुश्रीफलयुगकठिनस्तनसंगता ॥ पत्रावलीश्रिया युक्ता दीप्ता सद्रत्नतेजसा ॥१६॥ सुचा
रुवर्तुलाकारमुदरं सुमनोहरम् ॥ विचित्रत्रिवलीयुक्तं निम्ननाभिं च बिभ्रती ॥ १७ ॥ सद्रत्नसाररचितमेखलाजालभूषिता ॥
कामास्त्रसारभ्रूभङ्गयोगीन्द्रचित्तमोहिनी ॥ १८ ॥ कठिनश्रोणियुगलं धरणीधरनिन्दितम् ॥ स्थलपद्मप्रभामुष्टचरणं दधती मुदा ॥
॥ १९ ॥ रत्नभूषणसंयुक्तं यावकद्रवसंयुतम् ॥ मणीन्द्रशोभासंमुष्टसालक्तकपुनर्भवम् ॥ २० ॥ सद्रत्नसाररचितक्वणन्मञ्जीर
रञ्जितम् ॥ रत्नकङ्कणकेयूरचारुशङ्खविभूषिता ॥ २१ ॥ रत्नाङ्गुलीयनिकरवह्निशुद्धांशुकोज्ज्वला ॥ चारुचम्पकपुष्पाणां प्रभा
मुष्टकलेवरा ॥ २२ ॥ सहस्रदलसंयुक्तक्रीडाकमलमुज्ज्वलम् ॥ श्रीमुखश्रीदर्शनार्थं बिभ्रती रत्नदर्पणम् ॥ २३ ॥ दृष्ट्वा
तां निर्जने नन्दो विस्मयं परमं ययौ ॥ चन्द्रकोटिप्रभामुष्टां भासयन्तीं दिशो दश ॥ २४ ॥ ननाम तां साश्रुनेत्रो भक्तिनम्रात्म

कन्धरः ॥ जानामि त्वां गर्गमुखात्पद्माधिकप्रियां हरेः ॥ २५ ॥ जानामीमं महाविष्णोः परं निर्गुणमच्युतम् ॥ तथापि मोहि
तोऽहं च मानवो विष्णुमायया ॥ २६ ॥ गृहाण प्राणनाथं च गच्छ भद्रे यथासुखम् ॥ पश्चाद्दास्यसि मत्पुत्रं कृत्वा पूर्णम
नोरथम् ॥ २७ ॥ इत्युक्त्वा प्रददौ तस्यै रुदन्तं बालकं भिया ॥ जग्राह बालकं राधा जहास मधुरं सुखात् ॥ २८ ॥
उवाच नन्दं सा यत्नान्न प्रकाश्यं रहस्यकम् ॥ अहं दृष्टा त्वया नन्द कतिजन्मफलोदयात् ॥ २९ ॥ प्राज्ञस्त्वं गर्गवचनात्सर्वं
जानासि कारणम् ॥ अकथ्यमावयोर्गोप्यं चरितं गोकुले व्रज ॥ ३० ॥ वरं वृणु व्रजेश त्वं यत्ते मनसि वाञ्छितम् ॥ ददामि
लीलया तुभ्यं देवानामपि दुर्लभम् ॥ ३१ ॥ राधिकावचनं श्रुत्वा तामुवाच व्रजेश्वरः ॥ युवयोश्चरणे भक्तिं देहि नान्यत्र मे स्पृहा
॥ ३२ ॥ युवयोः सन्निधौ वासं दास्यसि त्वं सुदुर्लभम् ॥ आवाभ्यां देहि जगतामम्बिके परमेश्वरि ॥ ३३ ॥ श्रुत्वा नन्दस्य
वचनमुवाच परमेश्वरी ॥ दास्यामि दास्यमतुलमिदानीं भक्तिरस्तु ते ॥ ३४ ॥ आवयोश्चरणाम्भोजे युवयोश्च दिवानिशम् ॥
प्रफुल्लहृदये शश्वत्स्मृतिरस्तु सुदुर्लभा ॥ ३५ ॥ माया युवां च प्रच्छन्नौ न करिष्यति मद्वरात् ॥ गोलोके यास्यथान्ते च
विहाय मानवीं तनुम् ॥ ३६ ॥ एवमुक्त्वा तु सानन्दं कृत्वा कृष्णं स्ववक्षसि ॥ दूरं निनाय श्रीकृष्णं बाहुभ्यां च यथे
प्सितम् ॥ ३७ ॥ कृत्वा वक्षसि तं कामाच्छ्लेषंश्लेषं चुचुम्ब च ॥ पुलकाङ्कितसर्वाङ्गी सस्मार रासमण्डलम् ॥ ३८ ॥ एत
स्मिन्नन्तरे राधा मायासद्रत्नमण्डपम् ॥ ददर्श रत्नकलशशतेन च समन्वितम् ॥ ३९ ॥ नानाविचित्रचित्राढ्यं चित्रकाननशोभि
तम् ॥ सिन्दूराकारमणिभिः स्तम्भसंघैर्विराजितम् ॥ ४० ॥ चन्दनागुरुकस्तूरीकुङ्कुमद्रवयुक्तया ॥ संयुक्तं मालतीमालासमूहपुष्प
शय्यया ॥ ४१ ॥ नानाभोगसमायुक्तं दिव्यदर्पणसंयुतम् ॥ मणीन्द्रमुक्तामाणिक्यमालाजालैर्विभूषितम् ॥ ४२ ॥ मणीन्द्रसाररचि
तकपाटेन समन्वितम् ॥ भूषितं भूषितैर्वस्त्रैः पताकानिकरैर्वरैः ॥ कुङ्कुमाकारमणिभिः सप्तसोपानसंयुतम् ॥ ४३ ॥ युक्तं षट्पद
संयुक्तैः पुष्पोद्यानं च पुष्पितैः ॥ सा देवी मण्डपं दृष्ट्वा जगामाभ्यन्तरं मुदा ॥ ४४ ॥ ददर्श तत्र ताम्बूलं कर्पूरादिसमन्वितम् ॥

जलं च रत्नकुम्भस्थं स्वच्छं शीतं मनोहरम् ॥ ४५ ॥ सुधामधुभ्यां पूर्णानि रत्नकुम्भानि नारद ॥ पुरुषं कमनीयं च किशोर
श्यामसुन्दरम् ॥४६॥ कोटिकन्दर्पलीलाभं चन्दनेन विभूषितम् ॥ शयानं पुष्पशय्यायां सस्मितं सुमनोहरम् ॥४७॥ पीतवस्त्रपरी
धानं प्रसन्नवदनेक्षणम् ॥ मणीन्द्रसारनिर्माणं क्वणन्मञ्जीररञ्जितम् ॥ ४८ ॥ सद्रत्नसारनिर्माणकेयूरवलयान्वितम् ॥ मणीन्द्रकुण्डला
भ्यां च गण्डस्थलविराजितम् ॥ ४९ ॥ कौस्तुभेन मणीन्द्रेण वक्षःस्थलसमुज्ज्वलम् ॥ शरत्पार्वणचंद्रास्यप्रभामुष्टमुखोज्ज्वलम्
॥ ५० ॥ शरत्प्रफुल्लकमलप्रभामोचनलोचनम् ॥ मालतीमाल्यसंश्लिष्टशिखिपिच्छसुशोभितम् ॥ ५१ ॥ त्रिवंकचूडां बिभ्रन्तं
पश्यन्तं रत्नमन्दिरम् ॥ क्रोडं बालकशून्यं च दृष्ट्वा तं नवयौवनम् ॥ ५२ ॥ सर्वस्मृतिस्वरूपा सा तथापि विस्मयं ययौ ॥
रूपं रासेश्वरी दृष्ट्वा मुमोह सुमनोहरम् ॥ ५३ ॥ कामाच्चक्षुश्चकोराभ्यां मुखचन्द्रं पपौ मुदा ॥ निमेषरहिता राधा नवसंगमला
लसा ॥ ५४ ॥ पुलकाङ्कितसर्वाङ्गी सस्मिता मदनातुरा ॥ तामुवाच हरिस्तत्र स्मेराननसरोरुहाम् ॥ नवसंगमयोग्यां
च पश्यन्तीं वक्रचक्षुषा ॥ ५५ ॥ श्रीकृष्ण उवाच ॥ राधे स्मरसि गोलोकवृत्तान्तं सुरसंसदि ॥ ५६ ॥ अद्य पूर्णं करिष्यामि स्वी
कृतं यत्पुरा प्रिये ॥ त्वं मे प्राणाधिका[1] राधे प्रेयसी च वरानने ॥ ५७ ॥ यथा त्वं च तथाऽहं च भेदो हि नावयोर्ध्रुवम् ॥ यथा
क्षीरे च धावल्यं यथाऽग्नौ दाहिका सति ॥ ५८ ॥ यथा पृथिव्यां गन्धश्च तथाऽहं त्वयि संततम् ॥ विना मृदा घटं कर्तुं विना
स्वर्णेन कुण्डलम् ॥ ५९ ॥ कुलालः स्वर्णकारश्च नहि शक्तः कदाचन ॥ तथा त्वया विना सृष्टिमहं कर्तुं न च क्षमः
॥ ६० ॥ सृष्टेराधारभूता त्वं बीजरूपोऽहमच्युतः ॥ आगच्छ शयने साध्वि कुरु वक्षःस्थले हि माम् ॥ ६१ ॥ त्वं मे शोभा ॥ ४१ ॥
स्वरूपाऽसि देहस्य भूषणं यथा ॥ कृष्णं वदन्ति मां लोकास्त्वयैव रहितं यदा ॥ ६२ ॥ श्रीकृष्णं च तदा तेऽपि त्वयैव सहितं
परम् ॥ त्वं च श्रीस्त्वं च संपत्तिस्त्वमाधारस्वरूपिणी ॥ ६३ ॥ सर्वशक्तिस्वरूपासि सर्वरूपोऽहमक्षरः ॥ यदा तेजःस्वरूपोऽहं

---

[1] प्राणप्रिया-इ० पा० ।

तेजोरूपाऽसि त्वं तदा ॥ ६४ ॥ न शरीरी यदाहं च तदा त्वमशरीरिणी ॥ सर्वबीजस्वरूपोऽहं सदा योगेन सुन्दरि ॥ ६५ ॥
त्वं च शक्तिस्वरूपा च सर्वस्त्रीरूपधारिणी ॥ ममाङ्गांशस्वरूपा त्वं मूलप्रकृतिरीश्वरी ॥ ६६ ॥ शक्त्या बुद्ध्या च ज्ञानेन मया
तुल्या वरानने ॥ आवयोर्भेदबुद्धिं च यः करोति नराधमः ॥ ६७ ॥ तस्य वासः कालसूत्रे यावच्चन्द्रदिवाकरौ ॥ पूर्वान्सप्त
परान्सप्त पुरुषान्पातयत्यधः ॥ ६८ ॥ कोटिजन्मार्जितं पुण्यं तस्य नश्यति निश्चितम् ॥ अज्ञानादावयोर्निन्दां ये
कुर्वन्ति नराधमाः ॥ ६९ ॥ पच्यन्ते नरके घोरे यावच्चन्द्रदिवाकरौ ॥ राशब्दं कुर्वतस्त्रस्तो ददामि भक्तिमुत्तमाम् ॥ ७० ॥
धाशब्दं कुर्वतः पश्चाद्यामि श्रवणलोभतः ॥ ये सेवन्ते च दत्त्वा मामुपचारांश्च षोडश ॥ यावज्जीवनपर्यन्तं या प्रीतिर्जायते
मम ॥ ७१ ॥ सा प्रीतिर्मम जायेत राधाशब्दात्ततोऽधिका ॥ प्रिया न मे तथा राधे राधावक्ता ततोऽधिकः ॥ ७२ ॥ ब्रह्मानन्तः
शिवो धर्मो नरनारायणावृषी ॥ कपिलश्च गणेशश्च कार्त्तिकेयश्च मत्प्रियः ॥ ७३ ॥ लक्ष्मीः सरस्वती दुर्गा सावित्री प्रकृतिस्तथा॥
मम प्रियाश्च देवाश्च तास्तथापि न तत्समाः ॥७४॥ ते सर्वे प्राणतुल्या मे त्वं मे प्राणाधिका सती ॥ भिन्नस्थानस्थितास्ते च त्वं च
वक्षःस्थले स्थिता ॥ ७५ ॥ या मे चतुर्भुजा मूर्तिर्बिभर्त्ति वक्षसि प्रियाम् ॥ सोऽहं कृष्णस्वरूपस्त्वां विवहामि स्वयं सदा ॥ ७६ ॥
इत्येवमुक्त्वा श्रीकृष्णस्तस्थौ तल्पे मनोरमे ॥ उवाच राधिका नाथं भक्तिनम्रात्मकन्धरा ॥ ७७ ॥ राधिकोवाच ॥ स्मरामि सर्वं
जानामि विस्मरामि कथं विभो ॥ यत्त्वं वदसि सर्वाहं त्वत्पादाब्जप्रसादतः ॥ ७८ ॥ ईश्वरस्याप्रियाः केचित्प्रियाश्च कुत्र केचन ॥
ये यथा मां न स्मरन्ति तथा तेषु तवाकृपा ॥ ७९ ॥ तृणं च पर्वतं कर्तुं समर्थः पर्वतं तृणम् ॥ तथापि योग्यायोग्ये च संपत्तौ
च समा कृपा ॥ ८० ॥ तिष्ठत्यहं शयानस्त्वं कथाभिर्यत्क्षणं गतम् ॥ तत्क्षणं च युगसमं नाहं प्रापयितुं क्षमा ॥८१॥ वक्षःस्थले
च शिरसि देहि ते चरणाम्बुजम् ॥ दुनोति मन्मनः सद्यस्त्वदीयविरहानलात् ॥ ८२ ॥ पुरः पपात मे दृष्टिस्त्वदीयचरणाम्बुजे ॥
नीता मया नहि क्लेशाद्द्रष्टुमन्यत्कलेवरम् ॥८३॥ प्रत्येकमङ्गं दृष्ट्वैव दत्ता शान्ते मुखाम्बुजे॥दृष्ट्वा मुखारविन्दं च नान्यं गन्तुं च सा

क्षमा ॥ ८४ ॥ राधिकावचनं श्रुत्वा जहास पुरुषोत्तमः ॥ तामुवाच हितं तथ्यं श्रुतिस्मृतिनिरूपितम् ॥ ८५ ॥ श्रीकृष्ण उवाच ॥
न खण्डनीयं तत्तत्र मया पूर्वं निरूपितम् ॥ तिष्ठ भद्रे क्षणं भद्रं करिष्यामि तव प्रिये ॥ ८६ ॥त्वन्मनोरथपूर्णस्य स्वयं कालः समा
गतः ॥ यस्य यल्लिखितं पूर्वं यत्र काले निरूपितम् ॥ ८७ ॥ तदेव खण्डितुं राधे क्षमो नाहं च को विधिः ॥ विधातुश्च विधाताऽहं
येषां यल्लेखनं कृतम् ॥ ८८ ॥ ब्रह्मादीनां च क्षुद्राणां न तत्खण्ड्यं कदाचन ॥ एतस्मिन्नन्तरे ब्रह्माऽऽजगाम पुरतो हरेः ॥ ८९ ॥
मालाकमण्डलुकर ईषत्स्मेरचतुर्मुखः ॥ गत्वा ननाम तं कृष्णं प्रतुष्टाव यथागमम् ॥९०॥ साश्रुनेत्रःपुलकितो भक्तिनम्रात्मकन्धरः॥
स्तुत्वा नत्वा जगद्धाता जगाम हरिसन्निधिम् ॥९१॥ पुनर्नत्वा प्रभुं भक्त्या जगाम राधिकान्तिकम् ॥ मूर्ध्ना ननाम भक्त्या च
मातुस्तच्चरणाम्बुजे ॥९२॥ चकार संभ्रमेणैव जटाजालेन वेष्टितम्॥ कमण्डलुजलेनैव शीघ्रं प्रक्षालितं मुदा ॥९३॥ यथागमं प्रतुष्टाव
पुटाञ्जलियुतः पुनः ॥ ॥ ब्रह्मोवाच ॥ ॥ हे मातस्त्वत्पदाम्भोजं दृष्टं कृष्णप्रसादतः ॥९४॥ सुदुर्लभं च सर्वेषां भारते च विशेषतः ॥
षष्टिवर्षसहस्राणि तपस्तप्तं पुरा मया ॥ ९५ ॥ भास्करे पुष्करे तीर्थे कृष्णस्य परमात्मनः ॥ आजगाम वरं दातुं वरदाता हरिः
स्वयम् ॥ ९६ ॥ वरं वृणीष्वेत्युक्ते च स्वाभीष्टं च वृतं मुदा ॥ राधिकाचरणाम्भोजं सर्वेषामपि दुर्लभम् ॥ ९७ ॥ हे गुणातीत मे
शीघ्रमधुनैव प्रदर्शय ॥ मयेत्युक्तो हरिरयमुवाच मां तपस्विनम् ॥ ९८ ॥ दर्शयिष्यामि काले च वत्सेदानीं क्षमेति च ॥ नहीश्व
राज्ञा विफला तेन दृष्टं पदाम्बुजम् ॥ ९९ ॥ सर्वेषां वाञ्छितं मातर्गोलोके भारतेऽधुना ॥ सर्वा देव्यः प्रकृत्यंशा जन्याः प्राकृतिका
ध्रुवम् ॥ १०० ॥ त्वं कृष्णाङ्गार्धसंभूता तुल्या कृष्णेन सर्वतः ॥ श्रीकृष्णस्त्वमयं राधा त्वं राधा वा हरिः स्वयम् ॥ १०१ ॥ न हि
वेदेषु मे दृष्ट इति केन निरूपितम् ॥ ब्रह्माण्डाद्बहिरूर्ध्वं च गोलोकोऽस्ति यथाम्बिके ॥ १०२ ॥ वैकुण्ठश्चाप्यजन्यश्च त्वमजन्या
तथाम्बिके ॥ यथा समस्तब्रह्माण्डे श्रीकृष्णांशांशजीविनः॥१०३॥तथा शक्तिस्वरूपा त्वं तेषु सर्वेषु संस्थिता ॥ पुरुषाश्च हरेरंशास्त्व
दंशा निखिलाः स्त्रियः ॥१०४॥ आत्मना देहरूपा त्वमस्याधारस्त्वमेव हि ॥ अस्यास्तु प्राणैस्त्वं मातस्त्वत्प्राणैरयमीश्वरः ॥१०५॥

किमहो निर्मितः केन हेतुना शिल्पकारिणा ॥ नित्योऽयं च तथा कृष्णस्त्वं च नित्या तथाऽम्बिके ॥ १०६ ॥ अस्यांशा त्वं त्वदंशो
वाऽप्ययं केन निरूपितः ॥ अहं विधाता जगतां देवानां जनकः स्वयम् ॥ १०७ ॥ तं पठित्वा गुरुमुखाद्भवन्त्येव बुधा जनाः ॥ गुणा
नां वास्तवानां ते शतांशं वक्तुमक्षमः ॥ १०८ ॥ वेदो वा पण्डितो वाऽन्यः को वा त्वां स्तोतुमीश्वरः ॥ स्तवानां जनकं ज्ञानं बुद्धि
र्ज्ञानाम्बिका सदा ॥ १०९ ॥ त्वं बुद्धेर्जननी मातः को वा त्वां स्तोतुमीश्वरः ॥ यद्वस्तु दृष्टं सर्वेषां तद्धि वक्तुं बुधः क्षमः ॥ ११० ॥
यददृष्टाश्रुतं वस्तु तन्निर्वक्तुं च कः क्षमः ॥ अहं महेशोऽनंतश्च स्तोतुं त्वां कोऽपि न क्षमः ॥ १११ ॥ सरस्वती च वेदाश्च क्षमः कः स्तो
तुमीश्वरः ॥ यथागमं यथोक्तं च न मां निन्दितुमर्हसि ॥ ११२ ॥ ईश्वराणामीश्वरस्य योग्यायोग्ये समा कृपा ॥ जनस्य प्रतिपाल्यस्य
क्षणे दोषः क्षणे गुणः ॥ ११३ ॥ जननी जनको यो वा सर्वं क्षमति स्नेहतः ॥ इत्युक्त्वा जगतां धाता तस्थौ च पुरतस्तयोः ॥ ११४ ॥
प्रणम्य चरणाम्भोजं सर्वेषां वन्द्यमीप्सितम् ॥ ब्रह्मणा च कृतं स्तोत्रं त्रिसंध्यं यः पठेन्नरः ॥ ११५ ॥ राधामाधवयोः पादे भक्तिर्दास्यं लभे
द्ध्रुवम् ॥ कर्मनिर्मूलनं कृत्वा मृत्युं जित्वा सुदुर्जयम् ॥ विलङ्घ्य सर्वलोकांश्च याति गोलोकमुत्तमम् ॥ ११६ ॥ श्रीनारायण उवाच ॥
ब्रह्मणः स्तवनं श्रुत्वा तमुवाच ह राधिका ॥ ११७ ॥ वरं वृणु विधातस्त्वं यत्ते मनसि वर्तते ॥ राधिकावचनं श्रुत्वा तामुवाच
जगद्विधिः ॥ ११८ ॥ वरं च युवयोः पादपद्मभक्तिं च देहि मे ॥ इत्युक्ते विधिना राधा तूर्णमोमित्युवाच ह ॥ ११९ ॥ पुनर्ननाम तां
भक्त्या विधाता जगतां पतिः ॥ तदा ब्रह्मा तयोर्मध्ये प्रज्वाल्य च हुताशनम् ॥ १२० ॥ हरिं संस्मृत्य हवनं चकार विधिना विधिः ॥
उत्थाय शयनात्कृष्ण उवास वह्निसन्निधौ ॥ १२१ ॥ ब्रह्मणोक्तेन विधिना चकार हवनं स्वयम् ॥ प्रणमय्य पुनः कृष्णं राधां
तां जनकः स्वयम् ॥ १२२ ॥ कौतुकं कारयामास सप्तधा च प्रदक्षिणाम् ॥ पुनः प्रदक्षिणां राधां कारयित्वा हुताशनम् ॥ १२३ ॥
प्रणमय्य ततः कृष्णं वासयामास तं विधिः ॥ तस्या हस्तं च श्रीकृष्णं ग्राहयामास तं विधिः ॥ १२४ ॥ वेदोक्तसप्तमन्त्रांश्च पाठया
मास माधवम् ॥ संस्थाप्य राधिकाहस्तं हरेर्वक्षसि वेदवित् ॥ १२५ ॥ श्रीकृष्णहस्तं राधायाः पृष्ठदेशे प्रजापतिः ॥ स्थापया

मास मन्त्रांस्त्रीन्पाठयामास राधिकाम् ॥१२६॥ पारिजातप्रसूनानां मालां जानुविलम्बिताम् ॥ श्रीकृष्णस्य गले ब्रह्मा राधाद्वारा
ददौ मुदा ॥ १२७ ॥ प्रणमय्य पुनः कृष्णं राधां च कमलोद्भवः ॥ राधागले हरिद्वारा ददौ मालां मनोहराम् ॥ पुनश्च वासयामास
श्रीकृष्णं कमलोद्भवः ॥ १२८ ॥ तद्वामपार्श्वे राधां च सस्मितां कृष्णचेतसम् ॥ पुटाञ्जलिं कारयित्वा माधवं राधिकां विधिः ॥
॥१२९॥ पाठयामास वेदोक्तान्पञ्च मन्त्रांश्च नारद ॥ प्रणमय्य पुनः कृष्णं समर्प्य राधिकां विधिः ॥ १३० ॥ कन्यकां च यथा ता
तो भक्त्या तस्थौ हरेः पुरः ॥ एतस्मिन्नन्तरे देवाः सानन्दपुलकोद्गमाः ॥ १३१॥ दुन्दुभिं वादयामासुश्चानकं मुरजादिकम् ॥ पारिजा
तप्रसूनानां पुष्पवृष्टिर्बभूव ह ॥ १३२ ॥ जगुर्गन्धर्वप्रवरा ननृतुश्चाप्सरोगणाः ॥ तुष्टाव श्रीहरिं ब्रह्मा तमुवाच ह सस्मितः ॥१३३॥
युवयोश्चरणाम्भोजे भक्तिं मे देहि दक्षिणाम् ॥ब्रह्मणो वचनं श्रुत्वा तमुवाच हरिः स्वयम् ॥१३४॥ मदीयचरणाम्भोजे सुदृढा भक्ति
रस्तु ते ॥ स्वस्थानं गच्छ भद्रं ते भविता नात्र संशयः ॥ १३५ ॥ मया नियोजितं कर्म कुरु वत्स ममाज्ञया ॥ श्रीकृष्णस्य वचः
श्रुत्वा विधाता जगतां मुने ॥ १३६ ॥ प्रणम्य राधां कृष्णं च जगाम स्वालयं मुदा ॥ गते ब्रह्मणि सा देवी सस्मिता वक्रचक्षुषा ॥
॥ १३७ ॥ सा ददर्श हरेर्वक्रं चच्छाद व्रीडया मुखम् ॥ पुलकाङ्कितसर्वांगी कामबाणप्रपीडिता ॥ १३८ ॥ प्रणम्य श्रीहरिं भक्त्या
जगाम शयनं हरेः ॥ चन्दनागुरुपङ्कं च कस्तूरीकुङ्कुमान्वितम् ॥१३९॥ ललाटे तिलकं कृत्वा ददौ कृष्णस्य वक्षसि ॥ सुधापूर्णं रत्न
पात्रं मधुपूर्णं मनोहरम् ॥ १४० ॥ प्रददौ हरये भक्त्या बुभुजे जगतीपतिः ॥ ताम्बूलं च वरं रम्यं कर्पूरादिसुवासितम् ॥ १४१ ॥
ददौ कृष्णाय सा राधा सादरं बुभुजे हरिः ॥ चखाद सस्मिता राधा हरिदत्तं सुधारसम् ॥१४२॥ ताम्बूलं तेन दत्तं च बुभुजे पुरतो
हरेः ॥ कृष्णश्चर्विततताम्बूलं राधिकायै मुदा ददौ ॥१४३॥ चखाद परया भक्त्या पपौ तन्मुखपङ्कजम् ॥ राधाचर्विततताम्बूलं यया
चे मधुसूदनः ॥१४४॥ जहास न ददौ राधा क्षमेत्युक्तं तया मुदा ॥चन्दनागुरुकस्तूरीकुङ्कुमद्रवमुत्तमम् ॥ राधिकायाश्च सर्वांगे प्रददौ
माधवः स्वयम् ॥ १४५ ॥ यः कामो ध्यायते नित्यं यस्यैकचरणाम्बुजम् ॥ बभूव तस्य स वशो राधासंतोषकारणात् ॥ १४६ ॥

यद्भृत्यभृत्यैर्मदनो जितः सर्वक्षणं मुने ॥ स्वेच्छामयो हि भगवाञ्जितस्तेन कुतूहलात् ॥१४७॥ करे धृत्वा च तां कृष्णः स्थापया
मास वक्षसि ॥ चकार शिथिलं वस्त्रं चुम्बनं च चतुर्विधम् ॥१४८॥ बभूव रतियुद्धेन विच्छिन्ना क्षुद्रघण्टिका ॥ चुम्बनेनौष्ठरागश्च
ह्याश्लेषेण च पत्रकम् ॥१४९॥ शृंगारेणैव कबरी सिन्दूरतिलकं मुने ॥ जगामालक्तकाङ्कश्च विपरीतादिकेन च ॥१५०॥ पुलका
ङ्कितसर्वाङ्गी बभूव नवसंगमात् ॥ मूर्च्छामवाप सा राधा बुबुधे न दिवानिशम् ॥१५१॥ प्रत्यङ्गेनैव प्रत्यङ्गमङ्गेनाङ्गं समाश्लिषत् ॥
शृङ्गाराष्टविधं कृष्णश्चकार कामशास्त्रवित्॥१५२॥ पुनस्तां च समाश्लिष्य सस्मितां वक्रलोचनाम् ॥ क्षतविक्षतसर्वाङ्गीं नखदन्तैश्च
कार ह ॥१५३॥ कङ्कणानां किङ्किणीनां मञ्जीराणां मनोहरः ॥ बभूव शब्दस्तत्रैव शृङ्गारसमरोद्भवः ॥ १५४ ॥ पुनस्तां च समाकृ
ष्य शय्यायां च निवेश्य च ॥ चकार रहितां राधां कबरीबन्धवाससा ॥ १५५ ॥ निर्जने कौतुकात्कृष्णः कामशास्त्रविशारदः ॥
चूडावेषांशुकैर्हीनं चकार तं च राधिका ॥१५६॥ न कस्य कस्माद्धानिश्च तौ द्वौ कार्यविशारदौ ॥ जग्राह राधाहस्तात्तु माधवो रत्न
दर्पणम् ॥१५७॥ मुरलीं माधवकराज्जग्राह राधिका बलात् ॥ चित्तापहारं राधायाश्चकार माधवो बलात् ॥१५८॥ जहार राधि
का रासान्माधवस्यापि मानसम् ॥ निवृत्ते कामयुद्धे च सस्मिता वक्रलोचना ॥१५९॥ प्रददौ मुरलीं प्रीत्या श्रीकृष्णाय महात्मने॥
प्रददौ दर्पणं कृष्णः क्रीडाकमलमुज्ज्वलम् ॥१६०॥ चकार कबरीं रम्यां सिन्दूरतिलकं ददौ ॥ विचित्रपत्रकं वेषं चकारैवंविधं हरिः॥
॥१६१॥ विश्वकर्मा न जानाति सखीनामपि का कथा ॥ वेषं विधातुं कृष्णस्य यदा राधा समुद्यता ॥ १६२ ॥ बभूव शिशुरूपं
च कैशोरं च विहाय च ॥ ददर्श बालरूपं तं रुदन्तं पीडितं क्षुधा ॥१६३॥ यादृशं प्रददौ नन्दो भीतं तादृशमच्युतम् ॥ विनि
श्वस्य च सा राधा हृदयेन विदूयता ॥१६४॥ इतस्ततस्तं पश्यन्ती शोकार्ता विरहातुरा ॥ उवाच कृष्णमुद्दिश्य काकू
क्तिमिति कातरा ॥ १६५ ॥ मायां करोषि मायेश किंकरीं कथमीदृशीम् ॥ इत्येवमुक्त्वा सा राधा पपात च रुरोद च ॥
॥१६६॥ रुरोद कृष्णस्तत्रैव वाग्बभूवाशरीरिणी ॥ कथं रोदिषि राधे त्वं स्मर कृष्णपदाम्बुजम्॥१६७॥आरासमण्डलं यावन्नक्तम

त्रागमिष्यति ॥ करिष्यसि रतिं नित्यं हरिणा सार्द्धमीप्सिताम् ॥१६८॥ छायां विधाय स्वगृहे स्वयमागत्य मा रुद ॥ कृत्वा क्रोडे
च प्राणेशं मायेशं बालरूपिणम् ॥ १६९ ॥ त्यज शोकं गृहं गच्छ सुन्दरीत्थं प्रबोधिता ॥ श्रुत्वैवं वचनं राधा कृत्वा क्रोडे च बाल
कम् ॥ ॥ १७० ॥ ददर्श पुष्पोद्यानं च वनं सद्रत्नमण्डपम् ॥ तूर्णं वृन्दावनाद्राधा जगाम नन्दमन्दिरम् ॥ १७१ ॥ सा मनोयायिनी
देवी निमिषार्धेन नारद ॥ संसिक्तस्निग्धमधुररसना रक्तलोचना ॥ १७२ ॥ यशोदायै शिशुं दातुमुद्यता सेत्युवाच ह ॥ गृहीत्वैवं
शिशुं स्थूलं रुदन्तं च क्षुधातुरम् ॥ १७३ ॥ गोष्ठे त्वत्स्वामिना दत्तं प्राप्नोमि यातनां पथि ॥ संसिक्तं वसनं वत्से मेघाच्छन्नेऽतिदु
र्दिने ॥ १७४ ॥ पिच्छिले कर्दमोद्रेके यशोदा वोढुमक्षमा ॥ गृहाण बालकं भद्रे स्तनं दत्त्वा प्रबोधय ॥ १७५ ॥ गृहं चिरं परि
त्यक्तं यामि तिष्ठ सुखं सति ॥ इत्युक्त्वा बालकं दत्त्वा जगाम स्वगृहं प्रति ॥ १७६ ॥ यशोदा बालकं नीत्वा चुचुम्ब च स्तनं
ददौ ॥ बहिर्निविष्टा सा राधा स्वगृहे गृहकर्मणि ॥ १७७ ॥ नित्यं नक्तं रतिं तत्र चकार हरिणा सह ॥इत्येवं कथितं वत्स श्रीकृष्ण
चरितं शुभम् ॥ सुखदं मोक्षदं पुण्यमपरं कथयामि ते ॥ १७८ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारद
संवादे राधाकृष्णविवाहनवसंगमप्रस्तावो नाम पञ्चदशोऽध्यायः ॥ १५ ॥ श्रीनारायण उवाच ॥ माधवो बालकैः सार्द्धमेकदा
हलिना सह ॥ भुक्त्वा पीत्वा च क्रीडार्थं जगाम श्रीवनं मुने ॥१॥ तत्र नानाविधां क्रीडां चकार मधुसूदनः ॥ कृत्वा तां शिशुभिः
सार्द्धं चालयामास गोधनम् ॥ २ ॥ ययौ मधुवनं तस्माच्छ्रीकृष्णो गोधनैः सह ॥ तत्र स्वादु जलं पीत्वा वने च स महाबलः ॥
॥ ३ ॥ तत्रैकदैत्यो बलवाञ्छ्वेतवर्णो भयंकरः ॥ विकृताकारवदनो बकाकारश्च शैलवत् ॥ ४ ॥ दृष्ट्वा च गोकुलं गोष्ठे शिशुभिर्बल
केशवौ ॥ यथा ह्यगस्त्यो वातापिं सर्वं जग्रास लीलया ॥ ५ ॥ बकग्रस्तं हरिं दृष्ट्वा सर्वे देवा भयान्विताः ॥ चक्रुर्हाहेति संत्रस्ता
धावन्तः शस्त्रपाणयः ॥ ६ ॥ शक्रश्चिक्षेप वज्रं च मुनेरस्थिविनिर्मितम् ॥ न ममार बकस्तस्मात्पक्षमेकं ददाह च ॥ ७ ॥ नीहारास्त्रं
शशधरः शीतार्तस्तेन दानवः ॥ यमदण्डं सूर्यपुत्रस्तेन कुण्ठो बभूव ह ॥ ८ ॥ वायव्यास्त्रं च वायुश्च तेन स्थानान्तरं ययौ ॥ वरुणश्च

शिलावृष्टिं चकार तेन पीडितः ॥ ९ ॥ हुताशनश्च वाह्नेन पक्षांश्चैव ददाह सः ॥ कुबेरस्यार्धचन्द्रेण छिन्नपादो बभूव ह ॥ १० ॥ ईशानस्य च शूलेन बभूव मूर्च्छितोऽसुरः ॥ ऋषयो मुनयश्चैव कृष्णं चक्रुर्भियाऽऽशिषम् ॥ ११ ॥ एतस्मिन्नन्तरे कृष्णः प्रज्वलन्ब्रह्मतेजसा ॥ ददाह दैत्यसर्वाङ्गं बाह्याभ्यन्तरमीश्वरः ॥ १२ ॥ तत्सर्वं वमनं कृत्वा प्राणांस्तत्याज दानवः ॥ बकं निहत्य बलवाञ्छिशुभिर्गोधनैः सह ॥ १३ ॥ ययौ केलिकदन्बानां काननं सुमनोहरम् ॥ एतस्मिन्नन्तरे तत्र वृषरूपधरोऽसुरः ॥ १४ ॥ नाम्ना प्रलम्बो बलवान्महाधूर्तश्च शैलवत् ॥ शृङ्गाभ्यां च हरिं धृत्वा भ्रामयामास तत्र वै ॥ १५ ॥ दुद्रुवुर्बालकाः सर्वे रुरुदुश्च भयातुराः ॥ बलो जहास बलवाञ्ज्ञात्वा भ्रातरमीश्वरम् ॥ १६ ॥ बालकान्बोधयामास भयं किमित्युवाच ह ॥ तद्विषाणं गृहीत्वा च स्वयं श्रीमधुसूदनः ॥१७॥ भ्रामयित्वा च गगने पातयामास भूतले ॥ प्राणांस्तत्याज दैत्येन्द्रो निपत्य च महीतलम् ॥ १८ ॥ जहसुर्बालकाः सर्वे ननृतुश्च जगुर्मुदा ॥ हत्वा प्रलम्बं श्रीकृष्णो बलेन सह सत्वरम् ॥ १९ ॥ गोधनं चारयामास ययौ भाण्डीरमीश्वरः ॥ गच्छन्तं माधवं दृष्ट्वा केशी दैत्येश्वरो बली ॥ २० ॥ वेष्टयामास तं शीघ्रं खुरेण विलिखन्महीम् ॥ मूर्ध्नि कृत्वा हरिं तुष्टो गगनं शतयोजनम् ॥ २१ ॥ उत्पात्य भ्रामयामास पपात च महीतले ॥ जग्राह स हरिं पापी चर्वयामास कोपतः ॥ २२ ॥ स भग्नदन्तो दैत्यश्च वज्राङ्गचर्वणादहो ॥ श्रीकृष्णतेजसा दग्धः प्राणांस्तत्याज भूतले ॥२३॥ स्वर्गे दुन्दुभयो नेदुः पुष्पवृष्टिर्बभूव ह ॥ एतस्मिन्नन्तरे तत्र पार्षदा दिव्यरूपिणः ॥ २४ ॥ तत्राजग्मुः स्यन्दनस्था द्विभुजाः पीतवाससः ॥ किरीटिनः कुण्डलिनो वनमालाविभूषिताः ॥ ॥ २५ ॥ विनोदमुरलीहस्ताः क्वणन्मञ्जीररञ्जिताः ॥ चन्दनोक्षितसर्वाङ्गा गोपवेषधरा वराः ॥ २६ ॥ ईषद्धास्यप्रसन्नास्या भक्तानुग्रहकातराः ॥ प्रदीप्तं रथमास्थाय रत्नसारविनिर्मितम् ॥ २७ ॥ भाण्डीरवनमाजग्मुर्यत्र सन्निहितो हरिः ॥ दिव्यवस्त्रपरीधाना रत्नालंकारभूषिताः ॥ २८ ॥ प्रणमय्य हरिं स्तुत्वा जग्मुर्गोलोकमुत्तमम् ॥ मुक्त्वा देहं परित्यज्य वैष्णवाः पुरुषास्त्रयः ॥ संप्राप्य दानवीं योनिं बभूवुः कृष्णपार्षदाः ॥ २९ ॥ नारद उवाच ॥ के ते च दिव्यपुरुषा वैष्णवा दैत्यरूपिणः ॥ कथयस्व महाभाग कृतं किं

परमाद्भुतम् ॥ ३० ॥ नारायण उवाच ॥ शृणु ब्रह्मन्प्रवक्ष्येऽहमितिहासं पुरातनम् ॥ ३१ ॥ श्रुतं महेशवदनात्सूर्यपर्वणि पुष्करे॥हरेर्गु
णप्रसङ्गेन कथयामास शंकरः । ३२॥ संपृष्टो मुनिसंघैश्च मया धर्मेण ब्रह्मणा ॥ ब्रह्मपुत्र महाभाग कथां भुवनपावनीम् ॥३३॥ कथ
यामास विस्तार्य सावधानं निशामय ॥ गन्धर्वेशो गन्धवाहः पर्वते गन्धमादने ॥ ३४ ॥ महांस्तपस्विप्रवरो हरिसेवनतत्परः ॥
पुत्रा बभूवुश्चत्वारो गन्धर्वप्रवरा मुने ॥ ३५ ॥ सस्मरुः कृष्णपादाब्जं स्वप्ने ज्ञाने दिवानिशम् ॥ ते च दुर्वाससः शिष्याः श्रीकृष्णा
र्चनतत्पराः ॥ ३६ ॥ नित्यं दत्त्वा च कमलं संपूज्य तं पपुर्जलम् ॥ वसुदेवः सुहोत्रश्च सुदर्शनसुपार्श्वकौ ॥ ३७ ॥ चत्वारो वैष्ण
वश्रेष्ठास्तेपुस्ते पुष्करे तपः ॥ चिरकालं तपस्तप्त्वा बभूवुः सिद्धमन्त्रिणः ॥ ३८ ॥ ज्येष्ठो दुर्वाससो योगं संप्राप्य योगिनां वरः॥
सिद्धश्चाकृतदारश्च प्रज्वलन्ब्रह्मतेजसा ॥ ३९ ॥ सद्यो देहं परित्यज्य बभूव कृष्णपार्षदः ॥ एकदा भ्रातरस्ते च जग्मुश्चित्रसरोवरम्॥
॥ ४० ॥ पद्मानि कृष्णपूजार्थमाहर्तुमुदये रवेः ॥ पद्मानां चयनं कृत्वा गच्छतो वैष्णवान्मुने ॥ ४१ ॥ दृष्ट्वा निबध्य संजग्मुः सर्वे
शंकरकिंकराः ॥ बलिष्ठा दुर्बलान्धृत्वा जग्मुः शंकरसन्निधिम् ॥ ४२ ॥ ते सर्वे शंकरं दृष्ट्वा प्रणेमुः शिरसा भुवि ॥ तानुवाच
शिवः शीघ्रं प्रयुज्याशिषमुत्तमाम् ॥ ईषद्धास्यप्रसन्नास्यो भक्तानुग्रहकातरः ॥ ४३ ॥ शिव उवाच ॥ के यूयं पद्महर्तारः
पार्वत्याश्च सरोवरे ॥ ४४ ॥ लक्षयक्षै रक्षणीयं पार्वतीव्रतहेतवे ॥ नित्यं सहस्रकमलं ददाति हरये सती ॥ ४५ ॥ व्रते त्रैमासिके
भक्त्या पतिसौभाग्यवर्द्धने ॥ शिवस्य वचनं श्रुत्वा तमूचुर्वैष्णवा भिया ॥ पुटाञ्जलियुताः सर्वे भक्तिनम्रात्मकन्धराः ॥ ४६ ॥
गन्धर्वा ऊचुः ॥ ॥ वयं गन्धर्वप्रवरा गन्धवाहसुता विभो ॥ ४७ ॥ हरये कमलं दत्त्वा पिबामो जलमीश्वर ॥ वयं न विद्मो हे नाथ
पार्वत्या रक्षितं सरः ॥ ४८ ॥ गृहाण कमलं सर्वं युष्माकं च फलं कुरु ॥ न दास्यामोऽद्य कमलं पास्यामोऽद्य जलं हर ॥ ४९ ॥
किं वा कथं न पास्यामस्तुभ्यं दत्तानि तानि च ॥ नित्यं ध्यात्वा यत्पदाब्जं पद्मेन पूजयामहे ॥ ५० ॥ साक्षात्तस्मै प्रदत्त्वा
च पद्मं पूता वयं प्रभो ॥ एकं ब्रह्म ह्यद्वितीयं क्व देहः क्व च रूपवान् ॥ ५१ ॥ भक्तानुग्रहतो देहो रूपभेदश्च मायया ॥ किं तु गृहाण

पद्मानि त्वमेव मत्प्रभुः प्रभो ॥ ५२ ॥ यतो नो मानसं पूर्णं तद्रूपं दर्शयाच्युत ॥ द्विभुजं कमनीयं च किशोरं श्यामसुन्दरम् ॥
॥ ५३ ॥ विनोदमुरलीहस्तं पीतांबरधरं परम् ॥ एकवक्त्रं द्विनयनं चन्दनागुरुचर्चितम् ॥ ५४ ॥ ईषद्धास्यप्रसन्नास्यं रत्नालंकारभूषितम् ॥
कौस्तुभेन मणीन्द्रेण वक्षःस्थलसमुज्ज्वलम् ॥ ५५ ॥ मयूरपिच्छचूडं च मालतीमाल्यभूषितम् ॥ पारिजातप्रसुनानां मालाराजिविभूषितम् ॥ ५६ ॥
कोटिकन्दर्पलावण्यलीलाधाममनोहरम् ॥ गोपीसंघैर्दृश्यमानं सस्मितैर्वक्रलोचनैः ॥ ५७ ॥ नवयौवनसंपन्नं
राधावक्षःस्थलस्थितम् ॥ ब्रह्मादिभिः स्तूयमानं वन्द्यं ध्येयमभीप्सितम् ॥ ५८ ॥ स्वात्मारामं पूर्णकामं भक्तानुग्रहकातरम् ॥
इत्युक्त्वा पुरतः शम्भोस्तस्थुर्गन्धर्वपुङ्गवाः ॥ ५९ ॥ श्रीकृष्णरूपश्रवणात्पुलकाङ्कितविग्रहः ॥ गन्धर्वाणां वचः श्रुत्वा शिवस्तानित्युवाच ह ॥ ६० ॥
श्रीकृष्णरूपश्रवणात्साश्रुपूर्णविलोचनः ॥ मयैव यूयं विज्ञाता वैष्णवप्रवरा महीम् ॥ ६१ ॥ पूतां कर्तुं च भ्रमथ
चरणाम्भोजरेणुना ॥ अहं वाञ्छां करोम्येव श्रीकृष्णभक्तदर्शने ॥ ६२ ॥ समागमो हि साधूनां त्रिषु लोकेषु दुलभः ॥ पार्वत्याश्च
सुराणां च सदा यूयं मम प्रियाः ॥ ६३ ॥ आत्मनश्चात्मभक्तेभ्यो वैष्णवाश्च प्रियाश्च नः ॥ किन्तु मोघं च न भवेन्मया यत्स्त्रीकृतं पुरा ॥ ६४ ॥
तच्छ्रूयतां महाभागाः पार्वतीव्रतकर्मणि ॥ सरसश्चैव पद्मानि यैर्हृतानि व्रतान्तरे ॥ ६५ ॥ ते तूर्णमासुरीं योनिं
गमिष्यन्ति न संशयः ॥ न हि श्रीकृष्णभक्तानामशुभं विद्यते क्वचित् ॥ ६६ ॥ संप्राप्य मानवीं योनिं गोलोकं यास्यथ ध्रुवम् ॥
यूयं श्रीकृष्णरूपं च प्रत्यक्षं द्रष्टुमुत्सुकाः ॥ ६७ ॥ ध्रुवं द्रक्ष्यथ भो वत्सा वृन्दारण्ये च भारते ॥ दृष्ट्वा कृष्णं ततो मृत्युं संप्राप्य
वैष्णवोत्तमाः ॥ ६८ ॥ दिव्यं स्यंदनमारुह्य गमिष्यथ हरेर्गृहम् ॥ अधुना वाञ्छनीयं च रूपं द्रष्टुमिहोत्सुकाः ॥ ६९ ॥ तत्सर्वं पश्यतेत्युक्त्वा
दर्शयामास तच्छिवः ॥ रूपं दृष्ट्वा साश्रुनेत्राः प्रणम्य सर्वरूपिणम् ॥ ७० ॥ आजग्मुर्दानवीं योनिमिति ते दानवेश्वराः ॥
वसुदेवः पुरा मुक्तः सुहोत्रश्च बकासुरः ॥ ७१ ॥ सुदर्शनः प्रलम्बोऽयं स्वयं केशी सुपार्श्वकः ॥ हरस्य वरदानेन दृष्ट्वा रूपमनुत्तमम् ॥ ७२ ॥
मृत्युं संप्राप्य श्रीकृष्णाज्जग्मुस्ते कृष्णमन्दिरम् ॥ इत्येवं कथितं विप्र हरेश्चरितमद्भुतम् ॥ बककेशिप्रलम्बानां

मोक्षणं मोक्षकारकम् ॥ ७३ ॥ नारद उवाच ॥श्रुतं सर्वं महाभाग त्वत्प्रसादाद्यदद्भुतम् ॥ ७४ ॥ अधुना श्रोतुमिच्छामि पार्वत्या किं कृतं व्रतम् ॥ को वाऽऽराध्यो व्रतस्यास्य किं फलं नियमश्च कः ॥७५॥ कानि द्रव्याणि भगवन्व्रतोपयोगिकानि च ॥ कतिकालं व्रतं किं वा प्रतिष्ठायां निरूपणम् ॥ ७६ ॥ सुविचार्य वद विभो श्रोतुं कौतूहलं मम ॥ श्रीनारायण उवाच ॥ व्रतं त्रैमासिकं नाम पतिसौभाग्यवर्धनम् ॥ ७७ ॥ आराध्यो भगवान्कृष्णो राधिकासहितो मुने ॥ विषुवे च समारंभः समाप्तिर्दक्षिणायने ॥ ७८ ॥ संयम्य पूर्वदिवसे कृत्वाऽवश्यं हविष्यकम्॥स्नात्वा वैशाखसंक्रान्त्यां संकल्प्य जाह्नवीतटे॥७९॥घटे मणौ शालग्रामे जले वा पूजयेद्व्रती॥ ध्यायेद्भक्त्या च राधेशं संपूज्य पञ्च देवताः ॥ ८० ॥ ध्यानं च सामवेदोक्तं निबोध कथयामि ते ॥ नवीननीरदश्यामं पीतकौशेयवाससम् ॥८१॥ शरत्पार्वणचन्द्रास्यमीषद्धास्यसमन्वितम् ॥ शरत्प्रफुल्लपद्माक्षं मञ्जुलाञ्छनरंजितम् ॥८२॥ मानसं गोपिकानां च मोहयन्तं मुहुर्मुहुः ॥ राधया दृश्यमानं च राधावक्षःस्थलस्थितम्॥८३॥ ब्रह्मानन्तेशधर्माद्यैः स्तूयमानमहं भजे ॥ ध्यात्वा कृष्णं च ध्यानेन तमावाह्य व्रती मुदा ॥८४॥ ध्यायेत्तदा राधिकां च ध्यानं मध्यंदिनेरितम् ॥ राधां रासेश्वरीं रम्यां रासोल्लासरसोत्सुकाम् ॥ ॥८५॥ रासमण्डलमध्यस्थां रासाधिष्ठातृदेवताम् ॥ रासेश्वरोरःस्थलस्थां रसिकां रसिकप्रियाम्॥८६ ॥ रसिकप्रवरां रम्यां रमां च रमणोत्सुकाम् ॥ शरद्राजीवराजीनां प्रभामोचनलोचनाम् ॥ ८७ ॥ वक्रभ्रूभङ्गसंयुक्तां मञ्जीरेणैव रञ्जिताम् ॥ शरत्पार्वणचन्द्रास्यामीषद्धास्यमनोहराम् ॥ ८८ ॥ चारुचम्पकवर्णाभां चन्दनेन विभूषिताम् ॥ कस्तूरीबिन्दुना सार्धं सिंदूरबिंदुना युताम् ॥८९॥ चारुपत्रावलीयुक्तां वह्निशुद्धांशुकोज्ज्वलाम् ॥ सद्रत्नकुण्डलाभ्यां च सुकपोलस्थलोज्ज्वलाम् ॥ ९० ॥ रत्नेन्द्रसारहारेण वक्षःस्थलविराजिताम् ॥ रत्नकङ्कणकेयूरकिङ्किणीरत्नरञ्जिताम् ॥९१॥ सद्रत्नसाररचितक्वणन्मञ्जीररञ्जिताम् ॥ ब्रह्मादिभिश्च सेव्येन श्रीकृष्णेनैव सेविताम् ॥ ९२ ॥ सर्वेशेन स्तूयमानां सर्वबीजां भजाम्यहम् ॥ इति ध्यात्वा च कृष्णेन सहितां तां च पूजयेत् ॥ ९३ ॥ भक्त्या दत्त्वा प्रतिदिनमुपचारांश्च षोडश ॥ प्रत्येकं च पृथक्कृत्वा सर्वं दद्याद्व्रती मुदा ॥ ९४ ॥ सहस्रकमलं दिव्यं शतमष्टोत्तरं मुने ॥ होमं

कुर्याद्व्रती नित्यमष्टोत्तरशताहुतीः ॥ ९५ ॥ दद्याद्भक्त्या च कृष्णाय स्वाहेत्युच्चार्य यत्नतः ॥ रसालस्य कदल्याश्च ह्यामं वा पक्कमेव च ॥ ९६ ॥ नित्यमष्टोत्तरशतं दद्याद्भक्त्याऽक्षतैः फलम् ॥ नित्यं च भोजयेद्भक्त्या ब्राह्मणानां शतं मुने ॥ ९७ ॥ होमं कुर्याद्व्रती नित्यमष्टोत्तरशताहुतीः ॥ दद्याद्भक्त्या च कृष्णाय राधिकासहिताय च ॥ ९८ ॥ तिलेन हवनं कुर्यादाज्यमिश्रेण नारद ॥ वाद्यं च वादयेन्नित्यं कारयेद्धरिकीर्तनम् ॥ ९९ ॥ एवं मासत्रयं कृत्वा प्रतिष्ठां तदनन्तरम् ॥ प्रतिष्ठादिवसे तत्र विधानं शृणु नारद ॥ ॥ १०० ॥ कमलानां च नवतिसहस्राण्यक्षतानि च ॥ ब्राह्मणानां सहस्राणि नव विप्रेन्द्र यत्नतः ॥ १०१ ॥ भोजयेत्परमान्नानि स्वादूनि मिष्टकानि च ॥ फलं विंशाधिकं सप्तशतं नवसहस्रकम् ॥ १०२ ॥ दद्यान्नानाविधं द्रव्यं नैवेद्यं सुमनोहरम् ॥ संस्कृताग्निं च संस्थाप्य होमं कुर्याद्विचक्षणः ॥ १०३ ॥ नवतिं च सहस्राणि हुत्वाऽऽज्येन तिलेन च ॥ सवत्रं च सभोज्यं च यज्ञसूत्रफलान्वितम् ॥ १०४ ॥ गन्धपुष्पार्चितान्भक्त्या दद्यान्नवतिलड्डुकान् ॥ दद्यान्नवतिकुम्भांश्च शीततोयप्रपूरितान् ॥ १०५ ॥ एवंविधं व्रतं कृत्वा दद्याद्विप्राय दक्षिणाम् ॥ दक्षिणायाः परिमितं वेदेषु यन्निरूपितम् ॥ १०६ ॥ वृषेन्द्राणां सहस्रं च स्वर्णशृङ्गसमन्वितम् ॥ इत्येवं कथितं विप्र कृतं त्रैमासिकव्रतम् ॥ १०७ ॥ त्रिशिष्टसंततिकरं पतिसौभाग्यवर्द्धनम् ॥ व्रतस्यास्य प्रभावेण सौभाग्यं शतजन्मनि ॥ १०८ ॥ सत्पुत्रजननी सा च भवेज्जन्मशतं ध्रुवम् ॥ कदाऽपि न भवेत्तस्या भेदश्च पतिपुत्रयोः ॥ १०९ ॥ दासतुल्यो भवेत्पुत्रो भर्ता च स्ववचस्करः ॥ अनुक्षणं भवेद्राधाकृष्णभक्तियुता सती ॥ ११० ॥ भवेद्व्रतप्रभावेण प्राप्तज्ञानहरिस्मृतिः ॥ व्रतं च सामवेदोक्तं कृतं पूर्वमथावयोः ॥ १११ ॥ सर्वेषां च व्रतानां च श्रेष्ठं शृणु वदामि ते ॥ स्वायंभुवस्य च मनोः शतरूपाभिधा सती ॥ ११२ ॥ तया कृतं प्रथमतः कृत्वाऽगस्त्यं पुरोहितम् ॥ तदा कृतं देवहूत्या चाकूत्या च कृतं तदा ॥ ११३ ॥ पुरोहितं पुलस्त्यं च कृत्वा श्रुत्युक्तया मुने ॥ चकार रोहिणी तत्तु क्रतुं कृत्वा पुरोहितम् ॥ ११४ ॥ रतिश्चकार तद्भक्त्या गौतमस्तत्पुरोहितः ॥ अकारि तद्व्रतं भक्त्या तारया गुरुकान्तया ॥ ११५ ॥ महासंभृतसंभारो वसिष्ठस्तत्पुरोहितः ॥ तद्दृष्ट्वा गुरुपत्न्याश्च

शक्रशच्या कृतं व्रतम् ॥ ११६ ॥ महासम्भृतसम्भारस्तत्पुरोधा बृहस्पतिः ॥ व्रतं चकार स्वाहा च सर्वतोऽपि विलक्षणम् ॥११७॥
अतिसंभृतसंभारो मरीचिस्तत्पुरोहितः ॥ तद्दृष्ट्वा पार्वती ब्रह्मन्नुवाच शंकरं मुदा ॥ पुटाञ्जलियुता देवी भक्तिनम्रात्मकन्धरा ॥११८॥
पार्वत्युवाच ॥ आज्ञां कुरु जगन्नाथ करोमि व्रतमुत्तमम् ॥ ११९ ॥ आवयोरिष्टदेवस्य व्रतानां च परं व्रतम् ॥
हरेराराधनं नाथ सर्वमंगलकारणम् ॥ १२० ॥ इष्टं दत्तं श्रुतेः पाठं तीर्थं पृथ्व्याः प्रदक्षिणम् ॥ हरेराराधनस्यापि
कलां नार्हति षोडशीम् ॥ १२१ ॥ बहिरभ्यंतरे यस्य हरिस्मृतिरनुक्षणम् ॥ जीवन्मुक्तस्य तस्यैव मुक्तिर्भवति दर्शनात् ॥
॥ १२२ ॥ तस्य पादाब्जरजसा सद्यः पूता वसुन्धरा ॥ तस्य दर्शनमात्रेण पुनाति भुवनत्रयम् ॥ १२३ ॥ ब्रह्मा विष्णुश्च धर्मश्च
शेषस्त्वं च गणेश्वरः ॥ ध्यायंध्यायं यत्पदाब्जं तेजसा तत्समो महान् ॥ १२४ ॥ यश्च यं सन्ततं ध्यायेत्स तमाप्नोति निश्चितम् ॥
गुणेन तेजसा बुद्ध्या ज्ञानेन तत्समो भवेत् ॥ १२५ ॥ कृष्णस्य स्मरणाद्ध्यानात्तपसा तस्य सेवया ॥ मया प्राप्तो हि भगवान्
स्वामी वा पुत्र एव च ॥१२६॥ प्रलब्धं लीलया सर्वं पूर्णं मन्मानसं तदा ॥ स्वामी मे त्वादृशः पुत्रौ कार्त्तिकेयगणेश्वरौ ॥१२७॥
पिता हिमाद्रिः कृष्णांशो मम किं दुर्लभं प्रभो ॥ पार्वतीवचनं श्रुत्वा सुप्रीतः शंकरः स्वयम् ॥ प्रहस्योवाच मधुरं पुलकांकि
तविग्रहः॥१२८॥ ॥ श्रीमहादेव उवाच ॥ ॥ महालक्ष्मीस्वरूपासि किमसाध्यं तवेश्वरि ॥ १२९ ॥ सर्वसम्पत्स्वरूपा त्वमनन्तशक्ति
रूपिणी ॥ त्वं च यस्य गृहे देवि स चैश्वर्यस्य भाजनम् ॥१३०॥ न लक्ष्मीर्यद्गृहे तस्य जीवनान्मरणं वरम् ॥ अहं ब्रह्मा च विष्णुश्च
त्वयि भक्त्या शुभप्रदे ॥ १३१ ॥ संहारे सृष्टिकाले च त्वत्प्रसादाद्वयं क्षमाः ॥ को वा हिमालयः कोऽहं कौ कार्त्तिकगणेश्वरौ ॥
॥१३२॥ त्वद्विहीना अशक्ताश्च त्वया च वयमीश्वराः ॥ युक्ताः पतिव्रता याश्च याः पुराज्ञाः श्रुतौ श्रुताः ॥१३३॥ गृहीत्वाऽऽज्ञामीश्वरस्य
व्रतं कुरु पतिव्रते ॥ व्रतमेतत्कृतं याभिस्ताभ्यः कुरु विलक्षणम् ॥ १३४ ॥ सनत्कुमारो भगवान्व्रते तेऽस्तु पुरोहितः ॥ कमलानां
ब्राह्मणानां द्रव्याणां दायकोऽप्यहम्॥ १३५ ॥ कुबेरं द्रव्यकोशे च रक्षकं कुरु सुन्दरि ॥ व्रते च दानाध्यक्षोऽहं धनदात्री च श्रीः

स्वयम् ॥ १३६ ॥ पाठको वह्निदेवश्च वरुणो जलदायकः ॥ वस्तूनां वाहका यक्षास्तदध्यक्षः षडाननः ॥ १३७ ॥ स्थानसंस्कार
कर्ता च व्रतेऽत्र पवनः स्वयम् ॥ परिवेष्टा स्वयं शक्रश्चन्द्रोऽधिष्ठापको व्रते ॥ १३८ ॥ सूर्यश्च दाननिर्वक्ता योग्यायोग्यं यथोचि
तम् ॥ व्रतोपयुक्तं यद्द्रव्यं दत्त्वा नियमितं प्रिये ॥ १३९ ॥ ततोऽधिकं फलं पुष्पं हरये देहि सुन्दरि ॥ व्रते नियमितान्विप्रान्भोज
यित्वा ततोऽधिकान् ॥ १४० ॥ असंख्यान्ब्राह्मणान्देवि भक्त्या कुरु निमन्त्रणम् ॥ समाप्तिदिवसे स्वर्णं रत्नं मुक्तां प्रवालकम्॥ १४१॥
व्रतोक्तां दक्षिणां दत्त्वा सर्वं देहि द्विजातये ॥ इत्युक्त्वा शंकरस्तां च कारयामास तद्व्रतम् ॥ १४२ ॥ व्रतं चकार सा दुर्गा सर्वा
भ्यश्च विलक्षणम् ॥ इत्येवं कथितं विप्र पार्वत्या यद्व्रतं कृतम् ॥ १४३ ॥ रत्नं वोढुमशक्ताश्च ब्राह्मणाः पार्वतीव्रते ॥ इतिहासः श्रुतः
सर्वः प्रकृतं शृणु नारद ॥ १४४ ॥ श्रीकृष्णबालचरितं नूत्नं नूत्नं पदे पदे ॥ हत्वा तान्दानवेन्द्रांश्च शिशुभिः सह गोकुले ॥१४५॥
जगाम स्वगृहं कृष्णः कुबेरभवनोपमम् ॥ सर्वेभ्यो वनवार्तां च प्रोक्ता च शिशुभिर्मुदा ॥ १४६ ॥ श्रुत्वैवं विस्मिताः सर्वे नन्दो भय
मवाप ह ॥ आनीय वृद्धान्गोपांश्च गोपिकाः स्थविरास्तथा ॥ १४७ ॥ युक्तिं चकार तैः सार्द्धमालोच्य समयोचिताम् ॥ कृत्वा युक्तिं
च गोपेशस्तत्स्थानं त्यक्तुमुद्यतः॥१४८॥गन्तुं वृन्दावनं सर्वानुवाच तत्क्षणं मुने॥नन्दाज्ञां च समाकर्ण्य ते सर्वे गन्तुमुद्यताः॥१४९॥
गोपाश्च गोपिकाश्चैव बालका बालिकास्तथा ॥ कृष्णेन हलिना सार्धं प्रययुर्बालका मुदा ॥ १५० ॥ संगीतं च प्रगायन्तो नानावेष
समन्विताः ॥ वेणुप्रवादकाः केचित्केचिच्छृङ्गप्रवादकाः ॥ १५१ ॥ करतालकराः केचिद्वीणाहस्ताश्च केचन ॥ शरयन्त्रकराः केचिच्छृ
ङ्गहस्ताश्च केचन ॥ १५२ ॥ नवपल्लवकर्णाश्च केचिद्गोपालबालकाः ॥ केचिन्मुकुलकर्णाश्च पुष्पकर्णाश्च केचन ॥ १५३ ॥ नवमा
ल्यकराः केचित्केचिदाजानुमालिनः ॥ केचित्पल्लवचूडाश्च पुष्पचूडाश्च केचन ॥ १५४ ॥ गोपालबालकाः सर्वे विप्रेन्द्र नवकोटयः ॥
जग्मुर्गोप्यो वयस्याश्च कोटिशः कोटिशो मुदा ॥ १५५ ॥ वृद्धाश्च कोटिशस्तत्र बृहच्छ्रोण्यश्चलत्कुचाः ॥ राधिकासहचारिण्यो
बाला गोपालिका मुने ॥ १५६ ॥ ताः सुशीलादयो भव्या नानालंकारभूषिताः ॥ दिव्यवस्त्रपरीधानाः सस्मितास्ता ययुर्मुदा ॥१५७॥

काश्चिदारुह्य शिबिकां रथमारुह्य काश्चन ॥ राधा स्यन्दनमारुह्य शातकौम्भपरिच्छदम् ॥ १५८ ॥ ताभिर्युक्ता ययौ देवी रत्नालंकार
भूषिता ॥ यशोदा रोहिणी चैव रत्नालंकारभूषिता ॥ १५९ ॥ ययौ स्यन्दनमारुह्य शातकौम्भपरिच्छदम् ॥ नन्दः सुनन्दः श्रीदामा
गिरिभानुर्विभाकरः ॥ १६० ॥ वीरभानुश्चन्द्रभानुर्गजस्थाः प्रययुर्मुदा ॥ श्रीकृष्णबलदेवौ तौ रत्नालंकारभूषितौ ॥ १६१ ॥ स्वर्ण
स्यन्दनमास्थाय जग्मतुः परया मुदा ॥ कोटिशः कोटिशो गोपा वृद्धाश्च यौवनान्विताः ॥ १६२ ॥ अश्वस्थाश्च गजस्थाश्च रथ
स्थाश्चैव केचन ॥ गोपा ययुर्मुदा युक्ताश्चोद्धता नन्दकिंकराः ॥१६३॥ वृषस्था गर्दभस्थाश्च संगीततानतत्पराः ॥ अपरा राधिकादा
स्यस्त्रिसप्तशतकोटयः ॥ १६४ ॥ मुदान्विताः सस्मिताश्च स्वर्णालंकारभूषिताः ॥ काश्चित्सिन्दूरहस्ताश्च काश्चित्कज्जलवाहिकाः ॥
॥१६५॥ काश्चित्कन्दुकहस्ताश्च काश्चित्पुत्तलिकाकराः ॥ भोगद्रव्यकराः काश्चित्क्रीडाद्रव्यकरा वराः ॥ १६६ ॥ वेषद्रव्यकराः काश्चि
त्काश्चिन्मालाकरा वराः ॥ काश्चिद्वाद्यकहस्ताश्च प्रययुर्गोपिका मुदा ॥१६७॥ वह्निशुद्धांशुकानां च वाहिकाश्चैव काश्चन ॥ चन्दनागु
रुकस्तूरीकुङ्कुमद्रववाहिका ः॥१६८॥ काश्चित्संगीतनिरताः काश्चिच्चित्रकथारताः॥ कोटिशः कोटिशो रम्याः प्रययुः शिबिकान्विताः॥
॥१६९॥ कोटिशः कोटिशश्चाश्वाः कोटिशः कोटिशो रथाः ॥ कोटिशः कोटिशश्चैव शकटा द्रव्यपूरिताः ॥१७०॥ कोटिशः कोटि
शश्चैव वृषेन्द्रा द्रव्यवाहकाः ॥ कोटिशः कोटिशश्चैव दशलक्षाणि हस्तिनाम् ॥१७१॥ हस्तिपांकुशयुक्तानि ययुर्वृन्दावनं वनम् ॥ सर्वे
वृन्दावनं गत्वा दृष्ट्वा शून्यगृहं मुने ॥१७२॥ वृक्षमूले यथास्थानं तस्थुः सर्वे यथोचितम् ॥ उवाच गोपाञ्छ्रीकृष्णो गृहांश्चेष्टतमान्व्र
जाः ॥१७३॥ अद्य संतिष्ठतेत्येवं श्रुत्वा श्रीकृष्णभाषितम् ॥ कुत्र सन्ति गृहाः कृष्णेत्येवमूचुस्तु गोपकाः ॥ इति तेषां वचः श्रुत्वा
श्रीकृष्णो वाक्यमब्रवीत् ॥ १७४ ॥ श्रीकृष्ण उवाच ॥ अत्र स्थाने गृहाः सन्ति प्रसन्ना देवनिर्मिताः ॥ १७५ ॥ देवप्रीतिं विना
शक्ता नहि द्रष्टुं च केचन ॥ अद्य तिष्ठत गोपालाः संपूज्य वनदेवताः ॥ १७६ ॥ प्रातर्यूयं गृहान्रम्यान्द्रक्ष्यथाद्य ध्रुवं मुदा ॥
धूपदीपादिनैवेद्यैर्बलिभिः पुष्पचन्दनैः ॥१७७॥ देवीं च वटमूलस्थां पूजां कुरुत चण्डिकाम् ॥ कृष्णस्य वचनं श्रुत्वा गोपाः संपूज्य

देवताम् ॥ भुक्त्वा भोगान्दिने रात्रौ तत्रैव सुषुपुर्मुदा ॥१७८॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे
बकप्रलम्बकेशिवधपूर्वकवृन्दावनगमनं नाम षोडशोऽध्यायः ॥ १६ ॥छ॥ श्रीनारायण उवाच ॥ सुप्तेषु व्रजनन्देषु नक्तं वृन्दावने वने ॥
सुनिद्रिते च निद्रेशे मातृवक्षःस्थलस्थिते ॥ १ ॥ निद्रितासु च गोपीषु रम्यतल्पास्थितासु च ॥ यूनां च सुखसंयोगानुषक्तमा
नसासु च ॥ २ ॥ कासुचिच्छिशुयुक्तासु सखीयुक्तासु कासुचित् ॥ कासुचिच्छकटस्थासु स्यंदनस्थासु कासुचित् ॥ ३ ॥
पूर्णेन्दुकौमुदीयुक्ते स्वर्गादपि मनोहरे ॥ नानाप्रकारकुसुमवायुना सुरभीकृते ॥ ४ ॥ सर्वप्राणिनि निश्चेष्टे मुहूर्ते पञ्चमे गते ॥ तत्रा
जगाम भगवाञ्छिल्पिनां च गुरोर्गुरुः ॥ ५ ॥ बिभ्रद्दिव्यांशुकं सूक्ष्मं रत्नमाल्यं मनोहरम् ॥ रत्नालङ्कारमतुलं श्रीमन्मकरकु
ण्डलम् ॥ ६ ॥ ज्ञानेन वयसा वृद्धो दर्शनीयः किशोरवत् ॥ अतीव सुन्दरः श्रीमान्कामदेवसमप्रभः ॥ ७ ॥ विशिष्टशिल्पनि
पुणैः सार्द्धं शिल्पित्रिकोटिभिः ॥ मणिरत्नैर्हेमरत्नैर्लौहास्त्रयुतहस्तकैः ॥ ८ ॥ आजग्मुर्यक्षनिकराः कुबेरवनकिंकराः ॥ स्फाटि
कारत्नवेषाश्च दीर्घस्कन्धाश्च केचन ॥ ९ ॥ पद्मरागकरा केचिदिन्द्रनीलकरा वराः ॥ केचित्स्यमन्तककराश्चन्द्रकान्तकरास्तथा
॥ १० ॥ सूर्यकान्तकराश्चान्ये प्रभाकरकरा वराः ॥ केचित्परशुहस्ताश्च लोहसारकरा वराः ॥ ११ ॥ केचिच्च गन्धसाराणां मणी
न्द्राणां च वाहकाः ॥ केचिच्चामरहस्ताश्च केचिद्दर्पणवाहकाः ॥ १२ ॥ स्वर्णपात्रघटादीनो वाहकाश्चैव केचन ॥ विश्वकर्मा च
सामग्रीं दृष्ट्वा तु सुमनोहराम् ॥ १३ ॥ नगरं कर्तुमारेभे ध्यात्वा कृष्णं शुभेक्षणम् ॥ पञ्चयोजनविस्तीर्णं भारते श्रेष्ठमुत्तमम् ॥
॥ १४ ॥ पुण्यक्षेत्रं तीर्थसारमतिप्रियतमं हरेः ॥ तत्रस्थानां मुमुक्षूणां परं निर्वाणकारणम् ॥ १५ ॥ गोलोकस्य च सोपानं
सर्वेषां वाञ्छितप्रदम् ॥ चतुष्कोटिचतुःशालं तत्रैवातिमनोहरम् ॥ १६ ॥ कपाटस्तम्भसोपानसहितैः प्रस्तरैर्वरैः ॥ चित्रपुत्तलि
कापुष्पकलशोज्ज्वलशेखरम् ॥ १७ ॥ शैलजाश्मविनिर्माणवेदिप्रांगणसंयुतम् ॥ शिलाप्राकारसंयुक्तं प्रचकाराथ लीलया ॥ १८ ॥
यथोचितबृहत्क्षुद्रद्वारद्वयसमन्वितम् ॥ स्फाटिकाकारमणिभिर्मुदा युक्तो विनिर्ममे ॥ १९ ॥ सोपानैर्गन्धसाराणां स्तम्भैः शंकुवि

निर्मितैः ॥ कपाटैर्लौहसाराणां राजतैः कलशोज्ज्वलैः ॥ २० ॥ वज्रसारविनिर्माणप्राकारैः परिशोभितम् ॥ कृत्वाऽऽश्रमं बल्लवानां यथास्थानं यथोचितम् ॥ वृषभान्वालयं[1] रम्यं कर्तुमारब्धवान्पुनः ॥ २१ ॥ प्राकारपरिखायुक्तं चतुर्द्वारान्वितं परम् ॥ चारुविंशच्चतुःशालं महामणिविनिर्मितम् ॥ २२ ॥ रत्नसारविकारैश्च तूलिकानिकरैर्वरैः ॥ सुवर्णाकारमणिभिरारोहैरतिसुन्दरैः ॥ २३ ॥ लोहसारकपाटैश्च शोभितं चित्रकृत्रिमैः ॥ मन्दिरेमन्दिरे रम्ये सुवर्णकलशोज्ज्वलम् ॥ २४ ॥ तदाश्रमैकदेशे च निर्जनेऽतिमनोहरे ॥ चारुचम्पकवृक्षाणामुद्यानाभ्यन्तरे मुने ॥ २५ ॥ संभोगार्थं कलावत्याः स्वामिना सह कौतुकात् ॥ विशिष्टेन मणीन्द्रेण चकाराट्टालिकालयम् ॥ २६ ॥ युक्तं नवभिरारोहैरिन्द्रनीलविनिर्मितैः ॥ स्थूणाकपाटनिकरैर्गंधसारविकारजैः ॥ अत्युच्छ्रितं मनोरम्यं सर्वतोऽपि विलक्षणम् ॥ २७ ॥ नारद उवाच ॥ कलावती का भगवन्कस्य पत्नी मनोहरा ॥ यत्नतो यद्गृहं रम्यं निर्ममे सुरकारुणा ॥ २८ ॥ नारायण उवाच ॥ पितॄणां मानसी कन्या कमलांशा कलावती ॥ सुन्दरी वृषभानस्य पतिव्रतपरायणा ॥ यस्याश्च तनया राधा कृष्णप्राणाधिका प्रिया ॥ २९ ॥ श्रीकृष्णार्द्धांशसंभूता तेन तुल्या च तेजसा ॥ यस्याश्च चरणाम्भोजरजःपूता वसुन्धरा ॥ यस्यां च सुदृढां भक्तिं सन्तो वाञ्छंति सन्ततम् ॥ ३० ॥ नारद उवाच ॥ पितॄणां मानसीं कन्यां व्रजे तिष्ठन्कथं मुने ॥ मानवः केन पुण्येन कथमाप सुदुर्लभाम् ॥ ३१ ॥ वृषभानुर्व्रजपतिः पुराऽऽसीत्को महानहो ॥ कस्य वा केन तपसा राधा कन्या बभूव ह ॥ ३२ ॥ सूत उवाच ॥ नारदस्य वचः श्रुत्वा महर्षिर्ज्ञानिनां वरः ॥ प्रहस्योवाच प्रीत्या तमितिहासं पुरातनम् ॥ ३३ ॥ नारायण उवाच ॥ बभूवुः कन्यकास्तिस्रः पितॄणां मानसात्पुरा ॥ ३४ ॥ कलावतीरत्नमालामेनकाश्चातिदुर्लभाः ॥ रत्नमाला च जनकं वरयामास कामुकी ॥३५॥ शैलाधिपं हरेरंशं मेनका सा हिमालयम् ॥ दुहिता रत्नमालाया अयोनिसंभवा सती ॥३६॥ श्रीरामपत्नी श्रीः साक्षात्सीता सत्यपरायणा ॥ कन्यका

---

[1] वृषभानोर्गृहम्–इ०पा० ।

मेनकायाश्च पार्वती सा पुरा सती ॥ ३७ ॥ अयोनिसंभवा सा च हरेर्माया सनातनी ॥ सा लेभे तपसा देवं हरं नारायणात्मकम् ॥ ३८ ॥कलावती सुचन्द्रं च मनुवंशसमुद्भवम् ॥ स च राजा हरेरंशस्तां संप्राप्य कलावतीम् ॥३९॥ मन्ये गुणवतां श्रेष्ठमात्मानमतिसुन्दरम् ॥ अहो रूपमहो वेषमहो अस्या नवं वयः ॥ ४० ॥ सुकोमलाङ्गं ललितं शरच्चन्द्राधिकाननम् ॥ गमनं दुर्लभमहो गजखञ्जनगञ्जनम् ॥४१॥ कटाक्षैर्मोहितुं शक्ता मुनीन्द्राणां च मानसम् ॥ श्रोणीयुग्मं सुललितं रम्भास्तम्भविनिर्मितम् ॥ ४२ ॥ स्तनद्वयं सुकठिनमतिपीनोन्नतं मुने ॥ नितम्बयुगलं चारु रथचक्रविनिर्मितम् ॥ ४३ ॥ हस्तौ पादौ च रक्तौ च पक्वबिम्बफलाधरम्॥ पक्वदाडिमबीजाभं दन्तपङ्क्तिमनोहरम् ॥ ४४ ॥ शरन्मध्याह्नपद्मानां प्रभामोचनलोचनम् ॥ भूषणैर्भूषितं रूपं कृतं सद्रत्नभूषणम् ॥ ॥ ४५ ॥ इतीव मत्वा दृष्ट्वा च कामबाणप्रपीडितः ॥ दिव्यं स्यन्दनमारुह्य कामुक्या सह कामुकः ॥ ४६ ॥ क्रीडां चकार रहसि स्थानेस्थाने मनोहरे ॥ रम्यायां मलयद्रोण्यां चन्दनागुरुवायुना ॥ ४७ ॥ चारुचम्पकपुष्पाणां तल्पे रतिसुखावहे ॥ मालतीमल्लिकानां च पुष्पोद्यानेऽतिपुष्पिते ॥ ४८ ॥ पुष्पभद्रानदीतीरे निर्जने केतकीवने ॥पश्चिमाब्धितटान्तस्थकानने जन्तुवर्जिते ॥ ४९ ॥ नन्दने मन्दरद्रोण्यां कावेरीतीरजे वने ॥ शैलेशैले सुरम्ये च नद्यांनद्यां नदेनदे ॥ ५० ॥ द्वीपेद्वीपे तु रहसि स रेमे वामया सह ॥ नवसंगमसंयोगाद्बुबुधे न दिवानिशम् ॥ ५१ ॥ एवं वर्षसहस्रं तद्गतमेव मुहूर्तवत् ॥ कृत्वा विहारं सुचिरं स विरक्तो बभूव ह ॥५२॥ जगाम तपसे विन्ध्यशैलं तीर्थं तया सह ॥ भारतेऽतिप्रशस्यं च पुलहाश्रममुत्तमम् ॥५३॥ तपस्तेपे नृपस्तत्र दिव्यवर्षसहस्रकम् ॥ मोक्षाकाङ्क्षी निःस्पृहश्च निराहारः कृशोदरः॥५४॥मूर्छामाप मुनिश्रेष्ठ ध्यात्वा कृष्णपदाम्बुजम् ॥ तद्गात्रव्याप्तवल्मीकं साध्वी दूरं चकार सा ॥ ५५ ॥ निश्चेष्टितं पतिं दृष्ट्वा त्यक्तं प्राणैश्च पञ्चभिः ॥ मांसशोणितरिक्तं तमस्थिसंसक्तविग्रहम् ॥ ५६ ॥ उच्चै रुरोद शोकार्ता निर्जने तु कलावती ॥ हे नाथनाथेत्युच्चार्य कृत्वा वक्षसि मूर्छितम् ॥ ५७ ॥ विललाप महादीना पतिव्रतपरायणा ॥ दृष्ट्वा नृपं निराहारं कृशं धमनिसंयुतम् ॥५८॥ श्रुत्वा च रोदनं तस्याः कृपया च कृपानिधिः ॥ आविर्बभूव जगतां विधाता कमलोद्भवः ॥५९॥

क्रोडे कृत्वा च तं तूर्णं रुरोद भगवान्विभुः ॥ ब्रह्मा कमण्डलुजलेनासिच्य नृपविग्रहम् ॥ ६० ॥ जीवं संचारयामास ब्रह्मज्ञाने
न ब्रह्मवित् ॥ नृपेन्द्रश्चेतनां प्राप्य पुरो दृष्ट्वा प्रजापतिम् ॥ ६१ ॥ प्रणनाम च तं दृष्ट्वा तं च कामसमप्रभम् ॥ तमुवाचेति संतुष्टो
वरं वृणु यथेप्सितम् ॥ ६२ ॥ स विधेर्वचनं श्रुत्वा वव्रे निर्वाणमीप्सितम् ॥ दयानिधे त्वं दयया वरं दातुं समुद्यतः ॥ ६३ ॥
प्रसन्नवदनः श्रीमान्स्मेराननसरोरुहः ॥ कृत्वानुमानं मनसि शुष्ककण्ठोष्ठतालुका ॥६४॥ तमुवाच सती त्रस्ता वरं दातुं समुद्यतम् ॥
॥ कलावत्युवाच ॥ यदि मुक्तिं नृपेन्द्राय ददासि कमलोद्भव ॥६५॥ अतोऽबलाया हे ब्रह्मन्का गतिर्भविता वद ॥ विना कान्तं च
कान्तानां का शोभा चतुरानन ॥ ६६ ॥ व्रतं पतिव्रतायाश्च पतिरेव श्रुतौ श्रुतम् ॥ गुरुश्चाभीष्टदेवश्च तपोधर्ममयः पतिः ॥ ६७ ॥
सर्वेषां च प्रियतरो न बन्धुः स्वामिनः परः ॥ सर्वधर्मात्परा ब्रह्मन्पतिसेवा सुदुर्लभा ॥ ६८ ॥ स्वामिसेवाविहीनायाः सर्वं तन्निष्फलं
भवेत् ॥ व्रतं दानं तपः पूजा जपहोमादिकं च यत्॥६९॥ स्नानं च सर्वतीर्थेषु पृथिव्याश्च प्रदक्षिणम् ॥ दीक्षा च सर्वयज्ञेषु महादानानि
यानि च ॥ ७० ॥ पठनं सर्ववेदानां सर्वाणि च तपांसि च ॥ वेदज्ञानां ब्राह्मणानां भोजनं देवसेवनम् ॥७१॥ एतानि स्वामिसेवायाः
कलां नार्हन्ति षोडशीम् ॥ स्वामिसेवाविहीना या वदंति स्वामिने कटुम् ॥७२॥ पतंति कालसूत्रे च यावच्चंद्रदिवाकरौ ॥ सर्पप्रमाणाः
कृमयो दंशंति च दिवानिशम् ॥७३ ॥ संततं विपरीतं च कुर्वंति शब्दमुल्बणम् ॥ मूत्रश्लेष्मपुरीषाणां कुर्वंति भक्षणं मुदा ॥७४॥
मुखे तासां ददत्येवमुल्कां च यमकिंकराः ॥ भुक्त्वा भोगं च नरके कृमियोनिं प्रयांति ताः ॥ ७५ ॥ भक्षंति जन्मशतकं
रक्तमांसपुरीषकम् ॥ श्रुत्वाहं विदुषां वक्त्राद्वेदवाक्येषु निश्चितम् ॥ ७६ ॥ जानामि किंचिदबला त्वं वेदजनको विभुः ॥ गुरोर्गुरु
श्च विदुषां योगिनां ज्ञानिनां तथा ॥७७॥ सर्वज्ञमेवंभूतं त्वां बोधयामि किमच्युत ॥ प्राणाधिकोऽयं कांतोऽयं यदि मुक्तो बभूव ह ॥
॥ ७८ ॥ मम को रक्षिता ब्रह्मन्धर्मस्य यौवनस्य च ॥ कौमारे रक्षिता तातो दत्त्वा पात्राय सत्कृती ॥७९॥ सर्वदा रक्षिता कांतस्तद
भावे च तत्सुतः ॥ त्रिष्ववस्थासु नारीणां त्रातारश्च त्रयः स्मृताः ॥ ८० ॥ याः स्वतंत्राश्च ता नष्टाः सर्वधर्मबहिष्कृताः ॥ असत्कु

लप्रसूतास्ताः कुलटा दुष्टमानसाः ॥ ८१ ॥ शतजन्मकृतं पुण्यं तासां नश्यति पद्मज ॥ पुत्रस्नेहो यथा बाल्ये तथा यूनि च वार्द्धके ॥ ८२ ॥ पतिव्रतानां कान्ते च सर्वकाले समा स्पृहा ॥ सुते स्तनंधये स्नेहो मातृणां चातिशोभिते ॥ ८३ ॥ पतिस्नेहस्य साध्वीनां कलां नार्हति षोडशीम् ॥ स्तनान्धे स्तनदानान्तमिष्टान्ने भोजनावधि ॥ ८४॥ कान्ते चित्तं सतीनां च स्वप्ने ज्ञाने च सन्ततम् ॥ दुःखान्तो बन्धुविच्छेदः पुत्राणां च ततोऽधिकः॥८५॥सुदारुणः स्वामिनश्च दुःखं नातः परं स्त्रियाः॥अविदग्धा यथा दग्धा ज्वलदग्नौ विषादने ॥ ८६ ॥ तथा विदग्धा दग्धा स्याद्विदग्धविरहानले ॥ नान्ने तृष्णा जले तृष्णा साध्वीनां स्वामिनं विना ॥ ८७ ॥ विरहाग्नौ मनो दग्धं वह्नौ शुष्कतृणं यथा॥ न हि कान्तात्परो बन्धुर्न हि कान्तात्परः प्रियः॥८८॥न हि कान्तात्परो देवो न हि कान्तात्परो गुरुः ॥ न हि कान्तात्परो धर्मो न हि कान्तात्परं धनम् ॥ ८९ ॥ न हि कान्तात्परः प्राणा न हि कान्तात्परः स्त्रियाः ॥निमग्नं कृष्णपादाब्जे वैष्णवानां यथा मनः ॥ ९० ॥ यथैकपुत्रे मातुश्च यथा स्त्रीषु च कामिनाम् ॥ धनेषु कृपणानां च चिरकालार्जितेषु च ॥ ९१ ॥ यथा भयेषु भीतानां शास्त्रेषु विदुषां यथा ॥ स्तनादाने शिशूनां च शिल्पेषु शिल्पिनां यथा ॥ ९२ ॥ यथा जारे पुंश्चलीनां साध्वीनां च तथा प्रिये ॥ तं विना जीवितुं ब्रह्मन्क्षणमेकं न च क्षमम् ॥ ९३ ॥ मरणं जीवनं तासां जीवनं मरणाधिकम् ॥ सद्भर्तृरहितानां च शोकेन हतचेतसाम् ॥ अन्यशोकनिमग्नानां कालेन पानभोजनात् ॥ ९४ ॥ विपरीतः कान्तशोको वर्द्धते भक्षणादहो ॥ कर्म च्छाया सतीनां च सङ्गिनीनां सती वरा (?)॥९५॥इतरे भोगदेहान्ते साध्वी जन्मनि जन्मनि ॥ करोषि चेज्जगद्धातरिमं मुक्तं मया विना ॥ ९६ ॥ त्वां शप्त्वाऽहं त्वयि विभो पश्य दास्यामि स्त्रीवधम् ॥ श्रुत्वा कलावतीवाक्यमुवाच विस्मितो विधिः ॥ हितं पीयूषसदृशं भयसंविग्नमानसः ॥ ९७ ॥ ब्रह्मोवाच ॥ ॥ वत्से मुक्तिं न दास्यामि स्वामिनं च त्वया विना ॥ ॥ ९८ ॥ मुक्तं कर्तुं त्वया सार्द्धं साम्प्रतं नाहमीश्वरः ॥ मातर्मुक्तिर्विना भोगाद्दुर्लभा सर्वसंमता ॥ ९९ ॥निर्वाणतां समाप्नोति भोगी भोगविकृन्तने ॥ कविवर्षं स्वर्गभोगं कुरुष्व स्वामिना सह ॥ १०० ॥ ततस्तु युवयोर्जन्म भविता भारते सति ॥ यदा भविष्यति

सती कन्या ते राधिका स्वयम् ॥ १०१ ॥ जीवन्मुक्तौ तया सार्द्धं गोलोकं च गमिष्यथः ॥ कतिकालं नृपश्रेष्ठ भुङ्क्ष्व भोगं स्त्रिया
सह ॥ १०२ ॥ साध्वी वै सत्त्वयुक्ता च मा मां शप्तुं त्वमर्हसि ॥ जीवन्मुक्ताः समाः सन्तः कृष्णपादाब्जमानसाः ॥ १०३ ॥
वाञ्छन्ति हरिदास्यं च दुर्लभं न च निर्वृतिम् ॥ इत्युक्त्वा तौ वरौ दत्त्वा सन्तस्थौ पुरतस्तयोः ॥१०४॥ ययतुस्तौ तं प्रणम्य जगा
म स्वालयं विधिः ॥ आजग्मतुस्तौ कालेन भुक्त्वा भोगं च भारतम् ॥ १०५ ॥ परं पुण्यप्रदं दिव्यं ब्रह्मादीनां च वाञ्छितम् ॥
सुचन्द्रो वृषभानुश्च ललाभ जन्म गोकुले ॥ १०६ ॥ पद्मावत्याश्च जठरे सुरभानस्य रेतसा ॥ जातिस्मरो हरेरंशः शुक्लपक्षे यथा
शशी ॥ १०७ ॥ ववृधेऽनुदिनं तत्र व्रजगेहे व्रजाधिपः ॥ सर्वज्ञश्च महायोगी हरिपादाब्जमानसः ॥ १०८ ॥ नन्दबन्धुर्वदान्यश्च
रूपवान्गुणवान्सुधीः ॥ कलावती कान्यकुब्जे बभूवायोनिसंभवा ॥ १०९ ॥ जातिस्मरा महासाध्वी सुन्दरी कमलाकला ॥ कान्य
कुब्जे नृपश्रेष्ठो भनन्दन उरुक्रमः ॥११०॥ स तां संप्राप्य यागान्ते यज्ञकुण्डसमुत्थिताम् ॥ नग्नां हसन्तीं रूपाढ्यां स्तनान्धामिव
बालिकाम् ॥ १११ ॥ तेजसा प्रज्वलन्तीं च प्रतप्तकनकप्रभाम् ॥ कृत्वा वक्षसि राजेन्द्रः स्वकान्तायै ददौ मुदा ॥ ११२ ॥ माला
वती स्तनं दत्त्वा तां पुपोष प्रहर्षिता ॥ तदन्नप्राशनदिने सतां मध्ये शुभे क्षणे ॥ ११३ ॥ नामरक्षणकाले च वागभूवाशरीरिणी ॥
कलावतीति कन्याया नाम रक्ष नृपेति च ॥ ११४ ॥ इत्येवं वचनं श्रुत्वा तच्चकार महीपतिः ॥ विप्रेभ्यो भिक्षुकेभ्यश्च बन्दिभ्यश्च
धनं ददौ ॥ ११५ ॥ सर्वेभ्यो भोजयामास चकार सुमहोत्सवम् ॥ कालेन सा रूपवती यौवनस्था बभूव ह ॥ ११६॥ अतीव सुन्दर
श्यामा मुनिमानसमोहिनी ॥ चारुचम्पकवर्णाभा शरच्चन्द्रनिभानना ॥ ११७ ॥ ईषद्धास्यप्रसन्नास्या प्रफुल्लपद्मलोचना ॥ नितम्ब
श्रोणिभारार्ता स्तनभारनता सती ॥ ११८ ॥ गच्छन्ती राजमार्गेण गजेन्द्रमन्दगामिनी ॥ ददर्श नन्दः पथि तां गच्छन्तीं च मुदा
न्वितः ॥११९॥ जितेन्द्रियश्च ज्ञानी च मूर्च्छामाप तथाऽपि च ॥ त्रस्तो लोकान्पथि गतांस्तूर्णं पप्रच्छ सादरम्॥१२०॥ गच्छन्ती
कस्य कन्येयमिति होवाच तं जनः ॥ भनन्दनस्य नृपतेः कन्या नाम्ना कलावती ॥ १२१ ॥ कमलाकलया धन्या संभूता नृपम

न्दिरे ॥ कौतुकेन च गच्छन्ती क्रीडार्थं सखिमन्दिरम् ॥ १२२ ॥ व्रजं व्रज व्रजश्रेष्ठेत्युक्त्वा लोको जगाम ह ॥ प्रहृष्टमानसो नन्दो
जगाम राजमन्दिरम् ॥ १२३ ॥ अवरुह्य रथात्तूर्णं विवेश नृपतेः सभाम् ॥ उत्थाय राजा संभाष्य स्वर्णसिंहासनं ददौ ॥ १२४ ॥
इष्टालापं बहुतरं चकार च परस्परम् ॥ विनयावनतो नन्दः सम्बन्धोक्तिं चकार ह ॥ १२५ ॥ नन्द उवाच ॥ शृणु राजेन्द्र वक्ष्यामि
विशेषवचनं शुभम् ॥ संबन्धं कुरु कन्याया विशिष्टेन च साम्प्रतम् ॥ १२६ ॥ सुरभानुसुतः श्रीमान्वृषभानुर्व्रजाधिपः ॥
नारायणांशो गुणवान्सुन्दरश्च सुपण्डितः ॥ १२७ ॥ स्थिरयौवनयुक्तश्च योगी जातिस्मरो युवा ॥ कन्या तेऽयोनिसंभूता यज्ञकुण्डसमुद्भवा
॥ १२८ ॥ त्रैलोक्यमोहिनी शान्ता कमलांशा कलावती ॥ स च योग्यस्त्वद्दुहितुस्तद्योग्या ते च कन्यका ॥ १२९ ॥ विदग्धाया
विदग्धेन संबन्धो गुणवान्नृप ॥ इत्येवमुक्त्वा नन्दस्तु विरराम च संसदि ॥ उवाच तं नृपश्रेष्ठो विनयावनतो मुने ॥
॥ १३० ॥ भनन्दन उवाच ॥ संबन्धो हि विधिवशो न मे साध्यो व्रजाधिप ॥ १३१ ॥ प्रजापतिर्योगकर्ता जन्मदाताऽहमेव
च ॥ का कस्य पत्नी कन्या वा वरः को वा ससाधनः ॥ १३२ ॥ कर्मानुरूपफलदः सर्वेषां कारणं विधिः ॥ भवितव्यं कृतं
कर्म तदमोघं श्रुतौ श्रुतम् ॥ १३३ ॥ अन्यथा निष्फलं सर्वमनीशस्योद्यमो यथा ॥ वृषभानुप्रिया धात्रा लिखिता चेत्सुता मम ॥
॥ १३४ ॥ पुरा भूतैव को वाऽहं केनान्येन निवार्यते ॥ इत्येवमुक्त्वा राजेन्द्रो विनयानतकंधरः ॥ १३५ ॥ मिष्टान्नं भोजयामास
सादरेण च नारद ॥ नृपानुज्ञामुपादाय व्रजराजो व्रजं गतः ॥ १३६ ॥ गत्वा स कथयामास सुरभानस्य संसदि ॥ सुरभानश्च
यत्नेन नन्दनेन च सादरम् ॥ १३७ ॥ संबन्धं योजयामास गर्गद्वारा च सत्वरम् ॥ विवाहकाले राजेन्द्रो विपुलं यौतकं ददौ ॥
॥ १३८ ॥ गजरत्नमश्वरत्नं रत्नानि मणिभूषणम् ॥ वृषभानुर्मुदा युक्तः प्राप्य तां च कलावतीम् ॥ १३९ ॥ रेमे सुनिर्जने रम्ये
बुबुधे न दिवानिशम् ॥ चक्षुर्निमेषविरहाद्व्याकुलां स्वामिना विना ॥ १४० ॥ व्याकुलो वृषभानुश्च क्षणेन च तया विना ॥ जातिस्मरा
च सा कन्या मायामानुषरूपिणी ॥ १४१ ॥ जातिस्मरो हरेरंशो वृषभानो मुदाऽन्वितः ॥ ववृधे च तयोः प्रेम नित्यंनित्यं

नवंनवम् ॥ १४२ ॥ सदा सकामा सा प्रौढा स च कामसमो युवा ॥ तयोः कन्या च कालेन राधिका सा बभूव ह ॥ दैवात्सुदाम
शापेन श्रीकृष्णस्याज्ञया पुरा ॥ १४३ ॥ अयोनिसंभवा सा च कृष्णप्राणाधिका सती ॥ यस्या दर्शनमात्रेण तौ विमुक्तौ बभूवतुः॥
॥ १४४ ॥ इतिहासश्च कथितः प्रकृतं शृणु साम्प्रतम् ॥ पापेन्धनानां दाहे च ज्वलदग्निशिखोपमः ॥१४५॥ वृषभानाश्रमं गत्वा शि
ल्पिनां प्रवरो मुदा ॥ स्थानान्तरं विश्वकर्मा जगाम स्वगणैः सह ॥ १४६ ॥ क्रोशमात्रं स्थलं चारु मनसाऽऽलोच्य तत्त्ववित् ॥
आश्रमं कर्तुमारेभे नन्दस्य सुमहात्मनः ॥ १४७ ॥ कृत्वाऽनुमानं बुद्ध्या च सर्वतोऽपि विलक्षणम् ॥ परिखाभिर्गभीराभिश्चतुर्भिः
संयुतं वरम् ॥ १४८ ॥ दुर्लङ्घ्याभिर्वैरिभिश्च खनिताभिश्च प्रस्तरैः ॥ पुष्पोद्यानैः पुष्पिताभिः पारावारेषु पुष्पितैः ॥ १४९ ॥ चारु
चम्पकवृक्षैश्च पुष्पितैः सुमनोहरैः ॥ परितो वासिताभिश्च सुगन्धिवायुना मुने ॥ १५० ॥ आम्रैर्गुडालैः पनसैः खर्जूरैर्नारिकेलकैः ॥
दाडिमैः श्रीफलैर्भृङ्गैर्जम्बीरैर्नागरङ्गकैः ॥१५१॥ तुङ्गैराम्रातकैर्जम्बुसमूहैश्च फलान्वितैः ॥ कदलीनां केतकीनां कदम्बानां कदम्बकैः ॥
॥ १५२ ॥ सर्वतः शोभिताभिश्च फलैस्तैः पुष्पितैरहो ॥ क्रीडार्हाभिर्निगूढाभिर्वाञ्छिताभिश्च सर्वदा ॥ १५३ ॥ परिखानां रहः
स्थाने चकार मार्गमुत्तमम् ॥ दुर्गमं परवर्गाणां स्वानां च सुगमं सदा ॥ १५४ ॥ संकेतेन मणिस्तम्भैश्छादितैः स्वल्पपाथसा ॥
स्तम्भसीमाकृतमहो न संकीर्णं न विस्तृतम् ॥ १५५ ॥ परिखोपरिभागे च प्राकारं सुमनोहरम् ॥ धनुःशतप्रमाणं च चकारातिस
मुच्छ्रितम् ॥ १५६ ॥ प्रस्तरस्य प्रमाणं च पञ्चविंशतिहस्तकम् ॥ सिन्दूराकारमणिभिर्निर्मितं चातिसुन्दरम् ॥ १५७ ॥ बाह्ये
द्वाभ्यां च संयुक्तमन्तरे सप्तभिस्तथा ॥ द्वार्भिश्च सन्निरुद्धाभिर्मणिसारकपाटकैः ॥१५८॥ हरिन्मणीनां कलशैश्चित्रयुक्तैर्विराजितम् ॥
मणिसारविकारैश्च कपाटैश्च सुशोभितम् ॥ १५९ ॥ स्वर्णसारविनिर्माणकलशोज्ज्वलशेखरम् ॥ नन्दालयं विनिर्माय बभ्राम नगरं
पुनः ॥ १६० ॥ राजमार्गांश्च विविधान्स च चारूंश्चकार ह ॥ रक्तभानुविकारैश्च वेदीभिश्च सुपत्तनैः ॥ १६१ ॥ पारावारे च परितो
निबन्धांश्च मनोहरान् ॥ वाणिज्यार्हैश्च वणिजां परितो मणिमण्डपैः ॥ १६२ ॥ सर्वतो दक्षिणे वामे ज्वलद्भिश्च विराजितान् ॥

ततो वृन्दावनं गत्वा निर्ममे रासमण्डलम्॥१६३॥सुन्दरं मण्डलाकारं मणिप्राकारसंयुतम् ॥ परितो योजनायामं मणिवेदिभिरन्वितम् ॥ १६४ ॥ मणिसारविकारैश्च मण्डपैर्नवकोटिभिः ॥ शृङ्गाराहैश्च चित्राढ्यै रतितल्पसमन्वितैः ॥ १६५ ॥ नानाजातिप्रसूनानां वायुना सुरभीकृतैः ॥ रत्नप्रदीपसंयुक्तैः सुवर्णकलशोज्ज्वलैः ॥ १६६ ॥ पुष्पोद्यानैः पुष्पितैश्च सरोभिश्च सुशोभितम् ॥ रासस्थलं विनिर्माय जगामान्यत्स्थलं पुरः ॥ १६७ ॥ दृष्ट्वा वृन्दावनं रम्यं परितुष्टो बभूव ह ॥ वृन्दावनाभ्यन्तरे च स्थानेस्थाने सुनिर्जने ॥ १६८ ॥ कृत्वा परिमितं बुद्ध्या मनसालोच्य यत्नतः ॥ विलक्षणानि रम्याणि तत्र त्रिंशद्वनानि च ॥ १६९ ॥ राधामाधवयोरेव क्रीडार्थं च विनिर्ममे ॥ ततो मधुवनाभ्याशे निर्जनेऽतिमनोहरे ॥ १७०॥ वटमूलसमीपे च सरसः पश्चिमे तटे ॥ चम्पकोद्यानपूर्वायां केतकीवनमध्यतः ॥१७१॥ पुनस्तयोश्च क्रीडार्थं चकार रत्नमण्डपम् ॥ चतुर्भिर्वेदिकाभिश्च परीतमतिसुन्दरम् ॥१७२॥ सद्रत्नसाररचितै राजितं तूलिकाशतैः ॥ अमूल्यरत्नरचितैर्नानाचित्रेण चित्रितैः॥१७३॥कपाटैर्नवभिर्युक्तं नवद्वारैर्मनोहरैः ॥ रत्नेंद्रचित्रकलशैः कृत्रिमैश्च त्रिकोटिभिः ॥ १७४ ॥ परितः परितो भित्त्यामूर्ध्वं च परिशोभितम् ॥ महामणीन्द्रविकृतैरारोहैर्नवभिर्वृतम् ॥१७५॥ सद्रत्नसाररचितकलशोज्ज्वलशेखरम्।।पताकातोरणैर्युक्तं शोभितं श्वेतचामरैः ॥१७६॥ सर्वतः पुरतो दीप्तममूल्यरत्नदर्पणैः ॥ धनुःप्रमाणशतकमूर्ध्वमग्निशिखोपमम् ॥१७७॥ शतहस्तप्रमाणं च प्रस्तारं वर्तुलाकृतिम् ॥शोभितं रत्नकल्पैश्च तदभ्यन्तरमुत्तमम् ॥१७८॥ वह्निशुद्धांशुकैर्वस्त्रैर्मालाजालविचित्रितैः॥पारिजातप्रसूनानां माल्योपधानसंयुतैः॥१७९॥ चन्दनागुरुकस्तूरीकुङ्कुमैः सुरभीकृतम् ॥ नवशृङ्गारयोग्यैश्च कामवर्द्धनकारिभिः ॥ १८० ॥ मालतीचम्पकानां च पुष्पराजिभिरन्वितम् ॥ सकर्पूरैश्च ताम्बूलैः सद्रत्नपात्रसंस्थितैः ॥ १८१ ॥ वज्रसारेण खचितैर्मुक्ताजालविलम्बिभिः ॥ रत्नसारघटाकीर्णं रत्नपीठैः सुसंयुतम् ॥ १८२ ॥ रत्नसिंहासनैर्युक्तं रत्नचित्रेण चित्रितैः ॥ क्षरितैश्चन्द्रकान्तैश्च सुसिक्तं जलबिन्दुभिः॥१८३॥शीतवासिततोयेन संयुक्तं भोगवस्तुभिः ॥ कृत्वा रतिगृहं रम्यं नगरं च पुनर्ययौ ॥ १८४ ॥ यानि येषां मन्दिराणि तन्नामानि लिलेख सः ॥ मुदा युक्तो विश्वकर्मा शिष्यैर्यक्ष

गणैः सह ॥ १८५ ॥ निद्रेशं निद्रितं नत्वा प्रययौ स्वालयं मुने ॥ सर्वत्रैवं सुकृतिनां समस्तं भगवत्कृपा ॥ १८६ ॥ नेहाश्चर्यं च नगरं बभूवेशेच्छया भुवि ॥ इत्येवं कथितं सर्वं हरेश्चरितमङ्गलम् ॥ सुखदं पातकहरं किं भूयः श्रोतुमिच्छसि ॥ १८७ ॥

॥ नारद उवाच ॥ कथं बृन्दावनं नाम काननस्यास्य भारते ॥ व्युत्पत्तिरस्य संज्ञा वा तत्त्वं वद सुतत्त्ववित् ॥ १८८ ॥

सूत उवाच ॥ नारदस्य वचः श्रुत्वा ऋषिर्नारायणो मुदा ॥ प्रहस्योवाच निखिलं तत्त्वमेव पुरातनम् ॥ १८९ ॥

॥ नारायण उवाच ॥ ॥ पुरा केदारनृपतिः सप्तद्वीपपतिः स्वयम् ॥ १९० ॥ आसीत्सत्ययुगे ब्रह्मन्सत्यधर्मरतः सदा ॥ स रेमे सह नारीभिः पुत्रपौत्रगणैः सह ॥ १९१ ॥ पुत्रानिव प्रजाः सर्वाः पालयामास धार्मिकः ॥ कृत्वा क्रतुशतं राजा लेभे नेन्द्रत्वमीप्सितम् ॥ १९२ ॥ कृत्वा नानाविधं पुण्यं फलकाङ्क्षी न च स्वयम् ॥ नित्यं नैमित्तिकं सर्वं श्रीकृष्णप्रीतिपूर्वकम् ॥ १९३ ॥ केदारतुल्यो राजेन्द्रो न भूतो भविता पुनः ॥ पुत्रेषु राज्यं संन्यस्य प्रियां त्रैलोक्यमोहिनीम् ॥ १९४ ॥ जैगीषव्योपदेशेन जगाम तपसे वनम् ॥ हरेरैकान्तिको भक्तो ध्यायते संततं हरिम् ॥१९५॥ शश्वत्सुदर्शनं चक्रमस्ति यत्सन्निधौ मुने ॥ चिरं तप्त्वा मुनिश्रेष्ठो गोलोकं च जगाम सः ॥१९६॥ केदारं नाम तीर्थं च तन्नाम्ना च बभूव ह ॥ तत्राद्यापि मृतः प्राणी सद्यो मुक्तो भवेद्ध्रुवम् ॥ १९७ ॥ कमलांशा तस्य कन्या नाम्ना वृन्दा तपस्विनी ॥ न वव्रे सा वरं कंचिद्योगशास्त्रविशारदा ॥ १९८ ॥ दत्तो दुर्वाससा तस्यै हरेर्मन्त्रः सुदुर्लभः ॥ सा विरक्ता गृहं त्यक्त्वा जगाम तपसे वनम् ॥ १९९ ॥ षष्टिवर्षसहस्राणि तपस्तेपे सुनिर्जने ॥ आविर्बभूव श्रीकृष्णस्तत्पुरो भक्तवत्सलः ॥ २०० ॥ प्रसन्नवदनः श्रीमान्वरं वृणिवत्युवाच सः ॥ दृष्ट्वा सा राधिकाकान्तं शान्तं सुन्दरविग्रहम् ॥ २०१ ॥ मूर्च्छां संप्राप सा सद्यः कामबाणप्रपीडिता ॥ सा च शीघ्रं वरं वव्रे पतिस्त्वं मे भवेति च ॥ २०२ ॥ ओमित्युक्त्वा च रहसि चिरं रेमे तया सह ॥ सा जगाम च गोलोकं कृष्णेन सह कौतुकात् ॥ २०३ ॥ राधासमा सा सौभाग्याद्गोपीश्रेष्ठा बभूव ह ॥ वृन्दा यत्र तपस्तेपे तत्तु वृन्दावनं स्मृतम् ॥ २०४ ॥ वृन्दयाऽत्र कृता क्रीडा तेन वा मुनि

पुंगव ॥ अथाऽन्यं चेतिहासं च शृणुष्व वत्स पुण्यदम् ॥ २०५ ॥ येन वृन्दावनं नाम निबोध कथयामि ते ॥ कुशध्वजस्य कन्ये द्वे धर्मशास्त्रविशारदे ॥ २०६ ॥ तुलसीवेदवत्यौ च विरक्ते भवकर्मणि ॥ तपस्तप्त्वा वेदवती प्राप नारायणं परम् ॥ २०७ ॥ सीता जनककन्या सा सर्वत्र परकीर्तिता ॥ तुलसी च तपस्तप्त्वा वाञ्छां कृत्वा हरिं प्रति ॥ २०८ ॥ दैवाद्दुर्वाससः शापात्प्राप्य शङ्खासुरं प्रति ॥ पश्चात्संप्राप्य कमलाकान्तं कान्तं मनोहरम् ॥ २०९ ॥ सा चैव हरिशापेन वृक्षरूपा सुरेश्वरी ॥ तस्याः शापेन च हरिः शालग्रामो बभूव ह ॥ २१० ॥ तथा तस्थौ च सततं शिलावक्षसि सुंदरी ॥ विस्तीर्णं कथितं सर्वं तुलसीचरितं च ते ॥ तथाऽपि च प्रसंगेन किंचिदुक्तं मुने पुनः ॥ २११ ॥ तस्याश्च तपसः स्थानं तदिदं च तपोधन ॥ तेन वृन्दावनं नाम प्रवदन्ति मनीषिणः ॥ २१२ ॥ अथ वा ते प्रवक्ष्यामि परं हेत्वन्तरं शृणु ॥ येन वृन्दावनं नाम पुण्यक्षेत्रस्य भारते ॥ २१३ ॥ राधाषोडशनाम्नां च वृन्दानाम श्रुतौ श्रुतम् ॥ तस्याः क्रीडावनं रम्यं तेन वृन्दावनं स्मृतम् ॥ २१४ ॥ गोलोके प्रीतये तस्याः कृष्णेन निर्मितं पुरा ॥ क्रीडार्थं भुवि तन्नाम्ना वनं वृन्दावनं स्मृतम् ॥ २१५ ॥ नारद उवाच ॥ कानि षोडश नामानि राधिकाया जगद्गुरो ॥ तानि मे वद शिष्याय श्रोतुं कौतूहलं मम ॥ २१६ ॥ श्रुतं नाम्नां सहस्रं च सामवेदे निरूपितम् ॥ तथाऽपि श्रोतुमिच्छामि त्वत्तो नामानि षोडश ॥ २१७ ॥ अभ्यंतराणि तेषां वा तदन्यान्येव मे विभो ॥ अहो पुण्यस्वरूपाणि भक्तानां वाञ्छितानि च ॥ २१८ ॥ नामानि तेषां व्युत्पत्तिं सर्वेषां दुर्लभानि च ॥ पावनानि जगन्मातुर्जगतामपि कारणम् ॥ २१९ ॥ श्रीनारायण उवाच ॥ राधा रासेश्वरी रासवासिनी रसिकेश्वरी ॥ कृष्णप्राणाधिका कृष्णप्रिया कृष्णस्वरूपिणी ॥ २२० ॥ कृष्णवामांगसंभूता परमानन्दरूपिणी ॥ कृष्णा वृन्दावनी वृन्दा वृन्दावनविनोदिनी ॥ २२१ ॥ चन्द्रावती चन्द्रकान्ता शतचन्द्रनिभानना ॥ नामान्येतानि साराणि तेषामभ्यन्तराणि च ॥ २२२ ॥ राधेत्येवं च संसिद्धा राकारो दानवाचकः ॥ स्वयं निर्वाणदात्री या सा राधा परिकीर्तिता ॥ २२३ ॥ रासेश्वरस्य पत्नीयं तेन रासेश्वरी स्मृता ॥

रासे च वासो यस्याश्च तेन सा रासवासिनी ॥ २२४ ॥ सर्वासां रसिकानां च देवीनामीश्वरी परा ॥ प्रवदन्ति पुरा सन्त
स्तेन तां रसिकेश्वरीम् ॥ २२५ ॥ प्राणाधिका प्रेयसी सा कृष्णस्य परमात्मनः ॥ कृष्णप्राणाधिका सा च कृष्णेन
परिकीर्तिता ॥२२६॥ कृष्णस्यातिप्रिया कान्ता कृष्णो वाऽस्याः प्रियः सदा ॥ सर्वैर्देवगणैरुक्ता तेन कृष्णप्रिया स्मृता ॥ २२७ ॥
कृष्णरूपं सन्निधातुं या शक्ता चावलीलया ॥ सर्वांशैः कृष्णसदृशी तेन कृष्णस्वरूपिणी ॥ २२८ ॥ वामाङ्गार्धेन
कृष्णस्य या संभूता परा सती ॥ कृष्णवामाङ्गसंभूता तेन कृष्णेन कीर्तिता ॥ २२९ ॥ परमानन्दराशिश्च स्वयं मूर्तिमती सती ॥
श्रुतिभिः कीर्तिता तेन परमानन्दरूपिणी ॥ २३० ॥ कृषिर्मोक्षार्थवचनो न एवोत्कृष्टवाचकः ॥ आकारो दातृवचनस्तेन कृष्णा
प्रकीर्तिता ॥२३१॥ अस्ति वृन्दावनं यस्यास्तेन वृन्दावनी स्मृता ॥ वृन्दावनस्याधिदेवी तेन वाऽथ प्रकीर्तिता ॥२३२॥ संघः सखीनां
वृन्दः स्यादकारोऽप्यस्तिवाचकः ॥ सखिवृन्दोऽस्ति यस्याश्च सा वृन्दा परिकीर्तिता ॥२३३॥ वृन्दावने विनोदश्च सोऽस्या ह्यस्ति च
तत्र वै ॥ वेदा वदन्ति तां तेन वृन्दावनविनोदिनीम्॥२३४॥नखचन्द्रावलीवक्रचन्द्रोऽस्ति यत्र संततम्॥तेन चन्द्रावली सा च कृष्णेन
परिकीर्तिता ॥२३५॥ चन्द्रतुल्या कान्तिरस्ति सदा यस्या दिवानिशम् ॥ सा चन्द्रकान्ता हर्षेण हरिणा परिकीर्तिता ॥ २३६ ॥
शरच्चन्द्रप्रभा यस्याश्चाननेऽस्ति दिवानिशम् ॥मुनिना कीर्तिता तेन शरच्चन्द्रप्रभानना ॥ २३७ ॥ इदं षोडशनामोक्तमर्थव्याख्यानसं
युतम् ॥ नारायणेन यद्दत्तं ब्रह्मणे नाभिपङ्कजे ॥२३८॥ ब्रह्मणा च पुरा दत्तं धर्माय जनकाय मे ॥ धर्मेण कृपया दत्तं मह्य
मादित्यपर्वणि ॥ २३९ ॥ पुष्करे च महातीर्थे पुण्याहे देवसंसदि ॥ राधाप्रभावप्रस्तावे सुप्रसंनेन चेतसा ॥ २४० ॥ इदं स्तोत्रं
महापुण्यं तुभ्यं दत्तं मया मुने ॥ निन्दकायावैष्णवाय न दातव्यं महामुने ॥ २४१ ॥ यावज्जीवमिदं स्तोत्रं त्रिसंध्यं यः पठेन्नरः ॥
राधामाधवयोः पादपद्मे भक्तिर्भवेदिह ॥ २४२ ॥ अन्ते लभेत्तयोर्दास्यं शश्वत्सहचरो भवेत् ॥ अणिमादिकसिद्धिं च संप्राप्य
नित्यविग्रहम् ॥ २४३ ॥ व्रतदानोपवासैश्च सर्वैर्नियमपूर्वकैः ॥ चतुर्णां चैव वेदानां पाठैः सर्वार्थसंयुतैः ॥ २४४ ॥ सर्वेषां यज्ञ

तीर्थानां करणैर्विधिबोधितैः ॥ प्रदक्षिणेन भूमेश्च कृत्स्नाया एव सप्तधा ॥ २४५ ॥ शरणागतरक्षायामज्ञानां ज्ञानदानतः ॥ देवानां
वैष्णवानां च दर्शनेनापि यत्फलम् ॥ २४६ ॥ तदेव स्तोत्रपाठस्य कलां नार्हति षोडशीम् ॥ स्तोत्रस्यास्य प्रभावेण जीवन्मुक्तो
भवेन्नरः ॥ २४७ ॥ नारद उवाच ॥ संप्राप्तं परमाश्चर्यं स्तोत्रं सर्वसुदुर्लभम् ॥ कवचं चापि देव्याश्च संसारविजयं प्रभो ॥
॥ २४८ ॥ कृतं स्तोत्रं सुयज्ञेन प्राप्तं तदपि दुर्लभम् ॥ श्रुत्वा कृष्णकथां चित्रां त्वत्पादाब्जप्रसादतः ॥ २४९ ॥ अधुना श्रोतुमि
च्छामि यद्रहस्यं च तद्वद ॥ प्रातश्च नगरं दृष्ट्वा किमूचुर्बल्लवा मुने ॥ २५० ॥ श्रीनारायण उवाच ॥ गतायां तत्र यामि
न्यां गते च विश्वकर्मणि ॥ अरुणोदयवेलायां जनाः सर्वे जजागरुः ॥ २५१ ॥ उत्थाय दृष्ट्वा नगरं सर्वेभ्योऽपि विलक्षणम् ॥
किमाश्चर्यं किमाश्चर्यमित्यूचुर्व्रजवासिनः ॥ २५२ ॥ कांश्चिद्गोपान्केचिदूचुः कुत एतदभूदिदम् ॥ न जाने केन रूपेण को भूमौ
प्रभवेदिति ॥ २५३ ॥ बुबुधे मनसा नन्दो गर्गवाक्यमनुस्मरन् ॥ श्रीहरेरिच्छया सर्वं जगदेतच्चराचरम् ॥ २५४ ॥ ब्रह्मादितृणपर्य
न्तं यस्य भ्रूभङ्गलीलया ॥ आविर्भूतं तिरोभूतं तस्यासाध्यं च किं कुतः ॥ २५५ ॥ विवरेष्वेव यल्लोम्नां ब्रह्माण्डान्यखिलानि च ॥
ईशस्य तन्महाविष्णोः किमसाध्यं हरेरहो ॥ २५६ ॥ ब्रह्मानन्तेशधर्माश्च ध्यायन्ते यत्पदाम्बुजम् ॥ किमसाध्यं तदीशस्य
मायामानुषरूपिणः ॥ २५७ ॥ भ्रामंभ्रामं तन्नगरं दर्शंदर्शं गृहंगृहम् ॥ पाठंपाठं च नामानि सर्वेभ्यो निलयं ददौ ॥ २५८ ॥ कृत्वा
शुभक्षणं नन्दो वृषभानश्च कौतुकी ॥ चकार सगणैः सार्द्धं मुदाऽऽश्रमनिवेशनम् ॥ २५९ ॥ सर्वे वृन्दावनस्थाश्च प्रसन्नवदनेक्षणाः ॥
मुदा प्रवेशनं चक्रुः स्वंस्वमाश्रममुत्तमम् ॥ २६० ॥ सर्वे मुमुदिरे गोपाः स्वेस्वे स्थाने मनोहरे ॥ बालका बालिकाश्चैव चिक्रीडुश्च
प्रहर्षिताः ॥ २६१ ॥ श्रीकृष्णो बलदेवश्च शिशुभिः सह कौतुकात् ॥ क्रीडां चकार तत्रैव स्थानेस्थाने मनोहरे ॥ २६२ ॥ इत्येवं
कथितं सर्वं निर्माणं नगरस्य च ॥ अबलानां वने रासमण्डलस्य च नारद ॥ २६३ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे नारायणनार
दसंवादे श्रीवृन्दावननगरवर्णनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ शौनक उवाच ॥ अहो किमद्भुतं सूत रहस्यं सुमनोहरम् ॥

श्रुतं कृष्णस्य चरितं सुखदं मोक्षदं परम् ॥ १ ॥ सूत उवाच ॥ श्रुत्वा नगरनिर्माणं नारदो मुनिसत्तमः ॥ पप्रच्छ कृष्ण
चरितमपरं सुमनोहरम् ॥ २ ॥ नारद उवाच ॥ श्रीकृष्णाख्यानचरितं पीयूषमृषिसत्तम ॥ ज्ञानसिंधो निगद मां शिष्यं
च शरणागतम् ॥ ३ ॥ नारदस्य वचः श्रुत्वा मुदा नारायणः स्वयम् ॥ उवाच परमीशस्य चरितं परमाद्भुतम् ॥ ४ ॥ श्रीना
रायण उवाच ॥ एकदा बालकैः सार्धं बलेन सह माधवः ॥ जगाम श्रीमधुवनं यमुनातीरनीरजम् ॥ ५ ॥ विचेरुर्गोसहस्रैश्च
चिक्रीडुर्बालकास्तदा ॥ विश्रान्तास्तृट्परीताश्च क्षुधा च परिपीडिताः ॥ ६ ॥ तमूचुर्गोपशिशवः श्रीकृष्णं परया मुदा ॥ क्षुदस्मान्बा
धते कृष्ण किं कुर्मौ ब्रूहि किंकरान् ॥७॥ शिशूनां वचनं श्रुत्वा तानुवाच दयानिधिः ॥हितं तथ्यं च वचनं प्रसन्नवदनेक्षणः ॥८॥ श्रीकृ
ष्ण उवाच ॥ बाला गच्छत विप्राणां यज्ञस्थानं सुखावहम् ॥ अन्नं याचत ताञ्छीघ्रं ब्राह्मणांश्च क्रतून्मुखान् ॥ ९ ॥ विप्रा आंगि
रसाः सर्वे स्वाश्रमे श्रीवनान्तिके ॥ यज्ञं कुर्वन्ति विप्राश्च श्रुतिस्मृतिविशारदाः ॥१०॥ निःस्पृहा वैष्णवाः सर्वे मां यजन्ति मुमुक्षवः॥
मायया मां न जानन्ति मायामानुषरूपिणम् ॥ ११ ॥ न चेद्ददति युष्मभ्यमन्नं विप्राः क्रतून्मुखाः ॥ तत्कान्ता याचत क्षिप्रं दया
युक्ताः शिशून्प्रति ॥ १२ ॥ श्रीकृष्णवचनं श्रुत्वा ययुर्बालकपुंगवाः ॥ पुरतो ब्राह्मणानां च तस्थुरानम्रकंधराः ॥ १३ ॥ इत्यूचुर्बा
लकाः शीघ्रमन्नं दत्त द्विजोत्तमाः ॥ न शुश्रुवुर्द्विजाः केचित्केचिच्छ्रुत्वा स्थिताः स्थिताः॥१४॥ ते ययू रन्धनागारं ब्राह्मण्यो यत्र पाचि
काः ॥ गत्वा बाला विप्रभार्याः प्रणेमुर्नतकन्धराः ॥ १५ ॥ नत्वोचुर्बालकाः सर्वे विप्रभार्याः पतिव्रताः ॥ अन्नं दत्त मातरोऽस्मा
न्क्षुधार्तान्बालकानपि ॥ १६ ॥ बालानां वचनं श्रुत्वा दृष्ट्वा तांश्च मनोहरान् ॥ पप्रच्छुः सादरं साध्व्यः स्मेराननसरोरुहाः ॥१७॥
विप्रपत्न्य ऊचुः ॥ के यूयं प्रेषिताः केन कानि नामानि कोविदाः ॥ दास्यामोऽन्नं बहुविधं व्यञ्जनैः सहितं वरम् ॥ १८ ॥
ब्राह्मणीनां वचः श्रुत्वा ता ऊचुस्ते मुदाऽन्विताः ॥ स्निग्धा हसन्तः स्फीताश्च सर्वे गोपालबालकाः ॥ १९ ॥ बाला ऊचुः ॥ प्रेषिता
रामकृष्णाभ्यां वयं क्षुत्पीडिता भृशम् ॥ दत्तान्नं मातरोऽस्मभ्यं क्षिप्रं यामस्तदन्तिकम् ॥ २० ॥ इतो विदूरे भाण्डीरे वनाभ्यन्तरमेव

च ॥ वटमूले मधुवने वसन्तौ रामकेशवौ ॥ २१ ॥ विश्रान्तौ क्षुधितौ तौ च याचेतेऽन्नं च मातरः ॥ किमु देयमदेयं वा शीघ्रं वदत
नोऽधुना ॥ २२ ॥ गोपानां वचनं श्रुत्वा हृष्टानन्दाश्रुलोचनाः ॥ पुलकांकितसर्वांगास्तत्पादाब्जमनोरथाः ॥ २३ ॥ नानाव्यञ्जन
संयुक्तं शाल्यन्नं सुमनोहरम्॥पायसं पिष्टकं स्वादु दधि क्षीरं घृतं मधु ॥ २४ ॥ रौप्ये कांस्ये राजते च पात्रे कृत्वा मुदाऽन्विताः ॥
ताः सर्वा विप्रपत्न्यश्च प्रययुः कृष्णसन्निधिम् ॥ २५ ॥ नानामनोरथं कृत्वा मनसा गमनोत्सुकाः ॥ पतिव्रतास्ता धन्याश्च श्रीकृ
ष्णदर्शनोत्सुकाः ॥ २६ ॥ श्रीकृष्णं ददृशुर्गत्वा रामं च सहबालकम् ॥ वटमूले वसन्तं तमुडुमध्ये यथोडुपम् ॥ २७ ॥ श्यामं
किशोरवयसं पीतकौशेयवाससम् ॥ सुन्दरं सस्मितं शान्तं राधाकान्तं मनोहरम् ॥२८॥ शरत्पार्वणचन्द्रास्यं रत्नालंकारभूषितम् ॥
रत्नकुण्डलयुग्माभ्यां गण्डस्थलविराजितम् ॥ २९ ॥ रत्नकेयूरवलयरत्ननूपुरभूषितम् ॥ आजानुलम्बितां शुभ्रां बिभ्रतं रत्नमालि
काम् ॥ ३० ॥ मालतीमालया कण्ठवक्षःस्थलविराजितम्॥चन्दनागुरुकस्तूरीकुङ्कुमाञ्चितविग्रहम् ॥३१ ॥ सुनखं सुकपोलं च पक्व
बिम्बाधरं वरम् ॥ पक्वदाडिमबीजाभं बिभ्रतं दन्तमुत्तमम् ॥ ३२ ॥ शिखिपिच्छसमायुक्तं बद्धचूडं परात्परम्॥कदम्बपुष्पयुग्माभ्यां
कर्णमूले विराजितम् ॥ ३३ ॥ ध्यानासाध्यं योगिनां च भक्तानुग्रहकातरम्॥ ब्रह्मेशधर्मशेषेन्द्रैः स्तूयमानं मुनीश्वरैः ॥ ३४ ॥ दृष्ट्वैव
मीश्वरं भक्त्या प्रणेमुर्द्विजयोषितः ॥ स्वानां ज्ञानानुरूपं च तुष्टुवुर्मधुसूदनम् ॥ ३५ ॥ विप्रपत्न्य ऊचुः ॥ त्वं ब्रह्म परमं धाम निरी
हो निरहंकृतिः ॥ निर्गुणश्च निराकारः साकारः सगुणः स्वयम् ॥३६॥ साक्षिरूपश्च निर्लिप्तः परमात्मा निराकृतिः ॥ प्रकृतिः पुरुष
स्त्वं च कारणं च तयोः परम् ॥ ३७॥ सृष्टिस्थित्यन्तविषये ये च देवास्त्रयः स्मृताः ॥ ते त्वदंशाः सर्वबीजा ब्रह्मविष्णुमहेश्वराः ॥
॥ ३८ ॥ यस्य लोम्नां च विवरे चाखिलं विश्वमीश्वर॥महाविराण्महाविष्णुस्त्वं तस्य जनको विभो ॥ ३९ ॥ तेजस्त्वं चापि तेज
स्वी ज्ञानं ज्ञानी च तत्परः ॥ वेदेऽनिर्वचनीयस्त्वं कस्त्वां स्तोतुमिहेश्वरः ॥ ४० ॥ महदादिसृष्टिसूत्रं पञ्चतन्मात्रमेव च ॥ बीजं
त्वं सर्वशक्तीनां सर्वशक्तिस्वरूपकः ॥ ४१ ॥ सर्वशक्तीश्वरः सर्वः सर्वशक्त्याश्रयः सदा ॥ त्वमनीहः स्वयंज्योतिः सर्वानन्दः सना

तनः ॥ ४२ ॥ अहोऽप्याकारहीनस्त्वं सर्वविग्रहवानपि॥ सर्वेंद्रियाणां विषयं जानासि नेन्द्रियी भवान् ॥ ४३ ॥ सरस्वती जडीभूता
यत्स्तोत्रे यन्निरूपणे॥जडीभूतो महेशश्च शेषो धर्मो विधिः स्वयम् ॥ ४४ ॥ पार्वती कमला राधा सावित्री वेदसूरपि ॥ वेदश्च जडतां
याति के वा शक्ता विपश्चितः ॥ ४५ ॥ वयं किं स्तवनं कुर्मः स्त्रियः प्राणेश्वरेश्वर ॥ प्रसन्नो भव नो देव दीनबन्धो कृपां कुरु॥
॥ ४६ ॥ इति पेतुश्च ता विप्रपत्न्यस्तच्चरणाम्बुजे ॥ अभयं प्रददौ ताभ्यः प्रसन्नवदनेक्षणः ॥४७॥ विप्रपत्नीकृतं स्तोत्रं पूजाकाले
च यः पठेत् ॥ स गतिं विप्रपत्नीनां लभते नात्र संशयः ॥ ४८ ॥ नारायण उवाच ॥ ताः पदाम्भोजपतिता दृष्ट्वा श्रीमधुसूदनः ॥
वरं वृणुत कल्याणं भविता चेत्युवाच ह ॥ ४९ ॥ श्रीकृष्णस्य वचः श्रुत्वा विप्रपत्न्यो मुदाऽन्विताः॥तमूचुर्वचनं भक्त्या भक्तिनम्रात्मकन्धराः
॥५०॥ द्विजपत्न्य ऊचुः ॥ वरं कृष्ण न गृह्णीमो नः स्पृहा त्वत्पदाम्बुजे ॥ देहि स्वं दास्यमस्मभ्यं दृढां भक्तिं सुदुर्लभाम्
॥ ५१ ॥ पश्यामोऽनुक्षणं वक्त्रसरोजं तव केशव ॥ अनुग्रहं कुरु विभो न यास्यामो गृहं पुनः ॥ ५२ ॥ द्विजपत्नीवचः श्रुत्वा
श्रीकृष्णः करुणानिधिः ॥ ओमित्युक्त्वा त्रिलोकेशस्तस्थौ बालकसंसदि॥ ५३ ॥ प्रदत्तं विप्रपत्नीभिर्मिष्टमन्नं सुधोपमम् ॥ बालकान्
भोजयित्वा तु स्वयं च बुभुजे विभुः॥५४॥एतस्मिन्नन्तरे तत्र शातकुम्भं रथं परम् ॥ ददृशुर्विप्रपत्न्यश्च पतन्तं गगनादहो ॥५५॥
रत्नदर्पणसंयुक्तं रत्नसारपरिच्छदम् ॥ रत्नस्तम्भैर्निबद्धं च सद्रत्नकलशोज्ज्वलम् ॥५६॥ श्वेतचामरसंयुक्तं वह्निशुद्धांशुकान्वितम् ॥
पारिजातप्रसूनानां मालाजालैर्विराजितम्॥५७॥शतचक्रसमायुक्तं मनोयायि मनोहरम्॥वेष्टितं पार्षदैर्दिव्यैर्वनमालाविभूषितैः॥५८ ॥
पीतवस्त्रपरीधानै रत्नालंकारभूषितैः ॥ नवयौवनसंपन्नैः श्यामलैः सुमनोहरैः ॥ ५९ ॥ द्विभुजैर्मुरलीहस्तैर्गोपवेषधरैर्वरैः ॥ शिखिपिच्छ
गुञ्जमालाबद्धवक्रिमचूडकैः ॥ ६० ॥ अवरुह्य रथात्तूर्णं ते प्रणम्य हरेः पदम् ॥ रथं[1]मारोहणं कर्तुमूचुर्ब्राह्मणकामिनीः ॥ ६१ ॥
विप्रभार्या हरिं नत्वा जग्मुर्गोलोकमीप्सितम् ॥ बभूवुर्गोपिकाः सद्यस्त्यक्त्वा मानुषविग्रहान् ॥ ६२॥ हरिश्छायां विनिर्माय तासां

---

[1] रथस्यारोहणम् —इ० पा० ।

च विष्णुमायया ॥ प्रस्थापयामास गृहान्ब्राह्मणानां स्वयं विभुः ॥ ६३ ॥ विप्राश्च भार्या उद्दिश्य परमोद्विग्नमानसाः ॥ अन्वेषणं प्रकुर्वन्तो ददृशुः पथि कामिनीः ॥ ६४ ॥ दृष्ट्वोचुर्ब्राह्मणाः सर्वे तास्ते च विनयान्विताः ॥ पुलकाङ्कितसर्वाङ्गाः प्रसन्नवदनेक्षणाः ॥ ॥ ६५ ॥ ब्राह्मणा ऊचुः ॥ अहोऽतिधन्या यूयं च दृष्टो युष्माभिरीश्वरः ॥ अस्माकं जीवनं व्यर्थं वेदपाठोऽप्यनर्थकः ॥ ६६ ॥ वेदे पुराणे सर्वत्र विद्वद्भिः परिकीर्तिताः ॥ हरेर्विभूतयः सर्वाः सर्वेषां जनको हरिः ॥ ६७ ॥ तपो जपो व्रतं ज्ञानं वेदाध्ययनमर्चनम् ॥ तीर्थस्नानमनशनं सर्वेषां फलदो हरिः ॥ ६८ ॥ श्रीकृष्णः सेवितो येन किं तस्य तपसां फलैः ॥ प्राप्तः कल्पतरुर्येन किं तस्यान्येन शाखिना ॥ ६९ ॥ श्रीकृष्णो हृदये यस्य तस्य किं कर्मभिः कृतैः ॥ किं वा न सागरस्यैव पौरुषं कूपलङ्घने॥ ॥७०॥ इत्येवमुक्त्वा विप्राश्च गृहीत्वा कामिनीवराः ॥ आजग्मुः स्वगृहं हृष्टास्ताभिः सार्धं च रेमिरे ॥७१॥ तासां ततोऽधिकं प्रेम क्रीडासु सर्वकर्मसु ॥ दाक्षिण्यं मायया शक्त्या ब्राह्मणानामतर्कितम् ॥७२॥ अथ नारायणः सोऽयं बलेन शिशुभिः सह ॥ जगाम स्वालयं तूर्णं पूर्णब्रह्म सनातनः ॥७३॥ इत्येवं कथितं सर्वं हरेर्माहात्म्यमुत्तमम् ॥ पुरा श्रुतं धर्मवक्त्रात्किं भूयः श्रोतुमिच्छसि ॥ ॥ ७४ ॥ नारद उवाच ॥ ऋषीन्द्र केन पुण्येन बभूव विप्रयोषिताम् ॥ मुनीन्द्रयोगसिद्धानां दुर्लभा गतिरीश्वरी ॥ ७५ ॥ इमाः का वा पुण्यवत्यः पुरा तस्थुर्महीतलम् ॥ आजग्मुः केन दोषेण वद संदेहभञ्जनम् ॥ ७६ ॥ ॥ श्रीनारायण उवाच ॥ सप्तर्षीणां रमण्यश्च रूपेणाप्रतिमाः पराः ॥ गुणवत्यः सुशीलाश्च धर्मिष्ठाश्च पतिव्रताः ॥ ७७ ॥ नवीनयौवनाः सर्वाः पीनश्रोणिपयोधराः ॥ दिव्यवस्त्रपरीधाना रत्नालंकारभूषिताः ॥ ७८ ॥ तप्तकाञ्चनवर्णाभाः स्मेराननसरोरुहाः ॥ मुनीनां मोहितुं शक्ता मानसं वक्रचक्षुषा ॥ ७९ ॥ दृष्ट्वा तासां स्तनश्रोणिमुखानि सुन्दराणि च ॥ अनलश्चकमे ताश्च मदनानलपीडितः ॥ ८० ॥ अग्निस्थानस्थितानां च शिखया सुरतोन्मुखः ॥ स्पृष्ट्वा चाङ्गानि तासां च बभूव हतचेतनः ॥ ८१ ॥ पतिव्रता न जानन्ति पतिपादाब्जमानसाः ॥ अग्निरङ्गानि तासां च दर्शंदर्शं मुमोह च ॥ ८२ ॥ वह्नेश्च मानसं ज्ञात्वा भगवानङ्गिरा मुनिः ॥ शशाप तं चेत्यु

वाच सर्वभक्षो भवेति ह ॥ ८३ ॥ वह्निः सचेतनो भूत्वा तुष्टाव मुनिपुंगवम् ॥ व्रीडया नम्रवदनश्चकम्पे ब्रह्मतेजसा ॥ ८४ ॥ क्रुद्धो मुनिवरः स्पृष्टाः कामिन्यश्च शशाप ह ॥ यात यूयं पापयुक्ता मानुषीं योनिमेव च ॥ ८५ ॥ भारते ब्राह्मणानां च गृहे लभत जन्म वै ॥ करिष्यन्ति विवाहं च युष्माकं कुलजा द्विजाः ॥ ८६ ॥ श्रुत्वा वाक्यं मुनेस्ताश्च रुरुदुः प्रेमविह्वलाः ॥ पुटाञ्जलियुताः सर्वा ऊचुस्तं विदुषां वरम् ॥ ८७ ॥ मुनिपत्न्य ऊचुः ॥ न त्यजास्मान्मुनिश्रेष्ठ निष्पापाश्च पतिव्रताः ॥ अजानन्त्यः परस्पृष्टा न च नस्त्यक्तुमर्हसि ॥ ८८ ॥ भक्तानां किंकरीणां च न दण्डं कर्तुमर्हसि ॥ युष्माकं चरणाम्भोजं कदा द्रक्ष्यामहे वयम् ॥ ॥ ८९ ॥ खड्गच्छेदाद्वज्रपातात्सर्वप्रहरणान्मुने ॥ दारुणः कान्तविच्छेदः साध्वीनां दुःसहः सदा ॥ ९० ॥ ब्रह्मिष्ठानां गुणवतां परान्कान्तान्महामुनीन् ॥ एवंभूतान्कथं त्यक्त्वा यास्यामः पृथिवीतलम् ॥ ९१ ॥ यास्यामो यदि विप्रेश कदाऽत्रागमनं वद ॥ अज्ञानस्पर्शदोषश्च न स्यान्नो विधिबोधितः ॥ ९२ ॥ अहल्यया पुनः प्राप्तः स्वामीन्द्रस्य प्रधर्षणात् ॥ सा संभोगात्पुनः शुद्धा स्पर्शनाद्वर्जिता वयम् ॥ ९३ ॥ विचारं कुरु धर्मिष्ठ वेदवेदाङ्गपारग ॥ विश्वकर्तुश्च पुत्रस्त्वं सर्ववेदविदां वर ॥ ९४ ॥ अन्येषां च भयात्कान्ता व्रजन्ति शरणं पतिम् ॥ स्वकान्तभयसंविग्नाः शरणं कं व्रजन्ति ताः ॥ ९५ ॥ अभयं देहि धर्मिष्ठ भययुक्ताभ्य एव च ॥ पुत्रे शिष्ये कलत्रे च को दण्डं कर्तुमक्षमः ॥ ९६ ॥ दुर्बलः सबलो वापि स्ववस्तूनामपीश्वरः ॥ स्वद्रव्यविक्रयं कर्तुं न चान्यो रक्षितुं क्षमः ॥ ९७ ॥ कामिनीनां वचः श्रुत्वा दयालुर्मुनिपुंगवः ॥ प्रेम्णा रुरोद तासां च निरीक्ष्य मुखपङ्कजम् ॥ ९८ ॥ वेदवेदाङ्गपारज्ञो ज्ञानिनां योगिनां वरः ॥ पत्नीविच्छेदविषये मूर्च्छां प्राप तथापि सः ॥ ९९ ॥ सर्वे बभूवुः शोकार्ता विरहोद्विग्नमानसाः ॥ निरीक्ष्य तासां वक्त्राणि तस्थुः पुत्तलिका यथा ॥ ॥ १०० ॥ कृत्वा विलापं सुचिरं सर्ववेदविदां वरः ॥ भ्रातृभिश्च सहालोच्य ता उवाच शुचाऽऽतुरः ॥ १०१ ॥ अङ्गिरा उवाच ॥ यूयं शृणुत वक्ष्यामि वचनं सत्यमेव च ॥ स्वकर्मभोगिनां भोगमाकर्मांच्च श्रुतौ श्रुतम् ॥ १०२ ॥ गतो भोगश्च युष्माकमस्माभिः सह निश्चितम् ॥ गते भोगे पुनर्भोगो न हि वेदे निरूपितः ॥ १०३ ॥ शुभाशुभं च यत्कर्म भारते कृतिभिः सह ॥ नाभुक्तं क्षीयते कर्म

जन्मकोटिशतैरपि ॥ १०४ ॥ परभुक्तां च कान्तां च यो भुङ्क्ते स नराधमः ॥ स पच्यते कालसूत्रे यावच्चन्द्रदिवाकरौ ॥ १०५ ॥
न सा दैवे न सा पैत्र्ये पाकार्हा पापसंयुता ॥ तस्या आलिंगने भर्ता भ्रष्टश्रीस्तेजसा हतः ॥ १०६ ॥ देवताः पितरस्तस्य हव्य
दाने च तर्पणे ॥ सुखिनो न भवन्त्येवमित्याह कमलोद्भवः ॥ १०७ ॥ तस्माद्यत्नेन भार्याया रक्षणं कुरुते सुधीः ॥ अन्यथा
पापभाग्भर्ता निश्चितं नरकं व्रजेत् ॥ १०८॥ पदेपदे सावधानः कान्तां रक्षति पण्डितः ॥ न व्रती न स्थली योषा दोषाणां च
करण्डिका ॥ १०९ ॥ कलत्रं पाकपात्रं च सदा रक्षितुमर्हति ॥ परस्पर्शादशुद्धां च शुद्धां स्वस्पर्शने सदा ॥ ११० ॥ स्वकान्तं च
परित्यज्य परं गच्छति याऽधमा ॥ कुम्भीपाकं सा प्रयाति यावच्चन्द्रदिवाकरौ ॥ १११ ॥ तामेव यमदूताश्च संस्थाप्य नरकान्तरे ॥
उत्तिष्ठति विदूराच्चेत्कुर्वन्ति दण्डताडनाम् ॥ ११२ ॥ सर्पप्रमाणाः कीटाश्च तीक्ष्णदंष्ट्राः सुदारुणाः ॥ दशन्ति पुंश्चलीं तत्र सततं च
दिवानिशम् ॥ ११३ ॥ विकृताकारशब्दं च करोति शाश्वतं भिया ॥ न ममार प्रहारेण सूक्ष्मदेहविधारिणी ॥ ११४ ॥ मुहू
र्तार्धं सुखं भुक्त्वा लोकेऽत्र यशसा हता ॥ पतिता परलोके च गतिमेतादृशीं लभेत् ॥ ११५ ॥ परस्पृष्टा च वै नारी या स्पृहां
कुरुते परम् ॥ साऽपि दुष्टा परित्याज्या चेत्याह कमलोद्भवः ॥ ११६ ॥ तस्मान्नारी परैर्यत्नाददृष्टा कृतिभिः कृता ॥ असूर्यंपश्या
या दाराः शुद्धास्ताश्च पतिव्रताः ॥ ११७ ॥ स्वच्छन्दगामिनी या च स्वतन्त्रा सूकरीसमा ॥ अन्तर्दुष्टा सदा सैव निश्चितं परगामिनी
॥ ११८ ॥ स्वामिसाध्या च या नारी कुलधर्मभिया स्थिता ॥ कान्तेन सार्द्धं सा कान्ता वैकुण्ठं याति निश्चितम् ॥ ११९ ॥ यात
यूयं च पृथिवीं मानुषीं योनिमीप्सिताम् ॥ कृष्णदर्शनमात्रेण गोलोकं यास्यथ ध्रुवम् ॥१२०॥ हरिणा निर्मिताश्छाया युष्माकं
योगमायया ॥ ता विप्रमन्दिरे स्थित्वा चागमिष्यन्ति नो ध्रुवम् ॥१२१॥ पुनरंशेन नः पत्न्यो भविष्यथ न संशयः ॥ युष्माकं
मम शापश्च बभूव च वराधिकः ॥ १२२ ॥ इत्येवमुक्त्वा स मुनिर्विरराम शुचाऽन्वितः ॥ ता आगत्य महीं शापाद्भूवुर्विप्रयो
पितः ॥ १२३ ॥ दत्त्वाऽन्नं हरये भक्त्या प्रजग्मुर्हरिमन्दिरम् ॥ बभूव निश्चितं तासां शापश्च संपदोऽधिकः ॥ १२४ ॥ निन्द्या नीचा

च्च संपत्तिर्विपत्तिर्महतो वरा ॥ अहो सद्यः सतां कोपश्चोपकाराय कल्पते ॥ १२५ ॥ विना विपत्तेर्महिमा कुतः कस्य भवेद्भुवि ॥
भूताः कान्तपरित्यागान्मुक्ता ब्राह्मणयोषितः ॥ १२६ ॥ इत्येवं कथितं सर्वं हरेश्चरितमुत्तमम् ॥ अहो पुण्यवतीनां च मोक्षाख्यानं
मनोहरम् ॥ १२७ ॥ श्रीकृष्णाख्यानं विप्रेन्द्र नूत्नं नूत्नं पदेपदे ॥ न हि तृप्तिः श्रुतवतां केन श्रेयसि तृप्यते ॥ १२८ ॥ यावद्रम्यं
तत्कथितं यच्छ्रुतं गुरुवक्त्रतः ॥ वद मां वाञ्छितं यत्ते किं भूयः श्रोतुमिच्छसि ॥ १२९ ॥ नारद उवाच ॥ यद्यच्छ्रुतं
त्वया पूर्वं गुरुवक्त्रात्कृपानिधे ॥ मङ्गलं कृष्णचरितं तन्मे ब्रूहि जगद्गुरो ॥ १३० ॥ सूत उवाच ॥ श्रुत्वा देवर्षिवचनमृषिर्नारायणः
स्वयम् ॥ अपरं कृष्णमाहात्म्यं प्रवक्तुमुपचक्रमे ॥ १३१ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे विप्रपत्नीमोक्षणप्रस्तावो
नामाष्टादशोऽध्यायः ॥ ॥ १८ ॥ श्रीनारायण उवाच ॥ एकदा बालकैः सार्धं बलदेवं विना हरिः ॥ जगाम
यमुनातीरं यत्र कालियमन्दिरम् ॥ १ ॥ परिपक्वफलं भुक्त्वा यमुनातीरजे वने ॥ स्वेच्छामयस्तृट्परीतः पपौ च निर्मलं जलम्
॥ २ ॥ गोकुलं चारयामास शिशुभिः सह कानने ॥ विजहार च तैः सार्द्धं स्थापयामास गोकुलम् ॥ ३ ॥ क्रीडानिमग्नचित्तोऽयं
बालकाश्च मुदाऽन्विताः ॥ भुक्त्वा नवतृणं गवो विषतोयं पपुर्मुने ॥ ४ ॥ विषाक्तं च जलं पीत्वा दारुणान्तकचेष्टया ॥ ज्वालाभिः
कालकूटानां सद्यः प्राणांश्च तत्यजुः ॥५॥ दृष्ट्वा मृतं गोसमूहं गोपाश्चिन्ताकुला भिया ॥ विषण्णवदनाः सर्वे तमूचुर्मधुसूदनम् ॥ ६ ॥
ज्ञात्वा सर्वं जगन्नाथो जीवयामास गोकुलम् ॥ उत्तस्थुस्तत्क्षणं गावो ददृशुः श्रीहरेर्मुखम् ॥७॥ कृष्णः कदम्बमारुह्य यमुनानीरतीरजम्
॥ पपात सर्पभवने नागमध्ये नराकृतिः ॥ ८ ॥ शतंहस्तप्रमाणं च जलोत्थानं बभूव ह ॥ बाला हर्षं विषादं च मेनिरे तत्र
नारद ॥ ९ ॥ सर्पो नराकृतिं दृष्ट्वा कालियः क्रोधविह्वलः ॥ जग्राह श्रीहरिं तूर्णं तप्तलोहं यथा नरः ॥ १० ॥ दग्धकण्ठोदरो नागश्चोद्विग्नो
ब्रह्मतेजसा ॥ प्राणा यान्त्येवमुक्त्वा च चकारोद्वमनं पुनः ॥ ११ ॥ भग्नदन्तो रक्तमुखः कृष्णवज्राङ्गचर्वणात् ॥ रक्तवक्त्रस्य
भगवानुत्तस्थौ मस्तकोपरि ॥१२॥ नागो विश्वंभराक्रान्तः स प्राणांस्त्यक्तुमुद्यतः ॥ चकार रक्तोद्वमनं पपात मूर्च्छितो मुने ॥ १३ ॥

दृष्ट्वा तं मूर्छितं नागा रुरुदुः प्रेमविह्वलाः ॥ १४ ॥ केचित्पलायिता भीताः केचित्प्रविविशुर्बिलम् ॥ मरणाभिमुखं कान्तं दृष्ट्वा
सा सुरसा सती ॥१५॥ नागिनीभिः सह प्रेम्णा रुरोद पुरतो हरेः ॥ पुटाञ्जलियुता तूर्णं प्रणम्य श्रीहरिं भिया ॥ धृत्वा पादारविन्दे
च तमुवाच भियाऽऽकुला ॥ १६ ॥ सुरसोवाच ॥ ॥ हे जगत्कान्त मे कान्तं देहि मानं च मानद ॥ पतिः प्राणाधिकः स्त्रीणां
नास्ति बन्धुश्च तत्परः ॥ १७ ॥ सकलभुवननाथ प्राणनाथं मदीयं न कुरु वधमनन्त प्रेमसिन्धो सुबन्धो ॥ अखिलभुवनबन्धो
राधिकाप्रेमसिन्धो पतिमिह कुरु दानं मे विधातुर्विधातः ॥ १८ ॥ त्रिनयनविधिशेषाः षण्मुखश्चास्यसंघैः स्तवनविषयजाड्यात्स्तोतुमीशा
न वाणी ॥ खलु निखिलवेदाः स्तोतुमन्येऽपि देवाः स्तवनविषयशक्ताः सन्ति सन्तस्तवैव ॥ १९ ॥ कुमतिरहमधिज्ञा योषितां
काधमा वा क्व भुवनगतिरीशश्चक्षुषोऽगोचराऽपि ॥ विधिहरिहरशेषैः स्तूयमानश्च यस्त्वमतनुमनुजमीशं स्तोतुमिच्छामि तं त्वाम् ॥
॥ २० ॥ स्तवनविषयभीता पार्वती कस्य पद्मा श्रुतिगणजनयित्री स्तोतुमीशा न यं त्वाम् ॥ कलिकलुषनिमग्ना वेदवेदाङ्गशास्त्रश्रवणविषयमूढा
स्तोतुमिच्छामि किं त्वाम्॥२१॥शयानो रत्नपर्यङ्के रत्नभूषणभूषितः ॥ रत्नभूषणभूषाङ्गो राधावक्षसि संस्थितः॥
॥ २२ ॥ चन्दनोक्षितसर्वाङ्गः स्मेराननसरोरुहः ॥ प्रोद्यत्प्रेमरसाम्भोधौ निमग्नः सततं सुखात् ॥ २३ ॥ मल्लिकामालतीमालाजालैः
शोभितशेखरः ॥ पारिजातप्रसूनानां गन्धामोदितमानसः ॥ २४ ॥ पुंस्कोकिलकलध्वानैर्भ्रमरध्वनिसंयुतैः ॥ कुसुमेषुविकारेण पुलकाङ्कितविग्रहः
॥२५॥ प्रियाप्रदत्तताम्बूलं भुक्तवान्यः सदा मुदा ॥ वेदा अशक्ता यं स्तोतुं जडीभूता विचक्षणाः ॥ २६ ॥ तमनिर्वचनीयं
च किं स्तौमि नागवल्लभा ॥ वन्देऽहं त्वत्पदाम्भोजं ब्रह्मेशशेषसेवितम् ॥२७॥ लक्ष्मीसरस्वतीदुर्गाजाह्नवीवेदमातृभिः ॥ सेवितं
सिद्धसंघैश्च मुनीन्द्रैर्मनुभिः सदा ॥२८॥ निष्कारणायाखिलकारणाय सर्वैश्वरायापि परात्पराय ॥ स्वयंप्रकाशाय परावराय परावराणामधिपाय
ते नमः ॥ २९ ॥ हे कृष्ण हे कृष्ण सुरासुरेश ब्रह्मेश शेषेश प्रजापतीश ॥ मुनीश मन्वीश चराचरेश सिद्धीश सिद्धेश
गणेश पाहि ॥ ३० ॥ धर्मैश धर्मीश शुभाशुभेश वेदेश वेदेष्वनिरूपितश्च ॥ सर्वैश सर्वात्मक सर्वबन्धो जीवीश जीवेश्वर पाहि

मत्प्रभुम् ॥ ३१ ॥ इत्येवं स्तवनं कृत्वा भक्तिनम्रात्मकन्धरा ॥ विधृत्य चरणाम्भोजं तस्थौ नागेशवल्लभा ॥ ३२ ॥ नागपत्नीकृतं
स्तोत्रं त्रिसन्ध्यं यः पठेन्नरः ॥ सर्वपापात्प्रमुक्तस्तु यात्यन्ते श्रीहरेः पदम्॥३३॥इह लोके हरेर्भक्तिमन्ते दास्यं लभेद्ध्रुवम् ॥ लभते
पार्षदो भूत्वा सालोक्यादिचतुष्टयम् ॥ ३४ ॥ नारद उवाच ॥ नागपत्नीवचः श्रुत्वा भगवान्सर्वनन्दनः ॥ प्रहृष्टोत्फुल्लनयनः
किमुवाच हरिः स्वयम् ॥ ३५ ॥ कथयस्व महाभाग रहस्यं परमाद्भुतम् ॥ सूत उवाच ॥ नारदस्य वचः श्रुत्वा भगवान्सर्व
दर्शनः ॥ ३६ ॥ उवाच परमात्मानं मधुवृन्दं पदेपदे ॥ नारायण उवाच ॥ नागपत्नीवचः श्रुत्वा श्रीकृष्णस्तमुवाच ह ॥ ३७ ॥
पुटाञ्जलियुतां पादे पतितां भयविह्वलाम् ॥ श्रीकृष्ण उवाच ॥ उत्तिष्ठोत्तिष्ठ नागेशे वरं वृणु भयं त्यज ॥ ३८ ॥ गृहाण कान्तं हे
मातर्मद्वरादजरामरम् ॥ कालिन्दीह्रदमुत्सृज्य स्वकीयं भवनं व्रज ॥३९॥ भर्त्रा सगोष्ठ्या सार्द्धं च गच्छ वत्से सुखी भव ॥ अद्य
प्रभृति नागेशि भूता कन्या च त्वं मम ॥ ४० ॥ त्वत्प्राणाधिक एवायं जामाता च न संशयः ॥ मत्पादपद्मचिह्नेन गरुडस्त्वत्त्वपतिं
शुभे ॥ ४१ ॥ कृत्वा च स्तवनं भक्त्या प्रणमिष्यति मत्पदम् ॥ त्यज त्वं गरुडाद्भीतिं शीघ्रं रमणकं व्रज॥४२॥ह्रदान्निर्गच्छ वत्से
त्वं वरं वृणु यथेप्सितम् ॥ श्रीकृष्णस्य वचः श्रुत्वा प्रसन्नवदनेक्षणा ॥ ४३ ॥ उवाच साश्रुनेत्रा सा भक्तिनम्रात्मकन्धरा ॥ सुरसो
वाच ॥ वरं दास्यसि चेदानीं वरदेश्वर मेऽपि च ॥ ४४ ॥ त्वत्पादाब्जे दृढां भक्तिं निश्चलां दातुमर्हसि ॥ मन्मनस्त्वत्पदाम्भोजे
भ्रमतु भ्रमरो यथा ॥ ४५ ॥ तव स्मृतोर्विस्मृतिर्मे कदाऽपि न भविष्यति ॥ स्वकान्ते मम सौभाग्यं कान्तोऽयं ज्ञानिनां वरः ॥४६॥
इत्येवं प्रार्थनीयं च परिपूर्णं कुरु प्रभो ॥ इत्येवमुक्त्वा सर्पस्त्री प्रतस्थौ पुरतो हरेः ॥४७॥ शरत्पार्वणचन्द्रास्यं ददर्श श्रीहरेर्मुखम्॥
लोचनाभ्यां पपौ वक्त्रं निमेषरहितं सती ॥ ४८ ॥ सर्वाङ्गपुलकोद्भिन्ना सानंदाश्रुपरिप्लुता ॥ सुन्दरं बालकं दृष्ट्वा पुत्रस्नेहं प्रकुर्वती॥
॥ ४९ ॥ उवाच पुनरेवेदं भक्त्युद्रेकपरिप्लुता ॥ न यास्यामि रमणकं तत्र नास्ति प्रयोजनम् ॥ ५० ॥ सर्पः करोतु संसारं कुरु मां
निजकिङ्करीम् ॥ न वाञ्छा मम हे कृष्ण सालोक्यादिचतुष्टये ॥५१॥ त्वत्पदाम्भोजसेवायाः कलां नार्हन्ति षोडशीम् ॥ विना त्वत्पा

दसेवां च यो वाञ्छति वरान्तरम्॥५२॥भारते दुर्लभं जन्म लब्ध्वाऽसौ वञ्चितः स्वयम्॥नागपत्न्या वचः श्रुत्वा स्मेराननसरोरुहः॥५३॥ प्रसन्नमानसः श्रीमानोमित्येवमुवाच ह ॥ एतस्मिन्नंतरे दिव्यः सद्रत्नसारनिर्मितः ॥ ५४ ॥ अजगाम रथस्तूर्णमुद्दीप्तस्तेजसा मुने ॥ पार्षदप्रवरैर्युक्तो वस्त्रमालापरिच्छदः ॥ ५५ ॥ शतचक्रो वायुवेगो मनोयायी मनोहरः ॥ अवरुह्य रथात्तूर्णं श्यामलाः श्यामकिङ्कराः ॥५६॥ प्रणम्य कृष्णं तां नीत्वा जग्मुर्गोलोकमुत्तमम् ॥ हरिश्छायां विनिर्माय ददौ सर्पाय तेजसा ॥५७॥ स च किंचिन्न बुबुधे मोहितो विष्णुमायया ॥ अवरुह्य सर्पमूर्ध्नः श्रीकृष्णः करुणानिधिः॥५८॥ ददौ हस्तं च कृपया शीघ्रं कालियमस्तके ॥ संप्राप्य चेतनां सद्यो ददर्श पुरतो हरिम्॥५९॥पुटाञ्जलियुतां साश्रुपूर्णां च सुरसां सतीम् ॥ प्रणनाम हरिं सद्यो रुरोद प्रेमविह्वलः ॥ ६० ॥ भक्त्युद्रेकात्साश्रुनेत्रां पुलकाङ्कितविग्रहाम् ॥ तूष्णींभूतां च तां दृष्ट्वा समुवाच कृपानिधिः ॥ यदीश्वरस्य सततं योग्यायोग्ये समा कृपा ॥६१॥ श्रीकृष्ण उवाच ॥ वरं वृणु त्वं कालीय यस्ते मनसि वर्तते ॥६२॥ त्वं मे प्राणाधिको वत्स सुखं तिष्ठ भयं त्यज ॥ तस्याहमनुगृह्णाणि योऽतिभक्तो ममांशजः ॥६३॥ किंचित्तद्दमनं कृत्वा त्वत्प्रसादं करोम्यहम् ॥ त्वद्वंशजातान्सर्पांश्च हन्ति यो मानवाधमः ॥ ६४॥ ब्रह्महत्यासमं पापं भविता तस्य निश्चितम् ॥ मत्पादपद्मचिह्ने यः करोति दण्डताडनम् ॥५५॥ द्विगुणं ब्रह्महत्याया भविता तस्य किल्बिषम्॥लक्ष्मीर्यास्यति तद्गेहाच्छापं दत्त्वा सुदारुणम् ॥६६॥ वंशायुर्यशसां हानिर्भविता तस्य निश्चितम् ॥ ध्रुवं वर्षशतं कालसूत्रे यास्यति मद्गिरा ॥६७॥ त्वत्प्रमाणाः कीटसंघा दंशिष्यन्ति च संततम् ॥ भोगान्ते जन्म लब्ध्वा च तन्मृत्युस्तस्य दंशनात् ॥ ६८ ॥ तस्य वंशोद्भवानां च त्वद्वंशाद्भविता भयम् ॥ ये च त्वद्वंशजान्दृष्ट्वा सुपदाङ्कं मदीयकम् ॥ ६९ ॥ प्रणमिष्यन्ति भक्त्या ते मुच्यन्ते सर्वपातकात् ॥ गच्छ शीघ्रं रमणकं त्यज भीतिं खगाधिपात् ॥७०॥ मत्पदाङ्कं मूर्ध्नि दृष्ट्वा त्वां भक्त्या प्रणमिष्यति ॥ तव त्वद्वंशजानां च गरुडान्न भयं क्वचित् ॥७१॥ सर्वेषां ज्ञातिसर्पाणां वरोऽद्य भव मद्वरात् ॥ वरं किं परमं वत्स वाञ्छितं वरयाधुना ॥ ७२ ॥ भयं त्यक्त्वा कथय मां त्वदीयं दुःखभञ्जनम् ॥ श्रीकृष्णवचनं श्रुत्वा कालियः कम्पितो भिया ॥

पुटाञ्जलियुतो भूत्वा तमुवाच भुजङ्गमः ॥ ७३ ॥ कालिय उवाच ॥ वरेऽन्यस्मिन्मम विभो वाञ्छा नास्ति वरप्रद ॥
॥ ७४ ॥ भक्तिं स्मृतिं त्वत्पदाब्जे देहि जन्मनि जन्मनि ॥ जन्म ब्रह्मकुले वाऽपि तिर्यग्योनिषु वा समम् ॥ ७५ ॥ तद्भवेत्सफलं
यत्र स्मृतिस्त्वच्चरणाम्बुजे ॥ तन्निष्फलः स्वर्गवासो नास्ति चेत्त्वत्पदस्मृतिः ॥ ७६ ॥ त्वत्पादध्यानयुक्तस्य यत्तत्स्थानं च तत्परम् ॥
क्षणं वा कोटिकल्पं वा पुरुषायुः क्षयोऽस्तु वा ॥ ७७ ॥ यदि त्वत्सेवया याति सफलो निष्फलोऽथवा ॥ तेषां चायुर्व्ययो नास्ति ये
त्वत्पादाब्जसेवकाः॥७८॥ न सन्ति जन्ममरणरोगशोकार्तिभीतयः ॥ इन्द्रत्वे वाऽमरत्वे वा ब्रह्मत्वे चातिदुर्लभे॥७९॥वाञ्छा नास्त्येव
भक्तानां त्वत्पादसेवनं विना ॥ सुजीर्णपटखण्डस्य समं नूतनमेव च ॥ ८० ॥ पश्यन्ति भक्ताः किं चान्यत्सालोक्यादिचतुष्टयम् ॥
संप्राप्तस्त्वन्मनुर्ब्रह्मन्ननंताद्यावदेव हि ॥८१॥ तावत्त्वद्भावनेनैव त्वद्वर्णोऽहमनुग्रहात् ॥ मां च भक्तमपक्कं वा विज्ञाय गरुडः स्वयम् ॥
॥ ८२ ॥ देशाद्दूरं च न्यक्कारं चकार दृढभक्तिमान् ॥ भवता च दृढां भक्तिं दत्त्वा मे वरदेश्वर ॥८३॥ स च उक्तश्च भक्तोऽहं न मां
त्यक्तुं क्षमोऽधुना ॥ त्वत्पादपद्मचिह्नाक्तं दृष्ट्वा श्रीमस्तकं मम ॥८४॥ सदोषं गुणयुक्तं मां सोऽधुना त्यक्तुमक्षमः ॥ ममाराध्याश्च
नागेंद्रा न तद्वध्योऽहमीश्वर ॥ ८५ ॥ भयं न केभ्यः सर्वत्र तमनंतं गुरुं विना ॥ यं देवेन्द्राश्च देवाश्च मुनयो मनवो नराः ॥ ८६ ॥
स्वप्ने ध्याने न पश्यंति चक्षुषोर्गोचरः स मे ॥ भक्तानुरोधात्साकारः कुतस्ते विग्रहो विभो ॥ ८७ ॥ सगुणस्त्वं च साकारो निराका
रश्च निर्गुणः ॥ स्वेच्छामयः सर्वधाम सर्वबीजं सनातनम् ॥ ८८ ॥ सर्वेषामीश्वरः साक्षी सर्वात्मा सर्वरूपधृक् ॥ ब्रह्मेशशेषधर्मेन्द्रा
वेदवेदांगपारगाः ॥८९॥ स्तोतुं यमीशं ते जाड्याः सर्पः स्तोष्यति तं विभुम् ॥ हे नाथ करुणासिंधो दीनबंधो क्षमाधमम् ॥ ९० ॥
खलस्वभावादज्ञानात्कृष्ण त्वं चर्वितो मया ॥ नास्त्रलक्ष्यो यथाकाशो नदृश्यांतो न लंघ्यकः ॥ ९१ ॥ न स्पृश्यो हि न चावर्यं
स्तथा तेजस्त्वमेव च ॥ इत्येवमुक्त्वा नागेन्द्रः पपात चरणाम्बुजे ॥ ९२ ॥ ओमित्युक्त्वा हरिस्तुष्टः सर्वं तस्मै वरं ददौ ॥ नागराज
कृतं स्तोत्रं प्रातरुत्थाय यः पठेत् ॥ ९३ ॥ तद्वंश्यानां च तस्यैव नागेभ्यो न भयं भवेत् ॥ स नागशय्यां कृत्वैव स्वप्तुं शक्तः सदा

भुवि ॥ ९४ ॥ विषपीयूषयोर्भेदो नास्त्येव तस्य भक्षणे ॥ नागग्रस्ते नागघाते प्राणान्ते विषभोजनात् ॥ ९५ ॥ स्तोत्रस्मरणमात्रेण सुस्थो भवति मानवः ॥ भूर्जे कृत्वा स्तोत्रमिदं कण्ठे वा दक्षिणे करे ॥९६॥ बिभर्ति यो भक्तियुक्तो नागेभ्योऽपि न तद्भयम् ॥ यत्र गेहे स्तोत्रमिदं नागस्तत्र न तिष्ठति ॥ ९७ ॥ विषाग्निवज्रभीतिश्च न भवेत्तत्र निश्चितम् ॥ इह लोके हरेर्भक्तिं स्मृतिं च सततं लभेत् ॥ अन्ते च स्वकुलं पूत्वा दास्यं च लभते ध्रुवम् ॥ ९८ ॥ श्रीनारायण उवाच ॥ नागेन्द्राय वरं दत्त्वा पुनस्तं जगदीश्वरः ॥ उवाच मधुरं वाक्यं परिणामसुखावहम् ॥ ९९ ॥ श्रीकृष्ण उवाच ॥ गच्छ त्वं च रमणकं यथेन्द्रनगरं परम् ॥ ॥ १०० ॥ सार्द्धं स्वगोष्ठ्या नागेन्द्र यमुनाजलवर्त्मना॥श्रुत्वा नागो हरेराज्ञां रुरोद प्रेमविह्वलः ॥ १०१ ॥ कदा द्रक्ष्यामि त्वत्पादपद्मं नाथेत्युवाच ह ॥ प्रणम्य शतकृत्वश्च स्त्रिया गोष्ठ्या सहेश्वरम् ॥ १०२ ॥ जगाम जलमार्गेण नागेन्द्रो विरहातुरः ॥ यमुनाह्रदतोयं च बभूवामृतकल्पकम् ॥ १०३ ॥ प्रसन्ना जन्तवः सर्वे बभूवुस्तेन नारद ॥ गत्वा ददर्श भवनं यथेन्द्रनगरं परम् ॥ १०४ ॥ आज्ञया च कृपासिन्धोर्निर्मितं विश्वकर्मणा ॥ तत्र तस्थौ च नागेन्द्रः स्त्रिया पुत्रगणैः सह ॥१०५॥ निःशङ्को हर्षयुक्तश्च हरिभावनतत्परः ॥ इत्येवं कथितं सर्वं हरेश्चरितमद्भुतम् ॥ सुखदं मोक्षदं सारं परं किं श्रोतुमिच्छसि ॥ १०६ ॥ सूत उवाच ॥ महर्षेर्वचनं श्रुत्वा नारदो हर्षविह्वलः ॥ ऋषिं पप्रच्छ संदेहं सर्वसंदेहभञ्जनम् ॥ १०७ ॥ नारद उवाच ॥ कथं विहाय कालीयः स्वपूर्वभवनं परम् ॥ जगाम यमुनातीरं तन्मे ब्रूहि जगद्गुरो ॥ १०८ ॥ श्रीनारायण उवाच ॥ शृणु नारद वक्ष्येऽहमितिहासं पुरातनम् ॥ १०९ ॥ यच्छ्रुतं धर्मवक्त्रान्मे मलये सूर्यपर्वणि ॥ कृष्णाख्यानप्रसङ्गेन सुप्रभापश्चिमे तटे ॥ ११० ॥ पप्रच्छ धर्मं पुलहः कथितं मुनिसंसदि ॥ इदमाख्यानमाश्चर्यमुवाच तं कृपानिधिः ॥ १११ ॥ तत्र श्रुतं मया विप्र निबोध कथयामि ते ॥ शेषाज्ञया नागगणाः प्रतिसंवत्सरं भिया ॥ ११२ ॥ कार्त्तिकीपूर्णिमायां तु कुर्वन्ति गरुडार्चनम् ॥ पुष्पैर्धूपैश्च दीपैश्च नैवेद्यैर्बलिभिर्मुदा ॥ ११३ ॥ पुष्करे च महातीर्थे सुस्नाता भक्तिसंयुताः ॥ तस्य पूजां च काली

यो न चकारात्यहंकृतः ॥ ११४ ॥ नागपूजोपकरणं बलाद्भक्षितुमुद्यतः ॥ चक्रुर्निवारणं नागा नीतिमूचुर्मदोतद्धम् ॥ ११५ ॥ न शक्ता वारणे ते चेत्याविर्भूतः खगेश्वरः ॥ दृष्ट्वा खगेश्वरं नागाः कालीयप्राणरक्षया ॥११६॥ प्राणशक्त्या च युयुधुर्यावत्सूर्योदयं मुने ॥ पक्षीन्द्रतेजसा सर्वे समुद्विग्नाः पलायिताः ॥ ११७ ॥ अनन्तं शरणं जग्मुः सर्वेषामभयप्रदम् ॥ पलायनपरान्दृष्ट्वा नागांश्च करुणानिधिः ॥ ११८ ॥ तत्र तस्थौ च निःशङ्कः कालीयस्तं ददर्श ह ॥ स्मृत्वा हरिपदाम्भोजं कालीयो युयुधे मुने ॥ ११९ ॥ मुहूर्तं च तयोर्युद्धं बभूवातीव दारुणम् ॥ पराजितश्च नागेन्द्रस्तेजसा गरुडस्य च ॥ १२० ॥ भिया पलायनं कृत्वा जगाम यमुनाह्रदम् ॥ न तं सौभरिशापेन खगेन्द्रो गन्तुमीश्वरः ॥ तत्र तस्थौ भिया नागो जग्मुः पश्चाच्च तद्गणाः ॥ १२१ ॥ नारद उवाच ॥ कथं तु सौभरेः शापो बभूव गरुडाय वै ॥ कथं न शक्तो गन्तुं तं ह्रदमीश्वरवाहनः ॥ १२२ ॥ श्रीनारायण उवाच ॥ दिव्यं वर्षसहस्रं च वर्षाणां तत्र सौभरिः ॥१२३॥ तपस्तप्त्वा महासिद्धो दध्यौ कृष्णपदाम्बुजम् ॥ समीपे ध्यायमानस्य कूले च यमुनाजले ॥ १२४ ॥ गणेन सार्धं निःशंकः करोति भ्रमणं मुदा ॥ पुच्छमुत्फाल्य बहुधा परितः परमेच्छया ॥ १२५ ॥ मुनिं प्रदक्षिणीकृत्य यात्यायाति मुदाऽन्वितः ॥ सकुलं सुमहात्मानं दर्शंदर्शं खगाधिपः ॥१२६॥ जग्राह चन्चुना मीनं मुनीन्द्रस्य समीपतः ॥ गच्छन्तं तं मीनमुखं ददर्श कोपचक्षुषा ॥ १२७ ॥ प्रकोपितो मुनेर्दृष्ट्या मीनस्तोये पपात ह ॥ तमुवाच मुनीन्द्रश्च पुनरादातुमुद्यतम् ॥ मीनश्च गरुडत्रासात्तस्थौ मुनिसमीपतः ॥ १२८ ॥ सौभरिरुवाच ॥ गच्छ दूरं गच्छ दूरं खगेन्द्र मत्समीपतः ॥ १२९ ॥ का योग्यता मत्पुरस्ते ग्रहीतुं जीवमुल्बणम्॥श्रीकृष्णवाहनं ज्ञात्वा चात्मानं बहु मन्यसे ॥१३०॥ त्वद्विधान्कोटिशः कृष्णः स्रष्टुं शक्तश्च वाहकान् ॥ करोमि भस्मसात्तूर्णं त्वां च भ्रूभङ्गलीलया ॥ १३१ ॥ वाहनं च त्वमीशस्य न वयं तव किंकराः ॥ अद्यप्रभृति पक्षीन्द्र यद्यागच्छसि मे ह्रदम् ॥ १३२ ॥ मदीयशापात्तूर्णं च भस्मसाद्भविता ध्रुवम् ॥ मुनीन्द्रस्य वचः श्रुत्वा प्रचचाल खगेश्वरः ॥ १३३ ॥ स्मारंस्मारं कृष्णपादं तं प्रणम्य जगाम ह ॥ अद्यप्रभृति विप्रेन्द्र पतगेन्द्रस्य संततम् ॥ १३४ ॥ ह्रदस्य श्रुतिमा

त्रेण कम्पो भवति निश्चितम् ॥ इतिहासश्च कथितो यः श्रुतो धर्मवक्रतः ॥ १३५ ॥ सरहस्यं श्रुतिसुखं प्रकृतं शृणु मङ्गलम् ॥
विज्ञाय सुचिरं बाला नोत्तस्थौ तज्जलाद्धरिः ॥ १३६ ॥ चक्रुर्विषादं मोहाच्च रुरुदुर्यमुनातटे ॥ स्ववक्षोघातनं चक्रुः केचिद्बालाः
शुचाऽऽकुलाः ॥ १३७ ॥ केचिन्निपत्य भूमौ च मूर्च्छां प्रापुर्हरिं विना ॥ ह्रदं प्रवेष्टुं केचिच्च विरहेण समन्विताः॥१३८॥ केचिद्गोपाल
बालाश्च चक्रुश्च तन्निवारणम् ॥ कृत्वा विलापं केचिच्च प्राणांस्त्यक्तुं समुद्यताः ॥१३९॥ तेषां केचिज्ज्ञानवन्तो रक्षां चक्रुः प्रयत्नतः ॥
केचिदूचुश्च हाहेति कृष्ण कृष्णेति केचन ॥ १४० ॥ केचिद्वक्तुं प्रवृत्तिं च प्रययुर्नन्दसन्निधिम् ॥ केचित्संमीलितास्तत्र शोकमोह
भयातुराः ॥ १४१ ॥ इत्यूचुः किं करिष्यामः कुतोऽस्माकं गतो हरिः ॥ हे नन्दसूनो हे कृष्ण प्राणेभ्योऽप्यधिकप्रिय ॥ १४२ ॥
हे बन्धो दर्शनं देहीत्यूचुः प्राणाः प्रयान्ति हि ॥ एतस्मिन्नन्तरे केचिद्बालका नन्दसन्निधिम् ॥ १४३ ॥ संप्रापुरतिलोलाश्च रुदन्तः
शोकविह्वलाः ॥ प्रवृत्तिमूचुस्तं शीघ्रं यशोदां मूलतो बलम् ॥१४४॥ गोपान्गोपालिकाश्चैव रक्तपङ्कजलोचनाः ॥ श्रुत्वा वार्तां च ते
सर्वे शीघ्रं जग्मुः शुचाऽन्विताः ॥१४५॥ कलिन्दनन्दिनीतीरं रुरुदुर्बालकैर्युताः ॥ गत्वा संमीलिताःसर्वे रुरुदुः शोकमूर्च्छिताः॥१४६॥
ह्रदं विशन्तीमम्बां तां केचिच्चक्रुर्निवारणम् ॥ गोपा गोपालिकाश्चैव जघ्नुरङ्गानि शोकतः ॥१४७॥ केचिद्विललपुस्तत्र मूर्च्छां प्रापुश्च
केचन ॥ ह्रदं विशन्तीं तां राधां वारयामास काचन ॥ १४८ ॥ मूर्च्छां च प्राप सा शोकान्मृतेव च सरित्तटे ॥ विलप्या
तिभृशं नन्दो मूर्च्छां प्राप पुनः पुनः ॥ १४९ ॥ भूयोऽपि रोदनं कृत्वा भूयो मूर्च्छामवाप ह ॥ विलपन्तं भृशं नन्दं यशोदां
शोककर्शिताम् ॥ १५० ॥ गोपाश्च गोपिकाश्चैव राधिकामतिमूर्च्छिताम् ॥ रुदतो बालकान्सर्वान्बालिकाश्च शुचाऽन्विताः ॥
सर्वांश्च बोधयामास बलश्च ज्ञानिनां वरः ॥ १५१ ॥ श्रीबलदेव उवाच ॥ गोपा गोपालिका बालाः सर्वे शृणुत
मद्वचः ॥ १५२ ॥ हे नन्द ज्ञानिनां श्रेष्ठ गर्गवाक्यस्मृतिं कुरु ॥ जगद्बिभर्तुः शेषस्य संहर्तुः शंकरस्य च ॥१५३॥ विधातुः संवि
धातुश्च भुवि कस्मात्पराजयः ॥ परमाणुः परो व्यूहः स्थूलात्स्थूलः परात्परः ॥ १५४ ॥ विद्यमानोऽप्यविदृश्यः संयोगो

योगिनामपि ॥ दिशां नास्ति समाहारः स्पृश्यो नाकाश एव च ॥ १५५ ॥ अपि सर्वेश्वरो बाध्य इत्यूचुः श्रुतयः स्फुटम् ॥
नात्मा दृश्यो नास्त्रलक्ष्यो न वध्यो न हि दृश्यकः ॥ १५६ ॥ नाग्निग्रस्तो न हिंस्यश्चापीदमाध्यात्मिका विदुः ॥ विग्रहोऽस्यैव
कृष्णस्य भक्तध्यानार्थमेव च ॥ १५७ ॥ ज्योतिःस्वरूपस्य विभोर्नाद्यन्तमध्यमात्मनः ॥ जलप्लुते च ब्रह्माण्डे जलशायी जनार्दनः
॥ १५८ ॥ यन्नाभिपद्मजो ब्रह्मा तस्येशस्य ह्रदे विपत् ॥ मशकश्चेत्क्षमो ग्रस्तुं ब्रह्माण्डमखिलं पितः ॥ १५९ ॥ न तथाऽपि तदीशं
तं ग्रस्तुं सर्पः क्षमो भवेत् ॥ इत्येवं कथितं सर्वमाध्यात्मिकमनुत्तमम् ॥ १६० ॥ निगूढं योगिनां सारं संशयच्छेदकारणम् ॥
बलदेववचः श्रुत्वा गर्गवाक्यमनुस्मरन् ॥ १६१ ॥ तत्याज शोकं नन्दश्च व्रजश्च व्रजयोषितः ॥ प्रबोधं मेनिरे सर्वे न यशोदा न
राधिका ॥ १६२ ॥ बन्धुविच्छेदविषये प्रबोधे न स्थितं मनः ॥ एतस्मिन्नन्तरे कृष्णमुत्पतन्तं जलान्मुने ॥ १६३ ॥ ददृशुस्तं
सुप्रसन्ना व्रजाश्च व्रजयोषितः ॥ शरत्पार्वणचन्द्रास्यं सस्मितं सुमनोहरम् ॥ १६४ ॥ अस्निग्धवस्त्रमस्निग्धमलुप्तचन्दनाञ्जनम् ॥
सर्वाभरणसंयुक्तं ज्वलन्तं ब्रह्मतेजसा ॥ १६५ ॥ मयूरपिच्छचूडं च वंशीवदनमच्युतम् ॥ यशोदा बालकं दृष्ट्वा कृत्वा
वक्षसि सस्मिता ॥ १६६ ॥ चुचुम्ब वदनाम्भोजं प्रसन्नवदनेक्षणा ॥ क्रोडे चकार नन्दश्च बलश्च रोहिणी मुदा ॥ १६७ ॥ निमेषरहिताः
सर्वे ददृशुः श्रीमुखं हरेः ॥ प्रेमान्धा बालकाः सर्वे चक्रुरालिङ्गनं हरेः ॥ १६८ ॥ पपुश्चक्षुश्चकोरैश्च मुखचन्द्रं च गोपिकाः ॥
एतस्मिन्नन्तरे तत्र सहसा काननांतरम् ॥ १६९ ॥ दावाग्निर्वेष्टयामास तैः सर्वैः सह गोकुलम् ॥ दृष्ट्वा शैलप्रमाणाग्निं
परितः काननान्तरे ॥ १७० ॥ प्रणाशं मेनिरे सर्वे भयमापुश्च संकटे ॥ श्रीकृष्णं तुष्टुवुः सर्वे संपुटाञ्जलयो
व्रजाः ॥ बाला गोप्यश्च संत्रस्ता भक्तिनम्रात्मकन्धराः ॥ १७१ ॥ बाला ऊचुः ॥ यथा संरक्षितं ब्रह्मन्सर्वापत्स्वेव नः कुलम् ॥
॥ १७२ ॥ तथा रक्षां कुरु पुनर्दावाग्नेर्मधुसूदन ॥ त्वमिष्टदेवताऽस्माकं त्वमेव कुलदेवता ॥ १७३ ॥ स्रष्टा पाता च संहर्ता जगतां च
जगत्पते ॥ वह्निर्वा वरुणो वाऽपि चन्द्रो वा सूर्य एव च ॥ १७४ ॥ यमः कुबेरः पवन ईशानाद्याश्च देवताः ॥ ब्रह्मेशशेषधर्मेन्द्रा

मुनीन्द्रा मनवः स्मृताः ॥ १७५ ॥ मानवाश्च तथा दैत्या यक्षराक्षसकिंनराः ॥ येये चराचराश्चैव सर्वे तव विभूतयः ॥ १७६ ॥ आविर्भावस्तिरोभावः सर्वेषां च तवेच्छया ॥ अभयं देहि गोविंद वह्निसंहरणं कुरु ॥ १७७ ॥ वयं त्वां शरणं यामो रक्ष नः शरणागतान् ॥ इत्येवमुक्त्वा ते सर्वे तस्थुर्ध्यात्वा पदाम्बुजम् ॥ १७८ ॥ दूरीभूतस्तु दावाग्निः श्रीकृष्णामृतदृष्टितः ॥ दूरीभूते च दावाग्नौ ननृतुस्ते मुदाऽन्विताः ॥ १७९ ॥ सर्वापदः प्रणश्यन्ति हरिस्मरणमात्रतः ॥ इदं स्तोत्रं महापुण्यं प्रातरुत्थाय यः पठेत् ॥ १८० ॥ वह्नितो न भवेत्तस्य भयं जन्मनि जन्मनि ॥ शत्रुग्रस्ते च दावाग्नौ विपत्तौ प्राणसङ्कटे ॥ १८१ ॥ स्तोत्रमेतत्पठित्वा तु मुच्यते नात्र संशयः ॥ शत्रुसैन्यं क्षयं याति सर्वत्र विजयी भवेत् ॥ इह लोके हरेर्भक्तिमन्ते दास्यं लभेद्ध्रुवम् ॥ १८२ ॥ श्रीनारायण उवाच ॥ दावाग्निमोक्षणं कृत्वा तैः सार्द्धं शृणु नारद ॥ जगाम श्रीहरिर्गेहं कुबेरभवनोपमम् ॥ १८३ ॥ ब्राह्मणेभ्यो धनं नन्दः परिपूर्णं ददौ मुदा ॥ भोजनं कारयामास ज्ञातिवर्गांश्च बान्धवान् ॥ १८४ ॥ नानाविधं मङ्गलं च हरेर्नामानुकीर्तनम् ॥ वेदांश्च पाठयामास विप्रद्वारा मुदाऽन्वितः ॥ १८५ ॥ एवं मुमुदिरे सर्वे वृन्दारण्ये गृहेगृहे ॥ श्रीकृष्णचरणाम्भोजध्यानैकतानमानसाः ॥१८६॥ इत्येवं कथितं सर्वं हरेश्चरितमङ्गलम् ॥ कलिकिल्बिषकाष्ठानां दहने दहनोपमम् ॥१८७॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे कालीयदमनदावाग्निमोक्षणं नामैकोनविंशोऽध्यायः ॥ १९ ॥

श्रीनारायण उवाच ॥ एकदा बालकैः सार्द्धं बलेन सह माधवः ॥ भुक्त्वा पीत्वाऽनुलिप्तश्च वृन्दारण्यं जगाम ह ॥१॥ क्रीडां चकार भगवान्कौतुकेन च तैः सह ॥ क्रीडानि मग्नचित्तानां दूरं तद्गोकुलं ययौ ॥ २ ॥ तस्य प्रभावं विज्ञातुं विधाता जगतां पतिः ॥ चकार निहुतिं गाश्च वत्सांश्च बालकानपि ॥ ३ ॥ विज्ञाय तदभिप्रायं सर्वज्ञः सर्वकारकः ॥ पुनश्चकार तत्सर्वं योगीन्द्रो योगमायया ॥ ४ ॥ जगाम श्रीहरिर्गेहं कालयित्वा च गोकुलम् ॥ बलेन बालकैः सार्धं क्रीडाकौतुकमानसः ॥ ५ ॥ एवं चकार भगवान्वर्षमेकं च प्रत्यहम् ॥ यमुनागमनं गोभिर्बलेन सह बालकैः ॥ ६ ॥ ब्रह्मा प्रभावं विज्ञाय लज्जानम्रात्मकन्धरः ॥ आजगाम हरेः स्थानं भाण्डीरवटमूलके ॥ ७ ॥ ददर्श कृष्णं तत्रैव

गोपालगणवेष्टितम् ॥ यथा पार्वणचन्द्रं च विभान्तं स्वगणैः सह ॥८॥ रत्नसिंहासनस्थं च हसन्तं सस्मितं मुदा ॥ पीतवस्त्रपरीधानं ज्वलन्तं ब्रह्मतेजसा ॥९॥ रत्नकेयूरवलयरत्नमञ्जीररञ्जितम् ॥ रत्नकुण्डलयुग्माभ्यां स्वकपोलस्थलोज्ज्वलम् ॥ १० ॥ कोटिकन्दर्पलावण्यं लीलाधाममनोहरम् ॥ चन्दनागुरुकस्तूरीकुङ्कुमार्चितविग्रहम् ॥ ११ ॥ पारिजातप्रसूनानां मालाजालैर्विभूषितम् ॥ नवीननीरदश्यामं प्रोद्भिन्ननवयौवनम् ॥१२॥ मालतीमाल्यसंयुक्तं मयूरपिच्छचूडकम् ॥ स्वाङ्गसौन्दर्यदीप्त्या च कृतभूषणभूषितम् ॥ १३ ॥ शरत्पार्वणचन्द्रस्य प्रभामुष्टास्यसुन्दरम् ॥ पक्वबिम्बाधरौष्ठं च खगेन्द्रचञ्चुनासिकम् ॥ १४ ॥ शरन्मध्याह्नपद्मानां प्रभामोचनलोचनम् ॥ मुक्तापङ्क्तिविनिन्द्यैकदन्तपङ्क्तिमनोहरम् ॥१५॥ कौस्तुभेन मणीन्द्रेण वक्षःस्थलसमुज्ज्वलम् ॥ शान्तं च राधिकाकान्तं परिपूर्णतमं परम् ॥ १६ ॥ एवंभूतं प्रभुं दृष्ट्वा प्रणनामातिविस्मितः ॥ दर्शंदर्शमीश्वरं तं प्रणनाम पुनःपुनः ॥१७॥ यद्दृष्टं हृदयाम्भोजे तद्रूपं बहिरेव च ॥ या मूर्तिः पुरतो दृष्टा सा पश्चात्पारितस्ततः ॥१८॥ तत्र वृन्दावने सर्वं दृष्ट्वा कृष्णसमं मुने ॥ ध्यायंध्यायं च तद्रूपं तत्र तस्थौ जगद्गुरुः ॥१९॥ गावो वत्साश्च बालाश्च लतागुल्माश्च वीरुधः ॥ सर्वं वृन्दावनं ब्रह्मा श्यामरूपं ददर्श ह ॥२०॥ दृष्ट्वैवं परमाश्चर्यं पुनर्ध्यानं चकार ह ॥ ददर्श त्रिजगद्ब्रह्मा नान्यत्कृष्णं विना मुने ॥२१॥ क्व च वृक्षः क्व वा शैलः क्व मही क्व च सागराः ॥ क्व देवाः क्व च गन्धर्वा मुनीन्द्राः क्व च मानवाः ॥२२॥ क्व चात्मा क्व जगद्बीजं क्व स्वर्गः क्वायमेव च ॥ सर्वं च स्वदृशा ब्रह्मा ददर्श मायया हरेः ॥२३॥ क्व कृष्णो जगतां नाथः क्व वा मायाविभूतयः ॥ सर्वं कृष्णमयं दृष्ट्वा किंचिन्निर्वक्तुमक्षमः ॥ २४ ॥ किं स्तौमि किं करोमीति मनसैवं प्रगृह्य च ॥ तत्र स्थित्वा जगद्धाता जपं कर्तुं समुद्यतः ॥ २५ ॥ सुखं योगासनं कृत्वा बभूव संपुटाञ्जलिः ॥ पुलकाङ्कितसर्वाङ्गः साश्रुनेत्रोऽतिदीनवत् ॥ २६ ॥ इडां सुषुम्नां मध्यां च पिङ्गलां नलिनीं धुराम् ॥ नाडीषट्कं च योगेन निबद्ध्य च प्रयत्नतः ॥ २७ ॥ मूलाधारं स्वाधिष्ठानं मणिपूरं मनोहरम् ॥ विशुद्धं परमाज्ञाख्यं षट्चक्रं च निबद्ध्य च ॥ २८ ॥ लङ्घनं कारयित्वा च तत्षट्चक्रं क्रमाद्विधिः ॥ ब्रह्मरन्ध्रं समानीय वायुबन्धं चकार ह ॥२९॥ निबध्य वायुं मध्यां तामानीय हृदयाम्बुजम् ॥

तं वायुं भ्रामयित्वा च योजयामास मध्यया ॥ ३० ॥ एवं कृत्वा तु निष्पन्दो यो दत्तो हरिणा पुरा ॥ जजाप परमं मन्त्रं तस्यै
व च दशाक्षरम् ॥३१॥ मुहूर्तं च जपं कृत्वा ध्यायंध्यायं पदाम्बुजम् ॥ ददर्श हृदयाम्भोजे सर्वतेजोमयं मुने ॥३२॥ तत्तेजसोऽन्तरे
रूपमतीव सुमनोहरम् ॥ द्विभुजं मुरलीहस्तं भूषितं पीतवाससा ॥ ३३ ॥ श्रुतिमूलस्थलन्यस्तज्वलन्मकरकुण्डलम् ॥ ईषद्धास्यप्रस
न्नास्यं भक्तानुग्रहकातरम् ॥ ३४ ॥ यद्दृष्टं ब्रह्मरन्ध्रे च हृदि तद्बहिरेव च ॥ दृष्ट्वा च परमाश्चर्यं तुष्टाव परमेश्वरम् ॥३५॥ यत्स्तोत्रं
च पुरा दत्तं हरिणैकार्णवे मुने ॥ तमीशं तेन विधिना भक्तिनम्रात्मकन्धरः ॥ ३६ ॥ ब्रह्मोवाच ॥ सर्वस्वरूपं सर्वेशं सर्वकारण
कारणम् ॥ सर्वानिर्वचनीयं तं नमामि शिवरूपिणम् ॥ ३७ ॥ नवीनजलदाकारं श्यामसुन्दरविग्रहम् ॥ स्थितं जन्तुषु सर्वेषु
निर्लिप्तं साक्षिरूपिणम् ॥ ३८ ॥ स्वात्मारामं पूर्णकामं जगद्व्यापिजगत्परम् ॥ सर्वस्वरूपं सर्वेषां बीजरूपं सना
तनम् ॥ ३९ ॥ सर्वाधारं सर्ववरं सर्वशक्तिसमन्वितम् ॥ सर्वाराध्यं सर्वगुरुं सर्वमङ्गलकारणम् ॥ ४० ॥ सर्वमंत्रस्वरूपं
च सर्वसंपत्करं वरम् ॥ शक्तियुक्तमयुक्तं च स्तौमि स्वेच्छामयं विभुम् ॥ ४१ ॥ शक्तीशं शक्तिबीजं च शक्तिरूपधरं वरम् ॥
संसारसागरे घोरे शक्तिनौकासमन्वितम् ॥ ४२ ॥ कृपालुं कर्णधारं च नमामि भक्तवत्सलम् ॥ आत्मस्वरूपमेकांतं लिप्तं
निर्लिप्तमेव च ॥४३॥ सगुणं निर्गुणं ब्रह्म स्तौमि स्वेच्छास्वरूपिणम् ॥ सर्वेन्द्रियादिदेवं तमिन्द्रियालयमेव च ॥४४॥ सर्वेन्द्रियस्व
रूपं च विराड्रूपं नमाम्यहम् ॥ वेदं च वेदजनकं सर्ववेदाङ्गरूपिणम् ॥४५॥ सर्वमन्त्रस्वरूपं च नमामि परमेश्वरम् ॥ सारात्सारतरं
द्रव्यमपूर्वमनिरूपिणम् ॥ ४६ ॥ स्वतन्त्रमस्वतन्त्रं च यशोदानन्दनं भजे ॥ सन्तं सर्वशरीरेषु तमदृष्टमनूहकम् ॥४७॥ ध्यानासाध्यं
विद्यमानं योगीन्द्राणां गुरुं भजे ॥ रासमण्डलमध्यस्थं रासोल्लाससमुत्सुकम् ॥४८॥ गोपीभिः सेव्यमानं च तं धरेशं नमाम्यहम् ॥
सतां सदैव सन्तं तमसन्तमसतामपि॥४९॥योगीशं योगसाध्यं च नमामि शिवसेवितम्॥मन्त्रबीजं मन्त्रराजं मन्त्रदं फलदं फलम् ॥
॥५०॥ मन्त्रसिद्धिस्वरूपं तं नमामि च परात्परम् ॥ सुखं दुःखं च सुखदं दुःखदं पुण्यमेव च ॥५१॥ पुण्यप्रदं च शुभदं शुभबीजं

नमाम्यहम् ॥ इत्येवं स्तवनं कृत्वा दत्त्वा गाश्च स बालकान् ॥ ५२ ॥ निपत्य दण्डवद्भूमौ रुरोद प्रणनाम च ॥ ददर्श चक्षुरुन्मील्य विधाता जगतां मुने ॥ ५३ ॥ ब्रह्मणा च कृतं स्तोत्रं नित्यं भक्त्या च यः पठेत् ॥ इह लोके सुखं भुक्त्वा यात्यन्ते श्रीहरेः पदम् ॥ ५४ ॥ लभते दास्यमतुलं स्थानमीश्वरसन्निधौ ॥ लब्ध्वा च कृष्णसान्निध्यं पार्षदप्रवरो भवेत् ॥ ५५ ॥ श्रीनारायण उवाच ॥ गते जगत्कारणे च ब्रह्मलोकं च ब्रह्मणि ॥ श्रीकृष्णो बालकैः सार्धं जगाम स्वालयं विभुः ॥ ५६ ॥ गावो वत्साश्च बालाश्च जग्मुर्वर्षान्तरे गृहम् ॥ श्रीकृष्णमायया सर्वे मेनिरे ते दिनान्तरम् ॥ ५७ ॥ गोपा गोपालिकाः किंचित्तत्कर्तुं न क्षमास्तदा ॥ योगिनः कृत्रिमं सर्वं किं नूत्नं वा पुरातनम् ॥ ५८ ॥ इत्येवं कथितं सर्वं श्रीकृष्णचरितं शुभम् ॥ सुखदं मोक्षदं पुण्यं सर्वकालसुखावहम् ॥ ५९ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे गोवत्सबालकहरणप्रस्तावो नाम विंशोऽध्यायः ॥ २० ॥

श्रीनारायण उवाच ॥ एकदाऽऽनन्दयुक्तश्च नन्दो गोपव्रजे मुने ॥ दुन्दुभिं वादयामास शक्रयागकृतोद्यमः ॥ १ ॥ दधि क्षीरं घृतं तक्रं नवनीतं गुडं मधु ॥ एतान्यादाय शक्रस्य पूजां कुर्वन्त्विति ब्रुवन् ॥२॥ येये सन्त्यत्र नगरे गोपा गोप्यश्च बालकाः ॥ बालिकाश्च द्विजा भूयो वैश्याः शूद्राश्च भक्तितः ॥ ३ ॥ इत्येवं श्रावयामास स्वयमेव मुदाऽन्वितः ॥ यष्टिमारोपयामास रम्यस्थाने सुविस्तृते ॥ ४ ॥ ददौ तत्र क्षौमवस्त्रं मालाजालं मनोहरम् ॥ चन्दनागुरुकस्तूरीकुङ्कुमद्रवमेव च ॥ ५ ॥ स्नातः कृताह्निको भक्त्या धृत्वा धौते च वाससी ॥ उवास स्वर्णपीठे च प्रक्षालितपदाम्बुजः ॥६॥ नानाप्रकारपात्रैश्च ब्राह्मणैश्च पुरोहितैः ॥ गोपालैर्गोपिकाभिश्च बालाभिः सह बालकैः ॥ ७ ॥ एतस्मिन्नन्तरे तत्राजग्मुर्नगरवासिनः ॥ महासंभृतसंभारा नानोपायनसंयुताः ॥ ८ ॥ आजग्मुर्मुनयः सर्वे ज्वलन्तं ब्रह्मतेजसा ॥ शान्ताः शिष्यगणैः सार्धं वेदवेदाङ्गपारगाः ॥ ९ ॥ गर्गश्च गालवश्चैव शाकल्यः शाकटायनः ॥ गौतमः करुषः कण्वो वात्स्यः कात्यायनस्तथा ॥ १० ॥ सौभरिर्वामदेवश्च याज्ञवल्क्यश्च पाणिनिः ॥ ऋष्यशृङ्गो गौरमुखो भरद्वाजश्च वामनः ॥११॥ कृष्णद्वैपायनः शृङ्गी सुमन्तुर्जैमिनिः

कचः ॥ पराशरश्च मैत्रेयो वैशम्पायन एव च ॥ १२ ॥ ब्राह्मणाश्च कतिविधा भिक्षुका बन्दिनस्तथा ॥ भूपा वैश्याश्च शूद्राश्च समाजग्मुर्महोत्सवे ॥ १३ ॥ दृष्ट्वा मुनीन्द्रान्नन्दश्च ब्राह्मणान्भूमिपांस्तथा ॥ स्वर्णपीठात्समुत्तस्थौ व्रजाश्चोत्तस्थुरेव च ॥ १४ ॥ प्रणम्य वासयामास मुनीन्द्रान्विप्रभूमिपान् ॥ तेषामनुमतिं प्राप्य तत्रोवास पुनर्मुदा ॥ १५ ॥ पाकं च यष्टिनिकटे कर्तुमाज्ञां चकार ह ॥ पाकप्राज्ञं ब्राह्मणानां शतमानीय सादरम् ॥ १६ ॥ तत्र रत्नप्रदीपाश्च जज्वलुः परितस्तथा ॥ अन्धीभूतं च धूपेन स्थानं तत्सुरभीकृतम् ॥ १७ ॥ नानाविधानि पुष्पाणि माल्यानि विविधानि च ॥ नैवेद्यं च बहुविधमपूर्वं सुमनोहरम् ॥ १८ ॥ तिललड्डुकपूर्णं च मण्डकानां सहस्रकम् ॥ स्वस्तिकैः परिपूर्णं च यष्टिस्थानं च नारद ॥ १९ ॥ कलशानां सहस्रं च पूर्णं शर्करया मुने ॥ यवगोधूमचूर्णानां लड्डुकैर्मधुरैर्वरैः ॥२०॥ घृतपक्वैर्विप्रकृतैः पूर्णानि कलशानि च ॥ वृक्षपक्वानि रम्याणि चारुरम्भाफलानि च ॥२१॥ फलानि परिपक्वानि कालदेशोद्भवानि च॥क्षीराणां कुम्भलक्षाणि दध्नां तावन्ति नारद ॥ २२ ॥ मधूनां कुम्भशतकं सर्पिष्कुम्भसहस्रकम् ॥ कलशानां त्रिलक्षाणि तक्रपूर्णानि निश्चितम् ॥ २३ ॥ घटानां पञ्चलक्षाणि गुडपूर्णानि निश्चितम् ॥ तिलतैलेन पूर्णं च कलशानां सहस्रकम् ॥ २४ ॥ वृषेन्द्राश्च बहुविधा भोगार्हद्रव्यवाहकाः ॥ नानाविधानि पात्राणि सौवर्णराजतानि च ॥ २५ ॥ स्वर्णपीठानि च ब्रह्मन्नाजग्मुर्यष्टिसन्निधिम् ॥ वस्त्राणि वरणार्हाणि चारूणि भूषणानि च ॥ २६ ॥ नानाविधानि वाद्यानि चारूणि मधुराणि च ॥ वादकाः स्वरयन्त्राणि वादयामासुरुत्सवे ॥ २७ ॥ छागलानां सहस्राणि महिषाणां शतानि च ॥ मेषकाणां च लक्षाणि ह्यानयामास तत्र वै ॥२८॥ शतान्येव गण्डकानामाजग्मुर्यष्टिसंनिधिम् ॥ प्रेक्षितानि च सर्वाणि रक्षितानि च रक्षकैः॥२९॥ बालकानां बालिकानां वृक्षाणां वृक्षयोषिताम् ॥ यूनां च युवतीनां च संख्यां कर्तुं च कः क्षमः ॥३०॥ गायकानां च संगीतं नर्तकानां च नर्तनम् ॥ श्रुत्वा दृष्ट्वा जनाः सर्वे मुमुहुः सुमहोत्सवे ॥ ३१ ॥ रंभोर्वशी मेनका च घृताची मोहिनी रतिः ॥ प्रभावती भानुमती विप्रचित्तिस्तिलोत्तमा ॥ ३२ ॥ चन्द्रप्रभा सुप्रभा च रत्नमाला मदालसा ॥ रेणुका रमणी ब्रह्मन्नेता आजग्मुरुत्सवे ॥ ३३ ॥ तासां

नृत्येन गीतेन स्तनास्यश्रोणिदर्शनात् ॥ रूपेण वक्रदृष्ट्या च मूर्च्छां प्रापुश्च मानवाः ॥ ३४ ॥ एतस्मिन्नन्तरे शीघ्रमाजगाम हरिः स्वयम् ॥ गोपालबालकैः सार्धं बलेन बलशालिना॥३५॥दृष्ट्वा तं च जनाः सर्वे संभ्रान्ता हर्षविह्वलाः ॥ उत्तस्थुराराद्वीताश्च पुलकाङ्कितविग्रहाः ॥ ३६॥ क्रीडास्थानात्समायान्तं शान्तं सुन्दरविग्रहम्॥विनोदमुरलीवेणुश्रृङ्गशब्दसमन्वितम् ॥ ३७ ॥ सद्रत्नसारभूषाभिर्भूषितं कौस्तुभेन च ॥ चन्दनागुरुपङ्केन चर्चितं श्यामविग्रहम् ॥ ३८ ॥ शरन्मध्याह्नपद्मास्यं पश्यन्तं रत्नदर्पणे ॥ चारुचन्दनचन्द्रेण कस्तूरीबिन्दुना सह ॥ ३९ ॥ शशाङ्केन यथाऽऽकाशं भालमध्यविराजितम् ॥ मालतीमालया श्यामकण्ठवक्षःस्थलोज्ज्वलम् ॥४०॥ बकपङ्क्त्या यथाऽऽकाशं शारदीयं सुनिर्मलम्॥ चारुणा पीतवस्त्रेण शोभितं श्यामविग्रहम् ॥४१॥ विभान्तं विद्युता शश्वन्नवीनं नीरदं यथा ॥ कुन्दप्रसूनैर्गुञ्जाभिर्बद्धवक्रिमचूडकम् ॥ ४२ ॥ यथेन्द्रधनुषा भाति विभातं भगणैर्नभः ॥ रत्नकुण्डलदीप्त्या च स्मितवक्रसुशोभितम् ॥ ४३ ॥ शरत्प्रफुल्लपद्मं च द्युमणेः किरणैर्यथा ॥ विप्रक्षत्रियवैश्याश्च मुनयो बल्लवा मुने ॥ ४४ ॥ प्रणम्य वासयामासू रत्नसिंहासने शुभे ॥ उवास रत्नपीठे स तेषां मध्ये जगत्पतिः॥ ४५ ॥यथा बभौ शरच्चन्द्रो ज्योतिषामन्तरे च खे ॥ श्रुत्वा तमूचुस्ते सर्वे जगतामीश्वरं परम् ॥ ४६ ॥ स्वेच्छामयं गुणातीतं ज्योतीरूपं सनातनम् ॥ दृष्ट्वा महोत्सवं शीघ्रमुवाच पितरं हरिः ॥ सर्वेषां दुर्लभां नीतिं नीतिशास्त्रविशारदः ॥ ४७ ॥ श्रीकृष्ण उवाच ॥ भोभो बल्लवराजेंद्र किं करोषीह सुव्रत ॥ ४८ ॥ आराध्यः कश्च का पूजा किं फलं पूजने भवेत् ॥ फलेन साधनं किं वा कः साध्यः साधनेन च ॥ ४९ ॥ देवे रुष्टे भवेत्किं वा पूजायाः प्रतिबन्धके ॥ तुष्टो देवः किं ददाति फलमत्रपरत्रकम् ॥ ५० ॥ काचिद्ददात्यत्र फलं परत्रेह न काचन ॥ काचिन्न नोभयत्रापि चोभयत्रापि काचन ॥ ५१ ॥ अवेदविहिता पूजा सर्वहानिकरण्डिका ॥ पूजेयमधुना वा ते किमु वा पुरुषक्रमात् ॥ ५२ ॥ दृष्टो देवस्त्वया कस्मिन्पूजेयं चानुसारिणी ॥ साक्षात्खादति देवस्ते साक्षात्किं वा न खादति ॥ ५३ ॥ साक्षाद्भुङ्क्ते च यो देवः सुप्रशस्तं तदर्चनम् ॥ साक्षात्खादति नैवेद्यं विप्ररूपी जनार्दनः ॥ ५४ ॥ ब्राह्मणे परितुष्टे

च संतुष्टाः सर्वदेवताः ॥ किं तस्य देवपूजायां यो नियुक्तो द्विजार्चने ॥ ५५ ॥ पूजिता ब्राह्मणा येन पूजिताः सर्वदेवताः ॥ देवाय दत्त्वा नैवेद्यं द्विजाय न प्रयच्छति ॥ ५६ ॥ भस्मीभूतं च नैवेद्यं पूजनं निष्फलं भवेत् ॥ विप्राय देवनैवेद्यदानाद्धुवमनन्तकम् ॥५७॥ तुष्टो देवो वरं दत्त्वा प्रयाति च स्वमन्दिरम् ॥ दत्त्वा देवाय नैवेद्यं मूढो भुङ्क्ते स्वयं यदि॥५८॥दत्तापहारी देवस्वं भुक्त्वा च नरकं व्रजेत् ॥ देवदत्तं न भोक्तव्यं नैवेद्यं च विना हरेः ॥५९॥ प्रशस्तं सर्वदेवेषु विष्णुनैवेद्यभोजनम्॥ अन्नं विष्ठा जलं मूत्रं यद्विष्णोरनिवेदितम् ॥ ६० ॥ सर्वेषां च क्रममिदं ब्राह्मणानां विशेषतः ॥ न दत्त्वा वस्तु देवाय दत्तं विप्राय चेत्सुधीः ॥ ६१ ॥ भुक्ता विप्रमुखे देवास्तुष्टाः स्वर्गं प्रयान्ति च ॥ तस्मात्सर्वप्रयत्नेन विप्राणामर्चनं कुरु ॥६२॥ प्रशस्तफलदातॄणामिह लोके परत्र च ॥ जपस्तपश्च पूजा वा यज्ञदानं महोत्सवम् ॥ ६३ ॥ सर्वेषां कर्मणां सारं विप्रतुष्टिश्च दक्षिणा ॥ दक्षिणानां शरीरेषु तिष्ठन्ति सर्वदेवताः ॥ ॥६४॥ पादेषु सर्वतीर्थानि पुण्यानि पादधूलिषु ॥ पादोदके च विप्राणां तीर्थतोयानि सन्ति च ॥ ६५ ॥ तत्स्पर्शात्सर्वतीर्थेषु स्नानजन्यफलं लभेत् ॥ नश्यंति भक्षणाद्रोगा भक्तिभावेन बल्लव ॥६६॥ सप्तजन्मकृतात्पापान्मुच्यन्ते नात्र संशयः ॥ पापं पञ्चविधं कृत्वा यो विप्रं प्रणमेद्व्रजे ॥६७॥ स स्नातः सर्वतीर्थेषु सर्वपापात्प्रमुच्यते ॥ ब्राह्मणस्पर्शमात्रेण मुक्तो भवति पातकी ॥ ६८ ॥ दर्शनान्मुच्यते पापादिति वेदे निरूपितम् ॥ अप्राज्ञो वाऽथ प्राज्ञो वा ब्राह्मणो विष्णुविग्रहः ॥ ६९ ॥ प्रियाः प्राणाधिका विष्णोर्ये विप्रा हरिसेविनः ॥ द्विजानां हरिभक्तानां प्रभावो दुर्लभः श्रुतौ ॥७०॥ येषां पादाब्जरजसा सद्यः पूता वसुन्धरा॥तेषां च पादचिह्नं यत्तीर्थं तत्परिकीर्तितम् ॥ ७१ ॥ तेषां च स्पर्शमात्रेण तीर्थपापं प्रणश्यति ॥ आलिङ्गनात्सदालापात्तेषामुच्छिष्टभोजनात् ॥ ॥ ७२ ॥ दर्शनात्स्पर्शनाच्चैव सर्वपापात्प्रमुच्यते ॥ भ्रमणे सर्वतीर्थानां यत्पुण्यं स्नानतो भवेत् ॥७३॥ हरिदासस्य विप्रस्य तत्पुण्यं दर्शनाल्लभेत् ॥ ये विप्रा हरये दत्त्वा नित्यमन्नं च भुञ्जते ॥७४॥उच्छिष्टभोजनात्तेषां हरेर्दास्यं लभेन्नरः ॥ न दत्त्वा हरये भक्त्या भुञ्जते चेद्भ्रमादपि ॥ ७५ ॥ पुरीषसदृशं वस्तु जलं मूत्रसमं भवेत् ॥ शूद्रश्चेद्धरिभक्तश्च नैवेद्यभोजनोत्सुकः ॥ ७६ ॥ आमान्नं

हरये दत्त्वा कृत्वा पाकं च खादति ॥ विप्रक्षत्रियवैश्यानां शालग्रामशिलार्चने ॥७७॥ अधिकारो न शूद्राणां हरेरप्यर्चने तथा ॥
द्रव्याण्येतानि गोपेन्द्र विप्रेभ्यश्चेन्न दास्यति ॥७८॥ भस्मीभूतानि सर्वाणि भविष्यन्ति न संशयः ॥ अन्नं च सर्वजीवेभ्यः पुण्यार्थं
दातुमर्हति ॥ ७९ ॥ दत्त्वा विशिष्टजीवेभ्यो विशिष्टं फलमाप्नुयात् ॥ अतो दत्त्वा मानुषेभ्यो लभतेऽष्टगुणं फलम् ॥ ८० ॥ शूद्रा
णां द्विगुणं पुण्यं वैश्येभ्योऽन्नं प्रदाय च ॥दत्त्वाऽन्नं क्षत्रियेभ्योऽपि वैश्यानां द्विगुणं भवेत् ॥ क्षत्रियाणां शतगुणं विप्रेभ्योऽन्नं प्रदाय च
॥ ८१ ॥ विप्राणां च शतगुणं शास्त्रज्ञे ब्राह्मणे फलम् ॥ शास्त्रज्ञानां शतगुणं भक्ते विप्रे लभेद्ध्रुवम् ॥ ८२ ॥ स चान्नं हरये दत्त्वा
भुङ्क्ते भक्त्या च सादरम् ॥ विष्णवे विप्रभक्ताय दत्त्वा दातुश्च यत्फलम् ॥ ८३ ॥ तत्फलं लभते नूनं भक्तब्राह्मणभोजने ॥ भक्ते
तुष्टे हरिस्तुष्टो हरौ तुष्टे च देवताः ॥ ८४ ॥ भवन्ति सिद्धाः शाखाश्च यथा मूलनिषेचनात् ॥ द्रव्याण्येतानि देवाय यद्येकस्मै
प्रयच्छति ॥ ८५ ॥ सर्वैं देवाश्च रुष्टाश्चेद्देवैः कः किं करिष्यति ॥ अथवाऽर्द्धं च वस्तूनां देहि गोवर्धनाय च ॥ ८६ ॥ गा वर्धयति
नित्यं यस्तेन गोवर्धनः स्मृतः ॥ गोवर्धनसमस्तात पुण्यवान्न महीतले ॥ ८७ ॥ नित्यं ददाति गोभ्यो यो नवीनानि तृणानि च ॥
तीर्थस्थानेषु यत्पुण्यं यत्पुण्यं विप्रभोजने ॥ ८८ ॥ सर्वव्रतोपवासेषु सर्वेष्वेव तपःसु च ॥ यत्पुण्यं च महादाने यत्पुण्यं हरिसेवने
॥ ८९ ॥ भुवः पर्यटने यत्तु सर्ववाक्येषु यद्भवेत् ॥ यत्पुण्यं सर्वयज्ञेषु दीक्षायां च लभेन्नरः ॥ ९० ॥ तत्पुण्यं लभते प्राज्ञो गोभ्यो
दत्त्वा तृणानि च ॥ भुक्तवन्तीं तृणं यश्च गां वारयति कामतः ॥ ९१ ॥ ब्रह्महत्या भवेत्तस्य प्रायश्चित्ताद्विशुध्यति॥ सर्वें देवा गवा
मङ्गे तीर्थानि तत्पदेषु च ॥ ९२ ॥ तद्गुह्येषु स्वयं लक्ष्मीस्तिष्ठत्येव सदा पितः ॥गोष्पदाक्तमृदा यो हि तिलकं कुरुते नरः॥९३॥
तीर्थस्नातो भवेत्सद्यो जयस्तस्य पदेपदे ॥ गावस्तिष्ठंति यत्रैव तत्तीर्थं परिकीर्तितम् ॥ ९४ ॥ प्राणांस्त्यक्त्वा नरस्तत्र सद्यो मुक्तो
भवेद्ध्रुवम् ॥ ब्राह्मणानां गवामङ्गं यो हन्ति मानवाधमः ॥ ९५ ॥ ब्रह्महत्यासमं पापं भवेत्तस्य न संशयः ॥ नारायणांशान्विप्रांश्च
गाश्च ये घ्नन्ति मानवाः ॥ ९६ ॥ कालसूत्रं च ते यान्ति यावच्चन्द्रदिवाकरौ ॥ इत्येवमुक्त्वा श्रीकृष्णो विरराम च नारद ॥९७॥

आनन्दयुक्तो नन्दश्च तमुवाच स्मिताननः ॥ नन्द उवाच ॥ पौर्वापरीयं पूजेति महेन्द्रस्य महात्मनः ॥ ९८ ॥ सुवृष्टिसाधनी साध्यं
सर्वसस्यमनोहरम् ॥ सस्यानि प्राणिनां प्राणाः सस्याज्जीवन्ति जीविनः॥९९॥ पूजयन्ति व्रजस्थाश्च महेन्द्रं पुरुषक्रमात्॥महोत्सववत्सरान्ते
निर्विघ्नाय शिवाय च ॥ १०० ॥ इत्येवं वचनं श्रुत्वा बलेन सह माधवः ॥ उच्चैर्जहास स पुनरुवाच पितरं मुदा ॥ १ ॥
श्रीकृष्ण उवाच ॥ अहो श्रुतं विचित्रं ते वचनं परमाद्भुतम् ॥ उपहास्यं लोकशास्त्रं वेदेष्वेव विगर्हितम् ॥ २ ॥ निरूपणं नास्ति कुत्र
शक्राद्वृष्टिः प्रजायते ॥ अपूर्वं नीतिवचनं श्रुतमद्य मुखात्तव ॥ ३ ॥ शृणु नीतिं श्रुतिमतां हे तात नानयं वदेः ॥ वचनं सामवेदोक्तं
सन्तो जानन्ति सर्वतः॥४॥ प्रश्नं कुरुष्व मन्त्रांश्च विविधानपि संसदि ॥ ब्रुवन्तु परमार्थं च किमिन्द्राद्वृष्टिरेव च ॥५॥ सूर्याद्धि जायते
तोयं तोयात्सस्यानि शाखिनः ॥ तेभ्योऽन्नानि फलान्येव तेभ्यो जीवन्ति जीविनः ॥६॥ सूर्यग्रस्तं च नीरं च काले तस्मात्समुद्भवः॥
सूर्यो मेघादयः सर्वे विधात्रा ते निरूपिताः ॥ ७ ॥ यत्राब्दे यो जलधरो गजश्च सागरो मतः ॥ सस्याधिपो नृपो मन्त्री विधात्रा ते
निरूपिताः ॥८॥ जलादिकानां सस्यानां तृणानां च निरूपितम् ॥ अब्देऽब्देऽस्त्येव तत्सर्वं कल्पे कल्पे युगे युगे ॥ ९ ॥ हस्ती समुद्रा
दादाय करेण जलमीप्सितम् ॥ दद्याद्घनाय तद्दद्याद्वातेन प्रेरितो घनः ॥ ११० ॥ स्थानेस्थाने पृथिव्यां च कालेकाले यथोचितम्॥
ईशेच्छयाऽऽविर्भूतं च न भवेत्प्रतिबन्धकम् ॥ ११ ॥ भूतं भव्यं भविष्यच्च महत्क्षुद्रं च मध्यमम् ॥ धात्रा निरूपितं कर्म केन तात
निवार्यते ॥ १२ ॥ जगच्चराचरं सर्वं कृतं तेनेश्वराज्ञया ॥ आदौ विनिर्मितं भक्ष्यं पश्चाज्जीव इति स्मृतः ॥ १३ ॥ अभ्यासा
त्स स्वभावो हि स्वभावात्कर्म एव च ॥ जायते कर्मणां भोगो जीविनां सुखदुःखयोः ॥ १४ ॥ यातनाजन्ममरणरोगशोकभ
यानि च ॥ समुत्पत्तिर्विपद्विद्या कविता वा यशोऽयशः ॥ १५ ॥ पुण्यं च स्वर्गवासश्च पापं नरकसंस्थितिः ॥ भुक्तिर्मुक्तिर्हरेर्दास्यं
कर्मणा घटते नृणाम् ॥ १६ ॥ सर्वेषां जनको हीशश्चाभ्यासः शीलकर्मणाम् ॥ धातुश्च फलदाता च सर्वं तस्येच्छया भवेत् ॥१७॥
विनिर्मितो विराडयेन तत्त्वानि प्रकृतिर्जगत् ॥ कूर्मश्च शेषधरणी चाब्रह्मस्तम्ब एव च ॥१८॥ यस्याज्ञया मरुत्कूर्मं धत्ते शेषं बिभ

र्ति[1] सः ॥ शेषो वसुन्धरां मूर्ध्ना सा च सर्वं चराचरम् ॥ १९ ॥ यस्याज्ञया सदा वाति जगत्प्राणो जगत्त्रये ॥ तपति भ्रमणं कृत्वा
भूगोलं सुप्रभाकरः ॥ १२० ॥ दहत्यग्निः संचरते मृत्युश्च सर्वजन्तुषु ॥ उत्पत्तिः शाखिनां काले पुष्पाणि च फलानि च ॥ २१ ॥
स्वेस्वे स्थाने समुद्राश्च तूर्णं मज्जन्त्यधोऽधुना ॥ तमीशं भज भक्त्या च शक्रः किं कर्तुमीश्वरः ॥ २२ ॥ ब्रह्माण्डं च कतिविधमावि
र्भूतं तिरोहितम् ॥ विधेयश्च[2] कतिविधा यस्य भ्रूभङ्गलीलया ॥ २३॥ मृत्योर्मृत्युः कालकालो विधातुर्विधिरेव सः ॥ भज तं शरणं
तात स ते रक्षां करिष्यति ॥२४॥ अहोऽष्टाविंशदिन्द्राणां पतने यदहर्निशम् ॥ विधातुरेव जगतामष्टोत्तरशताधिकः ॥ २५ ॥ निमे
षाद्यस्य पतनं निर्गुणस्यात्मनः प्रभोः ॥ एवंभूते तिष्ठतीशे शक्रपूजा विडम्बनम् ॥२६॥ इत्येवमुक्त्वा श्रीकृष्णो विरराम च नारद॥
प्रशशंसुश्च मुनयो भगवन्तं सभासदः ॥ २७ ॥ नन्दः सपुलको हृष्टः सभायां साश्रुलोचनः ॥ आनन्दयुक्ता मनुजा यदि पुत्रैः परा
जिताः ॥ २८ ॥ श्रीकृष्णाज्ञां समाज्ञाय चकार स्वस्तिवाचनम् ॥ क्रमेण वरणं तत्र सर्वेषां च चकार ह ॥ २९ ॥ पर्वतस्य मुनीं
द्राणां चकार पूजनं तदा ॥ बुधानां ब्राह्मणानां च गवां वह्नेश्च सादरम् ॥ १३० ॥ तत्र पूजासमाप्तौ च क्रतौ च सुमहोत्सवे ॥
नानाप्रकारवाद्यानां बभूव शब्द उल्बणः ॥ ३१ ॥ जयशब्दः शङ्खशब्दो हरिशब्दो बभूव ह ॥ वेदमङ्गलकाण्डं च पपाठ मुनिपुङ्ग
वः ॥३२॥ बन्दिनां प्रवरो डिण्डी कंसस्य सचिवः प्रियः ॥ उच्चैः पपाठ पुरतो मङ्गलं मङ्गलाष्टकम् ॥३३॥ कृष्णः शैलान्तिकं गत्वा
भिन्नां मूर्तिं विधाय च ॥ वस्तु खादामि शैलोऽस्मि वरं वृण्वित्युवाच ह ॥३४॥ उवाच नन्दं श्रीकृष्णः पश्य शैलं पितः पुरः॥ वरं
प्रार्थय भद्रं ते भविता चेत्युवाच ह ॥३५॥ हरेर्दास्यं हरेर्भक्तिं वरं वव्रे स बल्लवः ॥ द्रव्यं भुक्त्वा वरं दत्त्वा सोऽन्तर्धानं चकार ह॥
॥ ३६ ॥ मुनीन्द्रान्ब्राह्मणांश्चैव भोजयित्वा च गोपपाः ॥ बन्दिभ्यो ब्राह्मणेभ्यश्च मुनिभ्यश्च धनं ददौ ॥३७॥ मुनिभ्यो ब्राह्मणेभ्यो
ऽपि दत्त्वा नन्दो मुदाऽन्वितः ॥ रामकृष्णौ पुरस्कृत्य सगणः स्वालयं ययौ ॥३८॥ रौप्यं वस्त्रं सुवर्णं च वरमश्वं मणिं तथा ॥ भक्ष्यं

---

१ बिभर्ति–इ० पा० । २ विधेयाश्च–इ० पा० ।

द्रव्यं बहुविधं बंदिने डिंडिने ददौ ॥ ३९ ॥ स्तुत्वा नत्वा रामकृष्णौ मुनयो ब्राह्मणा ययुः ॥ ययुरप्सरसः सर्वा गन्धर्वाः किंनरास्तथा ॥ १४० ॥ राजानो बल्लवाः सर्वे चाहूता ये महोत्सवे ॥ सर्वे प्रणम्य श्रीकृष्णं ययुः सादरपूर्वकम् ॥ ४१ ॥ एतस्मिन्नन्तरे शक्रः कोपप्रस्फुरिताधरः ॥ मखभंगे बहुविधां निंदां श्रुत्वा सुरेश्वरः ॥ ४२ ॥ मरुद्भिर्वारिदैः सार्धं रथमारुह्य सत्वरम् ॥ जगाम नंद नगरं वृन्दारण्यं मनोहरम् ॥ ४३ ॥ सर्वे देवा ययुः पश्चाद्युद्धशास्त्रविशारदाः ॥ शस्त्रास्त्रपाणयः कोपाद्रथमारुह्य नारद ॥४४॥ वायुशब्दैर्मेघशब्दैः सैन्यशब्दैर्भयानकैः ॥ चकम्पे नगरं सर्वं नन्दो भयमवाप ह ॥४५॥ भार्यां संबोध्य स्वगणमुवाच शोककातरः ॥ रहःस्थलं समानीय नीतिशास्त्रविशारदः ॥ ४६ ॥ नन्द उवाच ॥ हे यशोदे समागच्छ वचनं शृणु रोहिणि ॥ रामकृष्णौ समादाय व्रज दूरं व्रजात्प्रिये ॥ बालका बालिका नार्यो यान्तु दूरं भयाकुलाः ॥ ४७ ॥ बलवन्तश्च गोपालास्तिष्ठंतु मत्समीपतः ॥ पश्चाच्च निर्गमिष्यामो वयं च प्राणसंकटात् ॥४८॥ इत्युक्त्वा बल्लवश्रेष्ठः सस्मार श्रीहरिं भिया ॥ पुटाञ्जलियुतो भूत्वा भक्तिनम्रात्मकन्धरः ॥ काण्वशाखोक्तस्तोत्रेण तुष्टाव ह शचीपतिम् ॥ ४९ ॥ नन्द उवाच ॥ इन्द्रः सुरपतिः शक्रो दितिजः पवनाग्रजः ॥ १५० ॥ सहस्राक्षो भगाङ्गश्च कश्यपाङ्गज एव च ॥ बिडौजाश्च सुनासीरो मरुत्वान्पाकशासनः ॥५१॥ जयन्तजनकः श्रीमाञ्छचीशो दैत्यसूदनः ॥ वज्रहस्तः कामसखो गौतमीव्रतनाशनः ॥ ५२ ॥ वृत्रहा वासवश्चैव दधीचिदेहभिक्षुकः ॥ विष्णुश्च वामनभ्राता पुरुहूतः पुरन्दरः ॥ ५३ ॥ दिवस्पतिः शतमखः सुत्रामा गोत्रभिद्विभुः ॥ लेखर्षभो बलारातिर्जम्भभेदी सुराश्रयः ॥५४॥ संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः ॥ आखण्डलो हरिहयो नमुचिप्राणनाशनः ॥ ५५ ॥ वृद्धश्रवा वृषश्चैव दैत्यदर्पनिषूदनः ॥ षट्चत्वारिंशन्नामानि पापघ्नानि विनिश्चितम् ॥ ५६ ॥ स्तोत्रमेतत्कौथुमोक्तं नित्यं यदि पठेन्नरः ॥ महाविपत्तौ शक्रस्तं वज्रहस्तश्च रक्षति ॥ ५७ ॥ अतिवृष्टिशिलावृष्टिवज्रपाताच्च दारुणात् ॥ कदाचिन्न भयं तस्य रक्षिता वासवः स्वयम् ॥ ५८ ॥ यत्र गेहे स्तोत्रमिदं यश्च जानाति पुण्यवान् ॥ न तत्र वज्रपतनं शिलावृष्टिश्च नारद ॥ ५९ ॥ श्रीनारायण उवाच ॥ स्तोत्रं नंदमुखाच्छ्रुत्वा

चुकोप मधुसूदनः ॥१६०॥ उवाच पितरं नीतिं प्रज्वलन्ब्रह्मतेजसा ॥ कं स्तौषि भीरो को वेन्द्रस्त्यज भीतिं ममान्तिके ॥ ६१ ॥
क्षणार्द्धं भस्मसात्कर्तुं क्षमोऽहमवलीलया ॥ गाश्च वत्सांश्च बालांश्च योषितो हि भयातुराः ॥६२॥ गोवर्धनस्य कुहरे संस्थाप्य तिष्ठ
निर्भयम् ॥ बालस्य वचनं श्रुत्वा तच्चकार मुदाऽन्वितः ॥ ६३ ॥ हरिर्दधार शैलं तं वामहस्तेन दण्डवत् ॥ एतस्मिन्नन्तरे तत्र दीप्तो
ऽपि रत्नतेजसा ॥ ६४ ॥ अन्धीभूतश्च सहसा बभूव रजसाऽऽवृतः ॥ सवातो मेघनिकरश्चच्छाद गगनं मुने ॥ ६५ ॥ वृन्दावने बभूवा
तिवृष्टिरेव निरन्तरम् ॥ शिलावृष्टिर्वज्रवृष्टिरुल्कापातः सुदारुणः ॥ ६६ ॥ समस्तं पर्वतस्पर्शात्पतितं दूरतस्ततः ॥ विफलस्तत्समा
रम्भो यथाऽनीशोद्यमो मुने ॥ ६७ ॥ दृष्ट्वा मोघं च तत्सर्वं सद्यः शक्रश्चुकोप ह ॥ जग्राहामोघकुलिशं दधीच्यस्थिविनिर्मितम् ॥
॥ ६८ ॥ दृष्ट्वा तं वज्रहस्तं च जहास मधुसूदनः ॥ सहस्तं स्तम्भयामास वज्रमेवातिदारुणम् ॥ ६९ ॥ सहामरगणं मोघं चकार स्तं
भनं विभुः ॥ सर्वे तस्थुर्निश्चलास्ते भित्तौ पुत्तलिका यथा ॥ १७० ॥ हरिणा जृम्भितः शक्रः सद्यस्तंद्रामवाप ह ॥ ददर्श सर्वं
तन्द्रायां तत्र कृष्णमयं जगत् ॥ ७१ ॥ द्विभुजं मुरलीहस्तं रत्नालंकारभूषितम् ॥ पीतवस्त्रपरीधानं रत्नसिंहासनस्थितम् ॥७२॥
ईषद्धास्यप्रसन्नास्यं भक्तानुग्रहकातरम् ॥ चन्दनोक्षितसर्वांगमेतत्सर्वं चराचरम् ॥ ७३ ॥ दृष्ट्वाऽद्भुततमं तत्र सद्यो मूर्च्छामवाप ह ॥
जजाप मन्त्रं तत्रैव प्रदत्तं गुरुणा पुरा ॥ ७४ ॥ सहस्रदलपद्मस्थं ददर्श ज्योतिरुल्बणम् ॥ तत्रान्तरे दिव्यरूपमतीव सुमनोहरम् ॥
॥७५॥ नवीनजलदोत्कर्षं श्यामसुन्दरविग्रहम् ॥ सद्रत्नसारनिर्माणज्वलन्मकरकुण्डलम् ॥ ७६ ॥ ज्वलन्मणीन्द्रमकरकिरीटोज्ज्वल
शेखरम् ॥ ज्वलता कौस्तुभेन्द्रेण कण्ठवक्षःस्थलोज्ज्वलम् ॥७७॥ मणिकेयूरवलयमणिमञ्जीररंजितम् ॥ अन्तर्बहिः समं दृष्ट्वा तुष्टाव
परमेश्वरम् ॥ ७८ ॥ इन्द्र उवाच ॥ अक्षरं परमं ब्रह्म ज्योतीरूपं सनातनम् ॥ गुणातीतं निराकारं स्वेच्छामयमनंतकम् ॥
॥ ७९ ॥ भक्तध्यानाय सेवायै नानारूपधरं वरम् ॥ शुक्लरक्तपीतश्यामं युगानुक्रमणेन च ॥ १८० ॥ शुक्लतेजःस्वरूपं च सत्ये
सत्यस्वरूपिणम् ॥ त्रेतायां कुंकुमाकारं ज्वलंतं ब्रह्मतेजसा ॥ ८१ ॥ द्वापरे पीतवर्णं च शोभितं पीतवाससा ॥ कृष्णवर्णं कलौ

कृष्णं परिपूर्णतमं प्रभुम् ॥ ८२ ॥ नवधाराधरोत्कृष्टश्यामसुन्दरविग्रहम् ॥ नन्दैकनन्दनं वन्दे यशोदानन्दनं प्रभुम् ॥८३॥ गोपिका
चेतनहरं राधाप्राणाधिकं परम् ॥ विनोदमुरलीशब्दं कुर्वन्तं कौतुकेन च ॥ ८४ ॥ रूपेणाप्रतिमेनैव रत्नभूषणभूषितम् ॥ कन्दर्पकोटि
सौन्दर्यं बिभ्रतं शान्तमीश्वरम्॥८५॥क्रीडन्तं राधया सार्धं वृन्दारण्ये च कुत्रचित् ॥ कुत्रचिन्निर्जनेऽरण्ये राधावक्षःस्थलस्थितम् ॥८६॥
जलक्रीडां प्रकुर्वन्तं राधया सह कुत्रचित् ॥ राधिकाकबरीभारं कुर्वन्तं कुत्रचिद्वने ॥ ८७ ॥ कुत्रचिद्राधिकापादे दत्तवन्तमलक्तकम्॥
सदा चर्विततताम्बूलं गृह्णन्तं कुत्रचिन्मुदा ॥८८॥ पश्यन्तं कुत्रचिद्राधां पश्यन्तीं वक्रचक्षुषा ॥ दत्तवन्तं च राधायै कृत्वा मालां च कुत्र
चित् ॥ ८९ ॥ कुत्रचिद्राधया सार्धं गच्छन्तं रासमंडलम् ॥ राधादत्तां गले मालां धृतवन्तं च कुत्रचित् ॥ १९० ॥ सार्धं गोपालि
काभिश्च विहरन्तं च कुत्रचित् ॥ राधां गृहीत्वा गच्छन्तं विहाय तां च कुत्रचित् ॥ ९१ ॥ विप्रपत्नीदत्तमन्नं भुक्तवन्तं च कुत्रचित्॥
भुक्तवन्तं तालफलं बालकैः सह कुत्रचित् ॥९२॥ वस्त्रं गोपालिकानां च हरन्तं कुत्रचिन्मुदा ॥ गवां गणं व्याहरन्तं कुत्रचिद्बालकैः
सह ॥ ९३ ॥ कालीयमूर्ध्नि पादाब्जं दत्तवन्तं च कुत्रचित् ॥ विनोदमुरलीशब्दं कुर्वन्तं कुत्रचिन्मुदा ॥ ९४ ॥ गायन्तं रम्यसङ्गीतं
कुत्रचिद्बालकैः सह॥ स्तुत्वा शक्रः स्तवेन्द्रेण प्रणनाम हरिं भिया ॥९५॥ पुरा दत्तेन गुरुणा रणे वृत्रासुरेण च ॥ कृष्णेन दत्तं कृपया
ब्रह्मणे च तपस्यते ॥९६॥ एकादशाक्षरो मन्त्रः कवचं सर्वलक्षणम् ॥ दत्तमेतत्कुमाराय पुष्करे ब्रह्मणा पुरा ॥९७॥ कुमारोऽङ्गिरसे
दत्तं गुरवेऽङ्गिरसा मुने ॥ इदमिन्द्रकृतं स्तोत्रं नित्यं भक्त्या च यः पठेत् ॥ ९८ ॥ स हि प्राप्य दृढां भक्तिमन्ते दास्यं लभेद्ध्रुवम्॥
जन्ममृत्युजराव्याधिशोकेभ्यो मुच्यते नरः ॥ न हि पश्यति स्वप्नेऽपि यमदूतं यमालयम्॥९९॥ नारायण उवाच ॥ इन्द्रस्य वचनं
श्रुत्वा प्रसन्नः श्रीनिकेतनः॥२००॥ प्रीत्या तस्मै वरं दत्त्वा स्थापयामास पर्वतम् ॥ प्रणम्य च हरिं शक्रः प्रययौ स्वगणैः सह ॥१॥
गह्वरस्था जनाः सर्वे प्रजग्मुर्गह्वराद्गृहम् ॥ ते सर्वे मेनिरे कृष्णं परिपूर्णतमं विभुम् ॥ २ ॥ पुरस्कृत्य व्रजस्थांश्च प्रययौ स्वालयं
हरिः ॥ तुष्टाव नंदः पुत्रं तं पूर्णब्रह्म सनातनम् ॥ पुलकाञ्चितसर्वाङ्गो भक्तिपूर्णाश्रुलोचनः ॥ ३ ॥ नन्द उवाच ॥ नमो ब्रह्मण्यदेवा

य गोब्राह्मणहिताय च ॥४॥ जगद्धिताय कृष्णाय गोविन्दाय नमोनमः ॥ नमो ब्रह्मण्यदेवाय ब्रह्मणे परमात्मने ॥ ५ ॥ अनन्तकोटिब्रह्माण्डधामधाम्ने नमोऽस्तु ते ॥ नमो मत्स्यादिरूपाणां जीवरूपाय साक्षिणे ॥६॥ निर्लिप्ताय निर्गुणाय निराकाराय ते नमः॥ अतिसूक्ष्मस्वरूपाय स्थूलात्स्थूलतमाय च ॥७॥ सर्वेश्वराय सर्वाय तेजोरूप नमोऽस्तु ते ॥ अतिप्रत्यक्षरूपाय ध्यानासाध्याय[1] योगिनाम् ॥८॥ ब्रह्मविष्णुमहेशानां वन्द्याय नित्यरूपिणे ॥ धाम्ने चतुर्णां वर्णानां युगेष्वेव चतुर्षु च ॥९॥ शुक्लरक्तपीतश्यामाभिधानगुणशालिने ॥ योगिने योगरूपाय गुरवे योगिनामपि ॥२१०॥ सिद्धेश्वराय सिद्धाय सिद्धानां गुरवे नमः ॥ यं स्तोतुमक्षमो ब्रह्मा विष्णुर्यं स्तोतुमक्षमः ॥११॥ यं स्तोतुमक्षमो रुद्रः शेषो यं स्तोतुमक्षमः ॥ यं स्तोतुमक्षमो धर्मो यं स्तोतुमक्षमो रविः ॥१२॥ यं स्तोतुमक्षमो लम्बोदरश्चापि षडाननः ॥ यं स्तोतुमक्षमाः सर्वे मुनयः सनकादयः ॥१३॥ कपिलो न क्षमः स्तोतुं सिद्धेन्द्राणां गुरोर्गुरुः॥ न शक्तौ स्तवनं कर्तुं नरनारायणावृषी ॥१४॥ अन्ये जडधियः के वा स्तोतुं शक्ताः परात्परम् ॥ वेदा न शक्ता नो वाणी न च लक्ष्मीः सरस्वती ॥१५॥ न राधा स्तवने शक्ता किं स्तुवन्ति विपश्चितः ॥ क्षमस्व निखिलं ब्रह्मन्नपराधं क्षणेक्षणे ॥ १६ ॥ रक्ष मां करुणासिन्धो दीनबन्धो भवार्णवे ॥ पुरा तीर्थे तपस्तप्त्वा पुत्रः प्राप्तः सनातनः ॥ १७ ॥ स्वकीयचरणाम्भोजे भक्तिं दास्यं च देहि मे ॥ ब्रह्मत्वममरत्वं वा सालोक्यादिकमेव वा ॥१८॥ त्वत्पदाम्भोजदास्यस्य कलां नार्हन्ति षोडशीम् ॥ इन्द्रत्वं वा सुरत्वं वा संप्राप्तिं सिद्धिस्वर्गयोः ॥१९॥ राजत्वं चिरजीवित्वं सुधियो गणयन्ति किम् ॥ एतद्यत्कथितं सर्वं ब्रह्मत्वादिकमीश्वर ॥ २२० ॥ भक्तसङ्गक्षणार्द्धस्य नोपमा ते किमर्हति ॥ त्वद्भक्तो यस्त्वत्सदृशः कस्त्वां तर्कितुमीश्वरः ॥२१॥ क्षणार्द्धालापमात्रेण पारं कर्तुं स चेश्वरः ॥ भक्तसङ्गाद्भवत्येव भक्तिं कर्तुमनेकधा ॥ २२ ॥ त्वद्भक्तजलदालापजलसेकेन वर्द्धते ॥ अभक्तालापतापात्तु शुष्कतां याति तत्क्षणम् ॥ ॥ २३ ॥ त्वद्गुणस्मृतिसेकाच्च वर्द्धते तत्क्षणे स्फुटम् ॥ त्वद्भक्त्यङ्कुरमुद्भूतं स्फीतं मानसजं परम् ॥ २४ ॥ न नश्यं वर्द्धनीयं च

---

१ ध्यानसाध्याय--इ० पा० ।

नित्यंनित्यं क्षणेक्षणे ॥ ततः संप्राप्य ब्रह्मत्वं भक्तस्य जीवनाय च ॥ २५ ॥ ददात्येव फलं तस्मै हरिदास्यमनुत्तमम् ॥ संप्राप्य दुर्लभं दास्यं यदि दासो बभूव ह ॥ २६ ॥ सुनिश्चयेन तेनैव जितं सर्वं भयादिकम् ॥ इत्येवमुक्त्वा भक्त्या च नन्दस्तस्थौ हरेः पुरः ॥ २७ ॥ प्रसन्नवदनः कृष्णो ददौ तस्मै तदीप्सितम् ॥ एवं नन्दकृतं स्तोत्रं नित्यं भक्त्या च यः पठेत् ॥२८॥ सुदृढां भक्तिमाप्नोति सद्यो दास्यं लभेद्धरेः ॥ तपस्तप्त्वा यदा द्रोणस्तीर्थे च धरया सह ॥२९॥ स्तोत्रं तस्मै पुरा दत्तं ब्रह्मणा तत्सुदुर्लभम् ॥ हरेः षडक्षरो मन्त्रः कवचं सर्वरक्षणम् ॥२३०॥ इह सौभरिणा दत्तं तस्मै तुष्टेन पुष्करे ॥ तदेव कवचं स्तोत्रं स च मन्त्रः सुदुर्लभः॥ ॥ ३१ ॥ ब्रह्मणोंऽशेन मुनिना नन्दाय च तपस्यते ॥ मन्त्रः स्तोत्रं च कवचमिष्टदेवो गुरुस्तथा ॥ ३२ ॥ या यस्य विद्या प्राचीना न तां त्यजति निश्चितम् ॥ इत्येवं कथितं स्तोत्रं श्रीकृष्णाख्यानमद्भुतम् ॥ सुखदं मोक्षदं सारं भवबन्धविमोचनम् ॥ २३३॥ इति श्रीब्रह्मवैवर्तें महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे इन्द्रयागभञ्जनो नामैकविंशतितमोऽध्यायः ॥२१॥ ॥श्रीनारायण उवाच ॥ एकदा राधिकानाथो बलेन सह बालकैः ॥ जगाम तत्तालवनं परिपक्वफलान्वितम् ॥ १ ॥ वृक्षाणां रक्षिता दैत्यः खररूपी च धेनुकः॥ कोटिसिंहसमबलो देवानां दर्पनाशनः ॥२॥ शरीरं पर्वतसमं कूपतुल्ये च लोचने ॥ ईषापंक्तिसमा दन्तास्तुण्डं पर्वतगह्वरम् ॥ ३ ॥ शतहस्तपरिमिता जिह्वा लोला भयानका ॥ कासारसदृशी नाभिः शब्दस्तस्य भयानकः ॥ ४ ॥ दृष्ट्वा तालवनं बाला हर्षमापुरनिन्दिताः ॥ कौतुकात्कृष्णमूचुस्ते स्मेराननसरोरुहाः ॥ ५ ॥ बाला ऊचुः ॥ हे कृष्ण करुणासिन्धो दीनबन्धो जगत्पते ॥ महाबल बलभ्रातः समस्तबलिनां वर ॥ ६ ॥ अवधानं कुरु विभो क्षणार्द्धं नो निवेदने ॥ क्षुधितानां शिशूनां च भक्तानां भक्तवत्सल ॥ ७ ॥ स्वादूनि सुन्दराण्येव पश्य तालफलानि च ॥ भङ्क्तुं चालयितुं वृक्षान्पातितुं च फलानि च ॥ ८ ॥ नानावर्णानि पुष्पाणि पक्वानि दुर्लभानि च ॥ आज्ञां करोषि चेत्कृष्ण चेष्टां कर्त्तुं वयं क्षमाः ॥९॥ किं त्वत्र दैत्यो बलवान्खररूपी च धेनुकः ॥ अजितस्त्रिदशैः सर्वैर्महाबलपराक्रमः ॥ १० ॥ दुर्निवार्यश्च सर्वेषां कंसस्य सचिवो महान् ॥ हिंसकः सर्वजन्तूनां

वनानामस्ति रक्षिता ॥ ११ ॥ सुविचार्य जगत्कान्त वद नो वदतां वर ॥ युक्तं कार्यमयुक्तं वा कर्तव्यमथ वा न वा ॥ १२ ॥ बालकानां वचः श्रुत्वा भगवान्मधुसूदनः ॥ उवाच मधुरं बालान्वचनं तत्सुखावहम् ॥ १३ ॥ श्रीकृष्ण उवाच ॥ किं वो दैत्याद्भयं बाला यूयं मत्सहचारिणः ॥ वृक्षान्भङ्क्त्वा चालयित्वा फलानि खादताभयम् ॥ १४ ॥ श्रीकृष्णाज्ञां समादाय बालका बलशालिनः ॥ उत्पेतुर्वृक्षशिखरं क्षुधिताश्च फलार्थिनः ॥ १५ ॥ नानाप्रकारवर्णानि स्वादूनि सुन्दराणि च ॥ फलानि पातयामासुः परिपक्वानि नारद ॥ १६ ॥ केचिद्बभञ्जुर्वृक्षांश्च चालयामासुरेव च ॥ केचित्कोलाहलं चक्रुर्ननृतुस्तत्र केचन ॥ १७ ॥ अवरुह्य तरुभ्यश्च बालका बलशालिनः ॥ फलान्यादाय गच्छन्तो ददृशुर्दैत्यपुङ्गवम् ॥ १८ ॥ महाबलं महाकायं घोरं गर्दभरूपिणम् ॥ आगच्छन्तं महावेगात्कुर्वन्तं शब्दमुल्बणम् ॥ १९ ॥ तं दृष्ट्वा रुरुदुः सर्वे फलानि तत्यजुर्भिया ॥ कृष्णकृष्णेति शब्दं च प्रचक्रुर्बहुधा भृशम् ॥ २० ॥ अस्मान्रक्ष समागच्छ हे कृष्ण करुणानिधे ॥ हे सङ्कर्षण नो रक्ष प्राणा नो यान्ति दानवात् ॥ २१ ॥ हे कृष्ण हे कृष्ण हरे मुरारे गोविन्द दामोदर दीनबन्धो ॥ गोपीश गोपेश भवार्णवेऽस्माननन्त नारायण रक्ष रक्ष ॥ २२ ॥ भयेऽभये वाथ शुभेऽशुभे वा सुखेषु दुःखेषु च दीननाथ ॥ त्वया विनाऽन्यं शरणं भवार्णवे न नोऽस्ति हे माधव रक्ष रक्ष ॥ २३ ॥ जयजय गुणसिन्धो कृष्ण भक्तैकबन्धो बहुतरभययुक्तान्बालकान्रक्ष रक्ष ॥ जहि दनुजकुलानामीशमस्माकमन्तं सुरकुलबलदर्पं वर्धयेमं निहत्य ॥ २४ ॥ बालानां विक्लवं दृष्ट्वा बलेन सह माधवः ॥ आजगाम शिशुस्थानं भयहा भक्तवत्सलः ॥ २५ ॥ भयं नास्ति भयं नास्तीत्युक्त्वा दुद्राव सत्वरम् ॥ ईषद्धास्यप्रसन्नास्यो निर्भयं दत्तवाञ्छिशून् ॥ २६ ॥ दृष्ट्वा कृष्णं बलं बाला ननृतुर्विजहुर्भयम् ॥ हरिस्मृतिश्चाभयदा सर्वमङ्गलदायिका ॥ २७ ॥ श्रीकृष्णो दानवं दृष्ट्वा ग्रसन्तं पुरतः शिशून् ॥ बलं संबोध्य बलिनमुवाच मधुसूदनः ॥ २८ ॥ श्रीकृष्ण उवाच ॥ दानवो बलिपुत्रोऽयं नाम्ना साहसिको बली ॥ गर्दभो ब्रह्मशापेन शप्तो दुर्वाससा पुरा ॥ २९ ॥ पापिष्ठो मम वध्योऽयं महाबलपराक्रमः ॥ अहमेनं वधिष्यामि त्वं रक्ष बालकान्बल ॥ ३० ॥

आदाय बालकान्सर्वान्दूरं गच्छेत्युवाच ह ॥ तान्गृहीत्वा बलः शीघ्रं जगाम त्वरयाज्ञया ॥ ३१ ॥ दृष्ट्वा कृष्णं दानवेन्द्रो
महाबलपराक्रमः ॥ जग्रास लीलया कोपाज्ज्वलदग्निशिखोपमम् ॥ ३२ ॥ बभूवातिदाहयुक्तो मर्तुकामोऽतितेजसा ॥ उज्जग्रास पुनर्दैत्यो
विभुं तेजस्विनं भिया ॥३३॥ उज्झितं सन्तमीशं च दृष्ट्वा दैत्यो मुमोच ह॥अतीव सुन्दरं शान्तं ज्वलन्तं ब्रह्मतेजसा ॥३४॥
कृष्णदर्शनमात्रेण बभूवास्य पुरा स्मृतिः ॥ आत्मानं बुबुधे कृष्णं जगतां कारणं परम् ॥ ३५ ॥ तेजःस्वरूपमीशं तं दृष्ट्वा तुष्टाव
दानवः ॥ यथागमं यथाजन्म गुणातीतं श्रुतेः परम् ॥ ३६ ॥ दानव उवाच ॥ वामनोऽसि त्वमंशेन मत्पितुर्यज्ञभिक्षुकः ॥
राज्यहर्ता च श्रीहर्ता सुतलस्थलदायकः ॥ ३७ ॥ बलिर्भक्तिवशो वीरः सर्वेशो भक्तवत्सलः ॥ शीघ्रं त्वं हिन्धि मां पापं शापाद्गर्दभरूपिणम्
॥ ३८ ॥ मुनेर्दुर्वाससः शापादीदृशं जन्म कुत्सितम् ॥ मृत्युरुक्तश्च मुनिना त्वत्तो मम जगत्पते ॥ ३९ ॥ षोडशारेण
चक्रेण सुतीक्ष्णेनातितेजसा ॥ जहि मां जगतां नाथ सद्भक्तिं कुरु मोक्षद ॥४०॥ त्वमंशेन वराहश्च समुद्धर्तुं वसुन्धराम् ॥ वेदानां
रक्षिता नाथ हिरण्याक्षनिपूदनः ॥ ४१ ॥ त्वं नृसिंहः स्वयं पूर्णो हिरण्यकशिपोर्वधे ॥ प्रह्लादानुग्रहार्थाय देवानां रक्षणाय च ॥
॥ ४२ ॥ त्वं च वेदोद्धारकर्ता मीनांशेन दयानिधे ॥ नृपस्य ज्ञानदानाय रक्षायै सुरविप्रयोः ॥ ४३ ॥ शेषाधारश्च कूर्मस्त्वमंशेन
सृष्टिहेतवे ॥ विश्वाधारश्च विश्वस्त्वमंशेनापि सहस्रधृक् ॥४४॥ रामो दाशरथिस्त्वं च जानक्युद्धारहेतवे ॥ दशकन्धरहन्ता च सिन्धौ
सेतुविधायकः ॥४५॥ कलया परशुरामश्च जमदग्निसुतो महान् ॥ त्रिःसप्तकृत्वो भूपानां निहन्ता जगतीपते ॥ ४६ ॥ अंशेन कपिलस्त्वं
च सिद्धानां च गुरोर्गुरुः ॥ मातृज्ञानप्रदाता च योगशास्त्रविधायकः ॥ ४७ ॥ अंशेन ज्ञानिनां श्रेष्ठो नरनारायणावृषी ॥
त्वं च धर्मसुतो भूत्वा लोकविस्तारकारकः ॥४८॥ अधुना कृष्णरूपस्त्वं परिपूर्णतमः स्वयम् ॥ सर्वेषामवताराणां बीजरूपः सनातनः
॥ ४९ ॥ यशोदाजीवनो नित्यो नन्दैकानन्दवर्धनः ॥ प्राणाधिदेवो गोपीनां राधाप्राणाधिकप्रियः ॥५०॥ वसुदेवसुतः शान्तो
देवकीदुःखभञ्जनः ॥ अयोनिसंभवः श्रीमान्पृथिवीभारहारकः ॥ ५१ ॥ पूतनायै मातृगतिं प्रदाता च कृपानिधिः ॥ बककेशि

प्रलम्बानां ममापि मोक्षकारकः ॥ ९२ ॥ स्वेच्छामय गुणातीत भक्तानां भयभञ्जन ॥ प्रसीद राधिकानाथ प्रसीद कुरु मोक्षणम् ॥
॥९३॥ हे नाथ गार्दभीयोनेः[1] समुद्धर भवार्णवात् ॥ मूर्खस्त्वद्भक्तपुत्रोऽहं मामुद्धर्तुं त्वमर्हसि ॥ ९४ ॥ वेदा ब्रह्मादयो यं च मुनीन्द्राः
स्तोतुमक्षमाः ॥ किं स्तौमि तं गुणातीतं पुरा दैत्योऽधुना खरः ॥९५॥ एवं कुरु कृपासिन्धो येन मे न भवेज्जनुः ॥ दृष्ट्वा पादारविन्दं
ते कः पुनर्भवनं व्रजेत् ॥९६॥ ब्रह्मा स्तोता खरः स्तोता नोपहासितुमर्हसि ॥ सदीश्वरस्य विज्ञस्य योग्यायोग्ये समा कृपा ॥ ९७ ॥
इत्येवमुक्त्वा दैत्येन्द्रस्तस्थौ च पुरतो हरेः ॥ प्रसन्नवदनः श्रीमानतितुष्टो बभूव ह ॥९८॥ इदं दैत्यकृतं स्तोत्रं नित्यं भक्त्या च यः
पठेत् ॥ सालोक्यसार्ष्टिसामीप्यं लीलया लभते हरेः॥९९॥ इह लोके हरेर्भक्तिमन्ते दास्यं सुदुर्लभम्॥विद्यां श्रियं सुकवितां पुत्रपौत्रा
न्यशो लभेत् ॥ ६० ॥ श्रीनारायण उवाच ॥ श्रुत्वाऽनुमेने दैत्येन्द्रस्तवनं करुणानिधिः ॥ कथं करोमि संहारमीदृशं भक्तमित्यहो ॥
॥६१॥अनुमन्य स्मृतिं तस्य संजहार हरिः स्वयम् ॥ न हि युक्तो वधः स्तोतुर्दुर्वक्तुर्विधिरीश्वरात् ॥६२॥ दानवो मायया विष्णोर्विस
स्मार पुनः स्वकम्॥दुरुक्तिस्तत्कण्ठदेशे ह्यधिष्ठानं चकार ह॥६३॥उवाच श्रीहरिं दैत्यः कोपात्प्रस्फुरिताधरः ॥ मुने सद्यो मर्तुकामो
दैवग्रस्तो विचेतनः ॥६४॥ दैत्य उवाच॥ ध्रुवं त्वं मर्तुकामोऽसि दुर्बुद्धे मानवार्भक ॥ अद्य प्रस्थापयिष्यामि त्वामहं यममन्दिरम् ॥
॥६५॥आयासि जीवनाकाङ्क्षी मम तालवनं शिशो ॥ न यास्यसि पुनर्गेहं बान्धवं न हि द्रक्ष्यसि ॥६६॥ न कंसो न जरासन्धो नरको
न समो मम ॥ देवाः कम्पन्ति मे नित्यं के चान्ये मत्क्षमा भुवि ॥६७॥ न हि संहारकर्ता च मां संहर्तुं क्षमः शिवः ॥ न च ब्रह्मा न
विष्णुश्च न मृत्युः काल एव च ॥६८॥ मम तालतरून्भङ्क्त्वा पातयित्वा फलानि च ॥ अहंकरोषि सहसा किमहो कस्य तेजसा
॥ ६९ ॥ कस्त्वं वद बटो सत्यं कमनीयोऽतिसुन्दरः ॥ दुर्लभं जीवनं दातुं मह्यं कथमिहागतः ॥७० ॥ इत्युक्त्वा मस्तके कृत्वा
प्रेरयित्वा तु तं बली ॥ दूरतः पातयामास श्रीकृष्णं मरणोन्मुखः ॥ ७१ ॥ पातयित्वा च तं भूमौ विषाणाभ्यां[2] जघान सः॥

---

१ गर्दभयोनेरित्यर्थः । २ खुराभ्यां च– इ० पा ० ।

कृष्णाङ्गस्पर्शमात्रेण तद्विषाणे बभञ्जतुः ॥७२॥ दैत्यो भग्नविषाणश्च तमीशं कोपयन्मुने ॥ जग्रास चर्वणं कर्तुं भग्नदन्तो बभूव ह ॥ ७३ ॥ तेजसा दग्धवक्त्रश्च तमुज्जग्राह तत्क्षणे ॥ जज्वाल व्यथितः कोपाद्ददार खुरतो महीम् ॥ ७४ ॥ घूर्णयित्वा तु लांगूलं शब्दं कृत्वा भयानकम् ॥ स जगाम शिशुस्थानं दुद्रुवुर्बालका भिया ॥ ७५ ॥ बलं च प्रेरयामास मस्तकेन महाबली ॥ बलो मुष्टिं ददौ तस्मै मूर्च्छामाप ततोऽसुरः ॥७६॥ क्षणेन चेतनां प्राप्य जगाम हरिसन्निधिम् ॥ बलमुष्ट्या च व्यथितः पुनर्मूर्च्छामवाप सः ॥ ७७ ॥ पुनश्च चेतनां प्राप्य समुत्तस्थौ व्यथाकुलः ॥ उत्ससर्ज बृहल्लेंडं मूत्रं च भयमाप ह ॥७८॥ क्षणात्संधिक्षणं प्राप्य महाबलपराक्रमः ॥ कृत्वा शिरसि गोविन्दं घूर्णयामास दानवः ॥ ७९ ॥ पातयामास भूमौ तं घूर्णयित्वा पुनःपुनः ॥ उत्पाट्य तालवृक्षं तं ताडयामास माधवः ॥८०॥ यथा खड्गप्रहारेण दानवस्य भवेद्व्यथा ॥ तथा बभूव दैत्यस्य तालवृक्षस्य ताडनात् ॥८१॥ गोवर्धनं समुत्पाट्य घातयामास तं विभुः ॥ पपात वेगाच्छैलेन्द्रस्तस्योपरि महामुने ॥८२॥ पर्वतस्य प्रहारेण मूर्च्छामाप महाबलः॥ बभूव जर्जराङ्गश्च रुधिरं च समुद्वमन् ॥ ८३ ॥ क्षणेन चेतनां प्राप्य समुत्तस्थौ रुषाऽसुरः ॥ गृहीत्वा पर्वतश्रेष्ठं प्रेरयामास माधवम् ॥ ८४ ॥ दृष्ट्वा शैलमुत्पतन्तं वेगेन मधुसूदनः ॥ जग्राह दक्षिणकरे यथेक्षुदण्डवत्प्रभुः ॥ ८५ ॥ पूर्वस्थाने पर्वतं तं स्थापयामास कौतुकात् ॥ गृहीत्वा दैत्यकर्णाग्रं पातयामास दूरतः ॥ ८६ ॥ उत्पत्य च महावेगाच्चकार वेष्टनं हरेः ॥ पृथिवीं घर्षयामास तीक्ष्णाग्रेण खुरेण च ॥ ८७ ॥ प्रगृह्य श्रीहरिं वेगात्कृत्वा मूर्ध्नि महासुरः ॥ उत्पपात मनोयायी लीलया लक्षयोजनम् ॥ ८८ ॥ प्रहरं च तयोर्युद्धं निर्लक्षे च बभूव ह ॥ ततो गृहीत्वा श्रीकृष्णं पपात धरणीतले ॥ ८९ ॥ पुनर्मुहूर्तं युद्धं च बभूव भूतले तयोः ॥ मुदा हरिः प्रशशंस प्रहस्य दानवेश्वरम् ॥ ९० ॥ मद्भक्तस्य बलेः पुत्रं धन्यं तज्जीवनं परम्॥स्वस्त्यस्तु ते दानवेन्द्र वत्स निर्वाणतां व्रज ॥ ९१ ॥ मद्दर्शनं स्वस्तिबीजं परं निर्वाणकारणम् ॥ सर्वाधिकं सर्वपरं लभ स्थानं मनोहरम् ॥ ९२ ॥ इत्येवमुक्त्वा श्रीकृष्णः सस्मार चक्रमुत्तमम् ॥ सूर्यकोटिसमं दीप्त्या जग्राह तत्सुदर्शनम् ॥९३॥ चिक्षेप भ्रामयित्वा च षोडशारमनुत्तमम् ॥ चिच्छेद

लीलयाऽवध्यं ब्रह्मविष्णुमहेश्वरैः ॥ ९४ ॥ पपात मस्तकं भूमौ दानवस्य महात्मनः ॥ तेजःसमूह उत्तस्थौ शतसूर्यसमप्रभः
॥ ९५ ॥ विलोक्य हरिलोकं संश्लिष्टं कृष्णपदाम्बुजे ॥ संप्राप्य परमं मोक्षमहो दानवपुङ्गवः ॥ ९६ ॥ गगनस्थाः सुराः सर्वे
मुनयश्च भृशं मुदा ॥ पारिजातप्रसूनानां चक्रुस्ते तत्र वर्षणम् ॥९७॥ नेदुर्दुन्दुभयः स्वर्गे ननृतुश्चाप्सरोगणाः ॥ जगुर्गन्धर्वनिकरास्तुष्टुवुर्मुनयो मुदा ॥ ९८ ॥ स्तुत्वा जग्मुः सुराः सर्वे मुनयो हर्षविह्वलाः ॥ धेनुकस्य वधं दृष्ट्वा तत्राजग्मुश्च बालकाः ॥ ९९ ॥
बलश्च बलिनां श्रेष्ठस्तुष्टाव पुरुषोत्तमम् ॥ तुष्टुवुर्बालकाः सर्वे ननृतुश्च मुदाऽन्विताः ॥ १०० ॥ दत्त्वा कृष्णबलाभ्यां च प्रपक्वानि
फलानि च ॥ सर्वाणि भक्षयामासुर्बालाः प्रहृष्टमानसाः ॥ १०१ ॥ भुक्त्वा पीत्वा हरिः शीघ्रं बलेन बालकैः सह ॥ जगाम स्वालयं
ब्रह्मन्निहत्य दानवेश्वरम्॥१०२॥इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे धेनुकवधो नाम द्वाविंशोऽध्यायः
॥ २२ ॥ नारद उवाच ॥ केन पापेन बलिजो गर्दभत्वमवाप ह ॥ दुर्वासाः केन दोषेण शशाप दानवेश्वरम् ॥ १ ॥ केन
पुण्येन वा नाथ बलिनः श्रीहरेः पदम् ॥ सहसैकत्वमुक्तिं च संप्राप दानवाधिपः ॥ २ ॥ मुने सर्वं सुविस्तार्य वद संदेहभञ्जन ॥
अहो कविमुखे काव्यं नूतनंनूतनं पदेपदे ॥ ३ ॥ श्रीनारायण उवाच ॥ शृणु वत्स प्रवक्ष्येऽहमितिहासं पुरातनम् ॥ पुरा श्रुतं
धर्मवक्त्रात्पर्वते गन्धमादने ॥ ४ ॥ पाद्मकल्पे च वृत्तान्तं विचित्रं सुमनोहरम् ॥ नारायणकथोपेतं कर्णपीयूषमुत्तमम् ॥ ५ ॥ यत्र
कल्पे कथा चेयं तत्र त्वमुपबर्हणः ॥ आकल्पजीवी सश्रीकः सुन्दरः स्थिरयौवनः ॥ ६ ॥ पंचाशत्कामिनीनां च पतिः शृङ्गारतत्परः ॥ वरेण ब्रह्मणस्त्वं च सुकण्ठो गायनेश्वरः ॥ ७ ॥ अनुक्षणं पपुस्तास्ते सुन्दरं मुखपङ्कजम् ॥ निमेषरहिताः सर्वाः
कामबाणप्रपीडिताः ॥ ८ ॥ तासां प्राणैश्च घटितो विधिना त्वमिव श्रुतम् ॥ दिवानिशं सहचरा न जीवन्ति त्वया विना ॥
॥ ९ ॥ पुष्पोद्याने च रहसि स्थानेस्थाने मनोरमे ॥ गह्वरेषु च शैलानां कन्दरेषु नदीषु च ॥ १० ॥ काननेषु च रम्येषु
श्मशाने जन्तुवर्जिते ॥ यथामनोरथं ताश्च क्रीडां चक्रुस्त्वया सह ॥ ११ ॥ तदा दैवाद्विधेः शापाद्भूत्वा दासीसुतो भवान् ॥

अधुना ब्रह्मणः पुत्रो वैष्णवोच्छिष्टभोजनात् ॥ १२ ॥ असंख्यकल्पजीवी च वैष्णवप्रवरो महान् ॥ ज्ञानदृष्ट्या सर्वदर्शी प्रियशिष्यश्च धूर्जटेः ॥ १३ ॥ तस्य कल्पस्य वृत्तान्तं मुने मत्तो निशामय ॥ विस्तार्य दैत्यवृत्तांतं कथयामि सुधोपमम् ॥१४॥ एकदैव बलेः पुत्रो नाम्ना साहसिको बली ॥ स्वतेजसा सुराञ्जित्वा प्रतस्थे गन्धमादनम् ॥ १५ ॥ चन्देनोक्षितसर्वाङ्गो रत्नभूषणभूषितः ॥ रत्नसिंहासनस्थश्च बहुसैन्यसमन्वितः ॥ १६ ॥ एतस्मिन्नन्तरे तेन पथा याति तिलोत्तमा ॥ रूपेणाप्सरसां श्रेष्ठा नानावेषविधायिनी ॥ १७ ॥ चारुचम्पकवर्णाभा रत्नाभरणभूषिता ॥ नवयौवनसम्पन्ना कामबाणप्रपीडिता ॥ १८ ॥ ईषद्धास्यप्रसन्नास्या दिव्यवस्त्रं सुबिभ्रती ॥ वक्रभ्रूभङ्गयुक्ता सा गजेन्द्रमन्दगामिनी ॥ १९ ॥ स्तनमूरुं मुखेन्दुं च दृष्ट्वा साहसिको युवा ॥ वायुना मुक्तवस्त्रायास्तस्या मूर्च्छामवाप ह ॥ २० ॥ सा ददर्श बलेः पुत्रमतीव सुमनोहरम् ॥ प्रफुल्लमालतीमालां बिभ्रतं नवयौवनम् ॥ २१ ॥ शरत्पार्वणचन्द्रास्यं सुस्मितं सुमनोहरम् ॥ दृष्ट्वा तं विस्मिता कामात्कटाक्षं च चकार सा ॥ २२ ॥ क्रीडार्थे चन्द्रलोकं च गच्छन्ती चन्द्रकामुकी ॥ तस्थौ केन च्छलेनैव मत्ता शृङ्गारलालसा ॥ २३ ॥ दर्शंदर्शं च तस्यास्यं प्रहस्य वक्रचक्षुषा ॥ मुखस्याच्छादनं चक्रे वाससा सा पुनःपुनः ॥ २४ ॥ पुलकांकितसर्वाङ्गं धर्मकर्मसमन्वितम् ॥ बभूव काममत्ताया योनौ कण्डूयनं जलम् ॥ २५ ॥ विसस्मार शशधरं बलिपुत्रमनोरथा ॥ अहो को वेद भुवने दुर्ज्ञेयं पुंश्चलीमनः ॥ २६ ॥ पुंश्चल्यां यो हि विश्वस्तो विधिना स विडम्बितः ॥ बहिष्कृतश्च यशसा धर्मेण स्वकुलेन च॥२७॥वाञ्छितं नूतनं प्राप्य विनश्यति पुरातनम् ॥ तदा स्वकर्मसाध्या सा को वा तस्याः प्रियोऽप्रियः ॥२८॥ दैवे कर्मणि पैत्र्ये च पुत्रे बन्धौ न भर्तरि ॥ दारुणं पुंश्चलीचित्तं सदा शृङ्गारकर्मणि ॥ २९ ॥ प्राणाधिकं रतिज्ञं साऽमृतदृष्ट्या च पुंश्चली ॥ रत्नप्रदं रत्नविज्ञं विषदृष्ट्या हि पश्यति ॥ ३० ॥ सर्वेषां स्थलमस्त्येव पुंश्चलीनां न कुत्रचित् ॥ दारुणा पुंश्चली जातिर्नरघातिभ्य एव च ॥३१॥ निष्कृतिः सर्वभोगान्ते सर्वेषामस्ति निश्चितम्॥ न पुंश्चलीनां विप्रेन्द्र यावच्चन्द्रदिवाकरौ ॥ ३२ ॥ अन्यासां कामिनीनां च कीटं हन्तुं च या दया ॥ सा नास्ति पुंश्चलीनां तु कान्तं

हन्ति पुरातनम् ॥ ३३ ॥ कान्तं दृष्ट्वा हिनस्त्येव सोपायेनावलीलया ॥ रतिज्ञं नूतनं प्राप्य विषतुल्यं पुरातनम् ॥ ३४ ॥ पृथिव्यां यानि पापानि पुंश्चलीष्वेव भारते ॥ तिष्ठन्ति ताभ्यो न पराः पापिष्ठाः सन्ति केचन ॥ ३५ ॥ पुंश्चलीपरिपक्वान्नं सर्वपातकनिश्चितम् ॥ दैवे कर्मणि पैत्र्ये च न देयं च तथा जलम् ॥ ३६ ॥ अन्नं विष्ठा जलं मूत्रं पुंश्चलीनां च निश्चितम् ॥ दत्त्वा पितृभ्यो देवेभ्यो भुक्त्वा च नरकं व्रजेत् ॥३७॥ शतवर्षं कालसूत्रे पचत्येव सुदारुणे ॥ घोरान्धकारे कृमयस्तं दशन्ति दिवानिशम्॥ ॥ ३८ ॥ पुंश्चल्यन्नं च यो भुङ्क्ते दैवाद्यदि नराधमः ॥ सप्तजन्मकृतं पुण्यं तस्य नश्यति निश्चितम् ॥ ३९ ॥ आयुः श्रीयशसां हानिरिह लोके परत्र च ॥ तस्माद्यत्नाद्रक्षणीयं पाकपात्रं कलत्रकम् ॥ ४० ॥ पुंश्चलीदर्शने पुण्यं यात्रासिद्धिर्भवेद्ध्रुवम् ॥ स्पर्शने च महापापं तीर्थस्नानाद्विशुध्यति ॥ ४१ ॥ स्नानं दानं व्रतं चैव जपश्च देवपूजनम् ॥ निष्फलं पुंश्चलिनां च भारते जीवनं वृथा ॥ ॥ ४२ ॥ कथितं कुलटाख्यानं दुर्ज्ञेयं च यथागमम् ॥ संवादं च तयोस्तत्र प्रकृतं शृणु नारद ॥ ४३ ॥ स पुनश्चेतनां प्राप्य तां दृष्ट्वैव बलेः सुतः ॥ कामातुरः प्रमत्तश्च जगाम कुलटान्तिकम् ॥ ४४ ॥ उवाच कुटिलापाङ्गी पीनश्रोणिपयोधराम् ॥ व्रीडया वाससा वक्रमाच्छन्नं कुर्वती मुदा ॥ ४५ ॥ साहसिक उवाच ॥ कासि त्वं कस्य कन्यासि कस्य कान्तासि कामिनि ॥ स्वयं क्व यासि कं सुभ्रूः पुण्यवन्तं मनोहरम् ॥ ४६ ॥ कल्पान्ते तपसा पूतं भोक्तुं त्वामेव सुन्दरि ॥ यं तं यासि याहि सा त्वं भृत्यं मां कर्तुमर्हसि ॥४७॥ क्रीणीहि रतिपुण्येन मां भृत्यं रतिलोलुपम् ॥ शृङ्गारलोलुपा त्वं च शृङ्गारं देहि कामुकि ॥ ४८ ॥ त्वया सह ममाश्लेषो विधिना च विनिर्मितः ॥ निरूपितं यत्तेनैव वार्यते केन तत्प्रिये ॥ ४९ ॥ वाक्यं पीयूषसदृशं सस्मितं वद सुन्दरि ॥ शीघ्रं भुजलतापाशैर्बन्धनं कुरु निर्जने ॥५०॥ आसनं देहि कल्याणि स्वोरुं कनकसन्निभम् ॥ स्तनमण्डलकुम्भं च पात्रयोग्यं प्रदर्शय ॥५१॥ तीक्ष्णास्त्रेण कटाक्षेण जर्जरं कुरु भामिनि ॥ कामसर्पक्षतं पादस्पर्शनेनारुजं कुरु ॥ ५२ ॥ अधरोष्ठामृतं स्वादु देहि मेक्षुधिताय च ॥ पक्वदाडिमबीजाभं दन्तं दर्शय सुन्दरम्॥५३॥गम्भीरनाभिं त्रिवलीं द्रष्टुमिच्छामि सुन्दरि ॥ नीवीप्रमोक्षणं कर्तुमिच्छा मे वर्तते सदा ॥५४॥

श्रोणीं पश्यामि ललितां मुनिमानसमोहिनीम् ॥ शरन्मध्याह्नपद्मानां प्रभामोचनलोचनाम् ॥ ५५ ॥ शरत्पार्वणचन्द्रास्यं प्रसन्नं च
प्रदर्शय ॥ सा च तद्वचनं श्रुत्वा तमुवाच स्मरातुरा ॥ ५६ ॥ दृष्ट्वाऽऽर्तं कामबाणेन मानसंक्षयकामिनी ॥ तिलोत्तमोवाच ॥ पतिस्त्व
त्सदृशो नाथ कामिनीनां मनीषितः ॥ ५७ ॥ बलिपुत्रोऽसि धर्मिष्ठो रूपवान्गुणवान्युवा ॥ शृङ्गारनिपुणः कान्तः कामशास्त्रविशा
रदः॥५८॥सदा मनोज्ञः स्त्रीणां त्वं सुवेषश्च स्वभावतः॥सुवेषं सुन्दरं शान्तं कान्तं दान्तमरोगिणम्॥५९॥शृङ्गारज्ञं गुणज्ञं त्वां युवानं
रसिकं शुचिम् ॥ स्त्रीमनोज्ञं दयालुं च बलिष्ठं सन्तमीश्वरम् ॥ दातारमनुरक्तं च कान्तमिच्छति कामिनी ॥६०॥ एते सर्वे गुणाः कान्त
सन्ति कान्ते त्वयि ध्रुवम्॥त्वां न वाञ्छन्ति याः कान्तास्ता अविज्ञाश्च वञ्चिताः ॥६१॥ संतोषं ते करिष्यामि समागम्य विधोर्गृहात्॥
वेषं कृत्वा तु चन्द्रार्थं यात्राऽद्य तस्य कामिनी ॥ अन्याश्लेषणमात्रेण भविता धर्मलङ्घना ॥ ६२ ॥ याश्च धर्मान्न रक्षन्ति तासां
च जीवनं वृथा ॥ चन्द्राश्लेषं न जानन्ति यास्ता मूढाः प्रकीर्तिताः ॥ ता एव मातृगर्भस्था न प्राज्ञाः पौरुषे रसैः ॥ ६३ ॥ स्ववैद्यौ
मदनश्चन्द्रो मरुत्वान्नलकूबरः ॥ एभिर्नालिङ्गिता यास्ता वञ्चिता रतिकर्मभिः ॥ ६४ ॥ दिवानिशं मानसं मे तेषां क्रीडां च
चिन्तयेत् ॥ विशेषतः कामदेवो निपुणो रतिकर्मणि ॥ ६५ ॥ चन्द्रश्शृङ्गारमाश्लेषमालापममृताधिकम् ॥ अद्य तस्य रतिदिनं तेन
तच्चिन्तयेन्मनः ॥ ६६ ॥ तिलोत्तमावचः श्रुत्वा जहास बलिनन्दनः ॥ सकामश्च सपुलकस्तामुवाच रहःस्थले ॥ ६७ ॥ साहसिक
उवाच ॥ ब्रह्मणा निर्मिता त्वं च कौतुकेन तिलोत्तमे ॥ अतो वरा चाप्सरसां विदग्धरसिकेश्वरी ॥ ६८ ॥ सुन्दोपसुन्दयोर्नाश
निमित्तेन प्रयत्नतः ॥ सर्वरूपगुणाधारा विधिना च कृता पुरा ॥ ६९ ॥ सर्वं जानासि सर्वज्ञे विज्ञा सुरतकर्मणि ॥ हर्षेण श्रोतुमि
च्छामि वद वो मानसं वचः ॥७०॥ अतिप्रियश्च को वा च कः स्वभावो वरानने ॥ अवश्यं गोपनीयं च श्रोतुमिच्छामि सुन्दरि ॥
॥ ७१ ॥ गन्धर्वाणां सुराणां च राज्ञां पुण्यवतामपि ॥ सर्वेषां प्राणतुल्या त्वमेषु ते कः परः प्रियः ॥ ७२ ॥ असुरस्य वचः श्रुत्वा प्रह
स्य सा तिलोत्तमा ॥ मुखमाच्छादनं चक्रे विलोक्य वक्रचक्षुषा ॥ ७३ ॥ सत्यं सारमन्तरस्थमव्यक्तमतिगोपनम् ॥ उवाच मान

सं वाक्यमज्ञातं विदुषामपि ॥ ७४ ॥ ॥ तिलोत्तमोवाच ॥ ॥ कथनीयं साहसिक पुंश्चलीनां मनोवचः ॥ स्त्रीजातीनां च सर्वा
साम्रुपहासकरं परम् ॥ ७५ ॥ सर्वेषामपि दुर्ज्ञेयं चरितं योषितामपि ॥ विशेषतोऽपि दुर्ज्ञेयं पुंश्चलीनां मनोवचः ॥ ७६ ॥
वेदवेदाङ्गशास्त्रान्तं सर्वं जानाति पंडितः ॥ कान्त नांतं विजानाति दिशामाकाशयोषिताम् ॥ ७७ ॥ विषादप्यप्रियो वृद्धो रत्नादपि
च योषिताम् ॥ युवा सर्वस्वहर्ता चेत्प्राणेभ्योऽपि परः प्रियः ॥७८॥ युवानं सुन्दरं दृष्ट्वा ह्यार्ता भवति पुंश्चली ॥ विशेषतः सुवेषं च
दृष्ट्वैव हतचेतना ॥ ७९ ॥ निमेषरहिता तस्य लोचनाभ्यां पिबेन्मुखम् ॥ योनौ जलं क्षरेत्तस्याः सद्यः कुण्डूयनं भवेत् ॥ ८० ॥
मनोऽतिलोलमस्थैर्यं सर्वाङ्गानि चकम्पिरे ॥ जडीभूतं शरीरं च प्रदग्धं मदनानलात् ॥ ८१ ॥ संप्राप्य तं चेद्रहसि साऽऽलापं कुरुते
स्फुटम् ॥ सकटाक्षं स्मेरवक्त्रं दर्शयित्वा पुनः पुनः ॥ ८२ ॥ तथा यदि वशं कर्तुं न शशाक जितेन्द्रियम् ॥ स्वमङ्गं दर्शयित्वा तम
न्तर्वाक्यं स्फुटं वदेत् ॥ ८३ ॥ दुःसाध्ये नायके दुःखं भवेदाजन्मजन्मनि ॥ तत्तुल्यं तत्परं प्राप्य तं विस्मरति पुंश्चली ॥ ८४ ॥
पुंश्चलीनामप्रियः कः कः प्रियो वा महीतले ॥ योऽतिशृङ्गारनिपुणः स च प्राणाधिकः प्रियः ॥ ८५ ॥ पूर्वजारं पतिं पुत्रं भ्रातरं
पितरं प्रसूम् ॥ विशिष्टं नूतनं प्राप्य सर्वं त्यजति लीलया ॥ ८६ ॥ न दानेन न मानेन सत्येन स्तवनेन वा ॥ नोपकारेण प्रीत्या
वा सा साध्या सुरतिं विना ॥८७॥ शयने भोजने चापि स्वप्ने ज्ञाने दिवानिशम् ॥ नित्यं सत्पुरुषाश्लेषं स्मरन्ति कुलटाः स्त्रियः ॥
॥ ८८ ॥ शृङ्गारनिपुणानां च ध्यानसाध्या चिरं परम्॥दारुणा पुंश्चलीजातिः प्रार्थयेच्च नवंनवम् ॥८९॥ सर्वासां कुलटानां च चरित्रं
कथितं मया ॥ अकथ्यं गोपनीयं च मम हृद्वचनं शृणु॥९०॥ मम सन्ति प्रियतरा गन्धर्वेषु[1] सुरेषु च ॥ युवानो रतिशूराश्च कामशास्त्र
विशारदाः ॥९१॥ विशेषतः शशधरे स्नेहो मे विद्यते परः ॥ ततोऽतिरिक्तः सर्वस्मादपि कामः प्रियो मम ॥९२॥ प्रियो मे कामस
दृशो न भूतो न भविष्यति ॥ स्मरस्य स्मरणात्तूर्णं सुस्निग्धं मानसं मम ॥ ९३ ॥ इत्येवं कथितं सर्वमात्मनो योषितामपि ॥

---

[1] गन्धर्वेषूरगेषु च—इ० पा० ।

आज्ञां कुरु महाराज यास्यामि चन्द्रसन्निधिम् ॥ ९४ ॥ चन्द्रस्थानात्तव स्थानं समागत्य सुनिश्चितम् ॥ संतोषं तव दैत्येन्द्र करिष्यामि
न संशयः ॥ ९५ ॥ श्रुत्वैवं बलिपुत्रश्च जहासोच्चैः पुनः पुनः ॥ सा वक्रचक्षुषाऽऽलोक्य तं जहास स्मरातुरा ॥ ९६ ॥ छलेन दर्शया
मास कठिनं स्तनयोर्युगम् ॥ चारुचम्पकवर्णाभं वर्तुलं पीनमुच्छ्रितम् ॥ ९७ ॥ श्रोणीं सुकठिनां रम्यां रम्भास्तम्भविनिन्दिनीम् ॥
सकटाक्षं स्मेरमुखं कपोलं पुलकाञ्चितम् ॥ ९८ ॥ रहःस्थानं समासाद्य कामेन हतचेतना ॥ पुलकाञ्चितसर्वाङ्गी लोचनाभ्यां पपौ
मुखम् ॥ ९९ ॥ तस्य रूपं च वेषं च दर्शंदर्शं पुनःपुनः ॥ मुखस्याच्छादनं भावात्कुर्वती सूक्ष्मवाससा ॥ १०० ॥ अतिकामातुरां
दृष्ट्वा सुप्राज्ञो बलिनन्दनः ॥ पप्रच्छ कामिनां कामी भावं विज्ञातुमुत्सुकः ॥ १०१ ॥ साहसिक उवाच ॥ किं करिष्यसि मां सत्यं
वद पङ्कजलोचने ॥ कार्यान्तरं करिष्यामि सुचिरं स्थातुमक्षमः ॥१०२॥ कामिनीषु बलात्कारो न धर्मो धर्मिणां प्रिये ॥ विशेषतोऽतिवि
दुषां नास्माकं स्वकुलोचितः ॥ १०३ ॥ शृङ्गारं देहि वा गच्छ रतिं कर्तुं सुरान्तिके ॥ कः क्षमो वा वशीकर्तुं पुंश्चलीं बहुगामि
नीम् ॥ १०४ ॥ दानवस्य वचः श्रुत्वा शुष्ककण्ठोष्ठतालुका ॥ आत्मानमधमंमन्या भिद्यमाना स्मरास्त्रतः ॥ १०५ ॥ तिलोत्त
मोवाच ॥ ॥ कथमेवं ब्रूहि त्वं मे कान्तः प्राणाधिकः प्रियः ॥ कथं वा कोपयुक्तोऽसि कुरु कार्यं मनीषितम् ॥ १०६ ॥ त्वामेवं
विमुखं कृत्वा यामि चन्द्रान्तिकं यदि ॥ तवाभिशापात्तत्रैव सद्यो विघ्नो भविष्यति ॥ १०७ ॥ विहारं कुरु भद्रं ते करिष्यति हरिः
स्वयम् ॥ पदेपदे शुभं तस्य यः स्त्रीमानं च रक्षति ॥१०८॥ अवमन्य स्त्रियं मूढो यो याति पुरुषाधमः ॥ पदेपदे तदशुभं करोति
पार्वती सती ॥ १०९ ॥ तिलोत्तमावचः श्रुत्वा जहास बलिनन्दनः ॥ कामशास्त्रेषु निष्णातस्तद्भावं बुबुधे सुधीः ॥ ११० ॥ भावं
विज्ञाय भावज्ञः कामशास्त्रविशारदः ॥ करे धृत्वा समाश्लिष्य चुचुम्ब मुखपङ्कजम् ॥ १११ ॥ जगाम च तया सार्धं गन्धमादनग
ह्वरम् ॥ ददर्श तत्र गत्वा च स्थानं जन्तुविवर्जितम् ॥ ११२ ॥ संस्थाप्य रत्नदीपांश्च धूपं च सुमनोहरम् ॥ शय्यां रतिकरीं कृत्वा
सुष्वाप च तया सह ॥ ११३ ॥ नानाप्रकारशृङ्गारं चकार काममोहितः ॥ तिलोत्तमा तं बुबुधे सुरादपि विचक्षणम् ॥ ११४ ॥

विपरीतरतौ तुष्टा बभूव रसिकेश्वरी ॥ दिवानिशं न बुबुधे नवसंगममूर्च्छिता ॥ ११५ ॥ तिलोत्तमा कामभावाद्बलिपुत्रमुवाच ह॥
कृत्वा वक्षसि प्राणेशं स्तनयोरन्तरे मुदा ॥ ११६ ॥ तिलोत्तमोवाच ॥ कदा द्रक्ष्याम्यहं कान्त मुखचन्द्रं मनोहरम् ॥ एवंभूतं शुभ
दिनं कदा मे भविता पुनः ॥ ११७ ॥ अयि किं रूपमाश्चर्यं गुणो वा तव दानव ॥ ध्रुवं शृङ्गारनिपुणस्त्वत्परो नास्ति कश्चन ॥११८॥
मां विस्मरसि कालेन पुरुषः षट्पदो यथा ॥ स्त्रीणां सत्पुरुषाश्लेष आजीवं मनसि स्थितः ॥ ११९ ॥ सत्संगमः शुभदिने पुण्या
त्पुण्यवतां भवेत् ॥ सद्विच्छेदो दुःखहेतुर्मरणादतिरिच्यते ॥१२०॥ पीयूषभोजनात्स्वर्गवासादपि च दुर्लभः ॥ सत्संगमः सुखमयो
ऽप्यसत्सङ्गो विषाधिकः ॥ १२१ ॥ क्षणं तिष्ठ महाराज पुनरालिंगनं कुरु ॥ त्वया सार्धं मम प्राणा यास्यन्ति चेतसा सह ॥१२२॥
इत्येवमुक्त्वा कुलटा कृत्वा वक्षसि सादरम् ॥ पुमंगसंगोत्पुलका मूर्च्छामाप सुखेन च ॥ १२३ ॥ कुलटालिंगनालापात्सोऽतिकामी
बभूव ह ॥ यथा दीप्तः कृष्णवर्त्मा वर्धते हविषाऽधिकम् ॥ १२४ ॥ पुनश्चकार शृंगारमसुरोऽष्टविधं मुने ॥ चुंबनं च नवविधं यथा
स्थाने यथोचितम् ॥ १२५ ॥ नखदन्तकरैः क्रीडां चकार विविधां पुनः ॥ किंकिणीनां कंकणानां बभूव शब्द उल्बणः ॥ मुनेर्दुर्वा
ससस्तेन ध्यानभङ्गो बभूव ह ॥ १२६ ॥ अदृष्टस्य तयोस्तत्र वल्मीकाच्छादितस्य च ॥ योगासनं कुर्वतश्च गन्धमादन
गह्वरे ॥ १२७ ॥ ध्यायतश्चरणांभोजं कृष्णस्य परमात्मनः ॥ न पपात तयोर्दृष्टिः समीपस्थे महामुनौ ॥ कामात्मनोर्न हि ज्ञानं
कामेन हतचेतसोः ॥ १२८ ॥ सहसा चेतनां प्राप्य प्रज्वलन्ब्रह्मतेजसा ॥ ददर्श पुरतस्तौ तु मुनिरुन्मील्य लोचने ॥ १२९ ॥
दिवानिशं न जानन्तौ संयुक्तौ काममोहितौ ॥ दृष्ट्वा चुकोप तेजस्वी रुद्रांशो भगवान्विभुः ॥ १३० ॥ उवाच तौ विहारान्ते रक्तपङ्क
जलोचनः ॥ ध्यानप्राप्तपदाम्भोजविच्छेदोद्विग्नमानसः ॥ १३१ ॥ दुर्वासा उवाच ॥ उत्तिष्ठ गर्दभाकार निर्लज्ज पुरुषाधम ॥
भक्तप्रधानस्य बलेः पुत्रः पशुसमप्रभः ॥ १३२ ॥ देवो वा मानवो वाऽपि दैत्यगन्धर्वराक्षसाः ॥ लज्जां कुर्वन्ति सततं स्वजातौ च
पशून्विना ॥ १३३ ॥ ज्ञानलज्जाविहीना च खरजातिर्विशेषतः ॥ तस्मात्त्वं दानवश्रेष्ठ खरयोनिं व्रजाधुना ॥ १३४ ॥ तिलोत्तमे

त्वमुत्तिष्ठ लज्जाहीना च पुंश्चली ॥ एतादृशी स्पृहा दैत्ये व्रज योनिं च दानवीम् ॥ १३५ ॥ इत्येवमुक्त्वा स मुनिस्तस्थौ तत्र रुषा ज्वलन् ॥ तौ च तुष्टुवतुर्भीतावुत्थाय व्रीडितौ मुनिम ॥ १३६ ॥ साहसिक उवाच ॥ त्वं ब्रह्मा त्वं च विष्णुश्च त्वं च साक्षान्महेश्वरः ॥ हुताशनस्त्वं सूर्यश्च सृष्टिस्थित्यन्तकारकः ॥१३७॥ क्षमापराधं भगवन्कृपां कुरु कृपानिधे ॥ मूढापराधं सततं यः क्षमेत्स सदीश्वरः ॥ १३८ ॥ इत्येवमुक्त्वा दैत्येन्द्रो रुरोदोच्चैः पुरो मुनेः ॥ कृत्वा तृणानि दशने पपात चरणाम्बुजे ॥ १३९ ॥ तिलोत्तमोवाच ॥ हे नाथ करुणासिन्धो दीनबन्धो कृपां कुरु ॥ विधिसृष्टौ च सर्वेषां मूढा स्त्रीजातिरेव च ॥ १४० ॥ ततोऽतिमत्ता कुलटा सदा कामातुरा परा ॥ लज्जा भीतिश्चेतना च न सन्ति कामुके विभो ॥ १४१ ॥ इत्युक्त्वा रोदनं कृत्वा जगाम शरणं मुनेः ॥ विना विपत्तौ केषांचिज्ज्ञानं भवति भूतले ॥ तयोर्दृष्ट्वा च वैकल्यं बभूव करुणा मुनेः ॥ १४२ ॥ दुर्वासा उवाच ॥ अतिशापः प्रसादो वा भवेद्दैवेन दानव ॥ सत्कीर्तिरपकीर्तिर्वा प्राक्तनप्रभवा ध्रुवम् ॥ १४३ ॥ विष्णुभक्तबलेः पुत्रः सद्वंशप्रभवो जनः ॥ जनकाद्विष्णुभक्तोऽसि जानामि त्वां सुनिश्चितम् ॥ १४४ ॥ जनकस्य स्वभावो हि जन्ये तिष्ठति निश्चितम् ॥ यथा श्रीकृष्णपादाङ्कः कालीयवंशमस्तके ॥ १४५ ॥ संप्राप्य गार्दभीं योनिं वत्स निर्वाणतां व्रज ॥ पूर्वं कृष्णार्चनफलं न हि लुप्तं सतां चिरात् ॥ १४६ ॥ वृन्दारण्यं तालवनं व्रज शीघ्रं व्रजान्तिकम् ॥ प्राणांस्त्यक्त्वा हरेश्चक्रान्मुक्तिं प्राप्स्यसि निश्चितम् ॥ १४७ ॥ तिलोत्तमे भारते त्वं बाणपुत्री भविष्यसि ॥ श्रीकृष्णपौत्रश्लेषेण पुनः पूता भविष्यसि ॥ १४८ ॥ इत्येवमुक्त्वा स मुनिर्विरराम महामुने ॥ तौ जग्मतुर्यथास्थानं प्रणम्य मुनिपुंगवम् ॥ १४९ ॥ इत्युक्तं सर्ववृत्तान्तं दैत्यस्य खरजन्मनः ॥ तिलोत्तमा बाणपुत्री ह्युषाऽनिरुद्धकामिनी ॥ १५० ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे तिलोत्तमाबलिपुत्रयोर्ब्रह्मशापप्रस्तावो नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीनारायण उवाच ॥ निगूढं शृणु वृत्तान्तं मुनेर्दुर्वाससो मुने ॥ अहोऽस्य दारसंयोगः कथं तदूर्ध्वरेतसः ॥ १ ॥ दृष्ट्वा तयोश्च शृङ्गारं मुनिः कामी बभूव ह ॥ जिते

न्द्रियोऽसत्संसर्गाद्दोषः सांसर्गिको भवेत् ॥ २ ॥ सहसा तस्य हृदये बभूव सुरते स्पृहा ॥ तपस्तप्त्वा तत्र दध्यौ कामिनीं मद
नातुरः ॥ ३ ॥ एतस्मिन्नन्तरे तेन पथा याति मुनीश्वरः ॥ प्रार्थयन्त्या पतिं सन्तमौर्वश्च सुतया सह ॥ ४ ॥ ऊरूद्भवो ब्रह्मणश्च
पुरा कल्पे तपस्यतः ॥ ऊर्ध्वरेताश्च योगीन्द्र ओर्वस्तेन इति स्मृतः ॥ ५ ॥ तस्य जानूद्भवा कन्या कन्दली नाम विश्रुता ॥ दुर्वा
ससं प्रार्थयन्ती नान्यं मनसि रोचते ॥ ६ ॥ ससुतो हि मुनिश्रेष्ठो मुनेर्दुर्वाससः पुरः ॥ तस्थौ महाप्रसन्नश्च ज्वलदग्निशिखोपमः ॥
॥ ७ ॥ मुनीन्द्रोऽपि मुनीन्द्रं तं पुरो दृष्ट्वा ससंभ्रमः ॥ प्रजवेन समुत्तस्थौ ननाम च मुदाऽन्वितः ॥८॥ और्वो दुर्वाससं तत्र समाश्लि
ष्य मुदाऽन्वितः ॥ उवाच मुनये सर्वं कन्यकाया मनोरथम् ॥ ९ ॥ और्व उवाच ॥ विख्याता कन्दली नाम मम कन्या
मनोहरा ॥ प्रौढा त्वामेव ध्यायन्ती श्रुत्वा वाचिकवक्रतः ॥ १० ॥ अयोनिसम्भवा कन्या त्रैलोक्यं मोहितुं क्षमा ॥ सर्वरूपगुणाधारा
दोषेणैकेन संयुता ॥ ११ ॥ अतीव कलहाविष्टा कोपेन कटुभाषिणी ॥ नानागुणयुतं द्रव्यं न त्यजेदेकदोषतः ॥ १२ ॥ और्वस्य
वचनं श्रुत्वा हर्षशोकान्वितो मुनिः ॥ ददर्श कन्यां पुरतो गुणरूपसमन्विताम् ॥ १३ ॥ शरत्पार्वणचन्द्रास्यां शरत्पङ्कजलोच
नाम् ॥ ईषद्धास्यप्रसन्नास्यां पीनश्रोणिपयोधराम् ॥ १४ ॥ नवयौवनसंयुक्तां पश्यन्तीं वक्रचक्षुषा ॥ रत्नालंकारशोभाढ्यां वह्निशु
द्धांशुकान्विताम् ॥ १५ ॥ मुनिर्मुमोह तां दृष्ट्वा कामबाणप्रपीडितः ॥ उवाच तं मुनिश्रेष्ठं हृदयेन विदूयता ॥ १६ ॥ दुर्वासा
उवाच ॥ नारीरूपं त्रिभुवने मुक्तिमार्गनिरोधकम् ॥ व्यवधानं तपस्यायाः सततं मोहकारणम् ॥ १७ ॥ कारागारे च संसारे
दुर्वहं निगडं परम् ॥ अच्छेद्यं ज्ञानखड्गैश्च महद्भिः शंकरादिभिः ॥ १८ ॥ सङ्गिच्छायातिरिक्तं च कर्मभोगात्परात्परम् ॥ इन्द्रिया
दिन्द्रियाधाराद्विद्यायाश्च मतेरपि ॥ १९ ॥ आदेहं सङ्गिनी छाया भोगान्तं भोग एव च ॥ देहेन्द्रियाणि जीवान्तं विद्या चैवावशीलि
नम् ॥ २० ॥ मतिश्चैवावशीलान्ता सुस्त्री जन्मनिजन्मनि ॥ यावज्जीवी च सुस्त्रीको न तावज्जन्मखण्डनम् ॥२१ ॥ यावच्च जीविनो
जन्म तावद्भोगः सुखावहः ॥ परं मुनीन्द्र सर्वस्माद्धरिपादाब्जसेवनम् ॥ २२ ॥ ध्यायतः कृष्णपादाब्जं मम विघ्नो बभूव ह ॥

न जाने कर्मदोषेण केन वा पूर्वजन्मनः ॥ २३ ॥ पुंश्चल्या सह शृङ्गारं दृष्ट्वा दैत्यस्य मन्मनः ॥ बभूव कामसंयुक्तं दत्तं धात्रा च
तत्फलम् ॥२४॥ किं त्वहं तव कन्यायाः कटूक्तिशतकं मुने ॥ ध्रुवं क्षमां करिष्यामि दास्यामि च ततः फलम् ॥२५॥ सर्वतोऽपि
परा निन्दा स्त्रीकटूक्तिसहिष्णुता ॥ अतीव निन्दितः सत्सु स्त्रीजितो भुवनत्रये ॥ २६ ॥ तवाज्ञां मस्तके कृत्वा ग्रहीष्यामि सुतां
तव ॥ उपेतां कामिनीं त्यक्त्वा कालसूत्रं व्रजेन्नरः ॥२७॥ रहस्युपस्थितां कामात्पुंश्चलीं चेज्जितेन्द्रियः ॥ परित्यजेद्धर्मभयादधर्मा
न्नरकं व्रजेत् ॥ २८ ॥ इत्येवमुक्त्वा दुर्वासा विरराम मुनेः पुरः ॥ मुनिर्वेदोक्तविधिना ददौ तस्मै सुतां मुने ॥ २९ ॥ स्वस्तीत्यु
वाच दुर्वासा मुनिश्च यौतुकं ददौ ॥ कन्यासमर्पणं कृत्वा मोहाच्चैव रुरोद ह ॥ ३० ॥ मूर्च्छामवाप स मुनिः स्वकन्याविरहातुरः ॥
अपत्यभेदशोकौघः स्वात्मारामं न मुञ्चति ॥ ३१ ॥ क्षणेन चेतनां प्राप्य बोधयामास कन्यकाम् ॥ मूर्च्छितां तातविच्छेदाद्रुदन्तीं
शोकसंयुताम् ॥ ३२ ॥ और्व उवाच ॥ शृणु वत्से प्रवक्ष्यामि नीतिसारं सुदुर्लभम् ॥ हितं सत्यं च वेदोक्तं परिणामसुखाव
हम् ॥३३॥ स्वकान्तश्च परो बन्धुरिह लोके परत्र च ॥ न हि कान्तात्परः प्रेयान् कुलस्त्रीणां परो गुरुः ॥३४॥ देवपूजा व्रतं दानं
तपश्चानशनं जपः ॥ स्नानं च सर्वतीर्थेषु दीक्षा सर्वमखेषु च ॥३५॥ प्रादक्षिण्यं पृथिव्याश्च ब्राह्मणातिथिसेवनम् ॥ सर्वाणि पतिसे
वायाः कलां नार्हन्ति षोडशीम्॥३६॥किमेतैः पतिभक्ताया अभक्तायाश्च भारते॥ यदा दुःखी सुखारम्भे साकाङ्क्षः प्रथमो भवेत् ॥
पतिसेवा परो धर्मःसर्वशास्त्रेषु पठ्यते॥३७॥स्वप्रज्ञानेन सततं कान्तं नारायणाधिकम् ॥ दृष्ट्वा तच्चरणाम्भोजसेवां नित्यं करिष्यति॥
॥ ३८ ॥ परिहासेन कोपेन भ्रमेणावज्ञया मुने ॥ कटूक्तिं स्वामिनः साक्षात्परोक्षान्न करिष्यति ॥ ३९ ॥ स्त्रिया वाग्योनिदुष्टायाः
कामतो भारते भुवि ॥ प्रायश्चित्तं श्रुतौ नास्ति नरकं ब्रह्मणः शतम् ॥४०॥ सर्वधर्मपरीता या कटूक्तिं कुरुते पतिम् ॥ शतजन्मकृतं
पुण्यं तस्या नश्यति निश्चितम् ॥ ४१ ॥ दत्त्वा कन्यां बोधयित्वा जगाम मुनिपुंगवः ॥ स्वात्मारामः स्वाश्रमे च तस्थौ स्त्रीसहितो
मुदा ॥ ४२ ॥ सम्भोगेच्छावृते चित्ते कामी संप्राप कामिनीम् ॥ अहो सुकृतिनां कामो वाञ्छामात्रेण सिध्यति ॥ ४३ ॥ शय्यां

रतिकरीं कृत्वा मुनिश्रेष्ठो महामुने॥ शुभे क्षणे गृहीत्वा तां सुष्वाप निर्जने प्रियाम्॥४४॥नारीरसानभिज्ञः स्यादाजन्म मुनिपुंगवः॥ तथाऽपि सुरतौ विज्ञः कामशास्त्रविशारदः ॥४५॥ नानाप्रकारं शृङ्गारं चकार विधिपूर्वकम्॥ नवसंगममात्रेण मूर्च्छां संप्राप कन्दली ॥ ४६ ॥ मूर्च्छां प्राप मुनिश्रेष्ठो बुबुधे न दिवानिशम्॥ एवं प्रतिदिनं तत्र चकार सुरतिं मुने ॥४७॥ विदग्धाया विदग्धेन बभूव संगमः समः॥ संबभूव गृहासक्तस्तपस्त्यक्त्वा मुनीश्वरः॥ ४८ ॥ करोति कलहे नित्यं कन्दली स्वामिना सह॥ मुनीन्द्रो बोधयामास नीतिवाक्येन कामिनीम्॥ सा तन्न बुबुधे किंचित्करोति कलहे स्पृहाम्॥ ४९ ॥ तातप्रदत्तज्ञानेन सा न शान्ता बभूव ह॥ न हीयते प्रबोधेन स्वभावो दुरतिक्रमः ॥५०॥ नित्यं कटूक्तिं कान्तं सा करोति हेतुना विना॥ जगत्प्रकम्पितं येन तया कोपात्स कम्पितः॥५१॥ तया कृतां कटूक्तिं च क्षमासंस्थां चकार ह॥ बोधयामास तां नित्यं सद्यो मोहाद्दयानिधिः ॥ ५२ ॥ कटूक्तिशतकं पूर्णं तत्कालेन बभूव ह॥ क्षमां चकार कृपया कटूक्तिं च शताधिकाम् ॥ ५३ ॥ पत्नीकटूक्त्या नियतं प्रदग्धं मानसं मुनेः॥ तस्याः कटूक्तिकारिण्याः कर्म पूर्णं बभूव ह॥ ५४ ॥ स्वात्मारामो दयालुश्च कोपं त्यक्तुं न स क्षमः॥ शशाप कामिनीं मोहाद्भस्मराशिर्भवेति च॥ ५५ ॥ मुनेरिङ्गितमात्रेण भस्मसात्सा बभूव ह॥ एवमत्युच्छ्रितानां च न कल्याणं जगत्त्रये॥ ५६॥ शरीरे भस्मसाद्भूते प्रतिबिंबः स चात्मनः॥ जीवस्तत्रान्तरिक्षस्थो ह्युवाच विनयात्प्रभुम्॥ ५७॥ जीव उवाच॥ हे नाथ सर्वदर्शी त्वं सततं ज्ञानचक्षुषा॥ सर्वं जानासि सर्वज्ञः किमहं बोधयामि ते॥ ५८॥ सदुक्तिर्वा कटूक्तिर्वा कोपः संताप एव च॥ लोभो मोहश्च कामश्च क्षुत्पिपासादिकं च यत् ॥५९॥ स्थौल्यं कार्श्यं च नाशश्च दृश्यादृश्यं समुद्भवम्॥ सर्वं शरीरधर्मं च न जीवस्य न चात्मनः ॥६०॥ सत्त्वं रजस्तम इति शरीरं त्रिगुणात्मकम्॥ तच्च नानाप्रकारं च निबोध कथयामि ते ॥६१॥ किञ्चित्सत्त्वातिरिक्तं च किञ्चिदेव रजोधिकम्॥ तमोतिरिक्तं किञ्चिच्च न समं कुत्रचिन्मुने ॥६२॥ सत्त्वोदयाच्च मुक्तीच्छा कर्मेच्छा च रजोगुणात्॥ तमोगुणाज्जीवहिंसा कोपोऽहंकार एव च॥ ६३॥ कोपात्कटूक्तिर्नियतं कटूक्त्या शत्रुता भवेत् ॥ तया चाप्रियता सद्यः शत्रुः कः कस्य

भूतले ॥ ६४ ॥ को वा प्रियोऽप्रियः कः किं किं मित्र को रिपुर्भवेत् ॥ इंद्रियाणि च बीजानि सर्वत्र शत्रुमित्रयोः ॥६५॥ प्राणाधिकः
प्रियः स्त्रीणां भर्तुः प्राणाधिका प्रिया ॥ बभूव शत्रुता सद्यो दुरुक्त्या च क्षणाद्द्वयोः ॥ ६६ ॥ यद्गतं तद्गतं सर्वं कामदोषेण वै प्रभो ॥
क्षमापराधं निखिलं किं कर्तव्यं वदाधुना ॥ ६७ ॥ किं करोमि क्व यामीति भविता कुत्र जन्म मे ॥ तव नान्यस्य जायाऽहं भवि
ष्यामि जगत्त्रये ॥ ६८ ॥ इत्येवमुक्त्वा जीवश्च मौनीभूतो बभूव ह ॥ मूर्च्छामवाप स मुनिः शोकेन हतचेतनः ॥ ६९ ॥ स्वात्मारा
मो महाज्ञानी जहार चेतनामहो ॥ स्त्रीविच्छेदो विदग्धानां सर्वशोकात्परात्परः ॥ ७० ॥ क्षणेन चेतनां प्राप्य प्राणांस्त्यक्तुं समु
द्यतः ॥ तत्र योगासनं कृत्वा चकार वायुधारणम् ॥७१॥ एतस्मिन्नन्तरे तत्र जगाम ब्राह्मणोऽर्भकः॥दण्डी छत्री रक्तवासा बिभ्रत्ति
लकमुत्तमम् ॥ ७२ ॥ सस्मितः श्यामवर्णश्च प्रज्वलन्ब्रह्मतेजसा ॥ वयसाऽतिशिशुः शान्तो ज्ञानी वेदविदां वरः ॥ ७३ ॥ दृष्ट्वा तं
संभ्रमेणैव दुर्वासाः प्रणनाम ह ॥ वासयामास तत्रैव पूजयामास भक्तितः ॥ ७४ ॥ उवाच ब्राह्मणवटुर्दत्त्वा तस्मै सदाशिषम् ॥
तद्दर्शनादाशिषा च सर्वं दुःखं गतं मुनेः ॥ ७५ ॥ शिशुरूपं क्षणं स्थित्वा तमुवाच विचक्षणः ॥ पीयूषतुल्यं नीत्योघं नीतिशास्त्र
विशारदः ॥ ७६ ॥ शिशुरुवाच ॥ सर्वं जानासि सर्वज्ञ गुरोर्मन्त्रप्रसादतः ॥ किं तत्त्वं त्वामहं विप्र पृच्छामि शोक
कातरम् ॥ ७७ ॥ ब्राह्मणानां तपो धर्मस्तपःसाध्यं जगत्त्रयम् ॥ स्वधर्मं वै परित्यज्य किमिदानीं करोषि भोः ॥ ७८ ॥ का कस्य
पत्नी कः कान्तः कस्या वा भुवनत्रये ॥ मूर्खाणां वञ्चनां कर्तुं करोति मायया हरिः ॥ ७९ ॥ मिथ्या पत्नी तवेयं च क्षणात्तेन गता
धुना ॥ न हि सत्यमदृश्यं च मिथ्या यत्राचिरस्थितिः ॥ ८० ॥ एकानंशा च भगिनी वसुदेवसुता हरेः॥ पार्वत्यंशसमुद्भूता सुशीला
चिरजीविनी ॥ ८१ ॥ कल्पे कल्पे सुन्दरी सा तव पत्नी भविष्यति ॥ मनो देहि तपस्यायां मुदा कतिपयं दिनम्॥८२॥ कन्दली
कदलीजातिर्भविष्यति महीतले ॥ शुभदा फलदा कान्ता सकृत्सूता सुदुर्लभा ॥ ८३ ॥ कल्पान्तरे शान्तरूपा तव पत्नी भविष्य
ति॥अत्युच्छ्रितस्य दमनमुचितं च श्रुतौ श्रुतम्॥ ८४॥ इत्येवमुक्त्वा शीघ्रं च विप्ररूपी जनार्दनः ॥ दत्त्वा ज्ञानं च विप्राय सोऽन्त

र्धानं चकार ह ॥ ८५ ॥ मुनिः सर्वंभ्रमं त्यक्त्वा तपस्यायां मनो दधे ॥ कन्दली कदलीजातिर्बभूव धरणीतले ॥ ८६ ॥ दैत्यस्तालवनं गत्वा बभूव गर्दभाकृतिः ॥ तिलोत्तमा बाणपुत्री बभूव समये मुने ॥ ८७॥ दैत्येन्द्रो विष्णुचक्रेण प्राणांस्त्यक्त्वा सुवाञ्छितम् ॥ संप्राप्य चरणाम्भोजं मुनेरपि सुदुर्लभम् ॥ ८८ ॥ काले तिलोत्तमा भूत्वा जगाम स्वालयं पुनः ॥ कृष्णपौत्रालिंगनेन परिपूर्णमनोरथा ॥ ८९ ॥ इत्येवं कथितं श्रुत्वा श्रीकृष्णाख्यानमुत्तमम् ॥ पदेपदे सुन्दरं च किं भूयः श्रोतुमिच्छसि ॥ ९० ॥ इति श्रीब्रह्मवैवर्तें महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे तालफलभक्षणप्रसङ्गे बलिपुत्रमोक्षो नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ नारद उवाच ॥ ॥ श्रुतं किमद्भुतं ब्रह्मन् हरेश्चरितमङ्गलम् ॥ विशेषतस्तव मुखे ह्यतीव सुमनोहरम् ॥ १ ॥ मृतायां मुनिकन्यायां शापाद्दुर्वाससो मुनेः ॥ किं चकार समागत्य तन्मे ब्रूहि तपोधन ॥ २ ॥ ॥ श्रीनारायण उवाच ॥ ॥ सरस्वतीनदीतीरे तपस्यां कुर्वतो मुनेः ॥ पपात धौतमूर्ध्वाँश्च धार्यमाणं च वायुना ॥ ३ ॥ पृथिव्यां पतिते वस्त्रे तपस्त्यक्त्वा मुनीश्वरः ॥ ध्यानेन बुबुधे सर्वं कन्यासंबन्धि संकटम् ॥४॥ जगाम शोकाविष्टोऽपि तूर्णं जामातुराश्रमम्॥ सिषेच पृथिवीरेणूञ्छश्वन्नयनबिन्दुना ॥५॥ गत्वाऽऽलयसमीपं च विप्रः कातरमानसः ॥ हे वत्से कन्दलीत्येवमुवाच च पुनःपुनः॥ ॥ ६ ॥ श्वशरस्य स्वरं ज्ञात्वा दुर्वासा भयविह्वलः ॥ बहिर्बभूव शीघ्रं च पपात चरणाम्बुजे ॥ ७ ॥ प्रणम्य श्वशुरं शोकाद्विललाप भृशं पुनः ॥ प्रवृत्तिं कथयामास मूलतो मुनिसत्तमम् ॥ ८ ॥ श्रुत्वा वार्तां शुचाऽऽविष्टः पपात धरणीतले ॥ मूर्च्छामाप महाज्ञानी निश्चेष्टो हि यथा मृतः ॥ ९ ॥ मृतं दृष्ट्वा स दुर्वासा मुने मनसि संकटम् ॥ चेतनां कारयामास प्रयत्नेन महामुनेः ॥ १० ॥ संप्राप्य चेतनां शीघ्रमुवाच तं पुरः स्थितम् ॥ जामातरं शोकयुतं भीतं प्रणतकन्धरम् ॥ ११ ॥ महाशोकादश्रुपूर्णं रक्तपङ्कजलोचनम् ॥ कोपात्कम्पितवाञ्छश्वत्संत्रस्तः स्फुरिताधरः ॥ १२ ॥ और्व उवाच ॥ अये ब्रह्मन्नत्रिवंश पौत्रस्त्वं जगतीपतेः ॥ स्वल्पदोषे बहुतरः कृतो दण्डस्त्वया कथम् ॥१३॥ त्वज्जन्म शंकरांशेन शिष्यस्तस्य जगद्गुरोः ॥ वेदवेदाङ्गविज्ञश्च सर्वज्ञो गुणवा

न्स्वयम् ॥ १४ ॥ अनसूया महासाध्वी कमलांशा तव प्रसूः ॥ न जाने केन दोषेण तव चैतादृशी मतिः ॥ १५ ॥ गुणवाञ्जनको यस्य माता गुणवती सती ॥ तयोः पुत्रो दयाहीनो गतिः सूक्ष्मा श्रुतेरहो ॥ १६ ॥ मम प्राणाधिका कन्या मुदा त्वयि समर्पिता॥ महागुणान्विता स्वल्पदोषेण परिमिश्रिता ॥ १७ ॥ वाग्दुष्टायाश्च दण्डो हि परित्यागः श्रुतौ श्रुतः ॥ त्वया क्रोधाद्यदि त्यक्ता पित्रा यत्नेन पालिता ॥१८॥ मदपत्यं स्वल्पदोषे यतो भस्मीकृतं त्वया ॥ पराभवस्तव महान्भविष्यति न संशयः ॥ १९ ॥ महतां क्षुद्रजन्तूनां सर्वेषां जीविनां सदा ॥ स्रष्टा पाता च शास्ता च भगवान्करुणानिधिः ॥ २० ॥ इत्युक्त्वा च मुनिश्रेष्ठो विलप्य च पुनः पुनः ॥ हेऽम्ब वत्से ह्ययीत्युक्त्वा जगाम स्वालयं रुषा ॥२१॥ गते मुनीन्द्रे दुर्वासा विललाप भृशं पुनः॥ ज्ञानेन विस्मृतः शोको बभूव द्विगुणः पुनः ॥ २२ ॥ शोकानलो हि कालेन विच्छिन्नो ज्ञानभस्मना ॥ बन्धुदर्शनशुष्केन्धदानेन वर्धते पुनः ॥ ॥ २३ ॥ स्मारंस्मारं प्रियां तत्र विलप्य च पुनःपुनः ॥ बोधयित्वा स्वमात्मानं तपस्यायां मनो दधौ ॥ २४ ॥ इत्येवं कथितं सर्वं मुनेः शापस्य कारणम् ॥ बभूव तस्य कालेन दुःसहश्च पराभवः ॥ २५ ॥ नारद उवाच ॥ दुर्वासाः शंकरस्यांशः शिवतुल्यश्च तेजसा ॥ तेजस्वी को महानेव चकार तत्पराभवम् ॥ २६ ॥ श्रीनारायण उवाच ॥ अम्बरीषो हि राजेन्द्रः सूर्यवंशसमुद्भवः ॥ श्रीकृष्णचरणाम्भोजे तन्मनाः संततं मुने ॥ २७ ॥ न राज्येषु न भार्यासु न पुत्रेषु प्रजासु च ॥ न संपत्सु क्षणं चित्तं पुण्यकर्मार्जितासु च ॥ २८ ॥ ध्यायतेऽहर्निशं धर्मी स्वप्ने ज्ञाने हरिं मुदा ॥ महाजितेन्द्रियः शान्तो विष्णुव्रतपरायणः ॥ २९ ॥ एकादशीव्रतरतः कृष्णपूजासु तत्परः ॥ सर्वकर्मस्वलिप्तश्च कर्ता कृष्णार्पितेषु च ॥३०॥ सुतीक्ष्णं षोडशारं च हरेश्चक्रं सुदर्शनम् ॥ तेजसा हरितुल्यं च सूर्यकोटिसमप्रभम् ॥ ३१ ॥ ब्रह्मादिभिः स्तूयमानं पूजितं च सुरासुरैः ॥ प्रभुणा रक्षितं शश्वद्रक्षायै नृपसन्निधौ ॥ ॥ ३२ ॥ [1]एकादशीव्रतं कृत्वा द्वादशीदिवसे सति ॥ स्नात्वा विधाय पूजां च कालेन विधिपूर्वकम् ॥३३॥ दत्त्वा दानं ब्राह्मणेभ्यः

---

[1] एकदा स व्रतम्–इ० पा० ।

सुवर्णरजतादिकम् ॥ ब्राह्मणान्भोजयित्वा च भोजनार्थमुवास ह ॥ ३४ ॥ एतस्मिन्नन्तरे विप्रस्तपस्वी क्षुधितो मुने ॥ दण्डी छत्री शुक्लवासा बिभ्रत्तिलकमुत्तमम् ॥ ३५ ॥ जटिलोऽतिकृशस्त्रस्तः शुष्ककण्ठोष्ठतालुकः ॥ तत्राजगाम भगवान्दुर्वासा नृपतेः पुरः ॥ ३६ ॥ स च दृष्ट्वा मुनीन्द्रं तमुत्थाय च प्रणम्य च ॥ दत्त्वा पाद्यं च संप्रीत्या स्वर्णसिंहासनं ददौ ॥ ३७ ॥ तस्मै दत्त्वाऽऽशिषं विप्रः समुवास सुखासने ॥ पप्रच्छ राजा तं प्रीतः काऽऽज्ञा ते वद कामितम् ॥ ३८ ॥ नृपेन्द्रवचनं श्रुत्वा तमुवाच महामुनिः॥ बुभुक्षितस्य मे राजन्देह्यन्नं विधिपूर्वकम्॥३९॥किंत्वघमर्षणमन्त्रं तु जप्त्वाऽऽयाम्यचिरेण वै ॥क्षणं प्रतीक्षतां राजन्नित्युक्त्वा च गतो मुनिः ॥ ४० ॥ गते विप्रे तु राजर्षिश्चिन्तां प्राप दुरत्ययाम् ॥ विलोक्य विगतप्रायां द्वादशीं भयसंयुतः ॥ ४१ ॥ एतस्मिन्नन्तरे तत्र समायान्तं गुरुं मुदा ॥ नत्वा निवेद्य सर्वं तु नृपतिः समुवाच ह ॥ ४२ ॥ नायाति मुनिशार्दूलः प्रयाति द्वादशी तिथिः ॥ संकटेऽस्मिन्विधेयं च विविच्य विधिपूर्वकम् ॥ शीघ्रं वद मुनिश्रेष्ठ भद्राभद्रं च मामिति ॥ ४३ ॥ श्रुत्वा नृपोक्तिं त्वरितमुवाच मुनिपुंगवः ॥ हितं तथ्यं च वेदोक्तं परिणामसुखावहम् ॥ ४४ ॥ वशिष्ठ उवाच ॥ द्वादश्यां समतीतायां त्रयोदश्यां तु पारणम् ॥ उपवासफलं हत्वा व्रतिनं हन्ति निश्चितम् ॥ ४५ ॥ ब्रह्महत्यासमं पापं भवेत्तस्य श्रुतौ श्रुतम् ॥ भक्ष्यद्रव्यं सुरातुल्यमित्याह कमलोद्भवः ॥४६॥ न भोजयित्वा मूढश्चेदतिथिं समुपस्थितम् ॥ स त्रस्तः क्षुधितो भुङ्क्ते कुम्भीपाके व्रजेद् ध्रुवम्॥४७॥ शतवर्षं तत्र तिष्ठन्नरश्चाण्डालतां व्रजेत् ॥ व्याधियुक्तो दरिद्रश्च भवेज्जन्मनि जन्मनि ॥ ४८ ॥ अतोऽतिसूक्ष्मं किं ब्रूमोऽधुना परमसंकटे ॥ रक्षां कुरु द्वयोर्धर्मं समालोक्य वदामि ते ॥४९॥ उपवासफलं रक्ष कृष्णस्य चरणोदकम् ॥ भुक्त्वा शीघ्रमपो राजंस्तद्भक्षणमभक्षणम् ॥५०॥ इत्युक्त्वा ब्रह्मणः पुत्रो विरराम महामुने ॥ बुभुजे तज्जलं किंचित्कृष्णपादाम्बुजं स्मरन्॥५१॥एतस्मिन्नन्तरे ब्रह्मन्नाजगाम मुनीश्वरः ॥ चिच्छेद कोपात्सर्वज्ञः स्वजटां नृपतेः पुरः ॥ ५२ ॥ ततः समुत्थितः शीघ्रं पुरुषोऽग्निशिखोपमः ॥ खड्गहस्तो महाभीमो राजेन्द्रं हन्तुमुद्यतः ॥५३॥ हरेश्चक्रं च तं दृष्ट्वा सूर्यकोटिसमप्रभम् ॥ चिच्छेद कृत्यापुरुषं ब्राह्मणं छेत्तुमुद्यतम् ॥५४॥

दृष्ट्वा सुदर्शनं विप्रो दुद्राव भयविह्वलः ॥ द्विजः पश्चात्तं ददर्श ज्वलदग्निशिखोपमम् ॥ ५५ ॥ ब्रह्माण्डक्रमणं कृत्वा निर्विण्णोऽति भयाकुलः ॥ तं च मत्वा जगन्नाथं ब्रह्माणं शरणं ययौ ॥ ५६ ॥ त्राहित्राहीत्येवमुक्त्वा विवेश ब्रह्मणः सभाम् ॥ उत्थाय ब्रह्मा विप्रेन्द्रं पप्रच्छ कुशलं मुने ॥ ५७ ॥ सर्वं स कथयामास वृत्तान्तं मूलतो विधिम् ॥ श्रुत्वा ब्रह्मा निशश्वास तमुवाच भयाकुलः ॥ ५८ ॥ ब्रह्मोवाच ॥ हरिदासं वत्स शप्तुं गतोऽसि कस्य तेजसा ॥ रक्षिता यस्य भगवांस्तं को हन्ता जगत्त्रये ॥ ५९ ॥ क्षुद्राणां महतां चैव भक्तानां रक्षणाय च ॥ ररक्ष संततं चक्रं श्रीहरिर्भक्तवत्सलः ॥ ६० ॥ यो मूढो वैष्णवं द्वेष्टि विष्णुप्राणसमं द्विज ॥ तस्य संहारकर्तारं संहर्तुमीश्वरो हरिः ॥६१॥ शीघ्रं स्थानान्तरं गच्छ वत्स त्राणं न वाऽधुना ॥ अन्यथा त्वां मया सार्धं हनिष्यति सुदर्शनम् ॥ ६२ ॥ किं ब्रह्मलोकं ब्रह्माण्डं दग्धुं शक्तं क्षणेन यत् ॥ तेजसा विष्णुतुल्यं यत्केनान्येन निवार्यते ॥ ६३ ॥ ब्रह्मणो वचनं श्रुत्वा ततो दुद्राव ब्राह्मणः ॥ त्रस्तो जगाम कैलासं शंकरं शरणं भिया ॥ ६४ ॥ कृपानिधान मां रक्षेत्युवाच शंकरं भिया ॥ न ि प्रच्छ कुशलं सर्वज्ञो ब्राह्मणं शिवः ॥ ६५ ॥ उवाच दीनदीनेशः संहर्ता जगतां क्षणात् ॥ स्थिरो भव द्विजश्रेष्ठ मदीयं वचनं शृणु ॥ ६६ ॥ शंकर उवाच ॥ पौत्रस्त्वं जगतां धातुरत्रेश्च तनयो मुने ॥ वेदज्ञाताऽसि सर्वज्ञ मूर्खतुल्यं तु कर्म ते ॥ ६७ ॥ वेदेषु च पुराणेषु सेतिहासेषु सर्वतः ॥ निरूपितो यः सर्वेशस्तं न जानासि मूढवत् ॥ ६८ ॥ अहं ब्रह्मा च इन्द्रश्च आदित्या वसवस्तथा ॥ धर्मेन्द्रौ च सुराः सर्वे मुनीन्द्रा मनवस्तथा ॥६९॥ आविर्भूतास्तिरोभूता यस्य भ्रूभङ्गलीलया ॥ तस्य प्राणाधिकं भक्तं हंसि त्वं कस्य तेजसा ॥ ७० ॥ अहं ब्रह्मा च कमला दुर्गा वाणी च राधिका ॥ न हि भक्तात्पराः प्रेम्णा भक्ताश्च सर्वतः प्रियाः ॥७१॥ क्षुद्रांश्च महतो भक्ताञ्छश्वद्रक्षति यत्नतः ॥ सर्वान्तरात्मा भगवांश्चक्रेण दुःसहेन च ॥ ॥ ७२ ॥ नियुज्य चक्रं दुर्वार्यं स्वात्मतुल्यं च तेजसा ॥ तथाऽपि न प्रतीतिश्च स्वयं गच्छति रक्षितुम् ॥ ७३ ॥ स्वकीयगुणनाम्नां च श्रवणादतिसंभ्रमः ॥ भक्तसङ्गे भ्रमत्येव छायेव संततं हरिः ॥ ७४ ॥ कान्ता प्राणाधिका शश्वन्न हि कोऽपि ततोऽधिकः ॥

भक्तान्द्वेष्टि स्वयं सा चेत्तूर्णं त्यजति तां प्रभुः ॥ ७५ ॥ सर्वेषां च प्रिया विप्राः स्वशरीरादपि द्विज ॥ ब्राह्मणेभ्यः प्रिया भक्ताः
प्राणेभ्यश्च हरेरपि ॥ ७६ ॥ ईश्वरस्य प्रियः को वाऽप्रियः को वा जगत्त्रये ॥ यः शिष्टस्तं भजेच्छश्वद्धचायते सततं सदा ॥ ७७ ॥
महति प्रलये ब्रह्मन्ब्रह्माण्डौघे जलप्लुते ॥ न तत्र नाशो भक्तानां सर्वेषां च भविष्यति ॥ ७८ ॥ भज ब्राह्मण गोविन्दं स्मर तस्य
पदाम्बुजम् ॥ सर्वापदो विनश्यन्ति श्रीहरेः स्मरणादपि ॥ ७९ ॥ व्रज शीघ्रं च वैकुण्ठं वैकुण्ठः शरणं तव ॥ दास्यत्येवाभयं तुभ्यं
करुणासागरो विभुः ॥ ८० ॥ एतस्मिन्नन्तरे व्याप्तं कैलासं चक्रतेजसा ॥ यथा च सूर्यकिरणैः सुप्रदीप्तं महीतलम् ॥ ८१ ॥
दग्धा ज्वालाकरालैश्च सर्वे कैलासवासिनः ॥ त्राहि त्राहीत्येवमुक्त्वा शंकरं शरणं ययुः ॥ ८२ ॥ दृष्ट्वा चक्रं दुर्विषहं शंकरः करुणानिधिः
॥ पार्वत्या सह संप्रीत्या ब्राह्मणायाशिषं ददौ ॥ ८३ ॥ तेजः सत्यं तपः सत्यं यदि चेच्चिरसंचितम् ॥ कृतापराधो
भीतश्च द्विजो भवतु विज्वरः ॥ ८४ ॥ पार्वत्युवाच ॥ यत्प्रभोर्मम पुण्येषु ब्राह्मणः शरणागतः ॥ ममाशिषा महाभीत्या
शीघ्रं भवतु विज्वरः ॥ ८५ ॥ इत्येवमुक्त्वा कृपया विरराम शिवा शिवः ॥ मुनिः प्रणम्य देवेशं वैकुण्ठं शरणं ययौ ॥ ८६ ॥ गत्वा
वैकुण्ठभवनं मनोयायी मुनीश्वरः ॥ दृष्ट्वा सुदर्शनं पश्चाद्विवेशान्तःपुरं हरेः ॥ ८७ ॥ ददर्श श्रीहरिं विप्रो रत्नसिंहासनस्थितम् ॥
शङ्खचक्रगदापद्मधरं पीताम्बरं परम् ॥ ८८ ॥ श्यामं चतुर्भुजं शान्तं लक्ष्मीकान्तं मनोहरम् ॥ रत्नालंकारशोभाढ्यं रत्नमाला
विभूषितम् ॥ ८९ ॥ ईषद्धास्यप्रसन्नास्यं भक्तानुग्रहकातरम् ॥ सद्रत्नसाररचितं किरीटोज्ज्वलशेखरम् ॥ ९० ॥ पार्षदप्रवरेन्द्रैश्च
सेवितं श्वेतचामरैः ॥ पद्मासेवितपादाब्जं सरस्वत्या स्तुतं पुरः ॥ ९१ ॥ सुनन्दनन्दकुमुदप्रचण्डादिभिरावृतम् ॥ गुणानुवादं
गायन्तं तन्त्रैः पश्यन्तमीप्सितम् ॥ ९२ ॥ एवंभूतं प्रभुं दृष्ट्वा दण्डवत्प्रणनाम च ॥ तुष्टाव सामवेदोक्तस्तोत्रेण परमेश्वरम् ॥ ९३ ॥
॥ दुर्वासा उवाच ॥ ॥ त्राहि मां कमलाकान्त त्राहि मां करुणानिधे ॥ दीनबन्धोऽतिदीनेश करुणासागर प्रभो ॥ ९४ ॥
वेदवेदाङ्गसंस्रष्टुर्विधातुश्च स्वयं विधे ॥ मृत्योर्मृत्युः कालकाल त्राहि मां संकटार्णवे ॥ ९५ ॥ संहारकर्तुः संहारः सर्वेशः

सर्वकारणः ॥ महाविष्णुतरोर्बीजं रक्ष मां भवसागरे ॥ ९६ ॥ शरणागतशोकार्तभयत्राणपरायण ॥ भगवन्नव मां भीतं
नारायण नमोऽस्तु ते ॥ ९७ ॥ वेदेष्वाद्यं च यद्वस्तु वेदाः स्तोतुं न च क्षमाः ॥ सरस्वती जडीभूता किं स्तुवन्ति विपश्चितः ॥
॥ ९७ ॥ शेषः सहस्रवक्त्रेण यं स्तोतुं जडतां व्रजेत् ॥ पञ्चवक्त्रो जडीभूतो जडीभूतश्चतुर्मुखः ॥ ९९ ॥ श्रुतयः स्मृतिकर्तारो
वाणी चेत्स्तोतुमक्षमा ॥ कोऽहं विप्रश्च वेदज्ञः शिष्यः किं स्तौमि मानद ॥ १०० ॥ मनूनां च महेन्द्राणामष्टाविंशतिमे गते ॥
दिवानिशं यस्य विधेरष्टोत्तरशतायुषः ॥ १०१ ॥ तस्य पातो भवेद्यस्य चक्षुरुन्मीलनेन च ॥ तमनिर्वचनीयं च किं स्तौमि
पाहि मां प्रभो ॥ १०२ ॥ इत्येवं स्तवनं कृत्वा पपात चरणाम्बुजे ॥ नयनाम्बुजनीरेण सिषेच भयविह्वलः ॥१०३॥ दुर्वाससा कृतं
स्तोत्रं हरेश्च परमात्मनः ॥ पुण्यदं सामवेदोक्तं जगन्मङ्गलनामकम् ॥ १०४ ॥ यः पठेत्संकटग्रस्तो भक्तियुक्तश्च संयतः ॥ नारायण
स्तं कृपया शीघ्रमागत्य रक्षति ॥ १०५ ॥ राजद्वारे श्मशाने च कारागारे भयाकुले ॥ शत्रुग्रस्ते दस्युभीतौ हिंस्रजन्तुसमन्विते ॥
॥ १०६ ॥ वेष्टिते राजसैन्येन मग्ने पोते महार्णवे ॥ स्तोत्रस्मरणमात्रेण मुच्यते नात्र संशयः ॥ १०७ ॥ इति श्रीब्रह्मवैवर्ते दुर्वाससा कृतं
श्रीकृष्णस्तोत्रं समाप्तम् ॥ नारायण उवाच ॥ मुनेश्च स्तवनं श्रुत्वा भगवान्भक्तवत्सलः ॥ प्रहस्योवाच मधुरं पीयूषवृष्टि
वन्मुदा ॥ १०८ ॥ श्रीभगवानुवाच ॥ उत्तिष्ठोत्तिष्ठ भद्रं ते भविष्यति वरेण मे ॥ किं तु मे वचनं नित्यं शृणु सत्यं सुखा
वहम् ॥ १०९ ॥ अन्येषां च भवेज्ज्ञानं श्रुत्वा शास्त्रं सतां मुखात् ॥ स्वमूर्तिमन्ति शास्त्राणि भवेत्सन्तश्चरन्ति हि ॥ ११० ॥
कर्म वेदविरुद्धं च सर्वेषामतिगर्हितम् ॥ करोति विद्वांश्चेज्ज्ञात्वा स च जीवन्मृताधिकः ॥ १११ ॥ पुराणेषु च वेदेषु चेतिहासेषु
ब्राह्मण ॥ वैष्णवानां च महिमा श्रुतः सर्वैश्च सर्वतः ॥११२॥ अहं प्राणा वैष्णवानां मम प्राणाश्च वैष्णवाः ॥ तानेव द्वेष्टि यो मूढो
ममासूनां च हिंसकः ॥ ११३ ॥ पुत्रान्पौत्रान्कलत्रांश्च राज्यं लक्ष्मीं विहाय च ॥ ध्यायन्ते सततं ये मां को मे तेभ्यः परः प्रियः ॥
॥ ११४ ॥ परा भक्तान्न मे प्राणा न च लक्ष्मीर्न शङ्करः ॥ न भारती न च ब्रह्मा न दुर्गा न गणेश्वरः ॥ ११५ ॥ न ब्राह्मणा न

वेदाश्च न वेदजननी परा ॥ न गोपी न च गोपाला न राधा प्राणतः प्रियाः ॥११६॥ इत्येवं कथितं सर्वं सत्यं सारं च वास्तवम् ॥
न प्रशंसापरं तेषां ते च प्राणाधिकाः प्रियाः ॥ ११७ ॥ मां द्विषन्ति च ये मूढा ज्ञानहीनाश्च वञ्चिताः ॥ आत्मानं ये न जानन्ति ते
यान्ति निरयं चिरम् ॥११८॥ ये द्विषन्ति च मद्भक्तान्प्राणानामधिकं प्रियान्॥तेषां शास्ता त्वहं तूर्णं परत्र निरयं चिरम् ॥ ११९ ॥
प्रभावोऽहं च सर्वेषामीश्वरः परिपालकः॥ न च व्यापी स्वतन्त्रोऽहं भक्ताधीनो दिवानिशम्॥१२०॥गोलोके वाऽथ वैकुण्ठे द्विभुजं च चतु
र्भुजम् ॥ रूपमात्रमिदं शश्वत्प्राणा मे भक्तसन्निधौ ॥ १२१ ॥ यदुक्तं भक्तदत्तं च भक्षणीयं च तन्मम ॥ अभक्ष्यं द्रव्यमन्येन दत्तं
चेदमृतोपमम् ॥ १२२ ॥ अंबरीषं नृपश्रेष्ठं निरीहं तमहिंसकम् ॥ कथं हंसि दयाशीलं सर्वप्राणिहिते रतम् ॥ १२३ ॥ दयां कुर्वंति
ये सन्तःसततं सर्वजन्तुषु ॥ तान्द्विषन्ति च ये मूढास्तेषां हन्ताऽहमेव च ॥१२४॥ भक्तानां हिंसकं शत्रुमहं रक्षितुमक्षमः॥अम्बरीषा
लयं गच्छ स त्वां रक्षितुमीश्वरः ॥ १२५ ॥ नारायण उवाच ॥ इदं वाक्यं च तच्छ्रुत्वा ब्राह्मणो भयविह्वलः ॥ विषण्ण
मानसस्तस्थौ स्मरन्कृष्णपदाम्बुजम् ॥१२६॥ एतस्मिन्नन्तरे ब्रह्मा भवान्या सह शंकरः ॥ धर्मश्चेन्द्रादयो देवा आजग्मुर्मुनिपुङ्गवाः॥
॥ १२७ ॥ प्रणम्य तुष्टुवुः सर्वे परमात्मानमीश्वरम् ॥ पुलकाञ्चितसर्वाङ्गा भक्तिनम्रात्मकंधराः ॥ १२८ ॥ ब्रह्मोवाच ॥
स्वात्मस्वरूप निर्लिप्त भक्तानुग्रहकातर ॥ भक्तापराधजनकं रक्ष ब्राह्मणपुङ्गवम् ॥ १२९ ॥ महादेव उवाच ॥ दीनबन्धो जगन्ना
थ नायं विप्रो जगद्बहिः ॥ कृतापराधं दीनं च पाहीमं शरणागतम् ॥ १३० ॥ पार्वत्युवाच ॥ भक्त एवांबरीषस्ते न द्वि
जा न सुरा वयम् ॥ सर्वेषामीश्वरस्त्वं च रक्ष विप्रं कृतागसम् ॥ १३१ ॥ धर्म उवाच ॥ सर्वेषां जनकस्त्वं च पाता दण्ड
कृदीश्वरः शिशुहेतोः शिशुं हन्ति पितेत्येवं कुतः प्रभो ॥ १३२ ॥ इंद्र उवाच ॥ कृपया समता शश्वत्सर्वेषु जीविषु प्रभो ॥
अपराधफलं भूतमधुना पातुमर्हसि ॥ १३३ ॥ रुद्र उवाच ॥ शान्तिं कर्तुं समुचितमुचितं सांप्रतं कुरु ॥ कृतकुण्ठस्य मूल
स्य पालनं कर्तुमर्हसि ॥ १३४ ॥ दिक्पाल उवाच ॥ कृतापराधं विप्रं च छेत्तुमर्हसि न श्रुतौ ॥ अपराधशमं

कृत्वा सदा पाति सदीश्वरः ॥ १३५ ॥ ग्रहा ऊचुः ॥ यो द्वेष्टि वैष्णवं मूढस्तं रुष्टाः सर्वदेवताः ॥ पीडां कुर्मो वयं शश्वत्पश्चात्त्वं पातुमर्हसि ॥ १३६ ॥ मुनय ऊचुः ॥ नाथ विप्रे पराभूते सर्वे जीवन्मृता वयम् ॥ दण्डं विधातुमेकस्य भवेल्लज्जा स्वजातिषु ॥ १३७ ॥ अत्रिरुवाच ॥ त्वयैव दत्तः पुत्रो मे क्रोधी त्वत्सेवकः सदा ॥ न कं बिभेति त्रैलोक्ये तेजस्वी तेजसा तव ॥ १३८ ॥ लक्ष्मीरुवाच ॥ क्षमापराधं भगवन् ब्राह्मणं शरणागतम् ॥ स्तुवन्ति देवविप्राश्च न विप्रं हन्तुमर्हसि ॥ १३९ ॥ सरस्वत्युवाच ॥ बोधयिष्यामि देवानां जनकं कामदं श्रुतिम् ॥ भगवन्स्वामी सर्वेषां सर्वांश्च पातुमर्हसि ॥ १४० ॥ पार्षदा ऊचुः ॥ भवतः स्मृतिमात्रेण सर्वेषां सर्वमङ्गलम् ॥ भवेत्सर्वापदो यान्ति पाहीमं शरणागतम् ॥ १४१ ॥ नर्तका ऊचुः ॥ दारिद्र्यभंजन वयं भिक्षुकास्तव संततम् ॥ भिक्षां नः सांप्रतं देहि परित्राणं द्विजस्य च ॥ १४२ ॥ एतेषां स्तवनं श्रुत्वा प्रभुः शरणवत्सलः ॥ प्रहस्योवाच वचनं सर्वसन्तोषकारणम् ॥ १४३ ॥ श्रीभगवानुवाच ॥ सर्वे शृणुत मद्वाक्यं नीतियुक्तं सुखावहम्॥विप्ररक्षां करिष्यामि युष्माकमाज्ञया ध्रुवम् ॥१४४॥ किं त्वयं यातु वैकुण्ठादम्बरीषालयं पुनः ॥ करोतु पारणं तत्र राज्ञः सुप्रीतये मुनिः ॥ १४५ ॥ विप्रस्तस्यातिथिर्भूत्वा निर्दोषं शप्तुमुद्यतः ॥ सुदर्शनं तु तं रक्ष्यं ब्राह्मणं हन्तुमुद्यतम् ॥१४६॥ पूर्णं वर्षमयं भीतो भ्रमत्येव भुवं मुदा ॥ उपवासी स राजेन्द्रःसस्त्रीकश्च शुचाऽन्वितः ॥१४७॥ ततोऽहमुपवासी च भक्तोपवासकारणात् ॥ स्तनान्धं बालकं दृष्ट्वा न भुङ्क्ते जननी यथा ॥ १४८ ॥ ममाशिषा मुनिश्रेष्ठः सद्यो भवतु विज्वरः ॥ पथि तत्रास्य हिंसां च मच्चक्रं न करिष्यति ॥ १४९ ॥ अहमेवाद्य निश्चिन्तः सुखं भोक्ष्यामि निश्चितम् ॥ भक्तदत्तं च यद्वस्तु प्रीत्या कृत्वा सुधोपमम् ॥१५०॥ लक्ष्मीदत्तं च यद्द्रव्यं न चाहं भोक्तुमीश्वरः ॥ विना भक्तप्रदानेन न तृप्तिं दातुमीश्वरः ॥ ॥ १५१ ॥ हे मुनीन्द्र महाप्राज्ञ गच्छ वत्स नृपालयम् ॥ सर्वे देवाश्च देव्यश्च गच्छन्तु मुनयो गृहम् ॥१५२॥ इत्युक्त्वा श्रीहरिस्तूर्णं ययौ स्वान्तःपुरं मुदा ॥ ययुः सर्वे मुदा युक्ताः प्रणम्य जगदीश्वरम् ॥ १५३ ॥ ब्राह्मणश्च मनोयायी जगाम नृपमन्दिरम् ॥सुदर्शनं

च तच्चक्रं सूर्यकोटिसमप्रभम् ॥ १५४ ॥ उपोष्य वत्सरं राजा शुष्ककण्ठोष्ठतालुकः ॥ सिंहासनस्थः पुरतो ददर्श मुनिपुङ्ग
वम् ॥ १५५ ॥ उत्थाय संभ्रमात्सद्यः प्रणम्य सादरं मुदा ॥ भोजयित्वा तु मिष्टान्नं ब्राह्मणं बुभुजे स्वयम् ॥ १५६ ॥ भुक्त्वा तुष्टो
द्विजश्रेष्ठो युयुजे परमाशिषम् ॥ जगाम स्वालयं तूर्णं प्रशशंस पुनःपुनः ॥ १५७ ॥ उवाच पथि विप्रेन्द्रो मनसा विस्मयाकुलः॥
माहात्म्यं दुर्लभमहो वैष्णवानामिति द्विजः ॥ १५८ ॥इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे मुनिमो
क्षणप्रस्तावो नाम पञ्चविंशोऽध्यायः ॥ २५ ॥ नारद उवाच ॥ द्वादशीलङ्घने दोषः श्रुतस्त्वन्मुखतो मुने ॥
पराभवो मुनेश्चैव नृपत्राणं हरेरहो ॥ १ ॥ अधुना श्रोतुमिच्छामि सर्वेषामीप्सितं च मे ॥ एकादशीव्रतस्यास्य विधानं वद निश्चि
तम् ॥ २ ॥ अहो श्रुतौ श्रुतं किंचिन्मतभेदान्न निश्चितम् ॥ श्रुतीनां कारणमुखाच्छ्रोतुं कौतूहलं मम ॥ ३ ॥ नारायण उवाच ॥
एकादशीव्रतमिदं देवानामपि दुर्लभम् ॥ श्रीकृष्णप्रीतिजनकं तपः श्रेष्ठं तपस्विनाम् ॥४॥ देवानां च यथा कृष्णो देवीनां प्रकृति
र्यथा ॥ आश्रमाणां यथा विप्रो वैष्णवानां यथा शिवः ॥५॥ यथा गणेशः पूज्यानां यथा वाणी विपश्चिताम् ॥ शास्त्राणां च यथा
वेदास्तीर्थानां जाह्नवी यथा ॥६॥ तैजसानां यथा स्वर्णं प्राणिनां वैष्णवो यथा ॥ धनानां च यथा विद्या सङ्गिनां च यथा प्रिया ॥७॥
प्रमथानां यथा रुद्रः श्रेयसां च यथा मतिः॥ आत्मा यथेन्द्रियाणां च चञ्चलानां यथा मनः ॥८॥ गुरुस्त्रीणां यथा माता बन्धूनां च
यथा पतिः ॥ बलिष्ठानां यथा दैवं कालः कलयतां यथा ॥९॥ सुशीलं चैव मित्राणां शत्रूणां रुग्यथा मुने ॥ यथा कीर्तिः कीर्तिमतां
गृहिणां च यथा गृहम् ॥ १०॥ यथा खलो हिंसकानां दुष्टानां चैव पुंश्चली ॥ तेजस्विनां ग्रहेशश्च सहिष्णूनां यथा क्षितिः ॥ ११ ॥
यथाऽमृतं भक्षणानां दाहकानां यथाऽनलः ॥ यथा श्रीर्धनदातृणां सतीनां च यथा सती ॥ १२ ॥ प्रजेशानां यथा ब्रह्मा सरितां
सागरो यथा ॥ यथा साम श्रुतीनां च गायत्री छन्दसां यथा ॥१३॥ वृक्षाणां च यथाऽश्वत्थः पुष्पाणां तुलसी यथा ॥ यथा मार्गो
हि मासानामृतूनां च यथा मधुः ॥ १४ ॥ आदित्यानां यथा सूर्यो रुद्राणां शंकरो यथा॥ यथा भीष्मो वसूनां च वर्षाणां भारतं

यथा ॥ १५ ॥ देवर्षीणां यथा त्वं च ब्रह्मर्षीणां यथा भृगुः ॥ नृपाणां च यथा रामः सिद्धानां कपिलो यथा ॥ १६ ॥ यथा सनत्कुमारश्च योगिनां ज्ञानिनां वरः ॥ ऐरावतो गजेन्द्राणां पशूनां शरभो यथा ॥ १७ ॥ यथा हिमाद्रिः शैलानां मणीनां कौस्तुभो यथा ॥ सरस्वती नदीनां च यथा पुण्यस्वरूपिणी ॥ १८ ॥ गन्धर्वाणां चित्ररथो यथा श्रेष्ठश्च नारद ॥ यथा कुबेरो यक्षाणां सुमाली रक्षसां यथा ॥ १९ ॥ यथा श्रेष्ठा च नारीणां शतरूपा वरा परा ॥ मनूनां च यथा श्रेष्ठः स्वयं स्वायंभुवो मनुः ॥२०॥ सुन्दरीणां यथा रम्भा यथा माया च मायिनाम् ॥ एकादशीव्रतमिदं व्रतानां च वरं तथा ॥२१॥ कर्तव्यं च चतुर्णां च वर्णानां नित्यमेव च ॥ यतीनां वैष्णवानां ब्राह्मणानां विशेषतः ॥ २२ ॥ सत्यं सर्वाणि पापानि ब्रह्महत्यादिकानि च ॥ सन्त्येवौदनमाश्रित्य श्रीकृष्णव्रतवासरे ॥ २३ ॥ भुक्त्वैतानि च पापानि यो भुङ्क्ते तत्र मन्दधीः ॥ इहातिपातकी सोऽपि यात्यन्ते नरकं ध्रुवम्॥२४॥ एकादशीप्रमाणानि युगसंख्याकृतानि च ॥ कुम्भीपाके महाघोरे स्थित्वा चाण्डालतां व्रजेत् ॥२५॥ गलितव्याधियुक्तश्च ततः सप्तसु जन्मसु॥ पश्चान्मुक्तो भवेत्पापादित्याह कमलोद्भवः ॥२६॥ इत्येवं कथितं ब्रह्मन्यो दोषस्तत्र भोजने ॥ द्वादशीलङ्घने दोषो मयोक्तश्च श्रुतः पुरा ॥२७॥ दशमीलङ्घने दोषं निबोध कथयामि ते ॥ पुरा श्रुतो धर्मवक्त्राद्वेदसारोद्धृतोऽपि च ॥२८॥ दशमीं यः कलामात्रां मूढोऽज्ञानेन लङ्घयेत् ॥ याति श्रीस्तद्गृहात्तूर्णं शापं दत्त्वा तु दारुणम् ॥२९॥ इह तद्वंशहानिश्च यशोहानिर्भवेद्ध्रुवम् ॥ अन्ते मन्वन्तरशतमन्धकूपे वसेद्द्विज ॥३०॥ दशम्येकादशी वापि द्वादशी यत्र वासरे ॥ तत्र भुक्त्वा परदिने उपोष्य व्रतमाचरेत् ॥३१॥ द्वादश्यां च व्रतं कृत्वा त्रयोदश्यां च पारणम् ॥ द्वादशीलङ्घने दोषो व्रतिनां तत्र विद्यते ॥ ३२ ॥ संपूर्णैकादशी यत्र प्रभाते किंचिदेव सा॥ तत्रोपोष्या द्वितीया च परा चेद्यदि वर्धते ॥३३॥ षष्टिदण्डात्मिका यत्र प्रभाते च तिथित्रयम् ॥ कुर्वन्ति गृहिणः पूर्वं चैव यत्यादयस्तथा ॥३४॥ परत्रानशनं कृत्वा नित्यकृत्यं समाचरेत् ॥ व्रते जागरणं सर्वं पूर्वत्रैवाचरेद्बुधः ॥३५॥ तत्पूर्वदिवसे नित्यं व्रते कृत्वा परेऽहनि ॥ एकादश्यां व्यतीतायां पारणं तु समाचरेत् ॥ ३६ ॥ वैष्णवानां यतीनां च विधवानां तथैव च ॥ सर्वाः समा उपोष्या

स्ता भिक्षूणां ब्रह्मचारिणाम् ॥ ३७ ॥ शुक्लामेव तु कुर्वन्ति गृहिणो वैष्णवेतराः ॥ न कृष्णालङ्घने दोषस्तेषां वेदेषु नारद ॥ ३८ ॥
शयनीबोधिनीमध्ये या कृष्णैकादशी भवेत् ॥ सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन ॥३९॥ इत्येवं कथितो ब्रह्मन्निर्णयोऽयं
श्रुतौ श्रुतः ॥ व्रतस्यास्य विधानं च निबोध कथयामि ते ॥ ४० ॥ कृत्वा हविष्यं पूर्वाह्णे न च भुङ्क्ते पुनर्जलम् ॥ एकाकी कुशश
य्यायां नक्तं शयनमाचरेत् ॥ ४१ ॥ ब्राह्मे मुहूर्ते चोत्थाय प्रातःकृत्यं विधाय च ॥ नित्यकृत्यं विधायाथ ततः स्नानं समाचरेत् ॥
॥ ४२ ॥ व्रतोपवासं संकल्प्य श्रीकृष्णप्रीतिपूर्वकम् ॥ कृत्वा सन्ध्यां तर्पणं च विधायाह्निकमाचरेत् ॥ ४३ ॥ नित्यपूजां दिने कृत्वा
व्रतद्रव्यं समाहरेत् ॥ कृत्वा षोडशोपचारं प्रहृष्टं विधिबोधितम् ॥ ४४ ॥ आसनं वसनं पाद्यमर्घ्यं पुष्पानुलेपनम् ॥ धूपं दीपं च
नैवेद्यं यज्ञसूत्रं च भूषणम् ॥ ४५ ॥ गन्धं स्नानीयताम्बूले मधुपर्कं पुनर्जलम् ॥ एतान्याहृत्य दिवसे व्रतं नक्तं समाचरेत् ॥ ४६ ॥ उप
विश्यासने पूतो धृत्वा धौतेयवाससी ॥ आचम्य श्रीहरिं नत्वा स्वस्तिवाचनमाचरेत् ॥ ४७ ॥ आरोप्य मङ्गलघटं धान्याधारे शुभे
क्षणे ॥ फलशाखाचंदनाक्तं वेदोक्तं मुनिभिर्मुदा ॥४८॥ देवषट्कं समावाह्य पृथग्धान्यैः समाचरेत् ॥ पूजां पञ्चोपचारैश्च प्रकृष्टैश्च
विचक्षणः ॥ ४९ ॥ गणेश्वरं दिनकरं वह्निं विष्णुं शिवं शिवाम् ॥ संपूज्यैतान्प्रणम्याथ व्रतं कुर्याद्धरिं स्मरन् ॥ ५० ॥ नाराध्य दे
वषट्कं च यदि कर्म समाचरेत् ॥ नित्यं नैमित्तिकं चापि तत्सर्वं निष्फलं भवेत् ॥ ५१ ॥ इत्येवं कथितं सर्वं व्रताङ्गभूतमेव च ॥
कण्वशाखोक्तमिष्टं च व्रतं शृणु महामुने ॥५२॥ सामवेदोक्तध्यानेन ध्यात्वा कृष्णं परात्परम् ॥ पुष्पं च शिरसि न्यस्य पुनर्ध्यानं
समाचरेत् ॥५३॥ ध्यानं शृणु निगूढं च सर्वेषामपि वाञ्छितम् ॥ न प्रकाश्यमभक्ताय भक्तप्राणाधिकं परम् ॥५४॥ नवीननीरदो
यद्वच्छ्यामसुन्दरविग्रहम् ॥ शरत्पार्वणचन्द्राभाविनिन्द्यास्यमनुत्तमम् ॥ ५५ ॥ शरत्सूर्योदयाब्जानां प्रभामोचनलोचनम्॥स्वांगसौं
दर्यशोभाभी रत्नभूषणभूषितम् ॥५६॥ गोपीलोचनकोणैश्च प्रसन्नैरतिसूचकैः ॥ शश्वन्निरीक्ष्यमाणं तत्प्राणैरिव विनिर्मितम् ॥ ५७ ॥
रासमण्डलमध्यस्थं रासोल्लाससमुत्सुकम्॥ राधावक्त्रशरच्चन्द्रसुधापानचकोरकम्॥५८॥ कौस्तुभेन मणीन्द्रेण वक्षःस्थलसमुज्ज्वलम्॥

पारिजातप्रसूनानां मालाजालैर्विराजितम् ॥ ५९ ॥ सद्रत्नसारनिर्माणं किरीटोज्ज्वलशेखरम् ॥ विनोदमुरलीन्यस्तहस्तं पूज्यं सुरासुरैः ॥ ६० ॥ ध्यानासाध्यं दुराराध्यं ब्रह्मादीनां च वन्दितम् ॥ कारणं कारणानां यस्तमीश्वरमहं भजे ॥ ६१ ॥ ध्यात्वाऽनेन तमावाह्य चोपहाराणि षोडश ॥ दत्त्वा संपूजयेद्भक्त्या मन्त्रैरेभिश्च नारद ॥ ६२ ॥ आसनं स्वर्णनिर्माणं रत्नसारपरिच्छदम् ॥ नानाचित्रविचित्राढ्यं गृह्यतां परमेश्वर ॥ ६३ ॥ वह्निप्रक्षालितं वस्त्रं निर्मितं विश्वकर्मणा ॥ मूल्यानिर्वचनीयं च गृह्यतां राधिकापते ॥ ॥ ६४ ॥ पादप्रक्षालनार्हं च सुवर्णपात्रसंस्थितम् ॥ सुवासितं शीतलं च गृह्यतां करुणानिधे ॥ ६५ ॥ इदमर्घ्यं पवित्रं च शङ्खतोयसमन्वितम् ॥ पुष्पदूर्वाचन्दनाक्तं गृह्यतां भक्तवत्सल ॥ ६६ ॥ सुवासितं शुक्लपुष्पं चन्दनागुरुसंयुतम् ॥ सद्यस्ते प्रीतिजनकं गृह्यतां सर्वकारण ॥ ६७ ॥ चन्दनागुरुकस्तूरीकुङ्कुमोशीरमुत्तमम् ॥ सर्वैप्सितमिदं कृष्ण गृह्यतामनुलेपनम् ॥ ६८ ॥ रसो वृक्षविशेषस्य नानाद्रव्यसमन्वितः ॥ सुगन्धियुक्तः सुखदो धूपोऽयं प्रतिगृह्यताम् ॥ ६९ ॥ दिवानिशं सुप्रदीप्तो रत्नसारविनिर्मितः ॥ पुनर्ध्वान्तनाशबीजं दीपोऽयं प्रतिगृह्यताम् ॥ ७० ॥ नानाविधानि द्रव्याणि स्वादूनि सुरभीणि च ॥ चोष्यादीनि पवित्राणि स्वात्माराम प्रगृह्यताम् ॥७१॥ सावित्रीग्रन्थिसयुक्तं स्वर्णतन्तुविनिर्मितम् ॥ गृह्यतां देवदेवेश रचितं चारु कारुण॥७२॥ अमूल्यरत्नरचितं सर्वावयवभूषणम् ॥ त्विषा जाज्वल्यमानं च गृह्यतां नन्दनन्दन ॥७३॥ प्रधानो वर्णनीयश्च सर्वमङ्गलकर्मणि ॥ प्रगृह्यतां दीनबन्धो गन्धोऽयं मङ्गलप्रदः ॥७४॥ धात्री श्रीफलपत्रोत्थं विष्णुतैलं मनोहरम् ॥ वाञ्छितं सर्वलोकानां भगवन्प्रतिगृह्यताम् ॥७५॥ वाञ्छनीयं च सर्वेषां कर्पूरादिसुवासितम् ॥मया निवेदितं नाथ ताम्बूलं प्रतिगृह्यताम् ॥७६॥ सर्वेषां प्रीतिजनकं सुमिष्टं मधुरं मधु ॥ सद्रत्नसारपात्रस्थं गोपीकान्त प्रगृह्यताम् ॥ ७७ ॥ निर्मलं जाह्नवीतोयं सुपवित्रं सुवासितम् ॥ पुनराचमनीयं च गृह्यतां मधुसूदन ॥ ७८ ॥ इति षोडशोपचारान्दत्त्वा भक्तो मुदाऽन्वितः ॥ मन्त्रेणानेन पुष्पाणि माल्यं दत्त्वा प्रयत्नतः ॥७९॥ नानाप्रकारपुष्पैश्च ग्रथितं शुक्लतन्तुना ॥ प्रवरं भूषणानां च माल्यं च गृह्यतां प्रभो ॥ ८० ॥ इति पुष्पाञ्जलिं दद्यान्मूलमन्त्रेण च व्रती ॥ कुर्यात्तत्स्तवनं भक्त्या पुटाञ्ज

लियुतः सुधीः ॥ ८१ ॥ भक्त उवाच ॥ हे कृष्ण राधिकानाथ करुणासागर प्रभो ॥ संसारसागरे घोरे मामुद्धर भया
नके ॥ ८२ ॥ शतजन्मकृतायासादुद्विग्नस्य मम प्रभो ॥ स्वकर्मपाशनिगडैर्बद्धस्य मोक्षणं कुरु ॥ ८३ ॥ प्रणतं पादपद्मे ते
पश्य मां शरणागतम् ॥ भवपाशभयाद्भीतं पाहि त्वं शरणागतम् ॥ ८४ ॥ भक्तिहीनं क्रियाहीनं विधिहीनं च वेदतः ॥ वस्तुम
न्त्रविहीनं यत्तत्संपूर्णं कुरु प्रभो ॥ ८५ ॥ वेदोक्तविहिताऽज्ञानात्स्वाङ्गहीने च कर्मणि ॥ त्वन्नामोच्चारणेनैव सर्वं पूर्णं भवेद्धरे॥८६॥
इति स्तुत्वा तं प्रणम्य दत्त्वा विप्राय दक्षिणाम् ॥ महोत्सवं विधायाथ कुर्याज्जागरणं व्रती ॥८७॥ कृत्वा व्रतोपवासं च यदि निद्रां
निषेवते ॥ पुनरेव जलं भुङ्क्ते व्रतार्धफलभाग्भवेत् ॥ ८८ ॥ यत्नेन च हविष्यान्नं सकृदेव समाचरेत् ॥ मन्त्रेणानेन विप्रेन्द्र श्रीकृष्ण
चरणं स्मरन् ॥ ८९ ॥ अन्नं हि प्राणिनां प्राणा ब्रह्मणा निर्मितं पुरा ॥ देहि मे विष्णुरूपं त्वं व्रतोपवासयोः फलम् ॥ ९० ॥ एवं
यः कुरुते भक्त्या भारते व्रतमुत्तमम् ॥ पूर्वान्सप्त परान्सप्त स्वात्मानमुद्धरेद्ध्रुवम् ॥९१॥ मातरं भ्रातरं चैव श्वश्रूं च श्वशुरं सुताम् ॥
जामातरं तथा भृत्यमुद्धरेन्निश्चितं नरः ॥ ९२ ॥ इत्येवं कथितं विप्र श्रीकृष्णचरितव्रतम् ॥ सुखदं मोक्षदं सारमपरं कथयामि ते ॥
॥ ९३ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे एकादशीव्रतनिरूपणं नाम षड्विंशोऽध्यायः ॥
॥ २६ ॥ श्रीनारायण उवाच ॥ शृणु नारद वक्ष्यामि श्रीकृष्णचरितं पुनः ॥ गोपीनां वस्त्रहरणं वरदानं मनीषितम् ॥ १ ॥
हेमन्ते प्रथमे मासि गोपिकाः काममोहिताः ॥ कृत्वा हविष्यं भक्त्या च यावन्मासं सुसंयुताः ॥ २ ॥ स्नात्वा सूर्यसुतातीरे
पार्वतीं वालुकामयीम् ॥ कृत्वाऽवाह्य च मन्त्रेण पूजां कुर्वन्ति नित्यशः ॥ ३ ॥ चन्दनागुरुकस्तूरीकुङ्कुमैश्च मनोहरैः ॥ नानाप्रकार
पुष्पैश्च माल्यैर्बहुविधैरपि ॥ ४ ॥ धूपैर्दीपैश्च नैवेद्यैर्वस्त्रैर्नानाफलैर्मुने ॥ मणिमुक्ताप्रवालैश्च वाद्यैर्नानाविधैरपि ॥ ५ ॥ हे देवि
जगतां मातः सृष्टिस्थित्यन्तकारिणि ॥ नन्दगोपसुतं कान्तमस्मभ्यं देहि सुव्रते ॥ ६ ॥ मन्त्रेणानेन देवेशीं परिहारं विधाय च ॥
ततः कृत्वा तु संकल्पं पूजयन् मूलमन्त्रतः ॥ ७ ॥ मन्त्रस्तु सामवेदोक्तोऽयातयामः सबीजकः ॥ ॐ श्रीदुर्गायै सर्वविघ्नविनाशिन्यै

नम इति ॥ ८ ॥ पुष्पं माल्यं च नैवेद्यं धूपं दीपं तथा शुभम् ॥ मन्त्रेणानेन तद्भक्त्या ददुः सर्वा मुदान्विताः ॥ ९ ॥ प्रवाल
मालया भक्त्या चेमं मन्त्रं सहस्रधा ॥ जपं कृत्वा च स्तुत्वा च प्रणेमुः शिरसा भुवि ॥ १० ॥ सर्वमङ्गलमाङ्गल्ये सर्वकामप्रदे
शिवे ॥ देहि मे वाञ्छितं देवि नमस्ते शंकरप्रिये ॥ ११ ॥ इत्युक्त्वा च नमस्कारं कृत्वा दत्त्वा च दक्षिणाम् ॥ नैवेद्यानि च
सर्वाणि ब्राह्मणेभ्यो ययुर्गृहम् ॥ १२ ॥ श्रीनारायण उवाच ॥ स्तवराजं शृणु मुने तुष्टुवुर्येन पार्वतीम् ॥ भक्त्या
गोपाङ्गनाः सर्वाः सर्वाभीष्टफलप्रदाम् ॥ १३ ॥ जगत्येकार्णवे घोरे चन्द्रसूर्यविवर्जिते ॥ अञ्जनाकारतोयेन संप्लुते च चराचरे
॥ १४ ॥ दत्तं पुरा ब्रह्मणे च हरिणा जलशायिना ॥ तस्मै दत्त्वा सर्वमिदं निद्रां भेजे जगत्पतिः ॥ १५ ॥ नाभिपद्मे जगत्स्रष्टा
मधुना कैटभेन च ॥ पीडितः परितुष्टाव मूलप्रकृतिमीश्वरीम् ॥ १६ ॥ ब्रह्मोवाच ॥ दुर्गे शिवेऽभये माये नारायणि
सनातनि ॥ जये मे मङ्गलं देहि नमस्ते सर्वमङ्गले ॥ १७ ॥ दैत्यनाशार्थवचनो दकारः परिकीर्तितः ॥ उकारो विघ्ननाशार्थ
वाचको वेदसंमतः ॥ १८ ॥ रेफो रोगघ्नवचनो गश्च पापघ्नवाचकः ॥ भयशत्रुघ्नवचनश्चाकारः परिकीर्तितः ॥ १९ ॥ स्मृत्युक्ति
स्मरणाद्यस्या एते नश्यन्ति निश्चितम् ॥ अतो दुर्गा हरेः शक्तिर्हरिणा परिकीर्तिता ॥ २० ॥ विपत्तिवाचको दुर्गश्चाकारो नाश
वाचकः ॥ दुर्गं नश्यति या नित्यं सा दुर्गा परिकीर्तिता ॥ २१ ॥ दुर्गो दैत्येन्द्रवचनोऽप्याकारो नाशवाचकः ॥ तं ननाश पुरा तेन
बुधैर्दुर्गा प्रकीर्तिता ॥ २२ ॥ शश्च कल्याणवचन इकारोत्कृष्टवाचकः ॥ समूहवाचकश्चैव वाकारो दातृवाचकः ॥ २३ ॥ श्रेयःसङ्घो
त्कृष्टदात्री शिवा तेन प्रकीर्तिता ॥ शिवराशिर्मूर्त्तिमती शिवा तेन प्रकीर्तिता ॥ २४ ॥ शिवो हि मोक्षवचनश्चाकारो दातृवाचकः ॥
स्वयं निर्वाणदात्री या सा शिवा परिकीर्तिता ॥ २५ ॥ अभयो भयनाशोक्तश्चाकारो दातृवाचकः ॥ प्रददात्यभयं सद्यः साऽभया
परिकीर्तिता ॥ २६ ॥ राज्यश्रीवचनो माश्च याश्च प्रापणवाचकः ॥ तां प्रापयति या सद्यः सा माया परिकीर्तिता ॥ २७ ॥ माश्च
मोक्षार्थवचनो याश्च प्रापणवाचकः ॥ तं प्रापयति या नित्यं सा माया परिकीर्तिता ॥ २८ ॥ नारायणार्धाङ्गभूता तेन तुल्या च तेजसा ॥

सदा तस्य शरीरस्था तेन नारायणी स्मृता ॥ २९ ॥ निर्गुणस्य च नित्यस्य वाचकश्च सनातनः ॥ सदा नित्या निर्गुणा या कीर्तिता सा सनातनी ॥ ३० ॥ जयः कल्याणवचनो याकारो दातृवाचकः ॥ जयं ददाति या नित्यं सा जया परिकीर्तिता ॥ ३१ ॥ सर्वमङ्गलशब्दश्च संपूर्णैश्वर्यवाचकः ॥ आकारो दातृवचनस्तद्दात्री सर्वमङ्गला ॥३२॥ नामाष्टकमिदं सारं नामार्थसहसंयुतम् ॥ नारायणेन यद्दत्तं ब्रह्मणे नाभिपङ्कजे ॥ ३३ ॥ तस्मै दत्त्वा निद्रितश्च बभूव जगतां पतिः ॥ मधुकैटभौ दुर्गौ तौ ब्रह्माणं हन्तुमुद्यतौ ॥ ३४ ॥ स्तोत्रेणानेन स ब्रह्मा स्तुतिं नत्वा चकार ह ॥ साक्षात्स्तुता तदा दुर्गा ब्रह्मणे कवचं ददौ ॥ ३५ ॥ श्रीकृष्णकवचं दिव्यं सर्वरक्षणनामकम् ॥ दत्त्वा तस्मै महामाया साऽन्तर्धानं चकार ह ॥ ३६ ॥ स्तोत्रं कुर्वन्ति निद्रां च संरक्ष्य कवचेन वै ॥ निद्रानुग्रहतः सद्यः स्तोत्रस्यैव प्रभावतः ॥ ३७ ॥ तत्राजगाम भगवान्वृषरूपी जनार्दनः ॥ शक्त्या च दुर्गया सार्धं शंकरस्य जयाय च ॥ ३८ ॥ सरथं शंकरं मूर्ध्नि कृत्वा च निर्भयं ददौ ॥ अत्यूर्ध्वं प्रापयामास जया तस्मै जयं ददौ ॥ ३९ ॥ स्तोत्रस्यैव प्रभावेण संप्राप्य कवचं विधिः ॥ वरं च कवचं प्राप्य निर्भयं प्राप निश्चितम् ॥ ४० ॥ ब्रह्मा ददौ महेशाय स्तोत्रं च कवचं वरम् ॥ त्रिपुरस्य च संग्रामे सरथे पतिते हरौ ॥ ४१ ॥ ब्रह्मास्त्रं च गृहीत्वा स सनिद्रं श्रीहरिं स्मरन् ॥ स्तोत्रं च कवचं प्राप्य जघान त्रिपुरं हरः ॥ ४२ ॥ स्तोत्रेणानेन तां दुर्गां कृत्वा गोपालिकाः स्तुतिम् ॥ लेभिरे श्रीहरिं कान्तं स्तोत्रस्यास्य प्रभावतः ॥४३॥ गोपकन्याकृतं स्तोत्रं सर्वमङ्गलनामकम् ॥ वांछितार्थप्रदं सद्यः सर्वविघ्नविनाशनम् ॥ ४४ ॥ त्रिसन्ध्यं यः पठेन्नित्यं भक्तियुक्तश्च मानवः ॥ शैवो वा वैष्णवो वाऽपि शाक्तो दुर्गात्प्रमुच्यते ॥४५॥ राजद्वारे श्मशाने च दावाग्नौ प्राणसंकटे ॥ हिंस्रजन्तुभयग्रस्तो मग्नः पोते महार्णवे ॥४६॥ शत्रुग्रस्ते च संग्रामे कारागारे विपद्गते ॥ गुरुशापे ब्रह्मशापे बन्धुभेदे च दुस्तरे ॥४७॥ स्थानभ्रष्टे धनभ्रष्टे जातिभ्रष्टे शुचाऽन्विते ॥ पतिभेदे पुत्रभेदे खलसर्पविषान्विते ॥४८॥ स्तोत्रस्मरणमात्रेण सद्यो मुच्येत निर्भयः ॥ वांछितं लभते सद्यः सर्वैश्वर्यमनुत्तमम् ॥ ४९ ॥ इह लोके हरेर्भक्तिं दृढां च सततं स्मृतिम् ॥ अन्ते दास्यं च लभते पार्वत्याश्च प्रसादतः ॥५०॥ इति श्रीब्रह्मवैवर्ते

गोपकन्याकृतं सर्वमंगलास्तोत्रम् ॥ अनेन स्तवराजेन तुष्टुवुर्नित्यमीश्वरीम् ॥ प्रणेमुः परया भक्त्या यावन्मासं व्रजाङ्गनाः ॥ ५१ ॥ एवं पूर्णे च मासे च समाप्तिदिवसे तथा ॥ स्नातुं प्रजग्मुर्गोप्यश्च वस्त्राण्याधाय तत्तटे ॥५२॥ नानाविधानि द्रव्याणि रत्नमूल्यानि नारद ॥ पीतलोहितशुक्लानि चारूणि मिश्रितानि च ॥ ५३ ॥ तीरावृतान्यसंख्यानि तैश्च तीरं सुशोभनम् ॥ चन्दनागुरुकस्तूरीवायुना सुरभीकृतम् ॥५४॥ नैवेद्यैश्च बहुविधैः कालदेशोद्भवैः फलैः ॥ धूपैः प्रदीपैः सिन्दूरैः कुङ्कुमैश्च विराजितम् ॥ ५५ ॥ जले क्रीडोन्मुखा गोप्यो बभूवुः कौतुकेन च ॥ नग्नाः क्रीडाभिरासक्ताः श्रीकृष्णार्पितमानसाः ॥ ५६ ॥ दृष्ट्वा कृष्णश्च वस्त्राणि द्रव्याणि विविधानि च ॥ वासांस्यादाय वस्तूनि चखाद शिशुभिः सह ॥५७॥ गत्वा दूरं च गोपालास्तस्थुः सर्वे मुदाऽन्विताः ॥ वस्त्राणि पुंजीकृत्यादावूचुः स्कन्धेऽतिलोलुपाः ॥ ५८ ॥ श्रीदामा च सुदामा च वसुदामा तथैव च ॥ सुबलश्च सुपार्श्वश्च शुभाङ्गः सुन्दरस्तथा ॥ ५९ ॥ चन्द्रभानो वीरभानः सूर्यभानस्तथैव च ॥ वसुभानो रत्नभानो गोपाला द्वादश स्मृताः ॥ ६० ॥ श्रीकृष्णो बलदेवश्च प्रधानाश्च चतुर्दश ॥ गोपा हरेर्वयस्याश्च कोटिशः कोटिशो मुने ॥ ६१ ॥ वस्त्राण्यादाय ते सर्वे तस्थुरेकत्र दूरतः ॥ शतशः पुञ्जिकास्तत्र स्थापयामासुरुन्मुखाः ॥ ६२ ॥ किंचिद्वस्त्रं समादाय कृत्वा च पुञ्जिकां मुदा ॥ समारुह्य कदम्बाग्रमुवाच गोपिका हरिः ॥ ६३ ॥ श्रीकृष्ण उवाच ॥ भोभो गोपालिकाः सर्वा विनष्टा व्रतकर्मणि ॥ कृत्वा विधानं मद्वाक्यं श्रुत्वा क्रीडत मन्मथात् ॥ ६४ ॥ संकल्पिते व्रतार्हे च मासे मङ्गलकर्मणि ॥ यूयं नग्नाः कथं तोये व्रताङ्गहानिकारिकाः ॥ ६५ ॥ परिधेयानि वासांसि पुष्पमाल्यानि यानि च ॥ व्रतार्हाणि च वस्तूनि केन नीतानि वोऽधुना ॥ ६६ ॥ व्रते तु नग्ना या स्नाति तां रुष्टो वरुणः स्वयम् ॥ वरुणानुचराश्चक्रुर्वासोवस्तूपनिर्हतिम् ॥ ६७ ॥ कथं यास्यथ नग्नाश्च किं व्रतस्या भविष्यति ॥ व्रताराध्या कथं सा च वस्तूनि किं न रक्षति ॥६८॥ चिन्तां कुरुत तां पूज्यां तुष्टाव बलिरीश्वरीम् ॥ युष्माकमीदृशी देवी न शक्ता वस्तुरक्षणे ॥ ६९ ॥ कथं व्रतफलं सा वा दातुं शक्ता सुरेश्वरी ॥ फलं प्रदातुं या शक्ता सा शक्ता सर्वकर्मणि ॥ ७० ॥ श्रीकृष्णस्य वचः श्रुत्वा चिन्तामापुर्व्रज

स्त्रियः ॥ ददृशुर्यमुनातीरं वस्त्रवस्तुविहीनकम् ॥७१॥ चक्रुर्विषादं तोये च नग्नास्ता रुरुदुर्भृशम् ॥ क्व गतानि च वस्त्राणि वस्तूनीत्यूचुरत्र नः ॥ ७२ ॥ कृत्वा विषादं तत्रैव तमूचुर्गोपकन्यकाः ॥ पुटाञ्जलियुताः सर्वा भक्त्या विनयपूर्वकम् ॥ ७३ ॥ गोपालिका ऊचुः ॥ परिधेयानि वस्त्राणि किंकरीणां सदीश्वर ॥ निबोधयात्मानमेव स्पर्शं कर्तुं त्वमर्हसि ॥ ७४ ॥ व्रतार्हाणि च वस्तूनि देवस्वानि च साम्प्रतम् ॥ अदत्तानि मोचितानि ग्रहीतुं वेदविद्वद ॥७५॥ देहि धौतानि धृत्वा च करिष्यामो व्रतं वयम्॥ वस्तुनाऽन्येन गोविन्द वस्तूनां भक्षणं कुरु ॥ ७६ ॥ एतस्मिन्नन्तरे तत्र श्रीदामा वस्त्रपुञ्जिकाम् ॥ दर्शयित्वा च ताः सर्वा दूरं दुद्राव तत्पुरः ॥ ७७ ॥ दृष्ट्वा सवस्त्रं गोपालं सर्वासामीश्वरी परा ॥ सर्वा वयस्याश्चाववाच कोपयुक्ता जलप्लुता ॥७८॥ श्रीराधिकोवाच ॥ हे सुशीले शशिकले हे चन्द्रमुखि माधवि ॥ कदम्बमाले हे कुन्ति यमुने सर्वमङ्गले ॥ ७९ ॥ हे पद्ममुखि सावित्रि पारिजाते च जाह्नवि॥ सुधामुखि शुभे पद्मे हे गौरि हे स्वयंप्रभे ॥ ८० ॥ कालिके कमले दुर्गे हे सरस्वति भारति ॥ अपूर्णे रति हे गंगे चाम्बिके सति सुन्दरि ॥ ८१ ॥ कृष्णप्रिये मधुमति चम्पे चन्दननन्दिनि ॥ यूयं सर्वाः समुत्थाय बद्ध्वाऽऽनयत बल्लवम् ॥८२॥ सर्वा राधाज्ञया तूर्णं समुत्थाय जलात्क्रुधा ॥ प्रजग्मुर्गोपिका नग्ना योनिमाच्छाद्य पाणिना ॥ ८३ ॥ एतासां सहचारिण्यो गोप्यस्तूर्णं सहस्रशः ॥ प्रजग्मुस्तेन रूपेण कोपादारक्तलोचनाः ॥ ८४ ॥ वेगेन दुद्रुवुः सर्वाः श्रीदामानं च बालिकाः ॥ वेगेन च प्रधावन्तं बिभ्रतं वस्त्रपुंजिकाम् ॥ ८५ ॥ जगाम शीघ्रं श्रीदामा यत्र गोपाः सहांशुकाः ॥ जवेन दुद्रुवुर्गोप्यस्तत्पश्चाद्बलसंयुताः ॥ ८६ ॥ वस्त्रचोरांश्च गोपांश्च वेष्टयामासुराशु ताः ॥ भिया प्रदुद्रुवुर्बाला यत्र कृष्णः सहांशुकः ॥ ८७ ॥ श्रीकृष्णसहितान्बालान्वरयामासुराशु च ॥ गोपिकानां भिया गोपा ददुर्वस्त्राणि माधवम् ॥ ८८ ॥ माधवः स्थापयामास स्कन्धेस्कन्धे तरोस्तथा॥ कदम्बवृक्षः शुशुभे वस्त्रैर्नानाविधैरपि ॥ ८९ ॥ वस्त्राणां पुंजिकाः सर्वाः स्कन्धेषु विनिधाय च ॥ उवाच गोपिकाः कृष्णः परिहासपरं वचः ॥ ९० ॥ श्रीकृष्ण उवाच ॥ भो भो गोपालिका नग्ना इदानीं किं करिष्यथ ॥ वस्त्रयाच्ञां प्रकर्तुं च कुरुताशु पुटाञ्जलिम् ॥ ९१ ॥ गत्वा वदत युष्माकमीश्वरीमथ

राधिकाम् ॥ करोतु शीघ्रं वस्त्राणां याच्ञां कृत्वा पुटाञ्जलिम् ॥९२॥ अन्यथाऽहं न दास्यामि युष्मभ्यमंशुकानि च ॥ युष्माकमी
श्वरी राधा किं करिष्यति मेऽधुना ॥९३॥ व्रताराध्या च या देवी सा वा मे किं करिष्यति ॥ इत्येवं कथितं सर्वं ब्रूत यूयं च राधि
काम् ॥ ९४ ॥ श्रीकृष्णवचनं श्रुत्वा ताः सर्वा गोपकन्यकाः ॥ वीक्ष्य लोचनकोणेन प्रजग्मू राधिकान्तिकम् ॥ ९५ ॥ चक्रुर्निवे
दनं गत्वा यदुवाच हरिः स्वयम् ॥ श्रुत्वा जहास सा राधा बभूव कामपीडिता ॥ ९६ ॥ श्रुत्वा तासां च वचनं पुलकाञ्चित
विग्रहा ॥ न जगाम हरेः स्थानं व्रीडया सस्मिता सती ॥९७॥ जले योगासनं कृत्वा दध्यौ कृष्णपदाम्बुजम् ॥ ब्रह्मेशानन्तधर्माणां
वन्द्यमीप्सितदं परम् ॥ ९८ ॥ स्मारंस्मारं पदाम्भोजं साऽश्रुसंपूर्णलोचना ॥ भावातिरेकात्प्राणेशं तुष्टाव निर्गुणं परम् ॥ ९९ ॥
॥ राधिकोवाच ॥ ॥ गोलोकनाथ गोपीश मदीश प्राणवल्लभ ॥ हे दीनबन्धो दीनेश सर्वेश्वर नमोऽस्तु ते ॥ १०० ॥ गोपे
श गोसमूहेश यशोदानन्दवर्धन ॥ नन्दात्मज सदानन्द नित्यानन्द नमोऽस्तु ते ॥ १०१ ॥ शतमन्योर्मन्युभग्न ब्रह्मदर्पविनाशक॥
कालीयदमन प्राणनाथ कृष्ण नमोऽस्तु ते॥ १०२ ॥ शिवानन्तेश ब्रह्मेश ब्राह्मणेश परात्पर ॥ ब्रह्मस्वरूप ब्रह्मज्ञ ब्रह्मबीज नमोऽस्तु
ते ॥१०३॥ चराचरतरोर्बीज गुणातीत गुणात्मक ॥ गुणबीज गुणाधार गुणेश्वर नमोऽस्तु ते ॥१०४॥ अणिमादिकसिद्धीश सिद्धेः
सिद्धिस्वरूपक ॥ तपस्तपस्विंस्तपसां बीजरूप नमोऽस्तु ते ॥ १०५ ॥ यदनिर्वचनीयं च वस्तु निर्वचनीयकम् ॥ तत्स्वरूप तयो
र्बीज सर्वबीज नमोऽस्तु ते ॥१०६॥ अहं सरस्वती लक्ष्मीर्दुर्गा गङ्गा श्रुतिप्रसूः ॥ यस्य पादार्चनान्नित्यं पूज्या तस्मै नमोनमः ॥
॥ १०७ ॥ स्पर्शने यस्य भृत्यानां ध्यानेन च दिवानिशम् ॥ पवित्राणि च तीर्थानि तस्मै भगवते नमः ॥ १०८ ॥ इत्येवमुक्त्वा
सा देवी जले संन्यस्य विग्रहम् ॥ मनः प्राणांश्च श्रीकृष्णे तस्थौ स्थाणुसमा सती ॥ १०९ ॥ राधाकृतं हरेः स्तोत्रं त्रिसन्ध्यं यः
पठेन्नरः ॥ हरिभक्तिं च दास्यं च लभेद्राधागतिं ध्रुवम् ॥ ११० ॥ विपत्तौ यः पठेद्भक्त्या सद्यः संपत्तिमाप्नुयात् ॥ चिरकालगतं
द्रव्यं हृतं नष्टं च लभ्यते ॥१११॥ बन्धुवृद्धिर्भवेत्तस्य प्रसन्नं मानसं परम् ॥ चिन्ताग्रस्तः पठेद्भक्त्या परां निर्वृतिमाप्नुयात् ॥११२॥

पतिभेदे पुत्रभेदे मित्रभेदे च संकटे ॥ मासं भक्त्या यदि पठेत्सद्यः संदर्शनं लभेत् ॥ ११३ ॥ भक्त्या कुमारी स्तोत्रं च
शृणुयाद्वत्सरं यदि ॥ श्रीकृष्णसदृशं कान्तं गुणवन्तं लभेद् ध्रुवम् ॥११४॥ इति श्रीब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे राधाकृतं श्रीकृष्ण
स्तोत्रम् ॥ जलस्था राधिका ध्यात्वा श्रीकृष्णचरणाम्बुजम् ॥ स्तुत्वैवं चक्षुरुन्मील्य दृष्ट्वा कृष्णमयं जगत् ॥ ११५ ॥ ददर्श
यमुनातीरं वस्त्रद्रव्यमयं मुने ॥ दृष्ट्वा तन्द्राऽथवा स्वप्नमिति मेने च राधिका ॥११६॥ यत्र स्थाने यदाधारे यद्द्रव्यं संस्थितं पुरा ॥
वस्त्रैश्च सहितं सर्वं तत्प्रापुर्गोपकन्यकाः ॥ ११७ ॥ जलादुत्थाय ताः सर्वा व्रतं कृत्वा मनीषितम् ॥ संप्राप्य च वरं देव्यस्ताः
सर्वाः स्वालयं ययुः ॥ ११८ ॥ नारद उवाच ॥ व्रतस्य किं विधानं च किं नाम किं फलं प्रभो ॥ कानि द्रव्याणि
देयानि का देया तत्र दक्षिणा ॥ ११९ ॥ व्रतान्ते किं रहस्यं च बभूव सुमनोहरम् ॥ व्यासं कृत्वा महाभाग वद नारायणीं कथाम् ॥
॥ १२० ॥सूत उवाच ॥ नारदस्य वचः श्रुत्वा प्रहस्य मुनिपुंगवः ॥ कथां कथितुमारेभे कवीन्द्राणां गुरोर्गुरुः ॥ १२१ ॥
नारायण उवाच ॥ सर्वं व्रतविधानं च मत्तो वत्स निशामय ॥ ख्यातं गौरीव्रतं नाम मार्गे मासि कृतं स्त्रिया ॥
॥ १२२ ॥ पुंसां च धर्मकामार्थमोक्षदं कृष्णभक्तिदम् ॥ देशभेदे प्रसिद्धं च व्रतं पौर्वापरं स्मृतम् ॥१२३ ॥ कामदं कामुकानां च
फलं कान्तनिमित्तकम् ॥ उपोष्य पूर्वदिवसे वस्त्रं प्रक्षाल्य संयता ॥ १२४ ॥ प्रातश्च मार्गसंक्रान्त्यां भक्त्या गत्वा सरित्तटम् ॥
धृत्वा धौते च स्नात्वा च नानाद्रव्येण कन्यका ॥ १२५ ॥ देवषट्कं च संपूज्य कृत्वा चावाहनं घटे ॥ गणेशं च दिनेशं च वह्निं ना
रायणं शिवम् ॥ १२६ ॥ दुर्गां पंचोपचारैश्च संपूज्य व्रतमारभेत् ॥ घटाधः पिण्डिकां कृत्वा चतुरस्रां सुविस्तृताम् ॥ चन्द
नागुरुकस्तूरीकुङ्कुमैश्च सुसंस्कृताम् ॥ १२७ ॥ निर्माय वालुकानां च दुर्गां दशभुजां पराम् ॥ धृत्वा कपाले सिन्दूरं तदधश्चन्दनेन्दुकम्
॥१२८॥तां ध्यात्वाऽऽवाहयेद्देवीं ततो भूत्वा पुटाञ्जलिः ॥ इमं मन्त्रं पठित्वाऽऽदौ ततः पूजां समारभेत्॥१२९॥हे गौरि शंकरार्धा
ङ्गि यथा त्वं शंकरप्रिया ॥ तथा मां कुरु कल्याणि कान्तकान्तां सुदुर्लभाम् ॥ १३० ॥इमं मन्त्रं पठित्वा तु ध्यायेद्देवीं जगत्प्रसूम् ॥

ध्यानं तत्सामवेदोक्तं निगूढं सर्वकामदम् ॥ १३१ ॥ शृणु नारद वक्ष्यामि मुनीन्द्राणां च दुर्लभम् ॥ ध्यायन्त्यनेन सिद्धाश्च दुर्गां
दुर्गतिनाशिनीम् ॥१३२॥ शिवां शिवप्रियां शैवां शिववक्षःस्थलस्थिताम् ॥ ईषद्धास्यप्रसन्नास्यां सुप्रतिष्ठां सुलोचनाम् ॥ १३३ ॥
नवयौवनसंपन्नां रत्नाभरणभूषिताम् ॥ रत्नकङ्कणकेयूररत्ननूपुरभूषिताम्॥१३४॥रत्नकुण्डलयुग्मेन गण्डस्थलविराजिताम् ॥ मालतीमाल्यसंसक्तकबरभ्रमरान्विताम् ॥ १३५ ॥ सिन्दूरतिलकं चारुकस्तूरीबिन्दुना सह ॥ वह्निशुद्धांशुकां रत्नकिरीटां सुमनोहराम् ॥
॥ १३६ ॥ मणीन्द्रसारसंसक्तरत्नमालासमुज्ज्वलाम् ॥ पारिजातप्रसूनानां मालाजालानुलम्बिताम् ॥ १३७ ॥ सुपीनकठिनश्रोणीं
बिभ्रतीं च स्तनानताम् ॥ नवयौवनभारौघादीषन्नम्रां मनोहराम् ॥ १३८ ॥ ब्रह्मादिभिः स्तूयमानां सूर्यकोटिसमप्रभाम् ॥ पक्वबिम्बाधरोष्ठीं च चारुचम्पकसन्निभाम्॥१३९॥मुक्तापङ्क्तिविनिन्द्यैकदन्तराजिविराजिताम् ॥ मुक्तिकामप्रदां देवीं शरच्चन्द्रमुखीं भजे॥
॥ १४० ॥ ध्यात्वैवं मस्तके पुष्पं विन्यस्य च व्रती मुदा ॥ पुष्पं गृहीत्वा भक्त्या च पुनर्ध्यात्वा च पूजयेत् ॥ १४१ ॥ दत्त्वा
षोडशोपचारान्प्रहृष्टं तत्र नित्यशः ॥ पूर्वोक्तेनैव मन्त्रेण मुदा भक्त्या व्रते व्रती ॥१४२॥ पूर्वोक्तेनैव स्तोत्रेण स्तुत्वा च प्रणमेत्तदा ॥
कृत्वा प्रणामं भक्त्या च संयतः शृणुयात्कथाम् ॥ १४३ ॥ नारद उवाच ॥ व्रतं व्रतविधानं च फलं च स्तोत्रमद्भुतम् ॥ अधुना
श्रोतुमिच्छामि गौरीव्रतकथां शुभाम् ॥ १४४ ॥ व्रतं केन कृतं पूर्वं भूमौ केन प्रकाशितम् ॥ एतत्सर्वं सुविस्तार्य वद संदेहभञ्जन ॥
॥ १४५ ॥ श्रीनारायण उवाच ॥ कुशध्वजस्य हि सुता नाम्ना वेदवती सती ॥ तया कृतं व्रतमिदं महातीर्थे च पुष्करे ॥ १४६ ॥
समाप्तिदिवसे साक्षाद्बभूव जगदम्बिका ॥ योगिनीलक्षसंयुक्ता सूर्यकोटिसमप्रभा ॥ १४७ ॥ शातकुम्भविनिर्माणरथस्था परमेश्वरी ॥ ईषद्धास्यप्रसन्नास्या तामुवाच सुसंयुताम् ॥ १४८ ॥ पार्वत्युवाच ॥ हे वेदवति भद्रं ते वरं वृणु यथेप्सितम् ॥ तव व्रतेन
तुष्टाऽहं तुभ्यं दास्यामि वाञ्छितम् ॥ १४९ ॥ पार्वतीवचनं श्रुत्वा दृष्ट्वा तां हृष्टमानसाम् ॥ पुटाञ्जलियुता साध्वी प्रणम्योवाच
नारद ॥ १५० ॥ वेदवत्युवाच ॥ देवि नारायणं कान्तं मह्यं देहि मनीषितम् ॥ वरेऽन्यस्मिन्स्पृहा नास्ति दृढां भक्तिं च तत्पदे ॥

॥ १५१ ॥ श्रुत्वा वेदवतीवाक्यं प्रहस्य जगदम्बिका ॥ अवरुह्य रथात्तूर्णं तामुवाच हरिप्रियाम् ॥ १५२ ॥ पार्वत्युवाच ॥ ज्ञातं सर्वं जगन्मातस्त्वं च लक्ष्मीः स्वयं सती ॥ भारतं पादरजसा पूतं कर्तुं समागता ॥ त्वत्पादरजसा साध्वि सद्यः पूता वसुंधरा ॥ १५३ ॥ निखिलानि च तीर्थानि पूतानि परमेश्वरी ॥ व्रतं ते लोकशिक्षार्थं तपश्चर तपस्विनि ॥ १५४ ॥ नारायणस्य कान्ता त्वं प्रिया जन्मनि जन्मनि ॥ भारावतरणे विष्णुर्वसुधामागमिष्यति ॥ १५५ ॥ रामो दाशरथिः पूर्णः कर्तुं दस्युविनिग्रहम् ॥ ब्रह्मशापाच्च च्युतयोर्मोक्षणाय च भक्तयोः ॥ १५६ ॥ अयोध्यायां च त्रेतायामाविर्भावो हरेरपि ॥ त्वमेव मिथिलां गच्छ विधाय शिशुविग्रहम् ॥ १५७ ॥ त्वामिमां प्राप्य जनकोऽप्ययोनिसंभवां सुताम् ॥ पालयिष्यति यत्नेन सीता त्वं च भविष्यसि ॥ १५८ ॥ गत्वा रामोऽपि मिथिलां त्वद्विवाहं करिष्यति ॥ नारायणस्य कान्ता त्वं कल्पे कल्पे भविष्यसि ॥ १५९ ॥ इत्युक्त्वा तां समालिङ्ग्य पार्वती स्वालयं ययौ ॥ गत्वा सा मिथिलां साध्वी शिशुरूपं विधाय च ॥ १६० ॥ लाङ्गलस्य च रेखायां सुखात्तस्थौ च मायया ॥ विलोक्य जनकस्तां च नग्नां मुद्रितलोचनाम् ॥ १६१ ॥ तप्तकाञ्चनवर्णां च रुदन्तीं तेजसाऽन्विताम् ॥ दृष्ट्वा तां च गृहीत्वा च कृत्वा वक्षसि नारद ॥ १६२ ॥ गच्छन्तं प्रति तत्रैव वाग्बभूवाशरीरिणी ॥ अयोनिसंभवां कन्यां कमलां ग्रहणं कुरु ॥ १६३ ॥ नारायणस्ते जामाता भवितेत्येव मे वचः ॥ श्रुत्वा तदा देववाणीं गृहीत्वा कन्यकामृषिः ॥ १६४ ॥ गत्वा ददौ स्वकान्तायै पालनाय मुदाऽन्वितः ॥ सा लब्धयौवना प्राप रामं दाशरथिं सती ॥ १६५ ॥ व्रतस्यास्य प्रभावेण कान्तं त्रिजगतां पतिम् ॥ प्रकाशितं वशिष्ठेन पृथिव्यां भक्तिभावतः ॥ १६६ ॥ राधा कृत्वा व्रतमिदं श्रीकृष्णं प्राणवल्लभम् ॥ गोपाङ्गनाश्च तं प्रापुर्व्रतस्यास्य प्रभावतः ॥ १६७ ॥ इत्येवं कथिता विप्र कथा गौरीव्रतस्य च ॥ भारते च व्रतमिदं या करोति कुमारिका ॥ स्वामिनं कृष्णतुल्यं च सा प्राप्नोति न संशयः ॥ १६८ ॥ श्रीनारायण उवाच ॥ एवं व्रतं च चक्रुस्ता यावन्मासं च गोपिकाः ॥ पूर्वस्तोत्रेण तां देवीं तुष्टुवुश्च दिने दिने ॥ १६९ ॥ समाप्तिदिवसे गोप्यो व्रतं कृत्वा मुदाऽन्विताः ॥

कण्वशाखोक्तस्तोत्रेण तुष्टुवुः परमेश्वरीम् ॥ १७० ॥ येन स्तोत्रेण तां स्तुत्वा सीता सत्यपरायणा ॥ सद्यः संप्राप कान्तं च रामं राजीवलोचनम् ॥ १७१ ॥ जानक्युवाच ॥ शक्तिस्वरूपे सर्वेषां सर्वाधारे गुणाश्रये ॥ सदा शंकरयुक्ते च पतिं देहि नमोऽस्तु ते ॥१७२॥ सृष्टिस्थित्यंतरूपेण सृष्टिस्थित्यन्तरूपिणी ॥ सृष्टिस्थित्यन्तबीजानां बीजरूपे नमोऽस्तु ते ॥१७३॥ हे गौरि पतिमर्मज्ञे पतिव्रतपरायणे ॥ पतिव्रते पतिरते पतिं देहि नमोस्तु ते ॥ १७४ ॥ सर्वमंगलमाङ्गल्ये सर्वमंगलसंयुते ॥ सर्वमंगलबीजे च नमस्ते सर्वमंगले ॥ १७५ ॥ सर्वप्रिये सर्वबीजे सर्वाशुभविनाशिनि ॥ सर्वेशे सर्वजनके नमस्ते शंकरप्रिये ॥ १७६ ॥ परमात्मस्वरूपे च नित्यरूपे सनातनि ॥ साकारे च निराकारे सर्वरूपे नमोऽस्तु ते ॥ १७७ ॥ क्षुत्तृष्णेच्छा दया श्रद्धा निद्रा तन्द्रा स्मृतिः क्षमा ॥ एतास्तव कलाः सर्वा नारायणि नमोऽस्तु ते ॥ १७८ ॥ लज्जा मेधा तुष्टिपुष्टी शान्तिसंपत्तिवृद्धयः ॥ एतास्तव कलाः सर्वाः सर्वरूपे नमोऽस्तु ते ॥ १७९ ॥ दृष्टादृष्टस्वरूपे च तयोर्बीजफलप्रदे ॥ सर्वानिर्वचनीये च महामाये नमोऽस्तु ते ॥ १८० ॥ शिवे शंकरसौभाग्ययुक्ते सौभाग्यदायिनि ॥ हरिं कान्तं च सौभाग्यं देहि देवि नमोऽस्तु ते ॥ १८१ ॥ स्तोत्रेणानेन याः स्तुत्वा समाप्तिदिवसे शिवाम् ॥ नमन्ति परया भक्त्या ता लभन्ते हरिं पतिम् ॥१८२॥ इह कान्तसुखं भुक्त्वा पतिं प्राप्य परात्परम्॥ दिव्यं स्यन्दनमारुह्य यात्यन्ते कृष्णसन्निधिम् ॥ १८३ ॥ इति श्रीब्रह्मवैवर्ते सीताकृतं पार्वतीस्तोत्रम् ॥ समाप्तिदिवसे राधा गोपीभिः सह संयुता ॥ देवीं प्रणम्य स्तुत्वा च व्रतं पूर्णं चकार ह ॥ १८४ ॥ गोसहस्रं ब्राह्मणेभ्यः सुवर्णशतकं मुदा ॥ विप्राय दक्षिणां दत्त्वा स्वगृहं गन्तुमुद्यता ॥ १८५ ॥ ब्राह्मणानां सहस्रं च भोजयामास सादरम् ॥ वाद्यानि वादयामास भिक्षुकाय धनं ददौ ॥ १८६ ॥ एतस्मिन्नन्तरे तत्र दुर्गा दुर्गार्तिनाशिनी ॥ आविर्बभूव गगनाज्ज्वलन्ती ब्रह्मतेजसा ॥ १८७ ॥ ईषद्धास्यप्रसन्नास्या योगिनीशतसंयुता ॥ सिंहस्था च दशभुजा रत्नालंकारभूषिता ॥१८८॥ शातकुम्भमयाद्दिव्याद्रत्नसारपरिच्छदात् ॥ अवरुह्य रथात्तूर्णमालिङ्ग्योरसि राधिकाम् ॥१८९॥ दृष्ट्वा गोपाङ्गना देवीं प्रणेमुश्च मुदाऽन्विताः ॥ आशिषं युयुजे दुर्गा वाञ्छासिद्धिर्भ

ब्र. वै. कृ. विष्यति ॥ १९० ॥ गोपिकाभ्यो वरं दत्त्वा ताः संभाष्य च सादरम् ॥ उवाच राधिकां दुर्गा स्मेराननसरोरुहा ॥ १९१ ॥ खं० ४ पू.
॥ ८९ ॥ पार्वत्युवाच ॥ राधे सर्वेश्वरप्राणादधिके जगदम्बिके ॥ व्रतं ते लोकशिक्षार्थं मायामानुषरूपिणि ॥ १९२ ॥ गोलोकनाथं अ० २७
गोलोकं श्रीशैलं गिरिजातटम् ॥ श्रीरासमण्डलं दिव्यं वृन्दावनमनोहरम् ॥ १९३ ॥ चरितं रतिचोरस्य स्त्रीणां मानसहारकम् ॥
विदुषः कामशास्त्राणां किंस्वित्स्मरसि सुन्दरि ॥ १९४ ॥ श्रीकृष्णार्धाङ्गसंभूता कृष्णतुल्या च तेजसा ॥ तवांशकलया देव्यः कथं
त्वं मानुषी सती ॥ १९५ ॥ भवती च हरेः प्राणा भवत्याश्च हरिः स्वयम् ॥ वेदे नास्ति द्वयोर्भेदः कथं त्वं मानुषी सती ॥ १९६ ॥
षष्टिवर्षसहस्राणि ब्रह्मा तप्त्वा तपः पुरा ॥ न ते ददर्श पादाब्जं कथं त्वं मानुषी सती ॥ १९७ ॥ कृष्णाज्ञया च त्वं देवि गोपी
रूपं विधाय च ॥ आगताऽसि महीं शान्ते कथं त्वं मानुषी सती ॥ १९८ ॥ सुयज्ञो हि नृपश्रेष्ठो मनुवंशसमुद्भवः ॥ त्वत्तो जगाम
गोलोकं कथं त्वं मानुषी सती ॥ १९९ ॥ त्रिःसप्तकृत्वो निर्भूपां चकार पृथिवीं भृगुः ॥ तव मन्त्रेण कवचात्कथं त्वं मानुषी सती
॥ २०० ॥ शंकरात्प्राप्य त्वन्मन्त्रं सिद्धं कृत्वा च पुष्करे ॥ जघान कार्तवीर्यं च कथं त्वं मानुषी सती ॥ २०१ ॥ बभञ्ज दर्पाद्दन्तं
च गणेशस्य महात्मनः ॥ त्वत्तो नाम भयं चक्रे कथं त्वं मानुषी सती ॥ २०२ ॥ मय्युद्धतायां कोपेन भस्मसात्कर्तुमीश्वरः ॥
ररक्षागत्य मत्प्रीत्या कथं त्वं मानुषी सती ॥ २०३ ॥ कल्पे कल्पे तव पतिः कृष्णो जन्मनि जन्मनि ॥ व्रतं लोकहितार्थाय जगन्मा
तस्त्वया कृतम् ॥ २०४ ॥ अहो श्रीदामशापेन भारावतरणेन च ॥ भूमौ तवाधिष्ठानं च कथं त्वं मानुषी सती ॥ २०५ ॥
अयोनिसंभवा त्वं च जन्ममृत्युजरापहा ॥ कलावतीसुता पुण्या कथं त्वं मानुषी सती ॥ २०६ ॥ त्रिषु मासेष्वतीतेषु मधुमासे ॥ ८९ ॥
मनोहरे ॥ निर्जने निर्मले रात्रौ सुयोग्ये रासमण्डले ॥ २०७ ॥ सर्वाभिर्गोपिकाभिश्च सार्धं वृन्दावने वने ॥ हर्षेण हरिणा सार्धं
क्रीडा ते भविता सति ॥ २०८ ॥ विधात्रा लिखिता क्रीडा कल्पे कल्पे महीतले ॥ तव श्रीहरिणा सार्धं केन राधे निवार्यते
॥ २०९ ॥ यथा सौभाग्ययुक्ताऽहं हरस्य श्रीहरिप्रिये ॥ तथा सौभाग्ययुक्ता त्वं भव कृष्णस्य सुन्दरि ॥ २१० ॥ यथा क्षीरेषु धाव

ल्यं यथा वह्नौ च दाहिका ॥ भुवि गन्धो जले शैत्यं तथा कृष्णे स्थितिस्तव ॥ २११ ॥ दैवी वा मानुषी वाऽपि गान्धर्वी राक्षसी
तथा ॥ त्वत्तः परा च सौभाग्या न भूता न भविष्यति ॥ २१२ ॥ परात्परो गुणातीतो ब्रह्मादीनां च वन्दितः ॥ स्वयं कृष्णस्तवा
धीनो मद्वरेण भविष्यति ॥ २१३ ॥ ब्रह्मानन्तशिवाराध्यो भविता त्वद्वशः सति ॥ ध्यानासाध्यो दुराराध्यः सर्वेषामपि योगिनाम्
॥२१४॥ त्वं च भाग्यवती राधे स्त्रीजातिषु न ते परा ॥ कृष्णेन सार्धं पश्चात्त्वं गोलोकं च गमिष्यसि ॥२१५॥ इत्युक्त्वा पार्वती
सद्यस्तत्रैवान्तर्दधे मुने ॥ सार्धं गोपालिकाभिश्च राधिका गन्तुमुद्यता॥२१६॥एतस्मिन्नन्तरे कृष्णो जगाम राधिकापुरः॥ राधा ददर्श
श्रीकृष्णं किशोरं श्यामसुन्दरम्॥२१७॥पीतवस्त्रपरीधानं नानालंकारभूषितम् ॥ आजानुमालतीमालावनमालाविभूषितम्॥ २१८ ॥
ईषद्धास्यप्रसन्नास्यं भक्तानुग्रहकातरम्॥चन्दनोक्षितसर्वाङ्गं शरत्पङ्कजलोचनम् ॥२१९॥शरत्पार्वणचन्द्रास्यं सद्रत्नमुकुटोज्ज्वलम् ॥
पक्वदाडिमबीजाभदशनं सुमनोहरम् ॥ २२० ॥ विनोदमुरलीहस्तन्यस्तलीलासरोरुहम् ॥ कोटिकन्दर्पलावण्यं लीलाधाममनोहरम्
॥२२१॥गुणातीतं स्तूयमानं ब्रह्मानन्तशिवादिभिः॥ब्रह्मस्वरूपं ब्रह्मण्यं श्रुतिभिश्चानिरूपितम्॥२२२॥ अव्यक्तमक्षराव्यक्तं ज्योतीरूपं
सनातनम् ॥ माङ्गल्यं मङ्गलाधारं मङ्गलं मङ्गलप्रदम् ॥ २२३ ॥ दृष्ट्वा तदद्भुतं रूपं संभ्रमात्प्रणनाम तम् ॥ तं दृष्ट्वा मूर्च्छिता राधा
कामबाणप्रपीडीता ॥ २२४ ॥ दर्शंदर्श मुखाम्भोजं सस्मिता वक्रलोचना ॥ मुखस्याच्छादनं चक्रे व्रीडया च पुनः पुनः ॥२२५॥
दृष्ट्वा हरिस्तामुवाच प्रसन्नवदनेक्षणः ॥ गोपालिकासमूहानां सर्वेषां पुरतः स्थितः ॥ २२६ ॥ श्रीकृष्ण उवाच ॥ ॥
प्राणाधिके राधिके त्वं वरं वृणु मनीषितम् ॥ भो भो गोपालिकाः सर्वा वरं वृणुत वाञ्छितम्॥२२७॥कृष्णस्य वचनं श्रुत्वा वरं वव्रे
च राधिका ॥ गोपालिकाः प्रहृष्टाश्च सर्वसंकल्पपादपात् ॥ २२८ ॥ राधिकोवाच ॥ त्वत्पादाब्जे मन्मनोलिः सततं भ्रमतु
प्रभो ॥पातुं भक्तिरसं पद्मे मधुपश्च यथा मधु॥२२९ ॥ मदीयप्राणनाथस्त्वं भव जन्मनिजन्मनि ॥ त्वदीयचरणाम्भोजे देहि भक्तिं
सुदुर्लभाम्॥ २३० ॥ तव स्मृतौ गुणे चित्तं स्वप्ने ज्ञाने दिवानिशम् ॥ भवेन्निमग्नं सततमेतन्मम मनीषितम् ॥ २३१ ॥ गोपालिका

ऊचुः ॥ यथा राधां तथा नश्च प्राणबन्धो दिवानिशम् ॥ भविष्यसि प्राणनाथः पास्यसि प्रतिजन्मनि ॥ २३२ ॥ आसां च वचनं श्रुत्वा तथाऽस्त्वेवमुवाच ह ॥ प्रसन्नवदनः श्रीमान्यशोदानन्दवर्धनः ॥ २३३ ॥ क्रीडापद्मं राधिकायै सहस्रदलसंयुतम् ॥ ललितां मालतीमालां ददौ प्रीत्या जगत्पतिः ॥२३४॥ मालासमूहं पुष्पाणि गोपीभ्यो गोपिकापतिः ॥ प्रहस्य परमप्रीत्या प्रददावित्युवाच ह ॥ २३५ ॥ श्रीकृष्ण उवाच ॥ त्रिषु मासेष्वतीतेषु यूयं क्रीडां मया सह ॥ रासमण्डलरम्ये च वृन्दारण्ये करिष्यथ ॥ २३६ ॥ यथाऽहं च तथा यूयं नाहं भेदः श्रुतौ श्रुतः[1] ॥ प्राणोऽहं चैव युष्माकं यूयं प्राणा मम प्रभोः ॥ २३७ ॥ व्रतं वो लोकरक्षार्थं न हि स्वार्थमिदं प्रियाः ॥ सहागताश्च गोलोकाद्गमनं च मया सह ॥ २३८ ॥ गच्छत स्वालयं शीघ्रं वोऽहं जन्मनि जन्मनि ॥ प्राणेभ्योऽपि गरीयस्यो यूयं मे नात्र संशयः ॥ २३९ ॥ इत्युक्त्वा श्रीहरिस्तत्र तस्थौ सूर्यसुतातटे ॥ तस्थुर्गोपालिकाः सर्वा वीक्ष्य कृष्णं पुनःपुनः ॥२४०॥ सर्वाः प्रहृष्टवदनाः सस्मिता वक्रलोचनाः ॥ प्रीत्या चक्षुश्चकोराभ्यां मुखचन्द्रं पपुर्हरेः ॥ २४१ ॥ ताः शीघ्रं प्रययुर्गेहं जयं दत्त्वा पुनःपुनः ॥ हरिश्च शिशुभिः सार्द्धं प्रसन्नः स्वालयं ययौ ॥ २४२ ॥ इत्येवं कथितं सर्वं हरेश्चरितमङ्गलम् ॥ गोपीनां वस्त्रहरणं सर्वलोकसुखावहम् ॥ २४३ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे गोपिकावस्त्रहरणप्रस्तावो नाम सप्तविंशोऽध्यायः ॥ २७ ॥ नारद उवाच ॥ त्रिषु मासेष्वतीतेषु तासां च हरिणा सह ॥ वद केन प्रकारेण बभूव तनुसंगमः ॥१॥ वृन्दावनं किंप्रकारं किंविधं रासमण्डलम् ॥ हरिरेकस्ताश्च बह्व्यः केन क्रीडा बभूव ह ॥ २ ॥ कुतूहलं भवति मे इदं श्रोतुं नवं नवम् ॥ कथयस्व महाभाग पुण्यश्रवणकीर्तन ॥ ३ ॥ कथापुराणसाराणां रासयात्रा हरेरहो ॥ हरिलीलाः पृथिव्यां तु सर्वाः प्रतिमनोहराः ॥ ४ ॥ सूत उवाच ॥ नारदस्य वचः श्रुत्वा ऋषिर्नारायणः स्वयम् ॥ प्रहस्य सुप्रसन्नास्यः प्रवक्तुमुपचक्रमे ॥ ५ ॥ श्रीनारायण उवाच ॥ एकदा श्रीहरिर्नक्तं वनं

---

[1] श्रुतमस्यास्तीति श्रुतः अर्शआदित्वादच् ।

वृन्दावनं ययौ ॥ शुभे शुक्लत्रयोदश्यां पूर्णे चन्द्रोदये मुने ॥ ६ ॥ यूथिकामालतीकुन्दमाधवीपुष्पवायुना ॥ वासितं कलनादेन मधु
भ्राणां मनोहरम् ॥ ७ ॥ नवपल्लवसंयुक्तं पुंस्कोकिलरुतश्रुतम् ॥ नवलक्षरासवाससंयुक्तं सुमनोहरम् ॥ ८ ॥ चन्दनागुरुकस्तूरीकुंकु
मेन सुवासितम् ॥ कर्पूरान्विततताम्बूलभोगद्रव्यसमन्वितम् ॥ ९ ॥ प्रसूनैश्चम्पकानां च कस्तूरीचन्दनान्वितैः॥रतियोग्यैर्विरचितैर्ना
नातल्पैः सुशोभितम् ॥ १० ॥ दीप्तं रत्नप्रदीपैश्च धूपेन सुरभीकृतम् ॥ नानापुष्पैश्च रचितं मालाजालैर्विराजितम् ॥ ११ ॥ परितो
वर्तुलाकारं तत्रैव रासमण्डलम् ॥ चन्दनागुरुकस्तूरीकुंकुमेन सुसंस्कृतम् ॥ १२॥ पुष्पोद्यानैः पुष्पितैश्च युक्तं क्रीडासरोवरैः॥हंसकार
ण्डवाकीर्णैर्जलकुक्कुटकूजितैः ॥ १३ ॥ क्रीडनीयैः सुन्दरैश्च सुरतश्रमहारिभिः ॥ शुद्धस्फटिकसंकाशतोयपूर्णैः सुनिर्मलैः ॥ १४॥
दधिपूर्णशुक्लधान्यजलैर्निर्मञ्छनीकृतम् ॥ रम्भास्तम्भसमूहेन सुन्दरेण सुशोभितम् ॥ १५ ॥ आम्रपल्लवयुक्तेन सूत्रबन्धेन चारुणा ॥
भूषितं मंगलघटैः सिन्दूरचन्दनान्वितैः॥१६॥मालतीमाल्यसंयुक्तैर्नारिकेलफलान्वितैः॥स रासमण्डलं दृष्ट्वा जहास मधुसूदनः॥१७॥
चकार तत्र कुतुकाद्विनोदमुरलीरवम् ॥ गोपीनां कामुकीनां च कामवर्धनकारणम् ॥ १८ ॥ तच्छ्रुत्वा राधिका सद्यो मुमोह मद
नातुरा ॥ बभूव स्थाणुवद्देहा ध्यानैकतानमानसा ॥ १९ ॥ क्षणेन चेतनां प्राप्य पुनः शुश्राव सा ध्वनिम् ॥ उवास सा समुत्तस्थौ
समुद्विग्ना पुनः पुनः ॥ २० ॥ त्यक्त्वा चावश्यकं कर्म निःससार द्रुतं गृहात् ॥ ययौ तदनुसारेण प्रसमीक्ष्य चतुर्दिशम् ॥ २१ ॥
ध्यायन्ती चरणाम्भोजं श्रीकृष्णस्य महात्मनः ॥ तेजसा च द्योतयन्ती सद्रत्नसारभूषणैः ॥ २२ ॥ बहिर्बभूवुस्तास्त्रस्ता वरेण हृतचे
तनाः ॥ कुलधर्मं परित्यज्य निशंकाः काममोहिताः ॥ २३ ॥ त्रयस्त्रिंशद्वयस्याश्च ताः सुशीलादयः स्मृताः ॥ राधिकायाः
प्रियतमा गोपीनां प्रवरा ययुः ॥२४॥ तासां पश्चाद्ययुर्गोप्यस्तासां संख्यां निबोध मे॥समा वेषेण वयसा रूपेण च गुणेन च ॥२५॥
ययुः सुशीलासंगेन सहस्राणि च षोडश ॥ ययुश्चन्द्रमुखी पश्चात्सहस्राणि च षोडश ॥ २६ ॥ एकादशसहस्राणि माधव्याल्यश्च
निर्ययुः ॥ जग्मुः कदम्बमालाल्यः स सहस्राणि त्रयोदश ॥२७॥ ययुः कुन्तीवयस्याश्च सहस्राणि दश स्मृताः ॥ चतुर्दश सहस्राणि

ययुस्ता यमुनानुगाः ॥२८॥ जाह्नवीसहचारिण्यः सहस्राणि ययुर्नव ॥ ययुर्नवसहस्राणि पद्ममुख्यालय एव च ॥२९॥ सावित्र्यालयः
पंचदश सहस्राणि ययुर्व्रजात् ॥ पारिजातावयस्याश्च सहस्राणि ययुर्दश ॥३०॥ स्वयंप्रभानुगाः सप्त सहस्राणि ययुर्व्रजात् ॥ ययुः
सुधामुखीगोप्यः सहस्राणि चतुर्दश ॥३१॥शुभानुगा ययुर्गोप्यः सहस्राणि चतुर्दश ॥ पद्मानुगा ययुर्गोप्यः सहस्राणि चतुर्दश ॥३२॥
गौरी पद्मा[1] ययुर्गोप्यः सहस्राणि चतुर्दश ॥ ययुः सर्वमङ्गलालयः सहस्राणि च षोडश ॥३३॥ कालिकाल्यो ययुर्गोप्यः सहस्राणि च
षोडश ॥ निर्ययुः कमलालयश्च सहस्राणि त्रयोदश ॥ ३४ ॥ दुर्गानुगा ययुर्गोप्यः सहस्राणि च षोडश ॥ ययुः सरस्वतीपश्चात्स
हस्राणि त्रयोदश ॥ ३५ ॥ प्रजग्मुर्भारतीपश्चात्सहस्राणि दश व्रजात् ॥ अपर्णासहचारिण्यः सहस्राणि चतुर्दश ॥ ३६ ॥ रतिप
श्चाद्ययस्याश्च सहस्राणि ययुर्दश ॥ गङ्गावयस्याः प्रययुः सहस्राणि चतुर्दश ॥ ३७ ॥ प्रजग्मुरम्बिकापश्चात्सहस्राणि च षोडश ॥
सतीपश्चाद्ययुर्गोप्यः सहस्राणि त्रयोदश ॥३८॥ नन्दिनीसहचारिण्यः सहस्राणि ययुर्दश ॥ प्रययुः सुन्दरीपश्चात्सहस्राणि त्रयोदश
॥३९॥ ययुः कृष्णप्रियापश्चात्सहस्राणि च षोडश ॥ ययुर्मधुमतीपश्चात्सहस्राणि च षोडश॥४०॥ ययुश्चम्पानुगा गोप्यः सहस्राणि
त्रयोदश ॥ चन्दनाल्यो ययुः पश्चात्सहस्राणि च षोडश ॥ ४१॥ सर्वा बभूवुरेकत्र तत्र तस्थुः पलं मुदा ॥ तत्राययुर्गोपिकाश्च मालाह
स्ताश्च काश्चन ॥ ४२ ॥ चारुचन्दनहस्ताश्च काश्चित्तत्राययुर्व्रजात् ॥ श्वेतचामरहस्ताश्च काश्चित्तत्राययुर्मुदा ॥ ४३ ॥
तत्राययुर्गोपकन्याः काश्चित्कस्तूरिकाकराः ॥ तत्राययुर्गोपकन्याः काश्चित्कुंकुमवाहिकाः ॥ ४४ ॥ काश्चित्तत्राययुर्गोप्यस्ताम्बूलपा
त्रवाहिकाः ॥ यावत्काञ्चनवस्त्राणां वाहिका गोपकन्यकाः ॥ काश्चित्तत्राययुः शीघ्रं यत्र चन्द्रावली मुदा॥४५॥सर्वाश्चैकत्र संभूय सस्मि
ताश्च मुदान्विताः ॥ विधाय राधिकावेषं स्थानाच्च प्रययुर्मुदा॥४६॥चक्रुः पुनः पुनस्ताश्च हरिशब्दजपं पथि ॥ प्रापुर्वृन्दावनं रम्यं
ददृशू रासमण्डलम्॥४७॥स्वर्गेभ्यः सुन्दरं दृश्यं राकापतिकरान्वितम् ॥ सुनिर्जनं कुसुमितं वासितं पुष्पवायुना॥४८॥नारीणां काम

---

[1] गौर्याः स्वस्वामिन्याः पदेऽङ्घ्रेर्मा यासु ताः ।

जननं मुनिमोहनकारणम् ॥ शुश्रुवुस्तत्र ताः सर्वाः पुंस्कोकिलकलध्वनिम् ॥ ४९ ॥ अतिसूक्ष्मकलं चातिभ्रमराणां मनोहरम् ॥ प्रसूनमधुमत्तानां भ्रमरीसङ्गसङ्गिनाम् ॥ ५० ॥ शुभे क्षणे प्रविवेश राधिका रासमण्डलम् ॥ सर्वाभिरालिभिः सार्धं ध्यात्वा कृष्णपदाम्बुजम् ॥ ५१ ॥ राधामारात्तु संवीक्ष्य कृष्णस्तत्र मुदाऽन्वितः ॥ जगामानुव्रजन्प्रीत्या सस्मितो मदनातुरः ॥ ५२ ॥ मध्यस्थां सखिसङ्घानां रत्नालङ्कारभूषिताम् ॥ दिव्यवस्त्रपरीधानां सस्मितां वक्रलोचनाम् ॥ ५३ ॥ गजेन्द्रगामिनीं रम्यां मुनिमानसमोहिनीम् ॥ नवीनवेषवयसा रूपेणातिमनोहराम् ॥५४॥ तलश्रोणिनितम्बानां भारशेषान्वितां पराम् ॥ चारुचम्पकवर्णाभां शरच्चन्द्रनिभाननाम् ॥ बिभ्रतीं कबरीभारं मालतीमाल्यसंयुतम् ॥ ५५ ॥ राधा ददर्श श्रीकृष्णं किशोरं श्यामसुन्दरम् ॥ नवयौवनसंपन्नं रत्नाभरणभूषितम् ॥ ॥ ५६ ॥ कन्दर्पकोटिलावण्यलीलाधाम मनोहरम् ॥ प्राणाधिकां तां पश्यन्तीं पश्यन्तीं वक्रचक्षुषा ॥ ५७ ॥ परमाद्भुतरूपं च सर्वत्रानुपमं परम् ॥ विचित्रवेषं चूडां च बिभ्रतं सस्मितं मुदा ॥ ५८ ॥ वक्रलोचनकोणेन दर्शंदर्शं पुनःपुनः ॥ मुखमाच्छादयाञ्चक्रे व्रीडया सस्मिता सती ॥ ५९ ॥ मूर्च्छामवाप सा सद्यः कामबाणप्रपीडिता ॥ पुलकाञ्चितसर्वाङ्गी बभूव हतचेतना ॥ ६० ॥ कटाक्षकामबाणैश्च विद्धः क्रीडारसोन्मुखः ॥ मूर्च्छां प्राप्य न पपात तस्थौ स्थाणुसमो हरिः ॥६१॥ पपात मुरली तस्य क्रीडाकमलमुज्ज्वलम् ॥ द्वितीयं पीतवस्त्रं च शिखिपिच्छं शरीरतः ॥६२॥ क्षणेन चेतनां प्राप्य ययौ राधान्तिकं मुदा ॥ कृत्वा वक्षसि तां प्रीत्या समाश्लिष्य चुचुम्ब सः ॥ ६३ ॥ श्रीकृष्णस्पर्शमात्रेण संप्राप्य चेतनां सती ॥ प्राणाधिकं प्राणनाथं समाश्लिष्य चुचुम्ब ह ॥ ६४ ॥ मनो जहार राधायाः कृष्णस्तस्य च सा मुने ॥ जगाम राधया सार्धं रसिको रतिमन्दिरम् ॥ ६५ ॥ रत्नप्रदीपसंयुक्तं रत्नदर्पणसंयुतम् ॥ चारुचम्पकशय्याभिश्चन्दनाक्ताभी राजितम् ॥ ६६ ॥ कर्पूरान्विततताम्बूलैर्भोगद्रव्यैः समन्वितम् ॥ उवाच राधया सार्धं कृष्णस्तत्र मुदान्वितः ॥ ६७ ॥ राधया दत्तताम्बूलं चखाद मधुसूदनः ॥ रासेश्वरी कृष्णदत्तं ताम्बूलं बुभुजे मुदा ॥ ६८ ॥ दत्तं चर्विततताम्बूलं राधायै प्रभुणा मुदा ॥ चखादः भक्त्वा सा तूर्णं प्रहस्य मदनातुरा ॥ ६९ ॥ राधाचर्विततताम्बूलं ययाचे माधवो मुदा ॥

न ददौ राधिका भीता पपात चरणाम्बुजे ॥ ७० ॥ एतस्मिन्नन्तरे तत्र सकामः सुरतोन्मुखः ॥ सुष्वाप राधया सार्धं रतितल्पे
मनोहरे ॥ ७१ ॥ शृङ्गाराष्टप्रकारं च विपरीतादिकं विभुः ॥ नखदन्तकराणां च प्रहारं च यथोचितम् ॥ ७२ ॥ कामशास्त्रेषु यद्गोप्यं
चुम्बनाष्टविधं परम् ॥ कामिनीनां मनोहारि चकार रसिकेश्वरः ॥ ७३ ॥ अङ्गैरङ्गानि प्रत्यङ्गैः प्रत्यङ्गानि स्मरातुरः ॥ चकाराश्लेषणं
तत्र कामुकीनां सुखावहम् ॥७४॥ शृङ्गारकुशलौ तौ तु कामशास्त्रसुपण्डितौ ॥ रतियुद्धविरामश्च न बभूव द्वयोरपि ॥ ७५ ॥ एवं गृहे
गृहे रम्ये नानामूर्तिं विधाय च ॥ रेमे गोपाङ्गनाभिश्च सुरम्ये रासमण्डले ॥ ७६ ॥ गोपीनां नव लक्षाणि गोपानां च तथैव च ॥ लक्षा
ण्यष्टादश मुने युक्तानि रासमण्डले ॥ ७७ ॥ मुक्तकेशानि नग्नानि विच्छिन्नभूषणानि च ॥ वेषोच्छिन्नानि मत्तानि मूर्च्छितानि
स्मरेण च ॥७८॥ कङ्कणानां किंकिणीनां वलयानां च नारद ॥ सद्रत्ननूपुराणां च शब्दयुक्तानि संततम् ॥७९॥ एवं कृत्वा स्थलक्रीडां
ययुस्तानि जलं मुदा ॥ कृत्वा तत्र जलक्रीडां परिश्रान्तानि साम्प्रतम् ॥ ८० ॥ तूर्णं जलात्समुत्थाय वासांसि परिधाय च ॥ ददृशु
र्मुखपद्मानि सद्रत्नदर्पणेषु च ॥ ८१ ॥ चन्दनागुरुकस्तूरीद्रव्याणि पुष्पमालिकाः ॥ मुदा परिदधुस्तानि संप्रापुश्चेतनानि च ॥
॥ ८२ ॥ सकर्पूरं च ताम्बूलं भुक्त्वा सर्वाणि कौतुकात् ॥ ददृशुर्मुखपद्मानि सद्रत्ने दर्पणेऽमले ॥ ८३ ॥ काचित्कामातुरा कृष्णं
बलादाकृष्य कौतुकात् ॥ हस्ताद्वंशीं निजग्राह वसनं च चकर्ष ह ॥ ८४ ॥ काचित्कामप्रमत्ता च नग्नं कृत्वा तु माधवम् ॥
निजग्राह पीतवस्त्रं परिहस्य पुनर्ददौ ॥८५॥ युक्तिं शृण्वित्येवमुक्त्वा काचित्संगृह्य स्वामिनम् ॥ चुचुम्ब गण्डे बिम्बोष्ठे समाश्लिष्य
पुनःपुनः ॥ ८६ ॥ सस्मितं सकटाक्षं च मुखचन्द्रं स्तनोन्नतम् ॥ काचिच्छ्रोणीं सुललितां दर्शयामास कामतः ॥ ८७ ॥ काचि
त्कान्तं करे कृत्वा संस्थाप्य श्रोणिदेशतः ॥ चकार चूडानिर्माणं मालतीमाल्यसंयुतम् ॥८८॥ काचिच्चूडां समाकृष्य मयूरपिच्छकं
ददौ ॥ गुञ्जामाल्यं च चूडायां वेष्टयामास काचन ॥ ८९ ॥ प्रददौ स्वामिने कामात्प्रेमवर्धनहेतवे ॥ काचित्काश्चित्समाकृष्य
नग्नां कृत्वा तु कामतः ॥ ९० ॥ प्रेषयामास कृष्णस्य क्रोडे चन्दनचर्चिते ॥ ननृतुश्च जगुः काश्चित्कान्तं कृत्वा तु कामतः ॥ ९१ ॥

नर्तनं कारयामास तं च काचिद्बलेन च ॥ कृष्णश्च वस्त्रं कस्याश्च विचकर्ष कुतूहलात् ॥ ९२ ॥ कांचित्कृत्वा तु नग्नां च कस्यैचिदंशुकं ददौ ॥ कृष्णो राधां समाकृष्य वासयामास वक्षसि॥९३॥तस्याश्च कबरीं रम्यां सुनिर्माणं चकार ह ॥ सिन्दूरं च ददौ भाले कस्तूरीं बिन्दुभिः सह ॥ ९४ ॥ अतिसूक्ष्मं चन्दनेन्दुं कौतुकात्तदधो ददौ ॥ पत्रावलीं सुललितां सुकपोले चकार ह ॥९५॥ वह्निशुद्धांशुकं चारु परिधार्य्य प्रयत्नतः ॥ पदोः सद्रत्नमंजीरे गृहीत्वा चरणाम्बुजे ॥९६॥ नखनिर्माजनं कृत्वा सुन्दरं यावकं ददौ ॥ भूषणैर्भूषितां कृत्वा संप्रलिप्यानुलेपनैः ॥ ९७ ॥ दत्त्वा च मालतीमालां चुचुम्ब च पुनः पुनः ॥ चारुलोचनपद्मे च चकाराञ्जनसंयुते ॥ ९८ ॥ प्रददौ नासिकामध्ये दुर्लभं गजमौक्तिकम् ॥ श्रोणिदेशे च स्तनयोर्नखच्छिद्रं चकार ह ॥९९॥ चकार दन्तदलनं पक्वबिम्बाधरे वरे ॥ सरसश्च तटे रम्ये पुष्पोद्याने सुनिर्जने ॥ १०० ॥ बहिश्चन्द्रोदये रम्ये पुष्पचन्दनचर्चिते ॥ अगुरुचन्दनाक्तेन वायुना सुरभीकृते ॥ १०१ ॥ भ्रमरध्वनिसंयुक्ते पुंस्कोकिलरुतश्रुते ॥ बहुमूर्तीः संविधाय योगिनां परमो गुरुः ॥ १०२ ॥ पुनश्चकार शृङ्गारं गोपीनां चित्तहारकः ॥ किंकिणीनां कङ्कणानां नूपुराणां च नारद ॥ १०३ ॥ शृङ्गारोद्रेकतस्तत्र बभूव सुन्दरो रवः ॥ मूर्च्छामवापुस्ताः सर्वा नवसंगममात्रतः ॥ १०४ ॥ बभूवुरचलास्पन्दाः पुलकाञ्चितविग्रहाः ॥ शृङ्गारविरते भूते संप्रापुश्चेतनां पुनः ॥ १०५ ॥ नखदन्तप्रहारं च प्रचकार परस्परम् ॥ कृष्णः कररुहाघातं ददौ तासां कुचोपरि ॥ १०६ ॥ श्रोणीदेशे सुकठिने नखचिह्नं चकार ह ॥ नीवी विस्रंसिता तासां कबरी क्षुद्रघण्टिकाः ॥ १०७ ॥ दूरीभूतं सुवसनं सुवेषं सुमनोहरम् ॥ आलिङ्गनं नवविधं चुम्बनाष्टविधं मुदा ॥ १०८ ॥ शृङ्गारं षोडशविधं चकार रसिकेश्वरः ॥ अङ्गैरङ्गानि प्रत्यङ्गैः प्रत्यङ्गानि च योषिताम् ॥ १०९ ॥ चकारालिङ्गनं प्रीत्या कामुकीनां च कामुकः ॥ नारीणां षोडश कलाः शृङ्गारस्तत्प्रमाणकः ॥ ॥ ११० ॥ कलाभेदेन तद्भेदं कामशास्त्रविदो विदुः ॥ प्राकृतं द्वादशविधं चकार रसिकेश्वरः ॥ १११ ॥ निरूपितं कामशास्त्रे चकारेशस्ततोऽधिकम् ॥ क्रीडारम्भे च मध्ये च विरतौ कर्म योषिताम् ॥ ११२ ॥ प्रीत्यर्थमपि कर्तव्यं चकारेशस्ततोऽधिकम् ॥

गोपीकङ्कणरेखाभिः पादालक्तकचिह्नितः ॥ शुशुभे कृष्णदेहश्च यथाऽद्रिर्गैरिकेण च ॥ ११३ ॥ एवंभूते पूर्णरासससंभूते रास
मण्डले ॥ समाजग्मुः सुराः सर्वे सकलत्राश्च सानुगाः ॥ ११४ ॥ सुवर्णस्यन्दनस्थाश्च कौतुकात्स्वगणावृताः ॥ पुलकाञ्चितस
र्वाङ्गाः कामबाणप्रपीडिताः ॥ ११५ ॥ ऋषयो मुनयश्चैव सिद्धाश्च पितरस्तथा ॥ विद्याधराश्च गन्धर्वा यक्षराक्षसकिन्नराः ॥
सस्त्रीकाश्च समाजग्मुर्ददृशुश्च मुदाऽन्विताः ॥ ११६ ॥ दिव्यस्यन्दनमारुह्य शातकौम्भविनिर्मितम् ॥ सुशोभितं च मणिना
रत्नसारपरिच्छदम् ॥ ११७ ॥ वह्निशुद्धांशुकेनैव वेष्टितं सुमनोहरम् ॥ श्वेतचामरयुक्तं च सद्रत्नदर्पणाम्बुजम् ॥ ११८ ॥
शतचक्रं चित्रयुक्तं मनोयायि मनोहरम् ॥ सद्रत्नसारनिर्माणकलशोज्ज्वलशेखरम् ॥ ११९ ॥ समाजगाम भगवान्पार्वत्या सह
शंकरः ॥ वामपार्श्वे महाकालो दक्षिणे नन्दिकेश्वरः ॥ १२० ॥ पुरतः कार्त्तिकेयश्च स्वयं देवो गणेश्वरः ॥ पिङ्गलाक्ष
दयः सर्वे पार्षदाः परितस्तयोः ॥ १२१ ॥ क्षेत्रपालादयः सर्वे तथाऽष्टौ भैरवेश्वराः ॥ वक्षःस्थलस्थिता दुर्गा सस्मिता वक्रलोचना
॥ १२२ ॥ भारत्या सह ब्रह्मा च शातकौम्भरथस्थितः ॥ वामे सप्तर्षयस्तस्य दक्षिणे सनकादयः ॥ १२३ ॥ सुवर्णस्यन्दनस्थश्च धर्मः
साक्षी च कर्मणाम् ॥ वक्षःस्थलस्थिता तस्य मूर्तिः स्मेरानना सती ॥ १२४ ॥ पश्यन्ती पूर्णरासं च सकामा वक्रलोचना ॥ परितः
पार्षदाः सर्वे ज्वलन्तो ब्रह्मतेजसा ॥ १२५ ॥ शच्या सह महेन्द्रश्च रोहिण्या च कलानिधिः ॥ स्वाहासार्द्धं स्वयं वह्निः सूर्यश्च
संज्ञया सह ॥ १२६ ॥ समाजगाम कामश्च रतिं कृत्वा च वक्षसि ॥ सर्वे ग्रहाश्च दिक्पाला आजग्मुः सकलत्रकाः ॥ १२७ ॥
आकाशस्थाश्च ददृशुः सरासं रासमण्डलम् ॥ केचिच्च मुमुहुस्तत्र मूर्च्छामापुश्च केचन ॥ १२८ ॥ मुहूर्तं च सुराः सर्वे सस्मिताश्च
मुदाऽन्विताः ॥ चन्दनद्रववृष्टिं च पुष्पवृष्टिं च चिक्षिपुः ॥ १२९ ॥ कस्तूरीयुक्तमाल्यानां वृष्टिं चक्रुर्मुनीश्वराः ॥ रासं दृष्ट्वा देवपत्न्यः काम
बाणप्रपीडिताः ॥ १३० ॥ स्थले रतिरसं कृत्वा जगाम यमुनाजलम् ॥ राधया सह कृष्णश्च पूर्णब्रह्म सनातनः ॥ १३१ ॥ गोपीभिः
सह जग्मुश्च मायाः श्रीकृष्णरूपिकाः ॥ प्रपीडिताः कामबाणैः क्रीडां चक्रुर्जले मुदा ॥ १३२ ॥ जलं ददौ राधिकायै सकामो

माधवः स्वयम् ॥ ददौ सा च माधवाय कामार्तायाञ्जलित्रयम् ॥ १३३ ॥ वस्त्रं जग्राह तस्याश्च सा च नग्ना बभूव ह ॥ मालां चिच्छेद कबरीं चकार शिथिलां हरिः ॥ १३४ ॥ सिन्दूरपत्रकं लुप्तं वेषं च जलताडनैः ॥ भ्रूविचित्रमोष्ठरागं लुप्तं कज्जललोचनम् ॥ १३५ ॥ तां च नग्नां समाश्लिष्य निममज्ज जले हरिः ॥ प्रकृत्याऽभ्यन्तरे क्रीडां सुतस्थौ च तया सह ॥१३६॥ तां च नग्नां दर्शयित्वा गोपिकां क्रीडया नताम् ॥ सस्मितां प्रेरयामास दूरतो यमुनाजले ॥ १३७ ॥ सा वेगेन समुत्थाय बलाज्जग्राह माधवम्॥ गृहीत्वा मुरलीं कोपात्प्रेरयामास दूरतः ॥ १३८ ॥ गृहीत्वा पीतवसनं तं चकार दिगम्बरम् ॥ वनमालां च चिच्छेद ददौ तोयं पुनः पुनः ॥ १३९ ॥ हरिं पुनः समाकृष्य प्रेषयामास पाथसि ॥ गभीरे स्रोतसि मुने निममज्ज जगत्पतिः ॥ १४० ॥ उत्थाय माधवः शीघ्रं तां गृहीत्वा प्रहस्य च ॥ कृत्वा वक्षसि नग्नां च चुचुम्ब च पुनःपुनः ॥१४१॥ एवं ता मूर्तयः सर्वा गोपीभिः सह कौतुकात् ॥ क्रीडां विचक्रुर्यमुनातीरनीरे मनोहरे ॥ १४२ ॥ तीरं गत्वा तया सार्धं हरिर्नग्नश्च नग्नया ॥ सा तं ययाचे वसनं स च तां सस्मितां सतीम् ॥१४३॥ राधिकायै ददौ वस्त्रं रम्यां मालां च माधवः ॥ प्रददौ हरये वस्त्रं वंशीं रासेश्वरी तथा ॥१४४॥ चन्दनागुरुकस्तूरीं सर्वाङ्गे कुङ्कुमान्विताम् ॥ कृष्णस्य परया भक्त्या ददौ श्रोणिस्थितस्य च ॥ १४५ ॥ निर्माय चूडां ललितां कामिनीं चित्तमोहिनीम् ॥ शोभनैर्मालतीमाल्यैश्चकार वेष्टनं पुनः ॥ १४६ ॥ श्रीकृष्णो राधिकायाश्च कबरीं सुमनोहराम् ॥ कृत्वा कुण्डलसंस्कारं निर्ममे पत्रकावलीम् ॥ १४७ ॥ ददौ ललाटे सिन्दूरं कस्तूरीबिन्दुभिः सह ॥ तदधश्चन्दनेन्दुं च सुसूक्ष्मं सुमनोहरम् ॥ १४८ ॥ नखाङ्कं स्तनयोरूर्वोरुरस्येव घनं मुदा ॥ दत्त्वा तां वासयामास वह्निशुद्धांशुकेन वै ॥ १४९ ॥ चन्दनागुरुकस्तूरीकुङ्कुमानां द्रवेण सः ॥ कृत्वा वक्षसि संलिप्य चुचुम्ब च मुहुर्मुहुः ॥ १५० ॥ पुनराश्लेषणं कृत्वा ददौ मालां गले पुनः ॥ भूषणैर्भूषितां कृत्वा मञ्जीरं चरणे ददौ ॥ १५१ ॥ अलक्तकं चरणयोर्नखेषु च ददौ पुनः ॥ एवं गोपाश्च गोपीनां विदधौ च पृथक्पृथक् ॥ १५२ ॥ पुनः प्रजग्मुस्ता मत्ताः सुन्दरं रासमण्डलम् ॥ पूर्णेन्दुचन्द्रिकायुक्तं रतियोग्यं सुनिर्जनम् ॥१५३॥ माधवीकेतकीकुन्दमालतीनां मनो

हरेः ॥ चम्पयूथीमल्लिकानां पुष्पैश्च सुरभीकृतम् ॥ १५४ ॥ दृष्ट्वा च स्फुटितं पुष्पं चयनं कर्तुमीश्वरी ॥ गोपीर्नियोजयामास कौतुकेन
च राधिका ॥ १५५ ॥ काश्चिन्नियोजयामास मालानिर्माणकर्मणि ॥ काश्चित्ताम्बूलसज्जेषु काश्चिच्चन्दनघर्षणे॥१५६॥ मालाचन्दनताम्बूलं
गोपीदत्तं च सुन्दरी ॥ ददौ कृष्णाय संप्रीत्या सस्मिता वक्रलोचना ॥१५७॥ काश्चिन्नियोजनं चक्रुः कृष्णसङ्गीतकर्मणि
॥ मृदङ्गमुरजादीनां वादनेषु च काश्चन ॥ १५८ ॥ एवं रासे रतिं कृत्वा लीलया हरिणा सह ॥ विजहार च सर्वत्र निर्जनेषु
मनोहरम् ॥ १५९ ॥ पुष्पोद्यानेषु रम्येषु सरसां च तटेषु च ॥ कन्दरे कन्दरे रम्ये नदेषु च नदीषु च ॥ १६० ॥ अतीव
निर्जनस्थाने श्मशाने गिरिगह्वरे ॥ वाञ्छितेषु च नारीणां त्रयस्त्रिंशद्वनेषु च ॥ १६१ ॥ भाण्डीरे श्रीवने रम्ये कदम्बकानने
तथा ॥ तुलसीकानने कुन्दवने चम्पककानने ॥१६२॥ निम्बारण्ये मधुवने जम्बीरकानने तथा ॥ नालिकेरवने पूगवने च कदलीवने
॥ १६३ ॥ बदरीकानने बिल्ववने नारिङ्गकानने ॥ अश्वत्थकानने वंशवने दाडिमकानने ॥ १६४ ॥ मन्दारकानने तालवने
चूतवने तथा ॥ केतकीकाननेऽशोकवने खर्जूरकानने ॥ १६५ ॥ आम्रातकवने जम्बूगहने शालकानने ॥ कटके कानने पद्मवने
जातिवने मुने ॥ १६६ ॥ न्यग्रोधगहने घोरे तथा श्रीखण्डकानने ॥ प्रहृष्टकेसरवने सर्वतोऽपि विलक्षणे ॥ १६७ ॥ एवं रेमे
कौतुकेन कामात्रिंशद्दिवानिशम् ॥ तथाऽपि मानसं पूर्णं न च किंचिद्बभूव ह ॥ १६८ ॥ न कामिनीनां कामश्च शृङ्गारेण निवर्तते ॥
अधिकं वर्धते शश्वद्यथाऽग्निर्घृतधारया ॥ १६९ ॥ जग्मुर्देवाः स्वगेहं च देव्यश्च मुनयस्तथा ॥ ते सर्वे प्रशशंसुश्च विस्मयं च
ययुर्मुदा ॥ १७० ॥ गेहे गेहे नृपेन्द्राणां लेभिरे जन्म भारते ॥ दग्धाः कामाग्निनांऽशेन देव्यः शृङ्गारलालसाः ॥ १७१ ॥

इति श्रीब्रह्मवैवर्त्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे रासक्रीडाप्रस्तावो नाम अष्टाविंशोऽध्यायः
॥ २८ ॥ श्रीनारायण उवाच ॥ अथ गोपाङ्गनाः सर्वाः काममत्ततया मुने ॥ अतिप्रौढाश्च मानिन्योनेश्वरं
मेनिरे पतिम् ॥ १ ॥ काश्चिदूचुरहो कृष्णं सस्मिता वक्रलोचनाः ॥ मालतीपुष्पमुत्तोल्य देहि मे मालिकामिति ॥ २ ॥

काश्चिदूचुरये कृष्ण स्वक्रोडेऽस्मांश्च कुर्विति ॥ गृहीत्वा श्रीहरेः स्कन्धमारुरोह च काचन ॥ ३ ॥ उवाच काचिद्दर्पेण प्रमत्ता प्राणव
ल्लभम् ॥ स्वकीयपीतवसनं परिधारय मामिति ॥४॥ उवाच काचिदीशं तं सिन्दूरं देहि मामिति ॥ उवाच काचित्प्राणेशं शीघ्रमाग
त्य साम्प्रतम् ॥ ५ ॥ कृत्वा कुन्तलसंस्कारं कुरु मे कबरीमिति ॥ काश्चित्संप्रेरयामासुः श्रीखण्डं बल्लवाय च ॥६॥ स्वांगवेषविधायि
न्यो भूषार्थं श्रुतिमूलयोः ॥ उवाच काचित्कामेन परं संकेतपूर्वकम् ॥ ७ ॥ पश्यन्ती तन्मुखाम्भोजं सस्मिता मैथुनाय च ॥ काचि
ज्जग्राह मुरलीं बलादाकृष्य माधवम् ॥ ८ ॥ जहार पीतवसनं कृत्वा नग्नं च कामिनी ॥ कामिन्यः काश्चिदित्यूचुर्मानिन्यो मधु
सूदनम् ॥ ९ ॥ अलक्तकद्रवं देहि पादयोर्नखरेषु च ॥ उवाच काचित्प्रेम्णा तं गण्डयोः स्तनयोर्मम ॥१०॥ नानाचित्रविचित्राढ्यां
कुरु पत्रावलीमिति ॥ कृत्वाऽनुमानं मनसा दृष्ट्वा तासां प्रमत्तताम् ॥ ११ ॥ माधवो राधया सार्द्धमन्तर्धानं चकार ह ॥ अतीव
निर्जने स्थाने मुदा स्वेच्छामयो विभुः ॥ १२ ॥ कलामानप्रकारं च शृंगारं च चकार ह ॥ पर्वते पर्वते रम्ये द्वीपेद्वीपे सुनिर्जने ॥
॥ १३ ॥ तटे तटे नदीनां च सर्वजन्तुविवर्जिते ॥ श्रीगोष्ठे रत्नशैले च वेलागङ्गातटेऽपि च ॥ १४ ॥ कालिन्दे च पुलिन्दे च
मन्दिरे गन्धमादने ॥ मनोहरे कुन्दवने कावेरीतीरनीरजे ॥ १५ ॥ पुष्पभद्रापुलिनजे पुष्पोद्याने सुपुष्पिते ॥ सर्वत्र रमणं कृत्वा
राधावेषं विधाय च ॥ १६ ॥ जगाम मलयद्रोणीं रम्यां चन्दनवायुना ॥ शय्यां पुष्पमयीं कृत्वा तत्र रेमे तया सह ॥ १७ ॥
अतीव सुखसंभोगान्मूर्च्छां संप्राप्य राधिका ॥ कृत्वा वक्षसि गोविन्दं पुलकाञ्चितविग्रहा ॥१८॥ दृष्ट्वा तां मूर्च्छितां कृष्णो घनश्रो
णिपयोधराम् ॥ विलुप्तवेषां कामार्तां नग्नां शिथिलकुन्तलाम् ॥ १९ ॥ चेतनां कारयामास कृत्वा वक्षसि तन्द्रिताम् ॥ वासया
मास वसनं राधायामेखलाम्बरम् ॥ २० ॥ कबरीं रचयामास किंचिद्वामेन वक्रताम् ॥ मालतीमाल्यसंयुक्तां कुन्दपुष्पैश्च वेष्टिताम् ॥
॥ २१ ॥ तस्याः कपाले सिंदूरतिलकं सुन्दरं ददौ ॥ गण्डयोः स्तनयोश्चित्रां चकार पत्रिकां मुदा ॥ २२ ॥ सालक्तकांश्च नखरांश्चित्रि
तान्पादपद्मयोः ॥ नखैः कृत्रिमपद्मानि निर्ममे श्रोणिवक्षसोः ॥ २३ ॥ उत्थायाथ तया सार्द्धं जगाम हि सरोवरम् ॥ नानाप्रकारप

ह्मानां राजिभिश्च विराजितम् ॥ २४ ॥ निर्मलस्फटिकाकारजलपूर्णं मनोहरम् ॥ हंसकारण्डवाकीर्णं जलकुक्कुटकूजितम् ॥२५॥
मधुलुब्धमधुव्राणां पद्मस्थानं सुपद्मजम् ॥ चारुणा कलशब्देन शब्दितं शश्वदेव हि ॥ २६ ॥ तत्र स्नात्वा जलक्रीडां चकार ह
तया सह ॥ जलं ददौ राधिकायै मुदा सा माधवाय च ॥ २७ ॥ सहस्रदलपद्मं च गृहीत्वा माधवः स्वयम् ॥ एकं ददौ राधिका
यै ररक्ष स्वार्थमेककम् ॥ २८ ॥ चन्दनागुरुकस्तूरीकुङ्कुमद्रवमीप्सितम् ॥ स्वाङ्गं दत्त्वा राधिकायै लिलेप राधिकेश्वरः ॥ २९॥ ततो
गच्छंस्तया सार्द्धं ददर्श पुरतो वटम् ॥ अतीवोत्तुङ्गशाखाग्रमतिविस्तृतमेव च ॥ ३० ॥ मूले योजनपर्यन्तं छायया परिवेष्टितम् ॥
उवास तत्र गोविन्दः केतकीवनसंनिधौ ॥३१॥ पुष्पाक्तेन सुशीतेन वायुना सुरभीकृते ॥ चित्रं रहस्यं सुचिरं पुराणं च पुरातनम् ॥
॥ ३२ ॥ प्रहर्षितश्च श्रीकृष्णः कथयामास राधिकाम् ॥ एतस्मिन्नन्तरे तत्र ददर्श मुनिपुंगवम् ॥ ३३ ॥ आगच्छन्तं च तं दृष्ट्वा प्रसन्न
वदनेक्षणम् ॥ न दृष्ट्वा हृदये रूपमीशस्य परमात्मनः ॥ ३४ ॥ ध्यानाद्विरतमग्रे च पश्यन्तं बहिरेव तत् ॥ सर्वावयववक्रं च कृष्णं
सर्वदिगम्बरम् ॥ ३५ ॥ नाम्नाऽष्टवक्रं जटिलं ज्वलन्तं ब्रह्मतेजसा ॥ मुखतोऽग्निमुद्गिरन्तं तपोराशिमिवोत्थितम् ॥ ३६ ॥ अहो किं वा
ब्रह्मतेजो मूर्तिमन्तमिह स्वयम् ॥ नखश्मश्रुसुदीर्घं च शांतं तेजस्विनं परम् ॥ ३७ ॥ पुटाञ्जलियुतं भक्त्या भीतं प्रणतकंधरम् ॥ दृष्ट्वा
हसन्तीं राधां तां वारयामास माधवः ॥३८॥ प्रभावं कथयामास मुनीन्द्रस्य महात्मनः ॥ अथ प्रणम्य गोविन्दं तुष्टाव मुनिपुंगवः ॥
यत्स्तोत्रं च पुरा दत्तं शंकरेण महात्मना ॥ ३९ ॥ अष्टावक्र उवाच ॥ गुणातीत गुणाधार गुणबीज गुणात्मक ॥
गुणीश गुणिनां बीज गुणायन नमोऽस्तु ते ॥ ४० ॥ सिद्धिस्वरूप सिद्ध्यंश सिद्धिबीज परात्पर ॥ सिद्धिसिद्धिगुणाधीश सिद्धानां
गुरवे नमः ॥ ४१ ॥ हे वेदबीज वेदज्ञ वेदिन्वेदविदां वर ॥ वेदाज्ञाताद्यरूपेश वेदाङ्गेश नमोऽस्तु ते ॥ ४२ ॥ ब्रह्मानन्तेश शेषेन्द्रध
र्मादीनामधीश्वर ॥ सर्व सर्वेश शर्वेश बीजरूप नमोऽस्तु ते ॥ ४३ ॥ प्रकृते प्राकृत प्रज्ञ प्रकृतीश परात्पर ॥ संसारवृक्ष तद्बीज
फलरूप नमोऽस्तु ते ॥ ४४ ॥ सृष्टिस्थित्यन्तबीजेश सृष्टिस्थित्यन्तकारण ॥ महाविराट्तरोर्बीज राधिकेश नमोऽस्तु ते ॥ ४५ ॥

अहो यस्य त्रयः स्कन्धा ब्रह्मविष्णुमहेश्वराः ॥ शाखाप्रशाखा वेदाद्यास्तपांसि कुसुमानि च ॥ ४६ ॥ संसारविफला एव
प्रकृत्यंकुरमेव च ॥ तदाधार निराधार सर्वाधार नमोऽस्तु ते ॥ ४७ ॥ तेजोरूप निराकार प्रत्यक्षानूहमेव च ॥
सर्वाकारातिप्रत्यक्ष स्वेच्छामय नमोऽस्तु ते ॥ ४८ ॥ इत्युक्त्वा स मुनिश्रेष्ठो निपत्य चरणाम्बुजे ॥ प्राणांस्तत्याज योगेन तयोः
प्रत्यक्ष एव च ॥ ४९ ॥ पपात तत्र तद्देहः पादपद्मसमीपतः ॥ तत्तेजश्च समुत्तस्थौ ज्वलदग्निशिखोपमम् ॥ ५० ॥ सप्ततालप्रमाणं
तु चोत्थाय च पपात ह॥भ्रामं भ्रामं च परितो लीनं चाभूत्पदाम्बुजे॥५१॥अष्टावक्रकृतं स्तोत्रं प्रातरुत्थाय यः पठेत् ॥ परं निर्वाण
मोक्षं च समाप्नोति न संशयः ॥ ५२ ॥ प्राणाधिको मुमुक्षूणां स्तोत्रराजश्च नारद ॥ हरिणाऽहो पुरा दत्तो वैकुण्ठे शंकराय च
॥ ५३ ॥ इति श्रीब्रह्मवैवर्ते म० श्रीकृ० ज० नाराय० मुनिमोक्षणप्रस्ताव एकोनत्रिंशोऽध्यायः ॥ २९ ॥ नारद उवाच ॥ ॥
महामुने रहस्यं च श्रुतं ब्रह्मन्किमद्भुतम् ॥ मृते मुनौ किं चकार श्रीकृष्णो भक्तवत्सलः ॥ १ ॥ श्रीनारायण उवाच ॥ दृष्ट्वा
मृतं मुनिं कृष्णः संस्कारं कर्तुमुद्यतः ॥ कृत्वा वक्षसि तद्देहं रुरोदोच्चैर्यथा नरः ॥२॥ बाहुभ्यां च समाश्लिष्य पिपेषोद्रिक्तमोहतः ॥
निर्गतं भस्मनिकरं शवाद्भ्रांगघर्षणात् ॥ ३ ॥ रक्तमांसास्थिहीनं तच्छरीरं च महात्मनः ॥ षष्टिवर्षसहस्राणि निराहारः कृतो मुने
॥ ४ ॥ दग्धं लोहितमांसास्थि ज्वलता जठराग्निना ॥ बाह्यज्ञानविहीनस्य हरिपादाब्जचेतसः ॥ ५ ॥ चितां चन्दनकाष्ठेन निर्माय
मधुसूदनः ॥ कृत्वाऽग्निकार्यं तत्रैव स्थापयामास शोकतः ॥ ६ ॥ ददौ चितायामग्निं च काष्ठं दत्त्वा शवोपरि ॥ ज्वलितायां चिता
यां च मूर्च्छामाप क्षणं विभुः ॥७॥ तद्देहे भस्मसाद्भूते नेदुर्दुन्दुभयो दिवि ॥ बभूव पुष्पवृष्टिश्च तत्क्षणाद्गगनादहो ॥ ८ ॥ एतस्मि
न्नन्तरे तत्र रत्नसारविनिर्मितम् ॥ स्यन्दनं च मनोयायि वस्त्रमाल्यपरिच्छदम् ॥ ९ ॥ पार्षदप्रवरैर्युक्तं श्रीकृष्णसदृशैर्वरैः ॥ आविर्ब
भूव गोलोकात्सुन्दरं पुरतो हरेः ॥ १० ॥ अवरुह्य रथात्तूर्णं पार्षदप्रवरा हरेः ॥ सर्वे समानरूपास्ते प्रणम्य राधिकेश्वरौ ११ ॥
धृतवन्तं सूक्ष्मदेहं प्रणमय्य मुनीश्वरम् ॥ रथे कृत्वा तु तं देहं जग्मुर्गोलोकमुत्तमम् ॥ १२ ॥ गते मुनीन्द्रे गोलोकं वृन्दावनविनो

दिनी ॥ बभूव विस्मिता साध्वी पप्रच्छ जगदीश्वरम् ॥ १३ ॥ श्रीराधिकोवाच ॥ कोऽयं नाथ मुनिश्रेष्ठः सर्वावयवव
क्रिमः ॥ अतिखर्वजनाकारस्तेजीयानतिकुत्सितः ॥ १४ ॥ कथं वा निर्गतं भस्म देहादस्य किमद्भुतम् ॥ साक्षाद्विलीनं यत्तेज
स्त्वत्पादाब्जेऽनलोपमम् ॥ १५ ॥ रथस्थः पुण्यवान्सद्यो गोलकं च जगाम ह ॥ स्वात्मारामस्य यद्धेतो रोदनं ते बभूव ह ॥ १६ ॥
त्वया कृतं च सत्कारमश्रुपूर्णेन चक्षुषा ॥ सर्वं विवरणं तूर्णं संव्यस्य कथय प्रभो ॥ १७ ॥ राधिकावचनं श्रुत्वा प्रहस्य मधुसूदनः
कथां कथितुमारेभे युगान्तरगतामपि ॥ १८ ॥ श्रीकृष्ण उवाच ॥ रहस्यमष्टावक्रीयं विख्यातं सर्वतः प्रिये ॥ पश्चाच्छ्रोष्यसि
कालेन प्रसङ्गे विदुषां मुखात् ॥१९॥ अष्टावक्रो मुनीन्द्रोऽपि विख्यातो भुवनत्रये ॥ परिपूर्णं यद्यशसा जन्मना तज्जगत्त्रयम् ॥२०॥
कृष्णस्य वचनं श्रुत्वा विमनस्का हरिप्रिया ॥ उवाच मधुरं यत्नाच्छुष्ककण्ठोष्ठतालुका ॥ २१ ॥ राधिकोवाच ॥ यत्तृ
षालोर्मनः पूर्णं न बभूव सुधाम्बुधौ ॥ स वितृप्तो भवति किं गोष्पदोदकपानतः ॥ २२ ॥ वेदानां वेदवक्तृणां विधातुर्जनकस्य च ॥
महाविष्णोरीश्वरस्त्वं कोऽन्यो वक्ताऽस्ति त्वत्परः ॥२३॥ राधिकावचनं श्रुत्वा तुष्टः कृष्णो बभूव ह ॥ उवाच गोपनीयं च रहस्यं
परमाद्भुतम् ॥ २४ ॥ श्रीकृष्ण उवाच ॥ शृणु कान्ते प्रवक्ष्येऽहमितिहासं पुरातनम् ॥ श्रवणात्कथनाद्यस्य सर्वं पापं
प्रणश्यति ॥ २५ ॥ महाविष्णोर्नाभिपद्माद्बभूव जगतां विधिः ॥ ममांशस्य मत्कलया जलाकीर्णे जगत्त्रये ॥ २६ ॥ पुत्रा बभूवुश्च
त्वारो ब्रह्मणो मानसात्पुरा ॥ नारायणपराः सर्वे ज्वलन्तो ब्रह्मतेजसा ॥ २७ ॥ शिशवः पञ्चवर्षीया नग्ना अज्ञानिनो यथा ॥
बाह्यज्ञानविहीनाश्च ब्रह्मतत्त्वविशारदाः ॥ २८ ॥ सनकश्च सनन्दश्च तृतीयश्च सनातनः ॥ सनत्कुमारो भगवानेते च
त्वार एव च ॥२९॥ तानुवाच जगद्धाता सृष्टिं कुरुत पुत्रकाः ॥ ते न तस्थुः पितुर्वाक्ये प्रययुस्तपसे मम ॥३०॥ विधाता विमन
स्कश्च तनयेषु गतेषु च ॥ पितुर्दुःखाय प्रभवेत्पुत्रश्चेदवचस्करः ॥ ३१ ॥ ज्ञानेन निर्ममे पुत्रान्स्वाङ्गेषु च तपोधनान् ॥ वेदवेदाङ्गवि
ज्ञांश्च ज्वलतो ब्रह्मतेजसा ॥३२॥ अत्रिः पुलस्त्यः पुलहो मरीचिर्भृगुरङ्गिराः ॥ क्रतुर्वसिष्ठो वोढुश्च कपिलश्चासुरिः कविः ॥३३॥

शङ्कुः शङ्खः पञ्चशिखः प्रचेतास्ते तपोधनाः ॥ बहुकालं तपस्तप्त्वा चक्रुः सृष्टिं तदाज्ञया ॥ ३४ ॥ कलत्रवन्तस्ते सर्वे संसारं कर्तुमुन्मुखाः ॥ बभूवुः पुत्रपौत्राश्च सर्वेषां च तपस्विनाम् ॥ ३५ ॥ तदस्तु च कथा बह्वी मुनिवंशानुकीर्तनी ॥ चार्वी पुण्यस्वरूपा च प्रकृतं श्रृणु सुन्दरि ॥ ३६ ॥ प्रचेतसः सुतः श्रीमानसितो मुनिपुङ्गवः ॥ सकलत्रस्तपस्तेपे दिव्यं वर्षसहस्रकम् ॥ ३७ ॥ न बभूव सुतस्तस्य प्राणांस्त्यक्तुं समुद्यतः ॥ तं सम्बोद्धुं बभूवाथ सत्या वागशरीरिणी ॥३८॥ कथं त्यजसि प्राणांस्त्वं गच्छ शङ्करसन्निधिम् ॥ सिद्धं कुरु गृहीत्वा च मन्त्रं शङ्करवक्रतः ॥ ३९ ॥ मन्त्राधिष्ठातृदेवी ते सद्यः साक्षाद्भविष्यति ॥ वरेणाभीष्टदेव्याश्च पुत्रस्ते भविता ध्रुवम् ॥ ४० ॥ श्रुत्वैतच्चरितं विप्रो जगाम शिवसन्निधिम् ॥ योगिनामप्यगम्यं च शिवलोकं निरामयम् ॥ ४१ ॥ सकलत्रो यथा योगी तुष्टाव योगिनां गुरुम् ॥ पुटाञ्जलियुतो भूत्वा भक्तिनम्रात्मकन्धरः ॥४२॥ असित उवाच ॥ जगद्गुरो नमस्तुभ्यं शिवाय शिवदाय च ॥ योगीन्द्राणां च योगीन्द्र गुरूणां गुरवे नमः ॥ ४३ ॥ मृत्योर्मृत्युस्वरूपेण मृत्युसंसारखण्डन ॥ मृत्योरीश मृत्युबीज मृत्युञ्जय नमोऽस्तु ते ॥ ४४ ॥ कालरूपं कलयतां कालकालेश कारण ॥ कालादतीत कालस्य कालकाल नमोऽस्तु ते ॥ ४५ ॥ गुणातीत गुणाधार गुणबीज गुणात्मक ॥ गुणीश गुणिनां बीज गुणिनां गुरवे नमः ॥ ४६ ॥ ब्रह्मस्वरूप ब्रह्मज्ञ ब्रह्मभावे च तत्पर ॥ ब्रह्मबीजस्वरूपेण ब्रह्मबीज नमोस्तु ते ॥ ४७ ॥ इति स्तुत्वा शिवं नत्वा पुरस्तस्थौ मुनीश्वरः ॥ दीनवत्साश्रुनेत्रश्च पुलकाञ्चितविग्रहः ॥ ४८ ॥ असितेन कृतं स्तोत्रं भक्तियुक्तश्च यः पठेत् ॥ वर्षमेकं हविष्याशी शङ्करस्य महात्मनः ॥ ४९ ॥ स लभेद्वैष्णवं पुत्रं ज्ञानिनं चिरजीविनम् ॥ भवेद्धनाढ्यो दुःखी च मूको भवति पण्डितः ॥ ५० ॥ अभार्यो लभते भार्यां सुशीलां च पतिव्रताम् ॥ इह लोके सुखं भुक्त्वा यात्यन्ते शिवसन्निधिम् ॥ ५१ ॥ इदं स्तोत्रं पुरा दत्तं ब्रह्मणा च प्रचेतसे ॥ प्रचेतसा स्वपुत्रायासिताय दत्तमुत्तमम् ॥ ५२ ॥ श्रीकृष्ण उवाच ॥ समाकर्ण्य मुनेः स्तोत्रं भगवाञ्छंकरः स्वयम् ॥ उवाच ब्रह्मणः पुत्रं स्वभक्तं भक्तवत्सलः ॥ ५३ ॥ शंकर उवाच ॥ स्थिरो भव मुनिश्रेष्ठ जानामि तव वाञ्छितम् ॥ पुत्रस्ते भविता सत्यं मदंशेन च मत्समः ॥५४॥

दास्यामि मन्त्रमतुलं सर्वेषां च सुदुर्लभम् ॥ इत्युक्त्वा च ददौ मन्त्रं तवैव षोडशाक्षरम् ॥ ५५ ॥ स्तोत्रं पूजाविधानं च
कवचं परमाद्भुतम् ॥ संसारविजयं नाम पुरश्चरणपूर्वकम् ॥५६॥ वरं दातुमिष्टदेवी प्रत्यक्षा भवितेति च ॥ इत्युक्त्वा विरतो रुद्रः स तं
नत्वा जगाम ह ॥ ५७ ॥ जजाप परमं मन्त्रं सोऽसितः शतवत्सरम् ॥ साक्षाद्भूत्वा वरस्तस्मै त्वया दत्तः पुरा सति ॥ ५८ ॥ पुत्रस्ते
भविता सत्यं महाज्ञानी सुतेति च ॥ वरं दत्त्वा त्वमगमो गोलोकं मम सन्निधिम् ॥ ५९ ॥ कालेन च सुतस्तस्य शिवांशेन बभूव
ह ॥ ब्रह्मिष्ठो देवलो नाम्ना कन्दर्पसमसुन्दरः ॥ ६० ॥ सुयज्ञनृपतेः कन्यां रत्नमालावतीं मुदा ॥ तां सुन्दरीं विवाहेन जगृहे सर्वमो
हिनीम् ॥ ६१ ॥ स्थाने स्थाने च रहसि शतवर्षं तया सह ॥ स रेमे निपुणः श्रेष्ठः स्त्रीणां रमणकर्मणि ॥ ६२ ॥ कालान्तरे स विरतो
बभूव मुनिपुंगवः ॥ सुखं सर्वं परित्यज्य धर्मिष्ठः श्रीहरिं स्मरन् ॥ ६३ ॥ उत्थाय रात्रौ शयनाद्विरक्तश्च तपोधनः ॥ स ययौ तपसे
कान्ते गन्धमादनपर्वते ॥६४॥ निद्रां त्यक्त्वा च तत्कान्ता न दृष्ट्वा स्वामिनं सती ॥ विललाप भृशं शोकात्प्रदग्धा विरहाग्निना॥६५॥
उत्तिष्ठन्ती निर्विशन्ती रुरोदोच्चैर्मुहुर्मुहुः ॥ तप्तपात्रे यथा धान्यं बभूव तन्मनस्तदा ॥ ६६ ॥ आहारं च परित्यज्य प्राणांस्तत्याज
सुन्दरी ॥ चकार तत्सुतस्तस्याः कर्म निर्हरणादिकम् ॥६७॥ तपश्चकार स मुनिर्गन्धमादनगह्वरे ॥ दिव्यं वर्षसहस्रं च मम भक्तो जिते
न्द्रियः ॥६८॥ तं ददर्श ह दैवेन रम्भा शृंगारलोलुपा॥अतीव सुन्दरं शान्तं कन्दर्पमिव सुन्दरम् ॥ ६९ ॥ सा च तं कथयामास निर्जने
समुपस्थिता ॥ विधाय वेषं यत्नेन त्रैलोक्यचित्तमोहिनी ॥ ७० ॥ रम्भोवाच ॥ निबोध साधो मद्वाक्यं कामिनीनां मनोहरम् ॥
त्यक्त्वा कठोरं रहसि भज मां सुखदायिकाम् ॥ ७१ ॥ त्वं वरेषु वरः पृथ्व्यां वरारोहा स्वयंवरा ॥ विदग्धाया विदग्धस्य दुर्लभो नव
संगमः ॥ ७२ ॥ यज्ञं कुर्वन्ति भूपाला भारते स्वर्गहेतुकम् ॥ स्वर्गभोगनिमित्तं च भोगसारा वयं मुने ॥ ७३ ॥ स्तनयोर्युग्ममपूर्वांमे
सुन्दरं मुखपंकजम् ॥ हास्यभ्रूभंगसहितं दृष्ट्वा को न लभेत्सुखम् ॥ ७४ ॥ स्त्रीरसः सुखसारश्च मुनीनामभिवाञ्छितः ॥ रसिकासुखसंभो
गो निर्जने चातिदुर्लभः ॥७५॥ देवो वा मानवो वाऽपि गन्धर्वो वाऽथ राक्षसः ॥ स्त्रीसुखेष्वप्यविज्ञेयो रम्भाया रतिवञ्चितः॥७६॥

रहस्युपस्थितां कान्तां न भजेद्यो जितेन्द्रियः ॥गात्रलोमप्रमाणाब्दं कुम्भीपाके वसेद्ध्रुवम् ॥७७॥ सत्यं तस्याश्च वधभाक्तच्छापेन प्रणश्यति ॥ विधाता मोहिनीशापादपूज्यो भुवनत्रये ॥ ७८ ॥ येन त्यक्तोपस्थिता तं यथा पश्यति पुंश्चली ॥ स्वामिपुत्रस्वबन्धूनां न तथा घातकं रुषा ॥ ७९ ॥ परं प्रियं च सर्वेषां जारं जानाति पुंश्चली ॥ यदि तेन परित्यक्ता तं हन्तुं सा तु दक्षिणा॥८०॥ पुंश्चली हिंस्रजन्तुभ्यो नवघातिभ्य एव च॥दुष्टा शश्वद्दयाहीना दुरन्ता प्रतिजन्मनि ॥ ८१ ॥ त्यज ध्यानं मुनिश्रेष्ठ भुंक्ष्वेदं तपसः फलम् ॥ रहस्युपस्थितां मां च गृहीत्वा सुचिरं सुखम् ॥ ८२ ॥ स रम्भावचनं श्रुत्वा तामुवाच भयाकुलः ॥ हितं तथ्यं नीतिसारं परिणामसुखावहम् ॥ ८३ ॥ देवल उवाच ॥ शृणु रम्भे प्रवक्ष्यामि वेदसारं परं वचः ॥ कुलधर्मोचितं सत्यं ब्राह्मणानां तपस्विनाम् ॥ ८४ ॥ धर्मोऽयं युक्तकाले च स्वयोषिति रतो द्विजः ॥ सर्वत्र पूजितः शश्वदिह लोके परत्र च ॥ ८५ ॥ ब्राह्मणः क्षत्रियो वैश्यो यो रतः परयोषिति ॥ याति तस्यापूजितस्य रुष्टा लक्ष्मीर्गृहादपि ॥ ८६ ॥ इहातिनिन्द्यः सर्वत्र नाधिकारी स्वकर्मसु ॥ परत्रैवान्धकूपे च यावद्वर्षशतं वसेत् ॥ ८७ ॥ ग्राह्या चोपस्थिता स्त्री च गृहिणा न तपस्विना ॥ त्यागे दोषः कामिनीनां शापभाक्पापभाग्गृही ॥ ८८ ॥ ब्रह्मा जगद्विधाताऽपि न विरक्तः कलत्रवान् ॥ त्यागे दोषस्तत्कदाचिन्नास्माकं त्यक्तयोषिताम् ॥ ८९ ॥ स्वभार्यां च परित्यज्य यो गृह्णाति परस्त्रियम् ॥ यशोधनायुषां हानिर्भवेज्जीवन्मृतस्य च ॥ ९० ॥ भुवि नास्ति यशो यस्य जीवनं तस्य निष्फलम् ॥ सुसंपदा किं राज्येन सुखेन च तपस्विनः ॥ ९१ ॥ निष्कामेन च वृद्धेन मया किं ते प्रयोजनम्॥सुवेषं सुन्दरं मातर्युवानं पश्य सुन्दरि॥९२॥ इत्येवं वचनं श्रुत्वा चुकोपाप्सरसां वरा ॥ उवाच भूयो वाक्यं तं त्रस्ता प्रस्फुरिताधरा ॥ ९३ ॥ रम्भोवाच ॥ चारुचम्पकवर्णाभः कन्दर्पसमसुन्दरः ॥ तपःप्रभावात्सश्रीकः सुवेषः संमतः स्त्रियाः॥९४॥त्वया विनाऽन्यं कं यामि को वास्ति त्वत्परः पुमान्॥पुंश्चली त्वां परित्यज्य का जीवति स्मरातुरा ॥ ९५ ॥ शीघ्रं मां भज विप्रेन्द्र दग्धां कामाग्निना सदा ॥ कामो नश्यति मां त्वत्तो यथा रम्भां मतंगजः ॥ ९६ ॥ न चेच्छापं

प्रदास्यामि वद वेदविदां वर ॥ मां वा दारुणशापं वा सत्वरं ग्रहणं कुरु ॥९७॥दग्धाः प्राणा मनो दग्धं स्वात्मा वा इति संततम्॥
नवशृङ्गारपीयूषपाननिर्वाणतां व्रजेत् ॥ ९८ ॥ स्वान्तर्दुःखेन दुःखार्तौ यो यं शपति निश्चितम्॥तं शापं खण्डितुं शक्तो न विधाता
जगत्पतिः ॥ ९९ ॥ द्विजो रम्भावचः श्रुत्वा बभूव ध्यानतत्परः ॥ नोवाच किंचिन्मौनस्थः सा तं कोपाच्छशाप ह ॥१००॥ हे
वक्रचित्त ते विप्र सर्वावयववक्रिमम् ॥ शरीरमञ्जनाकारं रूपयौवनवर्जितम् ॥ १ ॥ अतीव विकृताकारं त्रिषु लोकेषु गर्हितम् ॥
पुरातनं तपो नष्टं सद्यो भवतु निश्चितम् ॥ २ ॥ इत्युक्त्वा पुंश्चली कामात्कामलोकं जगाम ह ॥ अचिरेण मुनीन्द्रश्च न ददर्श हरेः
पदम् ॥३॥ पदारविन्दविरहात्समुद्विग्नो बभूव ह॥स्वाङ्गं च दृष्ट्वा विकृतं पूर्वपुण्यविवर्जितम्॥ ४ ॥ कृत्वाऽग्निकुण्डं शोकेन प्राणांस्त्य
क्तुं समुद्यतः ॥ मया दृष्टो वरो दत्तो दिव्यज्ञानेन बोधितः ॥५॥ आश्वासश्च कृतः प्रीत्या ततः शान्तो बभूव ह ॥ अङ्गान्यष्टौ च वक्रा
णि दृष्ट्वा तूर्णं महामुनेः ॥ ६ ॥ अष्टावक्रेति तन्नाम कौतुकेन मया कृतम् ॥ मद्वाक्यान्मलयद्रोणीमयमागम्य सत्वरः ॥ ७ ॥ षष्टि
वर्षसहस्राणि चकार परमं तपः ॥ तपोऽवसाने मद्भक्तो मया युक्तः कृतः प्रिये ॥ ८ ॥ सर्वस्मिन्प्रलये नष्टे न मद्भक्तः प्रणश्यति॥
सुचिरेणैव तपसा ज्वलता जठराग्निना ॥ ९ ॥ त्यक्ताहारस्यान्तरं च भस्मपूर्णं ततो मुनेः ॥ आगतं मलयद्रोणीं मुनिहेतोर्मया
प्रिये ॥ ११० ॥ अष्टावक्राच्च मद्भक्तो न भूतो न भविष्यति ॥ एवंभूतस्तपोनिष्ठः प्रपौत्रो ब्रह्मणो मुनिः ॥ ११ ॥ निष्कलः पुंश्चली
शापाद्ब्रह्माऽपूज्यो यथा पुरा ॥ इत्येवं कथितं सर्वं रहस्यं च महात्मनः ॥ सुखदं पुण्यदं गूढं किं भूयः श्रोतुमिच्छसि ॥ ११२ ॥
इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे राधाप्रश्ने त्रिंशत्तमोऽध्यायः ॥ ३० ॥ श्रीराधिकोवाच ॥
किमाश्चर्यं श्रुतं नाथ चरितं सुमनोहरम् ॥ अधुना श्रोतुमिच्छामि ब्रह्मणः शापकारणम् ॥ १ ॥ यो विधाता त्रिजगतां तपसां
फलदायकः ॥ स कथं कुलटाशापादपूज्यश्च बभूव ह ॥ २ ॥ श्रीकृष्ण उवाच ॥ मन्वन्तरे रैवतस्य सुचन्द्रो नृपपुंगवः ॥
तपस्वी वैष्णवः श्रेष्ठो ज्ञानी परमधार्मिकः ॥ ३ ॥ स च पूर्वं तपः कुर्वन्नाजगाम मम प्रिये ॥ इमां च मलयद्रोणीं भारतेषु मनोह

राम् ॥४॥ तपश्चकार राजेन्द्रो वर्षाणां च सहस्रकम् ॥ जीर्णं तस्य शरीरं च कठोरेण तपस्विनः ॥५॥ वल्मीकाच्छादितं देहं दृष्ट्वा
धाता कृपानिधिः ॥ आजगाम वरं दातुं तपःस्थानं सुनिर्जनम् ॥६॥ कमण्डलुजलेनैव मम देहोद्भवेन च॥सिषेच तं च मन्त्रेण मया दत्ते
न योगवित् ॥ ७ ॥ कमण्डलुजलस्पर्शादुत्थाय नृपतिः स्वयम् ॥ ननाम भक्त्या जगतां स्रष्टारं च पुरः स्थितम्॥८॥ स तं नमन्तं
राजानमुवाच कमलोद्भवः ॥ वरं वृणिवति राजेन्द्र यत्ते मनसि वाञ्छितम् ॥ ९ ॥ तस्य तद्वचनं श्रुत्वा वरं वव्रे परात्परम् ॥ ममैव
चरणे भक्तिं मदीयं दास्यमेव च ॥१०॥ कृपया च वरं ब्रह्मा दत्तवानभिवांछितम् ॥ स च तत्पुरतस्तस्थौ कामदेवसमप्रभः ॥११॥
एतस्मिन्नन्तरे राजा ददर्श रथमुत्तमम् ॥ आकाशान्निपतन्तं वै शतसूर्यसमप्रभम् ॥ १२ ॥ तेजसाऽऽच्छादितं सर्वं सुप्रदीप्तं दिशो
दश ॥ रत्नेन्द्रसारनिर्माणं शतचक्रसमन्वितम् ॥ १३ ॥ अमूल्यरत्नरचितं विचित्रकलशोज्ज्वलम् ॥ मुक्तामाणिक्यहीराणां माला
जालैश्च राजितम् ॥ १४ ॥ सद्रत्नदर्पणैर्दीप्तैरतीव सुमनोहरम् ॥ भूषितं दिव्यवस्त्रैश्च श्वेतचामरकोटिभिः ॥ १५ ॥ पारिजातप्रसूनानां
मालाजालैः सुशोभितम् ॥ मनोयायि महाश्चर्यं नानाचित्रेण चित्रितम् ॥१६॥ वेष्टितं पार्षदैर्दिव्यै रत्नभूषणभूषितैः॥चतुर्भुजैः श्याम
लैश्च ज्वलद्भिः स्थिरयौवनैः ॥ १७ ॥ पीतवस्त्रपरीधानैश्चन्दनागुरुचर्चितैः ॥ दृष्ट्वा रथस्थान्देवांश्च ननाम नृपतिर्मुदा ॥ १८ ॥ सह
सा तस्य शिरसि पुष्पवृष्टिर्बभूव ह ॥ नेदुर्दुन्दुभयः स्वर्गे चानकाश्च मनोहराः ॥ १९ ॥ ऋषयो मुनयः सिद्धाः प्रकुर्वन्तो मुदाऽऽशि
षम् ॥ प्रशशंसुः सुराः सर्वे राजानं हर्षनिर्भराः ॥ २० ॥ राजा च पार्षदान्ध्यात्वा तद्रूपश्च बभूव ह ॥ पार्षदास्तं रथे कृत्वा नीत्वा
जग्मुर्ममालयम् ॥ २१ ॥ मदीयः पार्षदो भूत्वा स च तस्थौ ममान्तिके ॥ ततः स्वमन्दिरं यान्तं ददर्श मोहिनी विधिम् ॥२२॥
पुष्पोद्याने च रम्ये च पुष्पचन्दनवायुना॥सद्यो मुमोह तं दृष्ट्वा प्रदग्धा मदानानलैः॥२३॥विलोक्य वक्रनयना जुगोप सस्मितं मुखम्॥
सिन्दूरबिन्दुं दधती कस्तूरीबिन्दुना सह॥२४॥चारुचम्पकवर्णाभा सततं स्थिरयौवना॥बृहन्नितम्बयुगला पीनश्रोणिपयोधरा ॥२५॥
शरत्पार्वणशुभ्रांशुप्रभामुष्टकरानना ॥ सूक्ष्मवस्त्रपरीधाना रत्नालंकारभूषिता ॥ २६ ॥ त्रैलोक्यं मोहितुं शक्ता कटाक्षैरेव लीलया ॥

अतीव कामिनी शश्वद्गजेन्द्रमन्दगामिनी ॥२७॥ पुलकाञ्चितसर्वाङ्गी मूर्च्छां संप्राप वर्त्मनि ॥ सन्निरीक्ष्य च तां ब्रह्मा जगाम श्रीहरिं
स्मरन् ॥ २८ ॥ स विकारं न हि प्राप ह्यात्मारामो जितेंद्रियः ॥ ब्रह्मलोकं च संप्राप ब्रह्मा च जगतां पतिः ॥ २९ ॥ सकामा सा
च कुलटा बभूव हतचेतना ॥ दिवानिशं चिन्तयन्ती स्वप्ने ज्ञाने चतुर्मुखम् ॥ ३० ॥ सर्वं जारं विसस्मार तत्याज हरिमीश्वरी ॥ उत्तिष्ठन्ती
निवसती शयनं कुर्वती क्षणम् ॥३१॥ तप्तपात्रे यथा सस्यं भ्रमत्येव तथा पथि ॥ एतस्मिन्नन्तरे रम्भा विदग्धाऽप्सरसां वरा ॥
॥ ३२ ॥ गच्छन्ती कामलोकं सा सकामा तेन वर्त्मना ॥ दृष्ट्वा सहचरीं तत्र शुष्ककण्ठोष्ठतालुकाम् ॥ अभिप्रायेण बुबुधे पप्रच्छ
सस्मिता तदा ॥ ३३ ॥ रम्भोवाच ॥ कथमेवंविधा त्वं हि त्रैलोक्यचित्तमोहिनि ॥ ३४ ॥ वद शीघ्रं महाभागे रम्भाऽहं चेतनं
कुरु ॥ कमुद्दिश्य सकामा त्वं गच्छ त्वं कान्तमीप्सितम् ॥३५॥ कुलटा सर्वसौभाग्या न वयं कुलपालिकाः ॥ सर्वे व्यग्रा इन्द्रियाणां
सुखाय भुवनत्रये ॥३६॥ यान्ति प्राणा यतः काले का लज्जा तत्र जीविनाम् ॥ न चात्मनः परः कश्चित्प्रियोऽस्ति भुवनत्रये ॥३७॥
कान्तेऽपत्ये स्वबन्धौ च स्नेहो यः स्वात्महेतुकः ॥ सम्बन्धः स्वात्मनो यावत्तावत्स्नेहोऽस्ति तत्र वै ॥ ३८ ॥ येषु यन्मानसं शश्वत्तेषां
प्राणास्त एव हि ॥ गच्छन्तीं कामलोकं च सकामां पश्य मां प्रिये ॥ ३९ ॥ सह सख्या समालोक्य मनसा गच्छ तं प्रियम् ॥ निबद्ध्य
नीवीं केशांश्च कृत्वा वेषमभीप्सितम् ॥ ४० ॥ मुनिमोहनबीजं च तं मोहं कुरु मोहिनि ॥ कथयस्व महाभागे वचनं हृदयंगमम्
॥ ४१ ॥ रक्षात्मानं प्रभावं च स्त्रीजातीनां जगत्त्रये ॥ स्वाभिप्रायश्च सुरतौ न प्रकाश्यः कदाचन ॥४२॥ स्वान्तं कान्तं स्वानुरक्तमृज्वीं
सहचरीं विना ॥ तस्माद्यत्नेन हृद्वाक्यं प्रकाश्यं च प्रिये प्रिये ॥ ४३ ॥ अन्यथा चोपहासाय मरणायैव कल्पते ॥ तस्याश्च
वचनं श्रुत्वा सस्मिता सा सुलज्जिता ॥ हृद्यं च कथयामास यद्धेतोस्तादृशी गतिः ॥ ४४ ॥ मोहिन्युवाच ॥ यावद्दृष्टो
मया रम्भे निर्जने चतुराननः ॥ ४५ ॥ तावन्मनो मेऽतिदग्धं शश्वन्मनसिजानलैः ॥ न दत्तमात्मने भक्ष्यमन्तरे न हि रोचते ॥
॥ ४६ ॥ जानामि नाहमुदयं यामिनीशदिनेशयोः ॥ अधुना नहि भेदो मे सततं स्वप्नज्ञानयोः ॥ ४७ ॥ मम प्राणाः प्रतीक्षन्ते

तस्यालिङ्गनमेव च ॥ क्षणं विज्ञाय न चिरं यास्यन्ति नान्यथा प्रिये ॥ ४८ ॥ कामज्वालाकलापैश्च स्वर्णाकारं कलेवरम् ॥ अनाहारेण चेदानीं बभूव दग्धशैलवत् ॥४९॥ गन्तुं स्थातुं न शक्ताऽहं शयनं कर्तुमुद्यता॥धिगस्तु पुंश्चलीजातिं मामेव च विशेषतः ॥५०॥ कमुपायं करिष्यामि वद रम्भेऽतिसाम्प्रतम् ॥ लज्जां वाऽपि शरीरं वा विसृजामि च किं द्वयोः॥५१॥मोहिनीवचनं श्रुत्वा प्रहस्याप्सरसां वरा ॥ तामुवाच हितं नीतमुपायं शुभकारणम् ॥ ५२ ॥ रम्भोवाच ॥ एवमेतदहो भद्रे भद्रस्य कारणं तव ॥ सर्वं त्वपनयिष्यामि शृणूपायं भयं त्यज ॥ ५३ ॥ कृत्वा वेषमपूर्वं च पूर्वमाराध्य मन्मथम् ॥ तेन सार्द्धं स्वयं गत्वा मोहं कुरु च भामिनि ॥ ॥५४॥ जितेन्द्रियाणां प्रवरं साक्षान्नारायणात्मकम् ॥ विना कामसहायेन का शक्ता जेतुमीश्वरम् ॥५५॥ भज कामं तपः कृत्वा पुष्करे व्रज मोहिनि ॥ सद्यः साक्षात्स भविता दयालुर्योषितां प्रभुः ॥५६॥ इत्युक्त्वा तामप्सरसां प्रवरा काममन्तिकम् ॥ जगामेन्द्रियशान्त्यर्थं सा जगाम च पुष्करम् ॥ ५७ ॥ पुष्करे च तपः कृत्वा कामं संप्राप्य मोहिनी ॥ जगाम तेन सार्द्धं च ब्रह्मलोकमनामयम् ॥ ५८ ॥ ददर्श निर्जनस्थं च मोहिनी कमलोद्भवम् ॥ तमेव मोहनं कर्तुं समारेभे पुरः स्थिता ॥ ५९ ॥ क्षणं ननर्त सुचिरं सुगानेन क्षणं जगौ ॥ संगीतं मम संबन्धि भक्तानां चित्तमोहनम् ॥ ६० ॥ विधाता जगतां तस्याः श्रुत्वा संगीतमीप्सितम् ॥ पुलकाञ्चितसर्वाङ्गो मुमोह साश्रुलोचनः ॥ ६१ ॥ दृष्ट्वा मुग्धं चतुर्वक्त्रं मोहिनी हृष्टमानसा ॥ कलाप्रमाणं भावं च चकार तत्र लीलया ॥ ६२ ॥ स्वाङ्गं संदर्शयामास स्मेरभ्रूभङ्गपूर्वकम् ॥ का लज्जा तस्य संसारे यः कामहतचेतनः ॥ ६३ ॥ विज्ञाय ब्रह्मा तद्भावं नतवक्त्रो बभूव ह ॥ प्रदाय तस्या दानं च विरतः श्रीहरिं स्मरन् ॥ ६४ ॥ विज्ञाय ब्रह्मणो भावं शुष्ककण्ठोष्ठतालुका ॥ हतोद्यमा सा तुष्टाव कामं कामप्रदं वरम् ॥ ६५ ॥ मोहिन्युवाच ॥ सर्वेन्द्रियाणां प्रवरं विष्णोरंशं च मानसम् ॥ तदेव कर्मणां बीजं तदुद्भव नमोऽस्तु ते ॥ ६६ ॥ स्वयमात्मा हि भगवाञ्ज्ञानरूपो महेश्वरः ॥ नमो ब्रह्मञ्जगत्स्रष्टस्तदुद्भव नमोऽस्तु ते ॥ ६७ ॥ सृष्टिः सर्वशरीरेषु दृष्टिश्च योगिनामपि ॥ जगत्साध्य दुराराध्य दुर्निवार नमोऽस्तु ते ॥६८॥ सर्वाजित जगज्जेतर्जीव जीवमनोहर॥

रतिबीज रतिस्वामिन्रतिप्रिय नमोऽस्तु ते ॥ ६९ ॥ शश्वद्योषिदधिष्ठान योषित्प्राणाधिकप्रिय ॥ योषिद्वाहन योषास्त्र योषिद्बन्धो
नमोऽस्तु ते ॥ ७० ॥ पतिसाध्यकराशेषरूपाधार गुणाश्रय ॥ सुगन्धिवातसचिव मधुमित्र नमोऽस्तु ते ॥ ७१ ॥ शश्वद्योनिकृता
धार स्त्रीसंदर्शनवर्धन ॥ विदग्धानां विरहिणां प्राणान्तक नमोऽस्तु ते ॥ ७२ ॥ अकृपा येषु तेऽनर्थास्तेषां ज्ञानविनाशनम् ॥
अनूहरूपभक्तेषु कृपासिन्धो नमोऽस्तु ते ॥ ७३ ॥ तपस्विनां च तपसां विघ्नबीजावलीलया ॥ मनः सकामं मुक्तानां कर्तुं
शक्त नमोऽस्तु ते ॥ ७४ ॥ तपःसाध्याश्चाराध्याश्च सदैवं पाञ्चभौतिकाः ॥ पञ्चेन्द्रियकृताधार पञ्चबाण नमोऽस्तु ते ॥ ७५ ॥
मोहिनीत्येवमुक्त्वा तु मनसा सा विधेः पुरः ॥ विरराम नम्रवक्त्रा बभूव ध्यानतत्परा ॥ ७६ ॥ उक्तं माध्यंदिने कान्ते स्तोत्रमेतन्म
नोहरम् ॥ पुरा दुर्वाससा दत्तं मोहिन्यै गन्धमादने ॥ ७७ ॥ स्तोत्रमेतन्महापुण्यं कामी भक्त्या यदा पठेत् ॥ अभीष्टं लभते नूनं
निष्कलङ्को भवेद् ध्रुवम् ॥७८॥ चेष्टां न कुरुते कामः कदाचिदपि तं प्रियम् ॥ भवेदरोगी श्रीयुक्तः कामदेवसमप्रभः ॥ वनितां लभते
साध्वीं पत्नीं त्रैलोक्यमोहिनीम् ॥ ७९ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे मोहिनी
स्तोत्रवर्णनं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥ श्रीकृष्ण उवाच ॥ मोहिनीस्तवनेनैव कामस्तुष्टो बभूव ह ॥ चकार शरसं
धानमन्तरिक्षे स्थितः स्वयम् ॥ १ ॥ मन्त्रपूतं महास्त्रं च चिक्षेप पितरं मुदा ॥ बभूव चञ्चलो ब्रह्मा कामास्त्रेण च कामुकः ॥ २ ॥
क्षणं निरीक्षणं चक्रे मोहिन्यास्ये पुनःपुनः ॥ ज्ञानं प्राप्य तदा धाता विरराम हरिं स्मरन् ॥३॥ बुबुधे मनसा सर्वं चरितं मन्मथस्य
च ॥ शशाप तं सुतमपि विधाता क्रोधविह्वलः ॥ ४ ॥ हे काम यौवनोन्मत्त मूढैश्वर्येण गर्वित ॥ भविता दर्पभङ्गस्ते गुरोर्मे हेलना
दिति ॥ ५ ॥ हतोद्यमो जगामाशु मन्मथो मधुना सह ॥ ब्रह्मणः शापभीतश्च शुष्ककण्ठोष्ठतालुकः ॥ ६ ॥ इत्युवाच जगद्धाता
मोहिनीं मदनातुराम् ॥ चतुर्वक्त्रं च पश्यन्तीं सस्मितं वक्रचक्षुषा ॥ ७ ॥ ब्रह्मोवाच ॥ मातर्मोहिनि गच्छ त्वं निष्फलं
कर्म चात्र ते ॥ ज्ञातस्तवाभिप्रायश्च नाहं योग्योऽस्य कर्मणः ॥ ८ ॥ वेदे जुगुप्सितं कर्म तदेव कर्तुमक्षमः ॥ वेदकर्ता स्वयमहं व्यव

स्थाकारको भवे ॥ ९ ॥ अकीर्तिं वेदवक्तुश्च निन्द्यं च किमतः परम् ॥ उपस्थिता च या योषिदत्याज्या रागिणामपि ॥१०॥ श्रुतौ
श्रुतमिति त्याज्या सर्वदैव तपस्विनाम् ॥ अहो सर्वैः परित्याज्या पुंश्चली च विशेषतः ॥ ११ ॥ धनायुःप्राणयशसां नाशिनी
दुःखदायिनी ॥ स्वकार्यतत्परा शश्वत्परकार्यविनाशिनी ॥१२॥ निष्ठुरा नवघातिभ्यः सर्वापद्बीजरूपिणी ॥ विद्युद्दीप्तिर्जले रेखा
लोभान्मैत्री यथा भवेत् ॥ १३ ॥ परद्रोहाद्यथा संपत्कुलटाप्रेम तत्समम् ॥ सर्वेभ्यो हिंस्रजन्तुभ्यो विपद्बीजा सदैव हि ॥१४॥ यो
विश्वसेत्तां संमूढो विपत्तस्य पदेपदे ॥ त्वं च रूपवती धन्या वञ्चिता कामुकैः सदा॥१५॥यूनां संपत्स्वरूपा च विषतुल्या तपस्विनाम् ॥
त्वमेवाप्सरसां श्रेष्ठा सर्वदा स्थिरयौवना ॥१६॥ तवैव कर्म योग्यं च युवानं पश्य सुन्दरि ॥ त्वं विदग्धा च योषित्सु विदग्धान्वेषणं
कुरु ॥ १७ ॥ विदग्धाया विदग्धेन संगमो गुणवान्भवेत् ॥ जरातुरोऽहं वृद्धश्च तपस्वी वैष्णवो द्विजः ॥१८॥ अस्वतन्त्रः पराधीनः
का रतिः पुंश्चलीषु मे ॥ अये वत्से गच्छ शीघ्रं विहाय पितरं च माम् ॥१९॥ नाम्नाऽहं च जगत्स्रष्टा तस्मात्तव पिता सदा॥मन्मथं
चंद्रमित्रं च जयन्तं नलकूबरम् ॥ २० ॥ स्ववैद्यौ चंद्रतनयं दितिपुत्रांश्च सुंदारान् ॥ कामशास्त्रेषु निष्णातान्रतिकर्मविशारदान् ॥
॥ २१ ॥ या मां यासि हि तांस्त्यक्त्वा सा विदग्धा च कामुकी ॥ सदा संभोगविषये स्त्रियं प्रार्थयते पुमान् ॥२२॥ स्त्री चेत्प्र
याति पुरुषं विपरीतं विडम्बनम् ॥ सर्वेषां चैव रत्नानां स्त्रीरत्नं दुर्लभं परम् ॥२३ ॥ स्त्रयं प्रार्थयते स्वामी न तु स्वामिनमेव च॥
योषिज्जातिषु धिक् ताश्च स्वयं याः समुपस्थिताः॥२४॥भवेद्दूरं स्वल्पमूल्यं रत्नं स्वयमुपस्थितम् ॥ नित्यं पुमान्स्त्रियं याति स्त्री वा
याति च न प्रियम् ॥ २५ ॥ लोकाचारेषु वेदेषु न स्त्री याति परप्रियम् ॥ स्ववस्तु भुङ्क्ते यः काले शास्त्रोक्तविधिपूर्वकम् ॥२६॥
स पूज्यो न भवेत्पूज्यो यद्रतिः परवस्तुषु ॥ कः कस्य शत्रुरबले निशामय जगत्त्रये ॥ २७ ॥ स्वेन्द्रियाः शत्रवः सर्वे शत्रुता यन्निमि
त्ततः ॥ वेदोक्ताचरणे सर्वं मित्रं च जगतां जगत् ॥ २८ ॥ कृते वेदविरुद्धे च मित्रं शत्रुर्भवेद्ध्रुवम् ॥ वेदोक्तं कृतवन्तं च हरिस्तुष्टो
दिवानिशम् ॥ २९ ॥ हरौ तुष्टे जगत्तुष्टं तस्मिन्रुष्टे भवो रिपुः ॥ कुत्रास्ति कुलटाजातिः साध्वीजातिश्च कुत्र वा ॥ ३० ॥ स्वकी

याचरणात्सर्वं भवे भवति कर्मणः ॥ स्त्रीजातिः प्रकृतेरंशा नारायणविनिर्मिता ॥ ३१ ॥ दुःशीला पुंश्चली निन्द्या सुशीला च पति
व्रता ॥ पतिव्रतास्तु त्रिविधाः पुंश्चलीषु च योषितः ॥ ३२ ॥ तासामेवंविधा नास्ति स्वयं याति परप्रियम् ॥ स्त्रीजातीनां च मध्ये
च काऽस्त्येवं कुलकज्जला ॥३३॥ भवे रत्यै स्वयं दृष्ट्वा वेषं कृत्वा प्रयाति तम् ॥ क्षोभिता यदि पश्यन्ती भक्ष्यद्रव्यमसाध्यकम् ॥
॥३४॥ वैकुल्यान्नहि तत्साध्यं सामान्यमेव केवलम् ॥इत्येवमुक्त्वा जगतां विधाता विरराम च ॥ वक्तुं समुद्यता सा च कोपप्रस्फु
रिताधरा ॥ ३५ ॥ मोहिन्युवाच ॥ ज्ञातं सर्वं जगद्धातश्चरितं तव सांप्रतम् ॥ ३६ ॥ त्वया निबोधिता नीतिर्मनो मे
न स्थिरं भवेत् ॥ भूतं त्वयि विशिष्टं च यावद्दृष्टः क्षणे भवान् ॥३७॥ त्वद्वक्त्रदृष्टिमात्रेण सर्वे जाराश्च विस्मृताः ॥ देहं कामाग्निना
दग्धं यदा त्यक्तुं समुद्यता ॥ ३८ ॥ निषिषेध च मां रम्भा प्रददौ मन्त्रमीदृशम् ॥ तदा कामसहायेन त्वत्समीपं समागता ॥३९॥
समधुस्तव शापेन स जगाम हतोद्यमः ॥ अहो गन्तुमशक्ताऽहं त्वया यद्यपि भर्त्सिता ॥ ४० ॥ सर्वाङ्गेष्वेव मे जाड्यं बभूव सांप्रतं
विभो ॥ कृपां कुरु कृपासिन्धो न मां हन्तुं त्वमर्हसि ॥ ४१ ॥ तवाश्लेषणमात्रेण विज्वराऽहं सुनिश्चितम् ॥ त्वमेव जगतां धाता
कुलटाऽहं च कर्मणा ॥ ४२ ॥ सन्तो गर्वं न कुर्वन्ति कर्मसाध्याश्च जीविनः ॥ कश्चित्प्रयाति यानेन वहन्ति तं च केचन ॥४३॥
करं गृह्णाति नृपतिः कर्मणा ददति प्रजाः ॥ कश्चित्सिंहासनस्थश्च नृपमात्रश्च कश्चन ॥ ४४ ॥ कर्मणा वाहकाः केचि
त्केचिद्वाहनपालकाः ॥ सूकरीजठरं कश्चित्संप्रयाति स्वकर्मणा ॥ ४५ ॥ कश्चिच्छच्याश्च जठरं तव पुत्राश्च केचन ॥
केचित्कृत्वा हरेर्भक्तिं कर्मणा तस्य पार्षदाः ॥ ४६ ॥ केचिद्भवन्ति कृमयो विष्ठायां दैवदोषतः ॥ स्वर्गं प्रयान्ति राजेन्द्राः
केचिच्च स्वस्वकर्मणा ॥ ४७ ॥ केचित्प्रयान्ति नरकं विण्मूत्रे तत्र पच्यते ॥ कर्मणा कश्चिदिन्द्रेन्द्रः सुराणां प्रवरः स्वयम्॥४८॥
केचित्सुरा नराः केचित्केचिच्च क्षुद्रजन्तवः ॥ केचिच्च कर्मणा विप्रा वर्णश्रेष्ठा महीतले ॥ ४९ ॥ केचिद्भूपा वैश्यशूद्राः केचि
च्च म्लेच्छजातयः॥केचित्स्वकर्मणा प्राज्ञा ज्ञानेन सर्वदर्शिनः ॥५०॥केचिन्मूर्खाः केचिदन्धाः स्वाङ्गहीनाश्च केचन ॥ केचिच्छास्त्रं

बोधयन्ति शिष्यवर्गान्स्वकर्मणा ॥५१॥ केचित्पठन्ति सर्वार्थं जानन्ति गुरुवक्त्रतः ॥ भवन्ति कर्मणा केचिद्देहे स्थावरजङ्गमे ॥५२॥
तपस्वी नवघाती च त्वं च ब्रह्मा च कर्मणा ॥ काचित्स्वकर्मणा साध्वी पूज्येह च परत्र च ॥५३॥ काचिद्वेश्या तदाहारं भुङ्क्ते कृत्वाऽङ्ग
विक्रयम् ॥ स्ववेश्याऽहं सुरपुरे सुरभोग्या सुपूजिता ॥५४॥ येषामालिङ्गनेनैव कर्मणां खण्डनं भवेत् ॥ मनः स्वभावबीजं च स्वभावः
कर्मबीजकः ॥ ५५ ॥ तत्कर्म फलबीजं च सर्वेषां जनको हरिः ॥ फलं ददाति नियतं कर्मद्वारा विभुः स्वयम् ॥ ५६ ॥ सर्वेभ्यो बल
वान्नित्यं कर्मरूपी जनार्दनः ॥ कुतो हेतोर्निन्दिताऽहं त्वयैव भर्त्सिता कथम् ॥ ५७ ॥ जगत्स्रष्टुरीश्वरस्य पादाब्जं द्रष्टुमागता ॥
स्वप्ने यस्य पदद्वन्द्वं न हि पश्यन्ति योगिनः ॥ ५८ ॥ तमीश्वरं पतिं कर्तुमिच्छया स्वयमागता ॥ गत्वा हि कस्यचित्स्थानमस्पृ
श्येह परत्र च ॥ ५९ ॥ कस्यचित्पादरजसा यशसा भान्ति योषितः ॥ इत्युक्त्वा मोहिनी शीघ्रं गत्वोवास हरेः पुरः ॥ ६० ॥
स्वयं विधाता जगतां चकम्पे कुलटाभयात् ॥ सस्मिता वक्रनयना कामभावं चकार ह ॥ ६१ ॥ स्वाङ्गं च दर्शयामास कामबाणप्र
पीडिता ॥ एतस्मिन्नन्तरे कामः सर्वज्ञः सर्वयोगवित् ॥ ६२ ॥ आविर्भूय पञ्च बाणान्निचिक्षेप च ब्रह्मणि ॥ सम्मोहनं समुद्वेगं बीजस्त
म्भितकारणम् ॥ ६३ ॥ उन्मत्तबीजं ज्वलदं शश्वच्चेतनहारकम् ॥ एतान्प्रक्षिप्य मदनोऽप्यन्तरिक्षस्थितः स्वयम्॥६४॥ किंकरान्प्रे
षयामास संमोहाय पितुर्मुदा ॥ वसन्तं कोकिलालीश्च गन्धवातं मनोहरम् ॥ ६५ ॥ नियुज्याभ्यन्तरं गत्वा तद्विकारं चकार ह ॥
पुंस्कोकिलः कलं रावमुवाच तत्समीपतः॥६६॥ षट्पदः सुन्दरं सूक्ष्मं जुगुञ्जे पुरतः स्थितः॥शश्वद्ववौ गन्धवहो मन्दोऽतिशीतलः
प्रिये ॥ ६७ ॥ सततं मुदितस्तत्र बभ्राम च मधुः स्वयम् ॥ पुलकाञ्चितसर्वाङ्गो बभूव जगतां विधिः ॥ ६८ ॥ ददर्श मोहिनी
भावं प्रहस्य च पुनः पुनः ॥ अतीव वक्रनयना कामास्त्रहतचेतना ॥ ६९॥विधाता बुबुधे सर्वं सर्वबन्धनिबन्धनम्॥नियन्तुं न मनः
शक्तः सस्मार श्रीहरिं भिया ॥ ७० ॥ तुष्टाव मनसा कृष्णं शान्तं हृत्पङ्कजस्थितम् ॥ द्विभुजं मुरलीहस्तं हरिं पीताम्बरं परम्
॥ ७१ ॥ अतीव कमनीयं च किशोरं स्थिरयौवनम् ॥ रत्नालंकारभूषाढ्यं सस्मितं श्यामसुन्दरम् ॥ ७२ ॥ ब्रह्मोवाच ॥

रक्ष रक्ष हरे मां च निमग्नं कामसागरे ॥ दुष्कीर्तिजलपूर्णे च दुष्पारे बहुसंकटे ॥ ७३ ॥ भक्तिविस्मृतिबीजे च विपत्सोपानदुस्तरे ॥
अतीव निर्मलज्ञानचक्षुःप्रच्छन्नकारणे ॥ ७४ ॥ जन्मोर्मिसंघसहिते योषिन्नक्रौघसंकुले ॥ रतिस्रोतःसमायुक्ते गंभीरे घोर एव च
॥ ७५ ॥ प्रथमामृतरूपे च परिणामविषालये ॥ यमालयप्रदेशाय मुक्तिद्वारातिविस्मृते॥७६॥बुद्ध्या तरण्या विज्ञानैरुद्धरास्मानतः
स्वयम् ॥ स्वयं च त्वं कर्णधारः प्रसीद मधुसूदन ॥७७॥मद्विधाः कतिचिन्नाथ नियोज्या भवकर्मणि॥सन्ति विश्वेश विधयो हे विश्वे
श्वर माधव ॥ ७८ ॥ न कर्मक्षेत्रमेवेदं ब्रह्मलोकोऽयमीप्सितः ॥ तथापि नः स्पृहा कामे त्वद्भक्तिव्यवधायके॥७९ ॥ हे नाथ करुणा
सिन्धो दीनबन्धो कृपां कुरु ॥ त्वं महेश महाज्ञाता दुःस्वप्नं मां न दर्शय ॥ ८० ॥ इत्युक्त्वा जगतां धाता विरराम सनातनः ॥
ध्यायंध्यायं मत्पदाब्जं शश्वत्सस्मार मामिति ॥ ८१ ॥ ब्रह्मणा च कृतं स्तोत्रं भक्तियुक्तश्च यः पठेत् ॥ स चैवाकर्ण्य विषये न
निमग्नो भवेद्ध्रुवम् ॥ ८२ ॥ मम मायां विनिर्जित्य संज्ञानं लभते ध्रुवम् ॥ इह लोके भक्तियुक्तो मद्भक्तप्रवरो भवेत् ॥ ८३ ॥ ॥
इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे ब्रह्ममोहिनीसंवादे द्वात्रिंशोऽध्यायः ॥ ३२ ॥ श्रीकृष्ण
उवाच ॥ कृत्वा ब्रह्मा हरेः स्तोत्रं तस्थौ तस्याः समीपतः ॥ मनोमत्तगजेन्द्रं च कामासक्तं निवारयन् ॥ १ ॥ दिव्यज्ञानांकुशे
नैव मया दत्तेन राधिके ॥ उवाच मोहिनी तं च परिहासपरं वचः ॥ २ ॥ मोहिन्युवाच ॥ इङ्गितेनैव नारीणां सद्यो मत्तं
भवेन्मनः ॥ करोत्याकृष्य संभोगं यः स एवोत्तमो विभो ॥ ३ ॥ ज्ञात्वा स्फुटमभिप्रायं नार्या संप्रेषितो हि यः ॥ पश्चात्करोति
शृङ्गारं पुरुषः स च मध्यमः ॥ ४ ॥ पुनःपुनः प्रेषितश्च स्त्रिया कामार्तया च यः ॥ तया न लिप्तो रहसि स क्लीबो न पुमानहो ॥५॥
गृही तपस्वी कामी वा त्यजेत्स्त्रियमुपस्थिताम् ॥ व्रजेत्परत्र नरकमपूज्यश्च भवेदिह ॥६॥ नष्टश्रीर्भ्रष्टरूपश्च भ्रष्टबुद्धिर्भवेद् ध्रुवम् ॥ स
सद्यः क्लीबतां याति ब्रह्मञ्छापेन योषितः॥७॥ उत्तिष्ठ जगतीनाथ पारं कुरु स्मरार्णवे ॥ निमग्नां दुस्तरे घोरे कर्णधार भयानके ॥८॥
अतीव निर्जनस्थाने सर्वजन्तुविवर्जिते ॥ सुगन्धिवायुना रम्ये पुंस्कोकिलरुतश्रुते ॥ ९ ॥ सततं त्वन्मनस्कां मां दासीं जन्मनि

जन्मनि ॥ क्रीणीहि रतिपण्येनामूल्यरत्नेन सत्वरम् ॥१० ॥ इत्युक्त्वा मोहिनी सद्यो जगत्स्रष्टुश्च ब्रह्मणः ॥ विचकर्ष वरं वस्त्रं सस्मि
ता कामविह्वला ॥ ११ ॥ विज्ञाय समयं धाता तामुवाच भयातुरः ॥ पीयूषतुल्यं वचनं वरं विनयपूर्वकम् ॥ १२ ॥ ब्रह्मोवाच ॥
शृणु मोहिनि मद्वाक्यं सत्यसारं हितं स्फुटम् ॥ न कुरु त्वं च त्रैलोक्ये स्त्रीजातीनामपत्रपाम् ॥ १३ ॥ त्यज मामम्बिके पुत्रं
वृद्धं निष्काममेव च ॥ त्वत्कर्मयोग्यरसिकं युवानं पश्य सुस्मिते ॥ १४ ॥ निषेकाल्लभते पत्नी गुरुं भर्तुः शुभाशुभम् ॥ मन्त्रशिल्प
मपत्यं च सर्वमेतन्न यत्नतः ॥ १५ ॥ त्वया सह मम रते निबन्धो नास्ति सुव्रते ॥ क्षुद्रं महद्वा यत्कर्म सर्वं दैवनिबन्धकम् ॥१६॥
इत्युक्तवन्तं ब्रह्माणं स्मरन्तं मत्पदाम्बुजम् ॥ विचकर्ष पुनर्वेश्या कामेन हृतचेतना ॥१७॥ एतस्मिन्नन्तरे शीघ्रं स्थानं तत्सुमनोहरम्॥
आजग्मुर्मुनयः सर्वे ज्वलन्तो ब्रह्मतेजसा ॥१८॥ अत्रिः पुलस्त्यः पुलहो वसिष्ठः क्रतुरंगिराः॥भृगुर्मरीचिः कपिलो वोढुः पञ्चशि
खो रुचिः ॥ १९ ॥ आसुरिश्च प्रचेताश्च स्वयं शुक्रो बृहस्पतिः ॥ उतथ्यः करकः कण्वः कश्यपो गौतमस्तथा ॥ २० ॥ सनकश्च
सनन्दश्च कर्दमश्च सनातनः ॥ सनत्कुमारो भगवान्योगिनां परमो गुरुः ॥ २१ ॥ शातातपः पिप्पलश्च शंकुः शुक्रः पराशरः ॥
मार्कण्डेयो लोमशश्च मृकण्डुश्च्यवनस्तथा ॥ २२ ॥ दुर्वासाश्च जरत्कारुरास्तीकश्च विभाण्डकः ॥ ऋष्यशृङ्गो भरद्वाजो वामदेवश्च
कौशिकः ॥ २३ ॥ दृष्ट्वतांश्च तपोनिष्ठानागतांश्च मुनीश्वरान् ॥ तत्याज मोहिनी शीघ्रं व्रीडया कमलोद्भवम् ॥ २४ ॥ तत्रोवास
जगद्धाता तद्धामपार्श्वतश्च सा ॥ प्रणेमुर्मुनयस्तं च भक्तिनम्रात्मकन्धराः ॥ २५ ॥ आशिषं युयुजे ब्रह्मा वासयामास तान्विभुः ॥
तेषु मध्ये प्रजज्वाल यथा तारासु चन्द्रमाः ॥ २६ ॥ पप्रच्छुर्मुनयो देवं कथमेषा तवान्तिके ॥ स्वर्वेश्यानां च प्रवरा मोहिनीत्येवमेव
च ॥ २७ ॥ श्रुत्वा मुनीनां वचनमुवाच तान्प्रजापतिः ॥ स्त्रीजातीनां च वचनं लज्जाच्छादनमेव च ॥ २८ ॥ ॥ ब्रह्मोवाच ॥
अपूर्वं नृत्यगीतं च चिरं कृत्वा शुभावहा ॥ उवासेयं परिश्रान्ता यथा कन्या पितुः पुरः ॥ इत्युक्त्वा जगतां धाता जहास मुनि
संसदि ॥ २९ ॥ जहसुर्मुनयः सर्वे सर्वज्ञास्तत्र राधिके ॥ सर्वं रहस्यं विज्ञाय जगत्स्रष्टुश्च मानसम् ॥ ३० ॥ सद्यश्चुकोप कुलटा

हास्यव्याजेन संसदि ॥ सर्वाङ्गकम्पमाना सा कुलटा कुटिलानना ॥ ३१ ॥ रक्तपङ्कजनेत्रा च कोपप्रस्फुरिताधरा ॥ उत्थाय च सभामध्ये तेषां च पुरतः स्थिता ॥ संबोध्योवाच ब्रह्माणं मृत्युकन्या यथा रुषा ॥ ३२ ॥ मोहिन्युवाच ॥ अये ब्रह्मञ्जगन्नाथ वेदकर्ता त्वमेव च ॥ ३३ ॥ किं वा वेदप्रणिहितं कर्म किं तद्विपर्ययम् ॥ विचारं मनसा स्वेन कुरु वेदविदां गुरो ॥ ३४ ॥ स्वकन्यायां यत्स्पृहा स कथं हससि नर्तकीम् ॥ निर्मिताऽहमीश्वरेण स्वर्वेश्या सर्वगामिनी ॥ ३५ ॥ सतां कर्म विरुद्धं यत्तदत्यन्तविडम्बनम् ॥ दासीतुल्यां विनीतां च दैवेन शरणागताम् ॥ ३६ ॥ यतो हससि गर्वेण ततोऽपूज्यो भवाचिरम् ॥ अचिराद्दर्पभङ्गं ते करिष्यति हरिः स्वयम् ॥ ३७ ॥ निबोध वचनं ब्रह्मन्वेश्यायाश्च तु सांप्रतम् ॥ तवैव वचनं स्तोत्रं गृह्णाति यो नरः सदा ॥ ३८ ॥ भविता तस्य विघ्नश्च स यास्यत्युपहास्यताम् ॥ भविता वार्षिकी पूजा देवतानां युगेयुगे ॥ ३९ ॥ तव माघ्यां च संक्रान्त्यां न भविष्यति सा पुनः ॥ कल्पान्तरेऽत्र कल्पे वा देहे देहांतरेऽत्र वा ॥ ४० ॥ पुनः पूजा न भविता या गता सा गतैव च ॥ इत्युक्त्वा मोहिनी शीघ्रं जगाम मदनालयम् ॥ ४१ ॥ तेन सार्द्धं रतिं कृत्वा बभूव विज्वरा पुनः ॥ पश्चात्सा चेतनां प्राप्य विललाप भृशं पुनः ॥ ४२ ॥ अयं कथं मया शप्तो जगद्विधिरतिप्रियः ॥ स्वर्वेश्यायां गतायां च मुनयो दुःखिता भृशम् ॥ ४३ ॥ स्वयं विधाता जगतां चकम्पे नतकन्धरः ॥ उपायं मुनयस्तस्मै ददुः कल्याणकारिणः ॥ ४४ ॥ शरणं व्रज वैकुण्ठमित्युक्त्वा ते गृहान्ययुः ॥ ब्रह्मा जगाम शरणं मम मूर्त्यन्तरं परम् ॥ ४५ ॥ शान्तं तं कमलाकान्तं श्यामं नारायणाभिधम् ॥ गत्वा विषण्णवदनः प्रणम्य च चतुर्भुजम् ॥ ४६ ॥ तत्रोवास जगत्कर्ता नातिदूरे समीपतः ॥ रहस्यं कथयामास शुष्ककण्ठोष्ठतालुकः ॥ ४७ ॥ दीनबन्धुं दयासिन्धुं विपत्तारणकारणम् ॥ श्रुत्वा रहस्यं तत्सर्वं प्रहस्योवाच तं विभुः ॥ सत्यं सारं हितं वाक्यं जगतां च सुखावहम् ॥ ४८ ॥ श्रीनारायण उवाच ॥ स्वयं त्वं वेदविदसि विदुषां च गुरोर्गुरुः ॥ ४९ ॥ त्वया कृतं च यत्कर्म इह केन न तत्कृतम् ॥ स्त्रीजातिः प्रकृतेरंशा जगतां बीजरूपिणी ॥ ५० ॥ स्त्रीणां बिडम्बनेनैव प्रकृतेश्च विडम्बनम् ॥ न तद्भारतवर्षं च पुण्यक्षेत्रमनुत्तमम् ॥ ५१ ॥

क्रीडाक्षेत्रे ब्रह्मलोके कस्तवेन्द्रियनिग्रहः ॥ यदि तद्धारते दैवात्कामिनी समुपस्थिता ॥ ५२ ॥ स्वयं रहसि कामार्ता न सा त्याज्या जितेन्द्रियैः ॥ त्यक्त्वा परत्र नरकं व्रजेदतिविडम्बितः ॥ ५३ ॥ भवेदेव हि दुःखार्ता शापं दद्याच्च तं ध्रुवम् ॥ विहाय स्वकलत्रं च यो गृह्णाति परस्त्रियम् ॥ ५४ ॥ लोभात्कामसुखाद्वाऽपि सोऽधमो नात्र संशयः ॥ पातयित्वा स च पतेद्दश पूर्वान्दशापरान् ॥ ५५ ॥ त्यक्त्वा स्वस्वामिनं या च परं गच्छति कामतः ॥ न पुमान्न च वेश्या च कुलस्त्री तत्र दुष्यति ॥ ॥ ५६ ॥ उपायेन च या साध्यं करोति परपूरुषम् ॥ तिष्ठत्येवान्धकूपे सा यावच्चन्द्रदिवाकरौ ॥ ५७ ॥ स्ववेश्या च दिवं याति सततं कुलधर्मतः ॥ ध्रुवं भवेत्सोऽपराधी तस्या अप्यवमानतः ॥ ५८ ॥ तमुपायं करिष्यामि शप्तो यत्र विशुद्ध्यति ॥ क्षणं तिष्ठ जगन्नाथ पापिनश्च भवार्णवे ॥ ५९ ॥ एतस्मिन्नंतरे कश्चिदाजगाम हरेः पुरः ॥ द्वारपालः शीघ्रगामीत्युवाच नतकन्धरः ॥ ६० ॥ द्वारपाल उवाच ॥ अन्यब्रह्माण्डाधिपतिर्ब्रह्मा दशमुखः स्वयम् ॥ द्वारे तिष्ठन्महाभक्तस्त्वां द्रष्टुं स्वयमागतः ॥ ६१ ॥ द्वारपालवचः श्रुत्वा स चैवानुमतिं ददौ ॥ द्वारपालाज्ञया ब्रह्मा तुष्टावागत्य भक्तितः ॥ ६२॥ स्तोत्रैरतिविचित्रैश्च चतुर्वक्त्राऽश्रुतैरहो ॥ स्तुत्वोवासाज्ञया विष्णोः कृत्वा पश्चाच्चतुर्मुखम् ॥ ६३ ॥ नारायणो द्वारपालानित्युवाच चतुर्भुजान् ॥ आगन्तुकं जनमपि प्रवेशयत सादरम् ॥ ६४ ॥ एतस्मिन्नन्तरे तत्र वृन्दावनविनोदिनि ॥ आजगामातिप्रणतो ब्रह्मा शतमुखः स्वयम् ॥ ॥ ६५ ॥ दिव्यैः स्तोत्रैश्च तुष्टाव निगूढमतिसुन्दरैः ॥ स्तुत्वोवास वरैः स्तोत्रैः सर्वेषामश्रुतैरहो ॥ ६६ ॥ तदनन्तरयोरग्रे भक्त्या शतमुखः स्वयम् ॥ जगद्विधौ सभायां च तत्र तिष्ठति तत्क्षणे ॥ ६७ ॥ आजगामान्यब्रह्माण्डाधिपो ब्रह्मा हरेः पुरः ॥ सहस्रवदनः श्रीमान्भक्त्या नम्रात्मकन्धरः ॥ ६८ ॥ स्तुत्वोवास वरैः स्तोत्रैः सर्वेषामश्रुतैरहो ॥ तं च पप्रच्छ सर्वेषां ब्रह्माण्डानां च ब्रह्मणाम् ॥ ॥ ६९ ॥ वार्तां विषयिणां चैव सुराणां च क्रमेण च॥ चतुर्मुखस्य तान्दृष्ट्वा दर्पभङ्गो बभूव ह ॥ ७० ॥ आत्मानं विष्णुसदृशं मन्यमानस्य दर्पतः ॥ अन्यान्न दर्शयामास ब्रह्माण्डस्थान्विधीन्हरिः ॥ ७१ ॥ दृष्ट्वा च कृपया तत्र मृततुल्यं चतुर्मुखम्॥ यावन्ति गात्रलो

मानि सन्ति नारायणस्य मे॥७२॥ तत्प्रमाणाश्च ब्रह्माण्डा ब्रह्माणः सन्ति सन्ततम्॥नारायणं प्रणम्याशु जग्मुस्ते स्वालयं प्रति॥७३॥
स मेने विधिरात्मानमत्यल्पविषयाधिपम् ॥ पप्रच्छ प्रणतं विष्णुर्लज्जानम्रचतुर्मुखम् ॥ ७४ ॥ वद तत्किमिदं दृष्टं स्वप्नवद्ध
वताऽधुना ॥ नारायणवचः श्रुत्वा विधिरित्युक्तवांस्तदा ॥७५॥ भूतं भव्यं भविष्यं च तव मायासमुद्भवम् ॥ इत्येवमुक्त्वा स विधिस्त
स्थौ संसदि लज्जया ॥ सर्वान्तर्यामी भगवांस्तस्योपायं विनिर्ममे ॥ ७६ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे
नारायणनारदसंवादे मोहिनीशापब्रह्मदर्पभंगो नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ❀ ॥ श्रीकृष्ण उवाच ॥ ॥ एतस्मिन्नन्तरे तत्र
शंकरः समुपस्थितः ॥ सस्मितो वृषभेन्द्रस्थो विभूतिभूषणः स्वयम् ॥ १ ॥ व्याघ्रचर्माम्बरधरो नागयज्ञोपवीतकः ॥ स्वर्णाकारज
टाधारमर्धचन्द्रं च सन्दधत् ॥ २ ॥ त्रिशूलपट्टिशकरो बिभ्रत्खट्वाङ्गमुत्तमम् ॥ सद्रत्नसाररचितस्वरयन्त्रकरो मुदा ॥ ३ ॥ वाहनादव
रुह्याशु भक्तिनम्रात्मकन्धरः ॥ प्रणम्य कमलाकान्तं वामे चोवास भक्तितः॥४॥ आजग्मुर्मुनयः सर्वे सुराः शक्रादयस्तथा॥आदित्या
वसवो रुद्रा मनवः सिद्धचारणाः ॥ ५ ॥ पुलकाञ्चितसर्वाङ्गास्तुष्टुवुः पुरुषोत्तमम् ॥ प्रणम्य तं शिवं सर्वे सुराश्च नम्रकन्धराः॥ ६ ॥
एतस्मिन्नन्तरे तत्र संगीतं शंकरो जगौ ॥ कृत्वाऽतीव सुतालं च स्वरयन्त्रसमन्वितः ॥ ७ ॥ आवयोश्च गुणाख्यानं राससंबन्धि सुन्द
रम् ॥ समयोचितरागेण मनोमोहनकारिणा ॥ ८॥ यत्र कण्ठैकमानेन चैकतानेन चारुणा ॥ पदभेदविरामेण गुरुणा लघुना क्रमात्॥
॥ ९ ॥ गमकेनातिदीर्घेण मदेन मधुरेण च ॥ भवेऽतिदुर्लभं सृष्टं प्रीत्या स्वेन विनिर्मितम् ॥ १० ॥ पुलकाञ्चितसर्वाङ्गः साश्रुनेत्रः
पुनःपुनः ॥ तदेव श्रुतिमात्रेण मूर्च्छां प्रापुर्विचेतनाः ॥ ११ ॥ बभूवू रुद्ररूपाश्च मुनयः पुरतः प्रिये ॥ रुद्ररूपाः सुराः सर्वे विधातृह
रिपार्षदाः ॥ १२ ॥ नारायणश्च लक्ष्मीश्च गायकश्च शिवः स्वयम् ॥ जलपूर्णं च वैकुण्ठं दृष्ट्वा त्रस्तोऽहमीश्वरि ॥ १३ ॥ गत्वा मूर्तीर्वि
निर्माय सर्वाश्च तादृशीरिति ॥ तत्स्वरूपास्तदस्त्राश्च तत्स्ववाहनभूषणाः ॥ १४ ॥ तत्स्वभावास्तन्मनस्कास्तत्तद्विषयमानसाः ॥
स्थानं निर्माय परितो वैकुण्ठस्य चतुर्दिशि ॥ १५ ॥ तदधिष्ठातृदेवी च आजगाम स्वमालयम् ॥ शरीरजा सुराणां सा बभूव सुर

निम्नगा ॥ १६ ॥ मुक्तिदा च मुमुक्षूणां भक्तानां हरिभक्तिदा ॥ कोटिजन्मार्जितं पापं विविधं पापिनामहो ॥ १७ ॥ यस्याश्च स्पर्शवायोश्च संपर्केण विनश्यति ॥ किं वा न जाने प्राणेशि स्पर्शदर्शनयोः फलम् ॥ १८ ॥ किमुत स्नानजन्यं च कथयामि निरूपणम् ॥ सर्वतीर्थात्परं पृथ्व्यां पुष्करं परिकीर्तितम् ॥ १९ ॥ वेदोक्तं च तदेवास्याः कलां नार्हति षोडशीम् ॥ भगीरथेन चानीता तेन भागीरथी स्मृता ॥ २० ॥ गामागता स्रोतसोंऽशाद्गङ्गा तेन प्रकीर्तिता ॥ जानुद्वारा पुरा दत्ता जह्नुनाऽऽपीय कोपतः ॥ २१ ॥ तस्य कन्यास्वरूपा सा जाह्नवी तेन कीर्तिता ॥ भीष्मः स्वयं वसुर्जातस्तस्यांशात्तेन भीष्मसूः ॥ २२ ॥ धाराभिस्तिसृभिः स्वर्गं पृथिवीमतलं तथा ॥ ममाज्ञया च गच्छन्ती तेन त्रिपथगामिनी ॥ २३ ॥ प्रधानधारया स्वर्गे सा च मन्दाकिनी स्मृता ॥ योजनायुतविस्तीर्णा प्रस्थे च योजना स्मृता ॥ २४ ॥ क्षीरतुल्यजला शश्वदत्युत्तुङ्गतरङ्गिणी ॥ वैकुण्ठाद्ब्रह्मलोकं च ततः स्वर्गं समागता ॥ २५ ॥ स्वर्गाद्धिमाद्रिमार्गेण पृथिवीमागता मुदा ॥ सा धाराऽलकनंदाख्या लवणोदेन मिश्रिता ॥ ॥ २६ ॥ शुद्धस्फटिकसंकाशा बहुवेगवती सती ॥ पापिनां पापशुष्केन्धं दग्धुं पावकरूपिणी ॥ २७ ॥ अहो सगरवंशेभ्यो निर्वाणमुक्तिदायिनी ॥ वैकुण्ठगामिगी सा च सोपानरूपिणी वरा ॥ २८ ॥ अतोऽपि मृत्युसमये सतां पुण्यस्वरूपिणाम् ॥ आदौ पादौ च संन्यस्य मुखे तोयं प्रदीयते ॥ २९ ॥ गङ्गासोपानमारुह्य सन्तो यान्ति निरामयम् ॥ आब्रह्मलोकं संलंघ्य रथस्थाश्च निरापदः ॥ ॥ ३० ॥ दैवात्पुरा प्राक्तनेन मग्नं चेत्कृतपातकैः ॥ लोमप्रमाणवर्षं च मोदन्ते हरिमन्दिरे ॥ ३१ ॥ ततो भोगो भवेत्तेषां निश्चितं पापपुण्ययोः ॥ अतिस्वल्पेन कालेन कालव्यूहं च बिभ्रताम् ॥ ३२ ॥ ततः पुण्यवतां गेहे लब्ध्वा जन्म च भारते ॥ संप्राप्य निश्चलां भक्तिं भवन्ति हरिरूपिणः ॥ ३३ ॥ मृतद्विजानां देहांश्च दैवाच्छूद्रा वहन्ति चेत् ॥ पदप्रमाणवर्षं च तेषां च नरके स्थितिः ॥ ३४॥ ततस्तेषां च साहाय्यं करोति हरिरूपिणी॥ददाति मुक्तिं तेभ्योऽपि क्रमेण च कृपामयी॥३५॥जन्म पुण्यवतां गेहे कारयित्वा च भारते॥ स्थलं ददाति वैकुण्ठे निश्चितं जन्मभिस्त्रिभिः ॥ ३६ ॥ यात्रां कृत्वा तु यः शुद्धौ स्नातुं याति सुरेश्वरीम् ॥ पदप्रमाणवर्षं च वैकुण्ठे

मोदते ध्रुवम् ॥ ३७ ॥ गङ्गां प्राप्यानुषङ्गेण स्नाति चेत्समलो नरः ॥ मुच्यते सर्वपापेभ्यः पुनर्यदि न लिप्यते ॥ ३८ ॥ कलौ पञ्च
सहस्राब्दं स्थितिस्तस्याश्च भारते ॥ तस्यां च विद्यमानायां कः प्रभावः कलेरहो ॥ ३९ ॥ कलौ दशसहस्राणि वर्षाणि प्रतिमा मम॥
तिष्ठन्ति च पुराणानि प्रभावस्तत्र कः कलेः ॥ ४० ॥ अतलं याति या धारा सा च भोगवती स्मृता ॥ पयःफेननिभा शश्वदतिवेग
वती सदा ॥ ४१ ॥ आकरामूल्यरत्नानां मणीन्द्राणां च संततम् ॥ नागकन्याश्च यत्तीरे क्रीडन्ति स्थिरयौवनाः ॥ ४२ ॥ स्वयं देवी च
वैकुण्ठं वेष्टयित्वा च संततम् ॥ सहस्रयोजना प्रस्थे दैर्घ्ये च लक्षयोजना ॥ ४३ ॥ अस्या विनाशः प्रलये नास्त्येव दुहितुर्मम ॥
नानारत्नाकरं दिव्यं तत्तीरं सुमनोहरम् ॥ ४४ ॥ इत्येवं कथितं सर्वं जाह्नवीजन्म पुण्यदम् ॥ ब्रह्मणश्च प्रतीकारो मोहिनीशापता
शृणु ॥ ४५ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे जाह्नवीजन्मप्रस्तावो नाम चतुस्त्रिंशोऽध्यायः॥
॥ ३४ ॥ छ ॥ श्रीकृष्ण उवाच ॥ नारायणश्चब्रह्माणमुवाच कृपया पुनः ॥ दृष्ट्वा गङ्गां च सर्वे तां मम मायां च मेनिरे ॥ १ ॥
॥ ॥ श्रीनारायण उवाच ॥ उत्तिष्ठ गच्छ भद्रं ते भविष्यति चतुर्मुख ॥ अत्र स्नात्वाऽभिशप्तस्त्वं पूतो भव ममाज्ञया॥२॥ त्वं चेत्स
त्यं स्वयं पूतः स्पर्शं वाञ्छन्ति तानि ते ॥ वैष्णवेशस्य तीर्थानि सर्वाणि सततं मुने ॥३॥ तथापि शापमुक्तस्त्वमत्र प्रकृतिहेलनात् ॥
अहंकारश्च सर्वेषां पापबीजममङ्गलम् ॥ ४ ॥ शीघ्रं त्वं गच्छ गोलोकं ममालयं परात्परम् ॥ प्रकृत्यंशां मङ्गलदां तत्र प्राप्स्यसि भार
तीम् ॥ ५ ॥ प्रकृतिं भज कल्याण सृष्टिबीजस्वरूपिणीम् ॥ अहो कल्पान्तपर्यन्तं तपस्तप्तं त्वयाऽधुना ॥६॥ तव मन्त्रं न गृह्णन्ति केऽपि
वेश्याऽभिशापतः ॥ यदन्यदेवपूजायां तव पूजा भविष्यति ॥ ७ ॥ त्वमेव जगतां धाता स्वात्मारामश्च योषितः ॥ सर्वरूपी च पूजः
च सर्वदेहेषु सर्वतः ॥ ८ ॥ तदा ममाज्ञया ब्रह्मा स्नात्वा च जाह्नवीजले ॥ शीघ्रं जगाम गोलोकं मां प्रणम्य जगद्गुरुः ॥ ९ ॥ ते
देवा मुनयः सर्वे प्रजग्मुः स्वालयं मुदा ॥ सुनिर्मलं मम यशो गायन्तश्च पुनःपुनः ॥ १० ॥ विधिरागत्य गोलोकं संप्राप्य भारतीं
सतीम् ॥ सर्वविद्याधिदेवीं तां मद्वक्त्राब्जविनिर्मिताम् ॥११ ॥ वागीश्वरीं च संप्राप्य ब्रह्मा प्रमुदितः स्वयम् ॥ कामास्त्राणां च व्या

पारमनुमेने स्वयं विभुः॥१२॥तत आगत्य मां नत्वा प्राप्य त्रैलोक्यमोहिनीम् ॥ क्रीडां चकार भगवान्स्थानेस्थानेऽतिनिर्जने॥१३॥
रतिं चिरतरं कृत्वा विरराम स्वयं विधिः ॥ वागीश्वरीमुवाचेदं त्वं वै ब्रह्मा च कर्मणा ॥ १४ ॥ काचित्स्वकर्मणा साध्वी पूज्या च
स्थिरयौवना ॥ तवैव कर्मयोगं च युवानं पश्य सुन्दरि ॥ १५ ॥ विदग्धाया विदग्धेन संगमो गुणवान्भवेत् ॥ जरातुरोऽहं वृद्धश्च
तपस्वी वैष्णवो द्विजः ॥ १६ ॥ अस्वतन्त्रः पराधीनः का रतिः पुंश्चलीषु मे ॥ आजगाम ब्रह्मलोकं पुनरेव निजालयम् ॥ १७ ॥
ददृशुर्ब्रह्मलोकस्थास्तां देवीं कौतुकान्विताः ॥ अतीव सुन्दरीं रम्यां शुभ्रवर्णां च सस्मिताम् ॥ १८॥ शरच्छीतांशुवदनां शरत्पङ्कज
लोचनाम् ॥ पक्वबिम्बप्रभामुष्टदीप्तौष्ठाधरपल्लवाम् ॥१९॥ मुक्तापङ्क्तिविनिन्द्यैकदन्तपङ्क्तिमनोहराम्॥ रत्नकेयूरवलयरत्ननूपुरशोभि
ताम् ॥ २० ॥ रत्नकुण्डलयुग्मेन कर्णमूलविराजिताम् ॥ रत्नेन्द्रसारहारेण वक्षःस्थलसमुज्ज्वलाम् ॥ २१ ॥ वह्निशुद्धांशुकं सूक्ष्मं
बिभ्रतीं नवयौवनाम् ॥ अतीव कमनीयां च पीनश्रोणिपयोधराम् ॥ २२ ॥ वीणापुस्तकहस्तां च व्याख्यामुद्राकरां वराम् ॥
ते च निर्मञ्छनं कृत्वा चक्रुः परममङ्गलम् ॥ २३ ॥ पुरीं प्रवेशयामासुर्ब्रह्माणं भारतीं मुदा ॥ ब्रह्मा तया सह क्रीडां चकार
स दिवानिशम् ॥ २४ ॥ अतीव सुखसंभोगे निमग्नः सततं मुदा ॥ गूढं सर्वपुराणेषु किं पुनः श्रोतुमिच्छसि ॥ २५ ॥
॥ श्रीनारायण उवाच ॥ प्राणेशवचनं श्रुत्वा प्रहस्य परमेश्वरी ॥ भूयोऽपि परिपप्रच्छ कौतुकान्मानसं पुरा ॥ २६ ॥
श्रीराधिकोवाच ॥ ब्रह्मा कथं न जग्राह वेश्यां स्वयमुपस्थिताम् ॥ न कर्मक्षेत्रे रहसि फलदाता च कर्मणाम् ॥ २७ ॥
उपस्थितायास्त्यागे च महान्दोषो हि योषितः ॥ ज्ञात्वा देवो विधाता स कथं तत्याज मोहिनीम् ॥ २८ ॥ श्रीनारायण
उवाच ॥ राधिकावचनं श्रुत्वा प्रहस्य मधुसूदनः ॥ पाद्मकल्पस्य वृत्तान्तमुवाच परमेश्वरीम् ॥ २९ ॥ श्रीकृष्ण
उवाच ॥ शृणु कान्ते प्रवक्ष्यामि पुरावृत्तान्तमीप्सितम् ॥ अकथ्यं गोपनीयं च महतामभिनिन्दितम् ॥ ३० ॥ एकदा च प्रजाः
स्रष्टुं विधाता प्रेरितो मया ॥ ससर्ज मनसा पुत्राञ्ज्वलतो ब्रह्मतेजसा ॥ ३१ ॥ सनकं च सनन्दं च सनातनमनुत्तमम् ॥ सनत्कु

मारं वोढुं च कविं पञ्चशिखं विभुम् ॥ ३२ ॥ असितं कपिलं सिद्धं सिद्धान्मम कुलोद्भवान्॥तान्नग्नान्पञ्चवर्षीयान्पिता स्रष्टुं जगाद
ह॥ ३३ ॥ प्रजाः स्रष्टुं प्रेरकं च जनकं तेऽवमन्य च ॥ प्रजग्मुस्तपसे तूर्णं ममार्चनपरायणाः ॥ ३४ ॥ तदा रुष्टो जगद्धाता पुनः
पुत्रान्विनिर्ममे ॥ रुद्रानेकादश वरात्रुदतो भीमविग्रहान् ॥ ३५ ॥ तस्मिन्प्रयुज्य तरसा पुनः पुत्रान्विनिर्ममे ॥ योगी योगेन
मां ध्यात्वा स्वात्मारामः स्वविग्रहे ॥ ३६ ॥ वसिष्ठं पुलहं चैव क्रतुमङ्गिरसं तथा ॥ भृगुमत्रिं पुलस्त्यं च दक्षं कर्दममेव च ॥ ३७ ॥
मरीचिं च विनिर्माय प्रजाः स्रष्टुं नियुज्य च ॥ प्रहृष्टमानसः पुत्रं कन्यैकां च ससर्ज ह ॥ ३८ ॥ कृष्णस्य कामिनः पुत्रः काम
देवो बभूव ह ॥ कन्या षोडशवर्षीया रत्नभूषणभूषिता ॥ ३९ ॥ उवाच पुत्रं स विधिः सुदीप्तं पुरतः स्थितम् ॥ दुर्निवार्यं मत्क
लांशं स्वात्मारामं मनोहरम् ॥ ४० ॥ ब्रह्मोवाच ॥ स्त्रीपुंसोः क्रीडनार्थाय मुदा त्वं च विनिर्मितः ॥ हृष्टियोगेन सर्वे
षामधिष्ठानं करिष्यसि ॥ ४१ ॥ संमोहनं समुद्वेगं बीजस्तंभितकारणम् ॥ उन्मत्तबीजं ज्वलदं शश्वच्चेतनहारकम् ॥ ४२ ॥ प्रगृ
ह्यैतान्मया दत्तान्सर्वान्संमोहनं कुरु ॥ दुर्निवार्यौ मम वराद्भव वत्स भवेषु च ॥ ४३ ॥ बाणान्दत्त्वैवमुक्त्वा च प्रहृष्टश्च जग
द्विधिः ॥ हृष्टोवाच दुहितरं वरं दातुं समुद्यतः ॥ ४४॥ एतस्मिन्नन्तरे कामो मनसाऽऽलोच्य मन्त्रणाम् ॥ कर्तुं शस्त्रपरीक्षां च बाणां
श्चिक्षेप ब्रह्मणि ॥ ४५ ॥ मन्त्रपूतैश्च बाणैश्च दुर्वार्यैः स्मरणेन च ॥अतिविद्धो महायोगी मूर्च्छितो हतचेतनः॥ ४६ ॥ क्षणेन चेतनां
प्राप्य ददर्शाग्रे च कन्यकाम् ॥ तां संभोक्तुं मनश्चक्रे सा दुद्राव भिया सती ॥ ४७ ॥ दृष्ट्वा पश्चाच्च पितरं धावन्तं हतचेतनम् ॥
जगाम शरणं शीघ्रं भ्रातृणां च तपस्विनाम् ॥ ४८ ॥ ते तां समीपे संस्थाप्य तमूचुः पितरं क्रुधा ॥ हितं तथ्यं च वेदोक्तं नीतिसारं
परं वचः ॥ ४९ ॥ ऋषय ऊचुः ॥ अहो किमेतज्जनक कर्म तेऽतिविगर्हितम् ॥ नीचानां चरितं यत्तत्करोषि त्वं
जगद्विधे ॥ ५० ॥ पश्यन्ति सततं सन्तः प्रसूमिव परस्त्रियम् ॥ ये ते सर्वत्र पूज्याश्च परत्रेह जितेन्द्रियाः ॥ ५१ ॥ त्वं स्वयं वेदकर्ता
च कन्यां संभोक्तुमिच्छसि ॥ कन्या च मातृवर्गेषु प्रविष्टा च श्रुतौ श्रुता ॥ ५२ ॥ गुरोः पत्नी राजपत्नी विप्रपत्नी च या

सती ॥ पत्नी च भ्रातृसुतयोर्मित्रपत्नी च तत्प्रसूः ॥ ५३ ॥ प्रसूः पित्रोस्तथा भ्रातुः पत्नी श्वश्रूः स्वकन्यकाः ॥ जननी तत्सपत्नी
च भगिनी सुरभी तथा ॥ ५४ ॥ स्वाभीष्टसुरपत्नी च धात्रिकाऽन्नप्रदायिका ॥ गर्भधात्री स्वनाम्ना च भयात्त्रातुश्च कामिनी
॥ ५५ ॥ एता वेदप्रणीताश्च सर्वेषां मातरः स्मृताः॥ एतास्वपि च सर्वासु न्यूनता नास्ति कासु च ॥५६॥ कन्यादाताऽन्नदाता च
ज्ञानदाताऽभयप्रदः ॥ जन्मदो मन्त्रदो ज्येष्ठभ्राता च पितरः स्मृताः ॥५७ ॥एता वहन्ति ये मूढा य एताञ्जनकानपि ॥ पच्य
न्ते नरके ते च यावद्वै ब्रह्मणो वयः ॥ ५८ ॥ तानन्धकूपे संस्थाप्य दूरतो यमकिङ्कराः॥ कुर्वन्ति ताडनं शश्वत्पुरीषं पाययन्ति च
॥ ५९ ॥ त्वमेव विश्वकर्ता च शास्ता वै शमनस्य च ॥ वयं विधाता जगतां तेन गृह्णासि कन्यकाम् ॥ ६० ॥ अस्माकं पुरतो
दूरं गच्छ कामार्तमानस॥ न कुर्मो भस्मसात्कर्तुं शक्ताश्च जनकं वयम् ॥६१॥ गुरोर्दोषसहस्राणि क्षन्तुमर्हन्ति पण्डिताः ॥ सर्वघ्नं तं
विनिघ्नन्ति नीतिज्ञाः स्वगुरुं विना ॥६२॥ गृह्णन्ति यदि सर्वस्वं शपन्तं निष्ठुरं गुरुम् ॥साधवस्तं न निन्दन्ति प्रणमन्ति स्वभक्तितः
॥६३॥ ये द्विषन्ति च निन्दन्ति गुरुमिष्टं सुरात्परम् ॥ पच्यन्ते तेऽन्धकूपे च यावच्चन्द्रदिवाकरौ॥६४॥पुरीषं भुञ्जते नित्यं क्षुभिता
यमताडनैः ॥ सर्पप्रमाणकीटैश्च दंशिताश्च दिवानिशम् ॥ ६५ ॥ इत्येवमुक्त्वा मुनयः प्रणेमुस्तत्पदाम्बुजम् ॥ सर्वं भवति दैवेन प्रशा
न्तमनसा ध्रुवम् ॥ ६६ ॥ उन्मुखा मुनयः सर्वे बभूवुश्च स्वकर्मणि ॥ ब्रह्मा शरीरं संत्यक्तुं व्रीडया च समुद्यतः ॥६७॥ योगेन भित्त्वा
षट्चक्रं सर्वान्प्राणान्निरुद्ध्य च॥ब्रह्मरन्ध्रं समानीय तत्याज स्वेन वर्त्मना ॥६८॥मनसा श्रीहरिं स्मृत्वा नमस्कारं चकार ह ॥ न मे
मनः परद्रव्ये भविता स्तोकमीश्वर ॥६९॥ प्राणत्यागात्परं दुःखमयशश्च यशस्विनाम् ॥ बभूव हृदि कृत्वैकं ब्रह्मा लीनश्च ब्रह्मणि॥
॥ ७० ॥ कन्या तातं मृतं दृष्ट्वा विलप्य च भृशं मुहुः॥योगेन देहं तत्याज सा प्रलीना च ब्रह्मणि॥७१॥ मृतं तातं च भगिनीं दृष्ट्वा च
मुनिपुंगवाः ॥ सस्मरुः श्रीहरिं कोपात्स्वात्मारामं विलप्य च ॥७२॥नारायणो मदंशश्च कृपयाऽऽगत्य सत्वरम् ॥ ब्रह्माणं जीवयामास
ब्रह्मज्ञानात्सुतां च ताम् ॥७३॥ ब्रह्मा पुरो हरिं दृष्ट्वा वरं वव्रे स्म वाञ्छितम् ॥ भक्तिं त्वच्चरणे शश्वन्निश्चलामनपायिनीम् ॥७४॥ ब्रह्माणं

विरसं दृष्ट्वा तमुवाच कृपानिधिः ॥ प्रबोधवचनं सत्यं नीतिसारं मनोहरम् ॥ ७५ ॥ श्रीनारायण उवाच ॥ शृणु ब्रह्म
न्प्रवक्ष्येऽहं सुखमुत्तोल्य सांप्रतम् ॥ त्यज लज्जां जगन्नाथ हृदयज्वररूपिणीम् ॥ ७६ ॥ सत्कीर्तिरपकीर्तिर्वा सुप्रतिष्ठाप्युपद्रवः ॥
क्षुद्राणां चैव महतां भवत्येव स्वकर्मणा ॥७७॥ सर्वेषामपि सर्वेभ्यः स्वकर्म बलवत्तरम् ॥ तस्मात्सन्तः प्रकुर्वन्ति नित्यं सत्कर्म संततम्
॥ ७८ ॥ केचित्कुर्वन्ति निर्मूलं सर्वेषामपि कर्मणाम् ॥ कृतं कर्म परं भुक्त्वा हरिपादाब्जचेतसः ॥ ७९ ॥ कुकर्मणश्चापकीर्तिस्ततो
लज्जा भवेद्ध्रुवम् ॥ सुकर्मणः सुप्रतिष्ठा सर्वत्र निर्मलं यशः ॥ ८० ॥ कालेन रजसा देहो बलं रूपं शुभाशुभम् ॥ कीर्तिर्या त्रिगुणा
चैव मोहश्चापयशो विधे ॥ ८१ ॥ ऋणव्रणापवादाश्च जन्तूनां यान्ति कालतः ॥ महतां तौ च पूर्वोक्तौ नेतरश्च कदाचन ॥ ८२ ॥
सदाऽपकीर्तिर्वसति परस्त्रीषु च वस्तुषु॥ तस्मात्ते नैव गृह्णन्ति सन्तः स्वक्लेशकारणे ॥ ८३ ॥ स्मर मामन्तरे ब्रह्मन् मदीयं विषयं कुरु॥
अतस्ते न मनो लोलं भविता परवस्तुषु ॥ ८४ ॥ योषिद्रूपा च मे माया सर्वेषां मोहकारिणी ॥ लीलया कुरुते मोहं स्वात्मारामस्य
संततम् ॥ ८५ ॥ नानामुद्राश्रये देशे रागिणां संततं रतिः॥ स्तनाभिधे मांसपिण्डेऽधरे लालालयेऽशुचौ ॥८६॥ श्रोणिवक्रस्तनं तासां
कामदेवालयं सदा ॥तस्मात्ते न हि पश्यन्ति सन्तो हि धर्मभीरवः ॥८७॥ को धर्मः किं यशस्तेषां का प्रतिष्ठा च किं तपः॥किंबुद्धि
र्विद्या दानं च परस्त्रीषु च यन्मनः ॥ ८८ ॥ इहाप्यपयशो दुःखं नरकेषु परत्र च ॥ वासः प्रहारस्तेषां च ताडनैः कृमिभक्षणैः
॥ ८९ ॥ दुःखबीजं सुखं मत्वा मूढाश्च दैवदोषतः ॥ परस्त्रीसेवनं प्रीत्या कुर्वन्ति संततं मुदा ॥ ९० ॥ उत्तमा मत्पदाम्भोजं सत्कर्म
मध्यमाः सदा ॥ स्मरन्ति शश्वदधमाः परस्त्रीसेवनं मुदा ॥ ९१ ॥ विपत्तिः संततं तस्य परवस्तुषु यन्मनः ॥ विशेषतः परस्त्रीषु
सुवर्णेषु च भूमिषु ॥ ९२ ॥ दैवात्परस्त्रियं दृष्ट्वा विरमेद्यो हरिं स्मरन् ॥ दृष्ट्वा परसुवर्णं च हस्तप्रक्षालनाच्छुचिः ॥ ९३ ॥ संततं नैव
संसक्ताः सन्तः स्वस्त्रीषु कामतः ॥ यक्ष्मव्याधिज्ञानहानिलोकनिन्दाभयेन च ॥९४॥ तपस्विनस्तपस्यायां शास्त्रचिन्तासु पण्डिताः॥
योगिनो योगचिन्तासु वेदार्थेषु च वैदिकाः ॥९५॥ साध्व्यश्च पतिसेवासु गृहस्था गृहकर्मसु ॥ विषयेषु विषयिणो मद्भक्ता मम सेवने

॥ ९६ ॥ एते नियुक्ता एतेषु सभासु च प्रशंसिताः॥ वेदोक्ताचरणेनैव तद्विरुद्धेन निन्दिताः ॥९७॥ सर्वे नित्यं प्रशंसन्ति शश्वत्सन्मार्गगामिनम् ॥ हालिका अपि निन्दन्ति कुवर्त्मगामिनं विधे ॥९८॥ भविता न परस्त्रीषु परवस्तुषु ते मनः ॥ अद्यप्रभृति जीवन्तं निविष्टं मद्वरेण च ॥ ९९ ॥ मदीयविषये बाह्ये मया दत्तं कुरु प्रियम् ॥ अन्तरा मत्पदाम्भोजचिन्तां विघ्नविनाशिनीम् ॥ १०० ॥ कन्या भवतु मे ब्रह्मन्कामदेवस्य कामिनी ॥ रतिर्नाम परित्याज्या रत्यधिष्ठातृदेवता ॥१०१॥ इत्येवमुक्त्वा ब्रह्माणमाश्वास्य कमलापतिः ॥ जगाम नित्यं वैकुण्ठं वृन्दावनविनोदनः ॥ १०२ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे राधाकृष्णसंवादो नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

॥ श्रीराधिकोवाच ॥ ॥ एतेन नियमेनैव ब्रह्मा तत्याज मोहिनीम् ॥ कथं स कुलटाशापादपूज्यः संबभूव ह ॥ १ ॥ कथं तस्य दर्पभङ्गं चकार कमलापतिः ॥ कथयस्व सर्वबीजं सर्वेषामीश्वरः स्वयम् ॥२॥ ॥ ॥ श्रीनारायण उवाच ॥ ॥ रासेश्वरीवचः श्रुत्वा प्रहस्य रसिकेश्वरः ॥ निगूढमितिहासं च तां वक्तुमुपचक्रमे ॥ ३ ॥ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ ब्रह्मा चिरं तपस्तप्त्वा मत्तो लब्ध्वा वरं वरम् ॥ सृष्टिं नानाविधां कृत्वा विधाता स बभूव ह ॥ ४ ॥ तपसां फलदाता च सर्वेषां शास्तिकृत्प्रभुः ॥ आत्मानमीश्वरं ज्ञात्वा महागर्वो बभूव ह ॥५॥ ब्रह्माण्डेषु च सर्वेषु गर्वपर्यन्तमुन्नतिः ॥ इति मत्वा ब्रह्मणश्च दर्पभङ्गः कृतो मया ॥६॥ येषां येषां भवेद्दर्पो ब्रह्माण्डेषु परात्परः ॥ विज्ञाय सर्वं सर्वात्मा तेषां शास्ताऽहमेव च ॥ ७ ॥ प्रथमे ब्रह्मणो गर्वो मया चूर्णीकृतः श्रुतः ॥ शङ्करस्य च पार्वत्याश्चन्द्रस्य च रवेस्तथा॥८॥ वह्नेर्दुर्वाससश्चैव तथा धन्वन्तरेः प्रिये ॥ क्रमेण दर्पभङ्गं च कथयामि निशामय ॥ ९ ॥ क्षुद्राणां महतां चैव येषां गर्वो भवेत्प्रिये ॥ एवंविधमहं तेषां चूर्णीभूतं करोमि च ॥ १० ॥ ॥ श्रीनारायण उवाच ॥ ॥ श्रीकृष्णस्य वचः श्रुत्वा शुष्ककण्ठोष्ठतालुका ॥ पप्रच्छ राधा यत्नेन संत्रस्ता भयविह्वला ॥ ११ ॥ ॥ श्रीराधिकोवाच ॥ ॥ कस्य केन प्रभावेण महादर्पो बभूव ह ॥ त्वया केन प्रभावेण तस्य भङ्गः कृतः पुरा ॥ १२ ॥ कथयस्व प्राणनाथ सर्वेषां दर्पभञ्जन ॥ दर्पदो भयदः प्राणदानैककारणेश्वर ॥ १३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥

येन भूतं गर्वचूर्णं श्रुतं त्रिजगतां विधेः ॥ अन्येषां श्रूयतां राधे व्यासेन कथयामि ते ॥ १४॥ स्वयं शिवो मदंशश्च संहर्ता जगतां च
यः ॥ तेजसा मत्समः पूर्णो ज्ञानेन च गुणेन च ॥ १५॥ ध्यायन्ति योगिनो यं स योगीन्द्राणां गुरोर्गुरुः ज्ञानानन्दस्वरूपोऽयं तस्या
ख्यानं शृणु प्रिये॥१६॥युगषष्टिसहस्राणि तपस्तप्त्वा दिवानिशम् ॥ भूत्वा च मत्कलापूर्णो बभूव मत्समो विभुः॥१७॥ तपसा तेजसा
शश्वत्तेजोराशिर्बभूव ह ॥ सूर्यकोटिप्रभावश्च भक्तानां कल्पपादपः ॥१८॥ ध्यायंध्यायं च योगीन्द्रास्तत्तेजो बहुकालतः ॥ तदन्तरे च
पश्यन्ति स्वरूपमतिसुन्दरम्॥१९॥शुद्धस्फटिकसंकाशं पञ्चवक्त्रं त्रिलोचनम् ॥ त्रिशूलपट्टिशकरं व्याघ्रचर्माम्बरं वरम्॥२०॥जपन्तं
स्वात्मनाऽऽत्मानं श्वेताब्जबीजमालया ॥ ईषद्धास्यप्रसन्नास्यं चन्द्रचूडं परात्परम् ॥ २१ ॥ स्वर्णाकारं जटाभारं दधतं शिरसा
मुदा॥ शान्तं कान्तं त्रिजगतां भक्तानुग्रहकातरम्॥२२॥अथ स्वमीश्वरं मत्वा प्रदाता सर्वसंपदाम्॥ददाति सर्वं सर्वेभ्यो वाञ्छितं कल्प
पादपः॥२३॥ यो यं वाञ्छति तं तस्मै वरं दत्त्वा वरेश्वरः ॥ बभूव गर्वसंयुक्तः स्वात्मारामः स्वलीलया ॥२४॥ एकदा च वृको दैत्यस्त
पस्तेपे शिवस्य च ॥ केदारे च कठोरेण वर्षमेकं दिवानिशम् ॥ २५ ॥ नित्यं याति तत्समीपं कृपया च कृपानिधिः ॥वरं दातु
यथाऽभीष्टं न जग्राहासुरो वरम् ॥ २६ ॥ वर्षान्ते शङ्करः शश्वत्तस्थौ तत्पुरतः स्वयम् ॥ वरदो भक्तिपाशेन क्षणं गन्तुं न स क्षमः
॥ २७ ॥ सर्वैश्वर्यं सर्वसिद्धिं भुक्तिं मुक्तिं हरेः पदम् ॥ दैत्यः किंचिन्न गृह्णाति परितः शूलपाणिनः ॥ २८ ॥ ध्यायमानं तत्पदाब्जं
दृष्ट्वा त्रस्तो महेश्वरः ॥ अयाचितारं निश्चेष्टं रुरोद प्रेमविह्वलः ॥ २९ ॥ अतीव रोदनात्तस्य ध्यानभङ्गो बभूव ह ॥ ददर्श पुरतः
साक्षाद्दातारं सर्वसंपदाम् ॥ ३० ॥ यन्मायया वरं वव्रे दैत्येन्द्रो भक्तिपूर्वकम् ॥ हस्तं दधे च यन्मूर्ध्नि स भस्म भवितेति च ॥३१ ॥
ओमित्युक्त्वा प्रयान्तं तं दुद्राव दैत्यपुंगवः॥मृत्युञ्जयो मृत्युभयाद्दुद्राव त्रासविह्वलः ॥ ३२ ॥ पपात डमरुस्तस्य व्याघ्रचर्म मनो
हरम् ॥ दिगम्बरो दशदिशो भेजे दानवभीतये ॥ ३३ ॥ न हन्ति तं च कृपया भक्तं च भक्तवत्सलः ॥ दुष्टानुसारं साधुश्च न करोति
कदाचन ॥ ३४ ॥ साधवो घ्नन्ति घ्नन्तं च भृत्यं पुत्रं प्रियां विना ॥ प्रबोधितुं न शक्तश्च स्वात्मानं कृपया समम् ॥ ३५ ॥ शिवः स्वमृ

त्युं मत्वा च भीतश्च निरहङ्कृतः ॥ स्मारंस्मारं च मां भद्रे मामेव शरणं ययौ ॥ ३६ ॥ दृष्ट्वा स्वाश्रममायान्तं शुष्ककण्ठोष्ठतालु
कम् ॥ हे हरे रक्ष रक्षेति जपन्तं भयविह्वलम् ॥३७॥ संस्थाप्य तत्समीपे च स दैत्यो बोधितो मया ॥ पृष्टश्च सर्ववृत्तान्तमुवाच मां
क्रमेण च ॥ ३८ ॥ तदा ममाज्ञया तूर्णं वञ्चितो माययाऽसुरः ॥ दत्त्वा स्वमूर्ध्नि हस्तं च सद्यो भस्म बभूव ह ॥३९॥ तदा सिद्धाः
सुरेन्द्राश्च मुनीन्द्रा मनवो मुदा ॥ तुष्टुवुर्मां सुभक्त्या च लज्जया लज्जितः शिवः ॥४०॥ बभूव चूर्णस्तद्गर्वो जगाम बोधितो मया ॥
वरं ददाति वरदस्ततो बोध्यो ह्यहं शिवः ॥ ४१ ॥ अथ गर्वान्वितो रुद्रो हन्तुं त्रिपुरमुल्बणम् ॥ मत्वा मनसि संहर्ता सर्वेषां जगता
मिति ॥ ४२ ॥ कोऽयं पतङ्गवद्दैत्य इति मत्वा ययौ रणम् ॥ विहाय शूलं मद्दत्तं मदीयकवचं परम् ॥ ४३ ॥ चिरं बभूव समरं वर्ष
मेकं दिवानिशम् ॥ न कोऽपि जेतुं कं शक्तो द्वौ समौ समरे तदा ॥४४॥ पृथिव्यां चरणं कृत्वा दैत्येन्द्रो मायया प्रिये ॥ अत्यूर्ध्वं
च समुत्तस्थौ पञ्चाशत्कोटियोजनम् ॥ ४५ ॥ उत्तस्थौ शंकरस्तूर्णं हन्तुं दैत्यं जगत्प्रभुः ॥ बभूव तत्र युद्धं च मासमेकं निराश्रये ॥
॥ ४६ ॥ अस्त्राणि चापं चिच्छेद शङ्करस्यासुरो बली ॥ रथं बभञ्ज दैत्येन्द्रश्चापमस्त्राणि शङ्करात् ॥ ४७ ॥ जघान मुष्टिना रुद्रो
दानवेन्द्रं प्रकोपतः ॥ वज्रमुष्टिप्रहारेण सद्यो मूर्च्छामवाप सः ॥ ४८ ॥ क्षणेन चेतनां प्राप्य कोपाद्दानवपुंगवः ॥ शिवं शयानमु
त्तोल्य पातयामास भूतले ॥ ४९ ॥ सरथे पातिते रुद्रे देवा देवर्षयो भिया ॥ तुष्टुवुर्मां परित्राहि कृष्णेत्युक्त्वा पुनःपुनः ॥ ५० ॥
हरः सस्मार मामेव निर्भयो भयकारणम् ॥ तुष्टाव भक्त्या स्तोत्रेण मया दत्तेन संकटे ॥ ५१ ॥ तदाऽहं कलया शीघ्रं वृषरूपं विधा
य च ॥ शयानं शंकरं धृत्वा विषाणाभ्यामुरुक्रमम् ॥ ५२ ॥ ददौ तस्मै स्वकवचं स्वशूलमरिमर्दनम् ॥ प्राप्य तद्दानवस्थानमत्यूर्ध्वं
च निराश्रयम् ॥ ५३ ॥ मया दत्तेन शूलेन जघान त्रिपुरं हरः ॥ मामेव दर्पहन्तारं तुष्टाव व्रीडितः पुनः ॥ ५४ ॥ सद्यः पपात
दैत्येन्द्रश्चूर्णीभूतश्च भूतले ॥ देवता मुनयः सर्वें तुष्टुवुः शङ्करं मुदा ॥५५॥ तत्याज शङ्करो दर्पं विघ्नबीजं ततो विभुः ॥ ज्ञानान
न्दस्वरूपश्च निर्लिप्तः सर्वकर्मसु॥५६॥ततोऽहं वृषरूपेण वहामि तेन तं प्रियम् ॥ मम प्रियतमो नास्ति त्रैलोक्येषु शिवात्परः ॥५७॥

16

मनःस्वरूपो ब्रह्मा मे ज्ञानरूपो महेश्वरः ॥ बुद्धिर्भगवती दुर्गा मूलप्रकृतिरीश्वरी ॥ ५८ ॥ निद्रादयः शक्तयो यास्ताः सर्वाः प्रकृतेः
कलाः ॥ वागधिष्ठातृदेवी या सा स्वयं च सरस्वती ॥५९॥ मम कल्याणाधिदेवो हर्षरूपो गणेश्वरः ॥ परमार्थः स्वयं धर्मो मम भक्तो
हुताशनः ॥ ६० ॥ सर्वैश्वर्याधिदेवी मे सर्वगोलोकवासिनः ॥ प्राणाधिष्ठातृदेवी त्वं सदा प्राणाधिका मम ॥ ६१ ॥ गोपाङ्गनास्तव
कला अत एव मम प्रियाः ॥ मल्लोमकूपजा गोपाः सर्वे गोलोकवासिनः ॥ ६२ ॥ तेजःस्वरूपः सूर्यश्च प्राणा मे वायवः स्मृताः ॥
जलाधिदेवो वरुणः पृथिवी मे मलोद्भवा ॥ ६३ ॥ मम शून्यो महाकाशो मदनो मानसोद्भवः ॥ इन्द्रादयः सुराः सर्वे मत्कलांशांशसं
भवाः ॥ ६४ ॥ एतानि सृष्टिबीजानि महदादीनि चैव हि ॥ सर्वेषां बीजरूपोऽहं स्वयमात्मा निराश्रयः ॥ ६५ ॥ जीवो मे प्रतिबिम्बश्च
कर्मभोगाधिकारकः ॥ अहं साक्षी निरीहश्च न भोगी सर्वकर्मसु ॥ ६६ ॥ भक्तध्यानार्थदेहोऽयं मम स्वेच्छामयस्य च ॥ प्रकृतिः
पुरुषोऽहं च एक एव परात्परः ॥ ६७ ॥ इत्येवं कथितं राधे शिवदर्पविमोचनम् ॥ सृष्टिबीजं च शृणु मे पार्वतीदर्पमोचनम् ॥६८॥
श्रीनारायण उवाच ॥ इत्युक्तवन्तं श्रीकृष्णं परमात्मानमीश्वरम् ॥ पप्रच्छ राधिका देवी निगूढमभिवाञ्छितम् ॥ ६९ ॥ श्रीराधि
कोवाच ॥ भगवन्सर्वतत्त्वज्ञ सर्वबीज सनातन ॥ वद मे वाञ्छितं प्रश्नं सर्वसंदेहभञ्जनम् ॥ ७० ॥ सर्वज्ञानाधिदेवश्च शंकरः सर्वतत्त्व
वित् ॥ मृत्युंजयः कालकालो भगवांस्त्वत्समो महान् ॥७१॥ कथं विभूतिगात्रश्च पञ्चवक्त्रस्त्रिलोचनः ॥ दिगम्बरो जटाधारी नागसं
घातभूषणः ॥ ७२ ॥ वृषेणाटति देवेन्द्रो विहाय वरवाहनम् ॥ न बिभर्ति कथं रत्नसारनिर्माणभूषणम् ॥७३॥ वह्निशुद्धांशुकं त्यक्त्वा
धत्ते शार्दूलचर्मकम् ॥ धत्ते धत्तूरकुसुमं पारिजातं विहाय च ॥७४॥ नास्ति रत्नकिरीटेच्छा जटायां प्रीतिरुत्तमा ॥ दिव्यलोकं परि
त्यज्य श्मशानेषु स्पृहा विभोः ॥ ७५ ॥ चन्दनागुरुकस्तूरीसुगंधिकुसुमानि च ॥ त्यक्त्वा स्पृहा बिल्वपत्रे बिल्वकाष्ठानुलेपने ॥७६॥
एतद्वेदितुमिच्छामि व्यासेन कथय प्रभो ॥ श्रोतुं कौतूहलं नाथ वर्द्धते मे मनःस्पृहा ॥ ७७ ॥ राधिकावचनं श्रुत्वा प्रहस्य मधुसू
दनः ॥ कथां कथितुमारेभे कृत्वा राधां स्ववक्षसि ॥ ७८ ॥ श्रीकृष्ण उवाच ॥ युगषष्टिसहस्राणि तपः कृत्वा महेश्वरः ॥ विरराम

पूर्णतमो ध्यात्वा मां मनसा मुदा ॥७९॥ एतस्मिन्नन्तरे मां च ददर्श पुरतः स्थितम् ॥ अतीव कमनीयाङ्गं किशोरं श्यामसुन्दरम्॥
॥८०॥ अहोनिर्वचनीयं च दृष्ट्वा रूपमनुत्तमम् ॥ न बभूव वितृष्णश्च लोचनाभ्यां त्रिलोचनः ॥ ८१ ॥ पश्यन्निमेषरहित इति मत्वा
स्वमानसे ॥ भक्त्युद्रेकान्महाभक्तो रुरोद प्रेमविह्वलः ॥ ८२ ॥ सहस्रवदनोऽनन्तो भाग्यवांश्च चतुर्मुखः ॥ बहुभिर्लोचनैर्दृष्ट्वा तुष्टाव
बहुभिर्मुखैः ॥ ८३ ॥ पश्यामि किं वा किं स्तौमि संप्राप्य नाथमीदृशम् ॥ आस्यैकेन लोचनाभ्यां चतुर्द्धा स पुनःपुनः ॥ ८४ ॥ स्व
मानसे कुर्वतीदं शंकरे च तपस्विनि ॥ तद्बभूव चतुर्वक्त्रं पूर्वेण सह पञ्चमम् ॥ ८५ ॥ एकैकवक्त्रं शुशुभे लोचनैश्च त्रिभिस्त्रिभिः॥
बभूव तेन तन्नाम पञ्चवक्त्रस्त्रिलोचनः ॥ ८६ ॥ स्तवनादधिकप्रीतिः शिवस्य दर्शने मम ॥ तेनाधिकानि तस्यैवं बभूवुर्लोचनानि च॥
॥ ८७ ॥ चक्षूंषि गुणरूपाणि तस्य ब्रह्मस्वरूपिणः ॥ सत्त्वं रजस्तम इति तस्य हेतुं निशामय ॥ ८८ ॥ सत्त्वांशेन दृशा शंभुः
पश्यन्पाति च सात्त्विकान् ॥ राजसेन राजसिकांस्तामसेन च तामसान् ॥ ८९ ॥ चक्षुषस्तामसात्पश्चाल्ललाटस्थाद्धरस्य च ॥ संहार
काले संहर्तुरग्निराविर्भवेत्क्रुधा ॥ ९० ॥ कोटितालप्रमाणश्च सूर्यकोटिसमप्रभः ॥ लेलिहानो दीर्घशिखस्त्रैलोक्यं दग्धुमीश्वरः ॥९१॥
विभूतिगात्रः स विभुः सतीसंस्कारभस्मना ॥ धत्ते तस्या अस्थिमालां प्रेमभावेन भस्म च ॥ ९२ ॥ स्वात्मारामो यद्यपीशस्तथाऽपि
पूर्णमब्दकम् ॥ सतीशवं गृहीत्वा च भ्रामंभ्रामं रुरोद ह ॥ ९३ ॥ प्रत्यङ्गं चापि तस्याश्च पपात यत्र यत्र ह ॥ सिद्धपीठस्तत्र तत्र
बभूव मन्त्रसिद्धिकृत् ॥ ९४ ॥ तदा शवावशेषं च कृत्वा वक्षसि शंकरः ॥ पपात मूर्च्छितो भूत्वा सिद्धिक्षेत्रे च राधिके ॥९५॥ तदा
गत्वा महेशं तं कृत्वा क्रोडे प्रबोध्य च ॥ अददां दिव्यतत्त्वं च तस्मै शोकहरं परम्॥९६॥तदा शिवश्च संतुष्टः स्वं लोकं च जगाम
ह ॥ मूर्त्यन्तरेण कालेन तां संप्राप प्रियां सतीम् ॥ ९७ ॥ दिव्यस्रग्धारियोगेन नेच्छा नित्ये परे विभोः ॥ जटां तपस्याकालीनां
धत्तेऽद्यापि विवेकतः ॥९८॥ न चेच्छा केशसंस्कारे स्वाङ्गवेषेण योगिनः ॥ समता चन्दने पङ्के लोष्टे रत्ने मणीश्वरे॥९९॥गरुडद्वे
षिणो नागाः शंकरं शरणं ययुः ॥ बिभर्ति कृपया स्वाङ्गे तानेव शरणागतान्॥१००॥वाहनं वृषरूपोऽहमन्यस्तं वोढुमक्षमः ॥ त्रिपु

रस्य वधे पूर्वं मत्कलांशसमुद्भवः ॥१॥ पारिजातादिकं पुष्पं सुगन्धि चन्दनादिकम् ॥मयि संन्यस्य तेष्वेवं प्रीतिर्नास्ति कदाचन॥२॥ धत्तूरे तत्सदा प्रीतिर्बिल्वपत्रानुलेपने ॥ गन्धहीने सुगन्धे च योगीष्टे व्याघ्रचर्मणि ॥३॥ दिव्यलोके दिव्यतल्पे जनतायां न तन्मनः॥ श्मशानेऽतीव रहसि ध्यायते मामहर्निशम्॥४॥आब्रह्मस्तम्बपर्यन्तं समं च मन्यते शिवः॥ममानिर्वचनीयेऽत्र रूपे तन्मग्नमानसम्॥५॥ ब्रह्मणः पतनेनापि शूलपाणेः क्षणो भवेत् ॥ तस्यायुषः प्रमाणं च नाहं जानामि का श्रुतिः॥६॥ज्ञानं मृत्युंजयः शूलं धत्ते मत्तेजसा समम् ॥ विना मया न कश्चित्तं शंकरं जेतुमीश्वरः ॥ ७ ॥ शंकरः परमात्मा मे प्राणेभ्योऽपि परः शिवः॥ त्र्यम्बके मन्मनः शश्वन्न प्रियो मे भवात्परः ॥ ८ ॥ ब्रह्माण्डनिकरं छन्नं मया मन्मायया सदा ॥ स कम्पति हरं शश्वन्न च तं मोहितुं क्षमः ॥९॥न संवसामि गोलेके वैकुण्ठे तव वक्षसि ॥ सदा शिवस्य हृदये निबद्धः प्रेमपाशतः ॥११०॥ स्वरसिद्धं सुतानेन पञ्चवक्त्रेण शंकरः ॥ शश्वद्गायति मद्गाथां तेनाहं तत्समीपतः ॥११॥ स्रष्टुं शक्तो हि नष्टुं च भ्रूभङ्गलीलयाऽपि यः॥ ब्रह्माण्डनिकरं योगान्न योगी शंकरात्परः ॥१२॥ दिव्यज्ञानेन यः स्रष्टुं नष्टुं भ्रूभङ्गलीलया ॥ मृत्युं कालादिकं शक्तो न ज्ञानी शंकरात्परः ॥ १३॥ मम भक्तिं च दास्यं च मुक्तिं च सर्वसंपदः॥ सर्वसिद्धिं दातुमीशो न दाता शंकरात्परः ॥१४॥ पञ्चवक्त्रेण मन्नाम यो हि गायत्यहर्निशम् ॥ मद्रूपं ध्यायते शश्वन्न भक्तः शंकरात्परः ॥ १५ ॥ अहं सुदर्शनं शंभुस्तेजसा च वयं समाः ॥ ब्रह्मा स्रष्टा च योगेन नास्माभिस्तेजसा समः ॥१६॥ इत्येवं कथितं सर्वं शंकरस्य यशोऽमलम् ॥ तथाऽप्यस्य दर्पभङ्गं किं भूयः श्रोतुमिच्छसि ॥११७॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे श्रीकृष्णकृतशंकरप्रशंसा नाम षट्त्रिंशोऽध्यायः ॥३६॥ श्रीराधिकोवाच ॥ एवंभूतस्य च विभोः सर्वेशस्य महात्मनः ॥ न शस्तं कथमुच्छिष्टं ब्रूहि संदेहभञ्जन ॥ १ ॥ श्रीकृष्ण उवाच ॥ शृणु देवि प्रवक्ष्येऽहमितिहासं पुरातनम् ॥ पापेन्धनानां दहने ज्वलदग्निशिखोपमम् ॥२॥ सनत्कुमारो वैकुण्ठमेकदा च जगाम ह ॥ ददर्श भुक्तवन्तं च नाथं नारायणं द्विजः ॥३॥ तुष्टाव गूढैः स्तोत्रैश्च प्रणम्य भक्तितो मुदा ॥ अवशेषं ददौ तस्मै संतुष्टो भक्तवत्सलः ॥ ४ ॥ प्राप्तमात्रेण तत्रैव भुक्तं तेनैव किंचन॥

किंचिद्रक्ष बंधूनां भक्षणाय च दुर्लभम् ॥५॥ सिद्धाश्रमे च यद्दत्तं गुरवे शूलपाणिने ॥ भक्त्युद्रेकाच्च तत्सर्वं भुक्तं च प्राप्तिमात्रतः॥६॥ भुक्त्वा सुदुर्लभं वस्तु ननर्त प्रेमविह्वलः ॥ पुलकाङ्कितसर्वाङ्गः साश्रुनेत्रो मुदाऽन्वितः ॥७॥ गायन्मम गुणान्भक्त्या सुकण्ठः पंचवक्रतः ॥ रागभेदैकतानेन तालमानेन सुंदरम् ॥ ८ ॥ पपात डमरुर्हस्ताच्छृङ्गं च व्याघ्रचर्म च ॥ स्वयं निपत्य पश्चाच्च रुदन्मूर्च्छामवाप ह ॥ ९ ॥ अतीव कमनीयं तद्रूपं ध्यात्वैकमानसः ॥ सहस्रदलमध्यस्थं मां पश्यन्हृत्सरोरुहे ॥ १० ॥ एतस्मिन्नन्तरे देवी दुर्गा दुर्गार्तिनाशिनी ॥ मुदाऽऽजगाम शीघ्रं तत्प्रसन्नवदनेक्षणा ॥ ११ ॥ रुदन्तं मूर्च्छितं दृष्ट्वा निपतन्तं च भक्तितः ॥ प्रहस्य वार्ता पप्रच्छ कुमारं शूलपाणिनः ॥ १२ ॥ सर्वं तां कथयामास कुमारः संपुटाञ्जलिः ॥ श्रुत्वा चुकोप सा देवी शिवं प्रस्फुरिताधरा ॥ ॥ १३ ॥ तां शप्तुमुद्यतां देवीमुत्थाय च त्रिलोचनः ॥ बोधयामास विविधं तुष्टाव संपुटाञ्जलिः ॥ १४ ॥ श्रुत्वा मनोहरं स्तोत्रं न शशाप शिवं शिवा ॥ दुष्टं चक्रे तदुच्छिष्टमभक्ष्यं विदुषामपि ॥ १५ ॥ न लोकानां प्रभावश्च तपःसौभाग्यतेजसाम् ॥ ब्रह्माण्डे सर्वसंहर्ता चकंपे पार्वतीभये ॥ १६ ॥ उवाच तं जगन्माता नीतिसारं परं वचः ॥ गणप्रसूः सकोपा च रक्तपङ्कजलोचना ॥ १७ ॥ अहो तपःप्रभावश्च तेजसश्च न जीविनाम् ॥ स ब्रह्माण्डस्य संहर्ता चकम्पे शैलकन्यका ॥ १८ ॥ पार्वत्युवाच॥ त्वं पोष्टा जगतां पाता ममैव च विशेषतः ॥ वक्ता चतुर्णां वेदानां जनकश्च स्वयं विभुः ॥ १९ ॥ मुक्तिप्रदाता भक्तानां दाता च सर्वसंपदाम् त्वं चेत्करोषि दुर्नीतिं को वा धर्मं च पाति वै ॥२०॥ सदा ते परिपाल्याऽहं पोष्या भक्त्या च किंकरी ॥ वंचिता कर्मदोषेण हरनिर्माल्यभक्षणे ॥ २१ ॥ किंचिच्छुद्धं हिरण्येन किंचिद्वस्तु च वायुना ॥ किंचित्प्रक्षालनेनैव सर्वं विष्णोर्निवेदनात् ॥ २२ ॥ विष्णोर्निवेदितान्नेन यष्टव्याः सर्वदेवताः ॥ पितरोऽतिथयश्चैवमिति वेदेषु निश्चितम् ॥ २३ ॥ अनिवेद्यमभक्ष्यं च नैवेद्यमुदरे हरेः ॥ त्यक्त्वा करोति यो भक्त्या पार्षदप्रवरो भवेत् ॥ २४ ॥ अमृतं सर्ववस्तूनामिष्टसारं सुदुर्लभम् ॥ विष्णोर्निवेदितान्नस्य कलां नार्हति षोडशीम् ॥ २५ ॥ हन्त्यकालिकमृत्युं तदमृतं मूढरंजनम् ॥ नैवेद्यं च हरेरेव हरितुल्यं करोत्यहो ॥ २६ ॥ यदृच्छया तं नैवेद्यं यो

भुङ्क्ते साधुसंगतः ॥ षष्टिवर्षसहस्राणां प्राप्नोति तपसः फलम् ॥ २७ ॥ यो निवेद्य हरिं भुङ्क्ते भक्त्या भक्तश्च नित्यशः॥ किं वा
तपस्यां कर्ता च स हरेस्तेजसा समः ॥२८॥ श्रुतं पुरा त्वन्मुखतः पुष्करे मुनिसंसदि ॥ अहं वेदविधाता न किमहं वक्तुमीश्वरी ॥
॥ २९ ॥ सुचिरं च तपस्तप्त्वा मया लब्धस्त्वमीश्वरः ॥ त्वया विष्णोः प्रसादेन वंचिताऽहं कथं प्रभो ॥ ३० ॥ यतो न दत्तं नैवेद्यं
विष्णोर्मह्यं त्वयाऽधुना॥ अतो मत्तो गृहाणैतत्फलमेव महेश्वर ॥ ३१ ॥ अद्यप्रभृति ये लोका नैवेद्यं भुञ्जते तव ॥ ते जन्मैकं सार
मेया भविष्यन्त्येव भारते ॥३२॥ इत्युक्त्वा पार्वती माता रुरोद पुरतो विभोः ॥ दृष्टिः पपात तत्कण्ठे नीलकण्ठो बभूव ह ॥३३॥
तदा शिवः शिवां भक्त्या कृत्वा वक्षसि सादरम् ॥ तन्मानभङ्गं स्तोत्रेण विनयेन चकार ह ॥ ३४ ॥ करेण चक्षुषोर्नीरं संमृज्य च
पुनःपुनः ॥ बोधयामास विविधैर्नीतिवाक्यैर्मनोहरैः ॥ ३५ ॥ परितुष्टा च सा देवी भर्तारं समुवाच ह ॥ कलेवरं च त्यक्ष्यामि
नैवेद्येन विना हरेः ॥ ३६ ॥ बिभर्तिं देहं सततं तव सौभाग्यवर्द्धनम् ॥ कथं वहामि सौभाग्यरहितं च कलेवरम् ॥ ३७ ॥ अपूर्वं
तव नैवेद्यं जन्ममृत्युजराहरम् ॥ कृतं दुष्टं च यत्तस्मात्पश्य देहं त्यजामि च ॥ ३८ ॥ लिङ्गोपरि च यद्दत्तं तदेवाग्राह्यमीश्वर ॥ सुप
वित्रं भवेत्तस्य विष्णोर्नैवेद्यमिश्रितम् ॥ ३९ ॥ इत्येवमुक्त्वा सा देवी देहं त्यक्तुं समुद्यता ॥ त्रस्तो हरस्तत्पुरतः स्तुत्वा च स्वीच
कार ह ॥ ४० ॥ शंकर उवाच ॥ स्थिरा भव महादेवि चण्डिके जगदंबिके ॥ ममापराधमखिलं क्षन्तुमर्हसि सुन्दरि ॥
॥ ४१ ॥ मां भृत्यं तपसा क्रीतं कृपां कुरु ममोपरि ॥ ब्रह्मविष्णुमहेशानां बीजभूते सनातनि ॥ ४२ ॥ अहो गोलोकनाथस्य
गुणातीतस्य निर्गुणे ॥ सर्वशक्तिस्वरूपे च सदैव सहचारिणि ॥ ४३ ॥ साकारे च निराकारे नित्ये स्वेच्छामये प्रिये ॥ कृपया
तद्विभोरेव मम वक्षसि सांप्रतम् ॥ ४४ ॥ सर्वबीजस्वरूपे च महामाये मनोहरे ॥ सर्वसिद्धिप्रदे देवि मुक्तिदे कृष्णभक्तिदे ॥ ४५ ॥
इच्छैवं श्रीहरेः साक्षान्नाहं दातुमपि क्षमः ॥ तदा देहं परित्यज्य निर्गुणं व्रज निर्गुणे ॥ ४६ ॥ इत्येवमुक्त्वा पुरतस्तस्थौ च चन्द्र
शेखरः ॥ बभूव सुप्रसन्ना सा प्रणनाम हरं परम् ॥ ४७ ॥ इत्येवं पार्वतीस्तोत्रं शङ्करेण कृतं पुरा ॥ यः पठेद्विपदा ग्रस्तः स

भयादेव मुच्यते ॥ ४८ ॥ मित्रभेदो भवेद् दूरं तत्संम्प्रीतिर्भवेत्पुरा ॥ पार्वती परितुष्टा च न त्यजेत्तस्य मन्दिरम् ॥ ४९ ॥
॥ श्रीकृष्ण उवाच ॥ श्रुत्वा प्रतिज्ञां नाथस्य परितुष्टा बभूव सा ॥ जगाम स्वर्णदीं तूर्णं स्नानार्थं शंकराज्ञया ॥ ५० ॥
स्नात्वा संपूज्य भक्त्या च सुरमिष्टं च निर्गुणम् ॥ चकार प्रस्तुतं शीघ्रं मिष्टान्नं व्यञ्जनानि च ॥ ५१ ॥ शिवः स्नात्वा च संपूज्य
ब्रह्मज्योतिः सनातनम् ॥ तुष्टाव परया भक्त्या मामेव हृदयस्थितम् ॥ ५२ ॥ गत्वा सर्वमहं भुक्त्वा तस्मै दत्त्वाऽभिवाञ्छितम् ॥
नैवेद्यं पार्वती लेभे तव मूलं समागता ॥ ५३ ॥भुक्त्वाऽवशेषं सा देवी सह भर्त्रा मुदाऽन्विता ॥ तुष्टाव शङ्करं भक्त्या प्रणनाम मुहु
र्मुहुः ॥ ५४ ॥ इत्येवं कथितं सर्वं त्वया पृष्टं सुरेश्वरि ॥ अभिशप्तं शङ्करस्य निर्माल्यं येत हेतुना ॥ ५५ ॥ इति श्रीब्रह्मवैवर्त्ते
महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे हरनिर्माल्यशापप्रसङ्गो नाम सप्तत्रिंशोऽध्यायः ॥३७॥ ❀ ॥ श्रीकृष्ण उवाच ॥
दर्पभङ्गः श्रुतो देवि शङ्करस्य जगद्गुरोः ॥ अधुना श्रूयतां मत्तो दुर्गादर्पविमोचनम् ॥ १ ॥ तेजसा सर्वदेवानामाविर्भूय जगत्प्रसूः ॥
दधार कामिनीरूपं कमनीयं मनोहरम् ॥ २ ॥ निहत्य दानवेन्द्रांश्च ररक्ष देवताकुलम् ॥ लेभे जन्म ततो देवी जठरे दक्षयोषितः
॥ ३ ॥ पिनाकपाणिं जग्राह सा देवी सुरसाधनम् ॥ शश्वत्परमभक्त्या च सिषेवे स्वामिनं सती ॥ ४ ॥ दक्षेण सार्द्धं देवेन बभूव
शिवशत्रुता ॥ निरर्थकं दैवयोगात्पुरा वै सुरसंसदि ॥ ५ ॥ दक्षश्चकार यज्ञं च तत आगत्य कोपतः ॥ सर्वान्विज्ञापयामास तत्रैव
शंकरं विना ॥ ६ ॥ सस्त्रीका देवताः सर्वा आजग्मुर्दक्षमन्दिरम् ॥ सगणः शङ्करः कोपान्नाजगामाभिमानतः ॥ ७ ॥ सती पतिं च
मोहेन बोधयामास यत्नतः ॥ न तं चालयितुं शक्ता बभूव चञ्चला स्वयम् ॥ ८ ॥ आजगाम पितुर्गेहं दर्पात्तस्य विनाऽऽज्ञया ॥
तस्य शापेन तस्याश्च दर्पभङ्गो बभूव ह ॥९॥ न हि संभाषणं चक्रे वाङ्मात्रेण पिता च ताम् ॥ श्रुत्वा च निन्दां भर्तुश्च देहं तत्याज
मानतः ॥ १० ॥ एवं प्रिये निगदितं सतीदर्पविमोचनम् ॥ तस्या जन्मान्तरं नित्यं दर्पभङ्गश्च श्रूयताम् ॥ ११ ॥ लेभे जन्म सती
शीघ्रं जठरे शैलयोषितः ॥ शिवस्तस्याश्चिताभस्म चास्थि जग्राह भक्तितः ॥ १२ ॥ चकार मालामस्थ्नां च भस्मना तनुलेप

नम् ॥ स्मारंस्मारं सतीं प्रेम्णा भ्रामंभ्रामं पुनःपुनः ॥ १३ ॥ सुषाव मेना तां देवीमतीव सुमनोहराम् ॥ सृष्टौ विधातुस्तस्याश्च
ह्युपमा नास्ति कुत्र च ॥ १४ ॥ गुणप्रसूर्गुणान्सर्वान्सर्वरूपान्बिभर्त्ति सा ॥ सर्वाश्च देवपत्न्यस्तत्कलां नार्हन्ति षोडशीम् ॥ १५ ॥
बभूव वर्द्धमाना सा शुक्ले चन्द्रकला यथा ॥ अतीव यौवनस्था च शैलगेहे दिनेदिने ॥ १६ ॥ बभूवाकाशवाणी च तां संबोध्य
जगत्प्रसूम् ॥ शिवे शिवं च तपसा कठोरेण लभेति च ॥१७॥ विनेश्वरं न तपसा प्राप्ता हि गर्भसम्भवम् ॥ प्रहस्य तस्थौ श्रुत्वेति सा
च यौवनगर्विता ॥१८॥ मम जन्मान्तरीयं च भस्मास्थि च बिभर्ति यः ॥ स मां प्रौढां कथं दृष्ट्वा न गृह्णात्यत्र जन्मनि
॥१९॥ यो विदग्धश्च ब्रह्माण्डं बभ्राम मम शोकतः ॥ स कथं मां न गृह्णाति दृष्ट्वा परमसुन्दरीम् ॥ २० ॥ दक्षयज्ञं यो बभञ्ज मम
हेतोः कृपानिधिः ॥ स कथं मां न गृह्णाति पत्नीं जन्मनिजन्मनि ॥ २१ ॥ या यस्य पत्नी यो यस्या भर्ता प्राक्तनतः पुरा ॥ कुतो
विश्वे तयोर्भेदो निषेको नान्यथा भवेत् ॥ २२ ॥ सर्वरूपगुणाधारं मत्वा स्वमतिमानतः ॥ न चकार तपः साध्वी न विज्ञाय तमो
श्वरम् ॥ २३ ॥ सुन्दरीषु च सर्वासु मत्तो नास्त्येव सुन्दरी ॥ हृदीति मत्वा गर्वेण न चकार तपः शिवा ॥ २४ ॥ रूपयौवनवेषाणां
पुमान्ग्राही स्वयोषिताम् ॥ शिवो मच्छ्रुतिमात्रेण मां गृह्णाति विना तपः ॥ २५ ॥ हृदीति मत्वा गिरिजा तस्थौ हिमगिरेर्गृहे ॥
शश्वत्सहचरीमध्ये क्रीडोन्मत्ता दिवानिशम् ॥ २६ ॥ एतस्मिन्नन्तरे तूर्णं दूतः शैलेन्द्रसंसदि ॥ उवाचागत्य मधुरं तत्पुरः संपुटा
ञ्जलिः ॥ २७ ॥ दूत उवाच ॥ उत्तिष्ठोत्तिष्ठ शैलेन्द्र गच्छाक्षयवटान्तिकम् ॥ आजगाम महादेवः सगणो वृषवाहनः ॥ २८ ॥
मधुपर्कादिकं दत्त्वा भक्तिनम्रात्मकन्धरः ॥ पूजनं कुरु शैलेन्द्रं देवेन्द्रं तमतीन्द्रियम् ॥ २९ ॥ सिद्धिस्वरूपं सिद्धेशं योगीन्द्रा
णां गुरोर्गुरुम् ॥ मृत्युञ्जयं कालकालं ब्रह्मज्योतिः सनातनम् ॥ ३० ॥ परमात्मस्वरूपं च सगुणं निर्गुणं विभुम् ॥ भक्तध्यानार्थम
मलं दधानं देहमीश्वरम् ॥ ॥३१॥ शैलो दूतवचः श्रुत्वा समुत्तस्थौ मुदाऽन्वितः ॥ मधुपर्कादिकं नीत्वा जगाम शङ्करान्तिकम्
॥ ३२ ॥ देवी दूतवचः श्रुत्वा प्रसन्नवदनेक्षणा ॥ हृदीति मेने मद्धेतोराजगाम महेश्वरः ॥ ३३ ॥ चकार वेषमतुलं दधार वस्त्रमुत्त

मम् ॥ रत्नेन्द्रसारालंकाराद्रत्नमालां मनोहराम् ॥ ३४ ॥ पारिजातप्रसूनानां मालां चन्दनसंयुताम् ॥ चकार शङ्करार्थं च मत्वा मालां मनोहराम् ॥३५॥ रत्नसिंहासनस्था सा ददर्श दर्पणे मुखम् ॥ कस्तूरीबिन्दुना सार्द्धं सिन्दूरबिन्दुभूषितम् ॥ ३६॥ आरक्तनेत्रयुगलं निर्मलाञ्जनसंयुतम् ॥ शरन्मध्याह्नममलं यथालिपंक्तिवेष्टितम् ॥३७॥ सुकोमलौष्ठयुगुलं ताम्बूलरागसंयुतम् ॥ अतीव सुन्दरं रम्यपक्वबिंबफलं यथा ॥३८॥ रत्नकुंडलदीप्त्या च गंडस्थलविराजितम् ॥ सूर्योदयेन ज्वलितं सुमेरुशिखरं यथा ॥३९॥ अत्यनिर्वचनीयं च दन्तपंक्तिमनोहरम् ॥ यथा मुक्तासमूहं च सजलं जलदागमे ॥४०॥ गजमुक्तासमायुक्तं सुचारुनासिकोत्तमम् ॥ सुशोभितं यथा मेरुं स्वर्णदीजलधारया ॥ ४१ ॥ मालतीमाल्यसंयुक्तकबरीभरसंयुतम् ॥ बकपंक्तिसुशोभाढ्यं नवीनं जलदं यथा ॥ ४२ ॥ तप्तकाञ्चनवर्णाभं चारुवक्षःस्थलोज्ज्वलम् ॥ रत्नेन्द्रसारहाराक्तं कस्तूरीकुङ्कुमान्वितम् ॥४३॥ चारुचम्पकवर्णाभं स्तनयुग्मं मनोहरम् ॥ बदरीफलतुल्यं च चारुपत्रकशोभितम् ॥४४॥ मध्यं मनोहरं क्षीणं निम्ननाभिस्थलोज्ज्वलम् ॥ अतीव सुन्दरं रम्यमुदरं वर्तुलाकृति ॥ ४५ ॥ रम्भास्तंभविनिंद्यैकमूरुयुग्मं मनोहरम् ॥ कामालयं सुकठिनं निगूढमंशुकेन च ॥ ४६ ॥ स्थलपद्मप्रभामुष्टपदयुग्मं मनोहरम् ॥ रत्नपाशकसंयुक्तं सिद्धालक्तकभूषितम् ॥ ४७ ॥ दधतं रत्नमञ्जीरं राजहंसानुकारि च ॥ रत्नेन्द्रसाराभरणं निर्मितं विश्वकर्मणा ॥ ४८ ॥ करं सुकोमलतरं सुन्दरं कनकप्रभम् ॥ रत्नकङ्कणकेयूरशंखभूषणभूषितम् ॥४९॥ बिभ्रत्सद्रत्न[1]मुकुरं लीलाकमलमुज्ज्वलम्॥रत्नाङ्गुलीयमतुलं दधतं सुमनोहरम् ॥ ५० ॥ दृष्ट्वा स्वरूपमतुलं दध्यौ शङ्करमीश्वरम् ॥ विशिष्य मनसा शश्वद्भर्तुश्चरणपङ्कजम् ॥ ५१ ॥ पितरं मातरं बन्धुं साध्वीवर्गं सहोदरम् ॥ अन्तरे सा न सस्मार किंचिदेव शिवं विना ॥५२॥ अथ शैलेश्वरस्तत्र ददर्श चन्द्रशेखरम् ॥ स्वर्णदीपुलिनाद्रम्यादुत्पतन्तं च सस्मितम् ॥५३॥ दधतं संस्कृतां मालां जपन्तं मम नामकम् ॥ तप्तस्वर्णप्रभाजुष्टजटाराशिविराजितम् ॥ ५४ ॥ वृषभस्थं शूलपाणिं सर्वभूषणराजितम् ॥ नागयज्ञोपवीतं च सर्पभूषणभूषितम् ॥ ५५ ॥ शुद्धस्फटिकसंकाशं

---

[1] मुकुटम्—इ० पा० ।

व्याघ्रचर्मधरं परम् ॥ बिभूतिभूषिताङ्गं तमस्थिमालं दिगम्बरम् ॥५६॥ पञ्चवक्त्रं त्रिनयनं सूर्यकोटिसमप्रभम् ॥ ददर्श रुद्रान्परितो ज्वलतो ब्रह्मतेजसा ॥ ५७ ॥ शिववामे महाकालं दक्षिणे नन्दिकेश्वरम् ॥ भूतप्रेतपिशाचांश्च कूष्माण्डान्ब्रह्मराक्षसान् ॥५८॥ वेतालान्क्षेत्रपालांश्च भैरवान्भीमविक्रमान् ॥ सनकं च सनन्दं च कुमारं च सनातनम् ॥ ५९ ॥ जैगीषव्यं देवलं च काणादं गौतमं तथा ॥ पिप्पलादं कणखनं वोढुं पञ्चशिखं [1]कठम् ॥ ६० ॥ [2]जाजलिं [3]करखं कर्णं लोमशं सूर्यवर्चसम् ॥ कात्यायनं पाणिनिं च शंखं दुर्वाससं ततः ॥ ६१ ॥ शातातपं पारिभद्रमष्टावक्रं मरुद्भवम् ॥ एतान्पुरोगमान्नत्वा प्रणनाम शिवं गिरिः ॥ ६२ ॥ मूर्ध्ना निपत्य भूमौ स दण्डवत्संपुटाञ्जलिः ॥ अथो अनल्पया भक्त्या धृत्वा तच्चरणाम्बुजम् ॥ ननाम चाश्रुनेत्रः स पुलकाञ्चितविग्रहः ॥ ६३ ॥ धर्मदत्तेन स्तोत्रेण तुष्टाव परमेश्वरम् ॥ तुष्टे ब्राह्मे दिनेऽतीते पुष्करे सूर्यपर्वणि ॥ ६४ ॥ हिमालय उवाच ॥ त्वं ब्रह्मा सृष्टिकर्ता च त्वं विष्णुः परिपालकः ॥६५॥ त्वं शिवः शिवदोऽनन्तः सर्वसंहारकारकः ॥ त्वमीश्वरो गुणातीतो ज्योतीरूपः सनातनः ॥ ६६ ॥ प्रकृतः प्रकृतीशश्च प्राकृतः प्रकृतेः परः ॥ नानारूपविधाता त्वं भक्तानां ध्यानहेतवे ॥ येषु रूपेषु यत्प्रीतिस्तत्तद्रूपं बिभर्षि च ॥६७॥ सूर्यस्त्वं सृष्टिजनक आधारः सर्वतेजसाम् ॥ सोमस्त्वं सस्यपाता च सततं शीतरश्मिना॥६८॥ वायुस्त्वं वरुणस्त्वं च त्वमग्निः सर्वदाहकः ॥ इन्द्रस्त्वं देवराजश्च कालो मृत्युर्यमस्तथा ॥ ॥६९॥ मृत्युञ्जयो मृत्युमृत्युः कालकालो यमान्तकः ॥ ७० ॥ वेदस्त्वं वेदकर्ता च वेदवेदाङ्गपारगः ॥ विदुषां जनकस्त्वं च विद्वांश्च विदुषां गुरुः ॥७१॥ मन्त्रस्त्वं हि जपस्त्वं हि तपस्त्वं तत्फलप्रदः ॥ वाक् त्वं वागधिदेवी त्वं तत्कर्ता तद्गुरुः स्वयम् ॥७२॥ अहो सरस्वतीबीजं कस्त्वां स्तोतुमिहेश्वरः ॥ इत्येवमुक्त्वा शैलेन्द्रस्तस्थौ धृत्वा पदाम्बुजम् ॥७३॥ तत्रोवास तमाबोध्य चावरुह्य वृषाच्छिवः ॥ स्तोत्रमेतन्महापुण्यं त्रिसन्ध्यं यः पठेन्नरः ॥ ७४ ॥ मुच्यते सर्वपापेभ्यो भयेभ्यश्च भवार्णवे ॥ अपुत्रो लभते पुत्रं मासमेकं पठेद्यदि ॥७५॥ भार्याहीनो लभेद्भार्यां

---

[1] कचम्–इ०पा० । [2] जाबालिम्–इ०पा० । [3] करथं कण्वम्–इ० पा० ।

सुशीलां सुमनोहराम् ॥ चिरकालगतं वस्तु लभते सहसा ध्रुवम् ॥ ७६ ॥ राज्यभ्रष्टो लभेद्राज्यं शंकरस्य प्रसादतः ॥ कारागारे श्मशाने च शत्रुग्रस्तेऽतिसंकटे ॥ ७७ ॥गभीरेऽतिजलाकीर्णे भग्नपोते विषादने ॥रणमध्ये महाभीते हिंस्रजन्तुसमन्विते ॥ ७८ ॥ सर्वतो मुच्यते स्तुत्वा शंकरस्य प्रसादतः ॥ ७९ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादेऽष्टत्रिंशोऽध्यायः ॥ ३८ ॥ ❀ ॥ श्रीकृष्ण उवाच ॥ इति स्तुत्वा हिमगिरिर्वसतः शङ्करस्य च ॥ उवास पुरतो दूरे लब्धाज्ञः सर्वसंमतः ॥ १ ॥ मधुपर्कादिकं तस्मै प्रददौ भक्तिपूर्वकम् ॥ मुनीन्संपूजयामास ततः शङ्करपार्षदान् ॥ २ ॥ तदा तत्र समागत्य मेनका स्त्रीगणैः सह ॥ ददर्श वटमूलस्थं शङ्करं चन्द्रशेखरम् ॥ ३ ॥ ईषद्धास्यप्रसन्नास्यं वसन्तं व्यघ्रचर्मणि ॥ मध्ये मुनिगणानां च ज्वलन्तं ब्रह्मतेजसा ॥४॥ यथाऽऽकाशे तारकाणां द्विजराजं विराजितम् ॥ परमाह्लादकं रूपं कंदर्पकोटिसन्निभम् ॥५॥ विहाय वार्द्धकावस्थां दधतं नवयौवनम् ॥ अतीव सुन्दरं रम्यं चित्तचोरं च योषिताम् ॥ ६ ॥ कामं कामातुराणां च सतीनां च सुतं यथा ॥ वैष्णवानां महाविष्णुं शैवानां च सदाशिवम् ॥ ७ ॥ शक्तिस्वरूपं शाक्तानां सौराणां सूर्यरूपिणम् ॥ कालस्वरूपं दुष्टानां शिष्टानां परिपालकम्॥८॥कालकालसमं मृत्योर्मृत्युमृत्युं भयानकम् ॥ व्याघ्रचर्म चारुवस्त्रं बभूव भस्म चंदनम्॥९॥सर्पाः सुंदरमाल्यानि कस्तूरी या विषप्रभा ॥ जटासुललिता चूडा चंद्रस्त्वलिकचंदनम् ॥ १० ॥ सुचार्वी मालतीमाला गंगाधारा मनोहरा ॥अस्थिमाला रत्नमाला धत्तूरं चारुचंपकम् ॥११॥ एकीभूतं पंचवक्त्रं नेत्रयुग्माब्जशोभितम् ॥ शरत्पार्वणचंद्राभं प्रच्छाद्य दीप्तमुत्तमम्॥ १२ ॥ बंधुजीवविर्निंद्यैकमोष्ठाधरमनोहरम् ॥ श्वेतश्चन्द्रो वृषेंद्रश्च भूताद्या नर्तका इव ॥१३॥ सद्यो व्यतिक्रमं सर्वं महेशस्य महेश्वरि ॥ दृष्ट्वैवं शिवरूपं च मेना तुष्टा बभूव ह ॥१४॥ काश्चिन्निमेषरहिताः कामेन पुलकांचिताः ॥ अतिकामातुराः सत्यः प्रापुर्मूर्च्छां च काश्चन ॥ ॥ १५ ॥ काश्चिद्विनिंद्य कांतांश्च प्रशशंसुर्महेश्वरम् ॥ मनोरथेन मनसा समाश्लिष्यंति काश्चन ॥ १६ ॥ काचिन्मानसिकं कामा

त्कुर्वन्ती चुम्बनं मुदा ॥ ध्रुवं कामं करिष्यामो वयं च कामसागरे ॥ १७ ॥ अस्माकमेवं भर्ता चे[१]त्परत्रैव यशो भवेत् ॥ इहैवं किं
करिष्यामो वयं कांते रतैरलम् ॥ १८ ॥दृष्ट्वा तमेवं सुचिरमिति जल्पंति काश्चन ॥ काश्चिद्दृष्ट्वा शिवं किंचिन्मुखमाच्छाद्य वाससा
॥ १९ ॥सस्मिता वक्रनयनाः पश्यंत्येवं पुनःपुनः ॥ वयं गृहं न यास्यामो यास्यामः शिवसन्निधिम् ॥ २० ॥ शरत्सुधांशुवदनं
द्रक्ष्यामोऽहर्निशं मुदा ॥संसारं न करिष्यामः प्रविशामो हुताशनम् ॥२१॥ भविता नः शिवः स्वामीत्येवं जल्पंति काश्चन ॥
अहो पुण्यवती दुर्गा श्लाघ्यते जन्म भारते ॥ २२ ॥ यस्या अयं शिवः स्वामीत्येवं जल्पंति काश्चन ॥ मुदा मेना शिवं दृष्ट्वा गृहं
ताभिर्जगाम ह ॥ २३ ॥ शिवं संपूज्य शैलेंद्रः प्रणम्य स्वगृहं ययौ ॥ कृत्वाऽनुमानं रहसि गिरीशो मेनया सह ॥ २४ ॥ दुर्गां
प्रस्थापयामास शिवाय शिवसन्निधिम् ॥ पार्वती सखिभिः सार्द्धं वेषं कृत्वा मनोहरम् ॥ २५ ॥ भावानुरक्ता हर्षेण जगाम शिवसं
निधिम् ॥ दृष्ट्वा शिवा शिवं शांतं प्रसन्नवदनेक्षणम् ॥ २६ ॥ सप्तप्रदक्षिणं कृत्वा सस्मिता प्रणनाम सा ॥ अनन्यभावं गुणिनम
परं ज्ञानिनां वरम् ॥ २७ ॥ सुंदरं लभ भर्तारं सुन्दरीत्याशिषं ददौ ॥ भविता तव सौभाग्यं शुभे स्वामिनि संततम् ॥ २८॥पुत्रस्ते
भविता साध्वि नारायणसमो गुणैः ॥ भविता ते परा पूजा त्रैलोक्ये जगदम्बिके ॥२९॥ ब्रह्माण्डेषु च सर्वेषु सर्वेषां च परा भव ॥
सप्तप्रदक्षिणाः कृत्वा यतो भक्त्या त्वया नतम् ॥३०॥ सप्तजन्मनि तुष्टोऽहं तत्फलं लभ सुन्दरि ॥तीर्थे कान्तेऽभीष्टदेवे गुरौ मन्त्रे
तथौषधे ॥ ३१ ॥ आस्था च यादृशी यासां सिद्धिस्तासां च तादृशी ॥ इत्युक्त्वा शङ्करस्तूर्णं ब्रह्मज्योतिः परं च माम् ॥ ३२ ॥
दध्यौ योगासनं कृत्वा योगीशो व्याघ्रचर्मणि ॥ प्रक्षाल्य चरणौ देवी पपौ तच्चरणोदकम् ॥ ३३ ॥चकार मार्जनं भक्त्या वह्निशौ
चेन वाससा ॥ रत्नसिंहासनं रम्यं विश्वकर्मादिनिर्मितम् ॥३४॥ अपूर्वं कांस्यपात्रस्थं नैवेद्यं प्रददौ किल ॥ अर्घ्यं मंदाकिनीतोय
संयुक्तं चरणे ददौ ॥३५॥सुगन्धिचन्दनं चारु कस्तूरीकुङ्कुमान्वितम् ॥ प्रददौ मालतीमालां गले गरलसुन्दरे ॥३६॥ भक्त्या पूजां

---

[१] च परत्र च यतो भवेत् ॥ इहैवैकं करिष्यामो वयं कान्तं रतौ रतम्—इ० पा० ।

चकाराथ पुष्पवृष्टिं च तुष्टये ॥ पीयूषं स्वर्णपात्रस्थं प्रददौ मधुरं मधु ॥ ३७ ॥ रत्नप्रदीपशतकं समन्ताद्धूपमुत्तमम् ॥ त्रैलोक्यदुर्लभं वस्त्रं स्वर्णयज्ञोपवीतकम् ॥ ३८ ॥ सुगन्धिशीततोयं च पानार्थं पार्वती ददौ ॥ अतीव सुन्दरं रम्यं रत्नसारेन्द्रभूषणम्॥३९॥ दुर्लभां कामधेनुं च स्वर्णशृङ्गसमन्विताम् ॥ स्नानीयं तीर्थतोयं च ताम्बूलं च मनोहरम् ॥ ४० ॥ दत्त्वा षोडशोपचारं प्रणनाम पुनः पुनः ॥ संपूज्य शूलिनं भक्त्या ययौ नित्यं पितुर्गृहम् ॥४१॥ शुश्रावाप्सरसां वक्त्राद्देवीमिन्द्रो महेश्वरः ॥ श्रुत्वा वार्तां शुनासीरो ननर्त हर्षसंयुतः ॥ ४२ ॥ दूतद्वारा कामदेवमानिनाय त्वरान्वितः ॥ इन्द्राज्ञया कामदेवः प्रजगामामरावतीम् ॥ ४३ ॥ तूर्णं प्रस्थापयामास तं च यत्र शिवः शिवा ॥ पञ्चसायकसंयुक्तो जगाम पञ्चसायकः ॥४४॥ प्रसन्नवदनः श्रीमान्यत्र शक्तियुतः शिवः॥ गत्वा ददर्श मदनः शिवायुक्तं शिवं विभुम्॥४५॥शान्तं त्रैलोक्यकान्तं च प्रसन्नवदनेक्षणम्॥कामः स्थितोऽन्तरिक्षे च धृत्वा च सशरं धनुः ॥ ४६ ॥ चिक्षेपास्त्रं दुर्निवार्यममोघं शंकरे मुदा ॥ बभूवामोघमस्त्रं च मोघं तत्परमात्मनि॥४७॥आकाश इव निर्लिप्ते निर्लिप्ते परमात्मनि ॥ मोघीभूते च शस्त्रे च भयमाप च मन्मथः ॥ ४८ ॥ चकम्पे पुरतः स्थित्वा दृष्ट्वा मृत्युंजयं विभुम् ॥ सस्मार त्रिदशान्कामः शक्रादीन्भयविह्वलः ॥४९॥ आययुर्देवताः सर्वाः शंभुकोपेन वेपिताः॥चक्रुः स्तुतिं च स्तोत्रेण शंकरं त्रिदशेश्वरम् ॥५०॥ कोपाग्निमुद्गिरन्तं तं कपाललोचनादहो ॥ स्तुतिं कुर्वत्सु देवेषु स वह्निः शंभुसंभवः॥५१॥ जज्वालोर्ध्वशिखो दीप्तः प्रलयाग्निशिखोपमः ॥ उत्पत्य गगने घूर्णन्निपत्य धरणीतले ॥ भ्रामंभ्रामं च परितः पपात मदनोपरि ॥ ५२ ॥ बभूव भस्मसात्कामः क्षणेन हरकोपतः॥विषण्णा देवताः सर्वा नतवक्त्रा च पार्वती ॥५३॥ विललाप बहुतरं हरस्य पुरतो रतिः ॥ तुष्टुवुर्देवताः सर्वाः कम्पिताश्चन्द्रशेखरम् ॥ ५४ ॥ रतिमूचुः सुराः सर्वे रुरुदुश्च मुहुर्मुहुः ॥ किंचिद्भस्म गृहीत्वा च रक्ष मातर्भयं त्यज ॥५५॥ वयं तं जीवयिष्यामो लभिष्यसि प्रियं पुनः ॥ हरकोपापनयने सुप्रसन्ने दिने तथा ॥५६॥ दृष्ट्वा रतेर्विलापं च मूर्च्छां संप्राप पार्वती ॥ अतीन्द्रियं गुणातीतं तुष्टाव चन्द्रशेखरम्॥५७॥रुदन्तीं पार्वतीं त्यक्त्वा स्वस्थानं प्रययौ शिवः॥सद्यो बभूव तत्रैव पार्वतीदर्पमोक्षणम्॥५८॥ रूपयौवनयो

र्गर्वं तत्याज शैलकन्यका ॥ मुखं दर्शयितुं लज्जा तद्बभूव सखीगणे ॥ ५९ ॥ सुराश्च रतिमाश्वास्य सर्वे जग्मुः स्वमन्दिरम् ॥ प्रण
म्य दण्डवद्रुद्रं शोकादुद्विग्नमानसाः ॥६०॥ स्तुत्वा रुदित्वा शोकेन भयेन कामकामिनी ॥ कोपरक्तेक्षणं रुद्रं राधिके स्वालयं ययौ
॥ ६१ ॥ न जगाम पितुर्गेहं पार्वती सा तु लज्जया ॥ स्वालिभिर्वार्यमाणाऽपि जगाम तपसे वनम् ॥ ६२ ॥ प्रजग्मुः सहचारिण्य
स्तत्पश्चाच्छोकविह्वलाः ॥ मातृभिर्वार्यमाणा सा स्वर्णदीतीरजं वनम् ॥६३॥ सुचिरं च तपस्तप्त्वा सा संप्राप त्रिलोचनम् ॥ रतिः
संप्राप मदनं शंकरस्य वरेण च ॥ ६४ ॥ इत्येवं कथितं सर्वं पार्वतीदर्पमोक्षणम् ॥ निगूढचरितं राधे किं भूयः श्रोतुमिच्छसि
॥ ६५ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ श्रीरा
धिकोवाच ॥ अहो विचित्रं चरितमपूर्वं किं श्रुतं विभो ॥ सुन्दरं श्रुतिपीयूषं निगूढं ज्ञानकारणम् ॥ १ ॥ न विशेषं समासं
च श्रुतं न व्याससमीप्सितम् ॥ अधुना श्रोतुमिच्छामि विस्तीर्णं कथय प्रभो ॥ २ ॥ किं किं तपः कठोरं च चकार पार्वती स्व
यम् ॥ कं कं वरं वा संप्राप्य कथमाप महेश्वरम् ॥३॥ रतिः केन प्रकारेण जीवयामास मन्मथम् ॥ पार्वतीशिवयोः कृष्ण विवाहं
वर्णय प्रभो ॥ ४ ॥ तयो रहसि संभोगं पापिनां पापमोचनम् ॥ कथ्यतां करुणासिन्धो दुःखिनां दुःखमोचनम्॥५॥दम्पतीविरहो
क्तिश्च कर्णज्वाला च योषितः ॥ श्रोतुं कौतूहलं कृष्णं पुनः संमेलनं तयोः ॥ ६ ॥ अग्निज्वाला विषज्वाला क्षमा सोढुं च योषि
तः ॥ दम्पतीविरहज्वाला न श्रोतुं च क्षणं क्षमा ॥ ७ ॥ राधिकावचनं श्रुत्वा विस्मितश्चकिताननः ॥ विस्तीर्णं वक्तुमारेभे हृदयेन
विदूयता ॥ ८ ॥ दम्पतीविरहोक्तिं च यां राधा श्रोतुमक्षमा ॥ विच्छेदे शतवर्षीये किमस्या भविता मम ॥ ९ ॥ इत्येवं मानसे
कृत्वा मायशो माययाऽन्वितः ॥ कृपासिन्धुश्च कृपया कथां कथितुमुद्यतः ॥ १० ॥ श्रीकृष्ण उवाच ॥ प्राणाधिके
राधिके त्वं श्रूयतां प्राणवल्लभे ॥ प्राणाधिदेवि प्राणेशि प्राणाधारे मनोहरे ॥११॥ वटमूलाद्गते रुद्रे पार्वती तपसे ययौ ॥ पुनः पुनः
स्वमात्रा च पित्रा च विनिवारिता॥१२॥गत्वा सा स्वर्णदीतीरं स्नात्वा त्रिषवणं मुदा ॥ संदेशे च मया दत्तं जजाप तं मनुं मुदा॥१३॥

वर्षमेकं च संपूर्णमनाहारा स्वभक्तितः ॥ तप्त्वा तपः कठोरं च चकार जगदम्बिका ॥ १४ ॥ गीष्मे च परितो वह्निं प्रज्वलन्तं दिवानिशम् ॥ कृत्वा प्रतस्थौ तन्मध्ये संततं जपती मनुम् ॥१५॥ शश्वत्स्मशाने वर्षासु कृत्वा योगासनं शिवा॥शिलां दृष्ट्वा च संसिक्तां बभूव जलधारया ॥१६॥ शीते जलान्तरे शश्वत्प्रतस्थौ भक्तिपूर्वकम् ॥ अनाहारा शरद्रौद्रनीहारासु दिशासु च॥१७॥ एवं कृत्वा परं वर्षमप्राप्य शंकरं सती॥शुचा कृत्वाऽग्निकुण्डं च प्रवेष्टुं सा समुद्यता॥१८॥तामग्निकुण्डं विशतीं तपसाऽतिकृशां सतीम्॥ दृष्ट्वा शिवः कृपासिन्धुः कृपया तां जगाम ह ॥१९॥ अतीव वामनो बालो विप्ररूपी स्वतेजसा ॥ प्रज्वलन्मनसा हृष्टो दण्डी छत्री जटाधरः ॥ २० ॥ शुक्लयज्ञोपवीती च शुक्लवासाश्च सस्मितः ॥ श्वेताब्जबीजमालां च बिभ्रत्तिलकमुज्ज्वलम् ॥ २१ ॥ निर्जने बालकं दृष्ट्वा स्निग्धा सापि जगाद ह ॥ तत्तेजसाऽतिप्रच्छन्ना तत्याज च तपः स्वयम् ॥२२॥ को भवानिति पप्रच्छ तं शिशुं पुरतः स्थितम् ॥ मनसाऽलिङ्गनं कर्तुमिच्छन्ती परमादरम् ॥२३॥ श्रुत्वा शैलसुताप्रश्नं प्रहस्य परमेश्वरः ॥ उवाचातीव मधुरं कर्णपीयूषमीश्वरीम् ॥ २४ ॥ शंकर उवाच ॥ इच्छागामी बटुरहं तपस्वी विप्रबालकः ॥ का त्वं कान्ताऽतिकान्तारे तपश्चरसि सुन्दरि ॥ २५ ॥ वद कस्य कुले जाता कस्य कन्या च काऽभिधा ॥ तपसः फलदात्री त्वं कस्माद्धेतोस्तपस्तव ॥ २६ ॥ अहो वा तपसां राशिः स्वयं मूर्तिमती सती ॥ तपो वा लोकशिक्षार्थं करोषि कमलेक्षणे ॥ २७ ॥ स्वयं तेजःस्वरूपा वा मूलप्रकृतिरीश्वरी ॥ विधाय भक्तध्यानार्थं विग्रहं भारते जनुः ॥ २८ ॥ किं वा त्रिलोके लक्ष्मीस्त्वं संपद्रूपा सनातनी ॥ रक्षां विधातुं जगतामागता धातुरन्तिके ॥२९॥ किं वाम्बिका त्वं देवानां स्वयं मूर्तिमती सती ॥ सावित्री भारते जन्म स्वेच्छया लब्धुमागता ॥ ३० ॥ रागाधिष्ठातृदेवी वा स्वयं साक्षात्सरस्वती ॥ सर्वविद्याः प्रकटितुं स्वेच्छया जन्म भारते॥३१॥एतासु मध्ये का वा त्वं नाहं तर्कितुमीश्वरः ॥ या सा भवति कल्याणि परितुष्टा च मां भव ॥ ३२ ॥ सति त्वयि प्रसन्नायां प्रसन्नः परमेश्वरः ॥ पतिव्रतायां तुष्टायां तुष्टो नारायणः स्वयम् ॥ ३३ ॥ तुष्टे नारायणे देवे शश्वत्तुष्टं जगत्त्रयम् ॥ तरुमूलेषु सिक्तेषु शाखाः सिक्ता यथा प्रिये ॥ ३४ ॥ शिशोस्तद्व

चनं श्रुत्वा प्रहस्य परमेश्वरी ॥ उवाच वचनं चारु कर्णपीयूषमीश्वरी ॥ ३५ ॥ पार्वत्युवाच ॥ नाहं वेदप्रसूर्लक्ष्मीर्वागधिष्ठातृदेवता ॥ जन्म मे भारते वर्षे साम्प्रतं शैलकन्यका ॥ ३६ ॥ पूर्वं जन्म दक्षगेहे सती शंकरकामिनी ॥ योगेन त्यक्तदेहाऽहं तातभर्तृविनिन्दया ॥ ३७ ॥ अत्र जन्मनि पुण्येन सम्प्राप्ते शंकरे द्विज ॥ मां त्यक्त्वा भस्मसात्कृत्वा मन्मथं स जगाम ह ॥ ३८ ॥ प्रयाते शंकरे तापाद्व्रीडयाऽहं पितुर्गृहात् ॥ आगमत्तपसे चित्तं ममेदं स्वर्णदीतटे ॥ ३९ ॥ तपः कृत्वा कठोरं च सुचिरं प्राणवल्लभम् ॥ अप्राप्याग्निं प्रवेष्टुं च त्वां च दृष्ट्वा क्षणं स्थिता ॥ ४० ॥ गच्छ त्वं प्रविशाम्यग्नौ प्रलयाग्निशिखोपमे ॥ कृत्वा स्वकामनां विप्र हरप्राप्तिमनीषितम् ॥ ४१ ॥ यत्र यत्र जनुर्लब्ध्वा लभिष्यामि शिवं परम् ॥ प्राणाधिकं प्रियं कान्तं विभुं जन्मनि जन्मनि ॥४२॥ सर्वा हि स्वप्रियं लब्धुं लभन्ति जन्म वाञ्छितम् ॥ तज्जन्म पतिलाभार्थं सर्वासां च श्रुतौ श्रुतम् ॥ ४३ ॥ प्राक्तनीयो हि यो भर्ता स तासां प्रतिजन्मनि ॥ या स्त्री येषां सुनियता सा तेषां जन्मजन्मनि ॥ ४४ ॥ तद्देहमिह न प्राप्य कृत्वा घोरतरं तपः ॥ कृत्वाऽग्निकुण्डे काम्यं च लभिष्यामि परत्र तम् ॥४५॥ इत्युक्त्वा पार्वती तत्र तत्पुरः प्रविवेश ह ॥ निषिध्यमाना पुरतो ब्राह्मणेन पुनः पुनः॥४६॥वह्निप्रवेशं कुर्वन्त्याः पार्वत्याः परमेश्वरि ॥ बभूव तपसा सद्यो वह्निश्चन्दनवद्ध्रुवम्॥ ॥ ४७ ॥ क्षणं तदन्तरे स्थित्वा चोत्पतन्तीं शिवां शिवः ॥ पुनः प्रपच्छ सहसा वृन्दावनविनोदिनि ॥ ४८ ॥ श्रीमहादेव उवाच ॥ अहो तपस्ते किं भद्रे न बुद्धं किंचिदेव हि ॥ न दग्धो वह्निना देहो न च प्राप्तो मनीषितः ॥ ४९ ॥ शिवं कल्याणरूपं च भर्तारं कर्तुमिच्छसि॥अविग्रहं पतिं कृत्वा किं वा ते वाञ्छितं भवेत् ॥५०॥ संहर्तारं च भर्तारं यदीच्छसि शुचिस्मिते ॥ कान्तमिच्छति का वा स्त्री सर्वसंहारकारणम् ॥५१॥ मोक्षं वाञ्छसि चेद्देवि कृत्वा कान्तं स्वरूपिणम् ॥ सर्वमुक्तिप्रदा त्वं च तपस्या विफला तव॥ ॥ ५२ ॥ शिवश्च मङ्गले मोक्षे संहर्ता न च दृश्यते ॥ शिवशब्दस्य चान्योऽर्थो न हि वेदे निरूपितः ॥ ५३ ॥ तं च संहारकर्तारं यदि वाञ्छसि सुन्दरि ॥ लभिष्यसे रतं रुद्रं सर्वलोकभयंकरम् ॥५४॥ न भविष्यति मोक्षस्ते स्वाभीष्टं देवसेवनम् ॥ हरिस्मृतिर

मोघा च सर्वमंगलदा सदा ॥५५॥ शीघ्रं पितृगृहं गच्छ तत्र द्रक्ष्यसि शंकरम् ॥ ममाशिषा स्वतपसां फलेन च सुदुर्लभम्॥५६॥ इत्युक्त्वा पार्वतीं विप्रस्तत्रैवान्तरधीयत ॥ दुर्गा ययौ पितुर्गेहं महादेवेति वादिनी॥५७॥पार्वत्यागमनं श्रुत्वा मेनका च हिमालयः ॥ दिव्यं यानं पुरस्कृत्य प्रययौ हर्षविह्वलः ॥ ५८ ॥ संस्थाप्य मंगलघटान्राजवर्त्मनि राधिके ॥ चन्दनागुरुकस्तूरीफलशाखासमन्वितान् ॥ ५९ ॥ पट्टसूत्रसन्निबद्धरसालपल्लवान्वितैः ॥ परितः परितो रम्भास्तम्भवृन्दसमन्विते ॥ ६० ॥ पतिपुत्रवतीयोषित्समूहैर्दीपहस्तकैः ॥ पूर्णैर्लाजाधान्यदूर्वाफलपुष्पसमन्वितैः ॥६१॥ सुपुण्यैर्ब्राह्मणैश्चापि मुनिभिर्ब्रह्मचारिभिः ॥ नटीभिर्नर्तकीभिश्च गजेन्द्रैः परिशोभिते ॥ ६२ ॥ पुरोहितैश्च संयुक्तैः कुर्वद्भिर्मङ्गलध्वनिम् ॥ सुचारुमालतीमालाहस्तैः शस्तैः प्रशंसितैः ६३ ॥ नानाप्रकारवाद्यैश्च शंखध्वनिसुनादितैः॥सिन्दूररेणुभिश्चारुचन्दनद्रवपङ्किलम् ॥ ६४ ॥ प्रविश्य नगरं दुर्गा ददर्श पितरौ पुरः ॥ सुप्रसन्नौ प्रधावन्तौ हर्षाश्रुपुलकान्वितौ ॥ ६५ ॥ प्रसन्नवदना देवी चालिभिः प्रणनाम तौ ॥ संयुज्याथाशिषं तौ च चक्रतुस्तां च वक्षसि ॥ ॥ ६६ ॥ हे वत्से वत्सेत्युच्चार्य रुदन्तौ प्रेमविह्वलौ॥तदा तां च रथे कृत्वा जग्मतुर्निजमन्दिरम् ॥ ६७ ॥ स्त्रियो निर्मंच्छनं चक्रुर्विप्रा युयुजुराशिषम्॥ब्राह्मणेभ्यश्च बन्दिभ्यः पर्वतेन्द्रो धनं ददौ ॥६८॥ मङ्गलं कारयामास पाठयामास छान्दसम् ॥ एवं स्वकन्यया सार्द्धं तस्थतुस्तौ स्वमन्दिरे ॥ ६९ ॥ सुखेन वसतौ तौ हि हर्षनिर्भरमानसौ ॥ एकदा च तपः कर्तुं जगाम स्वर्णदीं गिरिः ॥ ७० ॥ मेनका कन्यया सार्द्धमुवास प्राङ्गणे मुदा ॥ एतस्मिन्नन्तरे भिक्षुर्नर्तकश्च सुगायनः ॥७१॥ सहसैक आजगाम मेनकासन्निधिं मुदा ॥ शृङ्गवाद्यं वामहस्ते डमरुं दक्षिणे तथा ॥७२॥ कृत्वा विभूतिगात्रोऽतिवृद्धोऽतीव जरातुरः ॥ पृष्ठकन्थो रक्तवासाः सुकण्ठोऽतिमनोहरः ॥ ७३ ॥ जगौ मम गुणाख्यानं कृत्वा नृत्यं मनोहरम् ॥ वादयामास शृङ्गं च क्षणं डमरुकं तथा ॥ ७४ ॥ आजग्मुर्नागरा बाला बालिका हर्षविह्वलाः ॥ वृद्धा युवानो युवतीसमूहो वृद्धयोषितः ॥ ७५ ॥ श्रुत्वा तु सुन्दरं गीतं सुतानस्वरसंयुतम् ॥ सहसा मुमुहुः सर्वे तेन मूर्च्छामवाप्नुवन् ॥७६॥ मूर्छां संप्राप सा दुर्गा ददर्श हृदि शङ्करम् ॥ त्रिशूलपट्टिशकरं व्याघ्रचर्मधरं परम् ॥७७॥

विभूतिभूषणं रम्यमस्थिमालां सुनिर्मलाम् ॥ ईषद्धास्यप्रसन्नास्यं सुप्रसन्नं त्रिलोचनम् ॥ ७८ ॥ मालाहस्तं पंचवक्त्रं नागयज्ञोपवीतकम्॥वरं वृण्वित्युक्तवन्तं सुन्दरं चन्द्रशेखरम्॥७९॥हृदयस्थं हरं दृष्ट्वा मनसा तं ननाम सा ॥ वरं वव्रे मानसे सा त्वं पतिर्मे भवेति च ॥ ८० ॥ एवं दत्त्वा शिवस्तस्यै चान्तर्धानं चकार सः ॥ न दृष्ट्वा हृदि तं दुर्गा संप्राप्य चेतनां पुनः ॥ ८१ ॥ ददर्श चक्षुरुन्मील्य भिक्षुकं गायकं पुरः ॥ नृत्यसंगीततः सा तु भिक्षुकस्य च मेनका ॥८२॥ दातुं ययौ सा रत्नानि स्वर्णपात्रस्थितानि च ॥ भिक्षां ययाचे भिक्षुस्तां दुर्गां नान्यां गृहीतवान् ॥ ८३ ॥ पुनश्च नर्तनं कर्तुमुद्यतः कौतुकेन च ॥ मेना तद्वचनं श्रुत्वा चुकोप विस्मयं ययौ ॥ ८४ ॥ भिक्षुकं भर्त्सयामास बहिः कर्तुमुवाच तम् ॥ पत्नी त्रिलोकनाथस्य शिवस्य परमात्मनः ॥ ८५ ॥ याच्ञामिमां प्रकुर्वन्तं दूरं कुरु सुभाषिणम्॥एतस्मिन्नन्तरे तत्वा गिरिः स्वालयमाययौ॥८६॥ददर्श पुरतो भिक्षुं प्राङ्गणस्थं मनोहरम्॥ कृत्वा नारायणार्चां च गङ्गातीरे मनोहरे ॥८७॥ तन्मूर्तिध्यानविश्लेषशोकादुद्विग्नमानसः ॥ श्रुत्वा मेनामुखाद्वार्तां जहास च चुकोप सः ॥८८॥आज्ञां चकार स्वचरं बहिः कर्तुं च भिक्षुकम् ॥ आकाशामिव दुःस्पर्शं प्रज्वलन्तं स्वतेजसा ॥८९॥ न शशाक बहिः कर्तुं समीपं गन्तुमक्षमः॥ददर्श भिक्षुकं शैलः क्षणं चारुचतुर्भुजम्॥९०॥किरीटिनं कुण्डलिनं पीताम्बरधरं परम्॥सुवेषं सुन्दरश्याममीषद्धास्यं मनोहरम् ॥ ९१ ॥ चन्दनोक्षितसर्वाङ्गं भक्तानुग्रहकातरम् ॥ यद्यत्पुष्पं प्रदत्तं च पूजाकाले गदाभृते ॥ ९२ ॥ गात्रे शिरसि तत्सर्वं भिक्षुकस्य ददर्श ह ॥ धूपः प्रदीपो यो दत्तो नैवेद्यं वा मनोहरम् ॥ ९३ ॥ ददर्श शैलस्तत्सर्वं भिक्षुकस्य पुरः स्थितम्॥क्षणं ददर्श द्विभुजं विनोदमुरलीकरम् ॥ ९४ ॥ गोपवेषं किशोरं च सस्मितं श्यामसुन्दरम् ॥ मयूरपिच्छचूडं च रत्नालंकारभूषितम् ॥ ॥ ९५ ॥ चन्दनोक्षितसर्वाङ्गं वनमालाविभूषितम् ॥ क्षणं ददर्श स्वच्छं च शंकरं चंद्रशेखरम् ॥ ९६ ॥ त्रिशूलपट्टिशकरं व्याघ्रचर्माम्बरं परम् ॥ विभूतिगात्रममलमस्थिमालाविभूषितम् ॥ ९७ ॥ नागयज्ञोपवीतं च ततस्वर्णजटाधरम् ॥ डमरुशृंगहस्तं च सुप्रशस्तं मनोहरम् ॥ ९८ ॥ प्रजपन्तं हरेर्नाम श्वेताब्जबीजमालया ॥ ईषद्धास्यप्रसन्नास्यं भक्तानुग्रहकातरम् ॥ ९९ ॥ स्वतेजसा प्रज्वलन्तं

पञ्चवक्रं त्रिलोचनम् ॥ क्षणं ददर्श जगतां स्रष्टारं च चतुर्मुखम् ॥ १०० ॥ जपन्तं श्रीहरेर्नाम स्वच्छस्फटिकमालया ॥ क्षणं सूर्य
स्वरूपं च ददर्श त्रिगुणात्मकम् ॥ १ ॥ ददर्श तमतीव्रं तु ज्वलन्तं ब्रह्मतेजसा ॥ क्षणमग्निस्वरूपं च ज्वलन्तमतितेजसा ॥ २ ॥
क्षणमाह्लादजनकं चन्द्ररूपं ददर्श ह ॥ क्षणं तेजःस्वरूपं च निराकारं निरञ्जनम् ॥ ३ ॥ निर्लिप्तं च निरीहं च परमात्मस्वरूपिणम् ॥
एवं स्वेच्छामयं दृष्ट्वा नानारूपधरं परम् ॥ ४ ॥ हर्षाश्रुपुलकः शैलो दण्डवत्प्रणनाम तम् ॥ भक्त्या प्रदक्षिणीकृत्य प्रणम्य च पुनः
पुनः ॥ ५ ॥ समुत्पत्य हर्षयुक्तो ददर्श पुनरेव तम् ॥ वास्तवं भिक्षुकं दृष्ट्वा शैलेन्द्रो विष्णुमायया ॥ ६ ॥ विसस्मार च तत्सर्वं नाना
रूपधरं परम् ॥ भिक्षां ययाचे भिक्षुस्तं भिक्षास्थालीस्वपार्श्वकम् ॥ ७ ॥ रक्ताम्बरः शृङ्गवाद्यविचित्रडमरुः करे ॥ आदातुमुत्सुको
दुर्गां नान्यां भिक्षुः कदाचन ॥ ८ ॥ न स्वीचकार शैलेन्द्रो मोहितो विष्णुमायया ॥ भिक्षुः किंचिन्न जग्राह तत्रैवान्तरधीयत ॥ ९ ॥
तदा बभूव ज्ञानं च मेनकाशैलयोः प्रिये ॥ अहो दृष्टो जगन्नाथ आवाभ्यां स्वप्नवद्दिने ॥ ११० ॥ आवां शिवौ वञ्चयित्वा स्वस्थानं
गतवान्विभुः ॥ तयोर्भक्तिं शिवे दृष्ट्वा सर्वे देवाश्च चिन्तिताः ॥ ११ ॥ चक्रुः शक्रादयो युक्तिं सुमेरो रक्षणे भरात् ॥ एकान्तभक्त्या
शैलश्चेत्कन्यां तस्मै प्रदास्यति ॥ १२ ॥ ध्रुवं निर्वाणतां सद्यः संप्राप्नोत्येव भारते ॥ अनन्तरत्नाधारश्चेत्पृथ्वीं त्यक्त्वा प्रयास्यति
॥ १३ ॥ रत्नगर्भाभिधा भूमेर्मिथ्यैव भविता ध्रुवम् ॥ स्थावरत्वं परित्यज्य दिव्यरूपं विधाय सः ॥ १४ ॥ कन्यां शूलभृते दत्त्वा
विष्णुलोकं गमिष्यति ॥ नारायणस्य सारूप्यं भविष्यत्येव लीलया ॥ १५ ॥ संप्राप्य पार्षदत्वं च हरिदासो भविष्यति ॥ दशवा
पीसमा कन्या दीयते ब्राह्मणाय ताम् ॥ १६ ॥ वेदज्ञाय पवित्राय चाप्रतिग्रहशालिने ॥ संध्यायज्ञवेदपाठकारिणे सत्यवादिने ॥ १७ ॥
अस्मै प्रदत्ता कन्या च दशवापीफलप्रदा ॥ त्रिसंध्याकारिणे सत्यवादिने गृहशालिने ॥ १८ ॥ वेदज्ञाय सुविप्राय दत्त्वा सुफलदा
यिनी ॥ परदारगृहीताय याजकाय द्विजातये ॥ १९ ॥ शठाय संध्याहीनाय वाप्यैकफलदा सुता ॥ सर्वसंध्यास्वगायत्रीविहीनाय
शठाय च ॥ १२० ॥ वैश्योद्भवाय दत्ता या वाप्यर्द्धफलदा स्मृता ॥ पापिने शूद्रजाताय विप्रक्षत्रोद्भवाय च ॥२१॥ दत्त्वा चाण्डाल

तुल्याय कन्या सा नरकप्रदा ॥ विष्णुभक्ताय विदुषे विप्राय सत्यवादिने ॥ २२ ॥ जितेन्द्रियाय दत्ता या विंशद्वापीफलप्रदा ॥ षष्टिवर्षसहस्राणि दिव्यरूपं विधाय च ॥ २३ ॥ एवंभूताय दत्ता चेन्मोदते विष्णुमंदिरे ॥ दत्त्वा कन्यां सुशीलां च हराय हरयेऽथ वा ॥ २४ ॥ नारायणस्वरूपं च भवेदेव श्रुतौ श्रुतम् ॥ विष्णुभक्तो यदा कन्यां ददाति विष्णुप्रीतये ॥ २५ ॥ स लभेद्धरिदास्यं च ध्रुवं विप्रोद्भवाय च ॥ इत्यालोच्य सुराः सर्वे कृत्वा च मन्त्रणां प्रिये ॥ २६ ॥ गुरुं प्रस्थापितुं जग्मुर्हिमालयगृहं प्रति ॥ गत्वा प्रणम्य च गुरुं सर्वे चक्रुर्निवेदनम् ॥ २७ ॥ हिमालयगृहं गत्वा कुरु निन्दां च शूलिनः ॥ पिनाकिनं विना दुर्गा वरं नान्यं वरिष्यति ॥ २८ ॥ अनिच्छया सुतां दत्त्वा फलं तूर्णं लभिष्यति ॥ कालेन यातु शैलेन्द्रश्चेदानीं भुवि तिष्ठतु ॥ २९ ॥ अनन्तरत्नाधारं च त्वमेव रक्ष भारते ॥ देवानां वचनं श्रुत्वा प्रददौ कर्णयोः करौ ॥१३०॥ न स्वीचकार स्वगुरुः स्मरन्नारायणेति च ॥ उवाच देववर्गांश्च संभर्त्स्यं च पुनःपुनः ॥ ३१ ॥ वेदवेदान्तविज्ञाता महाभक्तो हरौ हरे ॥ बृहस्पतिरुवाच ॥ श्रूयतां मद्वचः सत्यं हे देवाः स्वार्थसाधकाः ॥ ३२ ॥ नीतिसारं च वेदोक्तं परिणामसुखावहम् ॥ हरकेशवयोर्भक्तं ये च निन्दन्ति पापिनः ॥ ३३ ॥ भूदेवान्ब्राह्मणांश्चैव स्वगुरुं च पतिव्रताः॥ यतिभिक्षुब्रह्मचारिसृष्टिबीजान्सुरांस्तथा ॥ ३४॥ पच्यन्ते कालसूत्रे ते यावच्चन्द्रदिवाकरौ ॥श्लेष्ममूत्रपुरीषेषु शेरते ते दिवानिशम् ॥३५॥ भक्षिताः कीटनिकरैः शब्दं कुर्वंति कातराः ॥ ये निन्दन्ति च ब्रह्माणं स्रष्टारं जगतां गुरुम् ॥३६॥ शिवं सुराणां प्रवरं दुर्गां लक्ष्मीं सरस्वतीम् ॥ गीतां च तुलसीं गङ्गां वेदांश्च वेदमातरम् ॥ ३७ ॥ व्रतं तपस्यां पूजां च मन्त्रं मंत्रप्रदं गुरुम्॥ ते पच्यन्तेऽन्धकूपे वै चायुषोऽर्धं विधेरहो॥३८॥भक्षिताः सर्पसंघैश्च शब्दं कुर्वन्ति संततम् ॥ ये निन्दन्ति हृषीकेशं देवसाम्यं विधाय च ॥ ३९ ॥ विष्णुभक्तिप्रदं चैव पुराणं च श्रुतेः परम् ॥ राधा तदङ्गजा गोपी ब्राह्मणांश्च सदार्चितान् ॥ १४० ॥ ते पच्यन्तेऽवटे देवा विधातुरायुषा समम् ॥ अधोमुखा ऊर्ध्वजङ्घाः सर्पसंघैश्च वेष्टिताः ॥ ४१ ॥ भक्षिता विकृताकारैः कीटैः सर्पसमाकृतैः ॥ अतीव कातरा भीताः शब्दं कुर्वन्ति संततम् ॥४२॥ श्लेष्ममूत्रपुरीषाणि ध्रुवं भक्षन्ति क्षोभिताः ॥ उल्कां ददति रुष्टाश्च तन्मुखे यम

किंकराः ॥ ४३ ॥ त्रिसन्ध्यं तर्जनं कृत्वा कुर्वन्ति दण्डताडनम् ॥ कुर्वन्ति मूत्रपानं च प्रहारैस्तृषितान्भिया॥४४॥ तदा कल्पान्तरे स्रष्टुं सृष्टिं च प्रथमे पुनः ॥ तेषां भवेत्प्रतीकार इत्याह कमलोद्भवः ॥ ४५ ॥ कृत्वा हि शिवनिन्दां च यास्यन्ति नरकं सुराः ॥ इममेवोपकारं च कर्तुमिच्छथ पुत्रकाः ॥ ४६ ॥ ब्रह्मणा प्रेरितो दक्षो दत्त्वा शूलभृते सुताम् ॥ न पापं परमैश्वर्यं संप्राप हरनिन्दकः ॥ ४७ ॥ अनिच्छया सुतां दत्त्वा तुर्यपुण्यं ललाभ सः ॥ अहो विहाय सारूप्यं तुच्छं स्वर्गं ललाभ सः ॥ ४८ ॥ कश्चिन्मध्ये च युष्माकं गत्वा शैलगृहं सुराः ॥ संपादयतु स्वमतं शैलेन्द्रस्य प्रयत्नतः ॥ ४९ ॥ अनिच्छया सुतां दत्त्वा सुखं तिष्ठतु भारते ॥ तस्मै भक्त्या सुतां दत्त्वा मोक्षं प्राप्स्यति निश्चितम् ॥ १५० ॥ पश्चात्सप्तर्षयः सर्वे गृहीत्वा तामरुन्धतीम् ॥ ध्रुवं तस्य गृहं गत्वा बोधयिष्यन्ति पर्वतम् ॥ ५१ ॥ विना पिनाकिनं दुर्गा वरं नान्यं वरिष्यति ॥ अनिच्छया सुतां तस्मै प्रदास्यति सुताज्ञया ॥ ५२ ॥ इत्येवं कथितं सर्वं देवा गच्छन्तु मन्दिरम् ॥ इत्युक्त्वा वाक्पतिः शीघ्रं तपसे स्वर्णदीं गतः ॥ १५३ ॥ इति श्री ब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे चत्वारिंशोऽध्यायः ॥ ४० ॥ श्रीकृष्ण उवाच ॥ तदा देवाः समालोच्य जग्मुस्ते ब्रह्मणोऽन्तिकम् ॥ सर्वे निवेदनं चक्रुर्ब्रह्माणं जगतां पतिम् ॥ १ ॥ देवा ऊचुः ॥ ॥ तव सृष्टौ जगत्स्रष्टा रत्नाधारो हिमालयः ॥ स चेत्प्राप्स्यति मोक्षं च रत्नगर्भा कुतो मही ॥ २ ॥ सुतां शूलभृते दत्त्वा भक्त्या शैलेश्वरः स्वयम् ॥ नारायणस्य सारूप्यं संप्राप्स्यति न संशयः ॥ ३ ॥ त्वं तस्य निन्दनं कृत्वा विमतिं प्रतिपादय ॥ त्वया विना क्षमो नान्यो गच्छ शैलगृहे प्रभो ॥ ४ ॥ देवानां वचनं श्रुत्वा तानुवाच विधिः स्वयम् ॥ वचनं नीतिसारं च कर्णपीयूषमुत्तमम् ॥ ५ ॥ ॥ ॥ ब्रह्मोवाच ॥ नाहं कर्तुं क्षमो वत्साः शिवनिन्दां सुदुष्कराम् ॥ संपद्विनाशरूपां च विपदो बीजरूपिणीम् ॥ ६ ॥ भूतेशं प्रस्थापयत स्वात्मनिन्दां करोति सः ॥ परनिन्दा विनाशाय स्वनिन्दा यशसे परम् ॥७॥ ब्रह्मणो वचनं श्रुत्वा तं प्रणम्य सुराः प्रिये॥ शीघ्रं ययुस्ते कैलासं गत्वा च तुष्टुवुः शिवम् ॥ ८ ॥ सर्वे निवेदनं चक्रुः शंकरं करुणालयम् ॥ स ययौ शैलमूलं च तानाश्वास्य प्रह

स्य च ॥ ९ ॥ देवा मुमुदिरे सर्वे शीघ्रं गत्वा स्वमन्दिरम् ॥ इष्टसिद्धिर्मुदे शश्वदसिद्धिर्दुःखवर्धिनी ॥ १० ॥ अथ शैलः सभामध्ये
समुवास मुदाऽन्वितः ॥ बन्धुवर्गैः परिवृतः पार्वतीसहितः स्वयम् ॥ ११॥ एतस्मिन्नन्तरे तत्र विप्ररूपी शिवः स्वयम् ॥ समाजगाम
सहसा प्रसन्नवदनेक्षणः ॥ १२ ॥ दण्डी छत्री दीर्घवासा बिभ्रत्तिलकमुत्तमम् ॥ करे स्फटिकमालां च शालग्रामं गले दधत् ॥ १३ ॥
तं च दृष्ट्वा समुत्तस्थौ सगणश्च हिमालयः ॥ ननाम दण्डवद्भूमौ भक्त्याऽतिथिमपूर्वकम् ॥१४॥ ननाम पार्वती भक्त्या प्राणेशं विप्र
रूपिणम् ॥ आशिषं युयुजे विप्रः सर्वेषां प्रीतिपूर्वकम् ॥ १५ ॥ शैलदत्तासने शीघ्रमुवास ब्राह्मणः स्वयम् ॥ मधुपर्कादिकं सर्वं ज
ग्राह प्रीतिपूर्वकम् ॥ १६ ॥ पप्रच्छ कुशलं शैलो ब्राह्मणं को भवानिति ॥ उवाच सर्वं विप्रेन्द्रो गिरीन्द्रं सादरेण च ॥ १७ ॥
॥ ब्राह्मण उवाच ॥ घटिकां वृत्तिमाश्रित्य भ्रमामि धरणीतले ॥ मनोयायी सर्वगामी सर्वज्ञोऽहं गुरोर्वरात् ॥ १८ ॥ मया
ज्ञातं शंकराय सुतां दातुं त्वमिच्छसि ॥ इमां पद्मासमां दिव्यामज्ञातकुलशीलिने ॥ १९ ॥ निराश्रयायासङ्गायारूपाय निर्गुणाय च॥
श्मशानगामिने सर्वभूतनाथाय योगिने ॥ २० ॥ दिग्वाससेऽहिगात्राय विभूतिभूषणाय च ॥ व्यालग्राहिस्वरूपाय कालव्यापादनाय
च॥२१॥अज्ञातमृत्यवेऽज्ञायानाथायाबन्धवे भवे॥नग्नस्वर्गजटाभारधारिणे निर्धनाय च ॥ २२ ॥ अज्ञातवयसेऽतीव वृद्धाय चाविका
रिणे॥सर्वाश्रयाय भ्रमिणे नागहाराय भिक्षवे ॥ २३ ॥ निबोध ज्ञानिनां श्रेष्ठं नारायणं कुलोद्भवम् ॥ स ते पात्रानुरूपश्च पार्वतीदा
तृकर्मणि ॥ २४ ॥ महाजनः स्मेरमुखः श्रुतिमात्राद्भविष्यति ॥ लक्षशैलाधिपस्त्वं च न तस्यैकोऽस्ति बान्धवः ॥ २५ ॥ बान्धवा
न्मेनकां प्रश्नं कुरु शीघ्रं प्रयत्नतः॥ सर्वान्पृच्छ च यत्नेन हे बन्धा पार्वतीं विना ॥ २६ ॥ रोगिणे नौषधं शश्वत्कुपथ्यं रोचते सदा ॥
इत्युक्त्वा ब्राह्मणः शीघ्रं स्नात्वा भुक्त्वा मुदाऽन्वितः ॥२७॥ जगाम स्वालयं शान्तो वृन्दावनविनोदिनि ॥ ब्राह्मणस्य वचः श्रुत्वा
मेनोवाच हिमालयम् ॥ शोकेन साश्रुनयना हृदयेन विदूयता ॥ २८ ॥ मेनकोवाच ॥ शृणु शैलेन्द्र मद्वाक्यं परिणामसुखावहम्
॥ २९ ॥ पृच्छ शैलवरानस्मै न दास्यामि सुतामहम् ॥ त्यक्ष्यामि सर्वान्विषयान्भक्ष्यामि विषमेव च ॥ ३० ॥ गले बद्धाऽम्बिकां

पश्य यास्यामि घोरकाननम् ॥ गृहीत्वा पार्वतीं मेना गत्वा कोपालयं रुषा ॥३१॥ त्यक्त्वाऽऽहारं रुदन्ती च चकार शयनं भुवि॥ एतस्मिन्नन्तरे तत्र वसिष्ठो भ्रातृभिः सह ॥ ३२ ॥ आजगाम पुनस्तैश्च युक्ता पश्चादरुन्धती ॥ प्रणम्य शैलस्तान्सर्वान्स्वर्णसिंहासनं ददौ ॥ ३३ ॥ दत्त्वा षोडशोपचारान्पूजयामास भक्तितः ॥ ऋषयश्च सभामध्य सुखमूषुः सुखासने ॥ ३४ ॥ जगामारुन्धती तूर्णं यत्र मेना च पार्वती ॥ गत्वा ददर्श मेनां च शयानां शोकमूर्च्छिताम् ॥ ३५ ॥ उवाच मधुरं साध्वी सावधानां हितं वचः ॥ अरुन्धत्युवाच ॥ उत्तिष्ठ मेनके साध्वि त्वद्गृहेऽहमरुन्धती ॥ ३६ ॥ पितृणां मानसी कन्या मां जानीहि विधेर्वधूम् ॥ अरुन्धत्याः स्वरं श्रुत्वा शीघ्रमुत्थाय मेनका ॥ उवाच शिरसा नत्वा तां पद्मामिव तेजसा ॥ ३७ ॥ मेनकोवाच ॥ अहोऽद्य किमिदं पुण्यमस्माकं पुण्यजन्मनाम् ॥ ३८ ॥ वधूर्जगद्विधेः पत्नी वसिष्ठस्य ममालये ॥ संभ्रमेणेदमेवोक्ते गृहं तेऽहं च किंकरी ॥ ॥ ३९ ॥ ईश्वरी जगतां स्रष्टुरागता बहुपुण्यतः ॥ पाद्यं दत्त्वा स्वर्णपीठे वासयामास तां सतीम् ॥ ४० ॥ भोजयामास मिष्टान्नं बुभुजे कन्यया सह ॥ शिवस्य हेतोर्नीतिं च बोधयामास मेनकाम् ॥ ४१ ॥ अरुन्धती प्रसङ्गेन संबन्धयोजनानि च ॥ अथ शैलमृषीन्द्राश्च नीतिसारं परं वचः ॥ बोधयामासुः संबन्धयोजनानि प्रसङ्गतः ॥ ४२ ॥ ऋषय ऊचुः ॥ शैलेन्द्र श्रूयतां वाक्यमस्माकं शुभकारकम् ॥ ४३ ॥ शिवाय पार्वतीं देहि संहर्तुः श्वशुरो भव ॥ अयाचितारं देवेशं बोधयाशु प्रयत्नतः ॥ ४४ ॥ तव शङ्काविनाशाय ब्रह्मसंबन्धकर्मणि ॥ नेच्छको दारसंयोगे शंकरो योगिनां वरः ॥ ४५ ॥ विधेः प्रार्थनया देव तव कन्यां ग्रहीष्यति ॥ दुहितुस्ते तपस्यान्ते प्रतिज्ञानं चकार सः ॥ ४६ ॥ हेतुद्वयेन योगीन्द्रो विवाहं च करिष्यति ॥ ऋषीणां वचनं श्रुत्वा प्रहस्य च हिमालयः ॥ उवाच किंचिद्भीतश्च परं विनयपूर्वकम् ॥ ४७ ॥ हिमालय उवाच ॥ शिवस्य राजसामग्रीं न हि पश्यामि कांचन ॥ किंचिदाश्रममैश्वर्यं किं वा स्वजनबान्धवम् ॥ ४८ ॥ न कन्यामतिनिर्लिप्तयोगिने दातुमर्हति ॥ यूयं विधातुः पुत्राश्च सत्यं वदत निश्चितम् ॥ ४९ ॥ नानुरूपाय पुत्राय पिता कन्या ददाति चेत् ॥ कालाल्लोभाद्भयान्मोहाच्छताब्दं नर

कं व्रजेत् ॥ ५० ॥ न हि दास्याम्यहं कन्यामिच्छया शूलपाणिने ॥ यद्विधानं भवेद्योग्यमृषयस्तद्विधीयताम् ॥ ५१ ॥ हिमाल
यवचः श्रुत्वा वसिष्ठो विधिनन्दनः ॥ वेदवेदाङ्गविज्ञाता वेदोक्तं वक्तुमुद्यतः ॥ ५२ ॥ वसिष्ठ उवाच ॥ वचनं विविधं
शैल लौकिके वैदिके तथा ॥ सर्वं जानाति शास्त्रज्ञो निर्मलज्ञानचक्षुषा ॥ ५३ ॥ असत्यमहितं पश्चात्साम्प्रतं श्रुतिसुन्दरम् ॥
सुबुद्धं शत्रुर्वदति न हितं च कदाचन ॥ ५४ ॥ आपातप्रीतिजनकं परिणामसुखावहम् ॥ दयालुर्धर्मशीलश्च बोधयत्येव बान्धवम् ॥
॥ ५५ ॥ श्रुतिमात्रात्सुधातुल्यं सर्वकाले सुखावहम् ॥ सत्यसारं हितकरं वचसां श्रेष्ठमीप्सितम् ॥ ५६ ॥ एवं च त्रिविधं शैल नीति
शास्त्रनिरूपितम् ॥ कथ्यतां त्रिषु मध्ये किं वदामि वाक्यमीप्सितम् ॥५७॥ बाह्यसंपद्विहीनश्च शंकरस्त्रिदशेश्वरः ॥ तत्त्वज्ञानसमुद्रेषु
सन्निमग्नैकमानसः ॥५८॥ आपातभ्रमसंपत्तिर्विद्युच्छ्रीरिव नाशिनी ॥ सदानन्दस्येश्वरस्य स्वात्मारामस्य का स्पृहा ॥ ५९ ॥ गृही
ददाति स्वसुतां राज्यसंपत्तिशालिने ॥ कन्यां विद्वेषिणे दत्त्वा कन्याघाती भवेत्पिता ॥ ६० ॥ को वदेच्छंकरो दुःखी कुबेरो यस्य
किंकरः॥भ्रूभङ्गलीलया सृष्टिं स्रष्टु नष्टुं क्षमो हि यः॥६१॥निर्गुणः परमात्मा च य ईशः प्रकृतेः परः ॥ सर्वेशः स च निर्लिप्तो लिप्तश्च
सर्वजन्तुषु ॥ ६२ ॥ स एकः सृष्टिसंहारे स सर्वः सृष्टिकर्मणि ॥ निराकारश्च साकारो विभुः स्वेच्छामयः स्वयम् ॥ ६३ ॥ य ईशस्त्रि
विधां मूर्तिं विधत्ते सृष्टिकर्मणि ॥ सृष्टिस्थित्यन्तजननीं ब्रह्मविष्णुशिवाभिधाम्॥६४॥ ब्रह्मा च ब्रह्मलोकस्थो विष्णुः क्षीरोदवासकृत् ॥
शिवः कैलासवासी च सर्वाः कृष्णविभूतयः ॥ ६५ ॥ श्रीकृष्णश्च द्विधाभूतो द्विभुजश्च चतुर्भुजः ॥ चतुर्भुजश्च वैकुण्ठे गोलोके द्विभुजः
स्वयम् ॥ ६६ ॥ तस्य देवस्य तेंऽशाश्च ब्रह्मविष्णुमहेश्वराः ॥ केचिद्देवाः कलास्तस्य कलांशाश्चैव केचन ॥ ६७ ॥ कृष्णः सृष्ट्युन्मुख
श्चापि प्रकृतिं तत्र निर्ममे ॥ निर्माय तां च तद्योनौ वीर्याधानं चकार ह ॥६८॥ ततो डिम्भः समुद्भूतस्तन्मध्ये च महाविराट् ॥ महा
विष्णुः स विज्ञेयो श्रीकृष्णषोडशांशकः ॥ ६९ ॥ नाभिपद्मोद्भवो ब्रह्मा तस्यैव जलशायिनः ॥भालोद्भवस्तस्य स्रष्टुः शंकरश्चन्द्रशे
खरः ॥ ७० ॥ महाविष्णुर्वामपार्श्वात्संभूतो विष्णुरेव च ॥ सर्वे प्राकृतिकाः शैल ब्रह्मविष्णुशिवादयः ॥ ७१ ॥ धत्ते चतुर्विधां मूर्तिं

प्रकृतिः कृष्णसंभवा ॥ अंशेन लीलया सृष्टचै कलया बहुधा तया ॥७२॥ कृष्णवामांगसंभूता राधा रासेश्वरी स्वयम् ॥ मुखोद्भ
वा स्वयं वाणी रागाधिष्ठातृदेवता ॥ ७३ ॥ वक्षःस्थलोद्भवा लक्ष्मीः सर्वसंपत्स्वरूपिणी ॥ शिवा तेजःसु देवानामाविर्भावं चकार
सा ॥ ७४ ॥ निहत्य दानवान्सर्वान्देवेभ्यश्च श्रियं ददौ ॥ प्राप्य कल्पांतरे जन्म जठरे दक्षयोषितः ॥ ७५ ॥ नाम्ना सती शिवं प्राप
दक्षस्तस्मै ददौ च ताम् ॥ योगेन देहं तत्याज श्रुत्वा सा भर्तृनिंदनम् ॥७६॥ पितॄणां मानसी कन्या मेनका तव गेहिनी ॥ ललाभ तस्या
जठरे जन्म सा जगदंबिका ॥ ७७ ॥ शिवा शिवस्य पत्नीयं शैल जन्मनिजन्मनि ॥कल्पेकल्पे बुद्धिरूपा ज्ञानिनां जननी परा ॥७८॥
जतिस्मरा च सर्वज्ञा सिद्धिदा सिद्धिरूपिणी ॥ अस्या अस्थि चिताभस्म भक्त्या धत्ते शिवः स्वयम्॥७९॥देहि त्वं स्वेच्छया कन्यां
देहि भद्र शिवाय च ॥ अथवा सा स्वयं कांतस्थानं यास्यति द्रक्ष्यति ॥८०॥ प्राक्तनाद्यस्य या कांता सा तं प्राप्नोति वल्लभम् ॥
प्रजापतेर्निबंधं च न कोऽपि खंडितुं क्षमः ॥८१॥ विवाहे नोत्सुकः शंभुः स्वात्मारामश्च तत्त्ववित् ॥ तुष्टुवुस्तं सुराः सर्वे तारका
ख्येन पीडिताः ॥ ८२ ॥ देवानां पीडनं दृष्ट्वा ब्रह्मणा प्रार्थितो विभुः ॥ कृपया स्वीचकाराशु कृपालुर्देवसंसदि ॥ ८३ ॥ कृत्वा
प्रतिज्ञां योगींद्रो दृष्ट्वा क्लेशमसंख्यकम् ॥ दुहितुस्ते तपःस्थानमाजगाम द्विजात्मकः ॥ ८४ ॥ तामाश्वास्य वरं दत्त्वा जगाम निज
मंदिरम् ॥ तच्छ्रुत्वैवाययुः सर्वे सुराः शक्रादयो मुदा ॥ ८५ ॥ नारायणश्च भगवान्ब्रह्मा धर्मश्च सांप्रतम् ॥ ऋषयो मुनयः सर्वे
गंधर्वा यक्षराक्षसाः ॥ ८६ ॥ तत्र सर्वे मुदा युक्तैः समालोचनकर्तृभिः ॥ प्रस्थापिता वयं शीघ्रमनृणा सा अरुंधती ॥ ८७ ॥ तव प्रबो
धने प्रीतिर्वर्द्धते महती सदा ॥ संप्राप्तं शुभकार्यं च सर्वकालसुखावहम् ॥ ८८ ॥ शिवां शिवाय शैलेंद्र स्वेच्छया चेन्न दास्यसि ॥
भविता वा विवाहश्च भवितव्यबलेन च ॥ ८९ ॥ आगमिष्यति देवो यो नारायणसहायवान् ॥ रत्नसाररथे कृत्वा देवानां प्रवरं
वरम् ॥ ९० ॥ योगींद्राणां वरेण्यं तं ज्ञानिनां च गुरोर्गुरुम् ॥ आदिमध्यांतरहितमविकारमजं परम् ॥ ९१ ॥ वरं ददौ शिवायै स
शिवश्च तपसः स्थले ॥ न हीश्वरप्रतिज्ञातं दुर्लभं विफलं भवेत् ॥ ९२ ॥ ब्रह्मादिस्तंबपर्यंतं सर्वं नश्वरमस्थिरम् ॥ अहो प्रतिज्ञा

दुर्लङ्घ्या साधूनामविनाशिनी ॥ ९३ ॥ एको महेंद्रः शैलानां पक्षांश्चिच्छेद लीलया ॥ पवनो लीलया मेरोः शृंगभंगं चकार ह ॥
॥ ९४ ॥ के वा शैलेषु योद्धारः सुरैः सह हिमालय ॥ पतिष्यंति समुद्रेषु पवनैः प्रेरिताः क्षणात् ॥ ९५ ॥ एकार्थे यदि शैलेन्द्र
सर्वसंपद्विनश्यति ॥ सर्वान्रक्षति तद्दत्त्वा विना च शरणागतम् ॥ ९६ ॥ शरणागतरक्षार्थं प्रणांश्च दातुमर्हति ॥ पुत्रदारधनं सर्वानिति
नीतिविदो विदुः ॥ ९७ ॥ दत्त्वा विप्राय स्वसुतामनरण्यो नृपेश्वरः ॥ ब्रह्मशापाद्विमुक्तश्च ररक्ष सर्वसंपदम् ॥ ९८ ॥ तमाशु
बोधयामासुर्नीतिशास्त्रविदो जनाः ॥ ब्रह्मशापनिमग्नं च ब्रह्मण्यमतिकातरम् ॥ ९९ ॥ त्वमेव शैलराजेंद्र सुतां दत्त्वा शिवाय च ॥
रक्ष सर्वान्बंधुवर्गान्वशे कुरु सुरानपि ॥ १०० ॥ वसिष्ठस्य वचः श्रुत्वा प्रहस्य पर्वतेश्वरः ॥ पप्रच्छ नृपवृत्तांतं हृदयेन विदूयता
॥ १०१ ॥ हिमालय उवाच ॥ कस्य वंशोद्भवो ब्रह्मन्ननरण्यो नृपेश्वरः ॥ सुतां दत्त्वा स च कथमरक्षत्सर्वसंपदम् ॥ १०२ ॥
वसिष्ठ उवाच ॥ मनुवंशोद्भवो राजा सोऽनरण्यो नृपेश्वरः ॥ चिरंजीवी धर्मशीलो वैष्णवो विजितेंद्रियः ॥ १०३ ॥ स्वायंभुवो मनुः
पूर्वं ब्रह्मपुत्रोऽतिधार्मिकः ॥ राज्यं चकार धर्मेण युगानामेकसप्ततिम् ॥ १०४ ॥ ततो जगाम वैकुण्ठं सहितः शतरूपया ॥ संप्राप्य
दास्यं सान्निध्यं हरेर्दासो बभूव ह ॥ १०५ ॥ मनुर्बभूव तत्पश्चात्स्वयं स्वारोचिषो महान् ॥ स्वारोचिषे गते शैल बभूव मनुरुत्तमः
॥ ६ ॥ उत्तमे निर्गते धर्मी तामसो मनुरेव च ॥ ततो मनुर्बभूवात्र रैवतो ज्ञानिनां वरः ॥ ७ ॥ चाक्षुषश्च ततो ज्ञेयः श्राद्धदेवश्च
सप्तमः ॥ सावर्णिरष्टमो ज्ञेयः श्रीसूर्यतनयो महान् ॥ ८ ॥ चैत्रवंशोद्भवो राजा पुराऽऽसीत्सुरथो भुवि ॥ नवमो दक्षसावर्णिर्ब्रह्मसावर्णिको
दश ॥ ९ ॥ एकादशो मनुश्रेष्ठो धर्मसावर्णिरुच्यते ॥ ततश्च रुद्रसावर्णिर्विष्णुभक्तो जितेन्द्रियः ॥ ११० ॥ तत्परो देवसावर्णिरिंद्रसावर्णिकस्ततः
॥ इत्येवं कथिता बंधो मनवश्च चतुर्दश ॥ ११ ॥ एतेषु समतीतेषु बभूव ब्रह्मणो दिनम् ॥ इन्द्रसावर्णिवृत्तांतं सर्वं
मत्तो निशामय ॥ १२ ॥ मनूनां प्रवरो धर्मी शुद्धभक्तो गदाभृतः ॥ चकार राज्यं धर्मेण युगानामेकसप्ततिम् ॥ १३ ॥ राज्यं दत्त्वा
सुरेंद्राय जगाम तपसे वनम् ॥ सुरेंद्रस्य सुतः श्रीमाञ्छ्रीनिकेतुर्महाबलः ॥१४॥ तस्य पुत्रो महायोगी पुरीषतरुरेव च ॥ तस्य पुत्रोऽति

तेजस्वी गोकामुख इति स्मृतः ॥ १५ ॥ वृद्धश्रवाः सुतस्तस्य तत्पुत्रो भानुरेव च ॥ पुण्डरीकः सुतस्तस्य तत्पुत्रो जिह्वलस्तथा ॥
॥ १६ ॥ जिह्वलस्य सुतः शृङ्गी तत्पुत्रो भीम एव च ॥ तत्पुत्रोऽपि यशश्चन्द्रो यशसा च शशी जितः ॥ १७ ॥ तत्कीर्तिं निर्मलां
सन्तो गायन्ति संततं सुराः ॥ तस्य पुत्रो वरेण्यश्च पुरारण्यश्च तत्सुतः ॥१८॥ तत्पुत्रो धार्मिकः श्रीमान्धरारण्यश्च एव च ॥ तत्पुत्रो
मंगलारण्यस्तपस्वी ज्ञानिनां वरः ॥ १९ ॥ अपुत्रको नृपश्रेष्ठस्तपसे पुष्करं गतः ॥ सुचिरं च तस्तप्त्वा वरं लब्ध्वा महेश्वरात् ॥
॥ १२० ॥ संप्राप्य वैष्णवं पुत्रमनरण्यं जितेंद्रियम् ॥ दत्त्वा तस्मै च राज्यं च जगाम तपसे वनम् ॥ २१ ॥ अनरण्यो नृपश्रेष्ठः
सप्तद्वीपमहीपतिः ॥ चकार यज्ञशतकं भृगुणा च पुरोधसा॥२२॥तुच्छं मत्वाशु शक्रत्वं न लेभे नश्वरं सुधीः ॥ लीलया च जितः
शक्रो लीलया च जितो बलिः ॥२३॥ जिताश्च दानवेंद्रा वै ज्वलता स्वेन तेजसा ॥ बभूवुः शतपुत्राश्च राज्ञस्तस्य हिमालय ॥२४॥
कन्यैका सुंदरी रम्या पद्मा पद्मालयासमा॥सा कन्या यौवनस्था च बभूव पितृमंदिरे॥२५॥ चारं प्रस्थापयमास वराय नृपतीश्वरः ॥
एकदा पिप्पलादश्च गंतुं स्वाश्रममुत्सुकः॥२६॥ तपःस्थाने निर्जने च गन्धर्वं स ददर्श ह ॥ स्त्रीषु निर्मग्नचित्तं च शृङ्गाररससागरे
॥२७॥कामादतीव मत्तं च न जानन्तं दिवानिशम्॥दृष्ट्वा तं मुनिशार्दूलः सकामश्च बभूव ह॥२८॥ततः सुभग्नचित्तः सञ्चिन्तयन्दारसं
ग्रहम् ॥ एकदा पुष्पभद्रायां स्नातुं गच्छन्मुनीश्वरः ॥२९॥ ददर्श पद्मां युवतीं पद्मामिव मनोरमाम् ॥ केयं कस्येति पप्रच्छ
समीपस्थाञ्जनान्मुनिः ॥ १३० ॥ जना निवेदनं चक्रुः पद्माऽनरण्यकन्यका ॥ मुनिः स्नात्वाऽभीष्टदेवं संपूज्य राधिकेश्वरम्
॥ ३१ ॥ जगाम कामी भिक्षार्थमनरण्यसभाजिरे ॥ राजा शीघ्रं मुनिं दृष्ट्वा प्रणनाम भयाकुलः ॥ ३२ ॥ मधुपर्कादिकं दत्त्वा
पूजयामास भक्तितः ॥ कामात्सर्वं गृहीत्वा च ययाचे कन्यकां मुनिः ॥ ३३ ॥ मौनी बभूव नृपतिः किंचिन्निर्वक्तुमक्षमः ॥ मुनिः
पुनर्ययाचे तं कन्यां देहीति मे नृप ॥ ३४ ॥ अथवा भस्मसात्सर्वं करिष्यामि क्षणेन च ॥ सर्वे बभूवुराच्छन्ना गणाश्च तेजसा मुनेः
॥ ३५॥ रुरोद राजा सगणो दृष्ट्वा वृद्धं जरातुरम् ॥ महिष्यो रुरुदुः सर्वा इति कर्त्तव्यमक्षमाः ॥३६॥ मूर्च्छां प्राप महाराज्ञी कन्या

माता शुचाकुला ॥ पण्डितो नीतिशास्त्रज्ञो बोधयामास भूमिपम् ॥ ३७ ॥ महिषीं च नृपसुतान्कन्यकानीतिमुत्तमाम् ॥ अद्य वापि
दिनान्ते वा दातव्या कन्यका नृप ॥ ३८ ॥ पराय विप्रादन्यस्मै कस्मै वा दातुमर्हसि ॥ सत्पात्रं ब्राह्मणादन्यं न पश्यामि जगत्त्रये
॥ ३९ ॥ सुतां दत्त्वा च मुनये रक्षस्व सर्वसंपदम् ॥ राजकन्यानिमित्तेन सर्वसंपत्प्रणश्यति ॥ १४० ॥ सर्वं रक्षति तत्त्यक्त्वा
विना तं शरणागतम् ॥ राजा प्राज्ञवचः श्रुत्वा विलप्य च मुहुर्मुहुः ॥४१॥ कन्यां सालंकृतां कृत्वा मुनीन्द्राय ददौ किल ॥ कान्तां
गृहीत्वा स मुनिर्मुदितः स्वालयं ययौ ॥४२॥ राजा सर्वान्परित्यज्य जगाम तपसे शुचा ॥ भर्तुश्च दुहितुः शोकात्प्राणांस्तत्याज
सुन्दरी॥४३॥पुत्राः पौत्राश्च भृत्याश्च मूर्च्छां प्रापुर्नृपं विना ॥ अनरण्यस्तपस्तप्त्वा चिन्तयन्राधिकेश्वरम्॥४४॥ गोलोकनाथ संसेव्य
गोलोकं च जगाम ह ॥ बभूव कीर्तिमान्राजा ज्येष्ठपुत्रो नृपस्य च ॥ पुत्रवत्पालयामास प्रजाः सर्वा महीतले ॥१४५॥ इति श्रीब्रह्मवै
वर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे राधाकृष्णसंवादे एकचत्वारिंशोऽध्यायः ॥ ४१ ॥ वसिष्ठ उवाच ॥
अथानरण्यस्य कन्या सिषेवे भक्तितो मुनिम् ॥ कर्मणा मनसा वाचा लक्ष्मीर्नारायणं यथा ॥ १ ॥ एकदा स्वर्णदीं स्नातुं गच्छंतीं
सस्मितां सतीम् ॥ ददर्श पथि धर्मश्च मायया नृपलिंगकः ॥ २ ॥ चारुरत्नरथस्थश्च रत्नालंकारभूषितः ॥ नवीनयौवनश्रीमा
न्कामदेवसमप्रभः ॥३॥ दृष्ट्वा तां सुन्दरीं रम्यामुवाच मायया विभुः ॥ विज्ञातुमन्तस्तत्त्वं च तस्याश्च मुनियोषितः ॥ ४ ॥ धर्म
उवाच ॥ अयि सुन्दरि लक्ष्मीव राजयोग्ये मनोहरे ॥ अतीव यौवनस्थे च कामिनि स्थिरयौवने ॥५॥ जरातुरस्य वृद्धस्य समीपे त्वं
न राजसे ॥ चन्दनागुरुसंलिप्ता राजसे राजवक्षसि॥६॥ विप्रं तपःसु निरतं सत्यज्ञं मरणोन्मुखम्॥विहाय पश्य राजेन्द्रं रतिशूरं स्मरा
तुरम् ॥७॥ प्राप्नोति सुन्दरं पुण्यात्सौन्दर्यं पूर्वजन्मतः ॥ सफलं तद्भवेत्सर्वं रसिकालिंगनेन च ॥ ८ ॥ सहस्रसुन्दरीकान्तं कामशास्त्र
विशारदम् ॥ किंकरं कुरु मां कान्ते परित्यक्ष्यामि ता अपि ॥९॥ निर्जले निर्जने रम्ये शैलेशैले नदेनदे ॥ पुष्पोद्याने पुष्पिते च
सुगन्धिपुष्पवायुना ॥१०॥ मलये चन्दनारण्ये चारुचन्दनवायुना ॥ विहरिष्यामि कामेन कामिन्या च त्वया सह॥११॥कामज्वरेण

दग्धायाः शांतिं कर्तुमहं क्षमः ॥ विहरस्व मया सार्द्धं जन्मेदं सफलं कुरु ॥१२॥ इत्येवमुक्तवंतं तं स्वरथादवरुह्य च ॥ ग्रहीतुमुत्सुकं हस्ते तमुवाच पतिव्रता ॥ १३ ॥ पद्मोवाच ॥ दूरं गच्छ गच्छ दूरं पापिष्ठ भूमिपाधम ॥ मां चेत्पश्यसि कामेन सद्यो भस्म भविष्यसि ॥ १४ ॥ पिप्पलादं मुनिश्रेष्ठं तपासा पूतविग्रहम् ॥ विहाय त्वां भजिष्यामि स्त्रीजितं रतिलंपटम् ॥१५॥ स्त्रीजितस्पर्शमात्रेण सर्वं पुण्यं प्रणश्यति ॥ न भूमौ पातकी पापात्पापिनां स्त्रीजितात्परः ॥ १६ ॥ मां मातरं च स्त्रीभावं कृत्वा येन ब्रवीषि च ॥ भविष्यति क्षयस्तेन कालेन मम शापतः ॥ १७ ॥ श्रुत्वा धर्मः सतीशापं नृपमूर्तिं विहाय च ॥ धृत्वा स्वमूर्तिं देवेशः कंपमान उवाच ताम् ॥ १८ ॥ धर्म उवाच ॥ मातर्जानीहि मां धर्मं धर्मज्ञानां गुरोर्गुरुम् ॥ परस्त्रीमातृबुद्धिं च कुर्वन्तं संततं सति ॥ १९ ॥ अहं तवांतर्विज्ञातुमागतस्तव संनिधिम् ॥ युष्माकं च मनो जाने तथापि दैवबोधितः ॥ २० ॥ कृतं मे दमनं साध्वि न विरुद्धं यथोचितम् ॥ शास्तिः समुत्पथस्थानामीश्वरेण विनिर्मिता ॥ २१ ॥ धर्मं स्वधर्मं विज्ञातुं कालं कलयितुं क्षमः ॥ विधातारं संविधातुं तस्मै कृष्णाय ते नमः ॥२२॥ संहर्तुं यः क्षमः काले संहर्तारं भवं विभुः ॥ स्रष्टारं लीलया स्रष्टुं तस्मै कृष्णाय ते नमः ॥ २३ ॥ शत्रुं विधातुं मित्रं च सुप्रीतिं कलहं क्षमः ॥ स्रष्टुं नष्टुं तदेवं च तस्मै कृष्णाय ते नमः ॥ २४ ॥ शापं प्रदातुं सर्वांश्च सुखदुःखवरान्क्षमः ॥ संपदं विपदं यो हि तस्मै कृष्णाय ते नमः ॥ २५ ॥ प्रकृतिर्निर्मिता येन महाविष्णुश्च निर्मितः ॥ ब्रह्मविष्णुमहेशाद्यास्तस्मै कृष्णाय ते नमः ॥ २६ ॥ येन शुक्लीकृतं क्षीरं जलं शीतं कृतं पुरा ॥ दाहीकृतो हुताशश्च तस्मै कृष्णाय ते नमः ॥ २७ ॥ अतितेजः समुत्थाय तेजोरूपाय मूर्त्तये ॥ गुणश्रेष्ठनिर्गुणाय तस्मै कृष्णाय ते नमः ॥२८॥ सर्वस्मै सर्वबीजाय सर्वेषामन्तरात्मने॥ सर्वबंधुस्वरूपाय तस्मै कृष्णाय ते नमः ॥ २९ ॥ इत्युक्त्वा पुरतस्तस्यास्तस्थौ धर्मो जगद्गुरुः ॥ सा साध्वी तं च विज्ञाय सहसोवाच पर्वत ॥ ३० ॥ पद्मोवाच ॥ त्वमेव धर्मः सर्वेषां साक्षी च सर्वकर्मणाम् ॥ सर्वांतरेषु सर्वात्मा सर्वज्ञः सर्वतत्त्ववित् ॥ ३१ ॥ कथं मनो मे विज्ञातुं विडंबयसि किंकरीम् ॥ यत्कृतं त्वत्कृते ब्रह्मन्नपराधो बभूव मे ॥३२॥ त्वं च शप्तो मयाऽज्ञानात्स्त्रीस्वभावा

त्क्रुधा विभो ॥ का व्यवस्था भवेत्तस्य चिन्तयामीति सांप्रतम् ॥ ३३ ॥ आकाशोऽसौ दिशः सर्वा यदि नश्यन्ति वायवः ॥ तथापि
साध्वीशापस्तु न नश्यति कदाचन ॥ ३४ ॥ त्वं च नष्टो भवसि चेत्सृष्टिनाशो भवेत्तदा ॥ इतिकर्तव्यतामूढा तथापि त्वां वदा
म्यहम् ॥ ३५ ॥ सत्ये पूर्णश्चतुष्पादैः पौर्णमास्यां यथा शशी ॥ विराजसे देवराज सर्वकालं दिवानिशम् ॥ ३६ ॥ पादक्षयश्च त्रेता
यां भगवन्भविता तव ॥ पादौ परौ द्वापरे च तृतीयश्च कलौ विभो ॥ ३७ ॥ कलिशेषे शेषपादस्त्ववाच्छन्नो भविष्यति ॥ पुनः
सत्ये समायाते परिपूर्णो भविष्यसि ॥ ३८ ॥ सत्ये सर्वव्यापकस्त्वं तदन्येषु च कुत्रचित् ॥ यत्र स्थानं तवाधारो वदामि श्रूयतां
विभो ॥३९ ॥ वैष्णवेषु च सर्वेषु यतिषु ब्रह्मचारिषु ॥ पतिव्रतासु प्राज्ञेषु वानप्रस्थेषु भिक्षुषु ॥ ४० ॥ नृपेषु धर्मशीलेषु सत्सु सद्वै
श्यजातिषु ॥ द्विजसेविषु शूद्रेषु सत्संसर्गस्थितेषु च ॥ ४१॥ एषु त्वं सततं पूर्णो धर्मराज विराजसे ॥ युगेयुगे तदाधारा यत्र पुण्य
तमा जनाः ॥ ४२ ॥ अश्वत्थवटबिल्वेषु तुलसीचंदनेषु च ॥ दीक्षापरीक्षाशपथगोष्ठगोष्पदभूमिषु ॥४३॥ विवाहेषु च पुष्पेषु
विद्यमानोऽसि शाखिषु ॥ देवालयेषु तीर्थेषु सतां शश्वद्गृहेषु च ॥ ४४ ॥ वेदवेदांगश्रवणे जलेषु च सभासु च ॥श्रीकृष्णगुणनामोक्त
श्रुतिगीतस्थलेषु च ॥ ४५ ॥ व्रतपूजातपोन्याययज्ञसाक्षिस्थलेषु च ॥ गवां गृहेषु गोष्ठेव विद्यमानो हि पश्यसि ॥ ४६ ॥ कृशता
तेन भविता धर्म तेषु स्थलेषु च ॥ एतदन्येषु कृशता यदगम्यं च तच्छृणु ॥ ४७ ॥ पुंश्चलीषु च सर्वासु गृहेषु नरघातिनाम् ॥
नरघातिषु नीचेषु मूर्खेषु च खलेषु च ॥ ४८ ॥ देवतागुरुविप्रेष्टपाल्यानां धनहारिषु ॥ असन्नरेषु धूर्तेषु चौरेषु रतिभूमिषु ॥४९॥
दुरोदरसुरापानकलहानां स्थलेषु च ॥ शालग्रामसाधुतीर्थपुराणरहितेषु च ॥ ५० ॥ दस्युस्नेहेषु वादेषु तालच्छायासु गर्विषु॥असि
जीविमषीजीविदेवलग्रामयाजिषु ॥५१॥ वृषवाहस्वर्णकारजीवहिंसोपजीविषु ॥ भर्तृनिंदितनारीषु स्त्रीजितेषु च पुंसु च ॥ ५२ ॥
दीक्षासंध्याविष्णुभक्तिविहीनेषु द्विजेषु च ॥ स्वांगकन्याविक्रयिषु स्वयोषिद्विक्रयेष्वथ ॥ ५३ ॥ शालग्रामसुरग्रंथभूमिविक्रयिषु
प्रभो ॥ मित्रद्रोहिकृतघ्नेषु सत्यविश्वासघातिषु ॥ ५४ ॥ शरणागतदीनेषु चाश्रितघ्नेषु नृष्वपि ॥ शश्वन्मिथ्योक्तिशीलेषु तथा सीमाप

हारिषु ॥ ५५ ॥ कामात्क्रोधात्तथा लोभान्मिथ्यासाक्षिप्रवादिषु ॥ पुण्यकर्मविहीनेषु पुण्यकर्मविरोधिषु ॥ ५६ ॥ स्थातुमेतेषु निन्द्येषु नाधिकारस्तव प्रभो ॥ ममापि वचनं सत्यं बभूव तत्क्षणं तव ॥ ५७ ॥ यास्यामि पतिसेवायै गच्छ तात स्वमन्दिरम् ॥ इत्येवंवादिनीं साध्वीमुवाच विधिनन्दनः ॥ प्रसन्नवदनः श्रीमानतीव विनयं वचः ॥ ५८ ॥ धर्म उवाच ॥ धन्याऽसि पतिभक्ताऽसि स्वस्ति तेऽस्तु च संततम् ॥ ५९ ॥ वरं गृहाण दास्यामि मत्परित्राणकारिणि ॥ युवा भवतु भर्ता ते रतिशूरश्च कन्यके ॥ ॥ ६० ॥ रूपवान्गुणवान्साध्वि संततं स्थिरयौवनः ॥ परमैश्वर्यसंयुक्ता त्वं भव स्थिरयौवना ॥ ६१ ॥ चिरजीवी भवतु स मार्कण्डेयात्परः सुते ॥ कुबेराद्धनवांश्चैव शक्रादैश्वर्यवानपि ॥ ६२ ॥ विष्णुभक्तः शिवसमः सिद्धस्तु कपिलात्परः ॥ स्वामिसौभाग्यसंयुक्ता भव त्वं जीवनावधि ॥ ६३ ॥ गृहा भवन्तु ते साध्वि कुबेरभवनाधिकाः ॥ माता त्वं दशपुत्राणां गुणिनां चिरजीविनाम् ॥ ॥ ६४ ॥ स्वभर्तुरधिकानां च भविष्यसि न संशयः ॥ इत्येवमुक्त्वा संतस्थौ धर्मराजश्च पर्वत ॥६५॥ सा तं प्रदक्षिणीकृत्य प्रणम्य स्वगृहं ययौ ॥ धर्मस्तामाशिषं युक्त्वा जगाम निजमन्दिरम् ॥ ६६ ॥ पतिव्रतां प्रशशंस प्रतिसंसदि संसदि ॥ सा रेमे स्वामिना सार्द्धं यूना रहसि संततम् ॥ ६७ ॥ पश्चाद्बभूव सत्पुत्रा तद्भर्तुरधिका गुणैः ॥ शैलेन्द्र कथितं सर्वमितिहासं पुरातनम् ॥ ६८ ॥ दत्त्वाऽनरण्यः स्वसुतां ररक्ष सर्वसंपदम् ॥ त्वमेव कन्यकां दत्त्वा सर्वेषामीश्वराय च ॥६९॥ रक्ष सर्वबन्धुवर्गानात्मनः सर्वसंपदम् ॥ सप्ताहे समतीते च दुर्लभेऽतिशुभे क्षणे ॥७०॥ लग्नाधिपे च लग्नस्थे चन्द्रे स्वतनयान्विते ॥ मोदते रोहिणीयुक्ते विशुद्धे चन्द्रतारके ॥ ७१ ॥ मार्गशीर्षे चन्द्रवारे सर्वदोषविवर्जिते ॥ सर्वसद्ग्रहसंदृष्टे ह्यसद्ग्रहविवर्जिते ॥ ७२ ॥ सदपत्यप्रदेऽतीव पतिसौभाग्यदायिनि ॥ अवैधव्यप्रदे सौख्यप्रदे जन्मनि जन्मनि ॥ ७३ ॥ अत्यन्तप्रेमाविच्छेदप्रदायिनि परात्परे ॥ कन्यां प्रदाय देवाय त्वं कृती भव पर्वत ॥ ७४ ॥ जगदम्बां जगत्पित्रे मूलप्रकृतिमीश्वरीम् ॥ तेजःस्वरूपां सर्वेषां देवानां देवपूजिताम् ॥ ७५ ॥ आविर्भूता पुरा कल्पे देवानां रक्षणाय च ॥ तेजोराशिः सुरौघाणां प्रज्वलन्ती दिशो दश ॥ ७६ ॥ अस्याः स्वतेजसा दैत्याः केचिद्दग्धाः पला

यिताः ॥ केचिद्बभ्रमुः शैलेन्द्र भस्मीभूताश्च भूतले ॥ ७७ ॥ बिलं प्रविविशुः केचिन्मूर्च्छां प्रापुश्च केचन ॥ केचिद्दन्ते तृणं
कृत्वा जग्मुः शरणमीश्वरीम् ॥ ७८ ॥ केचिच्चिक्षिपुरस्त्राणि स्तम्भिता अपि केचन ॥ केचिच्चिरं रणं कृत्वा ययुः स्वर्ग
मनामयम् ॥ ७९ ॥ निःशत्रवो बभूवुस्ते सुरा अस्याः प्रसादतः ॥ कृष्णाज्ञया सा कल्पान्ते दक्षकन्या बभूव ह ॥ ८० ॥
दक्षश्च विधिवद्देवीं प्रददौ शूलपाणये ॥ देवेन मत्पितुर्यज्ञे सहसा सुरसंसदि ॥ ८१ ॥ बभूव कलहः शैल तेन शूलभृता महान् ॥
ब्रह्माणं च नमस्कृत्य ययौ रुष्टस्त्रिलोचनः ॥ ८२ ॥ दक्षश्च सगणो रुष्टः प्रययौ स्वालयं तदा ॥ कोपात्संभृतसंभारो दक्षो यज्ञं च
कार ह ॥ ८३ ॥ न ददौ यज्ञभागं च मात्सर्याच्छूलपाणये ॥ दृष्ट्वा सती प्रकुपिता जनकं रक्तलोचना ॥ ८४ ॥ निर्भर्त्स्य च
बहुतरं हृदयेन विदूयता ॥ यज्ञस्थानात्समुत्थाय जगाम मातुरन्तिकम् ॥ ८५ ॥ भविष्यं कथयामास त्रिकालज्ञा परात्परा ॥ यज्ञ
भङ्गादिकं वाऽपि स्वपितुश्च पराभवम् ॥ ८६ ॥ पलायनं च देवानां यज्ञस्थानाद्गिरीश्वरम् ॥ मुनीनामृत्विजां चैव पर्वतानां तथैव
च ॥ ८७ ॥ जयं शंकरसैन्यानां स्वात्मनो मृत्युमेव च ॥ शोकात्पर्यटनं भर्तुर्विरहातुरचेतसा ॥ ८८ ॥ निर्माणं नेत्ररसः प्रबोधं
च जनार्दनात् ॥ मूर्तिभेदात्पुनः प्राप्तिं विहारं तस्य तत्समम् ॥८९॥ अपरं भवितव्यं च सर्वमुक्त्वा जगाम सा ॥ स्वमात्रा भगि
नीभिश्च प्रतिषिद्धा च दुःखिता ॥ ९० ॥ बभूवादर्शना योगात्सर्वासां सिद्धियोगिनी ॥ गत्वा सा जाह्नवीतीरं स्मृत्वा संपूज्य शंकरम्
॥ ९१ ॥ स्मृत्वा तच्चरणाम्भोजं देहं तत्याज सुन्दरी ॥ गन्धमादनद्रोणीस्थं शरीरं प्रविवेश ह ॥ ९२ ॥ संजहार पुरा येन दैत्यानाम
खिलं कुलम् ॥ हाहाकारं प्रचक्रुश्च सुराः सर्वेऽतिविस्मिताः ॥ ९३ ॥ जग्मुः शंकरसेनाश्च दक्षयज्ञं विनश्य च ॥ पराभवं च सर्वेषां
कृत्वा शोकातुराः पराः ॥ ९४ ॥ सत्वरं सर्ववृत्तान्तं कथयामासुरीश्वरम् ॥ श्रुत्वा प्रवृत्तिं संहर्ता सर्वरुद्रगणैर्वृतः ॥ जगाम स्वर्णदी
तीरं यत्र देवीकलेवरम् ॥ ९५ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे सतीदेहत्यागो नाम द्विच
त्वारिंशोऽध्यायः ॥ ४२ ॥ नारायण उवाच ॥ अथ दुर्गां महादेवस्सतीमूर्तिं मनोहराम् ॥ अम्लानपद्मवक्त्रां तां शया

नां जाह्नवीतटे ॥ १ ॥ दधतीमक्षमालां च प्रतप्तकाञ्चनप्रभाम् ॥ तेजसा प्रज्वलन्तीं च दधानां शुक्लवाससम् ॥ २ ॥ दृष्ट्वा सतीश
रीरं च प्रदग्धो विरहाग्निना ॥ तत्त्वराशिर्मूर्तिमांश्च मूर्च्छां प्राप तथापि च ॥ ३ ॥ कलत्रशोको बलवान्स्वात्मारामं परात्परम् ॥
बाधते वेदबीजं तं योगीन्द्राणां गुरोर्गुरुम् ॥ ४ ॥ क्षणेन चेतनां प्राप्य तामुवाच त्रिलोचनः ॥ निरीक्ष्य वदनाम्भोजं स्थाणुः स्थाणुरि
वापरः ॥ ५ ॥ साश्रुनेत्रोऽतिदीनश्च दीनानां शरणप्रदः ॥ दीनदैन्यापहारी च विललाप परं वचः ॥ ६ ॥ शंकर उवाच ॥
उत्तिष्ठोत्तिष्ठ सुभगे सति प्राणेश्वरि प्रिये ॥ शङ्करोऽहं तव स्वामी पश्य मां निकटागतम् ॥ ७ ॥ शिवं शिवप्रदं सर्वसंपद्रूपं च सिद्धि
दम् ॥ सर्वात्मानं च सर्वेशं शवतुल्यं त्वया विना ॥ ८ ॥ शक्तोऽहं च त्वया सार्द्धं सर्वशक्तिस्वरूपया ॥ शक्तिहीनः शवसमो निश्चे
ष्टः सर्वकर्मसु ॥ ९ ॥ यश्च शक्तिं न जानाति ज्ञानहीनश्च निन्दति ॥ तं त्यक्तुमुचितं विज्ञे कथं मां त्यजसि प्रिये ॥ १० ॥ स्वयं ब्रह्मा
स्वयं विष्णुः साध्यभूता वयं तव ॥ सस्मितं सकटाक्षं च वद किंचित्सुधोपमम् ॥ ११ ॥ मधुराभासदृष्ट्या च मां दग्धं सेचनं
कुरु ॥ मां दृष्ट्वा दूरतः शीघ्रं स्निग्धं वदसि सस्मितम् ॥ १२ ॥ कथमद्यापि रुष्टेव विलपन्तं न भाषसे ॥ प्राणाधिके समुत्तिष्ठ रुदंतं
मां न पश्यसि ॥ १३ ॥ परित्यज्य च नः प्राणान्गन्तुं नार्हसि सुन्दरि ॥ जगदम्बे समुत्तिष्ठ प्राणाधारे परात्परे ॥ १४ ॥ पति
व्रते समुत्तिष्ठ कथं मां नाद्य सेवसे ॥ कथं करोषि विज्ञाय व्रतभङ्गं श्रुतिप्रसूः ॥ १५ ॥ इत्युक्त्वा मृतदेहं च प्रियाया विरहातुरः ॥
निधायोरसि संश्लिष्य चुचुम्ब च पुनःपुनः ॥ १६ ॥ अधरे चाधरं दत्त्वा वक्षो वक्षसि शङ्करः ॥ पुनःपुनः समाश्लिष्य पुनर्मूर्च्छाम
वाप सः ॥ १७ ॥ पुनः स चेतनां प्राप्य वेगादुत्थाय शोकतः ॥ दुद्राव च यथोन्मत्तो ज्ञानिनां च गुरोर्गुरुः ॥ १८ ॥ सप्तद्वीपं सप्तसि
न्धुं लोकालोकं च काञ्चनम् ॥ बभ्राम भ्रान्तवज्ज्ञानी सतीं कृत्वा स्ववक्षसि ॥ १९ ॥ शतशृङ्गगिरेः पार्श्वे जम्बुद्वीपे च भारते॥सु
निर्जनेऽक्षयवटे गङ्गातीरे सरित्तटे ॥ २० ॥ रुरोदोच्चैः स्वयं कृत्वा सति साध्वीत्युदीर्य च ॥ त्रिनेत्रनेत्रनीरेण संबभूव सरोवरम्
॥ २१ ॥ तन्नेत्रं च सरो नाम मुनीनां तपसः स्थलम् ॥ योजनद्वयविस्तीर्णं पुण्यतीर्थं मनोहरम् ॥ २२ ॥ यत्र स्नात्वा पुनर्जन्म

नराणां न भवेद्गिरे ॥ शतजन्मकृतं पापं स्नानमात्रेण नश्यति ॥ २३ ॥ त्यक्त्वा तां मानवीं मूर्तिं नरा यान्ति हरेः पदम् ॥ स तत्र रोदनं त्यक्त्वा पुनर्बभ्राम मेदिनीम् ॥ २४ ॥ पूर्णमब्दं महायोगी विरहातुरमानसः ॥ सतीगलितप्रत्यङ्गैरंगैश्च पर्वतेश्वर ॥ २५ ॥ बभूव सिद्धपीठानां समूहो वाञ्छितप्रदः ॥ शेषाङ्गानां महादेवः संस्कारं वै विधाय च ॥२६॥ अस्थिमालां विनिर्माय चकार कण्ठभूषणम् ॥ नित्यं तद्भस्म भक्त्या च चकार गात्रलेपनम्॥२७॥ सति प्राणेश्वरीत्युक्त्वा पुनर्मूर्च्छामवाप सः॥ विसस्मार ब्रह्म परमात्मानमात्मसंभवः ॥२८॥ स्वात्मारामः पूर्णकामो निश्चेष्टो विरहज्वरात् ॥ तं शयानं गिरिवरस्याभ्याशे वटमूलके ॥२९॥ दृष्ट्वा देवाः समाजग्मुर्विस्मिताः शिवसन्निधिम् ॥ नारायणश्च भगवानीश्वरः सह पार्षदैः ॥३०॥ रत्नयानेनाजगाम पद्मार्चितपदाम्बुजः॥ रत्नालंकारशोभाढ्यः पीतवासाश्चतुर्भुजः ॥ ३१ ॥ ईषद्धास्यप्रसन्नास्यो वनमालाविभूषितः ॥ ब्रह्मा शेषश्च धर्मश्च सुराः सर्वे महर्षयः ॥ ३२ ॥ समूषुरीशसदसि लक्ष्मीकान्तं प्रणम्य ते ॥ श्रीहरिः शङ्करमहो कृत्वा वक्षसि मूर्च्छितम् ॥ रुदन्तं बोधयामास ज्ञानीशो ज्ञानिनां गुरुम् ॥ ३३ ॥ श्रीभगवानुवाच ॥ स्वात्माराम निबोधेदं मदीयं वचनं शृणु ॥ ३४ ॥ हितमध्यात्मसारं च दुःखशोकनिकृन्तनम् ॥ सर्वाध्यात्मविद्यमानबीजं ज्ञाननिधिं विधिम् ॥ ३५ ॥ तथापि बोधयामि त्वां सर्वज्ञं वेधसां विधिम् ॥ बुधं बोधयितुं शक्तोऽबुधोऽपि प्राणसंकटे ॥ ३६ ॥ व्यवहारोऽस्ति लोकेषु सर्वः सर्वपरस्परम् ॥ मायाश्रिता गुणाः सर्वे हेतवः सुखदुःखयोः ॥ ॥ ३७ ॥ विष्णुमाया बलवती गुणयुक्तं प्रबाधते ॥ दुःखं शोकं भयं शंभो दुर्दिने भवतीश्वर ॥ ३८ ॥ तत्रातीते कुतस्तानि सुदिने च समागते ॥ हर्ष ऐश्वर्यदर्पश्च संततं तत्र वर्द्धते ॥ ३९ ॥ सर्वाण्येतानि गण्यन्ते स्वप्नानीव विपश्चितः ॥ ज्ञानं लभ महादेव ज्ञानबीज सनातन ॥ ४० ॥ चेतनां कुरु भद्रं ते सतीं प्राप्स्यसि निश्चितम् ॥ तत्तोयं शीतता नित्यं नाग्नि मुञ्चति दाहिका ॥ ४१ ॥ तेजः सूर्यं महीं गन्धो तथा त्वां च सती शिव ॥ शैलेत्येवं समाकर्ण्य हरिं किंचिदुवाच ह ॥ ४२ ॥ नेत्राण्युन्मीलनं कृत्वा त्रिनेत्रः श्रूयतामिति ॥ त्रिनेत्र उवाच ॥ कस्त्वं तेजःस्वरूपोऽसि क इमे तव सन्निधौ ॥ ४३ ॥ किन्नाम भवतश्चैषां कानि नामानि

का सती ॥ कोऽहं को मे भवान्ब्रूत किंकराः कुत आगताः ॥ ४४ ॥ क्व यास्यसि क्व यास्यामि क्व गच्छन्त इमे वद॥हरिरित्येवमा
कर्ण्य रुरोद सगणो गिरे ॥ ४५ ॥ नेत्रनीरैस्त्रिनेत्रं तं रुदन्तं प्रसिषेच सः ॥ हरिस्त्रिनेत्रयोर्नेत्रनीरपातेन तत्र वै ॥४६॥ बभूव सरसां
श्रेष्ठं तीर्थं भुवनपावनम् ॥ भारतेऽस्तगिरेः पश्चात्तत्राक्षयवटांतिके ॥ ४७ ॥ स्थलं बभूव तपसां मुक्तिबीजं तपस्विनाम् ॥ अथो
वाच पुनः शीघ्रमाध्यात्मं च हरं हरिः ॥ ४८ ॥ शृण्वतां सर्वदेवानां मुनीनामूर्ध्वरेतसाम् ॥ श्रीभगवानुवाच ॥ शृणु शंकर
वक्ष्यामि ज्ञानानंद सनातन ॥४९॥ ज्ञानं ज्ञाननिधे शोकाद्विस्मृतोऽसि परात्पर ॥ सुदिनं दुर्दिनं शश्वद्भवत्येव भवे भवे ॥ ५० ॥
सर्वेषां प्राकृतानां च ते बीजे सुखदुःखयोः॥सुखाद्भवति हर्षश्च दर्पः शौर्यं प्रमत्तता ॥ ५१ ॥ राग ऐश्वर्यकामश्च विद्वेषश्च निरन्त
रम् ॥ दुःखाच्छोकात्समुद्वेगाद्भयं नित्यं प्रवर्तते ॥ ५२ ॥ हतान्येतानि सर्वाणि हते बीजे महेश्वर ॥ सुदिनं दुर्दिनं चैव सर्वकर्मौद्भवं
भव ॥ ५३ ॥ तत्कर्म तपसा साध्यं कर्मणा च शुभाशुभम् ॥ तपः स्वभावसाध्यं च स्वभावोऽभ्यासतो भवेत्॥५४॥संसर्गसाध्यो
ऽध्यासश्च संसर्गः पुण्यतो भवेत्॥पुण्यबीजं मनश्चैव पापबीजं च चंचलम् ॥ ५५ ॥ मनः शंभो ममांशश्च सर्वेंद्रियपुरःसरम्॥सर्वेषां
जनकोऽहं च चित्त्वं ब्रह्मा पतिस्त्रयम् ॥ ५६ ॥ ब्रह्मैकं मूर्तिभेदस्तु गुणभेदेन संततम् ॥ तद्ब्रह्म विविधं वस्तु सगुणं निर्गुणं शिव
॥ ५७ ॥ मायाश्रितो यः सगुणो मायाऽतीतश्च निर्गुणः ॥ स्वेच्छामयश्च भगवानिच्छया विकरोति च॥ ५८ ॥ इच्छाशक्तिश्च प्रकृ
तिर्नित्या सर्वप्रसूः सदा ॥ केचिदेकं वदन्त्येव ब्रह्मज्योतिः सनातनम् ॥ ५९ ॥ केचिद्वदन्ति द्विविधं ब्रह्म प्रकृतिपूर्वकम् ॥ शृणु ये च
वदन्त्येकं मायापुरुषयोः परम् ॥६०॥ तस्माद्भवति तौ द्वौ च तद्ब्रह्म सर्वकारणम् ॥ अथ चैकं परं ब्रह्म द्विविधं भवतीच्छया ॥
॥ ६१ ॥ इच्छाशक्तिश्च प्रकृतिः सर्वशक्तिप्रसूः सदा ॥ तत्राशक्तश्च सगुणः सर्वाधारः सनातनः ॥ ६२ ॥ सर्वेश्वरः सर्वसाक्षी सर्व
त्रास्ति फलप्रदः ॥ शरीरं द्विविधं शंभो नित्यं प्राकृतमेव च ॥ ६३ ॥ नित्यं विनाशरहितं नश्वरं प्राकृतं सदा ॥ अहं त्वं चापि
भगवान्नावयोर्नित्यविग्रहः ॥ ६४ ॥ आवयोरंशभूता ये प्राकृता नष्टविग्रहाः ॥ रुद्रादयस्त्वदंशाश्च मदंशा विष्णुरूपिणः ॥ ६५ ॥

खं० ४ पृ०
अ० ४३

ममाप्येवं द्विधा रूपं द्विभुजं च चतुर्भुजम्॥चतुर्भुजोऽहं वैकुण्ठे पद्मया पार्षदैः सह ॥ ६६ ॥ गोलोके द्विभुजोऽहं च गोपीभिः सह राधया ॥ द्विविधं ये वदन्त्येवं द्वौ प्रधानौ तु तन्मते॥ ६७ ॥पुरुषश्च सदा नित्यो नित्या प्रकृतिरीश्वरी ॥ सदा तौ द्वौ च संश्लिष्टौ सर्वेषां पितरौ शिव ॥ ६८ ॥ सशरीरौ निःशरीरौ स्वेच्छया सर्वरूपिणौ ॥ प्राधान्यं च यथा पुंसः प्रकृतेश्च सदा तथा ॥ ६९ ॥ सतीमिच्छसि चेच्छम्भो प्रकृतेः स्तवनं कुरु ॥ यत्स्तोत्रं च त्वया दत्तं पुरा दुर्वाससे मुदा ॥ ७० ॥ तद्दिव्यं कण्वशाखोक्तं भज तेन जगत्प्रसूम् ॥ शोकनाशो भवतु ते शिवं शिव ममाशिषा ॥ ७१ ॥ दूरं विप्लवहेतुश्च यातु स्त्रीविरहज्वरः ॥ इत्येवमुक्त्वा लक्ष्मीशो विरराम गिरीश्वरम् ॥७२॥ स्तवनं कर्तुमारेभे प्रकृतेश्च महेश्वरः ॥ स्नात्वा नत्वा च श्रीकृष्णं ब्रह्माणं भक्तिसंयुतः॥पुटाञ्जलियुतो भूत्वा पुलकाञ्चितविग्रहः ॥ ७३ ॥ महेश्वर उवाच ॥ ओं नमः प्रकृत्यै मन्त्रः ॥ ब्राह्मि ब्रह्मस्वरूपे त्वं मां प्रसीद सनातनि ॥ परमात्मस्वरूपे च परमानन्दरूपिणि ॥ ७४ ॥ भद्रे भद्रप्रदे दुर्गे दुर्गघ्ने दुर्गनाशिनि ॥ पोतस्वरूपे जीर्णे त्वं मां प्रसीद भवार्णवे ॥ ॥ ७५ ॥ सर्वस्वरूपे सर्वेशि सर्वबीजस्वरूपिणि ॥ सर्वाधारे सर्वविद्ये मां प्रसीद जयप्रदे ॥ ७६ ॥ सर्वमङ्गलरूपे च सर्वमङ्गलदायिनि ॥ समस्तमङ्गलाधारे प्रसीद सर्वमङ्गले ॥ ७७ ॥ निद्रे तन्द्रे क्षमे श्रद्धे तुष्टिपुष्टिस्वरूपिणि ॥ लज्जे मेधे बुद्धिरूपे प्रसीद भक्तवत्सले ॥ ७८ ॥ वेदस्वरूपे वेदानां कारणे वेददायिनि ॥ सर्ववेदाङ्गरूपे च वेदमातः प्रसीद मे ॥ ७९ ॥ दये जये महामाये प्रसीद जगदम्बिके ॥ क्षान्ते शान्ते च सर्वान्ते क्षुत्पिपासास्वरूपिणि ॥ ८० ॥ लक्ष्मीर्नारायणक्रोडे स्रष्टुर्वक्षसि भारति ॥ मम क्रोडे महामाये विष्णुमाये प्रसीद मे ॥ ८१ ॥ कलाकाष्ठास्वरूपे च दिवारात्रिस्वरूपिणि ॥ परिणामप्रदे देवि प्रसीद दीनवत्सले ॥ ८२ ॥ कारणे सर्वशक्तीनां कृष्णस्योरसि राधिके ॥ कृष्णप्राणाधिके भद्रे प्रसीद कृष्णपूजिते ॥ ८३ ॥ यशः स्वरूपे यशसां कारणे च यशःप्रदे ॥ सर्वदेवीस्वरूपे च नारीरूपविधायिनि ॥ ८४ ॥ समस्तकामिनीरूपे कलांशेन प्रसीद मे ॥ सर्वसंपत्स्वरूपे च सर्वसंपत्प्रदे शुभे ॥ ८५ ॥ प्रसीद परमानन्दे कारणे सर्वसंपदाम् ॥ यशस्विनां पूजिते च प्रसीद यशसां

निधे ॥ ८६ ॥ आधारे सर्वजगतां रत्नाधारे वसुन्धरे ॥ चराचरस्वरूपे च प्रसीद मम मा चिरम् ॥ ८७ ॥ योगस्वरूपे योगीशे
योगदे योगकारणे ॥ योगाधिष्ठात्रि देवीशे प्रसीद सिद्धयोगिनि ॥ ८८ ॥ सर्वसिद्धिस्वरूपे च सर्वसिद्धिप्रदायिनि ॥ कारणे सर्वसिद्धीनां
सिद्धेश्वरि प्रसीद मे ॥ ८९ ॥ व्याख्यानं सर्वशास्त्राणां मतभेदे महेश्वरि ॥ ज्ञाने यदुक्तं तत्सर्वं क्षमस्व परमेश्वरि ॥ ९० ॥
केचिद्वदन्ति प्रकृतेः प्राधान्यं पुरुषस्य च ॥ केचित्तत्र मतद्वैधे व्याख्याभेदं विदुर्बुधाः ॥ ९१ ॥ महाविष्णोर्नाभिदेशे स्थितं तं
कमलोद्भवम् ॥ मधुकैटभौ महादैत्यौ लीलया हंतुमुद्यतौ ॥ ९२ ॥ दृष्ट्वा स्तुतिं प्रकुर्वन्तं ब्रह्माणं रक्षितुं पुरा ॥ बोधयामास गोविन्दं
विनाशहेतवे तयोः ॥ ९३ ॥ नारायणस्त्वद्भक्त्या च जघान तौ महासुरौ ॥ सर्वेश्वरस्त्वया सार्द्धमनीशोऽयं त्वया विना ॥ ९४ ॥
पुरा त्रिपुरसंग्रामे गगनात्पतिते मयि ॥ त्वया च विष्णुना सार्द्धं रक्षितोऽहं सुरेश्वरि ॥९५॥ अधुना रक्ष मामीशे प्रदग्धं विरहाग्निना॥
स्वात्मदर्शनपुण्येन क्रीणीहि परमेश्वरि ॥९६॥ इत्युक्त्वा विरतः शंभुर्ददर्श गगनस्थिताम् ॥ रत्नसाररथस्थां तां देवीं शतभुजां
मुदा ॥ ९७ ॥ तप्तकाञ्चनवर्णाभां रत्नाभरणभूषिताम् ॥ ईषद्धास्यप्रसन्नास्यां जगतां मातरं सतीम् ॥ ९८ ॥ दृष्ट्वा तां विरहासक्तः
पुनस्तुष्टाव सत्वरम् ॥ दुःखं निवेदयामास प्ररुदन्विरहोद्भवम् ॥ ९९ ॥ दर्शयामासास्थिमालां स्वांगस्थं भस्मभूषणम् ॥ कृत्वा बहु
परीहारं तोषयामास सुंदरीम् ॥ १०० ॥ नारायणश्च ब्रह्मा च धर्मः शेषः सुरर्षयः ॥ शिवं रक्षेश्वरीत्युक्त्वा तुष्टुवुस्ते सनातनीम् ॥१॥
बभूव परितुष्टा सा तेषां स्तोत्रेण तत्क्षणम् ॥ उवाच कृपया शंभुं प्राणेशं प्राणवल्लभा ॥ २ ॥ प्रकृतिरुवाच ॥ स्थिरो भव
महादेव प्राणाधिक मम प्रभो ॥ भवानात्मा च योगीशः स्वामी जन्मनि जन्मनि ॥३॥ अहं शैलेन्द्रकामिन्यां लब्ध्वा जन्म महेश्वर ॥
तव पत्नी भविष्यामि मुञ्च त्वं विरहज्वरम् ॥४॥ इत्युक्त्वा शिवमाश्वास्य चांतर्धानं चकार सा ॥ सुरा जग्मुस्तमाश्वास्य लज्जानम्रात्मकन्धरम्
॥ ५ ॥ हर्षान्तरात्मा गिरिशः कैलासं तु जगाम ह ॥ ननर्त सगणस्तूर्णं संत्यज्य विरहज्वरम् ॥ ६॥ इदं शिवकृतं स्तोत्रं
प्रकृत्या यः पठेन्नरः ॥ न भवेत्कामिनीभेदस्तस्य जन्मनि जन्मनि ॥ ७॥ इह लोके सुखं भुक्त्वा स याति शिवमन्दिरम् ॥ धर्मा

र्थकाममोक्षांश्च लभते नात्र संशयः ॥ १०८ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे शंकरशोकापनोदनं नाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ ❀ ॥ श्रीकृष्ण उवाच ॥ वसिष्ठस्य वचः श्रुत्वा सगणोऽपि हिमालयः ॥ विस्मितो भार्यया सार्द्धं जहास पार्वती स्वयम् ॥ १ ॥ अरुन्धती च तां मेनां बोधयामास कातराम् ॥ निराहारां रुदन्तीं तां जहौ शोकं मुदा च सा ॥ २ ॥ अरुन्धतीं भोजयित्वा बुभुजे भोगमुत्तमम् ॥ सर्वं प्रहृष्टमनसा मङ्गलं च चकार ह ॥ ३ ॥ ततः संभृतसंभारो वसिष्ठस्याज्ञया प्रिये ॥ पत्रं प्रस्थापयामास नानास्थानं त्वरान्वितः ॥४॥ ततः प्रस्थापयामास शिवं मङ्गलपत्रिकाम् ॥ नानाप्रकारद्रव्याणि बाह्यानि च चकार ह ॥५॥ तन्दुलानां च शैलान्वै पृथुकानां च सुन्दरि ॥ तैलानां च घृतानां च दध्नां वापीश्चकार ह ॥६॥ गुडानामासनानां च क्षीराणां च तथैव च ॥ अथो हैयंगवीनानां लवणानां परं मुने ॥ ७ ॥ लड्डुकानां शर्कराणां स्वस्तिकानां तथैव च ॥ यवचूर्णादिपिष्टानां घृतपक्वानि तानि च ॥ ८ ॥ नानाप्रकारवस्त्राणि वह्निशौचानि यानि च ॥ महारत्नप्रवालानि सुवर्णरजतानि च ॥९॥ द्रव्याण्येतानि शैलेन्द्र कृत्वा तु विधिपूर्वकम् ॥ मङ्गलं कर्तुमारेभे तत्रैव मङ्गले दिने ॥१०॥ संस्कारं कारयामासुः पार्वतीं पर्वतस्त्रियः ॥ स्नापयित्वा वस्त्रयुग्मं धारयामासुराशु ताः ॥ ११ ॥ कारयित्वा सुवेषां च रत्नभूषणभूषिताम् ॥ दर्पणं धारयामासुर्दूर्वाक्षतसमन्वितम् ॥१२॥ ददुश्चालक्तकं चारु पादांगुलिषु पादयोः ॥ गंडे पत्रावलीं रम्यां नेत्रे कज्जलमुज्ज्वलम् ॥१३॥ कबरीं कारयामासुर्मालतीमाल्यवेष्टिताम् ॥ पट्टसूत्रपिनद्धां तां वामवक्त्रां मनोहराम् ॥ १४॥ एतस्मिन्नंतरे राधे समाजग्मुः सुरेश्वराः ॥ नीत्वा त्रिनेत्रं तत्रैव रत्नयानस्थमीश्वरम् ॥ १५ ॥ शैलः संभृतसंभारान्संभाषयितुमीश्वरान् ॥ शैलान्प्रस्थापयामास ब्राह्मणानपि पूजितान् ॥ १६ ॥ प्राङ्गणं कारयामास रम्भास्तम्भैः समन्वितम् ॥ पट्टसूत्रसन्निबद्धरसालपल्लवान्वितैः ॥ १७॥ फलपल्लवसंयुक्तैः कलशैर्जलसंयुतैः ॥ चन्दनागुरुकस्तूरीसुचारुकुसुमान्वितैः॥१८॥मालतीमाल्यसंयुक्तैः संयुक्तं सुमनोहरम् ॥ देवेश्वरान्परो दृष्ट्वा प्रणनाम हिमालयः ॥ १९ ॥ रत्नसिंहासनं दातुं प्रेरयामास किङ्करान् ॥ नारायणो हि भगवानुवास पार्षदैः सह ॥ २० ॥ विनतानन्दनात्तूर्णमव

रुह्य चतुर्भुजः ॥ चतुर्भुजैःपार्षदैश्च रत्नभूषणभूषितैः ॥ २१ ॥ रत्नमुष्टिनिबद्धैश्च सेवितः श्वेतचामरैः ॥ ऋषिश्रेष्ठैः सुरश्रेष्ठैः स्तूयमानश्च संसदि ॥ २२ ॥ ईषद्धास्यप्रसन्नास्यो भक्तानुग्रहकातरः ॥ उवास च तदभ्याशे ब्रह्मा देवगणैः सह ॥२३॥ ऋषयो मुनयश्चैव समूषुर्मङ्गले स्थले ॥ एतस्मिन्नन्तरे शम्भुरवरुह्य रथादहो ॥२४॥ रत्नासने समुत्तिष्ठन्ददर्श पर्वतालयम् ॥ समाजग्मुः शिवं द्रष्टुं शैलेन्द्रनगरस्त्रियः ॥ २५ ॥ वृद्धा बाला युवत्यश्च वस्त्राभरणभूषिताः काश्चित्कज्जलहस्ताश्च वस्त्रहस्ताश्च काश्चन ॥२६॥ काश्चित्सिन्दूरहस्ताश्च काश्चित्कंकतिहाकराः ॥ वेषार्धभूषिताः काश्चित्काश्चिन्नैवार्धभूषिताः ॥ २७ ॥ काश्चिन्निर्भूषिताः काश्चित्सर्वाभरणभूषिताः ॥ सर्वा आगत्य संतस्थुः सस्मिताः पर्वतालये ॥२८॥ ऋषिकन्या देवकन्या नागकन्या मनोहराः ॥ गन्धर्वशैलकन्याश्च राजकन्याः समागताः ॥२९ ॥ सर्वा अप्सरसो दिव्या रम्भाद्याः समुपस्थिताः ॥ मेना कन्यागणैः सार्द्धं ददर्श शंकरं वरम् ॥ ३० ॥ चारुचम्पकवर्णाभमेकवक्त्रं त्रिलोचनम् ॥ ईषद्धास्यप्रसन्नास्यं रत्नाभरणभूषितम् ॥३१॥ चन्दनागुरुकस्तूरीचारुकुङ्कुमभूषितम् ॥ मालतीमाल्यसंयुक्तं सद्रत्नमुकुटोज्ज्वलम् ॥ ३२ ॥ वह्निशौचेनातुलेन चातिसूक्ष्मेण चारुणा ॥ अमूल्यवस्त्रयुग्मेन विचित्रेणातिभूषितम् ॥ ३३॥ रत्नदर्पणहस्तं च कज्जलोज्ज्वललोचनम् ॥ सर्वया प्रभया च्छन्नमतीव सुमनोहरम् ॥३४॥ अतीव तरुणं रम्यैर्भूषिताङ्गैश्च भूषितम् ॥ बिभ्रन्तं रूपमतुलं परं नारायणाज्ञया ॥३५॥ योगस्वरूपं योगेशं योगीन्द्राणां गुरोर्गुरुम् ॥ स्वेच्छामयं गुणातीतं ब्रह्मज्योतिः सनातनम् ॥३६ ॥ गुणभेदाद्रूपभेदं धत्तेऽनन्तमरूपकम् ॥ तारणं तं भवस्थानां सृष्टिस्थित्यंतकारणम् ॥ ३७ ॥ सर्वाधारं सर्वबीजं सर्वेशं सर्वजीवनम् ॥ साक्षिरूपं निरीहं च परमानन्दमक्षरम् ३८ ॥ आद्यन्तमध्यरहितं सर्वाद्यं सर्वरूपकम् ॥ दृष्ट्वा जामातरं मेना जहौ शोकं मुदान्विता ॥ ३९ ॥ प्रशशंसुर्युवत्यश्च धन्या धन्या सतीति ताः ॥ दुर्गा भाग्यवतीत्येवमूचुः काश्चन कन्यकाः ॥ ४० ॥ कामेन काश्चित्कामिन्यो मौनीभूताश्च स्तम्भिताः ॥ न दृष्टो वर इत्येवमस्माभिर्ज्ञानगोचरे ॥ ४१ ॥ काश्चिन्निमेषरहिता मूर्च्छामापुश्च काश्चन ॥ निनिन्दुः स्वपतिं काश्चित्स्वेच्छां चक्रुश्च काश्चन ॥ ४२ ॥ काश्चिद्भावेन रुरुदुः पुलकाञ्चितवि

ग्रहाः ॥ जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ४३ ॥ दृष्ट्वा शंकररूपं च प्रहृष्टाः सर्वदेवताः ॥ नानाप्रकारवाद्यानि चारूणि मधु
राणि च ॥ ४४ ॥ वादका वादयामासुर्नानाशिल्पेन तत्र वै ॥ एतस्मिन्नन्तरे दुर्गा शैलान्तःपुरचारिका ॥४५ ॥ बहिश्चकार सद्रत्नास
नस्थां रत्नवेदिकाम् ॥ कस्तूरीबिन्दुभिः सान्द्रसिन्दूरबिन्दुभूषिताम् ॥४६॥ चारुचन्दनचन्द्राभां नम्रभालस्थलोज्ज्वलाम् ॥ रत्नेन्द्र
सारहारेण वक्षःस्थलविभूषिताम् ॥ ४७ ॥ त्रिनेत्रदत्तनेत्रां तामन्यवारितलोचनाम् ॥ अतीषद्धास्ययुक्तास्यां सकटाक्षां मनोहराम्
॥ ४८ ॥ रत्नकेयूरवलयरत्नकङ्कणमण्डिताम् ॥ रत्नपाशकसंसक्तां क्वणन्मञ्जीररंजिताम् ॥ ४९ ॥ अमूल्यातुल्यचित्राढ्यवस्त्रयुग्म
सुशोभिताम् ॥ सद्रत्नकुण्डलाभ्यां च चारुगण्डस्थलोज्ज्वलाम्॥५०॥मणिसारप्रभामुष्टदन्तराजिविराजिताम्॥४९॥रत्नदर्पणहस्तां च
क्रीडापद्मं विघूर्णतीम्॥५१ ॥ चन्दनागुरुकस्तूरीकुङ्कुमेनाङ्गचर्चिताम् ॥ मुदिता ददृशुः सर्वे जगदाद्यां जगत्प्रसूम् ॥ ५२ ॥ त्रिनेत्रो
नेत्रकोणेन तां ददर्श मुदाऽन्वितः ॥ सर्वां सत्याकृतिं दृष्ट्वा विजहौ विरहज्वरम् ॥५३॥ शिवः सर्वं विसस्मार दुर्गासन्यस्तमानसः ॥
पुलकांचितसर्वांगो हर्षाश्रुयुक्तलोचनः॥५४॥एतस्मिन्नन्तरे शैलः प्रहृष्टः सपुरोहितः॥ तं वरं वरयामास वस्त्रचंदनभूषणैः॥५५॥भक्त्या
पाद्यादिभिर्माल्यैर्दिव्यगंधमनोहरैः ॥ ततः शीघ्रं वेदमंत्रैः संप्रदानं चकार ताम् ॥ ५६ ॥ यौतुकानि ददौ तस्मै रत्नानि विविधानि
च ॥ चारुरत्नविकाराणि पात्राणि सुन्दराणि च ॥५७॥गवां लक्षं गजेंद्राणां सहस्राणि च राधिके ॥ रत्नकंबलयुक्तानि सांकुशानि
मुदान्वितः ॥५८॥ त्रिंशल्लक्षं हयानां च सज्जितानामकातरः ॥ दासीनामनुरक्तानां लक्षं सद्रत्नभूषितम् ॥ ५९ ॥ शतं द्विजबटूनां
च पार्वतीभ्रातृकल्पकम् ॥ रथानां च शतं रम्यं रत्नेन्द्रसारनिर्मितम् ॥६० ॥ पार्वतीं वस्तुसहितां स्वस्तीत्युच्चार्य शंकरः ॥ जग्रा
हानंदमनसा यत्नाच्छैलसमर्पिताम् ॥ ६१ ॥ हिमालयः सुतां दत्त्वा परिहारं चकार तम् ॥ माध्यंदिनोक्तस्तोत्रेण तुष्टाव संपुटांज
लिः ॥ ६२ ॥ हिमालय उवाच ॥ प्रसीद दक्षयज्ञघ्न नरकार्णवतारक ॥ सर्वात्मरूप सर्वेश परमानंदविग्रह ॥ ६३ ॥
गुणार्णव गुणातीत गुणयुक्तगणेश्वर ॥ गुणबीज महाभाग प्रसीद गुणिनां वर ॥ ६४ ॥ योगाधार योगरूप योगज्ञ योगकारण ॥

योगीश योगिनां बीज प्रसीद योगिनां गुरो ॥ ६५ ॥ प्रलयप्रलयाद्यैकभवप्रलयकारण ॥ प्रलयान्ते सृष्टिबीज प्रसीद परिपालक ॥ ६६ ॥ संहारकाले घोरे च सृष्टिसंहारकारण ॥ दुर्निवार्य दुराराध्य चाशुतोष प्रसीद मे ॥ ६७ ॥ कालस्वरूप कालेश काले च फलदायक ॥ कालबीजैककालघ्न प्रसीद कालपालक ॥ ६८ ॥ शिवस्वरूप शिवद शिवबीज शिवाश्रय ॥ शिवभूत शिवप्राण प्रसीद परमाश्रय ॥ ६९ ॥ इत्येवं स्तवनं कृत्वा विरराम हिमालयः ॥ प्रशशंसुः सुराः सर्वे मुनयश्च गिरीश्वरम् ॥ ७० ॥ हिमालयकृतं स्तोत्रं संयतो यः पठेन्नरः ॥ प्रददाति शिवस्तस्मै वाञ्छितं राधिके ध्रुवम् ॥ ७१ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे पार्वतीसंप्रदाने चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ❀ ॥ श्रीकृष्ण उवाच ॥ अथ वेदविधानेन संस्थाप्य वह्निमीश्वरः ॥ यज्ञं चकार तत्रैव वामे संस्थाप्य पार्वतीम् ॥ १ ॥ निवृत्ते विधिवद्यज्ञे विप्राय दक्षिणां ददौ ॥ शिवः शतसुवर्णानि वृंदावनविनोदिनि ॥ २ ॥ अथ प्रदीपमानीय शैलेंद्रनगरस्त्रियः ॥ निर्वर्त्य मंगलं कर्म गृहं संप्राप्य दंपती ॥ ३ ॥ कृत्वा जयध्वनिं प्रीत्या शुभनिर्मञ्छनादिकम् ॥ सस्मिताः सकटाक्षाश्च पुलकांचितविग्रहाः ॥ ४ ॥ वासगेहं संप्रविश्य ददृशुः कामिनीगणाः ॥ शंकरं रूपवेषाढ्यं रत्नभूषणभूषितम् ॥ ५ ॥ चन्दनागुरुकस्तूरीकुंकुमांचितविग्रहम् ॥ ईषद्धास्यप्रसन्नास्यं सकटाक्षं मनोहरम् ॥ ६ ॥ अपूर्वसूक्ष्मवेषाढ्यं सिंदूरबिंदुभूषितम् ॥ चारुचंपकवर्णाभं सर्वावयवसुंदरम् ॥ ७ ॥ नवीनयौवनस्थं च मुनीन्द्रचित्तमोहनम् ॥ सरस्वतीं च लक्ष्मीं च सावित्रीं जाह्नवीं रतिम् ॥८॥ अदितिं च शचीं चैव लोपामुद्रामरुंधतीम् ॥ अहल्यां तुलसीं स्वाहां रोहिणीं च वसुंधराम् ॥ ९ ॥ शतरूपां च संज्ञां च सतीस्त्रीणां च षोडश ॥ देवकन्या नागकन्या मुनिकन्या मनोहराः ॥१०॥ या याः स्थितास्तत्र तासां संख्यां कर्तुं च कः क्षमः ॥ ताभी रत्नासने दत्ते तत्रोवास शिवो मुदा ॥ तमूचुः क्रमशो देव्यो मधुरोक्तिं सुधामिव ॥ ११ ॥ सरस्वत्युवाच ॥ प्राप्ता सती महादेवाधुना प्राणधिका मुदा ॥ दृष्ट्वा प्रियास्यं चंद्राभं संतापं त्यज कामुक ॥ ॥ १२ ॥ कालं गमय कालेश सदा संश्लेषपूर्वकम् ॥ विश्लेषस्ते न भविता सर्वकालं ममाशिषा ॥ १३ ॥ लक्ष्मीरुवाच ॥

लज्जां विहाय देवेश सतीं कृत्वा स्ववक्षसि ॥ तिष्ठ संप्रति का लज्जा प्राणा यांति यया विना ॥ १४ ॥ सावित्र्युवाच ॥
भोजयित्वा सतीं शंभो शीघ्रं भोजय मा खिदः॥ तदाचम्य सकर्पूरं तांबूलं देहि भक्तितः ॥ १५ ॥ जाह्नव्युवाच ॥ स्वर्णकंकतिकां
धृत्वा केशान्मार्जय योषितः ॥ कामिन्याः स्वामिसौभाग्यं सुखं नातः परं भवेत् ॥ १६ ॥ रतिरुवाच ॥ गृहीत्वा
पार्वतीं देव सुभगामतिदुर्लभाम् ॥ कथं मम प्राणनाथो निःस्वाथ भस्मसात्कृतः ॥ १७ ॥ जीवयसि विभो कामं कामव्यापारमात्मनि
॥ कुरु दूरं च संतापं मम विश्लेषहेतुकम् ॥ १८ ॥ दम्पतीविरहक्लेशं सर्वं ज्ञात्वा दयानिधे ॥ तथापि मम कांतश्च कोपेन भस्मसात्कृतः
॥ १९ ॥ इत्युक्त्वा कामभस्माथ ददौ सा ग्रन्थिबंधितम् ॥ रुरोद पुरतः शंभोर्नाथ नाथेत्युदीर्य च ॥ २० ॥ हरिस्तद्रोदनं
श्रुत्वा करुणामयसागरः ॥ ब्रह्मा धर्मादिदेवाश्च ययुर्वासगृहं शिवम् ॥ २१ ॥ दृष्ट्वा नारायणं धर्मं ब्रह्माणं च सुरानपि ॥ जवेन पीठादुत्थाय
स्वाज्ञां कुर्वित्युवाच ह ॥ २२ ॥ शंकरस्य वचः श्रुत्वा तमुवाच हरिः स्वयम् ॥ कामं जीवय हे रुद्रेत्युक्त्वा शीघ्रं जगाम सः
॥ २३ ॥ ऊचुर्देव्यो बहुतरं वाक्यं विनयपूर्वकम् ॥ क्रुधा दृष्ट्वा शूलभृतो भस्मतो निर्गतः स्मरः ॥ २४ ॥ दृष्ट्वा कामं रतिस्तं च प्रणनाम
महेश्वरम् ॥ तद्रूपं च तदाकारं सस्मितं सधनुःशरम् ॥ २५ ॥ प्रणम्य शंकरं कामः स्तुतिं कृत्वा यथागमम् ॥ बहिर्गत्वा हरिं
देवान्प्रणम्य समुवाच ह ॥ २६ ॥ कामं संभाष्य देवाश्च युयुजुश्च तमाशिषम् ॥ काले रक्षा विनाशश्च निषेधः केन वार्यते ॥ २७॥
अथ शैलः सुरान्सर्वान्नारायणपुरोगमान् ॥भोजयामास भक्त्या च शाययामास यत्नतः ॥ २८ ॥ अथ शंभुर्वासगृहे वामे संस्थाप्य
पार्वतीम् ॥ मिष्टान्नं भोजयामास तया सह मुदान्वितः ॥ २९ ॥ भुक्तवंतं शिवं तत्र देवमाताऽदितिः स्वयम् ॥ उवाच सस्मितं राधे
संप्रीत्या सरसं वचः ॥ ३० ॥ अदितिरुवाच ॥ भोजनांते शचि शंभोः शौचार्थं जलमर्पय ॥ देहि शीघ्रं मम प्रीत्या
दंपत्योः प्रीतिपूर्वकम् ॥ ३१ ॥ शच्युवाच ॥ कृत्वा विलापं यद्धेतोः शवं कृत्वा स्ववक्षसि ॥ यो बभ्राम भुवं मोहात्कालेन
प्राप तां सतीम् ॥ ३२ ॥ अरुंधत्युवाच ॥ मया दत्ता सती तुभ्यं मेना दातुमनीप्सिता ॥ विविधं बोधयित्वेमां रतिं

च कर्तुमर्हसि ॥ ३३ ॥ अहल्योवाच ॥ वृद्धावस्थां परित्यज्य ह्यतीव तरुणोऽधुना ॥ तेन मेना तु मेने त्वां सुतामर्पि
तुमीश्वर ॥ ३४ ॥ तुलस्युवाच ॥ सती त्वया परित्यक्ता कामो दग्धः पुराकृतः ॥ कथं तदा वसिष्ठश्च प्रभो प्रस्थापितोऽधुना
॥ ३५ ॥ स्वाहोवाच ॥ स्थिरो भव महादेव स्त्रीणां वचसि सांप्रतम् ॥ विवाहे व्यवहारोऽस्ति पुरःस्त्रीणां प्रगल्भता
॥ ३६ ॥ रोहिण्युवाच ॥ कामं पूरय पार्वत्याः कामशास्त्रविशारद ॥ कुरु पारं स्वयं कामी कामिनां कामसागरम् ॥
॥ ३७ ॥ वसुंधरोवाच ॥ भोगद्रव्यं विना भोगी न हि तुष्टः क्षुधातुरः ॥ येन तुष्टिर्भवेच्छंभो तत्कर्तुमुचितं स्त्रिया ॥ ३८ ॥
संज्ञोवाच ॥ जानासि भावं सर्वज्ञ कामार्तानां च योषिताम् ॥ न च स्वस्वामिनं शंभो सती जानाति संगतम् ॥ ३९ ॥
शतरूपोवाच ॥ तूर्णं प्रस्थापय प्रीत्या पार्वत्या सह शंकरम् ॥ रत्नप्रदीपं तांबूलं तल्पं निर्माय निर्जने ॥ ४० ॥ श्रीकृष्ण उवाच ॥
स्त्रीणां तद्वचनं श्रुत्वा ता उवाच शिवः स्वयम् ॥ निर्विकारी च भगवान्योगींद्राणां गुरोर्गुरुः ॥ ४१ ॥ शंकर उवाच ॥ देव्यो मा
वदतोक्तिं च ह्येवंभूतां ममांतिके ॥ जगतां मातरः साध्व्यः पुत्रे चपलता कथम् ॥४२॥ शंकरस्य वचः श्रुत्वा लज्जिताः सुरयोषितः ॥
बभूवुः संभ्रमात्तूष्णीं चित्रपुत्तलिका यथा ॥ ४३ ॥ भुक्त्वा मिष्टानि भगवानाचम्य च मुदाऽन्वितः ॥ सकर्पूरं च तांबूलं बुभुजे भार्य
या सह ॥ ४४ ॥ रत्नसिंहासने शंभुर्मेनादत्ते मनोहरे ॥ सन्निधाय मुदा युक्तो ददर्श वासमंदिरम् ॥ ४५ रत्नप्रदीपशतकैर्ज्वलद्भि
र्ज्वलितं श्रिया ॥ रत्नपात्रघटाकीर्णं मुक्तामाणिक्यभूषितम् ॥ ४६ ॥ रत्नदर्पणशोभाढ्यं मंडितं श्वेतचामरैः ॥ चंदनागुरुसंयुक्तं
पुष्पशय्यासमन्वितम् ॥ ४७ ॥ नानाचित्र विचित्राढयं निर्मितं विश्वकर्मणा ॥ रत्नसारेण खचितं रचितं हीरकैर्वरैः ॥ ४८ ॥ कुत्र
चित्सुरनिर्माणवैकुंठसुमनोहरम् ॥ वृंदावनं कुंजवनं कुत्रचिद्रासमंडलम् ॥ ४९ ॥ कैलासं च कुत्रचन कुत्रचिदिंद्रमंदिरम् ॥ दृष्ट्वाश्च
र्यं महादेवः परितुष्टो बभूव ह ॥ ५० ॥ अथ प्रभातकालश्च बभूव प्राणवल्लभे ॥ नानाप्रकारवाद्यानि वादयांचक्रिरे जनाः ॥ ५१ ॥
सर्वे सुराः समुत्तस्थुः सज्जीभूताः ससंभ्रमाः ॥ स्ववाहनान्समारुह्य कैलासं गन्तुमुद्यताः ॥५२॥ वासगेहं समागत्य धर्मो नारायणा

ज्ञया ॥ उवाच शंकरं योगी योगीशं समयोचितम् ॥ ५३ ॥ धर्म उवाच ॥ उत्तिष्ठोत्तिष्ठ भद्रं ते भवतु प्रमथाधिप ॥ पार्वत्या सह माहेंद्रे यात्रां कुरु हरिं स्मरन् ॥ ५४ ॥ इत्थं धर्मवचः श्रुत्वा पार्वत्या सह शंकरः ॥ यात्रां चकार माहेंद्रे वृंदावनविनोदिनि ॥ ५५ ॥ यात्रां कुर्वति देवेशे पार्वत्या सह शंकरे ॥ उच्चै रुदित्वा सा मेना तमुवाच कृपानिधिम् ॥ ५६ ॥ मेनोवाच ॥ कृपानिधे कृपां कृत्वा मद्वत्सां पालयिष्यसि ॥ सहस्रदोषान्भगवानाशुतोषः क्षमिष्यसि ॥ ५७ ॥ त्वत्पदांबुजभक्तैषा मद्वत्सा जन्मजन्मनि ॥ स्वप्ने ज्ञाने स्मृतिर्नास्ति महादेवप्रभुं विना ॥ ५८ ॥ त्वद्भक्तिश्रुतिमात्रेण हर्षाश्रुपुलकान्विता ॥ त्वन्निंदया भवेन्मौना मृत्युंजय मृता इव ॥ ५९ ॥ इत्युक्त्वा मेनका शीघ्रं तत्रागत्य हिमालयः ॥ उच्चै रुरोद च तदा वत्सां कृत्वा स्ववक्षसि ॥ ६० ॥ क्व यासि वत्सेत्युच्चार्य शून्यं कृत्वा हिमालयम् ॥ स्मारं स्मारं तद्गुणौघं विदार्य मन्मनः स्फुटम् ॥ ६१ ॥ इत्येवमुक्त्वा शैलेन्द्रः समर्प्य च शिवां शिवे ॥ स शैलः सहपुत्रश्च रुरोदोच्चैर्मुहुर्मुहुः ॥ ६२ ॥ नारायणश्च भगवानध्यात्मविद्यया स्वयम् ॥ सर्वान्प्रबोधयामास कृपया स कृपानिधिः ॥ ६३ ॥ ननाम पार्वती भक्त्या मातरं पितरं गुरुम् ॥ मायया च महामाया रुरोदोच्चैर्मुहुर्मुहुः ॥ ६४ ॥ पार्वतीरोदनेनैव रुरुदुः सर्वयोषितः ॥ मुनयश्च सुराः सर्वे सस्त्रीकाः सगणं ध्रुवम् ॥ ६५ ॥ शीघ्रं ययुस्ते कैलासं देवा मानसशायिनः ॥ मुहूर्तार्द्धेन मुदिताः संप्रापुः शंकरालयम् ॥ ६६ ॥ दृष्ट्वा गतं देवपत्न्यो मुनिपत्न्यश्च सत्वरम् ॥ आययुर्दीपमानीय मुदा मङ्गलकर्मणि ॥ ६७ वायुपत्नी कुबेरस्य कामिनी शुक्रकामिनी ॥ तारा सुरगुरोः पत्नी पत्नी दुर्वाससस्तथा ॥ ६८ ॥ अत्रिभार्यानुसूया च चंद्रपत्न्यस्तथैव च ॥ देवकन्या नागकन्या मुनिकन्याः सहस्रशः ॥ ६९ ॥ असंख्यकामिनीसंघः संख्यां कर्तुं च कः क्षमः ॥ ताश्च प्रवेशयामासुर्दंपती वासमंदिरम् ॥ ७० ॥ रत्नसिंहासने रम्ये वासयामासुरीश्वरीम् ॥ सतीं तां दर्शयामास शिवः पूर्वालयं मुदा ॥ ७१ ॥ सति स्मरस्यतो गेहाद्यद्गता तातमंदिरम् ॥ अधुना शैलकन्या त्वं तत्र दक्षसुता पुरा ॥ ७२ ॥ जातिस्मरां स्मारयामि नित्यं स्मरसि चेद्वद ॥ शंकरस्य वचः श्रुत्वा सस्मितोवाच सा सती ॥ ७३ ॥ सर्वं स्मरामि प्राणे

श मौनीभूतो भवेति तम् ॥ शिवः संभृतसंभारो नानावस्तुमनोहरम् ॥ ७४ ॥ भोजयामास देवांश्च नारायणपुरोगमान् ॥ भुक्त्वा देवाः प्रजग्मुस्ते नानारत्नविभूषिताः॥७५॥ सस्त्रीकाः सगणाः सर्वे प्रणम्य चन्द्रशेखरम् ॥ नारायणं च ब्रह्माणं ननाम शंकरः स्वयम् ॥७६॥ तौ च तं च समाश्लिष्याशिषं कृत्वा प्रजग्मतुः ॥ अथ शैलश्च मेना च मैनाकमाजुहाव ह ॥ ७७ ॥ शीघ्रमानय भद्रं ते पार्वतीं शंकरं सुत ॥ तयोः स वचनं श्रुत्वा शीघ्रं गत्वा शिवालयम् ॥७८॥ आजगाम समानीय पार्वतीपरमेश्वरौ ॥ पार्वत्यागमनं श्रुत्वा बालाश्च बालिकास्तथा ॥७९॥ वृद्धा युवत्यो या याश्च शैलाश्च दुद्रुवुर्मुदा ॥ मेना सुताभ्यां वध्वा च सह दुद्राव सस्मिता ॥ ८० ॥ हिमालयश्च मुदितो दुद्रावानुव्रजन्सुताम् ॥ अवरुह्य रथाद्देवी मातरं पितरं गुरुम् ॥८१॥ प्रणनाम प्रमुदिता निमग्नाऽऽनन्दसागरे ॥ पार्वतीं च समाश्लिष्य मेनका हर्षविह्वला ॥ ८२ ॥ हिमालयश्च मुदितो गताः प्राणा इवागताः ॥ सुतां निधाय गेहे स्वे रत्नसिंहासनं ददौ ॥८३॥ शूलभृते गणेभ्यश्च मधुपर्कादिकं मुदा ॥ तस्थौ श्वशुरगेहे च सगणश्चन्द्रशेखरः ॥८४॥ नित्यं षोडशोपचारैः पूजितः सह भार्यया ॥ इत्येवं कथितं राधे शंकरोद्वाहमङ्गलम् ॥ शोकघ्नं हर्षजनकं किं भूयः श्रोतुमिच्छसि ॥ ८५ ॥

॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे शंकरविवाहो नाम पञ्चचत्वारिंशोऽध्यायः ॥

॥ ४५ ॥ राधिकोवाच ॥ सुचिरं च मृतं कामं शंकरेण च जीवितम् ॥ रतिः पुनः प्रियं प्राप्य किं चकार मुदाऽन्विता ॥ १ ॥ स्त्रीणां स्वस्वामिविच्छेदो मरणादतिदुष्करः ॥ पुनः संमेलनं भर्तुः सुखं परमदुर्लभम् ॥ २ ॥ शिवः सतीं तां संप्राप्य सङ्गे मङ्गलकर्मणि ॥ चिरं प्रनष्टविरहः किं चकार मुदाऽन्वितः ॥ ३ ॥ कलत्रविरहः पुंसां सर्वशोकात्सुदुष्करः ॥ पुनः संमीलनं तस्याः प्राणदानाधिकं सुखम् ॥ ४ ॥ रतिः पुंसो विरहिणी शिवः स्त्रीविरही चिरम् ॥ द्वयोर्द्वयोश्च संप्राप्तौ किं बभूव द्वयोः सुखम् ॥ ५ ॥ तदेवं श्रोतुमिच्छामि परं कौतूहलं मम ॥ कृपया विदुषां श्रेष्ठ सव्यासं कथय प्रभो ॥ ६ ॥ मेलनं शक्तिशिवयो रतिमन्मथयोस्ततः ॥ शोकापहं श्रुतवतां सर्वमङ्गलकारणम् ॥ ७ ॥ नारायण उवाच ॥ इत्युक्त्वा राधिका देवी स

स्मिता विरराम ह ॥ कृष्णस्तद्वचनं श्रुत्वा सस्मितस्तामुवाच ह ॥ ८ ॥ कृष्ण उवाच ॥ मृतं कामं पुनः प्राप्य कामार्ता कामकामिनी ॥ स्वालयं तं समानीय हरोद्वाहगृहाद्दहो ॥ ९ ॥ भर्तुः सुवेषं विविधं स्वात्मनः स्वालिभिर्मुदा ॥ कारयामास यत्नेन सा रती रमणोत्सुका ॥ १० ॥ ज्ञात्वा कामस्तु तद्भावं कामशास्त्रविधायकः ॥ रत्नयानं समारुह्य जगाम स्वालयाद्वनम् ॥ ११ ॥ शैलेशैलेऽतिरम्ये च नद्यांनद्यां नदेनदे ॥ द्वीपेद्वीपे सिन्धुतटे पुष्पोद्याने मनोहरे ॥ १२ ॥ काञ्चने भूमिनिकरे वटमूलेऽतिनिर्जने ॥ नदीपुलिनभूम्यां च पुष्पिते पुष्पकानने ॥ १३ ॥ भ्रमरध्वनिसंयुक्ते पुंस्कोकिलरुतश्रुते ॥ सुगन्धिवायुनाऽऽकीर्णे दधती जलसीकरम् ॥ १४ ॥ चित्तेषु चेतनानां च हरणं योषितामहो ॥ कलामानप्रकारेण शृङ्गारं च चकार सा ॥१५॥ पूर्णमब्दशतं दिव्यं स रेमे वामया सह ॥ दिवानिशं न बुबुधे संसक्तः सततं मुदा ॥ १६ ॥ तस्थतुस्तौ च तत्रैव संसक्तौ सततं मुदा ॥ सुरतौ च न विरतौ रतिशास्त्रविशारदौ ॥ १७ ॥ पतिविच्छेदसंतापं विजहौ सा रतिर्मुदा ॥ प्राप्य रत्नमपहतं कः क्षणं त्यक्तुमुत्सहेत् ॥ १८ ॥ इत्येवं कथितं सर्वं रतिसंतापकारणम् ॥ शृङ्गारं शक्तिशिवयोरतुलं शृणु राधिके ॥ १९ ॥ शृण्वतां कर्णपीयूषं परमाश्चर्यमीप्सितम् ॥ सर्वसंतापहरणं सुखदं पुण्यदं शुभम् ॥ २० ॥ वसञ्छ्वशुरगेहे स पार्वत्या सह शंकरः ॥ तदनुज्ञां समादाय क्रीडार्थं प्रययौ वनम् ॥ २१ ॥ रत्नस्यन्दनमारुह्य रत्नसारपरिच्छदम् ॥ रत्नसारेण खचितं रचितं विश्वकर्मणा ॥ २२ ॥ शतशृङ्गसुवसने मलये गन्धमादने ॥ नन्दने पुष्पभद्रे च पारिभद्रे च भद्रके॥२३॥पुलिन्दे च कलिन्दे च पुंड्रे पिंडारकेंऽधके ॥ वनेवनेऽतिरम्ये च सागराणां तटेतटे ॥ २४ ॥ निकटेऽस्तगिरेः पार्श्ववटमूले मनोहरे ॥ चकार करुणां यत्र परित्यज्य सती शिवम् ॥ २५ ॥ नानास्थानेषु रहसि पशुपक्षिविवर्जिते ॥ यथामनोरथंगामी स रेमे वामया सह ॥ २६ ॥ यत्रयत्र शिवं नीत्वा बभ्राम धरणीतलम् ॥ तत्सर्वं दर्शयामास सतीं शंभुर्मुदाऽन्वितः ॥ २७ ॥ कृत्वा विहारं सुचिरं न पूर्णं मानसं तयोः ॥ महाशृङ्गारमारेभे सहस्राब्दं जगत्पिता ॥ २८ ॥ मायातीतोऽतिमायेशो मायासक्तः स्वमायया ॥ कालं न बुबुधे योगी सुखेन कालकारकः ॥ २९ ॥ शक्ति

शक्तिमतोस्तत्र न बभूव परिश्रमः ॥ जहतोः सर्वसंतापमन्योन्यविरहोद्भवम् ॥ ३० ॥ सुखसंसक्तमनसोः पुलकाञ्चितगात्रयोः ॥
कामबाणमूर्च्छितयोः पुष्पशय्याशयानयोः ॥ ३१ ॥ नग्नयोः सुखसंभोगाद्रतिशास्त्रविधिज्ञयोः ॥ नखदन्तप्रहारैश्च क्षतविक्षतदे
हयोः ॥ ३२ ॥ चन्दनागुरुकस्तूरीसिन्दूरबिन्दुलिप्तयोः॥निबद्धकेशकबरीश्लथयोश्छिन्नमाल्ययोः॥ ३३ ॥वसनानां नूपुराणां कङ्कणा
नां च सुन्दरि ॥ वलयानां कुण्डलानां शब्दैः क्रीडां प्रकुर्वतोः ॥ ३४ ॥ पुष्पतल्पं दलितयोर्बाष्पोत्कर्षं च बिभ्रतोः ॥ तेजसा सम
योः शश्वत्क्रीडया कौतुकेन च ॥ ३५ ॥ भारेण विश्वंभरयोर्भाराक्रान्ता वसुन्धरा ॥ सा विदीर्णा चकम्पे च सशैलवनसागरा॥३६॥
तयोर्भरभराक्रान्तधरायाश्च भरेण च ॥ भाराक्रान्तो हि शेषश्च तद्भरार्तोऽपि कच्छपः ॥ ३७ ॥ कच्छपस्य भरेणैव सर्वाधाराः समी
रणाः ॥ महाविक्लवयुक्ताश्च सर्वप्राणाश्च स्तम्भिताः ॥ ३८ ॥ स्तम्भितेषु समीरेषु त्रिलोका भयविह्वलाः ॥ ब्रह्मादयः सुराः सर्वे वै
कुण्ठं शरणं ययुः ॥ ३९ ॥ सर्वं निवेदनं चक्रुर्नारायणपदाम्बुजे ॥ नारायणश्च भगवानुवाच कमलोद्भवम् ॥ ४० ॥ श्रीनारायण
उवाच ॥ शृङ्गारभङ्गसमयो भविता नाधुना विधे ॥ कालप्रयुक्तं कार्यं च सिद्धं तत्समयोचितम् ॥ ४१ ॥ पूर्णे वर्षसहस्रे च
स्वेच्छया विरमिष्यति ॥ शंभोः संयोगमिष्टं च को भेदं कर्तुमीश्वरः ॥४२॥ स्त्रीपुंसो रतिविच्छेदमुपायेन करोति यः ॥ तस्य स्त्री
पुंसयोर्भेदो भवेज्जन्मनिजन्मनि ॥ ४३ ॥ यात्यन्ते कालसूत्रे च वर्षलक्षं स पातकी ॥ भ्रष्टज्ञानो नष्टकीर्तिरलक्ष्मीको भवेदिह ॥४४॥
रम्भायुक्तं शक्रमिमं चकार विरतं रतौ ॥ महामुनीन्द्रो दुर्वासास्तत्स्त्रीभेदो बभूव ह ॥ ४५ ॥ पुनरन्यां स संप्राप्य निषेव्य शूलपाणि
नम् ॥ दिव्यवर्षसहस्रं च विजहौ विरहज्वरम् ॥ ४६ ॥ रोहिणीसहितं चन्द्रं चकार विरतं रतौ ॥ महर्षिगौतमस्तस्य स्त्रीविच्छेदो
बभूव ह ॥ ४७ ॥ पुनः शिवं समाराध्य प्राप्याहल्यां च पुष्करे ॥ दिव्यवर्षसहस्रं च विजहौ विरहज्वरम् ॥ ४८ ॥ मुनिः स्व
भार्यासंसक्ते दिवसे निर्जने वने ॥ ब्रह्माण्डकसुतं नीत्वा चकार विरतं रुषा ॥ ४९ ॥ बभूव पुत्रविच्छेदस्तस्य कल्पान्तरे पुनः ॥
शिवं निषेव्य संप्राप्य पुत्र तत्याज विक्लवम् ॥ ५० ॥ हरिश्चन्द्रो हालिकं च वृषल्या सह संयुतम् ॥ वारयामास निश्चेष्टं

निर्जने तत्फलं शृणु ॥ ५१ ॥ भ्रष्टः श्रीराज्यवित्तेभ्यस्तं चकारावलीलया ॥ विश्वामित्रो महर्षिश्च ताडयामास तं पुरा ॥ ॥ ५२ ॥ ततः शिवं समाराध्य दातारं सर्वसंपदाम् ॥ सद्यो जगाम वैकुण्ठं सगणो मम मन्दिरम् ॥ ५३ ॥ आजामिलं द्विजश्रेष्ठं वृषल्या सह संयुतम् ॥ न भिया वारयामासुः सुरास्तं चापि केचन ॥ ५४ ॥ निष्पन्ने कर्मभोगे च स मद्भक्तो मुमोच ह ॥ मन्नामस्मृतिमात्रेण चाजगाम ममालयम् ॥ ५५ ॥ सर्वं निषेकसाध्यं च निषेको बलवान्निश्चये ॥ निषेकफलदाताऽहं निषेकः केन वार्यते ॥ ५६ ॥ दिव्यं वर्षसहस्रं च शंभोः संभोगकर्मकृत् ॥ निषेकफलदातुस्तु निषेकफलसंचयम् ॥ ५७ ॥ पूर्णे वर्षसहस्रे च गत्वा तत्र महेश्वरः ॥ येन वीर्यं पतेद्भूमौ तत्करिष्यति निश्चितम् ॥ ५८ ॥ तत्र वीर्ये च भविता स्कन्दको भक्ततारकः ॥ सदा भद्रस्वरूपोऽहं भयं किं वो मयि स्थिते ॥ ५९ ॥ अधुना त्वं गृहं गच्छ भगवान्स्वगणैः सह ॥ करोतु शंभुः संभोगं पार्वत्या सह निर्जने॥ ॥ ६० ॥ इत्युक्त्वा कमलाकान्तः शीघ्रं स्वान्तःपुरं ययौ ॥ स्वालयं प्रययुर्देवाः शिवः स्वस्थो रतौ रतः ॥ ६१ ॥ नारायण उवाच ॥ इत्युक्त्वा राधिकां कृष्णः सकटाक्षां च सस्मिताम् ॥ जगाम चन्दनवनं निर्जने च तया सह ॥ ६२ ॥ अतीव निर्जनं रम्यं वायुना सुरभीकृतम् ॥ पुष्पोद्यानैः समाकीर्णं तत्र क्रीडां चकार ह ॥ ६३ ॥ पुष्पतल्पसमाकीर्णे परपुष्टरुतश्रुते ॥ भ्रमरध्वनिसंयुक्ते कामिनीनां मनोहरे ॥ ६४ ॥ कृष्णसंभोगमात्रेण सुखसंमूर्च्छिता च सा ॥ अतीव मूर्च्छितः कृष्णो राधाङ्गस्पर्शमात्रतः ॥ ॥ ६५ ॥ तस्थतुस्तत्र संयुक्तौ राधारासेश्वरौ मुने ॥ अतीव रतिनिश्चेष्टौ किं भूयः श्रोतुमिच्छसि ॥ ६६ ॥ इत्येवं मङ्गलं कर्म यः शृणोति समाहितः ॥ कदाचिद्बन्धुविच्छेदो न भवेत्तस्य नारद ॥६७॥ महाशोकार्णवे मग्नो भेदे पुत्रकलत्रयोः ॥ मद्भृत्यानां च बन्धूनां मासं श्रुत्वा लभेद्ध्रुवम् ॥ ६८ ॥ सूत उवाच ॥ इत्युक्त्वा धर्मपुत्रश्च विरराम महामुनिः ॥ पुनः संप्रष्टुमारेभे देवर्षिः कौतुकान्वितः ॥ ६९ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंडे नारायणनारदसंवादे मंगलवर्णनं नाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ नारद उवाच ॥ अथ क्रीडांतरे राधा किं पप्रच्छ हरिं विभुम् ॥ कां कथां कथयामास कथ्यतां

करुणानिधे ॥ १ ॥ ॥ श्रीनारायण उवाच ॥ ॥ उत्थाय सुखसंभोगाद्राधां कृत्वा पुरो हरिः ॥ उवास मलयद्रोणीं वटमूले मनोहरे ॥ २ ॥ राधा तं परिपप्रच्छ सस्मितं सुमनोहरम् ॥ दर्पभङ्गं वज्रभृतो निगूढं श्रुतिसुन्दरम् ॥ ३ ॥ ॥ श्रीराधिकोवाच ॥ ॥ श्रुतं यशः शूलभृतो दर्पभङ्गश्च दैवतः ॥ पार्वत्या दर्पभङ्गश्च विवाहश्च तयोरहो ॥४॥ अधुना श्रोतुमिच्छामि दर्पभङ्गं हरेर्हरे ॥ शेषाणां च क्रमेणैव वद व्यस्य जगद्गुरो ॥ ५ ॥ श्रीकृष्ण उवाच ॥ दर्पभंगं सुरपतेस्त्रिषु लोकेषु विश्रुतम् ॥ कर्णपीयूषमतुलं सुन्दरं शृणु सुन्दरि ॥ ६ ॥ पुरा शतमखो दर्पात्कृत्वा शतमखान्मुदा ॥ बभूव सर्वदेवानामध्यक्षः संपदा युतः ॥ ७ ॥ दिने दिने तदैश्वर्यं वर्द्धते तपसां फलात् ॥ दीक्षां तं कारयामास सिद्धमन्त्रं बृहस्पतिः ॥८॥ स जजाप महामन्त्रं पुष्करे शतवत्सरम् ॥ बभूव मन्त्रसिद्धश्च परिपूर्णमनोरथः ॥ ९ ॥ ब्रह्मस्वरूपां प्रकृतिं संपन्मूढो न मन्यते ॥ सा तं शशाप स्वगुरोः शापं लेभेऽतिकोपतः ॥ ॥१०॥ एकदा प्रकृतेः शापाद्धतबुद्धिः स्वसंसदि ॥ गुरुं दृष्ट्वा समुत्थायन ननाम मुदाऽन्वितः ॥ ११ ॥ बृहस्पतिस्ततः कोपान्नोवास गृयमाययौ ॥ न तस्थौ तारकाभ्याशे तपसे काननं ययौ ॥ १२ ॥ उवाच मनसा दीनो यातु संपद्धरेरिति ॥ अथ शक्रो मतिं प्राप्य क्व गतोऽतो मदीश्वरः ॥१३॥इत्युक्त्वा वेगतः पीठाज्जगाम तारकान्तिकम्॥प्रणम्य मातरं भक्त्या नतस्कन्धः पुटाञ्जलिः ॥ ॥ १४ ॥ सर्वं निवेदनं कृत्वा रुरोदोच्चैर्मुहुर्मुहुः ॥ पुत्रस्य रोदनं दृष्ट्वा रुरोद तारका भृशम् ॥ १५ ॥ वत्स गच्छ गृहं नैव गुरुं द्रक्ष्यसि साम्प्रतम् ॥ दुर्दिनान्ते गुरुं प्राप्य पुनर्लक्ष्मीमवाप्स्यसि ॥ १६॥ अधुना कर्मणां भोगं भुङ्क्ष्व मूढ दुराशय॥दुर्दिने स्वगुरौ दोषः सुदिने परितोषणम् ॥१७॥ सुदिनं दुर्दिनं शक्र कारणं सुखदुःखयोः ॥ इत्युक्त्वा तारका देवी विरराम पतिव्रता ॥ १८ ॥ जगाम शक्रः स्नानार्थं स्वर्णदीं सुमनोहराम् ॥ ददर्श तत्र रुचिरां मार्जन्तीं च नितम्बिनीम् ॥१९॥ सस्मितां सकटाक्षां तामहल्यां गौतमप्रियाम् ॥ दृष्ट्वा च विपुलश्रोणीं स्तनयुग्मं मनोहरम् ॥२०॥ स तस्याः शक्रः संपश्यन्मुमोह काममोहितः ॥ पुनः स चेतनां प्राप्य विहाय स्नानमीश्वरि ॥ २१ ॥ मूर्तिं विधाय तद्भर्तुस्तत्समीपं जगाम ह ॥ गत्वा तु स्निग्धवस्त्रां तां समाकृष्य स्मरातुरः ॥ २२॥

चकार विविधं तत्र शृंगारं सुमनोहरम् ॥ मूर्च्छा संप्राप कामेन तन्द्रां च मुनिकामिनी ॥२३॥ निश्चेष्टा सुखसंभोगान्निश्चेष्टस्त्रिदशा
धिपः ॥ एतस्मिन्नन्तरे तत्त्वा समागत्य मुनीश्वरः॥ २४ ॥ ददर्श गेहे मिथुनं मैथुने च रतिप्रिये ॥ दृष्ट्वा चुकोप स मुनिर्ज्वलन्निव
हुताशनः ॥ २५ ॥ विज्ञानेनातिरोषेण बभञ्ज सुरतिक्षणम् ॥ शक्रः स चेतनां प्राप्य दृष्ट्वा च मुनिपुंगवम् ॥ २६ ॥ कालस्वरूपं
त्रासेन दधार चरणाम्बुजम् ॥ कोपरक्तास्यनयनो देवं पादानतं भिया ॥ उवाच नीतिवचनं गौतमः शरणागतम् ॥ २७ ॥
गौतम उवाच ॥ धिक् त्वामिन्द्र सुरश्रेष्ठ कश्यपात्मज पण्डित ॥ २८ ॥ प्रपौत्र जगतां स्रष्टुर्बुद्धिस्ते कथमीदृशी ॥
मातामहः स्वयं दक्षोऽदितिर्माता पतिव्रता ॥ २९ ॥ कर्मसाध्यः स्वभावश्च कुलधर्मं प्रबाधते ॥ वेदं विज्ञाय ज्ञानी त्वं योनि
लुब्धोऽसि कर्मणा ॥ ३० ॥ योनीनां च सहस्रं च तव गात्रे भवत्विह ॥ पूर्णवर्षं च सततं योनिगन्धं त्वमाप्नुहि ॥ ३१ ॥ ततः
सूर्यं समाराध्य योनिश्चक्षुर्भविष्यति ॥ मम प्राणेश्वरी दुष्टा येन मूढ त्वया कृता ॥ ३२ ॥ मच्छापेन गुरोः कोपाद्भ्रष्ट
श्रीर्भव साम्प्रतम् ॥ गुरोरपेक्षया मूढ प्राणा नापहृतास्तव ॥ ३३ ॥ तेजस्विनोऽतिबन्धोर्मे बंधुभेदभिया सुर ॥ उत्तिष्ठोत्तिष्ठ देवे
न्द्र गच्छ वत्स स्वमन्दिरम् ॥ ३४॥ शुभाशुभं च यत्किंचित्सर्वं कर्मोद्भवं भवेत् ॥ महामुनीन्द्रवचनाद्गतः शक्रश्च पुष्करम् ॥३५॥
चकाराराधनं भक्त्या नैष्कृत्यं च चकार ह ॥ पादानतामहल्यां तामुवाच मुनिपुंगवः ॥ ३६ ॥ वनं गत्वा चिरं तिष्ठ विधाय मूर्ति
मश्मनः ॥ ॥ अकामां चकमे शक्रः सर्वं जानाम्यहं प्रिये ॥ ३७ ॥ तथा च परभोग्या मे न भोग्या व्रजाधमे ॥ परवीर्यं यदुदरे
कामतोऽकामतोऽपि वा ॥३८॥ अहल्ये याति दैवेन तदुपायं निशामय ॥ अकामतो न च दुष्टा सा प्रायश्चित्तेन शुद्ध्यति ॥३९॥
कामभोगेन त्याज्या सा कर्मभोगेन शुद्ध्यति ॥ पितृपाके दैवपाके पूजायां नाधिकारिणी ॥४० ॥ षष्टिवर्षसहस्राणि कालसूत्रं
प्रयाति सा ॥ षष्टिवर्षसहस्राणि क्षयं कृत्वा स्वकर्मणः ॥ ४१ ॥ स्वामिनो वचनात्सा तु प्रणम्य स्वामिनं भिया ॥ नाथ नाथेति
कुर्वन्ती रुदन्ती वनमाप सा ॥ ४२ ॥ षष्टिवर्षसहस्राणि भुक्त्वा भोगं मुनिप्रिया ॥ श्रीरामचरणस्पर्शात्सद्यः शुद्धा बभूव ह ॥४३॥

त्रैलोक्यमोहनं रूपं विधाय मुनिकामिनी ॥ जगाम गौतमाभ्याशं मुनिः संप्राप्य सुन्दरीम् ॥ ४४ ॥ अथ शक्रस्य वृत्तांतं परमं शृणु सुन्दरि ॥ पापघ्नं पुण्यबीजं तत्संव्यस्य कथयामि ते ॥ ४५ ॥ एकदा च गुरोः कोपात्प्रकृतेरवहेलनात् ॥ ब्रह्महत्या वज्रभृतो बभूव हतचेतसः ॥ ४६ ॥ शक्रस्त्यक्तगुरुर्दैवग्रस्तो दैत्यनिपीडितः ॥ जगाम शरणं भीतो ब्रह्माणं जगतां गुरुम् ॥ ॥ ४७ ॥ तदाज्ञया विश्वरूपं चकार च पुरोहितम् ॥ बभूव तत्र विश्वस्तो दैवाद्बुद्धिहतो हरिः ॥ ४८ ॥ दैत्यदौःहित्रस्य भावं विज्ञाय च विचक्षणः ॥ प्रचिच्छेद शिरस्तस्य तीक्ष्णबाणेन लीलया ॥ ४९ ॥ विश्वरूपपिता त्वष्टा श्रुत्वा सद्यश्चुकोप ह ॥ इंद्रशत्रो विवर्द्धस्वेत्युक्त्वा यज्ञं चकार ह ॥ ५० ॥ यज्ञकुंडात्समुत्तस्थौ वृत्रो नाम महासुरः ॥ चकार निग्रहं कोपाद्देवानामवलीलया ॥ ५१ ॥ शक्रो महामुनेरस्थ्नां वज्रं कृत्वा सुदारुणम् ॥ जघान वृत्रं देवानां कंटकं दैत्यमर्दनः ॥ ५२ ॥ ब्रह्महत्या शुनासीरं दुद्राव हतचेतनम् ॥ रक्तवस्त्रपरीधाना वृत्रस्त्रीवेषधारिणी ॥ ५३ ॥ सप्ततालप्रमाणा सा शुष्ककण्ठोष्ठतालुका ॥ ईषाप्रमाणदशना महाभीतं चकार तम् ॥ ५४ ॥ धावंतं परिधावंती बलिष्ठा हतचेतनम् ॥ खड्गहस्ता दयाहीना वेगेन परिधावति ॥ ५५ ॥ इंद्रो दृष्ट्वा च तां घोरां स्मारंस्मारं गुरोः पदम् ॥ विवेश मानससरो मृणालसूक्ष्मसूत्रतः ॥ ५६॥ तत्र गंतुं न शक्ता सा ब्रह्मणः शापकारणात् ॥ सा तस्थौ वटशाखायां सरसस्तटसन्निधौ ॥ ५७ ॥ अथात्र नहुषो भूपस्त्रिलोकेशो बभूव ह ॥ स ययाचे शचीं देवान्बलिष्ठो दुर्बलानपि ॥ ५८ ॥ शची श्रुत्वा महाभीता तारकां शरणं ययौ ॥ तारा निर्भर्त्स्यं स्वपतिं भृत्यपत्नीं ररक्ष च ॥ ५९ ॥ शचीमाश्वास्य स्वगुरुर्जगाम तत्सरो मुदा ॥ आजुहाव शुनासीरं कातरं हतचेतनम् ॥ ६० ॥ बृहस्पतिरुवाच ॥ उत्तिष्ठोत्तिष्ठ हे वत्स भयं किं ते मयि स्थिते ॥ त्वदीश्वरं स्वरेणैव निशामय भयं त्यज ॥ स्वरं बृहस्पतेर्ज्ञात्वा सर्वसिद्धीश्वरो हरिः ॥ ६१ ॥ सूक्ष्मरूपं परित्यज्य स्वरूपं च दधार सः ॥ उत्थाय सद्यः संभ्रांतो गुरुं तं सूर्यवर्चसम् ॥६२॥ दृष्ट्वा ननाम संप्रीत्या संप्रीतं त्यक्तकोपकम् ॥ पदांबुजे निपतितं रुदंतं भयविह्वलम् ॥ ६३ ॥ निधाय वक्षसि प्रेम्णा रुरोद प्रेमविह्वलः ॥ रुदंतं वाक्पतिं तुष्टं तुष्टाव

त्रिदशेश्वरः ॥ पुटांजलिः पुलकितो भक्तिनम्रात्मकंधरः ॥ ६४ ॥ इंद्र उवाच ॥ क्षमस्व भगवन्दोषं कृपां कुरु कृपानिधे ॥ ६५ ॥ भृत्यापराधं सततं न गृह्णाति सदीश्वरः ॥ स्वभार्यासु स्वशिष्येषु स्वभृत्येषु सुतेषु च ॥ ६६ ॥ दुर्बलः सबलो वाऽपि को दंड कर्तुमक्षमः ॥ त्रिषु कोटिषु देवेषु देवकोऽहमपंडितः ॥६७॥ त्वत्प्रसादात्सुरश्रेष्ठ कृपया वार्द्धितस्त्वया ॥ संहर्तुमीशस्त्वं सर्वमहं को वापि कीटवत् ॥ ६८ ॥ स्वयं विधातुः पौत्रश्च पुनः स्रष्टुं स्वयं क्षमः ॥ इति तस्य स्तवं श्रुत्वा परितुष्टो गुरुः स्वयम् ॥ उवाच वचनं प्रीत्या प्रसन्नवदनेक्षणः ॥ ६९ ॥ गुरुरुवाच ॥ स्थिरो भव महाभाग निश्चलां कमलां लभ ॥ ७० ॥ संप्राप्य परमैश्वर्यं पूर्वस्माच्च चतुर्गुणम् ॥ गच्छामरावतीं वत्स राज्यं कुरु पुरंदर ॥ ७१ ॥ हतशत्रुर्मत्प्रसादाद्गत्वा पश्य शचीं सतीम् ॥ इत्येवमुक्त्वा स गुरुः सशिष्यो गंतुमुद्यतः ॥ ७२ ॥ ददर्श पुरतो घोरां ब्रह्महत्यां सुदुःसहाम् ॥ दृष्ट्वा शक्रो महाभीतस्तं गुरुं शरणं ययौ ॥ ७३ ॥ बृहस्पतिर्महाभीतः सस्मार मधुसूदनम् ॥ एतस्मिन्नंतरे तत्र वाग्बभूवाशरीरिणी ॥ ७४ ॥ स्वल्पाक्षरा च बह्वर्था तां शुश्राव बृहस्पतिः ॥ संसारविजयं नाम सर्वाशुभविनाशनम् ॥ ७५ ॥ राधिके वचनं श्रुत्वा शिष्यं रक्षाधुनेति च॥तदा त्वत्कवचं दत्त्वा शिष्याय शिष्यवत्सलः ॥७६॥ चकार भस्मसात्तां च हुंकारेणैव लीलया ॥ तदा शिष्यं गृहीत्वा च गत्वा साममरावतीम् ॥७७॥ ददर्श च्छिन्नभग्नां च शत्रुणा वचनाद्गुरोः ॥ भर्तुरागमनं श्रुत्वा शची संहृष्टमानसा ॥७८॥ प्रणम्य च गुरुं भक्त्या स्वकांतं प्रणनाम सा ॥ श्रुत्वाऽऽगमनमिंद्रस्य समाजग्मुः सुराः प्रिये ॥ ऋषयो मुनयश्चैव हर्षगद्गदमानसाः ॥७९ ॥ योजयामास सत्कारं निर्मातुममरावतीम् ॥ पूर्णमब्दशतं शिल्पी निर्ममे त्वमरावतीम् ॥ ८० ॥ नानारत्नविचित्राढ्यां मणिरत्नेंद्रनिर्मिताम् ॥ मनोहरां निरुपमां न हि तुष्टो यया हरिः ॥८१॥ विश्वकर्मा गृहं गंतुं न शशाक विनाऽऽज्ञया॥परमोद्विग्नचित्तश्च ब्रह्माणं शरणं ययौ ॥ ८२ ॥ विज्ञाय तदभिप्रायं तमुवाच विधिः स्वयम् ॥ तव कर्मक्षयादेव तावच्छ्रो भवितेति च ॥८३॥ श्रुत्वा तद्वचनं कारुः शीघ्रं प्रापामरावतीम् ॥ ब्रह्मा जगाम वैकुण्ठं प्रणम्योवाच मातरम् ॥८४॥ हरिर्ब्रह्माणमाश्वास्य प्रस्थाप्य स्वगृहं च तम् ॥

विप्ररूपं समास्थाय चाजगामामरावतीम् ॥ ८५ ॥ दण्डी छत्री शुक्लवासा बिभ्रत्तिलकमुज्ज्वलम् ॥ अतिखर्वः शुक्लदंतः सस्मितः
सुमनोहरः ॥ ८६ ॥ वयसाऽतिशिशुर्बुद्ध्या ज्ञानवृद्ध्या विचक्षणः ॥ स्वयं विधातुर्धाता च दाता च सर्वसंपदाम् ॥ ८७ ॥ इंद्रद्वारे
समुत्तिष्ठन्द्वारपालमुवाच ह ॥ ब्रूहीदं ब्राह्मणो द्वारे शीघ्रं त्वां द्रष्टुमागतः ॥ ८८ ॥ इत्येवं वचनं श्रुत्वा द्वारि ज्ञानं चकार तम् ॥ स
च शीघ्रं समागम्य ददर्श ब्राह्मणार्भकम् ॥ ८९ ॥ बालकामां बालिकानां समूहैः परिवेष्टितम् ॥ हसद्भिश्च महोत्साहात्सस्मितं तेज
साऽन्वितम् ॥ ९० ॥ प्रणनाम हरिर्भक्त्या तं हरिं शिशुरूपिणम् ॥ आशिषं युयुजे प्रीत्या तं हरिर्भक्तवत्सलः ॥ ९१ ॥ मधुपर्कादिकं
दत्त्वा शक्रः पूजां चकार तम् ॥ पप्रच्छागमनं कस्माद्वदेति विप्रबालकम् ॥ ९२ ॥ इंद्रस्य वचनं श्रुत्वा तमुवाच द्विजार्भकः ॥ मेघ
गम्भीरया वाचा बृहस्पतिगुरोर्गुरुः ॥ ९३ ॥ ब्राह्मण उवाच ॥ समागतोऽहं त्वां द्रष्टुं प्रष्टुं वचनमीप्सितम् ॥ चित्रं नगरनि
र्माणं समाकर्ण्याद्भुतं हरे ॥ ९४ ॥ कतिवर्षं च निर्माणे भवान्संकल्पितो यथा ॥ कतिचित्तां विश्वकर्मा निर्माणं वा करिष्यति ॥
॥ ९५ ॥ एवंभूतं च निर्माणं न केनेंद्रेण निर्मितम् ॥ नैवंविधं सुनिर्माणे विश्वकर्मा परः क्षमः ॥९६॥ बालकस्य वचः श्रुत्वा जहास
स सुरेश्वरः ॥ संपन्मदातिमत्तश्च पुनः पप्रच्छ बालकम् ॥ ९७ ॥ कतींद्राणां समूहश्च त्वया दृष्टः श्रुतोऽथवा ॥ विश्वकर्मा कतिवि
धस्तं मे ब्रूहि शिशोऽधुना ॥ ९८ ॥ शक्रस्य वचनं श्रुत्वा प्रहस्य विप्रबालकः ॥ तमुवाच श्रुतिसुखं पीयूषसदृशं वचः ॥ ९९ ॥
॥ ब्राह्मण उवाच ॥ जानामि कश्यपं तात तव तातं प्रजापतिम् ॥ मुनिं मरीचिनामानं तत्रालं च तपोनिधिम् ॥ १०० ॥
नाभिपद्मोद्भवं विष्णोः स्तुत्वा तं विधिमीश्वरम् ॥ रक्षितारं च तं विष्णुं परं सत्त्वगुणान्वितम् ॥ १ ॥ एकार्णवं च प्रलयं सत्त्वशून्यं
भयानकम् ॥ सृष्टिं कतिविधां शक्र कल्पं कतिविधं ध्रुवम् ॥ २ ॥ ब्रह्मांडं च कतिविधं ब्रह्मविष्णुमहेश्वरान् ॥ ब्रह्माण्डेषु कतिविधा
निन्द्रान्को गन्तुमीश्वरः ॥३॥ यदि संख्याऽस्ति रेणूनां धरायां च सुराधिप ॥ तथापि संख्या शक्राणां नास्त्येवेति विदुर्बुधाः ॥४॥
शक्रस्यायुश्चाधिकारो युगानामेकसप्ततिः ॥ अष्टाविंशतिशक्राणां पतनेऽहर्निशं विधेः ॥ ५ ॥ विधेरष्टोत्तरशतमायुरेव प्रमाणतः॥ सुरें

द्राणां च का संख्या नास्ति संख्या विधेरपि ॥ ६ ॥ ब्रह्मांडसंख्या यत्र क्क ब्रह्मविष्णुमहेश्वराः ॥ महाविष्णोर्लोमकूपोद्भवे तोये सुनिर्मले ॥ ७॥ ब्रह्मांडेऽस्ति यथा नौका भवतोये च कृत्रिमा ॥ एवं लोम्नः प्रमाणेन ब्रह्मांडाः संत्यसंख्यकाः ॥ ८ ॥ ब्रह्मांडे च कतिविधाः सुराः संत्येव त्वत्समाः ॥ एतस्मिन्नंतरे तत्र ददर्श पुरुषोत्तमः ॥ ९ ॥ पिपीलिकासमूहं च व्यायतं धनुषां शतम् ॥ क्रमशस्तान्संनिरीक्ष्य जहासोच्चैर्द्विजार्भकः ॥११०॥ नोवाच किंचिन्मौनी च गंभीरः सगणो यथा ॥ दृष्ट्वा हास्यं विप्रबटोर्गाथां श्रुत्वाऽतिविस्मितः ॥ पप्रच्छ च पुनर्विप्रं शुष्ककंठोष्ठतालुकः ॥ ११ ॥ इंद्र उवाच ॥ कथं हससि विप्रेंद्र मां शीघ्रं कारणं वद ॥ त्वं वा को मायया च्छन्नः शिशुरूपी गुणार्णवः ॥ १२॥ इंद्रस्य वचनं श्रुत्वा तमुवाच द्विजार्भकः ॥ आध्यात्मिकं नीतिसारं ज्ञानबीजं परं वरम् ॥ १३ ॥ ब्राह्मण उवाच ॥ दृष्टः पिपीलिकासंघो हेतुरस्य निगूढकः ॥ १४ ॥ मा मां पृच्छ शोकबीजं तवान्यज्ञानकारणम ॥ सांसारिकाणां संसारवृक्षमूलनिकृंतनम् ॥१५॥ अज्ञानतमसि च्छन्नं ज्ञानदीपमनुत्तमम् ॥ निगूढं सर्ववेदेषु सिद्धानामपि दुर्लभम् ॥ १६ ॥ योगिनां प्राणतुल्यं च मूढाहंकारभंजनम् ॥ इत्युक्त्वा तत्र संतस्थौ सस्मितो द्विजपुंगवः ॥ पुनः पप्रच्छ शक्रस्तं शुष्ककंठोष्ठतालुकः ॥ १७ ॥ शक्र उवाच ॥ ब्रूहि विप्रबटो शीघ्रं ज्ञानदीपं पुरातनम् ॥ न जानामि शशुः कस्त्वं ज्ञानराशिः स्वमूर्तिमान् ॥ १८ ॥ इंद्रस्य वचनं श्रुत्वा विप्ररूपी जनार्दनः ॥ ज्ञानं भाषितुमारेभे योगींद्राणां सुदुर्लभम् ॥ १९॥ ब्राह्मण उवाच ॥ सृष्टः पिपीलिकासंघ एकैकः क्रमशो मया ॥ १२० ॥ सर्वे स्वकर्मणा शक्र शक्रीभूताः सुरालये ॥ अधुना कर्मणा सर्वे क्रमशो भूतजन्मनाम् ॥ २१ ॥ अतीतकाले संप्राप्ता भूतजातिं पिपीलिकाम् ॥ कर्मणा जीविनो यांति वैकुंठ च निरामयम् ॥ २२ ॥ कर्मणा ब्रह्मलोकं च शिवलोकं च कर्मणा ॥ स्वर्गं स्वर्गसमास्थानं पातालं च स्वकर्मणा ॥ २३ ॥ कर्मणा नरकं घोरं स्वात्मदुःखैककारणम् ॥ कर्मणा सूकरीगर्भं कर्मणा क्षुद्रजीवनम् ॥ २४ ॥ कर्मणा पशुपत्नीनां कर्मणा पक्षियोषिताम् ॥ कर्मणा कीटयोनिं च वृक्षत्वं च स्वकर्मणा ॥२५॥ स्वकर्मणा सुखी दुःखी सेव्यः सेवकएव च ॥ कर्मणा ब्राह्मणत्वं च दैवं चापि स्व

कर्मणा ॥ २६ ॥ स्वकर्मणा च प्रेतत्वं ब्रह्मत्वं च स्वकर्मणा ॥ कर्मणा व्याधियुक्तश्च कर्मणैवातिसुन्दरः ॥ २७ ॥ कर्मणा स्वाङ्गहीनश्च
स्वाङ्गवृद्धश्च कर्मणा ॥ विधाता कर्मसूत्रेण फलदाता च जीविनाम् ॥ २८ ॥ कर्म स्वभावसाध्यं च स्वभावोऽभ्यासजीवकः ॥ इत्येवं
कथितं सर्वमाध्यात्मिकपरं वचः ॥ २९ ॥ सुखदं पुण्यदं सारं नरकार्णवतारकम् ॥ संसारः स्वप्नवत्सर्वं देवेन्द्र सचराचरम्॥१३०॥
मृत्युश्च मस्तकस्थायी सर्वेषां कालयोगतः ॥ जलबुद्बुदवत्सर्वं जीविनां च शुभाशुभम् ॥ ३१ ॥ शक्र शश्वद्भ्रमत्येव नाविष्टस्तत्र
पण्डितः ॥ इत्येवमुक्त्वा विप्रश्च तत्र तस्थौ च सस्मितः ॥ ३२ ॥ विस्मितस्त्रिदशाध्यक्षो नात्मानं बहुमन्यते ॥ एतस्मिन्नन्तरे
शीघ्रमाजगाम मुनीश्वरः ॥ ३३ ॥ अतिवृद्धो महायोगी ज्ञानेन वयसा महान् ॥ कृष्णाजिनी जटाधारी बिभ्रत्तिलकमुज्ज्वलम् ॥
॥ ३४ ॥ वक्षःस्थले रोमचक्रं बिभर्ति मस्तके कटम् ॥ स्थितं सर्वं मध्यदेशे किंचिदुत्पाटितं स्फुटम् ॥ ३५ ॥ समागत्य द्वयोर्मध्ये
तस्थौ स्थाणुवदेव सः ॥ महेन्द्रो ब्राह्मणं दृष्ट्वा प्रणनाम मुदाऽन्वितः ॥ ३६ ॥ मधुपर्कादिकं दत्त्वा पूजयामास भक्तितः ॥ पप्रच्छ
कुशलं विप्रं चकार विनयं पुनः ॥ ३७ ॥ तुष्टावातिथिभावेन मुदा सादरपूर्वकम् ॥ विप्रार्भकस्तेन सार्द्धं संभाषां च चकार सः ॥
स्ववाञ्छितं परं प्राह सर्वं विनयपूर्वकम् ॥ ३८ ॥ बालक उवाच ॥ कुतस्त्वमागतो विप्र किन्नाम तव वा वद ॥ को वाऽत्रा
गमने हेतुर्निवासः केन हेतुना ॥ ३९ ॥ कटं कथं मस्तके ते लोमचक्रं च वक्षसि ॥ अत्युन्नतं मध्यदेशे किंचिदुत्पाटितं मुने ॥
॥ १४० ॥ मां चेत्कृपाऽस्ति ते विप्र सर्वं संव्यस्य कथ्यताम् ॥ अत्यद्भुतमिदं सर्वं श्रोतुं कौतूहलं मम ॥ ४१ ॥ स शिशोर्वचनं
श्रुत्वा तमुवाच महामुनिः ॥ सर्वं स्वकीयवृत्तान्तं शक्रस्य पुरतो मुदा ॥४२॥मुनिरुवाच ॥ अल्पायुषा मया विप्र कुत्रापि न कृता
गृहाः ॥ न विवाहश्चोपजीव्यं भिक्षोपजीविनाऽधुना ॥ ४३ ॥ लोमशेति च मन्नाम हेतुर्विप्रस्य दर्शनम् ॥ वर्षणातपशान्त्यर्थं मस्त
कस्थं कटं मम ॥ ४४ ॥ वक्षःस्थलस्थितं रोमचक्रं तत्कारणं शृणु ॥ सांसारिकाणां भयदं विवेकजननं परम् ॥ ४५ ॥ आयुःसं
ख्याप्रमाणं मे लोमचक्रं च वक्षसि ॥ शक्रैकपतनं विप्र लोमैकोत्पाटनं मम ॥ ४६ ॥ उत्पाटितानि लोमानि तेन मध्ये स्थितानि

च ॥ ब्रह्मणो द्विपरार्धे च मम मृत्युर्निरूपितः ॥ ४७ ॥ असंख्यविधयो ब्रह्मन्मरिष्यन्ति मृता अपि ॥ कलत्रेण च पुत्रेण गृहेण किं प्रयोजनम् ॥ ४८ ॥ ब्रह्मणः पतने चक्षुर्निमेषश्च हरेर्भवेत् ॥ तत्पादपद्ममतुलं चिन्तयामि निरंतरम् ॥ ४९ ॥ दुर्लभं श्रीहरेर्दास्यं भक्तिर्मुक्तेर्गरीयसी ॥ स्वप्नवत्सर्वमैश्वर्यं तद्भक्तिव्यवधायकम् ॥ १५० ॥ इदं मद्गुरुणा दत्तं शंभुना ज्ञानमुत्तमम् ॥ विना भक्तिं न गृह्णामि सालोक्यादिचतुष्टयम् ॥ ५१ ॥ इत्येवमुक्त्वा स मुनिर्जगाम शिवसन्निधिम् ॥ शिशुरूपी हरिस्तत्रैवान्तर्धानं चकार ह ॥ ५२ ॥ इन्द्रस्तु स्वप्नवद्दृष्ट्वा बभूव तत्र विस्मितः ॥ तृष्णामात्रं च संपत्तौ नास्त्येव परमेश्वरे ॥ ५३ ॥ विश्वकर्माणमानीय प्रियमुक्त्वा शतक्रतुः ॥ दत्त्वा रत्नानि संपूज्य तं प्रस्थापितवान्गृहम् ॥ ५४ ॥ सर्वं विन्यस्य पुत्रे च शरणं गन्तुमुद्यतः ॥ शचीं राज्यश्रियं त्यक्त्वा विवेकी क्षयकामुकः ॥ ५५ ॥ दृष्ट्वा विवेकिनं कान्तं हृदयेन विदूयता ॥ शची जगाम शोकार्ता संत्रस्ता शरणं गुरोः ॥ ५६ ॥ सर्वं निवेदनं कृत्वा समानीय बृहस्पतिम् ॥ बोधयामास शक्रं तं नीतिसारेण कामिनी ॥५७॥ गुरोः शास्त्रविशेषं च दम्पतीरससंयुतम्॥ विधाय च स्वयं प्रीत्या पाठयामास तं मुदा ॥ ५८ ॥ मुनिः शास्त्रविशेषं च बोधयामास वाक्पतिः ॥ स चकार तदा राज्यं वृन्दावनविनोदिनि ॥ ५९ ॥ इत्येवं कथितं सर्वं शक्रदर्पविमोचनम् ॥ साक्षाद्दृष्टो दर्पभङ्गो नन्दयज्ञे सुरेश्वरि ॥ १६० ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे श्रीकृष्णराधासंवादे सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

श्रीराधिकोवाच ॥ कथितो भवता मह्यं दर्पभङ्गः श्रुतो हरेः ॥ दर्पभङ्गं रवेश्चापि श्रोतुमिच्छामि तत्त्वतः ॥ १ ॥ श्रीकृष्ण उवाच ॥ एकदैवोदयं कृत्वा रविरस्तं जगाम ह ॥ माली सुमाली दैत्येन्द्रौ दीप्तिं कर्तुं समुद्यतौ ॥ २ ॥ महासंपन्मदोन्मत्तौ शंकरस्य वरेण च ॥ तयोश्च प्रभया रात्रिर्न भवेदिति सुन्दरि ॥ ३ ॥ रुष्टः सूर्यः स्वशूलेन तौ जघानावलीलया ॥ पतितौ सूर्यशूलेन मूर्च्छितौ धरणीतले ॥ ४ ॥ भक्तापायं च विज्ञाय शंकरो भक्तवत्सलः ॥ आगत्य जीवयामास महाज्ञानेन तौ विभुः ॥ ५ ॥ तौ च नत्वा शिवं भक्त्या जग्मतुर्निजमन्दिरम् ॥ दुद्राव च महादेवः सूर्यं हन्तुं रुषा ज्वलन् ॥ ६ ॥ दृष्ट्वा संहारकर्तारं जिघांसन्तं हरं

रविः ॥ भिया पलायमानश्च ब्रह्माणं शरणं ययौ ॥ ७ ॥ दुद्राव च महादेवो ब्रह्मणो निलयं रुषा ॥ शूलमत्यर्थमुद्यम्य कालका
लो विधेर्विधिः ॥ ८ ॥ दृष्ट्वा ब्रह्मा हरं रुष्टं तुष्टाव परमेश्वरम् ॥ चतुर्वक्त्रेण वेदोक्तस्तोत्रेण जगतां पतिः ॥ ९ ॥ ब्रह्मोवाच ॥
प्रसीद दक्षयज्ञघ्न सूर्यं मच्छरणागतम् ॥ त्वयैव सृष्टं सृष्टेश्च समारम्भे जगद्गुरो ॥ १० ॥ आशुतोष महाभाग प्रसीद भक्तवत्सल ॥
कृपया च कृपासिन्धो रक्ष रक्ष दिवानिशम् ॥ ११ ॥ ब्रह्मस्वरूप भगवन्सृष्टिस्थित्यन्तकारण ॥ स्वयं रविं च निर्माय
स्वयं संहर्तुमिच्छसि ॥ १२ ॥ स्वयं ब्रह्मा स्वयं शेषो धर्मः सूर्यो हुताशनः ॥ इन्द्रचंद्रादयो देवास्त्वत्तो भीताः परात्पर ॥ १३ ॥
ऋषयो मुनयश्चैव त्वां निषेव्य तपोधनाः ॥ तपसां फलदाता त्वं तपस्त्वं तपसां फलम् ॥ १४ ॥ इत्येवमुक्त्वा ब्रह्मा तं सूर्यमानीय
भक्तितः ॥ प्रीत्या समर्पयामास शङ्करे दीनवत्सले ॥ १५ ॥ शंभुस्तमाशिषं कृत्वा विधिं नत्वा जगद्विधिः ॥ प्रसन्नवदनः श्रीमाना
लयं प्रययौ मुदा ॥ १६ ॥ इति धातृकृतं स्तोत्रं संकटे यः पठेन्नरः ॥ भयात्प्रमुच्यते भीतो बद्धो मुच्येत बन्धनात् ॥ १७ ॥ राज
द्वारे श्मशाने च मग्नपोते महार्णवे ॥ स्तोत्रस्मरणमात्रेण मुच्यते नात्र संशयः ॥ १८ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्म
खण्डे नारायणनारदसंवादे श्रीकृष्णराधासंवादे अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ❁ ॥ श्रीकृष्ण उवाच ॥ सूर्यः प्रणम्य ब्रह्माणं
मुदा युक्तस्तदाज्ञया ॥ चकार विनयं प्रीत्या तेजस्वी त्रिगुणात्मकः ॥ १ ॥ अथ वह्नेरुपाख्यानं सावधानं निशामय ॥ गोपनीयं पुरा
णेषु कर्णपीयूषमुत्तमम् ॥२॥ त्रैलोक्यं भस्मसात्कर्तुमेकदाऽग्निः समुद्यतः॥ शततालप्रमाणान्तां शिखां कृत्वा भयानकीम् ॥३॥ क्षुभितः
कुपितश्चैव भृगोः शापस्य कारणात् ॥ स्वं च तेजस्विनं मत्वा तुच्छं मत्वाऽन्यमात्मनः ॥४॥एतस्मिन्नन्तरे विष्णुराजगामावलीलया ॥
वह्नेस्तां दाहिकीं शक्तिं तां जहार पुरः स्थितः ॥ ५ ॥ मायया शिशुरूपी च तमुवाच जनार्दनः ॥ सस्मितो विनयं कृत्वा भक्तिनम्रा
त्मकन्धरः ॥ ६ ॥ शिशुरुवाच ॥ कथं रुष्टोऽसि भगवन्भवान्मां कारणं वद ॥ त्रैलोक्यं भस्मसात्कर्तुमुद्यतोऽसि निरर्थकम् ॥७॥
त्वमेव भृगुणा शप्तो भृगोश्च दमनं कुरु ॥ एकापराधात्रैलोक्यं भस्मीकर्तुं न चार्हसि ॥ ८ ॥ विश्वं च ब्रह्मणा सृष्टं तस्य पाता स्वयं

हरिः ॥ संहर्ता भगवान्रुद्र एवमेव क्रमो भवेत् ॥ ९ ॥ तत्कथं भस्मसात्कर्तुमीश्वरे शंकरे स्थिते ॥ रक्षितारं हरिं जित्वा संहारं कुरु सत्वरम् ॥ १० ॥ इत्युक्त्वा ब्राह्मणबटुः शरपत्रं पुरः स्थितम् ॥ अतिशुष्कं करे धृत्वा दग्धं कर्तुं ददौ मुदा ॥११॥ दृष्ट्वा शुष्केन्धनो वह्निर्लेलिहानो भयानकः ॥ स वव्रे शिखया विप्र मेघेन शशिनं यथा ॥ १२ ॥ न च दग्धं शुष्कपत्रं लोमैकं च शिशोस्तथा ॥ दृष्ट्वा व्रीडायुतो वह्निर्निस्तब्धो हि शिशोः पुरः ॥१३॥ कृत्वा वह्नेर्दर्पभङ्गमन्तर्धानं चकार सः ॥ वह्निः स्वमूर्तिं संहृत्य स्वस्थानं भीतवद्ययौ ॥ १४ ॥ उक्तो वह्नेर्दर्पभङ्गः परं वै श्रोतुमिच्छसि ॥ नित्यनूतनमाख्यानं देवानां दर्पमोचनम् ॥ १५ ॥ श्रीराधिकोवाच ॥ शेषाणां दर्पभंगं च क्रमेण कथय प्रभो ॥ कथापीयूषधारां ते श्रुत्वा तृप्येत को भुवि ॥ १६ ॥ श्रीनारायण उवाच ॥ राधिकावचनं श्रुत्वा सस्मितो भगवान्प्रभुः ॥ कथां कथितुमारेभे श्रुत्वा रम्यां पुरातनीम् ॥ १७ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे अग्निदर्पमोचनं नामैकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ छ ॥

श्रीकृष्ण उवाच ॥ दुर्वाससो दर्पभङ्गं कथयामि शृणु प्रिये ॥ महामुनेर्योगतश्च रुद्रांशस्यातितेजसः ॥१॥ एकदा चाम्बरीषश्च कृत्वा च द्वादशीव्रतम् ॥ पारणं कर्तुमारेभे भोजयित्वा द्विजान्बहून् ॥ २ ॥ एतस्मिन्नन्तरे तत्र चाजगाम मुनिः स्वयम् ॥ क्षुधार्तश्च तृषार्त्तश्च विष्णुव्रतपरायणः ॥ ३ ॥ मां भोजय महाभागेत्येवं स नृपमुक्तवान् ॥ राजा भक्त्या ददौ तस्मै परमान्नं सुधोपमम् ॥ ४ ॥ सकेशं पायसं दृष्ट्वा राजानं शप्तुमुद्यतः ॥ जटां निकृत्य शिरसः स्थापयामास भूतले ॥ ५ ॥ जटामध्यात्समुद्भूतो ज्वलदग्निशिखोपमः ॥ सप्ततालप्रमाणश्च पुरुषः प्रलयांतकः ॥ ६ ॥ नृपश्रेष्ठं स राजानं कोपेन हन्तुमुद्यतः ॥ भयेन कम्पिताः सर्वे शुष्ककण्ठोष्ठतालुकाः ॥७॥ सस्मार च महाभीतो राजा मम पदाम्बुजम् ॥ सर्वविघ्नस्योपशमः स्मृतिमात्राद्बभूव ह ॥ ८ ॥ एतस्मिन्नन्तरे चक्रं दुर्निवार्यं सुदर्शनम् ॥ तेजसा मम तुल्यं च कोटिसूर्यप्रभोपमम् ॥ ९ ॥ आविर्बभूव सहसा सभामध्ये च घूर्णितम् ॥ निकृत्य कृत्यापुरुषं दुद्राव मुनिपुङ्गवम् ॥ १० ॥ सशैलसागरां पृथ्वीं काञ्चनीं भूमिमुत्तमाम् ॥ भ्रामयित्वा महीं सर्वां पुनर्दुद्राव तं मुनिम् ॥ ११ ॥ धावन्तं मुक्तकेशं तं भीतं कातरमातु

रम् ॥ तेजसाऽऽच्छाद्य सूर्यं तं दीप्तिं कुर्वन्तमुत्तमाम् ॥१२॥ कैलासं सप्तवर्गं च ब्रह्मलोकमनामयम् ॥ विप्रेन्द्रो भ्रमणं कृत्वा वैकुण्ठं शरणं ययौ ॥ १३॥ पादपद्मे पतन्तं च ददर्श विप्रपुङ्गवम् ॥ कृपया च कृपासिन्धुर्ददौ विप्राय निर्भयम् ॥ १४ ॥ नारायणवरेणैव बभूव विज्वरो द्विजः॥पुनर्ययौ हरिं स्तुत्वा नृपगेहं तदाज्ञया॥१५॥ राजा मुनीन्द्रं संप्राप्य भोजयामास पायसम् ॥ स्वयं च पारणं चक्रे सस्त्रीकः सहबान्धवः॥१६॥राजानमाशिषं कृत्वा भुक्त्वा विप्रो गृहं ययौ ॥ मया नियोजितं चक्रं भक्तानां रक्षणाय च ॥ १७॥ नश्यन्ति सर्वे प्रलये न मे भक्तः प्रणश्यति॥सर्वे देवा मम प्राणा भक्ताः प्राणाधिका मम॥१८॥त्वं च लक्ष्मीर्महामाया सावित्री वा सरस्वती॥ब्रह्मा शंभुरनन्तश्च धर्मश्च ब्राह्मणास्तथा॥१९॥गोपाङ्गनाश्च गोपाश्च सर्वे प्रियतमा मम॥तेभ्यः प्रियाः परा भक्ताः प्रियो भक्तान्न कश्चन ॥२०॥ दत्त्वा सुदर्शनं चक्रं भक्तानां रक्षणाय च॥तथापि न प्रतीतिर्मे स्वयं द्रष्टुं प्रयामि तान्॥२१॥दुर्वाससो दर्पभङ्गः श्रुतो मत्तः सुरेश्वरि ॥ आज्ञापय महाभागे किं भूयः श्रोतुमिच्छसि ॥ २२ ॥ श्रीराधिकोवाच ॥ धन्वन्तरेर्दर्पभङ्गं कथयस्व जगद्गुरो ॥ पुराणे गोपनीनं च श्रोतुं कौतूहलं मम ॥ २३ ॥ श्रीनारायण उवाच ॥ राधिकावचनं श्रुत्वा जहास मधुसूदनः ॥ कथां कथितुमारेभे श्रुतिरम्यां पुरातनीम् ॥ २४ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे दुर्वाससो दर्पभङ्गो नाम पञ्चाशत्तमोऽध्यायः ॥ ५० ॥ श्रीकृष्ण उवाच ॥ नारायणांशो भगवान्स्वयं धन्वन्तरिर्महान् ॥ पुरा समुद्रमथने समुत्तस्थौ महोदधेः ॥ १॥ सर्ववेदेषु निष्णातो मंत्रतन्त्रविशारदः ॥ शिष्यो हि वैनतेयस्य शङ्करस्योपशिष्यकः ॥ ॥ २ ॥ शिष्याणां च सहस्रेण गतः कैलासमीश्वरि ॥ ददर्श तक्षकं मार्गे लेलिहानं भयानकम् ॥ ३ ॥ लक्षनागैः परिवृतं शैलतुल्यं विषोल्बणम् ॥ भोक्तुं कोपात्समायांतमेवं दृष्ट्वा जहास च ॥ ४ ॥ दम्भी धन्वन्तरेः शिष्यो धृत्वा तक्षकमुल्बणम् ॥ मंत्रेण जृंभितं कृत्वा निर्विषं तं चकार ह ॥ ५ ॥ अमूल्यं मणिरत्नं च जहार मस्तके स्थितम् ॥ करेण भ्रामयित्वा च प्रेरयामास दूरतः॥ ॥ ६ ॥ निश्चेष्टस्तक्षकस्तस्थौ तत्र मार्गे यथा मृतः ॥ गणा निवेदनं चक्रुर्गत्वा वासुकिसन्निधिम् ॥७॥ वासुकिस्तत्समाकर्ण्य

प्रज्वलन्नतिकोपतः ॥ सर्पान्प्रस्थापयामासासंख्यांश्चैव विषोल्बणान् ॥ ८ ॥ सर्पसेनाग्रणीनां च मुख्यान्पञ्च विशारदान् ॥ द्रोणकालीयकर्कोटपुण्डरीकधनंजयान् ॥ ९ ॥ सर्वे नागाः समाजग्मुर्यत्र धन्वन्तरिः स्वयम् ॥ भयमापुः शिष्यगणा दृष्ट्वा नागानसंख्यकान् ॥ १० ॥ नागनिश्वासवातेन सर्वे शिष्या मृता इव ॥ निश्चेष्टा ज्ञानरहिताः शेरते धरणीतले ॥ ११ ॥ धन्वन्तरिश्च भगवान्पीयूषवर्षणेन च ॥ जीवयामास शिष्यांश्च मंत्रेण च गुरुं स्मरन् ॥ १२ ॥ चेतनां कारयित्वा च शिष्याणां च जगद्गुरुः ॥ चकार जृंभितं मन्त्रैः सर्पसंघं विषोल्बणम् ॥ १३ ॥ सर्वे बभूवुर्निश्चेष्टा जृंभितास्ते मृता इव ॥ कोऽपि नालं ततो देवि वार्तां दातुं गणेषु च ॥ १४ ॥ वासुकिर्बुबुधे सर्वं सर्वज्ञः सर्वसंकटम् ॥ आजुहाव जगद्गौरीं भगिनीं ज्ञानरूपिणीम् ॥ १५ ॥ वासुकिरुवाच ॥ मनसे त्वं समागच्छ नागान्रक्षातिसङ्कटात् ॥ जगत्त्रये महाभागे पूजा तव भविष्यति ॥ १६ ॥ वासुकेर्वचनं श्रुत्वा प्रहस्योवाच कन्यका ॥ वाक्यं पीयूषतुल्यं च विनयावनतस्थिता ॥ १७ ॥ मनसोवाच ॥ नागेन्द्र शृणु मद्वाक्यं यास्यामि समरं प्रति ॥ भद्राभद्रं दैवसाध्यं करिष्यामि यथोचितम् ॥ १८ ॥ तं शत्रुं संहरिष्यामि लीलया समरस्थले ॥ अहं यं निहनिष्यामि तं को रक्षितुमीश्वरः ॥ १९ ॥ यदि ब्रह्मादयो देवाः समायान्ति रणस्थले ॥ तथापि तव शत्रुं च प्रजेष्यामि न संशयः॥२०॥ गुरुर्मे भगवाञ्छेषः सिद्धमन्त्रं च दत्तवान् ॥ नारायणस्य जगतामीशस्य परमाद्भुतम् ॥ २१ ॥ बिभर्मि कवचं कण्ठे परं त्रैलोक्यमङ्गलम् ॥ संसारं भस्मसात्कृत्वा पुनः स्रष्टुमहं क्षमा ॥ २२॥ शिष्याऽहं मंत्रशास्त्रेषु शंभोर्भगवतः पुरा ॥ महाज्ञानं दत्तवान्स मह्यं च कृपया विभुः ॥ २३ ॥ शंभोश्च शिष्यो गरुडो गणयामि न तं ध्रुवम् ॥ धन्वंतरिस्तच्छिष्याणामेकः किं गणयामि तम् ॥ २४ ॥ इत्युक्त्वा सा जगामैका त्यक्त्वा नागगणान्रुषा ॥ प्रणम्य श्रीहरिं शंभुं शेषं च हृष्टमानसा ॥ २५ ॥ यत्र धन्वन्तरिर्देवः प्रसन्नवदनेक्षणः ॥ तत्राजगाम सा देवी कोपरक्तेक्षणा रुषा ॥ २६॥ दृष्टिमात्रेण सर्वांश्च जीवयामास सुन्दरी ॥ विषदृष्ट्या शत्रुशिष्यान्निश्चेष्टांश्च चकार ह ॥ २७ ॥ धन्वन्तरिस्तु भगवान्मन्त्रशास्त्रविशारदः ॥ मन्त्रेण यत्नं कृतवान्नोत्थापयितुमीश्वरः ॥२८॥ दृष्ट्वा धन्वं

तारिं देवी प्रहस्योवाच सत्वरम् ॥ बहूक्तिमर्थंयुक्तां च साहंकारां सुरेश्वरि ॥ २९ ॥ मनसोवाच ॥ मन्त्रार्थं मन्त्रशिल्पं च
मन्त्रभेदं महौषधम् ॥ वद जानासि किं सिद्ध शिष्योऽसि गरुडस्य च ॥ ३० ॥ अहं च वैनतेयश्च शिष्यौ शंभोश्च विश्रुतौ ॥ सुक
ल्पकालं सुचिरमहं धन्वन्तरे शृणु ॥ ३१ ॥ इत्युक्त्वा सरसः पद्मं समानीय जगत्प्रसूः ॥ मन्त्रसंवलितं कृत्वा प्रेरयामास कोपतः
॥ ३२ ॥ दृष्ट्वाऽऽगतं पद्मपुष्पं ज्वलदग्निशिखोपमम् ॥ (धन्वंतरिश्च निःश्वासैर्भस्मसात्तच्चकार ह) ॥३३ ॥ तच्च धन्वंतरिर्दृष्ट्वा समं
त्रेणुमुष्टिना ॥ चकार निष्फलं भस्म तां प्रहस्यावलीलया ॥ ३४ ॥ देवी जग्राह शक्तिं च ग्रीष्मसूर्यसमप्रभाम् ॥ मंत्रसंवलितां
कृत्वा प्रेरयामास तं रिपुम् ॥ ३५ ॥ दृष्ट्वा जाज्वल्यमानां तां शक्तिं धन्वंतरिः स्वयम् ॥ विष्णुदत्तेन शूलेन स तु चिच्छेद लीलया
॥ ३६ ॥ तां च शक्तिं वृथा दृष्ट्वा प्रजज्वालेश्वरी रुषा ॥ जग्राह नागपाशं च घोरमव्यर्थमुल्बणम् ॥ ३७ ॥ नागलक्षसमायुक्तं
सिद्धमन्त्रेण मन्त्रितम् ॥ प्रेरयामास कोपेन कालान्तकसमप्रभम् ॥३८॥ धन्वंतरिर्नागपाशं दृष्ट्वा च सस्मितो मुदा ॥ सस्मार गरुडं
तूर्णमाजगाम खगेश्वरः ॥ ३९ ॥ सर्पास्त्रमागतं दृष्ट्वा गरुडो हरिवाहनः ॥ विधाय चञ्चुना शीघ्रं बुभुजे क्षुधितश्चिरम् ॥ ४० ॥ ना
गास्त्रं निष्फलं दृष्ट्वा कोपरक्तेक्षणा भृशम् ॥ जग्राह भस्ममुष्टिं च शिवदत्तां पुरा प्रिये ॥ ४१ ॥ भस्ममुष्टिं मन्त्रपूतां दृष्ट्वा च
प्रेरितां यथा ॥ पक्षवातेन चिक्षेप शिष्यं पश्चान्निधाय च ॥ ४२ ॥ निरस्तां भस्ममुष्टिं च दृष्ट्वा देवी चुकोप ह ॥ जग्राह शूल
मव्यर्थं हन्तुं धन्वन्तरिं स्वयम् ॥ ४३ ॥ शिवदत्तं च शूलं च शतसूर्यसमप्रभम् ॥ अव्यर्थशूलं लोकेषु प्रलयाग्निसमप्रभम्
॥ ४४ ॥ अथ ब्रह्मा तथा शंभुराजगाम रणाजिरम् ॥ धन्वंतरेश्च रक्षार्थं शमनार्थं खगस्य च ॥४५॥ दृष्ट्वा शंभुं जगद्गौरी विधिं च
जगतां पतिम् ॥ भक्त्या ननाम तावेव निःशङ्का शूलधारिणी ॥ ४६ ॥ धन्वन्तरिश्च गरुडः प्रणनाम सुरेश्वरौ ॥ तुष्टाव परया
भक्त्या तौ च चक्रतुराशिषम् ॥ ४७ ॥ उवाच ब्रह्मा मधुरं हितं धन्वंतरिं मुदा ॥ पूजार्थं मनसायाश्च लोकानां हितकाम्यया ॥
॥ ४८ ॥ ब्रह्मोवाच ॥ धन्वंतरे महाभाग सर्वशास्त्रविशारद ॥ रणं ते मनसासार्द्धं न हि साम्यं च मे मतम् ॥ ४९ ॥

शिवदत्तेन शूलेन दुर्निवार्येण सर्वतः ॥ त्रैलोक्यं भस्मसात्कर्तुं क्षमेयं त्रिदशेश्वरी ॥ ५० ॥ ध्यानं कौथुमशाखोक्तं कृत्वा भक्त्या समाहितः ॥ दत्त्वा षोडशोपचारं देव्याश्च कुरु पूजनम् ॥ ५१ ॥ आस्तिकोक्तेन स्तोत्रेण स्तवनं कर्तुमर्हसि ॥ परितुष्टा च मनसा वरं तुभ्यं प्रदास्यति ॥ ५२ ॥ ब्रह्मणो वचनं श्रुत्वा चकारानुमतिं शिवः ॥ वैनतेयश्च संप्रीत्या बोधयामास यत्नतः ॥ ५३ ॥ तेषां च वचनं श्रुत्वा स्नात्वा शुचिरलंकृतः ॥ विधिं पुरोहितं कृत्वा पूजां कर्तुं समुद्यतः ॥ ५४ ॥ धन्वन्तरिरुवाच ॥ इहागच्छ जगद्गौरि गृहाण मम पूजनम् ॥ पूज्या त्वं त्रिषु लोकेषु पुरा कश्यपकन्यके ॥ ५५ ॥ त्वया जितं जगत्सर्वं देवि विष्णुस्वरूपया ॥ तेन तेऽस्त्रप्रयोगश्च न कृतो रणभूमिषु ॥ ५६ ॥ इत्युक्त्वा संयतो भूत्वा भक्तिनम्रात्मकंधरः ॥ गृहीत्वा शुक्लकुसुमं ध्यानं कर्तुं समुद्यतः ॥ ५७ ॥ चारुचम्पकवर्णाभां सर्वाङ्गसुमनोहराम् ॥ ईषद्धास्यप्रसन्नास्यां शोभितां सूक्ष्मवाससा ॥५८॥ सुचारुकबरीशोभां रत्नाभरणभूषिताम् ॥ सर्वाभयप्रदां देवीं भक्तानुग्रहकातराम्॥५९॥सर्वविद्याप्रदां शान्तां सर्वविद्याविशारदाम् ॥ नागेन्द्रवाहिनीं देवीं भजे नागेश्वरीं पराम् ॥ ६० ॥ ध्यात्वैवं कुसुमं दत्त्वा नानाद्रव्यसमन्वितम् ॥ दत्त्वा षोडशोपचारं पूजयामास तां प्रिये ॥ ६१ ॥ स्तोत्रं चकार यत्नाच्च पुलकाञ्चितविग्रहः ॥ पुटाञ्जलियुतो भूत्वा भक्तिनम्रात्मकंधरः ॥ ६२ ॥ धन्वंतरिरुवाच ॥ नमः सिद्धिस्वरूपायै सिद्धिदायै नमो नमः ॥ नमः कश्यपकन्यायै वरदायै नमो नमः ॥ ६३ ॥ नमः शंकरकन्यायै शंकरायै नमो नमः ॥ नमस्ते नागवाहिन्यै नागेश्वर्यै नमो नमः ॥ ६४ ॥ नम आस्तीकजननि जनन्यै जगतां मम ॥ नमो जगत्कारणायै जरत्कारुस्त्रियै नमः ॥ ६५ ॥ नमो नागभगिन्यै च योगिन्यै च नमो नमः ॥ नमश्चिरं तपस्विन्यै सुखदायै नमो नमः ॥ ६६ ॥ नमस्तपस्यारूपायै फलदायै नमो नमः ॥ सुशीलायै च साध्व्यै च शान्तायै च नमो नमः ॥ ६७ ॥ इत्येवमुक्त्वा भक्त्या च प्रणनाम प्रयत्नतः ॥ तुष्टा देवी वरं दत्त्वा सत्वरं स्वालयं ययौ ॥ ६८ ॥ ब्रह्मरुद्रवैनतेयाः समाजग्मुर्निजालयम् ॥ धन्वंतरिश्च भगवाञ्जगाम निजमन्दिरम् ॥ ६९ ॥ जग्मुर्नागाः प्रहृष्टाश्च फणाराजिविराजिताः ॥ इत्येवं कथितं सर्वं स्तवराजं मया तव ॥ ७० ॥ विधिना मातरं भक्तिमास्तीकश्च चकार

ह ॥ तदा तुष्टा जगद्गौरी पुत्रं तं मुनिपुंगवम् ॥ ७१ ॥ इदं स्तोत्रं महापुण्यं भक्तियुक्तश्च यः पठेत् ॥ वंशजानां नागभयं नास्ति तस्य न संशयः ॥ ७२ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे धन्वन्तरिदर्पभंगमनसाविजयोनामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥ ॥ श्रीकृष्ण उवाच ॥ सर्वेषां दर्पभङ्गश्च कथितश्च श्रुतस्त्वया ॥ क्षुद्राणां महतां चैव कृत एव न संशयः ॥१ ॥ अधुना च समुत्तिष्ठ गच्छ वृन्दावनं वनम् ॥ गोपिका विरहार्तांश्च शीघ्रं पश्यामि सुन्दरि ॥ २ ॥ श्रीनारायण उवाच ॥ इत्येवं वचनं श्रुत्वा मानिनी रसिकेश्वरी ॥ उवाच कृष्णं नय मां न शक्ता गंतुमीश्वर ॥ ३ ॥ राधिका वचनं श्रुत्वा प्रहस्य मधुसूदनः ॥ मामारुहेत्येवमुक्त्वा सोऽन्तर्धानं चकार ह ॥४॥ सा मनोयायिनी राधा कृत्वा च रोदनं क्षणम्॥ इतस्ततस्तमन्वेष्य वृन्दारण्यं जगाम सा ॥५॥ विवेश चन्दनवनं रुदन्ती शोककातरा ॥ ददर्श गोपिकास्तत्र शोकार्ता भयविह्वलाः॥ ॥६॥ ताम्रास्या घूर्णनयना भ्रमन्तीः सर्वकाननम् ॥ नाथ नाथेति कुर्वन्तीर्निराहारा रुषाऽन्विताः ॥ ७ ॥ ता दृष्ट्वा राधिका सा च प्रेमविच्छेदकातरा ॥ कथयामास वृत्तान्तं मलयभ्रमणादिकम् ॥ ८ ॥ ताभिः सार्धं च सा राधा रुरोद विरहातुरा ॥ हा नाथ नाथेत्युच्चार्य विलप्य च मुहुर्मुहुः ॥ ९ ॥ विनिन्द्य कृष्णं कोपेन तर्जयामास च क्षणम् ॥ क्षणं शरीरमुत्स्रष्टुं कोपात्सर्वाः समुद्यताः ॥ ॥ १० ॥ एतस्मिन्नंतरे कृष्णस्तत्र चन्दनकानने ॥ स्वात्मानं दर्शयामास राधिकां गोपिकागणम् ॥ ११ ॥ राधा गोपाङ्गनाभिश्च दृष्ट्वा प्राणेश्वरं मुदा ॥ सस्मिता च प्रदुद्राव पुलकाञ्चितविग्रहा ॥१२॥ तूर्णं कृष्णं समाश्लिष्य जहार मुरलीं रुषा ॥ मालां च पीत वसनं भग्नं कृत्वा च मानिनी ॥ १३ ॥ पुनः संधारयामास वस्त्रं मालां मनोहराम् ॥ विनोदमुरलीं तुष्टा वृन्दावनविनोदिनी ॥ १४॥ चन्दनागुरुकस्तूरीकुङ्कुमाक्तं चकार तम् ॥ मुहुर्मुहुर्मुखं वीक्ष्य चुचुम्ब परमादरम् ॥१५॥ क्षणं संतर्जयामास क्षणं स्तोत्रं चकार ह॥ सकर्पूरं च ताम्बूलं क्षणं तस्मै मुदा ददौ ॥ १६ ॥ अथ गोपाङ्गनाः सर्वा रुरुदुः प्रेमविह्वलाः ॥ सर्वं निवेदनं चक्रुः स्वदुःखं विरहोद्भवम् ॥१७॥ देहत्यागं च स्नानं च स्वाहारस्य विसर्जनम् ॥ वनेवनेऽहर्निशं च शश्वद्भ्रमणमेव च॥१८॥ क्षणं तं भर्त्सयामासुः स्तोत्रं

चक्रुः क्षणं मुदा ॥ क्षणं ददुर्भूषणं च क्षणं तस्मै च चन्दनम् ॥१९॥ काश्चिदूचुः प्राणचोरं पश्य रक्षेति संततम् ॥ एवं पुनर्न कर्त्तव्य
मनेनेति च काश्चन ॥ २० ॥ काश्चिदूचुरिमं मध्ये यूयं कुरुत सत्वरम् ॥ निबद्धं प्रेमपाशेन हृदये चेति काश्चन ॥ २१ ॥
काश्चिदूचुरयं नास्ति प्रतीतिर्न कदाचन॥यत्नाच्चेतनचोरं च पश्य पश्येति काश्चन ॥२२॥ काश्चिदूचुर्निष्ठुरोऽयं नरघातीति कोपतः॥
न पुनर्वदते मां च काश्चनेति च नारद ॥२३॥ निर्जनानि च रम्याणि यानि यानि वनानि च ॥ भ्रमेयुर्गोपिकास्तानि कृष्णेन
सह कौतुकात् ॥ २४ ॥ एवं तं गोपिकाः सर्वा मध्ये कृत्वा सदीश्वरम् ॥ ययुर्वनान्तरे यत्र सुरम्यं रासमण्डलम्॥२५॥ रासं गत्वा
स्वर्णपीठे तस्थौ स रसिकेश्वरः ॥ निशि भाति यथाऽऽकाशे चन्द्रस्तारागणैः सह ॥२६॥ नानामूर्तीर्विधायात्र सह ताभिर्जनार्दनः ॥
चकार च पुनः क्रीडां कामुकीनां मनोहराम् ॥ २७ ॥ स्वयं राधां करे धृत्वा पूर्वोक्तं रतिमन्दिरम् ॥ विश्वकर्मविनिर्माणमारुरोह स्मरा
तुरः॥२८॥चन्दनागुरुकस्तूरीकुङ्कुमाक्तं सुवासितम् ॥ तत्र चम्पकतल्पे स सुष्वाप च तया सह ॥ २९ ॥ नानाप्रकारशृङ्गारं काम
शास्त्रविशारदः ॥ चकार कामी क्रीडां च कामिन्या सह कौतुकी ॥३०॥ बभूव सुरतिस्तत्र सुचिरं च तयोर्मुने ॥ रतिनिष्ठा तयो
रम्या विरतिर्नास्ति तत्क्षणम् ॥ ३१ ॥ एवं तौ तस्थतुस्तत्र राधाकृष्णौ रसोत्सुकौ ॥ तस्थुस्ता गोपिकाभिश्च सुरतौ कृष्णमूर्तयः
॥ ३२ ॥ नारद उवाच ॥ आदौ राधां समुच्चार्य पश्चात्कृष्णं विदुर्बुधाः ॥ निमित्तमस्य मां भक्तं वद भक्तजनप्रिय ॥३३ ॥
श्रीनारायण उवाच ॥ निमित्तमस्य त्रिविधं कथयामि निशामय ॥ जगन्माता च प्रकृतिः पुरुषश्च जगत्पिता ॥ ३४ ॥ गरी
यसी त्रिजगतां माता शतगुणैः पितुः ॥ राधाकृष्णेति गौरीशेत्येवं शब्दः श्रुतौ श्रुतः ॥ ३५ ॥ कृष्णराधेशगौरीति लोके न च कदा
श्रुतः ॥ प्रसीद रोहिणीचन्द्र गृहाणार्घ्यमिदं मम ॥ ३६ ॥गृहाणार्घ्यं मया दत्तं संज्ञया सह भास्कर ॥ प्रसीद कमलाकान्त गृहाण
मम पूजनम् ॥ ३७ ॥ इति दृष्टं सामवेदे कौथुमे मुनिसत्तम ॥ राशब्दोच्चारणादेव स्फीतो भवति माधवः ॥ ३८ ॥ धाशब्दोच्चारतः
पश्चाद्धावत्येव ससंभ्रमः ॥ आदौ पुरुषमुच्चार्य पश्चात्प्रकृतिमुच्चरेत् ॥ ३९ ॥ स भवेन्मातृघाती च वेदातिक्रमणे मुने ॥ त्रैलोक्ये

भारतं धन्यं कर्मक्षेत्रं च पुण्यदम् ॥ ४० ॥ ततो वृन्दावनं पुण्यं राधापादाब्जरेणुना ॥ षष्टिवर्षसहस्राणि तपस्तप्तं च वेधसा ॥ राधिकाचरणाम्भोजपादरेणूपलब्धये ॥ ४१ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे राधामाधवयोरासवर्णनं नाम द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥ ❀ ॥ नारद उवाच ॥ समतीते पूर्णरासे किं चकार जगत्पतिः ॥ रहस्यं किं बभूवाथ तद्भवान्वक्तुमर्हति ॥ १ ॥ श्रीनारायण उवाच ॥ रासं निवर्त्य रासे च रासेश्वर्या समन्वितः ॥ स्वयं रासेश्वरस्तस्माद्यमुनापुलिनं ययौ ॥ २ ॥ तत्र स्नात्वा जलं पीत्वा निर्मलं निर्मले जले ॥ सार्द्धं गोपाङ्गनाभिश्च जलक्रीडां चकार सः ॥ ३ ॥ ततो जगाम भगवान्भाण्डीरं राधया सह ॥ गोपाङ्गनाश्च स्वगृहान्प्रययुर्विरहातुराः ॥ ४ ॥ क्रीडां चकार रहसि भाण्डीरे मालतीवने ॥ मालतीपुष्पशय्यायां रम्यायां रमणोत्सुकः ॥ ५ ॥ कृत्वा क्रीडां च तत्रैव वासन्तीकाननं ययौ ॥ रेमे तत्रैव रासेशो वसन्ते सुमनोहरे ॥ ६ ॥ तत्रैव रमणं कृत्वा ययौ चन्दनकाननम् ॥ चन्दनोक्षितसर्वाङ्गो गृहीत्वा चन्दनोक्षितम् ॥ ७ ॥ रम्ये चन्दनतल्पे च स्निग्धे चन्दनपल्लवे ॥ पूर्णचन्द्रे समुदिते विजहार तया सह ॥ ८ ॥ कृत्वा विहारं तत्रैव ययौ चम्पककाननम् ॥ रम्ये चम्पकतल्पे च चकार रतिमीश्वरीम् ॥ ९ ॥ रतिं निर्वर्त्य तत्रैव ययौ पद्मवनं प्रभुः ॥ पद्मपत्रसमाकीर्णे तल्पेऽतिसुमनोहरे ॥ १० ॥ सार्धं तत्र पद्ममुख्या शीतेन पद्मवायुना ॥ चकार सुखसंभोगं ययौ निद्रां तया सह ॥ ११ ॥ विहाय निद्रां निद्रेशो ददर्श निद्रितां प्रियाम् ॥ शयानां पद्मतल्पे च सुखसंभोगमात्रतः ॥ १२ ॥ दृष्ट्वा मुखं च घर्माक्तं शरच्चन्द्रविनिंदितम् ॥ अतिसंलुप्तसिन्दूरं लुप्तं कज्जलमुल्बणम् ॥ १३ ॥ संलुप्ताधररागं च संलुप्तगण्डपत्रकम् ॥ विस्रस्तकबरीभारं नेत्रोत्पलविमुद्रितम् ॥ १४ ॥ रत्नकुण्डलयुग्मेनामूल्येन परिशोभितम् ॥ राजितं मौक्तिकेनैव गजराजोद्भवेन च ॥ १५ ॥ प्रेम्णा स्वसूक्ष्मवस्त्रेण वह्निशुद्धेन माधवः ॥ चकार मार्जनं भक्त्या तद्वक्त्रं भक्तवत्सलः ॥ १६ ॥ केशसंमार्जनं कृत्वा निर्माय कबरीं हरिः ॥ माधवीमालतीमालाजालेन परिशोभिताम् ॥ १७ ॥ रत्नपट्टसूत्रबद्धां वामवक्रां मनोहराम् ॥ अतीव वर्तुलाकारां कुन्दपुष्पसुशोभिताम् ॥ १८ ॥ ददौ सिन्दूरतिलकमधश्चन्दनमुज्ज्वलम् ॥ कस्तूरीबिन्दुना

Digitization by eGangotri. Funding MoE Delhi

साद्धं परितः परिशोभिताम् ॥ १९ ॥ चकार पत्रकं गण्डयुग्मे चित्रविचित्रितम् ॥ प्रददौ कज्जलं भक्त्या नेत्रोत्पलसमुज्ज्वलम् ॥
॥ २० ॥ चकाराधररागं च राधायाश्चानुरागतः ॥ कर्णभूषणयुग्मं च चकारातीव निर्मलम् ॥ २१ ॥ अमूल्यरत्नहारं च स्तनभार
युगोज्ज्वलम् ॥ ददौ कण्ठे च वैण्कुठो मणिराजिविराजितम् ॥ २२ ॥ वह्निशुद्धांशुकं दिव्यममूल्यं विश्वरत्नतः ॥ वासयामास
वसनं कस्तूरीकुङ्कुमाक्तकम् ॥ २३ ॥ प्रददौ पादयुगले रत्नमञ्जीररञ्जितम् ॥ चकारालक्तकं भक्त्या पादाङ्गुलिनखेषु च ॥२४॥
चकार सेवां सेव्यायाः सेव्यस्त्रिजगतां सताम् ॥ अहो सेवकसंभक्त्या श्वेतेन चामरेण च ॥ २५ ॥ सर्वभावविदां श्रेष्ठो बोधज्ञः
कामशास्त्रवित् ॥ कामिनीं बोधयामास वासयामास वक्षसि ॥ २६ ॥ प्रेम्णा च प्रददौ तस्यै सद्रत्नदर्पणं शुभम् ॥ सुवे
षदर्शनार्थं च मुखचन्द्रं च मार्जितुम् ॥ २७॥ नानापुष्पैर्विरचितामम्लानां चन्दनोक्षिताम् ॥ गण्डे सौभाग्ययुक्तायाः सौभाग्येन ददौ
हरिः ॥ २८ ॥ कस्तूरीकुङ्कुमाक्तं च सुगन्धि चन्दनं ततः ॥ ददौ प्रियायाः सर्वाङ्गे प्रियः प्रेमभरेण च ॥ २९ ॥ पारिजातस्य कुसुमं
दत्तं रहसि ब्रह्मणा ॥ प्रददौ तत्कबर्यां च ललितायां च नारद ॥ ३० ॥ कमलं निर्मलं दिव्यं सहस्रदलमुज्ज्वलम् ॥ शिवेन दत्तं
रहसि ददौ तद्दक्षिणे करे ॥ ३१ ॥ अतिसारं मणीन्द्राणां मणिरत्नं च कौस्तुभम् ॥ दत्तं रहसि धर्मेण तस्यै सुप्रीतये ददौ ॥ ३२॥
आसवं रत्नपात्रस्थं दस्रदत्तं च निर्जने ॥ पानार्थं प्रददौ तस्यै कामोन्मादकरं परम्॥३३॥मालतीमाधवीकुन्दमन्दारचम्पकादिकम्॥
पुष्पं सद्रत्नपात्रस्थं तस्यै सुप्रीतये ददौ ॥ ३४ ॥ सुदुर्लभं च ताम्बूलं कर्पूरादिसुसंस्कृतम् ॥ भक्षणं कारयामास समयज्ञश्च तां
प्रियाम् ॥ ३५ ॥ सुदुर्लभं च विश्वेषु वाक्पतेः परिनिर्मितम् ॥ अनुत्तमममूल्यं च वरुणेन रहःस्थले ॥ ३६ ॥ अतिसूक्ष्ममनुपमं
दत्तं भक्त्या विराजितम् ॥ वासयामास वसनं कृत्वा नग्नां च कौतुकात् ॥ ३७ ॥ देवराजेन दत्तं च गजराजेन्द्रमौक्तिकम् ॥
नासिकाभूषणं चारु तस्यै सुप्रीतये ददौ ॥ ३८ ॥ एतस्मिन्नन्तरे तत्र सुशीलाद्याश्च गोपिकाः ॥ षष्टिः सत्सहचर्यश्च राधायाः
सुप्रतिष्ठिताः ॥ ३९ ॥ षष्टिसत्कोटिगोपीभिः सार्धं संहृष्टमानसाः ॥ आययुः पादचिह्नेन प्रियस्य वहतः प्रियाम् ॥ ४० ॥

काश्चिच्चंदनहस्ताश्च काश्चिच्चामरवाहिकाः ॥ काश्चित्कस्तूरिहस्ताश्च मालाहस्ताश्च काश्चन ॥ ४१ ॥ काश्चित्सिंदूरहस्ताश्च
काश्चित्कंकतिकाकराः ॥ काश्चिदलक्तककरा वस्त्रहस्ताश्च काश्चन ॥ ४२ ॥ काश्चिद्दर्पणहस्ताश्च पुष्पपात्रधरा वराः ॥ काश्चि
त्क्रीडापद्महस्ता मालाहस्ताश्च काश्चन ॥ ४३ ॥ काश्चिदासवहस्ताश्च काश्चिद्भूषणवाहिकाः ॥ करतालकराः काश्चिन्मृदंगवा
हिकाः पराः ॥ ४४ ॥ स्वरयंत्रकराः काश्चिद्वीणाहस्ताश्च काश्चन ॥ षट्त्रिंशद्रागरागिण्यो गोपिकारूपधारिकाः ॥ ४५ ॥ गोलोका
दागता याश्च भारतं राधया सह ॥ काश्चिज्जगुश्च ननृतुस्तत्रागत्य च काश्चन ॥ ४६ ॥ काश्चिच्चक्रुश्च सेवां च राधायाः श्वेतचामरैः ॥
काश्चिच्चक्रुश्च देव्याश्च पादसंवाहनं मुदा ॥४७॥ काचिद्ददौ च ताम्बूलं भक्षणार्थं महामुने ॥ एवं कौतुकयुक्तश्च पुण्ये वृन्दावने वने ॥
॥ ४८ ॥ प्रतस्थौ गोपिकासार्द्धं राधावक्षःस्थलस्थितः ॥ क्षणं पपौ च माध्वीकं प्रियया सह माधवः ॥ ४९ ॥ क्षणं चखाद ता
म्बूलं क्षणं निद्रां ययौ मुदा ॥ क्षणं चकार शृङ्गारं रत्ननिर्मितमन्दिरे ॥ ५० ॥ क्षणं जलविहारं च चकार यमुनाजले ॥ इत्येवं कथि
ता वत्स रासक्रीडा हरेरहो ॥५१॥ स्वेच्छामयस्यात्मनश्च परिपूर्णतमस्य च ॥ निर्गुणस्य स्वतन्त्रस्य परस्य प्रकृतेः प्रभोः ॥५२॥
ब्रह्मविष्णुशिवादीनामीश्वरस्य परस्य च ॥ कृष्णजन्मरहस्यं च बालक्रीडनमीप्सितम्॥५३॥ उक्तं किशोरचरितं किं भूयः श्रोतुमिच्छसि
॥ ५४ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे श्रीकृष्णरासक्रीडावर्णनं नाम त्रिपञ्चाशत्तमोऽध्यायः
॥ ५३ ॥ नारद उवाच ॥ अतः परं किं रहस्यं बभूव मुनिसत्तम ॥ कथं जगाम भगवान्मथुरां नन्दमन्दिरात् ॥ १ ॥ नन्दो
दधार प्राणांश्च विच्छेदेन हरेः कथम् ॥ गोपाङ्गना यशोदा वा कृष्णैकतानमानसाः ॥२॥ चक्षुर्निमेषविच्छेदाद्या राधा न हि जीवति ॥
कथं दधार सा देवी प्राणान्प्राणेश्वरं विना ॥ ३ ॥ येये तत्सङ्गिनो गोपाः शयनासनभोगतः ॥ कथं विसस्मरुस्ते च तादृशं बांधवं
व्रजे ॥४ ॥ श्रीकृष्णो मथुरां गत्वा किं किं कर्म चकार सः ॥ स्वर्गारोहणपर्यन्तं तद्भवान्वक्तुमर्हति ॥ ५ ॥ श्रीनारायण उवाच ॥
कंसश्चकार यज्ञं च समाहूतो धनुर्मखम् ॥ जगाम तत्र भगवांस्तेन राज्ञा निमन्त्रितः ॥ ६ ॥ राजा प्रस्थापयामास चाक्रूरं भग

वत्प्रियम् ॥ अक्रूरः प्रेरितो राज्ञा गत्वा च नन्दमन्दिरम् ॥ ७ ॥ श्रीकृष्णं च गृहीत्वा स सगणं मथुरां गतः ॥ कृष्णः श्रीमथुरां गत्वा
जघान नृपतिं मुने ॥ ८ ॥ जघान रजकं चैव चाणूरं मुष्टिकं गजम् ॥ चकार पित्रोरुद्धारं बान्धवानां च बान्धवः ॥ ९ ॥ कुब्जया सह
शृङ्गारं कृत्वा च कौतुकेन च ॥ तं च प्रस्थापयामास गोलोकं गोपिकापतिः ॥ १० ॥ चकार कृपया विष्णुर्मालाकारस्य मोक्षण
म् ॥ कृपया चोद्धवद्वारा बोधयामास गोपिकाः ॥ ११ ॥ तदोपनीतो भगवानवन्तीनगरं ययौ ॥ चकार विद्याग्रहणं मुनेः सांदीप
नेर्गुरोः ॥ १२ ॥ ततो जित्वा जरासन्धं निहत्य यवनेश्वरम् ॥ उग्रसेनं च नृपतिं चकार विधिपूर्वकम् ॥ १३ ॥ गत्वा समुद्रनिकटं
निर्माय द्वारकां पुरीम् ॥ जहार रुक्मिणीं देवीं जित्वा नृपतिसंघकम् ॥१४ ॥ कालिंदीं लक्ष्मणां शैब्यां सत्यां जांबवतीं सतीम् ॥
मित्रविंदां नाग्नजितीं समुद्वाहं चकार सः ॥ १५ ॥ निहत्य नरकं भूपं रणेन दारुणेन च ॥ पत्नीषोडशसाहस्रं विहारं च चकार सः
॥ १६ ॥ जहार पारिजातं च जित्वा शक्रं च लीलया ॥ चिच्छेद बाणहस्तांश्च जित्वा च चन्द्रशेखरम् ॥ १७ ॥पौत्रस्य मोक्षणं
कृत्वा पुनरागत्य द्वारकाम् ॥ आत्मानं दर्शयामास लोकांश्च प्रतिमन्दिरम् ॥१८ ॥ योगे च वसुदेवस्य तीर्थयात्राप्रसंगतः ॥ प्राणा
धिष्ठातृदेवीं च ददर्श तत्र राधिकाम् ॥ १९ ॥ पूर्णे च शतवर्षे च सुदाम्नः शापमोक्षणे ॥ पुनर्ययौ तया सार्द्धं पुण्यं वृन्दावनं
वनम् ॥ २० ॥ पुनश्चतुर्दशाब्दं च तया सार्धं जगत्पतिः ॥ चकार रासं रासे च पुण्यक्षेत्रे च भारते ॥ २१ ॥ पूर्णमेकादशाब्दं
च निवृत्य नन्दमंदिरे ॥ मथुरायां द्वारकायां पूर्णमब्दशतं विभुः ॥ २२ ॥ चकार भारहरणं पृथिव्यां पृथुविक्रमः॥पंचविंशतिवर्षं
च शतवर्षाधिकं मुने ॥ २३ ॥ तिष्ठञ्जगाम गोलोकं पृथिव्यां च पुरातनः ॥ यशोदायै च नन्दाय वृषभानाय धीमते ॥ २४ ॥
राधामात्रे कलावत्यै ददौ सामीप्यमोक्षणम् ॥ कृष्णेन सार्द्धं गोपी च राधिका च कुतूहलात् ॥ २५ ॥ निबध्य धर्मसेतुं च वेदोक्तं
च युगे युगे ॥ इत्येवं कथितं सर्वं समासेन महामुने ॥२६॥ श्रीकृष्णचरितं रम्यं चतुर्वर्गफलप्रदम् ॥ ब्रह्मादिस्तम्बपर्यन्तं सर्वं नश्वरमेव
च ॥२७॥ भज तं परमानन्दं सानन्दं नन्दनन्दनम् ॥ स्वेच्छामयं परं ब्रह्म परमात्मानमीश्वरम् ॥२८॥ परमव्ययमव्यक्तं भक्तानुग्रहवि

ब्रह्म ॥सत्य नित्यं स्वतंत्रं च सर्वेशं प्रकृतेः परम् ॥ २९ ॥ निर्गुणं च निरीहं च निराकारं निरञ्जनम् ॥ ३० ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे श्रीकृष्णराधिकासंवादो नाम चतुष्पञ्चाशतमोऽध्यायः ॥ ५४ ॥ ❀ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ पूर्वार्द्धं समाप्तम् ॥ ॥ ॥ शुभं भवतु ॥ छ ॥ छ ॥ छ ॥ छ ॥ ॥ ॥ ॥

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजेन क्षेमराजेन स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणयन्त्रालयेऽङ्कयित्वा प्रकाशितम् । संवत् १९८८, शकाब्दाः १८५३।

॥ इति ब्रह्मवैवर्तें महापुराणे श्रीकृष्णजन्मखण्डे पूर्वार्द्धं समाप्तम् ॥

॥ अथ ब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धप्रारम्भः ॥

श्रीगणेशाय नमः ॥ श्रीनारायण उवाच ॥ स एव भगवान्कृष्णः सर्वात्मा पुरुषः परः ॥ दुराराध्योऽतिसाध्यश्च सर्वाराध्यः सुखप्रदः ॥१॥ निजभक्तातिसाध्यश्च भक्तस्याराध्य एव च ॥ शश्वद्दृश्यः स्वभक्तस्याभक्तस्यादृश्य एव च ॥ २ ॥ दुर्ज्ञेयं तस्य चरितं कार्यं हृदय एव च ॥ बद्धास्तन्मायया सर्वे मोहिताश्च दुरंतया ॥३॥ यद्भयाद्वाति वातोऽयं कूर्मं धत्ते निराश्रयः ॥ कूर्मोऽनन्तं विधत्ते च यद्भयेन निरन्तरम् ॥४॥ बिभर्ति शेषो विश्वं च यद्भयेन च नारद ॥ सहस्रशीर्षा पुरुषः शिरस्यैकदेशतः ॥ ५ ॥ सप्तसागरसंयुक्ता सप्तद्वीपा वसुंधरा ॥ शैलकाननसंयुक्ता पातालाः सप्त एव च ॥ ६ ॥ सप्त स्वर्गाश्च विविधा ब्रह्मलोकसमन्विताः॥एवं विश्वं त्रिभुवनं कृत्रिमं परिकीर्तितम् ॥७॥ यद्भयेन विधात्रा च प्रतिसृष्टौ च निर्मितम् ॥ एवं विश्वान्यसंख्यानि लोमकूपैर्महान्विराट् ॥ ८ ॥ यद्भयेन विधत्ते च यदंशो ध्यायते हि यम् ॥ विष्णुः पाति च संसारं यद्भयेन कृपानिधिः ॥ ९ ॥ कालाग्निरुद्रो यद्भीतः कालः संहरते प्रजाः ॥ मृत्युंजयो महादेवो यद्भयाद्ध्यायते च यम् ॥ १० ॥ षड्गुणैरनुरागैश्च विरागी विरतः सदा ॥ यद्भयेन दहत्यग्निः सूर्यस्तपति यद्भयात् ॥ ११ ॥ यद्भयाद्वर्षतींद्रश्च मृत्युश्चरति जंतुषु ॥ यद्भयेन यमः शास्ता पापिनां धर्म एव च ॥ १२ ॥ धत्ते च धरणी लोकान्यद्भयेन चराचरान् ॥ सूयते प्रकृतिः सृष्टौ यद्भयान्महदादिकम् ॥ १३ ॥ दुर्ज्ञेयं तदभिप्रायं को वा जानाति पुत्रक ॥ यत्प्रभावं न जानंति ब्रह्मविष्णुमहेश्वराः ॥ १४ ॥ कथं जानामि तच्चेष्टामहं वत्स सुमंदधीः ॥ कथं जगाम मथुरां त्यक्त्वा वृन्दावनं वनम् ॥ १५ ॥ कथं तत्याज गोपीश्च राधां प्राणाधिकां प्रियाम् ॥ यशोदां बांधवादींश्च नंदं वा नंदनंदनः ॥ १६ ॥ दर्पहा दर्पदः सोऽपि सर्वेषां सर्वदः सदा ॥ बभंज राधादर्पं च सुदाम्नः शापकारणात् ॥ १७ ॥ अन्येषां भावनाहेतोर्ब्रह्मप्राप्तिस्तथा भवेत् ॥ एवं किंचिद्वितर्कं च कुरुते कमलोद्भवः ॥ १८ ॥ चकार दर्पभङ्गं च महाविष्णुः पुरा विभुः ॥ ब्रह्मणश्च तथा विष्णोः शेषस्य च शिवस्य च ॥ १९ ॥ धर्मस्य च यमस्यापि सांबस्य चंद्रसूर्ययोः ॥ गरुडस्य च वह्नेश्च गुरोर्दुर्वाससस्तथा ॥ २० ॥ दौवारिकस्य भक्तस्य जयस्य विजयस्य च ॥ सुराणामसुराणां च भवतः कामशक्रयोः ॥ २१॥ लक्ष्मणस्यार्जुनस्यापि बाणस्य च भृगोस्तथा ॥

सुमेरोश्च समुद्राणां वायोश्च वरुणस्य च ॥ २२ ॥ सरस्वत्याश्च दुर्गायाः पद्मायाश्च भुवस्तथा ॥ सावित्र्याश्चैव गङ्गाया मनसायास्तथैव
च॥२३॥प्राणाधिष्ठातृदेव्याश्च प्रियायाः प्राणतोऽपि च॥प्राणाधिकाया राधाया अन्येषामपि का कथा॥२४॥हत्वा दर्पं च सर्वेषां
प्रसादं च चकार सः ॥ कर्ता हर्ता पालयिता स्रष्टा स्रष्टुश्च सर्वतः ॥ २५॥ यं स्तोतुमीशो नालं च पंचवक्त्रैस्तु शंकरः ॥ स्तोतुं नालं
चतुर्वक्त्रो विधाता जगतामपि ॥ २६ ॥ स्तोतुं नालमनंतश्च सहस्रवदनैरहो ॥ स्वयं विष्णुर्विश्वव्यापी नालं स्तोतुं जनार्दनः ॥ २७॥
महाविराण्न शक्तोऽपि यं स्तोतुं परमेश्वरम् ॥ कंपिता यस्य पुरतः प्रकृतिः परमात्मनः॥२८॥सरस्वती जडीभूता यं स्तोतुं परमेश्वरम् ॥
महिमानं न जानंति वेदा यस्य च नारद ॥२९॥ इत्येवं कथितो ब्रह्मन्प्रभावः परमात्मनः ॥ निर्गुणस्य च कृष्णस्य किं भूयः श्रोतुमि
च्छसि ॥ ३० ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंडे उत्तरार्द्धे नारायणनारदसंवादे श्रीकृष्णप्रभाववर्णनं नाम पञ्चपञ्चा
शत्तमोऽध्यायः ॥ ५५ ॥ ❀ ॥ नारद उवाच ॥ किमपूर्वं श्रुतं ब्रह्मन्रहस्यं परमाद्भुतम् ॥ अनंतचरितं धन्यमनंतस्याच्यु
तस्य च ॥ १ ॥ कथं कृष्णो महाविष्णोर्दर्पभङ्गं चकार सः ॥ अन्येषां वा कथमहो तद्भवान्वक्तुमर्हति ॥२॥ स्वतः श्रीकृष्णचरि
तमतीव मधुरं श्रुतौ ॥ अतीव मधुरं रम्यं काव्यं कविमुखात्ततः ॥ ३ ॥ श्रीनारायण उवाच ॥ महाविष्णोरहंकारो बभूव
सहसेति च॥सर्वं मल्लोमकूपेषु विश्वान्येवाहमीश्वरः ॥४॥ संहारभैरवो भूत्वा तं स जग्रास लीलया ॥ स्थिते मूर्धावशेषे च प्रसादं तं
चकार सः ॥ ५ ॥ सर्वात्मना ध्यायमानः स्तुतौ भीतं कृपानिधिः ॥ तच्छरीरं सुसंपन्नं पुनरेव चकार सः ॥ ६ ॥ ब्रह्मणः सहसा
ब्रह्मन्निति दर्पो बभूव ह ॥ अहं त्रिजगतां धाता कर्ताऽहमीश्वरः स्वयम् ॥ ७ ॥ मत्परः पूजितो नास्ति मत्परः पूजितेंद्रियः ॥ इत्ये
वं मनसा कृत्वा बहुदर्पो बभूव ह ॥ ८ ॥ तं ब्रह्मणां समूहं च दर्शयामास तत्क्षणम् ॥ गोलोके स्वसमीपे च वसंतं पुरतो विभोः ॥
पंचवक्त्रं चतुर्वक्त्रं षड्वक्त्रं च ततोऽधिकम्॥९॥शतवक्त्रं च प्रत्येकं ब्रह्मांडौघं च लीलया ॥ त्यक्तुकामं स्वदेहं च व्रीडया नतकन्धरम् ॥
॥ १० ॥ पुनः प्रसादं कृपया तं चकार कृपानिधिः ॥ कालेन मोहिनीद्वारा तमपूज्यं चकार सः ॥ ११ ॥ स्वकन्यां

दर्शयित्वा तं सकामं च चकार ह ॥ पुनस्तद्दर्पभङ्गं च शिवद्वारा चकार सः ॥ १२ ॥ तत्याज लज्जया देहं पुनर्देहं दधार
सः ॥ पुनश्चकार तं पूज्यं ब्रह्माणं ब्राह्मणः प्रभुः ॥ १३ ॥ ज्ञानं ददौ महाज्ञानी ज्ञानानन्दः सनातनः ॥ विष्णोर्बभूव गर्वश्च
जगत्पाताऽहमीश्वरः ॥ १४ ॥ तमात्मविस्मृतं कृष्णश्चकार रामजन्मनि ॥ अहं विश्वं बिभर्मीति शेषो दर्पी बभूव ह ॥ १५ ॥
तद्दर्पं गरुडद्वारा चूर्णीभूतं चकार सः ॥ एकदा पूजितो नागैर्गरुडः कृष्णवाहनः ॥ १६ ॥ न पूजितश्च शेषेण स्वदर्पेण
पुरा मुने ॥ गरुडेन जितं क्रोधात्तमनन्तं मनस्विनम् ॥ १७ ॥ चकार मोक्षणं तस्य श्रीकृष्णश्च कृपानिधिः ॥ स्वयं
शिवः स्वदर्पाच्च विवाहं न चकार सः ॥ १८ ॥ तं कृत्वा मायया मोहं कारयामास स्त्रीयुतम् ॥ पुनर्जहार पत्नीं च दक्षकन्यां
महासतीम् ॥ १९ ॥ वर्षं शुशोच तद्देहं क्रोडे कृत्वा च शङ्करः ॥ नानास्थानं च बभ्राम रुदञ्छोकान्मुहुर्मुहुः ॥ २० ॥
जन्मान्तरे पुनः प्राप्य तां सतीं पार्वतीं मुदा ॥ विसस्मार च स्वज्ञानं दक्षशप्तः पुनः शिवः ॥ २१ ॥ पुनश्चाङ्गिरसद्वारा
स्मारयामास सत्वरम् ॥ एकदा सरथः शंभुः प्रेरितस्त्रिपुरे पुरा ॥ २२ ॥ हत्वा दैत्यं शिवद्वारा त्रिपुरारिं चकार तम् ॥ सर्वं
वरं च सर्वस्मै दातुं शंभुः कृपानिधिः ॥ २३ ॥ स्वयं कल्पतरुर्भूत्वा प्रतिज्ञां च चकार सः ॥ वृकासुरोऽनुष्ठानं च कृत्वा वव्रे वरं
विभुम् ॥ २४ ॥ दास्यामि हस्तं यन्मूर्ध्नि भस्मसाद्भवतु क्षणात् ॥ जगाद जगतां नाथ ईप्सितं ते भविष्यति ॥ २५ ॥ इति लब्ध्वा
वरं रुद्राद्गच्छन्तं शङ्करं विभुम् ॥ हस्तं दातुं च तन्मूर्ध्नि प्राधावत्सत्वरं पुरा ॥ २६ ॥ अतीव भीतः शम्भुश्च जगाम शरणं हरिम् ॥
भगवांश्च शिवस्यार्थे दैत्यं भस्मीचकार सः॥२७॥शिवं युद्धं च कुर्वन्तं बाणयुद्धे पुरा विभुः॥लीलया जृंभणास्त्रेण जडीभूतं चकार
सः ॥ २८ ॥ समागतं दक्षयज्ञे शम्भुं दम्भेन लीलया॥वारयामास भगवान्हस्तं दत्त्वा च तद्गले ॥ २९ ॥ केदारकन्यकाद्वारा शप्तो
धर्मोऽतिदैवतः॥बभूवातिकृशो भीतः कुह्वामेव यथा शशी ॥३०॥ तदा तस्य च शापान्ते सत्ये पूर्णो बभूव ह ॥ त्रिपाद्बभूव त्रेतायां
द्वापरे च द्विपादिति ॥ ३१ ॥ एकपाच्च कलौ सोऽपि कलेरंते पुनः क्षयः ॥ षोडशांशोऽतिक्लिष्टश्च सस्मार चरणं विभोः ॥ ३२ ॥

तदा सत्ययुगारंभे परिपूर्णोऽभवत्पुनः ॥ पुनर्युगानुरोधेन क्रमेण च पुनः क्षयः ॥ ३३ ॥ यमो माण्डव्यशापेन शूद्रयोनिमवाप ह ॥
तदा पुनः शताब्दान्ते पुनः शुद्धो बभूव ह ॥ ३४ ॥ साम्बो विमातृशापेन गलत्कुष्ठी बभूव सः ॥ चन्द्रो दर्पमर्दनैव जहार च गुरोः
प्रियाम् ॥ ३५ ॥ बभूव दर्पभङ्गोऽस्य यक्ष्मग्रस्तो बभूव सः ॥ सूर्यो दर्पात्तेजसश्च हन्तुं शङ्करकिङ्करम्॥ ३६ ॥सुमालीत्यभिधं दैत्यं
जगामाशु गिरिं प्रति॥अहर्निशं दीप्तिकरं कुर्वन्तं विषयं रवेः॥ ३७॥सूर्येण भीतो दैत्यश्च शङ्करं शरणं ययौ ॥ सूर्यं दृष्ट्वा शङ्करश्च
जग्राह शूलमेव च ॥ भीतो दुद्राव सूर्यश्च दृष्ट्वा तं शूलिनं मुने ॥ ३८ ॥ जघान काश्यां शूलेन शूली काशीश्वरो रविम् ॥ मूर्च्छां
संप्राप्य शूलेन दर्पभङ्गो बभूव ह ॥ ३९ ॥ सान्द्रांधकारः सहसा जग्राह पृथिवीतलम् ॥ आशुतोषो महादेवो जीवयामास तत्क्षणम्
॥ ४० ॥ तुष्टाव शंकरं सूर्यो लज्जितोऽपि भयेन च ॥ कृत्वा तमाशिषं तुष्टो ययौ गेहं कृपानिधिः॥ ४१॥ विभुर्गरुत्मतो दर्पं बभञ्ज
लीलया पुरा ॥ निःश्वासैः प्रेरितस्यापि शिवस्य वृषभस्य च ॥४२॥ आगच्छतश्च वैकुण्ठं पृष्ठे कृत्वा शिवं पुरा ॥ द्रष्टुं समागतं
भक्त्या देवं नारायणं परम् ॥ ४३ ॥ वह्निर्दर्पी भृगोः शापात्सर्वभक्षो बभूव ह ॥ गुरोः स्वभार्याहरणाद्दश्चू गौं बभूव ह ॥
॥ ४४ ॥ दुर्वाससो दर्पभङ्गो बभूव ह्यम्बरीषतः ॥ सुदर्शनेन चक्रेण विष्णोर्दुर्विषहेण च ॥ ४५ ॥ जयस्य विजयस्यापि दर्पभङ्गं
चकार सः ॥ वैकुण्ठात्पतितस्यापि ब्रह्मशापच्छलेन च ॥ ४६ ॥ नृसिंहेण हतः सोऽपि हिरण्यकशिपुर्यथा ॥ सूकरेण हिरण्याक्षो
लीलया च रसातले ॥ ४७ ॥ रावणः कुम्भकर्णश्च निहतौ रामबाणतः ॥ जन्मान्तरे च लङ्कायां ब्रह्मणा प्रार्थितस्य च ॥४८॥शिशु
पालो हि निहतः कृष्णबाणेन लीलया ॥ दन्तवक्रश्च सहसा परिपूर्णेऽत्र जन्मनि॥ ४९ ॥ सुराणां दर्पभङ्गं च दैत्यद्वारा चकार ह ॥
असुराणां सुरद्वारा विरोधेन परस्परम् ॥ ५० ॥ विधिद्वारा दर्पभङ्गं भवतश्च चकार सः ॥ भवानासीन्नारदश्च पुरा पुत्रः प्रजापतेः
॥ ५१ ॥ गन्धर्वश्च पितुः शापाच्छूद्रीपुत्रस्ततः क्रमात् ॥ ततः पुनर्नारदश्च प्रसादादधुना विभोः ॥ ५२ ॥ मम साध्यं विश्वमिति
कामदर्पो बभूव ह ॥ तं प्रमत्तं हरद्वारा भस्मसाच्च चकार सः ॥ ५३ ॥ पुनः कृत्वा प्रसादं तं जीवयामास लीलया ॥ ऐकान्तिकं

च तद्भक्तं स च नास्त्रं करोति हि ॥ ५४ ॥ चकार दर्पभङ्गं च दर्पिणो लक्ष्मणस्य च ॥ रणे शंकरशूलेन रावणप्रेरितेन च ॥५५॥
पुनस्तं जीवयामास रामस्य स्तवनेन च ॥ स्वयं विस्मृतविष्णोश्च ब्रह्मशापेन नारद ॥ ५६ ॥ चकार दर्पभङ्गं च कार्तवीर्यार्जुनस्य
च ॥ जामदग्न्यस्य शस्त्रेणामोघेन पर्शुना पुरा ॥ ५७ ॥ विप्रपुत्रस्य मरणे हरणे कृष्णयोषिताम् ॥ कर्णेन सार्द्धं समरे पार्थदर्पं
बभञ्ज सः ॥ ५८ ॥ बाणस्य चोषाहरणे चिच्छेद च भुजान्विभुः ॥ भृगोश्च दक्षयज्ञे च दर्पभङ्गं चकार सः ॥ ५९ ॥ पर्शुरामस्य
रामस्य विवाहे पथि गच्छतः ॥ बभञ्ज दर्पं समरे रामद्वारा पुरा विभुः ॥ ६० ॥ सुमेरोः शृङ्गभङ्गं च वायुद्वारा चकार सः ॥
समुद्राणां दर्पभङ्गं चकारागस्त्यभक्षणात् ॥ ६१ ॥ अकाले सृष्टिहरणे तत्पुत्रमरणे पुरा ॥ कोपयुक्तस्य वायोश्च दर्पभङ्गं चकार सः
॥ ६२ ॥ उषाहरणयात्रायां द्वारकागमने हरेः ॥ बाणस्य च गवां हेतोर्वरुणं च शशाप सः ॥ ६३ ॥ कलहे गङ्गया सार्द्धं वाण्या
नारायणाग्रतः ॥ सरस्वतीं च तत्याज तस्या दर्पं बभञ्ज सः ॥ ६४ ॥ दर्पयुक्तां च दुर्गां च त्यक्त्वा शम्भुर्हिमालये ॥
कामं च भस्मसात्कृत्वा तपसे च ययौ विभुः ॥ ६५ ॥ लज्जामवाप सा देवी तस्या दर्पं बभञ्ज सः ॥ सा ययौ तपसे विष्णोः
प्राप्तिहेतोः शिवस्य च ॥६६॥ भारते सुचिरं तप्त्वा देवी विष्णोर्वरेण च ॥ चकार स्वामिनं शंभुं भगवन्तं सनातनम् ॥६७॥ महासौ
भाग्ययुक्ता सा बभूव शंकरप्रिया ॥ विश्वेषु सर्वदेवेषु पूज्या वन्द्या स्तुता सुरैः ॥६८॥ दर्पयुक्ता महालक्ष्मीर्बभूव सा महामुने ॥ परा
भूता पुरा देवी जयेन विजयेन च ॥६९॥ प्रविशन्ती विभोर्द्वारं दत्त्वा भक्ताय वांछितम् ॥ निवारिता सा द्वाराच्च तेन दौवारिके
ण वै ॥७०॥ यदाऽऽत्मनस्तिरस्कारं साभिमाना महासती ॥ स्मृत्वा हरेः पादपद्मं देहं त्यक्तुं समुद्यता ॥७१॥ तदा ब्रह्मा महेश
श्च विष्णुर्धर्मश्च भास्करः ॥ चन्द्रश्च कामदेवश्च वैश्वानरो धनेश्वरः ॥ ७२ ॥ ऋषयो मुनयश्चैव मनवो विघ्ननाशकाः ॥ महेन्द्रो
वरुणश्चैव जगत्प्राणो हुताशनः ॥ ७३ ॥ समाययू रुदन्तस्ते पद्मायाः पुरतः पुरः ॥ तुष्टुवुश्च महालक्ष्मीं मूलप्रकृतिमीश्वरीम्
॥ ७४ ॥ देवा ऊचुः ॥ क्षमस्व भगवत्यम्ब क्षमाशीले परात्परे ॥ शुद्धसत्त्वस्वरूपे च कोपादिपरिवर्जिते ॥ ७५ ॥ उपमे

सर्वसाध्वीनां देवीनां देवपूजिते ॥ त्वया विना जगत्सर्वं मृततुल्यं च निष्फलम् ॥ ७६ ॥ सर्वसंपत्स्वरूपा त्वं सर्वेषां सर्वरूपिणी ॥
रासेश्वर्यधिदेवी त्वं त्वत्कलाः सर्वयोषितः ॥७७॥ कैलासे पार्वती त्वं च क्षीरोदे सिन्धुकन्यका ॥ स्वर्गे च स्वर्गलक्ष्मीस्त्वं मर्त्य
लक्ष्मीश्च भूतले ॥ ७८ ॥ वैकुण्ठे च महालक्ष्मीर्देवदेवी सरस्वती ॥ गङ्गा च तुलसी त्वं च सावित्री ब्रह्मलोकतः ॥ ७९ ॥ कृष्ण
प्राणाधिदेवी त्वं गोलोके राधिका स्वयम् ॥ रासे रासेश्वरी त्वं च वृन्दा वृन्दावने वने॥८०॥ कृष्णप्रिया त्वं भाण्डीरे चन्द्रा चन्द
नकानने ॥ विरजा चम्पकवने शतशृङ्गे च सुन्दरी ॥ ८१ ॥ पद्मावती पद्मवने मालती मालतीवने ॥ कुन्ददन्ती कुन्दवने सुशीला केत
कीवने ॥८२॥ कदम्बमाला त्वं देवी कदम्बकाननेऽपि च ॥ राजलक्ष्मी राजगेहे गृहलक्ष्मीर्गृहे गृहे ॥ ८३ ॥ इत्युक्त्वा देवताः सर्वे
मुनयो मनवस्तथा ॥ रुरुदुर्नम्रवदनाः शुष्ककण्ठोष्ठतालुकाः ॥ ८४ ॥ इति लक्ष्मीस्तवं पुण्यं सर्वदेवैः कृतं शुभम् ॥ यः पठेत्प्रा
तरुत्थाय स वै सर्वं लभेद्ध्रुवम् ॥ ८५ ॥ अभार्यो लभते भार्यां विनीतां च सुतां सतीम् ॥ सुशीलां सुन्दरीं रम्यामतिसुप्रियवादिनीम्
॥ ८६ ॥ पुत्रपौत्रवतीं शुद्धां कुलजां कोमलां वराम् ॥ अपुत्रो लभते पुत्रं वैष्णवं चिरजीविनम् ॥८७॥ परमैश्वर्ययुक्तं च विद्या
वन्तं यशस्विनम् ॥ भ्रष्टराज्यो लभेद्राज्यं भ्रष्टश्रीर्लभते श्रियम्॥८८॥हतबन्धुर्लभेद्बन्धुं धनभ्रष्टो धनं लभेत् ॥ कीर्त्तिहीनो लभेत्कीर्तिं
प्रतिष्ठां च लभेद्ध्रुवम् ॥८९॥ सर्वमङ्गलदं स्तोत्रं शोकसंतापनाशनम् ॥ हर्षानन्दकरं शश्वद्धर्ममोक्षसुहृत्प्रदम् ॥ ९० ॥ इति श्रीब्रह्म
वैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे उत्तरार्द्धे नारायणनारदसंवादे भगवद्गुणवर्णने लक्ष्मीस्तोत्रकथनं नाम षट्पञ्चाशत्तमोऽध्यायः॥
॥ ५६ ॥ नारायण उवाच ॥ देवानां स्तवनं श्रुत्वा त्यक्त्वा च रोदनं सती ॥ उवाच सुप्रसन्ना तांस्तेषां स्तोत्रेण नारद
॥ १ ॥ महालक्ष्मीरुवाच ॥ त्यजामि देहं न क्रोधान्न वैराग्येण साम्प्रतम् ॥ इदं हृदि समालोच्य देवास्तच्छ्रूयता
मिति ॥ २ ॥ यस्मिन्सदीशे महति सर्वसाम्ये च निर्गुणे ॥ सर्वात्मनि सदानन्दे समता तृणशैलयोः ॥ ३ ॥ भ्रूभंगलीलया लक्ष्मी
लक्षं स्रष्टुमलं च यः ॥ भृत्ये स्त्रियां यत्समता किं कार्यं तस्य सेवया ॥ ४ ॥ तत्पत्नीनां प्रधानाऽहं निरस्ता द्वारिणाऽधुना ॥

तद्भृत्यभृत्यभृत्येन परिपूर्णेन नेप्सिता ॥ ५ ॥ त्यक्ष्यामि जीवनमहमसौभाग्या च स्वामिनि ॥ वह्नौ च कामनां कृत्वा यथा
भद्रं भवेत्पुरा ॥ ६ ॥ या स्त्री भर्तुरसौभाग्या साऽसौभाग्या च सर्वतः ॥ शयने भोजने तस्या न सुखं जीवनं वृथा ॥ ७ ॥ यस्या
नास्ति प्रियप्रेम तस्या जन्म निरर्थकम् ॥ तत्किं पुत्रे धने रूपे संपत्तौ यौवनेऽथवा ॥ ८ ॥ यद्भक्तिर्नास्ति कान्ते च सर्वप्रियतमे
परे ॥ साऽशुचिर्धर्महीना च सर्वकर्मविवर्जिता ॥ ९ ॥ पतिर्बन्धुर्गतिर्भर्ता दैवतं गुरुरेव च ॥ सर्वस्माच्च परः स्वामी न गुरुः स्वामि
नः परः ॥ १० ॥ पिता माता सुतो भ्राता क्लिष्टा दातुमिदं धनम् ॥ सर्वस्वदाता स्वामी च मूढानां योषितां सुराः ॥११॥ काचि
देव हि जानाति महासाध्वी च स्वामिनम् ॥ अतिसद्वंशजाता च सुशीला कुलपालिका ॥ १२ ॥ असद्वंशप्रसूता या दुःशीला धर्म
वर्जिता ॥ मुखदुष्टा योनिदुष्टा पतिं निंदति कोपतः ॥ १३ ॥ या स्त्री सर्वपरं द्वेष्टि पतिं विष्णुसमं गुरुम् ॥ कुम्भीपाके पचति सा
यावदिन्द्राश्चतुर्दश ॥ १४ ॥ व्रतं चानशनं दानं सत्यं पुण्यं तपश्चिरम् ॥ पतिभक्तिविहीनाया भस्मीभूतं निरर्थकम् ॥ १५ ॥ अतः
किंचिन्न वक्ष्यामि निष्ठुरं पतिमीश्वरम् ॥ भृत्यापराधैर्देवस्य प्राणांस्यक्ष्यामि निश्चितम् ॥ १६ ॥ पतिदोषे महासाध्वी पतिं चानि
ष्ठुरं वदेत् ॥ यदि सोढुमशक्ता च प्राणांस्त्यजति धर्मतः ॥ १७ ॥ पतिसेवा व्रतं स्त्रीणां पतिसेवा परं तपः ॥ पतिसेवा परो धर्मः
पतिसेवा सुरार्चनम् ॥ १८ ॥ पतिसेवा परं सत्यं दानतीर्थानुकीर्तनम् ॥ सर्वदेवमयः स्वामी सर्वदेवमयः शुचिः ॥ १९ ॥ सर्व
पुण्यस्वरूपश्च पतिरूपी जनार्दनः॥या सती भर्तुरुच्छिष्टं भुङ्क्ते पादोदकं सदा॥२०॥तस्या दर्शमुपस्पर्शं नित्यं वाञ्छन्ति देवताः॥
ततः सर्वाणि तीर्थानि पुनन्ति पापिनो ह्यघात् ॥२१॥ इत्युक्त्वा च महासाध्वी रुरोद च मुहुर्मुहुः ॥ उवाच ब्रह्मा भीतश्च भक्ति
नम्रात्मकन्धरः ॥ २२ ॥ ब्रह्मोवाच ॥ भविष्यति न भद्रं च जयस्य विजयस्य च ॥ त्वया न शप्तौ तौ मूढौ प्रियापराध
भीतया ॥ २३ ॥ सापराधं च धर्मिष्ठः क्षमया न शपेद्यदि ॥ सर्वनाशो भवेत्तस्य निश्चितं मा चिरं सति ॥२४॥ यदि शप्तुं न शक्तश्च
न दण्डं कर्तुमीश्वरः॥ सापराधे च पुरुषे धर्मो दण्डं करोति च ॥ २५ ॥ सर्वं क्षमस्व हे मातर्गच्छ गच्छ प्रियान्तिकम्॥मां च त्वत्स्वा

मिनो भक्तं नियोज्यं सृष्टिकर्मणि ॥२६॥ इत्युक्त्वा तां पुरस्कृत्य सार्द्धं देवैर्मुनीन्द्रकैः ॥ शीघ्रं जगाम वैकुण्ठं वैकुण्ठं स्तोतुमीश्वरः
॥२७॥ तत्र गत्वा जगन्नाथं तुष्टाव कमलासनः ॥ चतुर्वक्रैश्चतुर्वक्रश्चतुर्वेदविदां गुरुम् ॥ २८ ॥ ब्रह्मणः स्तवनं श्रुत्वा दृष्ट्वा लक्ष्मीं पुरः
सराम् ॥ रुदतीं नम्रवदनामुवाच कमलापतिः ॥ २९ ॥ श्रीभगवानुवाच ॥ सर्वं जानामि सर्वज्ञः सर्वात्मा सर्वपालकः ॥ सर्वशास्ता
च सर्वादिकारणं कमलोद्भव॥३०॥ भक्ते कलत्रे बन्धौ च सर्वत्र समता मम॥विशेषतोऽतिमद्भक्तः कलत्रात्पर एव च॥३१॥मद्भक्तौ तव
पुत्रौ च द्वारपालौ दुरंतकौ ॥ क्षम मामपराधं च तयोश्च भक्तिपूर्णयोः ॥ ३२ ॥ मद्भक्तिपूर्णौ बलवान्दैत्येभ्यो न बिभेति च ॥ रक्षितो
मम चक्रेण भक्तिमाध्वीकदुर्मदः ॥ ३३ ॥ इत्युक्त्वा जगतां नाथो लक्ष्मीं कृत्वा स्ववक्षसि ॥ समानीय द्वारपालं तमुवाचेदमेव च॥
॥ ३४ ॥ मा भैर्वत्स सुखं तिष्ठ भयं किं ते मयि स्थिते ॥ मद्भक्तानां च कः शास्ता गच्छ वत्सात्मनः पदम् ॥३५॥इत्युक्त्वा भगवा
स्तत्र विरराम महामुने ॥ ययुर्देवाश्च स्वस्थानं प्रणम्य जगदीश्वरम् ॥३६॥ नारायणवचः श्रुत्वा द्वारपाल उवाच तम् ॥ पुलकाञ्चित
सर्वाङ्गो भक्तिनम्रात्मकन्धरः ॥ ३७ ॥ जय उवाच ॥ नाहं बिभेमि देवांश्च लक्ष्मीं मुनिगणांस्तथा ॥ त्वदीयचरणाम्भोजध्यानैकतां
नमानसः ॥ ३८ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायणनारदसंवादे उत्तरार्द्धे वैराग्यमोचनं नाम सप्तपञ्चाशत्त
मोऽध्यायः ॥५७॥ श्रीनारायण उवाच ॥ बभूव दर्पः पृथ्व्याश्च सर्वाधाराऽहमेव च ॥ पृथुद्वारा च तद्दर्पं जघान चैव तत्प्रभुः ॥१॥
बभूव दर्पः सावित्र्या वेदमाताऽहमेव च ॥ काले चकार तस्याश्च सपुत्राया अदर्शनम् ॥ २ ॥ बभूव दर्पो गङ्गाया अहं निर्वाणदेति
च ॥ जह्नुद्वारा च तद्दर्पं जहार जगतां पतिः ॥ ३ ॥ जहार मनसादर्पं दुर्गाद्वारा पुरा मुने ॥ विरजोपगतं कृष्णं भर्त्सयामास कोपतः॥
॥ ४ ॥ प्रविशन्तं रासगृहं गोपीभिर्विनिवारितम् ॥ दौवारिकाभिर्वेत्रैश्च ताडितं तं च दर्पतः ॥५॥ सुदाम्ना निजभक्तेन राधा शप्ता बभूव
ह ॥ दैवेन सहसा ध्वस्ता गोलोकादागता धराम् ॥ ६ ॥ वृषभानुस्त्रियां जाता कलावत्यां च नारद ॥ कृष्णस्तदनुरोधेन कंसभीति
च्छलेन च ॥७॥ समागतो नन्दगेहं तेनाहं नन्दनन्दनः ॥ सुदाम्नः शापविच्छेदपालनार्थं जगत्पतिः ॥८॥ पुनर्जगाम मथुरामित्याह कम

लोद्भवः ॥ अस्याः परमभिप्रायं को वा जानाति नारद ॥ ९ ॥ कथं जातः समायातो मथुरायाश्च गोकुलम् ॥ इत्येवं कथितं सर्वम
परं श्रूयतामिति ॥ १० ॥ यथा जगाम मथुरां नंदात्स नंदनंदनः ॥ शोकं नंदो यशोदा च यथा संप्राप दैवतः ॥११॥ यथा गोपाश्च
गोप्यश्च गावो वृन्दावने वने ॥ वने वने वा वन्यास्ते वन्या जानन्ति किंचन ॥ १२ ॥ वनं रम्यं वन्यपदमपि त्यक्त्वा वने वने ॥
श्मशाने वाऽश्मशाने वा बभ्राम भामिनी मुने ॥ १३ ॥ ग्रामं त्यक्त्वा च बभ्राम चेतनाऽचेतना क्षणम् ॥ क्षणेन वर्जिता सा च प्रार्थयन्ती
प्रतिक्षणम् ॥ १४ ॥ क्षणं क्षणं मा श्वसंती चिंतनं कुर्वती क्षणम् ॥ क्षणं विशंती तल्पे च क्षणमुत्थाय तिष्ठति ॥ १५ ॥ इति
श्रीब्रह्मवैवर्त्ते महापुराणे श्रीकृष्णजन्मखण्डे उत्तरार्धे नारायणनारदसंवादे अष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ श्रीनारायण उवाच
॥ इत्येवं कथितं सर्वं सर्वेषां दर्पभञ्जनम् ॥ इंद्रस्य दर्पभंग च विस्तरेण निशामय ॥ १ ॥ इंद्रो दर्पात्सभायां च रत्नसिंहासनाद्भरात्
॥ नोत्तस्थौ स्वगुरुं दृष्ट्वा ब्रह्मिष्ठं च बृहस्पतिम् ॥२॥ गुरुर्जगामातिरुष्टः स्वापमाने समत्सरः ॥ तथापि कृपया धर्मीस्नेहाच्च
न शशाप तम् ॥ ३ ॥ विना शापेन तद्दर्पश्चूर्णीभूतो बभूव ह ॥ अन्यश्चेन्न शपेद्धर्मात्प्रेम्णा वाचाऽतिकिल्बिषम् ॥४॥ तथाऽपि
तं च फलति धर्मस्तं हन्ति नारद ॥ यो यं हिंस्रं सापराधं शपेत्कोपेन धार्मिकः ॥५॥ विनाशः सापराधस्य धर्मो नष्टश्च धर्मिणः
॥ तेनाधर्मेण शक्रस्य ब्रह्महत्या बभूव ह ॥ ६ ॥ भीतस्त्यक्त्वा स्वराज्यं च प्रययौ स सरोवरम् ॥ सरसः पद्मसूत्रे च निवासं
च चकार सः ॥ ७ ॥ गंतुं न शक्ता हत्या च पुण्यं विष्णुसरोवरम् ॥ श्रेष्ठं भारतवर्षे च तपःस्थानं तपस्विनाम् ॥ ८ ॥ तदेव पुष्करं
तीर्थं प्रवदंति पुराविदः ॥ राज्यभ्रष्टं हरिं दृष्ट्वा हरिभक्तो नराधिपः ॥ ९ ॥ बलाज्जहार तद्राज्यं नहुषो नाम धार्मिकः ॥ दृष्ट्वा शचीं
वरारोहामनपत्यां च सुन्दरीम् ॥ १० ॥ स्वर्गगंगां च गच्छंतीं हृदयेन विदूयता ॥ नवयौवनसंपन्नां रत्नालंकारभूषिताम्
॥ ११ ॥ सुकोमलां तां सुदतीं वदंतीं च महासतीम् ॥ मूर्च्छां संप्राप राजेन्द्रः कामेन यौवनेन च ॥ उवाच तत्पुरः स्थित्वा
सुविनीतश्च दासवत् ॥ १२ ॥ नहुष उवाच ॥ धातुर्गतिर्विचित्राऽहो न बोध्या च सतामपि ॥ १३ ॥ ईदृशी स्त्री भगाङ्गस्य

लुब्धस्य परयोषिति ॥ ईदृशी सुन्दरी यस्य परभार्यासु तन्मनः ॥१४॥ अस्या अग्रे च का रंभा कोर्वशी का तिलोत्तमा ॥ का वा
मेना घृताची वा रत्नमाला कलावती ॥ १५॥ कालिका सुन्दरी भद्रावती चंपावती तथा ॥ एताश्चाप्सरसश्चान्याः कलां नार्हन्ति षोडशीम्॥१६॥
इमां विहाय मूढोऽन्यां कथं गच्छति मन्दधीः ॥ अस्माकं योषितो याश्च चेटीतुल्याश्च निश्चितम्॥१७॥ मां भजस्व वरारोहे
सुप्रीता भव किंकरम् ॥ यथा राधा च गोलोके कृष्णवक्षसि राजते ॥ १८ ॥ वैकुंठोरसि वैकुंठे यथा लक्ष्मीः सरस्वती ॥ ब्रह्मलोके
च ब्रह्माणी यथैव ब्रह्मवक्षसि ॥ १९ ॥ यथा मूर्तिर्महासाध्वी धर्मवक्षःस्थलस्थिता ॥ पातालतललक्ष्मीर्वा यथैवानन्तवक्षसि ॥ २० ॥
यथा पुष्टिर्गणेशे च देवसेना च कार्त्तिके ॥ वरुणे वरुणानी च यथा स्वाहा हुताशने ॥ २१ ॥ यथा रतिः कामदेवे यथा संज्ञा दिनेश्वरे॥
वायोः पत्नी यथा वायौ यथा चंद्रे च रोहिणी ॥२२॥ यथाऽदितिर्देवमाता तव श्वश्रूश्च कश्यपे ॥ यथा हिमालये मेना पितृकन्या च
मानसी ॥ २३ ॥ लोपामुद्रा यथाऽगस्त्ये यथा तारा बृहस्पतौ ॥ कर्दमे देवहूती च वसिष्ठेऽरुंधती यथा ॥२४॥ मनौ च शतरूपेव
दमयंती नले यथा॥ तथा भव त्वं सौभाग्या मम वक्षसि सुन्दरि ॥२५॥ लीलया च सहस्रेंद्राञ्छेत्तुं शक्तोऽहमीश्वरः॥नारी वाञ्छति
जारं च स्वामिनो बलवत्तरम् ॥ २६ ॥ सुमेरुगिरिकूटे च दुर्गमेऽतिरहःस्थले ॥ अथवा मलये रम्ये रम्ये चंदनवायुना ॥ २७॥ विश्रम्भके
सुरसने किं वा नन्दनकानने ॥ निकटे शतशृंगस्य पुष्पभद्रानदीतटे ॥२८॥ गोदावरीतीरनीरे समीपे शीतवायुना ॥ चंपावती
नदीतीरे रम्ये चम्पककानने ॥२९॥ श्मशानेऽतिश्मशाने च रम्येऽतिनिर्जने वने ॥ शैलेशैलेऽतिरहसि कंदरे कंदरे वने ॥३०॥ द्वीपे
द्वीपे दुर्गदुर्गे नद्यां नद्यां नदे नदे ॥ समुद्रपुलिने रम्ये सर्वजंतुविवर्जिते ॥ ३१ ॥ विदग्धाया विदग्धेन संगमो निर्जने सुखः ॥ पुष्पचन्दनशय्यायां
पुष्पचन्दनचर्चिते ॥३२॥ मां गृहीत्वा कुरु रतिं पुष्पचन्दनचर्चितम्॥ब्रह्मणश्च वरैर्देवि जरामृत्युविवर्जितम् ॥३३॥मां
कुरुष्व पतिं भद्रे नित्यं सुस्थिरयौवनम्॥सुवेषं सुंदरं धीरं कामशास्त्रविशारदम्॥३४॥शरत्पार्वणचन्द्रास्यं चन्द्रवंशसमुद्भवम् ॥ आगतामुर्वशीं
मह्यां त्यक्तवंतं च याचतीम्॥३५॥न मे स्पृहा परस्त्रीषु त्वां दृष्ट्वा लोलुपं मनः॥ त्यक्ता मया स्वभार्याश्च रत्नभूषणभूषिताः३६॥

अथवा रक्षिताः सर्वा दासीः कृत्वा वरानने ॥ रत्नेन्द्रसारां मालां ते दास्यामि वरुणस्य च ॥ ३७ ॥ निर्जित्य वरुणं युद्धे
ब्रह्मास्त्रेणातितेजसा ॥ वह्निशुद्धं वस्त्रयुगं जित्वा वह्निं सुदुर्बलम् ॥ ३८ ॥ दास्याम्यद्यैव ते देवि नियोज्यं मां नियोजय ॥ मणीन्द्रसार
निर्माणमकराकारकुण्डले ॥३९॥ दास्यामि देवान्निर्ज्जित्य देवमातुश्च सुन्दरि ॥ करभूषणयुग्मं चात्यमूल्यरत्ननिर्मितम् ॥४०॥ दास्या
म्यद्यैव रोहिण्याश्चन्द्रं जित्वाऽतिदुर्लभम् ॥ यक्ष्मग्रस्तमतिकृशं ममैव पूर्वपूरुषम् ॥ ४१ ॥ विना युद्धेन भीतो मां कृपया वा प्रदास्यति॥
अलपरत्नविनिर्माणं क्वणन्मञ्जीरयुग्मकम् ॥ ४२ ॥ दास्याम्यद्यैव पार्वत्या भिक्षां कृत्वा महेश्वरम् ॥ आशुतोषं स्तुतिवशं भक्तेशं च
कृपामयम् ॥ ४३ ॥ सर्वसंपत्तिदातारं परं कल्पतरुं शुभे ॥ अमूल्यरत्ननिर्माणकेयूरयुगलं प्रिये ॥४४॥ दास्यामि तेऽद्य गङ्गाया युद्धं
कृत्वा सुदुर्लभम् ॥ बहुलीयुगलं चारु सूर्यपत्न्या मनोहरम् ॥ ४५ ॥ सद्रत्नसारनिर्माणं दास्याम्यद्य सुशोभने॥ अमूल्यरत्ननिर्माणं
दर्पणं चातिनिर्मलम् ॥ ४६ ॥ दास्यामि ते कामपत्न्याः कामं जित्वा च लीलया ॥ क्रीडाकमलमम्लानं कमलायाश्च सुन्दरि ॥४७॥
भिक्षां कृत्वा च दास्यामि स्तुत्वा च कमलापतिम् ॥ अङ्गुलीयकरत्नानि विश्वेषु दुर्लभानि च ॥ ४८ ॥ सावित्र्याश्च प्रदास्यामि
कृत्वा च ब्रह्मणस्तथा ॥ स्वयं गीतं प्रगायन्तीं मूर्च्छनाश्रुतिसंयुताम् ॥४९॥ वाणीवीणां प्रदास्यामि कृत्वा नारायणव्रतम् ॥ रत्नपाशक
संघं च विश्वकर्मविनिर्मितम् ॥५०॥ कुबेरपत्न्या दास्यामि पादाङ्गुलिविभूषणम् ॥ इत्येवमुक्त्वा नहुषः पपात तत्पदाम्बुजे ॥५१॥
उवाच तं शची त्रस्ता राजमार्गगतं नृपम् ॥ उत्थाप्य तं करे धृत्वा शुष्ककण्ठोष्ठतालुका ॥ स्मारं स्मारं पदाम्भोजं महासाध्वी हरेर्गुरोः॥
॥५२॥ शच्युवाच ॥ शृणु वत्स महाराज हे तात भयभञ्जन ॥५३॥ भयत्राता च राजा च सर्वेषां पालकः पिता ॥ भ्रष्टश्रीश्च
महेन्द्रोऽद्य त्वं च स्वर्गे नृपोऽधुना ॥५४॥ यो राजा स पिता पाता प्रजानामेव निश्चितम्॥गुरुपत्नी राजपत्नी देवपत्नी तथा वधूः॥
॥ ५५ ॥ पित्रोः स्वसा शिष्यपत्नी भृत्यपत्नी च मातुली ॥ पितृपत्नी भ्रातृपत्नी श्वश्रूश्च भगिनी सुता ॥ ५६ ॥ गर्भधात्रीष्टदेवी च
पुंसः षोडश मातरः ॥ त्वं नरो देवभार्याऽहं माता ते देवसंमता ॥५७॥ गच्छ वत्सादितिं रन्तुं यदि चेच्छसि मातरम् ॥ सर्वेषां निष्कृति

श्चास्ति न वत्स मातृगामिनाम् ॥ ५८ ॥ कुम्भीपाके ते पचन्ति यावद्वै ब्रह्मणो वयः ॥ ततो भवन्ति कृमयः कल्पाः[1] सप्त भवन्ति
ये ॥ ५९ ॥ ततश्च कुष्ठिनो म्लेच्छा भवन्ति सप्तजन्मसु ॥ नास्त्येव निष्कृतिस्तेषामित्याह कमलोद्भवः ॥ ६० ॥ एवं विट्क्षत्र
शूद्राणां ब्राह्मणीगमने नृप ॥ वेदेषु निष्कृतिर्नास्ति चेत्याङ्गिरसभाषितम् ॥ ६१ ॥ स्वर्गसंपत्तिभोगश्च सुखं संसारिणां ध्रुवम् ॥
मुमुक्षूणां च मोक्षश्च मोक्षश्चैव तपस्विनाम् ॥ ६२ ॥ ब्राह्मणानां च ब्राह्मण्यं मुनीनां मौनमेव च ॥ वेदाभ्यासो वैदिकानां कवीनां
काव्यवर्णनम् ॥ ६३ ॥ विष्णुदास्यं वैष्णवानां विष्णुभक्तिरसं परम् ॥ विष्णुभक्तिं विना नैव मुक्तिं वाञ्छन्ति वैष्णवाः ॥ ६४ ॥
मलाढ्येषु च क्लेदेषु दुर्गंधिनिलयेषु च ॥ साधूनां किं सुखं साधो स्त्रीणां योनिषु मां वद ॥ ६५ ॥ कुलप्रदीपे राजेन्द्र राज्ञां मण्ड
लवर्तिनाम् ॥ लब्धं च भारते जन्म पुण्येन बहुजन्मनाम् ॥ ६६ ॥ पद्मानां चन्द्रवंश्यानां नृपाणां दीप्तिहेतवे ॥ त्वमाविरासीस्ते
जस्वी ग्रीष्ममध्याह्नभास्करः ॥ ६७ ॥ सर्वेषामाश्रमाणां च स्वधर्मश्च यशः परम् ॥ स्वधर्महीना नरके पतन्ति मूढचेतसः ॥ ६८ ॥
ब्राह्मणस्य स्वधर्मश्च त्रिसंध्यमर्चनं हरेः ॥ तत्पादोदकनैवेद्यभक्षणं च सुधाधिकम् ॥ ६९ ॥ अन्नं विष्ठा जलं मूत्रमनिवेद्यं हरेर्नृप ॥
भवन्ति सूकराः सर्वे ब्राह्मणा यदि भुञ्जते ॥ ७० ॥ आजीवं भुञ्जते विप्रा एकादश्यां न भुञ्जते ॥ कृष्णजन्मदिने चैव शिवरात्रौ सुनि
श्चितम् ॥ ७१ ॥ तथा रामनवम्यां च यत्नतः पुण्यवासरे ॥ ब्राह्मणानां स्वधर्मश्च कथितो ब्रह्मणा नृप ॥ ७२ ॥ व्रतं पतिव्रतानां च
पतिसेवापरं तपः ॥ यथा पुत्रः परपतिरेष धर्मश्च योषिताम् ॥७३॥ पालयन्ति यथा भूपाः प्रजाः पुत्रानिवौरसान् ॥ प्रजास्त्रियं च
पश्यन्ति राजानो मातरं यथा ॥ ७४ ॥ यज्ञं कुर्वन्ति विष्णोश्च सेवनं देवविप्रयोः ॥ निवारणं च दुष्टानां शिष्टानां प्रतिपालनम् ॥
॥ ७५ ॥ इति धर्मः क्षत्रियाणां कथितो ब्रह्मणा पुरा ॥ वाणिज्यं चैव वैश्यानां स्वधर्मो धर्मसंचयः ॥७६॥ शूद्राणां विप्रसेवा च परो
धर्मो विधीयते ॥ सर्वन्यासो हरौ भूप धर्मः संन्यासिनां ध्रुवम् ॥७७॥ रक्तैकवासा दण्डी च बिभर्ति मृत्कमण्डलुम् ॥ सर्वत्र समदर्शी

---

१ वेश्यायोनिषु कल्पकान्—इति पुस्तकान्तरे ।

च स्मरेन्नारायणं सदा ॥ ७८ ॥ करोति भ्रमणं नित्यं गेहेगेहे न तिष्ठति ॥ विद्यामन्त्रं च कस्मैचिन्न ददाति च लोभतः ॥ ७९ ॥ करोति नाश्रमं भिक्षुः करोति नान्यवासनाम् ॥ करोति नान्यसङ्गं च निर्मोहः सङ्गवर्जितः ॥ ८० ॥ न स्वादु भुंक्ते लोभाच्च स्त्रीमुखं न हि पश्यति ॥ न वाञ्छितं भक्ष्यवस्तु याचते गृहिणं व्रती ॥ ८१ ॥ इति संन्यासिनां धर्ममित्याह कमलोद्भवः ॥ इति ते कथितं पुत्र गच्छ वत्स यथासुखम् ॥ ८२ ॥ इत्युक्त्वा च महेन्द्राणी विरराम च वर्त्मनि ॥ उवाच नहुषो राजा शचीं वक्रप्रकन्धरः ॥ ८३ ॥ नहुष उवाच ॥ त्वया यत्कथितं देवि सर्वं तत्तु विपर्ययम् ॥ यथार्थधर्मं वेदोक्तं निबोध कथयामि ते ॥ ८४ ॥ कर्मणां फलभोगश्च सर्वेषां सुरसुन्दरि ॥ नैव स्वर्गे न पाताले नान्यद्वीपे श्रुतौ श्रुतम् ॥ ८५ ॥ कृत्वा शुभाशुभं कर्म पुण्यक्षेत्रे च भारते ॥ अन्यत्र तत्फलं भुंक्ते कर्मी कर्मनिबन्धनात् ॥ ८६ ॥ हिमालयादासमुद्रं पुण्यक्षेत्रं च भारतम् ॥ श्रेष्ठं सर्वस्थलानां च मुनीनां च तपःस्थलम् ॥ ८७ ॥ तत्र लब्ध्वा जन्म जीवी वञ्चितो विष्णुमायया ॥ शश्वत्करोति विषयं विहाय सेवनं हरेः ॥ ८८ ॥ कृत्वा तत्र महत्पुण्यं स्वर्गं गच्छति पुण्यवान् ॥ गृहीत्वा सर्वकन्याश्च चिरं स्वर्गे प्रमोदते ॥ ८९ ॥ स्वर्गमागच्छति नरो विहाय मानवीं तनुम् ॥ स्वशरीरेणागतोऽहं मत्पुण्यं पश्य सुन्दरि ॥ ९० ॥ अनेकजन्मपुण्येन चागतः स्वर्गमीप्सितम् ॥ ततः किं केन पुण्येन दर्शनं मे त्वया सह ॥ ९१ ॥ न हि कर्मस्थलमिदं स्वर्भोगस्थलमेव च ॥ भोगस्थले भोगवस्तु न हि त्यक्तुं प्रशस्यते ॥ ९२ ॥ भावानुरक्ता रसिका भोग्या त्वं भोगिनामिह ॥ द्रव्यमस्वामिकं भोग्यं सुखं त्यजति मन्दधीः ॥९३॥ अविरोधसुखत्यागी पशुरेव न संशयः ॥ गच्छ कान्ते गृहं गत्वा कुरु तल्पं मनोहरम् ॥ ९४ ॥ रमणीयं च रहसि वरं रतिकरं परम् ॥ त्यज द्वैधं च मनसो निश्चितं वरवर्णिनि ॥ ९५ ॥ वरानने मया सार्द्धं मोदस्व वरमन्दिरे ॥ अमूल्यरत्नमालां च मणिराजविराजिताम् ॥ ९६ ॥ भिक्षां कृत्वा च दास्यामि लक्ष्मीवक्षसि शोभिताम् ॥ मणिं चानन्तशिरसः सर्वेषामतिदुर्लभम् ॥९७॥ दुष्प्राप्यं त्रिषु लोकेषु तुभ्यं दास्यामि सुन्दरि ॥ मणिरत्नं कौस्तुभं च यो नारायणवक्षसि ॥९८॥ भिक्षां कृत्वा तु दास्यामि कृत्वा नारायणव्रतम् ॥ चन्द्रशेखरमौलेश्च यदद्ध

चन्द्रभूषणम् ॥९९॥ जरामृत्युव्याधिहरं शक्तं क्रीडाकरं वरम् ॥ अतीव विश्वदुष्प्राप्यं विश्ववन्द्यं च सुन्दरम् ॥१००॥ विश्वनाथव्रतं कृत्वा तुभ्यं दास्यामि निश्चितम् ॥ दास्यामि ते श्रीसूर्यस्य मणिश्रेष्ठं स्यमन्तकम् ॥ १ ॥ भक्त्या सूर्यव्रतं कृत्वा त्रिषु लोकेषु दुर्लभम् ॥ अष्टौ भारान्सुवर्णं च यश्च नित्यं प्रसूयते ॥ २॥ जरामृत्युहरं चैव परं क्रीडाकरं प्रिये ॥ अमूल्यरत्ननिर्माणं पात्ररत्नं मनोहरम् ॥ ३ ॥ संततं मधुपूर्णं च दास्यामि मदनस्य च ॥ अमूल्यरत्ननिर्माणं सूर्यतुल्यं च तेजसा ॥ ४ ॥ नानाचित्रविचित्राढ्यं निर्माणमीश्वरेच्छया॥निर्मलं मण्डलाकारं मणिराजविराजितम् ॥ ५ ॥ हस्तलक्षपरिमितं चतुरस्रं च सुन्दरि ॥ पद्मापद्मासनं श्रेष्ठं प्रेष्ठं तस्याः सुदुर्लभम् ॥ ६ ॥ ध्रुवं तुभ्यं प्रदास्यामि कृत्वा पद्मालयाव्रतम् ॥ इत्येवमुक्त्वा नहुषः कृत्वा वर्त्मनिरोधनम् ॥ ७ ॥ पुनः पपात चरणे महेन्द्राण्या मुहुर्मुहुः ॥ नृपस्य वचनं श्रुत्वा शुष्ककण्ठोष्ठतालुका ॥ तमुवाच महेन्द्राणी स्मारं स्मारं गुरुं हरिम् ॥ ८ ॥ शच्युवाच ॥ अचेतनस्य मूढस्य कार्याकार्यमजानतः ॥ ९ ॥ श्रोष्याम्यद्य कतिविधां कथां कामातुरस्य च ॥ मधुमत्तः सुरामत्तः काममत्तो विचेतनः ॥ ११० ॥ मृत्युं न गणयेत्कामी कामेन हृतमानसः ॥ त्यज मामद्य हे मत्त मातृतुल्यां रजस्वलाम् ॥ ११ ॥ ऋतोः प्रथमो दिवसो ह्यद्य हे नृप मे ध्रुवम् ॥ प्रथमे दिवसे स्त्री च चाण्डाली सा रजस्वला ॥ १२ ॥ द्वितीये दिवसे म्लेच्छा तृतीये रजकी तथा ॥ शुद्धा भर्तुश्चतुर्थेऽह्नि न शुद्धा दैवपैत्र्ययोः ॥ १३ ॥ असच्छूद्रासमा सा च तद्दिने च परं प्रति ॥ प्रथमे दिवसे कान्तां यो हि गच्छेद्रजस्वलाम् ॥ १४ ॥ ब्रह्महत्याचतुर्थांशं लभते नात्र संशयः ॥ स पुमान्न हि कर्मार्हो दैवे पित्र्ये च कर्मणि ॥ १५ ॥ अधमः स च सर्वेषां निन्दितश्चायशस्करः ॥ द्वितीये दिवसे नारीं यो व्रजेच्च रजस्वलाम् ॥ १६ ॥ कामतः परिपूर्णश्च गोहत्यां लभते ध्रुवम् ॥ आजीवनं नाधिकारी पितृविप्रसुरार्चने ॥ १७ ॥ अमनुष्योऽयशस्यः स्यादित्याङ्गिरसभाषितम् ॥ तृतीये दिवसे जायां यो हि गच्छेद्रजस्वलाम् ॥ १८ ॥ स मूढो भ्रूणहत्यां च लभते नात्र संशयः ॥ पूर्ववत्पतितः सोऽपि न चार्हः सर्वकर्मसु ॥ १९ ॥ असच्छूद्रा चतुर्थेऽह्नि न गच्छेत्तां विचक्षणः ॥ यदि मां मातरं

मूढ ग्रहीष्यसि बलेन च ॥ १२० ॥ ऋतावतीते दिवसे गमनं च करिष्यसि ॥ शच्याश्च वचनं श्रुत्वा प्रहस्य नहुषस्तथा ॥ २१ ॥
उवाच मधुरं शांतः शक्रकांतां च सुव्रताम् ॥ देवपत्नी सदा शुद्धा तन्न्यूनं मानवं प्रति ॥ २२ ॥ शयने भोजने देवी
नाशुद्धा मानवं प्रति ॥ रजस्वलायाः संभोगे कर्मक्षेत्रे च भारते ॥ २३ ॥ त्वयोक्तं च भवेत्पापं नात्र दुर्गे च सुन्दरि ॥ कर्मक्षेत्रेऽपि
तत्कर्म यद्वेदोक्तं शुभाशुभम् ॥ २४ ॥ न भवेद्वैष्णवानां च ज्वलतां ब्रह्मतेजसा ॥ यथा प्रदीप्ते वह्नौ च शुष्काणि च तृणानि च ॥
॥ २५ ॥ भवन्ति भस्मीभूतानि तथा पापानि वैष्णवे ॥ वह्निसूर्यब्राह्मणेभ्यस्तेजीयान्वैष्णवः सदा ॥ २६ ॥ रक्षितो विष्णुचक्रेण
स्वतन्त्रो मत्तकुञ्जरः ॥ न विचारो न भोगश्च वैष्णवानां स्वकर्मणाम् ॥ २७ ॥ लिखितं साम्नि कौथुम्यां कुरु प्रश्नं बृहस्पतिम् ॥
अस्मांश्च सर्वे जानन्ति चन्द्रवंश्यांश्च वैष्णवान् ॥२८॥ देवमन्यं न सेवन्ते चन्द्रवंश्या हरिं विना ॥ सद्वंशप्रभवो यो हि ब्राह्मणः क्षत्रि
योऽथवा ॥ २९ ॥ विष्णुमन्त्रं न गृह्णाति वञ्चितो देवमायया ॥ को वा मन्त्रश्च के देवा न हि शास्ता यमो मम ॥ १३० ॥ सर्वा
ञ्छास्तुं समर्थोऽहं ब्रह्मविष्णुशिवान्विना ॥ शय्यां कुरु गृहं गत्वा शीघ्रं यास्यामि ते गृहम् ॥ ३१ ॥ ऋतुपापं मयि भवेत्तव किं गच्छ
शोभने ॥ इत्युक्त्वा नहुषो राजा प्रफुल्लवदनेक्षणः ॥३२॥ रत्नयानं समारुह्य ययौ नन्दनकाननम् ॥ न ययौ सा शची गेहं प्रजगाम
गुरोर्गृहम् ॥३३॥ गत्वा कुशासनस्थं च ददर्श च बृहस्पतिम् ॥ तारासेवितपादाब्जं ज्वलन्तं ब्रह्मतेजसा ॥ ३४ ॥ जपमालाकरं शश्व
ज्जपन्तं कृष्णमीप्सितम् ॥ परमं परमानन्दं परमात्मानमीश्वरम् ॥ ३५ ॥ निर्गुणं च निरीहं च स्वतन्त्रं प्रकृतेः परम् ॥ स्वेच्छामयं परं
ब्रह्म भक्तानुग्रहविग्रहम् ॥ ३६ ॥ तमानन्दाश्रुनेत्रं च ननाम शिरसा भुवि ॥ रुदती साश्रुनेत्रा सा मज्जन्ती भक्तिसागरे ॥ ३७ ॥ शोका
र्णवे निमज्जन्ती हृदयेन विदूयता ॥ तुष्टाव भीता स्वगुरुं ब्रह्मिष्ठं च कृपानिधिम् ॥ ३८ ॥ शच्युवाच ॥ रक्षरक्ष महाभाग
मां भीतां शरणागताम् ॥त्वमीश्वरः स्वदासीं च निमग्नां शोकसागरे ॥ ३९ ॥ अनीश्वरश्चेश्वरो वा बलवान्वा सुदुर्बलः ॥ स्वशिष्य
भार्यां पुत्रांश्च शासितुं च सदा क्षमः ॥ १४० ॥ दूरीभूतः स्वराज्याच्च स्वशिष्यश्च कृतस्त्वया ॥ शान्तिर्बभूव दोषस्य चाधुना निग्रहं

कुरु ॥ ४१ ॥ अनाथां सर्वशून्यां मां शून्यांताममरावतीम् ॥ संपच्छून्यमाश्रमं मे पश्य रक्ष कृपानिधे ॥ ४२ ॥ दस्युग्रस्तां च मां
रक्ष देशं किंकरमानय ॥ दत्त्वा चरणरेणूंस्तं शुभाशीर्वचनं कुरु ॥ ४३ ॥ सर्वेषां च गुरूणां च जन्मदाता परो गुरुः ॥ पितुः शत
गुणा माता पूज्या वन्द्या गरीयसी ॥ ४४ ॥ विद्यादाता मन्त्रदाता ज्ञानदो हरिभक्तिदः ॥ पूज्यो वन्द्यश्च सेव्यश्च मातुः शतगुणो गुरुः
॥ ४५ ॥ मन्त्राद्युद्गिरणेनैव गुरुरित्युच्यते बुधैः ॥ अन्यो वन्द्यो गुरुरयमन्यश्चारोपितो गुरुः ॥ ४६ ॥ अज्ञानतिमिरान्धस्य ज्ञानाञ्जन
शलाकया ॥ चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ ४७ ॥ अदीक्षितस्य मूर्खस्य निष्कृतिर्नास्ति निश्चितम् ॥ सर्वकर्मस्वन
र्हस्य नरके तत्पशोः स्थितिः ॥ ४८ ॥ जन्मदाताऽन्नदाता च मताऽन्ये गुरवस्तथा ॥ पारं कर्तुं न शक्तास्ते घोरसंसारसागरे ॥
॥ ४९ ॥ विद्यामन्त्रज्ञानदाता निपुणः पारकर्मणि ॥ स शक्तः शिष्यमुद्धर्तुमीश्वरश्चेश्वरात्परः ॥१५०॥ गुरुर्विष्णुर्गुरुर्ब्रह्मा गुरुर्देवो
महेश्वरः ॥ गुरुर्धर्मो गुरुः शेषः सर्वात्मा निर्गुणो गुरुः ॥ ५१ ॥ सर्वतीर्थाश्रयश्चैव सर्वदेवाश्रयो गुरुः ॥ सर्वदेवस्वरूपश्च गुरुरूपी
हरिः स्वयम् ॥ ५२ ॥ अभीष्टदेवे रुष्टे च गुरुःशक्तो हि रक्षितुम् ॥ गुरौ रुष्टेऽभीष्टदेवो न हि शक्तश्च रक्षितुम् ॥ ५३ ॥ सर्वे ग्रहाश्च
यं रुष्टा रुष्टाश्च देवब्राह्मणाः ॥ त्वमेव रुष्टो भवसि गुरुरेव हि देवताः ॥ ५४ ॥ न गुरोश्च प्रियश्चात्मा न गुरोश्च प्रियः सुतः ॥ धनं
प्रियं च न गुरोर्न च भार्या प्रिया तथा ॥ ५५॥ न गुरोश्च प्रियोधर्म्मो न गुरोश्च प्रियं तपः ॥ न गुरोश्च प्रियं सत्यं न पुण्यं च गुरोः
परम् ॥ ५६ ॥ गुरोः परो न शास्ता च न हि बन्धुर्गुरोः परः ॥ देवो राजा च शास्ता च शिष्याणां च सदा गुरुः ॥ ५७ ॥ याव
च्छक्तो दातुमन्नं तावच्छास्ता तमन्नदः ॥ गुरुः शास्ता च शिष्याणां प्रतिजन्मनि जन्मनि ॥ ५८ ॥ मन्त्रो विद्यागुरुर्देवः पूर्वलब्धो
यथा पतिः ॥प्रतिजन्मनि बन्धेन सर्वेषामुपरि स्थितः ॥५९॥ पिता गुरुश्च वन्द्यश्च यत्र जन्मनि जन्मदः॥ गुरवोऽन्ये तथा माता गुरुश्च
प्रतिजन्मनि ॥१६०॥ विप्राणां त्वं वरिष्ठश्च गरिष्ठश्च तपस्विनाम्॥ब्रह्मिष्ठो ब्रह्मविद्ब्रह्मन् धार्मिष्ठः सर्वधर्मिणाम् ॥६१॥ तुष्टो भव मुनि
श्रेष्ठ मां च शक्रं च साम्प्रतम् ॥ त्वयि तुष्टे सदा तुष्टा भवन्ति ग्रहदेवताः ॥६२॥ इत्युक्त्वा सा शची ब्रह्मन्पुनरुच्चै रुरोद ह ॥ दृष्ट्वा तद्रो

दनं तारा रुरोदोच्चैर्मुहुर्मुहुः ॥६३॥ पपात चरणे तारा रुरोद च पुनःपुनः ॥ अपराधं क्षमेत्युक्त्वा गुरुस्तुष्टोऽप्युवाच ताम् ॥६४॥ गुरु
रुवाच ॥ उत्तिष्ठ तारे शच्याश्च सर्वं भद्रं भविष्यति ॥ सद्यः प्राप्स्यति भर्त्तारं महेन्द्रं च मदाशिषा ॥ ६५ ॥ इत्युक्त्वा स गुरु
स्तत्र विरराम च नारद ॥ पपात चरणे तारा पुनरेव रुरोद च ॥ ६६ ॥ गृहीत्वा च शचीं तारा संस्थाप्य च स्ववक्षसि ॥ बोधयामा
स विविधमाध्यात्मकमनुत्तमम् ॥ ६७ ॥ शचीकृतं गुरुस्तोत्रं पूजाकाले च यः पठेत् ॥ गुरुश्चाभीष्टदेवश्च संतुष्टः प्रतिजन्मनि
॥ ६८ ॥ ग्रहदेवद्विजास्तं च परितुष्टाश्च संततम् ॥ राजानो बान्धवाश्चैव संतुष्टाः सर्वतः सदा ॥ ६९ ॥ गुरुभक्तिं विष्णुभक्तिं
वाञ्छितं लभते ध्रुवम् ॥ सदा हर्षो भवेत्तस्य न च शोकः कदाचन ॥ १७० ॥ पुत्रार्थी लभते पुत्रं भार्यार्थी लभते प्रियाम् ॥ सुस्वरू
पां गुणवतीं सतीं पुत्रवतीं ध्रुवम् ॥७१॥ रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ॥ अस्पष्टकीर्तिः सुयशा मूर्खो भवति पण्डितः
॥ ७२ ॥ कदाचिद्बन्धुविच्छेदो न भवेत्तस्य निश्चितम् ॥ नित्यं तद्वर्द्धते धर्मो विपुलं निर्मलं यशः ॥७३॥ लभते परमैश्वर्यं पुत्र
पौत्रधनान्वितम् ॥ इह सर्वसुखं भुक्त्वा प्राप्यते श्रीहरेः पदम् ॥७४॥ न भवेत्तत्पुनर्जन्म हरिदास्यं लभेद्ध्रुवम् ॥ विष्णुभक्ति
रसाब्धौ च निमग्नश्च भवेद्ध्रुवम् ॥ ७५॥ शश्वत्पिबति शान्तश्च विष्णुभक्तिरसामृतम् ॥ जन्ममृत्युजराव्याधिशोकसंतापनाशनम्
॥ १७६ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे उत्तरार्धे नारायणनारदसंवादे महेन्द्रदर्पभङ्गप्रकरणे शचीशोकापनो
दने शचीकृतगुरुस्तोत्रकथनं नामैकोनषष्टितमोऽध्यायः ॥५९॥ श्रीनारायण उवाच ॥ शचीस्तोत्रं समाकर्ण्य परि
तुष्टो बृहस्पतिः ॥ उवाच मधुरं शान्तः कान्तामिन्द्रस्य नारद ॥ १ ॥ बृहस्पतिरुवाच ॥ त्यज वत्से भयं सर्वं भयं किं
ते मयि स्थिते ॥ यथा कचस्य पत्नी मे तथा त्वमपि शोभने ॥ २ ॥ यथा पुत्रस्तथा शिष्यो न भेदः पुत्रशिष्ययोः ॥ तर्पणे पि
ण्डदाने च पालने परितोषणे ॥ ३ ॥ यथाऽग्निदाता पुत्रश्च तथा शिष्यश्च निश्चितम् ॥ इतीदं कण्वशाखायामुवाच कमलोद्भवः ॥४॥
पिता माता गुरुर्भार्या शिशुश्चानाथबान्धवाः ॥ एते पुंसां नित्यपोष्या इत्याह कमलोद्भवः ॥५॥ यश्चैतांश्च न पुष्णाति भस्मान्तं

तस्य सूतकम् ॥ दैवे पित्र्ये न कर्मार्हः सोऽपीत्याह महेश्वरः ॥ ६॥ कुरुते नरबुद्धिं च मातरं पितरं गुरुम् ॥ अयशस्तस्य सर्वत्र
विघ्न एव पदेपदे ॥ ७ ॥ संपन्मत्तो यः करोति स्वगुरोश्च पराभवम् ॥ अचिरात्सर्वनाशश्च भवेत्तस्य सुनिश्चितम् ॥ ८ ॥
मां च दृष्ट्वा सभामध्ये नोत्तस्थौ पाकशासनः ॥ तत्फलं भुज्यते साक्षात्सद्यः पश्य च साम्प्रतम् ॥ ९ ॥ अहं करोमि मोक्षं च तव
रक्षां सुनिश्चितम् ॥ शासितुं रक्षितुं शक्तः स एव गुरुरुच्यते ॥ १० ॥ न पश्यति सतीत्वं च हृच्छुद्धायाश्च योषितः ॥ यन्मानसे
विकल्पश्च तस्य धर्मश्च नश्यति ॥ ११ ॥ भविष्यति प्रभावस्ते दुर्गायाश्च समः सति ॥ लक्ष्मीसमा प्रतिष्ठा च यशस्तद्यशसा स
मम् ॥ १२ ॥ सौभाग्यं राधिकातुल्यं तत्समं प्रेम भर्त्तरि ॥ तत्तुल्यं गौरवं मान्यं प्रीतिः प्राधान्यमीश्वरे ॥ १३ ॥ रोहिण्याश्च समा
पेक्षा पूज्या च भारतीसमा ॥ शुद्धा निरुपमा शश्वत्सावित्रीसदृशी सदा ॥ १४ ॥ एतस्मिन्नन्तरे तत्र आगतो नहुषाच्चरः ॥ उवाच
वचनं भीतो वाक्पतेर्गोचरे ततः ॥ १५ ॥ दूत उवाच ॥ उत्तिष्ठ देवि शीघ्रं त्वं गच्छस्व नहुषम्प्रति ॥ क्रीडां कर्तुं च
रहसि रम्ये नन्दनकानने ॥ १६ ॥ दूतस्य वचनं श्रुत्वा तमुवाच बृहस्पतिः ॥ कम्पितावयवः कोपाद्रक्तपङ्कजलोचनः ॥ १७ ॥
॥ गुरुरुवाच ॥ नहुषं वद गत्वा त्वं शचीं चेद्भोक्तुमिच्छसि ॥ अपूर्वं यानमारुह्य निशायामागमिष्यसि ॥ १८ ॥ सप्त
र्षीणां च स्कन्धे च दत्त्वा स्वशिबिकां शुभाम् ॥ तामारुह्य सुवेषश्च गमनं कर्तुमर्हसि ॥ १९ ॥ वाक्पतेर्वचनं श्रुत्वा गत्वोवाच
नृपं तदा ॥ दूतस्य वचनं श्रुत्वा प्रहस्योवाच किंकरम् ॥ २० ॥ गच्छ गच्छ त्वरन् गच्छ सप्तर्षीञ्छीघ्रमानय ॥ उपायं च करिष्या
मि तैः सार्द्धं साम्प्रतं चर ॥२१॥ नृपस्य वचनं श्रुत्वा गत्वा दूतस्तदन्तिकम् ॥ उवाच सर्वांस्तत्रैव यथोक्तं नहुषेण च ॥ २२ ॥ दूत
स्य वचनं श्रुत्वा ययुः सप्तर्षयो मुदा ॥ राजा दृष्ट्वा च तान्सर्वान्ननामोवाच सादरम् ॥ २३ ॥ नहुष उवाच ॥ यूयं च
ब्रह्मणः पुत्रा ज्वलन्तो ब्रह्मतेजसा ॥ ब्रह्मणः सदृशाः सर्वे सततं भक्तवत्सलाः ॥२४॥ नारायणपराः शश्वच्छुद्धसत्त्वस्वरूपिणः ॥
मोहमात्सर्यहीनाश्च दर्पाहंकारवर्जिताः ॥ २५ ॥ नारायणसमाः सर्वे तेजसा यशसा सदा ॥ गुणेन कृपया प्रेम्णा वरदानेन निश्चि

तम् ॥ २६ ॥ इत्युक्त्वा प्रणतो राजा तुष्टाव च रुरोद च ॥ दृष्ट्वा ते कातरं भूपमूचुः परहितैषिणः ॥ २७ ॥ ऋषय ऊचुः ॥ ॥ वरं वृणीष्व हे वत्स यत्ते मनसि वाञ्छितम् ॥ सर्वं दातुं वयं शक्ता नासाध्यं नश्च किंचन ॥ २८ ॥ इंद्रत्वं वा मनुत्वं वा चिरायुर्वा ततः परम् ॥ सप्तद्वीपेश्वरत्वं चाप्यतीव सुचिरं सुखम् ॥ २९ ॥ अथापि सर्वसिद्धित्वं सर्वैश्वर्यं सुदुर्लभम् ॥ मुक्तिं वा हरिभक्तिं वा तपसा या सुदुर्लभा ॥ ३० ॥ किमीप्सितं ते हे वत्स ब्रूहि नः साम्प्रतं मुदा ॥ सर्वं तुभ्यं प्रदायैव यास्यामस्तपसे मुदा ॥ ३१ ॥ युगलक्षसमं यच्च क्षणं कृष्णार्चनं विना ॥ दुर्दिनं दुर्दिनं यत्तद्ध्यानसेवनवर्जितम् ॥ ३२ ॥ विना तत्सेवनं यो हि विषयान्यं च वाञ्छति ॥ विषमत्ति प्रणाशाय विहायामृतमीप्सितम् ॥ ३३ ॥ ब्रह्मा शिवश्च धर्मश्च विष्णुश्चापि महान्विराट् ॥ गणेशश्च दिनेशश्च शेषश्च सनकादयः ॥ ३४ ॥ एते यच्चरणाम्भोजं ध्यायन्तोऽहर्निशं मुदा ॥ जन्ममृत्युजराव्याधिहरं तन्निरता वयम् ॥ ३५ ॥ तेषां च वचनं श्रुत्वा तानुवाच नृपेश्वरः ॥ स लज्जितो नम्रवक्रो मायामोहितमानसः ॥ ३६ ॥ नहुष उवाच ॥ सर्वं दातुं समर्थाश्च यूयं च भक्तवत्सलाः ॥ अधुना दत्त मे तूर्णं शचीदानमभीप्सितम् ॥ ३७ ॥ सप्तर्षिवाहनं कान्तं शचीच्छति महासती ॥ एतदेव मम वरं निष्पन्नं कुरुताचिरम् ॥ ३८ ॥ नहुषस्य वचः श्रुत्वा मुनयश्च परस्परम् ॥ अत्युच्चैर्जहसुः सर्वे कौतुकेन च नारद ॥ ३९ ॥ राजानं मोहितं मत्वा वेष्टितं विष्णुमायया ॥ चक्रुः प्रतिज्ञां वोढुं च कृपया दीनवत्सलाः ॥ ४० ॥ चक्रुः स्कन्धे तच्छिबिकां मुक्तामाणिक्यभूषिताम् ॥ राजा ययौ सुवेषश्च रत्नभूषणभूषितः ॥ ४१ ॥ दृष्ट्वा चातिविलम्बं च भर्त्सयामास तान्नृपः ॥ क्रुधा शशाप दुर्वासाश्चाग्रगामी च वर्त्मनि ॥ ४२ ॥ महानजगरो भूत्वा पत वै मूढमानस ॥ दर्शनाद्धर्मपुत्रस्य तव मोक्षो भविष्यति ॥ ४३ ॥ रत्नयानेन वैकुण्ठं गत्वा वैकुण्ठसेवनम् ॥ करिष्यसि महाराज न कर्म निष्फलं भवेत् ॥ ४४ ॥ इत्युक्त्वाः प्रययुः सर्वे प्रहस्य मुनिसत्तमाः ॥ राजा पपात तच्छापात्सर्पो भूत्वा महामुने ॥ ४५ ॥ शची जगाम तच्छ्रुत्वा गुरुं नत्वाऽमरावतीम् ॥ ययौ बृहस्पतिः शीघ्रं यत्रेन्द्रः पद्मतन्तुषु ॥ ४६ ॥ गत्वा सरोवराभ्याशमाजुहाव सुरेश्वरम् ॥ अतिप्रसन्नवदनः कृपया च कृपानिधिः ॥ ४७ ॥

॥ बृहस्पतिरुवाच ॥ अयि वत्स त्वमागच्छ भयं किं ते मयि स्थिते ॥ त्यज भीतिमिहागच्छ गुरुस्तेऽहं बृहस्पतिः ॥ ४८ ॥ स्वगुरोश्च स्वरं श्रुत्वा महेन्द्रो हृष्टमानसः॥रूपं विहाय सूक्ष्मं च स्वरूपेण समाययौ ॥४९॥पपात दण्डवन्मूर्ध्ना भक्त्या चरणयो गुरोः ॥ तं रुदन्तं महाभीतं मुदोरसि चकार सः ॥ ५० ॥ कारयित्वा सोमयागं प्रायश्चितार्थमेव च ॥ रत्नसिंहासने रम्ये वासयामास तं गुरुः ॥५१॥ प्रददौ परमैश्वर्यं पूर्वस्माच्च चतुर्गुणम् ॥ आगत्य सर्वदेवाश्च चक्रुः सेवां मुदाऽन्विताः ॥५२॥ शची संप्राप भर्तारं महेन्द्रं त्रिदशेश्वरम्॥मन्दिरे पुष्पतल्पे च मुमुदे सा मुदाऽन्विता॥५३॥इत्येवं कथितं वत्स महेन्द्रदर्पभञ्जनम्॥शचीसतीत्व रक्षा च किं भूयः श्रोतुमिच्छसि ॥ ५४ ॥ नारद उवाच ॥ सोमयागविधानं च ब्रूहि मां मुनिसत्तम ॥ कथं तं कारयामास गुरुश्च किं फलं परम् ॥ ५५ ॥ नारायण उवाच ॥ ब्रह्महत्याप्रशमनं सोमयागफलं मुने ॥ वर्षं सोमलतापानं यजमानः करोति च ॥ ५६ ॥ वर्षमेकं फलं भुङ्क्ते वर्षमेकं जलं मुदा ॥ त्रैवार्षिकं व्रतमिदं सर्वपापप्रणाशनम् ॥ ५७ ॥ यत्र त्रैवार्षिकं धान्यं निहितं भूतवृद्धये ॥ अधिकं वाऽपि विद्येत स सोमं पातुमर्हति ॥ ५८ ॥ महाराजश्च देवो वा यागं कर्तुमलं मुने ॥ न सर्वसाध्यो यज्ञोऽयं बह्वन्नो बहुदक्षिणः॥५९॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे उतरार्धे नारायणनारदसंवादे शक्रदर्पभङ्गप्रकरणे शक्रमोक्षकथनं नाम षष्टितमोऽध्यायः ॥ ६० ॥ छ ॥ श्रीनारायण उवाच ॥ इति ते कथितं किंचिदिन्द्रस्य दर्पभञ्जनम् ॥ अपरं श्रूयतां ब्रह्मन्सावधानं निगूढकम् ॥१॥ समुद्रमथनं कृत्वा पीत्वाऽमृतरसं पुरा ॥ निर्जित्य दैत्यसंघांश्च बहुदर्पो बभूव ह ॥२॥ तदा कृष्णो बलिद्वारा शक्रदर्पं बभञ्ज ह ॥ भ्रष्टश्रियो बभूवुस्ते देवा इन्द्रपुरोगमाः॥३॥ तदा बृहस्पतेः स्तोत्राददितेश्च व्रतेन ते॥जातश्च स्वांशकलयाऽप्यदित्यां वामनो विभुः॥४॥ याच्ञां कृत्वा बलिं राज्यं कृपया च कृपानिधिः॥ तस्मै ददौ महेन्द्राय देवेभ्यश्चापि संपदम् ॥ ५ ॥ बभूव शक्रदर्पश्च पुनः कल्पान्तरे पुरा ॥ विभुर्दुर्वाससो द्वारा जहार तच्छ्रियं मुने ॥ ६ ॥ पुनर्ददौ च कृपया कृपालुर्भक्तवत्सलः ॥ पुनः श्रीदुर्मदः सोऽपि जहार गौतमप्रियाम् ॥७॥ तदा गौतमशापेन भगाङ्गश्च बभूव सः ॥ संप्राप यातनामिन्द्रः स्वाङ्ग

वेदनया पुरा ॥ ८ ॥ उच्चैस्तं जहसुर्दृष्ट्वा ऋषयो मनवस्तथा ॥ देवाश्च लज्जिताः सर्वे मृततुल्यो बृहस्पतिः ॥ ९ ॥ तदा सहस्रवर्षं च
तपस्तप्त्वा रवेः पुरा ॥ रवेर्वरेण शक्रः स सहस्राक्षो बभूव ह ॥ १० ॥ कलङ्करूपमिन्द्रस्य तच्चक्षुर्निकरं परम् ॥ यथा चन्द्रे कलङ्कश्च
तारकाहरणादभूत् ॥ ११ ॥ नारद उवाच ॥ ब्रह्मन् केन प्रकारेण जहार गौतमप्रियाम् ॥ महासतीमहल्यां च पूज्यां भुवनपावनीम् ॥ १२ ॥
शुद्धाशयां महाभागां निर्मलां कमलाकलाम् ॥ एतद्वेदितुमिच्छामि वद वेदविदां वर ॥ १३ ॥ श्रीनारायण
उवाच ॥ पुष्करे तीर्थयात्रायां सूर्यपर्वणि नारद ॥ तत्रागतामहल्यां च ददर्श पाकशासनः ॥१४॥ सुस्मितां सुदतीं शान्तां पीनश्रोणिपयोधराम् ॥
मूर्च्छामवाप चेन्द्रश्च दृष्टिमात्रेण तत्क्षणात् ॥ १५ ॥ अथापरदिने तां च दृष्ट्वा मन्दाकिनीतटे ॥ एकाकिनीं
सुस्मितां च स्नान्तीं नग्नां सलज्जिताम् ॥ १६ ॥ दृष्ट्वा श्रोणिं स्तनयुगमतीव विपुलं हरिः ॥ मूर्च्छामवाप कामार्तो जहार चेतनां
पुनः ॥ १७ ॥ क्षणेन चेतनां प्राप्य गत्वा कामी तदन्तिकम् ॥ उवाच श्लक्ष्णया वाचा विनयेन पतिव्रताम् ॥ १८ ॥ महेन्द्र
उवाच ॥ अहो गुणमहो रूपमहो किं वा नवं वयः ॥ अहो किं वा मुखश्रीस्ते शरच्चन्द्रं विनिन्दति ॥ १९ ॥ अहो कटाक्षं कुटिलं
पुंसां चित्तविकर्षणम् ॥ किमहो लोचनं पद्मप्रभामोचनमीप्सितम् ॥ २० ॥ गमनं रमणीयं च गजखञ्जनभञ्जनम् ॥ अहो वाक्यं
तु मधुरं पीयूषादपि दुर्लभम् ॥ २१ ॥ किमहो विपुलश्रोणी कामाधारा मनोहरा ॥ कामदा कामुकायैव मुनिमानसमोहिनी
॥२२॥ अतीव कठिना पीना रम्भास्तम्भविडम्बिता ॥ अहो नितम्बयुगलं वर्तुलं चन्द्रबिम्बवत् ॥२३॥ श्रीयुक्तं श्रीफलयुगतुल्यं ते
स्तनयुग्मकम् ॥ अत्युन्नतं सुकठिनं त्रैलोक्यचित्तमोहनम् ॥ २४ ॥ अहो किं वा तपस्तेपे गौतमश्च तपोधनः ॥ संप्राप यत्फलेनैव
सुदतीं सुन्दरीं वराम् ॥२५॥ निषेव्य प्रकृतिं दुर्गां विष्णुमायां सनातनीम् ॥ लक्ष्मीं च लक्ष्मीसदृशीं तपसा प्राप्य पद्मिनीम् ॥२६॥
सुकोमलां सुवदनां ललनां नलिनाननाम् ॥ शुद्धां च सुदतीं श्यामां न्यग्रोधदलमध्यमाम् ॥ २७ ॥ त्वत्पालनं च जानामि कामशास्त्रविचक्षणः ॥
कामो वा कामुकश्चन्द्रः किं त्वां जानाति गौतमः ॥ २८ ॥ मां प्रशंसन्ति नित्यं ते कामशास्त्रविचक्षणाः ॥ उर्वश्या

द्याश्चाप्सरसो मां प्रशंसन्ति संततम् ॥२९॥ दासीं कृत्वा च दास्यामि शचीं तुभ्यं वरानने ॥ त्रैलोक्यलक्ष्मीं विपुलां गृहाण त्यज
गौतमम् ॥३०॥ अनभिज्ञं कामशास्त्र दुर्बलं च तपस्विनम् ॥ अव्यवहार्यं निष्कामं नारायणपरायणम् ॥ ३१ ॥ अविदग्धो विधाता
च योजयामास योऽक्षमम् ॥ ईदृशीं कामुकीं रम्यां ददाति च तपस्विने ॥३२॥ इत्युक्त्वा कामुकः शक्रः पपात चरणे मुदा ॥ तमुवाच
महासाध्वी वेदोक्तं च यथोचितम् ॥ ३३ ॥ अहल्योवाच ॥ अभाग्याद्ब्रह्मणश्चापि मरीचेश्च तपस्विनः ॥ अभाग्यात्कश्य
पस्यापि त्वं पुत्रः पापमानसः ॥ ३४ ॥ किं तज्जपेन तपसा मौनेन च व्रतेन च ॥ सुरार्चनेन तीर्थेन स्त्रीभिर्यस्य मनो हृतम् ॥
॥३५॥ स्त्रीरूपं निर्मितं सृष्टौ मोहाय कामिनां मनः ॥ अन्यथा न भवेत्सृष्टिः स्रष्ट्रा तेन पुराज्ञया ॥३६॥ सर्वं मायाकरण्डश्च धर्म
मार्गार्गलं नृणाम् ॥ व्यवधानं च तपसां दोषाणामाश्रयं परम् ॥३७॥ कर्मबन्धनिबन्धानां निगडं कठिनं स्मृतम् ॥ प्रदीपरूपं कीटानां
मीनानां बडिशं यथा ॥ ३८ ॥ विषकुम्भं दुग्धमुखमारम्भे मधुरोपमम् ॥ परिणामे दुःखबीजं सोपानं नरकस्य च ॥ ३९ ॥ ऋषयः
सनकाद्याश्च नोद्वाहं चक्रुरीप्सितम् ॥ परस्त्रीषु मनो येषां तेषां सर्वं च निष्फलम् ॥ ४० ॥ परस्त्रीसेवनं शक्र इहैवात्ययशस्करम् ॥
परत्र नरकं घोरं ददाति कामुकाय च ॥ ४१ ॥ इत्युक्त्वा च महासाध्वी विहाय तं च कामुकम् ॥ प्रययौ स्वगृहं तूर्णं गृहिणी गौत
मस्य च ॥ ४२ ॥ तत्सर्वं कथयामास गौतमाय तपस्विने ॥ तस्थौ प्रहस्य स मुनिर्महेन्द्रं च विनिंद्य च ॥ ४३ ॥ एकदा गौतमः शीघ्रं
जगाम शङ्करालयम् ॥ शक्रो गौतमरूपेण तां संभोगं चकार सः॥४४॥सर्वं ज्ञात्वा च सर्वज्ञः स्वयं मन्दिरमाययौ॥ निर्गच्छन्तं महेन्द्रं
च ददर्श मुनिपुङ्गवः ॥४५॥ नग्नामहल्यां रहसि पीनश्रोणिपयोधराम् ॥ मुनिः शशाप शक्रं च भगाङ्गश्च भवेति च ॥ ४६ ॥ कोपा
च्छशाप पत्नीं च रुदन्तीं भयविह्वलाम् ॥ त्वं च पाषाणरूपा च महारण्ये भवेति च ॥ ४७ ॥ ययौ च स्वगृहं शक्रो लज्जैकनम्रमा
नसः ॥ उवाच मधुरं भीता स्वामिनं शोककर्शितम् ॥ ४८ ॥ अहल्योवाच ॥ मां च दासीं च निर्दोषां कथं त्यजसि धा
र्मिक ॥ त्वं च वेदविदां श्रेष्ठो विचारं कुरु धर्मतः ॥ ४९ ॥ गौतम उवाच ॥ त्वां जानामि मनःशुद्धां सुव्रतां च पतिव्रताम् ॥

त्यक्ष्यामि च तथापि त्वां परवीर्यं च बिभ्रतीम्॥५०॥ परभोग्या च या कान्ता साऽशुद्धा सर्वकर्मसु॥ तां यो गच्छेन्महामूढो नरकं तस्य कल्पकम् ॥५१॥अन्नं विष्ठा जलं मूत्रं परभोग्याश्च निश्चितम् ॥ उपस्पृशेन्न तस्याश्च हंति पुण्यं पुराकृतम् ॥ ५२ ॥ अनिच्छया च शृंगारे स्त्री जारेण न दुष्यति ॥ दुष्टा स्त्री निश्चितं साध्वी स्वेच्छाशृङ्गारकर्मणि॥५३॥त्वं शक्रं स्वामिनं मत्वा सुखं भुक्त्वा रतिं गृहे ॥ पश्चाद्बभूव ते ज्ञानं मां दृष्ट्वा च निशामय ॥५४॥ गच्छ गच्छ महारण्यं भव पाषाणरूपिणी ॥ रामपादांगुलिस्पर्शात्सद्यः पूता भविष्यसि ॥ ५५ ॥ मां संप्राप्स्यसि तत्पुण्यात्पुनरेवागमिष्यसि ॥ गच्छ कान्ते महारण्यमित्युक्त्वा तपसे ययौ ॥ ५६ ॥ इत्येवं कथितं सर्वं महेंद्रदर्पभंजनम् ॥ पुनः संप्राप्य लक्ष्मीं च विभोश्च कृपया मुने ॥ ५७ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे उत्तरार्धे नारायणनारदसंवादे एकषष्टितमोऽध्यायः ॥ ६१ ॥ ❀ ॥ नारद उवाच ॥ ब्रह्मन्केन प्रकारेण रामो दाशरथिः स्वयम् ॥ चकार मोक्षणं कुत्र युगे गौतमयोषितः ॥१॥ रामावतारं सुखदं समासेन मनोहरम् ॥ कथयस्व महाभाग श्रोतुं कौतूहलं मम ॥ २ ॥ श्रीनारायण उवाच ॥ ब्रह्मणा प्रार्थितो विष्णुर्जातो दशरथात्स्वयम् ॥ कौशल्यायां च भगवांस्त्रेतायां च मुदाऽन्वितः ॥ ३ ॥ कैकेय्यां भरतश्चैव रामतुल्यो गुणेन च ॥ लक्ष्मणश्चापि शत्रुघ्नःसुमित्रायां गुणार्णवः ॥ ४ ॥ विश्वामित्रप्रेषितश्च श्रीरामश्च सलक्ष्मणः ॥ प्रययौ मिथिलां रम्यां सीताग्रहणहेतवे ॥५॥ दृष्ट्वा पाषाणरूपां च रामो वर्त्मनि कामिनीम् ॥ विश्वामित्रं च पप्रच्छ कारणं जगदीश्वरः ॥ ६ ॥ रामस्य वचनं श्रुत्वा विश्वामित्रो महातपाः ॥ उवाच तत्र धर्मिष्ठो रहस्यं सर्वमेव च ॥ ७ ॥ कारणं तन्मुखाच्छ्रुत्वा रामो भुवनपावनः ॥ पस्पर्श पादाङ्गुलिना सा बभूव च पद्मिनी ॥ ८ ॥ सा रामाशिषं कृत्वा प्रययौ भर्तृमन्दिरम् ॥ शुभाशिषं ददौ तस्मै भार्यां संप्राप्य गौतमः॥९॥रामस्स मिथिलां गत्वा धनुर्भङ्गं शिवस्य च ॥ चकार पाणिग्रहणं सीतायाश्चैव नारद ॥१०॥कृत्वा विवाहं राजेन्द्रो भृगुदर्पं निहत्य च ॥अयोध्यां प्रययौ रम्यां क्रीडाकौतुकमङ्गलैः ॥ ११ ॥ राजा पुत्रं नृपं कर्तुमियेष कृतसादरम् ॥ सप्ततीर्थोदकं तूर्णमानीय मुनिपुंगवान्॥१२॥ कृताधिवासं श्रीरामं सर्वमङ्गलसंयुतम् ॥ दृष्ट्वा भरतमाता

च कैकेयी शोकविह्वला ॥१३॥ वरयामास राजानं पूर्वमङ्गीकृतं वरम् ॥ रामस्य वनवासं च राजत्वं भरतस्य च ॥ १४ ॥ वरं दातुं महाराजो नेयेष प्रेममोहितः ॥ धर्मसत्यभयेनैवोवाच रामो नृपं सुधीः ॥ १५ ॥ श्रीराम उवाच ॥ तडागशतदानेन यत्पुण्यं लभते नरः ॥ ततोऽधिकं च लभते वापीदानेन निश्चितम् ॥ १६ ॥ दशवापीप्रदानेन यत्पुण्यं लभते नरः ॥ ततोऽधिकं च लभते पुण्यं कन्याप्रदानतः ॥ १७ ॥ दशकन्याप्रदानेन यत्पुण्यं लभते नरः ॥ ततोऽधिकं च लभते यज्ञैकेन नराधिप ॥१८॥ शतयज्ञेन यत्पुण्यं लभते पुण्यकृज्जनः ॥ ततोऽधिकं च लभते पुत्रास्यदर्शनेन च ॥ १९ ॥ दर्शने शतपुत्राणां यत्पुण्यं लभते नरः ॥ तत्पुण्यं लभते नूनं पुण्यवान्सत्यपालनात् ॥ २० ॥ न हि सत्यात्परो धर्मो नानृतात्पातकं परम् ॥ न हि गंगासमं तीर्थं न देवः केशवात्परः ॥ २१ ॥ नास्ति धर्मात्परो बंधुर्नास्ति धर्मात्परं धनम् ॥ धर्मात्प्रियः परः को वा स्वधर्मं रक्ष यत्नतः ॥ २२ ॥ स्वधर्मे रक्षिते तात शश्वत्सर्वत्र मंगलम् ॥ यशस्यं सुप्रतिष्ठा च प्रतापः पूजनं परम् ॥ २३ ॥ चतुर्दशाब्दं धर्मेण त्यक्त्वा गृहसुखं भ्रमन् ॥ वनवासं करिष्यामि सत्यस्य पालनाय ते ॥ २४ ॥ कृत्वा सत्यं च शपथमिच्छयाऽनिच्छयाऽथ वा ॥ न कुर्यात्पालनं यो हि भस्मांतं तस्य सूतकम् ॥ २५ ॥ कुंभीपाके स पचति यावच्चन्द्रदिवाकरौ ॥ ततो मूको भवेत्कुष्ठी मानवः सप्तजन्मसु ॥ २६ ॥ इत्येवमुक्त्वा श्रीरामो विधाय वल्कलं जटाम् ॥ प्रययौ च महारण्ये सीतया लक्ष्मणेन च ॥ २७ ॥ पुत्रशोकान्महाराजस्तत्याज स्वतनुं मुने ॥ पालनाय पितुः सत्यं रामो बभ्राम कानने ॥ २८ ॥ कालान्तरे महारण्ये भगिनी रावणस्य च ॥ भ्रमन्ती कानने घोरे भर्त्रा सार्द्धं सुकौतुकात् ॥२९॥ ददर्श रामं कुलटा कामार्ता राक्षसी तदा ॥ पुलकांचितसर्वाङ्गी मूर्च्छामाप स्मरेण च ॥ ३० ॥ श्रीरामनिकटं गत्वा सस्मितोवाच कामुकी ॥ शश्वद्यौवनसंयुक्ताऽतिप्रौढा कामदुर्मदा ॥ ३१ ॥ शूर्पणखोवाच ॥ हे राम हे घनश्याम रूपधाम गुणान्वित ॥ भावानुरक्तां वनितां मां गृहाण सुनिर्जने ॥ ३२ ॥ श्रुत्वा शूर्पणखावाक्यं धर्मं संस्मृत्य धार्मिकः ॥ उवाच मधुरं वाक्यं शापभीतश्च नारद ॥ ३३ ॥ श्रीराम उवाच ॥ अम्ब मातः सभार्योऽहमभार्यं

गच्छ मेऽनुजम् ॥ दुःखं[1] प्रियोऽन्यां प्रभजेदितरं च सुखालयम् ॥३४॥ रामस्य वचनं श्रुत्वा प्रययौ लक्ष्मणं मुदा॥ददर्श लक्ष्मणं
शान्तं कान्तं च लक्षणान्वितम् ॥३५॥ मां भजस्व महाभागेत्युवाच च पुनःपुनः ॥ लक्ष्मणस्तद्वचः श्रुत्वा तामुवाच कुतूहलात् ॥
॥ ३६ ॥ लक्ष्मण उवाच ॥ विहाय रामं सर्वेशं हे मूढे दासमिच्छसि ॥ सीतादासी च मत्पत्नी सीतादासोऽहमेव च
॥ ३७ ॥ भव सीतासपत्नी त्वं गच्छ रामं मदीश्वरम् ॥ तव पुत्रो भविष्यामि सीतायाश्च यथा सति ॥ ३८ ॥ लक्ष्मणस्य वचः
श्रुत्वा कामेन हृतमानसा ॥ उवाच लक्ष्मणं मूढा शुष्ककण्ठोष्ठतालुकी ॥ ३९ ॥ शूर्पणखोवाच ॥ यदि त्यजसि मां मूढ
कामात्स्वयमुपस्थिताम् ॥ युवयोश्च विपत्तिश्च भविष्यति न संशयः ॥ ४० ॥ ब्रह्मा च मोहिनीं त्यक्त्वा विश्वेऽपूज्यो बभूव
सः ॥ रम्भाशापेन दक्षश्च छागमस्तो बभूव सः ॥ ४१ ॥ स्ववैद्यश्चोर्वशीशापाद्यज्ञभागविवर्जितः ॥ रूपहीनः कुबेरश्च मेनाशापेन
लक्ष्मण ॥ ४२ ॥ कामो घृताचीशापेन बभूव भस्मसाच्छिवात् ॥ बलिर्मदालसाशापाद्भ्रष्टराज्यो बभूव ह ॥ ४३ ॥ शापेन मिश्रकेश्याश्च
हृतभार्यो बृहस्पतिः ॥ मम शापात्तथा रामो हृतभार्यो भविष्यति ॥ ४४ ॥ कामातुरां यौवनस्थां भार्यां स्वयमुपस्थिताम् ॥
न त्यजेद्धर्मभीतश्च श्रुतं माध्यन्दिने पुरा ॥ ४५ ॥ इह त्यक्त्वा विपद्ग्रस्तः परत्र नरकं व्रजेत् ॥ श्रुत्वाशूर्पणखावाक्यमर्द्धचन्द्रेण
लक्ष्मणः ॥ ४६ ॥ चिच्छेद नासिकां तस्याः क्षुरधारेण लीलया ॥ तस्या भ्राता च युयुधे बलवान्खरदूषणः ॥ ४७ ॥ ससैन्यो
लक्ष्मणास्त्रेण स जगाम यमालयम् ॥ चतुर्दशसहस्रं च राक्षसान्खरदूषणम् ॥ ४८ ॥ मृतान्दृष्ट्वा शूर्पणखा भर्त्सयामास रावणम् ॥
सर्वं निवेदनं कृत्वा जगाम पुष्करं तदा ॥ ४९ ॥ ब्रह्मणश्च वरं प्राप कृत्वा च दुष्करं तपः ॥ उवाच तादृशीं दृष्ट्वा निराहारां तपस्विनीम्
॥ ५० ॥ सर्वज्ञस्तन्मनो मत्वा कृपासिंधुश्च नारद ॥ ५१ ॥ ब्रह्मोवाच ॥ अप्राप्य रामं दुष्प्रापं करोषि दुष्करं तपः ॥
जितेन्द्रियाणां प्रवरं लक्ष्मणं धर्मलक्षणम्॥ब्रह्मविष्णुशिवादीनामीश्वरं प्रकृतेः परम्॥५२॥जन्मान्तरे च भर्तारं प्राप्स्यसि त्वं वरानने॥

---

[1] भजेत्प्रियजनं दुःखम्–इ०पा० ।

इत्येवमुक्त्वा ब्रह्मा च जगाम स्वालयं मुदा ॥५३॥ देहं तत्याज सा वह्नौ सा च कुब्जा बभूव ह ॥ अथ शूर्पणखावाक्यात्कोपात्क
म्पितविग्रहः ॥ ५४ ॥ जहार मायया सीतां मायावी राक्षसेश्वरः॥सीतां न दृष्ट्वा रामश्च मूर्च्छां प्राप चिरं मुने॥५५॥ चेतनां कारया
मास भ्राता चाध्यात्मिकेन च ॥ ततो बभ्राम गहनं शैलं च कन्दरं नदम् ॥ ५६ ॥ अहर्निशं च शोकार्तो मुनीनामाश्रमं मुने ॥ चिर
मन्वेषणं कृत्वा न दृष्ट्वा जानकीं विभुः ॥ ५७ ॥ चकार मित्रतां रामः सुग्रीवेण स्वयं प्रभुः ॥ निहत्य वालिनं बाणैर्ददौ राज्यं
च लीलया ॥ ५८ ॥ सुग्रीवाय च मित्राय स्वीकारपालनाय वै॥ दूतान्प्रस्थापयामास सर्वत्र वानरेश्वरः॥५९॥तस्थौ सुग्रीवभवने
श्रीरामश्च सलक्ष्मणः ॥ हनूमते वरं दत्त्वा रम्यं रत्नाङ्गुलीयकम् ॥ ६० ॥ सीतायै शुभसंदेशं प्राणधारणकारणम् ॥ तं च प्रस्थापया
मास दक्षिणां दिशमुत्तमाम् ॥ ६१ ॥ सुप्रीत्याऽऽलिङ्गनं दत्त्वा पादरेणून्सुदुर्लभान् ॥ हनूमान्प्रययौ लङ्कां सीतान्वेषणहेतवे॥६२॥
रामादधीतसंदेशो ययौ रुद्रकलोद्भवः ॥ अशोककानने सीतां ददर्श शोककर्शिताम् ॥ ६३ ॥ निराहारामतिकृशां कुह्वां चन्द्रकला
मिव ॥ सततं रामरामेति जपन्तीं भक्तिपूर्वकम् ॥ ६४ ॥ बिभ्रतीं च जटाभारं तप्तकाञ्चनसन्निभाम् ॥ ध्यायमानां पदाब्जं च श्रीरा
मस्य दिवानिशम् ॥ ६५ ॥ शुद्धशय्यां सुशीलां च सुव्रतां च पतिव्रताम् ॥ महालक्ष्मीलक्ष्मयुक्तां प्रज्वलन्तीं स्वतेजसा ॥ ६६ ॥
पुण्यदां सर्वतीर्थानां दृष्ट्वा भुवनपावनीम् ॥ प्रणम्य मातरं दृष्ट्वा रुदन्तीं वायुनन्दनः ॥ ६७ ॥ रत्नाङ्गुलीयं रामस्य ददौ तस्यै मुदा
ऽन्वितः ॥ रुरोद धर्मी तां दृष्ट्वा धृत्वा तच्चरणाम्बुजम् ॥ उवाच रामसंदेशं सीताजीवनरक्षणम् ॥ ६८ ॥ हनुमानुवाच ॥
पारेसमुद्रं श्रीरामः सन्नद्धश्च सलक्ष्मणः ॥६९॥ बभूव राममित्रं च सुग्रीवो बलवान्कपिः ॥ रामश्च वालिनं हत्वा राज्यं निष्कण्टकं
ददौ ॥ ७० ॥ सुग्रीवाय च मित्राय तद्भार्यां वालिना हृताम् ॥ सुग्रीवश्च तवोद्धारं स्वीचकार च धर्मतः ॥ ७१ ॥ वानराश्च ययुः
सर्वे तवान्वेषणकारणात् ॥ प्राप्य मङ्गलवार्तां च मत्तो राजीवलोचनः ॥ ७२ ॥ गंभीरं सागरं बद्ध्वा सोऽचिरेणागमिष्यति ॥ नि
हत्य रावणं पापं सपुत्रं च सबांधवम् ॥ ७३ ॥ करिष्यत्यचिरेणैव हे मातस्तव मोक्षणम् ॥ अद्य रत्नमयीं लंकां निःशंकस्त्वत्प्रसा

दतः ॥७४॥ भस्मीभूतां करिष्यामि मातः पश्य च सस्मितम् ॥ मर्कटीडिम्भतुल्यां च लङ्कां पश्यामि सुव्रते ॥ ७५ ॥ मूत्रतुल्यं समुद्रं च शरावमिव भूतलम् ॥ पिपीलिकासङ्घमिव ससैन्यं रावणं तथा ॥७६॥ संहर्तुं च समर्थोऽहं मुहूर्तार्धेन लीलया ॥ रामप्रतिज्ञारक्षार्थं न हनिष्यामि साम्प्रतम् ॥७७॥ स्वस्था भव महाभागे त्यज भीतिं मदीश्वरि ॥ वानरस्य वचः श्रुत्वा रुरोदोच्चैर्मुहुर्मुहुः ॥ उवाच वचनं भीता सीता रामपतिव्रता ॥ ७८ ॥ सीतोवाच ॥ अये जीवति मे रामो मच्छोकार्णवदारुणात् ॥ ७९ ॥ अपि मे कुशली नाथः कौशल्यानन्दनः प्रभुः ॥ कीदृशश्च कृशाङ्गश्च जानकीजीवनोऽधुना ॥ ८० ॥ किमाहारश्च किं भुंक्ते मम प्राणाधिकः प्रियः ॥ अपि पारे समुद्रस्य सत्यं सीतापतिः स्वयम् ॥८१॥ अपि सत्यं स सन्नद्धो न शोकेन हतः प्रभुः ॥ अपि स्मरति मां पापां स्वामिनो दुःखरूपिणीम् ॥ ८२ ॥ मदर्थं कति दुखं वा संप्राप स मदीश्वरः ॥ हारो नारोपितः कंठे पुरा व्यवहितो रतौ ॥ ८३ ॥ अधुनैवावयोर्मध्ये समुद्रः शतयोजनः ॥ अपि द्रक्ष्यामि तं रामं करुणासागरं प्रभुम् ॥ ८४ ॥ कान्तं शान्तं नितान्तं च धर्मिष्ठं धर्मकर्मणि ॥ अयि सेवां करिष्यामि पादपद्मे पुनः प्रभोः ॥८५॥ पतिसेवाविहीनाया मूढाया जीवनं वृथा ॥ अयि मे धर्मपुत्रश्च सत्यं जीवति लक्ष्मणः ॥ ८६ ॥ मच्छोकसागरे मग्नो भग्नदर्पो मया विना ॥ वीराणां प्रवरो धर्मी देवकल्पश्च देवरः ॥ ८७ ॥ अपि सत्यं स सन्नद्धो मत्प्रभोरनुजः सदा ॥ अपि द्रक्ष्यामि सत्यं तं लक्ष्मणं धर्मलक्षणम् ॥ प्राणानामधिकं प्रेम्णा धन्यं पुण्यस्वरूपिणम् ॥ ८८ ॥ इत्येवं वचनं श्रुत्वा दत्त्वा प्रत्युत्तरं शुभम् ॥ भस्मीभूतां च लङ्कां च चकार लीलया मुने ॥८९॥ पुनः प्रबोधं तस्यै च दत्त्वा वायुसुतः कपिः ॥ प्रययौ लीलया वेगाद्यत्र राजीवलोचनः ॥ ९० ॥ सर्वं तत्कथयामास वृत्तांतं मातुरेव च ॥ सीतामङ्गलवृत्तांतं श्रुत्वा रामो रुरोद च ॥ ९१ ॥ रुरोदोच्चैर्लक्ष्मणश्च सुग्रीवश्चापि नारद ॥ वानरा रुरुदुः सर्वे महाबलपराक्रमाः ॥ ९२ ॥ निबध्य सेतुं लङ्कां च प्रययौ रघुनन्दनः ॥ ससैन्यः सानुजः शीघ्रं सन्नद्धश्चापि नारद ॥ ९३ ॥ निहत्य रावणं रामो रणं कृत्वा सबान्धवम् ॥ चकार मोक्षणं ब्रह्मन् सीतायाश्च शुभे क्षणे ॥ ९४ ॥ कृत्वा पुष्पकयानेन सीतां सत्यपरायणाम् ॥ अयोध्यां

प्रययौ शीघ्रं क्रीडाकौतुकमङ्गलैः॥९५॥ क्रीडां चकार भगवान् सीतां कृत्वा च वक्षसि ॥विजह्रौ विरहज्वालां सीता रामश्च तत्क्षणम्
॥ ९६ ॥ सप्तद्वीपेश्वरो रामो बभूव पृथिवीतले ॥ बभूव निखिला पृथ्वी आधिव्याधिविवर्जिता ॥९७॥ बभूवतू रामपुत्रौ धार्मिकौ च
कुशीलवौ॥ तयोश्च पुत्रैः पौत्रैश्च सूर्यवंशोद्भवा नृपाः॥९८॥ इति ते कथितं वत्स श्रीरामचरितं शुभम् ॥ सुखदं मोक्षदं सारं पारपोतं
भवार्णवे ॥९९॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे उत्तरार्धे नारायणनारदसंवादे श्रीरामचरितं नाम द्विषष्टितमोऽध्यायः
॥६२॥ ❀ ॥नारायण उवाच ॥ अथ कंसो विचिन्त्यैव दृष्ट्वा दुःस्वप्नमेव च ॥ समुद्विग्नो महाभीतो निराहारो निरुत्सुकः ॥ १ ॥
पुत्रं मित्रं बन्धुगणं बान्धवं च पुरोहितम् ॥ समानीय सभामध्ये तानुवाच सुदुःखितः ॥ २ ॥ कंस उवाच ॥ मया दृष्टो निशीथे यो
दुःस्वप्नो हि भयप्रदः ॥ निबोधत बुधाः सर्वे बांधवाश्च पुरोहिताः॥३॥ बिभ्रती रक्तपुष्पाणां मालां सा रक्तचन्दनम् ॥रक्ताम्बरं खड्ग
तीक्ष्णं खर्परं च भयङ्करम् ॥४॥ प्रकृत्याट्टाट्टहासं च लोलजिह्वा भयङ्करी॥अतीव वृद्धा कृष्णाङ्गी नगरे मम नृत्यति ॥५॥ मुक्तकेशी छि
न्ननासा कृष्णा कृष्णाम्बरप्रिया॥विधवा सा महाशूद्री मामालिङ्गितुमिच्छति॥६॥मलिनं चैलखण्डं च बिभ्रती रूक्षमूर्द्धजान्॥दधती चू
र्णतिलकं कपोले मम वक्षसि ॥ ७ ॥ कृष्णवर्णानि पक्वानि छिन्नभिन्नानि सत्यक ॥ पतन्ति कृत्वा शब्दांश्च शश्वत्तालफलानि च॥
॥ ८ ॥ कुचैलो विकृताकारो म्लेच्छो हि रूक्षमूर्द्धजः ॥ ददाति मह्यं भूषायां च्छिन्नभिन्नकपर्द्दकान् ॥ ९ ॥ महारुष्टा च दिव्या स्त्री
पतिपुत्रवती सती ॥बभञ्ज पूर्णकुम्भं च साभिशप्य पुनः पुनः ॥१०॥ अम्लानामूढमालां च रक्तचन्दनचर्चिताम् ॥ ददाति मह्यं विप्र
श्च महारुष्टोऽतिशप्य च ॥ ११ ॥ क्षणमङ्गारवृष्टिश्च भस्मवृष्टिः क्षणं क्षणम्॥क्षणंक्षणं रक्तवृष्टिर्भवेच्च नगरे मम ॥ १२ ॥ वानरं वाय
सं श्वानं भल्लूकं सूकरं खरम् ॥ पश्यामि विकटाकारं शब्दं कुर्वन्तमुल्बणम् ॥१३॥ पश्यामि शुष्ककाष्ठानां राशिमम्लानकज्जलम्॥
अरुणोदयवेलायां कर्पींश्छिन्ननखानि च ॥१४॥ पीतवस्त्रपरीधाना शुक्लचन्दन चर्चिता ॥ बिभ्रती मालतीमालां रत्नभूषणभूषिता ॥
॥ १५ ॥ क्रीडाकमलहस्ता सा सिन्दूरबिन्दुशोभिता ॥ कृत्वाऽभिशापं मां रुष्टा याति मन्मन्दिरात्सती ॥१६॥ पाशहस्तांश्च पुरुषा

न्मुक्तकेशान्भयङ्करान् ॥ अतिरूक्षांश्च पश्यामि विशतो नगरं मम ॥ १७ ॥ नग्ननारीं मुक्तकेशीं नृत्यन्तीं च गृहेगृहे ॥ अतीव विकृताकारां पश्यामि सस्मितां सदा ॥१८॥ छिन्ननासा च विधवा महाशूद्री दिगम्बरा ॥ सा तैलाभ्यङ्गितं मां च करोत्यतिभयङ्करी॥१९॥ निर्वाणाङ्गारयुक्ताश्च भस्मपूर्णा दिगम्बराः ॥ अतिप्रभातसमये चित्राः पश्यामि सस्मिताः ॥ २० ॥ पश्यामि च विवाहं च नृत्यगीतमनोहरम् ॥ रक्तवस्त्रपरीधानान्पुरुषान्रक्तमूर्द्धजान् ॥ २१ ॥ रक्तं वमन्तं पुरुषं नृत्यन्तं नग्नमुल्बणम् ॥ धावन्तं च शयानं च पश्यामि सस्मितं सदा ॥ २२॥ राहुग्रस्तं च गगने मण्डलं चन्द्रसूर्ययोः ॥ एककाले च पश्यामि सर्वग्रासं च बान्धवाः ॥ २३ ॥ उल्कापातं धूमकेतुं भूकम्पं राष्ट्रविप्लवम् ॥ झञ्झावातं महोत्पातं पश्यामि च पुरोहित ॥२४॥ वायुना घूर्णमानांश्च च्छिन्नस्कन्धान्महीरुहान् ॥ पतितान्पर्वतांश्चैव पश्यामि पृथिवीतले ॥२५॥ पुरुषं छिन्नशिरसं नृत्यंतं नग्नमुच्छ्रितम् ॥ मुण्डमालाकरं घोरं पश्यामि च गृहेगृहे ॥२६॥ दग्धं सर्वाश्रमं भस्मपूर्णमङ्गारसंकुलम् ॥ हाहाकारं च कुर्वंतं सर्वं पश्यामि सर्वतः ॥२७॥ इत्येवमुक्त्वा राजा स विरराम सभातले ॥ दृष्ट्वा स्वप्नं बांधवाश्च न तमुक्त्वा निशश्वसुः॥२८॥ जहार चेतनां सद्यः सत्यकश्च पुरोहितः ॥ मत्वा विनाशं कंसस्य यजमानस्य नारद ॥२९॥रुरोद नारीवर्गश्च पिता माता च शोकतः ॥ मेने विनाशकालं च सद्यः स्वयमुपस्थितम् ॥३०॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे कंसदुःस्वप्नकथनं नाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ❀ श्रीनारायण उवाच ॥ सर्वं कृत्वा परामर्शं सत्यकश्च पुरोहितः ॥ बुद्धिमाञ्छुक्रशिष्यश्च तमुवाच हितं मुने ॥ १ ॥ सत्यक उवाच ॥ भयं त्यज महाभाग भयं किं ते मयि स्थिते ॥ कुरु यागं महेशस्य सर्वारिष्टविनाशनम् ॥ २ ॥ यागो धनुर्मखो नाम बह्वन्नो बहुदक्षिणः ॥ दुःस्वप्नानां नाशकरः शत्रुभीतिविनाशकः ॥ ३ ॥ आध्यात्मिकमाधिदैवमाधिभौतिकमुत्कटम् ॥ एषां त्रिविधोत्पातानां खण्डनो भूतिवर्धनः ॥ ४ ॥ यागे समाप्ते शंभुश्च जरामृत्युहरं वरम् ॥ ददाति साक्षाद्भवति दाता च सर्वसंपदाम् ॥ ५ ॥ चकारेमं च यागं च पुरा बाणो महाबलः ॥ नंदी परशुरामश्च भल्लश्च बलिनां वरः ॥६॥ पुरा ददौ धनुरिदं शिवो नंदीश्वराय च ॥ यागेन भूत्वा

सिद्धः स ददौ बाणाय धार्मिकः ॥७॥ कृत्वा यागं महासिद्धो ददौ रामाय पुष्करे ॥ तुभ्यं ददौ परशुरामः कृपया च कृपानिधिः ॥
॥ ८ ॥ सहस्रहस्तपरिमितं दैर्घ्येऽतिकठिनं नृप ॥ दशहस्तप्रशस्तं च शंकरेच्छाविनिर्मितम् ॥ ९ ॥ पशुपतेः पाशुपतं युक्तयानेन दुर्व
हम् ॥ सर्वे भंक्तुं न शक्ताश्च देवं नारायणं विना ॥ १० ॥ यागे च धनुषः पूजां शंकरस्य तु शंकरे ॥ कुरु शीघ्रं शुभार्थं च सर्वान्कुरु
निमन्त्रणम् ॥ ११ ॥ अस्मिन्यागे धनुर्भंगो भवेद्यदि नराधिप ॥ विनाशो यजमानस्य भविष्यति न संशयः ॥ १२ ॥ भग्ने धनुषि
यागश्च भग्नो भवति निश्चितम् ॥ फलं ददाति को वाऽत्र चानिष्पन्ने च कर्मणि ॥१३॥ ब्रह्मा च धनुषो मूले मध्ये नारायणः स्वयम्॥
अग्रे चोग्रप्रतापश्च महादेवो महामते ॥१४॥ धनुर्हि त्रिविकारं च सद्रत्नखचितं वरम् ॥ ग्रीष्ममध्याह्नमार्तंडप्रभाप्रच्छन्नकारणम् ॥
॥ १५ ॥ अशक्तश्च नमयितुमनंतश्च महाबलः ॥ सूर्यश्च कार्त्तिकेयश्च का कथाऽन्यस्य भूमिप ॥ १६ ॥ त्रिपुरारिः पुराऽनेन जघान
त्रिपुरं मुदा ॥ निर्भयं कुरु स्वच्छन्दं मङ्गलार्हं महोत्सवे ॥ १७॥ सत्यकस्य वचः श्रुत्वा चन्द्रवंशविवर्धनः ॥ उवाच कंसः सर्वार्थं सत
तं च हितैषिणम् ॥ १८ ॥ कंस उवाच ॥ वसुदेवगृहे जज्ञे मद्वधी कुलनाशनः ॥ स्वच्छन्दं नन्दगेहे च वर्धते नन्दनन्दनः ॥
॥ १९ ॥ मद्बन्धुवर्गाञ्छूरांश्च मन्त्रिणः सुविशारदान् ॥ भगिनीं पूतनां पूतां जघान बालको बली ॥ २० ॥ गोवर्धनं दधारैककरेण
बलवर्धनः ॥ महेन्द्रस्य च शूरस्य चकार च पराभवम् ॥ २१ ॥ ब्रह्माणं दर्शयामास ब्रह्मरूपं चराचरम् ॥ निवहं बालवत्सानां चकार
कृत्रिमं मुदा ॥ २२ ॥ तमेव बलिनं हन्तुं मन्त्रणं कुरु सत्यक ॥ मम शत्रुर्विना तेन नास्तीह धरणीतले ॥ २३ ॥
न हि स्वर्गे न पाताले त्रिषु लोकेषु निश्चितम् ॥ सन्ति सन्तश्च राजानः सर्वत्र मम बान्धवाः ॥ २४ ॥ महातपस्वी ब्रह्मा
च तपस्वी शङ्करः स्वयम् ॥ विष्णुः सर्वत्र सर्वात्मा समदर्शी सनातनः ॥ २५ ॥ नन्दपुत्रं निहत्याहं त्रिषु लोकेषु पूजितः ॥
सार्वभौमो भविष्यामि सप्तदीपेश्वरो महान् ॥ २६ ॥ स्वर्गे निहत्य शक्रं च दुर्बलं दैत्यनिर्जितम् ॥ भविष्यामि महेन्द्रश्च तत्र
निर्जित्य भास्करम् ॥ २७ ॥ यक्ष्मग्रस्तं च चन्द्रं च ममैव पूर्वपूरुषम् ॥ वायुं कुबेरं वरुणं यमं जेष्यामि निश्चितम् ॥ २८ ॥ गच्छ

नन्दव्रजं शीघ्रं नन्दं च नन्दनन्दनम् ॥ तद्भ्रातरं च बलिनं बलमानय साम्प्रतम् ॥२९॥ कंसस्य वचनं श्रुत्वा तमुवाच स सत्यकः ॥
हितं सत्यं नीतिसारं परं सामयिकं तथा ॥ ३० ॥ सत्यक उवाच ॥ अक्रूरमुद्धवं वाऽपि वसुदेवमथापि वा ॥ प्रस्थापय महा
भाग नन्दव्रजमभीप्सितम् ॥ ३१ ॥ सत्यकस्य वचः श्रुत्वा वसन्तं तत्र संसदि ॥ स्वर्णसिंहासनस्थं च वसुदेवमुवाच सः ॥ ३२ ॥
राजेन्द्र उवाच ॥ तत्त्वज्ञो नीतिशास्त्राणां त्वमुपायविशारदः ॥ व्रज नन्दव्रजं बन्धो वसुदेव सुतालयम् ॥ ३३ ॥ वृषभानं च
नन्दं च बलं च नन्दनन्दनम् ॥ शीघ्रमानय यत्नेन सर्वं गोकुलवासिनम् ॥ ३४ ॥ गृहीत्वा पत्रिकां दूता गच्छन्तु च चतुर्दिशम् ॥
नृपान्मुनिगणान्सर्वान्कर्तुं विज्ञापनं मुदा ॥ ३५ ॥ नृपस्य वचनं श्रुत्वा शुष्ककण्ठोष्ठतालुकः ॥ उवाच वचनं ब्रह्मन् हृदयेन विदूयता
॥ ३६ ॥ वसुदेव उवाच ॥ न युक्तमत्र राजेन्द्र गमनं मम साम्प्रतम् ॥ विज्ञापितुं नंदव्रजं वसुदेवस्य नन्दनम् ॥ ३७ ॥ यद्यायातो
नन्दपुत्रो यागे ते च महोत्सवे ॥ अवश्यं तद्विरोधश्च भविष्यति त्वया सह ॥ ३८ ॥ तमहं च समानीय कारयिष्यामि संयुगम् ॥
इति मे न हि भद्रं च विघ्नस्तस्य तवापि च ॥ ३९ ॥ पित्रा नीतो मृतः कृष्ण इति सर्वो वदिष्यति ॥ वसुदेवः सुतद्वारा जघान नृप
मेव च ॥ ४० ॥ द्वयोरेकतरस्यापि सद्यो मृत्युर्भविष्यति ॥ पतिष्यंति च शूराश्च नास्ति युद्धं निरामिषम् ॥ ४१ ॥ वसुदेववचः
श्रुत्वा रक्तपङ्कजलोचनः ॥ खड्गं गृहीत्वा तं हन्तुं प्रययौ नृपतीश्वरः ॥ ४२ ॥ हाहेति कृत्वा पुत्रं च वारयामास तत्क्षणम्॥उग्रसेनो
महाराजमतीव बलवान्मुने ॥ ४३ ॥ स्वपीठाद्वसुदेवश्च कोपाविष्टो गृहं ययौ ॥ अक्रूरं प्रेरयामास गन्तुं नन्दव्रजं नृपः ॥ ४४ ॥
दूतान्प्रस्थापयामास शीघ्रं प्रतिदिशं तथा ॥ आययुर्मुनयः सर्वे नृपाश्च सपरिच्छदाः ॥ ४५ ॥ दिक्पालाश्च सुराः सर्वे ब्राह्मणाश्च त
पस्विनः ॥ सनकश्च सनन्दश्च वोढुः पञ्चशिखस्तथा ॥ ४६ ॥ सनत्कुमारो भगवान्प्रज्वलन्ब्रह्मतेजसा ॥ कपिलश्चासुरिः पैलः
सुमन्तुश्च सनातनः ॥ ४७ ॥ पुलहश्च पुलस्त्यश्च भृगुश्च क्रतुरङ्गिराः ॥ मरीचिः कश्यपश्चैव दक्षोऽत्रिश्च्यवनस्तथा ॥४८॥ भरद्वा
जश्च व्यासश्च गौतमश्च पराशरः ॥ प्रचेताश्च वसिष्ठश्च संवर्तश्च बृहस्पतिः ॥ ४९ ॥ कात्यायनो याज्ञवल्क्योऽप्युतङ्कः सौभरिस्तथा॥

पर्वतो देवलश्चैव जैगीषव्यश्च जैमिनिः ॥ ९० ॥ विश्वामित्रश्च सुतपाः पिप्पलः शाकटायनः ॥ जाबालिर्जाङ्गलिश्चैवापिशलिश्च शिलालिकः ॥ ९१ ॥ आस्तिकश्च जरत्कारुस्तथा कल्याणमित्रकः ॥ दुर्वासा वामदेवश्च ऋष्यशृङ्गो विभाण्डकः ॥ ९२ ॥ पंथिः कविः कणादश्च कौशिकः पाणिनिस्तथा॥ कौत्सोऽघमर्षणश्चैव वाल्मीकिर्लोमहर्षणः ॥९३॥ मार्कण्डेयो मृकण्डुश्च पर्शुरामश्च साङ्कृतिः ॥ अगस्त्यश्च तथा वान्तस्तथाऽन्ये मुनयो मुने ॥९४॥ सशिष्याश्च सपुत्राश्च ब्राह्मणाश्च तपस्विनः ॥ जरासन्धो दन्तवक्रो दाम्भिको द्रविडाधिपः ॥९५॥ शिशुपालो भीष्मकश्च भगदत्तश्च मुद्गलः॥ धार्तराष्ट्रो धूमकेशो धूम्रकेतुश्च शम्बरः ॥९६॥ शल्यः सत्राजितः शङ्कुर्नृपाश्चान्ये महाबलाः ॥ भीष्मो द्रोणः कृपाचार्यो ह्यश्वत्थामा महाबलः ॥९७॥ भूरिश्रवाश्च शाल्वश्च कैकेयः कौशलस्तथा ॥ सर्वान्संभाषयामास महाराजो यथोचितम् ॥ सत्यको यज्ञदिवसं चकार च शुभक्षणम् ॥ ९८ ॥ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे कंसयज्ञकथनं नाम चतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ❀ ॥ श्रीनारायण उवाच ॥ कंसस्य वचनं श्रुत्वा सोऽक्रूरो धार्मिणां वरः ॥ उवाच चोद्धवं शान्तं शान्तः संहृष्टमानसः ॥१॥ अक्रूर उवाच ॥ सुप्रभाताऽद्य रजनी बभूव मे शुभं दिनम् ॥ तुष्टाश्च गुरवो विप्रा देवा मामिति निश्चितम्॥२॥ कोटिजन्मार्जितं पुण्यं मम स्वयमुपस्थितम् ॥ बभूव मे समुत्पन्नं यद्यत्कर्म शुभाशुभम् ॥ ३ ॥ चिच्छेद बन्धनिगडं मम बद्धस्य कर्मणा ॥ कारागाराच्च संसारान्मुक्तो यामि हरेः पदम् ॥ ४ ॥ सुहृदर्थी कृतोऽहं च कंसेन विदुषा रुषा ॥ वरेण तुल्यो देवस्य क्रोधो मम बभूव ह ॥ ५ ॥ व्रजराजं समाहर्तुं व्रजं यास्यामि साम्प्रतम् ॥ द्रक्ष्यामि परमं पूज्यं भुक्तिमुक्तिप्रदायिनम् ॥ ६ ॥ नवीनजलदश्यामं नीलेंदीवरलोचनम् ॥ पीतवस्त्रसमायुक्तकटिदेशविराजितम् ॥ ७ ॥ धूलिधूसरिताङ्गं च किं वा चन्दनचर्चितम् ॥ अथवा नवनीताक्तमङ्गं द्रक्ष्यामि सस्मितम् ॥ ८ ॥ किं वा विनोदमुरलीं वादयन्तं मनोहरम् ॥ किं वा गवां समूहं च चारयन्तमितस्ततः ॥ ९ ॥ किं वा वसन्तं गच्छन्तं

---

१ करिपथः–इ० पा० ।

शयानं वा सुनिश्चितम् ॥ निदेशं कीदृशं चाद्य सुदृष्ट्वा च शुभे क्षणे ॥ १० ॥ यत्पादपद्मं ध्यायन्ते ब्रह्मविष्णुशिवादयः ॥ न हि जानाति यस्यान्तमनन्तोऽनन्तविग्रहः ॥ ११ ॥ यत्प्रभावं न जानन्ति देवाः सन्तश्च संततम् ॥ तस्य स्तोत्रे जडीभूता भीता देवी सरस्वती ॥ १२ ॥ दासीनियुक्ता यद्दास्ये महालक्ष्मीश्च लक्षिता ॥ गङ्गा यस्य पदाम्भोजान्निःसृता सत्त्वरूपिणी ॥ १३ ॥ जन्ममृत्युजराव्याधिहरा त्रिभुवनात्परा ॥ दर्शनस्पर्शनाभ्यां च नृणां पातकनाशिनी ॥ १४ ॥ ध्यायते यत्पदांभोजं दुर्गा दुर्गार्तिनाशिनी ॥ त्रैलोक्यजननी देवी मूलप्रकृतिरीश्वरी ॥ १५ ॥ लोम्नां कूपेषु विश्वानि महाविष्णोश्च यस्य च ॥ असंख्यानि विचित्राणि स्थूलात्स्थूलतरस्य च ॥ १६ ॥ स च यत्षोडशांशश्च यस्य सर्वेश्वरस्य च ॥ तं द्रष्टुं यामि हे बंधो मायामानुषरूपिणम् ॥१७॥ सर्वं सर्वान्तरात्मानं सर्वज्ञं प्रकृतेः परम् ॥ ब्रह्मज्योतिःस्वरूपं च भक्तानुग्रहविग्रहम् ॥ ॥१८॥ निर्गुणं च निरीहं च निरानन्दं निराश्रयम् ॥ परमं परमानन्दं सानन्दं नन्दनन्दनम् ॥१९॥ स्वेच्छामयं सर्वपरं सर्वबीजं सनातनम् ॥ वदन्ति योगिनः शश्वद्ध्यायन्तेऽहर्निशं शिशुम् ॥२०॥ मन्वन्तरसहस्रं च निराहारः कृशोदरः ॥ पद्मे पाद्मस्तपस्तेपे पुरा पाद्मे तु यत्कृते ॥ २१ ॥ पुनः कुरु तपस्यां च तदा द्रक्ष्यसि मामिति ॥ सकृच्छब्दं च शुश्राव न ददर्श तथाऽपि तम् ॥ २२ ॥ तावत्कालं पुनस्तप्त्वा वरं प्राप ददर्श तम् ॥ ईदृशं परमेशं च द्रक्ष्याम्यद्य तमुद्धव ॥२३॥ पुरा शंभुस्तपस्तेपे यावद्वै ब्रह्मणो वयः ॥ ज्योतिर्मण्डलमध्ये च गोलोके तं ददर्श सः ॥२४॥ सर्वतत्त्वं सर्वसिद्धं मम तत्त्वं परं वरम् ॥ संप्राप तत्पदाम्भोजे भक्तिं च निर्मलां पराम् ॥२५॥ चकारात्मसमं तं च यो भक्तो भक्तवत्सलः ॥ ईदृशं परमेशं च द्रक्ष्याम्यद्य तमुद्धव ॥२६॥ सहस्रशक्रपातान्तं निराहारः कृशोदरः ॥ यस्यानन्तस्तपस्तेपे भक्त्या च परमात्मनः ॥२७॥ तदा चात्मसमं ज्ञानं ददौ तस्मै य ईश्वरः ॥ ईदृशं परमेशं च द्रक्ष्याम्यद्य तमुद्धव ॥ २८ ॥ सहस्रशक्रपातान्तं धर्मस्तेपे च यत्तपः ॥ तदा बभूव साक्षी स धर्मिणां सर्वकर्मिणाम् ॥ २९ ॥ शास्ता च फलदाता च यत्प्रसादान्नृणामिह ॥ सर्वेशमीदृशमहो द्रक्ष्याम्यद्य तमुद्धव ॥ ३० ॥ अष्टाविंशतिरिन्द्राणां पतने यद्दिवानिशम् ॥

एवं क्रमेण मासाब्दैः शताब्दं ब्रह्मणो वयः ॥ ३१ ॥ अहो यस्य निमेषेण ब्रह्मणः पतनं भवेत् ॥ ईदृशं परमात्मानं द्रक्ष्याम्यद्य
तमुद्धव ॥ ३२ ॥ नास्ति भूरजसां संख्या यथैव ब्रह्मणां तथा ॥ तथैव बन्धो विश्वानां तदाधारो महाविराट्॥३३॥विश्वे विश्वे च
प्रत्येकं ब्रह्मविष्णुशिवादयः ॥ मुनयो मनवः सिद्धा मानवाद्याश्चराचराः ॥ ३४ ॥ यत्षोडशांशः स विराट् सृष्टो नष्टश्च लीलया ॥
ईदृशं सर्वशास्तारं द्रक्ष्याम्यद्य तमुद्धव ॥ ३५ ॥ इत्येवमुक्त्वाऽक्रूरश्च पुलकाञ्चितविग्रहः ॥ मूर्च्छां प्राप साश्रुनेत्रो दध्यौ तच्चरणा
म्बुजम् ॥ ३६ ॥ बभूव भक्तिपूर्णश्च स्मारं स्मारं पदाम्बुजम् ॥ कृत्वा प्रदक्षिणं वाऽपि कृष्णस्य परमात्मनः ॥ ३७ ॥ उद्धवञ्च तमा
श्लिष्य प्रशशंस पुनः पुनः ॥ स च शीघ्रं ययौ गेहमक्रूरोऽपि स्वमन्दिरे ॥ ३८ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड
उत्तरार्द्धे नारायणनारदसंवादे अक्रूरहर्षोत्कर्षकथनं नाम पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥ श्रीनारायण उवाच ॥ अथ रासेश्वरीयुक्तो
रासे रासेश्वरः स्वयम् ॥स च रेमे तया सार्द्धमतीव रमणोत्सुकः ॥ १ ॥ सुखसंभोगमात्रेण ययौ निद्रां च राधिका॥ दृष्ट्वा स्वप्नं
समुत्थाय दीनोवाच प्रियं दिने ॥ २ ॥ राधिकोवाच ॥ अहो स्वामिन्निहागच्छ त्वां करोमि स्ववक्षसि ॥ परिणामे वि
धाता मे न जाने किं करिष्यति ॥ ३ ॥ इत्युक्त्वा सा महाभागा प्रियं कृत्वा स्ववक्षसि ॥दुःस्वप्नं कथयामास हृदयेन विदूयता
॥ ४ ॥ राधिकोवाच ॥ रत्नसिंहासनेऽहं च रत्नच्छत्रं च बिभ्रती ॥ तदाऽऽतपत्रं जग्राह रुष्टो विप्रश्च मे प्रभो ॥ ५ ॥ सागरे
कज्जलाकारे महाघोरे च दुस्तरे ॥ गभीरे प्रेरयामास मामेव दुर्बलां स च ॥६॥ तत्र स्रोतसि शोकार्ता भ्रमामि च मुहुर्मुहुः ॥ महो
र्मीणां च वेगेन व्याकुला नक्रसंकुलैः ॥ ७ ॥ त्राहि त्राहीति हे नाथ त्वां वदामि पुनः पुनः॥त्वां न दृष्ट्वा महाभीता करोमि प्रार्थनां
सुरम् ॥८॥कृष्ण तत्र निमज्जन्ती पश्यामि चन्द्रमण्डलम्॥निपतन्तं च गगनाच्छतखण्डं च भूतले ॥९॥ क्षणान्तरे च पश्यामि गग
नात्सूर्यमण्डलम् ॥ बभूव च चतुःखण्डं निपत्य धरणीतले॥१०॥एककाले च गगने मण्डलं चन्द्रसूर्ययोः ॥ अतीव कज्जलाकारं सर्वं
ग्रस्तं च राहुणा ॥ ११ ॥ क्षणान्तरे च पश्यामि ब्राह्मणो दीप्तिमानिति॥मत्क्रोडस्थसुधाकुम्भं बभञ्ज च रुषेति च ॥१२॥ क्षणान्तरे

च पश्यामि महारुष्टं च ब्राह्मणम् ॥ गृहीत्वा च व्रजन्तं च चक्षुषोः पुरुषं मम॥१३॥क्रीडाकपालदण्डं च हस्ताद्धस्तं मम प्रभो॥सहसा खण्डखण्डं च बभूव सह हेतुना॥१४॥हस्ताद्धस्तं च सहसा सद्रत्नसारदर्पणः॥निर्मलः कज्जलाकारः खण्डखण्डो बभूव ह॥१५॥ हारो मे रत्नसाराणां छिन्नो भूत्वा च वक्षसः ॥ अतीव मलिनं पद्मं पपात धरणीतले ॥१६॥ सौधपुत्तलिकाः सर्वा नृत्यंति च हसन्ति च ॥ आस्फोटयंति गायन्ति रुदंति च क्षणंक्षणम्॥१७॥कृष्णवर्णं बृहच्चक्रं खे भ्रमन्तं मुहुर्मुहुः॥निपतन्तं चोत्पतन्तं पश्यामि च भयंकरम्॥ ॥ १८ ॥ प्राणाधिदेवः पुरुषो निःसृत्याभ्यंतरान्मम ॥ राधे विदायं देहीति ततो यामीत्युवाच ह॥१९॥कृष्णवर्णा च प्रतिमा मामाश्लिष्यति चुम्बति ॥ कृष्णवस्त्रपरीधाना चेति पश्यामि साम्प्रतम् ॥२०॥इतीदं विपरीतं च दृष्ट्वा च प्राणवल्लभ॥नृत्यंति दक्षिणाङ्गानि प्राणा आन्दोलयन्ति मे ॥२१॥ रुदन्ति शोकात्कर्षन्ति समुद्विग्नं च मानसम्॥किमिदं किमिदं नाथ वद वेदविदां वर॥२२॥ इत्युक्त्वा राधिका देवी शुष्ककण्ठोष्ठतालुका ॥ पपात तत्पदांभोजे भीता सा शोकविह्वला॥२३॥श्रुत्वा स्वप्नं जगन्नाथो देवीं कृत्वा स्ववक्षसि॥ आध्यात्मिकेन योगेन बोधयामास तत्क्षणम् ॥ २४॥ तत्याज शोकं सा देवी ज्ञानं संप्राप्य निर्मलम् ॥ शान्तं च भगवन्तं च कृत्वा कान्तं स्ववक्षसि ॥ २५ ॥ इति श्रीब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे उत्तरार्द्धे नारायणनारदसंवादे श्रीराधाशोकापनोदने षट्षष्टितमोऽध्यायः ॥ ६६ ॥ श्रीनारायण उवाच ॥ विरहव्याकुलां दृष्ट्वा कामिनीं काममोहनः ॥ कृत्वा वक्षसि तां कृष्णो ययौ क्रीडासरोवरम् ॥ १ ॥ राजराजेश्वरी राधा कृष्णवक्षसि राजते॥सौदामिनीव जलदे नवीने गगने मुने ॥ २ ॥ रेमे स रमया सार्द्धं कृपया च कृपानिधिः ॥ द्वयोर्द्वयोर्यथा स्वर्णमण्योर्मारकतो मणिः ॥ ३ ॥ रत्ननिर्माणपर्यंके रत्नेंद्रसारनिर्मिते ॥ रत्नप्रदीपे ज्वलति रत्नभूषणभूषितः ॥४॥ रत्नभूषाभूषितया रासरत्नश्च कौतुकात् ॥ रासरत्नाकरे रम्ये निमग्नो रसिकेश्वरः ॥ ५ ॥ रासे रासेश्वरी राधा रासेश्वरमुवाच सा ॥ सुरतौ विरतौ सत्यां विरते न मनोरथे॥६॥ राधिकोवाच ॥ प्रफुल्लाऽहं त्वया नाथ मृता म्लाना च त्वां विना ॥ यथा महौषधिगणः प्रभाते भाति भास्करे ॥ ७ ॥ नक्तं दीपशिखेवाहं त्वया सार्द्धं त्वया विना ॥ दिने दिने यथा क्षीणा

कृष्णपक्षे विधोः कला ॥ ८ ॥ तव वक्षसि मे दीप्तिः पूर्णचन्द्रप्रभासमा ॥सद्यो मृता त्वया त्यक्ता कुह्वां चन्द्रकला यथा ॥९॥ज्वल
दग्निशिखेवाहं घृताहुत्या त्वया सह ॥ त्वया विनाऽहं निर्वाणा शिशिरे पद्मिनी यथा॥१०॥चिन्ताज्वरजराग्रस्ता मत्तस्त्वयि गतेऽप्य
हम् ॥ अस्तं गते रवौ चन्द्रे ध्वांतग्रस्ता धरा यथा ॥११ ॥ भ्रष्टो वेषस्त्वां विना मे रूपं यौवनचेतनम् ॥ तारावली परिभ्रष्टा सूर्यसूतो
दये यथा ॥ १२ ॥ त्वमेवात्मा च सर्वेषां मम नाथो विशेषतः ॥ तनुर्यथाऽत्मना त्यक्ता तथाऽहं च त्वया विना ॥१३॥ पञ्चप्राणात्म
कस्त्वं मे मृताऽहं च त्वया विना ॥ दृष्टेश्च गोलकौ यद्वद्दृष्टिः पुत्तलिकां विना ॥१४॥ स्थलं यथा चित्रयुक्तं त्वया सार्द्धमहं तथा ॥
असंस्कृता त्वया हीना तृणच्छन्ना यथा मही ॥१५॥ त्वया सार्द्धमहं कृष्ण चित्रयुक्तेव मृन्मयी ॥ त्वां विना जलधौताऽहं विरूपा मृ
न्मयीव च ॥ १६ ॥ गोपांगनानां शोभा च त्वया रासेश्वरेण च ॥ हारे स्वर्णविकारे च श्वेतेन मणिना सह ॥१७॥ व्रजराज त्वया
सार्द्धं राजन्ते राजराजयः ॥ यथा चन्द्रेण नभसि ताराराजिर्विराजते ॥ १८ ॥ त्वया शोभा यशोदाया नन्दस्य नन्दनंदन ॥ यथा
शाखाफलस्कन्धैस्तरुराजिर्विराजते॥ १९ ॥ त्वया सार्द्धं गोकुलेश शोभा गोकुलवासिनाम्॥ यथा सर्वा लोकराजी राजेन्द्रेण विरा
जते ॥२०॥ रासस्यापि च रासेश त्वया शोभा मनोहरा ॥ राजते देवराजेन यथा स्वर्गेऽमरावती ॥२१॥ वृन्दावनस्य वृक्षाणां त्वं च
शोभा पतिर्गतिः ॥ अन्येषां च वनानां च बलवान्केसरी यथा ॥२२॥ त्वया विना यशोदा च निमग्ना शोकसागरे ॥ अप्राप्य वत्सं
सुरभिः क्रोशन्ती व्याकुला यथा॥२३॥आन्दोलयन्ति नन्दस्य प्राणा दग्धं च मानसम्॥त्वया विना तप्तपात्रे यथा धान्यसमूहकः॥
॥ २४ ॥ इत्युक्त्वा परमप्रेम्णा सा पतन्ती हरेः पदे॥ पुनराध्यात्मिकेनैव बोधयामास तां विभुः ॥ २५ ॥ आध्यात्मिको महायोगो
मोहसंछेदकारणम् ॥ यथा पर्शुश्च वृक्षाणां तीक्ष्णधारश्च नारद ॥ २६ ॥ नारद उवाच ॥ आध्यात्मिकं महायोगं वद वेदविदां
वर ॥ शोकच्छेदं च लोकानां श्रोतुं कौतूहलं मम ॥ २७ ॥ श्रीनारायण उवाच ॥ आध्यात्मिको महायोगो न
ज्ञातो योगिनामपि ॥ स च नानाप्रकारश्च सर्वं वेत्ति हरिः स्वयम् ॥ २८ ॥ किंचिदाध्यात्मिकं चैव गोलोके राधिकेश्वरः ॥ सुप्रीतः

कथयामास त्रिपुरारिं यथा मुने ॥२९॥सहस्रेन्द्रनिपातान्तं तपः कुर्वन्तमीश्वरम्॥श्रेष्ठं ज्येष्ठं वैष्णवानां वरिष्ठं च तपस्विनाम् ॥३०॥ पुष्करे दुष्करं तप्त्वा पाद्मे पाद्मं च पद्मजः॥दृष्ट्वा तं सादरं कृत्वा उवाच किंचिदेव तम् ॥३१॥ शतेन्द्रपातपर्यन्तं कठोरेण कृशोदरम् ॥ निश्चेष्टमस्थिसारं च कृपया च कृपानिधिः ॥ ३२ ॥ सिंहक्षेत्रे पुरा धर्मं मत्तातं धर्मिणां वरम् ॥ चतुर्दशेन्द्रावच्छिन्नं तपस्तप्त्वा कृशोदरम्॥३३॥पपाठाध्यात्मिकं किंचित्कृपया च कृपानिधिः॥किञ्चिच्छतेन्द्रावच्छिन्नमातपं तमुवाच सः ॥३४॥ किंचित्सनत्कुमारं च तपन्तं सुचिरं चिरम्॥सुतपन्तमनन्तं च किंचिच्चोवाच नारद॥३५॥चिरं तपन्तं कपिलं हिमशैले तपस्विनम्॥ पुष्करे भास्करे किंचित्तपन्तं दुष्करं तपः ॥३६॥ उवाच किंचित्प्रह्लादं किंचिद्दुर्वाससं भृगुम् ॥ एवं निगूढं भक्तं च कृपया भक्तवत्सलः ॥३७॥क्रीडासरोवरे रम्ये यदुवाच कृपानिधिः ॥ शोकार्तां राधिकां तच्च कथयामि निशामय ॥ ३८ ॥ विरसां रसिकां दृष्ट्वा वासयित्वा च वक्षसि ॥ उवाचाध्यात्मिकं किञ्चिद्योगिनीं योगिनां गुरुः ॥ ३९ ॥ श्रीकृष्ण उवाच ॥ जातिस्मरे स्मरात्मानं कथं विस्मरसि प्रिये ॥ सर्वं गोलोकवृत्तान्तं सुदाम्नः शापमेव च ॥४०॥ शापात्किंचिद्दिनं दीने त्वद्विच्छेदो मया सह ॥ भविष्यति महाभागे मेलनं पुनरावयोः ॥ ४१॥पुनरेव गमिष्यामि गोलोकं तन्निजालयम् ॥ गत्वा गोपाङ्गनाभिश्च गोपैर्गोलोकवासिभिः ॥ ॥४२॥ अधुनाऽऽध्यात्मिकं किंचित्त्वां वदामि निशामय ॥शोकघ्नं हर्षदं सारं सुखदं मानसस्य च ॥४३॥ अहं सर्वान्तरात्मा च निर्लिप्तः सर्वकर्मसु॥विद्यामानश्च सर्वेषु सर्वत्रादृष्ट एव च॥४४॥वायुश्चरति सर्वत्र यथैव सर्ववस्तुषु॥ न च लिप्तस्तथैवाहं साक्षी च सर्वकर्मणाम् ॥४५॥ जीवो मत्प्रतिबिम्बश्च सर्वः सर्वत्र जीविषु॥भोक्ता शुभाशुभानां च कर्ता च कर्मणां सदा ॥४६॥यथा जलघटेष्वेव मण्डलं चन्द्रसूर्ययोः ॥ भग्नेषु तेषु संश्लिष्टस्तयोरेव तथा मयि ॥४७॥ जीवः श्लिष्टस्तथा काले मृतेषु जीविषु प्रिये ॥ आवां च विद्यमानौ च सततं सर्वजन्तुषु ॥४८॥ आधारश्चाहमाधेयं कार्यं च कारणं विना ॥ अये सर्वाणि द्रव्याणि नश्वराणि च सुन्दरि ॥ ४९ ॥ आविर्भावाधिकाः कुत्र कुत्रचिन्न्यूनमेव च ॥ ममांशाः केऽपि देवाश्च केचिद्देवाः कलास्तथा ॥५०॥ केचित्कलाः कलांशांशास्तदं

शांशाश्च केचन ॥ मदंशा प्रकृत्तिः सूक्ष्मा सा च मूर्त्या च पञ्चधा ॥ ५१ ॥ सरस्वती च कमला दुर्गा त्वं चापि वेदसूः ॥ सर्वे
देवाः प्राकृतिका यावन्तो मूर्तिधारिणः ॥ ५२ ॥ अहमात्मा नित्यदेही भक्तध्यानानुरोधतः ॥ येये प्राकृतिका राधे ते नष्टाः प्राकृ
ते लये ॥ ५३ ॥ अहमेवासमेवाग्रे पश्चादप्यहमेव च ॥ यथाऽहं च तथा त्वं च यथा धावल्यदुग्धयोः ॥५४॥ भेदः कदापि न भवेन्नि
श्चितं च तथाऽऽवयोः ॥ अहं महान्विराट् सृष्टौ विश्वानि यस्य लोमसु ॥५५॥ अंशस्त्वं तत्र महती स्वांशेन तस्य कामिनी॥अहं क्षुद्र
विराट् सृष्टौ विश्वं यन्नाभिपद्मतः ॥ ५६ ॥ अयं विष्णोर्लोमकूपे वासो मे चांशतः सति ॥ तस्य स्त्री त्वं च बृहती स्वांशेन सुभगा
तथा ॥५७॥ तस्य विश्वे च प्रत्येकं ब्रह्मविष्णुशिवादयः ॥ ब्रह्मविष्णुशिवा अंशाश्चान्याश्चापि च मत्कलाः ॥५८ ॥ मत्कलांशांशक
लया सर्वे देवि चराचराः ॥ वैकुण्ठे त्वं महालक्ष्मीरहं तत्र चतुर्भुजः ॥५९॥ स च विश्वाद्बहिश्चोर्द्ध्वे यथा गोलोक एव च ॥ सरस्वती
त्वं सत्ये च सावित्री ब्रह्मणः प्रिया ॥ ६० ॥ शिवलोके शिवा त्वं च मूलप्रकृतिरीश्वरी ॥ विनाश्य दुर्गं दुर्गा च सर्वदुर्गतिनाशिनी
॥६१॥॥सा एव दक्षकन्या च सा एव शैलकन्यका ॥ कैलासे पार्वती तेन सौभाग्या शिववक्षसि ॥६२॥ स्वांशेन त्वं सिन्धुकन्या
क्षीरोदे विष्णुवक्षसि ॥ अहं स्वांशेन सृष्टौ च ब्रह्मविष्णुमहेश्वराः ॥ ६३ ॥ त्वं च लक्ष्मीः शिवा धात्री सावित्री च पृथक्पृथक् ॥ गो
लोके च स्वयं राधा रासे रासेश्वरी सदा ॥ ६४ ॥वृन्दा वृन्दावने रम्ये विरजा विरजातटे ॥ सा त्वं सुदामशापेन भारतं पुण्यमागता
॥६५॥ पूतं कर्तुं च भारतं वृन्दारण्यं च सुन्दरि॥त्वत्कलांशांशकलया विश्वेषु सर्वयोषितः॥६६॥या योषित्सा च भवती यः पुमान्सो
ऽहमेव च ॥ अहं च कलया वह्निस्त्वं स्वाहा दाहिका प्रिया॥६७॥त्वया सह समर्थोऽहं नालं दग्धुं च त्वां विना ॥ अहं दीप्तिमतां
सूर्यः कलया त्वं प्रभाकरी ॥६८॥ संज्ञा त्वं च त्वया भामि त्वां विनाऽहं न दीप्तिमान् ॥अहं च कलया चंद्रस्त्वं च शोभा च रोहि
णी ॥६९॥ मनोहरस्त्वया सार्द्धं त्वां विना न च सुन्दरः ॥ अहमिन्द्रश्च कलया स्वर्गलक्ष्मीश्च त्वं शची ॥७०॥ त्वया सार्द्धं देव
राजो हतश्रीश्च त्वया विना ॥ अहं धर्मश्च कलया त्वं च मूर्तिश्च धर्मिणी ॥ ७१ ॥ नाहं शक्तो धर्मकृत्ये त्वां च धर्मक्रियां विना

अहं यज्ञश्च कलया त्वं स्वाहांऽशेन दक्षिणा ॥७२॥ त्वया सार्द्धं च फलदोऽप्यसमर्थस्त्वया विना ॥ कलया पितृलोकोऽहं स्वांशेन त्वं स्वधा सती ॥ ७३ ॥ त्वयाऽलं कव्यदाने च सदा नालं त्वया विना ॥ अहं पुमांस्त्वं प्रकृतिर्न स्रष्टाऽहं त्वया विना ॥७४॥ त्वं च संपत्स्वरूपाऽहमीश्वरश्च त्वया सह ॥ लक्ष्मीयुक्तस्त्वया लक्ष्म्या निःश्रीकश्च त्वया विना॥७५॥यथा नालं कुलालश्च घटं कर्तुं मृदा विना ॥ अहं शेषश्च कलया स्वांशेन त्वं वसुन्धरा ॥७६॥ त्वां सस्यरत्नाधारां च बिभर्मि मूर्ध्नि सुन्दरि ॥ त्वं च कान्तिश्च शान्तिश्च भूतिमूर्तिमती सती ॥ ७७ ॥ तुष्टिः पुष्टिः क्षमा लज्जा क्षुधा तृष्णा परा दया ॥ निद्रा श्रद्धा च तन्द्रा च मूर्च्छा च सन्नतिः क्रिया ॥ ७८ ॥ मूर्तिरूपा भक्तिरूपा देहिनां देहरूपिणी॥ ममाधारा सदा त्वं च तवात्माहं परस्परम् ॥ ७९ ॥ यथा त्वं च तथाहं च समौ प्रकृतिपूरुषौ ॥ न हि सृष्टिर्भवेद्देवि द्वयोरेकतरं विना ॥८० ॥ इत्युक्त्वा परमात्मा च राधां प्राणाधिकां प्रियाम्॥कृत्वा वक्षसि सुप्रीतो बोधयामास नारद ॥ ८१ ॥ स च क्रीडानियुक्तश्च बभूव रत्नमन्दिरे ॥ तया च राधया सार्द्धं कामुक्या सह कामुकः ॥ ८२ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे आध्यात्मिकयोगकथनं नाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ श्रीनारायण उवाच ॥ कृत्वा क्रीडां समुत्थाय पुष्पतल्पात्पुरातनः ॥ निद्रितां प्राणसदृशीं बोधयामास तत्क्षणम् ॥ १ ॥ वस्त्राञ्चलेन संस्कृत्य कृत्वा तन्निर्मलं मुखम् ॥ उवाच मधुरं शान्तं शांतां च मधुसूदनः ॥ २ ॥ श्रीकृष्ण उवाच ॥ अयि तिष्ठ क्षणं रासे रासेश्वरि शुचिस्मिते ॥ व्रज वृन्दावनं वापि व्रजं व्रज व्रजेश्वरि ॥ ३ ॥ रासाधिष्ठातृदेवि त्वं रासं रासे कुरु क्षणम् ॥ ग्रमेग्रामेयथा सन्ति सर्वत्र ग्रामदेवताः ॥ ४ ॥ प्रियालिनिवहैः सार्द्धं क्षणं चन्दनकाननम् ॥ क्षणं वा चम्पकवनं गच्छ वा तिष्ठ सुन्दरि ॥ ५ ॥ क्षणं गृहं च यास्यामि विशिष्टं कार्यमस्ति मे ॥ विरामं देहि मे प्रीत्या क्षणं मां प्राणवल्लभे ॥६॥ प्राणाधिष्ठातृदेवि त्वं प्राणाश्च त्वयि सन्ति मे ॥ प्राणी विहाय प्राणांश्च कुत्र स्थातुं क्षमः प्रिये ॥ ७ ॥ त्वयि मे मानसं शश्वत्त्वं मे संसारवासना ॥ त्वत्तो मम प्रिया नास्ति त्वमेव शंकरात्प्रिया ॥ ८ ॥ प्राणा मे शंकरः सत्यं त्वं च प्राणाधिका सति ॥ इत्युक्त्वा तां समा

श्लिष्य भगवान् गन्तुमुद्यतः ॥९॥ अक्रूरागमनं ज्ञात्वा सर्वज्ञः सर्वसाधनः ॥ आत्मा पाता च सर्वेषां सर्वोपकारकारकः ॥१०॥ दृष्ट्वा
तमेव गच्छन्तमुत्सुकं भिन्नमानसम्॥उवाच राधिका देवी हृदयेन विदूयता ॥११॥ राधिकोवाच॥ हे नाथ रमणश्रेष्ठ श्रेष्ठश्च प्रेयसां
मम ॥ हे कृष्ण हे रमानाथ व्रजेश मा व्रज व्रजम् ॥ १२ ॥ अधुना त्वां प्राणनाथ पश्यामि भिन्नमानसम् ॥ गते त्वयि मम प्रेम
गतं सौभाग्यमेव च ॥ १३ ॥ क्व यासि मां विनिक्षिप्य गम्भीरे शोकसागरे ॥ विरहव्याकुलां दीनां त्वय्येव शरणागताम् ॥ १४ ॥
न यास्यामि पुनर्गेहं यास्यामि काननान्तरम् ॥ कृष्ण कृष्णेति कृष्णेति गायंगायं दिवानिशम् ॥ १५ ॥ न यास्याम्यथवाऽरण्यं
यास्यामि कामसागरे ॥ तत्र त्वत्कामनां कृत्वा त्यक्ष्यामि च कलेवरम् ॥ १६ ॥ यथाकाशो यथात्मा च यथा चन्द्रो यथा रविः ॥
तथा त्वं यासि मत्पार्श्वे निबद्धो वसनाञ्चले ॥ १७ ॥ अधुना यासि नैराश्यं कृत्वा मे दीनवत्सल ॥ न युक्तं हि परित्यक्तुं दीनां मां
शरणागताम् ॥ १८ ॥ यत्पादपद्मं ध्यायन्ते ब्रह्मविष्णुशिवादयः ॥ त्वां मायया गोपवेषं कथं जानामि मत्सरी॥१९॥ कृतं यद्दैव
दुर्नीतमपराधसहस्रकम् ॥ यदुक्तं पतिभावेन चाभिमानेन तत्क्षम ॥२०॥ चूर्णीभूतश्च मद्गर्वो दूरीभूतो मनोरथः॥ विज्ञातुमात्मसौभाग्यं
किमन्यत्कथयामि ते ॥२१॥ ज्ञात्वा गर्गमुखाच्छ्रुत्वा मोहिता तव मयया ॥ त्वां च वक्तुं न शक्नोमि प्रेम्णा वा भक्तिपाशतः ॥२२॥
यासि चेन्मां परित्यज्य सकलङ्को भविष्यसि ॥ त्वत्पुत्रपौत्रा नश्यन्ति ब्रह्मकोपानलेन च ॥२३॥ क्षणं युगशतं मन्ये त्वां विना
प्राणवल्लभम् ॥ कथं शताब्दं त्वां त्यक्त्वा बिभर्मि जीवनं प्रभो ॥ २४ ॥ इत्युक्त्वा राधिका कोपात्पपात धरणीतले॥मूर्च्छां संप्राप
सहसा जहार चेतनां मुने ॥२५॥ कृष्णस्तां मूर्च्छितां दृष्ट्वा कृपया च कृपानिधिः॥चेतनां कारयित्वा च वासयामास वक्षसि ॥ २६ ॥
बोधयामास विविधं योगैः शोकविखण्डनैः ॥ तथापि शोकं त्यक्तुं च न शशाक शुचिस्मिता ॥ २७ ॥ सामान्यवस्तुविश्लेषो नृणां
शोकाय केवलम् ॥ देहात्मनोश्च विच्छेदः क्व सुखाय प्रकल्पते ॥ २८॥ न ययौ तत्र दिवसे व्रजराजो व्रजं प्रति॥क्रीडासरोवराभ्याशं
प्रययौ राधया सह ॥ २९ ॥ तत्र गत्वा पुनः क्रीडां चकार च तया सह ॥ विजहौ विरहज्वालां रासे रासेश्वरी मुदा ॥३०॥ राधा सा

स्वामिना सार्द्धं पुष्पचन्दनचर्चिता ॥ पुष्पचन्दनतल्पे च तस्थौ रहसि नारद ॥ ३१ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे श्रीकृष्णजन्म
खण्ड उत्तरार्धे नारायणनारदसंवादे राधाशोकविमोचनं नाम अष्टषष्टितमोऽध्यायः ॥ ६८ ॥ नारद उवाच ॥ अतः परं
किं रहस्यं राधाकेशवयोर्वद ॥ निगूढतत्त्वमस्पष्टं तन्मे व्याख्यातुमर्हसि ॥ १ ॥ श्रीनारायण उवाच ॥ शृणु नारद वक्ष्या
मि रहस्यं परमाद्भुतम् ॥ गोपनीयं च वेदेषु पुराणेषु पुराविदाम् ॥ २ ॥ पुनः सकामो भगवान्कृष्णः स्वेच्छामयो विभुः ॥ रेमे स
रमया सार्द्धं विदग्धश्च विदग्धया ॥ ३ ॥ चतुःषष्टिकलाशक्त्या यथा कान्ता कलावती ॥ कामशास्त्रेषु निपुणा विदग्धा रसिकेश्वरी ॥
॥ ४ ॥ शृङ्गारलीलानिपुणा शश्वत्कामा च कामुकी ॥ सुन्दरी सुन्दरीष्वेव शश्वत्सुस्थिरयौवना॥५॥पितॄणां मानसी कन्या धन्या
मान्या च मानिनी ॥ शंभोः शिष्या ज्ञानयुता शतकल्पांतजीविनी ॥ ६ ॥ वेदवेदांगनिपुणा योगनीतिविशारदा ॥ नानारूपधरा
साध्वी प्रसिद्धा सिद्धयोगिनी ॥ ७ ॥ तत्कन्या राधिका देवी मातृतुल्या च कामुकी ॥ चकार नानाभावं सा सुशीला स्वामिनं प्रति
॥ ८ ॥ चतुःषष्टिकलामानं शृंगारं च चकार सः ॥ तथा विशिष्टया सार्कं रासे रासरसोत्सुकः ॥९॥ तां नखाग्रक्षतश्रोणीं नखक्ष
तपयोधराम् ॥ लुप्तचन्दनसिंदूरां कबरीशिथिलां सतीम् ॥ १० ॥ सुखसंभोगमग्नां च नग्नां च शोकमूर्च्छिताम् ॥ पुलकांचितसर्वांगीं
निद्रादेवीं समाययौ ॥ ११ ॥ दृष्ट्वा तां निद्रितां कृष्णः कृपया च कृपानिधिः ॥ रुरोद मायया मायी मायेशो लोकशिक्षया ॥१२॥
कृत्वा वक्षसि राधां च चुचुम्ब च पुनः पुनः ॥ स्नातां च नेत्रसलिलैः प्राणाधिष्ठातृदेवताम्॥१३॥प्राणाधिकां प्रियतमां धारयामास
वाससी ॥ वह्निशुद्धेऽतिसूक्ष्मे चामूल्ये विश्वसुदुर्लभे ॥१४॥ कबरीं रचयामास ददौ कुङ्कुमचन्दनम् ॥ तद्गात्रे च गले हारममूल्यं रत्न
निर्मितम् ॥१५॥ सिन्दूरं च ददौ तस्याः सीमन्ताधःस्थलेऽमले ॥ दाडिमीकुसुमाकारं युक्तं चन्दनबिन्दुभिः ॥१६॥ चकार पत्रकं
गण्डे नानाचित्रविचित्रकम् ॥ ददौ तत्पादपद्मे च रत्नमञ्जीररञ्जितम् ॥१७॥ पादाङ्गुलिनखाग्रे च सुन्दरालक्तकं ददौ ॥ नानासुवेषो
ज्ज्वलितां तां निद्राकुलितां विभुः॥१८॥पुनश्चकार मोहेन गाढालिङ्गनमीप्सितम् ॥ पुनश्च चुम्बनं कृत्वा निवेश्य च स्ववक्षसि॥१९॥

सुष्वाप जगतां स्वामी कामी विरहकातरः ॥ एतस्मिन्नंतरे काले ब्रह्मा लोकपितामहः ॥ २० ॥ शिवशेषादिभिर्देवैर्मुनीन्द्रैस्सार्द्धमाययौ ॥ आगत्य नत्वा शिरसा तुष्टाव संपुटाञ्जलिः ॥ २१ ॥ सामवेदोक्तस्तोत्रेण परिपूर्णतमं विभुम् ॥ २२ ॥ ब्रह्मोवाच ॥ जय जय जगदीश वन्दितचरण निर्गुण निराकार स्वेच्छामय भक्तानुग्रह नित्यविग्रह गोपवेष मायया मायेश सुवेष सुशील शान्त सर्वकान्त दान्त नितान्तज्ञानानन्द परात्परतर प्रकृतेः पर सर्वांतरात्मरूप निर्लिप्त साक्षिस्वरूप व्यक्ताव्यक्त निरञ्जन भारावतारण करुणार्णव शोकसंतापग्रसन जरामृत्युभयादिहरण शरणपञ्जर भक्तानुग्रहकातर भक्तवत्सल भक्तसंचितधन ओं नमोऽस्तु ते ॥२३॥ सर्वाधिष्ठातृदेवायेत्युक्त्वा वै प्रीणनाय च॥पुनःपुनरुवाचेदं मूर्च्छितश्च बभूव ह ॥२४॥इति ब्रह्मकृतं स्तोत्रं यः शृणोति समाहितः॥ तत्सर्वाभीष्टसिद्धिश्च भवत्येव न संशयः ॥ २५ ॥ अपुत्रो लभते पुत्रं प्रियाहीनो लभेत्प्रियाम् ॥ निर्धनो लभते सत्यं परिपूर्णतमं धनम् ॥२६॥ इह लोके सुखं भुक्त्वा चान्ते दास्यं लभेद्धरेः ॥ अचलां भक्तिमाप्नोति मुक्तेरपि सुदुर्लभाम्॥२७॥स्तुत्वा च जगतां धाता प्रणम्य च पुनः पुनः ॥ शनैः शनैः समुत्थाय भक्त्या पुनरुवाच ह ॥२८॥ ब्रह्मोवाच ॥ उत्तिष्ठ देवदेवेश परमानन्दकारण॥ नन्दनन्दन सानन्द नित्यानन्द नमोऽस्तु ते॥२९॥व्रज नन्दालयं नाथ त्यज वृन्दावनं वनम् ॥ स्मर सुदामशापं च शतवर्षनिबन्धनम् ॥ ॥ ३० ॥ भक्तशापानुरोधेन शतवर्षं प्रियां त्यज ॥ पुनरेतां च संप्राप्य गोलोकं च गमिष्यसि ॥ ३१ ॥ गत्वा पितृगृहं देव पश्याक्रूरं समागतम् ॥ पितृव्यमतिथिं मान्यं धन्यं वैष्णवमीश्वरम् ॥ ३२ ॥ तेन सार्द्धं मधुपुरीं भगवन् गच्छ सांप्रतम्॥ कुरु शंभोर्धनुर्भङ्गं भग्नं वैरिगणं हरे ॥ ३३ ॥ हन कंसं दुरात्मानं तातं बोधय मातरम् ॥ निर्माणं द्वारकायाश्च भारावतरणं भुवः ॥ ३४ ॥ दह वाराणसीं शंभोः शक्रस्य सदनं विभो ॥ शिवस्य जृम्भणं युद्धे बाणस्य भुजकृन्तनम् ॥३५॥ रुक्मिणीहरणं नाथ घातनं नरकस्य च ॥ षोडशानां सहस्रं च स्त्रीणां पाणिग्रहं कुरु ॥ ३६ ॥ त्यज प्रियां प्राणसमां व्रजेश्वर व्रजं व्रज ॥ उत्तिष्ठोत्तिष्ठ भद्रं ते यावद्राधा न जाग्रति ॥ ३७ ॥ इत्येवमुक्त्वा ब्रह्मा च सेन्द्रैर्देवगणैः सह ॥ जगाम ब्रह्मलोकं च शेषश्च शंकरस्तथा ॥ ३८ ॥ पुष्पचन्दनवृष्टिं च

कृष्णस्योपरि देवताः ॥ चक्रुः प्रीत्या च भक्त्या च वाग्बभूवाशरीरिणी ॥ ३९ ॥ वध कंसं वधार्हं च स्वपित्रोर्मोक्षणं कुरु ॥ शर्यं कुरु भुवो भारं नारदेत्येवमेव च ॥ ४० ॥ इत्येवं तद्वचः श्रुत्वा भगवान् भूतभावनः ॥ राधां भगवतीं त्यक्त्वा समुत्तस्थौ शनैः शनैः ॥ ४१ ॥ ययौ हरिः कियद्दूरं निरीक्ष्य च पुनःपुनः ॥ क्षणं तस्थौ चन्दनानां वने वाससमीपतः ॥ ४२ ॥ विहाय राधा निद्रां सा समुत्तस्थौ स्वतल्पतः ॥ न निरीक्ष्य हरिं शान्तं कान्तं च प्राणवल्लभम् ॥ ४३ ॥ हा नाथ रमण प्रेष्ठ प्राणेश प्राणवल्लभ ॥ प्राणचोर प्रियतम क्व गतोऽसीत्युवाच ह ॥ ४४ ॥ क्षणमन्वेषणं कृत्वा बभ्राम मालतीवनम् ॥ उवास क्षणमुत्तस्थौ क्षणं सुष्वाप भूतले ॥ ४५ ॥ रुरोद क्षणमत्युच्चैर्विललाप मुहुर्मुहुः ॥ आगच्छागच्छ हे नाथेत्येवमुक्त्वा पुनःपुनः ॥ ४६ ॥ मूर्च्छां संप्राप संतापात्संतप्ता विरहानलैः ॥ भूतले च तृणाच्छन्ने पपात च यथा मृता ॥ ४७ ॥ आययुस्तत्र गोप्यश्च ब्रह्मञ्छतसहस्रशः ॥ काश्चिच्चामरहस्ताश्च गृहीत्वा चन्दनद्रवम् ॥ ४८ ॥ तासां मध्ये प्रियाली तां कृत्वा राधां स्ववक्षसि ॥ मृतामिव प्रियां दृष्ट्वा रुरोद प्रेमविह्वला ॥ ४९ ॥ सजलं पङ्कजदलं पङ्कोपरि निधाय च ॥ स्थापयामास तां राधां निश्चेष्टां च मृतामिव ॥५०॥ गोपीभिः सेवितां तत्र रुचिरैः श्वेतचामरैः ॥ चन्दनद्रवयुक्तां च स्निग्धवस्त्रान्वितां सतीम् ॥ ५१ ॥ ददर्श कृष्णस्तत्रैत्य तामेव प्राणवल्लभाम् ॥ निवारितश्च गोपीभिर्बलिष्ठाभिश्च नारद ॥ ५२ ॥ यथा नीतः सापराधो दण्ड्यो राजभयादिभिः ॥ चकार राधां क्रोडे च समागत्य कृपानिधिः ॥ ५३ ॥ चेतनां कारयामास बोधयामास बोधनैः ॥ संप्राप्य चेतनां देवी ददर्श प्राणवल्लभम् ॥ ५४ ॥ बभूव सुस्थिरा देवी तत्याज विरहज्वरम् ॥ चकार कान्तं सा कान्ता गात्रालिङ्गनमीप्सितम् ॥ ५५ ॥ नानाप्रकारशृङ्गारं चकार मधुसूदनः ॥ उवास रत्नतल्पे च राधां कृत्वा स्ववक्षसि ॥ ५६ ॥ राधासखी रत्नमाला विदग्धा सर्वपूजिता ॥ उवाच कृष्णं मधुरं नीतिसारमनुत्तमम् ॥ ५७ ॥ रत्नमालोवाच ॥ शृणु कृष्ण प्रवक्ष्यामि परिणामसुखावहम् ॥ हितं तथ्यं नीतिसारं दम्पत्योः प्रीतिकारणम् ॥ ५८ ॥ संमतं कामशास्त्रेषु नीतौ वेदपुराणयोः ॥ लौकिकव्यवहारेषु प्रशस्यं सुयशस्करम् ॥ ५९ ॥ नारीणां च यथा माता प्रियो भ्राता च बन्धुषु ॥ ततः

प्रियश्च पुत्रश्च पुत्रादेव प्रियः पतिः ॥ ६० ॥ शतपुत्रात्प्रियः स्वामी साध्वीनां साधुसंमतः ॥ रसिकानां विदग्धानां न हि भर्तुः परः
प्रियः ॥ ६१ ॥ यदि भर्ता विदग्धश्च विदग्धानां सुखावहः ॥ अन्यथा विषतुल्यश्च विषमश्चेत्खलः खलु ॥ ६२ ॥ संसारे चानृते
वत्स दम्पत्योः प्रीतिरेव च ॥ परस्परं च समता प्रियसौभाग्यमीप्सितम् ॥ ६३ ॥ दम्पत्योः समता नास्ति यत्रयत्र हि
मन्दिरे ॥ अलक्ष्मीस्तत्र तत्रैव विफलं जीवनं तयोः ॥ ६४ ॥ सुस्वामिनां विभेदश्च परं दुःखं च योषिताम् ॥ शोकसंतापबीजं च
जीवितं मरणाधिकम् ॥ ६५ ॥ स्वप्ने जागरणे चापि पतिः प्राणाश्च योषितः ॥ पतिरेव गुरुः स्त्रीणामिह लोके परत्र च ॥ ६७ ॥
अस्मात्त्वयि गते नाथ मूर्च्छां संप्राप राधिका ॥ पपात सहसा भूमौ तृणाच्छन्ने च भूतले ॥ ६७ ॥ मया दत्तं मुखेऽस्याश्च
शीतलं जलमुत्तमम् ॥ तदाश्वासो बभूवास्याश्चेतनं बाल्यमेव च ॥ ६८ ॥ क्षणं वदति हे नाथ हे कृष्णेति क्षणं
सखी ॥ क्षणं रोदिति संतप्ता मूर्च्छां प्राप्नोति तत्क्षणम् ॥ ६९ ॥ राधिकायाः शरीरं च संतप्तं विरहानलैः ॥ दग्धलोहयष्टिसमम्
अस्पृश्यमनलोपमम् ॥ ७० ॥ स्वप्ने जागरणे रात्रौ दिवासु च गृहे वने ॥ जले स्थले चान्तरिक्षेऽभ्युदये चन्द्रसूर्ययोः
॥ ७१ ॥ नास्ति भेदश्च राधाया मृततुल्या जडाकृतिः ॥ शश्वत्पश्यति स्थानस्था सर्वं विष्णुमयं जगत् ॥ ७२ ॥
स्निग्धपङ्के पङ्कजानां सजलानि दलानि च ॥ निपत्य तत्कृते तल्पे सुष्वाप विरहातुरा ॥ ७३ ॥ सेविता सा प्रियालीभिः संततं श्वेतचामरैः
॥ चन्दनद्रवसंसिक्ता स्निग्धवस्त्रसमन्विता ॥७४॥ राधाङ्गस्पर्शमात्रेण पङ्कः संप्राप शुष्कताम् ॥ स्निग्धानि पद्मपत्राणि बभूवुर्भस्मसात्क्षणम्
॥७५॥ चन्दनं शुष्कतां प्राप वर्णश्चम्पकसन्निभः ॥ बभूव कज्जलाकारः केशस्य वर्णतो हरे ॥७६॥ सिन्दूरबिन्दू रुचिरः
श्यामतां प्राप तत्क्षणम् ॥ वेषो विलासो लीला च क्रीडा त्यक्ता बभूव ह ॥ ७७ ॥ रत्नमाला तु तां दृष्ट्वा गत्वा कृष्णान्तिकं तदा ॥
उवाच मधुरं वाक्यं राधाहितकरं परम् ॥ ७७ ॥ रत्नमालोवाच ॥ हे कृष्ण कमलाकान्त त्वद्वियोगेन मत्सखी ॥ प्राणांस्त्यक्ष्यति
शीघ्रं स यदि नायास्यसि ध्रुवम् ॥ ७९ ॥ विचार्य मनसा कृष्ण यत्तत्समुचितं कुरु ॥ न भवेत्कामिनीहत्या येन नीति

विशारद ॥ ८० ॥ रत्नमालावचः श्रुत्वा प्रहस्योवाच माधवः ॥ हितं सत्यं नीतिसारं परिणामसुखावहम् ॥ ८१ ॥ श्रीभगवानु
वाच ॥ ईशो यद्यपि शक्तोऽहं निषेधं खण्डितुं प्रिये ॥ तथाऽपि न क्षमो रत्ने नियतेर्न करोम्यहम् ॥ ८२ ॥ ब्रह्माण्डेषु च सर्वे
षु मर्यादा स्थापिता मया ॥ तया कर्म प्रकुर्वन्ति मुनयश्च सुरा नराः ॥ ८३ ॥ सुदामशापाद्विच्छेदः शतवर्षमनीप्सितः ॥ भवि
ष्यत्येव दम्पत्योरावयोरेव सुन्दरि ॥८४॥ भेदो जागरणेऽस्याश्च मया सह सुमध्यमे ॥ संश्लेषः संततं स्वप्ने मद्वरेण भविष्यति
॥८५॥ आध्यात्मिकी मया दत्ता शोकच्छेदो भविष्यति ॥ राधां बोधय भद्रं ते यास्यामि नन्दमन्दिरम् ॥८६॥ इत्युक्त्वा जगतां
नाथो ययौ नन्दालयं प्रति ॥ राधिकां बोधयामासुरालिसंघाश्च नारद ॥ ८७ ॥ गत्वा गृहं च पितरं ननाम मातरं तथा ॥ चकार मा
ता क्रोडे च नवनीतं च नूतनम् ॥ ८८ ॥ मातृदत्तं च ताम्बूलं चखाद शीतलं जलम् ॥ उवाच तत्र जगतां नाथो मातृसमीपतः
॥ ८९ ॥ सर्वैर्गोपसमूहैश्च सेवितः श्वेतचारैः ॥ माल्यचन्दनताम्बूलं ते च तस्मै ददुर्मुदा ॥ ९० ॥ इति श्रीब्रह्मवैवर्ते महापुराणे
श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे श्रीकृष्णगमनं नामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ श्रीनारायण उवाच ॥
यथाऽक्रूरः स्वशरणं गत्वा कंसेन प्रेषितः ॥ चकार शयनं तल्पे भुक्त्वा मिष्टान्नमुत्तमम् ॥ १ ॥ सकर्पूरं च ताम्बूलं चखाद वासितं
जलम् ॥ जगाम निद्रां सुखतः सुखसंभोगमात्रतः ॥२॥ ततो ददर्श सुस्वप्नं पुराणश्रुतिसंमितम् ॥ निशावशेषसमये वाद्यादिपरिवर्जिते
॥ ३ ॥ अरोगी बद्धकेशश्च वस्त्रयुग्मसमन्वितः ॥ सुतल्पशायी सुस्निग्धश्चिन्ताशोकविवर्जितः ॥४॥ किशोरवयसं श्यामं द्विभुजं मुर
लीधरम् ॥ पीतवस्त्रपरीधानं वनमालाविभूषितम् ॥ ५ ॥ चन्दनोक्षितसर्वाङ्गं मालतीमाल्यशोभितम् ॥ भूषितं भूषणार्हं च सद्रत्न
मणिभूषणैः ॥ ६ ॥ मयूरपिच्छचूडं च सस्मितं पद्मलोचनम् ॥ एवंभूतं द्विजशिशुं ददर्श प्रथमं मुने ॥ ७ ॥ ततो ददर्श रुचिरां पति
पुत्रवतीं सतीम् ॥ पीतवस्त्रपरीधानां रत्नभूषणभूषिताम् ॥ ८ ॥ ज्वलत्प्रदीपहस्तां च शुक्लधान्यकरां वराम् ॥ शरच्चन्द्रनिभास्यां च
सस्मितां वरदां शुभाम् ॥९॥ ततो ददर्श विप्रं च प्रकुर्वन्तं शुभाशिषम् ॥ श्वेतपद्मं राजहंसं तुरगं च सरोवरम् ॥ १० ॥ ददर्श चि

त्रितं चारु फलितं पुष्पितं शुभम् ॥ आम्रनिम्बनारिकेलगुवककदलीतरुम् ॥११॥ दशन्तं श्वेतसर्पं च स्वात्मानं पर्वतस्थितम्॥वृक्ष
स्थं च गजस्थं च तरिस्थं तुरगस्थितम् ॥१२॥ वीणां वादितवन्तं च भुक्तवन्तं च पायसम् ॥ दधिक्षीरयुतान्नं च पद्मपत्रस्थमीप्सि
तम् ॥ १३ ॥ कृमिविट्सहिताङ्गं च रुदन्तं मोहितं तदा ॥ शुक्लधान्यपुष्पकरं क्षणं चन्दनचर्चितम् ॥१४॥ प्रासादस्थं समुद्रस्थमा
त्मानं च सलोहितम् ॥ छिन्नभिन्नं क्षताङ्गं च मेदपूयसमन्वितम् ॥ १५ ॥ ततो ददर्श रजतं मणिं शुभ्रं च काञ्चनम् ॥ मुक्तामाणिक्य
रत्नं च पूर्णकुम्भजलं शुभम् ॥१६ ॥ सुरभिं च सवत्सां च वृषभेन्द्रं मयूरकम् ॥ शुकं च सारसं हंसं चिह्नं खञ्जनमेव च ॥१७॥
ताम्बूलं पुष्पमाल्यं च ज्वलदग्निं सुरार्चनम् ॥ पार्वतीप्रतिमां कृष्णप्रतिमां शिवलिङ्गकम् ॥ १८ ॥ विप्रबालां च बालां च सुपक्वफ
लितां कृषिम् ॥ देवस्थलीं च राजेन्द्रं सिंहं व्याघ्रं गुरुं सुरम् ॥१९॥ दृष्ट्वा स्वप्नं समुत्तस्थौ चकाराह्निकमीप्सितम् ॥ उद्धवं कथया
मास सर्वं वृत्तान्तमेव च ॥२०॥ उद्धवाज्ञां समादाय कृत्वा गुरुसुरार्चनम् ॥ यात्रां चकार श्रीकृष्णं ध्यात्वा मनसि नारद ॥ २१ ॥
ददर्श वर्त्मन्येवं च मङ्गलार्हं शुभप्रदम् ॥ वाञ्छाफलप्रदं रम्यं पुरो मङ्गलसूचकम् ॥ २२ ॥ वामे शिवं शिवां पूर्णं कुम्भं नकुलचाष
कम् ॥ पतिपुत्रवतीं साध्वीं दिव्याभरणभूषिताम् ॥ २३ ॥ शुक्लपुष्पं च माल्यं च धान्यं च खञ्जनं शुभम् ॥ दक्षिणे ज्वलदग्निं च
विप्रं च वृषभं गजम् ॥ २४ ॥ वत्सप्रयुक्तां धेनुं च श्वेताश्वं राजहंसकम् ॥ वेश्यां च पुष्पमालां च पताकां दधि पायसम्॥२५ ॥
मणिं सुवर्णं रजतं मुक्तामाणिक्यमीप्सितम् ॥ मद्यं मांसं चन्दनं च माध्वीकं घृतमुत्तमम् ॥ २६ ॥ कृष्णसारं फलं लाजसिद्धान्नं
दर्पणं तथा ॥ विचित्रितं विमानं च सुदीप्तां प्रतिमां तथा ॥ २७ ॥ शुक्लोत्पलं पद्मवनं शङ्खचिह्नं च कोरकम् ॥ मार्जारं पर्वतं मेघं
मयूरं शुकसारसम् ॥ २८ ॥ शंखकोकिलवाद्यानां ध्वनिं शुश्राव मङ्गलम् ॥ विचित्रकृष्णसंगीतं हरिशब्दं जयध्वनिम् ॥ २९ ॥
एवंभूतं शुभं दृष्ट्वा श्रुत्वा संहृष्टमानसः ॥ प्रविवेश हरिं स्मृत्वा पुण्यं वृन्दावनं वनम् ॥ ३० ॥ ददर्श पुरतो रम्यं रासमण्डल
मीप्सितम् ॥ चन्दनागुरुकस्तूरीपुष्पचंदनवायुना ॥ ३१ ॥ वासितं मङ्गलघटै रम्भास्तम्भैर्विराजितम् ॥ आम्रपल्लवसंघैश्च

पट्टसूत्रविचित्रितैः ॥३२॥ शोभितैः परितः शश्वत्पद्मरागविनिर्मितम् ॥ शोभितं शोभनार्हं च त्रिकोटिरत्नमन्दिरैः ॥ ३३ ॥ रम्यैः
कुञ्जकुटीरैश्च राजितं शतकोटिभिः ॥ रासं वृन्दावनं दृष्ट्वा कियद्दूरं ययौ च सः॥३४॥ ददर्श पुरतो रम्यं नन्दव्रजमनुत्तमम् ॥ परं
वैकुण्ठसङ्काशं वैकुण्ठनिलयं शुभम् ॥ ३५ ॥ रत्नसोपानसंयुक्तं रत्नस्तम्भैर्विराजतम् ॥ नानाचित्रविचित्राढ्यं सद्रत्नवलयान्वितम् ॥
॥ ३६ ॥ खचितं मणिसारेण रचितं विश्वकर्मणा ॥ द्वारि दृष्टेन मार्गेण राजद्वारं विवेश सः ॥ ३७ ॥ पताकारत्नजालाढ्यं मुक्ता
माणिक्यभूषितम् ॥ रत्नदर्पणशोभाढ्यं रत्नचित्रविचित्रितम् ॥३८॥ रत्नवीथीविरचितं मङ्गलं मङ्गलैर्घटैः ॥ अक्रूरागमनं श्रुत्वा सा
ह्लादो नन्द एव च ॥ सहितो रामकृष्णाभ्यां जगामानुव्रजाय वै ॥ ३९ ॥ वृषभान्वादिभिर्युक्तः कृत्वा वेश्यां पुरःसराम् ॥ पूर्णकुम्भं
गजेन्द्रं च कृत्वाग्रे शुक्लधान्यकम् ॥४०॥ कृष्णां गां मधुपर्कं च पाद्यं रत्नासनादिकम् ॥ गृहीत्वा सादरः शान्तः सस्मितो विनतस्त
था ॥४१॥ आनन्दयुक्तो नन्दश्च सगणः सह बालकः ॥ दृष्ट्वाऽक्रूरं महाभागं तूर्णमालिङ्गनं ददौ ॥ ४२ ॥ प्रणेमुः शिरसा सर्वे गोपा
जगृहुराशिषम् ॥ परस्परं च संयोगो बभूव गुणवान्मुने ॥४३॥ क्रोडे चकाराक्रूरश्च कृष्णं रामं क्रमेण च॥चुचुम्ब गण्डयुगले पुलकां
चितविग्रहः ॥४४॥ साश्रुनेत्रोऽतिसाह्लादः कृतार्थः सिद्धवांछितः॥ददर्श कृष्णं द्विभुजं क्षणं श्यामलसुन्दरम् ॥४५॥ पीतवस्त्रपरीधानं
मालतीमाल्यभूषितम् ॥ चन्दनोक्षितसर्वाङ्गं परं वंशीधरं वरम् ॥ ४६ ॥ स्तुतं ब्रह्मशशषाद्यैर्मुनीन्द्रैः सनकादिभिः ॥ वीक्षितं गोपक
न्याभिः परिपूर्णतमं विभुम् ॥४७॥ क्षणं ददर्श क्रोडस्थं सस्मितं च चतुर्भुजम् ॥ लक्ष्मीसरस्वतीयुक्तं वनमालाविभूषितम् ॥ ४८ ॥
सुनन्दनन्दकुमुदैः पार्षदैः परिसेवितम् ॥ सेवितं सिद्धसंघैश्च भक्तिनम्रैः परात्परम् ॥ ४९ ॥ क्षणं ददर्श देवं तं पञ्चवक्त्रं त्रिलोचनम् ॥
शुद्धस्फटिकसङ्काशं नागराजविराजितम् ॥ ५० ॥ दिगम्बरं परब्रह्म भस्माङ्गं च जटायुतम् ॥ जपमालाकरं ध्याननिष्ठं श्रेष्ठं च
योगिनाम् ॥ ५१ ॥ क्षणं चतुर्मुखं ध्याननिष्ठ श्रेष्ठं मनीषिणाम् ॥ क्षणं धर्मस्वरूपं च शेषरूपं क्षणं क्षणम् ॥ ५२ ॥ क्षणं
भास्कररूपं च ज्योतीरूपं सनातनम् ॥ क्षणं परमशोभाढ्यं कोटिकन्दर्पनिन्दितम् ॥ ५३ ॥ कामिनीकमनीयं च कामुकं कामसंयु

तम् ॥ एवंभूतं शिशुं दृष्ट्वा स्थापयामास वक्षसि ॥ ५४ ॥ रत्नसिंहासने रम्ये नन्ददत्ते च नारद ॥ कृत्वा प्रदक्षिणं भक्त्या पुलकाञ्चित
विग्रहः ॥ प्रणम्य शिरसा भूमौ तुष्टाव पुरुषोत्तमम् ॥ ५५ ॥ अक्रूर उवाच ॥ नमः कारणरूपाय परमात्मस्वरूपिणे
॥ ५६ ॥ सर्वैषामपि विश्वनामीश्वराय नमो नमः ॥ पराय प्रकृतेरीशपरात्परतराय च ॥ ५७ ॥ निर्गुणाय निरीहाय नीरूपाय
स्वरूपिणे ॥ सर्वदेवस्वरूपाय सर्वदेवेश्वराय च ॥५८॥ सर्वदेवाधिदेवाय विश्वादिभूतरूपिणे ॥ असंख्येषु च विश्वेषु ब्रह्मविष्णुशि
वात्मक ॥ ५९ ॥ स्वरूपायादिबीजाय तदीशविश्वरूपिणे ॥ नमो गोपाङ्गनेशाय गणेशेश्वररूपिणे ॥ ६० ॥ नमः सुरगणेशाय
राधेशाय नमो नमः ॥ राधारमणरूपाय राधारूपधराय च ॥ ६१ ॥ राधाराध्याय राधायाः प्राणाधिकतराय च ॥ राधासाध्याय
राधाधिदेवप्रियतमाय च ॥६२॥ राधाप्राणाधिदेवाय विश्वरूपाय ते नमः ॥ वेदस्तुतात्मवेदज्ञरूपिणे वेदिने नमः ॥ ६३ ॥ वेदा
धिष्ठातृदेवाय वेदबीजाय ते नमः ॥ यस्य लोमसु विश्वानि चासंख्यानि च नित्यशः ॥ ६४ ॥ महद्विष्णोरीश्वराय विश्वेशाय नमो
नमः ॥ स्वयं प्रकृतिरूपाय प्राकृताय नमो नमः ॥ ६५ ॥ प्रकृतीश्वररूपाय प्रधानपुरुषाय च ॥ इत्येवं स्तवनं कृत्वा मूर्च्छामाप
सभातले ॥ ६६ ॥ पपात सहसा भूमौ पुनरीशं ददर्श सः ॥ बहिःस्थं हृदयस्थं च परमात्मानमीश्वरम् ॥ ६७ ॥ परितः श्यामरू
पं च विश्वस्थं विश्वमेव च ॥ अक्रूरं मूर्च्छितं दृष्ट्वा नन्दः सादरपूर्वकम् ॥ ६८ ॥ रत्नसिंहासने रम्ये वासयामास नारद ॥ पप्रच्छ सर्व
वृत्तान्तं किंस्विद्दृष्टमिति त्वया ॥ ६९ ॥ मिष्टान्नं भोजयामास कुशलं च पुनःपुनः ॥ अक्रूरः कथयामास कंसवृत्तान्तमीप्सितम् ॥
॥ ७० ॥ स्वपित्रोर्मोक्षणार्थं च गमनं रामकृष्णयोः ॥ इत्यक्रूरकृतं स्तोत्रं यः पठेत्सुसमाहितः ॥ ७१ ॥ अपुत्रो लभते पुत्रमभार्यो
लभते प्रियाम् ॥ अधनो धनमाप्नोति निर्भूमिरुर्वरां महीम् ॥ ७२॥ हतप्रजः प्रजालाभं प्रतिष्ठां चाप्रतिष्ठितः ॥ यशः प्राप्नोति विपु
लमयशस्वी च लीलया ॥ ७३ ॥ अथ सुष्वाप समये परं संहृष्टमानसः ॥ रम्ये चम्पकतल्पे च कृष्णं कृत्वा स्ववक्षसि ॥ ७४ ॥
प्रातरुत्थाय सहसा कृत्वाह्निकमनुत्तमम् ॥ स्वरथे स्थापयामास रामं कृष्णं जगत्पतिम् ॥ ७५ ॥ गव्यं पञ्चप्रकारं च नानाद्रव्यं

सुदुर्लभम् ॥ वृषभानुं च नन्दं च सुनन्दं चन्द्रभानकम् ॥७६॥ नानाप्रकारं वाद्यं च मृदङ्गमुरजादिकम् ॥ पटहं पणवं चैव ढक्कां
दुन्दुभिमानकम् ॥ ७७ ॥ सज्जां संनहनीं कांस्यपट्टमर्दलमण्डवीम् ॥ वादयामास सानन्दं नन्दगोपो व्रजेश्वरः ॥ ७८ ॥ श्रुत्वा
वाद्यं च गोप्यश्च गमनं रामकृष्णयोः ॥ दृष्ट्वा कृष्णं रथस्थं तमाययुः कोपपीडिताः ॥ ७९ ॥ कृष्णेन वारिताः
सर्वाः प्रेरिता राधया द्विज ॥ बभञ्जुरीश्वररथं पादाघातेन लीलया ॥ ८० ॥ तत्र सर्वेषु गोपेषु हाहाकारं कृतेषु च ॥
प्रययुर्बलवत्यश्च कृष्णं कृत्वा स्ववक्षसि ॥ ८१ ॥ काचित्क्रूरं तमक्रूरं भर्त्सयामास कोपतः ॥ काश्चिद्बद्ध्वा च व
स्त्रेण चाक्रूरं प्रययुस्ततः ॥ ८२ ॥ काचित्तं ताडयामास कङ्कणेन करेण च ॥ तद्वस्त्रं हारयामास कृत्वा विवसनं मुने ॥ ८३ ॥ क्षत
विक्षतसर्वाङ्गं दृष्ट्वाक्रूरं च माधवः ॥ जगाम राधानिकटं बोधयामास तां पुनः ॥ ८४ ॥ आध्यात्मिकेन योगेन विनयेन च साद
रम् ॥ अक्रूरं बोधयामास बोधयामास तां विभुः ॥ ८५ ॥ आकाशात्पतितं दिव्यं मन्त्रप्रस्थापितं रथम् ॥ विचित्रवस्त्रसंयुक्तं ददर्श
पुरतो हरिः ॥ ८६ ॥ खचितं मणिराजेन रचितं विश्वकर्मणा ॥ तं दृष्ट्वा मातृभवनमाजगाम जगत्पतिः ॥८७॥ भुक्त्वा पीत्वा
सुखं सुप्त्वा भगवान्सह बान्धवैः ॥ तस्थौ मुनीन्द्रदेवेन्द्रब्रह्मेशशेषवन्दितः ॥ ८८ ॥ सुषुपुर्गोपिकाः सर्वाः परं संहृष्टमानसाः ॥ पुष्प
तल्पे च रम्ये च राधया सह नारद ॥ ८९ ॥ सर्वे चानन्दयुक्ताश्च जना गोकुलवासिनः ॥ केचिद्गोपाश्च ननृतुः केचित्संगीततत्पराः
॥ ९० ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे गोपीविषयो नाम सप्ततितमोऽध्यायः ॥
॥ ७० ॥ श्रीनारायण उवाच ॥ राधिकायां च सुप्तायां सुप्तासु गोपिकासु च ॥ पुष्पचन्दनतल्पे च वायुना सुरभीकृते
॥ १ ॥ तृतीयप्रहरेऽतीते निशायां च शुभेक्षणे ॥ शुभचन्द्रर्क्षयोगे चा मृतयोगसमन्विते ॥ २ ॥ सौम्यस्वामियुते लग्ने सौम्यग्रहवि
लोकिते ॥ पापग्रहसमासक्तदुष्टदोषादिवर्जिते ॥ ३ ॥ यशोदां बोधयामास कारयामास मङ्गलम् ॥ बन्धूनाश्वासयामास समुत्थाय
हरिः स्वयम् ॥ ४ ॥ वाद्यं निषेधयामास राधिकाभयभीतवत् ॥ स्वतन्त्रो विश्वकर्ता च पाता भर्ता स्वतन्त्रवत् ॥५॥ प्रक्षाल्य पादयु

गुलं धृत्वा धौते च वाससी ॥ उवाच संस्कृते स्थाने विलिप्ते चन्दनादिना ॥ ६ ॥ फलपल्लवसंयुक्तं संस्कृतं चन्दनादिभिः ॥ वामे कृत्वा पूर्णकुम्भं वह्निं विप्रं स्वदक्षिणे ॥७॥ पतिपुत्रवतीं दीपं दर्पणं पुरतस्तथा ॥ दूर्वाकाण्डं च सुस्निग्धं पुष्पं धान्यं सितं शुभम् ॥ ॥ ८ ॥ गुरुदत्तं गृहीत्वा च प्रदधौ मस्तकोपरि ॥ धृतं ददर्श माध्वीकं रजतं काञ्चनं दधि ॥ ९ ॥ चन्दनं लेपनं कृत्वा पुष्पमाला गले दधौ ॥ गुरुवर्गं ब्राह्मणं च वन्दयामास भक्तितः ॥१०॥ शङ्खध्वनिं वेदपाठं संगीतं मङ्गलाष्टकम् ॥ विप्राशीर्वचनं रम्यं शुश्राव परमादरम् ॥११॥ ध्यात्वा मङ्गलरूपं च सर्वत्र मङ्गलप्रदम् ॥ चिक्षेप दक्षिणं पादं सुन्दरं स्वात्मविग्रहम् ॥१२॥ विधृत्य नासिकां वामभागं मध्यमया विभुः ॥ विसृज्य वायुसंपूर्णं नासादक्षिणरन्ध्रतः ॥१३॥ ततो ययौ नन्दनन्दो नन्दस्य प्राङ्गणं वरम् ॥ सानन्दः परमानन्दो नित्यानन्दः सनातनः ॥ १४ ॥ नित्योऽनित्यौ नित्यबीजस्वरूपो नित्यविग्रहः ॥ नित्याङ्गभूतो नित्येशो नित्यकृत्यविशारदः ॥ १५ ॥ नित्यनूतनरूपश्च नित्यनूतनयौवनः ॥ नित्यो नूतनवेषश्च वयसा नित्यनूतनः ॥ १६ ॥ नित्यनूतनसंभाषो यत्प्रेम नित्यनूतनम् .॥ नित्यनूतनसंप्राप्तिः सौभाग्यं नित्यनूतनम् ॥ १७ ॥ सुधारसपरं मिष्टं यद्वाक्यं नित्यनूतनम् ॥ नित्यनूतनभक्तं च यत्पदं नित्यनूतनम् ॥ १८ ॥ स्थायंस्थायं प्राङ्गणेऽस्मिन्मायेशो मायया युतः ॥ अतीव रम्ये सुस्निग्धो बभूव गमनोन्मुखः ॥ १९ ॥ रम्भास्तम्भसमूहैश्च रसालपल्लवान्वितैः ॥ पटसूत्रनिबद्धैश्च सुन्दरैश्च सुसंस्कृते ॥ २० ॥ पद्मरागेण खचिते रचिते विश्वकर्मणा ॥ कस्तूरीकुङ्कुमाक्तैश्च चन्दनैश्च सुसंस्कृते ॥२१॥ तत्र तस्थौ स्वयं कृष्णः सहाक्रूरः सबान्धवः ॥ यशोदया समाश्लिष्टो वामपार्श्वेन मायया ॥ २२ ॥ नन्देनानन्दयुक्तेनाश्लिष्टो दक्षिणपार्श्वतः ॥ संभाषितो बान्धवैश्च पित्रा मात्रा च चुम्बितः ॥ २३ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे यात्रामङ्गलं नामैकसप्ततितमोऽध्यायः ॥ ७१ ॥ श्रीनारायण उवाच ॥ अथ कृष्णो गुरुं नत्वा निर्गम्य शिबिरान्मुने ॥ आरुह्य स्वर्गयानं च शुभां मधुपुरीं ययौ ॥ १ ॥ विवेश मथुरां रम्यां सहाक्रूरगणैः समम् ॥ निर्जित्य शक्रनगरीं शोभायुक्तां मनोहराम् ॥ २ ॥ रत्नश्रेष्ठेन खचितां रचितां विश्वकर्मणा ॥ अमूल्य

रत्नकलशै राजितैश्च विराजिताम् ॥ ३ ॥ राजमार्गशतैरिष्टैर्वेष्टितां रुचिरैर्वरैः ॥ चन्द्राकारैश्चन्द्रसारैर्मणिभिः परिसंस्कृतैः ॥ ४ ॥
विचित्रैर्मणिसारैश्च वीथीशतविनिर्मितैः ॥ शोभितैर्वणिजैः श्रेष्ठैः पुण्यवस्तुसमन्वितैः ॥ ५ ॥ सरोवरसहस्रैश्च परितः परिशोभि
ताम् ॥ शुद्धस्फटिकसङ्काशैः पद्मरागविराजितैः ॥ ६ ॥ रत्नालंकारभूषाढ्यैः शोभितां पद्मिनीगणैः ॥ स्थिरयौवनसंयुक्तैर्निमेषर
हितैः परैः ॥ ७ ॥ साक्षतैरूर्ध्ववदनैः कृष्णदर्शनलालसैः ॥ भ्रूभङ्गलीलालोलैश्च शश्वच्चञ्चललोचनैः ॥ ८ ॥ शश्वत्कामसमायुक्तैः
पीनश्रोणिपयोधरैः ॥ कोमलाङ्गैर्मध्यकूपै रतिरासविशारदैः ॥ ९ ॥ रत्ननिर्माणयानानां कोटिभिः परिशोभिताम् ॥ भूषणैर्भूषिता
भिश्च चित्रिताभिश्च चित्रकैः ॥ १० ॥ नानाप्रकारश्रीयुक्तां पुष्पोद्यानत्रिकोटिभिः ॥ नानापुष्पैः पुष्पिताभिर्युक्ताभिर्मधु
सूदनैः ॥ ११ ॥ माधुर्यमधुसंयुक्तैर्मधुलुब्धैर्मुदान्वितैः ॥ माध्वीकमधुमत्तैश्च युक्तैर्मधुकरीचयैः ॥ १२ ॥ नानाप्रकारदुर्गैश्च
दुर्गम्यां वैरिणां गणैः ॥ रक्षितां रक्षकैः शश्वद्रक्षाशास्त्रविशारदैः ॥ १३ ॥ त्रिकोट्याट्टालिकाभिश्च संयुक्तां सुमनोहराम् ॥
रचितां किल सद्रत्नैर्विचित्रैर्विश्वकर्मणा ॥ १४ ॥ एवंभूतां च मथुरां दृष्ट्वा कमललोचनः ॥ ददर्श पथि कुब्जां तां वृद्धाम
तिजरातुराम् ॥१५॥ यान्तीं दण्डसहायेन चातिनम्रां नमद्गलीम् ॥ रुषितां विकृताकारां बिभ्रतीं चन्दनद्रवम् ॥१६॥ कस्तूरीकुंकुमाक्तं
च स्पृष्टमात्रेण नारद ॥ सुगंधिमकरंदेन गंधाढ्यं सुमनोहरम् ॥ १७ ॥ सा दृष्ट्वा सस्मिता वृद्धा श्रीकान्तं शान्तमीश्वरम् ॥ श्रीयुक्तं
श्रीनिवासं तं श्रीबीजं श्रीनिकेतनम् ॥ १८ ॥ प्रणम्य सहसा मूर्ध्ना भक्तिनम्रा पुटाञ्जलिः ॥ प्रददौ चन्दनं तस्य गात्रे श्यामलसुन्दरे
॥ १९ ॥ गात्रेषु तद्गणानां च स्वर्णपात्रकरा वरा ॥ कृत्वा प्रदक्षिणं कृष्णं प्रणनाम पुनः पुनः ॥ २० ॥ श्रीकृष्णदृष्टिमात्रेण श्रीयु
क्ता सा बभूव ह ॥ सहसा श्रीसमा रम्या रूपेण यौवनेन च ॥२१॥ वह्निशुद्धा सुवसना रत्नभूषणभूषिता ॥ यथा द्वादशवर्षीया कन्या
धन्या मनोहरा ॥ २२ ॥ बिंबोष्ठी सस्मिता श्यामा तप्तकाञ्चनसन्निभा ॥ सुश्रोणी सुदती बिल्वफलतुल्यपयोधरा ॥ २३ ॥ अमूल्य
रत्ननिर्माणहारसारविराजिता ॥ गजेंद्रराजगमना रत्नमञ्जीररंजिता ॥ २४ ॥ बिभ्रती कबरीभारं मालतीमाल्यवेष्टितम् ॥ रक्षितं वाम

भागेन रुचिरं वर्तुलाकृतिम् ॥२५॥सिन्दूरबिन्दुं दधती दाडिमीकुसुमाकृतिम्॥कस्तूरीबिन्दुमुपरि सार्द्धं चन्दनबिन्दुभिः ॥२६॥ रत्नदर्पणहस्ता च प्रशस्ता रतिकर्मसु ॥ श्रीकृष्णं वरयामास लोललोचनकोणतः ॥ २७ ॥ श्रीवासस्तां समाश्वास्य ययौ स्थानान्तरं परम्॥कृतार्थरूपा सा प्रीत्या ययौ पद्मा यथाऽऽलयम्॥२८॥सा ददर्श स्वभवनं यथा पद्मालयालयम् ॥ रत्नशय्याविरचितं सद्रत्नसारनिर्मितम् ॥ २९ ॥ रत्नप्रदीपराजीभी राजिताभिश्च राजितम् ॥ रत्नदर्पणराजैश्च राजितं परितस्ततः ॥३०॥ सिन्दूरवस्त्रतांबूलं श्वेतचामरमाल्यकम् ॥ बिभ्रतीभिश्च दासीभिर्वेष्टितं दाससंघकैः ॥ ३१ ॥ तत्र गत्वा च भुक्त्वा च मिष्टान्नं परमं मुदा ॥ सुष्वाप रत्नपर्यंके सा दासीभिश्च सेविता ॥ ३२ ॥ सकर्पूरं च ताम्बूलं कस्तूरीकुंकुमान्वितम् ॥ चन्दनं स्थापयामास स्वतल्पे हरये सती ॥ ३३ ॥ मालतीमाल्ययुगुलं कर्पूरादिसुवासितम् ॥ शीतलं सलिलं स्वादु मिष्टान्नं स्वसमीपतः ॥३४॥ कर्मणा मनसा वाचा चिंतयन्ती हरेः पदम् ॥ हरेरागमनं चापि मुखचन्द्रं मनोहरम् ॥३५॥ जगत्कृष्णमयं शश्वत्पश्यंती कामुकी मुने ॥ कोटिकन्दर्पलीलाभं कामसक्तं च कामुकम् ॥ ३६ ॥ ततो ददर्श श्रीकृष्णो मालाकारं मनोहरम् ॥ मालासमूहं बिभ्रन्तं गच्छन्तं राजमन्दिरम् ॥३७॥ सोपि दृष्ट्वा च श्रीकान्तं प्रणम्य शिरसा भुवि ॥ ददौ माल्यसमूहं च कृष्णाय परमात्मने ॥ ३८ ॥ कृष्णस्तस्मै वरं दत्त्वा स्वदास्यमतिदुर्लभम् ॥ माल्यं गृहीत्वा प्रययौ राजमार्गं वरं वरः ॥ ३९ ॥ ततो ददर्श रजकं बिभ्रन्तं वस्त्रपुञ्जकम् ॥ अहंकृतिबलिष्ठं च सततं यौवनोद्धतम् ॥ ४० ॥ वस्त्रं ययाचे तं कृष्णो विनयेन महामुने ॥ स तस्मै न ददौ वस्त्रं तमुवाच च निष्ठुरम् ॥ ४१ ॥ रजक उवाच ॥ गोरक्षकानां त्वयोग्यं वस्त्रमेतत्सुदुर्लभम् ॥ राजयोग्यं च हे मूढ हे गोपजनवल्लभ ॥४२॥ गृहीत्वा गोपकन्याश्च कन्यालोलुप लम्पट ॥ यद्विहारः कृतस्तत्र वृन्दारण्येऽप्यराजके ॥४३॥ न चात्र तादृशं कर्म राज्ञः कंसस्य वर्त्मनि ॥ विद्यमानोऽत्र राजेन्द्रः शास्ता दुष्टस्य तत्क्षणम् ॥ ४४ ॥ रजकस्य वचः श्रुत्वा जहास मधुसूदनः ॥ जहास बलदेवश्च साक्रूरो गोपवर्गकः ॥ ४५ ॥ तं निहत्य चपेटेन जग्राह वस्त्रपुंजकम् ॥ वस्त्रं संधारयामास श्रीकृष्णः सगणस्तथा ॥ ४६ ॥ रत्नयानेन गोलोकं पार्षदैर्वेष्टितेन च ॥ ययौ रजकराजश्च

धृत्वा दिव्यकलेवरम् ॥ ४७ ॥ शश्वद्यौवनयुक्तं च जरामृत्युहरं वरम् ॥ पीतवस्त्रसमासक्तं सस्मितं श्यामसुन्दरम् ॥ ४८ ॥ बभूव सोपि गोलोके पार्षदेषु च पार्षदः ॥ कृष्णस्यागमनं तत्र सस्मार सततं वशी ॥ ४९ ॥ अस्तं गतो दिनकरोऽप्यक्रूरः स्वगृहं ययौ ॥ कृष्णस्यानुमतिं प्राप्य कृष्णोऽपि कस्यचिद्गृहम् ॥ ५० ॥ वैष्णवस्य कुविन्दस्य तस्मिन्नस्तधनस्य च ॥ सानन्दो नन्दसहितो बलदेवादिभिर्युतः ॥ ५१ ॥ स भक्तः पूजयामास प्रणम्य श्रीनिकेतनम् ॥ तस्मै ददौ स्वदास्यं च वरं ब्रह्मादिदुर्लभम्[1] ॥ ५२ ॥ पर्यङ्के सुषुपुः सर्वे भुक्त्वा मिष्टान्नमुत्तमम् ॥ निद्रां च लेभे सा कुब्जा निद्रेशोऽपि ययौ मुदा ॥ ५३ ॥ गत्वा ददर्श कुब्जां तां रत्नतल्पे च निद्रिताम् ॥ दासीगणैः परिवृतां सुन्दरीं कमलामिव ॥ ५४ ॥ बोधयामास तां कृष्णो न दासीश्चापि निद्रिताः ॥ तामुवाच जगन्नाथो जगन्नाथप्रियां सतीम् ॥ ५५ ॥ श्रीभगवानुवाच ॥ त्यज निद्रां महाभागे शृङ्गारं देहि सुन्दरि ॥ पुरा शूर्पणखा त्वं च भगिनी रावणस्य च ॥ ५६ ॥ रामजन्मनि मद्धेतोस्त्वया कान्ते तपः कृतम् ॥ तपःप्रभावान्मां कान्तं भज श्रीकृष्णजन्मनि ॥ ५७ ॥ अधुना सुखसंभोगं कृत्वा गच्छ ममालयम् ॥ सुदुर्लभं च गोलोकं जरामृत्युहरं परम् ॥ ५८ ॥ इत्युक्त्वा श्रीनिवासश्च कृत्वा तामेव वक्षसि ॥ नग्नां चकार शृङ्गारं चुम्बनं चापि कामुकीम् ॥ ५९ ॥ सा सस्मिता च श्रीकृष्णं नवसङ्गमलज्जिता ॥ चुचुम्बे गण्डे क्रोडे तां चकार कमलां यथा ॥ ६० ॥ सुरतेर्विरतिर्नास्ति दम्पती रतिपण्डितौ ॥ नानाप्रकारसुरतं बभूव तत्र नारद ॥ ६१ ॥ स्तनश्रोणियुगं तस्या वीक्षितं च चकार ह ॥ भगवान्नखरैस्तीक्ष्णैर्दशनैरधरं वरम् ॥ ६२ ॥ निशावसानसमये वीर्याधानं चकार सः ॥ सुखसंभोगभोगेन मूर्च्छामाप च सुन्दरी ॥ ६३ ॥ तत्राजगाम तां तन्द्रा कृष्णवक्षःस्थलस्थिताम् ॥ बुबुधे न दिवारात्रं स्वर्गं मर्त्यं जलं स्थलम् ॥ ६४ ॥ सुप्रभाता च रजनी बभूव रजनीपतिः ॥ पत्युर्व्यतिक्रमेणैव लज्जयेव मलीमसः ॥ ॥ ६५ ॥ अथाजगाम गोलोकाद्रथो रत्नविनिर्मितः ॥ जगाम तेन तं लोकं धृत्वा दिव्यकलेवरम् ॥ ६६ ॥ वह्निशुद्धांशुकाधानं

---

१ ब्रह्मादिदेवदुर्लभम्-इ० पा० ।

रत्नभूषणभूषितम् ॥ प्रतप्तकाञ्चनाभासं नित्यं जन्मादिवर्जितम् ॥ ६७ ॥ सा बभूव च तत्रैव गोपी चन्द्रमुखी मुने ॥ गोप्यः कतिविधास्तस्या बभूवुः परिचारिकाः ॥ ६८ ॥ भगवानपि तत्रैव क्षणं स्थित्वा स्वमन्दिरम् ॥ जगाम यत्र नन्दश्च सानन्दो नन्दनन्दनः ॥ ॥ ६९ ॥ अथ कंसो निशायां च निद्रायां भयविह्वलः ॥ ददर्श दुःखदुःस्वप्नमात्मनो मृत्युसूचकम् ॥ ७० ॥ ददर्श सूर्यं भूमिस्थं चतुःखण्डं नभश्च्युतम् ॥ दशखण्डं चन्द्रबिम्बं भूमिस्थं खाच्युतं मुने ॥ ७१ ॥ पुरुषान्विकृताकारान्रज्जुहस्तान्दिगम्बरान् ॥ विधवां शूद्रपत्नीं च नग्नां च च्छिन्ननासिकाम् ॥ ७२ ॥ हसन्तीं चूर्णतिलकां श्वेतकृष्णोच्चमूर्द्धजाम् ॥ खड्गखर्परहस्तां च लोलजिह्वां च बिभ्रतीम् ॥ ७३ ॥ रुण्डमालासमायुक्तां गर्दभं महिषं वृषम् ॥ सूकरं भल्लुकं काकं गृध्रं कङ्कं च वानरम् ॥७४॥ विरजं कुक्कुरं नक्रं शृगालं भस्मपुञ्जकम् ॥ अस्थिराशिं तालफलं केशं कार्पासमुल्बणम् ॥७५॥ निर्वाणाङ्गारमुल्कां च शवं मर्त्यं चिताश्रितम् ॥ कुलालतैलकाराणां चक्रं वक्रं कपर्दकम् ॥७६॥श्मशानं दग्धकाष्ठं च शुष्ककाष्ठं कुशं तृणम् ॥ गच्छन्तं च कबन्धं च नदन्तं मृतमस्तकम्॥७७॥ दग्धस्थानं भस्मयुतं तडागं जलवर्जितम् ॥ दग्धमत्स्यं च लोहं च निर्वाणदग्धकाननम् ॥ ७८ ॥ गलत्कुष्ठं च वृषलं नग्नं च मुक्तमूर्द्धजम् ॥ अतीव रुष्टं विप्रं च जपन्तं गुरुमीदृशम् ॥ ७९ ॥ अतीव रुष्टं भिक्षुं च योगिनं वैष्णवं नरम् ॥ एवं दृष्ट्वा समुत्थाय कथयामास मातरम् ॥८०॥ पितरं भ्रातरं पत्नीं रुदन्तीं प्रेमविह्वलाम् ॥ मञ्चकान्कारयामास स्थापयामास हस्तिनम् ॥ ८१ ॥ मल्लं सैन्यं च योद्धारं कारयामास मङ्गलम् ॥ सभां च कारयामास पुण्यं स्वस्त्ययनं शिवम् ॥ यत्नेन योजयामास योगे युक्तं पुरोहितम् ॥ ॥ ८२ ॥ उवास मञ्चके रम्ये धृत्वा खड्गं विलक्षणम् ॥ रणे नियोजयामास योद्धारं युद्धकोविदम् ॥ ८३ ॥ वासयामास राजेन्द्रान्ब्राह्मणांश्च मुनीश्वरान् ॥ ब्राह्मणांश्च सुहृद्वर्गान्धर्म्मिष्ठान्रणकोविदान् ॥ ८४ ॥ अथाजगाम गोविन्दो रामेण सह नारद ॥ महेशस्य धनुर्मध्यं बभञ्ज तत्र लीलया ॥८५॥ शब्देन तस्य मथुरा बधिरा च बभूव ह ॥ विषादं प्राप कंसश्च मुदं च देवकीसुतः ॥८६॥ उपस्थितः सभामध्ये गजमल्लं निहत्य च ॥ योगी ददर्श तं देवं परमात्मानमीश्वरम् ॥८७॥ यथाहृत्पद्ममध्यस्थं तादृशं बहिरेव च ॥ राजेन्द्र

रूपं राजानः शास्तारं दण्डधारिणाम् ॥८८॥ पिता माता दुग्धमुखं स्तनान्धं बालकं यथा ॥ कामिन्यः कोटिकन्दर्पलीलालावण्यधारिणम् ॥ ८९ ॥ कंसश्च कालपुरुषं वैरिणं तस्य बान्धवाः ॥ मल्ला मृत्युप्रदं चैव प्राणतुल्यं च यादवाः ॥ ९० ॥ नमस्कृत्य मुनीन्विप्रान्पितरं मातरं गुरुम् ॥ जगाम मञ्चकाभ्याशं हस्ते कृत्वा सुदर्शनम् ॥ ९१ ॥ दृष्ट्वा भक्तं भक्तबन्धुः कृपया च कृपानिधिः ॥ आकृष्य मञ्चकात्कंसं जघान लीलया मुने ॥ ९२ ॥ राजा ददर्श विश्वं च सर्वं कृष्णमयं परम् ॥ पुरतो रत्नयानं च हीरकाहारभूषितम् ॥ ९३ ॥ ययौ विष्णुपदं स्फीतो दिव्यरूपं विधाय च ॥ तेजो विवेश परमं कृष्णपादाम्बुजे मुने ॥ ९४ ॥ निवृत्य तस्य सत्कारं ब्राह्मणेभ्यो धनं ददौ ॥ ददौराज्यं राजछत्रमुग्रसेनाय धीमते ॥९५॥ स बभूव नृपेन्द्रश्च चन्द्रवंशसमुद्भवः ॥विललाप कंसमाता पत्नीवर्गश्च तत्पिता ॥ ९६ ॥ बांधवा मातृवर्गश्च भगिनी भ्रातृकामिनी ॥ दर्शनं देहि राजेन्द्र समुत्तिष्ठ नृपासने ॥९७॥ राज्यं रक्ष धनं रक्ष बान्धवं बलमेव च ॥ क्व यासि बान्धवान्हित्वा त्वमनाथान्महाबल॥९८॥ ब्रह्मादिस्तम्बपर्यन्तमसंख्यं विश्वमेव च ॥सर्वं चराचराधारं यः सृजत्येव लीलया ॥ ९९ ॥ ब्रह्मेशशेषधर्मांश्च दिनेशश्च गणेश्वरः॥मुनीन्द्रवर्गो देवेन्द्रो ध्यायते यमहर्निशम् ॥ १०० ॥ वेदाः स्तुवन्ति यं कृष्णं स्तौति भीता सरस्वती ॥ स्तौति यं प्रकृतिर्हृष्टा प्राकृतं प्रकृतेः परम् ॥ १ ॥ स्वेच्छामयं निरीहं च निर्गुणं च निरञ्जनम् ॥ परात्परतरं ब्रह्म परमात्मानमीश्वरम् ॥ २ ॥ नित्यं ज्योतिःस्वरूपं च भक्तानुग्रहविग्रहम् ॥ नित्यानन्दं च नित्यं च नित्यमक्षरविग्रहम् ॥ ३ ॥ सोऽवतीर्णो हि भगवान्भारावतरणाय च ॥ गोपालबालवेषश्च मायेशो मायया प्रभुः ॥ ४ ॥ स यं हन्ति च सर्वेशो रक्षिता तस्य कः पुमान् ॥ स यं रक्षति सर्वात्मा तस्य हंता न कोऽपि च ॥ ५ ॥ इत्येवमुक्त्वा सर्वांश्च विरराम महामुने ॥ ब्राह्मणान्भोजयामास तेभ्यः सर्वं धनं ददौ ॥ ६ ॥ भगवानपि सर्वात्मा जगाम पितुरन्तिकम् ॥ छित्त्वा च लोहनिगडं तयोर्मोक्षं चकार सः ॥ ७ ॥ ननाम दण्डवद्भूमौ मातरं पितरं तथा ॥ तुष्टाव भक्त्या देवेशो भक्तिनम्रात्मकन्धरः ॥ ८ ॥ श्रीभगवानुवाच ॥ पितरं मातरं विद्यामन्त्रदं गुरुमेव च ॥ यो न पुष्णाति पुरुषो यावज्जीवं च सोऽशुचिः ॥९॥ सर्वेषामपि पूज्यानां पिता वन्द्यो महान्

गुरुः ॥ पितुः शतगुणैर्माता गर्भधारणपोषणात् ॥ ११० ॥ माता च पृथिवीरूपा सर्वेभ्यश्च हितैषिणी ॥ नास्ति मातुः परो बन्धुः
सर्वेषां जगतीतले ॥१११॥ विद्यामन्त्रप्रदः सत्यं मातुः परतरो गुरुः॥ न हि तस्मात्परः कोऽपि वन्द्यः पूज्यश्च वेदतः ॥ ११२ ॥ इत्येव
मुक्त्वा श्रीकृष्णो बलभद्रो ननाम च ॥ माता चकार तौ क्रौडे पिता च सादरं मुने ॥११३॥ मिष्टान्नं परमं तौ च भोजयामास सा
दरम् ॥ नन्दं च भोजयामास गोपालान्परमादरम् ॥११४॥ मङ्गलं कारयामास भोजयामास ब्राह्मणान् ॥ वसुर्वसुसमूहं च ब्राह्मणेभ्यो
ददौ मुदा ॥११५॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे उत्तरार्धे नारायणनारदसंवादे कंसवधवसुदेवदेवकीमोक्षणं नाम
द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ श्रीनारायण उवाच ॥ अथ कृष्णश्च सानन्दं नन्दं तं पितरं बलः ॥ बोधयामास शोकार्तं
दिव्यैराध्यात्मिकादिभिः ॥ १ ॥ उच्चै रुदन्तं निश्चेष्टं पुत्रविच्छेदकातरम् ॥ दत्त्वा तस्मै मणिश्रेष्ठमित्युवाच जगत्पतिः ॥ २ ॥
श्रीभगवानुवाच ॥ निबोध नन्द सानन्दं त्यज शोकं मुदं लभ ॥ ज्ञानं गृहाण मद्दत्तं यद्दत्तं ब्रह्मणे पुरा ॥ ३ ॥ यद्दत्तं च शेषाय
गणेशायेश्वराय च ॥ दिनेशाय मुनीशाय योगीशाय च पुष्करे ॥ ४ ॥ कः कस्य पुत्रः कस्तातः का माता कस्यचि
त्कुतः॥ आयान्ति यान्ति संसारं परं स्वकृतकर्मणा ॥५॥ कर्मानुसाराज्जन्तुश्च जायते स्थानभेदतः ॥ कर्मणा कोऽपि जन्तुश्च योगी
न्द्राणां नृपस्त्रियाम् ॥६॥ द्विजपत्न्यां क्षत्रियाणां वैश्यायां शूद्रयोनिषु ॥ तिर्यग्योनिषु कश्चिच्च कश्चित्पश्वादियोनिषु ॥ ७ ॥ ममै
व मायया सर्वे सानन्दा विषयेषु च॥ देहत्यागे विषण्णाश्च विच्छेदे बान्धवस्य च ॥ ८ ॥ प्रजाभूमिधनादीनां विच्छेदो मरणाधिकः ॥
नित्यं भवति मूढश्च न च विद्वाञ्छुचा युतः ॥ ९ ॥ मद्भक्तो भक्तियुक्तश्च मद्याजी विजितेन्द्रियः ॥ मन्मन्त्रोपासकश्चैव मत्सेवानिरतः
शुचिः॥१०॥ मद्भयाद्वाति वातोऽयं रविर्भाति च नित्यशः॥ भाति चन्द्रो महेन्द्रश्च कालभेदे च वर्षति ॥११॥ वन्हिर्दहति नृत्यश्च चर
त्येव हि जन्तुषु ॥ बिभर्ति वृक्षः कालेन पुष्पाणि च फलानि च ॥१२॥ निराधारश्च वायुश्च वाय्वाधारश्च कच्छपः ॥ शेषश्च कच्छपा
धारः शेषाधाराश्च पर्वताः ॥१३॥ तदाधाराश्च पातालाः सप्त एव हि पङ्क्तितः ॥ निश्चलं च जलं तस्माज्जलस्था च वसुन्धरा ॥१४॥

सप्तस्वर्गं धराधारं ज्योतिश्चक्रं ग्रहाश्रयम् ॥ निराधारश्च वैकुण्ठो ब्रह्माण्डेभ्यः परो वरः ॥ १५ ॥ तत्परश्चापि गोलोकः पञ्चाशत्कोटियोजनात् ॥ ऊर्ध्वं निराश्रयश्चापि रत्नसारविनिर्मितः ॥ १६ ॥ सप्तद्वारः सप्तसारः परिखासप्तसंयुतः ॥ लक्षप्राकारयुक्तश्च नद्या विरजया युतः ॥ १७ ॥ वेष्टितो रत्नशैलेन शतशृङ्गेण चारुणा ॥ योजनायुतमानं च यस्यैकं शृङ्गमुज्ज्वलम् ॥ १८ ॥ शतकोटियोजनश्च शैल उच्छ्रित एव च ॥ दैर्घ्यं तस्य शतगुणं प्रस्थं च लक्षयोजनम् ॥१९॥ योजनायुतविस्तीर्णस्तत्रैव रासमण्डलः ॥ अमूल्यरत्ननिर्माणो वर्तुलश्चन्द्रबिम्बवत् ॥२०॥ पारिजातवनेनैव पुष्पितेन च वेष्टितः ॥ कल्पवृक्षसहस्रेण पुष्पोद्यानशतेन च॥२१॥ नानाविधैः पुष्पवृक्षैः पुष्पितेन च चारुणा ॥ त्रिकोटिरत्नभवनो गोपीलक्षैश्च रक्षितः ॥२२॥ रत्नप्रदीपयुक्तश्च रत्नतल्पसमन्वितः॥ नानाभोगसमायुक्तो मधुवापीशतैर्वृतः ॥२३॥ पीयूषवापीयुक्तश्च कामभोगसमन्वितः ॥ गोलोकगृहसंख्यानवर्णने वा विशारदः ॥२४॥ न कोऽपि वेद विद्वान्वा वेद विद्वान्व्रजेश्वरः ॥ अमूल्यरत्ननिर्माणभवनानां त्रिकोटिभिः ॥२५॥ शोभितं सुन्दरं रम्यं राधाशिबिरमुत्तमम् ॥ अमूल्यरत्नकलशैरुज्ज्वलं रत्नदर्पणैः ॥ २६ ॥ अमूल्यरत्नस्तम्भानां राजिभिश्च विराजितम् ॥ नानाचित्रविचित्रैश्च चित्रितं श्वेतचामरैः ॥ २७ ॥ मणिक्यमुक्तासंसक्तं हरिवारसमन्वितम् ॥ रत्नप्रदीपसंसक्तं रत्नसोपानसुन्दरम् ॥ २८ ॥ अमूल्यरत्नपात्रैश्च तल्पराजिविराजितम् ॥ अमूल्यरत्नचित्रैश्च त्रिभिश्चित्रविचित्रतैः ॥ २९ ॥ तिसृभिः परिखाभिश्च त्रिभिर्द्वारैश्च दुर्गमैः ॥ युक्तं षोडश कक्षाभिः प्रतिद्वारेषु वान्तरम् ॥३०॥ गोपीषोडशलक्षैश्च सन्नियुक्तैरितस्ततः ॥ वह्निशुद्धांशुकाधानै रत्नभूषणभूषितैः ॥ ३१ ॥ तप्तकांचनवर्णाभैः शतचन्द्रसमन्वितैः ॥ राधिकाकिंकरीवर्गैर्युक्तमभ्यन्तरं वरम् ॥३२॥ अमूल्यरत्ननिर्माणप्राङ्गणं सुमनोहरम् ॥ अमूल्यरत्नस्तम्भानां समूहैश्च सुशोभितम् ॥३३॥ रत्नमङ्गलकुम्भैश्च फलपल्लवसंयुतैः ॥ संयुतं रत्नवेदीभिर्युक्तायुक्ताभिरीप्सितम् ॥ ३४ ॥ अमूल्यरत्नमुकुरैः शोभितं सुन्दरैरहो ॥ अमूल्यरत्ननिर्माणं भवनानां वरं गृहम् ॥ ३५ ॥ रत्नसिंहासनस्था च गोपीलक्षैश्च सेविता ॥ कोटिपूर्णं सुशोभाढ्या श्वेतचम्पकसन्निभा ॥ ३६ ॥ अमूल्यरत्ननिर्माणभूषणैश्च विभूषिता ॥ अमूल्यरत्नवसना बिभ्रती रत्नदर्प

णम् ॥३७॥ रत्नपद्मं च रुचिरं सव्यदक्षिणहस्ततः ॥ दाडिम्बकुसुमाकारं सिन्दूरं सुमनोहरम् ॥ ३८ ॥ सुशोभितं मृगमदैरिष्टैश्चंदनबिन्दुभिः ॥ दधती कबरीभारं मालतीमाल्यमण्डितम् ॥ ३९ ॥ रचितं वामभागेन मुनीन्द्राणां मनोहरम् ॥ एवंभूतं तत्र राधा गोपीभिः परिसेविता ॥ ४० ॥ श्वेतचामरहस्ताभिस्तत्तुल्याभिश्च सर्वतः ॥ अमूल्यरत्ननिर्माणैर्भूषिताभिश्च भूषणैः ॥ ४१ ॥ मत्प्राणाधिष्ठातृदेवी देवीनां प्रवरा वरा ॥ सुदाम्नः सा च शापेन वृषभानसुताऽधुना ॥ ४२ ॥ शताब्दिको हि विच्छेदो भविष्यति मया सह ॥ तेन भारावतरणं करिष्यामि भुवः पितः ॥ ४३ ॥ तदा यास्यामि गोलोकं तया सार्द्धं सुनिश्चितम् ॥ त्वया यशोदया चापि गोपैर्गोपीभिरेव च ॥ ४४ ॥ वृषभानेन तत्पन्त्या कलावत्या च बान्धवैः ॥ एवं च नन्दं सानन्दं यशोदां कथयिष्यसि ॥ ४५ ॥ त्यज शोकं महाभाग व्रजैः सार्द्धं व्रजं व्रज ॥ अहमात्मा च साक्षी च निर्लिप्तः सर्वजीविषु ॥ ४६ ॥ जीवो मत्प्रतिबिम्बश्च इत्येवं सर्वसंमतम् ॥ प्रकृतिर्मद्विकारा च साऽप्यहं प्रकृतिः स्वयम् ॥४७॥ यथा दुग्धे च धावल्यं न तयोर्भेद एव च ॥ यथा जले तथा शैत्यं यथा वह्नौ च दाहिका ॥४८॥ यथाकाशे तथाशब्दो भूमौ गन्धो यथा नृप ॥ यथा शोभा च चन्द्रे च यथा दिनकरे प्रभा ॥४९॥ यथा जीवस्तथाऽऽत्मानं तथैव राधया सह ॥ त्यज त्वं गोपिकाबुद्धिं राधायां मयि पुत्रताम् ॥५०॥ अहं सर्वस्य प्रभवः सा च प्रकृतिरीश्वरी ॥ श्रूयतां नन्द सानन्दं मद्विभूतिं सुखावहम् ॥ ५१ ॥ पुरा या कथिता तात ब्रह्मणे व्यक्तजन्मने ॥ कृष्णोऽहं देवतानां च गोलोके द्विभुजः स्वयम् ॥५२॥ चतुर्भुजोऽहं वैकुण्ठे शिवलोके शिवः स्वयम् ॥ ब्रह्मलोके च ब्रह्माऽहं सूर्यस्तेजस्विनामहम् ॥ ५३ ॥ पवित्राणामहं वह्निर्जलमेव द्रवेषु च ॥ इन्द्रियणां मनश्चास्मि समीरः शीघ्रगामिनाम् ॥ ५४ ॥ यमोऽहं दण्डकर्तॄणां कालः कलयतामहम् ॥ अक्षराणामकारोऽस्मि साम्नां च साम एव च ॥५५॥ इन्द्रश्चतुर्दशेन्द्रेषु कुबेरो धनिनामहम् ॥ ईशानोऽहं दिगीशानां व्यापकानां नभस्तथा ॥५६॥ सर्वान्तरात्मा जीवेषु ब्राह्मणश्चाश्रमेषु च ॥ धनानां च रत्नमहममूल्यं सर्वदुर्लभम् ॥५७॥ तैजसानां सुवर्णोऽहं मणीनां कौस्तुभः स्वयम् ॥ शालग्रामस्तथार्च्यानां पत्राणां तुलसीति च ॥ ५८ ॥ पुष्पा

णां पारिजातोऽहं तीर्थानां पुष्करः स्वयम्॥वैष्णवानां कुमारोऽहं योगीन्द्राणां गणेश्वरः॥५९॥सेनापतीनां स्कन्दोऽहं लक्ष्मणोऽहं धनु
ष्मताम् ॥ राजेन्द्राणां च रामोहं नक्षत्राणामहं शशी॥६०॥मासानां मार्गशीर्षोहमृतूनामस्मि माधवः॥वारेष्वादित्यवारोऽहं तिथिष्वे
कादशीति च ॥ ६१ ॥ सहिष्णूनां च पृथिवी माताऽहं बान्धवेषु च ॥ अमृतं भक्ष्यवस्तूनां गव्येष्वाज्यमहं तथा॥६२॥कल्पवृक्षश्च
वृक्षाणां सुरभिः कामधेनुषु ॥ गङ्गाऽहं सरितां मध्ये कृतपाःपविनाशिनी॥६३॥वाणीति पण्डितानां च मन्त्राणां प्रणवस्तथा॥विद्यासु
बीजरूपोऽहं सस्यानां धान्यमेव च ॥६४॥अश्वत्थः फलिनामेव गुरूणां मन्त्रदः स्वयम् ॥ कश्यपश्च प्रजेशानां गरुडः पक्षिणां तथा
॥६५॥ अनंतोऽहं च नागानां नराणां च नराधिपः ॥ ब्रह्मर्षीणां भृगुरहं देवर्षीणां च नारदः॥६६॥राजर्षीणां च जनको महर्षीणां शुक
स्तथा ॥ गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥६७॥ बृहस्पतिर्बुद्धिमतां कवीनां शुक्र एव च ॥ ग्रहाणां च शनिरहं विश्व
कर्मा च शिल्पिनाम् ॥ ६८ ॥ मृगाणां च मृगेन्द्रोहं वृषाणां शिववाहनन् ॥ ऐरावतो गजेन्द्राणां गायत्री छन्दसामहम्॥६९॥ वेदाश्च
सर्वशास्त्राणां वरुणो यादसामहम् ॥ उर्वश्यप्सरसामेव समुद्राणां जलार्णवः ॥ ७० ॥ सुमेरुः पर्वतानां च रत्नवत्सु हिमालयः ॥
दुर्गा च प्रकृतीनां च देवीनां कमलालया ॥ ७१ ॥ शतरूपा च नारीणां मत्प्रियाणां च राधिका ॥ साध्वीनामपि सावित्री वेद
माता च निश्चितम् ॥ ७२ ॥ प्रह्लादश्चापि दैत्यानां बलिष्ठानां बलिः स्वयम् ॥ नारायणर्षिर्भगवाञ्ज्ञानिनां मध्य एव च ॥ ७३ ॥
हनूमान्वानराणां च पाण्डवानां धनंजयः॥मनसा नागकन्यानां वसूनां द्रोण एव च॥७४॥द्रोणो जलधराणां च वर्षाणां भारतं तथा॥
कामिनां कामदेवोऽहं रम्भा च कामुकीषु च॥७५॥ गोलोकश्चास्मि लोकानामुत्तमः सर्वतः परः ॥ मातृकासु शान्तिरहं रतिश्च सुंद
रीषु च ॥७६॥ धर्मोऽहं साक्षिणां मध्ये संध्या च वासरेषु च ॥ देवेष्वहं च माहेन्द्रो राक्षसेषु विभीषणः ॥७७॥ कालाग्निरुद्रो रुद्राणां
संहारो भैरवेषु च ॥ शंखेषु पाञ्चजन्योऽहमंगेष्वपि च मस्तकः ॥ ७८ ॥ परं पुराणसूत्रेषु चाहं भागवतं वरम् ॥ भारतं चेतिहासेषु
पञ्चरात्रेषु कापिलम् ॥७९॥ स्वायंभुवो मनूनां च मुनीनां व्यासदेवकः ॥ स्वधाहं पितृपत्नीषु स्वाहा वह्निप्रियासु च ॥ ८० ॥

यज्ञानां राजसूयोऽहं यज्ञपत्नीषु दक्षिणा ॥ शस्त्रास्त्रज्ञेषु रामोऽहं जमदग्निसुतो महान् ८१ ॥ पौराणिकेषु सूतोऽहं नीतिवत्स्वङ्गिरा
मुनिः ॥ विष्णुव्रतं व्रतानां च बलानां दैवमेव च ॥८२॥ ओषधीनामहं दूर्वा तृणानां कुशमेव च ॥ धर्मकर्मसु सत्यं च स्नेहपत्रिषु
पुत्रकः ॥८३॥ अहं व्याधिश्च शत्रूणां ज्वरो व्याधिष्वहं तथा ॥ मद्भक्तिष्वपि मद्दास्यं वरेषु च वरः स्मृतः ॥८४॥ आश्रमाणां गृह
स्थोऽहं संन्यासी च विवेकिनाम्॥सुदर्शनं च शस्त्राणां कुशलं च शुभाशिषाम्॥८५॥ऐश्वर्याणां महाज्ञानं वैराग्यं च सुखेष्वहम्॥मिष्ट
वाक्यं प्रीतिदेषु दानेषु चात्मदानकम्॥८६॥संचयेषु धर्मकर्म कर्मणां च मदर्चनम् ॥ कठोरेषु तपश्चाहं फलेषु मोक्ष एव च ॥ ८७ ॥
अष्टसिद्धिषु प्राकाम्यमहं काशी पुरीषु च॥नगरेषु तथा काञ्ची स देशो यत्र वैष्णवः॥८८॥ सर्वाधारेषु स्थूलेषु अहमेव महान्विराट्॥
परमाणुरहं विश्वे महासूक्ष्मेषु नित्यशः ॥८९॥ वैद्यानामश्विनीपुत्रौ चौषधीषु रसायनम् ॥ धन्वन्तरिर्मन्त्रविदां विषादः क्षयकारि
णाम् ॥ ९०॥ रागाणां मेघमल्लारः कामोदस्तत्प्रियासु च॥मत्पार्षदेषु श्रीदामा मद्बन्धुष्वहमुद्धवः॥९१॥पशुजन्तुषु गौश्चाहं चन्दनं
काननेषु च ॥ तीर्थपूतश्च पूतेषु निःशंकेषु च वैष्णवः॥९२॥न वैष्णवात्परः प्राणी मन्मन्त्रोपासकश्च यः ॥ वृक्षेष्वंकुररूपोऽहमाकारः
सर्ववस्तुषु ॥ ९३ ॥ अहं च सर्वभूतेषु मयि सर्वं च संततम् ॥ यथा वृक्षे फलान्येव फलेषु चाङ्कुरस्तरोः॥९४॥सर्वकारणरूपोऽहं न
च मत्कारणं परम् ॥ सर्वेशोऽहं न मेऽधीशो ह्यहं कारणकारणम्॥९५॥सर्वेषां सर्वबीजानां प्रवदन्ति मनीषिणः ॥ मन्मायामोहितजना
मां न जानन्ति पापिनः ॥ ९६॥ पापग्रस्तेन दुर्बुद्ध्या विधिना वञ्चितेन च ॥ स्वात्माऽहं सर्वजन्तूनां स्वाम्यहं नाहृतः स्वयम् ॥९७॥
यत्राहं शक्तयस्तत्र क्षुत्पिपासादयस्तथा ॥ गते मयि तथा यान्ति नरदेहे यथाऽनुगाः ॥९८॥ हे व्रजेश नन्द तात ज्ञानं ज्ञात्वा व्रजं
व्रज ॥ कथयस्व च तां राधां यशोदां ज्ञानमेव च ॥९९॥ ज्ञात्वा ज्ञानं व्रजेशश्च जगाम स्वानुगैः सह ॥ गत्वा च कथयामास ते द्वे च
योषितां वरे ॥१००॥ ते च सर्वे जहुः शोकं महाज्ञानेन नारद ॥ कृष्णो यद्यपि निर्लिप्तो मायेशो मायया रतः ॥ १०१ ॥ यशोदया
प्रेरितश्च पुनरागत्य माधवम्॥तुष्टाव परमानन्दं नन्दश्च नन्दनन्दनम् ॥ १०२॥ सामवेदोक्तस्तोत्रेण कृतेन ब्रह्मणा पुरा॥ पुत्रस्य पुरतः

स्थित्वा रुरोद च पुनःपुनः ॥ १०३ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे नन्दादिशोकप्र
मोचनं नाम त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ श्रीनारायण उवाच ॥ श्रीकृष्णः परमानन्दः परिपूर्णतमः प्रभुः ॥ परमात्मा
च परमो भक्तानुग्रहकारकः ॥ १ ॥ भुवो भारावतरणे निर्गुणः प्रकृतेः परः ॥ परात्परस्तु भगवान्ब्रह्मेशशेषवन्दितः ॥ २ ॥ तुष्टो
नन्दस्तवं श्रुत्वा तमुवाच जगत्पतिः ॥ आगच्छन्तं गोकुलाच्च विरहज्वरकातरम् ॥ ३ ॥ श्रीभगवानुवाच ॥ गच्छ नन्द
व्रजं नन्द त्यज शोकं भ्रमं भुवि ॥ शृणु सत्यं परं ज्ञानं शोकग्रन्थिनिकृन्तनम् ॥४॥ वायुश्च भूमिराकाशो जलं तेजश्च पङ्कजम् ॥ उक्तः
श्रुतिगणैरेतैः पञ्चभूतैश्च नित्यशः ॥५॥ सर्वेषां देहिनां तात देहश्च पाञ्चभौतिकः ॥ मिथ्याभ्रमः कृत्रिमश्च स्वप्नवन्माययाऽन्वितः ॥
॥ ६ ॥ देहं गृह्णन्ति सर्वेषां पञ्चभूतानि नित्यशः ॥ मायासंकेतरूपं तदभिज्ञानं भ्रमात्मकम् ॥ ७ ॥को वा कस्य सुतस्तात का स्त्री
कस्य पतिस्तु वा ॥ कर्मणा भ्रमणं शश्वत्सर्वेषां भूरि जन्मनि ॥८॥ कर्मणा जायते जन्तुः कर्मणैव प्रलीयते ॥ सुखं दुःखं भयं शोकं
कर्मणा च प्रपद्यते ॥ ९ ॥ केषां वा जन्मसर्गेषु केषां वा ब्रह्मणो गृहे ॥ केषां विप्रेषु क्षत्रेषु केषां वा वैश्यशूद्रयोः ॥१०॥ अतिनीचेषु
केषां वा केषां कृमिषु विट्सु च ॥ पशुपक्षिषु केषां वा केषां वा क्षुद्रजन्तुषु॥११॥ पुनःपुनर्भ्रमन्त्येव सर्वे तात स्वकर्मणा॥ करोति
कर्म निर्मूलं मद्भक्तो मत्प्रियः सदा ॥१२॥ सत्यं त्रेता द्वापरश्च कलिश्चेति चतुर्युगम् ॥ पञ्चविंशत्सहस्राणां युगान्ते निधनं मनोः॥
॥ १३ ॥ मनोः समं महेन्द्रस्य परमायुर्विनिर्मितम् ॥ चतुर्दशेन्द्रविच्छित्तौ ब्रह्मणो दिनमुच्यते ॥१४॥ एवं परिमिता रात्रिः कालवि
द्भिर्विनिर्मिता ॥ एवं परिमिता मासा वर्षं च परिनिश्चितम् ॥ १५ ॥ ब्रह्मणश्च वर्षशतं परमायुर्विनिर्मितम् ॥ निमेषमात्रं कालोऽयं
ब्रह्मणो निधने मम ॥ १६ ॥ ब्रह्मादितृणपर्यन्तं सर्वं विश्वं विनिश्चितम् ॥ सत्योऽहं परमात्मा च भक्तानुग्रहविग्रहः ॥१७॥ मन्मन्त्रो
पासकः सत्यो देहं त्यक्त्वा धरासु च ॥ यास्यत्येव हि गोलोकं छित्त्वा कर्म पुरातनम् ॥१८॥ असंख्यब्रह्मणां पाते न भवेत्तस्य पात
नम् ॥ गृह्णाति नित्यं स्वं देहं जन्ममृत्युजरापहम् ॥१९॥ न नन्द मम भक्तानामशुभं विद्यते क्वचित् ॥ नित्यं सुदर्शनं तं च परिरक्षति

सर्वतः॥२०॥मत्तो हि बलवान्भक्तश्चिन्तितोऽहं न चिंतितः ॥ अहं स्वामी च तस्यैव न मे स्वामी पिता प्रसूः॥२१॥ पुत्रबुद्धिं परित्यज्य भज मां ब्रह्मरूपिणम् ॥ छित्त्वा च ब्रह्मनिगडं गोलोकं तद्व्रज स्वयम् ॥२२॥ कथयस्व यशोदां च गोपीं गोपगणं व्रज ॥ तैश्च सर्वैर्जनैः शोकं त्यजस्व मन्दिरं व्रज ॥ २३ ॥ इत्येवमुक्त्वा भगवान्विरराम च संसदि ॥ पप्रच्छ पुनरेवं तं नन्दश्चानन्दसंप्लुतः ॥२४॥ नन्द उवाच ॥ वद सांसारिकं ज्ञानं येन यास्यामि त्वत्पदम् ॥ मूढोऽहं परमानन्द श्रुतीनां जनको भवान् ॥ २५ ॥ नन्दस्य वचनं श्रुत्वा सर्वज्ञो भगवान्स्वयम् ॥ आह्निकं कथयामास श्रुतिभिर्न श्रुतं हि यत् ॥ २६ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे भगवन्नन्दसंवादे चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ श्रीभगवानुवाच ॥ शृणु नन्द प्रवक्ष्यामि ज्ञानं च परमाद्भुतम् ॥ सुगोपनीयं वेदेषु पुराणेषु च दुर्लभम् ॥ १ ॥ न विश्वासो हि नारीषु संततं कुलटासु च ॥ मोक्षमार्गार्गलास्वेव भ्रममायासु भूमिषु ॥ २ ॥ हरिभक्तेरसाध्वीनां विरुद्धासु युतासु च ॥ बीजरूपासु नाशानां प्रमदासु व्रजेश्वर ॥ ३ ॥ नित्यं च प्रातरुत्थाय रात्रिवासो विहाय च ॥ अभीष्टदेवं हृत्पद्मे ब्रह्मरन्ध्रे गुरुं परम् ॥ ४ ॥ विचिन्त्य मनसा प्रातःकृत्यं कृत्वा सुनिश्चितम् ॥ स्नानं करोति सुप्राज्ञो निर्मलेषु जलेषु च ॥ ५ ॥ न संकल्पं च कुरुते भक्तः कर्मनिकृन्तनः ॥ स्नात्वा हरिं स्मरेत्सन्ध्यां कृत्वा याति गृहं प्रति ॥ ६ ॥ प्रक्षाल्य पादौ प्रविशन्निधाय धौतवाससी ॥ पूजयेत्परमात्मानं मामेव मुक्तिकारणम् ॥ ७ ॥ शालग्रामे मणौ यन्त्रे प्रतिमायां जलेऽपि च ॥ तथा च विप्रे गवि च गुरुष्वेव विशेषतः॥८॥घटेऽष्टदलपद्मे च पात्रे चन्दननिर्मिते ॥ आवाहनं च सर्वत्र शालग्रामे जलेन च ॥ ९ ॥ मन्त्रानुरूपध्यानेन ध्यात्वा मां पूजयेद्व्रती ॥ षोडशोपचारद्रव्याणि दद्यान्मूलेन भक्तितः ॥ ॥ १० ॥ श्रीदामानं सुदामानं वसुदामानमेव च ॥ वीरभानुं शूरभानुं गोपान्पञ्च प्रपूजयेत् ॥ ११ ॥ सुनन्दनन्दकुमुदं पार्षदं मे सुदर्शनम् ॥ लक्ष्मीं सरस्वतीं दुर्गां राधां गङ्गां वसुन्धराम् ॥ १२ ॥ गुरुं च तुलसीं शंभुं कार्त्तिकेयं विनायकम् ॥ नवग्रहांश्च दिक्पालान्परितः पूजयेत्सुधीः ॥ १३ ॥ देवषट्कं च संपूज्य सर्वादौ विघ्नविघ्नतः ॥ गणेशं च दिनेशं च वह्निं विष्णुं शिवं शिवाम् ॥ १४ ॥

श्रुतौ विनिर्मितान्देवान्मोक्षदान्कर्मकृन्तनान् ॥ गणेशं विघ्ननाशाय सूर्यं व्याधिविनाशिने ॥१५॥ वह्निं प्राप्तिनिमित्तेन शान्तौ शुद्धौ भवेद्ध्रुवम् ॥ विष्णुं मोक्षनिमित्तेन ज्ञानदानाय शंकरम् ॥ १६ ॥ बुद्धिमुक्तिनिमित्तेन पार्वतीं पूजयेत्सुधीः ॥ पुष्पाञ्जलित्रयं दत्त्वा स्वस्तोत्रं कवचं पठेत् ॥ १७ ॥ गुरुं प्रणम्य संपूज्य तत्पश्चात्प्रणमेत्सुरम् ॥ कृत्वाऽऽह्निकं च संपूज्य यथासुखमुदीरितम् ॥ १८ ॥ समाचरेत्स्वकर्मैतद्वेदोक्तं स्वात्मशुद्धये ॥ विष्ठां न पश्येत्प्राज्ञश्च व्याधिबीजस्वरूपिणीम् ॥ १९ ॥ मूत्रं च व्याधिबीजं च परं नरककारणम् ॥ लिङ्गयोनिं पापदुःखव्याधिदारिद्र्यदायिनीम् ॥ २० ॥ उरोमुखं स्तनं स्त्रीणां कटाक्षं हास्यमेव च ॥ विनाशबीजं रूपं च विपदां कारणं सदा ॥२१॥ दिवाभोगं च स्वस्त्रीणां स्वलोपं परिवर्जयेत् ॥ रोगाणां कारणं चैव चक्षुषोः कर्णयोस्तथा ॥ २२ ॥ एकतारं च गगनं न पश्येत्तु रुजां भयात् ॥ देवान्दृष्ट्वा हरिं स्मृत्वा सप्तधा नारदं जपेत् ॥ २३ ॥ अस्तकाले रविं चन्द्रं न पश्येद्व्याधिकारणम् ॥ खण्डं समुदितं चन्द्रं न पश्येद्व्याधिकारणम् ॥२४॥ जलस्थं च रविं चन्द्रं दृष्ट्वा शोकं लभेन्नरः ॥ बन्धुविच्छेदहेतुं च न पश्येत्परमैथुनम् ॥ २५ ॥ एकत्र शयनस्थानं भोजनं च गतिं तथा ॥ न कुर्यात्पापिना सार्द्धं सर्वनाशस्य लक्षणम् ॥२६॥ आलापाद्गात्रसंस्पर्शाच्छयनाश्रयभोजनात् ॥ संचरन्ति ध्रुवं पापास्तैलबिन्दुरिवाम्भसा ॥ २७ ॥ हिंस्रजन्तुसमीपं च न गच्छेद्दुःखकारणम् ॥ खलेन सार्द्धं मिलनं न कुर्याच्छोककारणम् ॥२८॥ ब्राह्मणानां गवां चैव वैष्णवानां विशेषतः ॥ न कुर्याद्धिंसनं हानिं सर्वनाशस्य कारणम् ॥२९॥ देवदेवलविप्राणां वैष्णवानां तथैव च ॥ वित्तं धनं च न हरेत्सर्वनाशस्य कारणम् ॥३०॥ स्वदत्तं परदत्तं वा ब्रह्मवित्तं हरेत्तु यः ॥ षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥३१॥ गृध्रः कोटिसहस्राणि शतजन्मानि सूकरः ॥ श्वापदः शतजन्मानि गण्डकः सप्तजन्मनि ॥३२॥ घोटकः सप्तजन्मानि कुम्भीरः पञ्चजन्मसु ॥ पुंश्चलीनां योनिकीटं शतजन्मसु निश्चितम् ॥ ३३ ॥ ब्रह्मकीटं च तेषां च शतजन्मसु नारद ॥ गोपिका सप्तजन्मानि गर्दभः सप्तजन्मसु ॥ ३४ ॥ सप्तजन्मानि मार्जारो नकुलस्त्रिषु जन्मसु ॥ उच्चैःश्रवा जन्मशतं खरश्चापि तथैव च ॥ ३५ ॥ क्रूरसर्पश्च शार्दूलो महिषः सप्तजन्मसु ॥ भेकश्च

शतजन्मानि च्छागलः सप्तजन्मसु ॥३६॥ भल्लूकः शतजन्मानि सृगालो लक्षजन्मसु ॥ ततो जलौका भवति ब्रह्मस्वहरणाद्ध्रुवम्॥
॥ ३७ ॥ कुम्भीपाके च पच्यंते पापिनो ब्रह्मणः शतम् ॥ दक्षिणा विप्रमुद्दिश्य तत्कालं चेन्न दीयते ॥३८ ॥ एकरात्रे व्यतीते तु तद्दानं
द्विगुणं भवेत् ॥ मासे शतगुणं प्रोक्तं द्विमासे तु सहस्रकम् ॥ ३९ ॥ संवत्सरे व्यतीते तु स दाता नरकं व्रजेत् ॥ दात्रा न दीयते
मूर्खो ग्रहीता च न याचते ॥ ४० ॥ उभौ तौ नरकं यातो दाता व्याधियुतो भवेत् ॥ विप्राणां हिंसनं कृत्वा वंशहानिं लभेद्ध्रुवम्
॥ ४१ ॥ धनं लक्ष्मीं परित्यज्य भिक्षुकश्च भवेद्व्रजन् ॥ देवं च ब्राह्मणं दृष्ट्वा न नमेद्यो लभेच्छुचम् ॥ ४२ ॥ न कुर्याद्गुरुभक्तिं यो ल
भते रौरवं शुचम् ॥ या स्त्री मूढा दुराचारा स्वपतिं हरिरूपिणम् ॥ ४३ ॥ न पश्येत्तर्जनं कृत्वा कुम्भीपाके व्रजेद्ध्रुवम् ॥ वाक्त
र्जनाद्भवेत्काको हिंसनात्सूकरो भवेत् ॥ ४४ ॥ सर्पो भवति कोपेन दर्पेण गर्दभो भवेत् ॥ कुक्कुरी च कुवाक्येनाप्यन्धश्च विषदर्श
नात् ॥ ४५ ॥ पतिव्रता च वैकुण्ठं पत्या सह व्रजेद्ध्रुवम् ॥ शिवं दुर्गां गणपतिं सूर्यं विप्रं च वैष्णवम् ॥ ४६॥ विष्णुं निन्दति यो
मूढः स महारौरवं व्रजेत् ॥ पितरं मातरं पुत्रं सतीं भार्यां गुरुं तथा ॥ ४७ ॥ अनाथां भगिनीं कन्यां विनिन्द्य नरकं व्रजेत् ॥ विप्र
भक्तिविहीनाश्च क्षत्रविट्शूद्रयोनिजाः ॥ ४८ ॥ हरिभक्तिविहीनाश्च पच्यन्ते नरके ध्रुवम् ॥ पतिभक्तिविहीनाश्च युवत्यश्च नराधमाः
॥४९॥शालग्रामजलं विष्णुप्रसादं ये च भुञ्जते ॥ तीर्थं पुनन्ति ते विप्राः शतं पुंसां वसुन्धराम् ॥ ५० ॥ पितॄन्देवान्समभ्यर्च्य खादन्मां
सं द्विजः शुचिः ॥ यो भक्षति वृथा मांसं स महारौरवं व्रजेत् ॥ ५१ ॥ मत्स्यांश्च कामतो दग्ध्वा चोपवासं वसेद्द्विजः॥प्रायश्चित्तं ततः
कुर्याद्व्रतं चान्द्रायणं चरेत् ॥५२॥ सोऽशुचिः सततं नन्द हन्ति पुण्यं पुराकृतम्॥कामतो ब्राह्मणो मत्स्यं भुङ्क्ते यो ज्ञानदुर्बलः॥५३॥
विष्णोरुच्छिष्टभोजी यो मत्स्यं मांसं न खादति॥पदेपदेऽश्वमेधस्य लभते निश्चितं फलम्॥५४॥ एकादशीं ये कुर्वन्ति कृष्णजन्माष्टमी
व्रतम्॥शतजन्मकृतात्पापान्मुच्यन्ते नात्र संशयः॥५५॥यद्बाल्ये यच्च कौमारे वार्द्धके यच्च यौवने॥भस्मीभूतानि कुर्वन्ति पातकानि कृ
तानि च ॥ ५६ ॥ एकादशीदिने भुङ्क्ते कृष्णजन्माष्टमीव्रते॥त्रैलोक्यजनितं पापं सोऽपि भुङ्क्ते न संशयः॥५७॥आतुरे नियमो न

स्यादपि वृद्धे च बालके ॥ भक्तस्य द्विगुणं दत्त्वा ब्राह्मणाय शुचिर्भवेत् ॥५८॥ यो भुंक्ते शिवरात्रौ च श्रीरामनवमीदिने ॥ उपवासे
समर्थश्च स महारौरवं व्रजेत् ॥५९॥ कुहूपूर्णेन्दुसंक्रान्तिचतुर्दश्यष्टमीषु च ॥ नरश्चाण्डालयोनिः स्यात्स्त्रीतैलमांससेवनात् ॥ ६० ॥
मत्स्यं मांसं मसूरं च कांस्यपात्रे च भोजनम् ॥ आर्द्रकं रक्तशाकं च रवौ च परिवर्जयेत् ॥६१॥ अन्यथा नरकं याति कुम्भीपा
कं न संशयः ॥ रजस्वलान्नं वेश्यान्नं मदिरान्नं व्रजेश्वर ॥ ६२ ॥ यो भुंक्ते ब्राह्मणो दैवाद्विड्भोजी स भवेद्ध्रुवम् ॥ यदह्ना
कुरुते कर्म न तस्य फलभाग्भवेत् ॥ ६३ ॥ स भवेदशुचिर्नित्यं भस्मांतं तस्य सूतकम् ॥ नारी वेश्या प्रतिज्ञेया चतुष्पुरुषगामि
नी ॥ ६४ ॥ पाके च पितृदेवानामधिकारो न तद्भवेत् ॥ यद्ग्रामयाजिनामन्नं शूद्रश्राद्धान्नभोजनम् ॥६५॥ भुक्त्वा च नरकं याति
यावच्चन्द्रदिवाकरौ ॥ शूद्राणां श्राद्धदिवसे तदन्नं भुंजते द्विजाः ॥६६॥ कुम्भीपाके च पच्यन्ते यावद्वै ब्रह्मणः शतम् ॥ यः शूद्रेणा
भ्यनुज्ञातो भुंक्ते श्राद्धदिनेऽन्यतः ॥ ६७ ॥ सुरापीति स विज्ञेयः सर्वधर्मबहिष्कृतः ॥ असिजीवी मषीजीवी देवलो वृषवाहकः ॥
॥ ६८ ॥ शूद्राणां शवदाही च यो हि शूद्रापतिर्द्विजः ॥ स शूद्रवद्बहिष्कार्यस्तदन्नं विट्समं सताम् ॥ ६९ ॥ नोपतिष्ठति यः पूर्वा
न्नोपास्ते यस्तु पश्चिमाम् ॥ स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः ॥ ७० ॥ संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ॥ यदह्ना
कुरुते कर्म न तस्य फलभाग्भवेत् ॥ ७१ ॥ वा[1]ममन्त्रोपासकश्च ब्राह्मणो नरकं व्रजेत् ॥ नदीगर्भे च गर्ते च वृक्षमूले जलान्तिके ॥
॥ ७२ ॥ देवान्तिके सस्यभूमौ पुरीषं नोत्सृजेद् बुधः ॥ वल्मीकमूषकोत्खातां मृदमन्तर्जलां तथा ॥ ७३ ॥ शौचावशिष्टां गेहाच्च
नादद्याल्लेपसंभवाम् ॥ अन्तःप्राणिपिपील्यां च हलोत्खातां व्रजेश्वर ॥ ७४ ॥ आलवालोत्थितां चैव सस्यक्षेत्रोत्थितां तथा ॥
वृक्षमूलोत्थितां नन्द नदीगर्भोत्थितां तथा ॥ ७५ ॥ परित्यजेन्मृदस्त्वेताः सकलाः शौचसाधने ॥ कूष्माण्डघातिका या स्त्री
दीपनिर्वाणकः पुमान् ॥ ७६ ॥ सप्तजन्म भवेद्रोगी दरिद्रो जन्मजन्मनि ॥ प्रदीपं शिवलिङ्गं च शालग्रामं मणिं तथा ॥ ७७ ॥

---

[1] रागमन्त्रविहीनश्च—इ० पा० ।

प्रतिमां यज्ञसूत्रं च सुवर्णं शंखमेव च ॥ हीरकं च तथा मुक्तां गोमूत्रं गोमयं घृतम् ॥ ७८ ॥ शालग्रामशिलातोयं भूमौ त्य
क्त्वा व्रजेदधः ॥ दरिद्रः कृपणः कुष्ठी वंशहीनोऽप्यभार्यकः ॥ ७९ ॥ भूमिहीनः प्रजाहीनो बन्धुहीनश्च कुत्सितः ॥ अन्धः
पंगुर्वा खर्वश्च खंजश्चैवांगहीनकः ॥ ८० ॥ भवेत्क्रमेण पापी स ह्येतान्भूमौ त्यजेत्तु यः ॥ दिवसे सन्ध्ययोर्निद्रां स्त्रीसंभोगं करो
ति यः ॥ ८१ ॥ सप्तजन्म भवेद्रोगी दरिद्रः सप्तजन्मसु ॥ उदिते जगतीनाथे यः कुर्याद्दन्तधावनम् ॥ ८२ ॥ स पापिष्ठः कथं
ब्रूते पूजयामि जनार्दनम् ॥ मृद्भस्मगोशकृत्पिंडैस्तथा वालुकयाऽपि वा ॥ ८३ ॥ कृत्वा लिंगं सकृत्पूज्य वसेत्कल्पशतं दिवि ॥
सहस्रपूजनात्सोऽपि लभते वाञ्छितं फलम् ॥ ८४ ॥ लक्षं च पूजयेद्यस्तु शिवत्वं लभते ध्रुवम् ॥ जीवन्मुक्तो भवेद्विप्रो लिंगम
भ्यर्चयेत्तु यः ॥ ८५ ॥ शिवपूजाविहीनश्च ब्राह्मणो नरकं व्रजेत् ॥ मत्पूजितं प्रियतमं शिवं निन्दन्ति ये नराः ॥ ८६ ॥ पच्यं
ते निरये तावद्यावद्वै ब्रह्मणः शतम् ॥ पूजिते शिवलिङ्गे च यदि स्यात्केशवालुका ॥ ८७ ॥ स महान्धो वालुकया केशेन यवनो
भवेत् ॥ क्षुद्रो दरिद्रः कृपणो व्याधिः स्यात्कुत्सिते यथा ॥ ८८ ॥ सर्वेभ्यो मानहानिः स्याज्जायते नीचयोनिषु ॥ सर्वेषु प्रिय
मात्रेषु ब्राह्मणश्च मम प्रियः ॥ ८९ ॥ ब्राह्मणाच्च प्रिया लक्ष्मीः सततं वक्षसि स्थिता ॥ ततोऽधिका प्रिया राधा प्रिया भक्तास्ततो
ऽधिकाः॥९०॥ततोऽधिकः शंकरो मे नास्ति मे शंकरात्प्रियः॥महादेवमहादेवमहादेवेति वादिनः ॥९१॥पश्चाद्यामि च संतृप्तो नामश्र
वणलोभतः॥ मनो मे भक्तमूले च प्राणा राधात्मिका ध्रुवम् ॥९२॥ आत्मा मे शंकरस्थानं शिवः प्राणाधिकश्च यः ॥आद्या नारा
यणी शक्तिः सृष्टिस्थित्यन्तकारिणी ॥ ९३ ॥ करोमि च यया सृष्टिं यया ब्रह्मादिदेवताः ॥ यया जयति विश्वं च यया सृष्टिः
प्रजायते ॥ ९४॥ यया विना जगन्नास्ति मया दत्ता शिवाय सा ॥ दया निद्रा च क्षुत्तृप्तिस्तृष्णा श्रद्धा क्षमा धृतिः ॥ ९५ ॥ तुष्टिः
पुष्टिस्तथा शान्तिर्लज्जाधिदेवता हि सा॥वैकुण्ठे सा महालक्ष्मीर्गोलोके राधिका सती ॥९६॥मर्त्ये लक्ष्मीश्च क्षीरोदे दक्षकन्या सती
च सा॥सा दुर्गा मेनकाकन्या दैन्यदुर्गतिनाशिनी॥९७॥स्वर्गलक्ष्मीश्च दुर्गा सा शक्रादीनां गृहेगृहे॥सा वाणी सा च सावित्री विद्या

धिष्ठातृदेवता ॥ ९८ ॥ वह्नौ सा दाहिकाशक्तिः प्रभाशक्तिश्च भास्करे ॥ शोभाशक्तिः पूर्णचन्द्रे जले शक्तिश्च शीतता ॥ ९९ ॥ सस्ये प्रसूताशक्तिश्च धारणा च धरासु सा ॥ ब्रह्मण्यशक्तिर्विप्रेषु देवशक्तिः सुरेषु सा ॥१००॥ तपस्विनां तपस्या सा गृहिणां गृहदेवता ॥ मुक्तिशक्तिश्च मुक्तानामाशा सांसारिकस्य सा ॥ १ ॥ मद्भक्तानां भक्तिशक्तिर्मयि भक्तिप्रदा सदा ॥ नृपाणां राज्यलक्ष्मीश्च वणिजां लभ्यरूपिणी ॥ २ ॥ पारे संसारसिन्धूनां त्रयीतत्त्वा तु तारिणी ॥ सत्सु सद्बुद्धिरूपा सा मेधाशक्तिस्वरूपिणी ॥ ३ ॥ व्याख्याशक्तिः श्रुतौ शास्त्रे दातृशक्तिश्च दातृषु ॥ क्षत्रादीनां विप्रभक्तिः पतिभक्तिः सतीषु च ॥ एवंरूपा च या शक्तिर्मया दत्ता शिवाय सा ॥ ४ ॥ एवं ते कथितं सर्वं किं भूयः श्रोतुमिच्छसि ॥ प्रश्नं करोषि यद्यन्मां तत्सर्वं कथयामि ते ॥ १०५ ॥ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे उत्तरार्द्धे नारायणनारदसंवादे भगवन्नन्दसंवादे पंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ श्रीनंद उवाच ॥ येषां च दर्शने पुण्यं पापं यस्य च दर्शने ॥ तत्सर्वं वद सर्वेश श्रोतुं कौतूहलं मम ॥ १ ॥ श्रीभगवानुवाच ॥ सुब्राह्मणानां तीर्थानां वैष्णवानां च दर्शने ॥ देवताप्रतिमादर्शी तीर्थस्नायी भवेन्नरः ॥ २ ॥ सूर्यस्य दर्शने भक्त्या सतीनां दर्शने तथा ॥ संन्यासिनां यतीनां च तथैव ब्रह्मचारिणाम् ॥ ३ ॥ भक्त्या गवां च वह्नीनां गुरूणां च विशेषतः ॥ गजेन्द्राणां च सिंहानां श्वेताश्वानां तथैव च ॥ ४ ॥ शुकानां च पिकानां च खञ्जनानां तथैव च ॥ हंसानां च मयूराणां चाषाणां शङ्खपक्षिणाम् ॥ ५ ॥ वत्सप्रयुक्तधेनूनामश्वत्थानां तथैव च ॥ पतिपुत्रवतीनां च नराणां तीर्थयायिनाम् ॥ ६ ॥ प्रदीपानां सुवर्णानां मणीनां च विशेषतः ॥ मुक्तानां हीरकाणां च माणिक्यानां महाशय ॥ ७ ॥ तुलसीशुक्लपुष्पाणां दर्शनं पापनाशनम् ॥ फलानि शुक्लधान्यानि घृतं दधि मधूनि च ॥८॥ पूर्णकुम्भं च लाजांश्च राजेन्द्र दर्पणं जलम् ॥ मालां च शुक्लपुष्पाणां दृष्ट्वा पुण्यं लभेन्नरः ॥ ॥ ९ ॥ गोरोचनं च कर्पूरं रजतं च सरोवरम् ॥ पुष्पोद्यानं पुष्पितं च दृष्ट्वा पुण्यं लभेन्नरः ॥ १० ॥ शुक्लपक्षस्य चन्द्रं च पीयूषं चन्दनं तथा ॥ कस्तूरीं कुङ्कुमं दृष्ट्वा नन्द पुण्यं लभेन्नरः ॥११॥ पताकामक्षयवटतरुं देवोत्थितं शुभम् ॥ देवालयं देवखातं दृष्ट्वा पुण्यं

लभेन्नरः ॥१२॥ देवाश्रितं देवघटं सुगन्धिपवनं तथा ॥ शंखं च दुन्दुभिं दृष्ट्वा सद्यः पुण्यं लभेन्नरः ॥ १३ ॥ शुक्तिं प्रवालं रजतं
स्फटिकं कुशमूलकम्॥गङ्गामृदं कुशं ताम्रं दृष्ट्वा पुण्यं० ॥ १४ ॥ पुराणपुस्तकं शुद्धं सबीजं विष्णुयन्त्रकम् ॥ स्निग्धदूर्वाक्षतं रत्नं
दृष्ट्वा पु० ॥१५॥ तपस्विनां सिद्धमन्त्रं समुद्रं कृष्णसारकम् ॥ यज्ञं महोत्सवं दृष्ट्वा स पुण्यं लभते नरः॥१६॥ गोमूत्रं गोमयं दुग्धं
गोधूलिं गोष्ठगोष्पदम् ॥ पक्वसस्यान्वितं क्षेत्रं दृष्ट्वा पुण्यं लभेद्ध्रुवम् ॥ १७॥ रुचिरां पद्मिनीं श्यामां न्यग्रोधपरिमण्डलाम् ॥
सुवेषकां सुवसनां दिव्यभूषणभूषिताम् ॥ १८॥ वेश्यां क्षेमकरीं गन्धं सुदूर्वाक्षततण्डुलम् ॥ सिद्धान्नं परमान्नं च दृष्ट्वा पुण्यं लभेन्नरः॥
॥ १९ ॥ कार्त्तिकीपूर्णिमायां च राधिकाप्रतिमां शुभाम् ॥ संपूज्य दृष्ट्वा नत्वा च करोति जन्मखण्डनम् ॥ २० ॥ हिंगुलायां तथा
ऽष्टम्यामिषे मासि सिते शुभे ॥ श्रीदुर्गाप्रतिमां दृष्ट्वा करोति जन्मखण्डनम् ॥ २१ ॥ शिवरात्रौ च काश्यां च विश्वनाथस्य दर्शनम्॥
कृत्वोपवासं पूजां च करोति जन्मखण्डनम् ॥२२॥ जन्माष्टमीदिने भक्तो दृष्ट्वा मां बिन्दुमाधवम् ॥ प्रणम्य पूजां कृत्वा च करोति
जन्मखण्डनम् ॥२३॥ पौषे मासि शुक्लरात्रौ यत्र यत्र स्थले नरः ॥ पद्मायाः प्रतिमां दृष्ट्वा करोति जन्म० ॥ २४॥ सप्तजन्म भवे
त्तस्य पुत्रः पौत्रो धनेश्वरः॥ उपोष्यैकादशीं स्नात्वा प्रभाते द्वादशीदिने ॥ दृष्ट्वा काश्यामन्नपूर्णां करोति ज० ॥ २५ ॥ चैत्रे मासि चतु
र्दश्यां कामरूपेषु पुण्यदे ॥ दृष्ट्वा नत्वा भद्रकालीं करोति ज० ॥२६॥ अयोध्यायां च रामं च श्रीरामनवमीदिने ॥ संपूज्य नत्वा
दृष्ट्वा च करोति० ॥२७॥ उपोष्य पुष्करे स्नात्वा किं वा बदरिकाश्रमे ॥ संपूज्य दृष्ट्वा मामेकं करोति० ॥ २८ ॥ दत्त्वा विष्णुपदे
पिण्डं विष्णुं यश्च प्रपूजयेत् ॥ पितृणां स्वात्मनश्चैव करो० ॥२९॥ प्रयागे मुण्डनं कृत्वा दानं च कुरुते यदि ॥ उपोष्य नैमिषारण्ये
करोति० ॥३०॥ सिद्धिं कृत्वा च बदरीं भुङ्क्ते बदरिकाश्रमे ॥ दृष्ट्वा मत्प्रतिमां नन्द करोति० ॥ ३१ ॥ दोलायमानं गोविन्दं पुण्ये
बृन्दावने च माम् ॥दृष्ट्वा संपूज्य नत्वा च करोति जन्म० ॥३२॥ भद्रे दृष्ट्वा च मञ्चस्थं मामेव मधुसूदनम् ॥ संपूज्य नत्वा भक्तश्च
करोति० ॥३३॥ रथस्थं च जगन्नाथं यो द्रक्ष्यति कलौ नरः ॥ संपूज्य नत्वा भक्त्या च करोति ॥ ३४ ॥ उत्तरायणसंक्रान्त्यां

प्रयागे स्नानमाचरेत् ॥ संपूज्य नत्वा मामेव करोति० ॥ ३५ ॥ कार्त्तिकीपौर्णमास्यां च दृष्ट्वा मत्प्रतिमां शुभाम् ॥ उपोष्य कृत्वा
पूजां च करोति० ॥ ३६ ॥ चन्द्रभागासमीपे च माघ्यां च मां नमेत्सुधीः॥ राधया सह मां दृष्ट्वा करोति०॥३७॥ रामेश्वरं सेतुबन्धे
आषाढीपूर्णिमादिने ॥ उपोष्य दृष्ट्वा संपूज्य करोति० ॥ ३८ ॥ स्वर्गे विद्याधरा रात्रौ नृत्यन्ति च मुहुर्मुहुः ॥ प्रणामं कर्तुमीशं तं
समायाति विभीषणः ॥ ३९ ॥ गायन्ति किन्नरा रात्रौ गन्धर्वाश्च मनोहरम् ॥ प्रणामं कर्तुमीशं तं समायाति च माधवः
॥ ४० ॥ दृष्ट्वा साक्षाद्वसंतं च सर्वेशं चंद्रशेखरम् ॥ जीवन्मुक्तो भवेदंते प्रयाति हरिमंदिरम् ॥ ४१ ॥ दीननाथं दिन
करं कोणार्के चोत्तरायणे ॥ उपोष्य दृष्ट्वा संपूज्य करोति जन्मनः क्षयम् ॥ ४२ ॥ कृषिकोष्ठे सुवसने कलविङ्के वसुन्धरे ॥
विस्पन्दके राजकोष्ठे नन्दके पुष्पभद्रके ॥ ४३ ॥ पार्वतीप्रतिमां दृष्ट्वा कार्त्तिकेयं गणेश्वरम् ॥ नन्दिनं शङ्करं दृष्ट्वा करोति जन्मनः
फलम् ॥ ४४ ॥ उपोष्य प्रतिसंपूज्य दृष्ट्वा स्तुत्वा च तौ नतः ॥ पारणं च दधि प्राश्य करोति जन्मनः फलम् ॥४५॥ त्रिकूटे मणि
भद्रे च पश्चिमोदधिसन्निधौ ॥ समुपोष्य दधि प्राश्य मां दृष्ट्वा मुक्तिमाप्नुयात् ॥४६॥ प्रतिमासु मदीयासु पार्वतीप्रतिमासु च ॥जीवं
संन्यस्य संपूज्य करोति जन्मनः क्षयम् ॥ ४७॥ शिवदुर्गालयं कृत्वा मदीयं च विशेषतः ॥ शिवसंस्थापनं कृत्वा करोति जन्मनः
क्षयम् ॥ ४८ ॥ पुष्पोद्यानं च शंकुं च सेतुं खातं सरोवरम् ॥ विप्रसंस्थापनं कृत्वा करोति जन्मनः फलम् ॥ ४९ ॥ न च वेदाः
पुराणानि ब्रह्मसंस्थापनं फलम् ॥ जानन्ति संतो मुनयः सुरा विप्रादयः पितः ॥ ५० ॥ गण्यंते पांसवो भूमेर्गण्यंते वृष्टिबिन्दवः ॥
न गण्यते विधात्राऽपि विप्रसंस्थापने फलम् ॥ ५१ ॥ कृत्वोपजीव्यं विप्रस्य जीवन्मुक्तो भवेन्नरः ॥ अचलां श्रियमाप्नोति परं मुक्ति
चतुष्टयम् ॥५२॥ मद्दास्यभक्तिं स लभेद्वैकुण्ठे मोदते चिरम् ॥ न हि पातो भवेत्तस्य यथा मे परमात्मनः ॥५३॥ कुमारीमष्टवर्षी
यां सुविप्राय ददाति यः॥संपूज्य सर्वाभरणां दुर्गादानफलं लभेत्॥५४॥सर्वं स्वर्ग्यं समालोक्य ब्रह्मलोकेषु पूजितः ॥ लभते मम दास्यं
च वैकुण्ठे मोदते चिरम् ॥५५॥ विवाहदर्शने कोटिस्वर्णदानफलं लभेत्॥ अन्ते स्वर्गे प्रयात्येवमिहैव निश्चलां श्रियम् ॥५६॥ यः सुविप्र

मनाथं च दरिद्रं च सुपण्डितम् ॥ दृष्ट्वा कुर्यात्तद्विवाहं स मोक्षं लभते ध्रुवम् ॥ ५७ ॥ यच्छत्रपादुकादानं शालग्रामस्य योषितः॥क
रोति भक्त्या पुण्याहे पृथ्वीदानफलं लभेत् ॥५८॥ गजदाने च तल्लोममानवर्षं श्रुतौ श्रुतम् ॥ चतुर्गुणं गजेन्द्रे च मोदते मम मन्दिरे ॥
॥ ५९ ॥ गजार्द्धं श्वेततुरगे तदर्द्धं चेतरे पितः ॥ गजतुल्यं कृष्णगवां दाने च तत्फलं लभेत् ॥ ६० ॥ तत्तुल्यं धेनुदाने च अर्धं
सामान्यगोस्तथा ॥ लभेद्वत्सप्रसूतानां दानेदाने फलं विभो ॥ ६१ ॥ भूमिदाने रेणुमानवर्षस्थानं च मत्पदे ॥ ज्ञानदाने
महत्पुण्यं वैकुण्ठे मोदते चिरम् ॥ ६२ ॥ श्रियं लभेत्स्वर्णदाने राजत्वं रजतेन च ॥ अन्नदाने फलं नाहं कथं जानामि वै
श्रुतम् ॥ ६३ ॥ लभते सर्वदानस्य फलं ब्राह्मणभोजने ॥ अन्नदानात्परं दानं न भूतं न भविष्यति ॥ ६४ ॥ नात्र पात्र
परीक्षा सा न कालनियमः क्वचित् ॥ अन्नदाने शुभं पुण्यं दातुः पात्रं त्वपातकी ॥ ६५ ॥ अन्नदानं च धन्यं स्याद्भूमौ वैकुण्ठ
हेतुकम् ॥ वस्त्रं ददाति विप्राय दरिद्राय कुटुंबिने ॥ ६६ ॥ वस्त्रसूत्रमानवर्षं वैकुण्ठे मोदते चिरम् ॥ सुरम्ये चन्द्रलोके च वारुणे
च तथैव च ॥ ६७ ॥ कृत्वा लोहप्रदीपं च स्वर्णवर्तिसमन्वितम् ॥ दत्त्वा घृतप्रदीपं च हरये परमात्मने ॥ ६८ ॥ अन्धकारं च
न गृहं यमदूतं यमं तथा ॥ न हि पश्यति दाता च प्रयाति मम मन्दिरम् ॥ ६९ ॥ ब्राह्मणाय च दत्त्वैव न याति यमयातनाम् ॥
दिव्यवर्षसहस्रं च मोदते शक्रमन्दिरे ॥ ७० ॥ आसनं लभते स्वर्गं वस्तुमानानुरूपतः ॥ उत्तमं लक्षवर्षं च तदर्धं चेतरे व्रजेत्
॥७१॥ ताम्बूलेन लभेद्भोगं स्वर्गे वर्षशतं व्रजेत् ॥ माल्यदाने प्रियं स्वर्गं वस्तुपात्रानुरूपतः ॥ ७२ ॥ फलदानफलं स्वर्गं लभते नात्र
संशयः ॥ समान्यशय्यादानेन स्वर्गं वर्षशतं व्रजेत् ॥७३॥ चतुर्गुणं प्रकृष्टानां गुणलक्षं विलक्षणे ॥ अनाथाय सुविप्राय यदि गेहं
प्रदीयते ॥ ७४ ॥ अत्रैव मानवर्षं च शक्रलोके महीयते ॥ दृष्ट्वा बुभुक्षितं विप्रमन्नं तस्मै प्रदीयते ॥ अचलां श्रियमाप्नोति पुत्रपौत्र
विवर्द्धिनीम् ॥ ७५ ॥ व्रजनाथ व्रजं गत्वा व्रजभूमौ व्रजाधुना ॥ व्रज भोजय विप्रांश्च व्रज सर्वं व्रजेव्रजे ॥७६॥ गोकुले गोकु
ले वत्स वस वत्स निराकुले ॥ व्याकुलानां गोकुलानां संकुले च व्रजेव्रजे ॥ ७७ ॥ एतत्ते कथितं नन्द सानन्दं पुण्यवर्द्धनम् ॥

सुस्वप्नदर्शनं पुण्यं यदि नीचं न वक्ति च ॥ ७८ ॥ काश्यपं दुर्भगं नीचं शत्रुमज्ञानिनं स्त्रियम् ॥ त्यक्त्वा रात्रिं च दिवसे वक्ति विप्रं सुपण्डितम् ॥७९॥ देवालये च देवं वाऽप्यश्वत्थतुलसीवटम् ॥ उक्त्वा तद्द्विगुणं पुण्यमप्रकाश्यं चतुर्गुणम् ॥ ८० ॥ सुस्वप्नदर्शने प्राज्ञो गङ्गास्नानफलं लभेत् ॥ अर्थं वित्तं च भार्यां च भूमिं पुत्रं लभेच्च सः ॥ ८१ ॥ मोक्षं च परमैश्वर्यं लभते सर्ववाञ्छितम् ॥ इत्येवं कथितं तात किं भूयः श्रोतुमिच्छसि ॥ ८२ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

✻

॥ नन्द उवाच ॥ केन स्वप्नेन किं पुण्यं केन मोक्षो भवेत्सुखम् ॥ कोऽपि कोऽपि च सुस्वप्नस्तत्सर्वं कथय प्रभो ॥ १ ॥ श्रीभगवानुवाच ॥ वेदेषु सामवेदश्च प्रशस्तः सर्वकर्मसु ॥ तथैव कण्वशाखायां पुण्यकाण्डे मनोहरे ॥ २ ॥ स व्यक्तो यश्च दुःस्वप्नः शश्वत्पुण्यफलप्रदः ॥ तत्सर्वं निखिलं तात कथयामि निशामय ॥ ३ ॥ स्वप्नाध्यायं प्रवक्ष्यामि बहुपुण्यफलप्रदम् ॥ स्वप्नाध्यायं नरः श्रुत्वा गङ्गास्नानफलं लभेत् ॥ ४ ॥ स्वप्नस्तु प्रथमे यामे संवत्सरफलप्रदः ॥ द्वितीये चाष्टभिर्मासैस्त्रिभिर्मासैस्तृतीयके ॥५॥ चतुर्थे चार्द्धमासेन स्वप्नः स्वात्मफलप्रदः ॥ दशाहे फलदः स्वप्नोऽप्यरुणोदयदर्शने ॥६॥ प्रातःस्वप्नश्च फलदस्तत्क्षणं यदि बोधितः ॥ दिने मनसि यद्दृष्टं तत्सर्वं च लभेद्ध्रुवम् ॥ ७ ॥ चिन्ताव्याधिसमायुक्तो नरः स्वप्नं च पश्यति ॥ तत्सर्वं निष्फलं तात प्रयात्येव न संशयः ॥ ॥ ८ ॥ जडो मूत्रपुरीषेण पीडितश्च भयाकुलः ॥ दिगम्बरो मुक्तकेशो न लभेत्स्वप्नजं फलम् ॥ ९ ॥ दृष्ट्वा स्वप्नं च निद्रालुर्यदि निद्रां प्रयाति च ॥ विमूढो वक्ति चेद्रात्रौ न लभेत्स्वप्नजं फलम् ॥ १० ॥ उक्त्वा काश्यपगोत्रं च विपत्तिं लभते ध्रुवम् ॥ दुर्गते दुर्गतिं याति नीचे व्याधिं प्रयाति च ॥ ११ ॥ शत्रौ भयं च लभते मूर्खे च कलहं लभेत् ॥ कामिन्यां धनहानिः स्याद्रात्रौ चोरभयं भवेत् ॥ १२ ॥ निद्रायां लभते शोकं पण्डिते वाञ्छितं फलम् ॥ न प्रकाश्यश्च स स्वप्नः पण्डितैः काश्यपे व्रज ॥ १३ ॥ गवां च कुञ्जराणां च हयानां च व्रजेश्वर ॥ प्रासादानां च शैलानां वृक्षाणां च तथैव च ॥ १४ ॥ आरोहणं च धनदं

भोजन रोदनं तथा ॥ प्रतिगृह्य तथा वीणां सस्याढ्यां भूमिमालभेत् ॥ १५ ॥ शस्त्रास्त्रेण यदा विद्धो व्रणेन कृमिणा तथा ॥ विष्ठया रुधिरेणैव स युक्तोऽप्यर्थवान्भवेत् ॥१६॥ स्वप्नेऽप्यगम्यागमनो भार्यालाभं करोति यः ॥ मूत्रसिक्तः पिबेच्छुक्रं नरकं च विशत्यपि ॥ १७ ॥ नगरं प्रविशेद्रक्तं समुद्रं वा सुधां पिबेत् ॥ शुभवार्तामवाप्नोति विपुलं चार्थमालभेत् ॥ १८ ॥ गजं नृपं सुवर्णं च वृषभं धेनुमेव च ॥ दीपमन्नं फलं पुष्पं कन्यां छत्रं रथं ध्वजम् ॥ १९ ॥ कुटुम्बं लभते दृष्ट्वा कीर्तिं च विपुलां श्रियम् ॥ पूर्णकुम्भं द्विजं वह्निं पुष्पताम्बूलमन्दिरम् ॥ २० ॥ शुक्लधान्यं नटं वेश्यां दृष्ट्वा श्रियमवाप्नुयात् ॥ गोक्षीरं च घृतं दृष्ट्वा चार्थं पुण्यधनं लभेत् ॥२१॥ पायसं पद्मपत्रे च दधि दुग्धं घृतं मधु ॥ मिष्टान्नं स्वस्तिकं भुक्त्वा ध्रुवं राजा भविष्यति ॥ २२ ॥ पक्षिणां मानुषाणां च भुङ्क्ते मांसं नरो यदि ॥ बह्वर्थं शुभवार्तां च लभेत वांछितं फलम् ॥ २३ ॥ छत्रं वा पादुकां वापि लब्ध्वा धान्यं च गच्छति ॥ असिं च निर्मलं तीक्ष्णं तत्तथैव भविष्यति ॥ २४ ॥ हेलया संतरेद्यो हि स प्रधानो भविष्यति ॥ दृष्ट्वा च फलितं वृक्षं धनमाप्नोति निश्चितम् ॥ २५ ॥ सर्पेण भक्षितो यो हि अर्थलाभश्च तद्भवेत् ॥ स्वप्ने सूर्यं विधुं दृष्ट्वा मुच्यते व्याधिबन्धनात् ॥ २६ ॥ वडवां कुक्कुटीं दृष्ट्वा क्रौंचीं भार्यां लभेद्ध्रुवम् ॥ स्वप्ने यो निगडैर्बद्धः प्रतिष्ठां पुत्रमालभेत् ॥ २७ ॥ दध्यन्नं पायसं भुंक्ते पद्मपत्रे नदीतटे ॥ विशीर्णपद्मपात्रे च सोऽपि राजा भविष्यति ॥ २८ ॥ जलौकसं वृश्चिकं च सर्पं च यदि पश्यति ॥ धनं पुत्रं च विजयं प्रतिष्ठां वा लभेदिति ॥ २९ ॥ शृंगिभिर्दंष्ट्रिभिः कोलैर्वानरैः पीडितो यदि ॥ निश्चितं च भवेद्राजा धनं च विपुलं लभेत् ॥ ३० ॥ मत्स्यं मांसं मौक्तिकं च शंखं चन्दनहीरकम् ॥ वस्तु पश्यति स्वप्नान्ते विपुलं धनमालभेत् ॥३१॥ सुतं च रुधिरं स्वर्णं भुक्त्वा विष्ठां धनं लभेत् ॥ प्रतिमां शिवलिङ्गं च लभेद् दृष्ट्वा जयं धनम् ॥ ३२ ॥ फलितं पुष्पितं बिल्वमाम्रं दृष्ट्वा लभेद्धनम् ॥ दृष्ट्वा च ज्वलदग्निं च धनं बुद्धिं श्रियं लभेत् ॥ ३३ ॥ धात्रीफलं चामलकमुत्पलं च धनागमम् ॥ देवताश्च द्विजा गावः पितरो लिङ्गिनस्तथा ॥ ३४ ॥ यद्ददाति मिथः स्वप्ने तत्तथैव भविष्यति ॥ शुक्लाम्बरधरा नार्यः शुक्लमाल्यानुलेपनाः ॥ ३५ ॥ समाश्लिष्यन्ति यं स्वप्ने तस्य श्रीः

सर्वतः सुखम् ॥ पीताम्बरधरां नारीं पीतमाल्यानुलेपनाम् ॥ अवगूहति यः स्वप्ने कल्याणं तस्य जायते ॥३६॥ सर्वाणि शुक्लानि
प्रशंसितानि भस्मास्थिकार्पासविवर्जितानि ॥ सर्वाणि कृष्णान्यतिनिन्दितानि गोहस्तिवाजिद्विजदेववर्ज्यम् ॥३७॥ दिव्या स्त्री
सस्मिता विप्रा रत्नभूषणभूषिता ॥ यस्य मन्दिरमायाति स प्रियं लभते ध्रुवम् ॥३८॥ स्वप्ने च ब्राह्मणो देवो ब्राह्मणी देवकन्यका॥
ब्राह्मणो ब्राह्मणी वाऽपि संतुष्टा सस्मिता सती ॥ फलं ददाति यस्मै च तस्य पुत्रो भविष्यति ॥३९ ॥ यं स्वप्ने ब्राह्मणा नन्द कुर्वन्ति
च शुभाशिषम्॥यद्वदन्ति भवेत्तस्य तस्यैश्वर्यं भवेद्ध्रुवम् ॥४०॥ परितुष्टो द्विजश्रेष्ठश्चायाति यस्य मन्दिरम् ॥ नारायणः शिवो ब्रह्मा
प्रविशेत्तु तदाश्रमम् ॥ ४१ ॥ संपत्तिस्तस्य भवति यशश्च विपुलं शुभम् ॥ पदेपदे सुखं तस्य स मानं गौरवं लभेत् ॥ ४२ ॥
अकस्मादपि स्वप्ने तु लभते सुरभिं यदि ॥ भूमिलाभो भवेत्तस्य भार्या चापि पतिव्रता ॥ ४३ ॥ करेण कृत्वा हस्ती यं मस्तके
स्थापयेद्यदि ॥ राज्यलाभो भवेत्तस्य निश्चितं च श्रुतौ मतम् ॥४४॥ स्वप्ने तु ब्राह्मणस्तुष्टः समाश्लिष्यति यं व्रज ॥ तीर्थस्नायी
भवेत्साऽपि निश्चितं च श्रियाऽन्वितः ॥४५॥ स्वप्ने ददाति पुष्पं च यस्मै पुण्यवते द्विजः॥ जययुक्तो भवेत्सोऽपि यशस्वी च धनी
सुखी ॥ ४६ ॥ स्वत्ने दृष्ट्वा च तीर्थानि सौधरत्नगृहाणि च ॥ जययुक्तश्च धनवांस्तीर्थस्नायी भवेन्नरः ॥४७॥ स्वप्ने तु पूर्णकलशं
कश्चित्कस्मै ददाति च ॥ पुत्रलाभो भवेत्तस्य संपत्तिं वा समालभेत् ॥४८॥ हस्ते कृत्वा तु कुडवमाढकं वारसुन्दरी ॥ यस्य मन्दिर
मायाति स लक्ष्मीं लभते ध्रुवम् ॥४९॥ दिव्या स्त्री यद्गृहं गत्वा पुरीषं विसृजेद्द्विज ॥ अर्थलाभो भवेत्तस्य दारिद्र्यं च प्रयाति च
॥ ५० ॥ यस्य गेहं समायाति ब्राह्मणो भार्यया सह ॥ पार्वत्या सह शंभुर्वा लक्ष्म्या नारायणोऽथवा ॥५१॥ ब्राह्मणो ब्राह्मणी वाऽपि स्वप्ने
तस्मै प्रदीयते ॥ धान्यं पुष्पांजलिं वाऽपि तस्य श्रीः सर्वतोमुखी॥५२॥ मुक्ताहारं पुष्पमाल्यं चंदनं च लभेद्व्रज ॥ स्वप्ने ददाति विप्रश्च
तस्य श्रीः सर्वतोमुखी ॥५३॥गोरोचनं पताकां वा हरिद्रामिक्षुदण्डकम् ॥ सिद्धान्नं च लभेत्स्वप्ने तस्य श्रीः सर्वतोमुखी॥५४॥ब्राह्मणो
ब्राह्मणी वाऽपि ददाति यस्य मस्तके॥छत्रं वा शुक्लधान्यं वा स च राजा भविष्यति ॥५५ ॥ स्वप्ने रथस्थः पुरुषः शुक्लमाल्यानुलेपनः ॥

तत्रस्थो दधि भुङ्क्ते च पायसं वा नृपो भवेत् ॥ ५६ ॥ स्वप्ने ददाति विप्रश्च ब्राह्मणी च सुधां दधि ॥ प्रशस्तपात्रं यस्मै वा सोऽपि
राजा भवेद् ध्रुवम् ॥ ५७ ॥ कुमारी चाष्टवर्षीया रत्नभूषणभूषिता ॥ यस्य तुष्टा भवेत्स्वप्ने स भवेत्कविपण्डितः ॥ ५८ ॥ ददाति
पुस्तकं स्वप्ने यस्मै पुण्यवते च सा ॥ स भवेद्विश्वविख्यातः कवीन्द्रः पण्डितेश्वरः ॥ ५९ ॥ यं पाठयति स्वप्ने वा मातेव च सुतं
यथा ॥ सरस्वती सुतः सोऽपि तत्परो नास्ति पण्डितः ॥६०॥ ब्राह्मणः पाठयेद्यं च पितेव यत्नपूर्वकम् ॥ ददाति पुस्तकं प्रीत्या स च
तत्सदृशो भवेत् ॥ ६१ ॥ प्राप्नोति पुस्तकं स्वप्ने पथि वा यत्र तत्र वा ॥ स पण्डितो यशस्वी च विख्यातश्च महीतले ॥ ६२ ॥ स्वप्ने
यतो महामन्त्रं विप्रो विप्रे ददाति चेत् ॥ स भवेत्पुरुषः प्राज्ञो धनवान्गुणवान्सुधीः ॥ ६३ ॥ स्वप्ने ददाति विप्रं वा प्रतिमां वा
शिलामयीम् ॥ यस्मै ददाति विप्रश्च मन्त्रसिद्धिश्च तद्भवेत् ॥ ६४ ॥ विप्रो विप्रसमूहं च दृष्ट्वा नत्वाऽऽशिषं लभेत् ॥ राजेन्द्रः स
भवेद्वाऽपि किं वा च कविपण्डितः ॥६५॥ शुक्लधान्ययुतां भूमिं यस्मै विप्रः समुत्सृजेत् ॥ स्वप्नेऽपि परितुष्टश्च स भवेत्पृथिवीपतिः
॥ ६६ ॥ स्वप्ने विप्रो रथे कृत्वा नानास्वर्गं प्रदर्शयेत् ॥ चिरञ्जीवी भवेदायुर्धनवृद्धिर्भवेद्ध्रुवम् ॥ ६७ ॥ विप्राय विप्रः संतुष्टो
यस्मै कन्यां ददाति च ॥ स्वप्ने च स भवेन्नित्यं धनाढ्यो भूपतिः स्वयम् ॥ ६८ ॥ स्वप्ने सरोवरं दृष्ट्वा समुद्रं वा नदीं नदम् ॥
शुक्लाहिं शुक्लशैलं च दृष्ट्वा श्रियमवाप्नुयात् ॥ ६९ ॥ यं पश्यंति मृतं स्वप्ने स भवेच्चिरजीवनः ॥ अरोगी रोगिणं दुःखी सुखिनं च
ध्रुवं भवेत् ॥ ७० ॥ दिव्या स्त्री यं प्रवदति मम स्वामी भवानिति ॥ स्वप्ने दृष्ट्वा च जागर्ति स च राजा भवेद्दृढम् ॥ ७१ ॥ स्वप्ने वा
कालिकां दृष्ट्वा लब्ध्वा स्फाटिकमालिकाम् ॥ इन्द्रचापं शक्रवज्रं स प्रतिष्ठां लभेद्ध्रुवम् ॥७२॥ स्वप्ने वदति यं विप्रो मम दासो भवेति
च ॥ हरिदास्यं च मद्भक्तिं स लब्ध्वा वैष्णवो भवेत् ॥ ७३ ॥ स्वप्ने विप्रो हरिः शंभुर्ब्रह्माणी कमला शिवा ॥ शुक्ला स्त्री देवमाता वा
जाह्नवी वा सरस्वती ॥७४॥ गोपालिकावेषधरी बालिका राधिका मम ॥ बालश्च बालगोपालः स्वप्नविद्भिः प्रकाशितः ॥७५॥ एष ते
कथितो नन्द सुस्वप्नः पुण्यहेतुकः ॥ श्रोतुमिच्छसि किं वा त्वं किं भूयः कथयामि ते ॥ ७६ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्ण

जन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे सुस्वप्नदर्शनं नाम सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ नन्द उवाच ॥ श्रीकृष्ण जगतां नाथ सुस्वप्नश्च श्रुतो मया ॥ वेदसारो नीतिसारो लौकिको वैदिकस्तथा ॥१॥ अधुना श्रोतुमिच्छामि पापं येषां च दर्शने ॥ यस्मिन्कर्मणि वा वत्स तन्मां कथितुमर्हसि ॥ २ ॥ वचनं वेदशास्त्रोक्तं तथा वेदानुयायिनः ॥ श्रोतुमिच्छन्ति संततं लोकास्त्वन्मुखतस्तथा ॥ ३ ॥ वेदानां जनकस्त्वं च वैदिकानां सतामपि ॥ ब्रह्मादीनां सुराणां च मुनीनां जगतामपि ॥ ४ ॥ श्रुतं यत्त्वन्मुखाम्भोजात्प्रमाणं वचनामृतम् ॥ तेन देहोऽभिषिक्तो मे वत्स विच्छेददाहनः॥५॥स्वप्ने यच्चरणाम्भोजं सर्वकामफलप्रदम् ॥ ब्रह्मादयो न पश्यन्ति तदद्य दृष्टिगोचरम् ॥ ६ ॥ अतः परं त्वत्पदाब्जं क्व पश्यामि च पातकी ॥ विण्मूत्रधारी देहो मे निबद्धश्च स्वकर्मणा ॥७॥ ईदृशं च दिनं वत्स कदा मम भविष्यति ॥ त्वया ब्रह्मादिनाथेन संवादो मम पापिनः ॥ ८ ॥ कृपां कुरु कृपानाथ मम दोषं क्षमस्व च ॥ वत्सबुद्ध्या च दुर्नीतं यत्कृतं च महेश्वर ॥ ९ ॥ ब्रह्मेशशेषमुनयो ध्यायन्ते त्वत्पदाम्बुजम् ॥ सरस्वती श्रुतिर्यस्य स्तवने जडतां व्रजेत् ॥ १० ॥ इत्येवमुक्त्वा नन्दश्च निरानन्दः शुचाऽऽकुलः ॥ मूर्च्छामाप रुदित्वा च पुत्रविच्छेदविह्वलः ॥११॥ संत्रस्तो भगवान्कृष्णो बोधयामास यत्नतः ॥ परमाध्यात्मिकं ज्ञानं ददौ तस्मै जगत्पतिः ॥ १२ ॥ श्रीभगवानुवाच ॥ हे नन्द जनकश्रेष्ठ सर्वश्रेष्ठ व्रजेश्वर ॥ चेतनं कुरु कल्याण ज्ञानं च परमं शृणु ॥ १३ ॥ परमाध्यात्मिकं ज्ञानं ज्ञानिनां च सुदुर्लभम् ॥ वेदशास्त्रे गोपनीयं तुभ्यमेव ददाम्यहम् ॥ १४ ॥ निबोध श्रूयतां नन्द सानन्दः सुसमाहितः ॥ जन्ममृत्युजराव्याधिर्यदभ्यासान्न जायते ॥ १५ ॥ स्थिरो भव महाराज व्रजनाथ व्रजं व्रज॥ज्ञानं लब्ध्वा सदानन्दः शोकमोहविवर्जितः ॥१६॥ जलबुद्बुदवत्सर्वं संसारं सचराचरम्॥ प्रभाते स्वप्नवन्मिथ्या मोहकारणमेव च ॥ १७ ॥ मिथ्याकृत्रिमनिर्माणहेतुश्च पांचभौतिकः॥ मायया सत्यबुद्ध्या च प्रतीतिं जायते नरः ॥ १८ ॥ कामक्रोधलोभमोहैर्वेष्टितः सर्वकर्मसु॥मायया मोहितः शश्वज्ज्ञानहीनश्च दुर्बलः ॥ १९ ॥ निद्रातन्द्राक्षुत्पिपासा क्षमाश्रद्धादयादिभिः ॥ लज्जा शान्तिर्धृतिः पुष्टिस्तुष्टिश्चाभिश्च वेष्टितः ॥२०॥ मनोबुद्धिचेतनाभिः प्राणज्ञानात्मभिः सह ॥ संसक्तः

सर्वदेवैश्च यथा वृक्षश्च वायसैः॥२१॥ अहमात्मा च सर्वेशः सर्वज्ञानात्मकः स्मृतः॥मनो ब्रह्मा च प्रकृतिर्बुद्धिरूपा सनातनी ॥२२॥
प्राणा विष्णुश्चेतना सा पद्मा तु चाधिदेवता॥मयि स्थिते स्थिताः सर्वे गतास्तेऽपि गते मयि ॥२३॥ अस्माभिश्च विना देहः सद्यः
पतति निश्चितम्॥पाञ्चभूतो विलीनश्च पञ्चभूतेषु तत्क्षणम् ॥२४॥नामसंकेतरूपं च निष्फलं मोहकारणम् ॥ शोकश्चाज्ञानिनां तात
ज्ञानिनां नास्ति किंचन ॥ २५ ॥ निद्रादयः शक्तयश्च ताः सर्वाः प्रकृतेः कलाः॥ लोभादयो ह्यधर्मांशास्तथाऽहंकारपञ्चमः ॥२६॥
ते ब्रह्मविष्णुरुद्रांशा गुणाः सत्त्वादयस्त्रयः ॥ ज्ञानात्मकः शिवो ज्योतिरहमात्मा च निर्गुणः ॥ २७ ॥ यदा विशामि प्रकृतौ तदाऽहं
सगुणः स्मृतः॥सगुणा विषया विष्णुब्रह्मरुद्रादयस्तथा॥२८॥धर्मो मदंशो विषयी शेषः सूर्यः कलानिधिः॥ एवं सर्वे मत्कलांशा मुनि
मन्वादयः सुराः ॥ २९ ॥ सर्वदेहे प्रविष्टोऽहं न लिप्तः सर्वकर्मसु ॥ जीवन्मुक्तश्च मद्भक्तो जन्ममृत्युजराहरः ॥३०॥ सर्वसिद्धेश्वरः
श्रीमान्कीर्तिमान्पंडितः कविः ॥ चतुस्त्रिंशद्विधः सिद्धः सर्वकर्मोपहारकः ॥ ३१ ॥ तमुपैमि स्वयं सिद्धं भक्तस्त्वन्यन्न वाञ्छति ॥
द्वाविंशतिविधं सिद्धं सिद्धिसाधनकारणम् ॥ ३२ ॥ मन्मुखाच्छ्रूयतां नन्द सिद्धमन्त्रं गृहाण च ॥ अणिमा लघिमा प्राप्तिः प्राकाश्यं
महिमा तथा ॥ ३३ ॥ ईशित्वं च वशित्वं च तथा कामावसायिता ॥ दूरश्रवणमेवेति परकायप्रवेशनम् ॥ ३४ ॥ मनोयायित्वमेवे
ति सर्वज्ञत्वमभीप्सितम् ॥ वह्निस्तंभं जलस्तम्भं चिरंजीवित्वमेव च ॥ ३५ ॥ कायव्यूहं च वाक्सिद्धिं मृतानयनमीप्सितम्॥सृष्टीनां
करणं चैव प्राणाकर्षणमेव च ॥३६॥ ॐ सर्वेश्वरेश्वराय सर्वविघ्नविनाशिने मधुसूदनाय स्वाहेति ॥ अयं मन्त्रो महागूढः सर्वेषां
कल्पपादपः ॥ सामवेदे च कथितः सिद्धानां सर्वसिद्धिदः ॥ ३७ ॥ अनेन योगिनः सिद्धा मुनींद्राश्च सुरास्तथा ॥ शतलक्षजपेनैव
मन्त्रसिद्धिर्भवेत्सताम् ॥३८॥ यदि नारायणे क्षेत्रे हविष्यान्नरतो जपेत् ॥ गत्वा कुरु जपं तात काशिकां मणिकर्णिकाम् ॥ ३९ ॥
शृणु नारायणक्षेत्रं जलाधस्तच्चतुष्टयम् ॥ अत्र नारायणः स्वामी नान्यः स्वामी कदाचन ॥४०॥ ज्ञानं चात्र मृते लोके मूर्तिर्भवति
तस्य वै ॥ व्रतं विनाऽपि मन्त्रेण जीवन्मुक्तो न संशयः ॥४१॥ व्रजं कुरु पवित्रं च व्रजनाथ व्रजं व्रज ॥ पापं यद्दर्शने तात कथया

मि निशामय ॥४२॥ दुःस्वप्नं पापबीजं च केवलं विघ्नकारणम् ॥ गोघ्नं च ब्राह्मणघ्नं वा कृतघ्नं कुटिलं तथा ॥४३॥ देवघ्नं पितृमातृघ्नं पापं विश्वासघातिनम् ॥ मिथ्यासाक्षिप्रदातारं यं चातिथ्यविवञ्चनम् ॥ ४४ ॥ ग्रामयाजिनमेवेति देवविप्रस्वहारिणम् ॥ अश्वत्थघातिनं दुष्टं शिवविष्णुविनिन्दकम्॥४५॥अदीक्षितमनाचारं सन्ध्याहीनं द्विजं तथा॥ देवलं वृषवाहं च शूद्राणां सूपकारकम् ॥ ॥ ४६ ॥ शवदाहं च शूद्राणां शूद्रश्राद्धान्नभोजिनम् ॥ अवीरां छिन्ननासां च देवब्राह्मणनिन्दकाम् ॥ ४७ ॥ पतिभक्तिविहीनां च विष्णुभक्तिविहीनकाम् ॥ शूद्राणां विधवां चैव चाण्डालीं व्यभिचारिणीम् ॥ ४८ ॥ शश्वत्कोपयुतं दुष्टमृणग्रस्तं च जारजम्॥ चौरं मिथ्यावादिनं च शरणागतयायिनम् ॥ ४९ ॥ मांसापहारिणं चैव ब्राह्मणं वृषलीपतिम्॥ ब्राह्मणीगामिनं शूद्रं द्विजं वार्धुषिकं तथा ॥ ॥ ५० ॥ अगम्यागामिनं दुष्टं चतुर्वर्णं नराधमम् ॥ माता सपत्नीमाता च श्वश्रूश्च भगिनी तथा॥५१॥गुरुपत्नी पुत्रपत्नी सोदरस्य प्रिया सती ॥ मातृष्वसा पितृष्वसा भागिनेयप्रिया तथा ॥ ५२ ॥ मातुलानी नवोढा च पितृव्यस्त्री रजस्वला ॥ पितृमातृप्रसूश्चैव चागम्याष्टादश स्मृताः ॥ ५३ ॥ कीर्तिताः सामवेदे च परिपाल्याः सतां व्रज ॥ एता दृष्ट्वा च स्पृष्ट्वा च ब्रह्महत्यां लभेन्नरः ॥ ५४ ॥ तस्माद्दैवेन ता दृष्ट्वा सूर्यं दृष्ट्वा हरिं स्मरेत् ॥ कामतो यदि पश्यन्ति विनिन्द्यास्ते भवन्ति वै ॥५५॥ तस्मात्सन्तो न पश्यन्ति शापभीता व्रजेश्वर ॥ राहुग्रस्तं रविं सोमं न पश्यन्ति विपश्चितः ॥ ५६ ॥ जन्माष्टसप्तरिःफाङ्कदशमस्थे दिवाकरे ॥ जन्मर्क्षे निधनं चापि चतुर्थेऽपि कलानिधौ॥५७ ॥ नष्टचन्द्रो न दृश्यश्च भाद्रे मासि सितासिते ॥ चतुर्थ्यामुदितश्चन्द्रः परित्यक्तो मनीषिभिः ॥५८॥ चन्द्रस्तारापहरणं कलङ्कमतिदुष्करम् ॥ तस्मै ददाति हे नन्द कामतो यदि पश्यति ॥ ५९ ॥ अकामतो नरो दृष्ट्वा मन्त्रपूतं जलं पिबेत्॥ तदा शुद्धो भवेत्सद्यो निष्कलंकी महीतले ॥६०॥ सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः॥ सुकुमारक मा रोदीस्तव ह्येष स्यमन्तकः ॥ ६१ ॥ इति मंत्रेण पूतं च जलं साधु पिबेद् ध्रुवम् ॥ इति ते कथितं सर्वमपरं कथयामि ते ॥ ६२ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे भगवन्नन्दसंवादेऽष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ छ ॥ छ ॥

॥श्रीनंद उवाच ॥ राहुग्रस्तः कथं सूर्यश्चन्द्रो वाऽपि जगत्प्रभो ॥ नष्टश्चन्द्रः कथं भाद्रे चतुर्थ्यां चासिते सिते॥१॥वेदानां जनकस्त्वं च कं पृच्छामि त्वया विना ॥ वेदे पुराणे गोप्यं यन्न जानन्ति विपश्चितः ॥ इति तद्वचनं श्रुत्वा चेदं वचनमब्रवीत् ॥ २ ॥ श्रीभगवानुवाच ॥ अतथ्यं वचनं चेदं निषिद्धं वैदिकैरपि ॥ क्षमस्व नन्द भद्रं ते प्रश्नमन्यं कुरुष्व माम् ॥३॥ विश्वस्तं वचनं तात न प्रकाश्यं मनीषिभिः ॥ विघ्नः प्रकाशे भवति सतां छिद्रं च दैवतः ॥ ४ ॥ नंद उवाच ॥ कथयस्व जगन्नाथ न भक्ते वञ्चनं कुरु ॥ अदृश्यौ चापि देवेशौ राहुग्रस्तौ च पुण्यदौ ॥ ५ ॥ श्रीभगवानुवाच ॥ शृणु नन्द प्रवक्ष्यामि कथामेतां पुरातनीम् ॥ यां श्रुत्वा निष्कलङ्कश्च तीर्थस्नायी भवेन्नरः ॥ ६ ॥ सर्वपातकिनं दृष्ट्वा यत्पापं लभते नरः ॥ आख्यानश्रवणेनैव भस्मीभूतं भविष्यति ॥ ७ ॥ एकदा जमदग्निश्च महाकौतूहलान्वितः ॥ रेणुकासहितस्तुष्टो जगाम नर्मदातटम् ॥८॥ निर्जने नर्मदातीरे विजहार तया सह ॥ नवोढया च सुन्दर्या नवयौवनयुक्तया ॥ ९ ॥ सुवेषया सुस्मितया रत्नभूषणयुक्तया ॥ नतया स्तनभारेण श्रोणीभारेण मन्दया ॥ १० ॥ सुंदरीणामतुलया श्वेतचम्पकवर्णया ॥ सुपूर्णचन्द्राननया कटाक्षयुतया तथा ॥ ११ ॥ अतीव सूक्ष्माम्बरया कामबाणार्तया व्रज ॥ पुलकांचितसर्वाङ्गसंभोगेनापि मूर्च्छया ॥ १२ ॥ पुंस्कोकिलयुते रम्ये शब्दिते सुमधुव्रते ॥ सुगंधिवायुसंयुक्ते पुष्पतल्पान्विते शुभे ॥ १३ ॥ चन्दनोक्षितसर्वाङ्गं वस्त्रमाल्यधरं सुनिम् ॥ महारासरसाढ्यं तमुवाच भास्करः स्वयम् ॥ १४ ॥ वेदकर्तुः प्रपौत्रस्त्वं ब्रह्मणश्च जगत्पतेः ॥ चतुर्वेदविधेयेषु सुनिष्णातः सदा शुचिः ॥ १५ ॥ वेदाङ्गकर्ता धर्मज्ञः श्रेष्ठो वेदविदां वरः ॥ महातपस्वी तेजस्वी ब्रह्मचारी च सुव्रती ॥ १६ ॥ युष्मद्विधोक्तं शास्त्रं च पठित्वाऽन्यश्च पंडितः ॥ वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ॥ १७ ॥ धर्मं त्यजति धर्मज्ञो ह्यधर्मेण रतः कथम् ॥ दिवामैथुनदोषं च वक्ति वेदो विशेषतः ॥१८॥ अहं च धर्मिणां साक्षी तेन त्वां कथयामि ते ॥ सूर्यस्य वचनं श्रुत्वा तत्याज मैथुनं द्विजः ॥ १९ ॥ दृष्ट्वा पुरो विप्ररूपं सूर्यं तेजस्विनं सुरम् ॥ उवाच सूर्यं रक्तास्यः कोपलज्जासमन्वितः ॥

रेणुका लज्जिता तत्र विधाय वाससी सती ॥ २० ॥ जमदग्निरुवाच ॥ को भवान्पण्डितंमन्यो न त्वदन्योऽस्ति पण्डितः
॥ २१ ॥ अहं भृगोर्भगवतः शिष्यस्त्वं कश्यपस्य च ॥ चतुर्वेदांश्च जानामि धर्माधर्मनिरूपणे ॥२२॥ वेदप्रणिहितो धर्मो ह्यधर्म
स्तद्विपर्ययः ॥ अज्ञानी पुरुषः शश्वज्जडितश्च स्वकर्मणा ॥२३॥ तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥ अन्ये भवांश्च धर्म
श्च साक्षी सर्वं च कर्मणाम् ॥ २४ ॥ फलदाता च शास्त्रज्ञो यतस्त्वत्तनयः सदा ॥ न वैष्णवानां शास्तारो यूयमस्माकमेव च
॥ २५ ॥ न वासुदेवभक्तानामशुभं विद्येत क्वचित् ॥ हरेः सुदर्शनं चक्रं शश्वद्रक्षति वैष्णवान् ॥ २६ ॥ नारायणश्च भगवान्स्वयं
ब्रह्मा च शङ्करः ॥ शास्ता यमश्च नास्माकं त्वं वै नापि दिवाकर ॥ २७ ॥ राजपुत्रो यथा स्थाने वयं स्वच्छन्दगामिनः ॥ शक्तोऽहं
भस्मसात्कर्तुं यमं सर्वसुरांस्तथा ॥ २८ ॥ महेन्द्रप्रभृतीन्सूर्यं क्षणेनैवावलीलया ॥ कस्त्वं धर्मप्रवक्ता मे याहि स्वस्थानमेव च
॥२९॥ मम शास्ता तु भगवाञ्छ्रीकृष्णः प्रकृतेः परः ॥ अद्य मे निर्जने स्थाने रसभङ्गस्त्वया कृतः ॥ ३० ॥ मम शापात्पापदृश्यो
राहुग्रस्तो भविष्यसि ॥ द्रष्टुं त्वां ये घनाः सर्वे दूरीभूता भवन्ति ते॥३१॥ त्वामाच्छन्नं करिष्यन्ति वायुना प्रेरितास्तथा॥स्वतेजसा
भवान्गर्वाद्धततेजा भविष्यसि॥३२॥मेघाच्छन्नः स्वल्पतेजा राहुग्रस्तो भवान्भव ॥ ब्राह्मणस्य वचः श्रुत्वा भगवान्भास्करः स्वयम्॥
ततः पुटाञ्जलिर्भूत्वा तुष्टाव मुनिपुङ्गवम् ॥३३॥ श्रीभास्कर उवाच ॥ अवध्याः सर्वधर्मज्ञ धन्या मान्याः पुरस्कृताः ॥ ३४ ॥
नारायणश्च भगवाञ्छंभुर्ब्रह्मा स्वयं प्रभुः ॥ गणेशश्चापि शेषश्च धर्मश्चापि सनातनः॥३५॥ स्तुवन्ति ब्राह्मणं सर्वे विप्ररूपिजनार्द
नम् ॥ क्षमस्व वैष्णवः शुद्धः स्वधर्मं च समाचर ॥ ३६ ॥ वैष्णवानां कुतः कोपो हृदि येषां जनार्दनः ॥ अस्माभिः पूजिता विप्रा
युष्माभिः पूजिताः सुराः ॥ ३७॥ परस्परं स्नेहपात्रं चेदमाचरणं द्विज ॥ अहमेव त्वया शप्तो मया शप्तो भवान्भव ॥ ३८ ॥ अन्य
था मां वदन्त्येव सूर्यं निस्तेजसं जनाः ॥ पराभूतः क्षत्रियेण भवष्यसि द्विजेश्वर ॥ ३९ ॥ मरणं क्षत्रियास्त्रेण भवतश्च भविष्यति ॥
सूर्यस्य वचनं श्रुत्वा चुकोप ब्राह्मणः पुनः ॥ तं शशापातिरक्तास्यः शंभुना निर्जितो भवान् ॥४०॥ उभयोः कलहं ज्ञात्वा कश्य

पेन सह व्रज ॥ आजगाम स्वयं ब्रह्मा विधाता जगतामपि ॥४१॥ आगत्य ब्रह्मा संत्रस्तं बोधयामास भास्करम् ॥ मुनिश्रेष्ठं च धर्मज्ञं धर्मज्ञानां गुरोर्गुरुः ॥ ४२ ॥ ब्रह्मोवाच ॥ क्षमस्व भास्कर त्वं च साक्षान्नारायणो भवान् ॥ युष्माकं परिपालयश्चाप्यवध्यो ब्राह्मणः सदा ॥ ४३ ॥ अहं करोमि भवतो विप्रशापान्तमुल्बणम् ॥ अत्राहमागतस्त्रस्तो भृगुणा प्रेरितस्ततः ॥४४॥ स्फुटोऽहं प्रेरितश्चापि कश्यपेन मरीचिना ॥ शान्तो भव सुरश्रेष्ठ साक्षी त्वं सर्वकर्मणाम् ॥४५॥ कुत्रचिद्दिवसे ब्रह्मंस्त्वां तत्र कुत्रचित्क्षणम् ॥ भविष्यसि घनाच्छन्नः सद्यो मुक्तो भविष्यसि ॥४६॥ न्यूनातिरिक्ते वर्षे च राहुग्रस्तो भविष्यसि ॥ तत्रादृश्यश्च केषांचित्पुण्यदृश्यो हि कस्यचित् ॥ ४७ ॥ अन्यथा सर्वकालेन पुण्यदृश्यो भवान्भुवि ॥ त्वां दृष्ट्वा च नमस्कृत्य सर्वे निष्पापिनो जनाः ॥ ४८ ॥ जन्मसप्ताष्टरिःफाङ्कचतुर्थे दशमे तथा ॥ जन्मर्क्षे निधनं नृणामदृश्यस्त्वं भविष्यसि ॥ ४९ ॥ अस्तकाले घनाच्छन्ने मध्याह्नस्थे जलेऽपि वा॥अर्द्धोदिते च काले च पापदृश्यो भविष्यसि ॥५०॥ भार्यादुःखनिमित्तेन भार्यया हेतुभूतया ॥ श्वशुरेण शालकेन हततेजा भविष्यसि ॥५१॥ अन्यथा तव तेजश्च संज्ञा सहितुमक्षमा ॥ मालीसुमालियुद्धे च शंभुना त्वं पराजितः ॥५२॥ इत्येवमुक्त्वा सूर्यं च बोधयामास ब्राह्मणम् ॥ नम्रं शापपराभूतं लज्जितं कोपितं व्रज ॥ ५३ ॥ हे विप्र स्वगृहं गच्छ गच्छ वत्स यथासुखम् ॥ त्वत्तेजसा क्षणेनैव भस्मीभूतं भवेज्जगत् ॥ ५४ ॥ सूर्यस्त्वत्परिपालयश्च भवान्सूर्यस्य नित्यशः ॥ परस्परं च पूज्यश्च संबन्धः पोष्यपोषकः ॥५५॥ हर्यंशेन क्षत्रियेण कार्तवीर्यार्जुनेन च ॥ भविष्यसि न संदेहः पराभूतो द्विजो मृतः ॥५६॥ पुरा ते प्राक्तनं सर्वं कदाचिन्न हि खण्डितम् ॥ नारायणश्च स्वांशेन तव पुत्रो भविष्यति ॥ ५७ ॥ त्रिःसप्तकृत्वो जगतीं निःक्षत्रां च करिष्यति ॥ मृत्युस्ते यशसो बीजं भविष्यति महीतले ॥ ५८ ॥ इत्येवमुक्त्वा ब्रह्मा च ययौ गेहं व्रजेश्वर ॥ प्रययौ जमदग्निश्च भास्करश्च स्वमन्दिरम् ॥ ५९ ॥ इत्येवं कथितं तात आख्यानं पुण्यकारकम् ॥ राहुग्रस्तो भास्करश्चाप्यदृश्यो येन हेतुना ॥ ६० ॥ चतुर्थ्यामुदितश्चंद्रो भाद्रे मासि सितासिते ॥ अदृश्यो नष्टरूपश्च श्रूयतां येन हेतुना ॥६१॥ राहुग्रस्तः

कलङ्की वा पुरा शप्तो मया पितः ॥ सर्वं त्वां कथयिष्यामि कथामेतां पुरातनीम् ॥ ६२ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे श्रीकृष्णजन्मखण्डे उत्तरार्धे नारायणनारदसंवादे भगवन्नन्दसंवादे एकोनाशीतितमोऽध्यायः ॥ ७९ ॥ श्रीकृष्ण उवाच ॥ पुरा तारा गुरोः पत्नी नवयौवनसंयुता ॥ रत्नभूषणभूषाढ्या वरसूक्ष्माम्बरा सती ॥ १ ॥ सुश्रोणी सस्मिता रम्या सुन्दरी सुमनोहरा॥ अतीव कबरीरम्या मालतीमाल्यभूषिता॥२॥सिन्दूरबिन्दुना साकं चारुचन्दनबिन्दुभिः॥कस्तूरीबिन्दुनाऽधश्च भालमध्यस्थलोज्ज्वला ॥३॥ रत्नेन्द्रसारनिर्माणक्वणन्मञ्जीररञ्जिता ॥ सुवक्रलोचना श्यामा सुचारुकज्जलोज्ज्वला ॥ ४ ॥ सुचारुसारमुक्ताभदन्तपङ्क्तिमनोहरा ॥ रत्नकुण्डलयुग्मेन चारुगण्डस्थलोज्ज्वला॥५॥कामिनीष्वतुला बाला गजेन्द्रमन्दगामिनी ॥ सुकोमला चन्द्रमुखी कामाधारा च कामुकी ॥ ६ ॥ स्वर्गमन्दाकिनीतीरे स्नाता स्निग्धाम्बरा वरा ॥ ध्यायन्ती गुरुपादं सा स्वगृहं गमनोन्मुखी ॥७॥ दृष्ट्वा तस्याश्च सर्वाङ्गमनङ्गबाणपीडितः ॥ भाद्रे चतुर्थ्यां चन्द्रश्च जहार चेतनां व्रज ॥ ८ ॥ ज्ञानं क्षणेन संप्राप्य रथस्थो रसिको बली ॥ रथमारोहयामास करे धृत्वा च तारकाम् ॥ ९ ॥ कामोन्मत्तः कामिनीं तां समाश्लिष्य चुचुम्ब च ॥ शृङ्गारं कर्तुमुद्यतं तमुवाच गुरुप्रिया ॥ १० ॥ तारकोवाच ॥ त्यज मां त्यज मां चन्द्र सुरेषु कुलपांसन ॥ गुरुपत्नीं ब्राह्मणीं च पातिव्रत्यपरायणाम् ॥ गुरुपत्नीसंगमने ब्रह्महत्याशतं भवेत् ॥ ११ ॥ गुरुपत्नी विप्रपत्नी यदि सा च पतिव्रता ॥ ब्रह्महत्यासहस्रं च तस्याः संगमने लभेत् ॥१२॥ पुत्रस्त्वं तव माताऽहं धैर्यं कुरु सुरेश्वर ॥ धिक्त्वां श्रुत्वा सुरगुरुर्भस्मीभूतं करिष्यति ॥१३॥ पुत्राधिकश्च शिष्यश्च प्रियो मत्स्वामिनो भवान् ॥ स्वधर्मं रक्ष पापिष्ठ मामेवं मातरं त्यज ॥१४॥ दास्यामि स्त्रीवधं तुभ्यं यदि मां संग्रहीष्यसि ॥ विलङ्घ्य तारावचनं तां च संभोक्तुमुद्यतम् ॥ १५ ॥ शशाप तारा कोपेन निष्कामा सा पतिव्रता ॥ राहुग्रस्तो घनग्रस्तः पापदृश्यो भवान्भव ॥ १६ ॥ कलङ्की यक्ष्मणा ग्रस्तो भविष्यसि न संशयः ॥ चन्द्रं शप्त्वा तदा तूर्णं कामदेवं शशाप सा ॥ १७ ॥ तेजस्विना केनचित्त्वं भस्मीभूतो भविष्यसि ॥ चन्द्रस्तारां गृहीत्वा च कृत्वाऽपि रमणं व्रज ॥१८॥ क्रोडे निधाय प्रययौ रुदन्तीं तां शुचाऽन्वि

ताम् ॥ निर्जने निर्जने रम्ये शैले शैले मनोहरे ॥ १९ ॥ सरोनदनदीनां च तीरे तीरे मनोहरे ॥ मधुव्रतपिकोक्ते च पुष्पोद्याने सुपुष्पिते
॥२०॥ रम्यायां पुष्पशय्यायां स रेमे रामया सह ॥ चन्दनोक्षितसर्वाङ्गो मधुपानरतः सुरः ॥ २१ ॥ सुखसंभोगसंसक्तो
बुबुधे न दिवानिशम् ॥ मलये मलयारण्ये मलयानिलसंयुते ॥२२॥ स्यन्दने चन्दनवने पश्चिमोदधिसन्निधौ ॥ त्रिकूटे वटमूले च
तत्र चन्द्रसरोवरे ॥२३॥ सुचारुशतपत्राणां पत्रे चन्दनचर्चिते ॥ सुचारुचम्पकोद्याने चम्पकानिलपूजिते ॥ २४ ॥ क्षीरोदकाञ्चनी
भूमौ क्रौञ्चकाञ्चनपर्वते ॥ रत्नशैले मणिमये मणिमन्दिरसुन्दरे ॥ २५ ॥ माणिक्यमुक्तासारेण हीरहारेण शोभिते ॥ सुचारुवस्त्रचित्राढ्ये
श्वेतचामरदर्पणैः ॥ २६ ॥ भूषिते रत्नदीपैश्च देवक्रोडे प्रियस्थले ॥ वारुणीं मदिरां पीत्वा वरुणानीसमन्वितः ॥ २७ ॥
वरुणो रमते यत्र तत्र रेमे तया सह ॥ पावने पवनोद्याने पारिजातानिलेन च ॥२८॥ सुगन्धिमोहिते रत्नमालातीरे च निर्मले ॥
ऋक्षशैले कल्पवृक्षवने वह्निप्रियाश्रमे ॥ २९ ॥ पपौ च कामधेनूनां क्षीरं क्षीरोदधेस्तटे ॥ वह्निशुद्धांशुकयुगं वह्निस्तस्मै ददौ मुदा
॥ ३० ॥ वरुणो रत्नमालां च रत्नच्छत्रं समीरणः ॥ तत्र दृष्ट्वाऽसुरगुरुं बलिगेहात्समागतम् ॥ ३१ ॥ प्रणम्य सर्वमुक्त्वा च
चन्द्रस्तं शरणं ययौ ॥ शुक्रस्तं बोधयामास वचनं नीतियुक्तितः ॥ निरपेक्षो मुनिश्रेष्ठो वेदवेदाङ्गपारगः ॥ ३२ ॥ शुक्र उवाच ॥
शृणु वत्स प्रवक्ष्यामि गुरवे देहि तारकाम् ॥ शंभोश्च गुरुपुत्राय पौत्राय ब्रह्मणश्च वै ॥ ३३ ॥ पूजिताय सुराणां च देया तस्मै
निशापते ॥ प्रियाय तत्प्रियां दत्त्वा शीघ्रं त्वं शरणं व्रज ॥ ३४ ॥ गुरुपत्नीं मातृतुल्यां त्यज मद्वचनाद्विधो ॥ कुरु पापक्षयं पापनिवृत्तिस्तु
महाफला ॥ ३५ ॥ सतीनां गुरुपत्नीनां ग्रहणे च बलेन च ॥ ब्रह्महत्यासहस्राणां पातकं लभते जनः ॥ ३६॥ कुम्भीपाके
च पच्यन्ते यावद्वै ब्रह्मणः शतम् ॥ साम्यं नारायणस्थाने तृणपर्वतयोः सुर ॥३७ ॥ कस्त्वं वत्स हरेः स्थाने कर्मभोगोऽस्ति
ब्रह्मणः ॥ नारायणाश्रिताः सर्वे जीविनस्त्रिविधा भवे ॥ ३८ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे
भगवन्नन्दसंवादे ताराहरणेऽशीतितमोऽध्यायः ॥ ८० ॥ ❀ ॥ श्रीकृष्ण उवाच ॥ एतस्मिन्नन्तरे शुक्रः सुरश्रेणीं

ददर्श सः ॥ आकाशमार्गादायांतीं रणशस्त्रास्त्रधारिणीम् ॥ १ ॥ पताकान्नां त्रिकोटिश्च शतकोटिर्महारथाः ॥ शतकोटिगजेन्द्राणां रथानां तच्चतुर्गुणम् ॥ २ ॥ अश्वानां तच्छतगुणं समूहं च सुदारुणम् ॥ पदातीनां समूहं च तुरङ्गेभ्यश्च षड्गुणम् ॥ ३ ॥ दुन्दुभीवाद्यभाण्डानां पञ्चलक्षं तथैव च ॥ पटहानां त्रिलक्षं च डिंडिमानां त्रिलक्षकम् ॥ ४ ॥ ऐरावते महेन्द्रं च श्वेताश्वे धर्ममेव च ॥ कुबेरं वरुणं वह्निं रथस्थं पवनं तथा ॥५॥ महिषस्थं यमं चैव स्यन्दनस्थं दिवाकरम् ॥ ईशानं च वृषेन्द्रस्थमनन्तं नागवाहनम् ॥ ६ ॥ आदित्यांश्च वसून्रुद्रान्सिद्धगन्धर्वकिन्नरान् ॥ जीवन्मुक्तमुनीनां च समूहं सूर्यवर्चसाम् ॥ ७ ॥ तान्दृष्ट्वा निर्भयः शुक्रः समाश्वास्य निशाकरम् ॥ सुराणां द्विगुणं सैन्यमाजुहाव व्रजेश्वर ॥ ८ ॥ रत्नमालानदीतीरे हुताशनप्रियाश्रमे ॥ तत्र तस्थौ दैत्यसैन्यं पुण्यक्षीरोदधेस्तटे ॥९॥ एतस्मिन्नंतरे शुक्रः समीपं सरसस्तटे ॥ पुण्याश्रमेऽक्षयवटे सुरसैन्यात्समागतम् ॥ १० ॥ ददर्श वृषभस्थं च शङ्करं सर्वशङ्करम् ॥ त्रिशूलपट्टिशधरं व्याघ्रचर्माम्बरं वरम् ॥११॥ तेजःस्वरूपं परमं भक्तानुग्रहविग्रहम् ॥ सर्वसंपत्प्रदातारं सर्वज्ञं सर्वकारणम् ॥ १२ ॥ सर्वेश्वरं सर्वपूज्यं सर्वरूपं सनातनम् ॥ शरणागतदीनार्तपरित्राणपरायणम् ॥ १३॥सस्मितं परमात्मानं ज्वलन्तं ब्रह्मतेजसा ॥ संत्रस्तः सहसोत्थाय प्रणनाम पदाम्बुजे ॥१४॥ ददौ शुभाशिषं तस्मै सुप्रसन्नः परात्परः॥रत्नसिंहासने तं च वासयामास सादरम्॥१५॥अथ तत्रान्तरे विप्र पुरतस्तं ददर्श सः ॥ शान्तं स्वयं विधातारं रत्नस्यन्दनसुन्दरम् ॥१६॥ वह्निशुद्धांशुकाधानं रत्नमालाविभूषितम् ॥ प्रसन्नं सुस्मितं शुद्धं जगतामीश्वरं परम् ॥१७॥ कर्मणां फलदातारं तपोरूपं तपस्विनाम् ॥ वेदानां जनकं वेदप्रसूं कान्तं मनोहरम् ॥१८॥ पुटांजलिस्तदा त्रस्तः प्रणनाम सुरेश्वरम् ॥ रत्नसिंहासने रम्ये वासयामास भक्तितः ॥ १९ ॥ पूजां चकार भक्त्या च तयोश्चरणपंकजे ॥ नोचितं कुशलप्रश्नं तयोः कल्याणमेव च ॥ २० ॥ विधाता जगतां शुक्रमाचार्यं पुरतः स्थितम् ॥ सुनीतिं कथयामास यत्नतः शंभुसंमतः ॥ २१ ॥ ब्रह्मोवाच ॥ शृणु शुक्र प्रवक्ष्यामि दुर्नीतिं शशिनः सुत ॥ लज्जाकरं त्रिजगतां कर्म वेदबहिष्कृतम् ॥ २२ ॥ स्नात्वा गृहोन्मुखीं तारां गुरुपत्नीं

पतिव्रताम् ॥ गृहीत्वा शरणापन्नस्त्वयि पापश्च सांप्रतम् ॥ २३ ॥ प्रस्तुतं तेन सैन्यं च पश्य वत्स रणोद्यतम् ॥ अहं शंभुस्त्वत्समीपं
तदर्थं च समागतौ ॥ २४ ॥ शंभुरुवाच ॥ चन्द्रमानय हे विप्र यद्यात्मशिवमिच्छसि ॥ संहरिष्ये शिरस्तस्य त्रिशूलेन
च पापिनः ॥ २५ ॥ अन्यथा संहरिष्यामि सर्वदैत्यान्क्षणेन च ॥ मयि रुष्टे रक्षिता को दैत्यानां च भवेद्द्विज ॥ २६ ॥ सद्यः पाशु
पतेनैव वाय्वस्त्रेण च सांप्रतम् ॥ सुराणां रिपुवर्गं च हरिष्यामि च लीलया ॥ २७ ॥ दुर्वाससो मदंशस्य गुरुस्तस्यांगिरा मुनिः ॥
परस्पराच्च संबन्धाद्गुरुपुत्रो गुरुर्मम ॥ २८ ॥ बृहस्पतिश्च तेजस्वी तं भस्मीकर्तुमीश्वरः ॥ न चकार कृपालुश्चेत्प्रियशिष्येण हेतुना
॥ २९ ॥ उतथ्यपत्नीं दृष्ट्वा स पुरा रेमे स्वकामतः ॥ तत्पतेः शापतोऽस्यैव परग्रस्ता प्रिया सती ॥ ३०॥ पत्नीं मद्गुरुपुत्रस्य देहि
तारां मनोहराम् ॥ मद्वैरिणं च चन्द्रं च भ्रातृभार्यापहारिणम्॥३१॥शरणागतदीनार्तं न हि रक्षेद्यदीश्वरः॥पच्यते निरये तावद्यावदिं
द्राश्चतुर्दश ॥ ३२ ॥ अत्र नास्ति विचारो मे पापिष्ठे शरणागते ॥ पापी यं शरणं याति स पापी च न संशयः ॥३३॥ देहि तं विप्र
शार्दूल पापिनं मातृगामिनम् ॥ बहिष्कृत्य स्वाश्रमाच्च तारासाध्वीसमन्वितम् ॥ ३४ ॥ शुक्र उवाच ॥ सुराणामसुराणां च
सर्वेषां जगतामपि ॥ त्वमेव शास्ता भगवान्को वा शास्ति सुरेऽसुरे ॥ ३५ ॥ कृत्वा सुराणां साहाय्यं कथं दैत्यान्हनिष्यसि
संहर्तुः सर्वजगतां दैत्यौघे किंच पौरुषम् ॥ ३६ ॥ त्वं ज्योतिः परमं ब्रह्म सगुणो निर्गुणः स्वयम् ॥ गुणभेदान्मूर्तिभेदो ब्रह्मविष्णु
शिवात्मकः ॥ ३७ ॥ बलिद्वारे गदापाणिः स्वयमेव भवान्प्रभो ॥ स्वयं प्रदत्ता शक्राय तस्मै श्रीरपि लीलया ॥ ३८ ॥ क्षमस्व
भगवञ्छंभो हर क्रोधं च संहार ॥ किं पौरुषं च भवतो ब्राह्मणस्यापि हिंसया॥३९॥अहं जीवञ्छरीरेण न दास्यामि निशाकरम् ॥
शरणागतदीनार्तं लज्जितं पापसंयुतम् ॥४०॥ अहं च त्वत्पदाम्भोजे शरणं यामि शङ्कर ॥ यथोचितं कुरु विभो जगत्सर्वं तथैव च
॥ ४१ ॥ शुक्रस्य वचनं श्रुत्वा प्रसन्नो भगवाञ्छिवः ॥ इत्युवाच निशानाथं समानय शुभं भवेत् ॥४२॥ एतस्मिन्नन्तरे ब्रह्मा बोध
यित्वा कविं विभुः ॥ समानीय निशानाथं तारकासहितं व्रज ॥ ४३ ॥ शंभोश्च चरणाम्भोजे चकार च समर्पणम् ॥ शंभुस्तं प्रीति

युक्तश्च वासयामास वक्षसि ॥ ४४ ॥ दत्त्वा तस्मै पादरेणुं निष्पापं च चकार सः ॥ दत्त्वा तन्मस्तके हस्तं कृपालुरभयं ददौ ॥ ४५ ॥ क्षीरोदे स्नापयित्वा च प्रायश्चित्तेन शङ्करः ॥ चकार चन्द्रं निष्पापं ब्रह्मणा सहितः शुचिम् ॥ ४६ ॥ योगेन चन्द्रं योगीन्द्रो द्विखण्डं तं चकार सः ॥ ररक्षार्धं ललाटे च सोऽप्यर्द्धं ब्रह्मणः पुरः ॥ ४७ ॥ एवमेव महादेवो बभूव चन्द्रशेखरः ॥ मृगाङ्को लज्जितस्तत्र कलंकी देवसंसदि ॥ ४८ ॥ लज्जया च स्वयोगेन देहत्यागं चकार सः ॥ तच्छरीरं च क्षीरोदे ब्रह्मणा च समर्पितम् ॥ रुरोदात्रिश्च कृपया शुचा क्षीरोदधेस्तटे ॥ ४९ ॥ अत्रेश्चक्षुर्जलं तस्य पपात च जले व्रज ॥ तस्माद्बभूव चन्द्रश्च निष्पापो देवसंसदि ॥५०॥ ब्रह्मा च भगवाञ्छम्भुरभिषेकं चकार तम् ॥ उवाच तं महादेवो निर्भयं देवसंसदि ॥ ५१ ॥ ॥ महादेव उवाच ॥ स्वस्थानं गच्छ पुत्र त्वं कुरुष्व विषयं मुदा ॥ पश्चात्तस्याश्च शापेन यक्ष्मग्रस्तो भविष्यसि ॥५२॥ व्यर्थं पतिव्रताशापं कर्तुमीशश्च को भुवि ॥ मदाशिषा यक्ष्मणश्च प्रतीकारो भविष्यति ॥ ५३ ॥ यस्माद्भाद्रचतुर्थ्यां तु गुरुपत्नीक्षतिः कृता ॥ तस्मात्तस्मिन्दिने वत्स पापदृश्यो युगे युगे ॥ ५४ ॥ नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥ अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ॥ ५५ ॥ देहत्यागेन हे वत्स कर्म भोगो न नश्यति ॥ प्रायश्चित्तान्न संदेहो ह्यस्तमेव भविष्यति ॥ ५६ ॥ तारापहरणाद्वत्स कलङ्कश्चन्द्रमण्डले ॥ मृगाकृतिर्विलग्नश्च भविष्यति युगेयुगे ॥ ५७ ॥ शृणु वाक्यमिहागच्छ तारके च पतिव्रते ॥ सत्यं ब्रूहि कस्य गर्भं त्यक्त्वा शुद्धा भव प्रिये ॥ ५८ ॥ अकामतो बलात्साध्वी न स्त्री जारेण दुष्यति ॥ कामतो नरकं याति यावच्चन्द्रदिवाकरौ ॥ ५९ ॥ उवाच तारा ब्रह्माणं गर्भं चन्द्रस्य सस्मितम् ॥ जहसुर्देवताः सर्वाः शम्भुश्च मुनिसङ्घकाः ॥ ६० ॥ ददौ तारां च गुरवे लज्जिताय व्रजेश्वर॥ बृहस्पतिर्ययौ गेहं गृहीत्वा च पतिव्रताम् ॥ ६१ ॥ तया प्रसूतं पुत्रं च सुन्दरं कनकप्रभम् ॥ गृहीत्वा प्रययौ चन्द्रो नमस्कृत्य विधिं शिवम् ॥ ६२॥ ययुर्देवाश्च मुनयः शम्भुश्च कमलोद्भवः ॥ प्रययौ स्वगृहं शुक्रो दैत्ययुक्तो मुदाऽन्वितः ॥ ६३ ॥ एतत्ते कथितं नन्द ह्याख्यानं पुण्यदं शुभम् ॥ एतच्छ्रुत्वा तु निष्पापो निष्कलङ्की नरो भवेत् ॥ ६४ ॥ धन्यं यशस्यमायुष्यं सर्वसंपत्करं परम् ॥ शोकापनोदनं हर्षकरं सर्वत्र

मङ्गलम् ॥ ६५ ॥ त्यज शोकं सदा नन्द गृहं व्रज व्रजेश्वर ॥ ब्रूहि सर्वं यशोदां च मत्प्रसूं गोपिकागणम् ॥ ६६ ॥ बोधयिष्यसि
सर्वां तां स्त्रीजातिं शोकसंयुताम् ॥ मदीयज्ञानदत्तेन हर्षयुक्तः सदा भव ॥ ६७ ॥ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे
उत्तरार्द्धे ताराहरणं नामैकाशीतितमोऽध्यायः ॥ ८१ ॥ ❀ ॥ नन्द उवाच ॥ श्रुतं सर्वं महाभाग दुःस्वप्नं कथय प्रभो ॥ उवाच तं
वै भगवाञ्छ्रूयतामिति तद्वचः ॥ १ ॥ श्रीभगवानुवाच ॥ स्वप्ने हसति यो हर्षाद्विवाहं यदि पश्यति ॥ नर्तनं गीतमिष्टं च
विपत्तिस्तस्य निश्चितम् ॥ २ ॥ दन्ता यस्य विपीड्यन्ते विचरन्त च पश्यति ॥ धनहानिर्भवेत्तस्य पीडा चापि शरीरजा ॥ ३ ॥
अभ्यङ्गितस्तु तैलेन यो गच्छेद्दक्षिणां दिशम् ॥ खरोष्ट्रमहिषारूढो मृत्युस्तस्य न संशयः ॥ ४ ॥ स्वप्ने कर्णे जपापुष्पमशोकं कर
वीरकम् ॥ विपत्तिस्तस्य तैलं च लवणं यदि पश्यति ॥५॥ नग्नां कृष्णां छिन्ननासां शूद्रस्य विधवां तथा ॥ कपर्दकं तालफलं दृष्ट्वा
शोकमवाप्नुयात् ॥ ६ ॥ स्वप्ने रुष्टं ब्राह्मणं च ब्राह्मणीं कोपसंयुताम् ॥ विपत्तिश्च भवेत्तस्य लक्ष्मीर्याति गृहाद् ध्रुवम् ॥७॥ वनपुष्पं
रक्तपुष्पं पलाशं च सुपुष्पितम् ॥ कार्पासं शुक्लवस्त्रं च दृष्ट्वा दुःखमवाप्नुयात् ॥ ८ ॥ गायन्तीं च हसन्तीं च कृष्णाम्बरधरां स्त्रियम् ॥
दृष्ट्वा कृष्णां च विधवां नरो मृत्युमवाप्नुयात्॥९॥देवता यत्र नृत्यन्ति गायन्ति च हसन्ति च॥आस्फोटयन्ति धावन्ति तस्य देहो मरिष्यति
॥ १० ॥ वान्तं मूत्रं पुरीषं च वैद्यं रौप्यं सुवर्णकम् ॥ प्रत्यक्षमथवा स्वप्ने जीवितं दशमावधि ॥ ११ ॥ कृष्णाम्बरधरां नारीं कृष्ण
माल्यानुलेपनाम् ॥ उपगूहति यः स्वप्ने तस्य मृत्युर्भविष्यति ॥ १२ ॥ मृतवत्सं च मुण्डं च मृगस्य च नरस्य च ॥ यः प्राप्नोत्यस्थि
मालां च विपत्तिस्तस्य निश्चितम् ॥१३॥ रथं खरोष्ट्रसंयुक्तमेकाकी योऽधिरोहयेत् ॥ तत्रस्थोऽपि च जागर्ति मृत्युरेव न संशयः॥१४॥
अभ्यङ्गितस्तु हविषा क्षीरेण मधुनाऽपि च ॥ तक्रेणापि गुडेनैव पीडा तस्य विनिश्चितम् ॥ १५ ॥ रक्ताम्बरधरां नारीं रक्तमाल्यानुले
पनाम् ॥ उपगूहति यः स्वप्ने तस्य व्याधिर्विनिश्चितम् ॥ १६ ॥ पतितान्नखकेशांश्च निर्वाणाङ्गारमेव च ॥ भस्मपूर्णां चितां दृष्ट्वा
लभते मृत्युमेव च ॥ १७ ॥ श्मशानं शुष्ककाष्ठं च तृणानि लोहमेव च ॥ शमीं च किंचित्कृष्णाश्वं दृष्ट्वा दुःखं लभेद् ध्रुवम् ॥ १८ ॥

पादुकां फलकं रक्तं पुष्पमाल्यं भयानकम् ॥ माषं मसूरं मुद्गं वा दृष्ट्वा सद्यो व्रणं लभेत् ॥ १९ ॥ कटकं सरटं काकं भल्लूकं वानरं गवम् ॥ पूयं गात्रमलं स्वप्ने केवलं व्याधिकारणम् ॥ २० ॥ भग्नभाण्डं क्षतं शूद्रं गलत्कुष्ठं च रोगिणम् ॥ रक्ताम्बरं च जटिलं सूकरं महिषं खरम् ॥ २१ ॥ अन्धकारं महाघोरं मृतं जीवं भयङ्करम् ॥ दृष्ट्वा स्वप्ने योनिलिङ्गं विपत्तिं लभते ध्रुवम् ॥२२॥ कुवेषरूपं म्लेच्छं च यमदूतं भयङ्करम् ॥ पाशहस्तं पाशशस्त्रं दृष्ट्वा मृत्युं लभेन्नरः ॥ २३ ॥ ब्राह्मणो ब्राह्मणी बाला बालको वा सुतः सुता ॥ विलापं कुरुते कोपाद्दृष्ट्वा दुःखमवाप्नुयात्॥२४॥कृष्णं पुष्पं च तन्माल्यं सस्यं शस्त्रास्त्रधारिणम् ॥ म्लेच्छां च विकृताकारां दृष्ट्वा मृत्युं लभेद् ध्रुवम्॥२५॥त्यक्तप्राणं मृतं दृष्ट्वा मृत्युं च लभते ध्रुवम् ॥ मत्स्यादि धारयेद्यो हि तद्भ्रातुर्मरणं ध्रुवम्॥२६॥वाद्यं च नर्तनं गीतं गायनं रक्तवाससम् ॥ मृदङ्गं वाद्यमानं तं दृष्ट्वा दुःखं लभेद्ध्रुवम् ॥२७॥ छिन्नं वापि कबन्धं वा विकृतं मुक्तकेशिनम् ॥ क्षिप्रं नृत्यं च कुर्वन्तं दृष्ट्वा मृत्युं लभेन्नरः ॥ २८ ॥ मृतो वापि मृता वापि कृष्णम्लेच्छा भयानका ॥ उपगूहति यं स्वप्ने तस्य मृत्युर्विनिश्चितम् ॥२९॥ येषां दन्ताश्च भग्नाश्च केशाश्चापि पतन्ति हि ॥ धनहानिर्भवेत्तस्य पीडा वा तच्छरीरजा ॥ ३० ॥ उपद्रवन्ति यं स्वप्ने शृङ्गिणो दंष्ट्रिणोऽपि वा ॥ बालका मानवाश्चैव तस्य राजकुलाद्भयम् ॥ ३१ ॥ छिन्नं वृक्षं पतन्तं च शिलावृष्टिं तुषं क्षुरम् ॥ रक्तांगारं भस्मवृष्टिं दृष्ट्वा दुःखमवाप्नुयात् ॥ ३२ ॥ गृहं पतन्तं शैलं वा धूमकेतुं भयानकम् ॥ भग्नस्कन्धं नरं वापि दृष्ट्वा दुःखमवाप्नुयात् ॥ ३३ ॥ रथगेहशैलवृक्षगोहस्तितुरगांबरात् ॥ भूमौ पतति यः स्वप्ने विपत्तिस्तस्य निश्चितम् ॥ ॥ ३४ ॥ उच्चैः पतन्ति गर्तेषु भस्मांगारयुतेषु च ॥ क्षारकुण्डेषु चूर्णेषु मृत्युस्तेषां न संशयः ॥ ३५ ॥ बलाद्गृह्णाति दुष्टश्च छत्रं च तस्य मस्तकात् ॥ पितुर्नाशो भवेत्तस्य गुरोर्वापि नृपस्य वा ॥ ३६ ॥ सुरभिर्यस्य गेहाच्च याति त्रस्ता सवत्सिका ॥ प्रयाति पापिनस्तस्य लक्ष्मीरपि वसुन्धरा ॥३७॥ पाशेन कृत्वा बद्धं च यं गृहीत्वा प्रयान्ति च ॥ यमदूताश्च ये म्लेच्छास्तस्य मृत्युर्विनिश्चितम् ॥ ३८ ॥ गणको ब्राह्मणो वापि ब्राह्मणी वा गुरुस्तथा ॥ परिरुष्टः शपति यं विपत्तिस्तस्य निश्चितम् ॥ ३९ ॥ विरोधिनश्च

काकाश्च कुक्कुटा भल्लुकास्तथा ॥ पतन्त्यागत्य यद्गात्रे तस्य मृत्युर्न संशयः ॥४०॥ महिषा भल्लुका उष्ट्राः सूकरा गर्दभास्तथा ॥
रुष्टा धावन्ति यं स्वप्ने स रोगी निश्चितं भवेत्॥४१॥रक्तचन्दनकाष्ठानि घृताक्तानि जुहोति यः ॥ गायत्र्याश्च सहस्रेण तेन शान्ति
र्विधीयते ॥४२॥ सहस्रधा जपेद्यो हि भक्त्यैव मधुसूदनम् ॥ निष्पापो हि भवेत्सोऽपि दुःस्वप्नः सुखवान्भवेत् ॥ ४३ ॥ अच्युतं
केशवं विष्णुं हरिं सत्यं जनार्दनम् ॥ हंसं नारायणं चैव ह्येतन्नामाष्टकं शुभम् ॥ ४४ ॥ शुचिः पूर्वमुखः प्राज्ञो दशकृत्वश्च यो
जपेत् ॥ निष्पापोऽपि भवेत्सोऽपि दुःस्वप्नः शुभवान्भवेत् ॥ ४५ ॥ विष्णुं नारायणं कृष्णं माधवं मधुसूदनम् ॥ हरिं नरहरिं रामं
गोविन्दं दधिवामनम् ॥ ४६ ॥ भक्त्या चेमानि नामानि दश भद्राणि यो जपेत् ॥ शतकृत्वो भक्तियुक्तो जप्त्वा नीरोगतां व्रजेत् ॥
॥ ४७ ॥ लक्षधा हि जपेद्यो हि बन्धनान्मुच्यते ध्रुवम् ॥ जप्त्वा च दशलक्षं च महावन्ध्या प्रसूयते ॥४८॥ हविष्याशी यतः शुद्धो
दरिद्रो धनवान्भवेत् ॥ शतलक्षं च जप्त्वा च जीवन्मुक्तो भवेन्नरः ॥ ४९ ॥ ओं नमः शिवं दुर्गां गणपतिं कार्त्तिकेयं दिनेश्वरम् ॥
धर्मं गङ्गां च तुलसीं राधां लक्ष्मीं सरस्वतीम्॥५०॥नामान्येतानि भद्राणि जले स्नात्वा च यो जपेत्॥वांछितं च लभेत्सोऽपि दुःस्वप्नः
शुभवान्भवेत् ॥५१॥ ओं ह्रीं श्रीं क्लीं पूर्वदुर्गतिनाशिन्यै महामायायै स्वाहा ॥ ५२ ॥ कल्पवृक्षो हि लोकानां मंत्रः सप्तदशाक्षरः
॥ शुचिश्च दशधा जप्त्वा दुःस्वप्नः सुखवान्भवेत् ॥ ५३ ॥ शतलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम् सिद्धमन्त्रस्तु लभते सर्वं
सिद्धिं च वांछिताम् ॥५४॥ ओं नमो मृत्युंजयायेति स्वाहान्तं लक्षधा जपेत् ॥ दृष्ट्वा च मरणं स्वप्ने शतायुश्च भवेन्नरः ॥ ५५ ॥
पूर्वोत्तरमुखो भूत्वा स्वप्नं प्राज्ञे प्रकाशयेत् ॥ काश्यपे दुर्गते नीचे देवब्राह्मणनिन्दके ॥ मूर्खे चैवानभिज्ञे च न च स्वप्नं प्रकाशयेत्
॥ ५६ ॥ अश्वत्थे गणके विप्रे पितृदेवासनेषु च ॥ आर्यें च वैष्णवे मित्रे दिवास्वप्नं प्रकाशयेत् ॥ ५७ ॥ इति ते पुण्यमाख्यातं
कथितं पापनाशनम् ॥ धन्यं यशस्यमायुष्यं किं भूयः श्रोतुमिच्छसि ॥ ५८ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्ण
जन्मखण्ड उत्तरार्धे नारायणनारदसंवादे श्रीभगवन्नन्दसंवादे द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ नंद उवाच ॥ वेदानां कारणं

त्वं च ब्रह्मादीनां च पुत्रक ॥ सर्वं कथय भद्रं ते कं पृच्छामि त्वया विना ॥ १ ॥ विप्राणां यो हि धर्मश्च क्षत्रविट्शूद्रकर्मणाम् ॥
संन्यासिनां च यो धर्मो यतीनां ब्रह्मचारिणाम् ॥ २ ॥ विप्राणां विधवास्त्रीणां वैष्णवानां सतामपि ॥ पतिव्रतानां स्त्रीणां च तत्सर्वं
वक्तुमर्हसि ॥ ३ ॥ गृहिणां गृहिणीनां च शिष्याणां च विशेषतः ॥ पुत्राणां चापि कन्यानां पितरं मातरं प्रति ॥ ४ ॥ स्त्रीजातिश्च
कतिविधा भक्तः कतिविधः प्रभो ॥ ब्रह्माण्डं च कतिविधं वदनं च किमात्मकम् ॥ किं नित्यं कृत्रिमं किं च ब्रूहि सर्वं क्रमेण
च ॥ ५ ॥ श्रीभगवानुवाच ॥ सन्ध्यापूतः सदा विप्रः कुरुते मम सेवनम् ॥ ६ ॥ नित्यं भुंक्ते मत्प्रसादमनिवेद्य कदाचन ॥
अन्नं विष्ठा जलं मूत्रं यद्विष्णोरनिवेदितम् ॥ ७ ॥ विष्णुप्रसादभोजी च जीवन्मुक्तश्च ब्राह्मणः ॥ नित्यं तपस्यानिरतः शुचिः
शान्तश्च शास्त्रवित् ॥ ८ ॥ व्रततीर्थाश्रितो धर्मी नानाध्यापनसंयुतः ॥ विष्णुमन्त्रं गृहीत्वा च कृत्वा च गुरुसेवनम् ॥ ९ ॥ गृहीत्वा
तदनुज्ञां च पश्चाद्भवति संगृही ॥ दक्षिणां नित्यपूजानां गुरवे च निवेदयेत् ॥१०॥ गुरूणां पोषणं नित्यं कर्तव्यं नात्र संशयः ॥ सर्वेषा
मपि वन्द्यानां पिता चैव महान् गुरुः ॥ ११ ॥ पितुः शतगुणैर्माता मातुः शतगुणैः सुरः ॥ मन्त्रदस्तन्त्रदश्चैव सुराणां च चतुर्गुणः ॥
॥ १२ ॥ नारायणश्च भगवान्गुरुः प्रत्यक्ष ईश्वरः ॥ उद्देशे दीयते तस्मै सुरायेति श्रुतौ श्रुतम् ॥ १३ ॥ प्रत्यक्षभोक्ता स्वगुरुः स्वयं
देही जनार्दनः ॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुरेव स्वयं शिवः ॥ १४ ॥ गुरौ च सर्वदेवाश्च तिष्ठन्ति सततं मुदा ॥ गुरौ तुष्टे हरिस्तुष्टो
यस्मिंस्तुष्टे च देवताः ॥ १५ ॥ गुरुः पुत्रसमं स्नेहं शिष्येषु न करिष्यति ॥ लभते ब्रह्महत्यां च भुंक्ते कृत्वा च नाशिषम् ॥ १६ ॥
स्वधर्मनिरतो विप्रो ब्राह्मणश्च सदा शुचिः ॥ विष्णुसेवी सदा विप्रस्तदन्योऽप्यशुचिः सदा ॥ १७ ॥ ब्राह्मणो वृषवाहश्च
शूद्राणां सूपकारकः ॥ ब्राह्मणो देवलश्चैव सन्ध्याहीनश्च दुर्बलः ॥ १८ ॥ ब्राह्मणश्च दिवाशायी शूद्रश्राद्धान्नभोजनः ॥
शूद्राणां शवदाही च ते च शूद्रसमा द्विजाः ॥ १९ ॥ शालग्राममहामन्त्रं कृत्वा पूजां विधानतः ॥ भुंक्ते नैवेद्यशेषं च तत्पादो
दकमेव च ॥ २० ॥ हरेः पादोदकं पीत्वा तीर्थस्नायी भवेन्नरः ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ २१ ॥

स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ॥ शालग्रामशिलातोयैर्योऽभिषेकं समाचरेत् ॥ २२ ॥ गङ्गाजलाद्दशगुणं शालग्रामजलं
व्रज ॥ नित्यं भुङ्क्ते च यो विप्रो जीवन्मुक्तः सुरैः समः ॥ २३ ॥ विप्राणां नित्यकृत्यं च विष्णोर्नैवेद्यभोजनम् ॥ यत्नेन पूजनं
तस्य तत्पादोदकसेवनम् ॥ २४ ॥ नित्यं त्रिसन्ध्यं कुरुते भक्त्या च मम पूजनम् ॥ एकादश्यां न भुङ्क्ते च मम वै जन्म
वासरे ॥ २५ ॥ शिवरात्रौ च हे तात श्रीरामनवमीदिने ॥ न च भुङ्क्ते व्रती यो हि जीवन्मुक्तो हि स द्विजः ॥ २६ ॥ पृथि
व्यां यानि तीर्थानि तस्य पादेन तानि च ॥ विप्रपादोदकं पीत्वा तीर्थस्नायी भवेन्नरः ॥ २७ ॥ विप्रपादोदकक्लिन्ना यावत्तिष्ठति
मेदिनी ॥ तावत्पुष्करपत्रेषु पिबन्ति पितरो जलम्॥२८॥ विष्णुप्रसादभोजी च पवित्रां कुरुते महीम् ॥ तीर्थानि च नारांश्चैव जीव
न्मुक्तो हि स द्विजः ॥ २९ ॥ सर्वतीर्थेषु स स्नातो व्रतानां च फलं लभेत् ॥ पदेपदेऽश्वमेधस्य लभते निश्चितं फलम्॥ ३०॥वह्नि
वायुसमः पूतस्तेजसा भास्करोपमः ॥ यमदूतं यमं चैव स च स्वप्ने न पश्यति॥ ३१ ॥ वैकुण्ठे मोदते सोऽपि पार्षदो हरिणा सह ॥
न भवेत्तस्य पातो हि विप्रस्य हरिसेविनः॥ ३२॥विष्णुमन्त्रोपासकश्च स एव वैष्णवो द्विजः॥ब्राह्मणो वैष्णवः प्राज्ञो न हि तस्मात्परः
पुमान् ॥३३॥ वेदोक्तो वा पुराणोक्तस्तन्त्रोक्तो वा मुनिः शुचिः॥विचारतो गृहीत्वा तं शैवः शाक्तश्च वैष्णवः॥३४॥गुरुवक्त्राद्विष्णुम
न्त्रो यस्य कर्णे विशत्ययम् ॥ तं वैष्णवं महापूतं प्रवदन्ति मनीषिणः॥३५॥ मन्त्रग्रहणमात्रेण जीवन्मुक्तो भवेन्नरः॥भित्त्वा ब्रह्माण्ड
मखिलं यास्यत्येव हरेः पदम् ॥३६॥ पूर्वान्सप्त परान्सप्त सप्त मातामहादिकान् ॥ सोदरानुद्धरेद्भक्तस्तत्प्रसूं तत्प्रसूं तथा॥३७॥जपे
न्नारायणं क्षेत्रे पुरश्चरणपूर्वकम् ॥ पुरुषाणां सहस्रं च लीलयाऽऽत्मानमुद्धरेत् ॥३८॥ मन्त्रग्रहणमात्रेण फलमेतद्व्रजेश्वर॥पुरश्चरणसं
पर्कात्पुरुषाणां शतंशतम् ॥ ३९॥ एकान्तिको वैष्णवश्च पुंसां लक्षं समुद्धरेत् ॥ क्रिया विष्णुपदे यस्य संकल्पाश्च बहिष्कृताः
॥ ४० ॥ द्विजाः सुरा मम प्राणा भक्तः प्राणात्परः प्रियः ॥ विश्वेषु प्रियपात्रेषु न मे भक्तात्परः प्रियः॥४१॥तेजीयांसं गुरुं दृष्ट्वा
सर्वत्र रक्षितुं क्षमम् ॥ करोति मन्त्रग्रहणं तस्माद्भूयाद्विचक्षणः ॥ ४२ ॥ वयोहीनाज्ज्ञानहीनाद्विद्याहीनात्तथैव च ॥ जातिहीनाद्गुरो

मन्त्रं गृह्णीयान्न कदाचन ॥ ४३ ॥ शास्त्रार्थं चाक्षतं मन्त्रं न गृह्णीयात्कदाचन ॥ मूर्खादाश्रमहीनाच्च पितुः संन्यासिनस्तथा ॥ ४४ ॥ रोगिणो वंशहीनाच्च भार्याहीनात्तथैव च ॥ मंत्रक्षिप्तात्तथा मन्त्रं न गृह्णीयात्कदाचन ॥ ४५ ॥ विष्णुमन्त्रं न गृह्णीयाद्विष्णुभक्तिविहीनतः ॥न च शैवान्न शाक्ताच्च गृह्णीयाद्वैष्णवाद्द्विजात् ॥४६॥ वयोहीनात्तथाऽल्पायुर्ज्ञानहीनादपंडितात् ॥ विद्याहीनाद्भवेन्मूढो जातिहीनात्क्षयो भवेत् ॥ ४७ ॥ मूर्खान्मूर्खो भवेत्सद्यो दुःखी स्वाश्रमहीनतः ॥ यशोहानिः पितुश्चैव मृत्युः संन्यासिनस्तथा ॥ ४८ ॥ रोगिणो व्याधियुक्तश्च निर्वंशो वंशहीनतः ॥ भार्याहीनोऽपि स्त्रीहीनान्मत्रक्षिप्तात्तु तत्समः ॥४९॥ विष्णुभक्तिविहीनाच्च भक्तिहीनो भवेन्नरः ॥ शैवाच्छाक्ताद्गृहीत्वा च हरौ भक्तिर्न वर्द्धते ॥ ५० ॥ ब्राह्मणो वैष्णवः शुद्धः पक्वान्नं दातुमीश्वरः ॥ पक्वान्नं हरये दातुमक्षमश्चेतरो जनः ॥ ५१ ॥ ओंकारोच्चारणाद्धोमाच्छालग्रामशिलार्चनात् ॥ मह्यं पक्वान्नदानाच्च विप्रादन्यो व्रजेदधः ॥ ५२ ॥ उदासीनाद्दुराचारान्न गृह्णीयान्मनुं सुधीः ॥ दैवाद्यदि च गृह्णीयाद्धनहीनो भवेद्ध्रुवम् ॥ ५३ ॥ ब्राह्मणानां सदा भक्ष्यं हविष्यं च निरामिषम् ॥ आमिषस्य परित्यागात्सूर्यवत्तेजसा भवेत् ॥ ५४ ॥ नित्यं नूतनभाण्डेन कर्तव्यः पाक एव च ॥ अथवा पक्षपर्यंतं ततस्त्याज्यं मनीषिभिः ॥ ५५ ॥ स्थानं सुसंस्कृतं कृत्वा पाकं निर्वर्त्य पूजकः॥स्थाने परिष्कृते विप्रो दत्त्वा मह्यं च भक्तितः ॥ ५६ ॥ तदा निवेद्य भुक्त्वा च दत्त्वा विप्राय सादरम् ॥ अनिवेद्य च भुक्त्वा च सुरापीतिर्भवेद्द्विजः ॥ ५७ ॥ चन्द्रसूर्योपरागे वै वाशौचे मृतजातयोः ॥ स्पृष्टेनाशुचिना सद्यः पाकभाण्डं परित्यजेत् ॥५८॥ भ्रष्टद्रव्यं तथाऽन्नं च धृत्वा धौते च वाससी ॥ पादप्रक्षालनं कृत्वा भुक्त्वा स्थाने परिष्कृते॥५९॥द्विर्भोजनं न कर्तव्यं स्थिते सूर्ये द्विजातिभिः॥निष्फलं तद्भवेत्कर्म भुक्त्वा च नरकं व्रजेत् ॥६०॥ यात्रां युद्धं नदीतीरं पुनर्भोजनमैथुने ॥ वर्जयेच्छ्राद्धदिवसे हविष्याशी च संयमी ॥ ६१ ॥ द्विजाय विष्णुभक्ताय पात्रं दद्याद् बुधाय च ॥ वृषलीपतये चैव न दद्याच्छूद्रयाजिने ॥ ६२ ॥ सन्ध्याहीनाय दुष्टाय वृषवाहाय यत्नतः ॥ शुकविक्रयिणे चैव देवलाय कदाचन ॥ ६३॥ प्रदत्तं पात्रमेतेभ्यो ब्राह्मणं नरकं नयेत् ॥पात्रं भुक्त्वा तद्दिवसे मैथुनान्नरकं व्रजेत् ॥६४॥ सर्वेभ्यः

पातकी तात कन्याविक्रयकारकः ॥ मूल्यं गृहीत्वा यो दद्यात्स महारौरवं व्रजेत् ॥ ६५ ॥ कन्यालोमप्रमाणान्तं वर्षं च पितृभिः सह ॥ कुम्भीपाके पच्यते च पुत्रश्चापि पुरोहितः ॥ ६६ ॥ तस्मात्कन्यां सुपुत्राय दानं कुर्याद्विचक्षणः ॥ शूद्रवद्ब्राह्मणेभ्यश्च नैव तद्वंशजाय च ॥६७॥ विप्रवैष्णवयोर्धर्मः कथितश्च व्रजेश्वर ॥ यदुक्तं च पुराणैश्च चतुर्भिः श्रुतिभिस्तथा ॥६८॥ द्विजार्चनं क्षत्रियाणां तथा नारायणार्चनम् ॥ राज्यानां पालनं चैव रणे निर्भयता तथा ॥६९॥ नित्यं दानं ब्राह्मणेभ्यः शरणागतरक्षणम् ॥ पुत्रतुल्यं प्रजानां च दुःखिनां परिपालनम् ॥ ७० ॥ शस्त्रास्त्राणां च नैपुण्यं रणे शौण्डीर्यमेव च ॥ तपश्च धर्मकृत्यं च यत्नतः कुरुते सदा॥७१॥ पण्डितं नीतिशास्त्रज्ञं नित्यं च परिपालयेत् ॥ नियोजयेत्सभामध्ये नित्यं सद्भिश्च संयुते ॥ ७२ ॥ हस्त्यश्वरथपादातं सेनाङ्गं च चतुष्टयम् ॥ पालयेद्यत्नतो नित्यं यशस्वी च प्रतापवान् ॥ ७३ ॥ रणे निमन्त्रितश्चैव दाने न विमुखो भवेत् ॥ रणे वा यस्त्यजेत्प्राणांस्तस्य स्वर्गो यशस्करः ॥ ७४ ॥ वैश्यानामपि वाणिज्यमीश्वरः कृषिपालने ॥ विप्रदेवार्चनं दानं तपस्या व्रतसेवनम् ॥ ७५ ॥ विप्राणामर्चनं नित्यं शूद्रधर्मो विधीयते ॥ तत्कृषी तद्धनग्राही शूद्रश्चाण्डालतां व्रजेत् ॥७६॥ गृध्रः कोटिसहस्राणि शतजन्मानि सूकरः॥ श्वापदः शतजन्मानि शूद्रो विप्रधनापहः ॥७७॥ यः शूद्रो ब्राह्मणीगामी मातृगामी स पातकी ॥ कुम्भीपाके पच्यते स यावद्वै ब्रह्मणः शतम् ॥ ७८ ॥ कुम्भीपाके तप्ततैले भुक्तः सर्पैरहर्निशम् ॥ शब्दं च विकृताकारं कुरुते यमताडनात् ॥ ७९ ॥ ततश्चाण्डालयोनिः स्यात्सप्तजन्मसु पातकी ॥ सप्तजन्मसु सर्पश्च जलौकाः सप्तजन्मसु ॥८०॥ जन्मकोटिसहस्रं च विष्ठायां जायते कृमिः ॥ पुंश्चलीनां योनिकृमिः स भवेत्सप्तजन्मसु ॥८१॥ गवां व्रणकृमिः स्याच्च पातकी सप्तजन्मसु ॥ योनौयोनौ भ्रमत्येवं न पुनर्जायते नरः ॥ ॥ ८२ ॥ संन्यासिनां च यो धर्मो मन्मुखाच्च निशामय ॥ दण्डग्रहणमात्रेण नरो नारायणो भवेत् ॥ ८३ ॥ पूर्वकर्माणि दग्ध्वा च परकर्मनिकृन्तनम् ॥ कुरुते चिन्तयेन्मां च ह्यायाति मम मन्दिरम् ॥ ८४ ॥ संन्यासिनः पदस्पर्शात्सद्यः पूता वसुन्धरा॥सद्यः पुनन्ति तीर्थानि वैष्णवस्य यथा व्रज॥८५॥संन्यासिनश्च स्पर्शेन निष्पापो जायते नरः॥संन्यासिनं भोजयित्वा चाश्वमेधफलं लभेत्॥८६॥

नत्वा च कामतो दृष्ट्वा राजसूयफलं लभेत् ॥ फलं संन्यासिनां तुल्यं यतीनां ब्रह्मचारिणाम् ॥ ८७ ॥ संन्यासी याति सायाह्ने क्षुधितो गृहिणां गृहम् ॥ सदन्नं वा कदन्नं वा तद्दत्तं नैव वर्जयेत् ॥ ८८ ॥ न याचते च मिष्टान्नं न कुर्यात्कोपमेव च ॥ न धनग्रहणं कुर्यादेकवासा निरीहितः ॥ ८९ ॥ शीतग्रीष्मसमानश्च लोभमोहविवर्जितः ॥ तत्र स्थित्वैकरात्रं च प्रातरन्यत्स्थलं व्रजेत् ॥ ॥ ९० ॥ यानमारोहणं कृत्वा गृहीत्वा गृहिणो धनम् ॥ गृहं कृत्वा गृही रम्यात्स्वधर्मात्पतितो भवत् ॥९१॥ कृत्वा च कृषिवाणिज्यं कुवृत्तिं कुरुते च यः ॥ स संन्यासी हृताचारः स्वधर्मात्पतितो भवेत् ॥ ९२ ॥ अशुभं च शुभं वाऽपि स्वकर्म कुरुते यदि ॥ बहिष्कृतः स्वधर्मी वाऽप्युपहास्यश्च वै भवेत् ॥ ९३ ॥ ब्राह्मणी पतिहीना या भवेन्निष्कामिनी सदा ॥ एकभुक्ता दिनांते सा हविष्यान्नरता सदा ॥ ९४ ॥ न धत्ते दिव्यवस्त्रं च गन्धद्रव्यं सुतैलकम् ॥ स्रजं च चन्दनं चैव शङ्खसिन्दूरभूषणम् ॥९५॥ त्यक्त्वा मलिनवस्त्रास्यान्नित्यं नारायणं स्मरेत् ॥ नारायणस्य सेवां च कुरुते नित्यमेव च ॥ ९६ ॥ तन्नामोच्चारणं शश्वत्कुरुते नान्यभक्तितः ॥ पुत्रतुल्यं च पुरुषं सदा पश्यति धर्मतः ॥ ९७ ॥ मिष्टान्नं न च भुङ्क्ते सा न कुर्याद्विभवं व्रज ॥ एकादश्यां न भोक्तव्यं कृष्णजन्माष्टमीदिने ॥ ९८ ॥ श्रीरामस्य नवम्यां तु शिवरात्रौ पवित्रया ॥ अघोरायां च प्रेतायां चन्द्रसूर्योपरागयोः ॥ ९९ ॥ भ्रष्टं द्रव्यं परित्यज्य भुज्यते परमेव च ॥ ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम् ॥ १०० ॥ संन्यासिनां च गोमांससुरातुल्यं श्रुतौ श्रुतम् ॥ रक्तशाकं मसूरं च जम्बीरं पर्णमेव च ॥ १ ॥ अलाबुर्वर्तुलाकारा वर्जनीया च तैरपि ॥ पर्यङ्कशायिनी नारी विधवा पातयेत्पतिम् ॥ ॥ २ ॥ यानमारोहणं कृत्वा विधवा नरकं व्रजेत् ॥ न कुर्यात्केशसंस्कारं गात्रसंस्कारमेव च ॥ ३ ॥ केशवेणी जटारूपं तत्क्षौरं तीर्थकं विना ॥ तैलाभ्यङ्गं न कुर्वीत नहि पश्यति दर्पणम् ॥ ४ ॥ मुखं च परपुंसां च यात्रां नृत्यं महोत्सवम् ॥ नर्तनं गायनं चैव सुवेषं पुरुषं शुभम् ॥ ५ ॥ शृणुयाच्च सतां धर्मं सामवेदनिरूपितम् ॥ परमार्थं परं चैव निबोध कथयामि ते ॥६॥ अध्यापनमध्ययनं शिष्याणां परिपालनम् ॥ गुरूणां सेवनं नित्यं द्विजदेवार्चनं तथा ॥ ७ ॥ सिद्धान्तशास्त्रनैपुण्यं भावनं स्वात्मतोषणम् ॥ व्याख्यानं

परिशुद्धं च ग्रन्थाभ्यस्तं च संततम् ॥८॥ व्यवस्थापरिशुद्ध्यर्थं विचारो वेदसंमतः ॥ शास्त्रार्थाचरणं चैव कर्तव्यं स्वयमेव च ॥९॥
देवाह्निकेषु नैपुण्यं वेदाचरणमीप्सितम् ॥ वेदोक्तभक्षणं चैव पवित्राचरणं सदा ॥ ११० ॥ पतिव्रतानां यं धर्मं तन्निबोध व्रजेश्वर ॥
नित्यं तु भर्तृश्यौत्सुक्यात्तत्पादोदकमीप्सितम् ॥ ११ ॥ भक्तिभावेन सततं भोक्तव्यं तदनुज्ञया ॥ व्रतं तपस्यां देवार्चां परित्यज्य
प्रयत्नतः ॥ १२ ॥ कुर्याच्चरणसेवां च स्तवनं परितोषणम् ॥ तदाज्ञारहितं कर्म न कुर्याद्वैरतः सती ॥ १३ ॥ नारायणात्परं
कान्तं ध्यायते सततं सती ॥ परपुंसां मुखं चैव सुवेषपुरुषं परम् ॥ १४ ॥यात्रामहोत्सवं नृत्यं नर्तनं गायनं व्रज ॥ परक्रीडां
च सततं न हि पश्यति सुव्रता १५ ॥ यद्भक्ष्यं स्वामिनो नित्यं तदेवमपि योषिताम् ॥ नहि त्यजेत्तु तत्सङ्गं क्षणमेव च
सुव्रता ॥ १६ ॥ उत्तरे नोत्तरं दद्यात्स्वामिनश्च पतिव्रता ॥ न कोपं कुरुते शुद्धा ताडिता चापि कोपतः ॥ १७ ॥ क्षुधितं
भोजयेत्कान्तं दद्यात्पानं च भोजनम् ॥ न बोधयेत्तं निद्रालुं प्रेरयेन्नैव कर्मसु ॥ १८ ॥ पुत्राणां च शतगुणं स्नेहं
कुर्य्यात्पतिं सती ॥ पतिर्बन्धुर्गतिर्भर्ता दैवतं कुलयोषितः ॥ १९ ॥ शुभं दृष्ट्वा सुधातुल्यं कान्तं पश्यति सुन्दरी ॥ सस्मितं
वदनं कृत्वा भक्तिभावेन यत्नतः ॥ १२० ॥ पुरुषाणां सहस्रं च सती स्त्री च समुद्धरेत् ॥ पतिः पतिव्रतानां च मुच्यते सर्व
पातकात् ॥ २१ ॥ नास्ति तेषां कर्मभोगः सतीनां व्रततेजसाम् ॥ तया सार्धं च निष्कर्मी मोदते हरिमन्दिरे ॥ २२ ॥ पृथिव्यां यानि
तीर्थानि सतीपादेषु तान्यपि ॥ तेजश्च सर्वदेवानां मुनीनां च सतीषु च ॥ २३ ॥ तपस्विनां तपः सर्वं व्रतिनां यत्फलं व्रज ॥
दाने फलं यद्दातॄणां तत्सर्वं तासु संततम् ॥२४॥ स्वयं नारायणः शंभुर्विधाता जगतामपि ॥ सुराः सर्वे च मुनयो भीतास्ताभ्यां
च संततम् ॥ २५ ॥ सतीनां पादरजसा सद्यः पूता वसुंधरा ॥ पतिव्रतां नमस्कृत्य मुच्यते पातकान्नरः ॥ २६ ॥ त्रैलोक्यं भस्म
सात्कर्तुं क्षणेनैव पतिव्रता ॥ स्वतेजसा समर्था सा महापुण्यवती सदा ॥ २७ ॥ सतीनां च पतिः साधुः पुत्रो निःशङ्क एव च ॥
न हि तस्य भयं किंचिद्देवेभ्यश्च यमादपि ॥ २८ ॥ शतजन्मपुण्यवतां गेहे जाता पतिव्रता ॥ पतिव्रताप्रसूः पूता जीवन्मुक्तः पिता

तथा ॥ २९ ॥ सती स्त्री प्रातरुत्थाय त्यक्त्वा च रात्रिवाससम् ॥ भर्तारं च नमस्कृत्य करोति स्तवनं मुदा ॥ ३० ॥ गृहकार्यं ततः कृत्वा स्नात्वा धौते च वाससी ॥ गृहीत्वा शुक्लपुष्पं च भक्तितः पूजयेत्पतिम् ॥ ३१ ॥ स्नापयित्वा सुपूतेन जलेन निर्मलेन च ॥ तस्मै दत्त्वा धौतवस्त्रं तत्पादौ क्षालयेन्मुदा ॥ ३२ ॥ आसने वासयित्वा च दत्त्वा भाले च चन्दनम् ॥ सर्वाङ्गलेपनं कृत्वा दत्त्वा माल्यं गलेऽपि च ॥ ३३ ॥ सामवेदोक्तमन्त्रेण भोगद्रव्यैः सुधोपमैः ॥ संपूज्य भक्तितः कान्तं स्तुत्वा च प्रणमेन्मुदा ॥ ३४ ॥ ओं नमः कान्ताय शान्ताय सर्वदेवाश्रयाय स्वाहा ॥ इत्यनेनैव मन्त्रेण दत्त्वा पुष्पं च चन्दनम् ॥ ३५ ॥ पाद्यार्घ्यं धूपदीपौ च वस्त्रं नैवेद्यमुत्तमम् ॥ जलं सुवासितं शुद्धं ताम्बूलं च सुवासितम् ॥ ३६ ॥ दत्त्वा स्तोत्रं पठेद्यद्यत्कृतं वै पाठ्यमेव च ॥ ओं नमः कान्ताय भर्त्रे च शिरश्चन्द्रस्वरूपिणे ॥ ३७ ॥ नमः शान्ताय दान्ताय सर्वदेवाश्रयाय च ॥ नमो ब्रह्मस्वरूपाय सतीप्राणपराय च ॥ ३८ ॥ नमस्याय च पूज्याय हृदाधाराय ते नमः ॥ पञ्चप्राणाधिदेवाय चक्षुषस्तारकाय च ॥ ज्ञानाधाराय पत्नीनां परमानन्दरूपिणे ॥ ॥ ३९ ॥ पतिर्ब्रह्मा पतिर्विष्णुः पतिरेव महेश्वरः ॥ पतिश्च निर्गुणाधारो ब्रह्मरूप नमोऽस्तु ते ॥ ४० ॥ क्षमस्व भगवन् दोषं ज्ञानाज्ञानकृतं च यत् ॥ पत्नीबन्धो दयासिन्धो दासीदोषं क्षमस्व मे ॥४१॥ इदं स्तोत्रं महापुण्यं सृष्ट्यादौ पद्मया कृतम् ॥ सरस्वत्या च धरया गङ्गया च पुरा व्रज ॥४२॥ सावित्र्या च कृतं पूर्वं ब्रह्मणे चापि नित्यशः ॥ पार्वत्या च कृतं भक्त्या कैलासे शंकराय च ॥४३॥ मुनीनां च सुराणां च पत्नीभिश्च कृतं पुरा ॥ पतिव्रतानां सर्वासां स्तोत्रमेतच्छुभावहम् ॥ ४४ ॥ इदं स्तोत्रं महापुण्यं या शृणोति पतिव्रता ॥ नरोऽन्यो वाऽपि नारी वा लभते सर्ववांछितम् ॥ ४५ ॥ अपुत्रो लभते पुत्रं निर्धनो लभते धनम् ॥ रोगी च मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ॥४६॥ पतिव्रता च स्तुत्वा च तीर्थस्नानफलं लभेत् ॥ फलं च सर्वतपसां व्रतानां च व्रजेश्वर ॥ ४७ ॥ इदं स्तुत्वा नमस्कृत्य भुंक्ते सा तदनुज्ञया ॥ उक्तः पतिव्रताधर्मो गृहिणां श्रूयतां व्रज ॥ ४८ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे भगवन्नन्दसंवादे त्र्यशीतितमोऽध्यायः ॥ ८३ ॥ श्रीभगवानुवाच ॥

द्विजदेवार्चनं चैव करोति सततं गृही ॥ स्वधर्माचरणं चैव चातुर्वर्ण्यं च नित्यशः ॥ १ ॥ कुर्वन्ति गृहिणामाशां सर्वे देवादय
स्तथा ॥ अकृत्वाऽतिथिपूजां च गृहस्थश्च सदाऽशुचिः॥२॥ पितरः कर्मकाले चातिथिकाले च देवताः ॥ सर्वे गृहस्थमायान्ति निपा
नमिव धेनवः॥ ३ ॥ समायाति प्रयत्नेन सायाह्ने क्षुधितोऽतिथिः ॥ पूजां कृत्वाऽऽशिषं लब्ध्वा प्रयाति गृहणो गृहात् ॥ ४ ॥ अकृ
त्वाऽथिपूजां च गृही भवति पातकी ॥ त्रैलोक्यजनितं पापं लभते नात्र संशयः ॥ ५ ॥ अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ॥
पितरस्तस्य देवाश्च वह्नयश्च तथैव च ॥६॥ निराशाः प्रतिगच्छन्ति गृहिणोऽतिथयो गृहात्॥स्त्रीघ्नैर्गोघ्नैः कृतघ्नैश्च ब्राह्मणैर्गुरुतल्पगैः
॥ ७ ॥ तुल्यदोषो भवत्येव येनातिथिरनर्चितः ॥ स्वात्मनः पातकं दत्त्वा पुण्यमादाय गच्छति ॥ ८ ॥ तस्मात्कृत्वा सर्वसेवां
देवादींश्च शुभाशयः ॥ पोष्याणां भरणं कृत्वा पश्चाद्भुङ्क्ते स धर्मवित् ॥ ९ ॥ यस्य माता गृहे नास्ति भार्या च पुंश्चली तथा ॥
अरण्यं तेन गन्तव्यमरण्याद्दुःखदं गृहम् ॥१०॥ पतिं द्वेष्टि सदा दुष्टा विषतुल्यं च पश्यति ॥ ददाति तस्मै नाहारं भर्त्सनं कुरुते
सदा ॥ ११ ॥ पूजितं मुनितुल्यं च सा च पापीयसी परम् ॥ संततं तृणवन्मत्वा न्यक्कारं कुरुते सदा ॥ १२ ॥ दुर्वाक्य
वह्निना दग्धो मृततुल्यश्च जीवति ॥ यावज्जीवनपर्यन्तं संप्राप्य दुष्टवंशजाम् ॥ १३ ॥ गृहिणीनां सदाचारं श्रूयतां तच्छ्रुतौ
श्रुतम् ॥ गृहिणी पतिभक्ता च देवब्राह्मणपूजिता ॥ १४ ॥ सा शुद्धा प्रातरुत्थाय नमस्कृत्य पतिं सुरम् ॥ प्राङ्गणे मङ्गलं
दद्याद्गोमयेन जलेन च ॥ १५ ॥ गृहकृत्यं च कृत्वा च स्नात्वाऽऽगत्य गृहं सती ॥ सुरं विप्रं पतिं नत्वा पूजयेद् गृहदेवताम् ॥१६॥
गृहकृत्यं सुनिर्वर्त्य भोजयित्वा पतिं सती ॥ अतिथिं पूजयित्वा च स्वयं भुंक्ते सुखं सती ॥ १७ ॥ पुत्रैश्च पूजितस्तातः
शिष्यैश्च पूजितो गुरुः ॥आज्ञया कुरुते कर्म पुत्रः शिष्यश्च भृत्यवत्॥१८॥ न प्रेरयेद् गुरुं तातं पुत्रं शिष्यश्च कर्मसु ॥ पित्रे च गुरवे
नित्यं सर्वस्वं च समर्पयेत् ॥ १९ ॥ न कुर्यान्नरबुद्धिं च गुरौ पितरि संततम् ॥ कृत्वा च नरबुद्धिं च ब्रह्महत्यां लभेद् ध्रुवम् ॥२०॥
मातरं पूजयेद्भक्त्या पितुश्चाप्यधिकां तथा ॥ मातुः परं गुरुं चैव पूजयेद्भक्तियोगतः ॥ २१ ॥ पिता माता गुरुर्भार्या शिष्यः पुत्रः स

दाऽक्षमः ॥ अनाथा भगिनी कन्या नित्यं पोष्या गुरुप्रिया ॥२२॥ एवं च कथितं तात सर्वेषां धर्ममुत्तमम् ॥ स्त्रीजातिर्वास्तवी शुद्धा ताश्च सर्वाः पतिव्रताः ॥ २३ ॥ सर्वा जातिरेकविधा चादौ सृष्टा च ब्रह्मणा ॥ ताः सर्वाः प्रकृतेरंशाः पवित्राः पण्डिताधिकाः॥२४॥ केदारकन्याशापेन स हि धर्मः क्षयं गतः॥तदा कोपेन धात्रा च कृत्या स्त्री च विनिर्मिता ॥२५॥ कृत्या स्त्री त्रिविधा जातिर्ब्रह्मणा निर्मिता पुरा॥उत्तमा प्रथमा सा च मध्यमा चाधमा व्रज ॥२६॥ उत्तमा पतिभक्ता सा किंचिद्धर्मसमन्विता॥प्राणान्तेऽपि न कुरुते तं जारमयशस्करम् ॥ २७ ॥ पूजयेत्सा यथा कान्तं तथा देवद्विजातिथीन् ॥ व्रतानि चोपवासांश्च कुरुते सर्वपूजनम् ॥२८॥ गुरुणा रक्षिता यत्नाज्जारं च न भजेद्भयात् ॥ सा कृत्रिमा मध्यमा च यथा किंचित्पतिं भजेत् ॥२९॥ स्थानं नास्ति क्षणं नास्ति नास्ति प्रार्थयिता नरः ॥ तेन हे नन्द तासां च सतीत्वमुपजायते॥३०॥अधमा परमा दुष्टाऽत्यन्ताऽसद्वंशजा तथा॥अधर्मशीला दुःशीला दुर्मुखा कलहान्विता ॥३१॥ पतिं भर्त्सयते नित्यं जारं च सेवते सदा ॥ दुःखं ददाति कान्ताय विषतुल्यं च पश्यति ॥३२॥ जारद्वारमुपायेन हन्ति कान्तं मनोहरम् ॥ धर्मिष्ठं च वरिष्ठं च गरिष्ठं च महीतले ॥ ३३ ॥ कामदेवसमं चापि जारं पश्यति कामतः शुभदृष्ट्या कटाक्षेण शश्वत्पापीयसी मुदा ॥३४॥ सुवेषं पुरुषं दृष्ट्वा युवानं रतिशूरकम् ॥ योनिः क्लिद्यति नारीणां कामिनीनां निरन्तरम् ॥३५॥ ददाति भर्त्रे नाहारं विषोक्तिं वक्ति संततम् ॥ अधर्मं चिन्तयेच्छश्वज्जारं च परमं मुदा ॥ ३६ ॥ गुरुभिर्भर्त्सिता सा च रक्षिता च शतेन च ॥ तथाऽपि जारं कुरुते नापि साध्या नृपैरपि ॥३७॥ नास्ति तस्याः प्रियं किंचित्सर्वं कार्यवशेन च ॥ गावस्तृणमिवारण्ये प्रार्थयन्ति नवंनवम् ॥३८॥ विद्युदाभा जले रेखा तस्याः प्रीतिस्तथैव च ॥ अधर्मयुक्ता सततं कपटं वक्ति निश्चितम् ॥ ३९ ॥ व्रते तपसि धर्मे च न मनो गृहकर्मणि ॥ न गुरौ न च देवेषु जारे स्निग्धं च चञ्चलम् ॥ ४० ॥ स्त्रीजातित्रिविधानां च कथा च कथिता मया ॥ भक्तानां त्रिविधानां च लक्षणं श्रूयतामिति ॥४१॥ तृणशय्यारतो भक्तो मन्नामगुणकीर्तिषु ॥ मनो निवेशयेत्त्यक्त्वा संसारसुखकारणम् ॥४२॥ ध्यायते मत्पदाब्जं च पूजयेद्भक्तिभावतः ॥ अहैतुकीं तस्य देवाः संकल्परहितस्य च ॥४३॥

सर्वसिद्धिं न वाञ्छन्ति तेऽणिमादिकमीप्सितम्॥ब्रह्मत्वममरत्वं वा सुरत्वं सुखकारणम् ॥४४॥ दास्यं विना नहीच्छन्ति सालोक्या
दिचतुष्टयम् ॥ नैव निर्वाणमुक्तिं च सुधापानमभीप्सितम् ॥ ४५ ॥ वाञ्छन्ति निश्चलां भक्तिं मदीयामतुलामपि ॥ स्त्रीपुंविभेदो ना
स्त्येव सर्वजीवेषु भिन्नता ॥४६॥ तेषां सिद्धेश्वराणां च प्रवराणां व्रजेश्वर ॥ क्षुत्पिपासादिकं निद्रालोभमोहादिकं रिपुम् ॥४७॥ त्य
क्त्वा दिवानिशं मां च ध्यायन्ते च दिगम्बराः ॥ स मद्भक्ततमो नन्द श्रूयतां मध्यमादिकम् ॥४८॥ नासक्तः कर्मसु गृही पूर्वप्राक्तन
तः शुचिः ॥ करोति सततं कर्म पूर्वकर्मनिकृन्तनम् ॥ ४९ ॥ न करोत्यपरं यत्नात्संकल्परहितः स च ॥ सर्वं कृष्णस्य यत्किंचिन्नाहं
कर्ता च कर्मणः ॥ ५० ॥ कर्मणा मनसा वाचा सततं चिन्तयेदिति ॥ न्यूनभक्तश्च तन्न्यूनः स च प्राकृतिकः श्रुतौ ॥ ५१ ॥ यमं
वा यमदूतं वा स्वप्नेऽपि न च पश्यति ॥ पुरुषाणां सहस्रं च पूर्वभक्तः समुद्धरेत् ॥५२॥ पुंसां शतं मध्यमश्च तच्चतुर्थं च प्राकृतः ॥
भक्तश्च त्रिविधस्तात कथितश्च तवाज्ञया ॥५३॥ ब्रह्माण्डरचनाख्यानं श्रूयतां सावधानतः ॥ ब्रह्माण्डरचनार्थं च भक्ता जानन्ति यत्न
तः ॥ ५४ ॥ मुनयश्च सुराः सन्तः किंचिज्जानन्ति दुःखतः ॥ जानामि विश्वं सर्वार्थं ब्रह्माऽनन्तो महेश्वरः ॥ ५५ ॥ धर्मः सनत्कुमा
रश्च नरनारायणावृषी ॥ कपिलश्च गणेशश्च दुर्गा लक्ष्मीः सरस्वती ॥ ५६ ॥ वेदश्च वेदमाता च सर्वज्ञा राधिका स्वयम् ॥ एते जा
नन्ति विश्वार्थं नान्यो जानाति कश्चन॥५७॥ वैषम्याथ च सुधियः सर्वे विज्ञातुमक्षमाः ॥ नित्याकाशो यथाऽऽत्मा च तथा नित्या
दिशो दश ॥ ५८ ॥ यथा नित्या च प्रकृतिस्तथैव विश्वगोलकः ॥ गोलोकश्च यथा नित्यस्तथा वैकुण्ठ एव च॥५९॥एकदा मयि
गोलोके रासे नित्यं प्रकुर्वति॥आविर्भूता च वामाङ्गाद्बाला षोडशवार्षिकी॥६०॥श्वेतचम्पकवर्णाभा शरच्चन्द्रसमप्रभा॥अतीव सुन्दरी
रामा रमणीनां परावरा ॥६१॥ ईषद्धास्यप्रसन्नास्या कोमलाङ्गी मनोहरा ॥ वह्निशुद्धांशुकाधाना रत्नाभरणभूषिता ॥६२॥ यथा जलद
पंक्तिश्च बलाकाभिर्विभूषिता॥सिन्दूरबिंदुना चारुचन्द्रचन्दनबिन्दुभिः॥६३॥कस्तूरीबिन्दुभिः साध सीमन्ताधःस्थलोज्ज्वला ॥ अमू
ल्यरत्ननिर्माणसुस्निग्धकिरणोज्ज्वला॥६४॥रत्नकुण्डलयुग्मेन गण्डस्थलसमुज्ज्वला ॥ कुङ्कुमालक्तकस्तूरीचारुचन्दनपत्रकैः॥६५॥

विचित्रैश्च सुचित्रैश्च सुकपोलस्थलोज्ज्वला॥खगेन्द्रचञ्चुविजितनासामौक्तिकशोभिता ॥६६॥ गजेन्द्रगण्डनिर्मुक्तमुक्ताभूषणभूषिता ॥
शुक्त्या विमुक्तमुक्ताभदन्तपंक्तिमनोहरा॥६७॥वलिताकलिताऽतीव पक्वबिम्बाधरा वरा॥शश्वत्पूर्णेन्दुनिन्दास्या पद्मनिन्दितलोचना६८
कृष्णसारनिभोद्भिन्नसुचारुकज्जलोज्ज्वला ॥ अमूल्यरत्ननिर्माणकेयूरकङ्कणोज्ज्वला ॥६९॥ मणीन्द्रराजिराजीभिः शङ्खयुग्मकरोज्ज्व
ला॥रत्नांगुलीयकैरेभिरमृतांगुलिभूषिता॥७०॥रत्नेन्द्रराजराजेन क्वणन्मञ्जीररञ्जिता ॥ रत्नपाशकराजीभिः पादांगुलिविराजिता ॥
॥७१॥ सुन्दरालक्तरागेण चरणाधःस्थलोज्ज्वला ॥ गजेन्द्रगामिनी रामा कामिनी वामलोचना ॥७२॥ मां ददर्श कटाक्षेण रमणी
रमणोत्सुका ॥ रासे संभूय रामा सा दधार पुरतो मम ॥७३॥ तेन राधा समाख्याता पुराविद्भिः प्रपूजिता ॥ प्रहृष्टा प्रकृतिश्चास्या
स्तेन प्रकृतिरीश्वरी ॥७४॥ शक्ता स्यात्सर्वकार्येषु तेन शक्तिः प्रकीर्तिता ॥ सर्वाधारा सर्वरूपा मङ्गलार्हा च सर्वतः ॥७५॥ सर्व
मङ्गलदक्षा सा तेन स्यात्सर्वमङ्गला ॥ वैकुण्ठे सा महालक्ष्मीर्मूर्तिभेदे सरस्वती ॥७६॥प्रसूय वेदान्विदिता वेदमाता च सा सदा ॥
सावित्री सा च गायत्री धात्री त्रिजगतामपि ॥७७॥ पुरा संहृत्य दुर्गं च सा दुर्गा च प्रकीर्तिता ॥ तेजसः सर्वदेवानामाविर्भूता पुरा
सती ॥७८॥ तेनाद्या प्रकृतिर्ज्ञेया सर्वासुरविमर्दिनी ॥ सर्वानन्दा च सानन्दा दुःखदारिद्र्यनाशिनी ॥ ७९ ॥ शत्रूणां भयदात्री च
भक्तानां भयहारिणी ॥ दक्षकन्या सती सा च शैलजातेति पार्वती ॥ ८० ॥ सर्वाधारस्वरूपा सा कलया सा वसुन्धरा ॥ कलया
तुलसी गङ्गा कलया सर्वयोषितः ॥८१॥ सृष्टिं करोमि च यया तात शक्त्या पुनः पुनः ॥ दृष्ट्वा तां रासमध्यस्थां मम क्रीडा तया
सह ॥ ८२ ॥ बभूव सुचिरं तात यावद्वै ब्रह्मणः शतम् ॥ अत्यद्भुतं कौतुकं च महाशृङ्गारमीक्षितम् ॥ ८३ ॥ तयोर्द्वयोर्घर्मराशिः
सुस्राव रासमण्डले ॥ तस्मान्मनोहरं जज्ञे नाम्नाऽऽकारसरोवरम् ॥८४॥ पपात घर्मधाराऽधो वेगेन विश्वगोलके ॥ बभूव जलपूर्णं
च ब्रह्माण्डानां च गोलकम् ॥८५॥ जलपूर्णं पुरा सर्वं सृष्टिशून्यं व्रजेश्वर ॥ शृङ्गारान्ते च तस्यां च वीर्याधानं मया कृतम् ॥८६॥
दधार गर्भं सा राधा यावद्वै ब्रह्मणः शतम् ॥ सुषुवे सा तदन्ते च डिम्भं च परमाद्भुतम् ॥८७॥ चुकोप देवी तं दृष्ट्वा रुरोद विषसाद

सा ॥ पादेन प्रेरयामास तमधो विश्वगोलके॥८८॥स पपात जले तात सर्वाधारो महान्विराट् ॥ दृष्ट्वाऽपत्यं जलस्थं च मया शप्ता
च सा पुरा ॥८९॥ अनपत्या च सा राधा मच्छापेन पुरा विभो ॥ तेन प्रभूताः क्रमतो दुर्गा लक्ष्मीः सरस्वती॥९०॥चतस्रः परिपूर्णा
स्ताः प्रसूताश्च सुनिश्चितम् ॥ देव्योऽन्याश्चापि कामिन्यस्ताः प्रसूता व्रजेश्वर ॥९१॥ कलया प्रभवो यासां कलांशांशेन वा व्रज ॥
जज्ञे महान्विराड्येन डिम्भेन कलयाऽऽश्रयः ॥ ९२ ॥ अमृतांगुष्ठपीयूषं मया दत्तं पपौ च सः ॥ जले स्थावररूपश्च शेते च निजकर्म
णः ॥ ९३ ॥ उपधानं जलं तल्पं तस्य योगबलेन च ॥ तस्य लोम्नां च कूपानि जलपूर्णानि संततम् ॥९४॥ प्रत्येकं क्रमतस्तेषु शेते
क्षुद्रविराट् पुनः ॥ सहस्रपत्रं कमलं जज्ञे क्षुद्रस्य नाभितः ॥९५॥ तत्र जज्ञे वरो ब्रह्मा तेनायं कमलोद्भवः ॥ तत्राविर्भूय स विधिश्चि
न्ताग्रस्तो बभूव सः ॥९६॥ कस्मादेहः क्व माता मे पिता वा क्व च बान्धवः ॥ दिव्यं त्रिलक्षवर्षं च बभ्राम कमलान्तरे ॥ ९७ ॥ ततो
दिव्यं पञ्चलक्षं सस्मार तपसा च माम् ॥ तदा मया दत्तमन्त्रं जजाप कमलान्तरे ॥९८॥ दिव्यसप्तवर्षलक्षं नियतं संयतः शुचिः ॥
तदा मत्तो वरं लब्ध्वा स्रष्टा सृष्टिं चकार सः ॥९९॥ मायया प्रतिब्रह्माण्डे ब्रह्मविष्णुशिवात्मकाः ॥ दिक्पाला द्वादशादित्या रुद्राश्चै
कादशापि च॥१००॥नवग्रहाष्टौ वसवो देवाः कोटित्रयं तथा ॥ ब्राह्मणक्षत्रविट्शूद्रा यक्षगन्धर्वकिन्नराः ॥१॥ भूतादयो राक्षसाश्चा
प्येवं सर्वं चराचरम् ॥ विश्वेविश्वे विनिर्माणाः स्वर्गाः सप्तक्रमेण च ॥२॥ सप्तसागरसंयुक्ता सप्तद्वीपा वसुन्धरा ॥ काञ्चनीभूमिसंयु
क्ता तमोयुक्तं स्थलं तथा ॥ ३ ॥ पातालाश्च तथा सप्त ब्रह्माण्डमेभिरेव च ॥ विश्वेविश्वे चन्द्रसूर्यौ पुण्यक्षेत्रं च भारतम् ॥ ४ ॥
तीर्थान्येतानि सर्वत्र गङ्गादीनि व्रजेश्वर ॥ यावन्ति लोमकूपानि महाविष्णोः क्रमेण च ॥५॥ विश्वान्येव हि तावन्ति ह्यसंख्याता
नि च ध्रुवम् ॥ विश्वेषामूर्ध्वभागे च वैकुण्ठश्च निराश्रयः ॥६॥ मदिच्छया विनिर्माणा वेदाः कथितुमक्षमाः ॥ कुयोगिनामदृष्टश्चा
भक्तानां च विनिश्चितम् ॥ ७ ॥ तस्मादुपरि गोलोकः पञ्चाशत्कोटियोजनः ॥ वायुना धार्यमाणश्च विचित्रः परमाश्रयः ॥ ८ ॥
अतीव रम्यनिर्माणो नित्यरूपो मदिच्छया ॥ शतशृङ्गेण शैलेन पुण्यवृन्दावनेन च ॥९॥ सुरासमण्डलेनापि नद्या विरजया युतः ॥

कोटियोजनविस्तीर्णा प्रस्थेन विरजा व्रज॥११०॥ दैर्घ्यं तस्याः शतगुणं परितः परमा शुभा ॥ अमूल्यरत्ननिकरैर्हीरमाणिक्ययोस्तथा ॥ ११ ॥ मणीनां कौस्तुभादीनामसंख्यानां मनोहरा ॥ अमूल्यरत्ननिर्माणं तत्रापि प्रतिमन्दिरम् ॥ १२ ॥ मनोहरं च प्राकारमदृष्टं विश्वकर्मणा ॥ गोपीभिर्गोपनिकरैर्वेष्टितं कामधेनुभिः ॥ १३ ॥ कल्पवृक्षैः पारिजातैरसंख्यैश्च सरोवरैः ॥ पुष्पोद्यानैः कोटिभिश्च संवृतं रासमण्डलम् ॥ १४ ॥ वेष्टितं वेष्टितैर्गोपैर्मन्दिरैः शतकोटिभिः ॥ रत्नप्रदीपयुक्तैश्च पुष्पतल्पसमन्वितैः ॥ १५ ॥ सुगन्धिचन्दनामोदैः कस्तूरीकुङ्कुमान्वितैः ॥ क्रीडोपयुक्तैर्भोगैश्च ताम्बूलैर्वासितैर्जलैः ॥ १६ ॥ धूपैः सुरभिरम्यैश्च माल्यैश्च रत्नदर्पणैः ॥ रक्षकै रक्षितं शश्वद्राधादासीत्रिकोटिभिः ॥ १७ ॥ अमूल्यरत्नाभरणैर्वह्निशुद्धांशुकैरपि ॥ लक्षमत्तगजेन्द्राणां वेष्टितं च बलैः क्रमात् ॥ १८ ॥ नवयौवनसंपन्नै रूपैर्निरुपमैरपि ॥ रम्यं च वर्तुलाकारं चन्द्रबिम्बं यथा व्रज ॥ १९ ॥ अमूल्यरत्नरचितं दशयोजनविस्तृतम् ॥ कस्तूरीकुङ्कुमै रम्यैः सुगन्धिचन्दनार्चितम्॥१२०॥आवृतं मङ्गलघटं फलपल्लवसंयुतैः॥दधिलाजैश्च पर्णैश्च स्निग्धदूर्वाङ्कुरैः फलैः ॥२१॥ श्रीरामकदलीस्तम्भैरसंख्यैश्च मनोहरैः ॥ पट्टसूत्रनिबद्धैश्च स्निग्धैश्चन्दनपल्लवैः ॥ २२ ॥ चन्दनासक्तमाल्यैश्च भूषणैश्च विभूषितम् ॥ अमूल्यरत्नरचितं शतशृङ्गमनोहरम् ॥ २३ ॥ कोटियोजनमूर्ध्वं च दैर्घ्यं दशगुणोत्तरम् ॥ शैलप्रस्थपरिमितं पञ्चाशत्कोटियोजनम् ॥ २४ ॥ अतीव कमनीयं च वेदानिर्वचनीयकम् ॥ प्राकारमिव तस्यापि गोलोकस्य मनोहरम् ॥ २५ ॥ परितो वेष्टितं रम्यं हीरहारसमन्वितम् ॥ तत्र वृंदावनं रम्यं युक्तं चन्दनपादपैः ॥२६॥ कल्पवृक्षैश्च रम्यैश्च मन्दारैः कामधेनुभिः ॥ शोभितं शोभनाढ्यैश्च पुष्पोद्यानैर्मनोहरैः ॥ २७ ॥ क्रीडासरोवरै रम्यैः सुरम्यै रतिमन्दिरैः ॥ अतीव रम्यं रहसि रासयोग्यस्थलान्वितम् ॥ २८ ॥ रक्षितं रक्षकै रम्यैरसंख्यैर्गोपिकागणैः ॥ परितो वर्तुलाकारं त्रिलक्षयोजनं वरम् ॥ २९ ॥ षट्पदध्वनिसंयुक्तं पुंस्कोकिलरुतान्वितम् ॥ तत्राक्षयो वटो रम्यो रहस्ये बहुविस्तृतः ॥ १३० ॥ सहस्रयोजनोर्ध्वश्च परितश्च चतुर्गुणः ॥ गोपीनां कल्पवृक्षश्च सर्ववाञ्छाफलप्रदः ॥३१॥ क्रीडान्वितैरावृतश्च राधादासीत्रिलक्षकैः ॥ विरजातीरनीराणां वायुना शीतलेन च ॥३२॥

पुष्पान्वितेन मन्देन पवित्रश्च सुगन्धिना ॥ दासीगणैरसंख्यैश्च वृन्दावनविनोदिनी ॥ ३३ ॥ तत्र क्रीडति राधा सा मम प्राणाधिदेवता ॥ सेयं श्रीदामशापेन वृषभानसुताऽधुना ॥ ३४ ॥ ब्रह्मादिदेवैः सिद्धेन्द्रमुनीन्द्रैः पूजिता व्रज ॥ सिद्धैर्गुणैर्बलैर्बुद्ध्या ज्ञानयोगैश्च विद्यया ॥ ३५ ॥ तात सर्वप्रकारेण वन्द्या मत्सदृशी प्रिया ॥ इत्येवं कथितं नन्द ब्रह्माण्डानां च वर्णनम्॥यथोचितं परिमितं किं भूयः श्रोतुमिच्छसि ॥ १३६ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे भगवन्नन्दसंवादे चतुरशीतितमोऽध्यायः ॥ ८४ ॥ नन्द उवाच ॥ वर्णानां च चतुर्णां च भक्ष्याभक्ष्यं च साम्प्रतम् ॥ विपाकं कर्मणां चैव सर्वेषां प्राणिनामपि ॥१॥ कथयस्व महाभाग कारणानां च कारणम् ॥ त्वत्तोऽन्यं कं च पृच्छामि नितान्तं सन्तमीश्वरम् ॥२॥ श्रीभगवानुवाच ॥ भक्ष्याभक्ष्यं चतुर्णां च वर्णानां च यथोचितम् ॥ वेदोक्तं श्रूयतां तात सावधानं निशामय ॥ ३ ॥ अयस्पात्रे पयःपानं गव्यं सिद्धान्नमेव च ॥ भ्रष्ट्रादिकं मधु गुडं नालिकेरोदकं तथा ॥४॥ फलं मूलं च यत्किञ्चिदभक्ष्यं मनुरब्रवीत् ॥ दग्धान्नं तप्तसौवीरमभक्ष्यं ब्रह्मनिर्मितम् ॥ ५ ॥ नालिकेरोदकं कांस्ये ताम्रपात्रे स्थित मधु ॥ गव्यं च ताम्रपात्रस्थं सर्वं मद्यं घृतं विना ॥ ६ ॥ ताम्रपात्रे पयःपानमुच्छिष्टं घृतभोजनम् ॥ दुग्धं सलवणं चैव सद्यो गोमांसभक्षणम् ॥ ७ ॥ अभक्ष्यं मधुमिश्रं च घृतं तैलं गुडं तथा ॥ आर्द्रकं गुणसंयुक्तमभक्ष्यं श्रुतिसंमतम् ॥ ८ ॥ पीतशेषजलं चैव माघे च मूलकं तथा ॥ जपादिकं च शयने सदा प्राज्ञः परित्यजेत् ॥९॥ द्विर्भोजनं च दिवसे संध्ययोर्भोजनं तथा ॥ भक्ष्यं च रात्रिशेषे च ध्रुवं प्राज्ञः परित्यजेत् ॥१०॥ पानीयं पायसं चूर्णं घृतं लवणमेव च ॥ स्वस्तिकं गुडकं चैव क्षीरं तक्रं तथा मधु ॥ ११ ॥ हस्ताद्धस्तगृहीतं च सद्यो गोमांसमेव च ॥ कर्पूरं रौप्यपात्रस्थमभक्ष्यं श्रुतिसंमतम् ॥ १२ ॥ परिवेषणकारी चेद्वोत्कारं स्पृशते यदि ॥ अभक्ष्यं च तदन्नं च सर्वेषामेव संमतम् ॥ १३ ॥ नकुलानां गण्डकानां महिषाणां च पक्षिणाम् ॥ सर्पाणां सूकराणां च गर्दभानां विशेषतः ॥ १४ ॥ मार्जाराणां सृगालानां कुक्कुटानां व्रजेश्वर ॥ व्याघ्राणामपि सिंहानां त्याज्यं मांसं नृणां सदा ॥ १५ ॥ जलौकसां च नक्राणां गो

धिकानां तथैव च ॥ मण्डूकानां कर्कटीनां चुञ्चुकानां च निश्चितम् ॥ १६ ॥ गवां च चमरीणां च न कलौ मांसभक्षणम् ॥ हस्तिनां घोटकानां च नृणामेव च रक्षसाम् ॥ १७ ॥ दंशश्च मशकश्चैव मक्षिका च पिपीलिका ॥ अन्येषां च निषिद्धानां लोके वेदे व्रजेश्वर ॥ १८ ॥ वानराणां भल्लुकानां शरभाणां तथैव च ॥ निषिद्धं मृगनाभीनां गर्दभानां च मांसकम् ॥ १९ ॥ अभक्ष्यं महिषीणां च दुग्धं दधि घृतं तथा ॥ स्वस्तिकं च तथा तत्र विप्राणां नवनीतकम् ॥ २० ॥ मांसमुच्चैःश्रवसकं तस्य दुग्धादिकं तथा ॥ वर्णानां च चतुर्णां चाप्यभक्ष्यं च श्रुतौ श्रुतम् ॥ २१ ॥ अभक्ष्यमार्द्रकं चैव सर्वेषां च रवेर्दिने ॥ पर्युषितं जलं चान्नं विप्राणां दुग्धमेव च ॥ २२ ॥ वर्णानां च चतुर्णां चाप्यवीरान्नस्य भक्षणम् ॥ तदन्नं च सुरातुल्यं गोमांसाधिकमेव च ॥ २३ ॥ अवीरान्नं च यो भुंक्ते ब्राह्मणो ज्ञानदुर्बलः ॥ पितृदेवार्चनं तस्य निष्फलं मनुरब्रवीत् ॥ २४ ॥ ब्राह्मणानां वैष्णवानामभक्ष्यं मात्स्यमेव च ॥ इतरेषामभक्ष्यं च पञ्चपर्वसु निश्चितम् ॥ २५ ॥ पितृदेवावशेषे च भक्ष्यं मांसं न दूषितम् ॥ पञ्चपर्वसु त्याज्यं च सर्वेषां मनुरब्रवीत् ॥ २६ ॥ असंस्कृतं च लवणं तैलं चाभक्ष्यमेव च ॥ भक्ष्यं पवित्रं सर्वेषां व्यञ्जनं वह्निसंस्कृतम् ॥ २७ ॥ एकहस्ते घृतं तोयमभक्ष्यं सर्वसंमतम् ॥ आविलं कृमियुक्तं चापरिशुद्धं च निर्मलम् ॥ २८ ॥ अभक्ष्यं ब्राह्मणानां च वैष्णवानां विशेषतः ॥ अनिवेद्यं हरेरेव यतीनां ब्रह्मचारिणाम् ॥ २९ ॥ पिपीलिकामिश्रितं च मधु गव्यं गुडं तथा ॥ यत्किंचिद्वस्तु वा तात न भक्ष्यं च श्रुतौ श्रुतम् ॥ ३० ॥ पक्षिभक्ष्यं कीटभक्ष्यं शुद्धं पक्वफलं तथा ॥ काकभक्ष्यमभक्ष्यं च सर्वेषां द्रव्यमेव च ॥ ३१ ॥ घृतपक्वं तैलपक्वं मिष्टान्नं शूद्रसंस्कृतम् ॥ अभक्ष्यं ब्राह्मणानां च शूद्रभक्ष्यं च पीठकम् ॥३२॥ सर्वेषामशुचीनां च जलमन्नं परित्यजेत् ॥ आशौचान्तात्परदिने शुद्धमेव न संशयः ॥ ३३ ॥ विपाकं कर्मणामेव दुष्करं श्रुतिसंमतम् ॥ भक्ष्याभक्ष्यं च कथितं यथाज्ञानं व्रजेश्वर ॥३४॥ क्रमाच्चतुर्षु वेदेषु चोक्तं मतचतुष्टयम् ॥ सर्वेषां सारभूतं च कथयामि पितः शृणु ॥ ३५ ॥ नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥ अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ॥ ३६ ॥ तीर्थानां च सुराणां च सहाय्यो न नृणामपि ॥ किंचि

द्भवति साहाय्यं कायव्यूहेन सर्वतः ॥ ३७ ॥ प्रायश्चित्तानि चीर्णानि निश्चितं मत्पराङ्मुखम् ॥ न निष्पुनन्ति हे तात सुराकुम्भमि
वापगाः ॥ ३८ ॥ प्रायश्चित्तेन पुण्येन न हि शुद्ध्यन्ति मानवाः ॥ सर्वारम्भेण वैश्येन्द्र दानेन योगतोऽपि वा ॥ ३९ ॥ शुभाशुभं च
यत्कर्म विना भोगान्न च क्षयः ॥ भोगेन शुद्धिमाप्नोति ततो मुक्तिर्भवेन्नृणाम् ॥ ४० ॥ न नष्टं दुष्कृतं कर्म सुकृतेन च कर्मणा ॥
न नष्टं सुकृतं कर्म कृतेन दुष्कृतेन च ॥ ४१ ॥ यज्ञेन तपसा वाऽपि व्रतेनानशनेन च ॥ तीर्थस्नानेन दानेन जपेन नियमेन च ॥
॥ ४२ ॥ भुवः प्रदक्षिणेनैव पुराणश्रवणेन च ॥ उपदेशेन पुण्येन पूजया गुरुदेवयोः ॥ ४३ ॥ स्वधर्माचरणेनैवातिथीनां पूजनेन
च ॥ ब्रह्मणां पूजनेनैव भोजनेन विशेषतः ॥ ४४ ॥ यद्दत्तमपि विप्राय तत्प्राप्तं पूर्णरूपतः ॥ बीजरूपं च तद्दानं क्षेत्ररूपं च ब्राह्मणः
॥ ४५ ॥ एकेन कर्मणा तात स्वर्गं प्राप्नोति मानवः ॥ कर्मणा न हि मोक्षं च तदेव मम सेवया ॥ ४६ ॥ स्वर्गं च सुकृतेनैव नरकं
दुष्कृतेन च ॥ व्याधिर्जन्म च योनौ च कुत्सितेन ततः शुचिः ॥ ४७ ॥ गोघ्नो यो ब्राह्मणानां च कामतश्चोपपातकी ॥ दन्दशूकत्व
माप्नोति गोलोमसमवर्षकम् ॥ ४८ ॥ सर्पेण भक्षितस्तेन ज्वालया गरलस्य च ॥ तृषितो व्यथितश्चैव निराहारः कृशोदरः ॥
॥ ४९ ॥ ततः कुण्डात्समुत्थाय गौर्भवेल्लोमवर्षकम् ॥ ततः कुष्ठी च चाण्डालो वर्षलक्षं ततो नरः ॥ ५० ॥ तदा भवेद्ब्राह्मणश्च कुष्ठ
युक्तो हि कर्मणा ॥ भोजयित्वा विप्रलक्षं निर्व्याधिश्च भवेच्छुचिः ॥ ५१ ॥ अकामतस्तदर्धं च क्षत्रियस्यापि कामतः ॥ अकामत
स्तदर्धं च चतुर्थं च विशस्तथा ॥५२॥ तदर्धं शूद्रगोघ्नश्च भुंक्ते पापं न संशयः ॥ प्रायश्चित्तेन शुद्धश्च भुंक्ते शेषं च कर्मणः ॥५३॥
अनुकल्पे चतुर्थं च पापं भुंक्ते न संशयः ॥ चतुर्गुणं च गोघ्नानां ब्राह्मणानां च पातकम् ॥ ५४ ॥ भुंक्ते पापं च ब्रह्मघ्नो ब्राह्मणश्चे
तरोऽपि वा ॥ क्रमेणानेन बोध्यं च कामतोऽकामतोऽपि वा ॥ ५५ ॥ प्रायश्चित्तं जन्म कर्म व्याधिरेव न संशयः ॥ गोघ्नो भवति
गौश्चापि यावद्वर्षं च निश्चितम् ॥ ५६ ॥ चतुर्गुणं च तेषां च ब्रह्मघ्नो विट्कृमिर्भवेत् ॥ ततो भवति म्लेच्छश्च तावद्वर्षचतुर्गुणम्
॥ ५७ ॥ इतश्चान्धो भवेद्विप्रः पूर्वेषां च चतुर्गुणम् ॥ ब्राह्मणानां चतुर्लक्षं भोजयित्वा शुचिर्भवेत् ॥ ५८ ॥ चक्षुष्मांश्च यशस्वी च

भवेत्सोऽप्यतिपातकात् ॥ स्त्रीघ्नश्चतुर्णां वर्णानां वेदे सोऽप्यतिपातकी ॥ ५९ ॥ कालसूत्रं च प्राप्नोति स्त्रीलोमसमवर्षकम् ॥ भक्षितः कृमिणा तत्र निराहारो व्यथायुतः ॥६०॥ ततो भवति लोके च तावद्वर्षं च पातकी ॥ ततः पापी भवेत्सोऽपि यक्ष्मग्रस्तश्च कर्मणा ॥ ६१ ॥ वर्षाणां शतकं चैव विप्रलक्षं च भोजयेत् ॥ ततः शुद्धो ब्राह्मणश्च विद्वांस्तपसि संयतः ॥ ६२ ॥ किंचिद्भुंक्ते पापशेषं स्वर्णदानाच्छुचिर्भवेत् ॥ गर्भघ्नश्च महापापी संप्राप्नोति शुनीमुखम् ॥ ६३ ॥ वर्षाणां शतकं चैव घोटकश्च भवेद्ध्रुवम् ॥ वर्षाणां शतकं चैव सूक्ष्मशस्त्रेण पीडितः ॥ ६४ ॥ ततः पापी भवेद्वैश्यो द्रव्ययुक्तो हि कर्मणा ॥ पञ्चाशद्वर्षपर्यन्तं स्वर्णदानाद्भवेच्छुचिः ॥ ६५ ॥ ततः स्वकुलजातोऽपि निर्व्याधिर्ब्राह्मणः शुचिः ॥ ब्राह्मणः क्षत्त्रियघ्नश्च क्षत्त्रियो वा विना रणात्॥६६॥तप्तशूलं च प्राप्नोति वर्षाणां च सहस्रकम्॥ क्वथितं तप्तलोहेन चार्तनादं करोति च ॥६७॥ ततो भवेन्मत्तगजो वर्षाणां शतकं तथा ॥ ततो रक्तविकारी च शूद्रो वर्षशतं तथा ॥ ६८ ॥ गजदानेन मुक्तश्च व्याधितश्च ततो द्विजः ॥वैश्यघ्नश्चापि वैश्यश्च शूद्रघ्नो वैश्य एव च ॥६९॥ वैश्यघ्नश्चापि शूद्रश्च समं पापं लभेद् ध्रुवम्॥कृमिकुण्डं च प्राप्नोति वर्षाणां शतकं तथा॥७०॥कृमिभिर्भक्षितो दुःखी किरातश्च भवेत्ततः॥वर्षाणां शतकं चैव कृमिव्याधिसमन्वितः॥७१॥ततो मन्दाग्नियुक्तश्च ब्राह्मणो दैन्यवान्व्रज॥पञ्चाशद्वर्षपर्यंतं दुर्बलश्च कृशोदरः॥७२॥ मुक्तिर्भवति युक्तेन तीर्थं चाश्वप्रदानतः ॥ शूद्रघ्नो ब्राह्मणश्चैव कामतोऽकामतोऽपि वा॥७३॥सावित्रीलक्षजाप्येन तदर्धेन शुचिर्भवेत्॥चतुर्वर्णः कुक्कुटघ्नो ह्यविशप्तश्च शंभुना॥७४॥वर्षाणां शतकं चैव प्राप्नोति रौरवं नरः॥ततो भुंक्ते कुक्कुटश्च वर्षाणामपि षोडश॥७५॥ ततः शुद्धो भवेद्विप्रो भक्षितः कुक्कुटेन च ॥ गङ्गास्नानेन दानेन स्वर्णस्यापि भवेच्छुचिः ॥७६॥ मार्जारघ्नश्चतुर्वर्णो गङ्गास्नानाद्भवेच्छुचिः ॥ विप्राय लवणं दत्त्वा षट्पलं च प्रमुच्यते ॥७७॥ हत्वा सर्पांश्चतुर्वर्णो मम पादेन चिह्नितान् ॥ ब्रह्महत्याचतुर्थं च पातकं च लभेद् ध्रुवम् ॥७८॥ असिपत्रं च नरकं वर्षाणां शतकं तथा ॥ प्राप्नोति यातनायुक्तो विच्छिन्नस्तीक्ष्णधारया ॥७९॥ ततो भवति सर्पश्च डुण्डुभो वर्षपञ्चकम् ॥ नरेण ताडितो दुःखी मृत्योर्भवति पीडितः ॥८०॥ ततो भवेन्नरः पापी ज्वरयुक्तो हि दुर्बलः॥वर्षाणां पञ्चकेनैव

मृतो भवति कर्मणा ॥ ८१ ॥ ततो भवति हस्ती च घोटको वा व्रजेश्वर ॥ यावद्विंशतिवर्षं च ततः शूद्रो भवेद्ध्रुवम् ॥ ८२ ॥ अहं
कृती व्याधियुक्तो रौप्यदानेन मुच्यते॥ब्राह्मणानां च शतकं भोजयित्वा शुचिर्भवेत्॥८३॥क्षुद्रजन्तुवधेनैव क्षुद्रजन्तुर्भवेन्नरः॥वर्षाणां
शतकं चैव क्षुद्रव्याधिं तरेत्ततः ॥ ८४ ॥ कृपा कार्या सता शश्वदहिंसिषु च जन्तुषु ॥ हिंसायां न हि दोषश्च हिंस्राणां च व्रजेश्वर॥
॥ ८५ ॥अश्वत्थघ्नश्चतुर्वर्णौ ब्रह्महत्याचतुर्थकम् ॥ पापं च लभते तात चासिपत्रं व्रजेद्ध्रुवम् ॥ ८६ ॥ स तीक्ष्णेनापि शस्त्रेण विच्छि
न्नश्च दिवानिशम् ॥ वर्षाणां शतकं चैव भुंक्ते परमयातनाम् ॥८७॥ ततो भवति वृक्षश्च शाल्मलिर्वर्षलक्षकम् ॥ ततो भवति शूद्रश्च
छिन्नाङ्गो व्याधिसंयुतः ॥८८॥ यावज्जीवनपर्यन्तं ततो विप्रो भवेद्ध्रुवम् ॥ व्रणव्याधिसमायुक्तो मुच्यते स्वर्णदानतः ॥ ८९ ॥ मिथ्या
साक्ष्यप्रदाता च कृतघ्नोऽतिकृतघ्नकः ॥ विश्वासघाती मित्रघ्नो विप्राणां धनहारकः ॥९०॥ शूद्रश्राद्धान्नभोजी च शूद्राणां शवदाहकः॥
शूद्राणां सूपकश्चैव वृषवाहकपातकी ॥ ९१ ॥ धावको देवलश्चापि चैतेऽतिपापिनस्तथा ॥ कुम्भीपाकं प्रयान्त्येव वर्षाणां च सहस्र
कम् ॥ ९२ ॥ तत्रैव तप्ततैलेन संतप्तश्च दिवानिशम् ॥ भक्षितो व्याधितश्चैव सर्पाकारेण जन्तुना ॥९३॥ गृध्रः कोटिसहस्राणि शत
जन्मानि सूकरः ॥ श्वापदः शतजन्मानि शूद्रो रोगी भवेत्ततः ॥ ९४ ॥ मन्दाग्निज्वरसंयुक्तः पञ्चाशद्वर्षकं तथा ॥ सुवर्णानां शतपलं
दत्त्वा शुद्धो भवेद् ध्रुवम् ॥९५॥ चतुर्वर्णौ वस्त्रहारी गव्यहारी च मानवः ॥ रौप्यमुक्तापहारी च शूद्रद्रव्यापहारकः ॥ ९६ ॥ वर्षाणां
च सहस्रं च बकजातिर्भवेद्ध्रुवम् ॥ मूत्रकुण्डं च वै भुक्त्वा वर्षाणां शतकं तथा ॥ ९७ ॥ ततो भवेच्छूद्रजातिर्वर्षाणां शतकं व्रज ॥
कुष्ठव्याधिसमायुक्तो गलितश्चैव पातकी ॥ ९८ ॥ ततो भवेद्ब्राह्मणश्च कुष्ठावशेषसंयुतः ॥ स्वर्णषट्पलदानेन व्याधितो मुच्यते शुचिः
॥ ९९ ॥ कोशापहारकश्चैव फलापहारकस्तथा ॥ यक्षः पृथिव्यां संभूतो लीलाद्रव्यापहारकः ॥ १०० ॥ वर्षाणां शतकं चैव चाष
पक्षी भवेद् ध्रुवम्॥ततो भवेत्कृष्णवर्णः शूद्रश्च भारते भुवि॥१॥ ततो भवेद्ब्राह्मणश्चाप्यधिकाङ्गोऽपि जन्मभिः ॥ पुनर्जन्मद्द्विजो भूत्वा
मुच्यते विप्रभोजनात् ॥ २ ॥ पक्वद्रव्यापहारी च पशुयोनिर्भवेद् ध्रुवम् ॥ यस्याण्डकोशो गन्धाक्तः कस्तूरी यस्य नाम च ॥३॥सप्त

जन्ममृगो भूत्वा ततो भवति गन्धकः ॥ जन्मैकं च ततः शूद्रो गलत्कुष्ठी च जन्मनि ॥४॥ ततो रोगावशेषेण संयुतो ब्राह्मणः कृशः स्वर्णषट्पलदानेन मुच्यते नात्र संशयः ॥ ५ ॥ धान्यापहारी दुःखी च कृपणः सप्तजन्मसु ॥ विष्ठाकुण्डं वर्षशतं संप्राप्य मुच्यते भिया ॥६॥ स्वर्णापहारी कुष्ठी च मानवः पतितो भवेत् ॥ स्वर्णदानप्रतिग्राही विट्कुण्डं च प्रयाति च ॥७॥ ततो वर्षशतं भुक्त्वा पुरीषं च दिवानिशम् ॥ ततो व्याधो भवेच्छूद्रो रक्तदोषेण संयुतः ॥८॥ तज्जन्मपातकं भुक्त्वा ब्राह्मणश्च पुनर्भवेत् ॥ व्याधिशेषोपयुक्तश्च मुच्यते स्वर्णदानतः ॥९॥ अगम्यानां च गामी च पूर्वोक्तं रौरवं व्रजेत् ॥ कुम्भीपाकं महाघोरं वर्षाणां चाप्यसंख्यकम् ॥११०॥ ततो भवेत्पुंश्चलीनां योनीनां च कृमिस्तथा ॥ वर्षाणां च सहस्रं च विट्कृमिर्वर्षलक्षकम् ॥ ११ ॥ पशुयोनिर्भवेत्तस्मात्तस्माच्च क्षुद्रजन्तवः ॥ ततो भवेन्म्लेच्छजातिस्ततः शूद्राधमस्तदा ॥१२॥ ततो भवति विप्रश्च व्याधियुक्तो नपुंसकः ॥ पुनश्च ब्राह्मणो भूत्वा तीर्थपर्यटनेन च ॥१३॥ क्रमेण शुद्धो भवति वंशहीनश्च पातकात् ॥ भोजयित्वा विप्रलक्षं पुत्रं च लभते शुचिः ॥ १४ ॥ मानवः क्रोधयुक्तश्च गर्दभः सप्तजन्मसु ॥ मानवः कलहाविष्टः सप्तजन्मसु वायसः ॥१५॥शालग्रामप्रतिग्राही कालसूत्रं व्रजेद् ध्रुवम्॥ वर्षाणां शतकं चैव खञ्जरीटो भवेत्ततः ॥१६॥ लोहचोरश्च निर्वंशो मषीचोरश्च कोकिलः ॥ शुकोऽप्यञ्जनचोरश्च मिष्टचोरः कृमिर्भवेत् ॥१७॥ विप्रद्वेषी गुरुद्वेषी शिरसां च कृमिर्भवेत् ॥ पुंश्चलीं कामिनीं तात भुक्त्वा च रौरवं व्रजेत् ॥१८॥ ततो वृथा कृमिश्चैव वर्षाणां शतकं तथा ॥ ततोऽपि विधवा चैव वन्ध्या च सप्तजन्मसु ॥१९॥ अस्पृश्या जातिहीना च च्छिन्ननासा भवेत्क्रमात् ॥ रक्तद्रव्यापहारी च रक्तदोषान्वितो भवेत्॥१२०॥आचारहीनो यवनः खञ्जो भवति हिंसकः ॥ अदीक्षितो वंखरश्च दुष्टदर्शी च कानकः॥ ॥ २१ ॥ अहंकारी कर्णहीनो बधिरो वेदनिन्दकः ॥ वाक्यहर्ता च मूकश्च हिंसकः केशहीनकः ॥ २२ ॥ मिथ्यावादी श्मश्रुहीनो दुर्वाक्यो दन्तहीनकः ॥ जिह्वाहीनः सत्यहारी दुष्टोऽप्यङ्गुलिहीनकः॥२३॥ग्रन्थापहारी मूर्खश्च व्याधियुक्तो भवेद्ध्रुवम् ॥ अश्वग्राही च तच्चोरो लालामूत्रं व्रजेदिति॥२४॥वर्षाणां च शतं स्थित्वा घोटकश्च भवेद्ध्रुवम् ॥ गजचोरो गजग्राही विट्कुण्डे च सहस्रकम् ॥२५॥

स्थित्वा वर्षं भवेद्धस्ती तत्पश्चाद् वृषलो भवेत् ॥ अयज्ञे छागहन्ता च च्छागचोरप्रतिग्रही ॥ २६ ॥ पूयकुण्डे वर्षशतं
स्थित्वा चाण्डालतां व्रजेत् ॥ छागश्च वर्षपर्यन्तं तथा भवति मानवः॥२७॥शत्रुशस्त्रेण च्छिन्नश्च तदा मुक्तो भवेद्द्विजः ॥ दत्तापहारी
वाग्दानं कृत्वाऽपहरते पुनः ॥ २८ ॥ स भवेन्म्लेच्छयोनौ च भुक्त्वा च नरकं व्रजेत् ॥ एकाकी मिष्टमश्नाति कालसूत्रं व्रजेद्ध्रुवम्
॥ २९ ॥ तत्र वर्षशतं स्थित्वा प्रेतो वर्षसहस्रकम् ॥ तदा भवति जन्मैकं मक्षिका च पिपीलिका ॥१३०॥ जन्मैकं भ्रमरश्चैव जन्मैकं
मधुमक्षिका ॥ जन्मैकं वरलश्चैव जन्मैकं दंश एव च ॥ ३१ ॥ जन्मैकं मशकश्चैव जन्मैकं पूतिकं स्मृतम् ॥ जन्मैकं तल्पकीटश्च
तदा शूद्रो भवेद्ध्रुवम् ॥३२॥ असद्बुद्धिर्व्याधियुक्तस्तदा मुक्तो भवेद्द्विजः ॥ तैलचोरस्तैलकारो मूर्ध्निकीटस्त्रिजन्मकम् ॥ ३३ ॥
तदा भवेत्स्वर्णकारो जन्मैकं दुष्टमानसः ॥ विश्वैकलिपिकर्ता च भक्ष्यदातुर्धनं हरेत् ॥३४॥ तमःकुण्डे वर्षशतं स्थित्वा स्वर्णवणि
ग्भवेत् ॥ जन्मैकं च दुराचारो जन्मैकं करणो भवेत् ॥३५॥ कायस्थेनोदरस्थेन मातुर्मांसं न खादितम् ॥ तत्र नास्ति कृपा तस्य
दन्ताभावेन केवलम् ॥३६॥ स्वर्णकारः स्वर्णवणिक् कायस्थश्च व्रजेश्वर ॥ नरेषु मध्ये ते धूर्ताः कृपाहीना महीतले ॥ ३७ ॥ हृदयं
क्षुरधाराभं तेषां नास्ति च सादरम् ॥ शतेषु सज्जनः कोऽपि कायस्थो नेतरौ च तौ ॥ ३८ ॥ सुबुद्धिः शिवयुक्तश्च शास्त्रज्ञो धर्ममा
नसः ॥ न विश्वसेत्तेषु तात स्वात्मकल्याणहेतवे ॥ ३९ ॥ सीमापहारी दुष्टश्च भूमिचोरश्च हिंसकः ॥ भूमिदानापहारी च काल
सूत्रं व्रजेद्ध्रुवम् ॥ १४० ॥ षष्टिवर्षसहस्राणि क्षुत्पिपासार्दितः स्थितः ॥ ततोऽपि तानि नामानि विष्ठायां जायते कृमिः ॥ ४१ ॥
ततो भवेदसच्छूद्रो जन्मैकं च ततः शुचिः ॥ तस्माज्ज्ञानैः सावधानं भवेत्प्राज्ञश्च यत्नतः ॥ ४२ ॥ रक्तवस्त्रापहारी च जन्मैकं रक्त
कीटकः ॥ ततः शूद्रश्च जन्मैकं ततो विप्रो भवेच्छुचिः॥४३॥ त्रिसन्ध्यहीनो विप्रश्च प्रातःशायी च यो नरः ॥ सन्ध्याशायी दिवा
शायी यज्ञसूत्रापहारकः ॥४४॥ अशुद्धः संध्याकारी च वेदवेदाङ्गनिन्दकः ॥ तद्विरुद्धः स्वर्गमार्गस्त्रिजन्मपतितो द्विजः ॥ ४५ ॥ यः
शूद्रो ब्राह्मणीगामी कुम्भीपाके व्रजेद्ध्रुवम् ॥ वर्षाणां च त्रिलक्षं च पच्यते तत्र पीडितः ॥ ४६ ॥ दिवानिशं प्रदग्धश्च तप्ततैले च

दारुणे ॥ ततो भवेद्योनिकीटः पुंश्चलीनां च पातकी ॥ ४७ ॥ षष्टिवर्षसहस्राणि चाहारं तस्य तन्मलम् ॥ ततो भवति चाण्डालो
जन्मलक्षं क्रमेण च ॥ ४८ ॥ ततः शूद्रो गलत्कुष्ठी जन्मैकं च ततः शुचिः ॥ सोऽपि विप्रो व्याधिशेषस्तीर्थपर्यटनाच्छुचिः ॥ ४९ ॥
असच्छूद्रश्च भवति सोऽस्थानेऽसुरपूजिते ॥ दत्त्वा देवाय नैवेद्यमपवित्रं च मानवः ॥ १५० ॥ सकेशं पार्थिवं लिङ्गं संपूज्य यवनो
भवेत् ॥ दुर्बलेन भवेदन्धः कुत्सितेन च कुत्सितः ॥५१॥ अङ्गहीनो दरिद्रश्च व्याधियुक्तश्च मानवः ॥ अश्रद्धया च निर्माणे निर्माण
सदृशं फलम् ॥ ५२ ॥ मृद्भस्मगोशकृत्पिण्डैस्तथा वालुकयाऽपि वा ॥ कृत्वा लिङ्गं सकृत्पूज्य वसेत्कल्पायुषं दिवि ॥५३॥ ततो भवति
विप्रश्च महाप्राज्ञश्च भूमिमान् ॥ राजा भवेद्भारते च लिङ्गानां शतपूजनात् ॥५४॥ सहस्रपूजनात्सोऽपि लभते निश्चितं फलम् ॥ स्थित्वा
च सुचिरं स्वर्गे राजेन्द्रो भारते भवेत् ॥ ५५ ॥ अयुते च तदीशश्च लक्षे च पृथिवीश्वरः ॥ पूजने चातिभक्त्या चाप्यतिरिक्तं फलं
लभेत् ॥ ५६ ॥ तीर्थस्नानेन दानेन विप्राणां भोजनेन च ॥ नारायणार्चया चैव विप्रजातिश्च कर्मणा ॥ ५७ ॥ अतिरिक्तेन तपसा
पण्डितो ब्राह्मणो भवेत् ॥ पण्डितो ब्राह्मणचैव वैष्णवश्च जितेन्द्रियः ॥५८॥ अनेकजन्मपुण्येन जायते भारते भुवि ॥ तस्यांघ्रिस्पर्श
नेनैव सद्यः पूता वसुंधरा ॥ ५९ ॥ तीर्थाः कुर्वन्ति तीर्थानि जीवन्मुक्ताश्च वैष्णवाः ॥ स्वपुंसां च सहस्रं च पुनन्तीति श्रुतौ श्रुतम्
॥ १६० ॥ पापेन वैद्यजन्मैव दुश्चिकित्सोऽपि ब्राह्मणः ॥ दुश्चिकित्सस्तथा वैद्यो व्यालग्राही त्रिजन्मसु ॥ ६१ ॥ अतिक्रूरो दुराचारो
द्वेष्टा च सुरविप्रयोः ॥ स भवेत्कुटिलव्यालो वर्षाणां च सहस्रकम् ॥ ६२ ॥ पुंश्चलीलम्पटानां च दूती या कामिनी व्रज॥कालसूत्रे
वर्षशतं स्थित्वा च गोधिका भवेत् ॥ ६३ ॥ जन्मैकं गोधिका भूत्वा हरिणश्च त्रिजन्मसु ॥ जन्मैकं महिषश्चैव जन्मैकं भल्लुको
भवेत् ॥ ६४ ॥ जन्मैकं गण्डकश्चैव शृगालश्च त्रिजन्मसु ॥ परकीयतडागं च सुप्तसस्यं ददाति च ॥ ६५ ॥ स भवेन्नक्रजातिश्च
कच्छपश्च त्रिजन्मसु ॥ वृथा मांसं च यो भुङ्क्ते मत्स्यलुब्धश्च ब्राह्मणः ॥ ६६ ॥ भुङ्क्ते मांसमदत्तं च स मीनश्च मृगो भवेत् ॥
वर्षाणां च सहस्रं च तात भुक्त्वा च किल्बिषम् ॥ ६७ ॥ कर्मभोगाच्छुचिर्भूत्वा स पुनर्ब्राह्मणो भवेत् ॥ एकादशीविहीनश्च

ब्राह्मणः पतितो भवेत् ॥ ६८ ॥ भक्ष्यस्य द्विगुणं दत्त्वा तेन पापेन मुच्यते ॥ मम जन्मदिने चैव यो भुंक्ते मानवोऽधमः ॥ ६९ ॥ त्रैलोक्यजनितं पापं सोऽपि भुंक्ते न संशयः ॥ भुक्त्वा च नरकं सर्वं पश्चाच्चाण्डालतां व्रजेत् ॥ १७० ॥ एवं च शिवरात्रौ च श्रीरामनवमीदिने ॥ उपवासासमर्थश्च हविष्यान्नं समाचरेत् ॥ ७१ ॥ ततोऽशक्तो दुर्बलश्च भोजयेद्ब्राह्मणानपि ॥ कृत्वा महोत्सवं पुण्यं मदीयं पातकाच्छुचिः ॥ ७२ ॥ तस्माद्यत्नेन कर्तव्यं नामसंकीर्तनं मम ॥ गृध्रः कोटिसहस्राणि शतजन्मानि सूकरः ॥ ७३ ॥ श्वापदः शतजन्मानि भवेच्च निशि भोजनात् ॥ अदीक्षितो द्विजश्चैव शंखश्चिह्नः शुको भवेत् ॥ ७४ ॥ अनुद्राही द्विजश्चैव राजहंसो भवेद् ध्रुवम् ॥ चित्रवस्त्रापहारी च मयूरश्च त्रिजन्मसु ॥७५॥ तेजःपात्रापहारी च भवेत्कारण्डवश्चिरम् ॥ सुराणां प्रतिमाचोरोऽप्यन्धश्च सप्तजन्मसु ॥ ७६॥दरिद्रो व्याधियुक्तश्च बधिरश्चापि कुब्जकः॥स्त्रीतैलमधुमांसानि रवौ वा पञ्चपर्वसु ॥ ७७ ॥ सेवते यो महामूढो वज्रदंष्ट्रं व्रजेद् ध्रुवम् ॥ पातकी दुःखितस्तत्र वर्षाणां च सहस्रकम् ॥ ७८ ॥ ततो भवति म्लेच्छश्च चाण्डालः सप्तजन्मसु ॥ व्याधियुक्तस्ततः शूद्रो ब्राह्मणश्च ततः शुचिः ॥७९॥ तस्माद्यत्नान्न भोक्तव्यं भारते धर्मभीरुणा ॥ ब्राह्मणं च सुरं दृष्ट्वा न नमेद्यो नराधमः ॥ १८० ॥ यावज्जीवनपर्यन्तमशुचिर्यवनो भवेत् ॥ अभ्युत्थानं न कुरुते दृष्ट्वा चागतब्राह्मणम् ॥ ८१ ॥ स भवेद्ब्रह्मघाती च सप्तजन्मसु निश्चितम् ॥ शिवद्वेषी कुक्कुटश्च देवलः सप्तजन्मसु ॥ ८२ ॥ पितृदेवार्चनं हन्ति वेदोक्तं ज्ञानदुर्बलः ॥ स याति नरकं पापी वर्षाणां च सहस्रकम् ॥८३॥ ततश्च रौरवं भुक्त्वा तीर्थकाकस्त्रिजन्मसु ॥ त्रिजन्मसु शृगालश्च तीर्थे भुङ्क्ते शवं व्रज ॥ ८४ ॥ त्रिजन्मसु भवेत्सोऽपि तीर्थेषु शवरक्षकः ॥ शवानां करमादत्ते कर्मणा कृतपातकी ॥८५॥ नित्यं सुरार्चनं कृत्वा दाम्भिको ज्ञानदुर्बलः ॥ गुरुं च नार्चयेद्भक्त्या तस्मै नान्नं ददाति यः ॥८६॥ स भवेद्देवलो दुःखी देवशापेन पातकी ॥ नित्यं सुरार्चनं कृत्वा दाम्भिको ज्ञानदुर्बलः ॥८७॥ पूजाफलं न लभते देवद्रोही स दारुणः ॥ दीपनिर्वाणकर्ता च खद्योतः सप्तजन्मसु ॥ ८८ ॥ अतीव मत्स्यलुब्धश्चाप्यनैवेद्यं च खादति ॥ स भवेन्मत्स्यरंगश्च मार्जारः सप्तजन्मसु ॥ ८९ ॥ गोणीहर्ता कपोतश्च

मालाहर्ता विहङ्गमः ॥ चटको धान्यचोरश्च मांसचोरश्च कुञ्जरः ॥ १९० ॥ कविः प्रहर्ता विदुषां मण्डूकः सप्तजन्मसु ॥ असत्कविग्रामविप्रो नकुलः सप्तजन्मसु ॥ ९१ ॥ कुष्ठी भवेच्च जन्मैकं कृकलासस्त्रिजन्मसु ॥ जन्मैकं वरलश्चैव ततो वृक्षपिपीलिका ॥ ९२ ॥ ततः शूद्रश्च वैश्यश्च क्षत्त्रियो ब्राह्मणस्तथा ॥ कन्याविक्रयकारी च चतुर्वर्णो हि मानवः ॥ ९३ ॥ सद्यः प्रयाति तामिस्रं यावच्चन्द्रदिवाकरौ ॥ ततो भवति व्याधश्च मांसविक्रयकारकः ॥ ९४ ॥ ततो व्याधिर्भवेत्पश्चाद्यो यथा पूर्वजन्मनि ॥ मन्नामविक्रयी विप्रो न हि मुक्तो भवेद् ध्रुवम् ॥ ९५ ॥ मृत्युलोके च मन्नामस्मृतिमात्रं न विद्यते ॥ पश्चाद्भवेत्स गोयोनौ जन्मैकं ज्ञानदुर्बलः ॥९६॥ ततश्छागस्ततो मेषो महिषः सप्तजन्मसु ॥ महाचक्री च कुटिलो धर्महीनस्तु मानवः ॥ ९७ ॥ जन्मैकं तैलकारश्च कुम्भकारस्तथैव च ॥ मिथ्याकलङ्कवक्ता च देवब्राह्मणनिन्दकः ॥ ९८ ॥ स भवेत्स्वर्णकारश्च रजकः सप्तजन्मसु ॥ ब्राह्मणक्षत्रविट्शूद्राः कुत्सिताः शौचवर्जिताः ॥९९॥ जन्म तेषां म्लेच्छयोनौ वर्षाणामयुतं तथा ॥ कामतो योषितां श्रोणीस्तनास्ये यश्च पश्यति ॥ २०० ॥ स भवेद्दृष्टिहीनश्च परत्रापि नपुंसकः ॥ विप्रोऽभिचारकर्ता च हिंसको ज्ञानदुर्बलः ॥१॥ यात्येवमन्धतामिस्रं वर्षाणामयुतं तथा ॥ तदा भवति दैवज्ञोऽप्यग्रदानी च दुर्मतिः ॥ २ ॥ ततः शूद्रो भवेद्विप्रो भोगेन कर्मणस्तथा ॥ शास्त्रज्ञाता च दैवज्ञो मिथ्या वदति लोभतः ॥ ३ ॥ स भवेच्च ध्रुवं ज्येष्ठी वानरः सप्तजन्मसु ॥ अनेकजन्मतपसा भारते ब्राह्मणो भवेत् ॥४॥ सुबुद्धिरतिधर्मिष्ठो धर्महीनश्च पातकी ॥ स्वधर्मनिरतो विप्रः परमाच्च हुताशनात् ॥५॥ पवित्रश्चातितेजस्वी तस्माद्भीताः सुराः सदा ॥ नदीषु च यथा गङ्गा तीर्थेषु पुष्करं यथा ॥ ६ ॥ पुरीषु च यथा काशी यथा ज्ञानिषु शंकरः ॥ शास्त्रेषु च यथा वेदा यथाऽश्वत्थश्च पादपे ॥ ७ ॥ मम पूजातपस्यासु व्रतेष्वनशनं यथा ॥ तथा जातिषु सर्वासु ब्राह्मणः श्रेष्ठ एव च ॥ ८ ॥ विप्रपादेषु तीर्थानि पुण्यानि च व्रतानि च ॥ विप्रपादरजः शुद्धं पापव्याधिविमर्दनम् ॥ ९ ॥ शुभाशीर्वचनं तेषां सर्वकल्याणकारणम् ॥ एतत्ते कथितं तात विपाकः कर्मणामहो ॥२१०॥ यथाश्रुतं यथाज्ञातं तदशेषं निशामय ॥ श्रुत्वा धर्मविपाकं च वाचकाय सुवर्णकम् ॥११॥

दद्यात्तस्मै च रौप्यं च वस्त्रं ताम्बूलमेव च ॥ सुवर्णशतकं दद्यात्सद्यो देही च गोकुलम् ॥ रौप्यं वस्त्रं च ताम्बूलं मत्प्रीत्या ब्राह्मणाय च ॥ २१२ ॥ इतिश्री ब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे भगवन्नन्दसंवादे पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥ छ ॥ नन्द उवाच ॥ केदारकन्याप्रस्तावात्कथितं कर्मकीर्तनम् ॥ कृत्यास्त्रीणां प्रसंगेन तद्व्यासेन वद प्रभो ॥ १ ॥ केदारकन्या सा का वा को वा केदारभूपतिः ॥ कस्य वंशे च तज्जन्म तन्मे व्याख्यातुमर्हसि ॥ २ ॥ श्रीभगवानुवाच ॥ पुरा तु ब्रह्मणः पुत्रो मनुः स्वायंभुवस्तथा ॥ तस्य स्त्री शतरूपा च धन्या मान्या च योषिताम् ॥ ३ ॥ प्रियव्रतोत्तानपादौ तयोः पुत्रौ बभूवतुः ॥ उत्तानपादपुत्रश्च ध्रुव एव महायशाः ॥ ४ ॥ तत्पुत्रो नन्दसावर्णिः केदारश्च तदात्मजः ॥ सप्तद्वीपपतिः श्रीमान्केदारो वैष्णवः स्वयम् ॥ ५ ॥ तस्य रक्षानिमित्तेन तत्सभायां सुदर्शनम् ॥ गवां लक्षं नवं शुद्धं स्वर्णशृङ्गं च भूषितम् ॥ ६ ॥ वह्निशुद्धानि वस्त्राणि दत्तानि वरुणेन च ॥ सुवर्णानां तथा लक्षं सर्वसस्या वसुन्धरा ॥ ७ ॥ मणिरत्नं च मुक्ताश्च हीरकं परमं तथा ॥ माणिक्यमश्वरत्नानां लक्षं लक्षं च हस्तिनाम् ॥ ८ ॥ रौप्यं प्रवालं मिष्टान्नं शतधान्याचलं वरम् ॥ नित्यं नित्यं ब्राह्मणेभ्यो ददौ च रत्नभूषणम् ॥ ९ ॥ शतलक्षं ब्राह्मणानां भोजयामास नित्यशः ॥ जलभोजनपात्राणि सुवर्णानां ददौ नृपः ॥ १० ॥ सुवर्णानां यज्ञसूत्रमङ्गुलीयकमुत्तमम् ॥ आसनं स्वर्णरत्नानां ब्राह्मणेभ्यो ददौ मुदा ॥ ११ ॥ ब्राह्मणानां च लक्षं च सूपकारं नृपस्य च ॥ ब्राह्मणानां द्विलक्षं च परिवेषणकारकम् ॥ १२ ॥ घृतकुल्या मधुकुल्या दधिकुल्या मनोहराः ॥ गुडकुल्या दुग्धकुल्या नित्यं प्रार्थनमीप्सितम् ॥ १३ ॥ प्रातरारभ्य सन्ध्यान्तं विप्राणां भोजनं तथा ॥ दुःखिनां भिक्षुकाणां च धनदानं यथोचितम् ॥ १४ ॥ फलमूलाशनो राजा वैष्णवश्च जितेन्द्रियः ॥ सर्वं मदर्पणं कृत्वा जपन्मां च दिवानिशम् ॥ १५ ॥ एकदा सूपकारश्च तमुवाच नृपेश्वरम् ॥ विप्राणां भोजनायैव दशलक्षमुपस्थितम् ॥१६॥ भुञ्जते ब्राह्मणाश्चाद्य रूक्षमन्नं वद प्रभो ॥ कुर्वन्तु भक्षणं ते वै विप्राः सूपादिना नृप ॥१७॥ चतुर्योजनपर्यन्तमधिकारो

नृपस्य च ॥ यो राजा तच्छतगुणः स एव मण्डलेश्वरः ॥१८॥ तत्तद्दशगुणो राजा राजेन्द्रः परिकीर्तितः ॥ राजेन्द्राणां पञ्चलक्षं नित्यं केदारसंसदि ॥ १९ ॥ अमूल्यरत्नमाणिक्यं मुक्ताहारं मणीश्वरम् ॥ गजरत्नमश्वरत्नं केदाराय करं ददौ ॥ २० ॥ कमला कलया जाता यज्ञकुण्डसमुद्भवा ॥ वह्निशुद्धांशुकाधाना रत्नभूषणभूषिता ॥ २१ ॥ कामुकी कामिनीश्रेष्ठा कन्या कमललोचना ॥ कन्याऽस्मि ते महाराजेत्युवाच नृपतिं च सा ॥ २२ ॥ राजा संपूज्य तां भक्त्या तस्थौ पत्नीं समर्प्य च ॥ सा विज्ञाय प्रसूं तातं कृत्वा च विनयं मुदा ॥२३॥ ययौ पुण्यवनं रम्यं तपसे यमुनान्तिकम् ॥ तत्तपस्यावनं यस्मात्तस्माद्वृन्दावनं स्मृतम्॥२४॥तपसा वरयामास मां वरं च वरंवरम् ॥ ब्रह्मा ददौ वरं तस्यै पश्चात्कृष्णं लभिष्यसि ॥ २५ ॥ सा चैकदा नदीतीरे वसन्ते सस्मिता सती ॥ शयाना पुष्पशय्यायां रत्नाभरणभूषिता ॥२६॥ ब्रह्मा परीक्षितुं यातः साध्वीं च सुमनोहराम् ॥ ददर्श कन्या रहसि युवानं पुरुषं परम् ॥२७॥चन्दनोक्षितसर्वाङ्गं रत्नभूषणभूषितम् ॥ सस्मितं कामुकं रम्यं रमणीनां च वाञ्छितम् ॥२८॥ यथा षोडशवर्षीयं कुमारं कनकप्रभम् ॥ कोटिकन्दर्पलीलाभं पीताम्बरधरं वरम् ॥२९॥ शरत्पार्वणचन्द्रास्यं शरत्पद्मसुलोचनम् ॥ दृष्ट्वा तं च समुत्थाय वासयामास सन्निधौ॥ ॥ ३० ॥ पूजां चकार भक्त्या च फलं मूलं ददौ मुदा ॥ सुवासितं जलं दत्त्वा प्रणनाम मुदाऽन्विता ॥ ३१ ॥ पूजां गृहीत्वा मुदितः सादरां तामुवाच ह ॥ विप्ररूपी च भगवान्प्रज्वलन्ब्रह्मतेजसा ॥ कामुकीनां च काम्यं च सतीनां दुष्करं व्रज ॥ ३२ ॥ धर्म उवाच ॥ भवती कस्य कन्या वा किं ते नाम मनोहरे ॥ किं करोषि रहस्येव तन्मे कथितुमर्हसि ॥ ३३ ॥ कस्य हेतोस्तपस्या ते किं वा वाञ्छसि सुन्दरि ॥ वरं वृणीष्व भद्रं ते यत्ते मनसि वाञ्छितम् ॥३४॥ वृन्दोवाच ॥ विप्र केदारकन्याऽहं वृन्दा वृन्दावने स्थिता ॥ तपः करोमि रहसि चिन्तयामि हरिं पतिम् ॥ ३५ ॥ यदि दातुं समर्थोऽसि देहि मे वाञ्छितं वरम् ॥ असमर्थोऽसि चेद्गच्छ किं ते प्रश्नेन ब्राह्मण ॥३६॥ धर्म उवाच ॥ निरीहमवितर्क्यं च परमात्मानमीश्वरम् ॥ निर्गुणं च निराकारं भक्तानुग्रहविग्रहम्॥ ॥ ३७ ॥ का क्षमा तं पतिं कर्तुं विना लक्ष्मीं सरस्वतीम् ॥ चतुर्भुजस्य द्वे भार्ये हरेर्वैकुण्ठशायिनः ॥ ३८ ॥ गोलोके द्विभुजस्यापि

श्रीवंशीवदनस्य च ॥ किशोरगोपवेषस्य परिपूर्णतमस्य च ॥ ३९ ॥ तस्य भार्या स्वयं राधा महालक्ष्मीः परात्परा ॥ ब्रह्मस्वरूपा
परमा परमात्मानमीश्वरम् ॥४०॥ भजते सततं शान्तं सुरम्यं श्यामसुन्दरम् ॥ कोटिकन्दर्पसौन्दर्यनिन्दितं सुकलेवरम् ॥४१॥ अमू
ल्यरत्नाभरणं सत्यं च नित्यविग्रहम् ॥ पीताम्बरधरं रम्यं दातारं सर्वसंपदाम् ॥ ४२ ॥ श्रीकृष्णश्च द्विधारूपो द्विभुजश्च चतुर्भुजः ॥
चतुर्भुजश्च वैकुण्ठे गोलोके द्विभुजः स्वयम् ॥४३॥ यन्निमेषो भवेद्वृन्दे ब्रह्मणः पतनेन च ॥ पञ्चविंशत्सहस्रेण युगेनेन्द्रस्य पातनम्
॥ ४४ ॥ चतुर्दशेन्द्रावच्छिन्नकालेन ब्रह्मणो दिनम् ॥ तावतीति निशा तस्य विधातुर्जगतामपि ॥ ४५ ॥ एवं त्रिंशद्दिनैर्मासं द्विषट्के
मासि वर्षकम् ॥ एवं शतायुस्तस्यैव निबोध बोधतत्परम् ॥४६॥ यावज्जीवनपर्यन्तं सेवन्ते सनकादयः ॥ कल्पानां कोटिकोटिं च
तन्न साध्यश्च यो विभुः ॥४७॥ सहस्रवक्त्रः शेषश्च सेवते च जपेत्सदा ॥ दिवानिशं च यं भक्त्या कल्पकोटिशतं शतम् ॥४८॥ तन्न
साध्यो हितकरो दुराराध्यः परात्परः॥ ब्रह्मा ब्रह्मस्वरूपं तं भजेज्जन्मनि जन्मनि॥४९॥वक्त्रैश्चतुर्भिः सततं स्तौति नित्यं सनातनम्॥
वेदेऽनिर्वचनीयश्च वेदानां जनको विधिः ॥५०॥ विधाता फलदाता च दाता च सर्वसंपदाम् ॥ तन्न साध्यो हि भगवान्कालकालान्त
कान्तकः ॥५१॥ संहारकर्ता जगतां कलया रुद्ररूपतः ॥ स स्तौति पञ्चवक्त्रैस्तु कोऽन्योऽन्यस्यापि का कथा ॥५२॥ तत्परश्च प्रियो
नास्ति वृन्दे भगवतः शृणु ॥ सर्वशक्तिस्वरूपा सा दुर्गा दुर्गतिनाशिनी ॥५३॥ ब्रह्मस्वरूपा परमा मूलप्रकृतिरीश्वरी ॥ नारायणी
विष्णुमाया वैष्णवी सा सनातनी ॥५४॥ यन्मायया जगद्भ्रान्तमनित्ये भ्रमते सदा ॥ सा स्तौति भक्त्या यं देवं वृन्देऽप्यंगे दिवानि
शम् ॥५५॥ स्तौति भक्त्या स्वशक्त्या च गजवक्त्रः षडाननः ॥ ध्यायते यं गणेशश्च सर्वादौ यस्य पूजनम्॥५६॥भगवान्सर्वदेवेशो
ज्ञानिनां च गुरोर्गुरुः ॥ सिद्धेन्द्रेषु च देवेन्द्रे योगीन्द्रे ज्ञानिनां गुरौ ॥५७॥ न गणेशात्परो विद्वान्गणेशश्च सुराधिपः॥सरस्वती च
यं स्तोतुमशक्ता परमेश्वरी ॥ ५८ ॥ दिवानिशं पादपद्मं भक्त्या पद्मां न सेवते ॥ यत्कटाक्षाज्जगत्सर्वं परिपूर्णतमं शिवम् ॥ ५९॥
यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भयात् ॥ वर्षतीन्द्रो दहत्यग्निर्मृत्युश्चरति जन्तुषु ॥६०॥ पृथिवी सेवया यस्य सर्वाधारा वसुन्धरा

समुद्रा निश्चलाः शैला यस्य भीताश्च सुन्दरि ॥ ६१ ॥ तीर्थसारा च सा गङ्गा पवित्रा मुक्तिदायिनी ॥ जगतां पावनी देवी यस्य
पादाब्जसेवया ॥ ६२ ॥ पवित्रा तुलसी देवी स्मरणाद्यस्य सेवनात् ॥ नवग्रहाश्च दिक्पाला भीता यस्य प्रतापतः ॥ ६३ ॥ ब्रह्मां
डेषु च सर्वेषु ब्रह्मविष्णुशिवात्मकाः ॥ अन्ये ये ये सुरेशाश्च शेषाद्या मुनयस्तथा ॥ ६४ ॥ केचित्कलास्वरूपाश्चाप्यंशरूपाश्च
केचन ॥ केचित्कलांशाः कृष्णस्य केचिच्च परमात्मनः ॥ ६५ ॥ पतिमिच्छसि कल्याणि प्रकृतेः परमीश्वरम् ॥ गोलोके राधिका
साध्यो नान्येषां च कदाचन ॥६६॥ मां भजस्व महाभागे नृपाणामीश्वरं पतिम् ॥ बलवन्तं च देवेभ्यो दैत्येभ्यश्च वरानने ॥ ६७ ॥
सुखानि यानि कल्याणि त्रिषु लोकेषु सन्ति वै ॥ भुङ्क्ष्व तान्येव सर्वाणि मत्प्रसादान्न संशयः ॥६८॥ सप्तसागरपारे च काञ्चनी
रुचिरा वरे ॥ देवानां क्रीडनार्थाय विधात्रा निर्मिता पुरी ॥ ६९ ॥ तत्रैव गच्छ भद्रं ते रम रामे मया सह ॥ महेन्द्रस्य प्रियवनं
पुष्पोद्यानसमन्वितम् ॥ ७० ॥ गच्छ स्वर्णमयीं लङ्कां नानारत्नविभूषिताम् ॥ तत्रैव गच्छ भद्रं ते रम रामे मया सह ॥ ७१ ॥
विस्पन्दकं सुवसनं नन्दकं पुष्पभद्रकम् ॥ तत्रैव० ॥ ७२ ॥ सुमेरुगह्वरं वाऽपि क्षीरोदं वा मनोहरम् ॥
तत्रैव० ॥ ७३ ॥ सत्यलोकं ब्रह्मलोकं रम्यं सद्म रहःस्थलम् ॥ तत्रैव० ॥ ७४ ॥ मलयं निलयं
रम्यं महेन्द्रसारनिर्मितम् ॥ सुगन्धियुक्तं सततं शुद्धं चन्दनवायुना ॥ ७५ ॥ मालती यूथिका रम्या केतकी माधवी तथा ॥
चारुचम्पकपुष्पाणां गन्धेन सुमनोहरम् ॥ तत्रैव० ॥७६॥ पिकानां भ्रमराणां च मधुरध्वनिसंयुतम् ॥ तत्रैव० ॥ ७७ ॥ इन्द्रस्य
वरुणस्यैव वायोरपि यमस्य च ॥ धनेश्वरस्य वह्नेश्च धर्मस्य शशिनस्तथा ॥ ७८ ॥ सुरम्यं लोकमेतेषां मध्ये देवि
यथेच्छसि॥तत्रैव० ॥७९॥ रत्नद्वीपं मणिद्वीपं रम्यं चन्द्रसरोवरम् ॥ तत्रैव०॥८०॥इत्येवमुक्त्वा संभोक्तुं गच्छन्तं तं छलेन च ॥
न वास्तवपरीक्षार्थं सतीत्वं बोधितुं व्रज ॥ ८१ ॥ उवाच सा नृपसुता कोपवक्रास्यलोचना ॥ हितं सत्यं योगयुक्तं धर्मार्थं च
यशस्करम् ॥ ८२ ॥ श्रीवृन्दोवाच ॥ धैर्यं कुरु महाभाग श्रेष्ठो जातिषु ब्राह्मणः ॥ ब्राह्मणानां तपो मूलं सत्यं वेदव्रतं

धृतिः॥८३॥ परस्त्रीसहसंभोगः स्वभावश्चाप्यधर्मिणाम् ॥ अधर्मेणैव हे विप्र दुष्टोऽभद्राणि पश्यति ॥ ततः सपत्ने जयति समूलस्थो
विनश्यति ॥ ८४ ॥ पतिव्रतानां गमने बलात्कारेण निश्चितम् ॥ मातृगामी भवेत्सद्यो ब्रह्महत्याशतं भवेत् ॥ ८५ ॥ कुम्भीपाके
पच्यते च यावच्चन्द्रदिवाकरौ॥प्रदग्धस्तैलतप्तेषु न मृतः सूक्ष्मदेहतः॥८६॥ताडितो यमदूतैश्च लोहदण्डेन मूर्धनि ॥ क्षणं सुखं चिरं
दुःखं सर्वनाशस्य कारणम् ॥८७॥ अगम्यागमनं दुःखं धर्मिष्ठो नैव वाञ्छति ॥ क्षमस्व गच्छ भद्रं ते ब्राह्मण ज्ञानदुर्बल ॥ ८८ ॥
यथा दीपशिखां दृष्ट्वा कीटः पतति निश्चितम् ॥ मिष्टं दृष्ट्वा बडीशाग्रे लुब्धमीनो मृगो यथा ॥८९॥ यथा विषाक्तं भक्ष्यं च भुंक्ते
भोक्ता बुभुक्षितः ॥ गृह्णाति दुष्टो दुष्टं च विषकुम्भं पयोमुखम्॥९०॥तथा दृष्ट्वा परस्त्रीणां मुखपद्मं मनोहरम् ॥ विनाशबीजं मोहे
न भ्रान्तो भवति लम्पटः ॥ ९१ ॥मुखं च रुचिरं स्त्रीणां श्रोणियुग्मं स्तनौ तथा ॥ कामाधारं नाशबीजमधर्मस्थलमेव च ॥९२॥
भगं नरककुण्डं च लालामूत्रसमन्वितम् ॥ दुर्गंधियुक्तं पापं च यमदण्डस्य कारणम् ॥९३॥ यथा लिङ्गं विशत्येव पापयोनौ च यो
षिताम् ॥ तथा पुमान्विशत्येव रौरवे च युगेयुगे ॥९४॥ रहस्यं चापदं दृष्ट्वा मां त्वं धर्षितुमिच्छसि ॥ अत्रैव सर्वदेवाश्च लोकपाला
श्च ब्राह्मण ॥९५॥ जाज्वल्यमानो धर्मश्च साक्षी शास्ता च कर्मणाम् ॥ यमश्च दण्डकर्ता च स्थापितो हरिणा स्वयम् ॥९६॥ स्व
यं कृष्णश्च धर्मात्मा ज्ञानरूपो महेश्वरः ॥ दुर्गा बुद्धिर्मनो ब्रह्मा चेन्द्रियाणि सुरास्तथा॥९७॥सर्वप्राणिषु तिष्ठंति साक्षिणः कर्मणां
द्विज ॥ क्व गुप्तं क्व रहस्यं वा ब्राह्मण ज्ञानदुर्बल ॥ ९८ ॥ क्षमस्व गच्छ भद्रं ते अवध्याश्च द्विजातयः ॥ शक्ताऽहं भस्मसात्कर्तुं
गच्छ वत्स यथासुखम् ॥९९॥ तपस्यासु मम गतमष्टोत्तरशतं युगम् ॥ नास्ति गोत्रं मत्पितुश्च न माता न पिता मम ॥ १०० ॥
सर्वान्तरात्मा भगवान्कृष्णो रक्षति मां द्विज ॥ कृष्णेन स्थापितो धर्मो मां च रक्षति नित्यशः॥१॥आदित्यश्च तथा चन्द्रः पवनश्च
हुताशनः ॥ ब्रह्मा शंभुर्भगवती दुर्गा रक्षति मां सदा॥ २ ॥येन शुक्लीकृता हंसाः शुकाश्च हरिताः कृताः ॥ मयूराश्चित्रिता येन स मे
रक्षां करिष्यति ॥ ३ ॥ अनाथबालवृद्धानां रक्षकाः सर्वदेवताः ॥ नारीबुद्ध्या न मां धर्मस्त्यक्त्वा गच्छेद्धि सर्वदा ॥ ४ ॥ मां मातरं

परित्यज्य गच्छ वत्स यथासुखम् ॥ इत्येवमुक्त्वा देवी सा तस्थौ तत्र धरा यथा ॥ ५ ॥ आगच्छन्तं च संभोक्तुंमाया तं बोधनेन च ॥ शशापेति च सा कोपाद्ब्रह्मबन्धो क्षयो भव ॥ ६ ॥ क्षयो भव दुराचार हे पापिष्ठ क्षयो भव ॥ पुनः शप्तं स्वयं सूर्यो वारयामास यत्नतः ॥ ७ ॥ एतस्मिन्नन्तरे तात तत्रैव जगदीश्वराः ॥ अजग्मुरतिसंत्रस्ता ब्रह्मविष्णुशिवादयः ॥ ८ ॥ धर्मं दृष्ट्वा कलारूपं रुरुदुस्त्रिदशेश्वराः ॥ कृत्वा क्रोडेऽतीव कृशं कुह्वा भीतं यथा विधुम् ॥ निश्चेष्टं मलिनं दग्धं सतीकोपाग्निना व्रज ॥ ९ ॥ श्रीभगवानुवाच ॥ क्षमस्व वृन्दे मद्भक्ते जन्ममृत्युजराहरे ॥ धर्मं जीवय मद्भक्तं रक्ष धर्मं पतिव्रते ॥ ॥ १० ॥ ब्रह्मोवाच ॥ ध्वांतघूर्णं जगत्सर्वं विना धर्मं बभूव ह ॥ कम्पितौ चन्द्रसूर्यौ च शेषश्चापि वसुन्धरा ॥ ११ ॥ ॥ महादेव उवाच ॥ प्रनष्टं च जगत्सर्वं विना धर्मेण सुन्दरि ॥ धर्मं जीवय भद्रं ते स्वस्ति तेऽस्तु वरानने ॥ १२ ॥ सूर्य उवाच ॥ वरं वृणीष्व भद्रं ते यत्ते मनसि वाञ्छितम् ॥ धर्मं जीवय भद्रं ते रक्ष सृष्टिं पतिव्रते ॥ १३ ॥ ॥ अनन्त उवाच ॥ धर्मं करोषि तपसा कथं धर्मं विहंसि च ॥ धर्मं जीवय भद्रं ते सर्वधर्मो भवेत्तव ॥ १४ ॥ चन्द्र उवाच ॥ द्विजरूपधरो धर्मस्त्वां परीक्षितुमागतः ॥ ब्रह्मणा प्रेरितश्चैव निर्दोषश्च विहिंसितः ॥ १५ ॥ महेन्द्र उवाच ॥ तपसोपार्जितो धर्मो धर्मेण च फलं नृणाम् ॥ कथं फलं च तपसां यदि धर्मः क्षयं गतः ॥ १६ ॥ वरुण उवाच ॥ धर्मं जीवय धर्मिष्ठे धर्मं रक्ष सनातनम् ॥ निष्फलं कर्मिणां कर्म विना धर्मेण धार्मिके ॥ १७ ॥ पवन उवाच ॥ जगत्पूतं कुरु शुभे धर्मं जीवय साम्प्रतम् ॥ धर्मे प्रनष्टे तपसां तवापूर्वं विनङ्क्ष्यति ॥ १८ ॥ वह्निरुवाच ॥ स्वधर्मोपार्जनं कर्तुमागताऽसि च भारतम् ॥ विहंसि धर्ममज्ञात्वा पुनर्जीवय सुन्दरि ॥ १९ ॥ यम उवाच ॥ वेदोक्तकर्मकर्तृणामहं विश्वेश्वरानने ॥ धर्मानुसारात्फलदो धर्मं जीवय सत्वरम् ॥ २० ॥ देवानां वचनं श्रुत्वा समुत्थाय पतिव्रता ॥ नमस्कृत्य सुरेशांश्च तानुवाच तपस्विनी ॥ २१ ॥ वृन्दोवाच ॥ अहं देव न जानामि धर्मं ब्राह्मणरूपिणम् ॥ कृतः क्षयो मया कोपान्मां परीक्षि

तुमागतः ॥ २२ ॥ जीवयामि ध्रुवं धर्मं युष्माकं च प्रसादतः ॥ इत्येवमुक्त्वा सा वृन्दा चेत्युवाच व्रजेश्वर ॥ २३ ॥ तपः सत्यं यदि मम सत्यं च विष्णुपूजनम् ॥ तेन पुण्येन सद्योऽत्र द्विजो भवतु विज्वरः ॥२४॥ यदि मे च भवेत्सत्यं व्रतं सत्यं तपः शुचि ॥ तेन पुण्येन सत्येन द्विजो भवतु विज्वरः ॥ २५ ॥ यदि नारायणः सत्यः सर्वात्मा नित्यविग्रहः ॥ ज्ञानात्मकः शिवः सत्यो द्विजो भवतु विज्वरः ॥ २६ ॥ ब्रह्म सत्यं च ते देवाः प्रकृतिः परमा यदि ॥ यज्ञः सत्यस्तपः सत्यं द्विजो भवतु विज्वरः ॥ २७ ॥ इत्येवमुक्त्वा सा वृन्दा धर्मं क्रोडे चकार च ॥ तं दृष्ट्वा च कलारूपं रुरोद कृपया सती ॥ २८ ॥ एतस्मिन्नन्तरे मूर्तिधर्मभार्या शुचाऽऽकुला ॥ निपत्य विष्णुपादे च शिरसा चेत्युवाच सा ॥ २९ ॥ मूर्तिरुवाच ॥ हे नाथ करुणासिंधो दीनबन्धो कृपां कुरु ॥ तूर्णं जीवय कान्तं मे जगन्नाथ कृपामय ॥ ३० ॥ पतिहीना च या नारी पापिनी सा भवार्णवे ॥ यथाऽऽस्यं चक्षुर्विरतं प्राणहीना यथा तनूः ॥ ३१ ॥ मितं ददाति हि पिता मितं भ्राता मितं सुतः ॥ मितं बन्धुर्मितं माता सर्वदाता पतिः प्रभुः ॥ ३२ ॥ इत्येवमुक्त्वा सा देवी तत्र तस्थौ रुरोद च ॥ उवाच वृन्दां भगवान्सर्वात्मा प्रकृतेः परः ॥ ३३ ॥ श्रीभगवानुवाच ॥ त्वयाऽऽयुस्तपसा लब्धं यावदायुश्च ब्रह्मणः ॥ तदेव देहि धर्माय गोलोकं गच्छ सुन्दरि ॥३४॥ तन्वानया च तपसा पश्चान्मां च लभिष्यसि ॥ पश्चाद्गोलोकमागत्य वाराहे च वरानने ॥ वृषभानसुता त्वं च राधाच्छाया भविष्यसि ॥३५॥ मत्कलांशश्च रापाणस्त्वां विवाहे ग्रहीष्यति ॥ मां लभिष्यसि रासे च गोपीभी राधया सह ॥३६॥ राधा श्रीदामशापेन वृषभानसुता यदा ॥ सा चैव वास्तवी राधा त्वं च च्छायास्वरूपिणी ॥३७॥ विवाहकाले रापाणस्त्वां च च्छायां ग्रहीष्यति ॥ त्वां दत्त्वा वास्तवी राधा साऽन्तर्धाना भविष्यति ॥ ॥३८॥ राधैवेति विमूढाश्च विज्ञास्यन्ति च गोकुले ॥ स्वप्ने राधापदाम्भोजं न हि पश्यन्ति बल्लवाः ॥३९॥ स्वयं राधा मम क्रोडे छाया रापाणकामिनी॥विष्णोश्च वचनं श्रुत्वा ददावायुश्च सुन्दरी ॥४०॥ उत्तस्थौ पूर्णधर्मश्च तप्तकाञ्चनसन्निभः ॥ पूर्वस्मात्सुन्दरः श्रीमान्प्रणनाम परात्परम् ॥ ४१ ॥ वृन्दोवाच ॥ देवाः शृणुत मद्वाक्यं दुर्लङ्घ्यं सावधानतः ॥ न हि मिथ्या भवेद्वाक्यं

मदीयं च निशामय ॥ ४२ ॥ क्षयो भवेति वाक्यं च मयोक्तं कोपभीतया ॥ वारत्रयं पुनर्वक्तुं वारयामास भास्करः ४३ ॥ सत्ये च
परिपूर्णोऽयं यथा पूर्वो यथाऽधुना॥ त्रिपादश्चापि त्रेतायां द्विपादो द्वापरे तथा ॥४४॥ एकपादश्च धर्मोऽयं कलेश्च प्रथमे हरे ॥ शेषः
कलाषोडशांशः पुनः सत्ये यथा पुरा ॥ ४५ ॥ त्रिर्निर्गतं मम मुखात्क्षयस्तेन ततः क्रमात् ॥ पुनरुक्ते च मनसि वारयामास
भास्करः ॥ ४६ ॥ तेनैव हेतुनाऽयं च कलिशेषे कलामयः ॥ तथा शप्तः स्थितो दुर्गे कलिशेषे तथा ध्रुवम् ॥ ४७ ॥ एतस्मिन्नन्तरे
नन्द ददृशुर्देवता रथम् ॥ गोलोकादागतं वेगादतीव सुन्दरं शुभम् ॥४८॥ अमूल्यरत्ननिर्माणहीरहारपरिष्कृतम् ॥ मणिमाणिक्य
मुक्ताभिर्वस्त्रैश्च श्वेतचामरैः ॥४९॥ विभूषितं भूषणैश्च रुचिरै रत्नदर्पणैः ॥ नत्वा हरिं हरं वृन्दा ब्रह्माणं सर्वदेवताः॥१५०॥समारुह्य रथं
दृष्ट्वा गोलोकं च जगाम सा॥देवा जग्मुश्च स्वस्थानं किं भूयः श्रोतुमिच्छसि॥१५१॥इति श्रीब्रह्मवैवर्ते महापुराणे नारायणनारदसं
वादे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे भगवन्नन्दसंवादे षडशीतितमोऽध्यायः॥८६॥नन्द उवाच॥त्वां ज्ञातुं नहि शक्ताश्च वेदा वेदप्रभुं स्व
यम्॥ सुरा ब्रह्मेशशेषाद्या मुनिसिद्धादयस्तथा॥१॥ को भवानिति विज्ञातुं परं कौतूहलं मम॥तत्सर्वं स्वात्मयाथार्थ्यं निर्जने कथय
प्रभो ॥ २ ॥ श्रीनारायण उवाच ॥ एतस्मिन्नन्तरे तत्र कृष्णं द्रष्टुं मुनीश्वराः ॥ आजग्मुः सहसा वत्स ज्वलन्तो ब्रह्मतेजसा ॥३॥
पुलहश्च पुलस्त्यश्च क्रतुश्च भृगुरङ्गिराः ॥ प्रचेताश्च वसिष्ठश्च दुर्वासाः कण्व एव च ॥ ४ ॥ कात्यायनः पाणिनिश्च कणादो गौतम
स्तथा॥ सनकश्च सनन्दश्च तृतीयश्च सनातनः॥५॥कपिलश्चासुरिश्चैव वायुः पञ्चशिखस्तथा॥विश्वामित्रो वाल्मीकिश्च कश्यपश्च
पराशरः ॥६॥ विभाण्डको मरीचिश्च शुक्रोऽत्रिश्च बृहस्पतिः॥गार्ग्यश्चापि तथा वात्स्यो व्यासश्च जैमिनिस्तथा॥७॥मितवागृष्य
शृङ्गश्च याज्ञवल्क्यः शुकस्तथा॥सौभरिः शुद्धजटिलो भरद्वाजः सुभद्रकः ॥८॥ मार्कण्डेयो लोमशश्च आसुरिश्च विटङ्कणः॥अष्टावक्रः
शतानन्दो वामदेवश्च भागुरिः॥९॥संवर्त्तश्चाप्युतथ्यश्च नरोऽहं चापि नारदः॥जाबालिः पर्शुरामश्चाप्यगस्त्यः पैल एव च॥१०॥
युधामन्युर्गौरमुखोऽप्युपमन्युः श्रुतश्रवाः ॥ मैत्रेयश्च्यवनश्चैव वररुच्यर्षिरेव च॥११॥तान्दृष्ट्वा सहसोत्थाय नमस्कृत्य पुटांजलिः ॥

सिंहासनेषु रम्येषु वासयामास सादरम् ॥ १२ ॥ पूजयामास विधिवत्कुशलप्रश्नपूर्वकम् ॥ परस्परं च संभाष्य मध्ये कृष्ण उवास
सः ॥ १३ ॥ एतस्मिन्नन्तरे कृष्णस्तेजोराशिं ददर्श सः॥ददृशुस्ते च मुनयोऽप्याकाशे च समुज्ज्वलम्॥१४॥तेजसोऽभ्यन्तरे वत्स
कुमारं कनकप्रभम् ॥ यथैवं पंचवर्षीयं नग्नं बालकमीप्सितम् ॥ १५ ॥ आविर्बभूव सहसा सभामध्ये च नारद ॥ उत्तिष्ठमानं सहसा
तद्दृष्ट्वा मुनिपुंगवाः ॥ १६ ॥ प्रणेमुर्मुनयः सर्वे शौरिश्च प्रणनाम तम् ॥ सस्मितं स्निग्धनेत्रं च कृत्वा युक्तिं च सादरम् ॥ १७ ॥
स सर्वांश्चाशिषं कृत्वा समुवास च संसदि ॥ उवाच तांश्च शौरिं च भगवन्तं सनातनम् ॥ १८ ॥ सनत्कुमार उवाच ॥
भद्रं वो मुनयः शश्वत्तपसां फलमीप्सितम् ॥ कृष्णस्य कुशलप्रश्नं शिवबीजस्य निष्फलम् ॥१९ ॥ साम्प्रतं कुशलं वश्च दर्शनं पर
मात्मनः ॥ भक्तानुरोधाद्देहस्य परस्य प्रकृतेरपि ॥ २० ॥ निर्गुणस्य निरीहस्य सर्वबीजस्य तेजसा ॥ भारावतरणायैव चाविर्भूत
स्य साम्प्रतम् ॥२१॥ श्रीकृष्ण उवाच ॥ शरीरधारिणश्चापि कुशलप्रश्नमीप्सितम् ॥ तत्कथं कुशलप्रश्नं मयि विप्र न
विद्यते ॥ २२ ॥ सनत्कुमार उवाच ॥ शरीरे प्राकृते नाथ सततं च शुभावहम् ॥ नित्यदेहे क्षेमबीजे शिवप्रश्नमनर्थकम्
॥ २३ ॥ श्रीभगवानुवाच ॥ योयो विग्रहकारी च स च प्राकृतिकः स्मृतः ॥ देहो न विद्यते विप्र तां नित्यां प्रकृतिं
विना ॥ २४ ॥ सनत्कुमार उवाच ॥ रक्तबिन्दूद्भवा देहास्ते च प्राकृतिकाः स्मृताः कथं प्रकृतिनाथस्य बीजस्य प्राकृतं
वपुः ॥२५॥ सर्वबीजस्य सर्वादिर्भवांश्च भगवान्स्वयम् ॥ सर्वेषामवताराणां प्रधानं बीजमव्ययम् ॥ २६ ॥ कृत्वा वदन्ति वेदाश्च
नित्यं नित्यं सनातनम् ॥ ज्योतिःस्वरूपं परमं परमात्मानमीश्वरम् ॥ २७ ॥ मायया सगुणं चैव मायेशं निर्गुणं परम् ॥ प्रवदन्ति
च वेदाङ्गास्तथा वेदविदः प्रभो ॥२८॥ श्रीकृष्ण उवाच ॥ साम्प्रतं वासुदेवोऽहं रक्तवीर्याश्रितं वपुः ॥ कथं न प्राकृतो विप्र
शिवप्रश्नमभीप्सितम् ॥ २९ ॥ सनत्कुमार उवाच ॥ वासुः सर्वनिवासश्च विश्वानि यस्य लोमसु ॥ तस्य देहः परं ब्रह्म
वासुदेव इतीरितः ॥ ३० ॥ वासुदेवेति तन्नाम वेदेषु च चतुर्षु च ॥ पुराणेष्वितिहासेषु यात्रादिषु च दृश्यते ॥३१॥ रक्तवीर्याश्रितो

देहः क्व ते वेदे निरूपितः ॥ साक्षिणो मुनयश्चैव धर्मः सर्वत्र एव च ॥ साक्षिणो मम वेदाश्च रविचन्द्रौ च साम्प्रतम् ॥ ३२ ॥ भृगुरुवाच ॥ सत्यं वदसि विप्रेन्द्र त्वमेव वैष्णवाग्रणीः ॥ स्वागतं कुशलं शश्वत्किन्निमित्तमिहागतः ॥ ३३ ॥ सनत्कुमार उवाच ॥ श्रूयतां मुनयः सर्वे श्रूयतां कृष्ण साम्प्रतम् ॥ अहो येन निमित्तेन चातिशीघ्रमिहागतः ॥ ३४ ॥ श्रीकृष्ण उवाच ॥ भगवन्सर्वधर्मज्ञ किंनिमित्तमिहागतः ॥ सर्वं जानासि सर्वज्ञ त्वमेव विदुषां वर ॥ ३५ ॥ सनत्कुमार उवाच ॥ धन्योऽसि भगवञ्छश्वन्मान्योऽसि जगतामपि ॥ सर्वेश्वरेश्वरोऽसि त्वं त्वत्परो नास्ति विश्वतः ॥ ३६ ॥ श्रीकृष्ण उवाच ॥ यज्ञानां च व्रतानां च तपस्यानां द्विजेश्वर ॥ सततं फलदाताऽहं दक्षिणाभिः सहेति च॥३७॥इति श्रुत्वा कुमारश्च जवेन प्रययौ च ते ॥ मत्वाऽऽश्चर्यं च वचनं वारयामास तेऽपि तम् ॥ ३८ ॥ ऋषय ऊचुः ॥ हे सिद्धेन्द्र महाभाग कुमार करुणामय ॥ का शङ्कितकथा प्रोक्ता भगवत्कृष्णसंनिधौ ॥ ३९ ॥ किं पुत्र दृष्टमाश्चर्यं श्रुतं किमपि कुत्रचित् ॥ अतीव कृत्वा विस्तीर्णमस्माकं वक्तुमर्हसि ॥ ४० ॥ एतस्मिन्नन्तरे ब्रह्मा पार्वत्या सह शंकरः ॥ अनन्तश्चापि धर्मश्च श्रीसूर्यश्च निशाकरः ॥४१॥ आदित्या वसवो रुद्रा दिक्पालाद्याश्च देवताः ॥ श्रीकृष्णं सहसोत्थाय संभाव्य च पृथक्पृथक् ॥४२॥मधुपर्कादिकं दत्त्वा पूजयामास भक्तितः ॥ प्रणेमुर्ऋषयः सर्वे शेषं शम्भुं विधिं शिवाम् ॥४३॥ परस्परं च संभाषा बभूव द्विजदेवयोः ॥ समुवासासने मध्ये कुमारः कनकप्रभः ॥ कथां कथितुमारेभे संसदि द्विजदेवयोः ॥ ४४ ॥ सनत्कुमार उवाच ॥ मया गतश्च गोलोको न दृष्टो राधिकापतिः ॥ ततो गतं च वैकुण्ठं तत्र नास्ति चतुर्भुजः ॥ ४५ ॥ ततो गतश्च क्षीरोदस्तत्र नास्ति हरिः स्वयम् ॥ परिश्रान्तो विषण्णश्च स्नातं क्षीरोदधेस्तटे ॥ ४६ ॥ विस्तीर्णवालुकामध्ये कच्छपः शतयोजनः ॥ भीतश्च कम्पितस्तत्र दृष्टो दुःखी च शुष्कितः ॥ ४७ ॥ निःसारितो राघवेण मीनेन च महात्मना ॥ धन्योऽसीति मयोक्तश्च नाहं धन्य उवाच सः ॥ ४८ ॥ क्षीरोदः सागरो धन्यो जंतवो यत्र मद्विधाः ॥ मत्तो महत्तराश्चापि ह्यसंख्याश्च महामुने ॥ ४९ ॥ भवान्धन्योऽसि क्षीरोद तेनोक्तो नाहमेव च ॥ धन्या वसुन्धरा देवी यत्रैव

सप्त सागराः॥५०॥धन्याऽसि वसुधेत्युक्ता नाहमेवेत्युवाच सा॥धन्योऽनन्तो ममाधारः कृष्णांशो नागराड्विभुः ॥५१॥ सहस्रमूर्ध्नी
मध्येऽहं मूर्ध्नि शूर्पे च सर्षपः ॥ धन्योऽसि शेषेत्युक्तोऽयं धन्यो नाहमुवाच वै ॥ ५२ ॥ धन्यः कूर्मो ममाधारो गच्छ तत्रैव वै मुने ॥
धन्योऽसि कूर्मेत्युक्तोऽयं नाहं धन्योऽस्मि वै मुने॥५३॥वायुना धार्यमाणोऽहं मत्तो धन्यतमश्च सः ॥ धन्योऽसीत्युक्तः पवनो धन्यो
नाहमुवाच सः ॥ धन्यश्च भगवान्ब्रह्मा विधाता जगतामपि ॥५४॥ धन्योऽसि तत्र धाता च धन्यो नाहमुवाच सः ॥ धन्यो महेश्वरो
देवो योगीन्द्राणां गुरोर्गुरुः ॥५५॥ सर्वाराध्यः सर्वपूज्यो धर्मरूपः सनातनः ॥ कालकालश्च संहर्ता स्वयं मृत्युञ्जयःप्रभुः ॥ धन्योऽसि
तत्र शम्भुश्च धन्यो नाहमुवाच सः ॥५६॥ सर्वादौ पूजनं यस्य ज्ञानिनां च गुरोर्गुरुः ॥ धन्यो गणेश्वरो देवो देवानां प्रवरः परः॥५७॥
सिद्धेन्द्रेषु मुनीन्द्रेषु देवेन्द्रेषु श्रुतौ श्रुतम्॥योगीन्द्रेषु च प्राज्ञेषु न गणेशात्परः पुमान्॥५८॥निम्नगासु यथा गङ्गा तीर्थेषु पुष्करं यथा
वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ॥५९॥ वेदो नारायणः साक्षाद्वयं पूज्या व्यवस्थया ॥ तस्माच्छास्त्राणि सर्वाणि पुराणानि च
सन्ति वै ॥ ६० ॥ तस्मान्निरूपितो धर्मश्चेतिहासश्च संहिताः ॥ तस्माद्धन्याश्च ते वेदा वदन्त्यत्र मनीषिणः ॥ ६१ ॥ यूयं धन्याश्च
मान्याश्चेत्युक्ता वेदा मया ततः ॥ ऊचुस्ते न वयं धन्या यज्ञसङ्घश्च साम्प्रतम् ॥६२॥ वयं व्यवस्थाकर्तारो यज्ञौघः फलदः स्वयम्॥
तस्माद्धन्यः स एवापि गच्छगच्छ महामुने ॥ ६३ ॥ धन्योऽसि यज्ञसंघोऽसीत्युक्तस्तत्र मया विभो ॥ ऊचुस्ते न वयं धन्या
धन्यं कर्म शुभं मुने ॥ ६४ ॥ शुभकर्मासि धन्यं त्वं नाहं धन्यमुवाच तत् ॥ कर्मणां फलदाता यः कर्महेतुश्च साम्प्रतम् ॥६५॥
धातुर्विधाता भगवान्सर्वादिः सर्वकारकः ॥ श्रीकृष्णः परमात्मा च धन्यो मान्यश्च निश्चितम् ॥ ६६ ॥ धर्मालयं ततो गत्वा न
दृष्ट्वा जगदीश्वरम् ॥ मथुरामागतं द्रष्टुं परिपूर्णतमं प्रभुम् ॥ ६७ ॥ यज्ञानां तपसां चैव व्रतानां शुभकर्मणाम् ॥ ईश्वरं फलदा
तारं परमात्मानमेव च ॥ ६८ ॥ कारणं कारणानां च ब्रह्मादीनां पुरःसरम् ॥ धन्योऽसीति मयोक्तश्च दक्षिणाभिः सहेति च
॥ ६९ ॥ इत्युक्तेन भगवता कथितं सर्वकारणम् ॥ दक्षिणाभिश्च फलदो हतयज्ञो ह्यदक्षिणः ॥ ७० ॥ दक्षिणा विप्रमुद्दिश्य तत्काले

तु न दीयते ॥ एकरात्रे व्यतीते तु तद्दानं द्विगुणं भवेत् ॥ ७१ ॥ मासे शतगुणं प्रोक्तं द्विमासे तु सहस्रकम् ॥ संवत्सरे
व्यतीते तु स दाता नरकं व्रजेत् ॥ ७२ ॥ वर्षाणां च सहस्रं च मूत्रकुण्डे निपत्य च ॥ ततश्चाण्डालतां याति व्याधियुक्तश्च
पातकी ॥ ७३ ॥ दात्रा न दीयते दानं ग्रहीत्रा चेन्न गृह्यते ॥ उभौ तौ नरकं प्राप्तौ वर्षाणां च सहस्रकम् ॥ ७४ ॥
यजमानश्च चाण्डालो ब्राह्मणस्तत्पुरोहितः ॥ व्याधियुक्तावुभौ तौ च पापिनौ कर्मणः फलात् ॥ ७५ ॥ सर्वे देवाश्च
मुनयो जहसुर्विस्मयं ययुः ॥ विस्मयं च ययौ नन्दस्तत्याज पुत्रभावकम् ॥ ७६ ॥ रुरोद च सभामध्ये लज्जाहीनः
शुचाकुलः ॥ त्यज मोहमितीत्युक्त्वा बोधयामास पार्वती ॥ ७७ ॥ श्रीनन्द उवाच ॥ अमूल्यरत्नं माणिक्यं यथा
कुजन्मनो गृहे ॥ स्थितं तेन च देवेश तथाऽहं वञ्चितः प्रभो ॥ ७८ ॥ ममापराधं भगवन् क्षमस्व प्रकृतेः पर ॥ यास्यामि न
पुनर्गेहं गोकुलं यमुनातटम् ॥ ७९ ॥ वृन्दावनं तथावासं क्रीडावासं गदाग्रज ॥ तत्सर्वं च यशोदाया गोपिकान्तिकमेव च
॥ ८० ॥ किं ब्रवीमि यशोदां च प्रेयसीं राधिकामपि ॥ प्रेमपात्रं च बालौघं वद भो कथयामि किम् ॥ ८१ ॥ इत्युक्त्वा
च सभामध्ये मूर्च्छां संप्राप नारद ॥ क्रोडे कृत्वा जगन्नाथो बोधयामास तत्क्षणम् ॥८२॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्ण
जन्मखण्डे उत्तरार्धे नारायणनारदसंवादे भगवन्नन्दसंवादे सप्ताशीतिमोऽध्यायः॥८७॥ ❀ ॥श्रीकृष्ण उवाच ॥ चेतनं कुरु हे तात
हे तात चेतनं कुरु॥ जलबुद्बुदवत्सर्वं संसारं सचराचरम् ॥१॥ त्यज मोहं महाभाग मायां स्तौहि परात्पराम् ॥ ब्रह्मस्वरूपां परमां
सर्वमोहनिकृन्तनीम् ॥ मुक्तिप्रदां महाभागां विष्णुमायां सनातनीम् ॥ २ ॥ त्रिपुरस्य वधे घोरे महायुद्धे भयाकुले ॥ येन स्तोत्रेण
शम्भुश्च तया दैत्यं जघान सः ॥ ३ ॥ स्तोत्रराजं प्रदास्यामि सर्वमोहनिकृन्तनम् ॥ सर्ववाञ्छाप्रदं नन्द श्रूयतामत्र संसदि ॥ ४ ॥
श्रीनन्द उवाच ॥ सर्वविघ्नविनाशाय दुःखप्रशमनाय च ॥ विभूतये च यशसे नृणां वाञ्छितसिद्धये ॥५॥ स्तोत्रमेकं महादेव्या जगन्मा
तुर्जगत्प्रभो ॥ परं दुर्गतिनाशिन्या गोपनीयं सुदुर्लभम् ॥ ६ ॥ देहि मह्यं विनीताय भक्ताय भक्तवत्सल ॥ वेदानां जनकस्त्वं च

निर्गुणश्च परात्परः ॥ ७ ॥ श्रीभगवानुवाच ॥ शृणु वक्ष्यामि वैश्येन्द्र स्तोत्रं यत्परमाद्भुतम् ॥ सर्वविघ्नविनाशार्थं मोहपाशनिकृन्तनम् ॥८॥ रणत्रस्तेन विभुना शङ्करेण पुरा कृतम्॥नारायणोपदेशेन प्रेरितेन च ब्रह्मणा ॥९॥ शत्रुग्रस्तं शिवं दृष्ट्वा सब्रह्माणमुवाच ह ॥ उवाच शंकरं ब्रह्मा रथस्थं पतितं रणे ॥१०॥ शूरसंकटशान्त्यर्थं दुर्गां दुर्गतिनाशिनीम् ॥ मूलप्रकृतिमाद्यां तां स्तौहि ब्रह्मस्वरूपिणीम् ॥ ११ ॥ हरिणा प्रेरितोऽहं च त्वां वदामि सुरेश्वर ॥ विना शक्तिसहायेन को वा कं जेतुमीश्वरः ॥ १२ ॥ ब्रह्मणश्च वचः श्रुत्वा दुर्गां सस्मार शङ्करः ॥ पुटाञ्जलिपरो भूत्वा भक्तिनम्रात्मकन्धरः ॥ १३ ॥ स्नातः पादौ च प्रक्षाल्य धृत्वा धौते च वाससी आचान्तः कुशहस्तश्च शुचिर्विष्णुं च संस्मरन् ॥ १४ ॥ श्रीमहादेव उवाच ॥ रक्षरक्ष महादेवि दुर्गे दुर्गतिनाशिनि ॥ मां भक्तमनुरक्तं च शत्रुग्रस्तं कृपा मयि ॥ १५ ॥ विष्णुमाये महाभागे नारायणि सनातनि ॥ ब्रह्मस्वरूपे परमे नित्यानन्दस्वरूपिणि ॥ १६ ॥ त्वं च ब्रह्मादिदेवानामम्बिके जगदम्बिके ॥ त्वं साकारे च गुणतो निराकारे च निर्गुणात् ॥ १७ ॥ मायया पुरुषत्वं च मायया प्रकृतिः स्वयम्॥तयोः परं ब्रह्म परं त्वं बिभर्षि सनातनि ॥१८॥ वेदानां जननी त्वं च सावित्री च परात्परा ॥ वैकुण्ठे च महालक्ष्मीः सर्वसंपत्स्वरूपिणी ॥ १९ ॥ मर्त्यलक्ष्मीश्च क्षीरोदे कामिनी शेषशायिनः ॥ स्वर्गेषु स्वर्गलक्ष्मीस्त्वं राजलक्ष्मीश्च भूतले ॥ २० ॥ नागादिलक्ष्मीः पाताले गृहेषु गृहदेवता ॥ सर्वसस्यस्वरूपा त्वं सर्वैश्वर्यविधायिनी ॥ २१ ॥ रागाधिष्ठातृदेवी त्वं ब्रह्मणश्च सरस्वती ॥ प्राणानामधिदेवी त्वं कृष्णस्य परमात्मनः ॥ २२ ॥ गोलोके च स्वयं राधा श्रीकृष्णस्यैव वक्षसि ॥ गोलोकाधिष्ठिता देवी वृन्दावनवने वने ॥ २३ ॥ श्रीरासमण्डले रम्या वृन्दावनविनोदिनी ॥ शतशृङ्गाधिदेवी त्वं नाम्ना चित्रावलीति च ॥ २४ ॥ दक्षकन्या कुत्रकल्पे कुत्रकल्पे च शैलजा ॥ देवमाता दितिस्त्वं च सर्वाधारा वसुन्धरा ॥ २५ ॥ त्वमेव गङ्गा तुलसी त्वं च स्वाहा स्वधा सती ॥ त्वदंशांशांशकलया सर्वदेवादियोषितः ॥ २६ ॥ स्त्रीरूपं चातिपुरुषं देवि त्वं च नपुंसकम् ॥ वृक्षाणां वृक्षरूपा त्वं सृष्टा चाङ्कुररूपिणी ॥ २७ ॥ वह्नौ च दाहिका शक्तिर्जले शैत्यस्वरूपिणी ॥ सूर्ये तेजःस्वरूपा च प्रभारूपा

च संततम् ॥ २८ ॥ गन्धरूपा च भूमौ च आकाशे शब्दरूपिणी ॥ शोभास्यरूपा चन्द्रे च पद्मसंघे च निश्चितम् ॥ २९ ॥ सृष्टौ
सृष्टिस्वरूपा च पालने परिपालका ॥ महामारी च संहारे जले च जलरूपिणी ॥ ३० ॥ क्षुत्त्वं दया त्वं निद्रा त्वं तृष्णा त्वं बु
द्धिरूपिणी ॥ तुष्टिस्त्वं चपि पुष्टिस्त्वं श्रद्धा त्वं च क्षमा स्वयम् ॥ ३१ ॥ शान्तिस्त्वं च स्वयं भ्रान्तिः कान्तिस्त्वं कीर्तिरेव च ॥
लज्जा त्वं च तथा माया भुक्तिमुक्तिस्वरूपिणी ॥ ३२ ॥ सर्वशक्तिस्वरूपा त्वं सर्वसंपत्प्रदायिनी ॥ वेदे च निर्वचनीया त्वं त्वां न
जानाति कश्चन ॥ ३३ ॥ सहस्रवक्त्रस्त्वां स्तोतुं न च शक्तः सुरेश्वरि ॥ वेदा न शक्ताः को विद्वान्न च शक्तः सरस्वती ॥ ३४ ॥
स्वयं विधाता शक्तो न न च विष्णुः सनातनः॥ किं स्तौमि पञ्चवक्त्रेऽस्तु रणत्रस्तो महेश्वरि ॥३५॥ कृपां कुरु महामाये मम शत्रु
क्षयं कुरु ॥ इत्युक्त्वा च सकरुणं रथस्थे पतिते रणे ॥ ३६ ॥ आविर्बभूव सा दुर्गा सूर्यकोटिसमप्रभा ॥ नारायणेन कृपया प्रेरिता
परमात्मना ॥ ३७ ॥ शिवस्य पुरतः शीघ्रं शिवाय च जयाय च ॥ इत्युवाच महादेवी मायाशक्त्यासुरं जहि ॥ ३८ ॥
॥ श्रीदुर्गोवाच ॥ वरं वृणीष्व भद्रं ते यत्ते मनसि वाञ्छितम् ॥ भवान्वरः सुराणां च जयं तुभ्यं ददाम्यहम् ॥ ३९ ॥
॥ श्रीमहादेव उवाच ॥ क्षयो भवतु दैत्यस्य इति मे वरमीश्वरि ॥ देहीति वाञ्छितं दुर्गे परमाद्ये सनातनि ॥ ४० ॥
भगवत्युवाच ॥ हरिं स्मर महाभाग जय दैत्यं जगद्गुरो ॥ स्वयं विधाता भगवांस्त्वमेव ज्योतिरीश्वरः ॥ ४१ ॥ एतस्मिन्नन्तरे
विष्णुर्वृषरूपो बभूव ह ॥ दधार कलया मूर्ध्ना शूलपाणे रथं विभुः ॥ ४२ ॥ ऊर्ध्वचक्रमथोग्रं च प्रकृतिं च चकार सः ॥ अस्त्रं ददौ
मन्त्रपूतमुद्दधार ततो रथम् ॥ ४३ ॥ शिवः शस्त्रं गृहीत्वा च ध्यात्वा विष्णुं महेश्वरीम् ॥ जघान त्रिपुरं शीघ्रं स पपात महीत
ले ॥ ४४ ॥ तुष्टुवुः शङ्करं देवाश्चक्रुश्च पुष्पवर्षणम् ॥ दुर्गा तस्मै ददौ शूलं पिनाकं विष्णुरेव च ॥ ४५ ॥ ब्रह्मा शुभाशिषं
चैव मुनयश्चापि हर्षिताः ॥ ननृतुर्देवताः सर्वा जगुर्गन्धर्वकिन्नराः ॥ ४६ ॥ एतस्मिन्नन्तरे तात स्तवराजमनुत्तमम् ॥ विघ्नं विघ्नकरं
शीघ्रं शत्रुसंहारकारणम् ॥ ४७ ॥ परमैश्वर्यजनकं सुखदं परमं शुभम् ॥ निर्वाणमोक्षदं चैव हरिभक्तिप्रदं ध्रुवम् ॥ ४८ ॥ गोलो

कवासदं चैव सर्वसिद्धिप्रदं वरम् ॥ स्तोत्रराजप्रपठनात्प्रसन्ना पार्वती सदा ॥ ४९ ॥ लोभमोहकामक्रोधकर्ममूलनिकृन्तनम् ॥ बलबुद्धिकरं चैव जन्ममृत्युविनाशनम् ॥ ५० ॥ धनपुत्रप्रिया भूमिसर्वसंपत्प्रदं नृणाम् ॥ शोकदुःखहरं चैव सर्वसिद्धिप्रदं वरम् ॥ ॥ ५१ ॥ स्तोत्रराजप्रपठनान्महावन्ध्या प्रसूयते ॥ बन्धनान्मुच्यते दुःखी भयान्मुच्येत निश्चितम् ॥ ५२ ॥ रोगाद्विमुच्यते रोगी दरिद्रश्च धनी भवेत् ॥ दावाग्निमध्ये न मृतो भग्नः पोतो महार्णवे ॥५३॥ दस्युग्रस्तो रिपुग्रस्तो हिंस्रजन्तुसमन्वितः ॥ स्तोत्रेणानेन वैश्येन्द्र कल्याणं लभते नरः ॥५४॥ तैजसानां यथा रत्नमाश्रमाणां द्विजो यथा ॥ नदीनां च यथा गङ्गा मन्त्राणां प्रणवो यथा ॥ ॥५५॥तुलसी सर्वपत्राणां धराणां च वसुन्धरा॥पुष्पाणां पारिजातं च काष्ठानां चंदनं यथा॥५६॥विष्णुपूजा च तपसां व्रतेष्वेकादशी यथा॥ज्ञानिनां च यथा शम्भुः सिद्धानांच गणेश्वरः ॥५७॥ देवानां च यथा विष्णुर्वेदाः शास्त्रेषु तन्त्रतः ॥ देवीनां च यथा दुर्गा शान्तानां कमला यथा ॥ ५८ ॥ सरस्वती च विदुषां राधिका सुन्दरीषु च ॥ तथा स्तोत्रेष्विदं स्तोत्रं नातः परतरं व्रज ॥ ५९ ॥ पुरा दत्तं ब्रह्मणे च पुष्करे सूर्यपर्वणि ॥ दैत्यग्रस्ताय भीताय सर्वदुर्गहरं परम् ॥ ६० ॥ शिवाय शत्रुग्रस्ताय ददौ ब्रह्मा मदाज्ञया ॥ शिवश्च सनकादिभ्यः पुरा दुर्वाससे ददौ ॥ ६१ ॥ सनत्कुमारो भगवान्कृपया गौतमाय च ॥ पुलहाय पुलस्त्याय ददौ चाङ्गिरसे मुदा ॥ ६२ ॥ तथा चन्द्राय सूर्याय सूर्यश्चापि यमाय च ॥ यमश्च चित्रगुप्ताय कृपया च पुरा ददौ ॥ ६३ ॥ नित्यं पठिष्यसि स्तोत्रं गोलोकगमनाय वै ॥ साक्षात्पश्यसि भोतात तामेव पार्वतीमिह ॥ ६४ ॥ यस्मै कस्मै न दातव्यं पापिने गोपनं कुरु ॥ नारायणस्य भक्ताय शान्ताय विदुषे तथा ॥६५॥ सर्वज्ञाय च विप्राय प्रदातव्यं प्रयत्नतः ॥ विप्राय वृषवाहाय वृषलीपतये तथा ॥ ६६ ॥ शूद्राणां सूपकाराय शूद्रश्राद्धान्नभोजिने ॥ कन्याविक्रयिणे चैव ब्राह्मणाय विशेषतः ॥ ६७ ॥ सर्वसिद्धिं च लभते सिद्धस्तोत्रो भवेद्यदि ॥ दशायुतजपेनैव सिद्धस्तोत्रो भवेन्नरः ॥६८॥ अग्निस्तम्भं जलस्तम्भं मृत्स्तम्भं मनसस्तथा ॥ अश्वमेधसहस्राच्च पृथिव्याश्च प्रदक्षिणात् ॥६९॥ स्नानाच्च सर्वतीर्थानां स्तोत्रमेतच्च पुण्यदम् ॥ दत्तं तुभ्यं मया तात मम प्राणसमं व्रज ॥७०॥ स्तवनं कुरु पार्व

त्याश्चेदानीं मम संसदि ॥ श्रीकृष्णस्य वचः श्रुत्वा नन्दस्तुष्टाव पार्वतीम् ॥७१॥ स्तोत्रेणानेन विप्रेन्द्र सर्वसंपत्प्रदायिनीम् ॥ वरं तस्मै ददौ दुर्गा गोलोकवासमीप्सितम् ॥७२॥ दुर्लभं परमं ज्ञानं वेदे यन्न श्रुतं मुने ॥ राजेन्द्रत्वं गोकुले च कृष्णभक्तिं सुदुर्लभाम् ॥७३॥ तद्दास्यं चाप परतो महत्त्वं सिद्धमेव च॥वरं दत्त्वा ययौ दुर्गा संभाष्य शंभुना सह॥ जग्मुर्देवाश्च मुनयः स्तुत्वा च नन्दनन्दनम्॥ ॥ ७४ ॥ उवाच नन्द श्रीकृष्णो व्रज नन्दं व्रजान्वितः ॥ प्रहृष्टस्त्यक्तमोहश्च बोधेन दुर्लभेन च ॥ ७५ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे उत्तरार्धे नारायणनारदसंवादे श्रीभगवन्नन्दसंवादे अष्टाशीतितमोऽध्यायः ॥ ८८ ॥ ❋ ॥ श्रीकृष्ण उवाच ॥ गच्छगच्छ गृहं गच्छ व्रजराज व्रजं व्रज ॥ सर्वतत्त्वं त्वया ज्ञातं दृष्टाश्च मुनयः सुराः ॥ १ ॥ श्रुतं मे धन्यमाख्यानं नानाख्यानं सुदुर्लभम् ॥ दुर्गायाः स्तोत्रराजं च जन्मपापनिकृन्तनम् ॥ २ ॥ स्थितं तत्ते निगदितं हर्षेण च सुखेन च ॥ मत्कृतं बालभावेन चापराद्धं च तत्क्षम ॥ ३ ॥ यत्सुखं न कृतं तात पित्रोश्च नृपमन्दिरे ॥ कृतं सुखं तत्परं च स्वर्गादपि सुदुर्लभम् ॥ ४ ॥ मदीयं प्रियवाक्यं च प्रह्वत्वं विनयं नयम् ॥ परिहासं बहुतरं यशोदां गोपिकागणम् ॥ ५ ॥ बालकानां समूहं च राधां चापि विशेषतः ॥ एकत्र च स्थितं तेषु बन्धुवर्गेषु कर्मणा ॥ ६ ॥ इहैवापि सुखं भुक्त्वा गच्छ गोलोकमुत्तमम् ॥ सार्द्धं यशोदया तात रोहिण्या गोपिकागणैः ॥ ७ ॥ गोपानां बालकैः सार्द्धं वृषभानेन गोपकैः ॥ राधामात्रा कलावत्या राधया सह यास्यसि ॥ ८ ॥ रथानां शतलक्षं च गोलोकादागतं पितः ॥ अमूल्यरत्ननिर्माणं हीरहारपरिष्कृतम् ॥ ९ ॥ मणिमाणिक्यमुक्तानां मालाजालविभूषितम् ॥ वह्निशुद्धांशुकै रम्यैराच्छन्नं पीतवर्णकैः ॥ १० ॥ पार्षदप्रवरै रम्यैर्वेष्टितं श्वेतचामरैः ॥ सद्रत्नदर्पणै रम्यैर्गोपिकाभिश्च गोपकैः ॥ वेष्टितं च तदारुह्य कौतुकाद्यास्यसि ध्रुवम् ॥ ११ ॥ त्यक्त्वा च पार्थिवं देहं दिव्यदेहं विधाय च ॥ अयोनिसंभवा राधा राधामाता कलावती ॥ १२ ॥ यास्यत्येव हि तेनैव नित्यदेहेन निश्चितम् ॥ पितॄणां मानसी कन्या धन्या मान्या कलावती ॥१३॥ धन्या च सीतामाता च दुर्गामाता च मेनका ॥ अयोनिसंभवा दुर्गा तारा सीता च सुन्दरी ॥१४॥

अयोनिसंभवास्ताश्च धन्या मेना कलावती ॥ इत्येवं कथितं तात गोपनीयं सुदुर्लभम् ॥ वरोऽयं दत्तस्तुभ्यं च मया च दुर्गया तथा ॥ १५ ॥ श्रीकृष्णस्य वचः श्रुत्वा प्रत्युवाच व्रजेश्वरः ॥ पुनरेव जगन्नाथं तद्भक्तो भक्तवत्सलम् ॥ १६ ॥ नन्द उवाच ॥ ॥ युगानां च चतुर्णां च यंयं धर्मं सनातनम् ॥ क्रमेण कृष्ण विस्तीर्णं कृत्वा मां कथय प्रभो ॥ १७ ॥ कलिशेषे भवेद्यद्यद्गुणदोषं कलेस्तथा ॥ का गतिर्वा पृथिव्याश्च धर्मस्य प्राणिनां तथा ॥ १८ ॥ नन्दस्य वचनं श्रुत्वा हृष्टः कमललोचनः ॥ कथां कथितुमारेभे विचित्रां मधुरान्विताम् ॥ १९ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे उत्तरभागे नारायणनारदसंवादे भगवन्नन्दसंवादे एकोननवतितमोऽध्यायः ॥ ८९ ॥

श्रीकृष्ण उवाच ॥ शृणु नन्द प्रवक्ष्यामि सानंदं मानसं यथा ॥ कथां रम्यां सुमधुरां पुराणेषु परिष्कृताम् ॥ १ ॥ परिपूर्णतमो धर्मो धार्मिकाश्च कृते युगे ॥ परिपूर्णतमं सत्यं परिपूर्णतमा दया ॥ २ ॥ अतीव प्रज्वलद्रूपा वेदाश्चत्वार एव च ॥ वेदाङ्गाश्चापि विविधाश्चेतिहासाश्च संहिताः ॥३॥ पुराणानि सुरम्याणि पञ्चरात्राणि पञ्च च ॥ रुचिराणि सुभद्राणि धर्मशास्त्राणि यानि च ॥ ४ ॥ विप्रा वेदविदः सर्वे पुण्यवन्तस्तपस्विनः ॥ नारायणं ते ध्यायन्ति तन्मनस्का जपान्ति च ॥ ५ ॥ ब्राह्मणाः क्षत्रिया वैश्याश्चतुर्वर्णाश्च वैष्णवाः ॥ शूद्रा ब्राह्मणभृत्याश्च सत्यधर्मपरायणाः ॥६॥ राजानो धार्मिकाश्चैव प्रजापालनतत्पराः ॥ गृह्णन्त्येव प्रजानां च षोडशांशकरान्नृपाः॥७॥करशून्याश्च विप्राश्च पूज्याः स्वच्छन्दगामिनः ॥ संततं सर्वसस्याढ्या रत्नाधारा वसुन्धरा ॥८॥ गुरुभक्तश्च शिष्याश्च पितृभक्ताः सुतास्तथा ॥ योषितः पतिभक्ताश्च पतिव्रतपरायणाः॥९॥ऋतौ संभोगिनः सर्वे न स्त्रीलुब्धा न लम्पटाः ॥ न भयं दस्युचौर्याणां न तत्र परदारिकाः ॥ १० ॥ तरवः पूर्णफलिनः पूर्णक्षीराश्च धेनवः ॥ बलवन्तो जनाः सर्वे दीर्घाः सौन्दर्यसंयुताः॥११॥लक्षवर्षायुषः केचित्पुण्यवन्तो ह्यरोगिणः ॥ यथा विप्रा विष्णुभक्तास्त्रिवर्णा विष्णुसेविनः ॥ १२ ॥ जलपूर्णा नदा नद्यः संततं कन्दरास्तथा ॥ तीर्थपूताश्चतुर्वर्णास्तपःपूता द्विजातयः ॥ १३ ॥ मनःपूताश्च निखिलाखलहीनं जगत्त्रयम् ॥ सत्कीर्तिपरिपूर्णं च यशस्यं मंगलान्वितम् ॥१४॥ पितरः सर्वकालेषु तिथिकालेषु देवताः ॥ सर्वकालेष्वतिथ

यः पूजिताश्च गृहेगृहे ॥१५॥ त्रिवर्णा विप्रभक्ताश्च विप्रभोजनतत्पराः ॥ ब्राह्मणस्य सुखं क्षेत्रमनूषरमकण्टकम् ॥१६॥ नारायणोत्कीर्तनेन हर्षयुक्तास्तदुत्सवे ॥ न देवानां द्विजानां च विदुषां तत्र निन्दकाः ॥ १७ ॥ नात्मप्रशंसकाः केचित्सर्वे परगुणोत्सुकाः ॥ न शत्रवो जनानां च सर्वे सर्वहितैषिणः ॥ १८ ॥ पुरुषा योषितश्चापि न हि मूर्खाश्च पण्डिताः ॥ न दुःखिनो जनाः सर्वे सर्वेषां रत्नमन्दिरम् ॥ १९ ॥ मणिमाणिक्यरत्नौघरत्नस्वर्णसमन्वितम् ॥ न भिक्षुका न रोगार्ताः शोकहीनाश्च हर्षिताः ॥ २० ॥ न हि भूषणहीनाश्च नरा नार्यश्च केचन ॥ न पापिनो न धूर्ताश्च न क्षुधार्ता न कुत्सिताः ॥ २१ ॥ जराहीनाः प्राणिनश्च शश्वद्यौवनसंस्थिताः ॥ आधिव्याधिविहीनाश्च निर्विकाराश्च देहिनः ॥ २२ ॥ यदुक्तो वै सत्ययुगे धर्मः सत्यं दयादिकम् ॥ पादहीनश्च त्रेतायां सत्यार्द्धं द्वापरेऽपि च ॥ २३ ॥ धर्मैकपाच्च प्रथमे कलेश्चापि कृशोऽबलः ॥ दुष्टानां दस्युचौर्याणामङ्कुरः प्रभवेद्व्रज ॥२४॥ अधर्मनिरताः केचिद्भीताः संगोपिनस्तथा ॥ भीता गुप्ताश्च पुंश्चल्यो भीताश्च पारदारिकाः ॥ २५ ॥ धर्मिष्ठानां भयं शश्वदधर्मिष्ठाश्च कम्पिताः ॥ स्वल्पधर्मरता भूपाः स्वल्पवेदरता द्विजाः ॥ २६ ॥ व्रतधर्मरताः केचित्सर्वे स्वच्छन्दगामिनः ॥ यावत्तिष्ठन्ति तीर्थानि यावत्तिष्ठन्ति साधवः ॥ २७ ॥ यावत्तिष्ठन्ति ग्रामाणां देवाः शास्त्राणि पूजनम् ॥ तावत्किंचित्तपः सत्यं स्वर्गधर्मांश एव च ॥२८॥ कलेर्दोषनिधेस्तात गुण एको महानपि ॥ मानसं च भवेत्पुण्यं सुकृतं न हि दुष्कृतम् ॥ २९ ॥ तीर्थादिके गते तात नष्टो धर्मांश एव च कलारूपश्च धर्मश्च यथा कुह्वां निशाकरः ॥ ३० ॥ नन्द उवाच ॥ तीर्थान्येतानि सर्वाणि तिष्ठन्त्येव कियद्दिनम् ॥ साधवो ग्राम्यदेवाश्च शास्त्राण्येतानि वत्सक ॥ ३१ ॥ श्रीकृष्ण उवाच ॥ कलौ दशसहस्राणि हरिस्तिष्ठति मेदिनीम् ॥ देवानां प्रतिमा पूज्या शास्त्राणि च पुराणकम् ॥ ३२ ॥ तदर्धमपि तीर्थानि गङ्गादीनि सुनिश्चितम् ॥ तदर्धं ग्रामदेवाश्च वेदाश्च विदुपामपि ॥३३॥ अधर्मः परिपूर्णश्च तदन्ते च कलौ पितः ॥ एकवर्णा भविष्यन्ति वर्णाश्चत्वार एव च ॥३४॥ न मन्त्रपूतोद्वाहश्च न हि सत्यं न च क्षमा ॥ स्त्रीस्वीकाररतो नित्यं ग्राम्यधर्मप्रधानतः ॥३५॥ न यज्ञसूत्रं तिलकं ब्राह्मणानां च नित्यशः ॥ सन्ध्याशास्त्रवि

हीनाश्च विप्रवंशाः श्रुता अपि ॥३६॥ सर्वैः साद्धं च सर्वेषां भक्षणं नियमच्युतम्॥अभक्ष्यभक्षा लोकाश्च चतुर्वर्णाश्च लम्पटाः॥३७॥ नारीषु न सती काचित्पुंश्चली च गृहेगृहे ॥ करोति तर्जनं कान्तं भृत्यतुल्यं च कम्पितम्॥३८॥जाराय दत्त्वा मिष्टान्नं ताम्बूलं वस्त्रचन्दनम् ॥ न ददात्येव चाहारं स्वामिने दुःखिने पितः ॥३९॥ पुत्रेण भर्त्सितस्तातः शिष्येण भर्त्सितो गुरुः ॥ प्रजाभिस्ताडितो भूपो भूपेन ताडिताः प्रजाः ॥ ४० ॥ दस्युचोरैश्च दुष्टैश्च शिष्टाश्च परिपीडिताः ॥ सस्यहीना च वसुधा क्षीरहीनाश्च धेनवः ॥ ४१ ॥ स्वल्पक्षीरे घृतं नास्ति नवनीतं च नित्यशः ॥ सत्यहीना जनाः सर्वे नित्यं मिथ्या वदन्ति च ॥४२ ॥शौचसन्ध्याशास्त्रहीना ब्राह्मणा वृषवाहकाः॥सूपकाराश्च शूद्राणां शूद्राणां शवदाहकः॥४३॥शूद्रस्त्रीनिरताः शश्वच्छूद्रा विप्रवधूरताः॥खादन्ति यस्य विप्रस्य भक्ष्यं च परिपाचकाः॥४४॥मातुः परां तस्य पत्नीं शूद्रा गृह्णति लम्पटाः॥भृत्यश्च हत्वा राजानं स्वयं राजा भविष्यति॥४५॥नारी हत्वा पतिं कामाद्व्रजेज्जारं च कौतुकात् ॥ पुत्रश्च पितरं हत्वा स्वयं भूपो भविष्यति ॥४६॥ सर्वे स्वच्छन्दनिरताः शिश्नोदरपरायणाः ॥ वंखरा व्याधियुक्ताश्च कुत्सिताश्च कुचैलकाः ॥४७॥ विक्षुण्णमन्त्रलिप्ताश्च मिथ्यायंत्रप्रचारिकाः ॥ जातिहीनाश्च गुरवो वयोहीनाश्च निन्दकाः ॥ ॥ ४८ ॥ राजानश्चापि म्लेच्छाश्च यवना धर्मनिन्दकाः ॥ सत्कीर्तिमपि साधूनां कुर्वंत्युन्मूलनं मुदा ॥ ४९ ॥ पितृदेवद्विजातीनामतिथीनां च नित्यशः ॥ पूजा नास्ति गुरूणां च पित्रोश्च पूजनं स्त्रियाः ॥ ५० ॥ स्त्रीबन्धूनां गौरवं च स्त्रीणां च सततं पितः॥चोरः सत्कुलजातिश्च ब्राह्मणो देवहारकः ॥ ५१ ॥ मानं वहन्ति लोभेन युगधर्मेण कौतुकात् ॥ देवायतनहीनं च जगत्सर्वं भयाकुलम् ॥ ५२ ॥ अराजकं च दुर्नीतं सततं कलिदोषतः ॥ बुभुक्षिताः कुचैलाश्च दरिद्रा व्याधिनो नराः ॥ ५३ ॥ कपर्दकघटाध्यक्षो राजेन्द्रो हि घटेश्वरः ॥ वृद्धांगुष्ठसमा लोका वृक्षाः शाकसमास्तथा॥५४॥तालानां नारिकेराणां पनसानां तथैव च ॥ फलानि सर्षपाण्येव तत्क्षुद्रं च ततः परम् ॥ ५५ ॥ जलभाजनपात्रेण सस्येन वाससा तथा ॥ विहीनं मन्दिरं सर्वं गृहाणामपरिष्कृतम् ॥ ५६ ॥ गन्धकेन परिवृतं दीपहीनं तमोयुतम् ॥ हिंस्रजन्तुभयाद्भीता जनाः सर्वे च पापिनः ॥ ५७ ॥ सर्वे च फललोभिष्ठाः पुंश्चल्यः कलह

प्रियाः॥ रूपवत्यो न कामिन्यो नराश्चापि न रूपिणः॥५८॥नद्यो नदाः कन्दराश्च तडागाश्च सरोवराः॥जलपद्मविहीनाश्च जलहीना घनास्तथा॥५९॥अपत्यहीना नार्यश्च कामुक्यो जारसंयुताः॥अश्वत्थच्छेदनाः सर्वे वृक्षहीना वसुन्धरा॥६०॥फलहीनाश्च तरवः शाखास्कन्धविहीनकाः ॥ फलानि स्वादुहीनानि चान्नानि च जलानि च ॥६१॥ मानवाः कूटवक्तारो निर्दया धर्मवर्जिताः ॥ तदन्ते द्वादशादित्याः संहरिष्यन्ति मानवान् ॥ ६२ ॥ सर्वाञ्जन्तूंश्च तापेन बहुवृष्ट्या व्रजेश्वर ॥ अवशिष्टा च पृथ्वी कथामात्रावशेषिता ॥ ६३ ॥ कलौ गते च पृथिवी क्षेत्र वर्षागते तथा ॥ पुनः सत्यप्रवृत्तिश्च भविष्यति क्रमेण वै॥६४॥इत्येवं कथितं सर्वं गच्छ तात व्रजं सुखम्॥ अहं दुग्धमुखो बालः पुत्रस्ते कथयामि किम् ॥ ६५ ॥ नवनीतं घृतं दुग्धं दधि तक्रं परिष्कृतम् ॥ स्वस्तिकं शुभकर्मार्हं मिष्टान्नं च सुधोपमम् ॥ ६६ ॥ मिष्टद्रव्यं च यत्किंचित्पितृदेवनिमित्तकम् ॥ भुक्तं बलाच्च तत्सर्वं बालानां रोदनं बलम् ॥ ६७ ॥ तत्क्षमस्वापराधं मे बालदोषः पदेपदे ॥ त्वं पिता तव पुत्रोऽहं यशोदा जननी मम ॥ ६८ ॥ मदीयं परिहासं च यशोदां रोहिणीं वद ॥ कुमारास्याच्छुतं सर्वं सोहमित्येवमीप्सितम्॥६९॥कीर्तययिष्यसि तत्सर्वं सर्वं गोकुलवासिनम् ॥ कालः करोति संसर्गं बन्धूनां बन्धुभिः सह ॥ ७० ॥ कालः करोति विच्छेदं विरोधं प्रीतिमेव च ॥ कालः सृष्टिं च कुरुते कालश्च परिपालनम् ॥ ७१ ॥ कालः करोति सानन्दं कालः संहरते प्रजाः ॥ सुखं दुःखं भयं शोकं जरां मृत्युं च जन्म च ॥७२॥ सर्वं कर्मानुरोधेन काल एव करोति च ॥ सर्वं कालकृतं तात विस्मयं न व्रजं व्रज ॥७३॥ कुतस्त्वं गोकुले वैश्यो नन्दो वैश्याधिपो नृपः ॥ वसुदेवसुतोऽहं च मथुरायामहो कुतः ॥ ॥७४॥ पित्रा मे कंसभीतेन त्वद्गृहे च समर्पितः ॥ पितुः परः पिता त्वं च माता मातुः पराऽपि वा॥७५॥ मया दत्तेन ज्ञानेन पार्वत्या च व्रजेश्वर ॥ त्यज मोहं महाभाग गच्छ तात सुखं गृहम् ॥ ७६ ॥ नन्द उवाच ॥ स्मर वृन्दावनं तात रम्यं पुण्यं महोत्सवम्॥गोकुलं गोकुलं रम्यं सुन्दरं यमुनातटम् ॥७७॥ रमणीनां सुरम्यं च त्वत्प्रियं रासमण्डलम्॥गोपालिका गोपबालान्यशोदां रोहिणीं प्रियाम् ॥७८॥ प्राणाधिकां राधिकां न कथं स्मरसि पुत्रक ॥ वारमेकं स्वल्पदिनं गोकुलं गच्छ वत्सक ॥ ७९ ॥

इत्येवमुक्त्वा नन्दश्च क्रोडे कृष्णं चकार सः ॥ नेत्राश्रुणा च पूर्णेन तं सिषेच शुचाऽन्वितः॥८०॥ चुचुम्ब तद्गण्डयुगं कृत्वा वक्षसि
मोहतः ॥ सानन्दः परमानन्दो भगवांस्तमुवाच सः ॥ ८१ ॥ इति श्रीब्रह्मवैवर्तें महापुराणे श्रीकृष्णजन्मखण्डे उत्तरभागे नारायण
नारदसंवादे नवतितमोऽध्यायः ॥ ९० ॥ श्रीभगवानुवाच ॥ निषेकेन परिष्वंगो विभेदस्तेन वा भवेत् ॥ क्षणेन दर्शनं तेन
निषेकः केन वार्यते ॥१॥ गमनागमनार्थं चाप्युद्धवः कथयिष्यति ॥ प्रस्थपयामि तं शीघ्रं विज्ञास्यसि ततः पितः ॥ २ ॥ यशोदां
रोहिणीं चैव गोपिकां गोपबालकान् ॥ प्राणाधिकां राधिकां तां गत्वा संबोधयिष्यति ॥३॥ एतस्मिन्नन्तरे तत्र वसुदेवश्च देवकी ॥
बलदेवश्चोद्धवश्च तथाक्रूरश्च सत्वरम् ॥ ४ ॥ वसुदेव उवाच ॥ नंद त्वं बलवाञ्ज्ञानी सद्बंधुश्च सखा मम ॥ त्यज मोहं गृहं
गच्छ वत्सस्तेयं यथा मम ॥ ५ ॥ द्वारभूता गोकुलाच्च मथुरा नास्ति बान्धवः ॥ महोत्सवे सदानन्दे नन्द द्रक्ष्यसि पुत्रकम् ॥ ६ ॥
श्रीदेवक्युवाच ॥ यथायमावयोः पुत्रस्तथैव भवतो ध्रुवम् ॥ सालसः केन हे नन्द शुचा देहो हि लक्ष्यते ॥७॥ एकाद
शाब्दं सबलः स्थित्वा ते मन्दिरे सुखम् ॥ कथं स्वल्पदिनेनैव शोकग्रस्तो भविष्यसि ॥ ८ ॥ तिष्ठ पुत्रेण सार्द्धं च मथुरायां किय
द्दिनम् ॥ पूर्णचन्द्राननं पश्य जन्म त्वं सफलं कुरु ॥ ९ ॥ श्रीभगवानुवाच ॥ गच्छोद्धव सुखं भद्रं भविष्यति तव प्रियम् ॥
प्रहर्षं गोकुलं गत्वा यशोदां रोहिणीं प्रसूम् ॥ १० ॥ गोपबालसमूहं च राधिकां गोपिकागणम् ॥ प्रबोधयाध्यात्मिकेन
मद्दत्तेन च शुक्छिदा ॥ ११ ॥ नन्दस्तिष्ठतु सानन्दं मन्मातुराज्ञया शुचा ॥ नन्दस्थितिं मद्विनयं यशोदां कथयिष्यसि ॥ १२ ॥
इत्येवमुक्त्वा श्रीकृष्णः पित्रा मात्रा बलेन च ॥ अक्रूरेण समं तूर्णं ययावभ्यन्तरं गृहम् ॥ १३ ॥ उद्धवो रजनीं स्थित्वा
मथुरायां च नारद ॥ प्रभाते प्रययौ शीघ्रं रम्यं वृन्दावनं वनम् ॥ १४ ॥ इति श्रीब्रह्मवैवर्तें महापुराणे श्रीकृष्णजन्मखण्डे
उत्तरभागे नारायणनारदसंवादे एकनवतितमोध्यायः ॥ ९१ ॥ श्रीनारायण उवाच ॥ श्रीकृष्णप्रेरितो त्हृष्टः प्रणम्य
च गणेश्वरम् ॥ स्मरन्नारायणं शंभुं दुर्गां लक्ष्मीं सरस्वतीम् ॥ १ ॥ गङ्गां च मनसि ध्यात्वा दिगीशं तं महेश्वरम् ॥ प्रजगामो

द्धवश्चैव दृष्ट्वा मङ्गलसूचकम् ॥ २ ॥ शुश्राव दुन्दुभिं घण्टानादं शंखध्वनिं तथा ॥ हरिशब्दं च संगीतं शुश्राव मङ्गलध्वनिम् ॥३॥ पतिपुत्रवतीं साध्वीं प्रदीपं माल्यदर्पणम् ॥ परिपूर्णतमं कुम्भं दधिलाजफलानि च ॥ ४ ॥ दूर्वाङ्कुरं शुक्लधान्यं रजतं काञ्चनं मधु ॥ ब्राह्मणानां समूहं च कृष्णसारं वृषं घृतम्॥५॥सद्योमांसं गजेन्द्रं च नृपेन्द्रं श्वेतघोटकम् ॥ पताकां नकुलं चाषं शुक्लं पुष्पं च चन्दनम् ॥ ६ ॥ दृष्ट्वैवं पथि कल्याणं प्राप वृन्दावनं वनम् ॥ ददर्श पुरतो वृक्षं भाण्डीरवटमक्षयम् ॥७॥ स्निग्धपूर्णं रक्तवर्णं पुण्यदं तीर्थमीप्सितम् ॥ सुवेषान्बालकांश्चैव रक्तभूषणभूषितान् ॥ ८ ॥ वदतो बालकृष्णेति रुदतश्च शुचाऽन्वितान् ॥ तानाश्वास्य ययौ दूरं प्रविश्य नगरं मुदा ॥ ९ ॥ ददर्श नन्दशिबिरं रचितं विश्वकर्मणा ॥ मणिरत्नविनिर्माणं मुक्तामाणिक्यहीरकैः ॥ ॥ १० ॥ परिच्छन्नं मनोरम्यं सद्रत्नकलशान्वितम् ॥ द्वारं चित्रं विचित्राढ्यं दृष्ट्वा च प्रविवेश सः ॥ ११ ॥ अवरुह्य रथात्तूर्णं तस्थौ तत्प्राङ्गणे मुदा ॥ यशोदा रोहिणी शीघ्रं पप्रच्छ कुशलं परम् ॥ १२ ॥ आसनं च जलं गां च मधुपर्कं ददौ मुदा ॥ क्व नन्दः क्व बलः कृष्णः सत्यं तत्कथयोद्धव ॥१३॥ उद्धवः कथयामास सर्वं भद्रं क्रमेण च ॥ सार्द्धं च बलकृष्णाभ्यां नन्दः सानन्दपूर्वकम् ॥ १४ ॥ आयास्यति विलम्बेन कृष्णोपनयनावधि ॥ युष्माकं कुशलं तत्त्वं विधाय विधिपूर्वकम् ॥१५॥ अहं यास्यामि मथुरां यशोदे शृणु साम्प्रतम् ॥ श्रुत्वा मङ्गलवार्तां च यशोदा रोहिणी मुदा ॥१६॥ ब्राह्मणाय ददौ रत्नं सुवर्णं वस्त्रमीप्सितम् ॥ उद्धवं भोजयामास मिष्टान्नं च सुधोपमम् ॥ १७ ॥ मणिश्रेष्ठं च रत्नं च ददौ तस्मै च हीरकम् ॥ वाद्यं च वादयामास भद्रं नानाविधं तथा ॥ १८ ॥ ब्राह्मणान्भोजयामास कारयामास मङ्गलम् ॥ वेदांश्च पाठयामास परमानन्दपूर्वकम् ॥ १९ ॥ शङ्करं पूजयामास विप्रद्वारा परं विभुम् ॥ नानोपहारैर्नैवेद्यैः पुष्पधूपप्रदीपकैः ॥ २० ॥ चन्दनैर्वस्त्रताम्बूलैर्मधुगव्यघृतादिभिः ॥ भवानीं पूजयामास श्रीवृन्दारण्यदेवताम् ॥ २१ ॥ षोडशोपचारैर्द्रव्यैश्च बलिभिर्विविधैर्मुने ॥ महिषाणां शतं शुद्धं छागलानां सहस्रकम् ॥ २२ ॥ मेषाणामयुतं शुद्धं युक्तमादाय पञ्चकम् ॥ ब्राह्मणेभ्यः स्वर्णशतं धेनूनां च शतं तथा ॥२३॥ प्रददौ दक्षिणां तूर्णं कृष्णकल्याणहेतवे ॥ उद्धवं पूज

यामास सादरं च पुनः पुनः ॥ २४ ॥ समाश्वास्य यशोदां च रोहिणीं गोपबालकान् ॥ वृद्धान्गोपालिकाः सर्वाः प्रययू रासमण्डल
म् ॥ २५ ॥ ददर्श रासं रुचिरं चन्द्रमण्डलवर्तुलम् ॥ श्रीरामकदलीस्तम्भशतकैरुपशोभितम् ॥ २६ ॥ युक्तैश्च स्निग्धवसनैश्चन्दना
नां च पल्लवैः ॥ पट्टसूत्रनिबद्धैश्च श्रीयुक्तमाल्यजालकैः ॥ २७ ॥ दधिलाजफलैः पट्टैः पुष्पैर्दूर्वाङ्कुरैरपि ॥ चन्दनागुरुकस्तूरीकुङ्कुमैः
परिसंस्कृतम् ॥२८॥ वेष्टितं रक्षितं यत्नाद्गोपिकानां त्रिकोटिभिः ॥ त्रिलक्षैः सुन्दरै रम्यैः संसिक्तं रतिमन्दिरैः ॥ २९ ॥ लक्षगोपैः
परिवृतं कृष्णागमनशङ्कितैः ॥ यमुनां दक्षिणां कृत्वा प्रययौ मालतीवनम् ॥३०॥ चन्दनानां चम्पकानां यूथिकानां तथैव च ॥
केतकीमाधवीनां च वनं कृत्वा प्रदक्षिणम् ॥ ३१ ॥ बकुलानां वञ्जुलानामशोकानां च काननम् ॥ मल्लिकानां पलाशानां शिरी
षाणां तथैव च ॥ ३२ ॥ धात्रीणां काञ्चनानां च कर्णिकानां वनं तथा ॥ नागेश्वराणां विपिनं लवङ्गानां तथैव च ॥ ३३ ॥ वनं च
शालतालानां हिंतालानां वनं तथा ॥ पनसानां रसालानां लाङ्गलीनां मनोहरम् ॥ ३४ ॥ मन्दारकाननं रम्यं वामं कृत्वा च सत्व
रम् ॥ दृष्ट्वा कुन्दवनं रम्यं संप्राप्य मधुकाननम् ॥ ३५ ॥ पुंस्कोकिलानां शब्देन मधुरेण समन्वितम् ॥ मधुव्रतसमूहानां मधुरध्वनि
पूरितम् ॥ ३६ ॥ वन्यवृक्षैः परिवृतं माध्वीकाधारमीप्सितम् ॥ वातेन वन्यपुष्पाणां परितः सुरभीकृतम् ॥ ३७॥ तद्दृष्ट्वा राजमार्गेण
यशोदोक्तेन सांप्रतम् ॥ ययौ शीघ्रं निरुद्विग्नं रहस्यं बदरीवनम् ॥ ३८ ॥ श्रीफलानां च निम्बानां नारिङ्गाणां वनं तथा ॥ पद्मानां क
रवीराणां तुलसीनां च काननम् ॥ ३९ ॥ दृष्ट्वा रक्तिमवर्णं च सुपक्वफलमीप्सितम् ॥ तदेव वामतः कृत्वा विवेश कदलीवनम्
॥ ४० ॥ अतीव निर्जने रम्ये ददर्श राधिकाश्रमम् ॥ मणीन्द्राणां च प्राकारं परिखादुर्गवेष्टितम् ॥ ४१ ॥ अत्यगम्यं रिपूणां च मि
त्राणां सुगमं सुखम् ॥ गोप्यं सङ्केतमार्गं च रक्षकैः परिरक्षितम् ॥ ४२ ॥ नानाचित्रविचित्राढ्यं निर्मितं विश्वकर्मणा ॥ मणीन्द्रमु
क्तामाणिक्यहीरहारोज्ज्वलं परम् ॥४३॥ रत्नेन्द्रसाररचितं रत्नस्तम्भैः सुशोभितम् ॥ रत्नसोपानसंसक्तमन्दिरेण मनोहरम् ॥ ४४ ॥
अमूल्यरत्नरचितं कलशैः परिशोभितम् ॥ वह्निशुद्धांशुकाभिश्च पताकाभिः परिष्कृतम् ॥ ४५ ॥ सद्रत्नदर्पणोत्कृष्टं चर्चितं श्वेतचा

मरैः ॥ ददर्श सिंहद्वारं च युक्तं रत्नकपाटकैः ॥४६॥ द्वारोपरि विचित्रं च रम्यं वृन्दावनं वनम् ॥ कदम्बकाननं रम्यं तद्वस्त्रहरणादिकम् ॥ ४७ ॥ विश्वकर्मविरचितं सुरम्यं रासमण्डलम् ॥ नानारत्नकुटीरं च गोपगोपीसमन्वितम् ॥ ४८ ॥ रक्षितं गोपिकालक्षैर्वेत्रहस्तैर्मनोहरैः ॥ स्वच्छन्दाचरणैः शश्वदमितैर्बलिभिर्मुदा ॥४९॥ तद्द्वारं पुरतो दृष्ट्वा विलङ्घ्य च जगाम सः ॥ द्वितीयं द्वारमुल्लंघ्य तस्मादुत्तममीप्सितम् ॥५०॥ द्वारं चतुर्थं संप्राप्य सर्वस्माच्च विलक्षणम् ॥ तत्पश्चात्पञ्चमं द्वारं ददर्श चित्रमुत्तमम् ॥ ५१ ॥ द्वारषट्कं च प्रययौ सर्वत्र रुचिरं परम् ॥ रामरावणयोर्युद्धं भित्तिचित्रं मनोहरम् ॥ ५२ ॥ दशावतारं विष्णोश्च कृत्रिमं रासमण्डलम् ॥ यमुनां जलकेलिं च रचितां विश्वकर्मणा ॥ ५३ ॥ गोपिकानां सहस्रेण षष्ठं द्वारं च रक्षितम् ॥ रत्नेन्द्रसारनिर्माणभूषणैर्भूषितेन च ॥५४॥ सद्रत्नदण्डहस्तेन हीरकैर्भूषितेन च ॥ मणीन्द्रमुक्तामाणिक्यहीरहारान्वितेन च॥५५॥माधवी तत्प्रधाना सा पप्रच्छ सांप्रतं शिवम् ॥ ददौ प्रत्युत्तरं सर्वं क्रमेण च स उद्धवः ॥५६॥ गत्वा विज्ञापयामास राधाप्रियसखीगणम् ॥ सा माधवी महाहृष्टा तत्र संस्थाप्य तं मुदा ॥५७॥ श्रुत्वा मङ्गलवार्तां च राधाप्रियसखीगणैः ॥ कृत्वा शङ्खध्वनिं घण्टामृदङ्गपटहस्वनम् ॥५८॥ कृत्वा निर्मञ्छनं शीघ्रमुद्धवं प्रियमागतम् ॥ हृष्टा प्रवेशयामास राधाभ्यन्तरमुत्तमम् ॥५९॥ अमूल्यरत्ननिर्माणं गत्वा मन्दिरमुत्तमम् ॥ ददर्श पुरतो राधां कुहां चन्द्रकलोपमाम् ॥ ६० ॥ सुपक्वपद्मनेत्रां च शयानां शोकमूर्छितताम् ॥ रुदन्तीं रक्तवदनां क्लिष्टां च त्यक्तभूषणाम् ॥ ॥ ६१ ॥ निश्चेष्टां च निराहारां सुवर्णवर्णकुण्डलाम् ॥ शुष्किताधरकण्ठां च किंचिन्निश्वाससंयुताम् ॥ ६२ ॥ प्रणनाम च तां दृष्ट्वा भक्तिनम्रात्मकन्धरः ॥ पुलकाञ्चितसर्वाङ्गो भक्त्या भक्तः स उद्धवः ॥ ६३ ॥ उद्धव उवाच ॥ वन्दे राधापदाम्भोजं ब्रह्मादिसुरवन्दितम् ॥ यत्कीर्तिकीर्तनेनैव पुनाति भुवनत्रयम् ॥६४॥ नमो गोकुलवासिन्यै राधिकायै नमोनमः ॥ शतशृङ्गनिवासिन्यै चन्द्रवत्यै नमोनमः ॥ ६५ ॥ तुलसीवनवासिन्यै वृन्दारण्यै नमोनमः ॥ रासमण्डलवासिन्यै रासेश्वर्यै नमोनमः ॥ ६६ ॥ विरजातीरवासिन्यै वृन्दायै च नमोनमः ॥ वृन्दावनविलासिन्यै कृष्णायै च नमोनमः ॥ ६७ ॥ नमः कृष्णप्रियायै च शान्तायै च नमोनमः ॥

कृष्णवक्षःस्थितायै च तत्प्रियायै नमोनमः ॥ ६८ ॥ नमो वैकुंठवासिन्यै महालक्ष्म्यै नमोनमः ॥ विद्याधिष्ठातृदेव्यै च सरस्वत्यै नमोनमः ॥ ६९ ॥ सर्वैश्वर्याधिदेव्यै च कमलायै नमोनमः ॥ पद्मनाभप्रियायै च पद्मायै च नमोनमः ॥ ७० ॥ महाविष्णोश्च मात्रे च पराद्यायै नमोनमः ॥ नमः सिंधुसुतायै च मर्त्यलक्ष्म्यै नमोनमः ॥ ७१ ॥ नारायणप्रियायै च नारायण्यै नमोनमः ॥ नमोऽस्तु विष्णुमायायै वैष्णव्यै च नमोनमः ॥ ७२ ॥ महामायास्वरूपायै संपदायै नमोनमः ॥ नमः कल्याणरूपिण्यै शुभायै च नमोनमः ॥ ७३ ॥ मात्रे चतुर्णां वेदानां सावित्र्यै च नमोनमः ॥ नमो दुर्गविनाशिन्यै दुर्गादेव्यै नमोनमः ॥ ७४ ॥ तेजःसु सर्व देवानां पुरा कृतयुगे मुदा ॥ अधिष्ठानकृतायै च प्रकृत्यै च नमोनमः ॥ ७५ ॥ नमस्त्रिपुरहारिण्यै त्रिपुरायै नमोनमः ॥ सुन्दरीषु च रम्यायै निर्गुणायै नमोनमः ॥ ७६ ॥ नमो निद्रास्वरूपायै निर्गुणायै नमोनमः ॥ नमो दक्षसुतायै च नमः सत्यै नमोनमः ॥ ॥ ७७ ॥ नमः ॥ शैलसुतायै च पार्वत्यै च नमोनमः ॥ नमोनमस्तपस्विन्यै ह्युमायै च नमोनमः ॥ ७८ ॥ निराहारस्वरूपायै ह्यपर्णायै नमोनमः ॥ गौरीलोकविलासिन्यै नमो गौर्यै नमोनमः ॥ ७९ ॥ नमः कैलासवासिन्यै माहेश्वर्यै नमोनमः ॥ निद्रायै च दयायै च श्रद्धायै च नमोनमः ॥८०॥ नमो धृत्यै क्षमायै च लज्जायै च नमोनमः ॥ तृष्णायै क्षुत्स्वरूपायै स्थितिकर्त्र्यै नमोनमः ॥ ॥ ८१ ॥ नमः संहाररूपिण्यै महामार्यै नमोनमः ॥ भयायै चाभयायै च मुक्तिदायै नमोनमः ॥८२॥ नमः स्वधायै स्वाहायै शान्त्यै कान्त्यै नमोनमः ॥ नमस्तुष्ट्यै च पुष्ट्यै च दयायै च नमोनमः ॥८३॥ नमो निद्रास्वरूपायै श्रद्धायै च नमोनमः ॥ क्षुत्पिपासास्वरूपायै लज्जायै च नमोनमः ॥८४॥ नमो धृत्यै क्षमायै च चेतनायै नमोनमः ॥ सर्वशक्तिस्वरूपिण्यै सर्वमात्रे नमोनमः ॥ ८५ ॥ अग्नौ दाहस्वरूपायै भद्रायै च नमोनमः ॥ शोभायै पूर्णचन्द्रे च शरत्पद्मे नमोनमः ॥ ८६ ॥ नास्ति भेदो यथा देवि दुग्धधावल्ययोः सदा ॥ यथैव गन्धभूम्योश्च यथैव जलशैत्ययोः ॥ ८७ ॥ यथैव शब्दनभसोर्ज्योतिःसूर्यकयोर्यथा ॥ लोके वेदे पुराणे च राधामाधवयोस्तथा ॥ ८८ ॥ चेतनं कुरु कल्याणि देहि मामुत्तरं सति ॥ इत्युक्त्वा चोद्धवस्तत्र प्रणनाम पुनः पुनः ॥ ८९ ॥ इत्युद्धवकृतं

स्तोत्रं यः पठेद्भक्तिपूर्वकम्॥इह लोके सुखं भुक्त्वा यात्यन्ते हरिमन्दिरम् ॥ ९० ॥ न भवेद्बन्धुविच्छेदो रोगः शोकः सुदारुणः ॥ प्रोषिता स्त्री लभेत्कान्तं भार्याभेदी लभेत्प्रियाम् ॥ ९१ ॥ अपुत्रो लभते पुत्रान्निर्धनो लभते धनम् ॥ निर्भूमिर्लभते भूमिं प्रजाहीनो लभेत्प्रजाम् ॥ ९२ ॥ रोगाद्विमुच्यते रोगी बद्धो मुच्येत बन्धनात् ॥ भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥ अस्पष्टकीर्तिः सुयशा मूर्खो भवति पण्डितः ॥ ९३ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे उत्तरार्द्धे नारायणनारदसंवादे राधास्तोत्रे द्विनवतितमोऽध्यायः ॥ ९२ ॥ श्रीनारायण उवाच ॥ उद्धवस्तवनं श्रुत्वा चेतनां प्राप्य राधिका ॥ विलोक्य कृष्णाकारं च तमुवाच शुचाऽन्विता ॥ १ ॥ श्रीराधिको वाच ॥ किन्नाम भवतो वत्स केन वा प्रेरितो भवान् ॥ आगतो वा कुत इति ब्रूहि मां केन हेतुना ॥ २ ॥ कृष्णाकृतिस्त्वं सर्वांगैर्मन्ये त्वां कृष्णपार्षदम्॥कृष्णस्य कुशलं ब्रूहि बलदेवस्य साम्प्रतम्॥३॥नन्दस्तिष्ठति तत्रैव हेतुना केन तद्वद ॥ समायास्यति गोविन्दो रम्यं वृन्दावनं वनम् ॥४॥ पुनर्द्रक्ष्यामि तस्यैव पूर्णचन्द्रमुखं शुभम्॥पुनः क्रीडां करिष्यामि तेनाहं रासमण्डले ॥५॥ जले च विहरिष्यामि पुनर्वा सखिभिः सह ॥ श्रीनन्दनन्दनांगे च पुनर्दास्यामि चन्दनम् ॥६॥ ॥ उद्धव उवाच ॥ उद्धवेत्यभिधानं मे क्षत्रियोऽहं वरानने ॥ प्रेषितः शुभवार्तार्थं कृष्णेन परमात्मना ॥७॥ तवान्तिकं समायातः पार्षदोऽहं हरेरपि ॥ कृष्णस्य बलदेवस्य शिवं नन्दस्य साम्प्रतम् ॥८॥ श्रीराधिकोवाच ॥ अस्ति तद्यमुनाकूलं सुगन्धिपवनोऽस्ति सः॥ तस्य केलिकदम्बानां मूलमस्त्येव साम्प्रतम् ॥९॥ पुण्यं वृन्दावनं रम्यं विद्यमानमभीप्सितम् ॥ पुंस्कोकिलानां विरुतं तल्पं चन्दनचर्चितम्॥१०॥चतुर्विधं च भोज्यं च मधुपानं च सुन्दरम्॥दुरन्तो दुःखदोऽप्यस्ति पापिष्ठो मन्मथस्तथा ॥११॥ ते च रत्नप्रदीपाश्च ज्वलन्ति रासमण्डले॥मणीन्द्रसारनिर्माणमस्त्येवं रतिमन्दिरम् १२गोपांगनागणोऽस्त्येव पूर्णचन्द्रोऽस्ति शोभितः॥सुगन्धिपुष्परचितं तल्पं चन्दनचर्चितम्॥१३॥ताम्बूलं रतिभोगार्हं कर्पूरादिसुसंस्कृतम्॥सुगन्धिमालतीमाल्यं श्वेतचामरदर्पणम्॥१४॥मुक्तामाणिक्यसंसक्तहरिहारमनोहरम् ॥ नानोपकाननं रम्यं रम्यक्रीडासरोवरम् ॥१५॥ सुगन्धिपुष्पोद्यानं च पद्मश्रेणीमनोहरम् ॥ अस्त्येवं सर्वविभवः

प्राणनाथः कुतो मम ॥ १६ ॥ हा कृष्ण हा रमानाथ क्वासि मे प्राणवल्लभ ॥ क्व वाऽपराधो दास्याश्च दासीदोषः पदेपदे ॥ १७ ॥
इत्येवमुक्त्वा सा देवी पुनर्मूर्च्छामवाप सा ॥ चेतनां कारयामास पुनरेव स उद्धवः ॥ तां दृष्ट्वा परमाश्चर्यं मेने क्षत्रियपुंगवः ॥१८॥
सखीभिः सप्तभिः शश्वत्सेवितां श्वेतचामरैः ॥ गोपीनां च त्रिलक्षैश्च सुप्रियैः प्रियसेविताम् ॥१९॥ दिवानिशं वेष्टितां च गोपी
नां शतकोटिभिः ॥ काचित्कज्जलहस्ता च काचिन्माल्यधराऽपरा ॥ २० ॥ काचित्सिन्दूरहस्ता च काचिद्गोरोचनाकरा ॥ काचि
च्चन्दनपात्रं च हस्ते कृत्वा च तिष्ठति ॥ २१ ॥ काचिद्दर्पणहस्ता च काचित्कुंकुमवाहिका ॥ कस्तूरीपात्रमिष्टं च काचिद्वहति तत्र
वै ॥२२॥ काचिच्चन्दनपात्रं च करे धृत्वा च तिष्ठति ॥ मधुभिर्मधुरैः पूर्णपात्रं धृत्वा शुचाऽन्विता ॥२३॥ काचित्सुगंधि तैलं च
गृहीत्वा परितिष्ठति ॥ काचिद्वहति ताम्बूलं कर्पूरादिसुवासितम्॥२४॥काचिद्वासितमिष्टं च जलं धृत्वा च तिष्ठति ॥ क्रीडापुत्तलिकां
काचिच्चित्राढ्यां परिरक्षति ॥ २५ ॥ काचिद्वहति कन्दूकं काचिच्च रत्नभूषणम् ॥ वह्निशुद्धांशुकं काचिदमूल्यं परिरक्षति ॥ २६ ॥
काचिद्भक्ष्योपहारं च गृहीत्वा परिवर्तते ॥ काचिच्च केशवेशार्थं करोति माल्यमीप्सितम् ॥ २७ ॥ काचित्कंकतिकां धृत्वा पुरतः
परितिष्ठति ॥ काचिद्यावकहस्ता च काचिद्धात्रीरसं मुदा ॥ २८ ॥ दूरतोऽपि वहत्येवं भीता च परितिष्ठति ॥ काचिद्भीता भिया
स्तौति काचिद्रोदिति शोकतः ॥ २९ ॥ काचित्तां बोधयत्येव विदग्धा विरहातुराम् ॥ काचिदुत्तापतप्ता च स्निग्धतल्पे मनोहरे ॥
॥३०॥ स्थापयेद्दाहदूरार्थं स्निग्धपद्मदले शुभे ॥ एवंभूतां च तां दृष्ट्वा चोवाच पुनरुद्धवः ॥ सुप्रियं कर्णपीयूषं विनयेन च भीतवत् ॥
॥ ३१ ॥ उद्धव उवाच ॥ जाने त्वां देवदेवीशां सुस्निग्धां सिद्धयोगिनीम् ॥ ३२ ॥ सर्वशक्तिस्वरूपां च मूलप्रकृति
मीश्वरीम् ॥ श्रीदामशापाद्धरणीं प्राप्तां गोलोककामिनीम् ॥ ३३ ॥ कृष्णप्राणाधिकां देवीं तद्वक्षःस्थलवासिनीम् ॥ सर्वशक्तिस्वरूपां
च मूलप्रकृतिमीश्वरीम् ॥ ३४ ॥ शृणु देवि प्रवक्ष्यामि शुभवार्तामभीप्सिताम् ॥ सुस्थिरं सखिभिः सार्धं हृदयस्निग्धकारिणीम्
॥ ३५ ॥ दुःखदावाग्निदग्धायाः सुधावर्षणरूपिणीम् ॥ विरहव्याधियुक्तायाः रसायनसमां शुभाम् ॥ ३६ ॥ तत्र तिष्ठति नन्दोऽयं

सानंदो मुदितः सदा ॥ निमन्त्रितश्च वसुना कृष्णोपनयनावधि॥३७॥गृहीत्वा सबलं कृष्णं साङ्गे मङ्गलकर्मणि ॥ स[illegible]नन्दः परमा
नंदो मुदाऽऽयास्यति गोकुलम् ॥ ३८ ॥ आगत्य कृष्णो मुदितः प्रणम्य मातरं पुनः ॥ नक्तमायास्यति मुदा पुण्यं वृन्दावनं वनम् ॥
॥३९॥ अचिराद्द्रक्ष्यसि सति श्रीकृष्णमुखपङ्कजम् ॥ सर्वं विरहदुःखं च संत्यक्ष्यसि च सांप्रतम् ॥ ४० ॥ सुस्थिरा भव मातस्त्वं
त्यज शोकं सुदारुणम् ॥ वह्निशुद्धांशुकं रम्यं परिधाय प्रहर्षिता ॥४१॥ अमूल्यरत्ननिर्माणभूषणग्रहणं कुरु ॥ गृहाण चन्दनं स्निग्धं
कस्तूरी कुङ्कुमान्वितम् ॥ ४२ ॥ कुरुष्व केशसंस्कारं मालतीमाल्यभूषितम् ॥ सुवेषं कुरु कल्याणि गण्डे च चित्रपत्रकम् ॥ ४३ ॥
सिन्दूरबिन्दुं सीमन्ते कस्तूरीचन्दनान्वितम् ॥ अलक्तकाक्तं चरणं युक्तं यावकभूषणैः॥४४॥कुरुष्व तिष्ठ चोत्तिष्ठ रत्नसिंहासने वरे ॥
सपङ्कपङ्कजं तल्पं त्यज सार्द्धं शुचा सति ॥ ४५ ॥ भुंक्ष्व कृष्णेन मनसा विशुद्धं मधुरं मधु ॥ संस्कृतं भासितं तोयं ताम्बूलं च
सुवासितम् ॥४६॥ रत्नेन्द्रसारनिर्माणपर्यङ्के सुमनोहरे ॥ वह्निशुद्धांशुकान्ते च मालतीमाल्यभूषिते ॥ ४७ ॥ सुगन्धियुक्ते कस्तूरी
जातीचम्पकचन्दनैः ॥ परितो मालतीमाल्यहीरहारविभूषिते ॥४८॥ मणीन्द्रमुक्तामाणिक्यसुन्दरैश्च परिष्कृते ॥ पुष्पमाल्योपधाने
च मङ्गलार्हे मुदाऽन्विता ॥४९॥ शयनं कुरु देवेशि गोपीभिः सेविता सदा ॥ करोति सेवनं शश्वत्प्रियालिः श्वेतचामरैः ॥ ५० ॥
पदारविन्दसेवां च गोपीभक्ता मनोहरे॥सद्रत्नसारनिर्माणपर्यङ्के सुमनोहरे॥५१॥इत्येवमुक्त्वा स मुने पुनस्तूष्णीं बभूव ह ॥ प्रणम्य
पादपद्मं च ब्रह्मादिसुरवन्दितम् ॥५२॥ उद्धवस्य वचः श्रुत्वा सस्मिता राधिका सती ॥ कौतुकं च ददौ तस्मै रत्नसारांगुलीयकम्
॥ ५३ ॥ अमूल्यं सुन्दरं रम्यं विश्वकर्मविनिर्मितम् ॥ सुखशोभं पीतवर्णं सुदीप्तं सुप्रदीपवत् ॥ ५४ ॥ कृष्णाय वह्निना दत्तमपूर्वं
रासमण्डले ॥ मणिकुण्डलयुग्मं चामूल्यरत्नविनिर्मितम्॥५५॥अमूल्यरत्ननिर्माणं सर्वभूषणमीप्सितम् ॥ वह्निशुद्धांशुकयुगं रत्ननिर्माणनायकम्
॥ ५६ ॥ हीरहारविनिर्माणं हारं च सुमनोहरम् ॥ पुरा दत्तं च सुप्रीत्या कृष्णाय वरुणेन च ॥ ५७ ॥
श्रीसूर्येण च यद्दत्तं श्रीकृष्णाय स्यमन्तकम् ॥ प्रदत्तं कौतुकं तस्मै यद्दत्तं हरिणा पुरा ॥ ५८ ॥ यद्दत्तं च महेन्द्रेण रत्नसिंहासनं

वरम् ॥ तत्प्रदत्तं मुदा देव्या तस्मै प्रीत्या च राधया ॥ ५९ ॥ मणीन्द्रसारनिर्माणं छत्ररत्नं मनोहरम् ॥ मुक्तामाणिक्यसारेण
हीरहारसमन्वितम् ॥ ६० ॥ विचित्ररत्नपङ्क्तेन चित्रितं वारुणं सदा ॥ शोभितं परितश्चान्यै रत्ननिर्माणदर्पणैः ॥ ६१ ॥
यद्दत्तं ब्रह्मणा प्रीत्या हरये रासमण्डले ॥ सुप्रीत्या राधया तत्र प्रदत्तमुद्धवाय च ॥ ६२ ॥ मणिसारविनिर्माणं मणिराजवि
राजितम् ॥ जपामाल्यं संस्कृतं च यद्दत्तं शम्भुना पुरा ॥६३॥ तदेव दत्तं तस्मै चाप्यमूल्यं पुण्यदं शुभम् ॥ जन्ममृत्युजराव्याधि
हरं चातिमनोहरम्॥६४॥चन्द्रकान्तमणिं रम्यं चन्द्रदत्तं परिष्कृतम् ॥ चन्द्रावली ददौ तस्मै सुदीप्तं पूर्णचन्द्रवत् ॥६५॥ विशुद्धं मधु
पर्कं च मधुपात्रं यदक्षयम् ॥ धर्मेण यत्प्रदत्तं च तद्दत्तं प्रियया हरेः ॥६६॥ जलभोजनपात्रं च शुद्धं स्वर्णविनिर्मितम् ॥ मिष्टान्नं
परमान्नं च ददौ सुस्वादु मिष्टकम् ॥६७॥ भोजनं कारयित्वा च कर्पूरादिसुवासितम् ॥ ताम्बूलं च ददौ शीघ्रं माल्यं सुस्निग्धचन्द
नम् ॥६८॥ शुभाशिषं च प्रददौ वाञ्छितं प्रवरं वरम् ॥ ज्ञानं कृष्णेन यद्दत्तं गोलोके रासमण्डले ॥६९॥ पुरुषाणां शतं यावन्नि
श्चलां कमलां ददौ ॥ विद्यां यशस्करीं शुद्धां यशः कीर्तिं सुनिर्मलाम् ॥ ७० ॥ सर्वसिद्धिं हरेर्दास्यं हरिभक्तिं च निश्चलाम् ॥ पार्ष
दप्रवरत्वं च पार्षदं च हरेरिति ॥ ७१ ॥ वरं प्रसादं दत्त्वा च समुत्थाय मुदाऽन्वितम् ॥ वह्निशुद्धांशुके धृत्वा चामूल्यं रत्नभूषणम् ॥
॥७२॥ हीरहारं रत्नमालां परिधाय मनोहराम् ॥ सिन्दूरं कज्जलं पुष्पमाल्यं सुस्निग्धचन्दनम् ॥७३॥ रत्नसिंहासनस्थं तं पूजिता
पूजितं मुदा ॥ वेष्टिता हर्षनिरतं गोपीनां शतकोटिभिः ॥ तप्तकाञ्चनवर्णाभा शतचन्द्रसमप्रभा ॥ ७४ ॥ श्रीराधिकोवाच ॥
सत्यमायास्यति हरिः सत्यं निष्कपटं वद ॥ ७५ ॥ वद तथ्यं भयं त्यक्त्वा सत्यं ब्रूहि सुसंसदि ॥ वरं कूपशताद्वापी वरं वापी
शतात्क्रतुः ॥ ७६ ॥ वरं क्रतुशतात्पुत्रः सत्यं पुत्रशतात्किल ॥ न हि सत्यात्परो धर्मो नानृतात्पातकं परम् ॥ ७७ ॥ उद्धव
उवाच ॥ सत्यमायास्यति हरिः सत्यं द्रक्ष्यसि सुन्दरि ॥ ध्रुवं त्यक्ष्यसि संतापं दृष्ट्वा चन्द्रमुखं हरेः ॥ ७८ ॥ अहं प्रस्थापयि
ष्यामि गत्वा मधुपुरीं हरिम् ॥ विधाय तत्प्रबोधं च कार्यमन्यत्करिष्यति ॥ ७९ ॥ विदायं कुरु मे मातर्यास्यामि हरिसंनिधिम् ॥

सर्वं तं कथयिष्यामि त्वद्वृत्तान्तं यथोचितम् ॥ ८० ॥ श्रीराधिकोवाच ॥ गमिष्यसि यदा वत्स मथुरां सुमनोहराम् ॥ शृणु
दुःखकथां कांचित्तिष्ठ वत्स स्थिरो भव ॥८१॥ मां विस्मृतो न भवसि विरहज्वरकातराम् ॥ कथयिष्यामि मत्कान्तं ध्रुवं प्रस्थापयि
ष्यसि ॥ ८२ ॥ नारीणां मनसो वार्तां को वा जानाति पण्डितः ॥ किंचिच्छास्त्रानुसारेण प्रकरोति निरूपणम् ॥ ८३ ॥ वेदा
वक्तुं न शक्ताश्च शास्त्राणि किं वदन्ति च ॥ कथयिष्यामि त्वां सर्वं पुत्र कृष्णं च वक्ष्यसि ॥८४॥ गेहे वने न भेदो मे पश्वादिषु
यथा नृषु ॥ किं वा जलं किमु स्वप्नमज्ञानं च दिवानिशम् ॥८५॥ आत्मानं च न जानामि चोदयं चन्द्रसूर्ययोः ॥ क्षणं प्राप्य हरे
र्वार्तां चेतनं मे बभूव ह ॥ ८६ ॥ कृष्णाकृतिं च पश्यामि शृणोमि मुरलीध्वनिम् ॥ कुलं लज्जां भयं त्यक्त्वा चिन्तयामि हरेः प
दम् ॥ ८७ ॥ संप्राप्य सर्वजगतामीश्वरं प्रकृतेः परम् ॥ न ज्ञानं मायया तस्य ज्ञात्वा गोपपतेर्मम ॥ ८८ ॥ ध्यायन्ते यत्पदाम्भोजं
वेदा ब्रह्मादयः सुराः ॥ स भर्त्सितो मया कोपाद्धृदि शल्यमिदं मम ॥ ८९ ॥ तत्पदांभोजसेवाभिर्गुणप्रस्तावतोऽपि वा ॥ तद्भक्त्या
यत्क्षणो नीतो ध्यानेन पूजयाऽथ वा ॥ ९० ॥ तत्रापि मङ्गलं सर्वं हर्षमायुर्व्यवस्थितम् ॥ विघ्नं च हृदि संतापस्तद्विच्छेदे सदोद्धव
॥ ९१ ॥ क्रीडाप्रीतिर्न भविता तादृशीष्टा पुनर्मम ॥ तादृशं प्रेमसौभाग्यं निर्जने न च संगमः ॥९२॥ वृन्दावनं न यास्यामि तत्सङ्गे
पुनरुद्धव ॥ चन्दनं वा न दास्यामि नन्दनन्दनवक्षसि ॥ ९३ ॥ मालां तस्मै न दास्यामि न द्रक्ष्यामि मुखाम्बुजम्॥मालतीनां केत
कीनां चम्पकानां च काननम् ॥९४॥ पुनरेव न यास्यामि सुन्दरं रासमण्डलम् ॥ हरिसङ्गे न यास्यामि रम्यं चन्दनकाननम् ॥९५॥
पुनरेव न यास्यामि मलयं रत्नमन्दिरे ॥ माधवीनां वनं रम्यं रहस्यं मधुकाननम् ॥९६॥ श्रीखण्डकाननं रम्यं स्वच्छं चन्द्रसरोवरम् ॥
विस्पन्दकं सुरवनं नन्दनं पुष्पभद्रकम् ॥ ९७ ॥ भद्रकं हरिणा सार्द्धं न यास्यामि पुनः पुनः ॥ क्व सा रम्या विकसिता माधवे माध
वीलता ॥ ९८ ॥ क्व गता माधवीरात्रिः क्व मधुः क्वापि माधवः ॥ इत्येवमुक्त्वा सा राधा ध्यात्वा कृष्णपदाम्बुजम् ॥ ९९ ॥ पुन
र्मूर्च्छां च संप्राप्य रुदती पुलकान्विता॥१००॥ इति श्रीब्रह्मवैवर्तें महापुराणे नारायणनारदसंवादे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे राधो

द्धवसंवादे त्रिनवतितमोऽध्यायः ॥ ९३ ॥ श्रीनारायण उवाच ॥ उद्धवो विस्मयं प्राप्य भयं च विपुलं मुने ॥ चेतनं
कारयामास तामुवाच मृतामिव ॥ १ ॥ तद्भक्तिं समभिज्ञाय स्वात्मानं भक्तसंख्यकम् ॥ तुच्छं मेने जगत्सर्वं दृष्ट्वा भाग्यवतीं
सतीम् ॥ २ ॥ उद्धव उवाच ॥ चेतनं कुरु कल्याणि जगन्मातर्नमोऽस्तु ते ॥ त्वमेव प्राक्तनं सर्वं कृष्णं द्रक्ष्यसि साम्प्रतम्
॥ ३ ॥ त्वत्तो विश्वं पवित्रं च त्वत्पादरजसा मही ॥ सुपवित्रं त्वद्वदनं पुण्यवत्यश्च गोपिकाः ॥ ४ ॥ लोकास्त्वामेव
गायन्ति संगीतैर्मंगलस्तवैः ॥ त्वत्सुकीर्तिं च देवाश्च सनकाद्याश्च संततम् ॥ ५ ॥ कृतपापहरां पुण्यां तीर्थपूजां च निर्मलाम् ॥
हरिभक्तिप्रदां भद्रां सर्वविघ्नविनाशिनीम् ॥ ६ ॥ त्वमेव राधा त्वं कृष्णस्त्वं पुमान्प्रकृतिः परा ॥ राधामाधवयोर्भेदो न
पुराणे श्रुतौ तथा ॥ ७ ॥ राधिकां मूर्च्छितां दृष्ट्वा पश्चात्कृत्वा तमुद्धवम् ॥ उवाच माधवी गोपी राधायाः पुरतः स्थिता ॥ ८ ॥
॥ माधव्युवाच ॥ किं वा चोरस्य कृष्णस्य रूपं वा वेषमुत्तमम् ॥ किं सुखं विभवं किं वा गौरवं चाप्यनुत्तमम् ॥ ९ ॥ किं वा
तद्वीर्यमैश्वर्यं शौर्यं वा दुरतिक्रमम् ॥ किं वा सिद्धं प्रसिद्धं वा किं वा तुल्यं गुणोत्तमम् ॥ १० ॥ इतो वा कुत आयातः पुनरेव कुतो
गतः ॥ बालको गोपवेषश्च न हि राजात्मजः पुमान् ॥ ११ ॥ त्वं किं स्मरसि कल्याणि गोपालं नन्दनन्दनम् ॥ आत्मानं रक्ष यत्नेन
कः प्रियः स्वात्मनः परः ॥ १२ ॥ मालत्युवाच ॥ धिक्त्वां राधेऽतिनिर्लज्जां तवैव जीवनं वृथा ॥ जगतो युवतीनां च
करोषि सुयशःक्षयम् ॥ १३ ॥ नारीणां गोपनं कार्यं सुव्यक्ते स्वयशःक्षयम् ॥ यत्नेन चक्षुषो वाऽहं सखि संचरणं कुरु ॥ अन्तरे पतिभावं
च संगोप्य भावनं कुरु ॥ १४ ॥ न वै जातिश्च शत्रूणां मित्राणां च सुरेश्वरी ॥ शत्रुः कार्यवशेनैव मित्रं च कर्मणा भवेत् ॥ १५ ॥
स्वकार्यमुद्धरेत्प्राज्ञः कार्यध्वंसेन मूर्खता ॥ कः कस्य वल्लभो राधे कः कस्याप्रिय एव च ॥ १६ ॥ कार्यं च समयं ज्ञात्वा सन्तः
कुर्वंति संततम् ॥ शत्रुर्धनापहारी च प्राणहर्ता ततः परः ॥ १७ ॥ कटुवक्ता दुःखदाता शत्रूणां लक्षणं शृणु ॥ स्वकुलात्त्वां बहिष्कृत्य
विसृज्य शोकसागरे ॥ १८ ॥ गृहीत्वा चेतनं प्राणान्निष्ठुरो दारुणो गतः ॥ किं किं स्मरसि मूढे हि त्यज शोकं सुदारुणम् ॥ १९ ॥

आत्मानं रक्ष यत्नेन कः प्रियः स्वात्मनः परः ॥ २० ॥ पद्मावत्युवाच ॥ भवता कथितं पूर्णं यमुनाजलसन्निधौ ॥ अरसस्य रतिर्दूरं नारीणां न सुखं प्रिये ॥ विद्युज्ज्वाला जले रेखा खलानां प्रीतिरेव च ॥ २१ ॥ न नीतिर्नीतिशास्त्रेषु सुविश्वासः खलेषु च ॥ यदा त्वं यमुनाकूले मुखं वीक्ष्य हरेरहो ॥२२॥ सस्मितं सुकटाक्षं च पुनः कृत्वाऽस्य गोपनम् ॥ पुनः पुनस्त्वं संवीक्ष्य त्वया त्यक्तं च चेतनम् ॥२३॥ गृहं त्यक्त्वा गुरुभयं सखीनां वचनं शुभम् ॥ संततं ध्यायते कृष्णो नाहारं जीवनं तथा ॥ २४ ॥ क्व कृष्णो मथुरायां च क्वापि त्वं कदलीवने ॥ त्वं यदि त्यजसि प्राणान्नाविर्भवति सोऽधुना ॥ काले द्रक्ष्यसि स्वात्मानं यदि रक्षसि सुन्दरि ॥ २५ ॥ चन्द्रमुख्युवाच ॥ प्राक्तनेन शुभं सर्वं सुखं च विभवश्चिरम् ॥ २६ ॥ दुःखं शोकः प्राक्तनेन विपत्सं पञ्च साम्प्रतम् ॥ भारते पुण्यभूमौ च सर्वेषामीप्सिते पदे ॥२७॥ लभेत्पतिं हरिं कान्तं तपसा प्रकृतेः परम् ॥ तथा विप्रदहेद्गात्रं काम बाणेन साम्प्रतम् ॥२८॥ अस्याः शत्रुः कथं चन्द्रो मधुर्वा मधुमाधवौ ॥ शंकरेण प्रदग्धोऽभूत्पुनरेव स मन्मथः ॥ २९ ॥ चन्द्रं भक्षतु राहुश्च पुनश्चोद्गमनं तथा॥मधुश्च मित्रशोकेन प्राणांस्त्यक्त्वा ययौ वनम् ॥३०॥ सुधासिन्धुश्च चेन्दुर्यो विषसिन्धुश्च मां प्रति॥ सुवेषः स्याज्ज्वलद्वह्निश्चन्दनं तद् घृताहुतिः ॥ ३१ ॥ संततं प्रदहेद्गात्रं सुगन्धिश्च समीरणः ॥ त्यक्ताहारा मम सखी पश्य श्वसित जीवतीम् ॥३२॥ प्रशंसां कुरु कृष्णस्य मुखेन कुरुनन्दन ॥ तन्नामस्मृतिमात्रेण तद्गुणश्रवणेन च॥तद्वार्तया च शुभया सहसा चेतनं भवेत् ॥ ३३ ॥ शशिकलोवाच ॥ त्वं किं माधवि जानासि कृष्णमात्मानमीश्वरम् ॥ ३४ ॥ यं तं ब्रह्मादयो देवा वेदाश्चत्वार एव च॥ध्यायन्ति संततं सन्तः पादपद्मं सुरेप्सितम्॥३५॥पद्मा सरस्वती दुर्गा सोऽनन्तोऽपि महेश्वरः॥यं न जानन्ति सिद्धेन्द्राः मुनीन्द्रा मनवस्तथा ॥ ३६ ॥ सर्वात्मनः कुतो रूपं निर्गुणस्य कुतो गुणाः ॥ सत्यमुक्तं च सत्यस्य यत्तदेव यथोचितम् ॥ ३७ ॥ धत्ते भारावतरणे पृथिव्याश्च मनोहरम् ॥ सुखमाह्लादकं रम्यं भक्तानुग्रहविग्रहम् ॥ ३८ ॥ किमनिर्वचनीयं च रूपं जनमनोहरम् ॥ कोटिकन्दर्पलावण्यं लीलाधाम शुभाश्रयम् ॥३९॥ यत्पादपद्ममधुरं मधु मन्दाकिनीजलम् ॥ दध्रे शिरसि भक्त्या च सर्वेशः शंकरः

परः ॥ ४० ॥ शश्वत्करोति वैरागी तीर्थकीर्तैश्च कीर्तनम् ॥ क्षणं नृत्यति भक्त्या च पञ्चवक्त्रेण गायति ॥ ४१ ॥ आहारं भू
षणं वस्त्रं परिहृत्य दिगम्बरः ॥ ब्रह्मज्योतिःस्वरूपं च ध्यात्वा शुभ्रं सुनिर्मलम् ॥ ४२ ॥ ब्रह्मा च तपसा जन्म नयत्येव हि सेवया ॥
शेषः सनत्कुमारश्च सिद्धसंघश्च योगवित् ॥ ४३ ॥ सुशीलोवाच ॥ निर्मन्थनार्हं न भवेत्तस्य कामशतं शतम् ॥ चन्द्रोऽश्वि
नीकुमारो वा रूपेषु केन गुण्यते ॥ ४४ ॥ असंख्येषु च विश्वेषु ब्रह्मविष्णुशिवादयः ॥ मुनयो मनवः सिद्धा भक्ताः सन्तश्च संततम्
॥४५॥ ध्यायन्ते यत्पदाम्भोजं निर्गुणस्यात्मनश्च वै॥वेदाः स्तोतुं न शक्ताश्च यमीशं च सरस्वती॥४६॥ जडीभूता च भीता च स्तव
नेन क्षमापयेत् ॥ सहस्रवक्त्रः स्तवने कम्पितश्च निरन्तरम् ॥४७॥ वेदानां जनको ब्रह्मा स्तोत्रेण तस्य हीश्वरः॥तं सत्यं नित्यमीशं
च माधवी परिनिन्दति ॥४८॥ अपवित्रा सभा भूता गोपीनां जीवनं वृथा ॥ तासु पुण्यवती राधा ध्यायते यं दिवानिशम् ॥४९॥
यन्नामस्मृतिमात्रेण कोटिजन्मार्जितं सखि ॥ कृतपापभयं शोकः प्रणश्यति न संशयः ॥५०॥रत्नमालोवाच ॥ दधार वामहस्तेन
शैलं गोवर्धनं हरिः ॥ ततः किं तद्यशः शौर्यं जगतां जनकस्य च॥५१॥शैलानां च सहस्रं यो भेत्तुं शक्तश्च दैत्यराट्॥लीलामात्रेण तेषां
च लक्षं हन्तुं क्षमो हरिः॥५२॥यदंशकलया जातः सूकरो विष्णुरीश्वरः॥वसुधां दशनाग्रेण चोद्दधार च लीलया॥५३॥शैलानां च सह
स्राणि यत्र सन्ति महीतले ॥ दैत्याश्च वाऽप्यसंख्याश्च वीराः शूरास्तथैव च ॥५४॥ तेनैव कर्मणा तस्य न शौर्यं न च पौरुषम् ॥
न यशश्च प्रशंसा वा सखि सर्वात्मनाऽऽत्मना ॥ ५५ ॥ पारिजातोवाच ॥ सप्तद्वीपा च वसुधा सशैलवनसागरा ॥ काञ्चनीभू
मिसहिता सर्वाधारा मनोहरा ॥ ५६ ॥ सप्तस्वर्गाश्च विविधा ब्रह्मलोकावधि प्रिये ॥ विचित्राः सुन्दराश्चैव पातालानां च सप्त च
॥५७॥ एतैः परिमितं विश्वं ब्रह्माण्डं ब्रह्मणा कृतम् ॥ महद्विष्णोर्लोमकूपे तदेवं चाणुवत्स्थितम् ॥ ५८ ॥ तस्य यावन्ति लोमा
नि तानि विश्वानि सन्ति च ॥ स एव षोडशांशश्च कृष्णस्य परमात्मनः ॥ ५९ ॥ तस्यैव किं यशः शौर्यं महिमानमनूपमम् ॥
यत्स्मरी गोपकन्या च किं वा जानाति माधवी ॥ ६० ॥ माधव्युवाच ॥ मया यदुक्तं न ज्ञात्वा मूढा जल्पन्ति गोपिकाः ॥

उद्धव शृणु मे वाक्यं यन्मया कथितं शुभम् ॥ ६१ ॥ स्वेच्छया सगुणो विष्णुः स्वेच्छया निर्गुणो भवेत् ॥ भुवो भारावतरणे गोपवेषः शिशुर्विभुः ॥ ६२ ॥ यदि वेदाः पुराणानि सिद्धाः सन्तश्च संततम् ॥ ब्रह्मेशशेषभक्ताश्च न जानन्ति यमीश्वरम् ॥ ६३ ॥ तं किं जानामि मूढाऽहं यत्स्मरी गोपकन्यका ॥ तथाऽपि मद्वचः सत्यं श्रूयतां वत्स तत्क्षणम् ॥ ६४ ॥ किमनिर्वचनीयं च रूपं शौर्यं यशो बलम् ॥ वीर्यं वेषं च सिद्धिं चाप्यन्यो वा यो गुणो हरेः ॥ ६५ ॥ स्वेच्छामयस्य तस्यैव सगुणस्य च साम्प्रतम् ॥ किमनिर्वचनीयं च वर्तते तद्विशेषणम् ॥ ६६ ॥ निर्गुणस्य च विष्णोश्च देहहीनश्च स्वात्मवान् ॥ वर्तते च किमाख्येयं तस्य रूपादिकं च किम् ॥ ६७ ॥ मां निन्दति महामूढा न बुद्ध्वा वचनं मम ॥ एषा जानाति किं मूढा तं सत्यं प्रकृतेः परम् ॥ ६८ ॥ ज्योतिःस्वरूपं परमं परमात्मानमीश्वरम् ॥ तमनिर्वचनीयं च भक्तानुग्रहविग्रहम् ॥ ६९ ॥ यत्पादपद्मं पद्मा सा त्रैलोक्यजननी परा ॥ सेवने कल्पिता भीता दासीवत्सततं भिया ॥ ७० ॥ विष्णुमाया च प्रकृतिर्मूलरूपा सनातनी ॥ ब्रह्मस्वरूपा परमा भीता दक्षिणपार्श्वतः ॥७१॥ सरस्वती जडीभूता भीता च परमेश्वरी ॥ स्तोतुं न शक्ता वेदाः किं स्तुवन्ति परमेश्वरम् ॥७२॥ तासां तद्वचनं श्रुत्वा चोद्धवो भक्तिविह्वलः ॥ पुलकाञ्चितसर्वाङ्गो रुरोद च पपात च ॥ ७३ ॥ मूर्च्छां संप्राप्य भक्त्या च ध्यात्वा तं परमेश्वरम् ॥ तुच्छं मेने स चात्मानं गोपीं भक्त्याऽप्युवाच सः ॥ ७४ ॥ उद्धव उवाच ॥ धन्यं यशस्यं द्वीपानां जम्बूद्वीपं मनोहरम् ॥ यत्र भारतवर्षं च पुण्यदं शुभदं तथा ॥ ७५ ॥ वणिजां च पुण्यकृतं वाणिज्यस्थलमीप्सितम् ॥ अत्र कृत्वा सुपुण्यं च भुङ्क्तेऽन्यत्र शुभं फलम् ॥ ७६ ॥ धन्यं भारतवर्षं च पुण्यदं शुभदं वरम् ॥ गोपीपादाब्जरजसा पूतं परमनिर्मलम् ॥ ७७ ॥ ततोऽपि गोपिका धन्या मान्या योषित्सु भारते ॥ नित्यं पश्यन्ति राधायाः पादपद्मं सुपुण्यदम् ॥७८॥ षष्टिवर्षसहस्राणि तपस्तप्तं च ब्रह्मणा ॥ राधिकापादपद्मस्य रेणूनामुपलब्धये ॥ ७९ ॥ गोलोकवासिनी राधा कृष्णप्राणाधिका परा ॥ तत्र श्रीदामशापेन वृषभानसुताऽधुना ॥ ८० ॥ ये ये भक्ताश्च कृष्णस्य देवा ब्रह्मादयस्तथा ॥ राधायाश्चापि गोपीनां कलां नार्हन्ति षोडशीम् ॥८१॥ कृष्णभक्तिं विजानाति योगी

न्द्रश्च महेश्वरः ॥ राधा गोप्यश्च गोपाश्च गोलोकवासिनश्च ये ॥ ८२ ॥ किंचित्सनत्कुमारश्च ब्रह्मा चेद्विषयी तथा ॥ किंचिदेव विजानन्ति सिद्धा भक्ताश्च निश्चितम् ॥८३॥ धन्योऽहं कृतकृत्योऽहमागतो गोकुलं यतः ॥ गोपिकाभ्यो गुरुभ्यश्च हरिभक्तिं लभेऽचलाम् ॥ ८४ ॥ मथुरां च न यास्यामि तीर्थकीर्तैश्च कीर्तनम् ॥ श्रोष्यामि किंकरो भूत्वा गोपीनां जन्मजन्मनि ॥ ८५ ॥ न गोपीभ्यः परो भक्तो हरेश्च परमात्मनः ॥ यादृशीं लेभिरे गोप्यो भक्तिं नान्ये च तादृशीम् ॥ ८६ ॥ कलावत्युवाच ॥ पितॄणां मानसी कन्या धन्या मेना कलावती ॥ वयं तिस्रो भगिन्यश्च भ्रमामः पृथिवीतले ॥८७॥ धन्या जनकपत्नी च सीतामाता पतिव्रता ॥ अयोनिसंभवा राधा अहं चायोनिसंभवा ॥ ८८ ॥ राधा श्रीदामशापेन वृषभानसुता भुवि ॥ सनत्कुमारशापेन वयमेव महीतले ॥ ८९ ॥ क्षीरोदसागरं रम्यं श्वेतद्वीपं मनोहरम् ॥ तिस्रो भगिन्यो भक्त्या च विष्णुं द्रष्टुं गता वयम् ॥९०॥ अभ्युत्थानादि न कृतं कोपादस्माञ्छशाप ह ॥ सनत्कुमारो भगवान्योगीन्द्राणां गुरोर्गुरुः ॥ ९१ ॥ सनत्कुमार उवाच ॥ मूढास्तिष्ठत भूमौ च पुनः स्वर्गं न यास्यथ ॥ मर्त्यप्राणिप्रिया भूत्वा चाहंकारेण हेतुना ॥ ९२ ॥ पुनर्वरं च प्रत्येकं ददौ तुष्टो द्विजेश्वरः ॥ विष्णोर्वंशस्य शैलस्य हिमाधारस्य कामिनी ॥ ९३ ॥ ज्येष्ठा भवतु त्वत्कन्या भविष्यत्येव पार्वती ॥ धन्या प्रिया तु भवतु योगिनो जनकस्य च ॥ ९४ ॥ तस्य कन्या महालक्ष्मीः सीतादेवी भविष्यति ॥ वृषभानस्य वैश्यस्य योगिनां प्रवरस्य च ॥९५॥ दुर्वाससश्च शिष्यस्य कनिष्ठा च कलावती ॥ भविष्यति प्रिया साध्वी द्वापरान्ते च गोकुले ॥ ९६ ॥ कलावतीसुता राधा देवी गोलोकवासिनी ॥ श्रीदामगोपशापेन भविष्यति न संशयः ॥ ९७ ॥ ईशो ब्रह्मेशशेषाणां भारावतरणेन च ॥ आगमिष्यति पृथ्वीं च पुण्यक्षेत्रं च भारतम् ॥ ९८ ॥ कलावती वृषभानः कौतुकात् कन्यया सह ॥ जीवन्मुक्तश्च गोलोकं गमिष्यति न संशयः ॥ ९९ ॥ धन्या च सीतया सार्द्धं वैकुण्ठं च गमिष्यति ॥ मेनका योगिनी सिद्धा पार्वत्याश्च वरेण च ॥ १०० ॥ कल्पान्ते विष्णुलोके च लक्ष्मीवन्मोदते चिरम् ॥ विना विपत्त्या महिमा केषां कुत्र भविष्यति ॥ १ ॥ कर्मणा च गते

दुःखे प्रभवेद्दुर्लभं सुखम् ॥ पुरा पितॄणां कन्याश्च स्वर्गभोगविलासिकाः ॥ २ ॥ लक्ष्मीसमा वरेणापि विप्रस्य विष्णुदर्शनात् ॥ कर्मक्षयं चाप्यस्माकं बभूव विष्णुदर्शनात् ॥ ३ ॥ पुण्येन तेन तीव्रेण कुमारस्यापि दर्शनम् ॥ श्रुतं तत्र कुमारास्याज्ज्ञानं परमदुर्लभम् ॥ ४ ॥ ब्रह्मविष्णुशिवादीनां सिद्धानां जगतामपि ॥ ईश्वरः परमात्मा च श्रीकृष्णः प्रकृतेः परः ॥ निर्गुणश्च निरीहश्च परः स्वेच्छामयो वरः ॥५॥ तुलस्युवाच ॥ सर्वप्राणिषु देवाश्च तिष्ठन्त्येव पृथक्पृथक् ॥ ६ ॥ प्राणो विष्णुश्च विषयी मनो ब्रह्मा च चेतना ॥ प्रकृतिर्बुद्धिरूपा च सर्वशक्त्यधिदेवता ॥ ७ ॥ ज्ञानस्वरूपः शंभुश्च स्वयं धर्मश्च पूरुषः ॥ निर्गुणः परमात्मा च तद्ब्रह्म प्रकृतेः परम् ॥ ८ ॥ स एव कृष्णः साक्षी च कर्मणां जीविनामपि ॥ भोक्ता च सुखदुःखानां जीवस्तत्प्रतिबिम्बकः ॥ ९ ॥ चक्षुषोश्चन्द्रसूर्यौ च जिह्वायां च सरस्वती ॥ वसुंधरा त्वाचि सदा बाह्वोस्ते लोकपालकाः ॥११०॥ आत्मनश्चापि ते सर्वे परिचारकरूपिणः ॥ आत्मन्येव प्रियास्ते च सर्वे गच्छन्ति जीविनः ॥ ११ ॥ यथा संसदि संसारे नरदेहमिवानुगाः ॥ तस्मात्सर्वात्मनाऽऽत्मानं भजन्ति संततं सदा॥१२॥सन्तश्च परया भक्त्या ध्यायन्ते योगिनो मुदा ॥ कर्मिणां कर्मणां साक्षी कुतः कर्म च गोपनम् ॥ अन्तर्यामी च कृष्णश्च प्रचारं कुरुते मुदा ॥ १३ ॥ कालिकोवाच ॥ नरा बालाश्च वृद्धाश्च युवानस्त्रिविधास्तथा ॥१४॥ देवादयश्च ये सिद्धाः सर्वे जानन्ति तं परम्॥साम्प्रतं मूर्च्छितां राधां युक्तो बोधयितुं बुधः॥१५॥अत्र युक्तिः प्रधाना च तां प्रबोधय चोद्धव ॥ ॥ उद्धव उवाच ॥ चेतनं कुरु कल्याणि जगन्मातर्निबोध माम् ॥ १६ ॥ उद्धवं कृष्णभक्तस्य किंकरस्यापि किंकरम् ॥ प्रसादं कुरु मातर्मां यास्यामि मथुरां पुनः ॥ १७ ॥ न स्वतन्त्रः पराधीनो योषा दारुमयी यथा ॥ यथा वृषो वशीभूतो वृषवाहस्य संततम् ॥ ११८ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे राधोद्धवसंवादे चतुर्नवतितमोऽध्यायः ॥ ९४ ॥ श्रीनारायण उवाच ॥ उद्धवस्य वचः श्रुत्वा चेतनं प्राप्य राधिका ॥ सा चोवास समुत्थाय नत्नसिंहासने वरे ॥ १ ॥ उवाच मधुरं देवी हृदयेन विदूयता ॥ गोपीभिः सप्तभिर्भक्त्या सेविता श्वेतचामरैः ॥ २ ॥ श्रीराधिकोवाच ॥

मथुरां गच्छ वत्स त्वं मां च विस्मर संपदा ॥ अतोऽप्यधर्मो नास्त्येव भवतो भवसागरे ॥ ३ ॥ मदीयं वचनं सर्वं गत्वा कथय साम्प्रतम् ॥ श्रीकृष्णं परमानन्दं शीघ्रमानय मत्प्रभुम् ॥ ४ ॥ योषिज्जन्मनि योषित्सु संप्राप्य तादृशं पतिम् ॥ भेदो बभूव कस्या वा मदन्या काऽपि दुःखिनी ॥५॥ किं ददासि प्रबोधं मे नास्ति मे बोधमौचितम् ॥ निष्फलो देहिनां देहो विनाऽऽत्मानं सदोद्धव ॥ ६ ॥ संप्रीत्या सह सौभाग्यं गौरवं नित्यनूतनम् ॥ अतीव दुर्लभं प्रेम रहस्यं नवसंगमम् ॥ ७ ॥ स्मरामि मनसा शश्वन्नान्यो मनसि वर्तते ॥ रात्रौ निद्रां परित्यज्य स्मरणं शोकवर्धनम् ॥ ८ ॥ मामुद्धर ध्रुवं वत्स निमग्नां शोकसागरे ॥ जीवाभयप्रदानेन तीर्थे स्नानफलं नृणाम् ॥ ९ ॥ प्रबोधितुं न शक्नोमि दुर्निवारं च मानसम् ॥ चिन्तये चरणाम्भोजं कृष्णस्य परमात्मनः ॥१०॥ तद्गुणं महिमानं च प्रीतिं च प्रेमसागरम् ॥ स्मारंस्मारं च सौभाग्यं मनो मे न स्थिरं चरम् ॥ ११ ॥ जगतां युवतीनां च कासां वा दुःखमीदृशम् ॥ श्रीकृष्णभेददुःखं च का वा जानाति मां विना ॥ १२ ॥ किंचिज्जानाति सीता साऽप्यहं च विधिबोधितम् ॥ मत्परा दुःखिनी नास्ति कामिनीषु जगत्त्रये ॥ १३ ॥ का वा याति प्रतीतिं मे श्रुत्वा च मानसीं व्यथाम् ॥ कासां वा मत्समं दुःखं युवतीनां सुतोद्धव ॥ १४ ॥ राधिकासदृशी स्त्रीषु न भूता न भविष्यति ॥ दुःखिनी विरहातप्ता सुखसौभाग्यवर्जिता ॥ १५ ॥ संप्राप्य कल्पवृक्षं च पतिं च जगतां पतिम् ॥ वंचिताऽहं विधात्रा च निर्दयेन च पापिना ॥ १६ ॥ जीवनं सफलं जन्म सुस्निग्धं चक्षुषी मनः ॥ तत्पादपद्मवक्त्रेन्दुरूपवेषप्रदर्शनात् ॥१७॥ यन्नामश्रुतिमात्रेण पञ्च प्राणाः प्रहर्षिताः ॥ स्तुतिमात्रात्प्रफुल्लयन्ते आत्मा सुस्निग्ध एव च ॥ १८ ॥ यश्च पस्पर्श सुरतौ यशस्त्रिभुवनेष्वपि ॥ कया वा संपदा वत्स विस्मरामि तमीश्वरम् ॥१९॥ त्रैलोक्यविजयं रूपं गुणमेव बिभर्ति यत् ॥ न निर्मितो यो विधिना तेनैव निर्मितो विधिः ॥ २० ॥ तं विधेश्च विधातारं दातारं सर्वसंपदाम् ॥ कल्पवृक्षात्परं शान्तं लक्ष्मीकान्तं मनोहरम् ॥ २१ ॥ सर्वेशं सर्वबीजं च परमात्मानमीश्वरम् ॥ कया वा संपदा तात विस्मरामि च तं पतिम् ॥ २२ ॥ यस्य निर्मंथनार्हं च न चन्द्रो न च मन्मथः ॥ नैवाश्विनीकुमारश्च गुणसाम्यं न विश्वतः ॥२३॥

ध्यायन्ते यत्पदाम्भोजं ब्रह्मेशशेषसंज्ञकाः ॥ कया वा संपदा तात विस्मरामि च तं प्रभुम् ॥२४॥ स्वप्ने पश्यन्ति ये रूपमतुलं च मनोहरम् ॥ तेऽपि सर्वं परित्यज्य ध्यायन्ते तमहर्निशम्॥२५॥गुणेन शैलः सलिलं शुष्ककाष्ठं द्रवेदिति ॥ मृतवृक्षो मुकुलितः स्तम्भितश्च समीरणः ॥ २६ ॥ सूर्यश्च जलधिश्चैव स्थगितो भक्तिभावतः ॥ कया वा संपदा पुत्र विस्मरामि च तं प्रियम् ॥२७॥ यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भयात् ॥ वर्षतीन्द्रो दहत्यग्निर्मृत्युश्चरति जन्तुषु ॥२८॥ यद्भयात्फलिता वृक्षाः पुष्पिताः समयेऽपि च॥समुद्राः स्वात्मविषये ग्रहाश्च मुनयः सुराः ॥ २९ ॥ कालस्य कालः संवर्तः संहर्ता स्रष्टुरीश्वरः ॥ स्वाधीनश्च स्वतन्त्रश्च स्वयमेवात्मसंज्ञकः ॥ ॥३०॥ कया वा संपदा भक्त विस्मरामि च तं प्रभुम् ॥ प्रबोधो नास्ति तद्भेदे येन मां बोधयेद् बुधः ॥३१॥ मां च बोधयितुं शक्ता न सावित्री सरस्वती ॥ न वेदा न च वेदाङ्गाः के वा सन्तश्च के सुराः ॥ ३२ ॥ सहस्रवक्त्रोऽनन्तश्च वेदानां जनको विधिः ॥ न शंभुर्न गणेशश्च योगीन्द्राणां गुरोर्गुरुः ॥३३॥ स्थितेर्गतिश्चिन्तनीया मार्गशून्ये कुतो गतिः ॥ कालसाध्यं च सर्वं च सुखं दुःखं शुभाशुभम् ॥ ३४ ॥ दुर्निवारः स कालश्च कालसाध्यं जगत्सु च ॥ उत्तिष्ठ मथुरां गच्छ सुखं वत्स मनोहरम् ॥ ३५ ॥ व्रजवासं परित्यज्य भवांश्च गमनोत्सुकः ॥ सुचिरं कृष्णविच्छेदो दुःखाय न सुखाय च ॥ ३६ ॥ पश्य चन्द्रमुखं तस्य जन्ममृत्युजरापहम् ॥ राधिकावचनं श्रुत्वा रुरोद भृशमुद्धवः ॥ रुदन्तीं राधिकां दृष्ट्वा बन्धुविच्छेदकातराम् ॥ ३७ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे राधोद्धवसंवादे पञ्चनवतितमोऽध्यायः ॥ ९५ ॥ श्रीनारायण उवाच ॥ श्रीकृष्णस्मरणं कृत्वा गमनोन्मुखमुद्धवम् ॥ नतं राधापदाम्भोजे शिरसा पुलकाञ्चितम् ॥१॥ उवाच माधवी गोपी रुदंती प्रेमविह्वला ॥ भक्तं रुदन्तमुच्चैश्च राधाविच्छेदकातरम् ॥ २ ॥ माधव्युवाच ॥ उद्धव शृणु वक्ष्यामि क्षणं तिष्ठ यथोचितम् ॥ निगूढं परमं ज्ञानं यत्ते मनसि वाञ्छितम् ॥ ३ ॥ सुदुर्लभं पुराणेषु वेदेषु गोपनीयकम् ॥ प्रश्नं कुरु महाभाग राधिकां त्रिजगत्प्रसूम् ॥ ४ ॥ इत्युक्त्वा सा च गोपीशा समुवास सुसंसदि ॥ उवाच मधुरं शान्तमुद्धवश्चापि राधिकाम् ॥ ५ ॥ उद्धव उवाच ॥ एकाकी भवमायाति

यात्येकाकी पुनः पुनः ॥ प्राणी कर्मानुरोधेन स्वकर्मफलभुक्पुमान् ॥ ६ ॥ कर्मणा जायते जन्तुः कर्मणैव प्रलीयते ॥ सुखं दुःखं
भयं शोकं कर्मणैवाभिपद्यते ॥ ७ ॥ जन्तुर्भोगावशेषेण भोगं भुङ्क्ते भवेषु च ॥ पुनश्च कर्मणो भोगात्समायाति च याति च ॥८॥ रत्ना
दिकं च यत्किंचिन्मह्यं दत्तं त्वया सति ॥ मया सार्द्धं न यात्येव तेन मे किं प्रयोजनम् ॥ ९ ॥ भवाब्धितारणे देवी भवती तरणि
र्वरा ॥ कर्णधारः स्वयं कृष्णः सर्वेषां पारकारकः ॥ १० ॥ किंचिद्दानं देहि मह्यं भवाब्धिपारकारणम् ॥ प्राप्य प्रसादं यास्यामि
मथुरां कृष्णमूलकम् ॥११॥ यां यां कालगतिं मातः सुराणां च नृणामपि ॥ पितॄणां ब्रह्मलोकस्य तदूर्ध्वस्य च तां वद ॥१२॥ तामे
व दुस्तरां घोरां तीर्त्वा यामि हरेः पदम् ॥ एवंभूतमुपायं च देहि मे कमलालये ॥१३॥ दूरतो यत्पदाम्भोजं ध्यायन्ते च दिवानि
शम् ॥ देवा ब्रह्मेशशेषाद्यास्त्वं तद्वक्षःस्थलस्थिता ॥ १४ ॥ उद्धवस्य वचः श्रुत्वा जहास कमलालया ॥ वाससा नेत्रनीरं च संमा
र्ज्य तमुवाच सा ॥ १५ ॥ श्रीराधोवाच ॥ माधवीवचनेनैव करोषि प्रश्नमुद्धव ॥ स्त्रीजातिरबला लोके किं वा ज्ञानं ददामि ते
॥ १६ ॥ शुद्धां कालगतिं वत्स जानाति भगवान्हरिः ॥ ब्रह्मा महेशः शेषश्च वेदाश्चत्वार एव च ॥ १७ ॥ किंचिद्वेदानुसारेण संतो
जानन्ति पुत्रक ॥ श्रूयतां कृष्णवक्त्रेण गोलोके रासमण्डले ॥ १८ ॥ गोलोके चापि वैकुण्ठे ब्रह्मलोके च साम्प्रतम् ॥ या च
दृष्टा कालगतिस्तामेव कथयामि ते ॥ १९ ॥ नृणां पितॄणां देवानां ब्रह्मलोकादिकस्य च ॥ बहिर्लोकस्य ब्रह्माण्डात्पा
तालानां च निश्चितम् ॥ २० ॥ दुरत्ययां कालगतिं येनोपायेन पण्डिताः ॥ निस्तरन्ति बुधश्रेष्ठ कथयामि निशामय ॥ २१ ॥
भजन्ति जगतां नाथं कालकालं जगद्गुरुम् ॥ निर्गुणं च निरीहं च परमात्मानमीश्वरम् ॥२२॥ सद्यः पतति देहोऽयं विना येन सदा
त्मना ॥ तं निषेव्य कालगतिं तरत्येव हि केवलम् ॥२३॥ आयुर्हरति सर्वेषां प्राणिनां रविरेव च ॥ श्रीहरेः शुद्धभक्तानां सतां पुण्य
वतां विना ॥ २४ ॥ विधेर्मानसिकान्पुत्रांश्चतुरः पश्य पुत्रक ॥ सनकादीन्भागवतान्येषां च सुस्थिरं वयः ॥ २५ ॥ रुद्राद्यान्वयसा
ऽऽदित्याञ्ज्ञानिनां च गुरोर्गुरून् ॥ बालाननुपनीतांश्च पञ्चवर्षशिशून्यथा ॥ २६ ॥ अभ्यन्तरे महास्फीतान्सस्मितांश्च दिगम्बरान् ॥

श्रीकृष्णध्यानपूतांश्च तीर्थपूतांश्च वैष्णवान् ॥ २७ ॥ वेदवेदाङ्गशास्त्राणां चिन्ताहीनान्प्रफुल्लितान् ॥ भक्त्या दिवानिशं शश्वद्धरिभावेन तत्परान् ॥ २८ ॥ बाह्यपूजाविहीनांश्च पूतान्मानसिकांस्तथा ॥ मृत्युंजयान्महाभागान्कालव्यालजितस्तथा ॥ २९ ॥ सनकं च सनन्दं च तृतीयं च सनातनम् ॥ परं सनत्कुमारं च ये स्मरन्ति च सर्वशः ॥ ३० ॥ तीर्थस्नानफलं लब्ध्वा मुच्यन्ते कृतपातकात् ॥ हरिभक्तिर्भवत्येषां हरिदास्यं लभन्ति च॥३१॥मृकण्डुबालकं पश्य कर्मणा च द्विजोत्तमम्॥दशवर्षायुतं तीव्रं ज्वलन्तं ब्रह्मतेजसा॥३२॥ हरिमेवमतः पश्चात्सप्तकल्पान्तजीविनम् ॥ वोढुं पञ्चशिखं पश्य लोमकं चासुरिं तथा ॥ ३३ ॥ सर्वकर्मविहीनं च हरिसेवनतत्परम् ॥ शतकल्पायुषं चैव ध्यायमानं हरेः पदम् ॥३४॥ जमदग्नेः सुतं पश्य रामं तं चिरजीविनम् ॥ हनुमन्तं बलिं व्यासमश्वत्थामानमेव च ॥ ॥३५॥विभीषणं कृपं विप्रं जाम्बवन्तं च भल्लुकम् ॥ हरिभावनया चैते शुद्धाः सुचिरजीविनः॥३६॥सिद्धेंद्रेषु मुनीन्द्रेषु नरेष्वन्येषु चोद्धव ॥ हरिभावेन शुद्धाश्च सर्वे ते चिरजीविनः ॥३७॥ प्रह्लादं पश्य दैत्येषु हिरण्यकशिपोः सुतम् ॥ हरिद्विषो दुरन्तस्य हरिभावनतत्परम् ॥३८॥ चिरायुषं कालजितं पश्यान्यं चाप्यसंज्ञकम् ॥ अनेकजन्मतपसा लब्ध्वा जन्म च भारते॥३९॥ये हरिं तं न सेवन्ते ते मूढाः कृतपापिनः ॥ वासुदेवं परित्यज्य विषये निरतो जनः ॥४०॥ त्यक्त्वाऽमृतं महामूढो विषं भुंक्ते निजेच्छया ॥ कस्य स्त्री कस्य वा पुत्रः कस्य वा बान्धवास्तथा ॥४१॥ कः कस्य बन्धुर्विपदि श्रीकृष्णेन विना भुवि ॥ तस्मात्सन्तः सदा कृष्णं भजन्त्येव दिवानिशम् ॥ ४२ ॥ जन्ममृत्युजराव्याधिहरं सर्वहरं परम् ॥ कालस्य तरणोपायं भजनं परमात्मनः ॥ ४३ ॥ आनन्दनन्दनस्यैव परिपूर्णतमस्य च ॥ शृणु कालगतिं वत्स मदीयज्ञानगोचराम् ॥४४॥ नराणां च पितृणां च सुराणां चापि ब्रह्मणः ॥ नागानां राक्षसादीनां तत्परेषां च पुत्रक ॥ ४५ ॥ कथयामि निगूढार्थं सावधानं निशामय ॥ सर्वस्माच्च परस्थानं सर्वाधारो महान्विराट् ॥ ४६ ॥ यस्य लोमसु विश्वानि चासंख्यानि च तानि च ॥ सर्वस्माच्च परं सूक्ष्मं परमाणुं निशामय॥४७॥कालारम्भात्मकं सर्वमनूहं परमीप्सितम् ॥ परमः सद्विशेषाणामनेकोऽसंयुतः सदा ॥ ४८ ॥ परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः ॥ परमाणुद्वयेनाणुस्त्रसरेणुस्तु ते

त्रयः ॥ ४९ ॥ त्रसरेणुत्रिकेणापि त्रुटिरुक्ता मनीषिभिः वेधस्त्रुटिशतेनैव त्रिवेधेन लवस्तथा ॥ ५० ॥ त्रिलवेन निमेषश्च त्रिनिमेषेण
चक्षणः ॥ काष्ठा पञ्चक्षणेनैव लघुश्च दशकाष्ठया ॥ ५१ ॥ लघुपञ्चदशं दण्डस्तत्प्रमाणं निशामय ॥ द्वादशार्द्धपलोन्मानं चतुर्भि
श्चतुरङ्गुलैः ॥५२॥ स्वर्णमाषैः कृतच्छिद्रं यावत्प्रस्थजलप्लुतम् ॥ दण्डद्वये मुहूर्तः स्यात्षष्टिदण्डात्मिका तिथिः ॥५३॥ तदष्टभागः
प्रहरः प्रमाणं च निरूपणम् ॥ चतुर्भिः प्रहरै रात्रिश्चतुर्भिर्दिनमुच्यते ॥ ५४ ॥ तिथिपञ्चदशेनैव पक्षमानं प्रकीर्तितम् ॥ पक्षद्वयेन
मासः स्याच्छुक्लकृष्णाभिधेन च ॥ ५५ ॥ ऋतुर्मासद्वयेनैव तत्षट्केनैव वत्सरः ॥ वसन्तग्रीष्मवर्षाश्च शरद्धेमन्तशीतकाः ॥५६॥
वर्षाः पञ्चविधा ज्ञेयाः कालविद्भिर्निरूपिताः ॥ संवत्सरः प्रवत्सर इलावत्सर एव च ॥ ५७ ॥ अनुवत्सरो वत्सरोऽयमिति कालविदो
विदुः॥ अब्दो द्विषट्कमासैश्च तन्नाम शृणु चोद्धव ॥ ५८ ॥ वैशाखो ज्येष्ठ आषाढः श्रावणो भाद्र एव च ॥ आश्विनः कार्त्तिको
मार्गः पौषो माघस्तु फाल्गुनः ॥ ५९ ॥ चैत्रस्तु चरमो ज्ञेयो वर्षशेषो निरूपितः ॥ वसन्तश्चैत्रवैशाखमासयुग्मेन कीर्तितः ॥ ६० ॥
ज्येष्ठाषाढद्वयेनैव ग्रीष्मस्तु परिकीर्तितः ॥ वर्षा श्रावणभाद्रे च ह्याश्विने कार्त्तिके शरत् ॥६१॥ मार्गे पौषे च हेमन्तः शिशिरो माघ
फाल्गुने ॥ अब्दस्तु चायने द्वे वै चोत्तरे दक्षिणायने ॥ ६२ ॥ माघादिषड्भिर्निर्मितमुत्तरायणमीप्सितम् ॥ श्रावणादिमासषट्कं
दक्षिणायनमेव च ॥ ६३ ॥ नक्तवृद्धिः श्रावणाच्च पौषपर्यन्तमेव च ॥ प्रतिपत्पूर्णिमान्तस्य शुक्लपक्षः प्रकीर्तितः ॥ ६४ ॥ पूर्णिमायाः
प्रतिपदश्चामावास्यान्त एव च ॥ कृष्णपक्षस्तु विज्ञेयो वेदविद्भिर्निरूपितः ॥ ६५ ॥ द्वितीया च तृतीया च चतुर्थी पञ्चमी तथा ॥
षष्ठी च सप्तमी चैव ह्यष्टमी नवमी तथा ॥ ६६ ॥ दशम्येकादशी चापि द्वादशी च त्रयोदशी ॥ चतुर्दशी कुहूर्यावद्दिनं तु गणनं
स्मृतम् ॥ ६७ ॥ अश्विनी भरणी चापि कृत्तिका रोहिणी तथा ॥ मृगशिरस्तथाऽऽर्द्रा च नक्षत्रे द्वे पुनर्वसू ॥ ६८ ॥ पुष्याश्लेषे मघा
चैव पूर्वा चोत्तरफाल्गुनी ॥ हस्तचित्रे तथा स्वाती विशाखा चानुराधिका ॥ ६९ ॥ ज्येष्ठा मूलं तथा ज्ञेया पूर्वाषाढोत्तरा तथा ॥
श्रवणाभिजिती चैव धनिष्ठा च प्रकीर्तिता ॥ ७० ॥ ततः शतभिषा ज्ञेया पूर्वाभाद्रपदा तथा ॥ तथोत्तरा तु विज्ञेया रेवती चरमा

स्मृता ॥ ७१ ॥ अष्टाविंशतिनक्षत्रं कलत्रं शशिनस्तथा ॥ क्रमेण ताभिः सार्द्धं च चन्द्रस्तिष्ठति नित्यशः ॥ ७२ ॥ सप्तविंशति
नक्षत्रं कलत्रं च श्रुतौ श्रुतम् ॥ अभिजिच्छ्रवणच्छाया तेनाष्टाविंशतिः स्मृता ॥ ७३ ॥ एकदा च मधौ चन्द्रो रोहिण्या वामया
सह ॥ रेमे दिवानिशं नित्यं श्रवणा च चुकोप सा ॥७४॥ छायां च दत्त्वा चन्द्राय ययौ तातान्तिकं भिया ॥ ततः पितरमादाय सा
चक्रे च विभागकम् ॥ ७५ ॥ बभूव तेन नक्षत्रमभिजिन्नामकं पुरा ॥ एतच्छ्रुत्वा कृष्णमुखाच्छतशृङ्गे च पर्वते ॥ ७६ ॥ नक्षत्रं
कथितं वत्स तिथ्या भ्रमति नित्यशः ॥ योगं च करणं चैव मद्वक्त्रेण निशामय ॥७७॥ विष्कम्भः प्रीतिरायुष्मान्सौभाग्यः शोभनस्तथा
॥ अतिगण्डः सुकर्मा च धृतिः शूलस्तथैव च ॥ ७८ ॥ गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ॥ वज्रं सिद्धिर्व्यतीपातो
वरीयान्परिघः शिवः ॥ ७९ ॥ सिद्धिः साध्यः शुभः शुक्लो ब्रह्मैन्द्रो वैधृतिस्तथा ॥ कीर्तितस्ते योगगणः करणं श्रूयतामिति ॥
॥ ८० ॥ बवश्च बालवश्चैव कौलवस्तैतिलस्तथा ॥ गरश्च वणिजश्चापि विष्टिश्च शकुनिस्तथा ॥ ८१ ॥ चतुष्पाच्चापि नागश्च किंस्तुघ्न
इति कीर्तितम् ॥ नराणां चापि मासेन पितॄणां च दिवानिशम् ॥ ८२ ॥ शुक्ले चापि दिनं तेषां कृष्णे नक्तं प्रकीर्तितम् ॥
वत्सरेण नराणां च सुराणां च दिवानिशम्॥८३॥ दिनं तेषामुत्तरे च नक्तं च दक्षिणायने ॥ मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः
॥ ८४ ॥ मनोरायुः परिमितं शक्रस्यायुः प्रकीर्तितम् ॥ पञ्चविंशत्सहस्रं च तथा पञ्चशतं परम् ॥ ८५ ॥ तत्र सूर्यगतिर्नास्ति
शक्रपातानुसारतः ॥ दिवानिशं च जानन्ति ब्रह्मलोकनिवासिनः ॥८६॥ दण्डद्वयं नरपलं शक्रपातेन तत्पलम् ॥ एवं त्रिंशद्दिनेनैव
धातुर्मासः प्रकीर्तितः ॥ ८७ ॥ अब्दो द्वादशभिर्मासैरेवं तस्य शतायुषः ॥ ब्रह्मणः पतनेनैव निमेषाच्छ्रीहरेरपि ॥ ८८ ॥ धातुः पातानुसारेण
वैकुण्ठे न दिवानिशम् ॥ तत्र सूर्यगतिर्नास्ति चैवं गोलोकतः स्मृतः ॥ ८९ ॥ वैकुण्ठवासिनः सर्वे न वै जानन्त्यहर्निशम्
॥ चन्द्रस्यापि ग्रहाणां च गतिर्नास्ति च तत्र वै ॥ ९० ॥ चक्रं नैव भ्रमत्यत्र राशीनामिच्छया हरेः ॥ दिनं च तेजसा दीप्तं कृष्णस्य
परमात्मनः ॥ ९१ ॥ नक्तं तेजोविहीनं च हरौ च मन्दिरं गते ॥ एवं कालगतिस्तत्र विष्णुलोकेऽस्ति संततम् ॥९२॥ कालस्व

रूपो भगवान्परमात्मा निराकृतिः ॥ चन्द्रसूर्यगतिर्नास्ति पातालेषु च सप्तषु ॥९३॥ तद्वासिनश्च जानन्ति शङ्कन्ते न दिवानिश
म् ॥ दिने च मूर्ध्नि नागानां मणिर्ज्वलति नित्यशः॥९४॥ संध्यायां दीप्तमग्निश्च रात्रिश्च तमसाऽऽवृता ॥ कालं ताम्रीप्रमाणेन जान
न्ति तन्निवासिनः ॥ ९५ ॥ यथा भुवि तथा तत्र परिमाणं प्रकीर्तितम् ॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् ॥ ९६ ॥ दिव्यै
र्द्वादशसाहस्रैर्वत्सरैश्चापि तन्मितम् ॥ अष्टौ शतान्यप्यधिकं सहस्राणां चतुष्टयम् ॥९७॥ दिव्यैर्वर्षैः कृतयुगं कालविद्भिर्निरूपितम् ॥
अष्टाविंशत्सहस्राण्यप्यधिकं परिमाणकम् ॥ ९८ ॥ लक्षाणां च सप्तदशं नृमानं परिकीर्तितम् ॥ अधिकं षट्शतान्येव सहस्राणां
शतं तथा ॥ ९९ ॥ दिव्यैर्वर्षैश्च त्रेतेति वत्स कालविदो विदुः ॥ षण्णवतिसहस्राणि लक्षैर्द्वादशभिः सह ॥१००॥ नृणां वर्षैश्च त्रेतेति
कालविद्भिः प्रकीर्त्तितः ॥ चतुष्टयं शतानां चाप्यधिकं द्विसहस्रकम् ॥ १ ॥ वर्षं दिव्यं द्वापरं च कालज्ञैः परिकीर्तितम् ॥ चतुःषष्टि
सहस्राणि लक्षैरष्टभिरेव च ॥ २॥ नृणां वर्षैर्द्वापरं च कालज्ञैः परिकीर्तितम् ॥ अधिकं द्विशतं चैव दिव्यं वर्षसहस्रकम् ॥ ३ ॥ ए
वंमितं कलियुगं वत्स प्राज्ञैर्निरूपितम् ॥ द्वात्रिंशच्च सहस्रं च चतुर्लक्षं नृमानकम् ॥४॥ वर्षं चेति कलियुगे चकार कालकोविदः ॥
लक्षैर्द्विचत्वारिंशद्भिः सह विंशत्सहस्रकैः ॥ नृमानवर्षैः कालज्ञैर्व्यक्तमेव चतुर्युगम् ॥ ५ ॥ इति ते कथितं वत्स कालसंख्यानिरू
पणम् ॥ यथाश्रुतं यथाज्ञानं गच्छ वत्स हरेः पुरम् ॥ १०६ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे उत्तरार्धे नारायण
नारदसंवादे राधोद्धवसंवादे कालनिरूपणं नाम षण्णवतितमोऽध्यायः ॥ ९६ ॥ श्रीनारायण उवाच ॥ गच्छन्तमुद्धवं
दृष्ट्वा संत्रस्ता श्रीहरेः प्रिया ॥ समुत्थायासनाच्छीघ्रं हृदयेन विदूयता ॥ १ ॥ गोपीभिः सहिता शीघ्रं समुद्विग्ना महासती ॥ ददौ
शुभाशिषं तस्मै तस्य मूर्ध्नि करं तथा ॥२॥ स्निग्धदूर्वाक्षतं शुक्लधान्यं पुष्पं च मङ्गलम् ॥ प्रेरयामास लाजांश्च फलं पर्णं तथा दधि
॥३॥ दर्पणं दर्शयामास पूर्णकुम्भं सपल्लवम्॥सफलं गन्धसिन्दूरकस्तूरीचन्दनान्वितम्॥४॥पुष्पमाल्यं प्रदीपं च रक्तगन्धं द्विजोत्तम ॥
पतिपुत्रवती साध्वी काञ्चनं रजतं तथा ॥ ५ ॥ तमुवाच महासाध्वी हितं सत्यं च मङ्गलम् ॥ संगोप्य साश्रुनेत्रं च पतितं दुःखि

ता हृदि ॥ ६ ॥ शुभं भवतु मार्गस्ते कल्याणमस्तु संततम् ॥ ज्ञानं लभ हरेः स्थानात्कृष्णस्य सुप्रियो भव ॥ ७ ॥ कृष्णभक्तिः
कृष्णदास्यं वरेषु च वरं वरम् ॥ श्रेष्ठा पञ्चविधा मुक्तेर्हरिभक्तिर्गरीयसी ॥८॥ ब्रह्मत्वादपि देवत्वादिन्द्रत्वादमरादपि ॥ अमृतात्सि
द्धिलाभाच्च हरिदास्यं सुदुर्लभम् ॥ ९ ॥ अनेकजन्मतपसा संभूय भारते द्विजः॥हरिभक्तिर्यदि लभेत्तस्य जन्म सुदुर्लभम् ॥ १० ॥
सफलं जीवनं तस्य कुर्वतः कर्मणः क्षयम् ॥ पितृणां च सहस्राणि स्वस्य मातुश्च निश्चितम् ॥११॥ मातामहानां पुंसां च शतानां
सोदरस्य च ॥ बान्धवस्यापि पत्न्याश्च गुरूणां शिष्यभृत्ययोः ॥१२॥ तत्कर्म शोभनं वत्स यच्च कृष्णे समर्पणम्॥तत्कर्म शोभनं
शुद्धं कृष्णसंतोषणं यतः ॥ १३ ॥ संकल्पसाधनं कर्म सप्रीतिविधिपूर्वकम् ॥ तदेव मङ्गलं धन्यं परिणामसुखावहम् ॥ १४ ॥ त
द्व्रतं तत्तपः सत्यं तद्भक्तिः पूजनं तथा ॥ तदुद्देश्यमनशनं केवलं दास्यकारणम् ॥ १५ ॥ समस्तपृथिवीदानं प्रादक्षिण्यं भुवस्तथा ॥
समस्ततीर्थस्नानं च समस्तं च व्रतं तपः ॥ १६ ॥ समस्तयज्ञकरणं सर्वदानफलं तथा ॥ समस्तवेदवेदाङ्गपठनं पाठनं तथा ॥१७॥
भीतस्य रक्षणं चैव ज्ञानदानं सुदुर्लभम् ॥ अतिथीनां पूजनं च शरणागतरक्षणम् ॥ १८ ॥ सर्वदेवार्चनं चैव वन्दनं जपनं मनोः ॥
भोजनं विप्रदेवनां पुरश्चरणपूर्वकम् ॥ १९ ॥ गुरुशुश्रूषणं चैव पित्रोर्भक्तिश्च पोषणम् ॥ सर्वं श्रीकृष्णदास्यस्य कलां नार्हति षोड
शीम् ॥ २० ॥ तस्मादुद्धव यत्नेन भज कृष्णं परात्परम् ॥ निर्गुणं च निरीहं च परमात्मानमीश्वरम् ॥ २१ ॥ नित्यं सत्यं परं ब्रह्म
प्रकृतेः परमीश्वरम् ॥ परिपूर्णतमं शुद्धं भक्तानुग्रहविग्रहम् ॥ २२ ॥ कर्मिणां कर्मणां साक्ष्यप्रदं निर्लिप्तमेव च ॥ ज्योतिःस्वरूपं
परमं कारणानां च कारणम् ॥ २३ ॥ सर्वस्वरूपं सर्वेशं सर्वसंपत्प्रदं शुभम् ॥ भक्तिदं दास्यदं स्वस्य निजसंपत्पदप्रदम्
॥ २४ ॥ विसृज्य ज्ञातिबुद्धिं च मात्सर्यमशुभप्रदम् ॥ भज तं परमानन्दं सानन्दं नन्दनन्दनम् ॥ २५ ॥ वेदे कौथुमिशा
खायां तस्य नाम्नां सहस्रकम् ॥ नन्दनन्दननामोक्तं कृतविघ्नसुदुर्लभम् ॥ २६ ॥ उद्धवः सर्वमाकर्ण्य परमं विस्मयं ययौ ॥ ज्ञानं
संप्राप्य संपूर्णं परिपूर्णौ बभूव ह ॥ २७ ॥ स्ववस्त्रं च गले बद्ध्वा दण्डवत्प्रणनाम ताम् ॥ मूर्ध्नः केशैश्च तत्पादं निबध्य च पुनः

पुनः ॥ २८ ॥ पुलकाञ्चितसर्वाङ्गः साश्रुनेत्रश्च भक्तितः ॥ तद्विच्छेदशुचा प्रेम्णा रुरोदोच्चैश्च नारद ॥ २९ ॥ रुरोद राधा तत्प्रेम्णा रुरोद बल्लवीगणः ॥ उद्धवस्य गलं धृत्वा स्थापयामास लोभतः ॥ ३० ॥ उद्धवं मूर्च्छितं दृष्ट्वा जृम्भितं त्यक्तचेतनम् ॥ शीघ्रमुत्थापयामास राधिका कृष्णमानसम् ॥३१॥ चेतनं कारयामास जलं दत्त्वा मुखाम्बुजे॥शुभाशिषं च प्रददौ वत्स जीवेति नारद ॥ ॥ ३२ ॥ उद्धवश्चेतनां प्राप्य तामुवाच सुसंसदि ॥ रुदतीनां च गोपीनां पुरतः परमार्थदम् ॥ ३३ ॥ उद्धव उवाच ॥ धन्यो यशस्यो द्वीपानां जम्बूद्वीपः सुदुर्लभः ॥ यत्र भारतवर्षं तु सर्वेषामीप्सितं वरम् ॥ ३४ ॥ अहो भारतवर्षे तु पुण्यं वृन्दावनं वनम् ॥ राधापादाब्जसंस्पर्शरजःपूतं सुरेप्सितम् ॥ ३५ ॥ धन्या मान्या च पृथिवी त्रिषु लोकेषु पूजिता ॥ राधायास्तीर्थपूतायाः पादाब्जरजसा वरा ॥३६॥ षष्टिवर्षसहस्राणि दिव्यानि पुष्करे पुरा ॥ ब्रह्मणा च तपस्तप्तं वेदोक्तं भक्तिपूर्वकम् ॥३७॥ गोलोके राधिकाकृष्णदर्शनार्थं मनोरथात् ॥ गोलोके राधिकाकृष्णो न दृष्टः स्वप्नतस्तदा ॥ ३८ ॥ श्रुता तेनाकाशवाणी सत्यरूपा च लीलया ॥ वाराहे भारते वर्षे पुण्ये वृन्दावने वने ॥ ३९ ॥ रासोत्सवे महारम्ये तत्रैव रासमण्डले॥द्रक्ष्यसीति च देवानां मध्ये सुस्थो न संशयः॥४०॥ श्रुत्वा च विरतो ब्रह्मा तपसः स्वगृहं गतः ॥ कृष्णो दृष्टश्च हृष्टश्च परिपूर्णमनोरथः ॥ ४१ ॥ गोपानां गोपिकानां च सफलं जन्म जीवनम् ॥ नित्यं पश्यन्ति ते पादपद्मं ब्रह्मादिदुर्लभम् ॥४२॥ मानिनीं राधिकां सन्तः सदा सेवन्ति नित्यशः॥योगीन्द्राश्च मुनीन्द्राश्च सिद्धेन्द्रा वैष्णवास्तथा ॥ ४३ ॥ सतीं पुण्यां तीर्थपूतां स्वतः शुद्धां सुदुर्लभाम् ॥ सुलभं यत्पदाम्भोजं ब्रह्मादीनां सुदुर्लभम् ॥ ॥४४॥ यत्पादपद्मनखरं कृतं यावकचिह्नितम् ॥ सर्वेश्वरेश्वरेणैव कृष्णेन परमात्मना ॥४५॥ चकार यस्याः पूजां च स्तोत्रराजं सुदुर्लभम् ॥ शतशृङ्गे स्वयं कृष्णो गोलोके रासमण्डले ॥४६॥ पारिजातप्रसूनानामञ्जलिं गन्धचन्दनम्॥ददौ दूर्वाक्षतं स्निग्धं यस्याः पादारविन्दयोः ॥ ४७ ॥ त्रिंशत्सहस्रकोटीनां गोपीनामीश्वरी च या ॥ तत्पट्त्रिंशत्सखीनां च ईश्वरी राधिकाभिधा ॥ ४८ ॥ ये वा द्विषन्ति निन्दन्ति पापिनश्च हसन्ति च॥कृष्णप्राणाधिकां देवदेवीं च राधिकां वराम् ॥४९॥ ब्रह्महत्याशतं ते च लभन्ते नात्र

संशयः ॥ तत्पापेन च पच्यन्ते कुम्भीपाके च रौरवे ॥९०॥ तप्ततैले महाघोरे ध्वान्ते कीटे च यन्त्रके ॥ चतुर्दशेन्द्रावच्छिन्नं पितृभिः
सप्तभिः सह ॥ ९१ ॥ ततः परं च जायेत जन्मैकं लोकजन्मतः ॥ दिव्यं वर्षसहस्रं च विष्ठाकीटाश्च पापतः ॥ ९२ ॥ पुंश्चलीनां
योनिकीटास्तद्रक्तमलभक्षकाः ॥ मलकीटाश्च तन्मानवर्षं च पूयभक्षकाः ॥ ९३ ॥ वेदे च काण्वशाखायामित्याह कमलोद्भवः ॥
इत्युक्तवन्तं तं यान्तमुवाच राधिका पुनः ॥ रुदन्तं च रुदन्ती सा कृष्णविच्छेदकातरा ॥ ९४ ॥ राधिकोवाच ॥ गच्छ वत्स
मधुपुरीं सर्वं बोधय माधवम् ॥ ९५ ॥ यथा पश्यामि गोविन्दं प्रयत्नेन तथा कुरु ॥ निष्फलं च गतं जन्म गच्छ मिथ्यादुराशया ॥९६॥
आशा हि परमं दुःखं नैराश्यं परमं सुखम् ॥ पश्चाद्विचिन्त्य गोविन्दं जीवन्मुक्ता बभूव सा ॥९७॥ इत्युक्त्वा राधिका
तत्र रुरोद च भृशं पुनः ॥ प्रणम्य तां रुदन्तीं च यशोदाभवनं ययौ ॥९८॥ अथोद्धवे गते राधा मूर्च्छां संप्राप नारद॥तत्याज चेतनां
शश्वद्बभूव ध्यानतत्परा ॥९९॥ पङ्कस्थे पङ्कजदले सजले शयने मुने ॥ गोप्यस्तां स्थापयामासुः साश्रुनेत्रोत्पला वराः ॥ ६० ॥
तत्स्पर्शमात्राच्छयनं भस्मीभूतं बभूव ह ॥ पुनः स्निग्धस्थले स्निग्धनिचोले चन्दनाङ्किते ॥ ६१ ॥ पुनस्तां स्थापयामासुर्विरहज्वरकातराम् ॥
सहसा शुष्कतां प्राप सुगन्धि चन्दनोदकम् ॥६२॥ निमेषेण शतयुगं तद्बभूवोद्धवं विना ॥ हाहोद्धवोद्धव हरिं शीघ्रं
गत्वा वदेति च ॥६३॥ समानय हरिं शीघ्रं मत्प्राणेश्वरमित्यपि ॥ इत्युक्तवचनां दीनां संतापहतचेतनाम् ॥ ६४ ॥ रुरुदुर्गोपिकाः
सर्वा राधां कृत्वा स्ववक्षसि ॥ चेतनां कारयामासुर्बोधयामासुरीप्सितम् ॥ ६५ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड
उत्तरार्धे नारायणनारदसंवादे राधोद्धवसंवादे सप्तनवतितमोऽध्यायः ॥ ९७ ॥ श्रीनारायण उवाच ॥ अथोद्धवो यशोदां च प्रणम्य
त्वरया मुदा ॥ खर्जूरकाननं वामे कृत्वा च यमुनां ययौ ॥१॥ स्नात्वा भुक्त्वा च तत्रैव जगाम मथुरां पुनः ॥ ददर्श वटमूले च गोविन्दं
रहसि स्थितम्॥२॥ प्रफुल्लोऽप्युद्धवं दृष्ट्वा सस्मितं तमुवाच सः ॥ रुदन्तं शोकदग्धं च साश्रुनेत्रं च कातरम् ॥ ३॥ श्रीभगवानुवाच ॥
आगच्छोद्धव कल्याण राधा जीवति जीवति ॥ कल्याणयुक्ता गोप्यश्च जीवन्ति विरहज्वरात् ॥४ ॥ शुभं गोपशिशूनां च वत्सानां

च गवामपि ॥ माता मे पुत्रविरहाद्यशोदा कीदृशी च सा॥५॥वद बन्धो यथार्थं तत्त्वां दृष्ट्वा किमुवाच सा ॥ त्वयोक्ता जननी किं वा
पुनः सा किमुवाच माम् ॥६॥ दृष्टं तद्यमुनाकूलं पुण्यं वृन्दावनं वनम् ॥ निर्जनोपवनौघैश्च सुरम्यं रासमण्डलम्॥७॥ रम्यं कुञ्जकुटीरौ
घै रम्यं क्रीडासरोवरम् ॥ पुष्पोद्यानं विकसितं संकुलं च मधुव्रतैः ॥८॥ भाण्डीराख्यो वटो दृष्टः सुस्निग्धो बालकान्वितः ॥ दृष्टो
गोष्ठो गवां दृष्टं गोकुलं गोकुलव्रजम् ॥९॥ यदि जीवति राधा सा दृष्ट्वा त्वां किमुवाच माम् ॥ तत्सर्वं वद हे बन्धो चांदोलयति
मे मनः ॥१०॥ किमूचुर्गोपिकाः सर्वाः किमूचुर्गोपबालकाः ॥ गोपाश्च वृद्धाः किं वोचुर्वयस्या जनकस्य मे ॥११॥ बलदेवस्य जननी
किमूचे रोहिणी सती ॥ किमूचुरपरास्तात बन्धुवल्लभबल्लवाः ॥१२॥ किं भुक्तं किमपूर्वं वा दत्तं मात्रा च राधया ॥ कीदृग्वाक्यं सुम
धुरं संभाषा कीदृशीति च ॥ १३ ॥ गोपानां गोपिकानां च शिशूनां मातुरेव च ॥ राधायाश्चापि कीदृग्वा मयि प्रेमोद्भवाधिकम् ॥
॥ १४ ॥ मां च स्मरति माता मे मां च स्मरति रोहिणी ॥ मां च स्मरति सा राधा मत्प्रेमविरहाकुला ॥ १५ ॥ मां च स्मरन्ति
गोप्यश्च गोपाश्च गोपबालकाः ॥ भाण्डीरे वटमूले च बालाः क्रीडन्ति मां विना ॥ १६ ॥ दत्तमन्नं ब्राह्मणीभिर्यत्र भुक्तं सुधोपमम्
प्रमदाबालकैः सार्द्धं यत्तद्दृष्टं परीप्सितम्॥१७॥इन्द्रयागस्थलं दृष्टं दृष्टो गोवर्धनो वरः ॥ ब्रह्मणा च हृता गावो यत्र तद्दृष्टमुत्तमम् ॥
॥ १८ ॥ श्रीकृष्णस्य वचः श्रुत्वा शोकोक्तं मधुरान्वितम् ॥ उद्धवः समुवाचेदं भगवन्तं सनातनम् ॥ १९ ॥ उद्धव उवाच ॥
यद्यदुक्तं त्वया नाथ सर्वं दृष्टं यथेप्सितम् ॥ सफलं जीवनं जन्म कृतमत्रैव भारते ॥२०॥ दृष्टं भारतसारं च पुण्यं वृन्दावनं वनम् ॥
तत्सारं व्रजभूमौ च सुरम्यं रासमण्डलम् ॥२१॥ तत्सारभूता गोलोकवासिन्यो गोपिका वराः ॥ दृष्टा तत्सारभूता च राधा रासेश्वरी
परा ॥२२॥ कदलीवनमध्ये च निर्जने सुहृदस्थले ॥ पङ्कस्थे पङ्कजदले सजले चंदनार्चिते ॥ २३ ॥ शयनेऽतिविषण्णा सा रत्नभूषण
वर्जिता ॥ अतीव मलिना क्षीणाऽऽच्छादिता शुक्लवाससा ॥२४॥ सेविता सखिभिस्तत्र सततं श्वेतचामरैः ॥ कृशोदरी निराहारा क्षणं
श्वसिति च क्षणम् ॥२५॥ क्षणं जीवति किं सा वा विरहज्वरपीडिता ॥ किं वा जलं स्थलं किं वा नक्तं किं वा दिनं हरे ॥ २६ ॥

परं पशुं न जानाति किं परं कः सुबान्धवः ॥ बाह्यज्ञानविरहिता ध्यायमाना पदं तव ॥ २७ ॥ त्रैलोक्ये यशसा भाति तन्मृ
त्युर्यशसंभवः ॥ स्त्रीहत्यां नैव वाञ्छन्ति ज्ञानहीनाश्च दस्यवः ॥ २८ ॥ गच्छ शीघ्रं जगन्नाथ कदलीवनमीप्सितम् ॥ बहिर्भूता न
जगतां सा राधा त्वत्परायणा ॥ २९ ॥ अतीव भक्ता न त्याज्या प्रभुणा रक्षिता सदा ॥ न हि राधापरा भक्ता न भूता न भविष्यति
॥ ३० ॥ मन्मथः शंकराद्भीतो भवांश्च तत्पुरःसरः ॥ भवद्विधं पतिं प्राप्य कामदग्धा च राधिका ॥ ३१ ॥ तस्मात्सर्वपरं कर्म तच्च के
नापि वार्यते ॥ मधुर्दहति चन्द्रश्च सततं किरणेन च ॥ ३२ ॥ शश्वत्सुगन्धिवायुश्चाप्यनाथा सर्वपीडिता ॥ तप्तकाञ्चनवर्णाभा साऽधुना
कज्जलोपमा ॥३३॥ सुवर्णवर्णकेशी च वासोवेषविवर्जिता ॥ स्वयं विधाता त्वद्भक्तः सुराणां प्रवरो विभुः ॥ त्वद्भक्तः शंकरो देवो यो
गीन्द्राणां गुरोर्गुरुः ॥ ३४ ॥ सनत्कुमारस्त्वद्भक्तो गणेशो ज्ञानिनां वरः ॥ मुनीन्द्राश्च कतिविधास्त्वद्भक्ता धरणीतले ॥३५॥ त्वद्भक्ता
यादृशी राधा न भक्तस्तादृशोऽपरः ॥ ध्यायते यादृशी राधा स्वयं लक्ष्मीर्न तादृशी ॥ ३६ ॥ हरिरायाति चेत्येवं राधाग्रे स्वीकृतं
मया ॥ शीघ्रं गच्छ महाभाग तदेव सार्थकं कुरु ॥ ३७ ॥ उद्धवस्य वचः श्रुत्वा जहासोवाच माधवः ॥ वेदोक्तं कथयामास सहितं
सत्यसुव्रतम् ॥ ३८ ॥ श्रीभगवानुवाच ॥ स्त्रीषु नर्मविवाहेषु वृत्त्यर्थे प्राणसंकटे ॥ गवामर्थे ब्राह्मणार्थे नानृतं स्याज्जुगुप्सि
तम् ॥ ३९ ॥ तत्स्वीकारविहीनेन कुतस्त्वं नरकः कुतः ॥ गोलोकं याति मद्भक्तो नरकं न हि पश्यति ॥ ४० ॥ त्वदङ्गीकारसाफ
ल्यं करिष्यामि तथाऽपि च ॥ यास्यामि स्वप्ने तन्मूलं गोपीनां मातुरेव च ॥ ४१ ॥ इत्याकर्ण्य ययौ गेहमुद्धवश्च महायशाः ॥ हरि
र्जगाम स्वप्ने च गोकुलं विरहाकुलम् ॥ ४२ ॥ स्वप्ने राधां समाश्वास्य दत्त्वा ज्ञानं सुदुर्लभम् ॥ संतोष्य क्रीडया तां च गोपिकाश्च
यथोचितम् ॥ ४३ ॥ बोधयित्वा यशोदां च स्तनं पीत्वा च निद्रिताम् ॥ गोपान्गोपशिशूंश्चैव बोधयित्वा ययौ पुनः ॥ ४४ ॥
इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे अष्टनवतितमोऽध्यायः ॥ ९८ ॥ श्रीनारायण
उवाच ॥ एतस्मिन्नन्तरे गर्गो वसुदेवाश्रमं ययौ ॥ दण्डी छत्री च जटिलो दीप्तश्च ब्रह्मतेजसा ॥ १ ॥ शुक्लयज्ञोपवीती च तप

स्वी संयतः सदा ॥ शुक्लदन्तः शुक्लवासा यदोः कुलपुरोहितः ॥ २ ॥ तं दृष्ट्वा सहसोत्थाय देवकी प्रणानाम च ॥ वसुदेवश्च भक्त्या च रत्नसिंहासनं ददौ ॥ ३ ॥ मधुपर्कं कामधेनुं वह्निशुद्धांशुकं तथा ॥ दत्त्वा गन्धं पुष्पमाल्यं पूजयामास भक्तितः ॥ ४ ॥ मिष्टान्नं परमान्नं च पिष्टकं मधुरं मधु ॥ भोजयामास यत्नेन तांबूलं वासितं ददौ ॥ ५ ॥ प्रणम्य कृष्णं मनसा सबलं तं विलोक्य च ॥ उवाच वसुदेवं च देवकीं च पतिव्रताम् ॥ ६ ॥ गर्ग उवाच ॥ वसुदेव निबोधेदं सबलं पश्य पुत्रकम् ॥ उपनीतोचितं शुद्धं वयसा साम्प्रतं वरम् ॥ ७ ॥ वसुदेव उवाच ॥ शुभक्षणं कुरु गुरो यदूनां पूज्यदैवत ॥ उपनीतोचितं शुद्धं प्रशस्यं च सतामपि ॥ ८ ॥ गर्ग उवाच ॥ सर्वेभ्यो बान्धवेभ्योऽपि देह्यामन्त्रणपत्रिकाम् ॥ संभारं कुरु यत्नेन वसुदेव वसूपम ॥ ९ ॥ परश्वः शुभमेवास्ति चोपनेतुमिहार्हसि ॥ दिनं सतामपि मतं विशुद्धं चन्द्रतारयोः ॥ १० ॥ गर्गस्य वचनं श्रुत्वा वसुदेवो वसूपमः ॥ प्रस्थापयामास सर्वान्बन्धून्मङ्गलपत्रिकाम् ॥ ११ ॥ घृतकुल्यां दुग्धकुल्यां दधिकुल्यां मनोहराम् ॥ मधुकुल्यां गुडकुल्यां प्रचकार समन्वितः ॥ १२ ॥ राशिं नानोपहाराणां मणिरत्नं सुवर्णकम् ॥ नानालंकारवस्त्रं च मुक्तामाणिक्यहीरकम् ॥ १३ ॥ श्रीकृष्णो देववर्गांश्च मुनीन्द्रसिद्धपुंगवान् ॥ सस्मार मनसा भक्त्या भक्तश्च भक्तवत्सलः ॥ १४ ॥ शुभे दिने च संप्राप्ते ते च सर्वे समाययुः ॥ मुनीन्द्रा बान्धवा देवा राजानो बहुशस्तथा ॥ १५ ॥ देवकन्या नागकन्या राजकन्याश्च सर्वशः ॥ विद्याधर्यश्च गन्धर्वाश्चाययुर्वाद्य भाण्डकाः ॥ १६ ॥ ब्राह्मणा भिक्षुका भट्टा यतयो ब्रह्मचारिणः ॥ संन्यासिनश्चावधूता योगिनश्च समाययुः ॥ १७ ॥ स्त्रीबान्धवाः स्वबंधूनां वर्गा मातामहस्य च ॥ बन्धूनां बान्धवाः सर्वे स्वाययुः शुभकर्मणि॥१८॥भीष्मो द्रोणश्च कर्णश्चाप्यश्वत्थामा कृपो द्विजः॥ सपुत्रो धृतराष्ट्रश्च सभार्यश्च समाययौ ॥ १९ ॥ कुन्ती सपुत्रा विधवा हर्षशोकसमाप्लुता ॥ नानादेशोद्भवा योग्या राजानो राजपुत्रकाः ॥२०॥ अत्रिर्वसिष्ठश्च्यवनो भरद्वाजो महातपाः ॥ याज्ञवल्क्यश्च भीमश्च गार्ग्यो गर्गो महातपाः ॥२१॥ वत्सः सपुत्रश्च धर्मो जैगीषव्यः पराशरः ॥ पुलहश्च पुलस्त्यश्चाप्यगस्त्यश्चापि सौभरिः ॥ २२ ॥ सनकश्च सनन्दश्च तृतीयश्च सनातनः ॥ सनत्कुमारो

भगवान्वोढुः पञ्चशिखस्तथा ॥२३॥ दुर्वासाश्चाङ्गिरा व्यासो व्यासपुत्रः शुकस्तथा ॥ कुशिकः कौशिको राम ऋष्यशृङ्गो विभाण्डकः
॥२४॥ शृङ्गी च वामदेवश्च गौतमश्च गुणार्णवः ॥ क्रतुर्यतिश्चारुणिश्च शुक्राचार्यों बृहस्पतिः ॥२५॥ अष्टावक्रो वामनश्च वाल्मीकिः
पारिभद्रकः ॥ पैलो वैशम्पायनश्च प्रचेताः पुरुजित्तथा ॥ २६ ॥ भृगुर्मरीचिर्मधुजित्कश्यपश्च प्रजापतिः ॥ अदितिर्देवमाता च दिति
दैंत्यप्रसूस्तथा ॥ २७ ॥ सुमन्तुश्च सुभानुश्च एकः कात्यायनस्तथा ॥ मार्कण्डेयो लोमशश्च कपिलश्च पराशरः ॥ २८ ॥ पाणिनिः
पारियात्रश्च पारिभद्रश्च पुंगवः ॥ संवर्तश्चाप्युतथ्यश्च नरोऽहं चापि नारद ॥२९॥ विश्वामित्रः शतानन्दो जाबालिस्तैतिलस्तथा ॥
सान्दीपिनिश्च ब्रह्मांशो योगिनां ज्ञानिनां गुरुः ॥ ३० ॥ उपमन्युर्गौरमुखो मैत्रेयश्च श्रुतश्रवाः ॥ कठः कचश्च करखो भरद्वाजश्च
धर्मवित् ॥ ३१ ॥ सशिष्या मुनयः सर्वे वसुदेवाश्रमं ययुः ॥ वसुदेवश्च तान्दृष्ट्वा ववन्दे दण्डवद्भुवि ॥ ३२ ॥ अथास्मिन्नन्तरे ब्रह्मा
सस्मितो हंसवाहनः ॥ रत्ननिर्माणयानेन पार्वत्या सह शंकरः ॥ ३३ ॥ नन्दी स्वयं महाकालो वीरभद्रः सुभद्रकः ॥ मणिभद्रः
पारिभद्रः कार्त्तिकेयो गणेश्वरः ॥ ३४ ॥ गजेन्द्रेण महेन्द्रश्च धर्मश्चन्द्रो रविस्तथा कुबेरो ॥ वरुणश्चैव पवनो वह्निरेव च ॥३५॥ यमः
संयमिनीनाथो जयन्तो नलकूबरः ॥ सर्वे ग्रहाश्च वसवो रुद्राश्च सगणास्तथा ॥३६॥ आदित्याश्च तथा शेषो नानादेवाः समाययुः॥
वसुदेवश्च भक्त्या च ववन्दे शिरसा भुवि॥३७॥तुष्टाव परया भक्त्या देवेन्द्रांश्च तथा सुरान्॥भक्तिनम्रात्ममूर्धा च पुलकाञ्चितविग्रहः
॥ ३८ ॥ वसुदेव उवाच ॥ परं ब्रह्म परं धाम परमेशः परात्परः ॥ स्वयं विधाता मद्गेहे जगतां परिपालकः ॥ ३९ ॥
वेदानां जनकः स्रष्टा सृष्टिहेतुः सनातनः ॥ सुराणां च मुनीन्द्राणां सिद्धेन्द्राणां गुरोर्गुरुः ॥४०॥ स्वप्ने यत्पादपद्मं च क्षणं द्रष्टुं सुदुर्लभम्
॥ शिवस्मरणमात्रेण सर्वानिष्टाः पलायिताः ॥४१॥ सर्वसंकटमुत्तीर्य कल्याणं लभते नरः ॥ सर्वाग्रे पूजनं यस्य देवानामग्रणीः
परः ॥ ४२ ॥ घटेषु मङ्गलं मन्त्रैर्भक्त्या चावाहनेन च ॥ स्वयं गणेशो भगवान् साक्षाद्विघ्नविनाशकः ॥४३॥ कार्त्तिकेयश्च भगवान्देवादीनां
च पूजितः ॥ देवानां प्रवरा पूज्या महालक्ष्मीः परात्परा ॥ ४४ ॥ मद्गेहे पार्वती माता जगतामादिरूपिणी ॥ सर्वशक्ति

स्वरूपा च मूलप्रकृतिरीश्वरी ॥४५॥ परापराणां परमा परब्रह्मस्वरूपिणी ॥ यस्याः पादौ समाराध्य वाञ्छितं लभते नरः ॥४६॥
शरत्काले च भक्त्या च सा साक्षान्मम मन्दिरे ॥ सर्वदेवैश्च सहिता सगणा भक्तवत्सला ॥४७॥ कृपामयी च कृपया चाविर्भूता च
भारते ॥ धन्योऽहं कृतकृत्योऽहं सफलं जीवनं मम ॥४८॥ आगताऽसि यतो दुर्गे परमाद्या च मद्गृहम् ॥ एवं सर्वांश्च तुष्टाव क्रमेण
च परस्परम् ॥४९॥ सर्वान्मुनीन्द्रान्विप्रांश्च गले बद्ध्वांऽशुकं मुदा ॥ प्रत्येकं वासयामास रत्नसिंहासने वरे ॥५०॥ पूजयामास विधि
वत्क्रमेण च पृथक्पृथक् ॥ प्रत्येकं वरयामास ब्रह्मादींश्च सुरानपि ॥ ५१ ॥ मुनिवर्गान्ब्राह्मणांश्च भक्त्या गर्गं पुरोहितम् ॥ रत्नैः
प्रवालैर्मणिभिर्मुक्तामाणिक्यहीरकैः ॥५२॥ भूषणैर्वसनैश्चैव माल्यैश्च गन्धचन्दनैः ॥ रत्नसिंहासने रम्ये सर्वेषां मध्यदेशतः ॥५३॥
गणेशं वरयामास पूजार्थं शुभकर्मणि ॥ सप्ततीर्थोदकेनैव सुवर्णकलशेन च ॥ ५४ ॥ पुष्पचन्दनयुक्तेन शीतेन वासितेन च ॥
स्वर्गगङ्गाजलेनैव पुष्करोदकपुण्यतः ॥ ५५ ॥ पञ्चामृतेन शुद्धेन पञ्चगव्येन भक्तितः ॥ हेरम्बं स्नापयामास समुद्रोदेन
मन्त्रतः ॥ ५६ ॥ वरयामास माल्येन पारिजातस्य नारद ॥ रत्नेन्द्रभूषणेनैव वह्निशुद्धेन वाससा ॥ ५७ ॥ गन्धचन्दनपुष्पैश्च
रत्नमाल्यांगुलीयकम् ॥ तुष्टाव पार्वतीपुत्रं सर्वदेवाधिपं शुभम् ॥ विघ्ननिघ्नकरं शान्तं भगवन्तं सनातनम् ॥ ५८ ॥
इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे उत्तरार्धे नारायणनारदसंवादे भगवदुपनयने गणेशाभिषेके नवनवति
तमोऽध्यायः ॥ ९९ ॥ श्रीनारायण उवाच ॥ अथादितिर्दितिश्चैव देवकी रोहिणी रतिः ॥ सरस्वती च सावित्री यशोदा
च पतिव्रता ॥ १ ॥ लोपामुद्राऽरुन्धती च अहल्या तारका तथा ॥ ययुस्ताः पार्वतीं द्रष्टुं वेगेन मन्दिरादपि ॥ २ ॥ परस्परं च
संभाष्य समाश्लिष्य पुनःपुनः ॥ प्रणम्य वेशयामासुर्मन्दिरं रत्ननिर्मितम् ॥ ३ ॥ रत्नसिंहासने रम्ये वासयामासुरीश्वरीम् ॥
वरयामास माल्येन वाससा रत्नभूषणैः ॥ ४ ॥ पारिजातस्य पुष्पं च शक्रानीतं मनोहरम् ॥ ददौ तत्पादपद्मे च देवकी भक्ति
पूर्वकम् ॥ ५॥ सिन्दूरबिन्दुं सीमन्ते भाले चन्दनबिन्दुकम् ॥ कस्तूरीकुङ्कुमादींश्च प्रददौ परितस्तयोः ॥६॥ मिष्टान्नं भोजयामास

शीततोयं सुवासितम् ॥ ताम्बूलं च वरं रम्यं कर्पूरादिसुवासितम् ॥ ७ ॥ अलक्तकं च प्रददौ नखेषु पादपद्मयोः ॥ कुंकुमस्यापि रागं च सिषेवे श्वेतचामरैः ॥ ८ ॥ संपूज्य पार्वतीं देवीं मुनिपत्नीः क्रमेण च ॥ पूजयामास विधिवत्पतिपुत्रवतीः सतीः ॥ ९ ॥ राजकन्या देवकन्या नागकन्या मनोहराः ॥ मुनिकन्या बन्धुकन्याः पूजयामास सुव्रत ॥ १० ॥ वाद्यं नानाविधं रम्यं वादयामास कौतुकात् ॥ मङ्गलं कारयामास भोजयामास ब्राह्मणान् ॥ ११ ॥ भैरवीं पूजयामास मथुराग्रामदेवताम् ॥ उपचारैः षोडशभिः षष्ठीं मङ्गलचण्डिकाम् ॥ १२ ॥ पुण्यं स्वस्त्ययनं शुद्धं कारयामास मङ्गलम् ॥ वेदांश्च पाठयामास वसुदेवस्य वल्लभा ॥१३॥ स्वर्गङ्गासुजलेनैव सुवर्णकलशेन च ॥ स्नापयामास सबलं श्रीकृष्णं पुत्रवत्सला ॥ १४ ॥ वस्त्रचन्दनमाल्यैश्च तयोर्वेषं चकार सा ॥ रत्नेन्द्रसारनिर्माणभूषणैश्च मनोहरैः ॥१५॥ मातृभूषणभूषाढ्यः सबलः कृष्ण एव च ॥ आययौ च सभां देवमुनीन्द्राणां च नारद ॥ १६ ॥ दृष्ट्वा तं जगतां नाथमुत्तस्थौ प्रजवेन च ॥ स्वयं विधाता शंभुश्च शेषो धर्मश्च भास्करः ॥ १७ ॥ देवाश्च मुनयश्चैव कार्त्तिकेयो गणेश्वरः ॥ पृथक्पृथक् क्रमेणैव तुष्टाव परमेश्वरम् ॥ १८ ॥ ब्रह्मोवाच ॥ नाथानिर्वचनीयोऽसि भक्तानुग्रहविग्रहः ॥ वेदानिर्वचनीयं च कस्त्वां स्तोतुमिहेश्वरः ॥ १९ ॥ श्रीमहादेव उवाच ॥ देहेषु देहिनं शश्वत्स्थितं निर्लिप्तमेव च ॥ कर्मिणां कर्मणां शुद्धं साक्षिणं साक्षतं विभुम् ॥ किं स्तौमि रूपशून्यं च गुणशून्यं च निर्गुणम् ॥ २० ॥ अनन्त उवाच ॥ किं वा जानाम्यहं नाथ त्वामज्ञोऽनन्तमीश्वरम् ॥२१॥ अनन्तकोटिब्रह्माण्डकारणं दुःखतारणम् ॥ महाविष्णोश्च लोम्नां च विवरेषु जलेषु च ॥२२॥ सन्ति विश्वान्यसंख्यानि चित्राणि कृत्रिमाणि च ॥ सन्ति सन्तश्च देवाश्च ब्रह्मविष्णुशिवात्मकाः ॥ २३ ॥ त्वदंशाः प्रतिबिम्बेषु तीर्थानि भारतं तथा ॥ ब्रह्माण्डैकस्थितोऽहं च सूक्ष्मनागस्वरूपकः ॥२४॥ स्थापितश्च त्वया कूर्मे गजेन्द्रे मशको यथा ॥ परमाणुपरं सूक्ष्मं विश्वेषु नास्ति कुत्रचित् ॥ २५ ॥ महाविष्णोः परं स्थूलं समो नास्ति च कुत्रचित् ॥ महाविष्णोः परस्त्वं च त्वत्परो नास्ति कश्चन ॥ २६ ॥ स्थूलात्स्थूलतरो देवः सूक्ष्मात्सूक्ष्मतमो महान् ॥ आधारश्च महाविष्णो जलरूपो भवान्स्वयम् ॥ २७ ॥ जलाधारो हि

गोलोकस्त्वं च स्थावररूपधृक् ॥ सर्वाधारो महान्वायुः श्वासनिःश्वासरूपकः ॥ २८ ॥ भक्तानुग्रहदेहस्य नित्यस्य भवतो विभो॥
वक्त्रैर्बहुतरैर्वाऽथ त्वया दत्तैः पुरैव च ॥ स्तोतुमिच्छामि त्वद्योगं न दत्तं ज्ञानमैश्वरम् ॥ २९ ॥ देवा ऊचुः ॥ त्वामनन्तं
यदि स्तोतुं देवोऽनन्तो न हीश्वरः ॥ ३० ॥ न हि स्वयं विधाता च न हि ज्ञानात्मकः शिवः ॥ सरस्वती जडीभूता किं कुर्मः स्त
वनं वयम् ॥ ३१ ॥ मुनीन्द्रा ऊचुः ॥ वेदा न शक्ताः स्तोतुं चेत्त्वां चैव ज्ञातुमीश्वरम् ॥ वयं वेदविदः सन्तः किं कुर्मः स्तवनं तव
॥३२॥ इदं स्तोत्रं महापुण्यं देवैश्च मुनिभिः कृतम् ॥ यः पठेत्संयतः शुद्धः पूजाकाले च भक्तितः ॥ ३३ ॥ इह लोके सुखं भुक्त्वा
लब्ध्वा ज्ञानं निरञ्जनम् ॥ रत्नयानं समारुह्य गोलोकं स च गच्छति ॥ ३४ ॥ इति श्रीब्रह्मवैवर्तें महापुराणे श्रीकृष्ण
जन्मखण्ड उत्तरार्धें नारायणनारदसंवादे भगवदुपनयने शततमोऽध्यायः ॥ १०० ॥ श्रीनारायण उवाच ॥ संस्तूय देवा
मुनयो विरेमुश्चैव मानसे ॥ ददृशुः प्राङ्गणे कृष्णं शोभितं पीतवाससा ॥ १ ॥ यथा सौदामिनीयुक्तं नवीनजलदं मुने ॥ बक
पङ्क्तियुतं चैव मालतीमालया तथा॥२॥कपाले मण्डलाकारकस्तूरीयुक्तचन्दनम् ॥ सकलङ्कं मृगाङ्कं च शोभितं जलदे तथा ॥ ३ ॥
द्विभुजं श्यामलं कान्तं राधाकान्तं मनोहरम् ॥ ईषद्धास्यप्रसन्नास्यं भक्तानुग्रहविग्रहम् ॥४॥ रत्नकेयूरवलयरत्नमञ्जीररंजितम् ॥ रुदन्तं
पितुरुत्सङ्गे बलेन सहितं परम् ॥५॥ अथ मङ्गलकाले च शुभलग्ने मनोरमे ॥ संवीक्षिते ग्रहैः सौम्यैर्जांग्रह्लग्नाधिपे स्थिते ॥ ६ ॥
असद्ग्रहैरदृष्टे च सद्ग्रहेक्षित एव च ॥ शुभकर्मसमारंभं स्वस्तिवाचनपूर्वकम् ॥ ७ ॥ चकार वसुदेवश्चाप्याज्ञया सुरविप्रयोः ॥ दत्त्वा
सुवर्णशतकं ब्राह्मणाय च सादरम्॥८॥देवेन्द्रांश्च मुनींद्रांश्च नमस्कृत्य पुरोहितम् ॥ गणेशं च दिनेशं च वह्निं च शंकरं शिवम्॥९॥
संपूज्य देवषट्कं च साक्षतैर्देवसंसदि ॥ उपचारैः षोडशभिः संयतो भक्तिपूर्वकम् ॥ १० ॥ पुत्राधिवासनं चक्रे वेदमन्त्रेण संसदि ॥
संपूज्य नानादेवांश्च दिक्पालांश्च नवग्रहान् ॥ ११ ॥ दत्त्वा पञ्चोपचारांश्च भक्त्या षोडश मातृकाः ॥ दत्त्वा च वसुधारां च सतवा
रान्घृतेन च ॥१२॥ चेदिराजं वसुं नत्वा संपूज्य प्रययौ पुनः ॥ वृद्धिश्राद्धं सुनिर्वाप्य यत्किंचिद्दैविकं तथा ॥ १३ ॥ यज्ञं कृत्वा

तु वेदोक्तं यज्ञसूत्रं ददौ मुदा ॥ बलदेवाग्रजायैव कृष्णाय परमात्मने ॥ १४ ॥ गायात्रीं च ददौ ताभ्यां मुनिः सान्दीपिनिस्तथा ॥ भिक्षां ददौ च प्रथमं पार्वती परमादरात् ॥ १५ ॥ अमूल्यरत्नपात्रस्थं मुक्तामाणिक्यहीरकम् ॥ हीरसारविनिर्माणं पित्रा दत्तं च हारकम् ॥ १६ ॥ शुभाशिषं च प्रददौ शुक्लपुष्पेण दूर्वया ॥ ततोऽदितिर्दितिश्चैव मुनिपत्न्यश्च देवकी ॥ १७ ॥ यशोदा रोहिणी हृष्टा सावित्री च सरस्वती ॥ प्रत्येकं प्रददौ भिक्षां मणिकाञ्चनभूषिताम् ॥ १८ ॥ देवकन्या नागकन्या राजकन्याः पतिव्रताः ॥ कामिन्यो बान्धवानां च सस्मिताः स्निग्धलोचनाः ॥ १९ ॥ इन्द्राणी वरुणानी च पवनानी च रोहिणी ॥ कुबेरपत्नी स्वाहा च रतिः कामस्य कामिनी ॥ २० ॥ प्रत्येकं प्रददौ भिक्षां रत्नभूषणभूषिताम् ॥ भिक्षां गृहीत्वा भगवान्सबलो भक्तिपूर्वकम् ॥ २१ ॥ किंचिद्ददौ च गर्गाय किंचित्स्वगुरवे तथा ॥ वैदिकं कर्म निर्वाप्य गर्गाय दक्षिणां ददौ ॥ २२ ॥ देवांश्च भोजयामास ब्राह्मणांश्चापि सादरम् ॥ येये समाययुर्यज्ञे ते च दत्त्वा शुभाशिषम् ॥ २३ ॥ कृष्णाय बलदेवाय प्रहृष्टाः प्रययुर्गृहम् ॥ नन्दः सभार्यौ निर्वाप्य शुभकर्म सुतस्य वै ॥२४॥ क्रोडे कृत्वा बलं कृष्णं चुचुम्ब वदनं तयोः॥उच्चै रुरोद नन्दश्च यशोदा च पतिव्रता॥ श्रीकृष्णस्तं समाश्वास्य बोधयामास यत्नतः ॥ २५ ॥ श्रीकृष्ण उवाच ॥ सानन्दं गच्छ हे मातर्यशोदे तात सत्वरम् ॥ त्वमेव माता पोष्ट्री त्वं पिता च परमार्थतः ॥ २६ ॥ अवन्तिनगरं तात यास्यामि सबलोऽधुना ॥ मुनेः सान्दीपिनेः स्थानं वेदपाठार्थमीप्सितम् ॥ २७ ॥ तत आगत्य सुचिरं काले भवति दर्शनम् ॥ कालः करोति कलनं स च भेदं करोति च ॥ ॥ २८ ॥ सर्वं कालकृतं मातर्भेदं संमीलनं नृणाम् ॥ सुखं दुःखं च हर्षं च शोकं च मङ्गलालयम् ॥ २९ ॥ मया दत्तं च तत्त्वं च योगिनामपि दुर्लभम् ॥ सर्वं नन्दश्च सानन्दं त्वामेव कथयिष्यति ॥ ३० ॥ इत्युक्त्वा जगतां नाथो वसुदेवसभां ययौ ॥ तदाज्ञया क्षणं प्राप्य ययौ सान्दीपिनेर्गृहम् ॥३१॥ वसुदेवं देवकीं च संभाष्य विनयेन च ॥ नन्दः सभार्यः प्रययौ हृदयेन विदूयता ॥ ॥ ३२ ॥ मुक्तामणिं सुवर्णं च माणिक्यं हीरकं तथा ॥ वह्निशुद्धांशुकं रत्नं नन्दाय देवकी ददौ ॥ ३३ ॥ श्वेताश्वं च गजेन्द्रं च

सुवर्णरथमुत्तमम् ॥ नन्दाय कृष्णः प्रददौ वसुदेवश्च सादरम् ॥ ३४ ॥ तयोरनुव्रजन्विप्रा देवकीप्रमुखाः स्त्रियः ॥ वसुदेवस्तथाऽक्रूरोऽप्युद्धवश्च ययौ मुदा ॥ ३५ ॥ कालिन्दीनिकटं गत्वा ते सर्वे रुरुदुः शुचा ॥ परस्परं च संभाष्य ते सर्वे स्वालयं ययुः ॥ ३६ ॥ कुन्ती सपुत्रा विधवा वसुदेवाज्ञया मुने ॥ नानारत्नमणिं प्राप्य प्रययौ स्वालयं मुदा ॥ ३७ ॥ वसुदेवो देवकी च पुत्रकल्याणहेतवे ॥ नानारत्नमणिं वस्त्रं सुवर्णं रजतं तथा ॥ ३८ ॥ मुक्तामाणिक्यहारं च मिष्टान्नं च सुधोपमम् ॥ भट्टेभ्यो ब्राह्मणेभ्यश्च प्रददौ सादरं मुदा ॥ ३९ ॥ महोत्सवं वेदपाठं हरेर्नामैकमङ्गलम् ॥ विप्राणां भोजनं चैव कारयामास यत्नतः ॥ ४० ॥ ज्ञातीनां बान्धवानां च पुरस्कारं यथोचितम् ॥ चकार मणिमाणिक्यमुक्तावस्त्रैर्मनोहरैः ॥ ४१ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे उत्तरार्धे नारायणनारदसंवादे भगवदुपनयनं नामैकशततमोऽध्यायः ॥ १०१ ॥ श्रीनारायण उवाच ॥ कृष्णः सान्दीपिनेर्गेहं गत्वा च सबलो मुदा ॥ नमश्चकार स्वगुरुं गुरुपत्नीं पतिव्रताम् ॥ १ ॥ शुभाशिषं गृहीत्वा च दत्त्वा रत्नमणिं हरिः ॥ गुरवे तस्य भार्यायै तमुवाच यथोचितम् ॥ २ ॥ श्रीकृष्ण उवाच ॥ त्वत्तो विद्यां लभिष्यामि वाञ्छितां वाञ्छितं मम ॥ कृत्वा शुभक्षणं विप्र मां पाठय यथोचितम् ॥ ३ ॥ ओमित्युक्त्वा मुनिश्रेष्ठः पूजयामास तं मुदा ॥ मधुपर्कप्राशनेन गवा वस्त्रेण चन्दनैः ॥ ४ ॥ मिष्टान्नं भोजयामास ताम्बूलं च सुवासितम् ॥ सुप्रियं कथयामास तुष्टाव मरमेश्वरम् ॥ ५ ॥ सान्दीपिनिरुवाच ॥ परं ब्रह्म परं धाम परमीश परात्पर ॥ स्वेच्छामयं स्वयंज्योतिर्निर्लिप्तैको निरङ्कुशः ॥ ६ ॥ भक्तैकनाथ भक्तेष्ट भक्तानुग्रहविग्रह ॥ भक्तवाञ्छाकल्पतरो भक्तानां प्राणवल्लभ ॥ ७ ॥ मायया बालरूपोऽसि ब्रह्मेशशेषवन्दितः ॥ मायया भुवि भूपाल भुवो भारक्षयाय च ॥ ८ ॥ योगिनो यं विदन्त्येवं ब्रह्मज्योतिः सनातनम् ॥ ध्यायन्ते भक्तनिवहा ज्योतिरभ्यन्तरे मुदा ॥ ९ ॥ द्विभुजं मुरलीहस्तं सुन्दरं श्यामरूपकम् ॥ चन्दनोक्षितसर्वाङ्गं सस्मितं भक्तवत्सलम् ॥ १० ॥ पीताम्बरधरं देवं वनमालाविभूषितम् ॥ लीलापाङ्गतरंगैश्च निन्दितानङ्गमूर्च्छितम् ॥११॥ अलक्तभवनं तद्वत्पादपद्मं सुशोभनम् ॥ कौस्तुभोद्भासिताङ्गं च दिव्यमूर्तिं

मनोहरम् ॥ १२ ॥ ईषद्धास्यप्रसन्न च सुवेषं प्रस्तुतं सुरैः ॥ देवदेवं जगन्नाथं त्रैलोक्यमोहनं परम् ॥ १३ ॥ कोटिकन्दर्पलीलाभं
कमनीयमनीश्वरम् ॥ अमूल्यरत्ननिर्माणभूषणौघेन भूषितम् ॥ १४ ॥ वरं वरेण्यं वरदं वरदानामभीप्सितम् ॥ चतुर्णामपि वेदानां
कारणानां च कारणम् ॥ १५ ॥ पाठार्थं मत्प्रियस्थानमागतोऽसि च मायया ॥ पाठं ते लोकशिक्षार्थं रमणं गमनं रणम् ॥
स्वात्मारामस्य च विभोः परिपूर्णतमस्य च ॥ १६ ॥ गुरुपत्न्युवाच ॥ अद्य मे सफलं जन्म सफलं जीवनं मम ॥
पातिव्रत्यं च सफलं सफलं च तपोवनम् ॥ १७ ॥ मद्दक्षहस्तः सफलो दत्तं येनान्नमीप्सितम् ॥ तदाश्रमं तीर्थपरं तीर्थपादपदाङ्कितम्
॥ १८ ॥ तत्पादरजसा पूता गृहाः प्राङ्गणमुत्तमम् ॥ यस्य त्वत्पादपद्मं चैवावयोर्जन्मखण्डनम् ॥१९॥ तावद्दुःखं च शोकश्च तावद्रोगश्च
रोगकः ॥ तावज्जन्मानि कर्माणि क्षुत्पिपासादिकानि च ॥ यावत्त्वत्पादपद्मस्य भजनं नास्ति दर्शनम् ॥ २० ॥ हे कालकाल
भगवन्स्रष्टुः संहर्तुरीश्वर ॥ कृपां कुरु कृपानाथ मायामोहनिकृन्तन ॥२१॥ इत्युक्त्वा साश्रुनेत्रा सा क्रोडे कृत्वा हरिं पुनः ॥ स्वस्तनं
पाययामास प्रेम्णा च देवकी यथा ॥ २२ ॥ श्रीकृष्ण उवाच ॥ मातस्त्वं मां कथं स्तौषि बालं दुग्धमुखं सुतम् ॥
गच्छ गोलोकमिष्टं च स्वामिना सह साम्प्रतम् ॥ २३ ॥ त्यक्त्वा प्राकृतिकं मिथ्या नश्वरं च कलेवरम् ॥ विधाय निर्मलं देहं
जन्ममृत्युजराहरम् ॥ २४ ॥ इत्युक्त्वा चतुरो वेदान्पठित्वा मुनिपुंगवात् ॥ मासेन परया भक्त्या दत्त्वा पुत्रं मृतं पुरा ॥ २५ ॥
रत्नानां च त्रिलक्षं च मणीनां पञ्चलक्षकम् ॥ हीरकाणां चतुर्लक्षं मुक्तानां पञ्चलक्षकम् ॥ २६ ॥ माणिक्यानां द्विलक्षं च वस्त्रं त्रैलोक्यदुर्लभम्
॥ हारं च दुर्गया दत्तं हस्तरत्नांगुलीयकम् ॥२७॥ दशकोटिं सुवर्णानां गुरवे दक्षिणां ददौ ॥ अमूल्यरत्ननिर्माणं नारीसर्वाङ्गभूषणम्
॥ २८ ॥ गुरुप्रियायै प्रददौ वह्निशुद्धांशुकं वरम् ॥ मुनिर्दत्त्वा च पुत्राय तत्सर्वं प्रियया सह ॥२९॥ सद्रत्नरथमारुह्य
ययौ गोलोकमुत्तमम् ॥ तमद्भुतं हरिं दृष्ट्वा प्रययौ स्वालयं मुदा ॥ ३० ॥ एवं ब्राह्मण्यदेवस्य चरित्रं शृणु नारद ॥ इदं स्तोत्रं महापुण्यं यः
पठेद्भक्तिपूर्वकम् ॥ ३१ ॥ श्रीकृष्णे निश्चलां भक्तिं लभते नात्र संशयः ॥ अस्पष्टकीर्तिः सुयशा मूर्खो भवति पण्डितः ॥३२॥ इह लो

के सुखं प्राप्य यात्यन्ते श्रीहरेः पदम् ॥ तत्र नित्यं हरेर्दास्यं लभते नात्र संशयः ॥३३॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्म
खण्ड उत्तरार्द्धे नारायणनारदसंवादे मुनिपत्नीस्तोत्रं नाम द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥ श्रीनारायण उवाच ॥ अथा
गत्य मधुपुरीं प्रणम्य पितरं विभुः ॥ सबलो वटमूले च सस्मार गरुडं हरिः ॥ १ ॥ सादरं लवणोदं च विश्वकर्माणमीप्सितम् ॥
तत्याज गोपवेषं च नृपवेषं दधार सः ॥ २ ॥ एतस्मिन्नन्तरे चक्रमाजगाम हरिं स्वयम् ॥ परं सुदर्शनं नाम सूर्यकोटिसमप्रभम् ॥ ३ ॥
तेजसा हरिणा तुल्यं परं वैरिविमर्दनम् ॥ अव्यर्थमस्त्रमस्त्राणां प्रवरं परमं परम् ॥ ४ ॥ रत्नयानं पुरः कृत्वा गरुडो हरिसंनिधिम् ॥
विश्वकर्मा सशिष्यश्च जलधिः कम्पितस्तथा ॥ ५ ॥ हरिं प्रणेमुस्ते सर्वे मूर्ध्ना च भक्तिपूर्वकम् ॥ सस्मितं सादरं यत्नात्तानुवाच
क्रमाद्विभुः ॥ ६ ॥ श्रीकृष्ण उवाच ॥ हे समुद्र महाभाग स्थलं च शतयोजनम् ॥ देहि मे नगरार्थं च पश्चाद्दास्यामि
निश्चितम् ॥ ७ ॥ नगरं कुरु हे कारो त्रिषु लोकेषु दुर्लभम् ॥ रमणीयं च सर्वेषां कमनीयं च योषिताम् ॥ ८ ॥ वाञ्छितं चापि भक्ता
नां वैकुण्ठसदृशं परम् ॥ सर्वेषामपि स्वर्गाणां परं पारमभीप्सितम् ॥ ९ ॥ दिवानिशं खगश्रेष्ठ सन्निधौ विश्वकर्मणः ॥ स्थितिं कुरु
महाभाग यावन्निर्माति द्वारकाम् ॥ १० ॥ दिवानिशं च मत्पार्श्वे चक्रश्रेष्ठ स्थितिं कुरु ॥ ओमित्युक्त्वा तु प्रययुः सर्वे चक्रं विना
मुने ॥ ११ ॥ कंसस्य पितरं भद्रमुग्रसेनं महाबलम् ॥ नृपं चकार नगरे क्षत्रियाणां सतामति ॥ १२ ॥ विजित्य च जरासन्धं निहत्य
यवनं तथा ॥ उपायेन महाभाग निर्माणक्रममीश्वरः ॥ १३ ॥ श्रीभगवानुवाच ॥ शतयोजनपर्यन्तं नगरं सुमनोहरम् ॥
पद्मरागैर्मरकतैरिन्द्रनीलैरनुत्तमैः ॥ १४ ॥ रुचकैः पारिभद्रैश्च पलङ्कैश्च स्यमन्तकैः ॥ गन्धकैर्गालिमैश्चैव चन्द्रकान्तादिभिस्तथा ॥ १५ ॥
सूर्यकान्तादिभिश्चैव पुत्रैश्च स्फटिकाकृतैः ॥ हरिद्वर्णैश्च मणिभिः श्यामैर्गौरमुखैश्चैषैः ॥ १६ ॥ गोरोचनाभिः पीतैश्च दाडिमीबीजरू
पकैः ॥ पद्मबीजनिभैश्चैव नीलैः कमलवर्णकैः ॥ १७ ॥ मणिभिः कज्जलाकारैरुज्ज्वलैश्च परिष्कृतैः ॥ श्वेतचम्पकवर्णाभैस्तप्तकाञ्चन
सन्निभैः ॥ १८ ॥ स्वर्णमूल्यशतगुणैरीषद्रक्तैः सुशोभनैः ॥ गरिष्ठैश्च वरिष्ठैश्च मणिश्रेष्ठैश्च पूजितैः ॥ १९ ॥ यथाविधानं यद्योग्यं यत्र

यन्मुक्तमीप्सितम्॥मणीनां हरणं चैव यक्षसंघा हिमालयात्॥२०॥दिवानिशं करिष्यंति यावन्निर्माणपूर्वकम् ॥ यक्षैश्च सप्तभिर्लक्षैः
कुबेरप्रेरितैरपि ॥ २१ ॥ वेताललक्षैः कूष्माण्डलक्षैः शंकरयोजितैः ॥ दानवैर्ब्रह्मरक्षोभिः शैलकन्यानियोजितैः ॥२२॥ कुरु दिव्यं च
पत्नीनां सहस्राणां च षोडश ॥ अन्यपत्नीजनस्यापि चाष्टाधिकशतस्य च ॥२३॥ शिबिरं परिखायुक्तमुच्चैः प्राकारवेष्टितम् ॥ युक्तं
द्वादशशालं च सिंहद्वारपरिष्कृतम्॥२४॥युक्तं चित्रैर्विचित्रैश्च कृत्रिमैश्च कपाटकैः ॥ निषिद्धवृक्षरहितं प्रसिद्धैश्च परिष्कृतम् ॥२५॥
सुलक्षणं चन्द्रवेधं प्राङ्गणं च तथैव च॥यदूनामाश्रमं दिव्यं किंकराणां तथैव च॥२६॥सर्वत्र सिद्धं निलयमुग्रसेनस्य भूभृतः ॥ आश्रमं
सर्वतोभद्रं वसुदेवस्य मत्पितुः ॥ २७ ॥ विश्वकर्मोवाच ॥ के ते वृक्षाः प्रशस्ताश्च निषिद्धाश्चापि केचन ॥ भद्राभद्र
प्रदाश्चापि तान्वदस्व जगद्गुरो ॥२८॥ केषामस्थिनियुक्तं च शिबिरं च शुभाशुभम् ॥ दिशि कुत्र जलं भद्रमभद्रं च वद प्रभो ॥२९॥
भद्रप्रदश्च को वृक्षो दिशि कुत्र प्रवर्तते ॥ किं प्रमाणं गृहाणां च प्राङ्गणानां सुरेश्वर ॥३०॥ मङ्गलं कुसुमोद्यानं दिशि कुत्र तरोस्तथा ॥
प्राकाराणां किं प्रमाणं परिखाणां सुरेश्वर ॥ ३१ ॥ द्वाराणां च गृहाणां च प्राकाराणां प्रमाणकम् ॥ कस्य कस्य तरोः काष्ठं प्रशस्तं
शिबिरे प्रभो ॥ ३२ ॥ अमङ्गलं वा केषां च सर्वं मां वक्तुमर्हसि ॥ ३३ ॥ श्रीभगवानुवाच ॥ आश्रमे नारिकेलश्च गृहिणां च
धनप्रदः ॥ शिबिरस्य यदीशाने पूर्वें पुत्रप्रदस्तरुः ॥३४॥ सर्वत्र मङ्गलार्हश्च तरुराजो मनोहरः ॥ रसालवृक्षः पूर्वस्मिन्नृणां संपत्प्रद
स्तथा॥३५॥शुभप्रदश्च सर्वत्र सुरकारो निशामय ॥ बिल्वश्च पनसश्चैव जम्बीरो बदरी तथा॥३६॥प्रजाप्रदश्च पूर्वस्मिन्दक्षिणे धन
दस्तथा ॥ संपत्प्रदश्च सर्वत्र यतो हि वर्धते गृही॥३७॥जम्बूवृक्षश्च दाडिम्बः कदल्याम्रातकस्तथा॥ बन्धुप्रदश्च पूर्वस्मिन्दक्षिणे मित्रद
स्तथा ॥३८॥ सर्वत्र शुभदश्चैव धनपुत्रशुभप्रदः हर्षप्रदः ॥ सुवाकश्च दक्षिणे पश्चिमे तथा ॥३९॥ ईशाने सुखदश्चैव सर्वत्रैव निशा
मय॥ सर्वत्र चम्पकः शुद्धो भुवि भद्रप्रदस्तथा॥४०॥अलाबुश्चातिकूष्माण्डमायाम्बुश्च सकिंशुकः ॥ खर्जूरीकर्कटी चापि शिबिरे मङ्ग
लप्रदा ॥४१॥ वास्तूककारबिल्वश्च वार्ताकश्च शुभप्रदः ॥ लताफलं च शुभदं सर्वं सर्वत्र निश्चितम् ॥ ४२ ॥ प्रशस्तं कथितं कारो

निषिद्धं च निशामय ॥ वन्यवृक्षो निषिद्धश्च शिबिरे नगरेऽपि च ॥४३॥ वटो निषिद्धः शिबिरे नित्यं चोरभयं यतः ॥ नगरेषु प्रसिद्धश्च दर्शनात्पुण्य दस्तथा ॥४४॥ निषिद्धः शाल्मलिश्चैव शिबिरे नगरे पुरे ॥ दुःखप्रदश्च सततं भूमिपानां सदाऽपि च ॥४५॥ न निषिद्धः प्रसिद्धश्च ग्रामेषु नगरेषु च ॥ विद्यामतिनिषिद्धस्तु सततं दुःखदस्तथा ॥ ४६ ॥ हे कारो तिन्तिडीवृक्षो यत्नात्तं परिवर्जयेत् ॥ शतेन धनहा निःस्यात्प्रजाहानिर्भवेद्ध्रुवम् ॥४७॥ शिबिरेऽतिनिषिद्धश्च नगरे किंचिदेव च ॥ न निषिद्धः प्रसिद्धश्च ग्रामेषु नगरेषु च ॥४८॥ विद्यामतिनिषिद्धश्च प्राज्ञस्तं परिवर्जयेत् ॥ खर्जूरश्च गद्दुश्चैव निषिद्धः शिबिरे तथा॥४९॥ न निषिद्धः प्रसिद्धश्च ग्रामेषु नगरेषु च ॥ वृक्षश्च चणकादीनां धान्यं च मङ्गलप्रदम् ॥५०॥ ग्रामेषु नगरे चापि शिबिरे च तथैव च ॥ इक्षुवृक्षश्च शुभदः संततं शुभदास्तथा॥५१॥अशोकश्च शिरीषश्च कदम्बश्च शुभप्रदः ॥ कश्चिद्धरिद्रा शुभदा शुभदश्चार्द्रकस्तथा ॥५२॥ हरीतकी च शुभदा ग्रामेषु नगरेषु च ॥ नवाद्या भद्रदा नित्यं तथा चामलकी ध्रुवम् ॥५३॥ गजानामस्थि शुभदमश्वानां च तथैव च ॥ कल्याणमुच्चैःश्रवसां वस्तौ स्थापनकारिणाम् ॥५४॥ न शुभप्रदमन्येषामुच्छिन्नकारणं परम् ॥ वानराणां नराणां च गर्दभानां गवामपि ॥ ५५ ॥ कुक्कुटानां शृगालानां मार्जाराणामभद्रकम् ॥ भेटकानां सूकराणां सर्वेषां च शुभप्रदम् ॥ ५६ ॥ ईशाने चापि पूर्वस्मिन्पश्चिमे च तथोत्तमे ॥ शिबिरस्य जलं भद्रमन्यत्राशुभमेव च ॥ ५७ ॥ दीर्घे प्रस्थे समानं च न कुर्यान्मन्दिरं बुधः ॥ चतुरस्रे गृहे कारो गृहिणां धननाशनम् ॥ ५८ ॥ दीर्घप्रस्थः परिमितो नेत्राङ्केनापि संहृतम् ॥ शून्येन रहितं भद्रं शून्यं शून्यप्रदं नृणाम् ॥ ५९ ॥ प्रस्थे हस्तद्वयात्पूर्वं दीघ हस्तत्रयं तथा ॥ गृहाणां शुभदं द्वारं प्राकरस्य गृहस्य च ॥६०॥ न मध्यदेशे कर्तव्यं किंचिन्न्यूनाधिके शुभम् ॥ चतुरस्रं चन्द्रवेधं शिबिरं मङ्गलप्रदम् ॥ ६१ ॥ अभद्रदं सूर्यवेधं शिबिरं मङ्गलप्रदम् अभद्रदं सूर्यवेधं प्राङ्गणं च तथैव च ॥६२॥ शिबिराभ्यन्तरे भद्रा स्थापिता तुलसी नृणाम् ॥ धनपुत्रप्रदात्री च पुण्यदा हरिभक्तिदा ॥ ६३ ॥ प्रभाते तुलसीं दृष्ट्वा स्वर्णदानफलं लभेत् ॥ मालती यूथिका कुन्दं माधवी केतकी तथा ॥६४॥ नागेश्वरं मल्लिकां च काञ्चनं बकु

लं शुभम् ॥ अपराजिता च शुभदा तेषामुद्यानमीप्सितम् ॥ ६५ ॥ पूर्वे च दक्षिणो चैव शुभदं नात्र संशयः ॥ उर्ध्वं षोडशहस्तेभ्यो
नैव कुर्याद्गृहं गृही ॥ ६६ ॥ ऊर्ध्वं विंशतिहस्तेभ्यः प्रकारं न शुभप्रदम् ॥ सूत्रधारं तैलकारं स्वर्णकारं च हीरकम् ॥ ७ ॥ वाटी
मूले ग्राममध्ये न कुर्यात्स्थापनं बुधः ॥ ब्राह्मणं क्षत्रियं वैश्यं सच्छूद्रं गणकं शुभम् ॥ ६८ ॥ भट्टं वैद्यं पुष्पकारं स्थापयेच्छिबिरां
तिके ॥ प्रस्थे च परिखामानं शतहस्तं प्रशस्तकम् ॥ ६९ ॥ परितः शिबिराणां च गम्भीरं दशहस्तकम् ॥ संकेतपूर्वकं चैव परि
खाद्वारमीप्सितम् ॥ ७० ॥ शत्रोरगम्यं मित्रस्य गम्यमेव सुखेन च ॥ शाल्मलीनां तिन्तिडीनां हिन्तालानां तथैव च ॥ ७१ ॥
निम्बानां सिन्धुवाराणामुम्बराणामभद्रकम्॥धत्तूराणां वटानां चाप्येरण्डानामवाञ्छितम्॥७२॥एतेषामतिरिक्तानां शिबिरे काष्ठमीप्सि
तम् ॥ वृक्षं च वज्रहस्तं च भूधरो वर्जयेदधः॥७३॥पुत्रदारधनं हन्यादित्याह कमलोद्भवः॥कथितं लोकशिक्षार्थं कुरु काष्ठं विना पुरीम्
॥ ७४ ॥ शुभक्षणं चाप्यधुना गच्छ वत्स यथासुखम् ॥ विश्वकर्म हरिं नत्वा जगाम पक्षिणा सह ॥ ७५ ॥ समुद्रस्य समीपं च
वटमूलं मनोहरम् ॥ सुष्वाप तत्र नक्तं च कारुश्च पक्षिणा सह ॥ ७६ ॥ स्वप्ने द्वारवतीं रम्यां ददर्श गरुडस्तथा॥यत्किंचित्कथितं का
रुं कृष्णेन परमात्मना ॥७७॥ तदेव लक्षणं सर्वं ददर्श नगरे मुने ॥ कारुं हसन्ति स्वप्ने च सर्वे ते शिल्पकारिणः ॥७८॥ गरुडं गरुडा
श्चान्ये बलवन्तश्च पक्षिणः ॥ बुद्धो ददर्श गरुडो विश्वकर्मा च लज्जितः ॥ ७९ ॥ अतीव द्वारकां रम्यां शतयोजनविस्तृताम् ॥
ब्रह्मादीनां च नगरं विजित्य च विराजितम् ॥ ८० ॥ तेजसाच्छादितं सूर्यं रत्नानां च परिष्कृताम् ॥ ८१ ॥ इति श्रीब्रह्म
वैवर्तै महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे द्वारकानिर्माणारम्भे त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥
श्रीनारायण उवाच ॥ एतस्मिन्नन्तरे ब्रह्मा भवान्या च भवः स्वयम् ॥ अनन्तश्चापि धर्मश्च भास्करश्च हुताशनः ॥ १ ॥ कुबेरो
वरुणश्चैव पवनश्च यमस्तथा ॥ महेन्द्रश्चापि चन्द्रश्च रुद्राश्चैकादशैव ते ॥२॥ अन्ये देवाश्च मुनयो वसवः सप्त एव च ॥ आदित्या
श्चापि दैत्याश्च गन्धर्वाः किन्नरास्तथा ॥ ३ ॥ आययुर्द्वारकां द्रष्टुं श्रीकृष्णं च बलं तथा ॥ आगच्छन्तं च सहसा वटमूलं मनोह

रम् ॥ ४ ॥ दृष्ट्वा च देवताः सर्वास्तुष्टुवुः पुरुषोत्तम् ॥ आकाशाच्च विमानैश्च संप्राप्य वटमूलकम् ॥ ५ ॥ ददृशुर्द्वारकां रम्या
मतीव सुमनोहराम् ॥ मुक्तामाणिक्यहीरेण रत्नराजिविराजिताम् ॥ ६ ॥ परितश्चतुरस्रां च शतयोजनसंमिताम् ॥ सप्तभिः परि
खाभिश्च गम्भीराभिश्च वेष्टिताम् ॥ ७ ॥ प्राकारैर्नवभिर्युक्तां लक्षैः क्रीडासरोवरैः ॥ मनोहरैः सपद्मैश्च सहितैश्च मधुव्रतैः॥८॥ शोभि
तां सर्वतोभद्रैः पुष्पोद्यानत्रिलक्षकैः ॥ प्रफुल्लपुष्पैः पवनैः सर्वत्र सुरभीकृताम् ॥ ९ ॥ आमोदितां च शीतेन मन्दचन्दनवायुना ॥ तरु
भिर्नारिकेराणां शोभितां शतकोटिभिः ॥ १० ॥ गुवाकानां च वृक्षैश्च भूषितां तच्चतुर्गुणैः ॥ चतुर्गुणैर्गुवाकानां युक्तामाम्रमहीरुहैः ॥
॥ ११ ॥ परीतां पनसानां च वृक्षैराम्रसमैर्मुने ॥ सुशोभितां च तालानां द्रुमैराम्रसमैर्मुने ॥ १२ ॥ अश्वत्थैर्बदरीभिश्च बिल्वैराम्रा
तकैर्वटैः ॥ शाल्मलीभिश्च जम्बूभिः कदम्बैश्चापि शोभिताम् ॥१३॥ वंशैश्च तिन्तिडीभिश्च चम्पकैर्बकुलैस्तथा ॥ नागेश्वरैर्नागरङ्गैर्ज
म्बीरैर्दाडिमैर्युताम् ॥ १४ ॥ खर्जूरैरर्जुनैः पिष्टैरिक्षुभिः काञ्चनैरपि ॥ हरीतकीभिर्धात्रीभिरिन्दुभिः परितः प्लुताम् ॥ १५ ॥ शालैः
प्रियालैर्हिन्तालैः शिशिरैः सप्तपर्णकैः ॥ अन्यैर्नानाद्रुमैरिष्टैरिष्टां युक्तां परिप्लुताम् ॥१६॥ असंख्यैर्मन्दिरै रम्यैरत्युच्चैरपि संस्कृताम् ॥
रत्नेन्द्रसारनिर्माणैर्मुक्तामाणिक्यभूषितैः ॥१७॥ माणिक्यहीरकैश्चित्रैः सद्रत्नकलशान्वितैः ॥ मणिभिर्निर्मितैरिष्टैः सोपाननिकरैर्वरैः
॥ १८ ॥ कपाटैः कठिनैर्दिव्यैरर्गलाकीलकैर्युताम् ॥ हरिन्मणीनां स्तम्भानां कदम्बैरपि संयुतैः ॥१९॥ नानाचित्रैर्विचित्रैश्च सुचित्रैश्च
परिष्कृतैः ॥ दर्पणैः सूक्ष्मवस्त्रैश्च शोभितैः श्वेतचामरैः ॥२०॥ प्राङ्गणैः पद्मरागाद्यैरिन्द्रनीलपरिष्कृताम् ॥ वीथीभी रत्नखचितै राज
मार्गैः समन्विताम् ॥ २१ ॥ ग्रीष्ममध्याह्नसूर्याभां ज्वलितां रत्नतेजसा ॥ गवाक्षलक्षैः संयुक्तां वाजिशालापरिष्कृताम् ॥ २२ ॥
दृष्ट्वा च द्वारकां रम्यां ते देवा विस्मयं ययुः ॥ प्रसन्नवदनो देवो लङ्गली भगवानजः ॥ २३ ॥ सस्मार यदुवंशानां समूहमुग्रसे
नकम् ॥ वसुदेवं देवकीं च पाण्डवांश्च समातृकान् ॥ २४ ॥ नन्दं यशोदां गोपालान्राजेन्द्रमुनिपुंगवान् ॥ गन्धर्वान्किन्नरांश्चैव सहि
तो यदुपुंगवैः ॥ २५ ॥ नन्दो यशोदा गोपाश्च जनन्या सह पाण्डवाः ॥ गन्धर्वाः किन्नराश्चैव विद्याधर्यश्च नारद ॥२६॥ किंनर्य

श्चापि नर्तक्यो गायका वाद्यभाण्डकाः ॥ भिक्षुका भाण्डकाश्चैव भट्टाश्च गणकास्तथा ॥ २७ ॥ नानादेशोद्भवा भूपा वेद्या
श्चान्ये च मानवाः ॥ संन्यासिनश्च यतयोऽवधूता ब्रह्मचारिणः ॥ २८ ॥ आयद्गुर्मुनयः सर्वे सशिष्याः सिद्धपुंगवाः ॥ सनकश्च
सनन्दश्च तृतीयश्च सनातनः ॥ २९ ॥ सनत्कुमारो भगधान्ज्ञानिनां च गुरोर्गुरुः ॥ शिष्यैस्त्रिकोटिभिः सार्द्धं पञ्चवर्षो दिगम्बरः ॥
॥ ३० ॥ शिष्यैस्त्रिलक्षैः सहितो दुर्वासा भगवानजः ॥ लक्षशिष्यैः कश्यपश्च वाल्मीकिश्च त्रिलक्षकैः ॥ ३१ ॥ लक्षशिष्यैर्गौतमश्च
कोटिभिश्च बृहस्पतिः ॥ शुक्रस्त्रिकोटिभिः सार्द्धं भरद्वाजश्च लक्षकैः ॥ ३२ ॥ शिष्यैस्त्रिकोटिभिः सार्द्धमङ्गिरा भगवानजः ॥
वसिष्ठः कोटिभिः शिष्यैः प्रचेताः कोटिभिस्तथा ॥३३॥ त्रिलक्षैश्च पुलस्त्यश्चाप्यगस्त्यः कोटिभिः सह ॥ पुलहो लक्षशिष्यैश्च
क्रतुर्लक्षैस्तथैव च ॥३४॥ अत्रिस्त्रिकोटिभिः सार्द्धं भृगुश्च पञ्चकोटिभिः ॥ त्रिकोटिभिर्मरीचिश्च शतानन्दः सहस्रकैः ॥ ३५ ॥ सार्द्धं
त्रिकोटिभिः शिष्यैर्ऋष्यशृङ्गो विभाण्डकः ॥ पाणिनिः कोटिभिः शिष्यैर्लक्षैः कात्यायनस्तथा॥३६॥याज्ञवल्क्यः सहस्रैश्च व्यास
शिष्यत्रिकोटिभिः॥शिष्यैर्लक्षैश्च सहितो गर्गः कुलपुरोहितः॥३७॥गालवश्च सहस्रैश्च सहस्रैः सौभरिस्तथा ॥ त्रिकोटिभिर्लोमशश्च
मार्कण्डेयस्त्रिकोटिभिः ॥३८॥ सान्दीपिनिर्देवलश्च सच्छिष्यैश्च त्रिकोटिभिः॥ वोढुः शिष्यैः कोटिभिश्च लक्षैः पञ्चशिखस्तथा॥
॥ ३९ ॥ अहंनारायणश्चैव नरो मम सहोदरः ॥ शिष्यस्त्रिकोटिभिः सार्द्धं विश्वामित्रश्च कोटिभिः ॥ ४० ॥ त्रिकोटिभिर्जरत्कारुरास्तीकश्च
त्रिकोटिभिः॥त्रिकोटिभिः पर्शुरामो वत्सो लक्षैश्च शिष्यकैः॥४१॥दक्षस्त्रिलक्षैः शिष्यैश्च कपिलः पञ्चकोटिभिः संवर्तश्च
त्रिलक्षैश्चाप्युतथ्यश्च तथैव च ॥४२॥ सहस्रैर्जैमिनिश्चैव पैलो लक्षैस्तथैव च ॥ सुवर्णश्च सहस्रैश्च वैशम्पायन एव च॥४३॥शिष्यैर्लक्षैः
समेतश्च व्यासशिष्यः पुरोगमः॥ लक्षैः शिष्यैस्तथा शृङ्गी चोपमन्युस्तथैव च॥४४॥सहस्रैश्च गौरमुखः कचो लक्षैर्गुरोः सुतः॥
अश्वत्थामा तथा द्रोणः कृपाचार्यः सशिष्यकः ॥४५॥ भीष्मः कर्णश्च शकुनी राजा दुर्योधनस्तथा॥नृपस्य भ्रातरः सर्वे चान्ये भूपा
जगद्गुरुम् ॥ ४६ ॥ श्रीभगवानुवाच ॥ शुभकर्मणि निष्पन्ने यास्यन्ति ये समागताः ॥ शिवब्रह्मादयो देवा मुनयश्च तथाऽपरे ॥ ४७ ॥

भवांश्च यादवैः सार्द्धं प्रविश द्वारकां पुरीम् ॥ मत्पित्रा मातृभिः सार्धं महेन्द्रे च क्षणे नृप ॥ ४८ ॥ अपरे यदवोऽन्ये च
यास्यन्ति मथुरां पुरीम् ॥ श्रुत्वेति विरसो राजा तमुवाच भयाकुलः ॥ ४९ ॥ उग्रसेन उवाच ॥ वासुदेव न यास्यामि भूमिं
तां पैतृकीं पुनः ॥ सर्वतीर्थपरां शुद्धां दैवे कर्मणि पैतृके ॥ ५० ॥ पावके भूमिदेशे च पितृणां निर्वपेत्तु यः ॥ सद्भूमिः स्वामिपि
तृभिः श्राद्धकर्मणि हन्यते ॥ ५१ ॥ पितृणां निष्फलं श्राद्धं देवानामपि पूजनम् ॥ किंचित्फलप्रदं चैव संपूर्णं पैतृके स्थले॥ ५२॥
पुत्रपौत्रकलत्रेभ्यः प्राणेभ्यः प्रेयसी सदा ॥ दुर्लभा पैतृकी भूमिः पितुर्मातुर्गरीयसी ॥ ५३ ॥ तत्सत्यं च पवित्रं च दैवे कर्मणि
पैतृके ॥ क्रीडां च दत्ते दानं च परदत्तमशुद्धकम् ॥ ५४ ॥ म्रियते पैतृकी भूम्यां तीर्थतुल्यफलं लभेत् ॥ गङ्गाजलसमं पूतं पितृखा
तोदकं हरे ॥ ५५ ॥ तत्र स्नात्वा जले पूते गङ्गास्नानफलं लभेत् ॥ पितृणां तर्पणं तत्र पवित्रं देवपूजनम् ॥५६॥ पैतृकी जन्मभूमि
श्चेद्द्विगुणं तत्फलं लभेत् ॥ पैतृकीभूमितुल्या च दानभूमिः सतामपि॥५७॥ वासुदेव उवाच ॥ भोगास्ते वचनं किं वा निषेकः केन
वार्यते ॥ पैतृकी तीर्थतुल्या सा किं तीर्थं द्वारकापरम्॥५८॥सर्वतीर्थपरा श्रेष्ठा द्वारका बहुपुण्यदा ॥ यस्याः प्रवेशमात्रेण नराणां
जन्मखण्डनम् ॥५९॥ दानं च द्वारकायां च श्राद्धं च देवपूजनम् ॥ चतुर्गुणं च तीर्थानां गङ्गादीनां च भूमिप ॥ ६० ॥ गच्छ ब्रह्मा
दिभिः सार्द्धं मुनिभिर्यादवैः सह ॥ राजेन्द्रभवनं तत्र गृहाणां सादरं पुनः ॥६१॥ करोति शश्वन्न्यक्कारं महेन्द्रस्यामरावतीम् ॥ निवस
त्वं सुधर्मायां महेन्द्रे च क्षणे नृप ॥ ६२ ॥ जम्बुद्वीपस्थिता भूपा राजेन्द्रमण्डलेश्वराः ॥ करं दास्यन्ति तुभ्यं च महेन्द्राय सुरा यथा॥
॥ ६३ ॥ भूयाज्जितः कुबेरश्च धनेन धनसंपदा ॥ तेजसा भास्करश्चापि महेन्द्रः संपदा तथा ॥ ६४ ॥ देवा जिता रणेनैव पुण्येन
मुनयो जिताः ॥ तपस्विनश्च तपसा व्रतिनश्च व्रतेन च ॥ ६५ ॥ उग्रसेनसमो राजा न भूतो न भविष्यति ॥ सभायां यस्य भगवान्बल
देवो महाबलः ॥६६॥ विश्वं च यस्य शिरसां सहस्राणां नरेश्वर ॥ एकस्मिञ्शिरसि न्यस्तं शूर्पे च सर्षपो यथा ॥ ६७ ॥ न ह्यन
न्तसमो देवो बलेन बलवत्तरः ॥ यद्गुणानां च नास्त्यन्तस्तेनानन्तं जगुर्बुधाः ॥ ६८ ॥ वसवोऽष्टौ महाभागा रुद्राश्च शंकरं विना ॥

बलिनो द्वादशादित्या महेन्द्रश्च सुरैः समः ॥ ६९ ॥ न समर्था ध्रुवं जेतुमुग्रसेनं नृपेश्वरम् ॥ कृष्णस्य वचनं श्रुत्वा प्रसन्नवदनो नृप ॥
॥७०॥ प्रययौ यादवैः सार्द्धं महेन्द्रभवनात्परम् ॥ स्वालयं द्वारकामध्ये ज्वलन्तं मणितेजसा ॥७१॥ सहस्रैर्द्वारपालैश्च शूलिभिर्दण्डह
स्तकैः ॥ नियुक्तै रक्षितं द्वारं ददर्श मानवेश्वरः ॥ ७२ ॥ अभ्यन्तरे च शिबिरं द्वारेभ्यः षड्भ्य एव च ॥ मन्दिराणां च शतकै रत्नानां
परिभूषणम् ॥ ७३ ॥ कोटिं मत्तगजेन्द्राणां ददर्श गजमन्दिरे ॥ चतुर्युगं गजौघं च गजानां षड्गुणं तथा ॥ ७४ ॥ महाबलांश्च तुरगा
न्सूर्याश्वं च हसन्ति च ॥ गजेन्द्रौघं च सर्वेषां वाहनानामपीश्वरम् ॥७५॥ हसत्यैरावतं शश्वन्महेन्द्रस्य च नारद ॥ अत्युच्चैरुच्चैःश्रवसां
ददर्श कोटिमीप्सितम् ॥७६॥ खराणां दशकोटिं च पादातं षड्गुणं तथा ॥ निर्माणं रत्नसाराणां रथानां पञ्चलक्षकम् ॥ ७७ ॥ पञ्च
लक्षं सारथीनां तत्राश्वं षड्गुणं तथा ॥ अश्ववाटं तत्समं च सुधर्मां च सभामपि॥७८॥ददर्शाभ्यन्तरे रम्ये देवौघमुनिसंयुताम् ॥ वह्नि
शुद्धांशुकै रम्यैर्भूषितां रक्तकम्बलैः॥७९॥ रत्नसिंहासनै रम्यैर्भूषितां रक्तपिङ्गलैः ॥ अमूल्यरत्ननिर्माणवीथीनां तेजसोज्ज्वलाम्॥८०॥
वेष्टितां च महाभीतैः किंकरैः शतकोटिभिः ॥ प्रविवेश सभां रम्यां श्रुत्वा शङ्खध्वनिं शुभम् ॥८१॥ वाद्यं च दुन्दुभीनां च मुनीनां
वेदमन्त्रकम् ॥ दृष्ट्वा नृपं समुत्तस्थौ वेगेन सबलो हरिः ॥ ८२ ॥ ब्रह्मा महेश्वरश्चैव शेषश्च देवपुंगवाः ॥ समुत्तस्थुः सुराः सर्वे मुनयश्च
महाव्रताः ॥ ८३ ॥ राजेन्द्राश्चापि सिद्धेन्द्रा वसुदेवपुरोगमाः ॥ रत्नसिंहासने रम्ये चोग्रसेनो महाबलः ॥ ८४ ॥ समुवास महेन्द्रस्य
मुनीनामाज्ञया हरेः ॥ देवानां च गुरूणां च गर्गस्यापि तथैव च ॥ ८५ ॥ सप्ततीर्थोदकेनैव पूर्णकुम्भेन नारद ॥ चकार वेदमन्त्रैश्च
नृपस्याप्यभिषेचनम् ॥ ८६ ॥ तस्मै वस्त्रयुगं दत्तं वह्निशुद्धं मनोहरम् ॥ वरुणेन पुरा दत्त कृष्णाय परमात्मने ॥ ८७ ॥ माल्यं च
पारिजातानां चन्दनं रत्नभूषणम् ॥ रत्नच्छत्रं ददौ तस्मै बलदेवो महाबलः ॥८८॥ ब्रह्मा कमण्डलुं चैव शूलं चापि महेश्वरः ॥ पार्वती
रत्नमाल्यं च हारं च मालती सती॥८९॥अन्ये देवाश्च मुनयो राजेन्द्राः सिद्धपुंगवाः॥यौतकं च ददौ तस्मै क्रमेण च पृथक्पृथक् ॥
॥९०॥ वसुदेवो ददौ तस्मै शुभदं श्वेतचामरम् ॥ पवनेन पुरा दत्तं कृष्णाय परमात्मने ॥९१॥ नन्दो ददौ च सुरभिं कामधेनुं च

पूजिताम् ॥ यशोदा देवकी तस्मै रत्नश्रेष्ठं ददौ मुदा ॥ ९२ ॥ सप्तभिः किंकरैश्चापि संवीतः श्वेतचामरैः ॥ दधार छत्रमक्रूरो
भक्त्या चैवाज्ञया हरेः ॥ ९३ ॥ रत्नसिंहासने रम्ये ददर्श रत्नदर्पणम् ॥ अतीव पुण्यावाप्यं च हरिणा च पुरस्कृतः ॥ ९४ ॥
चक्रुः स्तुतिं च भट्टाश्च भिक्षुका ब्राह्मणास्तथा ॥ ददुः शुभाशिषं तस्मै देवाश्च मुनयस्तथा ॥९५॥ ब्राह्मणेभ्यो ददौ राजा रत्नको
टिं च भक्तितः ॥ भट्टेभ्यो रत्नशतकं भिक्षुकेभ्यस्तथैव च ॥९६॥ अभिषिच्य नृपेन्द्रं च देवांश्च मुनिपुंगवान् ॥ संपूज्य ब्राह्मणांश्चा
पि भट्टान्भिक्षुं द्विजं गुरुम् ॥ ९७ ॥ स्वालयं च ययुः सर्वे यादवाश्च मुदाऽन्विताः ॥ ये ये हरेः पार्षदाश्च ते सर्वे स्वालयं ययुः
॥ ९८ ॥ प्रभाते चाययुः सर्वे सुधर्मां च सभां हरेः ॥ नमस्कृत्य महेन्द्रं च चोषुः सर्वे च संसदि ॥ ९९ ॥ इति श्री
ब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे द्वारकाप्रवेश उग्रसेनाभिषेके चतुरधिकशततमोऽध्यायः
॥ १०४ ॥ श्रीनारायण उवाच ॥ अथ वैदर्भराजेन्द्रो महाबलपराक्रमः ॥ विदर्भदेशे पुण्यात्मा सत्यशीलश्च भीष्मकः
॥ १ ॥ राजा नारायणांशश्च दाता च सर्वसंपदाम् ॥ धर्मिष्ठश्च गरीयांश्च वरिष्ठश्चापि पूजितः ॥ २ ॥ तस्य कन्या महालक्ष्मी रुक्मि
णी योषितां वरा ॥ अतीव सुन्दरी रम्या रमा रामासु पूजिता ॥३॥ नवयौवनसंपन्ना रत्नाभरणभूषिता ॥ तप्तकाञ्चनवर्णाभा तेजसो
ज्ज्वलिता सती ॥४॥ शुद्धसत्त्वस्वरूपा सा सत्यशीला पतिव्रता ॥ शान्ता दान्ता नितान्ता चाप्यनन्तगुणशालिनी ॥५॥ इन्द्राणी व
रुणानी च चन्द्रनारी च रोहिणी ॥ कुबेरपत्नी सूर्यस्त्री स्वाहा शान्ता कलावती ॥ ६ ॥ अन्यासु रमणीयासु श्रेष्ठा च सुमनोहरा ॥
रुक्मिण्या भीष्मकन्यायाः कलां नार्हन्ति षोडशीम् ॥ ७ ॥ तां दृष्ट्वा राजराजेन्द्रो बालक्रीडारतां पराम् ॥ बालां सुशोभां कुर्वन्तीं
यथाऽभ्रेषु विधोः कलाम् ॥ ८ ॥ शरत्पूर्णेन्दुशोभाढ्यां शरत्कमललोचनाम् ॥ विवाहयोग्यां युवतीं लज्जानम्राननां शुभाम् ॥ ९ ॥
सहसा चिन्तितो धर्मो धर्मशीलश्च सुव्रतः ॥ सुतां पप्रच्छ पुत्रांश्च ब्राह्मणांश्च पुरोहितान् ॥ १० ॥ भीष्मक उवाच ॥ कं वृणो
मि सुतार्थं च वरार्हं प्रवरं वरम् ॥ मुनिपुत्रं देवपुत्रं राजेन्द्रसुतमीप्सितम् ॥११॥ विवाहयोग्या कन्या मे वर्धमाना मनोहरा ॥ शीघ्रं

पश्य वरं योग्यं नवयौवनसंस्थितम्॥१२॥धर्मशीलं सत्यसन्धं नारायणपरायणम् ॥ वेदवेदाङ्गविज्ञं च पण्डितं सुन्दरं शुभम् ॥१३॥
शान्तं दान्तं क्षमाशीलं गुणिनं चिरजीविनम् ॥ महाकुलप्रसूतं च सर्वत्रैव प्रतिष्ठितम्॥१४॥ करोषि राजपुत्रं चेद्रणशास्त्रविशारदम् ॥
महारथं प्रतापार्हं रणमूर्ध्नि च सुस्थिरम् ॥ १५ ॥ करोषि देवपुत्रं चेद्देवं गुणयुतं तथा ॥ करोषि मुनिपुत्रं चेच्चतुर्वेदविशारदम् ॥
॥१६॥ सुवाचकं विचारज्ञं सिद्धान्तेषु नितान्तकम् ॥ नृपेन्द्रवचनं श्रुत्वा तमुवाच मुनेः सुतः ॥१७॥ गौतमस्य शतानन्दो वेदवेदाङ्ग
पारगः ॥ आप्तः प्रवक्ता विज्ञश्च धर्मी कुलपुरोहितः ॥ पृथिव्यां सर्वतत्त्वज्ञो निष्णातः सर्वकर्मसु ॥ १८ ॥ शतानन्द उवाच ॥
राजेन्द्र त्वं च धर्मज्ञो धर्मशास्त्रविशारदः ॥१९॥ पूर्वाख्यानं च वेदोक्तं कथयामि निशामय ॥ भुवो भारावतरणे स्वयं नारायणो भुवि
॥ २० ॥ वसुदेवसुतः श्रीमान्परिपूर्णतमः प्रभुः ॥ विधातुश्च विधाता च ब्रह्मेशशेषवन्दितः ॥ २१ ॥ ज्योतिःस्वरूपः परमो भक्तानु
ग्रहविग्रहः ॥ परमात्मा च सर्वेषां प्राणिनां प्रकृतेः परः ॥२२॥ निर्लिप्तश्च निरीहश्च साक्षी च सर्वकर्मणाम् ॥ राजेन्द्र तस्मै कन्यां
च परिपूर्णतमाय च ॥ २३ ॥ दत्त्वा यास्यसि गोलोकं पितॄणां शतकैः सह ॥ लभ सारूप्यमुक्तिं च कन्यां दत्त्वा परत्र च ॥२४॥
इहैव सर्वपूज्यश्च भव विश्वगुरोर्गुरुः ॥ सर्वस्वं दक्षिणां दत्त्वा महालक्ष्मीं च रुक्मिणीम् ॥२५॥ समर्पणं कुरु विभो कुरुष्व जन्मखं
डनम् ॥ विधात्रा लिखितो राजन्संबन्धः सर्वसंमतः ॥२६॥ द्वारकानगरे कृष्णं शीघ्रं प्रस्थापय द्विजम् ॥ कृत्वा शुभक्षणं तूर्णं सर्वे
षामपि संमतम् ॥ २७ ॥ आनीय परमात्मानं भक्तानुग्रहविग्रहम् ॥ ध्यानानुरोधहेतुं च नित्यदेहमनुत्तमम्॥२८॥दृष्टिमात्रात्कुरु नृप
स्वजन्मकर्मखण्डनम् ॥ यं न जानन्ति चत्वारो वेदाः सन्तश्च देवताः॥२९॥ सिद्धेन्द्राश्च मुनीन्द्राश्च देवा ब्रह्मादयस्तथा ॥ ध्यायन्ते
ध्यानपूताश्च योगिनो न विदन्ति यम् ॥३०॥ सरस्वती जडीभूता वेदाः शास्त्राणि यानि च ॥ सहस्रवक्रः शेषश्च पञ्चवक्रः सदाशि
वः ॥ ३१ ॥ चतुर्मुखो जगद्धाता कुमारः कार्त्तिकस्तथा ॥ ऋषयो मुनयश्चैव भक्ताः परमवैष्णवाः ॥ ३२ ॥ अक्षमाः स्तवने यस्य
ध्यानासाध्यश्च योगिनाम् ॥ बालकोऽहं महाराज तद्गुणं कथयामि किम्॥३३॥शतानन्दवचः श्रुत्वा प्रफुल्लवदनो नृपः ॥ आलिङ्ग

नं ददौ तस्मै समुत्थाय जवेन च ॥ ३४ ॥ नानारत्नं सुवर्णं च वस्त्रं च रत्नभूषणम् ॥ ददौ तस्मै प्रदानं च प्रसादसुमुखो नृपः
॥३५॥ गजेन्द्रं तुरंग श्रेष्ठं रथं च मणिनिर्मितम् ॥ रत्नसिंहासनं रम्यं धनं च विपुलं तथा ॥३६॥ भूमिं च सर्वसस्याढ्यां शश्व
दृष्टिकरीं शुभाम् ॥ अकृष्टसाध्यां पूज्यां च ग्रामं सर्वप्रशंसितम् ॥३७॥ एतस्मिन्नन्तरे रुक्मिश्चुकोप नृपनन्दनः ॥ कम्पितोऽधर्मयु
क्तश्च रक्तास्यो रक्तलोचनः ॥३८॥ उवाच पितरं विप्रं सभायामस्थिरस्तदा ॥ उत्थाय तिष्ठन्पुरतः सर्वेषां च सभासदाम् ॥३९॥ रु
क्मिरुवाच ॥ शृणु राजेन्द्र वचनं हितं तथ्यं प्रशंसितम् ॥ त्यज वाक्यं भिक्षुकाणां लोभिनां क्रोधिनामहो ॥ ४० ॥ नर्तकानां च
वैश्यानां भट्टानामर्थिनामपि ॥ कायस्थानां च भिक्षूणामसत्यं वचनं सदा ॥ ४१ ॥ घटकानां नाटकानां स्त्रीलुब्धानां च कामि
नाम् ॥ दरिद्राणां च मूर्खाणां स्तुतिपूर्वं वचः सदा ॥ ४२ ॥ निहत्य कालयवनं राजेन्द्रं दूरतो भिया ॥ उपायेन महाबाहो
लब्धं कृष्णेन तद्धनम् ॥ ४३ ॥ द्वारकायां धनी कृष्णो यवनस्य धनेन च ॥ जरासंधभयेनैव समुद्राभ्यन्तरे गृही ॥४४॥ जरा
संधशतं चैव क्षणेनैव च लीलया ॥ क्षमोऽहं हंतुमेकाकी राज्ञश्चान्यस्य का कथा ॥४५॥ दुर्वाससश्च शिष्योऽहं रणशास्त्रविशारदः ॥
ध्रुवं भीष्मक तेनैव विश्वं संहर्तुमीश्वरः ॥ ४६ ॥ मत्समः पर्शुरामश्च शिशुपालश्च मत्समः ॥ सखा च बलवाञ्छूरः स्वर्गं जेतुं स
च क्षमः ॥४७॥ महेन्द्रं सगणं जेतुमहमीशः क्षणेन च ॥ जित्वा युद्धे जरासन्धं दुर्बलं योगिनं नृप ॥४८॥ अहंकारयुतः कृष्णो वीरं
स्वं मन्यते धिया ॥ यद्यायास्यति मद्ग्रामं विवाहं कर्तुमीप्सितम् ॥ ४९ ॥ ध्रुवं प्रस्थापयिष्यामि क्षणेन यममन्दिरम् ॥ अहो नन्द
स्य वैश्यस्य तस्मै गोरक्षकाय च ॥ ५० ॥ साक्षाज्जाराय गोपीनां गोपालोच्छिष्टभोजिने ॥ करोषि कन्यास्वीकारं देवयोग्यां
च रुक्मिणीम् ॥५१॥ दातुमिच्छसि वाक्येन भिक्षुकस्य द्विजस्य च ॥ राजेन्द्र बुद्धिहीनोऽसि वचनाद्वटुलस्य च ॥५२॥ मा राज
पुत्रो मा शूरो मा कुलीनश्च मा शुचिः ॥ मा दाता मा धनाढ्यश्च मा योग्यो मा जितेन्द्रियः॥५३॥कन्यां देहि सुपुत्राय शिशुपाला
य भूमिप॥ बलेन रुद्रतुष्टाय राजेन्द्रतनयाय च ॥५४॥ निमन्त्रणं कुरु नृप नानादेशभवान्नृपान् ॥ बान्धवांश्च मुनीन्द्रांश्च पत्रद्वारा

त्वरान्वितः ॥५५॥ अङ्गं कलिङ्गं मगधं सौराष्ट्रं वल्कलं वरम्॥राटं वरेन्द्रं वङ्गं च गुर्जराटिं च पेठरम् ॥ ५६ ॥ महाराष्ट्रं विराटं च
मुद्गलं च मुरङ्गकम् ॥ भल्लकं गल्लकं खर्वं दुर्गं प्रस्थापय द्विजम् ॥५७॥ घृतकुल्यासहस्रं च मधुकुल्यासहस्रकम् ॥ दधिकुल्यासहस्रं
च दुग्धकुल्यासहस्रकम् ॥ ५८ ॥ तैलकुल्यापञ्चशतं गुडकुल्याद्विलक्षकम् ॥ शर्कराणां राशिशतं मिष्टान्नानां चतुर्गुणम् ॥ ५९ ॥
यवगोधूमचूर्णानां पिष्टराशिशतं शतम् ॥ पृथुकानां राशिलक्षमन्नानां च चतुर्गुणम् ॥ ६० ॥ गवां लक्षं छेदनं च हरिणानां द्विलक्ष
कम् ॥ चतुर्लक्षं शशानां च कूर्माणां च तथा कुरु ॥ ६१ ॥ दशलक्षं छागलानां भेटानां तच्चतुर्गुणम् ॥ पर्वणि ग्रामदेव्यै च बलिं
देहि च भक्तितः ॥ ६२ ॥ एतेषां पक्वमांसं च भोजनार्थं च कारय ॥ परिपूर्णं व्यञ्जनानां सामग्रीं कुरु भूमिप ॥ ६३ ॥ अथ
श्रुत्वा च तद्वाक्यं राजेन्द्रः सपुरोहितः ॥ चकारामन्त्रणं तूर्णं निजेन मन्त्रिणा सह ॥ ६४ ॥ द्विजं प्रस्थापयामास द्वारकां योग्यमी
प्सितम् ॥ कृत्वा च शुभलग्नं च सर्वेषामभिवाञ्छितम् ॥६५॥ राजा संभृतसंभारो बभूव सत्वरं मुदा ॥ निमन्त्रणं च सर्वत्र चकार
च सुताज्ञया ॥ ६६ ॥ विप्रः सुधर्मां संप्राप्य नृपैर्देवैश्च वेष्टिताम् ॥ प्रददौ पत्रिकां भद्रामुग्रसेनाय भूभृते ॥६७॥ प्रफुल्लवदनो राजा
श्रुत्वा पत्रं सुमङ्गलम् ॥ सुवर्णानां सहस्रं च ब्राह्मणेभ्यो ददौ मुदा ॥ ६८ ॥ दुन्दुभिं वादयामास द्वारकायां च सर्वतः ॥ देवान्मुनी
न्नृपांश्चैव ज्ञातिवर्गांश्च बान्धवान् ॥६९॥ भट्टांश्च भिक्षुकांश्चैव भोजयामास सादरम्॥श्रीकृष्णस्य सुवेषं च कारयामास भूपतिः ॥
॥ ७० ॥ अतीव रम्यमतुलं त्रिषु लोकेषु दुर्लभम् ॥ यात्रां च कारयामस जगतां प्रवरं वरम् ॥ ७१ ॥ वेदमन्त्रेण रम्येण माहेन्द्रे
सुमनोहरे ॥ आदौ ब्रह्मा रथस्थश्च सावित्र्या सहितो ययौ ॥ ७२ ॥ रथस्थश्च महाहृष्टो भवान्या च भवः स्वयम् ॥ शेषश्चापि
दिनेशश्च गणेशश्चापि कीर्तितः ॥७३॥महेन्द्रश्च तथा चन्द्रो वरुणः पर्वतस्तथा॥कुबेरश्च यमो वह्निरीशानोऽपि ययौ मुदा॥७४॥
देवानां च त्रिकोटयश्च मुनीनां षष्टिकोटयः ॥ गजेन्द्राणां त्रिलक्षं च श्वेतच्छत्रं त्रिलक्षकम् ॥ ७५ ॥ उग्रसेनो बभौ राजा नक्षत्रेषु
यथा शशी॥ययौ प्रसन्नवदनः कुण्डिनाभिमुखो बली ॥७६॥ रत्ननिर्माणयानेन बलदेवो महाबलः॥वसुदेवश्चोद्धवश्च नन्दोऽक्रूरश्च

सात्यकिः ॥ ७७ ॥ गोपाला यादवेन्द्राश्च चन्द्रवंश्याश्च ते ययुः ॥ धृतराष्ट्रसुताः सर्वे दुर्योधनपुरोगमाः ॥७८॥ युधिष्ठिरस्तथा
भीमः फाल्गुनो नकुलस्तथा ॥ सहदेवश्च यानैश्च प्रययुः पञ्च.पाण्डवाः ॥७९॥ भीष्मो द्रोणश्च कर्णश्चाप्यश्वत्थामा महाबलः॥
कृपाचार्यश्च शकुनिः शल्यश्च प्रययौ मुदा ॥८०॥ भटानां च त्रिकोटयश्च विप्राणां शतकोटयः॥संन्यासिनां सहस्रं च यतीनां
ब्रह्मचारिणाम् ॥ ८१ ॥ द्विसहस्रं जितक्रोधाश्चावधूतास्तथैव च ॥ उत्पलानां सहस्रं च सहस्रं पुष्पकारिणाम् ॥८२॥ नानाशिल्प
कराश्चैव विचित्रं चित्रमेव च ॥ लक्षं च वाद्यभाण्डानां नर्तकानां च लक्षकम् ॥ ८३ ॥ गन्धर्वाणां गायकानां लक्षमेकं तु नारद ॥
तत्र कल्पे भवत्येव गन्धर्वश्चोपबर्हणः ॥ ८४ ॥ पञ्चाशत्कामिनीभिश्च त्वमेव तेषु मध्यगः ॥ विद्याधरीणां लक्षं च लक्षमप्स
रसां तथा ॥ ८५ ॥ किन्नराणां त्रिलक्षं च गन्धर्वाणां त्रिलक्षकम् ॥ ८६ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड
उत्तरार्द्धे रुक्मिण्युद्वाहे पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥ श्रीनारायण उवाच ॥ एतस्मिन्नन्तरे राजा ककुद्मी च महा
बलः ॥ वरार्थं कन्यकायाश्च ब्रह्मलोकात्समागतः ॥ १ ॥ प्रददौ रेवतीं कन्यां शश्वत्सुस्थिरयौवनाम् ॥ अमूल्यरत्नभूषाढ्यां
त्रिषु लोकेषु दुर्लभाम् ॥ २ ॥ बलाय बलदेवाय संप्रदनेन कौतुकात् ॥ वयो यस्या गतं सत्ये युगानां सप्तविंशतिः ॥ ३ ॥
दत्त्वा कन्यां विधानेन मुनिदेवेन्द्रसंसदि॥गजेन्द्राणां त्रिलक्षं च जामात्रे यौतुकं ददौ ॥४॥ दशलक्षं तुरङ्गाणां रथानां लक्षमेव च॥
रत्नालंकारयुक्तानां दासीनां चापि लक्षकम् ॥५॥ मणिलक्षं रत्नलक्षं स्वर्णकोटिं च सादरम् ॥ वह्निशुद्धांशुकं रम्यं मुक्तामाणिक्य
हीरकम् ॥६॥ दत्त्वा कन्यां च राजेन्द्रो बलाय बलशालिने॥रत्नेन्द्रसारयानेन तैः सार्द्धं कुण्डिनं ययौ ॥७॥ अथान्तरे च निर्बन्धे
साङ्गे मङ्गलकर्मणि ॥ रेवतीं वेशयामास योषितां कमलां कलाम् ॥८॥ देवकी रोहिणी चैव यशोदा नन्दगेहिनी ॥ अदितिश्च दितिः
शान्तिर्जयं कृत्वा च मन्दिरम् ॥ ९ ॥ ब्राह्मणान्भोजयामास ददौ तेभ्यो धनं मुदा ॥ मंगलं कारयामास वसुदेवस्य वल्लभः॥१०॥
अथ देवाश्च मुनयो राजेन्द्राः कटकैः सह ॥ संप्रापुर्लीलामात्रेण कुण्डिनं नगरं मुदा ॥११॥ ददृशुर्नगरं सर्वं ह्यतीव सुमनोहरम् ॥

सप्तभिः परिखाभिश्च गभीराभिश्च वेष्टितम् ॥ १२ ॥ प्राकारैः सप्तभिर्युक्तं द्वाराणां शतकैस्तथा ॥ नानारत्नैश्च मणिभिर्निर्मितं विश्वकर्मणा ॥ १३ ॥ नगरस्य बहिर्द्वारं ददृशुर्वैरयात्रिणः ॥ रक्षितं रक्षकैः सार्द्धं चतुर्भिश्च महारथैः ॥ १४ ॥ रुक्मिश्च शिशुपालश्च दन्तवक्रो महाबली ॥ शाल्वो मायाविनां श्रेष्ठो युद्धशास्त्रविशारदः ॥१५॥ नानाशस्त्रैस्तथाऽस्त्रैश्च रथस्थश्च रणोन्मुखः ॥ विलोक्य कृष्णसैन्यं च चुकोप नृपनन्दनः ॥ १६ ॥ उवाच निष्ठुरं वाक्यं श्रुतितीक्ष्णं सुदुष्करम् ॥ उपहास्यं मुनीन्द्रांश्च देवांश्च मुनिपुंगवान् ॥ १७ ॥ रुक्मिरुवाच ॥ अहो कालकृतं कर्म दैवं च केन वार्यते ॥ किं वाऽहं कथयिष्यामि देवेन्द्राणां च संसदि ॥१८ ॥ ग्रहीतुं रुक्मिणीं कन्यां देवयोग्यां मनोहराम् ॥ आयाति देवैर्मुनिभिर्नन्दस्य पशुरक्षकः ॥ १९ ॥ साक्षाज्जारश्च गोपीनां गोपोच्छिष्टान्नभोजनः ॥ जातेश्च निर्णयो नास्ति भक्ष्यमैथुनयोस्तथा ॥ २० ॥ किन्तु राजेन्द्रपुत्रश्च किन्तु वा मुनिपुत्रकः ॥ वसुदेवः क्षत्रियश्च भक्षणं वैश्यमन्दिरे ॥ २१ ॥ शिशुकाले च स्त्रीहत्या कृताऽनेन दुरात्मना ॥ कुब्जा मृता च संभोगाद्वाससा रजको मृतः ॥ २२ ॥ राजेन्द्रस्य वधो दुष्टो ब्रह्महत्यां लभेद्ध्रुवम् ॥ मथुरायां च धर्मिष्ठः सद्यः कंसो निपातितः ॥२३॥ शाल्व उवाच ॥ यदुक्तं रुक्मिणा देव किमसत्यं च तत्र वै ॥ को वाऽयं रुक्मिणीभर्ता नन्दस्य पशुरक्षकः॥२४॥ शिशुपाल उवाच ॥ अहो भुवि किमाश्चर्यं देवा ब्रह्मादयस्तथा ॥ मुनीन्द्रा ब्रह्मणः पुत्राश्चाययुर्मानवाज्ञया ॥२५॥ दन्तवक्र उवाच ॥ संततं ब्राह्मणा लुब्धा देवाश्च भक्तवत्सलाः ॥ आययुर्ब्रह्मपुत्राश्च नन्दपुत्राज्ञया कथम् ॥२६ ॥ तेषां च वचनं श्रुत्वा चुकोप देवसंघकः ॥ मुनिराजेन्द्रसंघश्च लाङ्गलीत्यादिकं तथा ॥ २७ ॥ इति श्रीब्रह्मवैवर्तें महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धें नारायणनारदसंवादे रुक्मिण्युद्वाहे षडधिकशततमोऽध्यायः॥१०६॥ श्रीनारायण उवाच ॥ अथ कोपपरीतश्च बलदेवो महाबलः ॥ हलेन रुक्मियानं च बभञ्ज मुनिपुंगव ॥१॥ घोटकान्सारथिं चैव निहत्य जगतीपतिः ॥ भूमिष्ठं चापि पापिष्ठं रुक्मिं हन्तुं जगाम सः ॥ २ ॥ रुक्मी च शरजालेन वारयामास लीलया ॥ नागास्त्रं योजयामास बद्धुं हलिनमीश्वरम् ॥३॥ नागास्त्रं गारुडेनैव संजहार हली स्वयम् ॥ जग्राह कोपाद्रुक्मी च परं पाशुपतं मुने ॥ ४ ॥

अव्यर्थं वैरिमर्दं च शतसूर्यसमप्रभम् ॥ अभितो हलिना[रुक्मी जृम्भणास्त्रेण जृम्भितः ॥ ५ ॥ भूमिष्ठः स्थाणुवद्रुक्मी निद्रास्त्रेणैव
निद्रितः ॥ शाल्वस्तं निद्रितं दृष्ट्वा शतबाणान्मुमोच तम् ॥६॥ शैलवृष्टिं शिलावृष्टिं जलवृष्टिं चकार सः ॥ ज्वलदङ्गारवृष्टिं च शर
वृष्टिं चकार ह ॥ ७ ॥ बलाच्चास्त्रेण सर्वाणि वारयामास लाङ्गली ॥ हलेन तद्रथं चूर्णं चकार रणमध्यतः ॥ ८ ॥ घोटकान्सारथिं
चैव जघान चैव लीलया ॥ कोपाद्धलेन तं हन्तुं वाग्बभूवाशरीरिणी॥९॥त्यज शाल्वं कृष्णवध्यं तव किं पौरुषं रणे ॥ यस्य मूर्ध्नि
च ब्रह्माण्डं शूर्पे च सर्षपं यथा ॥१०॥ तच्छ्रुत्वा बलदेवश्च हलेन तस्य मस्तकम् ॥ चकार चूर्णं व्यथितः पपात रणमूर्धनि ॥ ११॥
शाल्वस्य पतनं दृष्ट्वा शिशुपालो महाबली ॥ चकार शरवृष्टिं च जलवृष्टिं तथा भुवि ॥ १२ ॥ हली तस्य रथं चूर्णं चकार लाङ्गलेन
च ॥ अर्द्धचन्द्रेण तद्बाणान्वारयामास लीलया॥ १३॥तं हन्तुं शंकरः साक्षान्निषेधं च चकार तम् ॥ कृष्णवध्यं त्यज बल पार्षदप्रवरं
हरेः ॥१४॥ दन्तवक्रस्य दन्तं च बभञ्ज स हलेन च ॥ सुप्रवृत्तस्य युद्धेन ते सर्वे जहसुश्च तम्॥१५॥बलस्य विक्रमं दृष्ट्वा सर्वे वीराः
पलायिताः ॥ चक्रुः प्रवेशनं सर्वे कुण्डिनं वरयात्रिकाः ॥१६॥ एतस्मिन्नन्तरे तत्र शतानन्दो महामुनिः ॥ कोटिभिर्मुनिभिः सार्द्धमाज
गाम हरेः पुरः ॥ १७ ॥ पुरं प्रवेशयामास शतद्वारं च दुर्गमम् ॥ अगम्यं चापि शत्रूणां मित्राणां च सुखप्रदम् ॥ १८ ॥ देवकन्या
नागकन्या राजकन्यास्तथैव च ॥ मुनिकन्या वरं द्रष्टुं सस्मिताश्च समाययुः ॥ १९ ॥ ददृशुर्योषितः सर्वा निमेषरहितेन च ॥ प्रसन्नं
कारयामास सस्मितश्चन्द्रशेखरः ॥२०॥ रत्नेन्द्रसारनिर्माणरथस्थं परमेश्वरम् ॥ सर्वेषां परमात्मानं भक्तानुग्रहविग्रहम् ॥२१॥ नवीन
जलदश्यामं शोभितं पीतवाससा ॥ चन्दनोक्षितसर्वाङ्गं वनमालाविभूषितम् ॥ २२ ॥ रत्नकेयूरवलयरत्नमालाकुलोज्ज्वलम् ॥
रत्नकुण्डलयुग्मेन गण्डस्थलविराजितम्॥२३॥रत्नेन्द्रसारनिर्माणक्वणन्मञ्जीररञ्जितम्॥सस्मितं मुरलीहस्तं पश्यन्तं रत्नदर्पणम्॥२४॥
सप्तभिः पार्षदैर्गोपैः सेवितं श्वेतचामरैः ॥ नवयौनवसंपन्नं शरत्कमललोचनम् ॥२५॥ शरत्पूर्णेन्दुतुल्यास्यं भक्तानुग्रहकारकम् ॥ कोटि
कन्दर्पसौन्दर्यं सत्यं नित्यं सनातनम् ॥२६॥ तीर्थपूतं कीर्तिपूतं ब्रह्मेशशेषवन्दितम् ॥ परमाह्लादकं रूपं कोटिचन्द्रसमप्रभम् ॥ २७ ॥

ध्यानासाध्यं दुराराध्यं परमं प्रकृतेः परम् ॥ दूर्वया पट्टसूत्रं च रत्नेन्द्रसारदर्पणम् ॥ २८ ॥ दधानं कर्तृकासाध्यं कदल्याः स्फुटमञ्ज
रीम्॥चूडां त्रिविक्रमाकारां मालतीमाल्यभूषिताम् ॥२९॥ पुष्पं नारीप्रदत्तं च मुकुटं मस्तकोज्ज्वलम् ॥ दृष्ट्वा वरं युवत्यश्च मूर्च्छां संप्रा
पुरीश्वरम् ॥ ३० ॥ रुक्मिणीजीवनं धन्यं श्लाघ्यमित्यूचुरीप्सितम् ॥ जामातरं सा ददर्श राज्ञी भीष्मककामिनी ॥ ३१ ॥ निमेष
रहिता तुष्टा प्रसन्नवदनेक्षणा ॥ राजा प्रसन्नवदनः सामात्यः सपुरोहितः ॥ ३२ ॥ समागत्य सुरान्विप्रान्भूतांश्च प्रणनाम सः ॥
ददौ योग्याश्रमं तेभ्यो भक्ष्यं पूर्णं सुधोपमम् ॥ ३३ ॥ दिवानिशं चाप्युवाच दीयतां दीयतामिति ॥ सुखं निनाय रजनीं देवैश्च
बान्धवैः सह ॥३४॥ वसुदेवः प्रभाते च प्रातःकृत्यं चकार सः ॥ स्नात्वा सन्ध्यादिकं कृत्वा धृत्वा धौते च वाससी ॥ ३५ ॥ चकार
वेदमन्त्रेण शुभाधिवासनं हरेः ॥ संपूज्य मातृकाः सर्वाः साक्षाच्च सर्वदेवताः ॥ ३६ ॥ प्रदाय वसुधारां च वृद्धिश्राद्धादिकं तथा ॥
ब्राह्मणान्भोजयामास देवांश्च बान्धवांस्तथा ॥ ३७ ॥ वाद्यं च वादयामास कारयामास मङ्गलम् ॥ सुवेषं कारयामास वरस्याप्रति
मस्य च ॥ ३८ ॥ सज्जं च कारयामास नरयानं सुशोभनम् ॥ एवं राजा भीष्मकश्च विवाहार्हं च मङ्गलम् ॥३९॥ पुरोहितैर्वेदमन्त्रैः
सर्वं कर्म चकार सः ॥ मणिरत्नं धनं वाऽपि मुक्तामाणिक्यहीरकम् ॥४०॥ भक्ष्यद्रव्यं च वस्त्रं चाप्युपहारमनुत्तमम् ॥ भट्टेभ्यो
ब्राह्मणेभ्योऽपि भिक्षुकेभ्यो ददौ मुदा ॥ ४१ ॥ वाद्यं च वादयामास कारयामास मङ्गलम् ॥ सुवेषं कारयामास रुक्मिण्याश्च मनोह
रम् ॥४२॥ राज्ञीभिर्मुनिपत्नीभिर्विधानं च यथोचितम् ॥ ततः शुभे क्षणे प्राप्ते माहेन्द्रे परमोदये ॥ ४३ ॥ विवाहोचितलग्ने च लग्ना
धिपतिसंयुते ॥ सद्ग्रहेक्षणशुद्धे चाप्यसतां दृष्टिवर्जिते ॥ ४४ ॥ शुभक्षणे शुभर्क्षे च विशुद्धे चन्द्रतारयोः ॥ वेधदोषादिरहिते शलाका
दिविवर्जिते ॥४५॥ दम्पत्योः शर्मयोग्ये च परिणामसुखप्रदे ॥ एवंभूते च समये भीष्मकप्राङ्गणं हरिः ॥४६॥ आजगाम सुरैः सार्द्धं
मुनिविप्रपुरोहितैः ॥ ज्ञातिभिर्बान्धवैः सार्द्धं पित्रा मात्रा नृपैस्तथा ॥ ४७ ॥ गोपालकैः पार्षदैश्च वयस्यैश्च मनोहरैः ॥ भट्टैश्च गण
कैश्चैव ज्योतिःशास्त्रविशारदैः ॥ ४८ ॥ वाद्यैर्नानाविधैश्चैव नर्त्तकैर्गायनैस्तथा ॥ नानाशिल्पकरैश्चैव मालाकारैस्तथाऽपरैः ॥ ४९ ॥

विद्याधर्यप्सरोभिश्च किन्नरीभिश्च सत्वरम् ॥ स्थलं च ददृशुर्देवा मुनयश्च नृपेश्वराः ॥ ५० ॥ सर्वे समागता ये च विवाहदर्शनोत्सु
काः ॥ रम्भास्तंभसहस्रैश्च पट्टसूत्रपरिष्कृतैः ॥५१॥ चम्पकानां चन्दनानां रसालानां च पल्लवैः ॥ माल्यैर्नानाविधैश्चैव पीतरक्तसिता
न्वितैः ॥५२॥ परितो मङ्गलघटैः फलपल्लवसंयुतैः ॥ कस्तूरीचन्दनाक्तैश्च कुङ्कुमेन विराजितैः ॥५३॥ पर्णैर्लाजैः फलैः पुष्पैर्दूर्वाभि
रुपशोभितैः ॥ मुनिभिर्ब्राह्मणैश्चैव राजेन्द्रैरपि वेष्टितम् ॥५४॥ रत्नेन्द्रसारनिर्माणवेदीयुक्तं मनोहरम् ॥ चर्चितं चन्दनस्निग्धैः कस्तूरी
कुङ्कुमान्वितैः ॥ ५५ ॥ सुगन्धिशीतमन्दैश्च पवनैः सुरभीकृतम् ॥ रत्नानां च सहस्रैश्च ज्वलितं ज्वलदीपकैः ॥ ५६ ॥ नानाप्रकारधू
पैश्च गन्धद्रव्यैः सुवासितम् ॥ चित्रैर्विचित्रैर्विविधैः शिल्पिनां पुण्यकारिणाम् ॥ ५७ ॥ परितः परितश्चैव शोभनार्हैः सुशोभनैः ॥
गन्धर्वाणां च संगीतैर्मधुरैर्मधुरीकृतम्॥५८॥विद्याधरीणां नृत्यैश्च नर्तकीनां च शिल्पिनाम् ॥ तत्र निश्चेष्टचित्रैश्च जनराजिविराजितम्
॥ ५९ ॥ गुप्तद्वारैर्गवाक्षैश्च युवतीभिश्च वीक्षितम् ॥ मङ्गलेन घटेनैव विदुषा च पुरोधसा ॥ ६० ॥ कुशहस्तेन भूपेन दानेन दानव
स्तुना॥दृष्ट्वा च प्राङ्गणे राज्ञो देवा ब्रह्मादयस्तथा ॥६१॥अवरुह्य रथात्तूर्णं तिष्ठन्ति प्राङ्गणे मुदा ॥ राजेन्द्रा दानवेन्द्राश्च मुनयः सनका
दयः ॥ ६२ ॥ श्रीकृष्णश्चापि भगवान्पार्षदप्रवरैः सह ॥ तान्दृष्ट्वा सहसोत्थाय जवेन भीष्मकस्तथा ॥ ६३ ॥ मूर्ध्ना ववन्दे देवांश्च
मुनीन्द्रांश्च नृपांस्तथा ॥ रत्नसिंहासने चैव सुरम्येषु पृथक्पृथक् ॥६४॥ क्रमतो वासयामास संपूज्य सादरेण च ॥ राजा तुष्टाव
भक्त्या च तान्सर्वान्भक्तिपूर्वकम् ॥ वसुदेवं वासुदेवं साश्रुनेत्रः पुटाञ्जलिः ॥ ६५ ॥ भीष्मक उवाच ॥ अद्य मे सफलं
जन्म जीवितं च सुजीवितम् ॥ ६६ ॥ बभूव जन्मकोटीनां कर्ममूलनिकृन्तनम् ॥ स्वयं विधाता जगतां प्रदाता सर्वसंप
दाम् ॥ ६७ ॥ स्वप्ने यत्पादपद्मं च द्रष्टुं नैव क्षमः प्रभो ॥ तपसां फलदाता च स स्रष्टा प्राङ्गणे मम ॥ ६८ ॥ स्वात्मारामेषु पूर्णेषु
शुभप्रश्नमभीप्सितम् ॥ योगीन्द्रैरपि सिद्धेन्द्रैः सुरेन्द्रैश्च मुनीन्द्रकैः ॥६९॥ ध्यानादृष्टश्च यो देवः स शिवः प्राङ्गणे मम ॥ कालस्य
कालो भगवान्मृत्योर्मृत्युश्च यः प्रभुः ॥ ७० ॥ मृत्युंजयश्च सर्वेशो नराणां दृष्टिगोचरः ॥ यस्य मूर्ध्नां सहस्रेषु मूर्ध्नि विश्वं चराच

रम् ॥ ७१ ॥ नास्त्यन्तः सर्ववेदेषु सोऽयं च मम प्रांगणे ॥ सर्वकामप्रणेयो हि सर्वाग्रे यस्य पूजनम् ॥ श्रेष्ठो देवगणानां च
स गणेशो ममांगणे ॥ ७२ ॥ मुनीनां वैष्णवानां च प्रवरो ज्ञानिनां गुरुः ॥ सनत्कुमारो भगवान्प्रत्यक्षः प्रांगणे मम ॥ ७३ ॥
ब्रह्मपुत्राश्च पौत्राश्च प्रपौत्राश्चापि वंशजाः ॥ ते सर्वे मद्गृहेऽद्यैव ज्वलन्तो ब्रह्मतेजसा ॥ ७४ ॥ अहो कल्पान्तपर्यन्तं तीर्थीभूतो
ममाश्रयः ॥ येषां पदोदकैस्तीर्थं विशुद्धं तद् गृहं मम ॥ ७५ ॥ पृथिव्यां यानि तीर्थानि तानि तीर्थानि सागरे ॥ सागरे या
नि तीर्थानि विप्रपादेषु तानि च ॥ ७६ ॥ विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी ॥ तावत्पुष्करपत्रेषु पिबन्ति पितरो जलम् ॥
॥ ७७ ॥ विप्रपादोदकं भुक्त्वा दत्त्वा विप्राय दक्षिणाम् ॥ स्नातानां सर्वतीर्थानां फलमाप्नोति निश्चितम् ॥ ७८ ॥ निकृन्तनं च वि
पदां व्याधिनिर्मूलकारणम् ॥ सुखदं शुभदं सारं विप्रपादोदकं नृणाम् ॥ ७९ ॥ न गङ्गासदृशं तीर्थं न देवो माधवात्परः ॥ सन
त्कुमाराद्भक्तो न न हि कल्पतरोस्तरुः ॥ ८० ॥ न पुष्पं पारिजाताच्च न व्रतं हरिवासरात् ॥ पूजने न हि पूज्यं च न पत्रं तुलसीप
रम् ॥ ८१ ॥ न देवी प्रकृतेश्चापि नाधारः पवनात्परः ॥ न हि स्थूलो महाविष्णोर्न सूक्ष्मं परमाणुतः ॥८२॥ न ब्राह्मणात्परः पूतो
नाश्रमश्च परः प्रभुः ॥ न देवो न परः कोऽपि इत्याह कमलोद्भवः ॥ ८३ ॥ ब्रह्मविष्णुशिवादीनां प्रकृतेश्च परः प्रभुः ॥ ध्यानासाध्यो
दुराराध्यो योगिनामपि निश्चितम् ॥ ८४ ॥ निर्गुणश्च निराकरो भक्तानुग्रहविग्रहः ॥ स एव चक्षुषो नृणां साक्षाद्देवश्च मद्गृहे
॥ ८५ ॥ देवैर्ब्रह्मेशशेषैश्च ध्यातं यत्पादपङ्कजम् ॥ धनेशेन गणेशेन दिनेशेनापि दुर्लभम् ॥८६॥ इत्युक्त्वा भीष्मकः कृष्णं समा
नीय स्वयं पुरः ॥ तुष्टाव सामवेदोक्तस्तोत्रेण परमेश्वरम् ॥ ८७ ॥ भीष्मक उवाच ॥ सर्वान्तरात्मा सर्वेषां साक्षी निर्लिप्त एव
च ॥ कर्मिणां कर्मणामेव कारणानां च कारणम् ॥ ८८ ॥ केचिद्वदन्ति त्वामेकं ज्योतीरूपं सनातनम् ॥ केचिच्च परमात्मानं जी
वो यत्प्रतिबिम्बकः ॥ ८९ ॥ केचित्प्राकृतिकं जीवं सगुणं भ्रान्तबुद्धयः ॥ केचिन्नित्यशरीरं च बुद्धाश्च सूक्ष्मबुद्धयः ॥९० ॥ज्योतिर
भ्यन्तरे नित्यं देहरूपं सनातनम् ॥ कस्मात्तेजः प्रभवति साकारमीश्वरं विना॥९१॥एवं स्तुत्वा स वाचाऽन्तः स्मरन्विष्णुं च नारद ॥

पाद्यं पद्मार्चिते पादपद्मे चार्यं ददौ मुदा ॥ ९२ ॥ अर्घ्यं च प्रददौ तत्र दूर्वापुष्पजलान्वितम् ॥ मधुपर्कं च सुरभि सर्वाङ्गे गन्ध
चन्दनम् ॥ ९३ ॥ यत्प्रदत्तं महेन्द्रेण शुभकर्मणि यौतुकम् ॥ पारिजातस्य माल्यं च जामातुश्च गले ददौ ॥ ९४ ॥ कुबेरेण च यद्द
त्तममूल्यरत्नभूषणम् ॥ चकार वरणं तस्य स राजा भक्तिपूर्वकम् ॥९५॥ वह्निशुद्धांशुकयुगं यद्दत्तं वह्निना पुरा ॥ ददौ तदेव कृष्णा
य परिपूर्णतमाय च ॥ ९६ ॥ ज्वलितं रत्नमुकुटं यद्दत्तं विश्वकर्मणा ॥ ददौ तन्मस्तके राजा कृष्णस्य परमात्मनः ॥ ९७ ॥ धूपं
रत्नप्रदीपं च नैवेद्यं सुमनोहरम् ॥ नानाप्रकारपुष्पं च रत्नसिंहासनं ददौ ॥ ९८ ॥ सप्ततीर्थोदकं चैव पुनराचमनीयकम् ॥ ताम्बूलं
च वरं रम्यं कर्पूरादिसुवासितम् ॥९९॥ शय्यां रतिकरीं रम्यां पानार्थं वासितं जलम् ॥ कृत्वा च वरणं राजा परिहारं चकार तम्
॥ १०० ॥ कृताञ्जलिपुटो राजा तस्मै पुष्पाञ्जलिं ददौ ॥ १०१ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे
नारायणनारदसंवादे रुक्मिण्युद्वाहे सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥ श्रीनारायण उवाच ॥ एतस्मिन्नन्तरे देवी महाल
क्ष्मीश्च रुक्मिणी ॥ आजगाम सभामध्ये मुनिदेवादिभिर्युता ॥ १ ॥ रत्नसिंहासनस्था च रत्नालंकारभूषिता ॥ वह्निशुद्धांशुका
धाना कबरीभारभूषिता ॥ २ ॥ पश्यन्ती सस्मिता साध्वी ह्यमूल्यरत्नदर्पणम् ॥ कस्तूरीबिन्दुभिर्युक्ता स्निग्धचन्दनचर्चिता ॥३॥ सि
न्दूरबिन्दुना शश्वद्भालमध्यस्थलोज्ज्वला॥तप्तकाञ्चनवर्णाभा शतचन्द्रसमप्रभा ॥४॥ चन्दनोक्षितसर्वाङ्गा मालतीमाल्यशोभिता॥सप्त
भिर्नृपपुत्रैश्च समानीता च बालकैः ॥५॥ देवेन्द्राश्च मुनीन्द्राश्च सिद्धेन्द्रा नृपपुंगवाः ॥ ददृशू रुक्मिणीं देवीं महालक्ष्मीं पतिव्रताम् ॥
॥ ६ ॥ सप्तप्रदक्षिणाः कृत्वा प्रणम्य स्वपतिं सती ॥ सिषेच शीततोयेन स्निग्धचन्दनपल्लवैः ॥ ७ ॥ तां सिषेच जगत्कान्तः का
न्तां शान्तां च सस्मिताम्॥ददर्श कान्तः कान्तां च कान्ता कान्तं शुभे क्षणे ॥८॥ अथ देवी पितुः क्रोडे समुवास शुभानना॥लज्ज
या नम्रवदना ज्वलन्ती च स्वतेजसा ॥ ९ ॥ राजा देवेश्वरीं तस्मै परिपूर्णतमाय च॥प्रददौ संप्रदानेन वेदमन्त्रेण नारद॥१०॥वसुदे
वाज्ञया कृष्णः स्वस्तीत्युक्त्वा स्थितो मुदा ॥ जग्राह देवीं देवश्च भवानीं च भवो यथा ॥११॥ सुवर्णानां पञ्चलक्षं कृष्णाय परमा

त्मने ॥ दक्षिणां तां ददौ राजा परिपूर्णतमाय च ॥ १२ ॥ शुभकर्मणि निष्पन्ने कृत्वा कन्यां च वक्षसि ॥ रुरोद राजा मोहेन मुनिदेवेन्द्रसंसदि ॥ १३ ॥ परिहारेण वचसा कृत्वा तस्मै समर्पणम् ॥ सिषेच कन्यां धन्यां च नेत्रयुग्मजलेन च ॥ १४ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे रुक्मिण्युद्वाहेऽष्टधिकशततमोऽध्यायः ॥ १०८ ॥

श्रीनारायण उवाच ॥ एतस्मिन्नन्तरे राज्ञी रुक्मिणीजननी शुभा ॥ पतिपुत्रवतीभिश्च साध्वीभिः सहिता मुदा ॥ १ ॥ आगत्य मङ्गलं कृत्वा तत्र निर्मञ्छनादिकम् ॥ दम्पती वेशयामास रत्ननिर्माणमन्दिरम् ॥ २ ॥ नानाविचित्रचित्राढ्यं हीरहारेण भूषितम् ॥ मुक्तामाणिक्यरत्नेन सुदीप्तं दर्पणेन च ॥ ३ ॥ ददर्श कृष्णस्तत्रैव दुर्गां दुर्गतिनाशिनीम् ॥ सरस्वतीं च सावित्रीं रतिं च रोहिणीं सतीम् ॥४॥ देवपत्नीं राजपत्नीं मुनिपत्नीं पतिव्रताम् ॥ रत्नसिंहासनस्थां च रत्नभूषणभूषिताम् ॥ ५ ॥ उत्तस्थुराराद्दृष्ट्वा च श्रीकृष्णं जगतीपतिम् ॥ रत्नसिंहासने रम्ये वासयामास तं मुदा ॥६॥ स्तुतिं चक्रुश्च देवाश्च मुनिपत्न्यश्च माधवम् ॥ पुटाञ्जलियुतास्तत्र क्रमेण च पृथक्पृथक् ॥७॥ भोजयामास राज्ञी च वरेण सह कन्यकाम् ॥ सकर्पूरं सताम्बूलं प्रददौ वासितं जलम् ॥ ॥ ८ ॥ दुर्गा कृष्णाय प्रददौ तत्र मङ्गलपत्रिकाम् ॥ सर्वासामाज्ञया देवी पठेति तमुवाच सा ॥ ९ ॥ पपाठ पत्रिकां कृष्णो देवीसंसदि सस्मितः ॥ लक्ष्मी सरस्वती दुर्गा सावित्री राधिका सती ॥१०॥ तुलसी पृथिवी गङ्गाऽरुन्धती यमुनाऽदितिः ॥ शतरूपा च सीता च देवहूतिश्च मेनिका ॥११॥ देव्यश्चैताश्च दम्पत्योः कुर्वन्तु मङ्गलं परम् ॥ पपाठ चेति कृष्णश्च शुश्रुवुर्जहसुश्च ताः ॥१२॥ ॥ पार्वत्युवाच ॥ रुक्मिणीं रुक्मिणीकान्त त्वां पश्यन्तीं च सस्मिताम् ॥ पश्य प्रौढां रूपवतीं सुन्दरीं नवयौवनाम् ॥ १३ ॥ ॥ सरस्वत्युवाच ॥ तव योग्या च युवती रत्नभूषणभूषिता ॥ त्वां प्रार्थयन्ती सुचिरमवमन्यान्यमीश्वरम् ॥ १४ ॥ ॥ सावित्र्युवाच ॥ यथा वरस्तथा कन्या विधिना योजिता पुरा ॥ विदग्धाया विदग्धेन सर्वत्र सङ्गमः शुभः ॥ १५ ॥ ॥ रत्युवाच ॥ ईश्वरेण परीहासं का वा कर्तुं क्षमा भुवि ॥ ध्यानासाध्यो दुराराध्यश्चावमन्यान्यमीश्वरम् ॥ १६ ॥

॥ गायत्र्युवाच ॥ यथा वरस्तथा कन्या चाक्षुब्धे भैष्मके गृहे ॥ रोहिण्युवाच ॥ सत्यं ब्रूहि जगन्नाथ कामिनीनां च संसदि ॥ कीदृशी राधिका रम्या रुक्मिणी चापि कीदृशी ॥ १७ ॥ सरस्वत्युवाच ॥ राधायां यादृशी प्रीती रुक्मिण्यां नैव तादृशी ॥ सा सङ्गिनी पूर्वकाले सर्वक्रीडासु वर्धिनी ॥ १८ ॥ प्राणाधिष्ठातृदेवी सा पञ्चप्राणाधिका सती ॥ रुक्मिणी कमला साक्षात्संपदाम धिदेवता ॥१९॥ सर्वशक्तिस्वरूपा च कृष्णयस्य परमात्मनः ॥ बुद्धेरप्यधिदेवी च दुर्गा नारायणी परा ॥ ॥ २० ॥ वेदाधिष्ठातृदेवी त्वं सावित्री वेदमातृका ॥ विद्याधिदेवताऽहं च ततोऽन्याश्च कलाकलाः ॥ २१ ॥ न ब्रह्मणि शिवे शेषे गणेशे च दिनेश्वरे ॥ न भक्तेषु च पद्मायां न शिवायां च मय्यपि ॥ २२ ॥ प्रसादो यादृशस्तस्यामन्येषु च न तादृशः ॥ त्रैलोक्ये पृथिवी धन्या सुपुण्यं भारतं यतः ॥२३॥ तत्र वृन्दावनं धन्यं राधापादाब्जचिह्नितम् ॥ सर्वासामपि देवीनां राधा पुण्यवती सती ॥ २४ ॥ राधापादाब्जनखरे ददौ स्निग्धमलक्तकम् ॥ अयमेवमिति श्रुत्वा जहसुः सर्वयोषितः ॥ २५ ॥ ध्यायन्ते दूरतः सर्वा राधा वक्षःस्थलस्थिता ॥ तस्माद्राधां नमस्कृत्य तुलनां मन्यते किल ॥ २६ ॥ सरस्वतीवचः श्रुत्वा सावित्री पार्वती सती ॥ अन्याश्च योषितः सर्वाः साध्वित्यूचुश्च संसदि॥२७॥लोपामुद्राऽनसूया चाप्यहल्याऽरुन्धती तथा ॥ सर्वास्ता मुनिपत्न्यश्च रभसं चक्रुरीश्वरम् ॥२८॥ अथ देवांश्च भूपांश्च मुनीन्द्रांश्चापि भीष्मकः ॥ पूजयामास विधिना भोजयामास सादरम् ॥ २९ ॥ खाद्यतां खाद्यतां लोका दीयतां दीयतामिति ॥ शब्दो बभूव नगरे वाद्यसंगीतमङ्गलैः ॥३०॥ अथ प्रभाते ब्रह्मेशशेषाद्यास्त्रिदशास्तथा ॥ यानमारोहणं भूपाश्चक्रिरे च त्वरान्विताः ॥३१॥ राजा महोग्रसेनश्च वसुदेवस्त्वरान्वितः ॥ कारयामास यात्रां च श्रीकृष्णं रुक्मिणीं सतीम् ॥ ॥ ३२ ॥ सुभद्रा रुक्मिणीमाता कन्यां कृत्वा स्ववक्षसि ॥ रुरोदोच्चैस्तत्सखीभिर्बान्धवैरित्युवाच सा ॥ ३३ ॥ सुभद्रोवाच ॥ क्व यासि मां परित्यज्य वत्से मातरमीश्वरीम् ॥ कथं जीवामि त्वां त्यक्त्वा कथं त्वं वाऽपि जीवसि ॥ ३४ ॥ महालक्ष्मीर्मम गृहात्कन्यारूपा च मायया ॥ वसुदेवालयं यासि वासुदेवप्रिया सती ॥ ३५ ॥ इत्युक्त्वा कन्यकां शोकात्सिषेच नेत्रजैर्जलैः ॥

भीष्मकः साश्रुनेत्रश्च कन्यां कृष्णे समर्प्य च ॥ ३६ ॥ तं च कृत्वा परीहारं रुरोदोच्चैरतीव सः ॥ रुरोद रुक्मिणी देवी श्रीकृष्णश्चापि मायया ॥३७॥ रथमारोपयामास वसुदेवः सुतं वधूम् ॥ एतस्मिन्नन्तरे राजा जामात्रे यौतुकं ददौ ॥३८॥ गजेन्द्राणां सहस्रं च षड्गुणं च तुरंगमम् ॥ दासीनां च सहस्रं च किङ्कराणां शतं शतम् ॥ ३९ ॥ रत्नानां च सहस्रं चैवामूल्यरत्नभूषणम् ॥ स्वर्णानां परिशुद्धानां पञ्चलक्षं च सादरम् ॥ ४० ॥ तोयभोजनपात्राणि कृतानि विश्वकर्मणा ॥ सौवर्णानि च रम्याणि सुरभीः प्रददौ मुदा ॥ ४१ ॥ दुग्धवतीनां धेनूनां सवत्सानां सहस्रकम् ॥ अमूल्यानि च रम्याणि वह्निशुद्धांशुकानि च ॥ ४२ ॥ वसुदेवश्चोग्रसेनो देवैश्च मुनिभिः सह ॥ प्रहृष्टवदनः शीघ्रं द्वारकाभिमुखं ययौ ॥ ४३ ॥ प्रविश्य स्वपुरीं रम्यां कारयामास मङ्गलम् ॥ वाद्यं च वादयामास सुन्दरं सुमनोहरम् ॥ ४४ ॥ देवकी रोहिणी रम्या यशोदा नन्दगेहिनी ॥ अदितिश्च दितिश्चैव तथा च वरकामिनी ॥ ४५ ॥ श्रीकृष्णं रुक्मिणीं रम्यां विलोक्य च पुनः पुनः ॥ गृहं प्रवेशयामास कारयामास मङ्गलम् ॥ ४६ ॥ चतुर्विधं भोजयित्वा देवांश्च मुनिपुंगवान् ॥ नृपांश्च बान्धवांश्चैव परिहारं चकार च ॥ ४७ ॥ भट्टेभ्यो ब्राह्मणेभ्योऽपि ददौ रत्नादिकं मुदा ॥ तांश्चापि भोजयामास परितुष्टांश्च सस्मितान् ॥ ४८ ॥ एवं भुक्त्वा धनं लब्ध्वा ययुः सर्वे गृहं मुदा ॥ मङ्गलं कारयामास वसुदेवस्य वल्लभा ॥ ४९ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे रुक्मिण्युद्वाहे नवाधिकशततमोऽध्यायः ॥ १०९ ॥ श्रीनारायण उवाच ॥ आगतेषु गतेष्वेवं साङ्गे मङ्गलकर्मणि ॥ नन्दो यशोदया सार्द्धं पुत्राभ्याशं समाययौ ॥ १ ॥ यशोदोवाच ॥ ज्ञानं च भवता दत्तं पित्रे नन्दाय माधव ॥ मां चापि मातरं वत्स कृपां कुरु कृपानिधे ॥ २ ॥ मामुद्धर महाभाग धरोद्धारणकारण ॥ भवाब्धितरणे भीमे भीतां च पतितामपि ॥३॥ मायामयी सा प्रकृतिर्भवाब्धितरणे तरिः ॥ त्वमेव कर्णधारश्च भक्तोत्तीर्ण कृपामय ॥ ४ ॥ यशोदावचनं श्रुत्वा जहास पुरुषोत्तमः ॥ उवाच मातरं भक्त्या ज्ञानिनां च गुरोर्गुरुः ॥५॥ श्रीभगवानुवाच ॥ सिद्धियोगात्मकं मातर्ज्ञानं च विषयात्म

कम् ॥ ज्ञानं भक्त्यात्मकं श्रेष्ठं मद्दास्यकारणं शुभम् ॥६॥ ज्ञानं पञ्चविधं प्रोक्तं सर्ववेदेषु संमतम् ॥ भक्त्यात्मकं सर्वपरं तेषां
च लक्षणं शृणु ॥ ७ ॥ क्षुत्पिपासादिकानां च खण्डनं स्वान्तशोधनम् ॥ नाडीनां शोधनं चैव चक्राणामपि भेदनम् ॥ ८॥ शक्ति
कुण्डलिनीयुक्तमीश्वरं चिन्तयेत्ततः ॥ इन्द्रियाणां च दमनं लोभादीनां च वर्धनम् ॥९॥ मूलाधारं स्वधिष्ठानं मणिपूरमनाहतम् ॥
विशुद्धं च तथाऽऽज्ञाख्यं चक्रषट्कं प्रकीर्तितम् ॥ १० ॥ नारीणामपि दुर्बोधं मूर्खाणां च विशेषतः ॥ ज्ञानं योगात्मकं साध्वि
सिद्धानां साध्यमीप्सितम् ॥११॥ जन्तूनामपि सर्वेषां ज्ञानं स्वविषये तथा ॥ सन्तः सर्वे विजानन्ति स्वेच्छया च मदीयया ॥१२॥
सिद्ध्यात्मकं च सिद्धानां नियुक्तं सर्वकर्मसु ॥ चतुस्त्रिंशत्सु सिद्धानां साधनं बोधनं तथा ॥ ज्ञानं मोक्षात्मकं सिद्धं परं निर्वाणकार
णम् ॥ १३ ॥ निवृत्तिमार्गमारूढं भक्तस्तन्नैव वाञ्छति ॥ भक्त्यात्मकं च यज्ज्ञानं तुभ्यं राधा प्रदास्यति ॥ १४ ॥ तस्यां च मानवं
भावं त्यक्त्वाऽऽज्ञां च करिष्यति ॥ नन्दाय दत्तं यज्ज्ञानं तच्च तुभ्यं प्रदास्यति ॥१५॥ गच्छ नन्दव्रजं मातर्नन्देन सह सादरम् ॥इत्युक्त्वा
विनयं कृत्वा जगामाभ्यन्तरं हरिः ॥१६॥ नन्दो यशोदया सार्द्धं प्रययौ कदलीवनम् ॥ ददर्श राधां तत्रैव निद्रितां त्यक्तभूषणाम्॥१७॥
दधानां शुक्लवस्त्रं च निराहारां कृशोदरीम् ॥ पङ्कस्थे पङ्कजदले सजले चन्दनार्चिते ॥ १८ ॥ शयानां शुष्कितौष्ठीं च साश्रुनेत्रां च
मूर्च्छिताम् ॥ ध्यायमानां पदाम्भोजं कृष्णस्य परमात्मनः ॥ १९ ॥ बाह्यज्ञानपरित्यक्तां तन्निविष्टैकमानसाम् ॥ पश्यन्तीं सस्मितं
कान्तं पश्यन्तीमुन्मुखाम्बुजम् ॥ २० ॥ हसन्तीं च रुदन्तीं च स्वप्ने कान्तसमीपतः ॥ सखीभिः परितः शश्वत्सेवितां श्वेतचामरैः
॥ २१ ॥ दिवानिशं रक्षितां च गोपीभिः शतकोटिभिः ॥ सावधानपराभिश्च वेत्रहस्ताभिरीश्वरीम् ॥ २२ ॥ सप्तद्वारेषु युक्ताभिः
परितः प्राङ्गणेषु च ॥ तां दृष्ट्वा विस्मयं प्राप्य सभार्यो नन्द एव च ॥ २३ ॥ ननाम परया भक्त्या दण्डवत्प्रणिपत्य च ॥ निद्रां
त्यक्त्वा च सहसा बुबुधे सेश्वरेच्छया ॥२४॥क्षणेन चेतनां प्राप विषयज्ञानवर्जिताम् ॥ पुरतो दम्पती दृष्ट्वा पप्रच्छ सादरं सती॥उवाच
मधुरं चैवं तत्रैव सखिसंसदि ॥ २५ ॥ राधिकोवाच ॥ कस्त्वं चात्र समायातो ब्रूहि वा किं प्रयोजनम् ॥ न च मे विषयज्ञानं न

जानामि नरं पशुम् ॥ २६ ॥ जलं किं वा स्थलं किं वा किं वा नक्तं दिनं शृणु ॥ स्त्रियं पुमांसं क्लीबं वा नाहं जानामि भेदकम् ॥ २७ ॥ राधिकावचनं श्रुत्वा नन्दश्च विस्मयं ययौ ॥ भीता यशोदा निकटं गोपीसंभाषिता ययौ ॥ २८ ॥ उवास निकटे तस्याः समुवाच प्रियं वचः ॥ उवास तत्र नन्दश्च गोपीदत्तासनेन च ॥ २९ ॥ यशोदोवाच ॥ चेतनं कुरु राधे त्वमात्मानं रक्ष यत्नतः ॥ द्रक्ष्यसि प्राणनाथं च संप्राप्ते मङ्गले दिने ॥ ३० ॥ त्वत्तो विश्वं पवित्रं च स्वकुलं च सुरेश्वरि ॥ गोप्यश्च पुण्यवत्यश्च त्वत्पादाम्बुजसेवया ॥ ३१ ॥ लोका गास्यन्ति त्वत्कीर्तिं तीर्थपूतां सुमङ्गलाम् ॥ सन्तो वेदाश्च चत्वारः पुराणानि पुरातनम् ॥ ३२ ॥ अहं यशोदा नन्दोऽयं बुद्धिरूपे निबोध माम् ॥ वृषभानुसुता त्वं च मां निशामय सुव्रते ॥ ३३ ॥ द्वारकानगराद्भद्रे श्रीकृष्णसन्निधानतः ॥ तवान्तिकमागताऽहं प्रेरिता हरिणा सति ॥३४॥ शृणु मङ्गलवार्तां च मङ्गलं च गदाभृतः ॥ आराद्द्रक्ष्यसि कृष्णं तं हे देवि चेतनं कुरु ॥ ३५ ॥ भक्त्यात्मकं परिज्ञानं देहि मह्यं च साम्प्रतम् ॥ त्वद्भर्तुरुपदेशेन त्वत्समीपं समागतौ ॥ ३६ ॥ पश्चादायास्यति हरिस्त्वां मुहूर्तं वरानने ॥ भविष्यत्यचिरणैव श्रीदाम्नः शापमोचनम् ॥३७॥ यशोदावचनं श्रुत्वा वार्तां प्राप्य गदाभृतः ॥ श्रीकृष्णनामस्मरणाद्दूरीभूतममङ्गलम् ॥ ३८ ॥ संप्राप चेतनं राधा संभाव्य कृष्णमन्तरम् ॥ उवाच मधुरं शान्ता लौकिकीं भक्तिमुत्तमाम् ॥ ३९ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे राधायशोदासंवादे दशाधिकशततमोऽध्यायः ॥ ११० ॥

राधिकोवाच ॥ ज्ञानात्मकश्च परमो ब्रह्मेशशेषपूजितः ॥ ज्ञानं च न ददौ तुभ्यं मन्मूलं प्रेषिता सति ॥ १ ॥ तेनैव च्छद्मना नेतुं भावार्थं बोधयामि किम् ॥ वेदाः सन्तश्च भावार्थं नैव जानन्ति तस्य च ॥२॥ स्त्रीजातिरबला मूढा वस्तुतोऽज्ञानतत्परा ॥ ततस्तद्विरहेणैव संततं हतचेतना॥३॥किं वाऽहं कथयिष्यामि ज्ञानं पञ्चविधेषु च ॥ भक्त्यात्मकं सर्वपरं निबोध कथयामि ते॥४॥श्रीकृष्णस्य वरेणापि त्वं साधो निर्भयो भव ॥ गोलोके चापि पतनं संभवेच्च कुयोगिनः॥५॥तस्मात्सर्वं परित्यज्य भजस्व परमेश्वरम् ॥ पुत्रबुद्धिं परित्यज्य ब्रह्मरूपं निशामय ॥६॥ सर्वं यशोदे भवती परित्यज्य च नश्वरम् ॥ गत्वा वृन्दा

वनं रम्यं पुण्यक्षेत्रं च भारतम् ॥ ७ ॥ कृत्वा त्रिकालस्नानं च निर्मले यमुनाजले ॥ कृत्वाऽष्टदलपद्मं च स्निग्धेन चन्दनेन च ॥८॥
ध्यानेन गर्गदत्तेन शुद्धेन मनसा सति ॥ संपूज्य परमानन्दं सानन्दं व्रज तत्पदम् ॥९॥ कृत्वा निकृन्तनं कर्म पितृभिः शतकैः सह ॥
वैष्णवेन सहालापं कुरुष्व सततं सति ॥१०॥ वरं हुतवहज्वालां भक्तो वाञ्छति पञ्जरम् ॥ वरं च कण्टके वासं वरं च विषभक्षणम् ॥
॥ ११ ॥ हरिभक्तिविहीनानां न सङ्गं नाशकारणम् ॥ स्वयं नष्टो भक्तिहीनो बुद्धिभेदं करोति च ॥ १२ ॥ अङ्कुरो भक्तिवृक्षस्य
भक्तसङ्गेन वर्द्धते ॥ परं हरिकथालापपीयूषासेचनेन च ॥१३॥ अभक्तालापदीपाग्निज्वालायाः कलयाऽपि च ॥ अङ्कुरः शुष्कतां
याति पुनः सेकेन वर्द्धते ॥ १४ ॥ तस्मादभक्तसङ्गं च सावधानः परित्यज ॥ यथा दृष्ट्वा कालसर्पं नरो भीत्वा पलायते ॥ १५ ॥
यशोदे च प्रयत्नेन स्वात्मनः पुत्रमीश्वरम् ॥ राम नारायणानन्त मुकुन्द मधुसूदन ॥१६॥ कृष्ण केशव कंसारे हरे वैकुण्ठ वामन ॥
इत्येकादश नामानि पठेद्वा पाठयेदिति ॥ जन्मकोटिसहस्राणां पातकादेव मुच्यते ॥१७॥ राशब्दो विश्ववचनो मश्चापीश्वरवाचकः ॥
विश्वानामीश्वरो यो हि तेन रामः प्रकीर्तितः ॥ १८ ॥ रमते रमया सार्धं तेन रामं विदुर्बुधाः ॥ रमाया रमणस्थानं रामं रामविदो
विदुः ॥१९॥ रा चेति लक्ष्मीवचनो मश्चापीश्वरवाचकः ॥ लक्ष्मीपतिं गतिं रामं प्रवदन्ति मनीषिणः ॥२०॥ नाम्नां सहस्रं दिव्या
नां स्मरणे यत्फलं लभेत् ॥ तत्फलं लभते नूनं रामोच्चारणमात्रतः ॥ २१ ॥ सारूप्यमुक्तिवचनो नारेति च विदुर्बुधाः ॥ यो देवोऽप्य
यनं तस्य स च नारायणः स्मृतः॥२२॥नाराश्च कृतपापाश्चाप्ययनं गमनं स्मृतम्॥यतो हि गमनं तेषां सोऽयं नारायणः स्मृतः ॥
॥२३॥ सकृन्नारायणेत्युक्त्वा पुमान्कल्पशतत्रयम् ॥ गङ्गादिसर्वतीर्थेषु स्नातो भवति निश्चितम् ॥२४॥ नारं च मोक्षणं पुण्यमयनं
ज्ञानमीप्सितम् ॥ तयोर्ज्ञानं भवेद्यस्मात्सोऽयं नारायणः प्रभुः ॥ २५ ॥ नास्त्यन्तो यस्य वेदेषु पुराणेषु चतुर्षु च ॥ शास्त्रेष्वन्येषु
योगेषु तेनानन्तं विदुर्बुधाः ॥ २६ ॥ मुकुमध्ययमानं च निर्माणं मोक्षवाचकम् ॥ तद्ददाति च यो देवो मुकुन्दस्तेन कीर्तितः ॥
॥ २७ ॥ मुकुं भक्तिरसप्रेमवचनं वेदसंमतम् ॥ यस्तं ददाति भक्तेभ्यो मुकुन्दस्तेन कीर्तितः ॥ २८ ॥ सूदनं मधुदैत्यस्य यस्मात्स

मधुसूदनः ॥ इति संतो वदंतीशं वेदे भिन्नार्थमीप्सितम् ॥ २९ ॥ मधु क्लीबं च माध्वीके कृतकर्मशुभाशुभे ॥ भक्तानां कर्मणां चैव
सदनं मधुसूदनः ॥ ३० ॥ परिणामशुभं कर्म भ्रांतानां मधुरं मधु ॥ करोति सूदनं यो हि स एव मधुसूदनः ॥ ३१ ॥ कृषिरुत्कृ
ष्टवचनो णश्च सद्भक्तिवाचकः ॥ अश्चापि दातृवचनः कृष्णं तेन विदुर्बुधाः ॥ ३२ ॥ कृषिश्च परमानंदे णश्च तद्दास्यकर्मणि ॥
तयोर्दाता च यो देवस्तेन कृष्णः प्रकीर्तितः ॥ ३३ ॥ कोटिजन्मार्जिते पापे कृषिः क्लेशे च वर्तते ॥ भक्तानां णश्च निर्वाणे तेन
कृष्णः प्रकीर्तितः ॥ ३४ ॥ नाम्नां सहस्रं दिव्यानां त्रिरावृत्य च यत्फलम् ॥ एकावृत्या तु कृष्णस्य तत्फलं लभते नरः ॥ ३५ ॥
कृष्णनाम्नः परं नाम न भूतं न भविष्यति ॥ सर्वेभ्यश्च परं नाम कृष्णेति वैदिका विदुः ॥ ३६ ॥ कृष्णकृष्णेति हे गोपि यस्तं स्म
रति नित्यशः ॥ जलं भित्त्वा यथा पद्मं नरकादुद्धरेच्च सः ॥ ३७ ॥ कृष्णेति मंगलं नाम यस्य वाचि प्रवर्तते ॥ भस्मीभवंति सद्य
स्तु महापातककोटयः ॥ ३८ ॥ अश्वमेधसहस्रेभ्यः फलं कृष्णजपस्य च ॥ वरं तेभ्यः पुनर्जन्म नातो भक्तपुनर्भवः ॥ ३९ ॥
सर्वेषामपि यज्ञानां लक्षाणि च व्रतानि च ॥ तीर्थस्नानानि सर्वाणि तपांस्यनशनानि च ॥ ४० ॥ वेदपाठसहस्राणि प्रादक्षिण्यं
भुवः शतम् ॥ कृष्णनामजपस्यास्य कलां नार्हति षोडशीम् ॥ ४१ ॥ तेषां लोभाद्भवेत्स्वर्गफलं च सुचिरं नृणाम् ॥ स्वर्गादवश्यं
पुंसश्च जपकर्तुर्हरेः पदम् ॥४२॥ के जले सर्वदेहेऽपि शयनं यस्य चात्मनः ॥ वदंति वैदिकाः सर्वे तं देवं केशवं परम्॥४३॥कंसश्च
पातके विघ्ने रोगे शोके च दानवे ॥ तेषामरिर्निहंता च स कंसारिः प्रकीर्तितः ॥ ४४ ॥ रुद्ररूपेण संहर्ता विश्वानामपि नित्यशः ॥
भक्तानां पातकानां च हरिस्तेन प्रकीर्तितः ॥ ४५ ॥ मा च ब्रह्मस्वरूपा या मूलप्रकृतिरीश्वरी ॥ नारायणीति विख्याता विष्णु
माया सनातनी ॥ ४६ ॥ महालक्ष्मीस्वरूपा च वेदमाता सरस्वती ॥ राधा वसुंधरा गंगा तासां स्वामी च माधवः ॥ ४७ ॥
ब्रह्मेशशेषादिभवैश्च वंद्यं ध्यानैर्न किंचित्सनकादिभिश्च ॥ वेदैः पुराणैर्न निरूपितं च भजस्व भक्त्या नवनीतचोरम् ॥४८॥ क्व चापि
दुग्धं क्व दधि घृतं वा नवोद्धृतं वा क्व च तक्रमीप्सितम्॥तेषां क्व चौरो भवति क्व चापि क्व बंधनं ते भवमूलमध्ये॥४९॥न योगि

भिः सिद्धगणैर्मुनीन्द्रैर्न भक्तसंघैर्भवपद्मशेषैः ॥ योगैर्न बद्धो न हि रक्षितुं क्षमैः कथं स बद्धस्तव मूलमध्यतः ॥ ९० ॥ प्रेम्णा नु
भक्त्या स्तवनेन पूजया भजस्व पुत्रं तरसा च भारते ॥ हृत्पद्ममध्ये स्थितमीश्वरं परं ध्यानेन यत्नेन च संततं सति ॥
॥ ९१ ॥ वरं वृणुष्व भद्रं ते यत्ते मनसि वांछितम् ॥ सर्वं दास्यामि जगति देवानामपि दुर्लभम् ॥ ९२ ॥ यशोदो
वाच ॥ हरौ च निश्चला भक्तिस्तद्दास्यं वांछितं मम ॥ तव नाम्नश्च व्युत्पत्तिः का वा तद्वक्तुमर्हसि ॥ ९३ ॥
॥ श्रीराधिकोवाच ॥ भवेद्भक्तिर्निश्चला ते हरेर्दास्यं च दुर्लभम् ॥ लभस्व मद्वरेणापि कथयामि सुनिर्णयम् ॥
॥ ९४ ॥ पुरा नंदेन दृष्टाऽहं भांडीरे वटमूलके ॥ मया च कथितो नंदो निषिद्धश्च व्रजेश्वरः ॥ ९५ ॥ अहमेव स्वयं राधा छाया
रापाणकामिनी ॥ रापाणः श्रीहरेरंशः पार्षदप्रवरो महान् ॥ ९६ ॥ राशब्दश्च महाविष्णुर्विश्वानि यस्य लोमसु॥विश्वप्राणिषु विश्वेषु
धा धात्री मातृवाचकः ॥ ९७ ॥ धात्री माताऽहमेतेषां मूलप्रकृतिरीश्वरी ॥ तेन राधा समाख्याता हरिणा च पुरा बुधैः ॥ ९८ ॥
अहं सुदामशापेन वृषभानसुताऽधुना ॥ शतवर्षं च विच्छेदो हरिणा सह सांप्रतम् ॥९९॥वृषभानश्च कृष्णस्य पार्षदप्रवरो महान्॥
पितृणां मानसी कन्या मम माता कलावती ॥ ६० ॥ अयोनिसंभवाऽहं च मम माता च भारते ॥ पुनः सार्धं च युष्माभिर्यास्यामि
श्रीहरेः पदम् ॥ ६१ ॥इति ते कथितं सर्वं व्रजं व्रज व्रजेश्वरि ॥ व्रजेश्वरेण सहिता स्वामिना ज्ञानिना सति ॥ ६२ ॥ ममाधुना
च भवती ध्यानस्य व्यवधानिका ॥ ध्यानभंगे महादोषो नराणामपि सुंदरि ॥ ६३ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्म
खण्ड उत्तरार्द्धे नारायणनारदसंवादे राधायशोदासंवादे एकादशाधिकशततमोऽध्यायः ॥ १११ ॥ श्रीनारायण उवाच ॥
वासुदेवो द्वारकायां वसुदेवाज्ञया मुने॥प्रययौ रत्नरुचिरं रुक्मिणीमंदिरं वरम् ॥१॥ शुद्धस्फटिकसंकाशममूल्यरत्ननिर्मितम्॥पुरतः
परितो रम्यं नानाचित्रेण चित्रितम् ॥ २ ॥ अमूल्यरत्नकलशं श्वेतचामरदर्पणैः ॥ वह्निशुद्धांशुकैः शुद्धैः परितः परिशोभितम् ॥
॥ ३ ॥ ददर्श रुक्मिणीं देवीमतीव नवयौवनाम् ॥ रत्नपर्यंकमारुह्य शयानां सस्मितां मुदा ॥ ४ ॥ अप्रौढां च नवोढां च नवसंगम

लज्जिताम् ॥ अमूल्यरत्ननिर्माणभूषणेन विभूषिताम् ॥ ५ ॥ सुचारुकबरीभारां मालतीमाल्यभूषिताम् ॥ दृष्ट्वा कृष्णं भीष्मकन्या सहसा प्रणनाम सा ॥ ६ ॥ तां संप्राप्य जगन्नाथो रत्नतल्पे उवास सः ॥ शुभक्षणे च शुभया स रेमे रमया सह ॥ ७ ॥ सुखसंभोगमात्रेण मूर्च्छामाप मुदा सती ॥ तस्यां जज्ञे कामदेवो भस्मीभूतश्च शंभुना ॥ ८ ॥ स शंबरं निहत्यैव तत्र प्राप रतिं सतीम् ॥ रती मायावती नाम्ना संकेतेन सुरस्य च ॥ छायां दत्त्वा च शयने गृहिणी शंबरालये ॥ ९ ॥ नारद उवाच ॥ जहार शंबरं कामो दैत्यं केन प्रकारतः ॥ कथयस्व महाभाग विस्तरेण शुभां कथाम् ॥ १० ॥ नारायण उवाच ॥ समतीते च सप्ताहे रुक्मिणीसूतिकागृहात् ॥ गृहीत्वा बालकं दैत्यो जगाम स्वालयं जवात् ॥ ११ ॥ अपुत्रकश्च दैत्येशः पुत्रं प्राप्य प्रहर्षितः ॥ मायावत्यै ददौ हृष्टो हृष्टा मायावती सती ॥ १२ ॥ अतीव पालनेनैव वर्धयामास बालकम् ॥ सरस्वती तां रहसि कथयामास निर्जने ॥ ॥ १३ ॥ सरस्वत्युवाच ॥ शिवकोपानले पूर्वं भस्मीभूतः पतिस्तव ॥ स चायं रुक्मिणीपुत्रो दैत्येनैव समाहृतः ॥ १४ ॥ माययाऽपि च मायेशो रुक्मिणीसूतिकागृहात् ॥ समानीय ददौ तुभ्यं पतिस्तेऽयं न चात्मजः ॥१५॥ कामं च कथयामास जगन्माता च सा सती ॥ तव पत्नी रतिश्चेयं रमस्व रामया सह ॥ १६ ॥ त्वमेव रुक्मिणीपुत्रो नान्यदैत्यस्य मन्मथः ॥ कुररीव सती नित्यं रोदिति स्म त्वया विना ॥ १७ ॥ इत्युक्त्वा च ययौ वाणी ब्रह्माणी ब्रह्मणः पदम् ॥ स रेमे निर्जने नित्यं रामया सह सुंदरः ॥ ॥ १८ ॥ एकदा मन्मथं दैत्यो ददर्श रहसि स्थितम् ॥ शृंगारं रामया सार्धं कुर्वंतं कौतुकेन च ॥ १९ ॥ सस्मितं सस्मितायाश्च मध्यवक्षःस्थलस्थितम् ॥ रतिं ददर्श कामेन मूर्च्छितां सुरतोत्सुकाम् ॥२०॥ दृष्ट्वा चुकोप दैत्यश्च जग्राह खड्गमुत्तमम् ॥ उवाच खड्गहस्तश्च कामदेवं रतिं सतीम् ॥ २१ ॥ शंबर उवाच ॥ धिक् त्वां महाकामुकं च मूर्खं पंडितमानिनम् ॥ महापातकिनां श्रेष्ठं प्रमत्तं मातृगामिनम् ॥ २२ ॥ धिक् त्वां च पुंश्चलीं मत्तां कामुकीं हतचेतनाम् ॥ पुत्रं गृहीत्वा रहसि करोषि सुरतिं सति ॥ ॥ २३ ॥ इत्येवमुक्त्वा खड्गं च तामेव हंतुमुद्यतः ॥ जिघांसंतं रतिं दैत्यं प्रेरयामास मन्मथः ॥२४॥ पपात दूरतो ब्रह्मन्मूर्च्छितः

Digitization by eGangotri. Funding MIIF-Delhi

स्वांगपीडितः ॥ पुनश्च चेतनां प्राप्य कोपेन प्रज्वलन्निव ॥ २५ ॥ शिवदत्तं च शूलं च जग्राह निर्भरेण च ॥ शतसूर्यप्रभं शूलं
प्रलयाग्निसमं मुने ॥ २६ ॥ दृष्ट्वाऽऽजग्मुश्च देवाश्च ब्रह्मेशशेषसंज्ञकाः ॥ पवनः कथयामास कर्णे कामस्य यत्नतः ॥२७॥ स्मर स्मर
महामायां दुर्गां दुर्गतिनाशिनीम् ॥ पवनस्य वचः श्रुत्वा दुर्गां सस्मार मन्मथः ॥ २८ ॥ शूलं बभूव तस्यांगे रम्यं माल्यं मनो
हरम् ॥ ब्रह्मास्त्रेण च तं दैत्यं जघान मन्मथो मुदा ॥ २९ ॥ रतिं गृहीत्वा यानेन जगाम द्वारकां पुरीम् ॥ प्रययुर्देवताः सर्वाः स्तु
त्वा च पार्वतीं स्वयम् ॥ ३० ॥ रुक्मिणी मंगलं कृत्वा प्रजग्राह रतिं सुतम् ॥ उत्सवं कारयामास परं स्वस्त्ययनं हरिः ॥ ३१ ॥
ब्राह्मणान्भोजयामास पूजयामास पार्वतीम् ॥ अथ कृष्णः क्रमेणैव वेदोक्ते मंगले दिने ॥ ३२ ॥ सप्तानां रमणीनां च पाणि
ग्राहं चकार ह ॥ कालिंदीं सत्यभामां च सत्यां नाग्निजितीं सतीम् ॥ ३३ ॥ जांबवतीं लक्ष्मणां च समुद्वाहं चकार सः ॥ ताभिः
सार्द्धं क्रमेणैव पुत्रोत्पत्तिं चकार ह॥३४॥एकस्यां दश पुत्राश्च कन्यकैका क्रमेण च ॥ निहत्य नरकं दैत्यं सपुत्रं च नृपेश्वरम् ॥३५॥बल
वंतं मुरं दैत्यं जघान रणमूर्धनि ॥ ददर्श कन्यास्तत्रस्थाः सहस्राणां च षोडश ॥ ३६ ॥ शताधिका वयस्याश्च शश्वत्सुस्थिरयौव
नाः ॥ प्रफुल्लवदनाः सर्वा रत्नभूषणभूषिताः ॥३७॥ शुभक्षणे च तासां च पाणिं जग्राह माधवः ॥ ताभिः सार्धं स रेमे च क्रमेण च
शुभक्षणे ॥३८॥ एकस्यां दश पुत्राश्च कन्यकैका क्रमेण च ॥ हरेरेतान्यपत्यानि बभूवुश्च पृथक्पृथक् ॥ ३९ ॥ एकदा द्वारकां रम्यां
दुर्वासा मुनिपुंगवः ॥ शिष्यैस्त्रिकोटिभिः सार्धमाजगामावलीलया ॥ ४० ॥ राजा महोग्रसेनश्च सपुत्रः सपुरोहितः ॥ वसुदेवो वासु
देवोऽप्यक्रूरश्चोद्धवस्तथा ॥ ४१ ॥ नीत्वा षोडशोपचारं प्रणेमुर्मुनिपुंगवम् ॥ शुभाशिषं च प्रददौ तेभ्यो ब्रह्मन्पृथक्पृथक् ॥ ४२ ॥
एकानंशां च कन्यां तां ददौ तस्मै शुभक्षणे ॥ मुक्तामाणिक्यहीरांश्च रत्नं च यौतुकं ददौ ॥ ४३ ॥ स रेमे रामया सार्धं माहेंद्रे रत्न
मंदिरे ॥ रत्नेंद्रसारनिर्माणं ददौ तस्मै शुभाश्रमम् ॥ ४४ ॥ एकदा स मुनिश्रेष्ठः समालोच्य स्वचेतसा ॥ शयनं कुत्रचिद्रम्यपर्यंके
रत्ननिर्मिते ॥ ४५ ॥ श्रुतवंतं पुराणं च श्रद्धया कुत्रचिद्विभुम् ॥ महोत्सवे नियुक्तं च कुत्रचित्प्रांगणे शुभे ॥ ४६ ॥ तांबूलं भुक्तवंतं

च भक्त्या दत्तं च सत्यया ॥ कुत्रचित्सेवितं तल्पे रुक्मिण्या श्वेतचामरैः ॥ ४७ ॥ कालिंदीसेवितपदं शयानं कुत्रचिन्मुदा ॥ सर्वत्र समसंभाषां चकार भगवान्मुनिः ॥ ४८ ॥ विस्मयं प्रययौ विप्रो दृष्ट्वा तत्परमाद्भुतम् ॥ तुष्टाव जगतीनाथं रुक्मिणीमंदिरे पुनः ॥ वसंतं च सुधर्मायां सतां संसदि सुन्दरम् ॥ ४९ ॥ दुर्वासा उवाच ॥ जयजय जगतां नाथ जितसर्व जनार्दन सर्वात्मक सर्वेश सर्वबीज पुरातन निर्गुण निरीह निर्लिप्त निरंजन निराकार भक्तानुग्रहविग्रह सत्यस्वरूप सनातन निःस्वरूप नित्यनूतन ब्रह्मेशशेषधनेशवंदित पद्मया सेवितपादपद्म ब्रह्मज्योतिरनिर्वचनीय वेदाविदितगुणरूप महाकाशसम्माननीय परमात्मन्नमोऽस्तु ते ॥ ५० ॥ इत्येवमुक्त्वा मनसा हरेरनुमतेन च ॥ प्रणम्य तस्थौ विप्रेंद्रस्तत्रैव पुरतो हरेः ॥५१॥ तमुवाच जगन्नाथो हितं सत्यं पुरातनम् ज्ञानं च वेदविहितं सर्वेषां च सतां मतम् ॥ ५२ ॥ श्रीभगवानुवाच ॥ मा भैर्विप्र शिवांशस्त्वं किं न जानासि ज्ञानतः ॥ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ॥ ५३ ॥ अहमात्मा च सर्वेषां शवाः सर्वे मया विना ॥ प्राणिदेहान्मयि गते यांत्येव सर्वशक्तयः ॥ ५४ ॥ जातावप्येक एवाहं व्यक्त एव पृथक्पृथक् ॥ यो भुंक्ते तस्य तृप्तिः स्यान्नान्येषां च कदाचन ॥ ५५ ॥ पृथग्जीवादिसर्वेषां प्रतिमानं च प्राणिनाम् ॥ परिपूर्णतमोऽहं च गोलोके रासमंडले ॥ ५६ ॥ श्रीदामशापाद्राधा सा मां द्रष्टुमक्षमाऽधुना ॥ सर्वे चैवांशरूपेण कलया च तदंशतः ॥ ५७ ॥ रुक्मिणीमंदिरे चांशोऽप्यन्यासां मंदिरे कलाः ॥ ममापि कुत्रचिच्चांशं कुत्रचिच्च कलाकलाः ॥ ५८ ॥ कलाकलांशाः कुत्रापि प्रतिमासु च देहिषु ॥ इत्युक्त्वा जगतां नाथो गृहस्याभ्यंतरं ययौ ॥ ५९ ॥ दुर्वासाश्च प्रियां त्यक्त्वा श्रीहरेस्तपसे गतः ॥ ६० ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायण नारदसंवादे मुनिकृष्णसंवादे द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥ श्रीनारायण उवाच ॥ सशिष्यश्चापि दुर्वासास्त्यक्त्वा च द्वारकां पुरीम् ॥ कैलासं प्रययौ भक्त्या शंकरं द्रष्टुमीश्वरम् ॥१॥ गत्वा मुनिश्च कैलासं प्रणनाम शिवं शिवाम्॥तुष्टाव परया भक्त्या सशिष्यः प्रणतः शुचिः ॥२॥ तत्सर्वं कथयामास वृत्तांतं श्रीहरेरपि॥आत्मनस्तपसस्तत्त्वं स्ववैराग्यं च चेतसः ॥३॥

मुनेश्च वचनं श्रुत्वा प्रहस्य पार्वती सती ॥ तमुवाच हितं सत्यं साक्षाच्छंकरसन्निधौ ॥ ४ ॥ पार्वत्युवाच ॥ धर्मत
त्त्वं न जानासि धर्मिष्ठं मन्यसे स्वकम् ॥ अनपत्यां परित्यज्य क्व यासि तपसे मुने ॥ ५ ॥ अनपत्यां च युवतीं कुलजां च पति
व्रताम् ॥ त्यक्त्वा भवेयुः संन्यासी ब्रह्मचारी यतीति वा॥६॥ वाणिज्ये वा प्रवासे वा चिरं दूरं प्रयाति यः ॥ तीर्थं वा तपसे वाऽपि
मोक्षार्थं जन्म खंडितुम् ॥ ७ ॥ न मोक्षस्तस्य भवति धर्मस्य स्खलनं ध्रुवम् ॥ अभिशापेन भार्याया नरकं च परत्र च ॥ इहैव च
यशोनाश इत्याह कमलोद्भवः ॥ ८ ॥ द्वारकां गच्छ हे विप्र स्वधर्मं रक्ष सांप्रतम् ॥ एकानंशां मदंशां च धर्मतः परिपालय ॥ ९ ॥
पादपद्मार्जितं पादपद्मं सर्वसुदुर्लभम् ॥ संततं शंभुना गीतं मुनींद्रैः सनकादिभिः॥१०॥परित्यज्य सुरतरोः कृष्णस्य परमात्मनः ॥
क्व यासि तपसे वत्स सुधां त्यक्त्वा मनोहराम् ॥ ११ ॥ श्रीकृष्णपादपद्मं च स्वप्ने जपति यो मुने ॥ शतजन्मकृतात्पापान्मु
च्यते नात्र संशयः ॥१२॥ यद्बाल्ये यच्च कौमारे वार्धके यच्च यौवने ॥ कामतोऽकामतो वाऽपि भस्मीभूतं च पातकम् ॥१३॥साक्षा
द्यो भारते वर्षे श्रीकृष्णचरणांबुजम् ॥ दृष्ट्वा सद्यो भवेत्पूज्यो जीवन्मुक्तो भवेद्ध्रुवम्॥१४॥कोटिजन्मार्जितात्सद्यः कृतपापाद्विमुच्यते ॥
सर्वाण्येव हि तीर्थानि यतः पूतानि नित्यशः॥१५॥तद्व्रतं तत्तपः सत्यं तत्पुण्यं तच्च पूजनम्॥सफलं कृष्णसंबंधि स्वजन्मखंडनं यतः
॥१६॥कृष्णभक्तिविहीनश्च ब्राह्मणो वेदपारगः॥तत्संगाच्च तदालापाद्भक्तभक्तिः प्रणश्यति॥१७॥कृष्णस्योच्छिष्टभोजी यः कृष्णश्च ब्रा
ह्मणः स्वयम् ॥ आवह्निपवनात्पूतः पूतं कर्तुं जगत्क्षमः ॥१८॥ श्रीकृष्णं च परित्यज्य क्व यासि तपसे द्विज ॥ तपसां फलमाप्नोति
श्रीकृष्णस्मरणेन च ॥ १९ ॥ यतो भक्तिर्न च भवेच्छ्रीकृष्णे परमात्मनि ॥ स गुरुः परमो वैरी करोति जन्म निष्फलम् ॥२०॥
पार्वतीवचनं श्रुत्वा शंकरः प्रेमविह्वलः ॥ पुलकांचितसर्वांगस्तुष्टाव परमेश्वरीम् ॥२१॥ दुर्वासाः प्रणतिं कृत्वा शिवदुर्गापदांबुजे ॥
स्मारंस्मारं कृष्णपदं पुनश्च द्वारकां ययौ ॥२२॥ तत्र गत्वा हरिं दृष्ट्वा तुष्टाव परमेश्वरम् ॥ एकानंशालयं गत्वा स च रेमे तया सह॥
॥२३॥ कृष्णो युधिष्ठिरध्यानात्प्रययौ हस्तिनापुरम् ॥ कुन्तीं संभाष्य भूपं च भ्रातॄंश्च प्रमुदाऽन्वितः॥२४॥उपायेन जरासंधं निहत्य

शाल्वमेव च ॥ कारयामास यज्ञं च विधिबोधितदक्षिणम् ॥ २५ ॥ मुनीन्द्रैश्च नृपेंद्रैश्च राजसूयमभीप्सितम् ॥ शिशुपालं दन्तवक्रं तत्र यज्ञे जघान सः ॥ २६ ॥ अतीव निंदां कुर्वंतं सभायां सुरभूपयोः ॥ पपात तच्छरीरं च जीवो गत्वा हरेः पदम् ॥ तं दृष्ट्वा तत्र सर्वेशं तुष्टावागत्य माधवम् ॥२७॥ शिशुपाल उवाच ॥ वेदानां जनकोऽसि त्वं वेदांगानां च माधव ॥ २८ ॥ सुराणामसुराणां च प्राकृतानां च देहिनाम् ॥ सूक्ष्मां विधाय सृष्टिं च कल्पभेदं करोषि च ॥ २९ ॥ मायया च स्वयं ब्रह्मा शंकरः शेष एव च ॥ मनवो मुनयश्चैव वेदाश्च सृष्टिपालकाः ॥३०॥ कालांशेनापि कलया दिक्पालाश्च ग्रहादयः ॥ स्वयं पुमान्स्वयं स्त्री च स्वयमेव नपुंसकः ॥ ॥ ३१ ॥ कारणं च स्वयं कार्यं जन्यश्च जनकः स्वयम् ॥ यंत्रस्य च गुणो दोषो यंत्रिणश्च श्रुतौ श्रुतम् ॥ ३२ ॥ सर्वे यंत्रा भवान्यंत्री त्वयि सर्वं प्रतिष्ठितम् ॥ मम क्षमस्वापराधं मूढस्य द्वारिणस्तव ॥ ३३ ॥ ब्रह्मशापात्कुबुद्धेश्च रक्ष रक्ष जगद्गुरो ॥ इत्येवमुक्त्वा क्रमतो जयो विजय एव च ॥३४॥ मुदा तौ ययतुः शीघ्रं वैकुण्ठद्वारमीप्सितम् ॥ शिशुपालस्य स्तोत्रेण सर्वे ते विस्मयं ययुः ॥ ॥ ३५॥ परिपूर्णतमं कृत्वा मेनिरे कृष्णमीश्वरम् ॥ कारयित्वा राजसूयं भोजयामास ब्राह्मणान् ॥ ३६ ॥ कुरुपाण्डवयुद्धं च कारयामास भेदतः ॥ भुवो भारावतरणं चकार स कृपानिधिः ॥३७॥ पुनर्ययौ द्वारकां च चिरं स्थित्वा नृपाज्ञया ॥ विप्राया मृतवत्साया जीवयामास पुत्रकान् ॥३८॥ मृतस्थानात्समानीय तन्मात्रे प्रददौ सुतान् ॥ तद्दृष्ट्वा देवकी तुष्टा ययाचे मृतपुत्रकान् ॥ ३९ ॥ मृतस्थानात्समानीय ददौ मात्रे सहोदरान् ॥ सद्यो जहार दारिद्र्यं सुदाम्नो ब्राह्मणस्य च ॥ ४० ॥ समागतस्य स्वगृहाद्द्वारकां शरणार्थिनः ॥ तस्मै ददौ राजलक्ष्मीं निश्चलां साप्तपौरुषीम् ॥ ४१ ॥ पृथुकानां कणं भुक्त्वा भक्तस्य भक्तवत्सलः ॥ बभूव तस्य राज्यं च यथेंद्रस्यामरावती ॥४२॥ यथा धनेश्वरो देवो धनाढ्यः स बभूव ह ॥ निश्चलां हरिभक्तिं च ददौ दास्यं सुदुर्लभम् ॥ ४३ ॥ अविनाशिनि गोलोके यथेष्टं पदमुत्तमम् ॥ जहार पारिजातं च शक्राहंकारमेव च ॥ ४४ ॥ सत्यां च कारयामास पुण्यकं व्रतमीप्सितम् ॥ वर्धयामास सर्वत्र नित्यं नैमित्तिकं मुने ॥४५॥ तत्र व्रते कुमाराय स्वात्मानं दक्षिणां ददौ ॥ ब्राह्मणान्भोजयामास तेभ्यो

रत्नं ददौ मुदा ॥ ४६ ॥ सत्यभामातिमानं च वर्धयामास सर्वतः ॥ रुक्मिण्या अतिसौभाग्यमन्यासां च नवंनवम् ॥४७॥ वैष्णवानां सुराणां च विप्राणामपि पूजनम् ॥ वर्धयामास सर्वत्र नित्यं नैमित्तिकं मुने ॥ ४८ ॥ परमाध्यात्मिकं ज्ञानमुद्धवाय ददौ प्रभुः ॥ अर्जुनं कथयामास गीतां च रणमूर्धनि ॥ ४९ ॥ कृत्वा निष्कंटकं चैव कृपया च कृपानिधिः ॥ युधिष्ठिराय पृथिवीराज्यलक्ष्मीं ददौ प्रभुः ॥ ५० ॥ दुर्गां च कारयामास वैष्णवीं ग्रामदेवताम् ॥ यज्ञं च कारयामास कोटिहोमान्वितं शुभम् ॥ ५१ ॥ नानाप्रकारनैवेद्यैर्धूपदीपैर्मनोहरैः ॥ ब्राह्मणान्भोजयामास पार्वतीप्रीतये तथा ॥ ५२ ॥ रैवते पर्वते रम्ये चामूल्यरत्नमंदिरे ॥ गणेशं पूजयामास देवानामीश्वरं परम् ॥५३॥ लड्डुकानां तिलानां च सुस्वादु सुमनोहराम् ॥ परितुष्टिं पंचलक्षं नैवेद्यं च ददौ मुदा ॥ लड्डुकं स्वस्तिकानां च सप्तलक्षं सुधोपमम् ॥ ५४ ॥ गणेश्वराय प्रददौ शर्कराशतराशिकम् ॥ पक्वरंभाफलानां च दशलक्षमपूपकम् ॥ ॥ ५५ ॥ मिष्टान्नं पायसं रम्यं स्वादु स्वस्तिकपिष्टकम् ॥ घृतं च नवनीतं च दधि दुग्धं सुधोपमम् ॥५६॥ धूपं दीपं पारिजातपुष्पमाल्यमभीप्सितम् ॥ सुगंधि चंदनं गन्धं वह्निशुद्धांशुकं ददौ ॥ ५७ ॥ यज्ञं च कारयामास कोटिहोमान्वितं शुभम् ॥ ब्राह्मणान्भोजयामास तुष्टाव स गणेश्वरम् ॥५८॥ वाद्यं दशविधं चैव वादयामास तत्र वै ॥ सूर्यं च पूजयामास सांबः कुष्ठक्षयाय च ॥ ५९ ॥ हविष्यं कारयामास तं च सांबं समातरम् ॥ परिपूर्णं वत्सरं चाप्युपहारैरनुत्तमैः ॥ ६० ॥ वरं ददौ च सांबाय स्तोत्रं च भास्करः स्वयम् ॥ ६१ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे गणेशपूजा नाम त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥ श्रीनारायण उवाच ॥ कृष्णपुत्रश्च प्रद्युम्नो महाबलपराक्रमः ॥ तत्पुत्रोऽप्यनिरुद्धश्च विधातुरंश एव च ॥ १ ॥ एकदाऽसावनिरुद्धो नवयौवनसंयुतः ॥ सुप्तो रहसि पर्यंके पुष्पचंदनचर्चिते ॥ २ ॥ स्वप्ने ददर्श युवतीं पुष्पोद्याने सुपुष्पिते ॥ सुगंधिपुष्पे तत्प्रेमस्निग्धचंदनचर्चिते ॥ ३ ॥ शयानां सुस्मितां रम्यां नवयौवनसंयुताम् ॥ अमूल्यरत्ननिर्माणभूषणेन विभूषिताम् ॥ ४ ॥ चारुकेयूरवलयशंखकंकणशोभिताम् ॥ मणिकुण्डलयुग्मेन गण्डस्थलविराजिताम् ॥ ५ ॥

अतीव सूक्ष्मवसनां क्वणन्मंजीररंजिताम् ॥ पक्वबिंबाधरोष्ठीं च शरत्कमललोचनाम् ॥ ६ ॥ शरत्पद्मप्रभामुष्टकोटींदुनिं
दिताननाम् ॥ मुक्तापंक्तिसमासाद्यदंतपंक्तिमनोहराम् ॥ ७ ॥ त्रिवक्रकबरीभारां मालतीमाल्यभूषिताम् ॥ कस्तूरीकुंकुमालक्तस्नि
ग्धचंदनकज्जलैः ॥ ८ ॥ पत्रावलीविरचितसुकपोलस्थलोज्ज्वलाम् ॥ दाडिमीकुसुमाकारसिंदूरबिंदुभूषिताम् ॥ ९ ॥ श्रीरामकदली
स्तंभनिंदितोरुस्थलोज्ज्वलाम् ॥ अत्युच्चैर्वर्तुलाकारस्तनयुग्मविभूषिताम् ॥ १० ॥ नितंबभारनम्रां च कामबाणप्रपीडिताम् ॥ कामु
कीं कमनीयां च पश्यंतीं वक्रचक्षुषा ॥ ११ ॥ कुंकुमालक्तरक्ताक्तपादपद्मविराजिताम् ॥ वायुप्रेरणवस्त्रेण व्यक्तगुप्तस्थलोज्ज्वलाम्
॥ १२ ॥ तां दृष्ट्वा कामपुत्रश्च कामोन्मथितमानसः ॥ उवाच मधुरं मत्तः काममत्तां सुकोमलाम् ॥ १३ ॥ चारुचंपकवर्णाभां कामे
न पुलकान्विताम् ॥ अतिप्रौढां नवोढां च शृंगारेच्छासुचंचलाम् ॥ १४ ॥ ॥ अनिरुद्ध उवाच ॥ ॥ किं देवी किं च गांध
र्वी का त्वं कामिनि कानने ॥ कस्य स्त्री कस्य कन्या वा कं वा वांछसि सुन्दरि ॥ १५ ॥ त्रैलोक्यातुलसौंदर्या मुनिमानसमोहिनी ॥
न बिभेषि कथं ब्रूहि स्वयमेकाकिनी च माम् ॥ १६ ॥ अहं त्रैलोक्यनाथस्य पौत्रः कामात्मजोऽधुना ॥ कांतेऽहमनिरुद्धश्च नवीन
यौवनाहतः ॥ १७ ॥ कमनीयश्च कामी च कामशास्त्रविशारदः ॥ कामुकीकामनां पूर्णां कर्तुमेवेश्वरः स्वयम् ॥ १८ ॥ मां भजस्व
सुशीले त्वं सुवेषं च सुशीलकम् ॥ रतिशूरं रतिरसप्राज्ञं रतिरसप्रियम् ॥ १९ ॥ रतिपुत्रं रतिरसं प्रमत्तं रसिकं प्रिये ॥ युवानं व्याधि
हीनं च कामुकं कामुकीच्छति ॥ २० ॥ विदग्धा सुविदग्धं च कांतमायाति कामतः ॥ विदग्धाया विदग्धेन संगमो गुणवान्भवेत्
॥ २१ ॥ प्रच्छाद्य लोचनास्यं च नवसंगमलज्जिता ॥ विलोकयंती वक्राक्षिकोणेन तमुवाच सा ॥ २२ ॥ कामिन्युवाच ॥
कामुकः कामपुत्रोऽसि कामेन व्याकुलोऽधुना ॥ भवांश्चेत्कामुकीयोग्यो न कामर्शिंचतितः कथम्॥२३॥पौत्रस्त्रैलोक्यनाथस्य स्वतः संभा
वितस्य च ॥ स्वयं योग्यो योग्यपुत्रो विवाहं न कथं कुरु ॥२४॥ विवाहिता यज्ञपत्नी सा च पुण्यव्रता सती ॥ निश्चला सततं सा
ध्या वर्धिनी संगिनी सदा ॥२५॥ भयप्रीतिदानसाध्या गुप्तपत्नी त्वनिश्चला ॥ नैमित्तिका न नित्या सा सा च वेदविवर्जिता ॥२६॥

परं नरकसोपाना परत्रेहायशस्करा ॥ साधुस्तत्र न हि रतो वंशजो वैष्णवो यदि ॥ २७ ॥ यदि पूर्वं भवेद्भ्रांतो निवृत्तः
साधुसंगतः ॥ प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥ २८ ॥ प्रायश्चित्ती पुनर्लिप्तो निवृत्तः पातकी यदि ॥ उपहास्यो भुवि भवे
त्सर्वं कुंजरशौचवत् ॥ २९ ॥ सुशीला सुन्दरी शांता धर्मपत्नी प्रशंसिता ॥ पतिव्रता सुसाध्या सा शश्वत्सुप्रियवादिनी ॥ ३० ॥
कोमलांगी विदग्धा च श्यामा रतिसुखप्रदा ॥ एवंभूतां परित्यज्य वैष्णवस्तपसे व्रजेत् ॥ ३१ ॥ सा चेत्परिणता साध्वी शांता पुत्र
वती यदा ॥ अन्यथा च वृथा सर्वं तपसः स्खलनं भवेत् ॥३२॥ असाधुश्च कुवंशश्चेत्परनारीं प्रयाति चेत् ॥ स याति नरकं घोरं
पितृभिः सप्तभिः सह ॥ ३३ ॥ अहमूषा बाणकन्या बाणः शंकरकिंकरः ॥ रणे त्रैलोक्यविजयी शंकरो जगतां पतिः ॥ ३४ ॥ न
स्वतंत्रा पराधीना त्रिषु कालेषु कामिनी ॥ पुंश्चली या स्वतंत्रा साप्यऽसद्वंशप्रसूतिका ॥ ३५ ॥ पिता ददाति कन्यां तां सुयोग्याय
वराय च ॥ कन्या वरं न याचेत धर्म एष सनातनः ॥३६॥ त्वं च योग्योऽसि योग्याऽहं मामिच्छसि यदि प्रभो ॥ बाणं प्रार्थय शं
भुं वाऽप्यथ वा पार्वतीं सतीम् ॥ ३७ ॥ इत्युक्त्वा सुन्दरी साध्वी सांऽतर्धाना बभूव ह ॥ निन्द्रां तत्याज सहसा कामी कामात्मजो
मुने ॥३८॥ बुद्ध्वा स्वप्नं स विज्ञाय कामेन व्यथितान्तरः ॥ बभूव व्याकुलोऽशांतो न दृष्ट्वा प्राणवल्लभाम् ॥३९॥ त्यक्त्वाऽऽहारमनिद्रश्च
प्रमत्तश्च कृशोदरः ॥ क्षणं तिष्ठति शेते च क्षणं रहसि रोदिति ॥ ४० ॥ पुत्रं दृष्ट्वा तु क्रंदंतं देवकी रुक्मिणी रतिः ॥ अन्याश्च योषि
तः सर्वाः कथयामासुरीश्वरम् ॥४१॥ तासां च वचनं श्रुत्वा प्रहस्य मधुसूदनः ॥ उवाच सर्वतत्त्वज्ञः कृष्णश्च पूर्णमानसः ॥ ४२ ॥
॥ श्रीभगवानुवाच ॥ कामातुरा बाणकन्या रतिं दृष्ट्वा शिवेशयोः ॥ वरं संप्राप दुर्गाया व्याकुला मदनाप्लुतः ॥ ४३ ॥
स्वप्नं च दर्शयामास नानिरुद्धं च पार्वती ॥ मम पौत्रं प्रमत्तं च चकार कौतुकेन च ॥ ४४ ॥ तत्पुत्रीं च प्रमत्तां तां करोमि स्वप्नतो
ऽधुना ॥ स्वच्छंदं तिष्ठ न चिरं नास्ति चिंता मनोव्यथा ॥ ४५ ॥ इति कृष्णः समाश्वास्य सर्वात्मा सर्वसिद्धिवित् ॥ स्वप्नं च दर्श
यामास बाणपुत्रीं च कामुकीम् ॥ ४६ ॥ सुप्ता सुतल्पे बाला सा पुष्पचंदनचर्चिते ॥ नवयौवनसंयुक्ता रत्नभूषणभूषिता ॥ ४७ ॥

शयाना रत्नपर्यंके ददर्श स्वप्नमीप्सितम् ॥ अतीव निर्जने देशे रत्ननिर्माणमंदिरे ॥ ४८ ॥ नवीननीरदश्याममतीव नवयौवनम् ॥ कोटिकंदर्पलीलाभं सस्मितं सुमनोहरम् ॥ ४९ ॥ रत्नकेयूरवलयरत्नमंजीररंजितम् ॥ रत्नकुंडलयुग्मेन गंडस्थलविराजितम् ॥ ५० ॥ चंदनोक्षितसर्वांगं भूषितं पीतवाससा ॥ सुचारुमालतीमाल्यवक्षःस्थलसमुज्ज्वलम् ॥ ५१ ॥ शयानं रत्नपर्यंके पुष्पचन्दनचर्चिते ॥ तं दृष्ट्वा सहसा साध्वी तन्मूलं प्रययौ मुदा ॥ ५२ ॥ उवाच मधुरं साध्वी हृदयेन विदूयता ॥ कामात्मजप्रिया कांता कामबाणप्रपीडिता ॥ ५३ ॥ ऊषोवाच ॥ कस्त्वं कामुक भद्रं ते मां भजस्व स्मरातुराम् ॥ अतिप्रौढां नवोढां च नवसंगमलालसाम् ॥ ५४ ॥ तवानुरक्तां भक्तां च गांधर्वेण समुद्वह ॥ विवाहाष्टप्रकारेषु गांधर्वः सुलभो नृणाम् ॥ ५५ ॥ अनुरक्तां प्रियां प्राप्य त्यजेद्यः कपटी पुमान् ॥ तस्माद्याति महालक्ष्मीः शापं दत्त्वा सुदारुणम् ॥ ॥ ५६ ॥ पुमानुवाच ॥ अहं कृष्णस्य पौत्रश्च कामदेवात्मजः स्वयम् ॥ कथं गृह्णामि त्वां कांते तयोरनुमतिं विना ॥ ॥ ५७ ॥ इत्येवमुक्त्वा स पुमानंतर्धानं चकार सः ॥ कामेन व्याकुला कांता न दृष्ट्वा कांतमीप्सितम् ॥ ५८ ॥ निद्रां त्यक्त्वा समुत्थाय तल्पादेव मनोहरात् ॥ विषसाद सखीमध्ये प्रमत्ता रुदती भृशम् ॥ ५९ ॥ पप्रच्छ तां वरालीनां किंकिमित्येव निश्चितम् ॥ उवाच बोधयामास चित्रलेखा सुयोगिनी ॥ ६० ॥ चित्रलेखोवाच ॥ चेतनं कुरु कल्याणि कस्मात्ते भीतिरुल्बणा ॥ स्वयं शंभुः शिवा साक्षाद्दुर्लंघ्ये नगरे सति ॥ ६१ ॥ शिवस्मरणमात्रेण सर्वारिष्टं पलायते ॥ शिवं भवति सर्वत्र शिव एव शिवालयः ॥ ६२ ॥ ध्यानाद्दुर्गतिनाशिन्याः सर्वदुर्गं विनश्यति ॥ ददाति मंगलं तस्मै सर्वमङ्गलमंगला ॥ ६३ ॥ चित्रलेखावचः श्रुत्वा किंचिन्नोवाच सुंदरी ॥ त्यक्त्वाऽऽहारं च निद्रां च पुरुषं चिन्तयेत्सदा ॥६४॥ चित्रलेखा सखी गत्वा बाणमाह च तत्प्रियाम् ॥ दुर्गां च शंकरं स्कंदं गणेशं योगिनां गुरुम् ॥ ६५ ॥ चित्रलेखावचः श्रुत्वा रुरोदोच्चैर्भृशं सती ॥ बाणश्च शंकराभ्याशे विषसाद प्रमूर्च्छितः ॥ जहास शंकरो दुर्गा कार्त्तिकेयो गणेश्वरः ॥ ६६ ॥ गणेश्वर उवाच ॥ यो ददाति ध्रुवं दुःखमन्य

स्मै दंभमोहितः ॥ सूक्ष्मधर्मविचारेण स विंदति चतुर्गुणम् ॥ ६७ ॥ शिवेशयोश्च क्रीडां च दृष्ट्वा या काममोहिता ॥ वरं तस्यै ददौ
दुर्गा वरमेव सुदुर्लभम् ॥६८॥ स्वप्ने गत्वा स्वयं देवी मत्तं कृत्वा स्मरात्मजम् ॥ अधुना वामपार्श्वे च शंभोस्तिष्ठति मूकवत् ॥६९॥
सर्वं ज्ञात्वा च सर्वज्ञो भगवान्हरिरीश्वरः ॥ स्वप्ने सुवेषं पुरुषं दर्शयामास कन्यकाम् ॥ ७० ॥ सुवेषं पुरुषं दृष्ट्वा युवानं युवती सती ॥
परमेच्छा भवेत्तस्या धर्मभीत्या निवर्तते ॥ ७१ ॥ सुवेषं पुरुषं दृष्ट्वा पुंश्चली पापवंशजा ॥ त्यजेन्निद्रां च स्वाहारं पतिं पुत्रं धनं
गृहम् ॥ ७२ ॥ चेतनं गृहकार्यं च कुललज्जां कुलद्वयम् ॥ युवानं रतिशूरं चाप्यतिनीचं न हि त्यजेत् ॥७३॥ त्यजेज्जातिं च धर्मं च
प्राणांश्च परिणामतः ॥ तस्मात्प्राज्ञः प्रयत्नेन प्राणेभ्यो युवतीं सदा ॥ ७४ ॥ परिरक्षेच्च सततं मायायुक्तां न विश्वसेत् ॥ हृदयं क्षुर
धाराभं नारीणां मधुरं वचः ॥ ७५ ॥ तासां मनो न जानंति संतो वेदाश्च वैदिकाः ॥ प्रयातु द्वारकां सद्यश्चित्रलेखा सुयोगिनी ॥
॥७६॥ अनिरुद्धं समाहर्तुं प्रमत्तमवलीलया ॥ इति श्रुत्वा महादेवो गणेशं तमुवाच ह ॥७७॥ न शृणोति यथा बाणः शुभकार्यं तथा
कुरु ॥ चित्रलेखा ययौ तूर्णं द्वारकाभवनं हरेः ॥ ७८ ॥ सर्वेषामपि दुर्लंघ्यं लीलया प्रविवेश सा ॥ निद्रितं चानिरुद्धं च समाहृत्य
च योगतः ॥ ७९ ॥ रथमारोहयामास निद्रितं बालकं मुदा ॥ सा मनोयायिनी भद्रा गृहीत्वा बालकं मुने ॥ ८० ॥ मुहूर्ताच्छो
णितपुरं कृत्वा शंखध्वनिं ययौ ॥ [1]अथाश्रमाभ्यंतरे च रुरुदुः सर्वयोषितः ॥ ८१ ॥ अहो बाणहरो वत्सः क्व गतः प्राणवल्लभः ॥
कृष्णस्ताश्च समाश्वास्य सर्वज्ञः सर्वतत्त्ववित् ॥८२॥ सांबकामबलैः सार्धं कृष्णः सात्यकिना तथा ॥ गृहीत्वा गरुडं वीरं रथमारुह्य
सत्वरः ॥ ८३ ॥ सुदर्शनं पांचजन्यं पद्मं कौमोदकीं गदाम् ॥ पश्चाद्यास्यति देवेशो नगरं शोणितं तथा ॥ ८४ ॥ सगणैः शङ्करे
णैव पार्वत्या परिरक्षितुम् ॥ अथ सा योगिनी धन्या पुण्या मान्या च योषिताम् ॥ ८५ ॥ शिष्या दुर्वाससः शांता सिद्धियोगेन
सिद्धिदा ॥ बालकं बोधयामास रुदंतं मातरं स्मरन् ॥ ८६ ॥ स्नापयित्वा ददौ तस्मै माल्यचंदनभूषणम् ॥ कृत्वा सुवेषं बालस्य

---

[1] अथ श्रुत्वा च गमनम्—इ०पा० ।

कन्यांतःपुरमीप्सितम् ॥ ८७ ॥ चक्रे प्रवेशं योगेन रक्षकैश्चापि रक्षितम् ॥ तामूषां रक्षितां दृष्ट्वा निराहारां कृशोदरीम् ॥ ८८ ॥
शीघ्रं च बोधयामास सखीभिः परिवारिताम् ॥ ऊषां कृत्वा च सुस्नातां वस्त्रभूषणभूषिताम् ॥ ८९ ॥ वस्त्रैर्माल्यैश्चंदनैश्च सिंदूरपत्रकैः
शुभैः ॥ द्वयोः संभाषणं तत्र महेंद्रे च शुभक्षणे ॥ ९० ॥ कारयामास गोष्ठ्या च सखीनां संगमेन च ॥ पतिव्रता पतिं दृष्ट्वा सा
रेमे विगतज्वरा ॥ ९१ ॥ गांधर्वेण विवाहेन तामुवाह स्मरात्मजः ॥ रतिर्बभूव सुचिरमुभयोः सुखकारणम् ॥ ९२ ॥ दिवानिशं न
बुबुधे स्मरपुत्रः स्मरातुरः ॥ ऊषा कामातुरा प्रौढा नवोढा नवसंगमात् ॥ ९३ ॥ मूर्च्छां संप्राप पुंसश्च स्पर्शमात्रेण कामुकी ॥
एवं नित्यं च रहसि संगमः सुमनोहरः ॥ बभूव सुचिरं विप्र राजा शुश्राव रक्षकात् ॥ ९४ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे
श्रीकृष्णजन्मखण्ड उत्तराद्ध नारायणनारदसंवादे बाणयुद्धे ऊषानिरुद्धयोः संवादे चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥
नारायण उवाच ॥ अथ भीता रक्षकास्ते समूचुर्बाणमीश्वरम् ॥ स्कंदं गणेशं दुर्गां च दंडवत्प्रणिपत्य च ॥
॥ १ ॥ रक्षका ऊचुः ॥ अहो दुष्टश्च कालोऽयमतीव दुरतिक्रमः ॥ स्वतंत्रा बालिका प्रौढा पतिमिच्छति सांप्रतम् ॥
॥ २ ॥ असंगसंगमं नाथ साधूनां दुःखकारणम् ॥ संसर्गजा गुणा दोषा भवंति सततं नृणाम् ॥ ३ ॥ चित्रलेखा स्वयं दूती
समानीय परं वरम् ॥ रणशूरं महावीरं नृपेंद्रं च महारथम् ॥ ४ ॥ युवानं व्याधिहीनं च कन्दर्पादपि सुंदरम् ॥ संभोगं कारयामास
बुबुधे न दिवानिशम् ॥ ५ ॥ सांप्रतं तव कन्या साऽप्यूषा गर्भवती सती ॥ कुलजा कुलयोश्चैव तप्तांगारस्वरूपिणी ॥ ६ ॥ दौहित्रो
वाऽपि दौहित्री बभूव सांप्रतं तव ॥ कन्यां पश्य महाप्रौढां नगरीं नागरान्विताम् ॥७॥ नखविक्षतसर्वांगीं वराधीनां च चंचलाम् ॥
पुंसश्च संगिनीं शश्वद्रहस्ये रतिसंगिनीम् ॥८॥ सस्मितां सकटाक्षां च चंचलेक्षणवीक्षिताम् ॥ एवं श्रुत्वा लज्जितश्च बाणस्तत्र चुकोप
ह ॥९॥ युद्धाय च मतिं चक्रे वारितः शंभुना भृशम् ॥ वारितश्च गणेशेन स्कंदेन शिवया तथा ॥ १० ॥ भैरव्या भद्रकाल्या
च योगिनीभिश्च संततम् ॥ अष्टभिर्भैरवैश्चैव रुद्रैरेकादशात्मकैः ॥ ११ ॥ भूतैः प्रेतैश्च कूष्मांडैर्वेतालैर्ब्रह्मराक्षसैः ॥ योगींद्रैरपि सिद्धे

न्द्रै रुद्रैश्चंडादिभिस्तथा ॥ १२ ॥ कोटर्या ग्रामदेव्या च यथा मात्रा हिताय च ॥ उवाच शंकरो बाणं मूढं पंडितमानिनम् ॥ हितं सत्यं नीतिशास्त्रं परिणामसुखावहम् ॥ १३ ॥ श्रीमहादेव उवाच ॥ शृणु बाण प्रवक्ष्यामि कथामेतां पुरातनीम् ॥ १४ ॥ भुवो भारावतरणे भारते स्वयमीश्वरः ॥ निहत्य सर्वान्राजेंद्रान्द्वारकायां विराजते ॥१५॥ यस्य लोमसु विश्वानि तस्य वासः सदीश्वरः ॥ वासुदेव इति ख्यातः कथ्यते तेन कोविदैः ॥१६ ॥ धातुर्विधाता भगवांश्चक्रपाणिः स्वयं भुवि ॥ ब्रह्मविष्णुशिवादीनामीश्वरः प्रकृतेः परः ॥ १७ ॥ निर्गुणश्च निरीहश्च भक्तानुग्रहविग्रहः ॥ परं ब्रह्म परं धाम परमात्मा च देहिनः ॥ १८ ॥ यस्मिन्गते शवो जीवः संग्रामस्तेन संभवेत् ॥ शस्त्रविद्धो महाकाशो यथा मूढ दिशस्तथा॥१९॥तथाऽऽत्मा च निराकारो देही च ध्यानहेतुना ॥ तस्य पुत्रोऽनिरुद्धश्च महाबलपराक्रमः ॥२०॥ त्रैलोक्यमपि संहर्तुं क्षणेन च क्षमः स्वयम् ॥ सर्वे देवाश्च दैत्याश्च बलवंतो महारथाः॥२१॥ ते सर्वे चानिरुद्धस्य कलां नार्हंति षोडशीम् ॥ ययोरेव समं वित्तं ययोरेव समं बलम् ॥ २२ ॥ तयोर्विवाहो मैत्री च न तु पुष्टविपुष्टयोः ॥ बलिः पिता ते दैत्यानां सारभूतो महारथः ॥ २३ ॥ क्षणेन येन नीतश्च सुतलं स हरेः कला ॥ सर्वे चांशकलाः पुंसः परिपूर्णतमस्य च ॥ वृंदावनेश्वरश्चापि कृष्णस्य परमात्मनः ॥ २४ ॥ पार्वत्युवाच ॥ ध्यायते ध्याननिष्ठश्च हृत्पद्मे च दिवानिशम् ॥ २५ ॥ ब्रह्मा महेशः शेषश्च भगवंतं सनातनम् ॥ दिनेशश्च गणेशश्च योगींद्राणां गुरोर्गुरुः ॥ ध्यायते परमात्मानं भगवंतं सनातनम् ॥ २६ ॥ सनत्कुमारः कपिलो नरो नारायणस्तथा ॥ ध्यायंते हृदयांभोजे भगवंतं सनातनम् ॥ २७ ॥ मनवश्च मुनींद्राश्च सिद्धेंद्रा योगिनां वराः ॥ ध्यानासाध्यं च ध्यायंते भगवंतं सनातनम् ॥२८॥ सर्वादिं सर्वबीजं च सर्वेशं च परात्परम्॥ ध्यायंते ज्ञानिनः सर्वे भगवंतं सनातनम् ॥ २९ ॥ गणेश उवाच ॥ अभाग्यं च बलेश्चापि वैष्णवस्य महात्मनः ॥ मूढोऽयमीदृशः पुत्रः प्रह्लादस्य च धीमतः ॥ ३० ॥ स्कंद उवाच ॥ अये भ्रातर्न श्रुता च हिरण्यकशिपोः कथा ॥ हिरण्याक्षस्य च मधोः कैटभस्य महात्मनः ॥ पूर्वजास्तेऽपि ते दैत्या महाबलपराक्रमाः॥३१॥ क्रमेण विष्णुना नीता लीलया यमसादनम् ॥

भगवान्यस्य संहर्ता स्वयं नारायणः प्रभुः ॥३२॥ तस्य को रक्षिता भ्रातर्निवर्तस्व शुभाय च ॥ तेषां च वचनं श्रुत्वा तानुवाचासुरेश्वरः ॥ ३३ ॥ कोपरक्तास्यनयनो धनुष्पाणिर्यथाऽतकः ॥ शृणु मातः प्रवक्ष्यामि शृणु तात महेश्वर ॥३४॥ शृणु भ्रातर्गणपते शृणु भ्रातश्च कार्त्तिक ॥ शुभाशुभं प्राक्तनेन प्राणिनां कर्मिणां तथा ॥ ३५ ॥ कृतकर्मातिरिक्तं च कार्यं केषां च वर्तते ॥ नानाप्तकाले म्रियते विद्धः शरशतैरपि ॥ ३६ ॥ तृणाग्रेणापि संस्पृष्टः प्राप्तकालो न जीवति ॥ यस्माच्च यस्य निर्वाणं विधात्रा लिखितं पुरा ॥ ३७ ॥ तदेव नित्यं सत्यं च निषेकः केन वार्यते ॥ संग्रामे कातरो यो हि निष्फलं तस्य जीवनम् ॥ ३८ ॥ जयी यशश्च लभते मृतः स्वर्गं च गच्छति ॥ प्रविश्य कन्यां गृह्णाति नगरं शिवरक्षितम् ॥ ३९ ॥ पार्वत्या च गणेशेन युद्धेन बलिना तथा ॥ को वा गृह्णाति कन्यां च कस्य वा जीवितस्य च ॥४०॥ सगर्भा तव कन्येति सभायां रक्षको वदेत् ॥ इति मे वज्रतुल्यं च श्रुतिकौटं परं वचः ॥ ४१ ॥ अतोऽनिरुद्धं हत्वा च घातयिष्यामि कन्यकाम् ॥ अन्यथा ज्वलदग्नौ च त्यक्ष्यामि च कलेवरम् ॥ ४२ ॥ कोटर्युवाच ॥ शृणु वत्स प्रवक्ष्यामि माताऽहं तेऽपि धर्मतः ॥ दुरंतेनापि पुत्रेण पित्रोर्दुःखं पदेपदे ॥४३॥ कन्या परगृहीता साऽप्यन्यस्मै दातुमक्षमा॥श्रीकृष्णस्यापि पौत्राय प्रद्युम्नस्य सुताय च॥४४॥अनिरुद्धाय महते स्वेच्छया देहि कन्यकाम्॥पूतोऽसि भारते वर्षे सप्तभिः पितृभिः सह॥४५॥यौतकं देहि सर्वस्वं यशसे महते भुवि ॥ अन्यथा रणमध्ये च त्वां हनिष्यति माधवः ॥४६॥ सुदर्शनेन चक्रेण को वा त्वां रक्षितुं क्षमः ॥ कोटरीवचनं श्रुत्वा चुकोप दैत्यपुंगवः ॥ ४७ ॥ प्रययौ रथमारुह्य यत्र पौत्रो हरेर्मुने ॥ स्कंदः सेनापतिर्भूत्वा प्रययौ शंकराज्ञया ॥ ४८ ॥ बाणः स्वस्त्ययनं चक्रे गणेशश्च शिवः स्वयम् ॥ बाणं शुभाशिषं चक्रे पार्वती कोटरी तथा॥४९॥ अष्टौ च भैरवाश्चैव रुद्राश्चैकादशैव ते ॥ सर्वे युद्धाय हंतारो बभूवुः शस्त्रपाणयः ॥ ५० ॥ एतस्मिन्नंतरे दूतोऽप्यनिरुद्धमुवाच ह ॥ पार्वत्या प्रेरितश्चैव बाणपत्न्या च सत्वरम् ॥ ५१ ॥ दूत उवाच ॥ अनिरुद्धोत्तिष्ठ भद्रं पार्वतीवचनं शृणु ॥ भव सान्नाहिको वत्स कुरु युद्धं बहिर्भव ॥ ५२ ॥ भीतोषा रुदती त्रस्ता सस्मार पार्वतीं सतीम् ॥ रक्षरक्ष महामाये मत्प्राणेश्वरमीप्सितम् ॥५३॥

अभयेऽप्यभयं देहि संग्रामे घोरदारुणे ॥ त्वमेव जगतां माता स्नेहस्ते सर्वतः समः ॥५४॥ तथाऽनिरुद्धः सन्नाही शस्त्रपाणिर्बभूव ह ॥ उषादत्तं रथं प्राप्य चकारारोहणं मुदा ॥ ५५ ॥ बहिः संभूय शिबिराद्ददर्श बाणमीश्वरः ॥ सान्नाहिकं शस्त्रपाणिं रक्तास्यलोचनं परम् ॥ ५६ ॥ दृष्ट्वाऽनिरुद्धं बाणश्च तमुवाच रुषाऽन्वितः ॥ घोरसंग्राममध्ये च विषोक्तिं प्रज्वलन्निव ॥ ५७ ॥ बाण उवाच ॥ अये वीर महादुष्ट नीतिशास्त्रविवर्जित ॥ चंद्रवंशकुलांगार पुण्यक्षेत्रेऽयशस्कर ॥ ५८ ॥ पिता ते शंबरं हत्वा जग्राह तस्य कामिनीम् ॥ ततो जातो भवानेव निरोधं स्वकुलक्षमम् ॥ ५९ ॥ पितामहो वासुदेवो मथुरायां च क्षत्रियः॥ गोकुले वैश्यपुत्रश्च नाम्ना च नंदनंदनः ॥ ६० ॥ वृंदावने च गोपस्य नंदस्य पशुरक्षकः ॥ साक्षाज्जारश्च गोपीनां दुष्टः परमलंपटः॥ ६१ ॥ जघान पूतनां सद्यो नारीघाती ह्यधार्मिकः ॥ आगत्य मथुरां कुब्जां जघान मैथुनेन च ॥ ६२ ॥ दुर्बलं नरकं हत्वा स्त्रीसमूहं मनोहरम् ॥ जग्राह योनिलुब्धश्च स्वपुत्रमतिनिष्ठुरः ॥६३॥ भीष्मकं मानवं जित्वा तत्पुत्रं चापि दुर्बलम्॥ जग्राह कन्यकां तस्य देवयोग्यां च रुक्मिणीम् ॥ ६४ ॥ सत्राजितः सूर्यभृत्यो देवात्प्राप्य मणीश्वरम् ॥ घातयित्वा ह्युपायेन जग्राह मणिकन्यकाम् ॥ ६५ ॥ कुरुपांडवयुद्धं च कारयित्वा च दारुणम् ॥ युधिष्ठिरस्य यज्ञे च शिशुपालं जघान सः ॥ ६६ ॥ दंतवक्रं च शाल्वं च जरासंधं च दारुणः ॥ संजहार भुवो भूपसमूहमतिदारुणम् ॥ ६७ ॥ उपायान्नरकं हत्वा सर्वस्वं तज्जहार सः ॥ दुर्बलो राजभीतश्च समुद्रं शरणं गतः ॥ ६८ ॥ जित्वा च भ्रातरं शक्रं भार्याया वचनेन च ॥ जग्राह पारिजातं च पुष्पं च स्वर्गदुर्लभम् ॥ ६९ ॥ कंसं निहत्याधर्मिष्ठो भ्रातरं मातुरेव च ॥ जग्राह तस्य सर्वस्वं परं किं कथयामि ते ॥७०॥ जित्वा च भल्लुकं युद्धे जग्राह तस्य कन्यकाम् ॥ तत्पितुर्भगिनी कुंती चतुर्णां कामिनी भुवि ॥ ७१ ॥ द्रौपदी भ्रातृपत्नी च पंचानां कामिनी तथा ॥ गोष्ठीनो योनिलुब्धश्च शश्वत्परमलंपटः ॥ ७२ ॥ तज्ज्येष्ठो बलदेवश्च शश्वत्पिबति वारुणीम् ॥ यमुनां भ्रातृपत्नीं च करोत्याह्वानमीप्सितम् ॥ ७३ ॥ जहार भगिनीं तस्य कौंतेयः शक्रनंदनः ॥ सुभद्रां मातुलसुतां सन्निबोध कुलक्रमम् ॥ ७४ ॥ बाणस्य वचनं श्रुत्वा चुकोप कामनंदनः ॥ उवाच परमार्थं च

योग्यं प्रत्युत्तरं मुने ॥ ७५ ॥ अनिरुद्ध उवाच ॥ पिता मे कामदेवश्च ब्रह्मपुत्रः पुरा शुचिः ॥ यस्यास्त्रेण वशीभूतं त्रैलोक्यं सततं शृणु ॥ ७६ ॥ शिवकोपानलेनैव भस्मीभूतः स्वकर्मतः ॥ कृष्णस्य पुत्रोप्यऽधुना सर्वेषां परमात्मनः ॥ ७७ ॥ पतिव्रता रतिर्माता पतिशोकेन सांप्रतम् ॥ शंबरस्य गृहे तस्थौ हृता तेन बलेन च ॥ ७८ ॥ छायां मायावतीं दत्त्वा मायया शयनेन च ॥ रतिं स्वधर्मं संरक्ष्य धर्मसाक्षी च तद्गृहे ॥ ७९ ॥ निहत्य शंबरं शत्रुं गृहीत्वा स्वप्रियां सतीम् ॥ आजगाम द्वारकां च चंद्रसूर्यौ च साक्षिणौ ॥ ८० ॥ पितामहं वासुदेवं त्वं किं जानासि मूढवत् ॥ यं च संतो न जानंति वेदाश्चत्वार एव च ॥ ८१ ॥ वासुः सर्वनिवासस्य विश्वानि यस्य लोमसु ॥ तस्य देवः परं ब्रह्म वासुदेव इति स्मृतः ॥८२॥ शङ्करं पृच्छ साक्षाच्च यस्य भृत्योऽधुना भवान् ॥ कृष्णभृत्यस्य च बलेः पुत्रोऽसि किंकरात्मजः ॥ ८३ ॥ गोकुले वैश्यपुत्रत्वं ब्रूहि त्वं ज्ञानदुर्बल ॥ भोजनं वेदविहितं शश्वत्क्षत्रियवैश्ययोः ॥ ८४ ॥ द्रोणः प्रजापतिः श्रेष्ठो धरा तस्य प्रिया सती ॥ पुत्रं च तपसा लेभे परमात्मानमीश्वरम् ॥ ८५ ॥ द्रोणो नन्दो वैश्यराजो यशोदा सा धरा सती ॥ वृषभानुसुता राधा सुदाम्नः शापकारणात् ॥ ८६ ॥ त्रिंशत्कोटिं च गोपीनां गृहीत्वा भर्तुराज्ञया ॥ पुण्यं च भारतं क्षेत्रं गोलोकादाजगाम सा ॥ ८७ ॥ ताभिः सार्द्धं स रेमे च स्वपत्नीभिर्मुदाऽन्वितः ॥ पाणिं जग्राह राधायाः स्वयं ब्रह्मा पुरोहितः ॥ ८८ ॥ गोपकोटिश्च गोलोकादाजगाम मुदाऽन्विता ॥ तेजसा हरितुल्यास्ते पार्षदप्रवरा हरेः ॥ ॥ ८९ ॥ गोरक्षणं हरेरेव गोपवेषस्य चात्मनः ॥ गोपानां शिशुरक्षार्थं मायेशस्यापि मायया ॥ ९० ॥ पूतना बलकन्या च भगिनी च तवासुर ॥ दृष्ट्वा च वामनं वंध्या चकार पुत्रमानसम् ॥ ९१ ॥ एवंभूतो यदि मम पुत्रो भवति सांप्रतम् ॥ स्तनं ददामि तनयं कृत्वा वक्षसि सुन्दरम् ॥ ९२ ॥ तस्याः पूर्णं मानसं च चकार भगवान्प्रभुः ॥ स्तनं दत्त्वा च गोलोकं ययौ सा रत्नयानतः ॥ ९३ ॥ कुब्जा सा भगिनी पूर्वं रावणस्य दुरात्मनः ॥ श्रीरामं चकमे कामान्नाम्ना शूर्पणखा सती ॥ ९४ ॥ नासां चिच्छेद तस्याश्च लक्ष्मणो धार्मिकेश्वरः ॥ तपसा च वरं लेभे ब्रह्मणः प्रियमीश्वरम् ॥ ९५ ॥ तेन पुण्येन तं लब्ध्वा गोलोकं सा

जगाम ह ॥ गोपी बभूव गोलोके कृष्णस्यालिंगनेन च ॥ ९६ ॥ नरको हरिवध्यश्च स्वपूर्वप्राक्तनेन च ॥ पाणिं जग्राह
कन्यानां साक्षिणौ शशिभास्करौ ॥ ९७ ॥ भीष्मकन्या महालक्ष्मीः श्रीकृष्णस्य प्रिया सती ॥ वैकुण्ठादागता साध्वी ब्रह्मणो
ऽनुमतेन च ॥ ९८ ॥ सत्राजितस्य कन्या सा सत्यभामा वसुन्धरा ॥ ददौ कृष्णाय राजा स तं मणिं यौतुकेन च ॥ ९९ ॥
भुवो भारावतरणहेतुनाऽऽगमनं हरेः ॥ संजहार भुवो भारं कुरुपाण्डवयुद्धतः ॥ १०० ॥ शिशुपालो दन्तवक्रो जयो विजय एव
च ॥ द्वारिणौ द्वारषट्के च वैकुण्ठे श्रीहरेरपि ॥ १ ॥ कुमारशापात्पतितौ प्राप्य जन्मत्रयं ध्रुवम् ॥ हिरण्यकशिपुश्चैव तवैव पूर्व
पूरुषः ॥ २ ॥ तस्य भ्राता हिरण्याक्षस्तेनैव वरुणो जितः ॥ हरिर्नृसिंहरूपेण तं जघानावलीलया ॥ ३ ॥ सूकरेण हतोन्यश्च
पूर्वजन्मकथां शृणु ॥ द्वितीये जन्मनि पुरा रावणः कुंभकर्णकः ॥ ४ ॥ श्रीरामेण हतौ तौ द्वौ शेषजन्म कलौ तयोः ॥ श्रीकृष्णे
न हतौ तौ द्वौ धर्मपुत्रावुभौ तथा ॥ ५ ॥ जरासन्धश्च शाल्वश्च दुरात्मा कंस एव च ॥ प्राक्तनात्तस्य वध्यास्ते भुवो भारजिहीर्षया
॥६॥ मांधातुः सुतमध्ये च यवनश्चापि प्राक्तनात् ॥ लक्ष्मीश्वरस्य कृष्णस्य धनेन किं प्रयोजनम् ॥ ७ ॥ प्रतिज्ञया च सत्यायाः
पुण्यकव्रतकारणात् ॥ पारिजातं समानीय चकार स्वात्मनो व्रतम् ॥ ८ ॥ स्वयं जांबवती देवी दुर्गांशा भल्लुकात्मजा ॥ पाणिं ज
ग्राह तस्याश्च तपसा भारते हरिः ॥ ९ ॥ कुन्त्याश्च क्षेत्रजाः पुत्राः केवलं भर्तुराज्ञया ॥ कलौ निषिद्धं त्रियुगे प्रसिद्धं पलपैतृकम्
॥ ११० ॥ युधिष्ठिरो धर्मपुत्रो भीमश्च पवनात्मजः ॥ महेन्द्रपुत्रो धर्मिष्ठः फाल्गुनो विजयी भुवि ॥ ११ ॥ यस्मै पाशुपतं शंभुः प्र
ददौ च स्वयं पुरा ॥ अश्वमेधं गवालंभं संन्यासं पलपैतृकम् ॥ १२ ॥ देवरेण सुतोत्पत्तिं कलौ पञ्च विवर्जयेत् ॥ द्रौपद्याः पञ्च भ
र्तारः शांकरेण वरेण च ॥ १३ ॥ बलदेवः पुष्पमधु पूतं पिबति नित्यशः ॥ चकार यमुनास्नानं स्नानार्थं धार्मिकः शुचिः ॥१४॥
सुभद्रां च ददौ कृष्णः फाल्गुनाय महात्मने ॥ कन्यकां मातुलानां च दाक्षिणात्यः परिग्रहः ॥१५॥ देशेष्वन्येषु दोषोऽयमित्याह क
मलोद्भवः ॥ ११६ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे बाणानिरुद्धसंवादे

पंचदशाधिकशततमोऽध्यायः ॥ ११५ ॥ बाण उवाच ॥ अनिरुद्ध बुधोऽसि त्वं त्वयोक्तं सत्यमेव च ॥ शंभुना चैवमुक्तं च
सर्वं बुद्धं स्वचेतसा ॥ १ ॥ त्वयोक्तं शंकरवरात्पंचानां स्वामिनां प्रिया ॥ द्रौपदी च महाभाग तन्मे व्याख्यातुमर्हसि ॥२॥ शंबरे
ण हृता पूर्वं तव माता कथं रतिः ॥ देवैरपि कथं दत्ता देवास्तेन जिता कथम् ॥ ३ ॥ अनिरुद्ध उवाच ॥ एकदा रघुनाथ
श्च सीतया लक्ष्मणेन च ॥ स्नातः सरसि तत्रस्थो रम्ये पंचवटीतटे ॥४॥ उवास सीता हेमंते जलं सुस्वादु निर्मलम् ॥ तथाऽन्नं व्यं
जनं रम्यं सर्वं वस्तु सुशीतलम् ॥५॥ फलावचयनं चक्रे सीतायै प्रददौ मुदा ॥ ततो ददौ लक्ष्मणाय पश्चाद्भुंक्ते स्वयं प्रभुः ॥ ६ ॥
लक्ष्मणस्तद्गृहीत्वा च नैव भुंक्ते फलं जलम् ॥ मेघनादवधार्थं च सीतोद्धारणकारणात् ॥७॥निद्रां न याति नो भुंक्ते वर्षाणां च च
तुर्दश ॥ य एवं पुरुषो योगी तद्वध्यो रावणात्मजः ॥ ८ ॥ एतस्मिन्नंतरे रामं द्रष्टुं कमललोचनम् ॥ वह्निस्तत्र समायातो द्विजरू
पी कृपानिधिः ॥ भविष्यत्कथयामास श्रुतिकौटपरं वचः ॥ ९ ॥ वह्निरुवाच ॥ शृणु राम महाभाग सीतासंगोपनं कु
रु ॥ १० ॥ सप्ताहाभ्यंतरे चैव रावणो दुष्टराक्षसः ॥ दुर्निवार्यः प्राक्तनेन जानकीं च हरिष्यति ॥ ११ ॥ विधात्रा लिखितं कर्म
प्राक्तनं केन वार्यते ॥ देवैश्चतुर्भिः कथितं न च दैवात्परं वरम् ॥ १२ ॥ श्रीराम उवाच ॥ सीतां गृहीत्वा त्वं गच्छ छाया
त्रैव तु तिष्ठतु ॥ कलत्रवर्जनं कर्म सर्वेषां च जुगुप्सितम् ॥ १३ ॥ सीतां गृहीत्वा प्रययौ रुदंतीं च हुताशनः ॥ सीतया सदृशी
छाया या तस्थौ रामसन्निधौ ॥ १४ ॥ सा च च्छाया हृता पूर्वं रावणेनावलीलया ॥ समुद्दधार तां रामो निहत्य तं सबांधवम्
॥ १५ ॥ वह्नौ परीक्षाकाले च छाया वह्नौ विवेश या ॥ अग्निश्छायां च संरक्ष्य ददौ रामाय जानकीम् ॥१६॥ रामस्तां च गृहीत्वा
च प्रययौ स्वाश्रमं मुदा ॥ छाया तस्थौ वह्निपार्श्वे हृदयेन विदूयता ॥ १७ ॥ सा च च्छाया तपश्चक्रे नारायणसरोवरे ॥ तपश्चकार
दिव्यं च शतवर्षं च शूलिनः ॥ १८ ॥ वरं वृणुष्व भद्रे त्वमुवाच शंकरश्च तम् ॥ उवाच सा शिवं व्यग्रा भर्तुर्दुःखेन दुःखिता
॥ १९ ॥ पतिं देहि पंचधा सा वरं वव्रे त्रिलोचनम् ॥ सर्वसंपत्प्रदस्तुष्टस्तस्यै शर्वो वरं ददौ ॥ २० ॥ श्रीमहादेव उवाच ॥

साध्वि त्वं पंचधा ब्रूहि पतिं देहीति व्याकुला ॥ पंचेंद्राश्च हरेरंशा भविष्यंति प्रियास्तव ॥ २१ ॥ ते च सर्वे च पंचेंद्राश्चाधुना पंच
पांडवाः ॥ सा च च्छाया द्रौपदी च यज्ञकुंडसमुद्भवा ॥ २२ ॥ कृते युगे वेदवती त्रेतायां जनकात्मजा ॥ द्वापरे द्रौ
पदी छाया तेन कृष्णा त्रिहायणीं ॥ २३ ॥ वैष्णवी कृष्णभक्ता च तेन कृष्णा प्रकीर्तिता ॥ स्वर्गलक्ष्मीर्महेंद्राणां सा च पश्चा
द्भविष्यति ॥ २४ ॥ राजा ददौ फाल्गुनाय कन्यायाश्च स्वयंवरे ॥ पप्रच्छ मातरं वीरो वस्तु प्राप्तं मयाऽधुना ॥ २५ ॥
तमुवाच स्वयं माता गृहाण भ्रातृभिः सह ॥ शंभोर्वरेण पूर्वं च परत्र मातुराज्ञया ॥ २६ ॥ द्रौपद्याः स्वामिनस्तेन हेतुना पंच पां
डवाः ॥ चतुर्दशानामिंद्राणां पञ्चेन्द्राः पंच पांडवाः ॥२७॥ शंकरेणाभिसंशप्ता सा मात्रा भर्त्सितेन च ॥ भर्ता ते भस्मसाद्भूतो हर
कोपानलेन च ॥ २८ ॥ हरेति त्वं मया शप्ता दैत्यग्रस्ता भवाधुना ॥ विजित्य देवान्सेंद्रांश्च शंबरस्त्वां हरिष्यति ॥ २९ ॥ पुनरुक्तं
वरं प्रादात्सतीत्वं तेन यास्यति ॥ छायां दत्त्वा तिष्ठ गेहे यावज्जीवति ते पतिः ॥ ३० ॥ इति ते कथितं सर्वमितिहासं पुरातनम् ॥
देवानां गुप्तचरितं शृणु दैत्येंद्र सांप्रतम् ॥३१॥ एतस्मिन्नंतरे तत्र सुभद्रश्च महाबलः॥कुभांडभ्राता बलवान्बाणसेनापतीश्वरः ॥३२॥
निर्भर्त्स्य बाणं समरे शस्त्रपाणिर्महारथः ॥ श्रीकृष्णपौत्रं शूलं च चिक्षेप प्रलयाग्निवत् ॥ ३३ ॥ अर्धचंद्रेण तच्छूलं चिच्छेद काम
पुत्रकः ॥ शक्तिं चिक्षेप भद्रश्च शतसूर्यसमप्रभाम् ॥ ३४ ॥ वैष्णवास्त्रेण चिच्छेद तां शक्तिं कामपुत्रकः ॥ नारायणास्त्रं चिक्षेप सुभ
द्रो रणमूर्धनि ॥ ३५ ॥ प्रणम्य शेते निर्भीतो मदनस्य सुतो बली ॥ ऊर्ध्वमस्त्रं च बभ्राम शतसूर्यसमप्रभम् ॥ ३६ ॥ प्रलीनमस्त्र
माकाशे विश्वसंहारकारणम् ॥ अस्त्रे गते सोऽनिरुद्धो गृहीत्वा च महासिम् ॥ ३७ ॥ प्रबभंज भद्ररथं जघानाश्वांश्च सारथिम् ॥
जघान तं सुभद्रं च लीलया रणमूर्धनि ॥ ३८ ॥ हते सुभद्रे बाणश्च महाबलपराक्रमः ॥ बाणानां शतकं चापि चिक्षेप रणमूर्धनि ॥
॥ ३९ ॥ कामात्मजोऽग्निबाणेन बाणौघं प्रददाह सः ॥ बाणश्चिक्षेप ब्रह्मास्त्रं सृष्टिसंहारकारणम् ॥ ४० ॥ दृष्ट्वा कामात्मजः शीघ्रं
सबीजं मंत्रपूर्वकम् ॥ ब्रह्मास्त्रेणैव सहसा संजहारावलीलया ॥४१॥ बाणः पाशुपतं क्षेप्तुं समारेभे च कोपतः ॥ निषिद्धश्च गणेशेन

स्कंदेन शंभुना तथा ॥ ४२ ॥ तद्दृष्ट्वा सोऽनिरुद्धस्तं धनुर्बाणौघसंयुतम् ॥ मुमोच जृंभणं युद्धे शीघ्रं तं च महारथम् ॥ ४३ ॥ जडो बभूव बाणश्च निश्चेष्टो रणमूर्धनि ॥ पुनश्चिक्षेप निद्रास्त्रं निद्रितं तं चकार सः ॥ ४४ ॥ बाणं तं निद्रितं दृष्ट्वा गृहीत्वा खड्गमुत्तमम् ॥ बाणं हंतुं समुद्यंतं वारयामास कार्त्तिकः ॥४५॥ स्कंदश्च शतबाणैश्च वारयामास लीलया ॥ अनिरुद्धं महाभागं बलवन्तं धनुर्धरम् ॥ ॥ ४६ ॥ अनिरुद्धश्च सहसा तया शक्त्या दुरन्यया ॥ बभंज कार्त्तिकरथं रत्नेंद्रसारनिर्मितम् ॥ ४७ ॥ गदया कार्त्तिकः क्रुद्धोऽप्यनिरुद्धरथं मुदा ॥ बभंज लीलया तत्र क्षणेन रणमूर्धनि ॥ ४८ ॥ अनिरुद्धोऽर्धचंद्रेण क्षुरधारेण लीलया ॥ चिच्छेद कार्तिकधनुर्भल्लास्त्रेण नियोजितम् ॥४९॥ जघान कार्त्तिकस्तं च गदया च दुरंतया ॥ गदां जग्राह तद्धस्ताज्जवेन मदनात्मजः ॥ ५० ॥ शूलं गृहीत्वा स्कन्दं च तमेव हंतुमुद्यतम् ॥ अनिरुद्धश्च कोपेन प्रेरयामास दूरतः ॥ ५१ ॥ कार्त्तिकः पुनरागत्य गृहीत्वा कामपुत्रकम् ॥ गृहीत्वा च करेणैव पातयामास भूतले ॥ ५२ ॥ अनिरुद्धो गृहीत्वाऽसिं समुत्तस्थौ महाबलः ॥ तयोर्विरोधं दूरं च प्रचकार गणेश्वरः ॥५३॥ कार्त्तिकः प्रययौ गेहमुमागेहं स्मरात्मजः ॥ सर्वं निवेदितुं शंभुं प्रययौ स गणेश्वरः ॥ ५४ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे बाणयुद्धे षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

श्रीनारायण उवाच ॥ गणेशस्तु शिवस्थानं गत्वा नत्वा महेश्वरम् ॥ सर्वं विज्ञापयामास क्रमेण च पृथक्पृथक् ॥ १ ॥ बाणानिरुद्धयोर्युद्धं सुभद्रनिधनं तथा ॥ स्कन्दानिरुद्धयोर्युद्धमनिरुद्धस्य विक्रमम् ॥२॥ गणेशवचनं श्रुत्वा प्रहस्य भगवान्भवः ॥ उवाच श्लक्ष्णया वाचा सुगुप्तं वेदसंमतम् ॥ ॥ ३ ॥ श्रीमहादेव उवाच ॥ गणेश्वर महाभाग श्रूयतां वचनं मम ॥ हितं तथ्यं नीतिसारं परिणामसुखावहम् ॥ ४ ॥ असंख्यविश्वसंघं च सर्वं कृष्णात्मजं सुतम् ॥ कृष्णं जानीहि यत्कार्यं कारणानां च कारणम् ॥ ५ ॥ ब्रह्मादितृणपर्यंतं जगत्सर्वं गणेश्वर ॥ निबोध सत्यं कृष्णं च भगवंतं सनातनम् ॥ ६ ॥ गोलोके द्विभुजं शांतं राधाकांतं मनोहरम् ॥ शिशुरूपं गोपवेषं परिपूर्णतमं प्रभुम् ॥७॥ गोपीभिर्गोपनिकरैः सहितं कामधेनुभिः ॥ पुण्ये वृन्दावने रम्ये सुंदरे रासमण्डले ॥८॥ चरन्त मुरलीहस्तं ब्रह्मेश

शेषवंदितम् ॥ शतशृंगे च शैलेशे वटमूले निराकुले ॥ ९ ॥ गोष्ठे भांडीरनिकटे निर्मले विरजातटे ॥ नवीननीरदश्यामं शोभितं
पीतवाससा ॥ १० ॥ यथा नवं घनौघं च सौदामिन्या विराजितम् ॥ आविर्भावश्च तेषां वै गोलोके रासमंडले ॥ ११ ॥ तावंतो
गोकुले रम्ये पुण्ये वृंदावने वने ॥ सर्वे चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम्॥१२॥परिपूर्णतमः कामो ब्रह्मशापात्स्वविस्मृतः ॥
तस्य पुत्रोऽनिरुद्धश्च महाबलपराक्रमः ॥१३॥ मया प्रस्थापितः स्कन्दो महायुद्धे सुदारुणे ॥ मृतो बाणश्च संग्रामे तेन स्कन्देन रक्षितः
॥१४॥ स्कन्दानिरुद्धयोर्युद्धे समत्वं तु गणेश्वर ॥ अष्टौ च भैरवाः सर्वे रुद्राश्चैकादशैव ते ॥ १५ ॥ अष्टौ च वसवश्चैते देवाः शक्रा
दयस्तथा ॥ तथैव द्वादशादित्याः सर्वे दैत्येश्वरास्तथा ॥ १६ ॥ देवानामग्रणीः स्कन्दो बाणश्च सगणस्तथा ॥ सर्वे ते चानिरुद्धं च
संग्रामे जेतुमक्षमाः ॥ १७ ॥ अनिरुद्धः स्वयं ब्रह्मा प्रद्युम्नः काम एव च ॥ बलदेवः स्वयं शेषः कृष्णश्च प्रकृतेः परः ॥१८॥ एतत्ते
कथितं सर्वं बाणं रक्ष गणेश्वर ॥ भवाञ्शुभस्वरूपश्च विघ्नखण्डनकारकः ॥ १९ ॥ आरादायास्यति हरिर्गृहीत्वा च सुदर्शनम् ॥
अव्यर्थमस्त्रप्रवरं सूर्यकोटिसमप्रभम् ॥ २० ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे
बाणयुद्धे शिवलम्बोदरसंवादे सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥ नारायण उवाच ॥ गणेशं बोधयित्वा तु शम्भुरभ्यंतरं
ययौ ॥ तत्र सिंहासने रम्ये दुर्गा दुर्गतिनाशिनी ॥ १ ॥ भैरवी भद्रकाली च उग्रचण्डा च कोटरी ॥ ताः समुत्थाय सहसा
प्रणेमुर्जगदीश्वरम् ॥ २ ॥ तत्राययौ गणेशश्च कार्त्तिकेयश्च वीर्यवान् ॥ बाणश्च वीरभद्रश्च स्वयं नन्दी सुनन्दकः ॥ ३ ॥ महा
कालो महामंत्री ह्यथाष्टौ भैरवास्तथा ॥ सिद्धेन्द्राश्चापि योगीन्द्रा रुद्राश्चैकादशैव ते ॥ ४ ॥ एतस्मिन्नंतरे तत्र मणिभद्रः समाययौ॥
सिंहद्वारे स्वयं द्वारी तमीश्वरमुवाच सः ॥ ५ ॥ मणिभद्र उवाच ॥ असंख्यानि च सैन्यानि यादवानां महेश्वर ॥ बलदेवश्च
प्रद्युम्नः सांबश्च सात्यकिस्तथा ॥ ६ ॥ राजा महोग्रसेनश्च भीमश्च स्वयमर्जुनः ॥ अक्रूरश्चोद्धवश्चैव जयन्तः शक्रनन्दनः ॥
॥ ७ ॥ रत्नेन्द्रसारनिर्माणरथेन्द्रे सुमनोहरे ॥ विधेर्विधाता भगवाञ्छ्रीकृष्णः परमेश्वरः ॥ ८ ॥ सप्तभिः पार्षदैर्गोपैः सेवितः श्वेत

चामरैः ॥ कंदर्पकोटिलीलाभो वनमालाविभूषितः ॥ ९ ॥ दधार चक्रमतुलं कोटिसूर्यसमप्रभम् ॥ गदां कौमोदकीं शूलमव्यर्थं
सन्निधाय च ॥ १० ॥ रथमध्ये महाशंखं विश्वसंहारकारणम् ॥ महारथानां लक्षैश्च रथानां च त्रिकोटिभिः ॥११॥ त्रिकोटिभिर्गजें
द्राणां मल्लानां च त्रिकोटिभिः ॥ शतकोटिभिरश्वानां चर्मिणां तच्चतुर्गुणैः ॥ १२ ॥ खड्गिनां तत्सप्तगुणैर्द्विगुणैस्तद्धनुष्मताम् ॥
एभिः सार्धं च त्वरितमाययौ शोणितं पुरम् ॥ १३ ॥ परितो वेष्टयामास लंकां दाशरथिर्यथा ॥ सहस्रतालमानां च ज्वलदग्नि
शिखोज्ज्वलाम् ॥ १४ ॥ ऊर्ध्वं च परिखायुक्तां दुर्लंघ्यामसुरैः सुरैः ॥ स्वर्गगंगांबुराशीनां समूहैर्वृष्टिभिस्तथा॥१५॥ पक्षींद्रो गरुडः
साक्षान्निर्वाणं च चकार सः ॥ मणींद्रसारनिर्माणं प्राकाराभ्रंलिहं पुरम् ॥ १६ ॥ बभंज लक्षं मल्लानां बलदेवश्च लांगलैः ॥ उद्या
नानां त्रिलक्षं च प्राकारोत्पाटनं प्रभोः ॥ १७ ॥ प्रविवेश महाद्वारं द्वारपालान्निहत्य च ॥ एवं श्रुत्वा महादेवश्चोवाच सुरसंसदि ॥
॥ १८ ॥ पार्वतीं भद्रकालीं च स्कंदं गणपतिं तथा ॥ अष्टौ च भैरवांश्चैव रुद्रांश्च वीरभद्रकम् ॥ महाकालं नंदिनं च सर्वान्सेनाप
तीन्नव ॥ १९ ॥ श्रीमहादेव उवाच ॥ गोलोकनाथो भगवांश्चक्रपाणिः समागतः ॥ २० ॥ विश्वौघं भंक्तुमीशो यः क्षणेन
नगरं च किम् ॥ सर्वोपायैश्च सर्वे ते बाणं रक्षंतु यत्नतः ॥ २१ ॥ बाणो गच्छतु संग्रामं स्मृत्वा लंबोदरं परम् ॥ बाणस्य दक्षिणे
स्कंदः पुरतश्च गणेश्वरः ॥ २२ ॥ वामे च भैरवा रुद्राः स्वयं नंदी महारथः ॥ महाकालो वीरभद्रो ये चान्ये सैनिकास्तथा ॥ २३ ॥
ऊर्ध्वं दुर्गा भद्रकाली ह्युग्रचंडा च कोटरी ॥ बाणं रक्ष महाभागे दुर्गे दुर्गतिनाशिनि ॥ २४ ॥ कृष्णस्य भवती शक्तिस्तेन नारायणी
स्मृता ॥ विष्णुमाये जगन्मातः सर्वमंगलमंगले ॥ २५ ॥ अव्यर्थाच्चक्रसाराच्च रक्ष बाणं सुदर्शनात् ॥ बाणः प्रियो मे सर्वेभ्यो
गणेशात्कार्त्तिकादपि ॥२६॥ बाणमूर्ध्नि करं धेहि पादाब्जरजसा सह ॥ शिवस्य वचनं श्रुत्वा दुर्गा दुर्गतिनाशिनी ॥ प्रहस्योवाच
मधुरं याथार्थ्यं समयोचितम् ॥ २७ ॥ पार्वत्युवाच ॥ मणिरत्नादिकं यद्यन्मुक्तामाणिक्यहीरकम् ॥ २८ ॥ सर्वस्वं
कन्यकामूषां रत्नभूषणभूषिताम् ॥ रत्नभूषणभूषाढ्यामनिरुद्धं परं वरम् ॥२९॥ पुरस्कृत्य देहि बाण कृष्णाय परमात्मने ॥ राज्यं

कुरुष्व निर्विघ्नं किं युद्धमात्मना सह ॥३०॥ यस्मिन्गते गताः प्राणाः स जीवश्चेंद्रियैः सह ॥ शक्तिश्चाहं मनो ब्रह्मा स्वयं ज्ञानात्मकं
शिवः ॥ ३१ ॥ सद्यः पतति देहश्च शिवं त्यक्त्वा शिवो भवेत् ॥ को वा तिष्ठति संग्रामे चक्रस्य तेजसा शिव ॥ ३२ ॥ नात्माका
शो बाणयुद्धे युद्धं किं स्वात्मना सह ॥ परमात्मा च सर्वेषां भक्तानुग्रहविग्रहः ॥३३॥ नित्यः सत्यो हि कृष्णश्च परिपूर्णतमः प्रभुः ॥
गणेशः कार्त्तिकेयश्च भवानपि तयोः परः ॥ ३४ ॥ किंकरेषु प्रियो बाणो न हि कृष्णात्परः प्रियः ॥ वैकुंठेऽहं महालक्ष्मीर्गोलोके
राधिका स्वयम् ॥ ३५ ॥ शिवाहं शिवलोकेऽपि ब्रह्मलोके सरस्वती ॥ अहं निहत्य दैत्यांश्च दक्षकन्या सती पुरा ॥ ३६ ॥ त्वन्नि
दया त्यक्तदेहा सा चाहं शैलकन्यका ॥ रक्तबीजस्य युद्धे च काली च मूर्तिभेदतः ॥ ३७ ॥ सावित्री वेदमाताऽहं सीता जनक
कन्यका ॥ रुक्मिणी द्वारवत्यां च भारते भीष्मकन्यका ॥३८॥ सुदाम्नः शापतो दैवाद्वृषभानुसुताऽधुना ॥ धर्मपत्नी च कृष्णस्य
पुण्ये वृंदावने वने ॥३९॥ भगवन्तं च सर्वज्ञं त्वां शिवं च सनातनम् ॥ किं वाऽहं कथयामीति कर्तव्यं समयोचितम् ॥ ४० ॥ इति
श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे बाणयुद्धेऽष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥
॥ नारायण उवाच ॥ पार्वतीवचनं श्रुत्वा गणेशश्च शिवः स्वयम् ॥ कार्त्तिकेयश्च काली च तां प्रशंसां चकार ह ॥ १ ॥
उवाच भगवाञ्शंभुर्जगतां मातरं पराम् ॥ ज्योतिःस्वरूपां परमां मूलप्रकृतिमीश्वरीम् ॥ २ ॥ श्रीमहादेव उवाच ॥ ॥ त्वया
यदुक्तं देवेशि सर्वं वेदोक्तमीप्सितम् ॥ अयुक्तमुपहास्यं च समरं परमात्मना ॥ ३ ॥ बाणो ददातु कन्यां तां स्वर्णभूषणभूषिताम् ॥
सामंजस्यं यशस्यं च शुभदं सर्वकर्मसु ॥ ४ ॥ न ददाति यदा बाणो हिरण्यकशिपोः प्रजा ॥ युद्धे पराङ्मुखो भीतो भगवत्य
यशस्करः ॥ ५ ॥ बाणो गच्छतु सन्नाही रणशास्त्रविशारदः ॥ पश्चाच्चागमनं कुर्मो वयं सान्नाहिकाः शिवे ॥ ६ ॥ उवाच
बाणं तां दातुं स च न स्वीचकार ह ॥ दुर्गा तं बोधयामास न बुबोध च सद्वचः ॥ ७ ॥ एतस्मिन्नंतरे तां च सभामेव
मनोरमाम् ॥ आजगाम महाधर्मो बलिश्च वैष्णवाग्रणीः ॥ ८ ॥ रथं रत्नेंद्रनिर्माणं समारुह्य महाबलः ॥ प्रततैः सप्तभिर्दैत्यैः सेवितः

श्वेतचामरैः ॥ ९ ॥ दैत्येन्द्राणां सप्तलक्षैरावृतः परमास्त्रवित् ॥ अवरुह्य रथात्तूर्णं गणेशं च शिवां शिवम् ॥ १० ॥ प्रणम्य कार्त्तिकेयं
च स उवास च संसदि ॥ उत्तस्थुरारात्तं दृष्ट्वा ते सर्वे शङ्करं विना ॥ तमुवाच महादेवः संभाष्य प्रियभाषणम् ॥ ११ ॥
॥ श्रीमहादेव उवाच ॥ भगवंश्चतुरस्त्वं च प्रदाता सर्वसंपदाम् ॥ १२ ॥ अयं हि परमो लाभो वैष्णवानां समागमः ॥
तीर्थान्यपि च पूतानि वैष्णवस्पर्शमात्रतः ॥ १३ ॥ सर्वेषामाश्रमाणां च पूजितो ब्राह्मणः शुचिः ॥ ततोऽधिकः पूजितोऽपि ब्राह्मणो
यदि वैष्णवः ॥ १४ ॥ न हि पूतं च पश्यामि वैष्णवब्राह्मणात्परम् ॥ स पूतः पवनादेव स पूतश्च हुताशनात् ॥ १५ ॥ तीर्थेभ्योऽपि
च सर्वेभ्यो बिभेति च ततोऽसुर ॥ न हि पापानि तद्देहे वह्नौ शुष्कतृणादिवत् ॥ १६ ॥ बलिरुवाच ॥ कथं स्तौषि
जगन्नाथ भृत्यस्तव महेश्वर॥प्रदत्तं परमैश्वर्यं त्वया नाथ सुदुर्लभम्॥१७॥अधुना स्थापितो दैवात्सर्वाधः सुतलेऽपि च ॥ इंद्राय
दत्तमैश्वर्यं मत्तो भक्तात्सुरेश्वर ॥ १८ ॥ त्वया वामनरूपेण सर्वरूपोऽसि सर्वतः ॥ बाणं बोधय भद्रं च मम प्राणात्मजं परम्
॥ १९ ॥ आत्मना सह युद्धं च देवेष्वपि विगर्हितम् ॥ इत्युक्त्वा च शिवं नत्वा शिरसा प्रणनाम तम् ॥ २० ॥ सामवेदोक्तस्तोत्रेण
तुष्टाव परमेश्वरम् ॥ पुलकाञ्चितसर्वाङ्गः साश्रुनेत्रोऽतिविह्वलः ॥ २१ ॥ ध्यायमानश्च नित्यं यो हृत्पद्मे सुमनोहरः ॥ शुक्रेण
दत्तं मन्त्रं च जप्त्वा चैकादशाक्षरम् ॥ २२ ॥ बलिरुवाच ॥ अदित्याः प्रार्थनेनैव मातुर्देव्या व्रतेन च ॥ पुरा वामनरूपेण
त्वयाऽहं वंचितः प्रभो ॥ २३ ॥ संपद्रूपा महालक्ष्मीर्दत्ता भक्ताय भक्तितः ॥ शक्राय मत्तो भक्ताय भ्रात्रे पुण्यवते ध्रुवम् ॥ २४ ॥
अधुना मम पुत्रोऽयं बाणः शंकरकिंकरः ॥ आराच्च रक्षितः सोऽपि तेनैव भक्तबन्धुना ॥ २५॥ परिपुष्टश्च पार्वत्या यथा मात्रा सुतस्तथा
॥ गृहीतवांश्च तत्कन्यां बलेन युवतीं सतीम् ॥ २६ ॥ समुद्यतश्च तं हन्तुं कार्त्तिकेनापि वारितः ॥ आगतोऽसि पुनर्हंतुं पौत्रस्य
दमने क्षमः ॥ २७ ॥ सर्वात्मनश्च सर्वत्र समभावः श्रुतौ श्रुतः ॥ करोषि जगतां नाथ कथमेवं व्यतिक्रमः ॥ २८ ॥ त्वया च निहतो
यो हि तस्य को रक्षिता भुवि ॥ सुदर्शनस्य तेजो हि सूर्यकोटिनिभं परम् ॥ २९ ॥ केषां सुराणामस्त्रेण तदेवमनिवारितम् ॥

यथा सुदर्शनं चैवमस्त्राणां प्रवरं वरम् ॥ ३० ॥ तथा भवांश्च देवानां सर्वेषामीश्वरः परः ॥ यथा भवांस्तथा कृष्णो विधाता वेधसामपि ॥ ३१ ॥ विष्णुः सत्त्वगुणाधारः शिवः सत्त्वाश्रयस्तथा ॥ स्वयं विधाता रजसः सृष्टिकर्ता पितामहः ॥ ३२ ॥ कालाग्निरुद्रो भगवान्विश्वसंहारकारकः ॥ तमसश्चाश्रयः सोऽपि रुद्राणां प्रवरो महान् ॥ ३३ ॥ स एव शंकरांशश्चाप्यन्ये रुद्राश्च तत्कलाः ॥ भवांश्च निर्गुणस्तेषां प्रकृतेश्च परस्तथा ॥ ३४ ॥ सर्वेषां परमात्मा वै प्राणा विश्वस्वरूपिणः ॥ मानसं च स्वयं ब्रह्म स्वयं ज्ञानात्मकः शिवः ॥ ३५ ॥ प्रवरा सर्वशक्तीनां बुद्धिः प्रकृतिरीश्वरी ॥ स्वात्मनः प्रतिबिंबस्ते जीवः सर्वेषु देहिषु ॥ ३६ ॥ जीवः स्वकर्मणां भोगी स्वयं साक्षी भवांस्तथा ॥ सर्वे यांति त्वयि गते नरदेवे यथाऽनुगाः॥३७॥सद्यः पतति देहश्च शवोऽस्पृश्यस्त्वया विना ॥ बुद्धाः संतो न जानंति वंचितास्तव मायया ॥३८॥ त्वां भजंत्येव ये सन्तो मायामेतां तरंति ते ॥ त्रिगुणा प्रकृतिर्दुर्गा वैष्णवी च सनातनी ॥ ३९ ॥ परा नारायणीशानी तव माया दुरत्यया ॥ त्वदंशाः प्रतिविश्वेषु ब्रह्मविष्णुशिवात्मकाः ॥ ४० ॥ सर्वेषामपि विश्वेषामाश्रयो यो महान्विराट् ॥ स शेते च जले योगाद्विश्वेशो गोकुले यथा ॥ ४१ ॥ स एव वासुर्भगवांस्तस्य देवो भवान्परः ॥ वासुदेव इति ख्यातः पुराविद्भिः प्रकीर्तितः ॥ ४२ ॥ त्वमेव कलया सूर्यस्त्वमेव कलया शशी ॥ कलया च हुताशश्च कलया पवनः स्वयम् ॥४३॥ कलया वरुणश्चैव कुबेरश्च यमस्तथा ॥ कलया त्वं महेन्द्रश्च कलया धर्म एव च ॥ ४४ ॥ त्वमेव कलया शेष ईशानो नैर्ऋतिस्तथा ॥ मुनयो मनवश्चैव ग्रहाश्च फलदायकाः ॥ ४५ ॥ कला कलायाश्चांशेन सर्वे जीवाश्चराचराः ॥ त्वं ब्रह्म परमं ज्योतिर्ध्यायंते योगिनः सदा ॥ ४६ ॥ तं त्वाद्रियन्ते भक्तास्ते ध्यायन्ते च तदंतरे ॥ नवीननीरदश्यामं पीतकौशेयवाससम् ॥ ४७ ॥ ईषद्धास्यप्रसन्नास्यं भक्तेशं भक्तवत्सलम् ॥ चन्दनोक्षितसर्वांगं द्विभुजं मुरलीधरम् ॥४८॥ मयूरपिच्छचूडं च मालतीमाल्यभूषितम् ॥ अमूल्यरत्ननिर्माणकेयूरवलयान्वितम् ॥ ४९ ॥ मणिकुण्डलयुग्मेन गण्डस्थलविराजितम् ॥ रत्नसारांगुलीयं च क्वणन्मञ्जीररंजितम्॥५०॥ कोटिकन्दर्पलीलाभं शरत्कमललोचनम् ॥ शरत्पूर्णेन्दुर्निंदास्यं चन्द्रकोटिसमप्रभम् ॥ ५१ ॥ वीक्षितं सस्मिताभिश्च गोपीनां कोटि

कोटिभिः ॥ वयस्यैः पार्षदैर्गोपैः सेवितं श्वेतचामरैः ॥ ५२ ॥ गोपबालकवेषं च राधावक्षःस्थलस्थितम् ॥ ध्यानासाध्यं दुराराध्यं ब्रह्मेशशेषवंदितम् ॥५३॥ सिद्धेंद्रैश्च मुनींद्रैश्च योगींद्रैः प्रणतं स्तुतम् ॥ वेदानिर्वचनीयं च परं स्वेच्छामयं विभुम् ॥५४॥ स्थूलात्स्थूलतमं रूपं सूक्ष्मात्सूक्ष्मतरं परम् ॥ सत्यं नित्यं प्रशस्तं च प्रकृतेः परमीश्वरम् ॥ ५५ ॥ निर्लिप्तं च निरीहं च भगवंतं सनातनम् ॥ एवं ध्यात्वा च ते पूताः स्निग्धदूर्वाक्षता जलम्॥५६॥पद्मापद्मार्चिते पादपद्मे च दातुमुत्सुकाः ॥ वेदाः स्तोतुमशक्तास्त्वामशक्ता सा सरस्वती ॥५७॥ शेषः स्तोतुमशक्तश्च स्वयंभूः शंभुरीश्वरम् ॥ गणेशश्च दिनेशश्च महेंद्रश्चंद्र एव च ॥५८॥ स्तोतुं नालं धनेशश्च किमन्ये जडबुद्धयः ॥ गुणातीतमनीहं च किं स्तौमि निर्गुणं परम् ॥५९॥ [1]अपंडितोऽयमसुरो न सुरः क्षंतुमर्हति ॥ बलेस्तु वचनं श्रुत्वा तमुवाच जगत्पतिः ॥ परिपूर्णतमः श्रीमान्भक्तं च भक्तवत्सलः ॥ ६० ॥ श्रीभगवानुवाच ॥ मा भैर्वत्स गृहं गच्छ सुतलं रक्षितं मया ॥ ६१ ॥ मद्वरेण प्रसादेन त्वत्पुत्रोऽप्यजरामरः ॥ दर्पहानिं करिष्यामि तस्य मूर्खस्य दर्पिणः ॥ ॥ ६२ ॥ प्रह्लादाय वरो दत्तो भक्ताय च तपस्विने ॥ ममावध्यश्च त्वद्वंशश्चेति प्रीतेन चेतसा ॥ ६३ ॥ तव पुत्राय दास्यामि ज्ञानं मृत्युंजयं परम् ॥ त्वया कृतमिदं स्तोत्रं सामवेदोक्तमीप्सितम् ॥ ६४ ॥ पुरा सनत्कुमाराय प्रदत्तं ब्रह्मणा तथा ॥ सिद्धाश्रमे पुण्यतमे प्रशस्ते सूर्यपर्वणि ॥ ६५ ॥ गौतमाय प्रदत्तं च गौर्या मंदाकिनीतटे ॥ शंकरेण च शिष्याय भक्ताय च दयालुना ॥ ६६ ॥ ब्रह्मणे च मया दत्तं शिवाय विरजातटे ॥ भृगवे च पुरा दत्तं कुमारेण च धीमता ॥६७॥ त्वं च दास्यसि बाणाय बाणः स्तोष्यत्यनेन माम् ॥ इदं स्तोत्रं महापुण्यमुपदिश्य गुरोर्मुखात् ॥६८॥ वृतस्य पूजितस्यापि वस्त्रभूषणचंदनैः ॥ सुस्नातो यः पठेन्नित्यं पूजाकाले च भक्तितः ॥ ६९ ॥ कोटिजन्मार्जितात्पापान्मुच्यते नात्र संशयः ॥ विपदां खंडनं स्तोत्रं कारणं सर्वसंपदाम् ॥ ७० ॥ वारणं दुःखशोकानां भवाब्धिघोरतारणम् ॥ खंडनं गर्भवासानां जरामृत्युहरं परम् ॥ ७१ ॥ बंधनानां च रोगाणां खंडनं भक्तमंडनम् ॥

---

[1] न पंडितोऽहमसुरो न सुरः क्षंतुमर्हसि—इ० पा० ।

स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ॥ ७२ ॥ व्रताव्रतेषु सर्वेषु तपस्वी च तपःसु च ॥ स सत्यं सर्वदानानां फलं च लभते
ध्रुवम्॥७३॥ लक्षधा स्तोत्रपाठेन स्तोत्रसिद्धिर्भवेन्नृणाम् ॥ सर्वसिद्धिं च लभते सिद्धस्तोत्रो भवेद्यदि॥७४॥इह लोके देवतुल्योऽप्यंते
याति हरेः पदम् ॥ ७५ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंड उत्तरार्धे नारायणनारदसंवादे बाणयुद्धे बलिकृतश्रीकृष्ण
स्तोत्रं नामैकोनविंशाधिकशततमोऽध्यायः ॥ ११९ ॥ श्रीनारायण उवाच ॥ अथ कृष्णश्च भगवानुद्धवेन बलेन च ॥ दूतं
प्रस्थापयामास विधाय मंत्रिणं शुभम् ॥ १ ॥ शिवो गणपतिर्यत्र दुर्गा दुर्गतिनाशिनी ॥ कार्त्तिकेयो भद्रकाली चोग्रचंडा च कोटरी
॥ २ ॥ आगत्य नत्वा दूतश्च गणेशं च शिवं शिवाम् ॥ मानवांश्चापि पूज्यांश्च समुवाच यथोचितम् ॥ ३ ॥ दूत उवाच ॥
बाणमाह्वयते कृष्णः संग्रामार्थं महेश्वर ॥ किं वाऽनिरुद्धमूषां च गृहीत्वा शरणं व्रज ॥४॥ रणे निमंत्रितो यो हि न याति भयका
तरः ॥ परत्र नरकं याति सप्तभिः पितृभिः सह ॥५॥ दूतस्य वचनं श्रुत्वा सभामध्ये यथोचितम् ॥ उवाच पार्वती देवी स्वयं शंक
रसन्निधौ ॥ ६ ॥ पार्वत्युवाच ॥ गच्छ बाण महाभाग गृहीत्वा वद कन्यकाम् ॥ सर्वस्वं यौतुकं दत्त्वा श्रीकृष्णं शरणं
व्रज ॥ ७ ॥ सर्वेषामीश्वरं बीजं दातारं सर्वसंपदाम् ॥ वरं वरेण्यं शरणं कृपालुं भक्तवत्सलम् ॥ ८ ॥ पार्वतीवचनं श्रुत्वा तमूचुस्ते
सुरेश्वराः ॥ प्रशशंसुः सभामध्ये धन्यधन्येति सर्वदा ॥ ९ ॥ कोपाविष्टश्च बाणोऽयमुत्तस्थौ सहसाऽसुरः ॥ सान्नाहिको धनुष्पाणिः
प्रणम्य शंकरं ययौ ॥ १० ॥ सर्वैर्निषिध्यमानश्च कंपितो रक्तलोचनः ॥ सान्नाहिकश्च दैत्यानां त्रिकोट्या च महाबलः ॥ ११ ॥
कुभांडः कूपकर्णश्च निकुंभः कुंभ एव च ॥ सेनापतीश्वरश्चैते ययुः सान्नाहिकास्तथा ॥ १२ ॥ उन्मत्तभैरवश्चैव संहारभैरवस्तथा ॥
असितांगो भैरवश्च रुरुभैरव एव च ॥ १३ ॥ महाभैरवसंज्ञश्च कालभैरव एव च ॥ प्रचंडभैरवश्चैव क्रोधभैरव एव च ॥१४॥ प्रययुः
शक्तिभिः सार्द्धं सर्वे सान्नाहिकाश्च ते ॥ कालाग्निरुद्रो भगवान्रुद्रैः सान्नाहिको ययौ ॥ १५ ॥ उग्रचंडा प्रचंडा च चंडिका चंडि
नायिका ॥ चंडेश्वरी च चामुंडा चंडी चंडकपालिका ॥ १६ ॥ अष्टौ च नायिकाः सर्वाः प्रययुः खर्परान्विताः ॥ कोटरी रत्नया

नस्था शोणितग्रामदेवता ॥१७॥ प्रययौ सा प्रफुल्लास्या खड्गखर्परधारिणी ॥ चन्द्राणी वैष्णवी शान्ता ब्रह्माणी ब्रह्मवादिनी ॥१८॥ कौमारी नारसिंही च वाराही विकटाकृतिः ॥ माहेश्वरी महामाया भैरवी भीमरूपिणी ॥ १९ ॥ अष्टौ च शक्तयः सर्वा रथस्थाः प्रययुर्मुदा ॥ रत्नेन्द्रसारयानस्था प्रययौ भद्रकालिका ॥ २० ॥ रक्तवर्णा त्रिनयना जिह्वाललनभीषणा ॥ शूलशक्तिगदाहस्ता खड्गखर्परधारिणी ॥ २१ ॥ प्रययौ शूलहस्तश्च वृषभस्थो महेश्वरः ॥ स्कन्दश्च शिखियानस्थः शस्त्रपाणिर्धनुर्धरः ॥ २२ ॥ एवं च प्रययुः सर्वे गणेशं पार्वतीं विना ॥ एभिर्युक्तं महादेवं दृष्ट्वा च भद्रकालिकाम् ॥ २३ ॥ प्रचक्रे चक्रपाणिश्च संभाषां च यथोचिताम् ॥ बाणः शंखध्वनिं कृत्वा प्रणम्य पार्वतीश्वरम् ॥ २४ ॥ धनुर्दधार सगुणं दिव्यास्त्रेण नियोजितम् ॥ बाणं समुद्यतं दृष्ट्वा सात्यकिः परवीरहा ॥ २५ ॥ निषिध्यमानस्तैः सर्वैः सन्नाही प्रययौ मुदा ॥ बाणश्चिक्षेप दिव्यास्त्रमजस्रं नाम नारद ॥ २६ ॥ अव्यर्थं ग्रीष्ममध्याह्नमार्तंडाभं सुतीक्ष्णकम् ॥ दृष्ट्वाऽस्त्रं सात्यकिः साक्षात्किंचिन्नम्रो बभूव सः ॥ २७ ॥ किं वा[1] न दग्धः प्रययौ नभोमध्यं सुदारुणम् ॥ वह्निं चिक्षेप बाणश्च सात्यकिर्वारुणेन च ॥ २८ ॥ प्रज्वलंतं तालमानं निर्वाणं च चकार सः ॥ चिक्षेप पावनं बाणः प्रचण्डं घोरमुल्बणम् ॥ २९॥ चिच्छेद सात्यकिश्चैव पर्वतास्त्रेण लीलया ॥ नारायणास्त्रं चिक्षेप बाणश्च रणमूर्धनि ॥ ३० ॥ सात्यकिर्दण्डवद्भूमौ पपातार्जुनशिक्षया ॥ माहेश्वरं प्रचिक्षेप बाणः शस्त्रविदां वरः ॥ ३१ ॥ सात्यकिर्वैष्णवास्त्रेण प्रचिच्छेदावलीलया ॥ ब्रह्मास्त्रं चापि चिक्षेप बाणश्च रणमूर्धनि ॥ ३२ ॥ क्षणं चकार निर्वाणं ब्रह्मास्त्रेण च सात्यकिः ॥३४॥ नागास्त्रं चापि चिक्षेप बाणो रणविशारदः ॥ ३३॥ सात्यकिर्गरुडेनैव संजहार क्षणेन च ॥ जग्राह शूलमव्यर्थं शंकरस्य सुदारुणम् ॥ ॥ ३४ ॥ तुष्टाव सात्यकिर्दुर्गां गले माल्यं बभूव ह ॥ जग्राह धनुषा बाणो बाणं पाशुपतं तथा ॥३५॥ बाणं सबाणं जृंभं च सात्यकिश्च चकार ह ॥ बाणं तं जृंभितं दृष्ट्वा कार्त्तिकेयो महाबलः ॥ ३६ ॥ अर्धचन्द्रं च चिक्षेप कामश्चिच्छेद लीलया ॥ गदां चिक्षेप च

---

[1] केशान् दग्ध्वा च—इ०पा० ।

स्कंदः प्रातःसूर्यसमप्रभाम् ॥ ३७ ॥ वैष्णवास्त्रेण कामश्च निर्वाणं च चकार सः ॥ नारायणास्त्रं स्कंदश्च प्राक्षिपच्च त्वरान्वितः ॥
॥ ३८ ॥ पपात दंडवद्भूमौ प्रद्युम्नः कृष्णशिक्षया ॥ स्कंदः शक्तिं च चिक्षेप प्रलयाग्निसमप्रभाम् ॥ ३९ ॥ कामो नारायणास्त्रेण
निर्वाणं च चकार ताम् ॥ ब्रह्मास्त्रं च प्रचिक्षेप कीर्त्तिको रणमूर्धनि ॥ ४० ॥ ब्रह्मास्त्रेणापि कामश्च निर्वाणं च चकार सः ॥ जग्राह
कार्त्तिकः कोपाद्दिव्यं पाशुपतं तथा ॥ ४१ ॥ निद्रास्त्रेणापि मदनो निद्रितं च चकार तम् ॥ कार्त्तिकं निद्रितं दृष्ट्वा बाणं च जृंभितं
तथा ॥४२॥ कोपात्कामं च सरथं जग्राह भद्रकालिका ॥ क्रोडे कृत्वा च बाणं च स्कंदं च जगतां प्रसूः ॥४३॥ रणस्थलाच्च प्रययौ
यत्रैव पार्वती सती ॥ कार्तिकं बोधयामास बाणं सुस्थं चकार सा ॥ ४४ ॥ सहसा सरथः कामो नासारंध्रेण वर्त्मना ॥ बहिर्बभूव
संत्रस्तः प्रययौ च रणस्थलम् ॥ ४५ ॥ दृष्ट्वा कामं च सरथं जहसुर्यादवास्तदा ॥ सर्वे शैवाश्च तत्रस्थाः शुष्ककंठा भयाकुलाः ॥ ४६ ॥
अथ बाणः पुनः क्रुद्धो रथमारुह्य कोपतः ॥ कार्त्तिकेयश्च भगवान्युद्धाय पुनरागतः ॥४७॥ बाणः पंच शरांश्चैव चिक्षेप रणमूर्धनि ॥
अर्धचंद्रेण चिच्छेद बलदेवो महाबलः ॥ ४८ ॥ रथं बभंज बाणस्य लांगलेन च लांगली ॥ जघान सूतमश्वांश्च मुसलेना
वलीलया ॥ ४९ ॥ कुर्वंतमुद्यमं छेत्तुं हलिनं च महाबलः ॥ कालाग्निरुद्रो भगवान्वारयामास लीलया ॥ ५० ॥ रथं काला
ग्निरुद्रस्य बभंज लांगली रुषा ॥ हलेन सूतमश्वांश्च जघान रणमूर्धनि ॥ ५१ ॥ कालाग्निरुद्रः कोपेन चिक्षेप ज्वरमुल्बणम् ॥ बभू
वुर्यादवाः सर्वे ज्वराक्रांता हरिं विना ॥ ५२ ॥ तं दृष्ट्वा भगवान्कृष्णः ससर्ज वैष्णवं ज्वरम् ॥ तं चिक्षेप ज्वरं हंतुं माहेशं रणमूर्धनि ॥
॥ ५३ ॥ बभूव ज्वरयोर्युद्धं मुहूर्तमतिदारुणम् ॥ वैष्णवज्वरनिष्क्रांतो रणमूर्ध्नि पपात सः ॥ परं बभूव निश्चेष्टस्तुष्टाव माधवं पुनः ॥
॥ ५४ ॥ ज्वर उवाच ॥ प्राणात्रक्ष जगन्नाथ भक्तानुग्रहविग्रह ॥ त्वमात्मा पुरुषः पूर्णः सर्वत्र समता तव ॥ ५५ ॥ ज्वर
स्य वचनं श्रुत्वा संजहार स्वकं ज्वरम् ॥ माहेश्वरो ज्वरो भीतो रणादेव हि निर्ययौ ॥ ५६ ॥बाणश्च पुनरागत्य बाणानां च सहस्र
कम् ॥ चिक्षेप मंत्रपूतं च प्रलयाग्निशिखोपमम् ॥ ५७ ॥ फाल्गुनः शरजालेन वारयामास लीलया ॥ चिक्षेप शक्तिं बाणश्च ग्रीष्म

सूर्यसमप्रभाम् ॥ ५८ ॥ चिच्छेद लीलया तां च सव्यसाची महाबलः ॥ स जग्राह पाशुपतं शतसूर्यसमप्रभम् ॥ ५९ ॥ अत्यर्थमतिघोरं च विश्वसंहारकारकम् ॥ तद्दृष्ट्वा चक्रपाणिश्च चक्रं चिक्षेप दारुणम् ॥ ६० ॥ हस्तानां च सहस्रं च सपाशुपतमुल्बणम् ॥ चिच्छेद रणमध्ये च पपाताचलसिंहवत् ॥ ६१ ॥ शस्त्रं पाशुपतं चैव ययौ पशुपतेः करम् ॥ अत्यर्थं दारुणं लोके प्रलयाग्निशिखोपमम् ॥ ६२ ॥ बाणरक्तसमूहेन बभूव च महानदः ॥ बाणः पपात निश्चेष्टो व्यथितो हतचेतनः ॥ ६३ ॥ तत्राजगाम भगवान्महादेवो जगद्गुरुः ॥ रुरोदागत्य मोहेन बाणं कृत्वा स्ववक्षसि ॥ ६४ ॥ शिवाश्रुपतनेनैव संबभूव सरोवरम् ॥ चेतनं कारयामास करुणासागरः प्रभुः ॥ ६५ ॥ बाणं गृहीत्वा प्रययौ यत्र देवो जनार्दनः ॥ चक्रे पद्मार्चिते पादपद्मे बाणसमर्पणम् ॥ ६६ ॥ तुष्टाव जगतां नाथं भक्तेशं चंद्रशेखरः ॥ बलिना च स्तुतं येन वेदोक्तेन च तेन च ॥६७॥ हरिर्मृत्युंजयं ज्ञानं ददौ बाणाय धीमते ॥ करपद्मं ददौ गात्रे तं चकाराजरामरम् ॥ ६८ ॥ बाणः स्तोत्रेण तुष्टाव भक्त्या बलिकृतेन च ॥ वरां कन्यां समानीय रत्नभूषणभूषिताम् ॥ ६९ ॥ प्रददौ हरये भक्त्या तत्रैव देवसंसदि ॥ गजेंद्राणां पंचलक्षमश्वानां च चतुर्गुणम् ॥ ७० ॥ दासीनां च सहस्रं च रत्नभूषणभूषितम् ॥ सहस्रं कामधेनूनां वत्सयुक्तं च सर्वदम् ॥ ७१ ॥ माणिक्यानां च मुक्तानां रत्नानां शतलक्षकम् ॥ मणींद्राणां हीरकाणां शतलक्षं मनोहरम् ॥ ७२ ॥ जलभाजनपात्राणि सुवर्णनिर्मितानि च ॥ सहस्राणि ददौ तस्मै भक्तिनम्रात्मकंधरः ॥ ७३ ॥ वराणि सूक्ष्मवस्त्राणि वह्निशुद्धांशुकानि च ॥ ददौ बाणश्च सर्वाणि स्वभक्त्या शंकराज्ञया ॥ ७४ ॥ तांबूलानां च चूर्णानां पूर्णपात्राणि नारद ॥ सहस्राणि ददौ भक्त्या वराणि विविधानि च ॥ ७५ ॥ कन्यां समर्पयामास पादपद्मे हरेरपि ॥ रुरोदोच्चैः स्वभक्त्या च परिहारं चकार सः ॥ ७६ ॥ कृष्णस्तस्मै वरं दत्त्वा वेदोक्तं च सुभाषितम् ॥ शंकरानुमतेनैव प्रययौ द्वारकांपुरीम् ॥ ७७ ॥ गत्वा कन्यां नवोढां तां बाणस्यापि महात्मनः ॥ रुक्मिण्यै प्रददौ शीघ्रं देवक्यै च हरिः स्वयम् ॥ ७८ ॥ महोत्सवं मंगलं च कारयामास यत्नतः ॥ ब्राह्मणान्भोजयामास ब्राह्मणेभ्यो धनं ददौ ॥ ७९ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे

श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे बाणयुद्धं नाम विंशत्यधिकशततमोऽध्यायः ॥ १२० ॥ नारायण उवाच ॥ अथ कृष्णः सुधर्मायां निवसन्त्सगणस्तथा ॥ तत्राजगाम विप्रश्च प्रज्वलन्ब्रह्मतेजसा ॥ १ ॥ आगत्य दृष्ट्वा तुष्टाव भक्त्या च पुरुषोत्तमम् ॥ उवाच मधुरं शांतो भीतो विनयपूर्वकम् ॥ २ ॥ ब्राह्मण उवाच ॥ ॥ शृगालो वासुदेवश्च राजेशो मंडलेश्वरः ॥ त्वामुवाच स यद्वाक्यं सावधानं निशामय ॥ ३ ॥ ॥ शृगाल उवाच ॥ वैकुंठे वासुदेवोऽहं देवेशश्च चतुर्भुजः ॥ लक्ष्मीपतिश्च जगतां धाता धातुश्च पालकः ॥४॥ ब्रह्मणा प्रार्थितोऽहं च भारावतरणाय च ॥ भुवो भारतवर्षं च तदर्थं गमनं मम ॥ ५ ॥ वसुदेवसुतो वैश्यः क्षत्रियश्चाप्यहं कृतः ॥ जनं जनेन निर्जित्य दुर्बलं बलिना सह ॥ योधयित्वा महाधूर्तो घातयामास भूपतीन् ॥ ६ ॥ दुर्योधनं जरासंधं भूपमन्यं च दुर्बलम् ॥ भीमेन घातयामास बलिनाऽल्पेन भूतले ॥७॥ द्रोणं भीष्मं च कर्णं च यं यमन्यं च भूतले ॥ बलीयसाऽर्जुनेनैव घातयामास लीलया ॥ ८ ॥ यं यमन्यं दुर्बलं च प्रसिद्धमप्रसिद्धकम् ॥ प्रसिद्धेन बलवता घातयामास लीलया ॥ ९ ॥ शिशुपालं दंतवक्रं कंसं च चिररोगिणम् ॥ मत्पुत्रं नरकं चैव दुर्बलं केशिनं मुरम् ॥ १० ॥ स्वयं जघान संकेताच्छलेन सहसा तव ॥ न धर्मयुद्धे कपटी स च बालो ह्यधार्मिकः ॥ ११ ॥ जघान पूतनां कुब्जां स्त्रीघाती वस्त्रहेतुना ॥ जघान रजकं शिष्टमशिष्टश्च प्रतारकः ॥ १२ ॥ हिरण्यकशिपुं दैत्यं हिरण्याक्षं महाबलम् ॥ मधुं च कैटभं चैव हत्वाऽहं सृष्टिरक्षकः ॥ १३ ॥ अहमेव स्वयं ब्रह्मा ह्यहमेव स्वयं शिवः ॥ अहं विष्णुश्च जगतां पाता दुष्टावहारकः ॥ १४ ॥ अंशेन कलया सर्वे मनवो मुनयस्तथा ॥ स्वयं नारायणोऽहं च निर्गुणः प्रकृतेः परः ॥ १५ ॥ लज्जया कृपया चैव मित्रबुद्ध्या क्षमाकृता ॥ यद्गतं तद्गतं भद्र युद्धं कुरु मया सह ॥१६॥ शृणोमि दूतद्वारेण ह्यतीवोच्चैरहंकृतम् ॥ उचितं दमनं तस्याप्युन्नतानां निपातनम् ॥ १७ ॥ रणश्च परमो धर्मोऽप्यहं शास्ता भुवोऽधुना ॥ शंखं चक्रं गदां पद्मं गृहीत्वाऽहं चतुर्भुजः॥१८॥द्वारकां तां गमिष्यामि युद्धाय सगणः स्वयम् ॥ युद्धं कुरु यदीच्छाऽस्ति न मां च शरणं व्रज ॥ १९ ॥ यदि मा यास्यति मम शरणं शरणागतः ॥

भस्मीभूतां करिष्यामि द्वारकां च क्षणेन च ॥ २० ॥ सबलं च सपुत्रं त्वां सगणं च सबांधवम् ॥ क्षणेन दग्धुं शक्तोऽहमसहायेन लीलया ॥ २१ ॥ तपस्विनं च वृद्धं च जित्वा युद्धे च शंकरम् ॥ शक्रं भगांगं जित्वा च रोगिणं ब्रह्मशापतः ॥ २२ ॥ मत्तोऽसि वीरमात्मानं मन्यमानस्त्वमेव च ॥ स्त्रीजितो हि वृथार्थं च पारिजातस्य हेतुना ॥ २३ ॥ लंपटो योनिलुब्धश्च राधाधीनश्च गोकुले ॥ अधुना किंकरसमः सत्यादीनां च योषिताम् ॥ २४ ॥ इत्येवमुक्त्वा विप्रश्च तूष्णींभूय स्थितो मुने ॥ श्रीकृष्णः सगणः श्रुत्वा भृशमुच्चैर्जहास सः ॥२५॥ भोजयित्वा च संपूज्य ब्राह्मणं च चतुर्विधम् ॥ निनाय रजनीं दुःखाद्वाक्शल्यमानसज्वरात् ॥ ॥ २६ ॥ प्रभाते रथमारुह्य सगणः सत्वरं मुदा ॥ लीलामात्रेण प्रययौ शृगालो नृपतिर्यतः ॥२७॥ श्रुत्वा शृगालो वार्तां तां कृत्रिमश्च चतुर्भुजः ॥ आजगाम हरेः स्थानं युद्धाय सगणः स्वयम् ॥ २८॥ कृष्णश्चक्रे च संभाषां मित्रबुद्ध्या च लौकिकीम् ॥ आश्लेषं मधुरालापं स्निग्धनेत्रश्च सस्मितः ॥ २९ ॥ राजा निमन्त्रणं चक्रे कृष्णो न स्वीचकार तत् ॥ उवाच कृष्णभीतश्च त्यक्त्वा दंभं च दर्शनात् ॥ ३० ॥ शृगाल उवाच ॥ चक्रेण मच्छिरश्छित्त्वा सुशीघ्रं द्वारकां व्रज ॥ पापः पततु देहोऽयमनित्यो नश्वरस्तथा ॥ ३१ ॥ अहं सुभद्रस्ते द्वारि जयश्च विजयो यथा ॥ सर्वं जानासि सर्वज्ञ मा विलम्बं कुरु प्रभो ॥ ३२॥ लक्ष्मीशापेन भ्रष्टोऽहं कालः पूर्णों बभूव मे ॥ शतवर्षेण शापान्ते यास्यामि भवनं तव ॥ ३३ ॥ श्रीकृष्ण उवाच ॥ पूर्वं मां मित्र प्रहर पश्चाद्युद्धं करोम्यहम् ॥ सर्वं जानामि वैकुण्ठं गच्छ वत्स यथासुखम् ॥ ३४॥ शृगालो दशबाणांश्च चिक्षेप माधवं प्रति ॥ ते प्रणम्य ययुः शीघ्रमाकाशं कालरूपिणः ॥ ३५ ॥ गदां चिक्षेप राजा स प्रलयाग्निशिखोपमाम् ॥ कृष्णांगस्पर्शमात्रेण बभञ्ज च क्षणेन च ॥ ३६ ॥ धनुश्चिक्षेप खड्गं च कालरूपं सुदारुणम् ॥ कृष्णांगस्पर्शमात्रेण बभञ्ज च क्षणेन च ॥ ३७ ॥ दृष्ट्वा निरस्तं राजानमित्युवाच कृपानिधिः ॥ गृहं गत्वा सुतीक्ष्णं च मित्रास्त्रमानयेति च ॥ ३८ ॥ शृगाल उवाच ॥ नात्माकाशोऽस्त्रविद्धश्च किं युद्धमात्मना सह ॥ मामुद्धर भवाब्धेश्च धरोद्धारणकारण ॥ ३९ ॥ भवाब्धिं विषमं नाथ विषयं च विषाधिकम् ॥ छिंधि

मे निगडं मायां मोहजालं स्वकर्मणः ॥ ४० ॥ कर्मणामीश्वरस्त्वं च विधाता धातुरेव च ॥ दाता शुभफलानां च प्रदाता सर्वसंपदाम् ॥ ४१ ॥ कारणं प्राक्तनानां च तेषां च खण्डने क्षमः ॥ यामि गेहं च वैकुण्ठं तवैव द्वारसत्तमम् ॥ ४२ ॥ त्यक्त्वा च नश्वरं देहं प्राकृतं पांचभौतिकम् ॥ मित्रस्य स्तवनं श्रुत्वा वचनं च सुधोपमम् ॥ ४३ ॥ रुरोद समरे तत्र कृपया च कृपानिधिः ॥ बभूव तत्र सहसा कृष्णनेत्राश्रुबिंदुना ॥४४॥ दिव्यं बिंदुसरो नाम तीर्थानां प्रवरं परम् ॥ तत्तोयस्पर्शमात्रेण जीवन्मुक्तो भवेन्नरः ॥ सप्तजन्मार्जितात्पापान्मुच्यते नात्र संशयः ॥ ४५ ॥ श्रीभगवानुवाच ॥ कथमेतादृशी बुद्धिर्मित्र ते निर्मलं मनः ॥ दूतद्वारा कथं चोक्तं निष्ठुरं दारुणं वचः ॥ ४६ ॥ शृगाल उवाच ॥ एवमुक्तो मया त्वं च तेन क्रोधादिहागतः ॥ अन्यथा दुर्लभं नाथ स्वप्नेऽपि तव दर्शनम् ॥ ४७ ॥ एतस्मिन्नंतरे योगाद्देहं त्यक्त्वा च प्राकृतम् ॥ दृष्ट्वा कृष्णं च यानेन वैकुण्ठं प्रययौ मुदा॥ ४८॥ सप्ततालप्रमाणं च ज्योतिस्तत्र महोल्बणम् ॥ पद्मैः पद्मार्चितं पादपद्मं नत्वा जगाम ह ॥४९॥ गत्वा च द्वारकां कृष्णो नत्वा च पितरं प्रसूम् ॥ श्रीकृष्णः सगणः शीघ्रं दृष्ट्वा च परमाद्भुतम् ॥ ५० ॥ प्रफुल्लवदनः श्रीमान्द्वारकाभिमुखं ययौ ॥ जगाम रुक्मिणीगेहं पुष्पचंदनवासितम् ॥ ५१ ॥ पुष्पचन्दनतल्पे च नक्तं रेमे तया सह ॥ मूर्च्छां संप्राप सा भैष्मी कृष्णं कृत्वा स्ववक्षसि ॥ ५२ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे शृगालवासुदेवमोक्षणं नामैकविंशत्यधिकशततमोऽध्यायः ॥ ॥ १२१ ॥ नारद उवाच ॥ सर्वासां रमणीनां च कृष्णेन परमात्मना ॥ समुद्वाहश्च कथितस्त्वया भगवता मुदा ॥ १ ॥ स्यमंतकस्य च मणेरुपाख्यानमभीप्सितम् ॥ तन्न श्रुतं महाभाग तन्मां व्याख्यातुमर्हसि ॥ २ ॥ नारायण उवाच ॥ भाद्रशुक्लचतुर्थ्यां च तारकां हृतवाञ्छशी ॥ तां तत्याज स कृष्णायां गुरुस्तां च गृहीतवान्॥३॥गुरुणा भर्त्सिता तारा सगर्भा लज्जिता सती ॥ शशाप लज्जया कोपाच्चन्द्रं कामातुरं पुरा ॥ ४ ॥ तारोवाच ॥ भव शापकलंकी त्वं यस्त्वां पश्यति देहभृत् ॥ पापं दृष्ट्वा स पापी च कलंकी च भविष्यति ॥ ५॥ इति श्रुत्वा स चन्द्रश्च नारायणसरोवरे ॥ नारायणतपस्तप्त्वा मुमोच कृतपातकात् ॥ ६ ॥

तपःक्लिष्टं च तं दृष्ट्वा भगवान्पुरुषोत्तमः ॥ तमुवाच महाभीतं कृपया च कृपानिधिः ॥ ७ ॥ श्रीभगवानुवाच ॥ मुक्तो भव
कलंकी त्वं सर्वकालं कलानिधे ॥ शापस्थानं तारकाया भाद्रे मासि सितासिते ॥८॥ चतुर्थ्यामुदितं चंद्रं यस्तु पश्यति कामतः ॥
तं याति तत्कलंकश्च स कलंकी भविष्यति ॥ ९ ॥ हरिणा दीयते ताली भाद्रे मासि सितासिते ॥ चतुर्थ्यामुदितश्चंद्रो नेक्षितव्यः
कदाचन ॥१०॥स्वयं दृष्ट्वा स्ववाक्यं च पालनं कर्त्तुमर्हति॥भाद्रे चंद्रं चतुर्थ्यां तु स कलंकी बभूव ह ॥ ११ ॥ कलंकी येन रूपेण
तद्वक्ष्यामि निशामय ॥ स मुमोच कलंकाच्च लोकशिक्षार्थमीश्वरः ॥ १२ ॥ सत्राजितः सूर्यभक्तस्तपस्तप्त्वा च पुष्करे ॥ स्यमंतकं
मणिश्रेष्ठं संप्राप भास्करादपि ॥ १३ ॥ अष्टौ भारान्सुवर्णानां प्रसूते निन्यमेव च॥विष्णोर्मणावधिष्ठानं महापूते च पुण्यदे ॥१४॥
सत्राजितः सत्यभामां दत्त्वा कृष्णाय भक्तितः ॥ यौतुकार्थं मणिं दातुमुद्यतो महते महान् ॥ १५ ॥ तं निषिध्य प्रसेनश्च दुर्मतिः
कालपीडितः ॥ मणिं गृहीत्वा प्रययौ पुण्यां वाराणसीं पुरीम् ॥१६॥ निहत्य तं पथि बलात्सिंहः सबल एव च ॥ मणिं जग्राह रुचिरं
सूत्रबद्धं गले ददौ ॥ १७ ॥ कलिंगराजपुत्रश्च ब्रह्मशापात्सुदारुणात् ॥ विप्रेणाभ्युदितस्तेन पशुयोनिं जगाम सः ॥ १८ ॥ निहत्य
सिंहं गहने भल्लूको जांबवान्बली ॥ मणिं गृहीत्वा प्रययौ स्वपुरं रत्ननिर्मितम् ॥१९॥ ऊचुः सर्वे द्वारकायां मणिं जग्राह माधवः
॥ तस्य बुद्धिं न जानीमः केनोपायेन वेति च ॥२०॥ इति श्रुत्वा तु भगवान्कलंककृंतनाय च ॥ प्रययौ काननं घोरं चौरचिह्नेन
वर्त्मना ॥ २१ ॥ मृतं प्रसेनं दृष्ट्वा च दुःखी सिंहं ददर्श सः ॥ मणिशून्यं च तं दृष्ट्वा विषसाद च माधवः ॥ २२ ॥ सर्वं ज्ञात्वा च
सर्वज्ञो भल्लूकभवनं ययौ ॥ रुदंतं बालकं तत्र धात्रीक्रोडे ददर्श सः॥२३॥बालकं बोधयामास सा धात्री करुणान्विता॥मणिं गृहाण
बालेति तव ह्येष स्यमंतकः ॥ २४ ॥ सिंहः प्रसेनमवधीत्सिंहो जांबवता हतः ॥ सुकुमारक मा रोदीस्तव ह्येष स्यमंतकः ॥२५॥
इति धात्र्युक्तसुश्लोकं यश्च स्मृत्वा जलं पिबेत् ॥ दैवदृष्टनष्टचंद्रदोषादेव प्रमुच्यते ॥ २६ ॥ कामतो यदि पश्यंति दांभिका वेदनिंदकाः
॥ कलंकिनो भवंत्येवमित्याह कमलोद्भवः ॥२७॥ कृष्णो धात्रीवचः श्रुत्वा मणिं जग्राह बालकात् ॥ धात्री गत्वा च भल्लूकं

कथयामास कोपतः ॥ २८ ॥ जांबवांश्च समागत्य तुष्टाव प्रणिपत्य सः ॥ कन्यां जांबवतीं तस्मै यौतकार्थं मणिं ददौ ॥ २९ ॥द्वारकां
मणिमानीय दर्शयामास यादवान् ॥ प्रभुश्च सर्वतः शुद्धो निष्कलंको बभूव सः ॥ ३० ॥ एतत्ते कथितं वत्स मणेराख्यानमु
त्तमम् ॥ अध्यायश्रवणादेव निष्कलंको भवेन्नरः ॥ ३१ ॥ यच्छुतं धर्मवक्त्रेण तदुक्तं च यथागमम् ॥ सुदुर्लभमुपाख्यानं किं
भूयः श्रोतुमिच्छसि ॥ ३२ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे स्यमन्तकमणि
हरणं नाम द्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥ नारद उवाच ॥ गणेशपूजनाख्यानं पुराणेषु च दुर्लभम् ॥
श्रुतं तद्ब्रह्मणो वक्त्रात्सामान्यं च समासतः ॥ १ ॥ महिमानं गणपतेः सर्वपूज्येश्वरस्य च ॥ व्यासेन श्रोतुमिच्छामि
योगींद्राणां गुरोर्गुरुः ॥ २ ॥ सिद्धाश्रमे महापूजा दिवौकोभिः कृता पुरा ॥ राधामाधवयोस्तत्र पुनः संमीलनं पुरा ॥ ३ ॥
अतीते वर्षशतके श्रीदाम्नः शापमोक्षणे ॥ आदौ चकार पूजां च स च राधा कथं मुने ॥ ४ ॥ स्थितेषु च सुरेंद्रेषु ब्रह्म
विष्णुशिवादिषु ॥ नागेंद्रे च स्थिते शेषे नागेषु च महत्सु च ॥ ५ ॥ राजेंद्रेषु च भूमौ च बलिष्ठेष्वसुरेषु च ॥ गंधर्वेषु च रक्षःसु
चान्येषु बलवत्सु च ॥ ६ ॥ विस्तरेण महाभाग तन्मां व्याख्यातुमर्हसि ॥ ७ ॥ श्रीकृष्ण उवाच ॥ त्रैलोक्ये पृथिवी
धन्या मान्या पुण्यवती सती ॥ तत्र भारतवर्षं च कर्मणां फलदं शुभम् ॥८॥ धन्यं यशस्यं पूज्यं च पुण्यक्षेत्रे च भारते ॥ सिद्धा
श्रमं महापुण्यक्षेत्रं मोक्षप्रदं शुभम् ॥ ९ ॥ सनत्कुमारो भगवांस्तत्र सिद्धो बभूव ह ॥ स्वयं विधाता तत्रैव तप्त्वा सिद्धो बभूव ह
॥ १० ॥ योगींद्राश्च मुनींद्राश्च सिद्धेंद्राः कपिलादयः ॥ शतक्रतून्महेंद्रश्च तत्र कृत्वा बभूव ह ॥११ ॥ तेन सिद्धाश्रमं नाम सर्वेषा
मपि दुर्लभम् ॥ अधिष्ठानं गणेशस्य तत्रैव सततं मुने ॥ १२ ॥ अमूल्यरत्ननिर्माणगणेशप्रतिमां शुभाम् ॥ वैशाखीपूर्णिमायां च
पूजां कुर्वंति देवताः ॥ १३ ॥ नागाश्च मानवाश्चैव दैत्या गंधर्वराक्षसाः ॥ सिद्धेंद्राश्च मुनींद्राश्च योगींद्राः सनकादयः ॥ १४ ॥ तत्रा
जगाम शंभुश्च पार्वत्या सह शंकरः ॥ सगणः कार्त्तिकेयश्च स्वयं ब्रह्मा प्रजापतिः ॥ १५ ॥ तत्राजगाम शेषश्च नागेंद्रैः सह सत्वरम्

तत्राजग्मुः सुराः सर्वे मनवो मुनयस्तथा ॥ १६ ॥ आजग्मुस्ते नृपाः सर्वे पूजार्थं हृष्टमानसाः ॥ आययौ भगवान्कृष्णो द्वारकावासिभिः सह ॥ १७ ॥ आजगाम तथा नंदः सार्द्धं गोकुलवासिभिः ॥ गोपीभिः शतकोटीभिर्गोलोकवासिभिः सह ॥ १८ ॥ गजेंद्रकोटितुल्याभिर्बलिष्ठाभिः सहालिभिः ॥ आययौ सुंदरी राधा कृष्णप्राणाधिदेवता ॥ १९ ॥ रासेश्वरी सुरसिका शतवर्षे गते सति ॥ सुस्नाता सुदती शुद्धा धृत्वा धौते च वाससी ॥ २० ॥ संयता सा निराहारा गत्वा च मणिमंडपम् ॥ सुप्रक्षालितपादाब्जा कांता भुवनपावनी ॥ २१ ॥ श्रीकृष्णप्राप्तिकामाऽथ सुसंकल्पं विधाय च ॥ गंगोदकेन हेरंबं स्नापयामास भक्तितः ॥ २२ ॥ ध्यानं च सामवेदोक्तं चकार शुक्लपुष्पतः ॥ माता चतुर्णां वेदानां वसोश्च जगतामपि ॥ २३ ॥ बुद्धिरूपा भगवती ज्ञानिनां जननी परा ॥ ध्यानात्मकं स्वपुत्रं तं परा ध्यानं चकार सा ॥ २४ ॥ सर्वं लंबोदरं स्थूलं ज्वलंतं ब्रह्मतेजसा ॥ गजवक्त्रं वह्निवर्णमेकदंतमनंतकम् ॥ ॥ २५ ॥ सिद्धानां योगिनामेव ज्ञानिनां च गुरोर्गुरुम् ॥ ध्यातं मुनींद्रैर्देवेंद्रैर्ब्रह्मेशशेषसंज्ञकैः ॥ २६ ॥ सिद्धेंद्रैर्मुनिभिः सद्भिर्भगवंतं सनातनम् ॥ ब्रह्मस्वरूपं परमं मंगलं मंगलालयम् ॥ २७ ॥ सर्वविघ्नहरं शांतं दातारं सर्वसंपदाम् ॥ भवाब्धिमायापोतेन कर्णधारं च कर्मिणाम् ॥ २८ ॥ शरणागतदीनार्तपरित्राणपरायणम् ॥ ध्यायेद्ध्यानात्मकं साध्यं भक्तेशं भक्तवत्सलम् ॥ २९ ॥ इति ध्यात्वा स्वशिरसि दत्त्वा पुष्पं पुनः सती ॥ सर्वांगशोधनं न्यासं वेदोक्तं च चकार सा ॥ ३० ॥ पुनश्च ध्यात्वा ध्यानेन तेनैव शुभदायिना ॥ ददौ पुष्पं पादपद्मे राधा लंबोदरस्य च ॥ ३१ ॥ सप्ततीर्थोदकेनैव शीतेन वासितेन च ॥ ददौ पद्मं पादपद्मे तैः पद्मादिभिरर्चिते ॥ ३२ ॥ दूर्वाक्षतैः शुक्लपुष्पैः सुगंधिचंदनोदकैः ॥ अर्घ्यं ददौ तच्छिरसि स्वयं गोलोकवासिनी ॥ ३३ ॥ सचंदनं स्निग्धमाल्यं पारिजातस्य सुंदरम् ॥ ददौ गले गणेशस्य स्वयं रासेश्वरी मुदा ॥ ३४ ॥ कस्तूरीकुंकुमाक्तं च सुगंधि स्निग्धचंदनम् ॥ सर्वांगे प्रददौ तस्य वृंदावनविनोदिनी ॥ ३५ ॥ सुगंधि शुक्लपुष्पं च सुगंधि चंदनार्चितम् ॥ ददौ तस्य पदांभोजे महापद्मालया सती ॥ ३६ ॥ सुगंधियुक्तं धूपं च पूतैर्वस्तुभिरन्वितम् ॥ ददौ कृष्णप्रिया तस्मै जगतामीश्वराय च ॥ ३७ ॥ दीपं घृतप्रदीप्तं च ध्वांत

विध्वंसकारणम् ॥ ददौ तस्मै सुरेशाय परमाद्या सनातनी ॥ ३८ ॥ नैवेद्यं विविधं रम्यं सुस्वादु सुमनोहरम् ॥ चोष्यं चर्व्यं लेह्यपेये सुधातुल्यं चतुर्विधम् ॥ ३९ ॥ फलानि च सुपक्वानि त्रैलोक्ये दुर्लभानि च ॥ मधुराणि च मूलानि ग्राम्यारण्यानि नारद ॥४०॥ तानि त्वानंत्यसंख्यानि तिलानां लड्डुकानि च ॥ सुपक्वानि सुरम्याणि स्वादूनि सुरसानि च ॥ ४१ ॥ यवगोधूमचूर्णानां पक्वानि पिष्टकानि च ॥ घृताक्तानि च रम्याणि शर्करासहितानि च ॥४२॥ स्वस्तिकानां लड्डुकानि स्थूलानि सुंदराणि च ॥ भ्रष्टद्रव्यं च विविधमक्षतं शर्करान्वितम्॥४३॥घृतकुल्यां दुग्धकुल्यां मधुकुल्यां मनोहराम् ॥ गुडस्य दध्नः कुल्यां च पायसानां तथैव च ॥४४॥ पिष्टकानां स्वस्तिकानां रंभाणां राशिरेव च ॥ मिष्टव्यंजनयुक्तानि शाल्यन्नानि शुभानि च ॥ ४५ ॥ ददौ तस्मै सुरेशाय कृष्णप्राणाधिदेवता ॥ अमूल्यरत्ननिर्माणं रम्यं सिंहासनं वरम् ॥ ४६ ॥ ददौ विघ्नविनाशाय विरजातटवासिनी ॥ मूक्ष्मवस्त्रयुगं रम्यममूल्यं वह्निशुद्धकम् ॥ ४७ ॥ ददौ शैलात्मजायैव शतशृंगनिवासिनी ॥ तांबूलं च वरं रम्यं कर्पूरादिसुवासितम् ॥ ४८ ॥ सर्वसंपत्प्रदत्रे च वृषभानसुता ददौ ॥ सप्ततीर्थोदकं शुद्धं सुपूतं च सुवासितम् ॥ ४९ ॥ पानार्थं च जलं तस्मै ददौ गोपीश्वरी मुदा ॥ अमूल्यं दुर्लभं चैव विशुद्धं श्वेतचामरम् ॥ ५० ॥ ददौ तस्मै परेशाय मूलप्रकृतिरीश्वरी ॥ अमूल्यरत्ननिर्माणं मुक्तामाणिक्यहीरकैः ॥ ॥ ५१ ॥ परिष्कृतं सुतल्पं च पुष्पचन्दनचर्चितम् ॥ सितसूक्ष्मांशुकेनैव परितश्च परिष्कृतम् ॥ ५२ ॥ ददौ शिवात्मजायैव कृष्णवक्षःस्थलस्थिता ॥ दत्त्वा च कामधेनुं च सवत्सां वांछितप्रदाम् ॥ ५३ ॥ कृत्वाऽतीव परीहारं वृन्दा पुष्पांजलिं ददौ ॥ दिव्येनानेन मनुना सबीजनोज्ज्वलेन च ॥५४॥ ददौ षोडशोपचारं कालिंदीकुलवासिनी ॥ ॐ गं गौं गणपतये विघ्नविनाशिने स्वाहा ॥ ५५ ॥ इत्येवमेव मंत्रं च गणेशं षोडशाक्षरम् ॥ सा जजाप सहस्रं च परं कल्पतरुं वरम् ॥ ५६ ॥ तुष्टाव परया भक्त्या भक्तिनम्रात्मकंधरा ॥ साश्रुनेत्रा पुलकिता स्तोत्रेण कौतुकेन च ॥ ५७ ॥ श्रीराधिकोवाच ॥ परं धाम परं ब्रह्म परेशं परमीश्वरम् ॥ विघ्ननिघ्नकरं शांतं पुष्टं कांतमनंतकम् ॥ ५८ ॥ सुरासुरेंद्रैः सिद्धेंद्रैः स्तुतं स्तौमि परात्परम् ॥ सुरपद्मदिनेशं च

गणेशं मङ्गलायनम् ॥ ५९ ॥ इदं स्तोत्रं महापुण्यं विघ्नशोकहरं परम् ॥ यः पठेत्प्रातरुत्थाय सर्वविघ्नात्प्रमुच्यते ॥ ६० ॥
इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे त्रैयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥
नारायण उवाच ॥ राधा संपूज्य विधिना स्तुत्वा लम्बोदरं सती ॥ अमूल्यरत्ननिर्माणं सर्वांगभूषणं ददौ ॥१॥ राधायाः पूजा ॥
श्रीनाथस्तवनं श्रुत्वा पूजां दृष्ट्वा च वस्तु च ॥ उवाच मधुरं शांतः शांतां त्रैलोक्यमातरम् ॥ २ ॥ श्रीगणेश उवाच ॥ तव
जगन्मातर्लोकशिक्षाकरी शुभे ॥ ब्रह्मस्वरूपा भवती कृष्णवक्षःस्थलस्थिता ॥३॥ यत्पादपद्ममतुलं ध्यायन्ते ते सुदुर्लभम् ॥ सुरा
ब्रह्मेशशाषाद्या मुनींद्राः सनकादयः ॥४॥ जीवन्मुक्ताश्च भक्ताश्च सिद्धेंद्राः कपिलादयः ॥ तस्य प्राणाधिदेवी त्वं प्रिया प्राणाधिका
परा ॥ ५ ॥ वामांगनिर्मिता राधा दक्षिणांगश्च माधवः ॥ महालक्ष्मीर्जगन्माता तव वामांगनिर्मिता ॥६॥ वसोः सर्वनिवासस्य प्रसू
स्त्वं परमेश्वरी ॥ वेदानां जगतामेव मूलप्रकृतिरीश्वरी ॥ ७ ॥ सर्वाः प्राकृतिका मातः सृष्ट्यां च त्वद्विभूतयः ॥ विश्वानि कार्यरू
पाणि त्वं च कारणरूपिणी ॥ ८ ॥ प्रलये ब्रह्मणः पाते तन्निमेषो हरेरपि ॥ आदौ राधां समुच्चार्य पश्चात्कृष्णं परात्परम् ॥ ९ ॥ स
एव पण्डितो योगी गोलोकं याति लीलया ॥ व्यतिक्रमे महापापी ब्रह्महत्यां लभेद्ध्रुवम् ॥१०॥ जगतां भवती माता परमात्मा पिता
हरिः ॥ पितुरेव गुरुर्माता पूज्या वंद्या परात्परा ॥ ११ ॥ भजते देवमन्यं वा कृष्णं वा सर्वकारणम् ॥ पुण्यक्षेत्रे महामूढो यदि निंद
ति राधिकाम् ॥ १२ ॥ वंशहानिर्भवेत्तस्य दुःखशोकमिहैव च ॥ पच्यते निरये घोरे यावच्चंद्रदिवाकरौ ॥ १३ ॥ गुरुश्च ज्ञानोद्गिरणा
ज्ज्ञानं स्यान्मन्त्रतंत्रयोः ॥ स च मन्त्रश्च तत्तंत्रं भक्तिः स्याद्युवयोर्यतः ॥१४॥ निषेव्य मन्त्रं देवानां जीवा जन्मनिजन्मनि ॥ भक्ता
भवन्ति दुर्गायाः पादपद्मे सुदुर्लभे॥१५॥निषेव्य मन्त्रं शंभोश्च जगतां कारणस्य च ॥ तदा प्राप्नोति युवयोः पादपद्मं सुदुर्लभम् ॥
॥ १६ ॥ युवयोः पादपद्मं च दुर्लभं प्राप्य पुण्यवान् ॥ क्षणार्धं षोडशांशं च नहि मुञ्चति दैवतः ॥ १७ ॥ भक्त्या च युवयोर्मंत्रं
गृहीत्वा वैष्णवादपि ॥ स्तवं वा कवचं वापि कर्ममूलनिकृंतनम् ॥ १८ ॥ योजयेत्परया भक्त्या पुण्यक्षेत्रे च भारते ॥ पुरुषाणां

सहस्रं च स्वात्मना सार्द्धमुद्धरेत् ॥ १९ ॥ गुरुमभ्यर्च्य विधिवद्वस्त्रालंकारचंदनैः ॥ कवचं धारयेद्यो हि विष्णुतुल्यो भवेद्ध्रुवम्॥२०॥
यद्दत्तं वस्तु मे मातस्तत्सर्वं सार्थकं कुरु ॥ देहि विप्राय मत्प्रीत्या तदा भोक्ष्यामि सांप्रतम् ॥ २१ ॥ देवे देयानि दानानि देवे
देया च दक्षिणा ॥ तत्सर्वं ब्राह्मणे दद्यात्तदानंत्याय कल्पते ॥ २२ ॥ ब्राह्मणानां मुखं राधे देवानां मुखमुख्यकम् ॥ विप्रभुक्तं च यद्द्रव्यं
प्राप्नुवंत्येव देवताः ॥ २३ ॥ विप्रांश्च भोजयामास तत्सर्वं राधिका सती ॥ बभूव तत्क्षणादेव प्रीतो लंबोदरो मुने ॥२४॥ एतस्मिन्नंतरे
देवा ब्रह्मेशशेषसंज्ञकाः ॥ आययुर्वटमूलं च देवपूजार्थमेव च ॥ २५ ॥ तत्र गत्वा शिवचरो देवान्देवीरुवाच सः ॥ श्रीकृष्णं
शुष्ककंठश्च भयभीतश्च रक्षकः ॥ २६ ॥ रक्षक उवाच ॥ गणेशं पूजयामास सर्वादौ च शुभक्षणे ॥ वृषभानुसुता राधा
प्रकृत्य स्वस्तिवाचनम् ॥ २७ ॥ सहिता सा बलवती गोपी त्रिशतकोटिभिः ॥ वारितोऽहं बलिष्ठाभिर्युष्मांश्च कथयामि तत् ॥२८॥
सर्वादौ पूजयेद्यो हि सोऽनंतं फलमालभेत् ॥ मध्ये मध्यविधं पुण्यं शेषे स्वल्पमिति स्मृतम्॥२९॥ देवेंद्रेषु मुनीन्द्रेषु देवस्त्रीषु स्थितासु
च ॥ गोपीभिश्च सह तया राधया पूजितः परः ॥ ३० ॥ दूतवाक्यं समाकर्ण्य जहसुः सर्वदेवताः ॥ मुनयो मनवश्चैव राजानो
देवयोषितः ॥ ३१ ॥ रुक्मिण्याद्या रमण्यश्च या देव्यो विस्मयं ययुः ॥ सरस्वती च सावित्री पार्वती परमेश्वरी ॥ ३२ ॥ रोहिणी
च सती संज्ञा स्वाहाद्या देवयोषितः ॥ मुदिताः प्रययुः सर्वा मुनिपत्न्यः पतिव्रताः ॥ ३३ ॥ मुनयो मनवः सर्वे देवाश्चापि नरास्तथा
॥ श्रीकृष्णः सगणैः सार्धं ये चान्ये प्रययुर्मुदा ॥ ३४ ॥ ते सर्वे विविधैर्द्रव्यैः पूजां चक्रुः शुभक्षणे ॥ बलिष्ठा दुर्बलाश्चैवं क्रमेण
च पृथक्पृथक् ॥ ३५ ॥ लड्डुकानां च राशीनां शतकोटिर्बभूव ह ॥ शर्कराणां तदर्द्धं च स्वस्तिकानां तथैव च ॥ ३६ ॥ अन्नानां
भव्यवस्तूनां शतकोटिर्बभूव ह ॥ असंख्यानि फलान्येव स्वादूनि मधुराणि च ॥ ३७ ॥ मधुकुल्या दुग्धकुल्या दधिकुल्या
घृतस्य च ॥ बभूवुः शतसंख्याश्च त्रैलोक्यानां च पूजने ॥ ३८ ॥ पूजां कृत्वा तु ते सर्वे समूषुश्च सुखासने ॥ पार्वती परमप्रीत्या
राधास्थानं समाययौ ॥ ३९ ॥ सा राधा पार्वतीं दृष्ट्वा समुत्थाय जवेन च ॥ यथायोग्यां च संभाषां चकार सादरं मुदा ॥ ४० ॥

आश्लेषणं चुंबनं च बभूव च परस्परम् ॥ उवाच मधुरं दुर्गा राधां कृत्वा स्ववक्षसि ॥ ४१ ॥ पार्वत्युवाच ॥ किं वा प्रश्नं करिष्यामि त्वां राधां मंगलालयाम् ॥ गता ते विरहज्वाला श्रीदाम्नः शापमोक्षणे ॥ ४२ ॥ सततं मन्मनः प्राणास्त्वय्येव मयि ते तथा ॥ न ह्येवमावयोर्भेदः शक्तिपुरुषयोस्तथा ॥ ४३ ॥ ये त्वां निंदंति मद्भक्तास्त्वद्भक्ताश्चापि मामपि ॥ कुंभीपाके च पच्यन्ते यावच्चंद्रदिवाकरौ ॥ ४४ ॥ राधामाधवयोर्भेदं ये कुर्वंति नराधमाः ॥ वंशहानिर्भवेत्तेषां पच्यंते नरके चिरम् ॥ ४५ ॥ यांति सूकरयोनिं च पितृभिः शतकैः सह ॥ षष्टिवर्षसहस्राणि विष्ठायां कृमयस्तथा ॥४६॥ त्वयैव पूजितः पुत्रो न मया च गणेश्वरः ॥ सर्वादौ सर्वपूज्योऽयं यथा तव तथा मम ॥४७॥ यावज्जीवनपर्यंतं न विच्छेदो भविष्यति ॥ राधामाधवयोर्देवि मुग्धधावल्ययोर्यथा ॥ ॥४८॥ सिद्धाश्रमे महातीर्थे पुण्यक्षेत्र च भारते ॥ निर्विघ्नं लभ गोविंदं संपूज्य विघ्नखंडनम् ॥ ४९ ॥ रासेश्वरी त्वं रसिका श्रीकृष्णो रसिकेश्वरः ॥ विदग्धाया विदग्धेन संगमो गुणवान्भवेत् ॥ ५० ॥ श्रीदाम्नः शापनिर्मुक्ता शतवर्षान्तरे सति ॥ कुरुष्व मद्वरेणाद्य कृष्णेन सह संगमम् ॥ ५१ ॥ ममाज्ञया दुर्लभया सुवेषं कुरु सुन्दरि ॥ सुदुर्लभः कामिनीनां सत्पुंसा सह संगमः ॥ ॥ ५२ ॥ चक्रुः सुवेषं राधायाः प्रियाल्यश्च शिवाज्ञया ॥५३॥ रत्नसिंहासने रम्ये वासयामासुरीश्वरीम् ॥ पुरतो रत्नमाला सा रत्नमालां गले ददौ ॥ ५४ ॥ राधाया दक्षिणे हस्ते क्रीडापद्मं मनोहरम् ॥ ददौ पद्ममुखी पादपद्मयुग्मेप्यलक्तकम् ॥५५॥ प्रददौ सुन्दरी गोपी सिंदूरं सुन्दरं वरम् ॥ चंदनेन समायुक्तं सीमंताधस्तलोज्ज्वलम् ॥ ५६ ॥ सुचारुकबरीं रम्यां चकार मालती सती ॥ मनोहरां मुनीनां च मालतीमाल्यभूषिताम् ॥ ५७ ॥ कस्तूरीकुंकुमाक्तं च चारुचंदनपत्रकम् ॥ स्तनयुग्मे सुकठिने चकार चंदना सती ॥ ॥ ५८ ॥ चारुचंपकपुष्पाणां मालां गंधमनोहराम् ॥ मालावती ददौ तस्यै प्रफुल्लां नवमल्लिकाम् ॥ ५९ ॥ रतीषु रसिका गोपी रत्नभूपणभूषिताम् ॥ तां चकारगतिरसिकां वरां रतिरसोत्सुकाम् ॥ ६० ॥ शरत्पद्मदलाभं च लोचनं कज्जलोज्ज्वलम् ॥ कृत्वा ददौ सुललतं वस्त्रं च ललिता सती ॥ ६१ ॥ महेंद्रेण प्रदत्तं च पारिजातप्रसूनकम् ॥ सुगंधियुक्तं तस्याश्च पारिजातं करे ददौ ॥ ६२ ॥

सुशीलं मधुरोक्तं च भर्तुः पार्श्वे यथोचितम् ॥ शिक्षां चकार नीतिं च सुशीला गोपिका सती ॥ ६३ ॥ स्त्रीणां च षोडशकलां विपत्तौ
विस्मृतां तयोः ॥ स्मरणं कारयामास राधामाता कलावती ॥ ६४ ॥ शृंगारविषयोक्तं च वचनं च सुधोपमम् ॥ स्मरणं कारयामास
भगिनी च सुधामुखी ॥ ६५ ॥ कमलानां चंपकानां दले चंदनचर्चिते ॥ चकार रतितल्पं च कमला चाशु कोमलम् ॥ ६६ ॥
चारुचंपकपुष्पं च कृष्णार्थं पुटकस्थितम् ॥ चकार चंदानाक्तं च स्वयं च पार्वती सती ॥६७॥ पुष्पं केलिकदंबानां स्तबकं च मनोहरम्
॥ कदंबमालां कृष्णार्थं विद्यमानां चकार सा ॥ ६८ ॥ तांबूलं च वरं रम्यं कर्पूरादिसुवासितम् ॥ कृष्णप्रिया च कृष्णार्थं चकार
वासितं जलम् ॥ ६९ ॥ एतस्मिन्नंतरे सर्वमाश्रमं सजलस्थलम् ॥ साक्षाद्गोरोचनाभं च ददृशुर्मुनयः सुराः ॥ ७० ॥ ते सर्वे विस्मयं
गत्वा पप्रच्छुः कृष्णमीश्वरम् ॥ उवाच भगवांस्तांश्च सर्वज्ञः सर्वकारणः ॥ ७१ ॥ श्रीभगवानुवाच ॥ अभिशप्ता च श्रीदाम्ना
भ्रष्टशोभा च राधिका ॥ सर्वं ज्ञानं विसस्मार मद्विच्छेदज्वरातुरा ॥ ७२ ॥ विमुक्ते वर्षशतके ज्ञानं सस्मार सा सती ॥ सिद्धाश्रमं
च पीताभं रासेश्वर्याश्च तेजसा ॥ ७३ ॥ परमाह्लादकं तेजश्चंद्रकोटिसमप्रभम् ॥ सुखदृश्यं च सुखदं चक्षुषा प्राणिनामपि ॥
॥ ७४ ॥ तच्छ्रुत्वा परमाश्चर्यं मुनयो मनवस्तथा ॥ देव्यश्च सर्वदेवास्ते ब्रह्मेशानादयस्तथा ॥ ७५ ॥ जवेन गत्वा तत्स्थानं भक्तिनम्रात्मकंधराः
॥ सर्वे जनास्ते ददृशुस्त्रैलोक्यस्थाश्च राधिकाम् ॥ ७६ ॥ श्वेतचंपकवर्णाभामतुलां सुमनोहराम् ॥ मोहिनीं मानसानां
च मुनीनामूर्ध्वरेतसाम् ॥ ७७ ॥ सुकेशीं सुन्दरीं श्यामां न्यग्रोधपरिमंडलाम् ॥ नितंबकठिनश्रोणीं स्तनयुग्मोन्नताननाम् ॥
॥७८॥ कोटींदुर्निंदितास्यां तां सस्मितां सुदतीं सतीम् ॥ कज्जलोज्वलरूपां च शरत्कमललोचनाम् ॥ ७९ ॥ महालक्ष्मीं बीजरूपां
परामाद्यां सनातनीम् ॥ परमात्मस्वरूपस्य प्राणाधिष्ठातृदेवताम् ॥ ८० ॥ स्तुतां च पूजितां चैव परां च परमात्मने ॥ ब्रह्मस्वरूप
निर्लिप्तां नित्यरूपां च निर्गुणाम् ॥ ८१ ॥ विश्वानुरोधात्प्रकृतिं भक्तानुग्रहविग्रहाम् ॥ सत्यस्वरूपां शुद्धां च पूतां पतितपावनीम्
॥ ८२ ॥ सुतीर्थपूतां सत्कीर्तिं विधात्रीं वेधसामपि ॥ महत्प्रियां च महतीं महाविष्णोश्च मातरम् ॥ ८३ ॥ रासेश्वरेश्वरीं रम्यां रसिकां

रसिकेश्वरीम् ॥ वह्निशुद्धांशुकाधानां स्वेच्छारूपां शुभालयाम् ॥ ८४ ॥ गोपीभिः सप्तभिः शश्वत्सेवितां श्वेतचामरैः ॥ चतसृभिः
प्रियालीभिः पादपद्मोपसेविताम् ॥ ८५ ॥ अमूल्यरत्ननिर्माणभूषणोच्चैर्विभूषिताम् ॥ चारुकुंडलयुग्मेन श्रुतिगंडस्थलोज्ज्वलाम्
॥ ८६ ॥ सुनासां गजमुक्ताढ्यां खगेन्द्रचंचुनिंदिताम् ॥ कुंकुमालक्तकस्तूरीस्निग्धचंदनचर्चिताम् ॥ ८७ ॥ दधानां सुकपोलां
च कोमलांगीं सुकामुकीम् ॥ गजेंद्रगामिनीं रामां कमनीयां सुकामिनीम् ॥ ८८ ॥ कामास्त्रजयरूपां च कामकाम्यालयां
वराम् ॥ क्रीडाकमलमम्लानं पारिजातप्रसूनकम् ॥ ८९ ॥ अमूल्यरत्ननिर्माणं दधानां दर्पणोज्ज्वलम् ॥ नानारत्न
विचित्राढ्यरत्नसिंहासनस्थिताम् ॥ ९० ॥ पद्मैः पद्मार्चितं पादपद्मं च मंगलालयम् ॥ हृत्पद्मे ध्यायमानां च कृष्णस्य
परमात्मनः ॥ ९१ ॥ कर्मणा मनसा वाचा स्वप्ने जागरणेऽपि च ॥ तत्प्रीतिं प्रेम सौभाग्यं स्मरंतीं नित्यनूतनम् ॥
॥ ९२ ॥ भावानुरक्तसंसिक्तां शुद्धभक्तां पतिव्रताम् ॥ धन्यां मान्यां गौरवर्णां शश्वद्वक्षःस्थलस्थिताम् ॥९३॥ प्रियासु प्रियभक्तेषु
सुप्रियां प्रियवादिनीम् ॥ कृष्णवामांगसंभूतामभेदां गुणरूपयोः ॥ ९४ ॥ गोलोकवासिनीं देवदेवीं सर्वोपरि स्थिताम् ॥ वृषभानुसु
ताख्यां तां पुण्ये क्षेत्रे च भारते ॥ ९५ ॥ गोपीश्वरीं गुप्तिरूपां सिद्धिदां सिद्धिरूपिणीम् ॥ ध्यानासाध्यां दुराराध्यां वंदे सद्भक्तवंदि
ताम् ॥ ९६ ॥ ध्याने ध्याने न राधाया ध्यायंते ज्ञानतत्पराः ॥ इहैव जीवन्मुक्तास्ते परत्र कृष्णपार्षदाः॥९७॥दृष्ट्वा ब्रह्मा च सर्वादौ
तुष्टाव परमेश्वरीम् ॥ स्वयं विधाता जगतां मातरं वेधसामपि ॥ ९८ ॥ ब्रह्मोवाच ॥ षष्टिवर्षसहस्राणि दिव्यानि परमे
श्वरि ॥ पुष्करे च तपस्तप्तं पुण्ये क्षेत्रे च भारते ॥ ९९ ॥ त्वत्पादद्ममधुरमधुलुब्धेन चेतसा ॥ मधुव्रतेन लोभेन प्रेरितेन मया
सति ॥ १०० ॥ तथाऽपि न मया लब्धं त्वत्पादपदमीप्सितम्॥न दृष्टमपि स्वप्नेऽपि जाता वागशरीरिणी ॥१॥ वाराहे भारते वर्षे
पुण्ये वृंदावने वने ॥ सिद्धाश्रमे गणेशस्य पादपद्मं च द्रक्ष्यसि ॥ २ ॥ राधामाधवयोर्दास्यं कुतो विषयिणस्तव ॥ निवर्तस्व महा
भाग परमेतत्सुदुर्लभम् ॥ ३ ॥ इति श्रुत्वा निवृत्तोऽहं तपसे भग्नमानसः ॥ परिपूर्ण तदधुना वांछितं तपसः फलम् ॥ ४ ॥ श्रीम

हादेव उवाच ॥ पद्मैः पद्मार्चितं पादपद्मं यस्य सुदुर्लभम् ॥ ध्यायंते ध्याननिष्ठाश्च शश्वद्ब्रह्मादयः सुराः ॥ ५ ॥ मुनयो मनव
श्चैव सिद्धाः संतश्च योगिनः ॥ द्रष्टुं नैव क्षमाः स्वप्ने भवती तस्य वक्षमि ॥ ६ ॥ अनंत उवाच ॥ वेदाश्च वेदमाता च पुरा
णानि च सुव्रते ॥ अहं सरस्वती संतः स्तोतुं नालं च संततम् ॥ ७ ॥ अस्माकं स्तवने यस्य भ्रूभंगं च सुदुर्लभम् ॥ तवैव भर्त्सने
भीताश्चावयोरंतरं हरेः ॥ ८ ॥ एवं देवाश्च देव्यश्चाप्यन्ये ये च समागताः ॥ प्रगतास्तुष्टुवुः सर्वे मुनिमन्वादयस्तथा ॥ ९ ॥ लज्जया
नम्रवक्राश्च रुक्मिण्याद्याश्च योषितः ॥ मलीमसं च चक्रुस्ताः श्वासेन रत्नदर्पणम् ॥११०॥ मृततुल्या सत्यभामा निराहारा कृशो
दरी ॥ मनसोऽप्यभिमानं च सर्वं तत्याज नारद ॥१११॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारद
संवादे सिद्धाश्रमतीर्थयात्राप्रसंगे गणेशपूजनं ब्रह्मेशशेषादिकृतराधिकास्तोत्रं नाम चतुर्विंशत्यधिकशततमोऽध्यायः ॥ १२४ ॥
॥ नारद उवाच ॥ गणेशपूजनादेव राधास्तोत्रात्परं विभो ॥ बभूव किं रहस्यं वा तन्मे व्याख्यातुमर्हसि ॥ १ ॥
॥ श्रीभगवानुवाच ॥ गणेशपूजने तीर्थे ये देवाश्च समाययुः ॥ मुनयश्चापि योगींद्रा वसंतो वटमूलके ॥ २ ॥ वासुदेवो
देवकी च परमादरपूर्वकम् ॥ पप्रच्छ शंभुं ब्रह्माणमनंतं मुनिपुंगवान् ॥ ३ ॥ भवेद्भवाब्धितरणमावयोरुत्तमा गतिः ॥ शीघ्रं ब्रूत महा
भागा दीनयोर्दीनबांधवाः ॥ भवाब्धितरणे तर्य्यां तत्र यूयं च नाविकाः ॥४॥ न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥ यज्ञरू
पाणि पुण्यानि व्रतान्यनशनानि च ॥ ५ ॥ तपांसि नानादानानि विप्रदेवार्चनानि च ॥ चिरं पुनंति सर्वाणि दर्शनादेव वैष्णवाः ॥
॥ ६ ॥ सतां च विष्णुभक्तानां रजसां स्पर्शमात्रतः ॥ पूतानां पादपद्मानां सद्यः पूता वसुंधरा ॥७॥ तीर्थानि च पवित्राणि समुद्राः
पर्वतास्तथा ॥ सुरा दर्शनमिच्छंति पातकेंधनपावकम् ॥ ८ ॥ सोऽज्ञानी नैव बुबुधे ज्ञानं च ज्ञानिना सह ॥ परमं स्वादुरूपं च दधि
दुग्धरसं यथा ॥ ९ ॥ यथा कृष्णस्य तातोऽहं संगी सुचिरमेव च ॥ तथैव देवकी माता ज्ञानिनां च गुरोर्गुरो ॥ १० ॥ वसुदेववचः
श्रुत्वा प्रहस्य शंकरः स्वयम् ॥ चतुर्णामपि वेदानामुवाच जनको गुरुः ॥ ११ ॥ महादेव उवाच ॥ सन्निकर्षौ ज्ञानिनां

चाप्यनादरणकारणम् ॥ यांति गंगांभसा पूतास्तीर्थान्यन्यानि सिद्धये ॥ १२ ॥ वासुदेवस्य तातोऽयं वसुदेवश्च पंडितः ॥ ज्ञानिनः
कश्यपस्यांशो वासोस्तातस्य चात्मनः ॥ १३ ॥ पृच्छति ज्ञानमस्मांश्च कृष्णाज्ञान्पुत्रबुद्धितः ॥ अहो दुर्गा महामाया ज्ञानिनामपि
मोहिनी ॥ १४ ॥ विष्णुमाया दुराराध्या न साध्या जगतामपि ॥ वयं च मोहिताः शश्वद्वेदानां जनकस्तथा ॥ १५ ॥ ब्रह्मा कृष्णं
परीक्षेत मोहितस्तस्य मायया ॥ ध्यायते यत्पदांभोजं तपसा जीवनावधि॥१६॥ इंद्रेषु दशलक्षेष्वप्यधिकाष्टशतेषु च ॥ पातेषु ब्रह्मणः
पाते निमेषो माधवस्य च ॥१७॥ सह देवेंद्रयुद्धं च पारिजातस्य हेतुना ॥ पारिजाततरुं दत्त्वा मया शक्रश्च रक्षितः ॥१८॥ यज्ज्ञानं
न गिरामेव तत्त्वं वा विषयात्मकम् ॥ नाहं किंचित्तदज्ञानात्साध्यानां च सदैव हि ॥१९॥ प्राणिनामात्मनो ज्ञानमस्माकं ज्ञानमस्ति
च ॥ तदूर्ध्वं तत्समं नैव कृष्णं पृच्छ शुभाशुभम् ॥ २० ॥ ब्रह्मणश्च चतुर्यामं कल्पं कल्पविदो विदुः ॥ सप्तकल्पांतजीवी च मार्कंडेयो
महामुनिः ॥ २१ ॥ अष्टानवतिशक्रेषु पातेषु पतनं मुनेः ॥ ततः प्राप्तं हरेर्दास्यं मुनिना तपसः फलात् ॥ २२ ॥ प्रलये ब्रह्मणः पाते पत
नं लोमशस्य च ॥ दिक्पालानां ग्रहाणां च तदायुश्चिरजीविनाम् ॥ २३ ॥ अन्येषामपि देवानां मुनीनामूर्ध्वरेतसाम् ॥ तदेवायुश्च
रुद्राणां मां च मृत्युंजयं विना ॥२४॥ प्रलये च विधेः पातो शिवलोकेऽप्यहं शिवः ॥ ब्रह्मभालोद्भवः शंभुः सर्वादिः सर्गभाषणः ॥
॥ २५ ॥ कृष्णवामांगसंभूता यथा राधा तथैव च ॥ तथैव दुर्गा लक्ष्मीश्च सावित्री च सरस्वती ॥२६॥ आदित्योऽप्यदितेः पुत्रः
कायव्यूहेन द्वादश ॥ तथैव च महेंद्रश्च कायव्यूहाश्चतुर्दश ॥ २७ ॥ तथैव वसवश्चाष्टौ रुद्राश्चैकादशैव ते ॥ मनुपाते चंद्रपातो विष
यात्पतनं भवेत् ॥ २८ ॥ समाययौ च सर्वेषां निधनं प्रलयेऽपि च ॥ प्रलये दर्शयामास ब्रह्मांडं च जलप्लुतम् ॥ २९ ॥ ब्रह्माणं च
स्वलोकं च स्वात्मानं शक्तिभिश्च माम् ॥ सर्वेषां मूलरूपश्च सर्वेशः कृष्ण एव च ॥ ३० ॥ भज पुत्रं राजसूये यज्ञेशं यज्ञका
रणम् ॥ विधिवद्दक्षिणां दत्त्वा भवाब्धिं तर यादव ॥ ३१ ॥ मुक्तिस्ते नास्ति निर्वाणा विषयी कश्यपो भवान् ॥ न ते दास्यं भक्त
धनमदितिर्देवकी तथा ॥ ३२ ॥ व्रज स्वर्गं भोगबीजं स्वस्थानममरालयम् ॥ शिवस्य वचनं श्रुत्वा संयतश्च शुभक्षणे ॥ ३३ ॥ तत्र

संभृतसंभारो राजसूयं चकार सः ॥ वसुदेवस्य हव्यं च साक्षाच्च जगृहुः सुराः ॥ ३४ ॥ यत्र साक्षाच्च यज्ञेशो यज्ञोऽयं दक्षिणा सह ॥ पूर्णाहुतिं दत्तवंतं वसुदेवमुवाच सः ॥ सनत्कुमारो भगवान्वासुदेवाज्ञया मुने ॥ ३५ ॥ सनत्कुमार उवाच ॥ सर्वस्वं दक्षिणां देहि तूर्णं लक्ष्मीपतेः पितः ॥ ३६ ॥ सार्थकं कुरु कर्मेदं वेदोक्तं वचनं शृणु ॥ दक्षिणां विप्रमुद्दिश्य यत्कालं चेन्न दीयते ॥ ३७ ॥ मुहूर्ते तु व्यतीते सा दक्षिणा द्विगुणा भवेत् ॥ वासरे च बहिर्भूते भवेत्साऽपि चतुर्गुणा ॥३८॥ त्रिरात्रे समतीते तु षड्गुणा दक्षिणा भवेत् ॥ पक्षांते तु शतगुणा मासांते तु चतुर्गुणा ॥ ३९ ॥ षण्मासेऽप्यधिके न्यूने च साहस्रगुणा तथा ॥ वर्षांते सा लक्षगुणा ब्रह्मणोक्तं च यादव ॥ उभौ च नरकं यातः कर्मकर्तृपुरोहितौ ॥ ४० ॥ वसुदेवश्च तच्छ्रुत्वा सर्वस्वमुत्ससर्ज सः ॥ अधिकारांश्च साह्लादो वासुदेवाज्ञया तथा ॥ ४१ ॥ अमूल्यानां च रत्नानां दशकोटिमनुत्तमाम् ॥ ददौ गर्गाय सर्वादौ स्वयं लक्ष्मीपतेः पिता ॥ ४२ ॥ शतकोटिं मणींद्राणां स्वर्णानां तच्चतुर्गुणम् ॥ माणिक्यानां च मुक्तानां हीरकाणां तथैव च ॥४३॥ रौप्यं प्रवालं परमं स्वर्णपात्राणि यानि च ॥ स्वस्त्रीणां स्ववधूनां चाप्यमूल्यरत्नभूषणम् ॥ ४४ ॥ श्वेतचामरलक्षं च लक्षं च रत्नदर्पणम् ॥ कामधेनुगणं सर्वं शतकोटिगजानपि ॥ ४५ ॥ शतकोटिं गजेंद्राणामश्वानां तच्चतुर्गुणम् ॥ यद्धनं यादवानां च राज्ञो राजानुमोदनात् ॥ ४६ ॥ ग्रामाणां शतलक्षं च ससस्यं फलितं तरुम् ॥ धान्याचलानां लक्षं च शाल्यन्नानां तथैव च ॥ ४७ ॥ पायसं पिष्टकं चैव मिष्टान्नं च सुधोपमम् ॥ स्वस्तिकानां तिलानां च रम्याणि लड्डुकानि च ॥ ४८ ॥ दध्नां मधूनां दुग्धानां गुडानां हविषामपि ॥ कुल्यानां शतकं दत्त्वा परिहारं चकार सः ॥ ४९ ॥ सकर्पूरं च तांबूलं सुशीतं वासितं जलम् ॥ सुगंधि चंदनं चैव पारिजातस्य मालिकाम्॥५०॥ आसनानि च रम्याणि वह्निशुद्धांशुकानि च ॥ रत्ननिर्माणतल्पानि पुष्पाणि च फलानि च ॥ ५१ ॥ प्रददौ ब्राह्मणेभ्यश्च प्रफुल्लवदनेक्षणः ॥ देवांश्च भोजयामास ब्राह्मणानां मुखैः शुभैः ॥५२॥ देवाश्च मुनयो रात्रौ स्वरामाभिश्च रेमिरे ॥ प्रभाते प्रययुः सर्वे श्रीकृष्णानुमतेन च ॥ ५३ ॥ यादवाः प्रययुः सर्वे द्वारकां कृष्णपालिताम् ॥ अमूल्यरत्नपूर्णां च रुक्मिणीदर्शनेन च ॥ ५४ ॥ इति

श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंड उत्तरार्द्धे नारायणनारदसंवादे पंचविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥

॥ श्रीनारायण उवाच ॥ गणेशपूजनं कृत्वा माधवो यादवैः सह ॥ देवैर्मुनिभिरन्यैश्च देवीभिः सह नारद ॥ १ ॥ अंशेन देवो देवीभी रुक्मिण्याद्याभिरेव च ॥ प्रययौ द्वारकां रम्यां तस्थौ सिद्धाश्रमे स्वयम् ॥ २ ॥ कृत्वा सुप्रीतिसंभाषां सार्द्धं गोलोकवासिभिः ॥ गोपैः सुहृद्भिर्नंदेन मात्रा गोप्या यशोदया ॥ ३ ॥ उवाच मातरं तातं सुनीतं च यथोचितम् ॥ गोपांश्च गोकुलस्थांश्च बन्धुवर्गांश्च सांप्रतम् ॥ ४ ॥ श्रीभगवानुवाच ॥ गच्छ नंदव्रजं नंद तात प्राणस्य वल्लभ ॥ मातर्यशोदे त्वमपि परमार्ये यशस्विनि ॥ ५ ॥ भुक्त्वा कालावशेषं च गच्छ गोकुलमुत्तमम् ॥ सालोक्यमुक्तिं दास्यामि सार्द्धं गोकुलवासिभिः ॥ ६ ॥ इत्युक्त्वा भगवान्कृष्णः पित्रोरनुमतेन च ॥ जगाम राधिकास्थानं नंदश्च गोकुलं तथा ॥ ७ ॥ ददर्श राधां रुचिरां मुक्ताहारां च सस्मिताम् ॥ यथा द्वादशवर्षीयां शश्वत्सुस्थिरयौवनाम् ॥ ८ ॥ रत्नोच्चैरासनस्थां च गोपीत्रिशतकोटिभिः ॥ आवृतां वेत्रहस्ताभिः सस्मिताभिश्च सांप्रतम् ॥ ९ ॥ दृष्ट्वा च दूरतो राधा श्रीकृष्णं प्राणवल्लभा ॥ शिशुवेषं सुवेषं च सुन्दरेशं च सस्मितम् ॥ १० ॥ नवीनजलदश्यामं पीतकौशेयवाससम् ॥ चंदनोक्षितसर्वांगं रत्नभूषणभूषितम् ॥ ११ ॥ मयूरपिच्छचूडं च मालतीमाल्यशोभितम् ॥ ईषद्धास्यप्रसन्नास्यं भक्तानुग्रहविग्रहम् ॥ १२ ॥ क्रीडाकमलमम्लानं धृतवंतं मनोहरम् ॥ मुरलीहस्तविन्यस्तं सुप्रशस्तं च दर्पणम् ॥ १३ ॥ जवेन च समुत्थाय गोपीभिः सह सारदम् ॥ प्रणम्य परया भक्त्या तुष्टाव परमेश्वरम् ॥ १४ ॥ राधिकोवाच ॥ अद्य मे सफलं जन्म जीवितं च सुर्जीवितम् ॥ यद्दृष्ट्वा मुखचंद्रं ते सुस्निग्धं लोचनं मनः ॥ १५ ॥ पंचप्राणाश्च स्निग्धाश्च परमात्मा च सुप्रियः ॥ उभयोर्हर्षबीजं च दुर्लभं बंधुदर्शनम् ॥ १६ ॥ शोकार्णवे निमग्नाहं प्रदग्धा विरहानलैः ॥ त्वद्दृष्ट्यामृतवृष्ट्या च सुसिक्ताद्य सुशीलता ॥ १७ ॥ शिवा शिवप्रदाहं च शिवबीजा त्वया सह ॥ शिवस्वरूपा निश्चेष्टाप्यदृष्टा च त्वया विना ॥ १८ ॥ त्वयि तिष्ठति देहे च देही श्रीमाञ्छुचिः स्वयम् ॥ सर्वशक्तिस्वरूपा च शिवरूपा गते त्वयि ॥ १९ ॥ स्त्रीपुंसोर्विरहो नाथ सामान्यश्च सुदारुणः ॥ यांत्येव शक्तिभिः

प्राणा विच्छेदात्परमात्मनः ॥ २० ॥ इत्युक्त्वा राधिका देवी परमात्मानमीश्वरम् ॥ स्वासने वासयामास कृत्वा पादार्चनं मुदा ॥
॥२१॥ रत्नसिंहासने श्रीमानुवास राधया सह ॥ गोपीभिः सहितः शश्वत्सेवितः श्वेतचामरैः ॥ २२ ॥ चंदना सा ददौ गात्रे सुगंधि
चंदनं हरेः ॥ सस्मिता रत्नमाला सा रत्नमालां गले ददौ ॥ २३ ॥ पद्मैः पद्मार्चिते पादपद्मे पद्मावती सती ॥ अर्घ्यं ददौ सा
सजलं दूर्वां पुष्पं च चंदनम् ॥ २४ ॥ मालती मालतीमाल्यं चूडायां च हरेर्ददौ ॥ चंपा पुष्पस्य पुटकं ददौ च पार्वती सती ॥ २५ ॥
पारिजाता च हरये पारिजातं ददौ मुदा ॥ सकर्पूरं च तांबूलं वासितं शीतलं जलम् ॥ ददौ कदंबमाला सा कदंबमालिकां शुभाम् ॥
॥ २६ ॥ क्रीडाकमलमम्लानममूल्यं रत्नदर्पणम् ॥ ददौ हस्ते हरेरेव कमला सा सुकोमला ॥ २७ ॥ वरुणेन पुरा दत्तं वस्त्रयुग्मं च
सुंदरम् ॥ साक्षाद्गोरोचनाभं च सुंदरी हरये ददौ ॥ २८ ॥ मधुपात्रं वधूस्तस्मै मधुरं मधुपूर्णकम् ॥ सुधापूर्णं सुधापात्रं ददौ भक्त्या
सुधामुखी ॥ २९ ॥ चकार पुष्पशय्यां च गोपी चंदनचर्चिताम् ॥ अम्लानमालतीपुष्पमालाजालविभूषिताम् ॥ ३० ॥ रत्नेंद्रसा
रनिर्माणमंदिरे सुमनोहरे ॥ मणींद्रमुक्तामाणिक्यहीरहारविभूषिते ॥ ३१ ॥ कस्तूरीकुंकुमाक्तेन वायुना सुरभीकृते ॥ रत्नप्रदीपशत
कैर्ज्वलद्भिश्च सुदीपिते ॥ ३२ ॥ धूपिते सततं धूपैर्नानावस्तुसमन्वितैः ॥ कृत्वा शय्यां रतिकरीं ययुर्गोप्यश्च सस्मिताः ॥ ३३ ॥
दृष्ट्वा रहसि तल्पं च सुरम्यं सुमनोहरम् ॥ माधवो राधया सार्धं विवेश रतिमंदिरम् ॥ ३४ ॥ नानाप्रकारहास्यं च परिहासं स्मरोचि
तम् ॥ द्वयोर्बभूव तल्पे च मदनातुरयोस्तथा ॥ ३५ ॥ माल्यं ददौ च कृष्णाय तांबूलं च सुवासितम् ॥ कस्तूरीकुंकुमाक्तं च चंदनं
श्यामवक्षसि ॥ ३६ ॥ चारुचंपकपुष्पं च चूडायां प्रददौ सती ॥ सहस्रदलसंसक्तक्रीडापद्मं करे ददौ ॥ ३७ ॥ प्रक्षिप्य मुरलीं हस्ता
त्प्रददौ रत्नदर्पणम् ॥ पारिजातस्य कुसुममम्लानं पुरतो ददौ ॥ ३८ ॥ उवाच मधुरं राधा रहस्यं मधुरं वचः ॥ सस्मिता सस्मितं
शांतं कांतं कांतामनोहरम् ॥ ३९ ॥ श्रीराधिकोवाच ॥ निष्फलं मंगलप्रश्नं मंगलं मंगलालये ॥ सर्वमंगलबीजे च मांगल्ये
मंगलप्रदे ॥ ४० ॥ तथापि कुशलप्रश्नं सांप्रतं समयोचितम् ॥ लौकिको व्यवहारोऽपि वेदेभ्यो बलवांस्तथा ॥४१॥ कुशलं रुक्मिणी

कांत सत्यभामेश सांप्रतम् ॥ महेंद्रेण समं युद्धं लीलया च यदाज्ञया ॥ ४२ ॥ पारिजाततरुं स्वर्गादुत्पाट्य चामरावतीम् ॥ गत्वा
विजित्य देवांश्च तस्यै दत्तमिति श्रुतम् ॥ ४३ ॥ पुण्यकं च कृतं तेन पारिजातेन सुव्रतम् ॥ त्वामेव साध्यं कांतं च संपूर्णे दक्षिणां
ददौ ॥ ४४ ॥ ब्रह्मेशशेषासाध्यस्त्वं तया साध्यः कृतः कथम् ॥ सर्वाभ्यः कामिनीभ्यश्च सत्यभामां बिभर्षि च ॥ ४५ ॥ रुक्मिण्याः
प्रेमसौभाग्यमतिरिक्तं च गौरवम् ॥ भयं मानं च धन्यायां सत्यायां सततं श्रुतम्॥४६॥सत्यं जांबवतीकांत वद मां च सुनिश्चितम् ॥
तासु सर्वासु कांतासु कस्यास्ते प्रेम चाधिकम् ॥ ४७ ॥ शृंगारे सर्वभावे वा तासु का रसिका परा ॥ त्वयि स्निग्धा विदग्धा का
तासु धन्यातिसुव्रता ॥ ४८ ॥ सा स्त्री भावानुरक्ता या भार्यां पाति पतिश्च सः ॥ प्रेमातिरिक्तं स्त्रीपुंसोस्त्रैलोक्येषु सुदुर्लभम् ॥ ४९ ॥
रसिका स्त्री विजानाति सती गुणवती पतिम् ॥ गुणज्ञं रसिकं शूरं सुशीलं सुरतौ सदा ॥ ५० ॥ दूराद्धावति पद्मार्थं मधुलोभान्म
धुव्रतः ॥ भेकस्तन्न हि जानाति तन्मूर्ध्नि पादमुत्सृजेत् ॥ ५१ ॥ यंत्री जानाति संगीतरसं यंत्रं च नैव च ॥ दुग्धस्वादं विदग्धश्च न
दर्वी नैव भाजनम् ॥ ५२ ॥ परिपक्वफलास्वादं जानंति भोगिनः सुखम् ॥ एकत्रावस्थिताः शश्वन्न किंचित्फलिनो यथा ॥ ५३ ॥सुशी
तलजलास्वादं विजानंति कृषीवलाः ॥ न च वापी न च घटश्चैकत्रावस्थितो यथा ॥ ५४ ॥ भोगिनो हि विजानंति शालिस्वादुरसं
परम् ॥ एकत्रावस्थितं चेत्तु न क्षेत्रं भाजनं यथा ॥५५ ॥ बुबुधे चंदनाघ्राणं चंदनार्थी च भोगवित् ॥ न गर्दभो भारवाही न तस्य
पात्रिका यथा ॥ ५६ ॥ यं न जानंति वेदाश्च ब्रह्मेशानादयस्तथा ॥ योगिनो मुनयः सिद्धास्तं किं जानंति योषितः ॥ ५७ ॥ सौभा
ग्यं गौरवं प्रेम दुर्लभं नित्यनूतनम् ॥ योषितां च परं नैव चूर्णीभूतं क्षणेन च ॥ ५८ ॥ अत्युच्छ्रितो निपतनं प्राप्नोत्येव ध्रुवं
प्रभो ॥ आराद्विपत्तिबीजं च वैष्णवानां विर्हिंसनम् ॥ ५९ ॥ श्रीदामा च मया शप्तस्त्वद्भक्तो भक्तवत्सलः ॥ एतादृशी विप
त्तिमें पुत्र श्रीदामशापतः ॥ ६० ॥ ईश्वरः कस्य वा बंधुः प्रियो वा विप्रियस्तथा ॥ सततं भक्तिसाध्यश्च यो भक्तश्च तदीश्वरः ॥ ६१॥
वेदाश्च वैदिकाः संतः पुराणानि वदंति च ॥ राधाया माधवः साध्यो भगवानिति निष्फलम् ॥ ६२ ॥ जित्वा च सगणं शंभुं

बाणस्य भुजकृंतनम् ॥ कृत्वा च रुक्मिणीपौत्रः समानीतः सभार्यकः ॥ ६३ ॥ अहो त्वयि समायाते रुक्मिणी किमुवाच ह ॥
प्रेम स्थितं समानं ते किं विवृद्धं च गौरवम् ॥ ६४ ॥ कुरुपांडवयुद्धेन कुरवो निहतास्त्वया ॥ पांडवार्थं तथा भूपाः क्व साम्यं पर
मात्मनः ॥ ६५ ॥ साक्षान्महेंद्रजातस्य कौंतेयस्यार्जुनस्य च ॥ राजमंडलमध्यस्थो भवानेव हि सारथिः ॥ ६६ ॥ तेन भक्तेन
शुद्धेन भीष्मेण च महात्मना ॥ लज्जितेन किमुक्तं ते महतीषु सभासु च ॥६७॥ देवैरपि कथं दृष्टो ब्रह्मेशशेषसंज्ञकैः ॥ भक्तसिंहैर्मृतैः
सर्वैर्न चोक्तं किंचिदेव सः ॥ ६८ ॥ यश्चानिर्वचनीयश्च वेदेषु च चतुर्षु च ॥ पुराणेष्वितिहासेषु प्रकृतेः पर ईश्वरः ॥ ६९ ॥ निर्गुणश्च
निरीहश्च निर्लिप्तः सर्वकर्मणाम् ॥ कर्मणां साक्षिरूपश्च भक्तानुग्रहविग्रहः ॥७०॥ परं ब्रह्म परं ज्योतिः परमेशः परात्परः ॥ परमात्मा
च सर्वेषां सूतो नररथस्थितः ॥ ७१ ॥ त्वया कुब्जा च संभुक्ता वृद्धा क्षत्रियकामिनी ॥ अपुत्रिणी चाधिकांगी यूना स्पृश्या च
प्राक्तनात् ॥ ७२ ॥ त्वया च निहतः कंसो मातुलः केन हेतुना ॥ आयास्यतीति कृत्वा च गतं न पुनरागतम् ॥ ७३ ॥ निहत्य
यादवान्सर्वान्विभज्य द्वारकां पुरीम् ॥ त्वां निबध्य समानेतुमीश्वरी वारिता जनैः ॥ ७४ ॥ इत्युक्त्वा राधिका देवी भृशमुच्चै रुरोद
सा ॥ मूर्छां संप्राप सहसा निर्निश्वासा बभूव ह ॥७५॥ गोप्यो गवाक्षजालस्थाः शुश्रुवुर्ददृशुस्तथा ॥ दृष्ट्वा तामाययुः सर्वा ऊचू
राधा मृतेति च ॥ ७६ ॥ उच्चैस्ता रुरुदुः सर्वाः क्रोडे कृत्वा च राधिकाम् ॥ ऊचुस्ता रक्षरक्षेति हरे नरहरे प्रभो ॥ ७७ ॥ गोप्य
ऊचुः ॥ किं कृतं किं कृतं कृष्ण त्वया राधा मृता च नः ॥ राधां जीवय भद्रं ते यास्यामः काननं वयम् ॥ ७८ ॥ अन्यथा
स्त्रीवधं तुभ्यं दास्यामः सर्वयोषितः ॥ ७९ ॥ गोपीनां वचनं श्रुत्वा राधिकायाश्च माधवः ॥ उवाच जीवयामास सुधादृष्ट्या च
नारद ॥ ८० ॥ उत्तस्थौ राधिका देवी रुदन्ती मानिनी सती ॥ गोप्यस्तां बोधयामासुः क्रोडे कृत्वा पुनः पुनः ॥ ८१ ॥
॥ श्रीकृष्ण उवाच ॥ शृणु राधे प्रवक्ष्यामि ज्ञानमाध्यात्मिकं परम् ॥ यच्छ्रुत्वा हलिको मूर्खः सद्यो भवति पंडितः ॥ ८२ ॥
जात्याहं जगतां स्वामी किं रुक्मिण्यादियोषिताम् ॥ कार्यकारणरूपोऽहं व्यक्तो राधे पृथक्पृथक् ॥८३ ॥ एकात्माहं च विश्वेषां

जात्या ज्योतिर्मयः स्वयम् ॥ सर्वप्राणिषु व्यक्तया चाप्याब्रह्मादितृणादिषु ॥ ८४ ॥ एकस्मिंश्च भुक्तवति न तुष्टोऽन्यो जनस्तथा॥
मय्यात्मनि गतेप्येको मृतोप्यन्यः सुजीवति ॥८५॥ जात्याहं कृष्णरूपश्च परिपूर्णमतः स्वयम्॥गोलोके गोकुले रम्ये क्षेत्रे वृन्दावने
वने ॥ ८६ ॥ द्विभुजो गोपवेषश्च स्वयं राधापतिः शिशुः ॥ गोपालैर्गोपिकाभिश्च सहितः कामधेनुभिः ॥ ८७ ॥ चतुर्भुजोहं वैकुण्ठे
द्विधारूपः सनातनः ॥ लक्ष्मीसरस्वतीकांतः सततं शांतिविग्रहः ॥ ८८ ॥ यन्मानसी सिंधुकन्या मर्त्यलक्ष्मीपतिर्भुवि ॥ श्वेतद्वीपे
च क्षीरोदे तत्रापि च चतुर्भुजः ॥ ८९ ॥ अहं नारायणर्षिश्च नरो धर्मः सनातनः ॥ धर्मवक्ता च धार्मिष्ठो धर्मवर्त्मप्रवर्तकः ॥९०॥
शांतिर्लक्ष्मीस्वरूपा च धर्मिष्ठा च पतिव्रता ॥ अत्र तस्याः पतिरहं पुण्यक्षेत्रे च भारते ॥९१॥ सिद्धेशः सिद्धिदः साक्षात्कपिलोहं
सतीपतिः ॥ नाना रूपधरोहं च व्यक्तिभेदेन सुंदरी ॥ ९२ ॥ अहं चतुर्भुजः शश्वद्द्वार्वत्यां रुक्मिणीपतिः ॥ अहं क्षीरोदशायी च
सत्यभामागृहे शुभे ॥ ९३ ॥अन्यासां मंदिरेऽहं च कायव्यूहात्पृथक्पृथक् ॥ अहं नारायणर्षिश्च फाल्गुनस्यास्य सारथिः ॥९४॥
स नरर्षिर्धर्मपुत्रो मदंशो बलवान्भुवि ॥ तपसाराधितस्तेन सारथ्येऽहं च पुष्करे ॥ ९५ ॥ यथा त्वं राधिका देवी गोलोके गोकुले
तथा ॥ वैकुण्ठे च महालक्ष्मीर्भवती च सरस्वती ॥ ९६ ॥ भवती मृत्युलक्ष्मीश्च क्षीरोदशायिनः प्रिया ॥ धर्मपुत्रवधूस्त्वं च शांति
र्लक्ष्मीः स्वरूपिणी ॥ ९७ ॥ कपिलस्य प्रिया कांता भारते भारती सती ॥ त्वं सीता मिथिलायां च त्वच्छाया द्रौपदी सती ॥
॥ ९८ ॥ द्वारवत्यां महालक्ष्मीर्भवती रुक्मिणी सती ॥ पंचानां पांडवानां च भवती कलया प्रिया ॥ ९९ ॥ रावणेन हृता त्वं
च त्वं च रामस्य कामिनी ॥ नानारूपा यथा त्वं च छायया कलया सति ॥ १०० ॥ नानारूपस्तथाहं च स्वांशेन कलया
तथा ॥ परिपूर्णतमोहं च परमात्मा परात्परः ॥ १ ॥ इति ते कथितं सर्वमाध्यात्मिकमिदं सति ॥ राधे सर्वापराधं मे क्षमस्व परमे
श्वरि ॥ २ ॥ श्रीकृष्णवचनं श्रुत्वा परितुष्टा च राधिका ॥ परितुष्टाश्च गोप्यश्च प्रणेमुः परमेश्वरम् ॥ १०३ ॥ ॥ इति श्रीब्रह्म
वैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे षड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥ ॥ श्रीनारायण

उवाच ॥ श्रीकृष्णवचनं श्रुत्वा प्रहृष्टा गोपिका मुदा ॥ मंदिरं प्रययुः सर्वाः प्रणम्य राधिकां प्रभुम् ॥१॥ राधाशृंगारभावं च कला षोडशपूर्वकम् ॥ चकार सस्मिता साध्वी वक्रचंचललोचना ॥२॥ दत्त्वा च चन्दनं माल्यं स्वामिने पुनरेव च ॥ रहस्यं च परीहास्यं पुनरेव चकार सः ॥ ३ ॥ आकृष्य राधिकां कृष्णः समानीय स्ववक्षसि ॥ ओष्ठाधरं कपोलं च गंडयुग्मं चुचुंबच ॥४॥ राधा चुचुंब कृष्णस्य मुखचंद्रं मनोहरम् ॥ चकार कृष्णं प्राणेशं बाहुभ्यां च स्ववक्षसि ॥५॥ शृंगारं षोडशविधं कामशास्त्रोक्तमीप्सितम् ॥ स्त्रीपुंसोस्तोषजनकं चकार भगवान्प्रभुः ॥६॥ नखविक्षतसर्वांगा दशनेनाधरक्षता ॥ पुलकांचितदेहा सा तंद्रिता वामनस्तनी ॥ ७ ॥ मूर्च्छिता सुखसंभोगाद्विलग्ना हतचेतना ॥ श्वासमात्रावशेषा च निद्रामुद्रितलोचना ॥ ८ ॥ रतिशूरा कोमलांगी कांतवक्षस्थलस्थिता ॥ शीते सुखोष्णसर्वांगी ग्रीष्मे सा सुखशीतला ॥९॥ शृंगारकाले सुखदा सांद्रश्रोणिपयोधरा ॥ नितंबभारा नम्रा च प्रसंगे सुखदायिका॥१०॥ विदग्धा रसिका श्रेष्ठा कामुकी च वरांगना ॥ सहसा चेतनं प्राप्य शुश्राव कोकिलध्वनिम्॥११॥ श्रुत्वा परमभीता सा दीना दीनविशंकया ॥ उवाच परमा सा च परमेशं परात्परम् ॥ बाहुश्रोणियुगाभ्यां च निबध्य च पुनःपुनः ॥१२॥ राधिकोवाच ॥ रासं गच्छ महाभाग पुण्यं वृन्दावनं वनम् ॥ तत्र क्रीडां करिष्यामि जलेन च स्थलेन च॥१३॥ पुनर्यास्यामि मलयं सुन्दरं मणिमंदिरम् ॥ अपरं यद्रहस्यं वा जन्मना न श्रुतं मया ॥१४॥ तत्र यामि त्वया सार्द्धमिति मे लालसा परा ॥ परस्परैकालापेन प्रययौ रजनी शुभा॥१५॥ अरुणोदयकालेपि न त्यजेन्माधवं सती ॥ माधवः प्रीतिवचसा बोधयामास साधनात् ॥ १६ ॥ प्रातःकृत्यं ततः कृत्वा स्वारुरोह रथं हरिः ॥ गोपीभी राधया सार्धं शरत्कमललोचनः ॥१७॥ योजनायतविस्तीर्णं गृहैस्त्रिशतकोटिभिः ॥ मणींद्रसारनिर्माणैर्ज्वलद्भिरुपशोभितम् ॥ १८ ॥ गोलोकादागतं तत्र मनोयायि मनोहरम् ॥ सहस्रचक्रसंयुक्तं सहस्राश्वैः प्रचालितम् ॥ १९ ॥ मणिस्तंभैस्त्रिकोटीभी रत्नराजिविराजितम् ॥ मुक्तामाणिक्यपरमैर्हीरहारैः सुशोभितम् ॥ २० ॥ नानाचित्रैर्विजित्रैश्च श्वेतचामरदर्पणैः ॥ वह्निशुद्धांशुकैर्दीप्तैर्मालाजालैर्विभूषितम् ॥ २१ ॥ रत्ननिर्माणतल्पैश्च पुष्पचंदनचर्चितम् ॥ समानरूपवेषैश्च गोपीलक्षैः समावृतम् ॥२२॥

रथेन तेन भगवान्पुनर्वृंदावनं ययौ ॥ तत्र गत्वा निशाकाले विजहार जले स्थले ॥२३॥ शृंगारं सुचिरं कृत्वा वनेषूपवनेषु च ॥
राधिकां दर्शयामास यथा सर्वं च नूतनम् ॥ २४ ॥ विस्पंदके सुरसने माहेंद्रे नंदने वने ॥ सुमेरुशिखरे रम्ये पर्वते गंधमादने॥२५॥
शैलेशैले सुंदरे च कंदरेकंदरे वने ॥ पुष्पोद्याने सुरहसि नद्यांनद्यां नदेनदे ॥ २६ ॥ समुद्रपुलिने रम्ये पारिजातवनेवने ॥ सुभद्रे
पुष्पभद्रे च नारायणसरोवरे ॥ २७ ॥ पवनस्यैव निलये मलये च सुरालये ॥ त्रिकूटे भद्रकूटे च पंचकूटे सकूटके ॥२८॥ देवानां
कमनीयायां कांचन्यां च तथैव च ॥ समुद्रे च समुद्रे च द्वीपेद्वीपे मनोहरे ॥ २९ ॥ खर्वटे प्रवरे रम्ये पुण्यचंद्रसरोवरे ॥ सुपार्श्वे
मुनिपार्श्वे च स रेमे रामया सह ॥ ३० ॥ शीघ्रं च पुनरागत्य जंबूद्वीपं च पुण्यदम् ॥ द्वारकां दर्शयामास पर्वतं रैवतं तथा॥३१॥
गोकुलं पुनरागत्य गोपगोकुलसंकुलम् ॥ तत्र दृष्ट्वा च भांडीरं पुण्यं वृन्दावनं ययौ ॥ ३२ ॥ श्रीकृष्णागमनं श्रुत्वा यशोदा नंद एव
च ॥ गोपी गोप्यश्च वृद्धाश्चाप्यश्रुनेत्रा निराकुलाः ॥३३॥ वारणेंद्रं पुरस्कृत्य वेश्यां च नटनर्तकाः॥पतिपुत्रवतीं साध्वीं ब्राह्मणीं ब्राह्मणं
तथा ॥ ३४ ॥ यथा देवाश्च वह्निं च दृष्ट्वा नंदं च मातरम् ॥ आययुर्बालकृष्णश्च राधया सह माधवः ॥ ३५ ॥ मातुः क्रोडमारुरोह
प्रहस्य मधुसूदनः ॥ नंदं यशोदया सार्द्धं चुचुंब मुखपंकजम् ॥ ३६ ॥ आश्लिष्य भृशमुच्चैश्च सिषेच नेत्रजैर्जलैः ॥ स्वयं च भग
वान्कृष्णो यशोदायास्तनं पपौ ॥ ३७ ॥ तादृशं ददृशुः सर्वे यादृशो मथुरां ययौ ॥ मुरलीहस्तविन्यस्तं रत्नभूषणभूषितम् ॥ ३८ ॥
यथैकादशवर्षीयं शोभितं पीतवाससा ॥ मयूरपिच्छचूडं च मालतीमाल्यमंडितम् ॥ ३९ ॥ मंदिरं वेशयामास राधया सह माधवम्॥
यशोदा मंगलं कृत्वा भोजयामास ब्राह्मणान् ॥ ४० ॥ पूजां चकार गोपीनां मुनीनां च यथा जनः॥मणिरत्नं प्रवालं च सुवर्णं परमं
तथा ॥ ४१ ॥ मुक्तामाणिक्यहीरं च ब्राह्मणेभ्यो ददौ मुदा ॥ गजरत्नं गवां रत्नमश्वरत्नं मनोहरम् ॥ ४२ ॥आसनानि च पात्राणि
भूषणानि तथैव च ॥ धान्यान्यपि च सस्यानि वस्त्राणि च तथा ददौ ॥४३॥ अपूर्वं दर्शयामास राधया सह माधवम् ॥ गोपीगणं
च मिष्टान्नं सादरेणापि नारद ॥ ४४ ॥ दुन्दुभीन्वादयामास कारयामास मंगलम् ॥ देवांश्च भोजयामास सानंदं च मनो

हरम्॥४९॥इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे सप्तविंशत्यधिकशततमोऽध्यायः॥१२७॥
॥ श्रीनारायण उवाच ॥ श्रीकृष्णश्च समाह्वानं गोपांश्चापि चकार सः ॥ भांडीरे वटमूले च तत्र स्वयमुवास ह ॥ १ ॥ पुरान्नं च
ददौ तस्मै यत्रैव ब्राह्मणीगणः ॥ उवास राधिका देवी वामपार्श्वे हरेरपि ॥ २ ॥ दक्षिणे नंदगोपश्च यशोदासहितस्तथा॥तद्दक्षिणे वृष
भानुस्तद्वामे सा कलावती ॥३॥ अन्ये गोपाश्च गोप्यश्च बांधवाः सुहृदस्तथा ॥ तानुवाच स गोविंदो याथार्थ्यं समयोचितम् ॥४॥
॥ श्रीभगवानुवाच ॥ शृणु नंद प्रवक्ष्यामि सांप्रतं समयोचितम् ॥ सत्यं च परमार्थं च परलोकसुखावहम् ॥ ५ ॥ आब्रह्म
स्तंबपर्यंतं भ्रमं सर्वं निशामय ॥ विद्युद्दीप्तिर्जलेरेषा यथा तोयस्य बुद्बुदम् ॥ ६ ॥ मथुरायां सर्वमुक्तं नावशेषं च किंचन ॥ यशोदां
बोधयामास राधिका कदलीवने ॥ ७ ॥ तदेव सत्यं परमं भ्रमध्वांतप्रदीपकम् ॥ विहाय मिथ्यामायां च स्मर तत्परमं पदम् ॥८॥
जन्ममृत्युजराव्याधिहरं हर्षकरं परम् ॥ शोकसंतापहरणं कर्ममूलनिकृंतनम् ॥ ९ ॥ मामेव परमं ब्रह्म भगवंतं सनातनम् ॥
ध्यायं ध्यायं पुत्रबुद्धिं त्यक्त्वा लभ परं पदम् ॥ १० ॥ गोलोकं गच्छ शीघ्रं त्वं सार्द्धं गोकुलवासिभिः ॥ आरात्कलेरागमनं
कर्ममूलनिकृंतनम् ॥ ११ ॥ स्त्रीपुंसोर्नियमो नास्ति जातीनां च तथैव च ॥ विप्रे संध्याधिकं नास्ति चिह्नं यज्ञोपवीतकम् ॥ १२ ॥
यज्ञसूत्रं च तिलकं शेषं लुप्तं सुनिश्चितम् ॥ दिवाव्यवायनिरतं विरतं धर्मकर्मणि ॥ १३ ॥ यज्ञानां च व्रतानां च तपसां लुप्तमेव च॥
केदारकन्याशापेन धर्मो नास्त्येव केवलम् ॥ १४ ॥ स्वच्छंदगामिनीस्त्रीणां पतिश्च सततं वशे ॥ ताडयेत्ससततं तं च भर्त्सयेच्च
दिवानिशम् ॥ १५ ॥ प्राधान्यं स्त्रीकुटुंबानां स्त्रीणां च सततं व्रज ॥स्वामी च भक्तस्तासां च पराभूतो निरंतरम् ॥ १६ ॥ कलौ च
योषितः सर्वा जारसेवासु तत्पराः ॥ शतपुत्रसमस्नेहस्तासां जारे भविष्यति ॥ १७ ॥ ददाति तस्मै भक्ष्यं च यथा भृत्याय कोपतः॥
सस्मिता सकटाक्षा सामृतदृष्ट्या निरंतरम् ॥ १८ ॥ जारं पश्यति कामेन विषदृष्ट्या पतिं सदा ॥ सततं गौरवं तासां स्नेहं च जार
बांधवे ॥ १९ ॥ पत्यौ करप्रहारं च नित्यं नित्यं करोति च ॥ मिष्टान्नं श्रद्धया भक्त्या जाराय प्रददाति च ॥ २० ॥ वेषयुक्ता च

सततं जारसेवनतत्परा ॥ प्राणा बंधुर्गतिश्चात्मा कलौ जारश्च योषिताम्॥२१॥लुप्ता चातिथिसेवा च प्रलुप्तं विष्णुसेवनम् ॥ पितॄणा
मर्चनं चैव देवानां च तथैव च ॥२२॥ विष्णुवैष्णवयोर्द्वेषी सततं च नरो भवेत् ॥ वाममंत्रोपासकाश्च चतुर्वर्णाश्च तत्पराः ॥ २२ ॥
शालग्रामं च तुलसीं कुशं गंगोदकं तथा ॥ न स्पृशेन्मानवो धूर्तो म्लेच्छाचाररतः सदा ॥२४॥ कारणं कारणानां च सर्वेषां सर्वबी
जकम् ॥ सुखदं मोक्षदं शश्वद्दातारं सर्वसंपदाम् ॥ २५ ॥ त्यक्त्वा मां परया भक्त्या क्षुद्रसंपत्प्रदायिनम् ॥ वेदनिघ्नं वाममंत्रं जपेद्वि
प्रश्च मायया ॥२६॥ सनातनी विष्णुमाया वंचितं तं करिष्यति ॥ ममाज्ञया भगवती जगतां च दुरत्यया॥२७॥कलेर्दशसहस्राणि
मदर्चा भुवि तिष्ठति ॥ तदर्धानि च वर्षाणां गंगा भुवनपावनी ॥ २८ ॥ तुलसी विष्णुभक्ताश्च यावद्गंगा च कीर्तनम् ॥ पुराणानि
च स्वल्पानि तावदेव महीतले ॥ २९॥ मम चोत्कीर्तनं नास्ति एतदंते कलौ व्रज ॥ एकवर्णा भविष्यंति किराता बलिनः शठाः ॥
॥ ३० ॥ पित्रोः सेवा गुरोः सेवा सेवा च देवविप्रयोः ॥ विवर्जिता नराःसर्वे चातिथीनां तथैव च ॥३१॥ सस्यहीना भवेत्पृथ्वी सा
चावृष्ट्या निरंतरम् ॥ फलहीनोपि वृक्षश्च जलहीना सरित्तथा ॥ ३२ ॥ वेदहीनो ब्राह्मणश्च बलहीनश्च भूपतिः ॥ जातिहीना जनाः
सर्वे म्लेच्छो भूपो भविष्यति ॥३३॥ भृत्यवत्ताडयेत्तातं पुत्रः शिष्यस्तथा गुरुम् ॥ कांतं च ताडयेत्कांता लुब्धकुक्कुटवद्गृही॥३४॥
नश्यंति सकला लोकाः कलौ शेषे च पापिनः ॥ सूर्याणामातपात्केचिज्जलौघेनापि केचन ॥ ३५ ॥ हे वैश्येंद्र सति कलौ
न नश्यति वसुन्धरा ॥ पुनः सृष्टिर्भवेत्सत्यं सत्यबीजं निरंतरम् ॥ ३६ ॥ एतस्मिन्नंतरे विप्र रथमेव मनोहरम् ॥ चतुर्योजन
विस्तीर्णमूर्ध्वं च पंचयोजनम् ॥ ३७ ॥ शुद्धस्फटिकसंकाशं रत्नेंद्रसारनिर्मितम् ॥ अम्लानपारिजातानां मालाजालविराजितम् ॥
॥ ३८ ॥मणीनां कौस्तुभानां च भूषणेन विभूषितम् ॥ अमूल्यरत्नकलशं हीरहारविलंबितम् ॥ ३९ ॥ मनोहरैः परिष्वक्तं सहस्र
कोटिमंदिरैः ॥ सहस्रद्वयचक्रं च सहस्रद्वयघोटकम् ॥ ४० ॥ सूक्ष्मवस्त्राच्छादितं च गोपीकोटीभिरावृतम् ॥ गोलोकादागतं तूर्णं
ददृशुः सहसा व्रजे ॥ ४१ ॥ कृष्णाज्ञया तमारुह्य ययुर्गोलोकमुत्तमम् ॥ राधा कलावती देवी धन्या चायोनिसंभवा ॥ ४२ ॥
गोलोकादागता गोप्यश्चायोनिसंभवाश्च ताः ॥ श्रुतिपत्न्यश्च ताः सर्वाः स्वशरीरेण नारद ॥ ४३ ॥ सर्वे त्यक्त्वा शरीराणि नश्व

राणि सुनिश्चितम् ॥ गोलोकं च ययौ राधा सार्धं गोकुलवासिभिः ॥ ४४ ॥ ददर्श विरजातीरं नानारत्नविभूषितम् ॥ तदुत्तीर्य ययौ विप्र शतशृंगं च पर्वतम् ॥ ४५ ॥ नानामणिगणाकीर्णं रासमंडलमंडितम् ॥ ततो ययौ कियद्दूरं पुण्यं वृन्दावनं वनम् ॥ ४६ ॥ सा ददर्शाक्षयवटमूर्ध्वं त्रिशतयोजनम् ॥ शयोजनविस्तीर्णं शतखाकोटिसमावृतम् ॥ ४७ ॥ रक्तवर्णैः फलौघैश्च स्थूलैरपि विभूषितम् ॥ गोपिकोटिसहस्रैश्च सार्द्धं वृंदा मनोहरा ॥ ४८ ॥ अनुव्रजं सादरं च सस्मिता सा समाययौ ॥ अवरुह्य रथात्तूर्णं राधां सा प्रणनाम च ॥ ४९ ॥ रासेश्वरीं तां संभाष्य प्रविवेश स्वमालयम् ॥ रत्नसिंहासने रम्ये हीरहारसमन्विताम् ॥५०॥ वृन्दा तां वासयामास पादसेवनतत्परा ॥ सप्तभिश्च सखीभिश्च सेवितां श्वेतचामरैः ॥ ५१ ॥ आययुर्गोपिकाः सर्वा द्रष्टुं तां परमेश्वरीम् ॥ नंदादिकं प्रकल्प्यैतद्राधा वासं पृथक्पृथक् ॥ ५२ ॥ परमानंदरूपा सा परमानंदपूर्वकम् ॥ स्ववेश्मनि महारम्ये प्रतस्थे गोपिका सह ॥ ५३ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे अष्टाविंशत्यधिकशततमोऽध्यायः ॥ १२८ ॥

॥ श्रीनारायण उवाच ॥ श्रीकृष्णो भगवांस्तत्र परिपूर्णतमः प्रभुः ॥ दृष्ट्वा साल्लोक्यमोक्षं च सद्यो गोकुलवासिनाम् ॥१॥ उवास पंचभिर्गोपैर्भांडीरे वटमूलके ॥ ददर्श गोकुलं सर्वं गोकुलं व्याकुलं तथा ॥ २ ॥ अरक्षकं च व्यस्तं च शून्यं वृन्दावनं वनम् ॥ योगेनामृतवृष्ट्या च कृपया च कृपानिधिः ॥३॥ गोपीभिश्च तथा गोपैः परिपूर्णं चकार सः ॥ तथा वृन्दावनं चैव सुरम्यं च मनोहरम् ॥ ४ ॥ गोकुलस्थांश्च गोपांश्च समाश्वासं चकार सः ॥ उवाच मधुरं वाक्यं हितं नीतं च दुर्लभम् ॥ ५ ॥ ॥ श्रीभगवानुवाच ॥ हे गोपगण हे बंधो सुखं तिष्ठन्स्थिरो भव ॥ रमणं प्रियया सार्धं सुरम्यं रासमंडलम् ॥ ६ ॥ तावत्प्रभृति कृष्णस्य पुण्ये वृंदावने वने ॥ अधिष्ठानं च सततं यावच्चंद्रदिवाकरौ ॥ ७ ॥ तथा जगाम भाण्डीरं विधाता जगतामपि ॥ स्वयं शेषश्च धर्मश्च भवान्या च भवः स्वयम् ॥ ८ ॥ सूर्यश्चापि महेंद्रश्च चंद्रश्चापि हुताशनः ॥ कुबेरो वरुणश्चैव पवनश्च यमस्तथा ॥ ९ ॥ ईशानश्चापि देवाश्च वसवोऽष्टौ तथैव च ॥ सर्वे ग्रहाश्च रुद्राश्च मुनयो मनवस्तथा ॥ १० ॥ त्वरिताश्चाययुः सर्वे यात्रास्ते भगवान्प्रभुः ॥ प्रणम्य दंडवद्भूमौ तमुवाच विधिः स्वयम् ॥ ११ ॥ ब्रह्मोवाच ॥ परिपूर्णतम ब्रह्मस्वरूप नित्यविग्रह ॥ ज्योतिः

स्वरूप परम नमोऽस्तु प्रकृतेः पर ॥ १२॥ सुनि र्लिप्तनिराकार साकार ध्यानहेतुना ॥ स्वेच्छामय परं धाम परमात्मन्नमोस्तु ते ॥
॥ १३ ॥ सर्वकार्यस्वरूपेश कारणानां च कारण ॥ ब्रह्मेश शेष देवेश सर्वेश ते नमोनमः ॥ १४ ॥ सरस्वतीश पद्मेश पार्वतीश
परात्पर ॥ हे सावित्रीश राधेश रासेश्वर नमोस्तु ते ॥१५॥ सर्वेषामादिभूतस्त्वं सर्वः सर्वेश्वरस्तथा ॥ सर्वपाता च संहर्ता सृष्टिरूप
नमोस्तु ते ॥ १६ ॥ त्वत्पादपद्मरजसा धन्या पूता वसुंधरा ॥ शून्यरूपा त्वयि गते हे नाथ परमं पदम् ॥ १७ ॥ यत्पंचविंशत्य
धिकं वर्षाणां शतकं गतम् ॥ त्यक्त्वेमां स्वपदं यासि रुदंतीं विरहातुराम् ॥ १८ ॥ श्रीमहादेव उवाच ॥ ब्रह्मणा प्रार्थित
स्त्वं च समागत्य वसुंधराम् ॥ भूभारहरणं कृत्वा प्रयासि स्वपदं विभो ॥ १९ ॥ त्रैलोक्ये पृथिवी धन्या सद्यः पूता पदांकिता॥
वयं च मुनन्यो धयाः साक्षाद्दृष्ट्वा पदांबुजम् ॥२०॥ ध्यानासाध्यो दुराराध्यो मुनीनाऽमूर्ध्वरेतसाम् ॥ अस्माकमनघश्चेशः सोधुना
चाक्षुषो भुवि ॥ २१ ॥ वासुः सर्वनिवासश्च विश्वानि यस्य लोमसु ॥ देवस्तस्य महाविष्णुर्वासुदेवो महीतले ॥ २२ ॥ सुचिरं तपसा
लब्धं सिद्धेंद्राणां सुदुर्लभम् ॥ यत्पादपद्ममतुलं चाक्षुषं सर्वजीविनाम् ॥ २३ ॥ अनंत उवाच ॥ त्वमनंतो हि भगवन्नाह
मेव कलांशकः ॥ विश्वैकस्थे क्षुद्रकूर्मे मशकोऽहं गजे यथा ॥२४॥ असंख्यशेषाः कूर्माश्च ब्रह्मविष्णुशिवात्मकाः ॥ असंख्यानि च
विश्वानि तेषामीशः स्वयं भवान् ॥ २५ ॥ अस्माकमीदृशं नाथ सुदिनं क्व भविष्यति ॥ स्वप्नादृष्टश्च यश्चेशः स दृष्टः सर्वजीविनाम्॥
॥ २६ ॥ नाथ प्रयासि गोलोकं पूता कृत्वा वसुंधराम् ॥ तामनाथां रुदंतीं च निमग्नां शोकसागरे ॥ २७ ॥ देवा ऊचुः ॥ ॥
वेदास्तोतुं न शक्ता यं ब्रह्मेशानादयस्तथा ॥ तमेव स्तवनं किं वा वयं कुर्मो नमोस्तु ते ॥ २८ ॥ इत्येवमुक्त्वा देवास्ते प्रययुर्द्वारकां
पुरीम् ॥ तत्रस्थं भगवंतं च द्रष्टुं शीघ्रं मुदान्विताः ॥ २९ ॥ अथ तेषां च गोपाला ययुर्गोलोकमुत्तमम् ॥ पृथिवी कंपिता भीता
चलंतः सप्तसागराः ॥ ३० ॥ हतश्रियं द्वारकां च त्यक्त्वा च ब्रह्मशापतः ॥ मूर्तिं कदंबमूलस्थां विवेश राधिकेश्वरः ॥ ३१ ॥ ते
सर्वे चैरकायुद्धे निपेतुर्यादवास्तथा ॥ चिंतामारुह्य देव्यश्च प्रययौ स्वामिभिः सह ॥ ३२ ॥ अर्जुनः स्वपुरं गत्वा तमुवाच युधिष्ठि
रम् ॥ स राजा भ्रातृभिः सार्धं ययौ स्वर्गं च भार्यया ॥ ३३ ॥ दृष्ट्वा कदंबमूलस्य तिष्ठंतं परमेश्वरम् ॥ देवा ब्रह्मादयस्ते च प्रणेमु

भक्तिपूर्वकम् ॥ ३४ ॥ तुष्टुवुः परमात्मानं देवं नारायणं प्रभुम् ॥ श्यामं किशोरवयसं भूषितं रत्नभूषणैः ॥३५॥ वह्निशुद्धांशुकाधानं
शोभितं वनमालया ॥ अतीव सुन्दरं शांतं लक्ष्मीकांतं मनोहरम् ॥ ३६ ॥ व्याधास्त्रसंयुतं पादपद्मं पद्मादिवंदितम् ॥ दृष्ट्वा ब्रह्मा
दिदेवांस्तानभयं सस्मितं ददौ ॥ ३७ ॥ पृथिवीं तां समाश्वास्य रुदंतीं प्रेमविह्वलाम् ॥ व्याधं प्रस्थापयामास परं स्वपदमुत्तमम्॥
॥ ३८ ॥ बलस्य तेजः शेषे च विवेश परमाद्भुतम् ॥ प्रद्युम्नस्य च कामैके वानिरुद्धस्य ब्रह्मणि ॥ ३९ ॥ अयोनिसंभवा देवी
महालक्ष्मीश्च रुक्मिणी ॥ वैकुण्ठं प्रययौ साक्षात्स्वशरीरेण नारद ॥ ४० ॥ सत्यभामा पृथिव्यां च विवेश कमलालया ॥ स्वयं
जांबवती देवी पार्वत्यां विश्वमातरि ॥ ४१ ॥ या या देव्यश्च यासां चाप्यंशरूपाश्च भूतले ॥ तस्यां तस्यां प्रविविशुस्ता एव च
पृथकपृथक् ॥४२॥सांबस्य तेजः स्कंदे च विवेश परमाद्भुतम् ॥ कश्यपे वसुदेवश्चाप्यदित्यां देवकी तथा ॥ ४३ ॥ रुक्मिणीमंदिरं
त्यक्त्वा समस्तां द्वारकां पुरीम् ॥ स जग्राह समुद्रश्च प्रफुल्लवदनेक्षणः ॥ ४४॥ लवणोदः समागत्य तुष्टाव पुरुषोत्तमम्॥रुरोद तद्वि
योगेन साश्रुनेत्रश्च विह्वलः ॥ ४५ ॥ गंगा सरस्वती पद्मावती च यमुना तथा ॥ गोदावरी स्वर्णरेखा कावेरी नर्मदा मुने ॥ ४६ ॥
शरावती बाहुदा च कृतमाला च पुण्यदा॥समाययुश्च ताः सर्वाः प्रणेमुः परमेश्वरम्॥४७॥उवाच जाह्नवी देवी रुदंती परमेश्वरम् ॥
साश्रुनेत्रातिदीना सा विरहज्वरकातरा ॥ ४८ ॥ भागीरथ्युवाच ॥ हे नाथ रमणश्रेष्ठ यासि गोलोकमुत्तमम् ॥ अस्माकं
का गतिश्चात्र भविष्यति कलौ युगे ॥ ४९ ॥ श्रीभगवानुवाच ॥ कलेः पंचसहस्राणि वर्षाणि तिष्ठ भूतले ॥ पापानि पापिनो
यानि तुभ्यं दास्यंति स्नानतः ॥ ५० ॥ मन्मंत्रोपासकस्पर्शाद्भस्मीभूतानि तत्क्षणात् ॥ भविष्यंति दर्शनाच्च स्नानादेव हि जाह्नवि
॥ ५१ ॥ हरेर्नामानि यत्रैव पुराणानि भवंति हि ॥ तत्र गत्वा सावधानमाभिः सार्द्धं च श्रोष्यसि ॥ ५२ ॥ पुराणश्रवणाच्चैव हरेर्ना
मानुकीर्तनात् ॥ भस्मीभूतानि पापानि ब्रह्महत्यादिकानि च॥५३॥भस्मीभूतानि तान्येव वैष्णवालिंगनेन च ॥ तृणानि शुष्ककाष्ठा
नि दहंति पावको यथा ॥ ५४ ॥ तथापि वैष्णवा लोके पापानि पापिनामपि ॥ पृथिव्यां यानि तीर्थानि पुण्यान्यपि च
जाह्नवि ॥ ५५ ॥ मद्भक्तानां शरीरेषु सन्ति पूतेषु संततम् ॥ मद्भक्तपादरजसा सद्यः पूता वसुन्धरा ॥५६॥ सद्यः पूतानि तीर्थानि

सद्यः पूतं जगत्तथा ॥ मन्मंत्रोपासका विप्रा ये मदुच्छिष्टभोजिनः ॥ ५७ ॥ मामेव नित्यं ध्यायंते ते मत्प्राणाधिकाः प्रियाः ॥ तदुपस्पर्शमात्रेण पूतो वायुश्च पावकः ॥ ५८ ॥ कलेर्दशसहस्राणि मद्भक्ताः संति भूतले ॥ एकवर्णा भविष्यंति मद्भक्तेषु गतेषु च ॥ ५९ ॥ मद्भक्तशून्या पृथिवी कलिग्रस्ता भविष्यति ॥ एतस्मिन्नंतरे तत्र कृष्णदेहाद्विनिर्गतः ॥६० ॥ चतुर्भुजश्च पुरुषः शतचंद्रसमप्रभः ॥ शंखचक्रगदापद्मधरः श्रीवत्सलाञ्छनः ॥ ६१ ॥ सुन्दरं रथमारुह्य क्षीरोदं स जगाम ह ॥ सिंधुकन्या च प्रययौ स्वयं मूर्तिमती सती ॥ ६२ ॥ श्रीकृष्णमनसा जाता मर्त्यलक्ष्मीर्मनोहरा ॥ श्वेतद्वीपं गते विष्णौ जगत्पालनकर्तरि ॥ ६३ ॥ शुद्धसत्त्वस्वरूपे च द्विधा रूपो बभूव ह ॥ दक्षिणांशश्च द्विभुजो गोपबालकरूपकः ॥ ६४ ॥ नवीनजलदश्यामः शोभितः पीतवाससा ॥ श्रीवंशवदनः श्रीमान्सस्मितः पद्मलोचनः ॥ ६५ ॥ शतकोटींदुसौंदर्यं शतकोटिस्मरप्रभम् ॥ दधानः परमानंदः परिपूर्णतमः प्रभुः ॥ ६६ ॥ परं धाम परब्रह्म स्वरूपो निर्गुणः स्वयम् ॥ परमात्मा च सर्वेषां भक्तानुग्रहविग्रहः ॥ ६७ ॥ नित्यदेहश्च भगवानीश्वरः प्रकृतेः परः ॥ योगिनो यं वदंत्येवं ज्योतीरूपं सनातनम्॥६८॥ज्योतिरभ्यंतरे नित्यरूपं भक्ता विदंति यम् ॥ वेदा वदंति सत्यं यं नित्यमाद्यं विचक्षणाः ॥ ६९ ॥ यं वदंति सुराः सर्वे परं स्वेच्छामयं प्रभुम् ॥ सिद्धेंद्रा मुनयः सर्वे सर्वरूपं वदंति यम् ॥ ७० ॥ यमनिर्वचनीयं च योगींद्रः शंकरो वदेत् ॥ स्वयं विधाता प्रवदेत्कारणानां च कारणम् ॥ ७१ ॥ शेषो वदेदनंतं यं नवधा रूपमीश्वरम् ॥ तर्काणामेव षण्णां च षड्विधं रूपमीप्सितम् ॥ ७२ ॥ वैष्णवानामेकरूपं वेदानामेकमेव च ॥ पुराणानामेकरूपं तस्मान्नवविधं स्मृतम् ॥ ७३ ॥ न्यायो निर्वचनीयं च यं मतं शंकरो वदेत् ॥ नित्यं वैशेषिकाश्च यं तं वदंति विचक्षणाः ॥७४ ॥ सांख्यो वदति तं देवं ज्योतीरूपं सनातनम् ॥ मीमांसा सर्वरूपं च वेदांतः सर्वकारणम् ॥ ७५ ॥ पातंजलोऽप्यनंतं च वेदाः सत्यस्वरूपकम् ॥ स्वेच्छामयं पुराणं च भक्ताश्च नित्यविग्रहम् ॥ ७६ ॥ सोयं गोलोकनाथश्च राधेशो नंदनंदनः ॥ गोकुले गोपवेषश्च पुण्ये वृंदावने वने ॥ ७७ ॥ चतुर्भुजश्च वैकुंठे महालक्ष्मीपतिः स्वयम् ॥ नारायणश्च भगवान्यन्नाम मुक्तिकारणम् ॥ ७८ ॥ सकृन्नारायणेत्युक्त्वा पुमान्कल्पशतत्रयम् ॥ गंगादिसर्वतीर्थेषु स्नातो भवति नारद ॥७९॥ सुनंदनंदकुमुदैः पार्षदैः परिवारितः ॥ शंखचक्रगदापद्मधरः श्री

वत्सलाञ्छनः ॥ ८० ॥ कौस्तुभेन मणींद्रेण भूषितो वनमालया ॥ वेदैः स्तुतश्च यानेन वैकुंठं स्वपदं ययौ ॥ ८१ ॥ गते वैकुंठनाथे च राधेशश्च स्वयं प्रभुः ॥ चकार वंशीशब्दं च त्रैलोक्यमोहनं परम् ॥ ८२ ॥ मूर्च्छां प्रापुर्देवगणा मुनयश्चापि नारद॥अचेतना बभूवुश्च मायया पार्वतीं विना ॥ ८३ ॥ उवाच पार्वती देवी भगवंतं सनातनम् ॥ विष्णुमाया भगवतो सर्वरूपा सनातनी ॥ ८४ ॥ परब्रह्मस्वरूपा या परमात्मस्वरूपिणी ॥ सगुणा निर्गुणा सा च परा स्वेच्छामयी सती ॥ ८५ ॥ पार्वत्युवाच ॥ एकाहं राधिकारूपा गोलोके रासमंडले ॥ रासशून्यं च गोलोकं परिपूर्णं कुरु प्रभो ॥८६॥ गच्छ त्वं रथमारुह्य मुक्तामाणिक्यभूषितम् ॥ परिपूर्णतमाहं च तव वक्षःस्थलस्थिता ॥८७॥ तवाज्ञया महालक्ष्मीरहं वैकुंठगामिनी॥सरस्वती च तत्रैव वामे पार्श्वे हरेरपि॥८८॥ तवाहं मानसा जाता सिंधुकन्या तवाज्ञया ॥ सावित्री वेदमाताहं कलया विधिसन्निधौ ॥ ८९ ॥ तेजःसु सर्वदेवानां पुरा सत्ये तवाज्ञया ॥ अधिष्ठानं कृतं तत्र धृतं देव्या शरीरकम् ॥ ९० ॥ शुंभादयश्च दैत्याश्च निहताश्चावलीलया ॥ दुर्गां निहत्य दुर्गाहं त्रिपुरा त्रिपुरे वधे ॥ ९१ ॥ निहत्य रक्तबीजं च रक्तबीजविनाशिनी ॥ तवाज्ञया दक्षकन्या सती सत्यस्वरूपिणी ॥ ९२ ॥ योगेन त्यक्त्वा देहं च शैलजाहं तवाज्ञया ॥ त्वया दत्त्वा शंकराय गोलोके रासमंडले ॥ ९३ ॥ विष्णुभक्तिरहं तेन विष्णुमाया च वैष्णवी ॥ नारायणस्य मायाहं तेन नारायणी स्मृता ॥९४॥ कृष्णप्राणाधिकाहं च प्राणाधिष्ठातृदेवता ॥ महाविष्णोश्च वासोश्च जननी राधिका स्वयम् ॥ ९५ ॥ तवाज्ञया पंचधाहं पंचप्रकृतिरूपिणी ॥ कलाकलांशयाहं च देवपत्न्यो गृहेगृहे ॥ ९६ ॥ शीघ्रं गच्छ महाभाग तत्राहं विरहातुरा ॥ गोपीभिः सहिता रासं भ्रमंती परितः सदा ॥ ९७ ॥ पार्वतीवचनं श्रुत्वा प्रहस्य रसिकेश्वरः ॥ रत्नयानं समारुह्य ययौ गोलोकमुत्तमम् ॥९८॥ पार्वती बोधयामास स्वयं देवगणं तथा ॥ मायावंशीरवाच्छिन्नं विष्णुमाया सनातनी ॥९९॥ कृत्वा ते हरिशब्दं च स्वगृहं विस्मयं ययुः॥शिवेन सार्द्धं दुर्गा सा प्रहृष्टा स्वपुरं ययौ॥१००॥अथ कृष्णं समायांतं राधा गोपीगणैः सह॥अनुव्रजं ययौ हृष्टा सर्वज्ञा प्राणवल्लभम् ॥१॥ दृष्ट्वा समीपमायांतमवरुह्य रथात्सती ॥प्रणनाम जगन्नाथं शिरसा सखिभिः सह ॥२॥ गोपा गोप्यश्च मुदिताः प्रफुल्लवदनेक्षणाः ॥ दुंदुभिं वादयामासुरीश्वरागमनोत्सुकाः ॥ ३ ॥ विरजां च समुत्तीर्य दृष्ट्वा राधां जगत्पतिः ॥

अवरुह्य रथात्तूर्णं गृहीत्वा राधिकाकरम् ॥ ४ ॥ शतश्रृंगे च बभ्राम सुरम्यं रासमंडलम् ॥ दृष्ट्वाक्षयवटं पुण्यं पुण्यं वृंदावनं वनम्॥५॥
तुलसीकाननं दृष्ट्वा प्रययौ मालतीवनम् ॥ वामे कृत्वा कुंदवनं माधवीकाननं तथा ॥६॥ चकार दक्षिणे कृष्णश्चंपकारण्यमीप्सितम् ॥
चकार पश्चात्तूर्णं च चारुचंदनकाननम् ॥७॥ ददर्श पुरतो रम्यं राधिकाभवनं परम् ॥ उवास राधया सार्धं रत्नसिंहासने वरे ॥ ८ ॥
सकर्पूरं च तांबूलं बुभुजे वासितं जलम् ॥ सुष्वाप पुष्पतल्पे च सुगंधिचंदनार्चिते ॥९॥ स रेमे रामया सार्धं निमग्नो रससागरे ॥
इत्येवं कथितं सर्वं धर्मवक्त्राच्च यच्छ्रुतम् ॥११० ॥ गोलोकारोहणं रम्यं किं भूयः श्रोतुमिच्छसि ॥१११॥ इति श्रीब्रह्मवैवर्ते महा
पुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे गोलोकारोहणं नामैकोनत्रिंशदधिकशततमोऽध्यायः ॥ १२९ ॥ ॥ नारद
उवाच ॥ सर्वं श्रुतं महाभाग नावशेषमभीप्सितम् ॥ किमपूर्वं पुराणं च ब्रह्मवैवर्तमिष्टदम् ॥ १ ॥ अधुना किं करिष्यामि तन्मां
ब्रूहि जगद्गुरो ॥ आज्ञां कुरु तपस्यां च कर्तुं यामि हिमालयम् ॥ २ ॥ श्रीनारायण उवाच ॥ उपबर्हणगंधर्वः पंचा
शत्कामिनीपतिः ॥ जन्मांतरे भवानासीदधुना ब्रह्मपुत्रकः ॥ ३ ॥ तास्वेका च सती रम्या तपसा शंकरं परम् ॥ आराध्य च वरं लेभे
वाञ्छितं नारदं पतिम् ॥४॥ सा च सृंजयकन्या च स्वर्णष्ठीवी महोदरा ॥ तां विवाहं कुरुष्वेति शंकराज्ञा कथं वृथा ॥५॥ सुंदरीं सुंदरी
ष्वेव कोमलां कमलाकलाम् ॥ पतिव्रतां महाभागां रम्यां सुप्रियवादिनीम् ॥ ६ ॥ कामुकीं कमनीयां च शश्वत्सुस्थिरयौवनाम् ॥
विधात्रा लिखितं कर्म प्राक्तनं केन वार्यते ॥ ७ ॥ नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥ अवश्यमेव भोक्तव्यं कृतं कर्म शुभा
शुभम् ॥ ८ ॥ सूत उवाच ॥ नारायणवचः श्रुत्वा हृदयेन विदूयता ॥ प्रणम्य प्रययौ शीघ्रं नारदः सृंजयालयम् ॥ ९ ॥
॥ शौनक उवाच ॥ अहो सूत महाभाग श्रुतं किं परमाद्भुतम् ॥ किमपूर्वं रहस्यं च सरसं च पुरातनम् ॥ १० ॥ अधुना श्रोतुमि
च्छामि विवाहं नारदस्य च ॥ अतींद्रियस्य च मुनेर्ब्रह्मपुत्रस्य सांप्रतम् ॥ ११ ॥ सूत उवाच ॥ नारदो मूढरूपश्च दृष्ट्वा सृंजयक
न्यकाम् ॥ तपस्विनीं महाभागां विष्णुव्रतपरायणाम् ॥ १२ ॥ ययौ ब्रह्मसभां रम्यां सर्वदेवैः समावृताम् ॥ प्रणम्य पितरं शांतः सर्वं
तत्त्वमुवाच तम् ॥ १३ ॥ ब्रह्मा प्रहृष्टवदनः श्रुत्वा वार्तां शुभावहाम् ॥ तपस्विनं च पुत्रं च संभाष्य जगतां पतिः ॥ १४ ॥ रत्ननिर्मा

णयानेन सार्धं देवैः शुभे क्षणे ॥ पुत्रं कृत्वा च पुरतो ययौ सृंजयमंदिरम् ॥ १५ ॥ तच्छ्रुत्वा सृंजयो राजा रत्नभूषणभूषिताम् ॥ गृहीत्वा कन्यकां रम्यां नारदाय ददौ मुदा ॥१६॥ सर्वस्वं दक्षिणां दत्त्वा मणिमुक्तादिकं तथा ॥ पुटांजलियुतो भूत्वा परिहारं चकार सः ॥ १७ ॥ कन्यां समर्प्य ब्रह्माणं राजा च योगिनां वरः ॥ रुरोद भृशमुच्चैश्च वत्से वत्स इतीरितम्॥१८॥ क्व यासि त्यक्त्वा मद्गेहं शून्यं कमललोचने ॥ अहं यामि वनं घोरं त्वां त्यक्त्वा जीवितो मृतः ॥ १९ ॥ प्रणम्य पितरं कन्या रुदंतं मातरं तथा ॥ रुदंतीं तां रुदंती साऽप्यारुरोह रथं विधेः॥२०॥गृहीत्वा च सभार्यं च पुत्रं धाता मुदाऽन्वितः ॥ प्रययौ ब्रह्मलोकं च देवेंद्रैर्मुनिभिः सह ॥२१॥ ब्राह्मणान्भोजयामास सांगे मंगलकर्मणि ॥ देवानपि च सिद्धांश्च वादयामास दुंदुभिम् ॥ २२ ॥ नारदस्तु मुनिश्रेष्ठो बाधितः पूर्वकर्मणा ॥ यस्य यत्प्राक्तनं विप्र दुर्लंघ्यं केन वार्यते ॥ २३ ॥ सुरम्ये पुष्पतल्पे च सुगंधिचंदनार्चिते ॥ स रेमे रामया सार्धं बुबुधे न दिवानिशम् ॥ २४ ॥ एवं कृत्वा विवाहं च विरतो मुनिसत्तमः ॥ उवास ब्रह्मलोकेषु वटमूले मनोहरे ॥ २५ ॥ तत्राजगाम नग्नश्च प्रज्वलन्ब्रह्मतेजसा ॥ सनत्कुमारो भगवान्साक्षाच्च बालको यथा ॥ २६ ॥ सृष्टेः पूर्वश्च वयसा यथैव पंचहायनः ॥ अचूडोऽनुपनीतश्च वेदसंध्याविहीनकः ॥ २७ ॥ कृष्णेति मंत्रं जपति यस्य नारायणो गुरुः ॥ अनंतकालकल्पं च भ्रातृभिश्च त्रिभिः सह ॥२८॥ वैष्णवानामग्रणीशो ज्ञानिनां च गुरोर्गुरुः ॥ आराद्दृष्ट्वा नारदस्तं भ्रातरं च सतां वरम् ॥ २९ ॥ सहसा शिरसा भूमौ दंडवत्प्रणनाम तम् ॥ उवाच नारदं बालः प्रहस्य परमार्थकम् ॥३०॥ सनत्कुमार उवाच ॥ अये भ्रातः किं करोषि कुशलं युवतीपते ॥ स्त्रीपुंसोर्वर्द्धते प्रेम नित्यं तन्नित्यनूतनम् ॥ ३१ ॥ अर्गलं ज्ञानमार्गस्य भक्तिद्वारकपाटकम् ॥ मोक्षमार्गव्यवहितं चिरं बंधनकारणम् ॥ ३२ ॥ पीयूषबुद्ध्या गरलं भुंक्ते पापी नराधमः ॥ परं नारायणं त्यक्त्वा यस्यास्ते विषये मनः ॥ ३३ ॥ स वंचितो मायया चामृतं त्यक्त्वा विषं भजेत् ॥ सर्वेषां कामभोगोऽस्ति कर्मिणामीश्वरं विना॥३४॥ वयं विधातुः पुत्राश्च सा बुद्धिरिति देहिनाम् ॥ यदि ते नास्ति भोगश्च कथं गंधर्वजन्म च ॥ ३५ ॥ कथं दासीसुतस्त्वं च मुक्तश्च भक्तसंगतः ॥ निर्गच्छ तपसे भ्रातस्त्यज मायामयीं प्रियाम् ॥ ॥ ३६ ॥ सुपुण्ये भारते वर्षे तपसा भज माधवम् ॥ स्थिते नारायणे स्वेशे परे स्वपददातारि ॥ ३७ ॥ विषयी विषयांधश्च वंचितो

मायया ध्रुवम् ॥ गृहाण मम मंत्रं च कृष्ण इत्यक्षरद्वयम् ॥३८॥ सर्वेषामेव मंत्राणां सारात्सारं परात्परम् ॥ सर्वेषु च पुराणेषु वेदेषु च चतुर्षु च॥३९॥धर्मशास्त्रेषु तंत्रेषु नास्त्येवास्मात्परो मनुः ॥ नारायणेन दत्तो मे पुष्करे सूर्यपर्वणि॥४०॥असंख्यकल्पं जप्त्वाऽहं भ्रामामि सर्वपूजितः ॥ इत्युक्त्वा स्नापयित्वा तं ददौ तस्मै परं मनुम् ॥ ४१ ॥ दिवानिशं स जपति पूतया मणिमालया ॥ तस्मै शुभाशिषं दत्त्वा मंत्रं च वैष्णवाग्रणीः ॥ ४२॥ गोलोकं प्रययौ द्रष्टुं भगवंतं सनातनम् ॥ नारदस्तु मनुं प्राप्य सर्वसिद्धिप्रदं वरम् ॥ ॥ ४३ ॥ श्रीकृष्णे निश्चला भक्तिः पूर्वकर्मनिकृंतनी ॥ त्यक्त्वा मायामयीं भार्यां भारतं तपसे ययौ ॥ ४४ ॥ कृतमालानदीतीरे ददर्श शंकरं परम् ॥ दृष्ट्वा च सहसा मूर्ध्ना प्रणनाम शिवं मुनिः ॥ तमुवाच जगन्नाथो भक्तं च भक्तवत्सलः ॥ ४५ ॥ श्रीमहादेव उवाच ॥ अहो नारद दृष्ट्वा त्वां प्रसन्नोऽहं स्वतेजसा ॥ ४६ ॥ भक्तानां दर्शनं यत्र सुदिनं तच्छरीरिणाम् ॥ अयं हि परमो लाभो देहिनां भक्तसंगमः ॥ ४७ ॥ स स्नातः सर्वतीर्थेषु यो ददर्श च वैष्णवम् ॥ अपि प्राप्तो महामंत्रः सर्वतंत्रसुदुर्लभः ॥४८॥ मया दत्तो गणेशाय स्कंदाय स्वात्मजाय च ॥ मह्यं दत्तश्च कृष्णेन गोलोके रासमंडले ॥ ४९ ॥ ब्रह्मणे चापि धर्माय धर्मो नारायणाय च ॥ ब्रह्मा सनत्कुमाराय तुभ्यं दत्तश्च तेन वै ॥ ५० ॥ मंत्रग्रहणमात्रेण जनो नारायणो भवेत् ॥ विचारणं च नास्त्यत्र कालाकालं शुभाशुभम् ॥ ५१ ॥ पंचलक्षजपेनैव पुरश्चरणमस्य च ॥ ध्यानं च सामवेदोक्तं तेन ध्यायेच्च वैष्णवः॥५२॥ध्यानं च पापदहनं कर्ममूलनिकृंतनम् ॥ कृष्णं नवघनश्यामं किशोरं पीतवाससम् ॥ ५३ ॥ शतकोटींदुसौंदर्यं दधानमतुलं परम् ॥ भूषितं भूषणौघैस्तैरमूल्यरत्ननिर्मितैः ॥ ५४ ॥ चंदनोक्षितसर्वांगं कौस्तुभेन विराजितम्॥मयूरपिच्छचूडं च मालतीमाल्यमंडितम् ॥५५॥ ईषद्धास्यप्रसन्नास्यं नित्योपास्यं शिवादिभिः ॥ ध्यानासाध्यं दुराराध्यं निर्गुणं प्रकृतेः परम् ॥५६॥ सर्वेषां परमात्मानं भक्तानुग्रहविग्रहम् ॥ वेदानिर्वचनीयं तं वरं सर्वेश्वरं भजे ॥५७॥ ध्यानेनानेन तं ध्यात्वा भगवंतं सनातनम्॥भज तं परमानंदं सत्यं नित्यं परात्परम्॥५८॥इत्युक्त्वा स्वपदं शंभुर्जगाम परमेश्वरः ॥ तं प्रणम्य जगन्नाथं नारदस्तपसे ययौ॥५९॥नारदः श्रीहरिं स्मृत्वा योगात्त्यक्त्वा कलेवरम्॥निलीनः पादपद्मे च पादपद्मार्चिते हरेः॥६०॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे नारदविवाहादिप्रक

रणं नाम त्रिंशदधिकशततमोऽध्यायः ॥१३०॥ शौनक उवाच ॥ अत्यपूर्वमुपाख्यानं श्रुतं परममद्भुतम् ॥ सुगोप्यं च सुगोप्यं च
रम्यंरम्यं नवंनवम् ॥ १ ॥ किमनिर्वचनीयं च कमनीयं मनोहरम् ॥ सुदुर्लभा कथा प्रोक्ता पुराणेषु पुरातनी ॥ २ ॥ एवंभूतं च सुदिनं
कदास्माकं भविष्यति ॥ तज्जन्म सफलं धन्यं यत्र वैष्णवसंगमः ॥ ३ ॥ गर्भवासोच्छेदनं च कर्ममूलनिकृंतनम् ॥ हरिदास्यप्रदं शुद्धं
भक्तानां भक्तिवर्धनम् ॥ ४ ॥ असाधुसंगदुर्बुद्धिपापोन्मूलनकारणम् ॥ गणेशजन्मोपाख्यानं पुराणेषु सुदुर्लभम् ॥५॥ तुलसीराधिका
ख्यानं किमपूर्वं श्रुतं परम् ॥ नवं यद्यद्गोपनीयं व्यक्तमव्यक्तमीप्सितम् ॥ सर्वं श्रुतं महाभाग परिपूर्णं मनोहरम् ॥ ६ ॥ अधुना श्रोतु
मिच्छामि वह्नेरुत्पत्तिमीप्सिताम् ॥ स्वर्णस्य च महाभाग तन्मे व्यख्यातुमर्हसि ॥ ७ ॥ सूत वाच ॥ सामग्रीकरणं सृष्टेर्जल
मेव हुताशनः ॥ तथैव प्रकृतिर्नित्या महानेव तथैव च ॥ ८ ॥ यथा दिशो महाकाशो यथैव सृष्टिगोलकम् ॥ प्रकृतेर्महतश्च स्यादहं
कारस्तथैव च ॥९॥ यथैव शब्दस्तन्मात्रं तथैव च हुताशनः ॥ तथाऽपि तत्समुत्पत्तिं कथयामि निशामय॥१०॥एकदा सृष्टिकाले
च ब्रह्मानंतमहेश्वराः ॥ श्वेतद्वीपं ययुः सर्वे द्रष्टुं विष्णुं जगत्पतिम् ॥११॥ परस्परं च संभाषां कृत्वा सिंहासनेषु च ॥ ऊषुः सर्वे सभा
मध्ये सुरम्ये पुरतो विभोः ॥१२॥ विष्णुगात्रोद्भवास्तत्र कामिन्यः कमलाकलाः॥तत्र नृत्यंति गायंति विष्णुगाथाश्च सुस्वरम् ॥१३॥
तासां च कठिनां श्रोणिं कठिनं स्तनमंडलम् ॥ सस्मितं मुखपद्मं च दृष्ट्वा ब्रह्मा सुकामुकः ॥ १४ ॥ मनोनिवारणं कर्तुं न शशाक
पितामहः ॥ वीर्यं पपात चच्छाद लज्जया वाससा विभुः ॥१५॥ तद्वीर्यं वस्त्रसहितं प्रतप्तं कामतापतः ॥ क्षीरोदे प्रेरयामास संगीते वि
रते द्विज ॥ १६ ॥ जलादुत्थाय पुरुषः प्रज्वलन्ब्रह्मतेजसा ॥ उवाच ब्रह्मणः क्रोडे लज्जितस्य च संसदि ॥ १७ ॥ एतस्मिन्नंतरे रुष्टो
जलादुत्थाय सत्वरः ॥ प्रणम्य वरुणो देवो बालं नेतुं समुद्यतः ॥१८॥ बालो दधार ब्रह्माणं बाहुभ्यां च भयाद्रुदन् ॥ किंचिन्नोवाच
जगतां विधाता लज्जया द्विज ॥ १९ ॥ बालकस्य करे धृत्वा चकाराकर्षणं रुषा ॥ वरुणश्च सभामध्ये तं चिक्षेप प्रजापतिः॥२०॥
पपात दूरतो देवो वरुणो दुर्बलस्ततः ॥ मूर्च्छां संप्राप मृतवत्कोपदृष्ट्या विधेरहो ॥२१॥ चेतनं करयामासामृतदृष्ट्या च शंकरः ॥
संप्राप्य चेतनं तत्र तमुवाच जलेश्वरः ॥ २२ ॥ वरुण उवाच ॥ बालो जले समुद्भूतो मम पुत्रोऽयमीप्सितः ॥ अहं गृहीत्वा या

स्यामि ब्रह्मा मां ताडयेत्कथम् ॥ २३ ॥ ब्रह्मोवाच ॥ बालकः शरणापन्नो मयि विष्णो महेश्वर ॥ कथं दास्यामि भीतं च रुदंतं
शरणागतम् ॥२४॥ शरणागतदीनार्तं यो न रक्षेदपंडितः ॥ पच्यते निरये तावद्यावच्चन्द्रदिवाकरौ ॥२५॥ उभयोर्वचनं श्रुत्वा प्रहस्य
मधुसूदनः ॥ उवाच तत्र सर्वज्ञः सर्वेशश्च यथोचितम् ॥ २६ ॥ श्रीभगवानुवाच ॥ दृष्ट्वा तु कामिनीश्रोणिं वीर्यं धातुः पपात तत् ॥
लज्जया प्रेरयामास क्षीरोदे निर्मले जले ॥ २७ ॥ ततो बभूव बालश्च धर्मतो विधिपुत्रकः ॥ क्षेत्रजश्च सुतः शास्त्रे वरुणस्यापि
गौणतः २८ ॥ श्रीमहादेव उवाच ॥ यो विद्यायोनिसंबंधो वेदेषु च निरूपितः ॥ शिष्ये पुत्रे च समता चेति वेदविदो
विदुः ॥ २९ ॥ मंत्रं ददातु वरुणो विद्यां च बालकाय च ॥ पुत्रो विधातुर्वह्निश्च शिष्यश्च वरुणस्य च ॥३०॥ विष्णुर्ददातु बालाय
दाहिकां शक्तिमुज्ज्वलाम् ॥ सर्वदग्धो हुताशश्च निर्वाणो वरुणेन च ॥ ३१ ॥ विष्णुश्च दाहिकां शक्तिं ददौ तस्मै शिवाज्ञया ॥ मंत्रं
विद्यां च वरुणो रत्नमालां मनोहराम् ॥ ३२ ॥ क्रोडे कृत्वा च तं बालं चुचुंब मायया सुरः ॥ ब्रह्मणे च ददौ साक्षाद्विष्णुशंकरयो
रपि ॥ ३३ ॥ प्रणम्य विष्णुं ब्रह्मा च ययौ शंभुः स्वमंदिरम् ॥ अग्न्युत्पत्तिश्च कथिता स्वर्णोत्पत्तिं निशामय ॥ ३४ ॥ एकदा सर्वदेवाश्च
समूषुः स्वर्गसंसदि ॥ तत्र कृत्वा च नृत्यं च गायंत्यप्सरसां गणाः ॥ ३५ ॥ विलोक्य रंभां सुश्रोणिं सकामो वह्निरेव च ॥ पपात वीर्यं
चच्छाद लज्जया वाससा तथा ॥ ३६ ॥ उत्तस्थौ स्वर्णपुंजश्च वस्त्रं क्षिप्त्वा ज्वलत्प्रभम् ॥ क्षणेन वर्धयामास स सुमेरुर्बभूव ह ॥३७॥
हिरण्यरेतसं वह्निं प्रवदंति मनीषिणः ॥ इति ते कथितं सर्वं किं भूयः श्रोतुमिच्छसि ॥ ३८ ॥ इति श्रीब्रह्मवैवर्ते . महापुराणे श्रीकृष्ण
जन्मखंड उत्तरार्धे नारायणनारदसंवादे वह्निसुवर्णोत्पत्तिर्नामैकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥ शौनक उवाच ॥ श्रुतं
सर्वं नावशेषं धर्मेश ब्राह्मणं च माम् ॥ कथयस्व महाभाग पुराणं पुनरेव हि ॥ १ ॥ एवंविधं पुराणं च जन्मनैव न हि श्रुतम् ॥ न
दृष्टं न श्रुतं तात तादृशं वाचकं तथा ॥ २ ॥ सूत उवाच ॥ श्रूयतां भो महाभाग सावधानं च संयतम् ॥ अध्यायश्रवणे
नैव पुराणफलमालभेत् ॥ ३ ॥ ब्रह्मखंडे च कथितं परं ब्रह्मनिरूपणम् ॥ तदनिर्वचनीयं च येषामपि यथागमम् ॥ ४ ॥ साकारं च
निराकारं सगुणं निर्गुणं पृथक् ॥ येषामपि यथाशक्तिस्तथैव ध्यानमेव च ॥५॥ गोलोकादेर्वर्णनं च क्रमेण च पृथक्पृथक् ॥ तत्रोप

युक्तोपाख्यानं यद्यत्प्रासंगिकं विभो ॥ ६ ॥ जातीनां निर्णयश्चैव संकराणां तथैव च ॥ यद्यद्दिष्टोपाख्यान तत्तत्प्रश्नानुरोधतः
॥ ७ ॥ राधामाधवयोः क्रीडा महाविष्णोः समुद्भवः ॥ निरूपणं च विश्वेषां समासेन द्विजोत्तम ॥ ८ ॥ ब्रह्मनारदयोश्चैव संवादः पर
मार्थतः ॥ विवेको नारदस्यैव मुनींद्रस्य तथैव च ॥ ९ ॥ आज्ञया ब्राह्मणश्चैव नरनारायणाश्रमम् ॥ गमनं नारदस्यैव तेन सार्धं च
दर्शनम् ॥ १० ॥ तयोः संभाषणं चैव नारदाद्यनिवेदनम् ॥ तत्र देवब्रह्मखंडक्रमेणोक्तं द्विजोत्तम ॥ ११ ॥ श्रूयतां प्रकृतेः खंड सुधा
खंडसमं मुने ॥ प्रकृतेर्लक्षणं प्रोक्तं प्रकृतीनां च वर्णनम् ॥ १२ ॥ उपाख्यानं च तासां च वर्णनं पूजनादिकम् ॥ लक्ष्मीः सरस्वती
दुर्गा सावित्री राधिका तथा ॥ १३ ॥ एतासां चरितं चैवमन्यासां च पृथक्पृथक् ॥ उपाख्यानं महालक्ष्म्याः सरस्वत्यास्तथैव च
॥ १४ ॥ अपूर्वं राधिकाख्यानं सावित्र्याश्च तथैव च ॥ संवादो यमसावित्र्योः सत्यवज्जीवदानकम् ॥ १५ ॥ कुंडानां वर्णनं प्रोक्तं ते
षां च लक्षणं तथा ॥ जीविकर्मविपाकश्च भोगनिर्णय एव च ॥ १६ ॥ अपूर्वं राधिकाख्यानं पुराणेषु सुगोप्यकम् ॥ सुयज्ञस्य नृ
पेंद्रस्य चरितं परमाद्भुतम् ॥ १७ ॥ प्रोक्तं तुलस्युपाख्यानं परमाद्भुतमेव च ॥ महायुद्धं च संवादे महेशशंखचूडयोः ॥ १८ ॥ तुल
सीकृष्णसंवादस्तयोः संभोग एव च ॥ निधनं शंखचूडस्य श्रीदाम्नः शापमोक्षणम् ॥ १९ ॥ पदप्राप्तिः सुराणां च विपदां खंडनं
तथा ॥ जीविनां मोक्षबीजं च गंगोपाख्यानमीप्सितम् ॥ २० ॥ तथैव मनसाख्यानं परं हर्षविवर्धनम् ॥ स्वाहास्वधाख्यानमेव
मन्यासां च निरूपणम् ॥ २१ ॥ यद्यत्प्रासंगिकाख्यानं वक्तुः प्रश्नानुरोधतः ॥ प्रोक्तं तत्प्रकृतेः खंडं खंडं गणपतेः शृणु ॥ २२ ॥
अतीव मधुरं रम्यं स्वादुस्वादु पदेपदे ॥ सुगोप्यं तत्पुराणेषु रम्यंरम्यं नवंनवम् ॥ २३ ॥ सुदुर्लभमुपाख्यानं श्रोतृप्रीतिकरं परम् ॥
प्रोक्ता क्रीडा च परमा पार्वतीपरमेशयोः ॥ २४ ॥ स्कंदोत्पत्तिः प्रथमतः क्रीडाभंगस्तयोस्तथा ॥ पार्वतीतोषणं चैवमभिमानविमो
क्षणम् ॥ २५ ॥ पुण्यकं च व्रतं विष्णोर्देव्याश्चरितमुत्तमम् ॥ वरदानं हरेरेव सुव्रतां पार्वतीं प्रति ॥ २६ ॥ हरेश्च दर्शनं चैव ब्राह्मणा
तिथिरूपिणः ॥ आविर्भावो गणेशस्य कृपया शिवमंदिरे ॥ २७ ॥ दर्शनं पुत्रवक्त्रस्य पार्वतीपरमेशयोः ॥ परमानंदरूपं च शिवगेहे
महोत्सवम् ॥ २८ ॥ देवाद्या ददृशुः सर्वे बालं नित्यमजं विभुम् ॥ सत्यस्वरूपं परमं परब्रह्मस्वरूपिणम् ॥ २९ ॥ सर्वविघ्नहरं शांतं

दातारं सर्वसंपदाम् ॥ तपसां जपयज्ञानां व्रतानां फलदं विभुम् ॥ ३० ॥ अतीव कमनीयं च रमणीयं च योषिताम् ॥ प्राणाधिकं
प्रियतमं पार्वतीपरमेशयोः॥३१॥परमात्मस्वरूपं च भगवंतं सनातनम् ॥ सर्वेशं सर्वबीजं च साक्षान्नारायणात्मकम्॥३२॥यद्दर्शनाच्च
स्तवनात्प्रणामात्पूजनात्तथा ॥ ध्यानासाध्यं दुराराध्यं जन्मकोट्यघनाशनम् ॥ ३३ ॥ कार्त्तिकोद्धरणं प्रोक्तं तस्याभिषेक एव च ॥
गणेशपूजनं चैव सर्वविघ्नविनाशनम् ॥ ३४ ॥ जमदग्नेश्च युद्धं च कार्तवीर्यार्जुनेन च ॥ सुरभीहरणं चैव निधनं च मुनेस्तथा॥३५॥
पतिव्रतारेणुकायाश्चितारोहणमेव च ॥ प्रतिज्ञातं भृगोश्चैव दारुणं च सुदारुणम् ॥ ३६ ॥ निःक्षत्रीकरणं चैवमेकविंशतिकं द्विज ॥
संवादो ज्ञानलाभश्च गणेशपर्शुरामयोः ॥ ३७ ॥ तयोर्युद्धं दारुणं च हेरंबदंतभंजनम् ॥ दुर्गायाश्च विलापश्चाभिशापो भार्गवं प्रति
॥ ३८ ॥ स्मरणे पर्शुरामस्याप्याविर्भावो हरेरपि ॥ पार्वतीं बोधयामास स्वयं नारायणः प्रभुः ॥ ३९ ॥ वर्णनं शिवलोकस्य पर
माश्चर्यमीप्सितम् ॥ प्रदत्तं पर्शुरामाय महास्त्रं शंकरेण च ॥ ४० ॥ मंत्रं च कवचं चैव कृष्णस्य परमात्मनः ॥ वरदानं चाभयं च
प्रदानं सर्वसंपदाम् ॥ ४१ ॥ त्रिःसप्तकृत्वो भूपानां निधनं च चकार सः ॥ बभूव भृगुणा विप्र भुवश्च भारहारणम् ॥ ४२ ॥ प्रश्नानुरो
धक्रमतः पूर्वोपाख्यानमेव च ॥ प्रोक्तं गणपतेः खंडं समासेन द्विजोत्तम ॥ ४३ ॥ श्रीकृष्णजन्मखंडं च श्रूयतां सावधानतः॥ जन्म
मृत्युजराव्याधिहरं मोक्षकरं परम् ॥ ४४ ॥ हरिदास्यप्रदं शुद्धं सुश्राव्यं च सुधोपमम् ॥ अत्यपूर्वमुपाख्यानं रम्यंरम्यं नवंनवम् ॥
॥ ४५ ॥ न श्रुतं जन्मना यद्यत्स्वादुस्वादु पदेपदे ॥ प्रदीपं सर्वसत्त्वानां भवाब्धितारणं परम् ॥ ४६ ॥ कर्मोपभोगरोगाणां मर्दनं
च रसायनम् ॥ श्रीकृष्णचरणांभोजप्राप्तिसोपानकारणम् ॥ ४७ ॥ श्रीदामराधाकलहवर्णनं दारुणं द्विज ॥ तयोः शापप्रकथनं तत
स्तेषां विसर्जनम् ॥ ४८॥ ब्रह्मणा प्रार्थितस्यैव हरेर्जन्म महीतले ॥ प्रोक्तं च जन्मखंडं च परमाद्भुतमेव च ॥ ४९ ॥ आविर्भावो
हरेरेव वसुदेवस्य मंदिरे ॥ कंसासुरभयेनैव गोकुले गमनं हरेः ॥ ५० ॥ वृषभानुसुता राधा श्रीदाम्नः शापहेतुना ॥ बालक्रीडावर्णनं
च गोकुले परमात्मनः ॥ ५१ ॥ दौत्यादिनिधनं चैव कीर्तितं हरिणा तथा ॥ गर्गस्यागमनं प्रोक्तं शुभान्नप्राशनं हरेः ॥५२॥ निधनं
पूतनायाश्च सद्यः शकटभंजनम् ॥ श्रीकृष्णबंधमोक्षं च यमलार्जुनभंजनम् ॥ ५३ ॥ त्रैलोक्यदर्शनं वक्त्रे गोवत्साहरणं तथा ॥ कृत्वा

गोवत्सनिर्माणं ब्रह्मणः स्तवनं हरेः ॥५४॥ सहसा गोकुलं त्यक्त्वा पुण्यं वृंदावनं वनम् ॥ भयाज्जगाम नंदश्च सार्धं च नंदनेन च ॥ ॥ ५५ ॥ वृंदावनस्य निर्माणं प्रोक्तं च परमाद्भुतम्॥सार्धं च बालकैः सार्धं तत्र संक्रीडनं हरेः ॥ ५६ ॥ सदन्नं ब्राह्मणीनां च भोजनं कथितं हरेः ॥ वरदानं च तासां च प्राक्तनेन निरूपणम् ॥ ५७ ॥ क्रतूनां वर्णनं चैव वस्त्रापहरणं तथा ॥ वरदानं च गोपीनां कृष्णे नैव कृतं द्विज ॥ ५८ ॥ कात्यायनीव्रतं प्रोक्तं श्रीदुर्गापूजनं तथा ॥ पार्वत्या च वरो दत्तो गोपीभ्यो यमुनातटे ॥५९॥ तालानां भक्षणं प्रोक्तं शक्रयागविमर्दनम् ॥ राधया सह कृष्णस्य विरहो मेलनं तथा ॥६०॥ गोपीक्रीडा च संप्रोक्ता कृष्णक्रोडे च राधिका छाया रापाणगेहे च संप्रोक्ता मायया हरेः ॥ ६१ ॥ शृंगारं षोडशविधं कृत्वा तं रासमंडले ॥ अंतर्धानं हरेरेव राधया सह कानने ॥ ॥ ६२ ॥ मलयागमनं चैव तया सार्धं द्विजोत्तम ॥ राधामाधवयोश्चैव संवादस्तत्र निर्जने ॥ ६३ ॥ कैवल्यमपि गोपीनां प्रोक्तं नानाविधं मुने ॥ पुनरागमनं चैव पुण्यं वृंदावनं वनम् ॥ ६४ ॥ श्रीकृष्णदर्शनं चैव गोपीनां हर्षवर्धनम् ॥ नानाप्रकारक्रीडा च प्रोक्ता तस्य जले स्थले ॥ ६५ ॥ गोपीनामपि सौभाग्यं राधायाश्च विशेषतः ॥ प्रोक्तं व्यासेन सौन्दर्यं रम्यंरम्यं नवंनवम् ॥६६॥ नभःस्थितानां देवानां दर्शनं प्रोक्तमेव च ॥ मनसः स्खलनं चैव देवीनां रासमंडले ॥ ६७ ॥ अंशेन लेभिरे जन्म देव्यश्चोक्तमिदं द्विज ॥ अक्रूरागमनं चैव गोपीनां च विलापनम् ॥६८॥ प्रोक्तं सर्वं क्रमेणैव चाक्रूरभर्त्सनं तथा॥ मथुरागमनं विष्णोः शोकं गोकुलवासिनाम् ॥ ६९ ॥ राधिकाविरहज्वालाजालं प्रोक्तं यथोचितम् ॥ स्वमूर्तिदर्शनं चैवमक्रूरं यमुनातटे ॥ ७० ॥ मथुरावेशनं प्रोक्तं निधनं रजकस्य च ॥ कुब्जया सह संभोगस्तस्या मोक्षणमेव च ॥७१ ॥ प्रसादनं कुविंदस्य मालाकारस्य मोक्षणम् ॥ धनुषो भंजनं शंभोर्हस्तिनो निधनं तथा ॥ ७२ ॥ सभाप्रवेशनं प्रोक्तं नानारूपप्रदर्शनम् ॥ कंसस्य निधनं प्रोक्तं तद्बंधूनां विलापनम् ॥ ७३ ॥ सत्कारं तस्य विधिवद्राजत्वं तत्पितुस्तथा ॥ विलापनं च नंदस्य स्तवनं परमाद्भुतम् ॥ ७४ ॥ प्रोक्तस्तयोश्च संवादो निर्जने तात पुत्रयोः ॥ परमाध्यात्मिकं ज्ञानं नंदाय च ददौ विभुः ॥ ७५ ॥ मुनीनां गमने चैव धन्योपाख्यानमेव च ॥ कथितं च कुमारेण प्रोक्तमेव सुदुर्लभम् ॥ ७६ ॥ उद्धवागमनं प्रोक्तं राधास्थानं च निर्जनम् ॥ ज्ञानं तयोश्च संवादे प्रोक्तमेव शुभावहम् ॥ ७७ ॥ यज्ञोपवीतं

कृष्णस्य विद्यादानं गुरोर्गृहे ॥ मृतपुत्रप्रदानं च प्रोक्तं तद्गुरवे पुरा ॥ ७८ ॥ जरासंधस्य दमनं निधनं यवनस्य च ॥ द्वारकायाश्च
निर्माणं विश्वकारोद्यमं तथा ॥ ७९ ॥ द्वारकावेशनं प्रोक्तमुग्रसेनविलापनम् ॥ रुक्मिणीहरणं चैव नृपाणां दमनं तथा ॥ ८० ॥
सर्वासां कामिनीनां च प्रोक्तमुद्वाहनं तथा ॥ मायावतीमोक्षणं च निधनं शंबरस्य च ॥ ८१ ॥ धर्मपुत्रराजसूये शिशुपालस्य मोक्षणम् ॥
दंतवक्रस्य च मुने शाल्वस्य निधनं तथा ॥ ८२ ॥ मणेश्च हरणं चैव पारिजातस्य स्वर्गतः ॥ कुरुपांडवयुद्धे च भुवश्च भारमोक्षणम्॥
॥ ८३ ॥ उषाया हरणं प्रोक्तं बाणस्य भुजकृंतनम् ॥ बलेश्च स्तवनं प्रोक्तमनिरुद्धस्य विक्रमः ॥८४॥ राधायशोदासंवादः प्रोक्तः परम
दुर्लभः ॥ मोक्षणं च शृगालस्य प्रोक्तं च परमाद्भुतम् ॥८५॥ तीर्थयात्राप्रसंगेन गणेशपूजनं तथा ॥ दर्शनं राधिकासार्धं कृष्णस्य परमा
त्मनः ॥ ८६ ॥ राधाया दर्शनं देव्या राधातेजःप्रकाशनम् ॥ राधया रमणं तीर्थे भ्रमणं रहसि स्मृतम् ॥ ८७ ॥ निधनं यदुवंशानां ब्रह्म
शापेन शौनक ॥ मोक्षणं पांडवानां च स्वपदे गमनं हरेः ॥ ८८ ॥ विवाहो नारदस्यैवोत्पत्तिर्वह्निसुवर्णयोः ॥ प्रोक्तं सर्वं महाभाग पुन
रेव समासतः ॥ ८९ ॥ चतुःखंडैः पुराणं च ब्रह्मवैवर्तमेव च ॥ अतः परं मुनिश्रेष्ठ किं भूयः श्रोतुमिच्छसि ॥ ९० ॥ इति श्रीब्रह्मवैवर्त्त
महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्धे नारायणनारदसंवादे चानुक्रमणिकं नाम द्वात्रिंशदधिकशततमोऽध्यायः ॥१३२॥ शौनक
उवाच ॥ अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥ यत्फलं ब्रह्मवैवर्तं निर्विघ्नं मोक्षकरणम् ॥ १ ॥ अभयं देहि हे वत्स हे
तात मह्यमेव च ॥ तदा निवेदनं किंचिदस्तीति च करोम्यहम् ॥ २ ॥ सूत उवाच ॥ त्यज भीतिं महाभाग प्रश्नं कुरु यदिच्छ
सि ॥ सर्वं ते कथयिष्यामि यद्यद्गोप्यं मनोहरम् ॥ ३ ॥ शौनक उवाच ॥ अधुना श्रोतुमिच्छामि पुराणानां च लक्षणम् ॥
संख्यानमपि तेषां च फलमस्यैव पुत्रक ॥ ४ ॥ सूत उवाच ॥ विस्तराणि पुराणानि चेतिहासश्च शौनक ॥ संहितां पंचरा
त्राणि कथयामि यथागतम् ॥ ५ ॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च ॥ वंशानुचरितं विप्र पुराणं पंचलक्षणम् ॥६॥ एतदुपपु
राणानां लक्षणं च विदुर्बुधाः ॥ महतां च पुराणानां लक्षणं कथायामि ते ॥ ७ ॥ सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषां च पालनम् ॥
कर्मणां वासना वार्ता मनूनां चाक्रमेण च ॥ ८ ॥ वर्णनं प्रलयानां च मोक्षस्य च निरूपणम् ॥ तत्कीर्तनं हरेरेव वेदानां च पृथक्

पृथक् ॥ ९ ॥ दशाधिकं लक्षणं च महतां परिकीर्तितम् ॥ संख्यानं च पुराणानां निबोध कथयामि ते ॥ १० ॥ परं ब्रह्मपुराणं च सहस्राणां दशैव तु ॥ पंचोनषष्टिसाहस्रं पाद्ममेव प्रकीर्तितम् ॥ ११ ॥ त्रयोविंशतिसाहस्रं वैष्णवं च विदुर्बुधाः ॥ चतुर्विंशतिसाहस्रं शैवं चैव निरूपितम् ॥ १२ ॥ ग्रंथोऽष्टादशसाहस्रं श्रीमद्भागवतं विदुः ॥ पंचविंशतिसाहस्रं नारदीयं प्रकीर्तितम् ॥ १३ ॥ मार्कंडं नवसाहस्रं पुराणं पंडिता विदुः ॥ चतुःशताधिकं पंचदशसाहस्रमेव च ॥१४॥ परमग्निपुराणं च रुचिरं परिकीर्तितम् ॥ चतुर्दशसहस्राणि परं पंचशताधिकम् ॥ १५ ॥ पुराणप्रवरं चैव भविष्यं परिकीर्तितम् ॥ अष्टादशसहस्रं च ब्रह्मवैवर्तमीप्सितम् ॥ १६ ॥ सर्वेषां च पुराणानां सारमेवं विदुर्बुधाः ॥ एकादशसहस्रं तु परं लिंगपुराणकम् ॥१७॥ चतुर्विंशतिसाहस्रं वाराहं परिकीर्तितम् ॥ एकाशीतिसहस्रं च परमेव शताधिकम् ॥ १८ ॥ वरं स्कंदपुराणं च सद्भिरेव निरूपितम् ॥ वामनं दशसाहस्रं कौर्मं सप्तदशैव तु ॥१९॥ मात्स्यं चतुर्दश प्रोक्तं पुराणं पंडितैस्तथा ॥ ऊनविंशतिसाहस्रं गारुडं परिकीर्तितम् ॥२०॥ परं द्वादशसाहस्रं ब्रह्मांडं परिकीर्तितम् ॥ एवं पुराणसंख्यानं चतुर्लक्षमुदाहृतम् ॥ २१ ॥ अष्टादशपुराणानामेवमेव विदुर्बुधाः ॥ एवं चोपपुराणानामष्टादश प्रकीर्तिता ॥ २२ ॥ इतिहासो भारतं च वाल्मीकं काव्यमेव च ॥ पंचकं पंचरात्राणां कृष्णमाहात्म्यपूर्वकम् ॥ २३ ॥ वासिष्ठं नारदीयं च कापिलं गौतमीयकम् ॥ परं सनत्कुमारीयं पंचरात्रं च पंचकम् ॥ २४ ॥ पंचकं संहितानां च कृष्णभक्तिसमन्वितम् ॥ ब्रह्मणश्च शिवस्यापि प्रह्लादस्य तथैव च ॥ २५ ॥ गौतमस्य कुमारस्य संहिताः परिकीर्तिताः ॥ इति ते कथितं सर्वं क्रमेण च पृथक्पृथक् ॥ २६ ॥ अस्त्येवं विपुलं शास्त्रं ममापि च यथागमम् ॥ उवाचेदं पुराणं च गोलोके रासमंडले ॥ २७ ॥ श्रीविष्णुर्भगवान्साक्षाद्ब्रह्माणं च स्वभक्तकम् ॥ ब्रह्मा धर्मं च धर्मिष्ठं धर्मो नारायणं मुनिम् ॥ २८ ॥ नारायणो नारदं च नारदो मां च भक्तकम् ॥ अहं त्वां च मुनिश्रेष्ठ वरिष्ठं कथयामि तव ॥ २९ ॥ सुदुर्लभं पुराणं च ब्रह्मवैवर्तमीप्सितम् ॥ यद्वृणोत्येव विश्वौघं जीविनां परमात्मकम् ॥ ३० ॥ तद्ब्रह्म साक्षिरूपं च कर्मणामेव कर्मिणाम् ॥ तद्ब्रह्म विवृतं यत्र तद्विभूतिमनुत्तमाम् ॥३१॥ तेनेदं ब्रह्मवैवर्तमित्येवं च विदुर्बुधाः ॥ पुण्यप्रदं पुराणं च मंगलं मंगलप्रदम् ॥ ३२ ॥ सुगोप्यं च रहस्यं च यत्र रम्यं नवं नवम् ॥ हरिभक्तिप्रदं चैव दुर्लभं हरिदास्यदम् ॥३३॥ सुखदं

ब्रह्मदं सारं शोकसंतापनाशनम् ॥ सरितां च यथा गंगा सद्यो मुक्तिप्रदा शुभा॥३४॥ तीर्थानां पुष्करं शुद्धं यथा काशी पुरीषु च ॥
सर्वेषु भारतं वर्षं सद्यो मुक्तिप्रदं शुभम् ॥ ३५ ॥ यथा सुमेरुः शैलेषु पारिजातं च पुष्पतः ॥ पत्रेषु तुलसीपत्रं व्रतेष्वेकादशीव्रतम्
॥३६॥ वृक्षेषु कल्पवृक्षश्च श्रीकृष्णश्च सुरेषु च ॥ ज्ञानींद्रेषु महादेवो योगींद्रेषु गणेश्वरः॥३७॥ सिद्धेन्द्रेष्वेव कपिलः सूर्यस्तेजस्विनां
यथा ॥ सनत्कुमारो भगवान्वैष्णवेषु यथाग्रणीः ॥ ३८ ॥ भूपेषु च यथा रामो लक्ष्मणश्च धनुष्मताम् ॥ देवीषु च यथा दुर्गा महा
पुण्यवती सती ॥ ३९ ॥ प्राणाधिका यथा राधा कृष्णस्य प्रेयसीषु च ॥ ईश्वरीषु यथा लक्ष्मीः पंडितेषु सरस्वती ॥ ४० ॥ तथा
सर्वपुराणेषु ब्रह्मवैवर्तमेव च ॥ नातो विशिष्टं सुखदं मधुरं च सुपुण्यदम् ॥ ४१ ॥ संदेहभंजनं चैव पुराणं परिकीर्तितम् ॥ इह लोके
च सुखदं सुप्रदं सर्वसंपदाम् ॥ ४२ ॥ शुभदं पुण्यदं चैव विघ्ननिघ्नकरं परम् ॥ हरिदास्यप्रदं चैव परलोके प्रहर्षदम् ॥ ४३ ॥
यज्ञानामपि तीर्थानां व्रतानां तपसां तथा ॥ भुवः प्रदक्षिणस्यापि फलं नास्य समानकम् ॥ ४४ ॥ चतुर्णामपि वेदानां पाठादपि
वरं फलम् ॥ शृणोतीदं पुराणं च संयतश्चेह पुत्रक ॥ ४५ ॥ गुणवंतं च विद्वांसं वैष्णवं पुत्रमालभेत् ॥ शृणोति दुर्भगा चेत्तु सौभा
ग्यं स्वामिनो लभेत् ॥ ४६ ॥ मृतवत्सा काकवंध्या महावंध्या च पापिनी ॥ पुराणश्रवणाल्लेभे पुत्रं च चिरजीविनम् ॥ ४७ ॥
अपुत्रो लभते पुत्रमभार्यो लभते प्रियाम् ॥ अस्पष्टकीर्तिः सुयशा मूर्खो भवति पंडितः ॥ ४८ ॥ रोगार्तो मुच्यते रोगाद्बद्धो मुच्ये
त बंधनात् ॥ भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥४९॥ अरण्ये प्रांतरे भीतो दावाग्नौ मुच्यते ध्रुवम् ॥ अघं कुष्ठं च दारिद्र्यं
रोगं शोकं च दारुणम् ॥ ५० ॥ पुराणश्रवणादेव नैव जानात्यपुण्यवान् ॥ श्लोकार्धं श्लोकपादं वा यः शृणोति सुसंयतः ॥ ५१ ॥
गोलक्षदानपुण्यं च लभते नात्र संशयः ॥ चतुःखंडं पुराणं च शुद्धकाले जितेंद्रियः ॥ ५२ ॥ संकल्पतो यः शृणोति भक्त्या दत्त्वा
च दक्षिणाम् ॥ यद्बाल्ये यच्च कौमारे वार्धके यच्च यौवने॥ ५३ ॥ कोटिजन्मार्जितात्पापान्मुच्यते नात्र संशयः ॥ रत्ननिर्माणयानेन
धृत्वा श्रीकृष्णरूपकम् ॥५४॥ नित्यं गत्वा च गोलोकं कृष्णदास्ये लभेद्ध्रुवम् ॥ असंख्यं ब्रह्मणां पाते न भवेत्तस्य पातनम् ॥५५॥
समीपे पार्षदो भूत्वा सेवां च कुरुते चिरम्॥श्रुत्वा च ब्रह्मखंडं च सुस्नातः संयतः शुचिः॥५६॥पायसं पिष्टकं चैव फलं तांबूलमेव च॥भोज

यित्वा वाचकं च तस्मै दद्यात्सुवर्णकम्॥५७॥चंदनं शुक्लमाल्यं च सूक्ष्मवस्त्रं मनोहरम्॥निवेद्य वासुदेवं च वाचकाय प्रदीयते॥५८॥श्रुत्वा च प्रकृतेः खंडं सुश्राव्यं च सुधोपमम्॥भोजयित्वा च दध्यन्नं तस्मै दद्याच्च कांचनम्॥५९॥सवत्सां सुरभिं रम्यां दद्याद्द्वै भक्तिपूर्वकम् श्रुत्वा गणपतेः खंडं विघ्ननाशाय संयतः ॥६०॥स्वर्णयज्ञोपवीतं च श्वेताश्वच्छत्रमाल्यकम्॥प्रदीयते वाचकाय स्वस्तिकं तिललड्डुकम् ॥ ६१ ॥ परिपक्वफलान्येव कालदेशोद्भवानि च ॥ श्रीकृष्णजन्मखंडं च श्रुत्वा भक्तश्च भक्तितः ॥ ६२ ॥ वाचकाय प्रदद्याच्च परं रत्नांगुलीयकम् ॥ सूक्ष्मवस्त्रं च माल्यं च स्वर्णकुंडलमुत्तमम् ॥ ६३ ॥ माल्यं च वरदोलां च सुपक्वं क्षीरमेव च ॥ सर्वस्वं दक्षिणां दद्यात्स्तवनं कुरुते ध्रुवम् ॥६४॥ शतकं ब्राह्मणानां च भोजयेत्परमादरात् ॥ ब्राह्मणं वैष्णवं शास्त्रनिष्णातं पंडितं वरम् ॥ ६५ ॥ कुरुते वाचकं शुद्धमन्यथा निष्फलं भवेत् ॥ श्रीकृष्णविमुखाद्दुष्टान्नोपदिष्टाच्च ब्राह्मणात् ॥ ६६ ॥ श्रीकृष्णभक्तियुक्तं च पुराणं न शृणोति यः ॥ भक्तिं पुण्यं न लभते हन्ति पुण्यं पुराकृतम् ॥६७॥ श्रीकृष्णभक्तियुक्ताच्च पुराणं यः शृणोति च ॥ भक्तिं पुण्यं च लभते यात्यंते श्रीहरेः पदम् ॥ ६८ ॥ एतत्ते कथितं सर्वं यच्छ्रुतं गुरुवक्त्रतः ॥ विदायं देहि विप्रेंद्र यामि नारायणाश्रमम् ॥६९॥ दृष्ट्वा विप्रसमूहं च नमस्कर्तुं समागतः ॥ कथितं ब्रह्मवैवर्तं भवतामाज्ञया परम् ॥ ७० ॥ नमोऽस्तु ब्राह्मणेभ्यश्च कृष्णाय परमात्मने ॥ शिवाय ब्रह्मणे नित्यं गणेशाय नमोनमः ॥ ७१ ॥ कायेन मनसा वाचा परं भक्त्या दिवानिशम् ॥ भज सत्यं परं ब्रह्म राधेशं त्रिगुणात्परम् ॥ ७२ ॥ नमो देव्यै सरस्वत्यै पुराणगुरवे नमः ॥ सर्वविघ्नविनाशिन्यै दुर्गादेव्यै नमोनमः ॥७३॥ युष्माकं पादपद्मानि दृष्ट्वा पुण्यानि शौनक ॥ अद्य सिद्धाश्रमं यामि यत्र देवो गणेश्वरः ॥ ७४ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्ड उत्तरार्द्धे नारायणनारदसंवादे सूतशौनकसंवादे त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥ .॥ छ ॥ छ ॥

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजेन क्षेमराजेन स्वकीये "श्रीवेङ्कटेश्वर" स्टीम्-
यन्त्रालयेऽङ्कित्वा प्रकाशितम् । संवत् १९८८, शकाब्दाः १८५३.

विक्रेयपुस्तकानि–पुराणग्रंन्थाः ।

नाम	की. रु. आ.
पद्मपुराण–संपूर्ण ५५००० ग्रंथ छः खंडोमें शुद्धतापूर्वक, यह ग्रंथ वैष्णवोंके अत्यन्त उपयोगी है	२५–०
श्रीमद्भागवत–श्रीधरीटीका और टीपणीसहित स्थूलाक्षर ।	१८–०
श्रीमद्भागवत-भावार्थदीपिकाप्रकाश वंशीधरी टीका यह टीका श्रीधरी टीकापर बहुतही उत्तम लगती है । ग्रंथ संख्या १२५००० सवालक्षहै. और भी कई टीकाओंका सार इसमें आगया है.	३०–०
श्रीमद्भागवत एकादशस्कन्धः श्रीधरीटीकया संदर्भविश्वनाथी–दीपिकादीपनादिपर्यायोपेतवंशीधरीयतद्भावार्थदीपिकाप्रकाशटीकया चोपेतः	३–०
श्रीमद्भागवत–सचूर्णिक मोटे अक्षर उत्तम कागज सप्ताह बाँचनेवालोंको परमोपयोगी है ग्लेज	१२–०
श्रीमद्भागवत–नवीन सुबोधिनीटीका समेत पढनेवालों व सप्ताह बाँचनेवालोंको परमोपयोगी है.	२०–०
श्रीमद्भागवत–मूल (गुटका) रेशमी जिल्द बँधी हुई नित्यपाठकरनेयोग्य ।	३–०
श्रीमद्भागवत–भाषाटीका माहात्म्य और शंकासमाधानसहित अत्युत्तम जिसमें ५००० दृष्टांत, कथाके सिवाय हैं नई छपी है ग्लेज कागज	२२–०
श्रीमद्भागवताद्यपद्यव्याख्याशतक– (जन्माद्यस्य श्लोकके सौ अर्थ)	१–१२
भागवतलीला कल्पद्रुम–श्रीमद्भागवतके सब चरित्र (जन्माद्यस्य इस श्लोकसे)	१–४
नारद पुराण–संपूर्ण २४००० मूल मात्र है....	८–०
शिवपुराण–बडा–२४००० मूलमात्र–इसमें विद्येश्वरसंहिता २०००,रुद्रसंहिता, १०५३० शतरुद्रसंहिता २१५०, कोटीरुद्रसंहिता २२४०, उमासंहिता १८४०, कैलाससंहिता १२४० और वायवीयसंहिता ४००० है. बहुत विद्वानोंकी संमतिसे शुद्धकर छापागया है.	१०–०
शिवपुराण–उपरोक्त सर्वालङ्कारोंसे भूषित और पं० ज्वालाप्रसाद मिश्रकृत भाषाटीकासमेत ...	२५–०
शिवमहापुराण–भाषावार्तिक जिल्द सहित	१२–०
ब्रह्मपुराण–सपूर्ण मूल संस्कृत	७–०
ब्रह्मांडपुराण–मूल संपूर्ण १२००० ग्रंथ	७–०

पुस्तक मिलनेका ठिकाना–

खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम्–प्रेस, बम्बई.

गंगाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर"–प्रेस, कल्याण–बम्बई.

॥ इति ब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंडं समाप्तम् ॥

विदुषामभ्यर्थना।

अत्रास्माकं मुद्रणालय ऋगादयो वेदा उपनिषदो वेदान्तग्रन्था महाभारतादीतिहासाः श्रीमद्भागवतादिमहापुराणोपपुराणानि धर्मशास्त्र-कर्मकाण्ड-व्याकरण-न्याय-योग-सांख्य-मीमांसादिशास्त्रीयग्रन्थाः काव्य-नाटक-चम्पू-प्रभृतयो ग्रन्थाः सहस्रनामाद्यनेकस्तोत्रग्रन्था विविधभाषाग्रन्थाश्च सीसकोत्तममहल्लघ्वक्षरैर्मनोहरं मुद्रिता योग्यमूल्येन क्रय्याः सन्ति, तांश्च ग्राहका यथापुस्तकसूचीपत्रं मूल्यप्रेषणेन प्राप्नुयुः।

अधिकमस्मदीयसूचीपत्रेण "श्रीवेङ्कटेश्वरसमाचार" पत्रप्रापणद्वारा च ज्ञेयमिति शम्।

क्षेमराज-श्रीकृष्णदासः "श्रीवेङ्कटेश्वर" स्टीम्-मुद्रणालयाध्यक्षः-मुंबईस्थः।
Khemraj Shrikrishnadass Proprietor of the "Shri Venkateshwar" Steam Press, Bombay.

मुद्रक और प्रकाशक-
खेमराज-श्रीकृष्णदास,
मालिक-"श्रीवेङ्कटेश्वर" स्टीम्-प्रेस, बंबई.

पुनर्मुद्रणादि सर्वाधिकार "श्रीवेङ्कटेश्वर" यन्त्रालयाध्यक्षाधीन है।

॥ ❋ ॥ इति श्रीब्रह्मवैवर्तं महापुराणं समाप्तम् ॥ ❋ ॥